कौण्डिन्न्यायनशिक्षा

(उपबन्धेनाऽनुबन्धैश्चोपबृंहिता महाशिक्षा)

प्रणेता

शिवराज आचार्यः कौण्डिन्न्यायनः

स्वाध्यायशाला

२०४९

कौण्डिन्न्यायनशिक्षा

(उपबन्धेनाऽनुबन्धैश्च चोपबृंहिता महाशिक्षा)

प्रणेता

शिवराज आचार्यः कौण्डिन्न्यायनः

शाङ्करवेदान्ताचार्यः (तिर.वि.वि.), साहित्याचार्यः (तिर.वि.वि.), एम्० ए० (संस्कृते, तिर.वि.वि.), एम्० ए० (फिलोसफिविषये, आगरा.), आयुर्वेदशास्त्री (नेपाल.), विशिष्टशास्त्री (तिर.वि.वि.), विद्द्यावारिधिः [पिएच्.डि.] (स.सं.वि.वि.), वाचस्पतिः [डि.लिट्.] (स.सं.वि.वि.)

प्रमुद्द्रणसंशोधकाः

आमोदवर्धनः कौण्डिन्न्यायनः, वेदाचार्यः
प्रियवँवदाम्बा कौण्डिन्न्यायनी, इतिहासपुराणाचार्या
प्रमोदवर्धनःकौण्डिन्न्यायनः, मीमांसाचार्यः
सुमोदवर्धनःकौण्डिन्न्यायनः, वेदान्तशास्त्रिकक्षाछात्रः

स्वाद्ध्यायशाला
२०४९

प्रकाशिका

[नारायणी]देवी आचार्यानी
स्वाद्ध्यायशालाकुटुम्बस्य कृते

[८५६+३२ पृष्ठात्मको ग्रन्थोऽयम् वेदाङ्गशिक्षाशास्त्रस्य रचनात्मकं समीक्षात्मकञ्च परिशीलनमिति शीर्षके वेदविभागाद्ध्यक्षाचार्य-युगलकिशोरमिश्रमहाभागस्य निर्देशकत्वे कार्यङ्कर्तुम् ५७।९४ इति सङ्ख्यायाम् यथानियमम् पञ्जीकरणङ्कृत्वा कार्यम् प्रारब्ध्य कारणवशान् मुद्रितग्रन्थत्वेन १९९१-५-३०(२०४८।२।१६) इत्यङ्कनीये दिने प्रस्तुतो वाचस्पतिः (डि. लिट्.) इत्युपाधये १९९२-(२०४९-)तमेऽब्दे वाराणसीस्थ-सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयेन स्वीकृतश्च]

प्रथमं संस्करणम्, २५० पुस्तकानि
२०४९

C
दर्ता नम्बर
98022

मूल्यम्-
भारतीयानि रूप्यकाणि ४००।-
नैपालीयानि रूप्यकाणि ६६०।-

6198
मा. 68 को

ग्रन्थप्राप्तिस्थानम्-
स्वाद्ध्यायशाला,
च.२/४१९, सरस्वतीमार्गः, लाजिम्पाट्,
काष्ठमण्डपनगरम्-२, नेपालदेशः
दूरस्वनः ४१०३२७

KAUNDINNYAYANASHIKKSA (Sanskrit Phonetics)
by Shivaraja Acharya Kaundinnyayana

ग्रन्थपरिचयः

इदानीन्तनेषु संस्कृतपाठिषु संस्कृत-भाषा-वर्णेषु दीर्घावर्णः, ऋकारः, लृकारः,ओकारः, ञकारः, वकारः, शकारः, षकारः,अभिनिहितवर्णः, यमवर्णः, अनुस्स्वारः, विसर्ग इत्यादीनावँ वर्णानामुच्चारणे श्रुतौ च अबोधो भ्रमश् च व्यापको वर्तते । संस्कृतपाठिषु अद्द्यत्वे शिक्षाशास्त्रस्य प्रचारोऽतीव न्यूनः । अस्माकवँ वैदिक-धर्मानुयायिनान् धर्मस्य निर्विकल्पाया अपि भाषायास् संस्कृताया वाण्यश् शुद्धमुच्चारणञ्च कर्तुं समर्थः पुरुषस् सम्पूर्णेऽपि भारतवर्षे सुदुर्लभ एवेदानीम् । संस्कृत-पाठिनो लब्धाचार्यादिपदवीका अपि जनास् संस्कृतस्य कतमदुच्चारणं शुद्धञ्च कतमच्चाऽशुद्धमिति विवेचने प्रायेणाऽसमर्था एवाऽद्द्यत्वे । मातृभाषारूपाया देश्याया अपभ्रंशभाषायाः प्रभावेण संस्कृतस्योच्चारणमतीवाऽशुद्धञ्च क्रियते । किन् त्वस्मिन् विषये संस्कृतपाठिनाम् प्रतिजागरस्याऽतीव न्यूनता दृश्यते । कतिपयानावँ वर्णानां शुद्धे संस्कृतरूपे तदीयेऽपभ्रष्टे रूपे च सत्यपि महत्यन्तरे अज्ज्ञोपज्ज्ञदुर्व्यवस्थानुसारिणि लेखे दृश्यया लिपिकृततुल्यतया व्यामोहिताः पण्डितम्मन्न्या अपि जनास् तत् तत्संस्कृतवर्णजानि अपभ्रष्टानि रूपाण्येव शुद्धानि संस्कृतरूपाणि मन्न्यन्ते ।

आचार्योवटस्य समये आचार्यशौनकस्यैव समये वाऽपि वेदस्याऽपि अत्यन्तमेवाऽपभ्रष्टेन रूपेणोच्चारका वेदपाठका अभूवन्नितिआचार्योवटलेखाद् ज्ञायते । उक्तं हि तेन "किमर्थमनुस्स्वारस्य दीर्घपूर्वस्य पदमद्ध्ये वर्तमानस्य बहुभिश् श्लोकैर् लक्षणञ्च क्रियते ? ननु पाठादेव सिद्धयँ यथाऽन्येषावँ वर्णानाम्; सत्यम्, किन् तु दुराम्म्नाननिवृत्त्यर्थमनयोश् शिक्षापटलयोर् बहूनावँ वर्णानालँ लक्षणञ्च क्रियते । ..... कथम् पुनर् दुराम्म्नानप्रसङ्गः? सन्ति हि अतीर्थोषिता अलसा अगुणदोषज्ज्ञा अन्न्योन्न्याध्यापकास् सर्ववर्णान्न्यथात्वजनयितारः; तद्दोषनिवृत्त्यर्थमाचार्येण शिष्ध्यहितार्थमिदमारब्धम्" (ऋग्वेदप्रातिशाख्यभाष्ये १३/२२ [३।१।२२]) इति । अद्द्यत्वे तु प्रायस् सर्वे वैदिका अन्न्ये च संस्कृतपाठकास् 'सर्ववर्णान्न्यथात्वजनयितारः' इति न चित्तरमेतत् ।

एतस्या विकृतसंस्कृतोच्चारणरीतेस् संशोधनाय प्राचीनायाश् शास्त्रीयायास् संस्कृतोच्चारणपद्धतेस् सम्म्यग् ज्ञानमावश्यकम् भवति । संस्कृतशिक्षाशास्त्रसम्बद्धेषु अनेकेषु मुद्द्रितेषु असंस्कृतेषु, संस्कृतेषु मुद्द्रितेष्वपि, दुर्लभेषु अद्द्याऽपि अमुद्द्रितेषु च ग्रन्थेषु स्थिता विषयास्

सर्वेषां संस्कृतपाठिनाङ्कृते एकतत्र सुलभास् सुबोधाश् च न भवन्ति । अत एवेदानीं संस्कृतपाठिषु संस्कृतस्य शुद्धोच्चारणस्य विषये भ्रमोऽबोधश् च बाहुल्येनोपलब्भ्यते । एतम् भ्रममबोधञ् च निराकृत्य प्राचीनामाश् शास्त्रीयायास् संस्कृतोच्चारणपद्धतेर् यथार्थं रूपं सुलभं सुबोधञ् च कृत्वा संस्कृतस्योच्चारणे शुद्धतामानेतुन् तां रक्षितुञ् च साहाय्यस्य प्रदानमेवाऽस्य ग्रन्थस्य प्रणयनेऽस्माकलँ लक्ष्यम् ।

अस्मिन् ग्रन्थे पाणिनि-कात्यायन-पतञ्जलि-काशिकाकार-पाणिनीय-वैयाकरणसिद्धान्तकौमुदीकार- शब्देन्दुशेखरकार - मधुसूदनविद्द्यावाचस्पति-सुनीतिकुमारचटर्जि-सिद्धेश्वरवर्म- सूर्यकान्तशास्त्रि- काशिनाथवासुदेवाऽब्भ्यङ्करविधातृमिश्रडब्लु.डि.ह्विट्नि-सि.सि.उह्लेन्बेक-फ्र्याङ्क्लिनएड्गर्टन-डब्ल्यु.एस्.एल्लेनप्रभृतीनाङ् ग्रन्थकाराणां संस्कृतशिक्षाशास्त्रसम्बद्ध-विषयेषु अस्स्पष्टानि भ्रमपूर्णानि अबोधोपहतानि च प्रतिपादनानि व्याख्यानानि च आधारभूतग्रन्थप्रमाणैर् युक्तिभिश् च स्स्पष्टीकृतानि निराकृतानि संशोधितानि च सन्ति ।

तैत्तिरीयारण्यके "शीक्षावँ व्याख्यास्स्यामः । वर्णस् स्वरः । मात्रा बलम् । साम सन्तानः । इत्युक्तश् शीक्षाद्ध्यायः" (७।२) इति प्रतिपादितायाश् शिक्षायास् सम्पूर्णेऽपि संस्कृतवाङ्मयेऽनुपलब्भ्यमाने खल्वादर्शभूते एकस्मिन्नपि परिपूर्णे ग्रन्थे तस्याऽभावस्य निरासाय वेदाङ्गशिक्षाशास्त्रस्य सर्वान् विषयान् इदम्प्रथमतया साङ्गोपाङ्गवँ विस्तरेण क्रमबद्धतया च निरूप्याऽयङ् ग्रन्थः प्रणीतोऽस्ति ।

अत्र मुख्यानां शिक्षाविषयाणाम् प्रायेण प्राचीनाभिःकुत्रचित् त्वभिनवाभिः कारिकाभिः, आवश्यकानावँ विमर्शानां स्पष्टीकरणानाञ् च व्याख्यानरूपेण प्रमाणवाक्यसङ्ग्रहरूपेण च गद्द्येन निबन्धनङ् कृतमस्ति । उपबन्धे शिक्षाशास्त्रेतिहासश् शिक्षाग्रन्थानाम् परिचयश् च दत्तोऽस्ति । अनुबन्धेषु शौनकशिक्षा- शैशिरीयशिक्षा- व्याडिशिक्षा- (विकृतिवल्ली) - चारायणीयशिक्षा- कौहलीयशिक्षा- सर्वसम्मतशिक्षा-पारिशिक्षाणां सङ्ग्रहोऽप्यस्ति ।

संस्कृतभाषाया उच्चारणं शास्त्रानुसारमेव कर्तव्यम्, संस्कृतभाषायाश् शास्त्रानुसारिणि उच्चारणे यावन्तो ये च वर्णा येन क्रमेणाऽऽगच्छन्ति तावन्तस् ते च वर्णास् तेनैव क्रमेण लेख्या इति च सर्वमान्यस् सिद्धान्तः।एतमेव सिद्धान्तमङ्गीकृत्य पाणिनीयव्याकरणसम्मतां शब्दविशेष-

वर्णानुपूर्वीञ् चानुसृत्य सयँयुक्तव्यञ्जनानाम् प्रातिशाक्ख्यप्रोक्ताम् पूर्वाङ्गपराङ्गभावव्यवस्थाञ् चाऽनुशील्य तदनुकूलया कयाऽपि नवीनया प्रणाल्याऽस्मिन् ग्रन्थे लिपिप्रयोगः कृतोऽस्ति ।

ग्रन्थपरिचय

यो ग्रन्थ वेद्का स्वरुप्, प्रयोग्, अर्थ र रअस्स्य खुलाउनि छओडा अङ्ग मद्दे पैलो अङ्ग सिच्छ्याको ग्रन्थ हो । तैत्तिरिय-आरन्न्यक्-अन्सार् सिच्छ्याका बिमय बर्ण, स्वर्, मात्त्रा, बल् (थान्-करण्-प्रयत्न), साम् (उच्चारणगुणदोस्),सन्तान्(सन्दि) हुन् । इ सबै बिसयको क्रमबद्द साङ्गोपाङ्ग प्रतिपादन् गर्नि ग्रन्थको सँस्क्रित्बाङ्मयमाँ एतिञ्जेल् अभाब् भैराखेकाले तेस् अभाब्लाइ् हटाउन र सँस्क्रित्को प्रचलित् असुद्द उच्चारण्लाइ् सुद्द पार्न यो ग्रन्थ रचिएको हो । एस् ग्रन्थमाँ पाँणिनि-कात्त्यायन्-पतञ्जलि-कासिकाकार्-सिद्दान्तकौमदिकार्हरुका र आदुनिक् भारतिय र पाश्चात्त्य भासाबिग्याँनिहरुका पनि सँस्क्रित्सिच्छ्यासास्त्रसम्बन्दि प्रतिपादन्माँ भएका अस्पष्टता-भ्रम्-र-अग्ग्याँन्हरुलाइ् हटाएर बिसयहरु प्रामाणिक् रुप्माँ प्रतिपादित् गरिएका छन् । दुर्लब् धेरै सँस्क्रित् ग्रन्थहरुबड प्रमाण्हरु प्रस्तुत् गरि बिसयहरु प्रष्ट पारिएका छन् । यो ८५६+३२ पिरष्टको ग्रन्थ मुद्द्रित् ग्रन्थका रुप्माँ बाराणसिस्थ सम्पुर्णानन्दसँस्क्रित्- बिस्स्व-बिद्द्यालयले बाचस्पति (डि.लिट्.)उपादिका लागि १९९२ क्रैस्ताब्दमा स्विक्रित् गरेको हो ।

Introduction

Now-a-days, there appear few people who can pronounce Sanskrit correctly according to the Sikksasastra.People holding the degree of Acharya or M.A. in Sanskrit also are found quite unable to distinguish between the correct and faulty pronunciation of Sanskrit. In the influence of their mother tongue people make the Sanskrit language like the Apabbhransa in pronouncing. Owing to the similarity of so-called *tatsama* words of modern Indian languages with the related Sanskrit words in writing prescribed by the people powerful but ill-informed in the linguistic thoughts of ancient Indian grammarians, people think that the pronunciation of the words in Sanskrit and in the modern Indian languages

is the same. In this way many people think that the spoken forms of the sanskrit *tatsama* words of the modern Indian languages themselves are the correct spoken forms of Sanskrit also. This is the condition of the Sanskrit pronunciation today in the Indian sub–continent.

To correct the fualty pronunciation of Sanskrit it is necessary to know the correct ancient way of pronouncing Sanskrit according to the ancient works of Sanskrit phonetics. But the works are rare. Some of them are not well–edited or printed. There are some obscurities and ambiguities in their containts also. There look some contradictions also in the works. So, for most of the Sanskritists to understand the ancient Sanskrit pronunciation is not a very easy task. In this context present work trys to discribe the correct ancient Sanskrit pronunciation clearly and fully as far as possible.

Though many Indian and western scholars have worked in this field, yet there are many topics of Sanskrit phonetics which are mis-Interpreted or unclearly interpreted by them. So, in the present work, mis-interpretations by other scholars like W.D. Whitney, C.C. Uhlenbek, Franklin Edgerton, W.S. Allen, Siddhesvar Varma, Sunitikumar Chatterji, Surya kanta Sastri, K. V. Abbhyanker, Vidhata Mishra etc. are refuted and corrected on the ground of the basic works of Sanskrit phonetics.

Present work discusses every topic in fairly concider–able detail and in light of the extant major works of Sanskrit phonetics. Quotations from the primary works of Sanskrit phonetics are given profusely.

Another important feature of the work is that it fills the void of a work fully and systematically dealing on all the topics of Sanskrit phonetics enumerated in the Taittiriyarannyaka.

So, the Sanskritists all over the world may take interest in this work.

Though all the pages of the work have originality in one or other aspect, some prominent points of originality may be noted as follow–

1. New interpretation of चत्वारि वाक् परिमिता etc. on the ground of the Satapathabrahmmana.

2. Vyakarana presupposes the padapatha and the padapatha presupposes the Sikksa.

3. Handbooks of phonetics attached to the special branches of the Vedas are earlier than the genral Sikksas.

4. First hand description of several Sanskrit phonetic works like Atreyasikksa, Saunakasikksa, Saisiriyasikksa etc.

5. Definition of the Sanskrit Sikksasastra (phonetics).

6. Different enumeration of the Sanskrit varnas, according to which the numbers of the varnas are 49, or 53, or 57 or 58 or 59, or 60, or 61, or 63, or 64, or 65, or 66, or 67, or 68, or 73, or 108.

7. Special description of dubious letters like anusvara' visarga, n· s' s. and ङ and the Yamas(so-called twin letters).

8. The classifications of Sankrit varnas and the etymologies of svara, vyanjana, ayogavaha, antastha etc.

9. Specifying the natures of long r, ।. e, o, ai and au.

10. Explanation of the definition of udatta, anudatta and svarita of Panini; its reconciliation with the Pratisakkhyas, refutation of the explanations given to the Paninian sutras by Kasikakara, Kayyata and Siddhantakaumudikara etc.

11. Vedic examples of the euphonic changes and critical evaluation of the Paninian rules of euphonic changes.

12. Ascertainment of reduplication of consonants etc.

The writing of Sanskrit portion of the Introduction indicates the mode of writing of the work, which the author has adopted for his work of phonetics. The writing phonetically presents the author's spoken Sanskrit which is also correct according to Paninian grammar. The writing of quotations from the works of Maddhyandiniyasakha in the work is correct according to its Pratisakkhya also. But the writing of quo-

tations from the work of other shakhas of the Vedas may not be correct according to their traditional pronunciation, because the works are not in print available in correct form of their traditional pronunciation. They are mostly written as pronounced by present author.

The main feature of the mode of writing is this: when the consonant coming bitween vowels makes syllable with the antecedent vowel it is written likeक् as in शिक्षा. When such a consonant makes syllable with follwing vowel it is written like क as in the same word. ङ् छ् ट् ठ् ड् ढ् द् र् (ह्) are exceptions, because they have no two forms likeक्क etc. in present writing. But when य follows ङ् etc. making syllable with य the य is written like ग्य. All this is done to draw attaintion of Sanskritists to the special nature of the rules of syllabification of Sanskrit so poorly delt with so far by other modern Sanskrit phoneticians.

To promote easyness in Devanagari script क्त क्र क्ष ङ्क ज्ञ त्त त्र द्घ द्ध द्म द्य द्व र्य र्व ह्म ह्म ह्य ह्य ह्र ह्व ह्व रु रू etc. are preferred than क्त क्र क्ष ङ्क ज्ञ त्त त्र द्ध द्ध द्म द्य द्व र्क र्य र्व ह्म ह्म ह्य ह्व ह्व रु रू etc. Yet, owing to the virtues of Devanagari, by this kind of experiment, the work does not loose its readability. As the work is intended mainly for the Vedists and the scholars of linguistics of the world, not for a layman, the author hopes, these new types of combinations of some letters will not discomfort the readers much.

The combinations of consonants like क्त etc. were not ambiguous in Brahmi script also. To illustrate it the author has presented a brief chart of the consonant combinations of Brahmi, Gupta and Devanagari. It justifies the prefference to क्त क्र क्ष etc. The author has also added some illustrations of some new types of letters necessary to improve Devanagari script so that it may represent the living spoken form of Sanskrit better, and better display it's nature of alphabetic writing.

This work was submitted, as a printed thesis for the degree of D. Litt., and was accepted by the Sampurnananda Sanskrit University, Varanasi, in 1992.

श्रीः

प्रस्ताविका

"षडङ्ग- शास्त्र-तेजोभिर् विशेषेणोज्ज्वलीकृते ।
वेदार्थजज्ञानरत्ने मे तृष्णाऽतीव विजृम्भते ।।"

(क) एतस्मिन् ग्रन्थे कृतस्य लिपिप्रयोगस्य सुस्पष्टीकरणम्

(१) यत्तर यो व्यञ्जनवर्णस् स्वपूर्ववर्तिस्वरस्याऽङ्गम् भवति तत्तर स व्यञ्जनवर्णः क् ख् ग् घ् च् ज् झ् ञ् ण् त् थ् ध् न् प् फ् ब् भ् म् य् र् ल् व् श् ष् स् इत्येवम्प्रकारेण लिक्ख्यते मुद्द्र्यते च, यथा 'प्रस्ताविका' इत्यत्तर सकारः ।

(२) यत्तर यो व्यञ्जनपरको व्यञ्जनवर्णस् स्वपरवर्तिस्वरस्याऽङ्गम् भवति तत्तर स व्यञ्जनवर्णः क ख ग घ च ज झ ञ ण त थ ध न प फ ब भ म य र ल व श ष स इत्येवम्प्रकारेण लिक्ख्यते मुद्द्र्यते च, यथा 'प्रस्ताविका' इत्यत्तर पकारः ।

(३) ङ (छ्) ट् (ठ्) ड् (ढ्) द् र् (ह्) इत्येते व्यञ्जनवर्णा उपर्युक्तयोर् नियमयोरपवादरूपास् सन्ति, एतेषाँ वर्णानान् द्विविधयो रूपयोर् लेक्ख्यवर्णमालायां सीसकवर्णमालायान् चाऽप्प्रसिद्धत्वात् । हकारस्य इदानीम् ह् इति ह इति च द्द्विविधे रूपे प्राप्प्येते, तथापि ह् इति रूपस्य मुद्द्रणे विसंस्थुलताया उद्भवाद् ह्म् ह्य् ह्व् इत्यादिषु हकारस्य स्वपूर्ववर्तिस्वराङ्गत्वेऽपि ह इति रूपमेव प्प्रायेण प्प्रयुज्यते । अन्न्यत्तर यथायथम् ह् इति रूपेण ह इति रूपेण च प्प्रयोगः क्रियते ।

(४) ङ छ् ट् ठ् ड् ढ् द् र् इत्येतेषाँ व्यञ्जनानायँ यकारपरकत्वे स्वपरवर्तिस्वराङ्गत्वे च सति एतैर् वर्णैस् सयँ युक्तो यकारः च इत्येवलँ लिक्ख्यते मुद्द्र्यते च, यथा 'मुद्द्र्यते' इत्यादिषु ।

इदं सर्ववँ विदुषां संस्कृतभाषाया अक्क्षरविभजननियमे चित्तमाकर्षटुम्, संस्कृतस्य शिक्क्षाशास्त्रव्याकरणशास्त्रसम्मतोच्चारणानुसारमेव लेखने औचित्त्यस्य बाधकस्याऽभावस्य च प्प्रदर्शनञ्च कर्तुम्,

वेदादीनामपि स्वस्स्वसम्प्रदायाऽननुरूपतया लेखनस्य प्रथाया निराकरणे च बलन् दातुमपि कृतवँ वेदितव्यम् ।

(५) जिह्वामूलीयोपध्मानीययोः कृते 'x' एतादृशी लिपिराङ्गलाष्टाङ्कसीसकवर्णकप्रान्तकर्तनेन निर्मायाऽत्तर ग्रन्थे प्रयुज्यते ।

(६) देवनागर्य्यास् सरलताया वर्धने दिशx प्रदर्शनाय, देवनागर्य्या मुख्यरूपेण वर्णात्मकलिपितायाः (नत्त्वक्क्षरात्मकलिपितायाः) स्पष्टीकरणाय च क्त क्ष ङ्क ज्ञ त्त त्र द्ध ध्म द्य द्व र्क न्य न्व ह्न ह्म ह्य ह्ल ह्व रु रू इत्यादीनालँ लिपीनां स्थाने क्त क्र क्ष ङ्क ज्ञ त्त त्र द्ध द्म द्य द्व र्क र्य र्व ह्न ह्न ह्म ह्म ह्य ह्य ह्र ह्र ह्व ह्व रु रू इत्येवमादयो लिपिविशेषा अत्तर प्रयुक्ताः । देवनागर्य्या गुणविशेषाद् एतस्मिन् ग्रन्थे एव इदम्प्रथमतयैव च कृतेनाऽपि एतादृशेन प्रयोगेण एतस्य ग्रन्थस्य सुपाठ्यत्वे काऽपि विशिष्टा बाधा च नोपस्थापिता भवेदित्याशास्यते, यतोऽयङ ग्रन्थस् संस्कृतशिक्षाशास्त्रव्याकरणशास्त्रादिषु अभियुक्तानावँ विदुषाङ कृतेऽस्ति । एतादृशx-प्रयोगो भारतवर्षीयलेखनपरम्पराया अपि नास्ति प्रतिकूल इति अधx-प्रदर्शितलिपिविकाससारणिकयाऽपि सुस्फुटम् भवति—

ब्राह्मी															
गौप्ती															
नागरी	क	ज	ञ	त	य	र	व	ष	क्त	क्य	क्र	क्व	क्ष	ज्ञ	त्र

(ख) प्रचलितदेवनागर्य्याx परिष्कारस्याऽऽवश्यकता

लेखने मुद्द्रणे च प्रयुज्यमाना प्रचलिता देवनागरी लिपिमाला संस्कृतभाषाया माद्ध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदशाखायाश् च ग्रन्थानां सुस्स्पष्टतया लेखनाय मुद्द्रणाय च पर्याप्ता नाऽस्ति । तदर्थन् देवनागर्य्याम् अधxप्रदर्शिता लिपिविशेषा अधxप्रदर्शितप्रकारेण परिष्कृत्योपस्थापयितुवँ वर्धयितुवँ वाऽप्यावश्यकास्सन्ति—

वर्तमानरूपे	ऋ	ॠ		ऌ	ॡ	...	अं	.	श	ष	०व	००	....	....	...	....
परिष्कृतरूपे	ऋ	ॠ	ऋ	ऌ	ॡ	ऌ	अं	अः	श	ष	ब	०	ऋ	ॠ	ऌ	ॡ

ऋलृक्[1] पुषादिद्युताद्यॢदित∗ परस्मैपदेषु[2] इत्यादिषु प्रयोगेषु लृकार एको वर्णः; स्यतासी लृलुटोः[3] अभिज्ञावचने लृट्[4] लृट् शेषे च[5] इत्यादिषु लृ इति द्वौ वर्णौ (ल्+ऋ)। अत उभयत्र समानाकारेण लेखनं समानरूपेणोच्चारणञ् चाऽतीवाऽनुचितम्। एतस्मिन् विषये च पाणिनीयसूत्रपाठादिशब्दकोषकार[6]— महाभाष्यशब्दकोषकारा[7] अपि व्व्यामूढा दृश्यन्ते। तस्माद् 'ऋ लृक्' इत्यादिषु लृ इति लेखनस्य 'स्यताती ल्ऋलुटोः' इत्यादिषु 'ल्ऋ' इति लेखनस्य व्यवस्था कार्या। यथाशास्त्रमुच्चारणस्य रीतिरपि प्रचारणीया। ऋकारस्य अन्तरतोरेफवत्त्वस्य सूचनाय अन्तरतोरेफद्वयवत्त्वस्य सूचनाय च प्रदर्शितप्रकारेण लिपिपरिष्कारश् च कार्यः। तथैव लृकारलिपिपरिष्कारोऽप्यावश्यकः। एतस्मिन् विषयेऽपि बहवो व्यामूढा दृश्यन्ते[8]। तस्य व्व्यामोहस्य निवारणाय ऋकारादिस्वरूपनिरूणाय प्रस्तुते ग्रन्थे कृता विवेचना सम्यगाकलनीया। अनुस्वारस्य स्वरपरवर्तिपृथग्वर्णत्वस्य स्पष्टतया सूचनाय स्वराननन्तरम् पृथग् लेखनाय मुद्रणाय च प्रदर्शितप्रकारेण लिपे∗ परिष्कार∗ कर्तव्यः। जिह्वामूलीयोपद्ध्मानीययो∗ कृते प्रदर्शितप्रकारेण समीचीना लिपि∗ कल्पनीया। माध्यन्दिनीयशाखाग्रन्थमुद्रणाय च पाराशरशिक्षाया "वकारस्य यकारस्य मध्ये बिन्दु∗ प्रतिष्ठितः"[9] इति वचनस्य अनुकूला∗ प्र-

---

१. अष्टाध्याय्यारम्भे द्वितीयम् प्रत्याहारसूत्रम्। २. अष्टा. ३।१।५५। ३. तत्रैव ३।१।३३। ४. तत्रैव ३।२।११२। ५. तत्रैव ३।३।१३। ६. 'पाणिनीयसूत्रपाठस्य तत्परिशिष्टग्रन्थानाञ् च शब्दकोशाः (महामहोपाध्यायवेदान्तवागीशपाठकोपाह्वशरीधरशास्त्रिणा तथा च विद्द्यानिधि-चित्तरावोपाह्वसिद्धेश्वरशास्त्रिणा सङ्गृहीता∗ पुण्यपत्तनस्थभाण्डारकर—प्राच्यविद्द्यासंशोधनमन्दिराधिकृतैः ··· प्राकाश्यन् नीताः [१९३५ तमे खरैस्ताब्दे]) इति ग्रन्थे ५२ तमम् २३४ तमञ् च पृष्ठन् दृश्यम्। ७. ताब्भ्यामेव सङ्गृहीते तैरेव १९२७ तमे खरैस्ताब्दे प्राकाश्यन् नीते महाभाष्यशब्दकोशे २९७ तमम् पृष्ठन् दृश्यम्। ८. 'श्रीवल्लभरामशालिग्रामसाङ्गवेदविद्द्यालय एवम् औषधालयका ६३ वाँ वार्षिक विवरण' इति पुस्तिकायाम् (२०४० तमवैक्रमाब्दसम्बद्धायाम्) द्वाविंशन् त्रयोविंशञ् च पृष्ठन् दृश्यम्। ९. श्लो. ११०।

दर्शितप्रकारा लिपयः कल्प्याः। ऋकारलृकारस्स्वरभक्तीनाञ्च कृतेऽपि प्रदर्शितप्रकारेण लिपयः कल्पयितुं शक्याः। माद्ध्यन्दिनीय-ऋकारलृकारविषये तु नियमस्य निरपवादतया लिपिविशेषा अनावश्यकाः। रङ्गयोः कृते, सामगानामनुनासिकविसर्गस्य च कृतेऽपि लिपयो यथा-यथञ्च कल्पनीयाः। एतस्मिन् विषये भारतवर्षीयगौरवरक्षाभिनिवेश-वद्भी राष्ट्रनेतृभिर् वैदिकैर् भाषाशास्त्रिभिश् शिक्षकैर् वैयाकरणैर् लिपिविशेषज्ञैर् मुद्रणप्रविधिविशेषज्ञैस् सीसकवर्णकनिर्मातृभिष् टङ्कनयन्त्रादिनिर्मातृभिश् चाऽवश्यमवधानन् देयम्।

देवनागर्या वर्णात्मकलिपितायाः, स्वरमद्ध्यवर्तिव्यञ्जनविशे-षाणाम् पूर्वस्स्वराङ्गतायाः परस्स्वराङ्गतायाश् च स्स्फुटतराङ्कर्तुञ् च कोऽपि लिपिपरिष्कारविशेष आवश्यकोऽस्तीति ङकारादीनावँ वर्णा-नावँ व्यञ्जनान्तरसयँयोगे पूर्वस्स्वराङ्गतायाः परस्स्वराङ्गतायास् च सूचनाय ङकारादिलिपीनाम् आवश्यकस्य द्वैविद्ध्यस्याभावेन पूर्व-वर्णितेन सूचितमेव। तस्या आवश्यकतायाः पूर्त्यै कर्तव्यस्य लिपिपरिष्कारविशेषस्य प्रदर्शनमधोलिखितया सारणिकया क्रियते—

वर्त.	ङङ्.	ढढ्...	टट्..	ठठ्...	डड्..	ढढ्..	ढढ्...	रर्...	हह्...
परि.	ङङ्ङ	ढढ्ढ	टट्ट	ठठ्ठ	डड्ड	ढढ्ढ	ढढ्ढ	रर्र	हह्ह

वर्त.	पृथङ्ङ्मम	उच्चढ्रयतात्	अविष्टढ्य	शीघ्रढ्याय
परि.	पृथङ्ङ्मम	उच्चढ्रयतात्	अविष्टढ्य	शीघ्रढ्याय

(ग) एतद्ग्रन्थरचनाशैलीविशेषता

एतस्मिन् ग्रन्थे प्रतिपादितेषु विषयेषु प्रामाणिकताया ज्ञानं श्रद्धा च भवतु विचारकाणामिति अत्तर प्रायेण प्राचीनानामाचार्याणा-मुक्तय एव सङ्गृहीता व्याख्याताश् च। तासामेव विमर्शनेन समन्वितो-ऽर्थश् च प्रकाशितः। अत्तर यावन्तो विषयास् सङ्गृहीतास् तावन्तो विषया न कुत्तराप्येकस्मिन् ग्रन्थेऽन्न्यत्तर समुपलब्ध्यन्त इत्त्ययं सङ्ग्रहो जिज्ञासुब्भ्यश् शोभन उपहारो भवेदिति मन्न्यामहे। प्रतिपाद्द्येषु विषयेषु यत्तरयत्तर पद्द्यरूपाणि प्राचावँ वचनानि नोपलब्धानि तत्तरतत्तर

यथाकथञ्चिद् रचितास् स्वोपज्ञाऽ कारिका एवाऽस्माभिर् निवेशिताः।एवञ्च मुक्ख्याना शिक्क्षाविषयाणाम् प्रायऽ प्राचीनाभिऽ कारिकाभिः, कुत्तर चित् तु अभिनवाभिश् च कारिकाभिः, आवश्श्यकानावँ् विमर्शाना स्पष्टीकरणानाञ् च व्याक्ख्यानरूपेण प्रमाणवाक्क्यसङ्गरहरूपेण च व्याक्ख्याभागेन निबन्धनङ्ग कृतमस्ति। पूर्वाचार्याणाम् पद्द्चेष्ष्वपि स्पष्टत्त्वार्थम् अभीष्टार्थप्प्रकाशनार्थञ् च कुत्तर चित् किञ्चित् परिवर्तनमपि कृतम्। तच् च टिप्पणीषु प्रायेण मूलपाठमपि दत्त्वा सूचितमस्ति।

(घ) एतस्स्य ग्रन्थस्स्य प्रयोजनवँ् वैशिष्ट्यञ् च

पुरा खलु वेदस्स्याऽद्ध्येतारस् सर्वे शिक्क्षाशास्त्रस्स्याऽद्ध्ययनङ्ग कुर्वते स्स्म। वर्णाना स्थानकरणनादानुप्प्रदानादीञ् ज्ञात्त्वैव ते वेदान् पठन्ति स्स्म। उक्त हि पतञ्जलिमुनिना— "पुराकल्प एतदासीत्— संस्कारोत्तरकालम् ब्राह्म्मणा व्याकरण स्माऽधीयते, तेब्भ्यस् स्थानकरणनादानुप्प्रदानज्ज्ञेब्भ्यो वैदिकाश् शब्दा उपदिश्श्यन्ते"[1] इति। अत्तर व्याकरणशब्दो यौगिको व्याक्रियात्मकशिक्क्षाशास्त्रादिशास्त्रपरस् स्थानकरणनादानुप्प्रदानज्ज्ञेब्भ्य इति वाक्क्यशेषात्। तैत्तिरीयप्रातिशाक्ख्यकारस्स्य "गुरुत्त्वलँ् लघुता साम्म्य ह्रस्स्वदीर्घप्प्लुतानि च। लोपागमविकाराश् च प्प्रकृतिर् विक्क्रमऽ क्रमः। स्वरितोदात्तनीचत्त्व श्वासो नादोऽङ्गमेव च। एतत् सर्व्वन् तु विज्ज्ञेयञ् छन्दोभाषामधीयता"[2] इत्त्युक्तेश् च प्राचीने काले वेदभाषाया अद्ध्येतृभिश् शिक्क्षाशास्त्रमवश्श्यमेवाऽद्ध्येतव्व्यमिति मन्न्यते स्मेति गम्म्यते।

भ्रश्श्यति तु युगे गार्हस्स्थ्यादिलौकिकसुखाद्द्चुपभोगायैव स्स्पृहयालवस् त्वरिता जनाश् शिक्क्षादिवेदषडङ्गाद्ध्ययनाय ग्लायन्तऽ केवलवँ् वेदमन्त्रस हितायँ् यज्ज्ञविद्द्चाञ् चाऽधीत्त्य गृहस्स्थाश्श्रमम् प्रवेष्टुम् प्रारप्सत किल। इदमपि पाणिनीयव्याकरणभाष्ष्यकारस्स्य "अद्द्चत्त्वे न तथा, वेदमधीत्त्य त्त्वरिता वक्तारो भवन्ति— वेदान् नो वैदिकाश् शब्दास् सिद्धा लोकाच् च लौकिका अनर्थकवँ् व्याकरणमिति"[3] इति वचनाद् ज्ञायते। श्रुतर्षिऽ पारस्करश् च "वेद समाप्प्य

---

१. पा. व्या. भा., पस्पशाह्न्निके। २. तै. प्रा. २४।५।
३. पा. व्या. भा., पस्पशाह्न्निके।

स्नूनायात्"[1] "विधिर्व् विधेयस्त् तर्क्कश्च् च वेदः"[2] "षडङ्गमेके"[3] "न कल्प्पमात्त्रे"[4] "कामन् तु याज्जँ्ञिकस्य"[5] इति सूत्त्रयन् शिक्क्षा-व्याकरणादीनि अन्न्यानि अङ्गानि अनधीत्त्य केवलवँ् वेदयँ् यज्ज्ञविद्-द्याञ् चाऽधीत्त्यापि समावर्त्तनमनुमन्न्यते। एवमर्वाचीने काले प्रायेण वैदिकाश् शिक्क्षिता अपि शिक्क्षाशास्त्राद्ध्ययने उदासीना अभूवन् किल। एवं साधारणानां शिक्क्षितानां शिक्क्षाशास्त्राऽद्ध्ययने औदासीन्न्ये अनुमतेऽपि आचार्यककामस्स्य तु शिक्क्षाशास्त्रे विशेषज्ज्ञताऽपेक्क्षितैव भवति स्स्मेति "पदक्क्रमविशेषज्ज्ञो वर्णक्क्रमविचक्क्षणः। स्वरमात्त्रा-विभागज्ज्ञो गच्छेदाचार्यसम्पदम्"[6] इति तैत्तिरीयप्रातिशाक्ख्यकार-वचनाद् अवगम्यते। अन्न्येषावँ् वेदपाठिनामुच्चारणेऽशुद्धत्त्वे आगते तत् तत्त्रैव व्यक्तिविशेषे तिष्ठति, आचार्यस्स्य (अद्ध्यापकस्स्य) उच्चारणेऽशुद्धत्त्वे आगते तु तज् जले तैलमिव शिष्ष्यगणोच्चारणेऽपि प्प्रसर्प्पति, एवञ् च सम्प्रदायाशुद्धिः प्रसज्ज्यते; अत एवाचार्यत्त्व-कामस्स्य शिक्क्षाशास्त्रज्ज्ञानमत्त्यावश्यकमिति सुदूरदर्शिनामृषीणा-मुपदेशस् सर्वथा पालनीय एव। तथापि रागादिदोषवशाद् "ब्राह्म्मणेन निष्कारणो धर्मष् षडङ्गो वेदोऽद्ध्येयो ज्ज्ञेयश् च"[7] इत्त्यादिकमागम-मपि उल्लङ्घ्य प्प्रवर्त्तमाना जनाश् शिक्क्षाशास्त्राद्ध्ययने उदासतैव किल। एवञ् च शिक्क्षाशास्त्राऽद्ध्ययनाभावाल् लौकिकदेश्यभाषाप्प्र-भावाच् च प्रायेण सर्वेषामेव वेदमन्त्राद्द्यु च्चारणे लौकिकसंस्कृतोच्-चारणे चाऽशुद्धिश् शनैश्शनैः पदमदात्। शास्त्रविशेषतदेकदेशादिक-मधीत्त्यैव स्वङ्कृतकृत्त्यम् मन्न्यमाना मीमांसा–व्याकरण–ज्योतिष–धर्म-शास्त्र–न्यायादिष्ष्वन्न्यतमं शास्त्रमधीयाना अधीतवन्तश् च जना अपि शिक्क्षाशास्त्राऽद्ध्ययनाभावात् स्वस्स्वमातृभाषाप्रभावाच् च संस्कृतम् प्रायेणाऽपब्भ्रष्टरूपेणैवोदचीचरन् किल।

राजशेखरसमये यद्द्यपि सुराष्ट्रत्त्रवणाद्द्यास् संस्कृतमपि अपब्भ्रंशरूपङ्कृत्त्वा पठन्ति स्स्म, उत्तरापथभवाश् च कवयो निरनु-नासिकानपि संस्कृतस्स्वरान् नासिकानुषङ्गेण विकृतानेवोच्चारयन्ति स्स्म, लाटादयश् च संस्कृतोच्चारणे महत् काठिन्न्यमनुभवन्ति स्स्म, तथापि संस्कृते सम्म्यगभिविनीताः कश्मीरभवा वाराणसीतः पूर्वेण स्स्थिता मगधादयश्

---

१. पा.गृ.सू.२।६।१। २. तत्त्रैव २।६।५। ३. तत्त्रैव २।६।६।
४. तत्त्रैव २।६।७। ५. तत्त्रैव २।६।८। ६. तै. प्रा. २४।६।
७. पा. व्या. भा., पस्पशाह्न्निके।

च केचन पुरुषास् संस्कृतं सुष्ठु पठन्ति स्स्मेति राजशेखरवचनाज् ज्ञायते[1]। एवञ् च सत्त्स्वपि संस्कृतभाषायां सम्म्यगभिविनीतेषु शुद्ध-संस्कृतोच्चारणाभिज्ञेषु केषु चिद् विद्द्वत्त्सु आचार्योव्वटस्स्य समये आचार्यशौनकस्स्यैव समये वाऽपि वेदस्स्याऽपि अत्त्यन्तमेवाऽपब्भ्रष्टेन रूपेणोच्चारका वेदपाठका अभूवन्निति आचार्योव्वटलेखाद् ज्ञायते। उक्तं हि तेन "किमर्थमनुस्स्वारस्स्य दीर्घपूर्वस्स्य पदमद्ध्ये वर्त-मानस्स्य बहुभिश् श्लोकैर् लक्क्षणङ क्रियते? ननु पाठादेव सिद्धयँ यथाऽन्न्येषावँ वर्णानाम्; सत्त्यम्, किन् तु दुराम्म्नाननिवृत्त्यर्थमनयोश् शिक्क्षापटलयोर् बहूनावँ वर्णानालँ लक्क्षणङ क्रियते। ..... कथम् पुनर् दुराम्म्नानप्प्रसङ्गः? सन्ति हि अतीर्थोषिता अलसा अगुणदोष-ज्ज्ञा अन्न्योन्न्याद्ध्यापकास् सर्ववर्णान्न्यथात्त्वजनयितारः, तद्दोष-निवृत्त्यर्थमाचार्येण शिष्ष्यहितार्थमिदमारब्धम्"[2] इति। अद्द्चत्त्वे तु प्रायस् सर्वे वैदिका अन्न्ये च संस्कृतपाठकास् 'सर्ववर्णान्न्यथा-त्त्वजनयितारः' इति न चित्त्रमेतत्। संस्कृतपाठिषु अद्द्चत्त्वे शिक्क्षा-शास्त्रस्स्य प्प्रचारोऽतीव न्न्यूनः। अस्माकवँ वैदिकधर्मानुयायिनान् धर्मस्स्य निर्विकल्पाया अपि भाषायास् संस्कृताया वाण्ण्याश् शुद्ध-मुच्चारणङ कर्तुं समर्थाऽ पुरुषास् सम्पूर्णेऽपि भारतवर्षे सुदुर्लभा एवेदानीम्। संस्कृतपाठिनो लब्धाचार्यपदवीका अपि पुरुषास् संस्कृतस्स्य कतमद् उच्चारणं शुद्धङ कतमच् चाऽशुद्धमिति विवेचने प्रायेणाऽसमर्था एवाऽद्द्चत्त्वे। मातृभाषारूपाया देश्श्याया अपब्भ्रंशभाषायाऽ प्रभावेण संस्कृतस्स्योच्चारणमतीवाऽशुद्धङ क्रियते। किन् त्वस्मिन् विषये संस्कृत-पाठिनाम् प्रतिजागरस्स्य सुतरामभावोऽस्ति। कतिपयानावँ वर्णानां शुद्धे संस्कृतरूपे तदीयेऽपब्भ्रष्टे रूपे च सत्त्यपि महत्त्यन्तरेऽज्ज्ञ-कृतदुर्व्यवस्स्थानुसारिणि लेखे दृश्श्यया लिपिकृततुल्ल्यतया व्यामोहिताऽ पण्डितम्मन्न्या अपि पुरुषास् तत्तत्संस्कृतवर्णजातानि अपब्भ्रष्टानि रूपाण्ण्येव शुद्धानि संस्कृतरूपाणि मन्न्यन्ते। एतादृशी हन्त संस्कृतो-च्चारणपद्धतिरिदानीम्।

एतस्स्या विकृतसंस्कृतोच्चारणपद्धतेस् संशोधनाय प्राचीनायास् संस्कृतोच्चारणपद्धतेस् सम्म्यग् ज्ञानमावश्श्यकम् भवति। संस्कृतशिक्-क्षाशास्त्रसम्बद्धेषु अनेकेषु मुद्द्रितेषु असुसम्पादितेषु, सुसम्पास्दितेषु

---

१. काव्व्यमीमांसायास् सप्तमेऽध्याये पाठप्प्रतिष्ठायाम्।
२. ऋ. प्रा. उ. भा. १३।२२ (३।१।२२)।

मुद्दरितेष्वपि दुर्लभेषु, इदानीञ्चामुद्दरितेषु च ग्रन्थेषु संस्थिता विषयास् सर्वेषां संस्कृताद्ध्यायिनाङ्ग कृते सुबोधास् सुलभाश् च न भवन्ति। अत एवेदानीं संस्कृताद्ध्यायिषु संस्कृतस्य शुद्धोच्चारणस्य विषये भ्रमोऽबोधश् च बाहुल्येनोपलब्भ्यते। एतम् भ्रममबोधञ् च निराकृत्य प्राचीनायास् संस्कृतोच्चारणपद्धतेर् यथार्थं रूपं सुलभं सुबोधञ् च कृत्वाऽस्माकवँ वेदानुयायिनान् धर्मस्य निर्विकल्पभाषायास् संस्कृतस्योच्चारणे शुद्धतामनेतुन् तां रक्षितुञ् च साहाय्यस्य प्रदानमेवाऽस्य ग्रन्थस्य प्रणयनेऽस्माकलँ लक्ष्यम्।

यद्द्यपि अन्न्यैर् भारतवर्षीयैः पाश्चात्त्यैश् च विचारकैरपि अस्मिन् विषये शोधकार्यम् बहुधा कृत्वा कृतयः प्रकाशिता एव, तथापि तत्तर सन्त्येव बहवो विषया येषु तेषाङ्ग कृतिषु अपूर्णताऽस्स्पष्टता भ्रम एव वाऽपि विद्द्यत एव। एवञ् चाऽस्मिन् विषयेऽधिकतरो विचार आवश्यक एव। अस्मिन् ग्रन्थे च पाणिनि-कात्त्यायन-पतञ्जलि-काशिकाकार—पाणिनीयवैयाकरणसिद्धान्तकौमुदीकार-शब्देन्दुशेखरकार-मधुसूदनविद्द्यावाचस्पति-सुनीतिकुमारचटर्जि-सिद्धेश्वरवर्म-सूर्यकान्त 'शास्त्रि'-काशिनाथवासुदेवाऽब्भ्यङ्कर—विधातृमिश्र-डब्ल्यु. डि. ह्विट्नि—सि. सि. उह्लेन्बेक—पर्चाङ्कलिनएङ्गर्टन—डब्ल्यु. एस्. एल्लेन-प्रभृतीनाङ्ग ग्रन्थकाराणां संस्कृतशिक्षाशास्त्रसम्बद्धविषयेषु अस्स्पष्टानि भ्रमपूर्णानि अबोधोपहतानि च प्रतिपादनानि व्याख्यानानि च आधारभूतग्रन्थप्रमाणैर् युक्तिभिश् च स्स्पष्टीकृतानि निराकृतानि संशोधितानि च सन्ति। एतद्विषये सङ्क्षेपेणोल्लेखोऽनुपदमेव च करिष्यतेऽत्तर। अपि च तैत्तिरीयारण्यके "शीक्षावँ व्याख्यास्यामः। वर्णस् स्वरः। मात्त्रा बलम्। साम सन्तानः। इत्त्युक्तश् शीक्षाद्ध्यायः" (७।२) इति प्रतिपादितायाश् शिक्षायास् सम्पूर्णेऽपि संस्कृतवाङ्मयेऽनुपलब्भ्यमानेऽप्यादर्शभूते एकस्मिन्नपि परिपूर्णे ग्रन्थे तत्संरचनेऽवधानञ् च तैर् न दत्तम्। अस्माभिस् तु पूर्वमुक्तेन लक्ष्येण सहैव तादृशस्य ग्रन्थस्य संरचनमपि लक्ष्यङ्ग कृतमिति भविष्यत्त्येवैतस्याऽस्माकङ्ग कार्यस्य महद् वैशिष्ट्यमुपयोगित्त्वञ् च संस्कृतपाठिनाङ्ग कृते।

एतस्मिन् ग्रन्थे प्रतिपृष्ठङ्ग काऽपि विशेषता प्राप्यतैव, सा च विदुषां सुज्ज्ञानैव भवेत्, तथापि एतस्मिन् ग्रन्थे वर्त्तमानाः कतिपये विशेषा अत्तर सङ्क्षेपेणोल्लिक्ष्यन्ते—

१. 'चत्वारि वाक्परिमिता' इत्यादिकस्य मन्त्रस्य शतपथ-ब्राह्मणाऽनुकूलस्याऽर्थस्य प्रदर्शनम् (पृ. १)।

२. शिक्षाया युक्तितोऽपि व्याकरणाज् ज्येष्ठत्वस्य प्रदर्शनम् (पृ. ६–८)।

३. प्रातिशाख्यग्रन्थानामेव प्राचीनतमपौरुषेयशिक्षाग्रन्थतायाः प्रतिपादनम् (पृ. १०)।

४. प्रातिशाख्यानां शिक्षाग्रन्थत्वस्य निरूपणम् (पृ. १३)।

५. अनेकेषां शिक्षाग्रन्थानामिदम्प्रथमयँ यथार्थवँ विवरणम् (पृ. ३७–७८)।

६. अनेकेषाम् प्राचीनानां शिक्षाशास्त्रविदामिदम्प्रथम उल्लेखः [एतद्विषयेऽन्यैरनुसन्धातृभिः कृतानान् त्रुटीनावँ विशेषतो निराकरणञ् च] (पृ. ८२; तत्र तृतीया टिप्पणी च द्रष्टव्या)।

७. युक्तियुक्तायाश् शिक्षापरिभाषायाः प्रणयनम् (पृ. ८९)।

८. शिक्षाप्रयोजनादीनावँ विस्तरेण सम्यक् प्रतिपादनम् (पृ. ९१–११३)।

९. वर्णोत्पत्तिशारीरस्याऽऽयुर्वेदानुसारि विस्तृतं स्फुटञ् च वर्णनम् (पृ. १६८–१७४)।

१०. वर्णसङ्ख्याया विस्तरेण विवेचनम् (पृ. १८१–१८७)।

११. दीर्घाऽवर्णस्स्वरूपविवेचनम् (पृ. १९६–२००)।

१२. ऋकारलृकारस्स्वरूपस्य स्स्पष्टीकरणम् (पृ. २००–२०९)।

१३. ए ऐ ओ औ इत्येतेषान् निरूपणे पाश्चात्यब्भ्रमस्य निराकरणम् (पृ. २०९–२१३)।

१४. चवर्गपञ्चमवर्णविषये मधुसूदनविद्द्यावाचस्पतिप्रभृतीनाम् भ्रमस्य निराकरणम् (पृ. २१३–२१५)।

१५. दन्तोष्ठ्यवकारश्श्रुतिविवेचनम् (पृ. २१५–२१९)।

१६. श–ष–स–श्श्रुतिविशेषे मन्दानामपि बोधो यथा स्यात् तथा तस्य विषयस्य प्रतिपादनम् (पृ. २२०)।

१७. जिह्वामूलीयोपद्ध्मानीयविसर्जनीयोच्चारणगतवैशिष्ट्यानां स्पष्टीकरणम् (पृ. २२०)।

१८. अनुस्स्वारस्स्वरूपस्स्पष्टीकरणम् (पृ. २२१)।

१९. रङ्गवर्णविषयेऽन्येषाम् भ्रान्तेर् निराकरणम् (पृ. २२१–२३०)।

२०. आधुनिकैरन्यैरनुसन्धातृभिरुपेक्षितानामभिनिहितवर्णानां

स्पष्टमाणं सम्यङ्ग निरूपणम् (पृ. २३०–२३४)।

२१. यमवर्ण–सङ्ख्यानिरूपणयँ यमशब्द–निर्वचनब्भ्रान्तिनिराकरणञ् च (पृ. २३४–२४६)।

२२. अनन्यैरनुसन्धातृभिः प्रायेणाऽनुल्लिखितस्य नासिक्यवर्णस्य निरूपणम् (पृ. २४६)।

२३. अनन्यैरनुसन्धातृभिरचर्चितस्य किट्किडाकार-वर्णस्योल्लेखनम् (पृ. २५७)।

२४. ऋकार–लृकार–जकार–जञसयँ योग–यकार–वकार–षकारा-ऽनुस्स्वारोच्चारणविशेषाणान् निरूपणन् तद्विषये भ्रान्तेर् निराकरणञ् च (पृ. २६३–२८४)।

२५. स्वर–व्यञ्जन–योगवाहा-ऽयोगवाहाऽऽदिपरिभाषास्स्पष्टीकरणम् (पृ. २८५–२९४)।

२६. उदात्तादिस्स्वरलक्षणे काशिकाकारसिद्धान्तकौमुदीकारादिमतानान् निराकरणम् (पृ. ३१७–३२४)।

२७. गान–पाठ–भेदप्रतिपादनम् (पृ. ३७९–३८१)।

२८. तरैस्स्वर्यादिप्रयोग-तानप्रयोग-विषयविवेचनम् (पृ. ३८९)।

२९. ऋकारमात्त्रासन्निवेशविशेषविवरणम् (पृ. ४५३–४५४)।

३०. आब्भ्यन्तरप्रयत्नानावँ विवेचनम्, तत्तर करणशब्दस्य प्रयोगे तात्पर्यस्य द्ध्वननञ् च (पृ. ५१९)।

३१. विस्तरयुतवँ वर्णोच्चारणदोषविवरणम् (पृ. ५३८–५५०)।

३२. सन्धिविषये वैदिकोदाहरणानाम् प्रदर्शनम्, विषयविशेषव्यवस्थाप्रदर्शनम्, पाणिनीयव्याकरणसमीक्षणञ् च (पृ. ६०१–७३२)।

३३. व्यञ्जनद्वित्त्वाऽद्वित्त्वनिरूपणम् (पृ. ७३२–७५४)।

३४. जटादिविकृतिपाठस्स्थितिविवेचनादिकम् (पृ. ७६२–७८२)।

३५. कतिपयानान् दुर्लभानाममुद्दरितानाञ् च शिक्षाग्रन्थानामनुबन्धत्वेन स्वशैल्या मुद्दरणम् (पृ. ७८८–)।

(ङ) एतदनुसन्धानकार्यप्रवृत्तिनिमित्तविशेषः

चतुर्षु पुरुषार्थेषु धर्मः प्राथम्यम् भजते। धर्मश् चाऽन्येषामपि पुरुषार्थानां साधनमिति च "ऊर्ध्वबाहुर् विरौम्येष न च कश् चिच् छृणोति मे। धर्मादर्थश् च कामश् च स किमर्थन् न सेव्यते"[1] इति

---

1. महाभारते १८।५।६२।

वचनादपि ज्ज्ञायते । एतस्य वचनस्य च 'धर्मान् न केवलम् मोक्षः, किन् तु एषणाप्रधानानामीप्सिततमावर्थकामावपि धर्मादेव सिद्ध्यतः' इत्यभिप्रायोऽवगम्यते । "**उत्पतिरेव विप्रस्य मूर्तिर् धर्मस्य शाश्वती । स हि धर्मार्थमुत्पन्नो ब्रह्मभूयाय कल्पते**"[1], "**चतुष्पात् सकलो धर्मो ब्राह्मणस्य विधीयते । पादावकृष्टो राजन्न्ये तथा धर्मो विधीयते**"[2] इत्यादिभ्यो वचनेभ्योऽपि ब्राह्मणेन धर्मे विशेषतोऽवधानम् च कर्तव्यम् । धर्मज्ज्ञानम् च ब्राह्मणानामनृणीणाङ खलु वेदादेव भवति । वेदस्वरूपप्रयोगार्थरहस्यानां सम्यग् ज्ञानम् च तेषां शिक्षादिभिष् षड्भिरङ्गैस् सह तदनुकूलया गुरुशिष्यपरम्परया चैव यथाविधि वेदानामद्ध्ययनेनैव भवति । तथा हि आचार्यो यास्कोऽपि "**साक्षात्कृतधर्माण ऋषयो बभूवुः, तेऽसाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान् त्सम्प्रादुः, उपदेशाय ग्लायन्तोऽवरे बिल्मग्रहणायेमङ ग्रन्थं समाम्नासिषुर् वेदञ् च वेदाङ्गानि च**"[3] इति वदन्नभिप्रैति । एतद् यास्कवचनमनुसरद्भिरस्माभिष् षंड्भिरङ्गैरन्जितवँ वेदार्थम् ज्ज्ञातुमनुशीलयितुम् च वेदवेदाङ्गाद्द्यद्ध्ययनेन तद्विषयकग्रन्थप्रणयनादिना च प्रयत्नः क्रियते । तत्र षट्सु वेदाङ्गेषु प्राथम्यम् भजमानायाश् शिक्षायाः परिशीलनम् चाऽस्माभिर् बहोः कालात् पूर्वम् प्रारब्धम्।तद्विषये यथाशक्ति सामग्रयस् सङ्कलिताः, बहवो निबन्धा विरचिताः, के चन प्रकाशिताश् च । शिक्षाग्रन्थप्रणयनमपि केनाऽपि रूपेण कृतम् । एतादृशे क्रियाकलापे प्रवर्तमाने एव "वैदिकयज्ज्ञा औपनिषदमात्मज्ज्ञानम् च" इत्येतस्मिन् विषयेऽनुसन्धानकार्यम् पूर्णङ कृत्वा वाराणसीस्थात् सम्पूर्णानन्दसंस्कृतविश्वविद्द्यालयाद् विद्द्यावारिद्ध्याख्ये उपाधौ प्राप्ते **वाचस्पत्युपाधिप्राप्तये** स्वकार्यक्षेत्रभूतस्य निकायस्याऽनुमत्याऽस्माभिः "**वेदाङ्गशिक्षाशास्त्रस्य रचनात्मकं सम्पादनात्मकञ् च परिशीलनम्**" इत्यस्मिन् आत्मनाकृतभूरिपरिश्रमे विषयेऽनुसन्धानकार्यङ कर्तुवँ वाराणसीस्थे सम्पूर्णानन्दसंस्कृतविश्वविद्द्यालये नियमानुसारम् आवेदनङ कृतम् । तदनुसारवँ वेदविभागाद्ध्यक्षस्य आचार्य-डा.युगलकिशोरमिश्रमहाभागस्य निर्देशकत्वे कार्यङ कर्तुम् ११-११-१९८७ इत्यङ्कनीये दिने स्वीकृतिः प्राप्ता, नव्यप्रयोजनानुरूपग्रन्थरचनाविशेषकार्यारम्भश् चाऽस्माभिः

---

१. मनु. १।९८। २. शान्ति. ३५।३२ ।
३. निरुक्ते १।६।४ ।

११-११-१९८७ इत्त्यङ्कनीये दिने कृतः । एषोऽस्माकमेतद्ग्रन्थप्प्रणयन-कार्यप्प्रवृत्तिविशेषस्य वृत्तान्तः ।

(च) कृतज्ञताव्यक्तीकरणम्

एवम् प्रवृत्तेऽस्माकमेतस्मिन् कार्ये नेपालस्थे काष्ठमण्डपनगरे जीविकायै शिक्क्षणकार्ये व्याप्प्रियमाणानामस्माकवँ वाराणसीस्थे सम्पूर्णानन्दसंस्कृतविश्वविद्द्यालये स्थित्वा नियमानुसारवँ वाचस्पत्त्युपाद्ध्यर्थमनुसन्धानकार्यम् पूर्णङ्क कर्तुवँ वर्षद्द्वयात्मकोऽवकाश आवश्यकोऽभूत् । तावतः कालस्य कृते निर्वेतनेऽवकाशे गृहीते कुटुम्बस्य निरवलम्बतायाः प्रसङ्गादस्माभिस् सवेतनस्याऽवकाशस्य कृते सम्बद्धनिकायस्याऽधिकृताः प्रार्थिताः । किन् तु नियमानुसारन् तादृशेऽवकाशे दातुं शक्क्येऽपि तदधिकृतैरस्मदीया प्रार्थनाऽरण्यरुदितीकृता । एवमवरुद्धेऽस्मिन् कार्ये उपायान्तरे चाऽनुपलब्ध्यमाने निर्देशकैराचार्य-डा.युगलकिशोरमिश्रमहाभागैर् भूयोभूयो निर्दिष्टाः प्रोत्साहिताश् च वयङ्क कथमपि **स्वप्प्रस्तुतानुसन्धानप्प्रस्तावानुरूपङ्क** ग्रन्थपुनर्विरचनं सम्पाद्द्य ग्रन्थमुद्द्रापणे प्रवृत्ता एवम्प्रकारेण मुद्द्रितप्प्रबन्धप्रस्तुतौ सफला जाता इति तत्तर भवतान् निर्देशकानामाचार्यवर्याणाङ्क कृतज्ञताधमर्णताया भारवँ वहामः ।

एतस्य ग्रन्थस्य रचनायाः प्रसङ्गे बहूनाममुद्द्रितानां शिक्क्षाग्रन्थानामुपलब्धेस् सुगमम् मार्गम् प्रदर्शितवतायँ युधिष्ठिरमीमांसकमहाभागानाम्, अमुद्द्रितानाम् बहूनां शिक्क्षाग्रन्थानामद्ध्ययने प्रतिलिपीनाङ्क करणे चाऽनुमतिं सौविद्ध्यञ् च दत्तवतान् नवदिल्लीस्थ-हौजखासटोल्लकवर्ति-सरस्स्वतीविहार-पुस्तकालयाद्ध्यक्क्षाणां सांसदानां श्रीलोकेशचन्द्रमहाभागानाम्, **आत्त्रेयशिक्क्षाया** अद्ध्ययनाय दुर्लभं हस्तलिखितग्रन्थयँ यथानियमङ्क काष्ठमण्डपनगरे एवाऽस्मत्सकाशे प्रस्थापितवताम् पञ्चनदप्प्रदेशस्थ-विश्वेश्वरानन्द-विश्वबन्धुसंस्कृत-भारतभारत्यनुशीलनकार्यालयसञ्चालकमहोदयानाम्, **चारायणीयशिक्क्षायाः** प्रतिलिपिमुपलम्भितवताम् भाण्डारकरप्राच्यविद्द्यानुसन्धानमन्दिराऽद्ध्यक्क्षाणाम्, मुद्द्रितशौनकशिक्क्षाछायाचित्तरप्प्रतिलिपिमुपलम्भितवतान् द्रमिडदेशस्थतञ्जाऊरनगरवर्तिसरस्स्वतीमहलपुस्तकालयाद्ध्यक्क्षाणाम्, केनाऽपि विलम्बेनाऽपि मुद्द्रिताया एव **शौनकशिक्क्षाया** हस्तलिखिताम्

प्रतिलिपिन् निश्शुल्कमुपलम्भितवतावँ् विद्द्याप्प्रचारणधियान् त्रिपुणि-त्तुरस्स्थानाङ्ग केरलब्ब्रह्मम्माणावँ् विदुषान् दिवाकरद्द्विजेन्द्राणाम्, पुराणाऽनुसन्धानपत्त्रिकाऽऽदिपठन-तन्मुद्द्रितसामग्रीप्रतिलिपिकरणसौविद्-ध्यादिकमुपलम्भितवतान् नैपाल-काष्ठमण्डपनगरस्स्थकेसरपुस्तकालयस्स्याऽ-द्ध्यक्क्षाणाञ् चोपकारं स्मरन्तस् तत्त्र भवतस् सर्वान् प्रशंसामः ।

एतस्स्य कठिनस्स्य महाकायस्स्य च ग्रन्थस्स्य मुद्द्रापणे खलु प्रमुद्द्रणसंशोधनेनाऽन्न्यैश्च कर्मभिरसाधारणंसाहाय्यञ्ज कृतवत आमोद-वर्धन-प्प्रमोदवर्धन-सुमोदवर्धनान् कुमारान् कुमारीम् प्रियवँ्वदाम्बाञ् च शुभाशीराशिभिरभिवर्धयामः ।

एतस्मिन् महति वेदपरमात्मप्प्रसादनकर्मणि अर्थविनियोजनमनु-ज्ज्ञातवत्त्यास् सम्मोदवर्धन-वशवँ्वदाम्बा-ऽतिसम्मोदवर्धनैर् बाला-ऽपत्त्यैस् सह अर्थकार्श्यकष्टं सोढुन् तत्पराया धर्मपत्न्या नारायण्य-पराभिधाया देव्या आचार्यान्न्या आनुकूल्यञ् चाऽनल्पम् प्रशंसामः ।

एतस्स्य ग्रन्थस्स्य मुद्द्रणेऽप्प्रचलितरीतिकङ्ग कठिनं सीसका-क्क्षरयोजनकार्ययँ् योग्यतातिशयेन उद्विग्नताकारणेषु विविधेष्ष्वापति-तेष्ष्वपि अनुद्विग्नत्त्वेन च कृतवतऽ काष्ठमण्डपस्स्थ-बाग्बजार-मुद्द्रणा-ऽऽलयंकर्मकरस्स्य सिन्धुलिजनपदकाऽभिजनस्स्य बुद्धिबहादुरश्श्रेष्ठस्स्य शिल्पनैपुणञ् च हृदयेन प्प्रशंसामः ।

बुधान् प्रति प्रार्थना

देशे दुर्लभतद्विद्द्यसम्भाषे चाऽल्पपुस्तके ।
उषित्त्वाऽलब्धसाहाय्यास् स्वाऽर्जिताल्पार्थसाधनाः ।।
सुतीव्रायाऽ केवलाया वेदभक्तेस् समाश्श्रयात् ।
रात्त्रिन्दिवं हि अल्पाल्पमपि कालन् नियोज्ज्य च ।।
शिक्क्षामररचामेमावँ् वययँ् यत्नेन भूयसा ।
सर्वार्थसाधनी त्त्वत्त्र लीलैव परमात्मनः ।।
मुद्द्रापयित्त्वाऽतियत्नात् पुरस्तात् प्रस्तुतामिमाम् ।
परीक्क्षन्ताम् मुदा सम्म्यक् परिश्श्रमविदो बुधाः ।।
सारासारवँ् विविच्च्याऽत्त्र सारङ्ग गृह्णन्न् तु पण्डिताः ।
ज्ञात्त्वा सुदुर्ल्लभं सारमात्त्रमस्स्खलितवँ् वचः ।।

इति ज्ज्ञापयति-

शिवराज आचार्यः (कौण्डिन्न्यायनः)

बौरबैत्त्रमासे, २०४७ तमे वैक्क्रमाब्दे ।

विषयानुक्रमणिका

प्रस्ताविका अ–ओ

(क) एतस्मिन् ग्रन्थे कृतस्य लिपिप्रयोगस्य स्पष्टीकरणम्–अ; (ख) प्रचलितदेवनागर्य्या परिष्कारस्याऽऽवश्यकता – आ; (ग) एतद्ग्रन्थरचनाशैलीविशेषता–ई; (घ) एतस्य ग्रन्थस्य प्रयोजनवँ वैशिष्ट्यञ्च – उ; (ङ) एतदनुसन्धानकार्यप्रवृत्तिनिमित्तविशेषः – ऊ; (च) कृतज्ञताव्यक्तीकरणम्–ऐ।

उपबन्धः

वेदाङ्गशिक्षाशास्त्रस्य सङ्क्षिप्त इतिहासः

१. वेदमन्त्रसंहितासु वेदाङ्गशिक्षाशास्त्रस्य बीजानि १

२. ब्राह्मणारण्यकोपनिषत्सु वेदाङ्गशिक्षाशास्त्रस्य विषयाः ३

३. कल्पसूत्रादिषु उपलब्ध्यमाना वेदाङ्गशिक्षाशास्त्रसमुन्नतेस् सूचनाः ८

४. पार्षदाख्याः प्रातिशाख्यापरपर्याया ग्रन्थास् ततः प्राचीना वाऽपि तथाविधा एव ग्रन्थाश् शिक्षाशास्त्रस्य प्राचीनतमाः पौरुषेया ग्रन्थाः १०

५. प्रातिशाख्यानां शिक्षाग्रन्थत्वम् १३

६. प्रातिशाख्यानि १९–२९

(क) ऋग्वेदप्रातिशाख्यम् ऋग्वेदपार्षदवँ वा–१९; (ख) आश्वलायनप्रातिशाख्यम्–२१; (ग) बाष्कलप्रातिशाख्यम्–२१; (घ) शाङ्खायनप्रातिशाख्यम्–२१; (ङ) शुक्लयजुर्वेदप्रातिशाख्यवँ वाजसनेयिप्रातिशाख्यवँ वा–२२; (च) तैत्तिरीयप्रातिशाख्यम्–२३; (छ) मैत्रायणीयप्रातिशाख्यम्–२४; (ज) चारायणीयप्रातिशाख्यम्–२५; (झ) ऋक्तन्त्रव्याकरणम् ऋक्तन्त्रं सामवेदप्रातिशाख्यवँ वा–२५; (ञ) सामतन्त्रम्–२७;

(ट) अक्क्षरतन्त्रम्–२८; (ठ) पुष्पसूत्त्रम् फुल्लसूत्त्रवँ वा –२८; (ड) सात्त्यमुग्गिरराणायनीयप्रातिशाक्ख्यम्–२८; (ढ) गौतमप्रातिशाक्ख्यम्–२८; (ण) शौनकीया चतुरद्ध्यायिका–२९; (त) अथर्ववेदप्रातिशाक्ख्यम्–२९।

७. प्रातिशाक्ख्यपरिशिष्टरूपा ग्रन्थाः ३०–३७

(क) ऋग्वेदसम्बद्धाः प्रातिशाक्ख्यपरिशिष्टरूपा ग्रन्थाः ३१–३४

(१) उपलेखसूत्त्रम्–३१; (२) विकृतिवल्ली (व्याडिशिक्क्षा) –३१; (३) अष्टविकृतिलक्क्षणानि–३१; (४) अष्टविकृति-विवृतिः (मधुसूदनशिक्क्षा)–३१; (५) वेदविकृतिविवरणम्–३२; (६) जटापटलम्–३२; (७) हयग्रीवकृतम् जटापटलम्–३२; (८) जटालक्क्षणम् (विकल्पकौमुदी ?)–३२; (९) ऋग्वेदजटा-लक्क्षणम्–३२; (१०) ऋग्वेदघनसारः–३२; (११) शमान-शिक्क्षा–३२; (१२) शमानपदानि–३२; (१३) शमानलक्क्षणम् (शमानप्प्रकरणम्)–३३; (१४) लघुशमानम्–३३; (१५) पदगाढः –३३; (१६) चतुर्ज्ज्ञानम्–३३; (१७) अवर्णदीपः–३३; (१८) अवर्गि–३३; (१९) ऋग्वेदपदादिसङ्ख्या (सप्तसङ्ख्या) –३३; (२०) ऋग्वेदपरिभाषाकारिका–३३; (२१) बोन्दलक्क्ष-णम् (ऋग्वेदक्करमलक्क्षणम्)–४३; (२२) गानिलक्क्षणम्–३३; (२३) एकाक्क्षरिबैठः (एकाक्क्षरिवैटुः, एकाक्क्षरिवैड्) –३३; (२४) पदान्तदीपिनी–३३; (२५) ऋग्वेदानुक्करमणिका –३४; (२६) ऋग्विलङ्घ्यम्–३४।

(ख) शुक्लयजुर्वेदसम्बद्धाः प्रातिशाक्ख्यपरिशिष्टरूपा ग्रन्थाः ३४–३५

(१) प्रतिज्ज्ञासूत्त्रम्–३४; (२) भाषिकसूत्त्रम्–३४; (३) वाजसनेयिसंहितापदकारिकारत्नमाला–३४; (४) वेदलक्क्ष-णम्–३४; (५) पदज्ज्योतिः–३४; (६) पदरत्नक्करमरत्नम्–३४; (७) आवर्णि–३४; (८) तपरम्–३४; (९) नपरम् –३४; (१०) नपरतपरलक्क्षणम्–३४; (११) विलङ्घ्यलक्क्षणी –३५; (१२) अवर्ण्यादिवर्णमालिका–३५; (१३) काण्वशाखीय-पदलक्क्षणम् (षण्मुखम्)–३५।

(ग) कृष्णयजुर्वेदसम्बद्धाः प्रातिशाख्यपरिशिष्टरूपा ग्रन्थाः ३५–३७

(१) लक्षणरत्नम्–३५; (२) अनिङ्ग्यम्–३५; (३) अनिङ्ग्यान्तं सव्याख्यानम्–३५; (४) अनिङ्ग्यशतकम्–३५; (५) त्वन्ताद्द्व्यनुक्रमणिका–३५; (६) शाखाशमानम्–३५; (७) शमानसन्धिः–३५; (८) षड्विंशतिसूत्रम्–३५; (९) अवर्णि–३५; (१०) अवर्ण्यादिवर्णमालिका–३५; (११) अवर्णदीपः–३५; (१२) अवर्ण्यावर्णि–३५; (१३) ईकारान्ताः–३५; (१४) पूर्वोत्तरोभयदीर्घी–३५; (१५) उभयपूर्वोत्तरदीर्घी–३६; (१६) यणादेशदीर्घी–३६; (१७) यणादेशदीर्घादिविधिः–३६; (१८) उभयह्रस्स्वि–३६; (१९) प्लुतानुशासनम्–३६; (२०) सकारपरविसर्जनीयः–३६; (२१) थकारधकारसूत्रम्–३६; (२२) अन्तप्रदीपिका–३६; (२३) नतान्तपदानि–३६; (२४) तैत्तिरीयपदस्वरलक्षणम्–३६; (२५) इङ्ग्यरत्नम्–३६; (२६) वेदलक्षणम्–३६; (२७) अवग्रहलक्षणम्–३६; (२८) प्रगृह्ययः–३६; (२९) अवेष्टनपदानि–३६; (३०) अर्धान्ताः–३६; (३१) उच्चस्स्वरनिर्णयः–३६; (३२) स्वरशिक्षा–३६; (३३) विलङ्घ्यम्–३६; (३४) सप्तलक्षणम्–३७; (३५) रावणभेटुः (रावणभेट् वा)–३७; (३६) तैत्तिरीयस्स्वरावधानम्–३७।

(घ) सामवेदसम्बद्धाः प्रातिशाख्यपरिशिष्टरूपा ग्रन्थाः ३७

(१) लघुऋक्तन्त्रसङ्ग्रहः–३७; (२) सामवेदसप्तलक्षणम्–३७; (३) उत्तरग्धारिमाला–३७; (४) उत्तरग्गुदात्तमाला–३७; (५) उत्तरक्स्वरितमाला–३७।

(ङ) अथर्ववेदसम्बद्धानाम् प्रातिशाख्यपरिशिष्टरूपग्रन्थानामभावः ३७

८. शिक्षेति प्रसिद्धा ग्रन्थाः ३७–७८

(अ) ऋग्वेदीयशिक्षाग्रन्थाः ३८–४२

(क) शैशिरीयशिक्षा–३८; (ख) शौनकशिक्षा–३९; (ग) पाणिनीयशिक्षा–३९; (घ) स्वराङ्कुशशिक्षा–४२; (ङ) स्वरव्यञ्जनशिक्षा–४२।

४. अधिकारिनिरूपणम् ११३-१२१
(क) नित्त्यायाऽद्ध्ययनाय शिष्ष्यस्स्य परीक्क्षा-११३; (ख)शास्त्रविशेषस्स्याऽद्ध्यापनाय शिष्ष्यस्स्य परीक्क्षा-११५; (ग) विद्द्याग्रहणेऽनधिकारिणः-११७; (घ) विद्द्याग्रहणाऽऽनुकूल्यसम्पादका विद्द्यार्थिनो नियमाः-११९।

५. अद्ध्ययनविधिनिरूपणम् १२१-१४५
(क) नित्त्यमद्ध्ययनम्-१२१; (ख) सुसम्प्रदायप्रशंसा-१२३; (ग) कुसम्प्रदायनिन्दा-१२५; (घ) काम्म्यविद्द्यावरणविचारः-१२५; (ङ) पाट्ठ्यग्रन्थचयनविचारः-१२६; (च) आचार्य्यवरणविचारः-१२७; (छ) वेदादिविद्द्याग्रहणनियमाः-१२९; (ज) विद्द्याधारणनियमाः-१३६; (झ) विद्द्यावर्धनोपायाः-१३८; (ञ) तद्विद्द्यसम्भाषणादिविधिः-१३९; (ट) विद्द्यासमाराधनरहस्स्यम्-१४३; (ठ) विद्द्याविनाशहेतुनिरूपणम्-१४४।

६. अद्ध्यापनविधिनिरूपणम् १४६-१६७
(क) विद्द्यादाननियमाः-१४६; (ख)अद्ध्यापनपद्धतिः-१४७; (ग) शास्त्रविशेषाद्ध्यापननियमाः-१४९; (घ) वेदाद्ध्यापननियमाः-१५३; (ङ) अर्थतत्त्वप्रधानशास्त्राद्ध्यापननियमाः-१६०; (च)विद्द्यारक्क्षार्थवँ विद्द्याविवृद्ध्यर्थञ्च स्नातकस्स्य अद्ध्यापकस्स्य च व्यवहारविशेषे नियमाः-१६३।

द्वितीयोऽद्ध्यायः
वर्णनिरूपणम्

१. वर्णोत्पत्तिशारीराधिकारः १६८
२. वर्णोत्पत्त्यधिकारः १७५
३ वर्णाधिकारः १७९-१९६
(अ) वर्णलक्क्षणम्-१७९; (आ) वर्णविवेकहेतुः-१८१; (इ)वर्णगणना-१८१; (ई) वर्णसमाम्नायस्स्येतिहासो महत्त्वञ्च-१८७; (उ) वर्णसमाम्नायस् तत्तर वर्णक्क्रमश् च-१९१।

४. वर्णविशेषविवेचनाधिकारः १९६–२६०
(क) दीर्घावर्णविवेकः–१६९; (ख) ऋकारलृकारविवेकः–२००; (ग) अे अै ओ औ इत्त्येतेषाँ विवेचनम्–२०९; (घ) चवर्गपञ्चमवर्णविवेकः–११३; (ङ) टवर्गीयपञ्चमवर्णविवेकः–२१५; (च) वकारश्श्रुतिविवेकः–२१५; (छ) श-ष-स-श्रुतिविवेकः–२२०; (ज) जिह्वामूलीयोपद्ध्मानीयविसर्जनीयविवेकः–२२०; (झ) अनुस्स्वारविवेकः–२२१; (ञ) रङ्गविवेकः–२२१; (ट) अभिनिहितवर्णविवेकः–२३०; (ठ) ध्रुवविवेकः–२३४; (ड) यमविवेकः–२३४; (ढ) नासिक्क्यविवेकः–२४६; (ण) स्वरभक्तिविवेकः–२४८; (त) ड़ढ़विवेकः–२५५; (थ) किट्किडाकारविवेकः–२५७; (द) नादविवेकः–२५७।

५. वर्णविशेषोच्चारणनिदर्शनविशेषाधिकारः २६०

६. वेदशाखाविशेषप्रसिद्ध–वर्णविशेषोच्चारणप्रकाराधिकारः २६३–२८४
(क) ऋकारलृकारोच्चारणविशेषौ–२६३; (ख) जकारोच्चारणविशेषः–२६४; (ग) सयँयुक्तजकारञकारद्द्वयोच्चारणविवेकः–२६५; (घ) यकारोच्चारणविशेषः–२६६; (ङ) वकारोच्चारणविशेषः–२७१; (च) मूर्धन्यषकारोच्चारणविशेषः–२७३; (छ) अनुस्स्वारोच्चारणविशेषः–२७६।

७. वर्णवर्गीकरणाधिकारः २८४–२९४
(क) वर्णवर्गीकरणसाधननिरूपणम्–२८४; (ख) वर्णविभागप्रदर्शनम्–२८५; (ग) स्वरपरिभाषा–२८५; (घ) व्यञ्जनपरिभाषा–२८७; (ङ) स्वरविभागप्रदर्शनम्–२८९; (च) व्यञ्जनविभागप्रदर्शनम्–२९०; (छ) योगवाहपरिभाषा–२९१; (ज) अयोगवाहपरिभाषा–२९१; (झ) योगवाहविभागाः–२९३; (ञ) स्पर्शान्तस्स्थोष्मपरिभाषाः–२९३।

८. अक्क्षरलक्क्षणाऽक्क्षरविभजनाधिकारः २९४–३०३
(क) अक्क्षरलक्क्षणम्–१९४; (ख) अक्क्षरे स्वरव्यञ्जनयोस्स्थितौ विशेषः–२९४; (ग) व्यञ्जनपूर्वाङ्गतापराङ्गतानिरूपणम्–२९५।

९. सयँयोगपिण्डोच्चारणविद्ध्यधिकारः ३०३

१०. वर्ण-रूप-जाति-लिङ्ग-देवता-निरूपणाधिकारः ३०९–३१२
(क) वर्णरूपनिरूपणम्–३०९; (ख) वर्णजातिनिरूपणम्–३१०;
(ग) वर्णलिङ्गनिरूपणम्–३११; (घ) वर्णदेवतानिरूपणम्–३११।

तृतीयोऽध्यायः

स्वरनिरूपणम्

१. स्वरपरिचयः ३१३
२. स्वरभेदाः ३१४
३. स्वराणाँ वर्णभेदस्य जनकता ३१५
४. उदात्ततलक्षणम् ३१७
५. अनुदात्तस्वरूपम् ३२४
६. स्वरितस्वरूपम् ३२५–३५०
(क) स्वरितपूर्वोत्तरभागव्यवस्था–३२६; (ख) स्वरितभेदाः–३३१; (ग) स्वरितभेदानाँ वर्गीकरणम्–३३२; (घ) जात्यनिरूपणम्–३३३; (ङ) अभिनिहितनिरूपणम्–३३४; (च) क्षैप्रनिरूपणम्–३३६; (छ) प्रश्लिष्टनिरूपणम्–३३८; (ज) तैरोव्यञ्जननिरूपणम्–३४०; (झ) तैरोविरामनिरूपणम्–३४२; (ञ) पादवृत्तनिरूपणम्–३४३; (ट) ताथाभाव्यनिरूपणम्–३४४; (ठ) प्रासङ्गिकवँ विक्रमनिरूपणम्–३४६; (ड) स्वरित–तीक्ष्णता–तारतम्यविवेचनम्–३४७।
७. कम्पस्वरनिरूपणम् ३५०
८. प्रचयस्वरनिरूपणम् ३५९
९. उदात्ततरस्वरनिरूपणम् ३६५
१०. अनुदात्ततरस्वरनिरूपणम् ३६७
११. भाषिकस्वरनिरूपणम् ३६८
१२. वैदिकस्वरगान्धर्वस्वरतुलना ३६९
१३. गान्धर्वस्वरसामस्वरविवेचनम् ३७४

१४. गानपाठभेदप्प्रतिपादनम् ३७९
१५. प्राकृतध्वनिगततया स्वरविशेषाणान् निदर्शनम् ३८०
१६. व्यञ्जनस्वरविवेचनम् ३८१
१७. उदात्तादिस्स्वर-रूप-गुण-वर्ण-गोत्तर-च्छन्दो-देवता-निरूपणम् ३८५–३८९
(क) स्वररूपनिरूपणम्–३८६; (ख) स्वरगुणनिरूपणम्–३८६;
(ग) स्वरवर्णनिरूपणम्–३८७; (घ) स्वरगोत्तरनिरूपणम्–३८७;
(ङ) स्वरच्छन्दोनिरूपणम्–३८८; (च)स्वरदेवतानिरूपणम्–३८८।
१८. तरैस्स्वर्यादिप्रयोगतानप्प्रयोगविषयविवेचनम् ३८९
१९. हस्तस्स्वरनिरूपणम् ४०१–४३१
(क) ऋग्वेदहस्तस्स्वरप्रक्क्रियाविवरणम्–४०३; (ख) शुक्ल-यजुर्वेदहस्तस्स्वरप्रक्क्रियाविवरणम्–४०५; (ग) माद्ध्यन्-दिनीयशतपथब्राह्म्मणहस्तस्स्वरविवरणम्–४२३; (घ) कृष्ण-यजुर्वेद–तैत्तिरीयाऽऽत्तरेय–शाखाहस्तस्स्वर–प्रक्क्रिया–४२४;
(ङ) चारायणीयशाखाहस्तस्स्वरप्रक्क्रिया–४२७; (च) सामवेद-हस्तस्स्वरप्रक्क्रियाविवरणम्–४२८; (छ) अथर्ववेदहस्त-स्स्वरप्रक्क्रियानिरूपणम्–४३१।
२०. स्वराङ्कनरीतिविवरणम् ४३३

चतुर्थोऽद्ध्यायः

मात्तरानिरूपणम्

१. मात्तरालक्क्षणम् ४४२
२. मात्तरादिपरिमाणस्स्याऽऽपेक्क्षिकत्त्वम् ४४३
३. मात्तराभेदाः ४४४
४. मात्तराकालप्रमाणविचारः ४४५
५. मात्तराभेदनिदर्शनानि ४४६
६. मात्तरामूला वर्णविभागाः ४४७

७. वर्णविशेषपरिमाणगता विशेषाः ४५०–४७६
(क) अकारगतो विशेषः–४५०; (ख) ह्रस्स्वस्स्वरसामान्यगता विशेषाः–४५०; (ग) दीर्घप्लुतेवर्णोवर्णस्स्वरूपस्स्पष्टीकरणम्–४५३; (घ) दीर्घप्लुतऋकारलृकारस्वरूपगतो विशेषः–४५३; (ङ) सन्ध्यक्क्षरमात्तराविशेषनिरूपणम्–४५५; (च) ओङ्कारमात्तराविवेचनम्–४५९; (छ) ऐकारौकारमात्तरागतविशेषनिरूपणम्–४६३; (ज) व्यञ्जनमात्तरानिरूपणम्–४६५; (झ) अनुस्स्वारमात्तरानिरूपणम्-४६९; (ञ) रङ्गमात्तराविवरणम्–४७३; (ट) स्वरभक्तिमात्तरानिरूपणम्–४७५।

पञ्चमोऽद्ध्यायः
बलनिरूपणम्

१. बलपरिभाषा ४७७
२. स्थानाधिकारः ४७७–५०६
(क) स्थानपरिभाषा–४७७; (ख) वर्णविशेषस्स्थानविशेषसम्बन्धः–४७८; (ग) वर्णानां स्थानानां सङ्ख्या–४७८; (घ) वर्णविशेषस्स्थानविशेषनिरूपणम्–४७९।
३. करणाधिकारः ५०६–५१६
(क) करणपरिभाषा–५०६; (ख) वर्णविशेषकरणविशेषसम्बन्धनिरूपणम्–५०८; (ग) वर्णविशेषकरणविशेषनिरूपणम्–५०८; (घ) करणोपसंहारविशेषविवरणम्–५१३।
४. प्रयत्नाधिकारः ५१६–५३७
(क) प्रयत्नपरिभाषा–५१६; (ख) प्रयत्नभेदाः–५१६; (ग) प्राणमानजप्रयत्नभेदौ–५१६; (घ) स्वरयन्तरजप्रयत्नस् तद्भेदाश् च–५१६; (ङ) आब्भ्यन्तरप्प्रयत्नस् तद्भेदाश् च–५१९; (च) वर्णविशेषाणाम् प्राणमानजयत्नस्स्य निरूपणम्–५२०; (छ) वर्णविशेषाणां स्वरयन्तरजयत्नस्स्य निरूपणम्–५२१; (ज)वर्णविशेषाणाम् आब्भ्यन्तरप्प्रयत्नस्स्य (=अन्तप्प्रयत्नस्स्य=आस्स्यप्प्रयत्नस्स्य) निरूपणम्–५२७।

५. वर्णस्वरूपसम्पत्त्यधिकारः ५३७
६. वर्णोच्चारणदोषविवेकाधिकारः ५३८–५५०
(अ) वर्णदोषवर्गीकरणम् ५३८–५३९
(१) आयदोषनिरूपणम्–५३९; (२) अपायदोषनिरूपणम्–५३९;
(३) व्यथनदोषनिरूपणम्–५३९ ।
(आ) दोषविशेषविषयवर्गीकरणम् ५३९
(इ) स्वरव्यञ्जनोभयगदोषोद्देशः ५३९–५४२
(१) निरस्तनिरूपणम्–५३९; (२) पीडननिरूपणम्–५४०;
(३) अम्बूकृतनिरूपणम्–५४०; (४) शूननिरूपणम्–५४१;
(५) ग्रस्तनिरूपणम्–५४१; (६) अनुनासिकनिरूपणम्–५४१;
(७) अनन्यवर्णतत्त्वकरणनिरूपणम्–५४२ ।
(ई) स्वरगतदोषोद्देशः ५४२–५४६
(१) अयथामात्तरवचननिरूपणम्–५४२; (२) दीर्घीकरणनिरूपणम्–५४३; (३) द्रुतनिरूपणम्–५४३; (४) अर्धकनिरूपणम्–५४३; (५) विकीर्णतत्त्वाऽभिव्यादानयोरैक्येन निरूपणम्–५४३; (६) सर्वावृतत्त्वनिरूपणम्–५४३; (७) कलत्त्वनिरूपणम्–५४३; (८) ध्मातनिरूपणम्–५४४; (९) एणीकृतनिरूपणम्–५४४; (१०) प्रगीतनिरूपणम्–५४४; (११) उपगीतनिरूपणम्–५४४; (१२) निर्हतनिरूपणम्–५४४; (१३) विकम्पितनिरूपणम्–५४४; (१४) व्यासनिरूपणम्–५४४; (१५) सन्दष्टनिरूपणम्–५४५; (१६) विषमरागतानिरूपणम्–५४५; (१७) अवलम्बितनिरूपणम्–५४५; (१८) ओष्ठ्याभतानिरूपणम्–५४५ ।
(उ) व्यञ्जनगदोषोद्देशः ५४६–५५०
(१) अनन्योन्यविरागनिरूपणम्–५४६; (२) लेशवचननिरूपणम्–५४६; (३) जिह्वाप्रथननिरूपणम्–५४६; (४) विक्लिष्टनिरूपणम्–५४६; (५) प्रतिहारनिरूपणम्–५४७;
(६) सकारनिभतानिरूपणम्–५४७; (७) बर्बरतानिरूपणम्–५४७;
(८) अतिस्स्पर्शनिरूपणम्–५४७; (९) जिह्वानतवचननिरूपणम्–५४८; (१०) लोमशश्यनिरूपणम्–५४८; (११) कण्वेडननिरूपणम्–५४८; (१२) श्वासाऽघोषनिभतयोरैक्येन

निरूपणम्–५४८; (१३) अनुनादनिरूपणम्–५४९; (१४) धारण-निरूपणम्–५४९; (१५) रक्तधारणनिरूपणम्–५४९ ।

षष्ठोऽध्यायः
सामनिरूपणम्

१. सामपरिभाषा ५५१
२. आदर्शरूपोच्चारणनिरूपणम् ५५१
३. हेयोच्चारणनिरूपणम् ५५६
४. पाठकगुणनिरूपणम् ५५८
५. पाठकदोषनिरूपणम् ५६०
६. उच्चारणपारुष्यादिनिराकरणोपायनिरूपणम् ५६०
७. वृत्तिनिरूपणम् ५६१–५६२
(क) द्रुतवृत्तिनिरूपणम्–५६२; (ख) मद्ध्यमवृत्तिनिरूपणम्–५६२; (ग) विलम्बितवृत्तिनिरूपणम्–५६२; (घ) वृत्तिविशेषविनियोगनिरूपणम्–५६२ ।
८. वाचस्स्थानादिनिरूपणम् ५६५–५६६
(क) वाचस्स्थानभेदाः–५६५; (ख) मन्द्रादिकाया वाचो विनियोगविशेषस्स्य निरूपणम्–५६५ ।
९. काकुनिरूपणम् ५६७
१०. विरामनिरूपणम् ५६९–५८५
(क) पदस्स्थवर्णमद्ध्यस्स्थविरामनिरूपणम्–५६९; (ख) सर्यं-युक्तव्यञ्जनमद्ध्यस्स्थ-विरामविशेषजन्य-सर्यं योगपिण्डविशेष-निरूपणम्–५७०; (ग) सर्यं योगपिण्डविशेषोद्देशः–५७१; (१) अयस्पिण्डनिरूपणम्–५७१; (२) दारुपिण्डनिरूपणम्–५७२; (३) ऊर्णापिण्डनिरूपणम्–५७३; (४) ज्वालापिण्डनिरूपणम्–५७४; (५) मृत्पिण्डनिरूपणम्–५७५; (६) वज्ज्रपिण्डनिरूपणम्–५७६; (७) वायुपिण्डनिरूपणम्–५७६; (घ) सर्यं-युक्तव्यञ्जनसङ्ख्याविचारः–५७७; (ङ) पदमद्ध्यस्स्थविराम-

निरूपणम्–५७७; (च) विवृत्तिरूपविरामनिरूपणम्–५७८; (छ) वाक्क्यान्त्यादिविरामनिरूपणम्–५८२; (ज) विसर्गोत्तरवर्तिविरामविचारः–५८४; (झ) स्थानकरणविमोक्क्षविवरणम्–५८४; (ञ) प्रत्त्यारम्भनिरूपणम्–५८५ ।

११. पदोच्चारणदोषनिरूपणम् ५८६

१२. वाक्क्योच्चारणदोषविशेषनिरूपणम् ५८९

सप्तमोऽद्ध्यायः

सन्तानिरूपणम्

१. सन्तान–संहितापदयोः पर्यायवाचिता ५९१

३. संहितानिरूपणम् ५९१

२. संहिताभेदनिरूपणम् ५९२

४. संहितायाः परिणामानावँ वर्गीकरणम् ५९३

५. शिक्क्षाशास्त्रविषयभूतसंहितानिरूपणम् ५९३–६०१

(क) पदनिरूपणम्–५९४; (ख) पदजातनिरूपणम्–५९४; (ग) नामादिपरिभाषाः–५९५; (घ) नामादिरङ्गनिरूपणम्–५९६; (ङ) नामादिगोत्त्रनिरूपणम्–५९६; (च) नामादिदेवतानिरूपणम्–५९६; (छ) नामादिस्स्वरसामान्न्यनिरूपणम्–५९७; (ज) पदशय्यानिरूपणम्–५९८; (झ) पदान्तगामिवर्णनिरूपणम्–५९९; (ञ) पदादिगामिवर्णनिरूपणम्–५९९; (ट) समानपदस्स्थानावँ वर्णविशेषाणाम् परस्परं सयँयोगित्त्वाऽसयँयोगित्त्वयोर् निरूपणम्–६०० ।

६. संहिताविशेषाधिकारः ६०१–७३२

(अ) स्वरसन्धिनिरूपणम् ६०१–६५४

(क) प्रश्श्लिष्टसन्धिषु दीर्घसन्धेर् निरूपणम्–६०१; (ख) दीर्घसन्ध्यपवादनिरूपणम्–६०३; (ग) प्रश्श्लिष्टसन्धिषु सन्ध्यक्क्षरीभावसन्धेः (गुणवृद्धिसन्धेः) तदपवादानाम् च निरूपणम्–६०३; (घ) सन्ध्यक्क्षरीभावाभावेऽपि गुणसन्धित्त्वेन

प्प्रसिद्धस्य सन्धिविशेषस्य निरूपणम्–६०५; (ङ) वृद्धि-सन्धितदपवादनिरूपणम्–६०९; (च) क्षेप्प्रसन्धि-(यण्सन्धि-) निरूपणम्–६१३; (छ) सन्ध्यक्क्षरविकारसन्धिनिरूपणम् (अयवायावः)–६१४; (ज) पूर्वरूपसन्धिनिरूपणम्–६१८; (झ) गोशब्द-सन्धिनिरूपणम्–६२०; (ञ) प्रकृतिभावसन्धिनिरूपणम्–६२३; (ट) एकारौकारप्प्रकृतिभावे विशेषः–६५३; (ठ) पदान्तस्स्थ-स्स्वरविशेषस्य स्वरे परेऽनुनासिकत्त्वम्–६५४ ।

(आ) उदात्तादिस्वरसंहितानियमनिरूपणम् ६५४

(इ) स्वरव्यञ्जनसंहितानिरूपणम् ६६१–६६७

(क) प्रकृतिभावः–६६१; (ख) दीर्घीभावः–६६१ ।

(ई) व्यञ्जनस्वरसंहितानिरूपणम् ६६७–६८०

(क) प्रथमतृतीयभाव-तृतीयप्रकृतिभावादिकम्–६६७; (ख) ङनण-द्वित्त्वम्–६६८; (ग) नकारस्य स्वररागताप्राप्त्या-दिकम्–६७०; (घ) नकारस्य रेफताप्राप्तिः–६७२; (ङ) मकारस्य प्रकृतिस्स्थता–६७३; (च) विसर्गस्य स्वरे परे विकारादयः–६७४ ।

(उ) व्यञ्जनसंहितानिरूपणम् ६८०–७३२

(क) पूर्वव्यञ्जन-विकाराऽविकारप्प्रधान-व्यञ्जन-सन्धि-निरूपणम्–६८०; (१) वर्गप्प्रथमवर्णाभिनिहितीभावादिकम्–६८०; (२) वर्गतृतीयवर्णविकारादिकम्–६८५; (३) तकारदकार-विकाराः–६८६; (४) नकारविकाराः–६८७; (५) मकार-विकाराः–६९३; (६) पदान्तस्स्थसकारविकारचर्चा–७००; (७) रेफजविसर्गविकाराः–७००; (८) रेफजाऽरेफजविसर्ग-विकाराः–७०३; (ख) व्यञ्जनोपजनप्प्रधानव्यञ्जनसंहितानिरूपणम्–७१०; (ग) परव्यञ्जनविकारिव्यञ्जनसन्धिनिरूपणम्–७१५; (१) तकारस्य टकारभावः–७१५; (२) नकार-स्य णकारभावस् तदपवादाश् च–७१६; (३) शकारस्य छकारभावः–७२०; (४) स्थास्स्तम्भोस् स्कम्भस्य च सकार-स्य लोपस् तकारभावो वा–७२२; (५) सकारस्य षकारभावस् तदपवादाश् च–७२३; (६) पूर्वपदान्तगसकारस्य षकारभावस् तदपवादाश् च–७२९; (७) हकारस्य वर्गचतुर्थभावः–७३२ ।

(ऊ) व्यञ्जनद्वित्वनिरूपणम् ७३२
७. पदपाठ–(पदसंहिता–)निरूपणाधिकारः ७५५
८. क्रमपाठ–(क्रमसंहिता–)निरूपणाधिकारः ७५९
९. क्रमजटादिविकृतिनिरूपणम् ७६२–७८२
(क) क्रमजटानिरूपणम्–७६९; (ख) क्रमशिखानिरूपणम्–७७३; (ग) क्रमदण्डनिरूपणम्–७७३: (घ) क्रमले(रे)खानिरूपणम्–७७५; (ङ) क्रममालानिरूपणम्(पुष्पमाला–पदमालाखण्डनञ् च)–७७५; (च) क्रमद्ध्वजनिरूपणम्–७७६; (छ) क्रमरथनिरूपणम्–७७७; (ज) क्रमघननिरूपणम् (शिखाघननिरूपणम्, घनवल्लभाऽपराऽभिध-पञ्चसन्धि-घनपाठोदाहरणञ् च)–७७९।

अष्टमोऽध्यायः

संस्कृतशिक्षाशास्त्रस्य आधुनिकशिक्षाशास्त्रेण सह तुलना

१. संस्कृतशिक्षाशास्त्राऽऽधुनिकशिक्षाशास्त्रप्रयोजनयोस् तुलना ७८३
२. संस्कृतशिक्षाशास्त्राऽऽधुनिकशिक्षाशास्त्रक्षेत्रयोस् तुलना ७८३
३. संस्कृतशिक्षाशास्त्राऽऽधुनिकशिक्षाशास्त्रस्वरव्यञ्जनपरिभाषातुलना ७८४
४. संस्कृतशिक्षाशास्त्राऽऽधुनिकशिक्षाशास्त्रवर्णवर्गीकरणादितुलना ७८४
५. संस्कृतशिक्षाशास्त्राऽऽधुनिकशिक्षाशास्त्रवस्तुनिर्णयसाधनतुलना ७८५

नवमोऽध्यायः

ग्रन्थोपसंहारो वैदिकशिक्षाशास्त्रमहत्त्ववर्णनपूर्वकः

१. वेदस्वरूपानुपालने वैदिकशिक्षाशास्त्रस्य परमोपकारकत्वम् ७८६

२. पाश्चात्त्यशिक्क्षाशास्त्रप्रगतौ वैदिकशिक्क्षा-
शास्त्रस्य हेतुत्त्वम् ७८६
३. वैदिकशिक्क्षाशास्त्रस्याऽनन्यसाधारणा विशेषाः ७८६
४. वैदिकशिक्क्षाशास्त्रस्योपयोगित्त्वमुपास्यत्त्वञ्च ७८७
५. ग्रन्थोपसंहारः ७८७

अनुबन्धाः

१. शौनकशिक्क्षा–७८८; २. शैशिरीयशिक्क्षा–७९१; ३. व्याडि-शिक्क्षा (विकृतिवल्ली)–८००; ४. चारायणीयशिक्क्षा–८०२; ५. कौह-लीयशिक्क्षा–८१९; ६. सर्वसम्मतशिक्क्षा–८२३; ७. पारि-शिक्क्षा–८३०; ८. आपिशलीयशिक्क्षा–८३८; ९. कतिपये प्रमुखाश् शिक्क्षाशास्त्रसम्बद्धाः पारिभाषिकाश् शब्दाः–८४१; १०. प्रस्तुतग्रन्थे आगतानि कति चन विशिष्टनामानि–८४३; ११. सङ्केता आधार-ग्रन्थसम्बद्धाः, सहायकग्रन्थसम्बद्धाः, सामान्याश् च–८४५।

कौण्डिन्न्यायनशिक्क्षा

(उपबन्धेनानुबन्धैश्चोपबृंहिता महाशिक्क्षा)

उपबन्धः

वेदाङ्ग–शिक्षा–शास्त्रस्य सङ्क्षिप्त इतिहासः

१. वेदमन्त्रसंहितासु वेदाङ्ग-शिक्षा-शास्त्रस्य बीजानि

शाकल-ऋग्वेद-मन्त्र-संहितायाम् एकस्याम् ऋचि[1] वाण्या व्यक्ततायाश् चतस्रः कक्ष्याः प्रदर्शिताः सन्ति। यद्द्यपि सा ऋक् पाणिनीय-व्याकरण-भाष्यकारेणाऽन्यथा व्याख्याता[2], तथापि माध्यन्दिनीय-वाजसनेयि-शतपथ-ब्राह्मणा-ऽनुसारन्[3] तत्र सरीसृपाणाम् पक्षिणाम् पशूनाञ् चाऽव्यक्तानाँ वाचाम् मनुष्याणाँ व्यक्ताया वाचश् च उल्लेखोऽस्ति। तत्र प्रथमायाम् उच्चतमायाङ् कक्ष्यायां स्पष्ट-स्वरव्यञ्जनविभागयुता मनुष्यवाक् ततो नीचायान् द्वितीयायाङ् कक्ष्यायां स्वरमयी पशुवाक् ततोऽपि नीचायान् तृतीयायाङ् कक्ष्यायां स्वरव्यञ्जनयोरस्पष्टेन विभागेन युक्ता पक्षिवाक् नीचतमायाञ् चतुर्थ्याङ् कक्ष्यायाञ् च स्वरव्यञ्जनविभाग-कल्पनाऽनर्हा सरीसृपवाक् स्थापिताऽस्ति। अतो व्यक्ताऽव्यक्त-वाणीविवेचने वर्णविभागयुक्ताऽयुक्त-वाणी-विवेचने च पुराकालेऽपि वर्तमानं सूक्ष्मञ् ज्ञानमियमृक् सूचयति। शाकल-ऋग्वेद-मन्त्र-संहिताया अन्न्यासु ऋक्षु अपि भाषासम्बद्धा विचाराः प्राप्यन्ते[4]। वेदभाषाविचार-

---

१. १।१६४।४५। २.पस्पशाह्निके। ३.स होवाच तुरीयन्तुरीयञ् चेन्न्मामविभजुस्तत्तुरीयमेव तर्हि वाङ्ङनिरुक्तवँ वदिष्यतीति तदेतत् तुरीयवँ वाचो निरुक्तयँ यन्न्मनुष्या वदन्त्यथैतत् तुरीयवँ वाचोऽनिरुक्तयँ यत्पशवो वदन्त्यथैतत् तुरीयवँ वाचोऽनिरुक्तयँ यद्द्वयांसि वदन्त्यथैतत् तुरीयवँ वाचोऽनिरुक्तयँ यदिदङ क्षुद्द्रं सरीसृपवँ वदति। तस्म्मादेतदृषिणाऽब्भ्यनूक्तम् – चत्त्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः। गुहात्त्रीणि निहिता नेङ्गयन्ति तुरीयवँ वाचो मनुष्या वदन्तीति। ४।१।३।१६,१७। ४. (क) देवीवँ वाचमजनयन्त देवास् तावँ विश्व-

सोपानस्स्य च वेदाङ्ग-शिक्क्षाशास्त्रम् प्रथमम् पदस्स्थानमिति ता अपि ऋचः पुराकालेऽपि भारतवर्षे वर्तमानवँ वेदाङ्ग-शिक्क्षा-शास्त्र-ज्ज्ञानं सूचयन्ति ।

माद्ध्यन्दिनीय-वाजसनेयि-शुक्क्लयजुर्वेद-मन्त्राऽऽर्षसंहितायां सङ्गृहीतायाम् ब्राह्म्मणात्मिकायामेकस्स्याङ्ग कण्डिकायां "सरस्स्वत्त्याऽ अग्ग्रजिह्व्वम्"[1] इति प्राप्प्यते । एतच् च वाण्ण्या एकम् मुक्ख्यङ्ग करणन् जिह्व्वाग्ग्रं सूचयति । यद्द्यपि तस्स्यामेव कण्डिकायां श्रूयमाणाश् शादादयो देवता अप्प्रसिद्धा इति तत्प्रीणनानि अङ्गानि वाणीसम्बद्धत्त्वेन उपात्तानि न वेति निर्णेतुन् न शक्क्यते तथापि तत्त्रोपात्तानि दन्त-दन्तमूल- बर्स्व- दंष्ट्रा-जिह्व्वा-तालु-हन्न्वा·ऽऽस्स्यानि[2] अपि वाण्ण्युच्चारणसम्बद्धान्न्येवाऽङ्गानीति अयमपि वेदमन्त्रसंहितांशो वेदाङ्ग–शिक्क्षाशास्त्रसम्बद्धानावँ वर्णोच्चारण-स्स्थानकरणादीनावँ विषयाणां सूचनङ्ग करोतीति विवेचका मन्न्यन्ते[3] । वाण्ण्या मानसस्स्य पक्क्षस्स्यापि अस्स्यां संहितायामुल्लेखः प्राप्प्यते[4] ।

आत्त्रेय-तैत्तिरीय-कृष्ण–यजुर्वेद–संहितान्तर्गते ब्राह्म्मणभागे अव्व्याकृताया वाच इन्द्रकृतवँ व्याकरणं श्रूयते[5] । व्याकरणस्स्य च वेदाङ्ग-शिक्क्षाशास्त्र-पूर्वकत्त्वादेतेनाऽपि वेदाङ्ग-शिक्क्षाशास्त्रस्स्य पुराकालेऽपि भारतवर्षे वर्तमानन् ज्ज्ञानं सूच्च्यते । व्याकरणस्स्य शिक्क्षाशास्त्रपूर्वकत्त्वन् च स्फुटीकरिष्ष्यते[6] । शिक्क्षाशास्त्रप्प्रयो-

---

रूपाम् पशवो वदन्ति । सा नो मन्द्रेषमूर्ज्जन् दुहाना धेनुर्व्वागस्मानुप सुष्टुतैतु । ८।१००।११; (ख) सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत । अत्रा सखायः सख्यानि जानते भद्रैषालँ लक्ष्मीर्न्निहिताऽधिवाचि । १०।७१।२; (ग) ४।२१।५; १०।७१।१; १०।७१।३ ।

१.२५।१। २.शादन् दद्द्भिरवकान् दन्तमूलैर् मृदम् बर्स्स्वैसूत्तेगान् दंष्ट्राब्भ्यां सरस्स्वत्त्याऽअग्ग्रजिह्व्वन् जिह्व्वाया उत्त्सादमवक्क्रन्देन तालु वाजं हनुब्भ्यामप आस्स्येन२५।१। ३. PIAI, p.6. ४. सम्म्यक्क्स्रवन्ति सरितो न धेनाऽअन्तर्हृदा मनसा पूयमानाः । १७। ९४ । ५. वाग् वै पराच्च्यव्व्याकृतावदत् ते देवा इन्द्रमब्ब्रुवन्निमान् नो बाचवँ व्याकुर्व्विति...तामिन्द्रो मद्ध्यतोवक्क्रम्म्यव्व्याकरोत्। ६।४।७ । ६. अत्त्रैव द्वितीयस्स्य प्रकरणस्स्यान्ते मुण्डकोपनिषत्प्रोक्तवेदषडङ्गविचारे ।

जनसूचकन् त्वष्टुरुपाख्यानमपि तत्र श्रूयते[1]।

साम्नाम् अतिगहनञ्च गानञ्च खलु वर्ण-स्वर-मात्रादीनावँ विशिष्टञ्ज्ञानवँ विना न सम्यक् प्रवर्तयितुं शक्यते, न च सम्यग् रक्षितुं शक्यते इति च सामगानपरम्परयाऽपि वेदाङ्ग-शिक्षाशास्त्र-ज्ज्ञानपरम्परा सूच्यते।

पैप्पलादाथर्ववेदमन्त्रसंहितायामपि वाचश् श्रेष्ठ्यस्य, तस्या रिरक्षिषायाश् च प्रतिपादनम् प्राप्यते[2]। वेदवाण्या विवेचने तस्या रक्षणस्य प्रयत्ने च वेदाङ्ग-शिक्षाशास्त्रम् प्रथमत आवश्यकम् भवतीति एतस्मादपि पुराकालेऽपि भारतवर्षे वेदाङ्ग – शिक्षाशास्त्र-ज्ज्ञानमुन्नतकोटिकमेवाऽऽसीदित्यनुमातुं शक्यते।

२. ब्राह्मणारण्यकोपनिषत्सु वेदाङ्ग–शिक्षाशास्त्रस्य विषयाः

यथा ब्राह्मणेभ्य एव अर्थवादान् हित्वा विधीन् समाहृत्य ऋषिभिः कल्पशास्त्रम् प्रणीतन् तथैव शिक्षाशास्त्रमपि प्रणीतमिति ब्राह्मणानि तु शिक्षाशास्त्रस्याऽऽकरभूतान्येवेतिप्रतीयते। तथाहि विष्णुमित्रोऽपि ऋग्वेदप्रातिशाख्यवर्गद्वयवृत्तौ "यस्मात् केवलैर् वेदवाक्यैर् न शक्यतेऽनुष्ठातुवँ विक्षिप्ततत्वाद् वेदवाक्यानाञ्च गूढार्थत्वाच् च; अतः कविभिराचार्यैर् वेदार्थकुशलैर् वेदार्थेभ्यो निष्कृष्य कर्मार्थं सुबोधानीमानि विद्द्यास्थानानि प्रवर्तितानि– शिक्षा कल्पो व्याकरणन् निरुक्तञ् छन्दो ज्योतिषन् धर्मशास्त्रम् पुराणन् न्यायविस्तरो मीमांसादीनि। अत आचार्यो भगवाञ् छौनको वेदार्थवित् सुहृद् भूत्वा ब्राह्मणेभ्योऽर्थवादानुत्सृज्य विधिं समाहृत्य पुरुषहितार्थम् ऋग्वेदस्य शिक्षाशास्त्रञ्च कृतवानिति प्रदर्शनार्थम् (इदं संहितोपनिषद्विषयस्स्यादौ निबन्धनम् इति) वर्णयन्ति"[3] इति। महाभारतेऽपि षण्णावँ वेदाङ्गानावँ वेदादुद्धरणम् प्रतिपादितमस्ति[4]।

तत्र ऐतरेयब्राह्मणे श्रूयमाणन् न्यूङ्खन[5] शिक्षाशास्त्रस्योन्नतञ् ज्ञानं सूचयति पुरातनानामपि भारतवर्षीयाणामार्याणाम्।

---

१. २।५।२। २. यो मे अनुनयँ यो मे रसवँ वाचं श्रेष्ठाञ् जिघांसति। इन्द्रश् च तस्मा अग्निश्च अस्तरं हिङ्कारमस्यताम्। १०।११।८। ३. १।४। ४. शान्ति ३८३।९२। ५. २१।३।

एतच् च आश्वलायनश्रौतसूत्रकृते न्यूङ्खविवरणेऽनुपदम् प्रतिपादयिष्यमाणे पठिते स्फुटम् भविष्यति ।

ऐतरेयारण्यके वर्णानां स्वरास् स्पर्शा अन्तस्था ऊष्माण इति भेदा वर्णितास् सन्ति । तत्र वर्णोपासनायाङ्क कृता व्यवस्था[1] च स्वराणाम् प्राधान्यस्य (स्वराट्त्वस्य) व्यञ्जनानाम् पराश्रितत्वस्य ऊष्मणां श्वासप्रधानत्वस्य च सूचिका दृश्यते । शोभनायोच्चारणाय च दन्तोष्ठङ्क कीदृशमावश्यकमिति च ततो ज्ञातुं शक्यते[2] । तत्र श्रूयमाणानि संहितालक्षणानि[3] च अक्षरविभागसिद्धान्तविषयेऽतीव महत्त्वपूर्णानि दृश्यन्ते । तत्र वाण्या मानसस्य पक्षस्याऽपि वर्णनम्[4] अस्ति ।

माध्यन्दिनीयवाजसनेयिशतपथब्राह्मणे चतुर्विधेषु प्राणिषु क्रमेण वर्तमाना वाण्या विविधाश् चतस्रस्[5] कक्ष्यास् स्पष्टरूपेणप्रतिपाद्य तत्र मनुष्येषुस्थितावँ वाण्या[5] कक्ष्यान् निरुक्ततत्वेन (स्फुटत्वेन) प्रतिपाद्य पशु-पक्षि-सरीसृपेषुस्थिता वाण्या[5] कक्ष्या अनिरुक्ततत्वेन (अस्फुटत्वेन) च प्रतिपाद्य उपर्युल्लिखिताया

---

१. (क) तस्यैतस्यात्मनःप्राणऊष्मरूपमस्थीनि स्पर्शरूपम्मज्जानः स्वररूपम् मांसलँ लोहितमित्येतदन्यच् चतुर्थमन्तस्थारूपमिति ह स्माऽऽह ह्रस्वो माण्डूकेयः। ३।२।१; (ख) यान्यक्षराण्यवोचामाहानि तानि यानूष्मणोऽवोचाम रात्रयस् ताः । ३।२।२, (ग) पृथिव्या रूपं स्पर्शा अन्तरिक्षस्योष्माणो दिवः स्वरा अग्ने रूपं स्पर्शा वायोरूष्माण आदित्यस्य स्वराः। ३।२।५ । २. ओष्ठापिधाना नकुली दन्तैः परिवृता पविः। सर्वस्यै वाच ईशाना चारु मामिह वादयेदिति वाग्रसः। ३।२।५ । ३. (क) अथ खल्वाहुर् निर्भुजवक्त्राः पूर्वमक्षरम् पूर्वं रूपमुत्तरमुत्तररूपयँ योऽवकाशः पूर्वोत्तररूपे अन्तरेण सा संहितेति । ३।१।५; (ख) अथ वयम् ब्रूमो निर्भुजवक्त्रा इति ह स्माऽऽह ह्रस्वो माण्डूकेयः पूर्वमेवाक्षरम् पूर्वरूपमुत्तरमुत्तररूपयँ योऽवकाशः पूर्वोत्तररूपे अन्तरेण येन सन्धिवँ विवर्तयति येन स्वराऽस्वरवँ विजानाति येन मात्रामात्रावँ विभजते सा संहितेति । ३।१।५; (ग) अथ हाऽस्य पुत्र आह मध्यमः प्रातीबोधीपुत्रोऽक्षरे खल्विमे अविकर्षन्ननेकीकुर्वन्यथावर्णमाह तद् याऽसौ मात्रा पूर्वोत्तररूपे अन्तरेण सन्धिविज्ञपनी साम तद् भवति सामैवाहं संहिताम् मन्य इति । ३।१।५ । ४. अथ हाऽस्य पुत्र आह

ऋचो[1] व्याक्ख्यानमिव कृतमस्ति[2]। एतेन वर्णात्मिकायास् स्फुटमर्थम् प्रतिपादयन्त्या वाण्याः ध्वन्न्यात्मिकायास् स्फुटमर्थम् अप्प्रतिपादयन्त्याश् च वाण्यास् तत्तर विवेको विहितो विज्ज्ञायते। तत्तर वाण्या मानसस्य पक्वषस्याऽपि प्रतिपादनङ कृतन् दृश्यते[3]। शिक्क्षाशास्तरप्प्रयोजनसूचकन् त्वष्टुरुपाक्ख्यानमपि तत्तराऽस्ति[4]। अग्निहोत्तरे उच्चारणस्य वैगुण्यादपि यजमानस्य आयुषो वा प्प्रजाया वा अवखण्डनम् भवतीति च तत्तर स्फुटम् प्रतिपादितमस्ति[5]। वेदाङ्गविदाम् ब्राह्म्मणानावँ वेदरहस्यवित्त्वमपि भवतीति एतद् ब्राह्म्मणं सूचयति[6]। अतोऽपि शिक्क्षाशास्तरमाहात्म्यन् तत्तरस्स्वीकृतमिति गम्म्यते।

तैत्तिरीयारण्यके तु "शीक्षावँ व्याख्यास्यामः। वर्णस्स्वरः। मात्रा बलम्। साम सन्तानः। इत्युक्तश् शीक्षाध्यायः"[7] इति शिक्क्षाशास्तरस्य मुक्ख्यानि प्रकरणानि सङ्गृह्य्य प्रतिपादितानि सन्ति। तत्तर वर्ण इति अकारादिवर्णसमाम्म्नायप्रकरणम् स्वर इति उदात्तादिस्वरनिरूपणप्रकरणम् मात्तरेति ह्रस्स्वदीर्घवृद्धप्लुतमात्तराविवेचनप्रकरणम् बलमिति स्थानकरणनादाद्द्यनुप्प्रदानादिनिरूपणप्रकरणम् सामेति उच्चारणगुणदोषविवेकप्रकरणम् सन्तान इति च संहिताप्रकरणम् (आर्षपदक्रमसंहिता–विधिप्रकरणरूपञ्) च सङ्गृहीतानीति आचार्या व्याचक्क्षते[8]। एतेन च शिक्क्षाशास्तरस्य विकसितम् पूर्णं स्वरूपं सूच्च्यते। अर्थप्प्रधानस्य उपनिषत्काण्डस्य प्रारम्भेऽपि शीक्क्षाद्ध्यायस्स्योपदेशश् शिक्क्षाशास्तरस्य वेदार्थनिरूपणेऽतीवाऽऽवश्श्यकतां सूचयति च। एतच् च शङ्करभगवत्पादेनाऽपि स्फुटीकृतमस्ति[9]।

सामवेदाद्ध्यायिनाङ्ग कौथुमानां षष्ठे ब्राह्म्मणे छान्दोग्य्यब्राह्म्-

---

ज्येष्ठो मनः पूर्वरूपवँ वागुत्तररूपम् मनसा वा अग्रे सङ्कल्पयत्यथ वाचा व्याहरति। ३।१।१।

१. अस्स्य उपबन्धस्स्य प्रथमे पृष्ठे प्रथमा टिप्पणी द्रष्टव्व्या। २. तत्तरैव तृतीया टिप्पणी द्रष्टव्व्या ३. (क) अपरिमिततरमिव हि मनः परिमिततरेव हि वाक्। १।४।४।७; (ख) न वै मया (मनसा) त्वङ्ग (वाङ्ग) किञ्चनानभिगतवँ वदसि। १।४।५।९; (ग) यद्द्वै मनसा द्ध्यायति तद्द्वाचा वदति। १२।९।१।१३॥ ४. १।६।३।८। ५. २।३।४।१८। ६. ११।४।३।२०। ७. ७।२। ८. उक्तस्स्य शीक्क्षाद्ध्यायस्स्य शङ्करभगवत्पादकृतं सायणकृतञ् च व्याक्ख्यानन् द्रष्टव्व्यम्। ९. पूर्वटिप्पण्युक्तवँ व्याक्ख्यानन् द्रष्टव्व्यम्।

मणे (उपनिषद्ब्राह्म्मणे) अन्तर्गतायाल् लोकेऽपि सुप्प्रसिद्धायाञ् छान्दोग्योपनिषदि (रहस्योपनिषदि) शिक्क्षाशास्त्रसम्बद्धानां स्वरोष्मस्स्पर्शघोषवदग्ग्रस्ताऽनिरस्ताऽविवृताऽनभिनिहितशब्दानाम् प्रयोगा उपलब्भ्यन्ते[1]। तस्स्यामेवोपनिषदि शङ्करभगवत्पादव्याक्ख्यानुसारम् ब्रह्म्मविद्द्याशब्देन वेदषडङ्गान्तर्गतं शिक्क्षाशास्त्रमपि उपात्तवँ विज्ज्ञायते[2]। वाण्ण्या मानसपक्क्षस्स्य च तत्तर सूचना समुपलब्भ्यते[3]। सप्तमे संहितोपनिषद्ब्राह्म्मणे च अदुस्स्पृष्टोच्चारणम्[4], हस्तस्स्वराः[5], द्रुतादिवृत्तयः[6], सुष्ठुस्स्वरादिप्प्रयोगः[7], अक्क्षरगतस्स्वरव्यञ्जनविवेकः[8], उदात्तादयस् स्वराः[9], वृद्धकृष्टादयो वर्णधर्माः[10], विद्द्यादाननियमाश्[11] च वर्णितास् सन्ति।

सामवेदाद्ध्यायिनामेव जैमिनीयानाम् ब्राह्म्मणेऽन्तर्गते जैमिनीयोपनिषद्ब्राह्म्मणे (गायत्तरोपनिषद्ब्राह्म्मणे) अपि वाण्ण्या मानसस्स्य पक्क्षस्स्य प्रतिपादनमस्ति[12]।

अथर्ववेदगोपथब्राह्म्मणेऽपि शिक्क्षाशास्त्रसम्बद्धानावँ वर्णाक्क्षरस्वरमात्तरास्थानकरणानुप्प्रदान–शिक्क्षुकषडङ्गविच्शैक्क्ष्यशब्दानामुल्लेखः, शिक्क्षाशास्त्रानुसार्य्युच्चारणगौरवसूचनञ् च प्राप्प्यते[13]।

अथर्ववेदीयायाम् मुण्डकोपनिषदि अपरस्स्या विद्द्याया विवरणे षट्सु वेदाङ्गेषु शिक्क्षा प्रथमम् पट्ठ्यते[14]। एतच् च वेदाङ्गेषु शिक्क्षाया ज्येष्ठतावँ विज्ज्ञापयति। युक्तितो विचारणेऽपि शिक्क्षा वेदाङ्गेषु ज्येष्ठैव दृश्श्यते। तथा हि शिक्क्षाशास्त्रसाहाय्येन स्वरवर्णानुपूर्वीनिर्ग्रहपूर्वकवँ वेदस्स्य स्वरूपेऽवधृते एव तस्स्य प्रयोगाय कल्पऽ प्रकल्पते। शिक्क्षाशास्त्रान्तर्गतसंहितानियमसाहाय्येन वेदवाक्क्येषु पदविभजने कृते सत्त्येव पदप्प्रकृतिप्रत्त्ययविभागादिकवँ व्याकरणस्स्य कार्य्यमपि प्रवर्त्तितुं शक्नोति। अतऽ कल्पव्व्याकरणादिब्भ्यश् शिक्क्षाशास्त्रमेव ज्येष्ठम्। यद्द्यपि "संहिता पदप्प्रकृतिः"[15] इत्त्युक्त्वा पदपाठम् प्रकृतिम् मत्त्वा प्रातिशाक्ख्यस्स्य संहिताधिकारऽ प्रवर्त्तते

---

१. २।२२।३–५। २.७।१।२। ३.७।३।१–२। ४.१।१७ (द्विजराजव्याक्ख्या द्रष्टटव्व्या) ५.तत्तरैव। ६.१।२१। ७.२।५। ८.२।२४। ९. ३।२-८, १०. तत्तरैव। ११. ३।९–२०। १२. १।१३।१।१-७। १३. १।१।२४-२७। १४. १।१।५। १५. ऋप्रा. २।१ ('पदप्प्रकृतिस्संहिता, पदप्प्रकृतीनि सर्वचरणानाम् पारिषदानि' इति निरुक्तकारवचनमपि (१।६।१) अत्तर स्मरणीयम्)।

इत्त्याचार्यशौनकेनोक्तम्, आचार्यपतञ्जलिना च "न लक्क्षणेन (व्याकरणेन) पदकारा अनुवर्त्याः पदकारैर् नाम लक्क्षणमनुवर्त्यम् यथालक्क्षणम् पदङ्ग कर्तव्यम्"[1] इत्युक्तमिति व्याकरणात् पदपाठ× कनीयान् ततोऽपि शिक्क्षा कनीयसी इति प्राप्नोति तथापि सम्यग् विचारे कृते तु तैत्तिरीयारण्यकानुसारं संहिताविषयस्य शिक्क्षाशास्त्रप्रकरणताया निश्चयात् संहितापाठस्याऽनादिताया× पदपाठस्य कृतकतायाश्च निर्णयात् 'तत्सत्यम्'[2] 'तद्विष्णोः'[3] 'तच्चिकेतत्'[4] 'तच्छयँयोः'[5] 'तन्न'[6] 'तज्जनाय'[7] इत्यादौ संहिताशास्त्रेण तकारादे× प्रकृतिभावादेर् व्यवस्थायाङ्ग कृतायां सत्त्यामेव 'तत् । सत्यम्' 'तत् । विष्णोः' 'तत् । चिकेतत्', 'तत् । शयँयोः' 'तत् । न' 'तत् । जनाय' इत्यादिरूपस्य वाक्क्यस्थपदविभागस्य सम्भवाद्, वाक्क्यस्थपदविभागे जाते एव वाक्क्यपदप्रकृतिप्रत्त्ययादिविश्श्लेषणादिकस्य व्याकरणकार्यस्य प्रवृत्तेस् सम्भवाद् व्याकरणात् पदपाठो ज्येष्ठः, पदपाठाच् च संहिताशास्त्रञ् ज्येष्ठमिति विज्ज्ञायते । एवञ् च व्याकरणादपि शिक्क्षाया ज्येष्ठत्त्वं सिद्ध्यति । आचार्यशौनकेन च पदविभजने पदसयँयोजने च समानरूपेण सम्भवत्त्यपि संहितानियमानामुपयोगे मन्दव्युत्पादनायैव अब्भ्युपगमसिद्धान्तेन संहिताम् पदप्रकृतिकां स्वीकृत्त्य 'संहिता पदप्रकृतिः' इत्युक्तम् । अन्न्यैरपि पार्षदकारै× प्रायस् तथैवोक्तम् । तदेव चाऽनूदितन् निरुक्तकारेणापि । आचार्यदुर्गव्याक्ख्यानमप्यत्त्रैवानुकूलम्[8] । तैत्तिरीयप्रातिशाक्ख्यकारेण तु संहिताम् पदानाम् प्रकृतिं स्वीकृत्त्यैव षत्त्व–सत्त्व–णत्त्व–नत्त्वादिविधय× प्रदर्शिताः । कौहडीयशिक्क्षायामपि "संहिता प्रकृति× प्रोक्ता पदस्यैतत् क्रमस्य तु । जटाया× प्रकृतिस् त्वेष एवन् नित्त्यन् निबोधत"[9] इति संहिताया पदस्य प्रकृतित्त्वं स्फुटमुक्तम् । एतेन "पदप्रकृतिस् संहिता, पदप्रकृतीनि सर्वचरणानाम् पार्षदानि"[10] इति यास्कवचनसारोऽपि व्याकृत एव । आचार्यपतञ्जलिनाऽपि "यद्द्वयमेवं सुहृत् किमन्न्यान्न्यप्प्येवञ्जातीयकानि नोपदिशति ? कानि पुनस् तानि ? स्थानकरणानुप्रदानानि । व्याकरणन् नामेयमुत्तरा विद्द्या । सोऽसौ छन्दश्शास्त्रेष्वभिविनीत

---

१. ३।१।१०९ वा. २; ६।१।२०७; ८।२।१६,वा.५। २. शा. ऋ. म. सं. १।१।६। ३. तत्त्रैव १।२२।२०। ४. तत्त्रैव १।३५।६। ५. तत्त्रैव। १।४३।४। ६. तत्त्रैव १।८९।४। ७. तत्त्रैव १।१६६। १२। ८. निरुक्ते १।६।१। ९. श्लो. ५४। १०. निरुक्ते १।६।१।

उपलब्ध्याऽधिगन्तुमुत्सहते"[1] इति वदता शिक्क्षाया व्याकरणाज् ज्येष्ठत्वं स्वीकृतमेव। व्याकरणात् पदपाठस्स्यापि ज्येष्ठत्वमेवेति हि पाणिनीयव्याकरणानुसारमविद्द्यमानेऽपि अवग्ग्रहस्स्याऽऽधारे 'ऋषिभिः'[2] इत्यादौ 'ऋषिऽभिः' इत्यादिकमवग्ग्रहङ्ग कुर्वन्ति पदकाराः। तस्माद् युक्त्याऽपि ज्येष्ठैव वेदाङ्गेषु शिक्क्षा।

३. कल्पसूत्तरादिषु उपलब्ध्यमाना वेदाङ्गशिक्क्षाशास्त्रसमुन्नतेस् सूचनाः

आश्श्वलायनश्रौतसूत्तरे न्यूङ्खनस्स्य यत् सनिदर्शनवँ विवरणम् प्राप्प्यते तत् तत्काले वर्त्तमानावँ वेदाङ्गशिक्क्षाशास्त्तरस्स्य प्रकृष्टामुन्नतिं सूचयति। तथा हि स्वरविशेषस्स्यस्स्थाने 'ओ३ **ओँ ओँ ओँ ओँ ओँ ओ३ ओँ ओँ ओँ ओँ ओँ** ओ३ **ओँ ओँ ओँ** इत्त्यादिप्प्रकारकमुच्चारणन् न्यूङ्खनमुच्च्यते[3]। तत्तर प्रथम ओकारx प्लुत उदात्तश्च, ततx परे पञ्च अर्धौकारा (ह्रस्स्वा ओकाराः) अनुदात्ताः, सप्तम ओकारx प्लुत उदात्तश् च, ततx परे पञ्च अर्धौकारा अनुदात्ताः त्रयोदश ओकारx प्लुत उदात्तश् च,ततx परे त्रय अर्धौकारा अनुदात्ता भवन्तीत्त्यादि। इयञ् च व्यवस्था स्वराणाम् मात्त्राया उदात्तादिस्स्वरस्स्य वर्णैक्क्यवर्णभेदयोश् च विषये सूक्क्ष्मं स्पष्टञ् च ज्ज्ञानमपेक्क्षते इतीयवँ व्यवस्था प्राचीनानाम् भारतवर्षीयाणामार्याणावँ वेदाङ्गशिक्क्षाशास्त्तरविषयज्ज्ञानस्स्योन्नतेस् साक्क्षिणी दृश्श्यते।

पारस्करगृह्य्यसूत्तरे सिष्णासुनाऽद्ध्येतव्व्येषु विषयेषु षण्णावँ वेदाङ्गानामुल्लेखोऽस्ति[4]। वसिष्ठधर्मसूत्तरे षडङ्गविदx पङ्क्तिपावनत्त्वन् धर्मनिर्णायकपरिषद्घटकत्त्वञ् च प्रतिपादितमस्ति[5]। गौतमधर्मसूत्तरेऽपि राजव्व्यवहाराधारभूतेषु शास्त्तरेषु वेदाङ्गानामुल्लेखोऽस्ति[6]। आपस्तम्बधर्मसूत्तरेऽपि षड्भिरङ्गैस् सहितस्स्य वेदस्स्याऽद्ध्येता मधुपर्कमर्हतीत्त्युक्तम्[7] अस्ति। तत्त्राङ्गानामुल्लेखे क्रमस् तु वैदिकात् क्रमाद् भिन्नः। तत्तर हि छन्दxकल्पः व्याकरणम् ज्योतिषम् निरुक्तम् शीक्क्षा छन्दोविचितिरिति क्रमः। छन्दx प्रयोगकल्पनयोपस्कुरुते इति छन्दxकल्पx कल्पसूत्तरमिति कल्पशास्त्रमेव तत्तर छन्दxकल्प इत्त्युक्तम्। विष्णुधर्मसूत्तरेऽपि त्रिंशेऽद्ध्याये वेदाङ्गा-

---

१. पा.व्या.भा. १।२।३२। २. शा.ऋ.म.सं. १।१।२। ३. ७।११। १, २,३,४। ४. २।६। १,५,६। ५. ३।२२–२३। ६. २।२।१९। ७. २।४।१।५–१३।

द्ध्ययनेन अद्ध्येत्तरा पितॄणामन्नेन कर्तव्या तृप्तिः कृता भवती-त्युक्तमस्ति ।

वाल्मीकीये रामायणे रामस्य वेदवेदाङ्ग-तत्त्वज्ञत्त्वं[१] वेदाङ्गेषु निष्ठितत्त्वम्[२] च प्रतिपादितम्; अयोद्ध्याया वेदवेदाङ्गविद्-द्विजोत्तमवत्त्वेन माहात्म्यम् प्रतिपादितम्[३]; दशरथाश्वमेधे ऋष्यशृङ्गादिभिश् शिक्षाशास्त्रानुसारिभिरक्षरैस् समन्वितैर् मन्त्रैश्[४] शक्रादीनामाह्वानङ्ग कृतमिति वर्णितम्[५], तत्र यज्ञे समवेतानान् द्विजानां सर्वेषां षडङ्गवित्त्वम् च प्रतिपादितम्[६]; लङ्कायां स्थितानाम् ब्रह्मराक्षसानामपि षडङ्गसहितवेदवित्त्वं वर्णितम्[७]। एतेन वाल्मीकिसमयेऽपि वेदस्य षण्णामङ्गानान् तदन्तर्गताया शिक्षायाश् च विद्द्यासु महत्त्वपूर्णं स्थानमभूदिति स्फुटम् भवति ।

महाभारतेऽपि वेदाङ्गानाम् बहुषु स्स्थलेषु समुल्लेखः प्राप्यते[८]। तत्र 'क्रमम् प्रणीय शिक्षाम् च प्रणयित्त्वा स गालवः (बभौ)'[९] इत्युक्त्वा गालवस्य माहात्म्ये शिक्षाप्रणेतृत्त्वन् निमित्ततयोल्लिखितमिति ततोऽपि तत्कालेऽपि शिक्षाशास्त्रस्य माहात्म्यमुत्कृष्टमेवाभूदिति गम्यते ।

याज्ञवल्क्यस्मृत्यादिस्मृतिग्रन्थेषु[१०] विष्णुपुराणादिषु पुराणग्रन्थेषु[११] च विद्द्यास्स्थानत्त्वेन धर्मस्स्थानत्त्वेन च वेदाङ्गानामुल्लेखः प्राप्यते इति शिक्षाया अपि विद्द्यास्स्थानत्त्वन् धर्मस्स्थानत्त्वम् च तत्र स्वीकृतमितिस् स्पष्टम् भवति ।

श्रुतर्षियास्ककृते निरुक्तेऽपि धर्मज्ञानकरणमन्त्रज्ञानाय वेदाङ्गानां समाम्नानम् प्रवृत्तमिति वर्णितमिति[१२] तत्समयेऽपि वेदाङ्गभूतायाश् शिक्षाया भूरि माहात्म्यमभूदिति विज्ञायते ।

आचार्यपाणिनितः पूर्वमेव शिक्षाद्ध्यायिनां शिक्षाविदाम् च महत्त्वन् तादृशीं स्थितिम् प्राप्तमभूद् यत् तेषाम् पृथङ्नामप्प्रतिलम्-

---

१. १।१।१४, २।२।३५। २. ५।३५।१४। ३. १।५।२३; १।६।१५। ४. "कर्मणि च मन्त्राणामुच्चारणप्प्रकारं शिक्षयतीति (शिक्षा)" इति हरदत्तोऽपि। –आ. ध. २।४।१।११। ५. १।१४।८। ६. १।१४।२१। ७. ५।१८।२ ८. १।१।६६; २।५।३; ३।६४।१७; ७।१९८।१; १२।३७।११; १३।२२।१२; १४।८८।२६ इ०। ९. १२।३४२।११४। १०. १।३। ११. विष्णुपु. ३।६।२८–२९; भाग. ३।१२।४६–४८; ११।२१।३६–४०। १२. १।६।४।

भोऽभूत् । अत एवाऽऽचार्यपाणिनेः करमादिगणे[1] शिक्षा पठ्यते । ततश् च शिक्षामधीते वेद वेत्त्यर्थे शिक्षक इति प्रयोगोऽन्वाख्यातो भवति । गोपथब्राह्मणे तु अस्मिन्नर्थे शिक्षुकशब्दः प्राप्यत इति पूर्वमेव सूचितम् ।

आचार्य- पतञ्जलिरपि- "पुराकल्प एतदासीत् संस्कारोत्तरकालम् ब्राह्मणा व्याकरणं स्माऽधीयते, तेभ्यस् स्थानकरणनादानुप्रदानजज्ञेभ्यो वैदिकाश् शब्दा उपदिश्यन्ते (स्म)"[2] इत्युक्त्वा वेदाद्ध्ययनात् पूर्वमेव व्याकरणस्य तत्पूर्वविद्द्याया वर्णस्थानकरणनादाऽनुप्रदानादिज्ञानदायिन्याश् शिक्षायाश् चाऽद्ध्ययनस्य प्रचलनम् पुराकल्पे एवाभूदिति समुल्लिखतीति सुचिरन्तने काले एव शिक्षाशास्त्रं समुन्नतमभूदिति विज्ञायते ।

४. पार्षदाख्याः प्रातिशाख्यापरपर्याया ग्रन्थास् ततः प्राचीना वाऽपि तथाविधा एव ग्रन्थाश् शिक्षाशास्त्रस्य प्राचीनतमाः पौरुषेया ग्रन्थाः

उपर्युद्धृतात् तैत्तिरीयारण्यकशीक्षाद्ध्यायात्[3] खलु वर्णोच्चारणादिपद्धतेः प्रतिपादकम् मुख्यैष् षड्भिः प्रकरणैर् युक्तं शिक्षाशास्त्रम् भारते वर्षेऽतिप्राचीने काले एव विकसितमभूदितिज्ञायते । किन्तु तैष् षड्भिः प्रकरणैर् युक्तास् सर्ववेदशाखालोकसाधारणतया प्रवृत्ताश् शिक्षाशास्त्रसामान्यसिद्धान्तप्रतिपादकाः प्राचीना ग्रन्थास् तु एतर्हि नोपलब्ध्यन्ते । एतादृशा ये केचन ग्रन्था अद्द्यत्वे प्राप्यन्ते ते सर्वेऽपि यदि नाम नाऽत्त्यन्तमर्वाचीनास् तथापि विद्द्यारसिकेषु तत्तद्विद्द्यानाम् परिशीलने प्रभूतं समयल् लगयत्सु जनेषु विरलेषु, सङ्क्षेपरुचिष्वेव जनेषु बहुलेषु जातेषु रचिता एवोपलब्ध्यन्ते; यतो हि तेषु ग्रन्थेषु प्रकृतिप्रत्त्ययादिसंहिताविधिना सह पदान्तपदादिसंहिताविधेरपि तन्त्रेणैव प्रसङ्गाच् चाऽपि पाणिनीयादिषु व्याकरणेषु प्रतिपादितत्वात् संहिताविधिर् व्याकरणेनैव गतार्थ इति कृत्वा स परित्त्यक्तो दृश्यते[4] । केषुचिच् शिक्षाग्रन्थेषु तु प्रातिशाख्या-

---

१. ४।२।६१ । २. पा. व्या. भा., पस्पशाह्निके ।
३. अस्य उपबन्धस्य द्वितीयम् प्रकरणन् द्रष्टव्यम् । ४. "सन्तानस् संहिता, 'वायवायाहि' (ऋग्. १।२।१) इत्त्यत्तर अवादेशः, 'इन्द्राग्नी आगतम्' (ऋग्. ३।१२।१) इत्त्यत्तर प्रकृतिभावः; एतच् च व्याकरणेऽभिहितत्वाच् शिक्षायामुपेक्षितम्" इति ऋग्वेद-

ऽनुसरणमेव संहिताविधिविषये प्राप्यते । तथापि केचन विचारकास् सामान्यास् शिक्षाग्रन्था एव प्रथमं रचिता अभूवन्, ततो वेदचरण-विशेषेषु समन्विताः तत्तच्चरणगतोत्सर्गापवादात्मक-दीर्घकाय-नियम-युताः पार्षदाख्याः प्रातिशाख्याग्रन्था अस्तित्वमागता इति विचा-रयन्ति[1] । किन्तु वेदस्स्वरूपप्रयोगार्थरहस्यानाम् अञ्जनाय रक्षणाय चैव वेदाङ्गानि समाम्नातानि[2] इति प्रथमन् तत्तद्वेदचरणसम्बद्धाः पार्षदाख्याः प्रातिशाख्यापरपर्यायाश् शिक्षाग्रन्था एव श्रुतर्-षिभिः प्रणीताः, तत्पश्चादेव वेदलोकसाधारणाश् शिक्षाशास्त्रसामान्य-विषयसिद्धान्तप्रतिपादकाश् शिक्षाग्रन्थास् सञ्जक्षेपरुचीनाल् लौकि-कानाञ् जनानाञ् कृते विद्वद्भिर् विरचितास् स्युरिति वयम् युक्ततर-मुत्पश्यामः । विशिष्टा वेदाध्यायिन एव प्रातिशाख्यानि पठन्ति स्स्मेति ते प्रातिशाख्यानामध्ययनात् प्रागेव वर्णराशिवँ वर्णक्रम-मञ् च जानन्ति स्स्मेति तयोः प्रातिशाख्येषूपेक्षायामुपलभ्यमानायामपि सत्त्यान् न तावता प्रातिशाख्यानां शिक्षाग्रन्थानन्तरापेक्षितत्वं सिद्ध्येत् । शुक्लयजुर्वेदप्रातिशाख्ये वर्णलोपागमविकारप्रकृतिभावान् संहितानियमान् स्वरविचारादींश्च शिक्षाविषयान् शिक्षाया अविष-यानिव कृत्वा 'अथ शिक्षाविहिताः'[3] इत्युक्त्वा वर्णस्स्थानकरणप्रतिपाद-नमपि वर्णस्स्थानकरणादिप्रतिपादनात्मकस्य शिक्षाप्रकरणस्य[4] शिक्षेति लौकिकीम् प्रसिद्धिमुपादाय प्रवृत्तल् लाक्षणिकव् वेदि-तव्यम् । यदि तु 'अथ शिक्षाविहिताः' इति आ शास्त्रसमाप्तेरधिकारस् स्यात् तर्हि तु पार्षदस्य (प्रातिशाख्यस्य) शिक्षातो भेदोऽ नादरणीय एव स्स्यात् । न चेदानीमुपलभ्यमानेभ्यः प्रातिशाख्येभ्यः प्राचीन उपर्युक्तप्रकारकः कश्चन वेदलोकसाधारणश् शिक्षाग्रन्थः प्राप्यते । अतो यदि एतर्हि उपलभ्यमानेभ्यः प्रातिशाख्येभ्यः प्राचीनाश् शिक्षाग्रन्था अभूवन् तर्हि तेऽपि उपलभ्यमानप्राति-

---

भाष्यभूमिकायाम् आगता सायणोक्तिरप्यत्तराऽनुसन्धेया (प्र० भा० पृ० २५) ।

१. CSIPOIG, p.5; PIAI, p. 5. २. निरुक्ते १।६।४। ३. शु. य. प्रा. १।२९ । ४. प्राचीने कालेऽपि लौकिका जनास् स्वस्स्वप्रयोजनानुसारं शास्त्रेभ्यः प्रकरणानि उद्धृत्य तावतैव स्वस्स्वव्यहारन् निर्वहन्ति स्स्म, तथा च शास्त्रमेव विप्रकीर्ण-ताङ् गच्छति स्स्मेति कामसूत्रवचनादपि विज्ञायते (१।१।११–१३)

शाक्ख्यसदृशा एवाऽभूवन्निति वक्तुं शक्क्यते। प्रातिशाक्ख्येषु आग्निवेश्श्यादीनाम् बहूनामाचार्याणां स्मरणमपि[1] एतमेव पक्क्षमुपोद्वलयति। पूर्वोक्तेन आगमेन[2] औचित्त्येन च शिक्क्षाशास्त्रस्स्यैव वेदाङ्गेषु ज्येष्ठतायाम् प्रमाणितायां सत्त्याम् पार्षदस्स्य (प्रातिशाक्ख्यस्स्य) शिक्क्षाशास्त्रत्त्वेन वेदाङ्गेषु ज्येष्ठत्त्वे सत्त्येव आचार्यकात्त्यायनस्स्य "वृद्धवँ वृद्धिः"[3] (वृद्धवँ वेदाङ्गेषु ज्येष्ठमिदं शास्त्रम् पठतो वृद्धिर् भवति) इति वचनमपि उपपन्नतरम् भवति। तस्मादुपलब्ध्यमानाऽ पार्षदाक्ख्याऽ प्रातिशाक्ख्यापरपर्याया ग्रन्था एव, ततऽ प्राचीना वाऽपि तथाविधा ग्रन्था एव शिक्क्षाशास्त्रस्स्य प्राचीनतमाऽ पौरुषेया ग्रन्था इति वक्तुं शक्क्यते।

प्रातिशाक्ख्यम् इति पदञ् च शाखायां शाखायाम् प्रतिशाखाम्, प्रतिशाखम् भवम् प्रातिशाक्ख्यम् इत्त्यन्न्वाक्ख्यायते पाणिनीयेन व्व्याकरणेन[4]। एतेन च तासुतासु शाखासूपलब्ध्यमानानां शिक्क्षाशास्त्रसम्बद्धानावँ विषयाणाम् प्रतिपादकं शास्त्रमेव प्रातिशाक्ख्यमिति विज्ज्ञायते। अत्त्र शाखापदञ् चरणपरम्। चरणशब्दश् चाऽवान्तरशाखायुतमहाशाखाबोधक इति विवेचकाः[5]। अत एव च ऋग्वेदेऽपि शैशिरीयाऽऽदिशाखाऽनुशाखासाधारणम् प्रातिशाक्ख्यन् दृश्श्यते। तथा चोव्वटोऽपि शैशिरीयाम्म्नायप्प्रधानमपि[6] ऋग्वेदप्रातिशाक्ख्यवँ व्याचक्क्षाण उदाहरणानि शाकलऋग्वेदसंहितात एव ददाति। शैशिरश् च शाखाभेदप्प्रवर्त्तकेषु पञ्चसु शाकल्ल्यशिष्ष्येष्ष्वन्न्यतम इति विष्णुमित्त्रेण पुराणवचनोपष्टम्भेन उक्तम्[7]। इदानीन्तना दशग्ग्रन्थिनश् शाकला आश्श्वलायनीया वाऽपि ऋग्वेदिनोऽपि शौनकप्प्रणीतं शैशिरीयाम्म्नायप्प्रधानमेव प्रातिशाक्ख्यं स्वेषु दशसु ग्रन्थेषु एकतमग्ग्रन्थत्त्वेन उपाददते[8]। गार्ग्यगोपालयज्ज्वनाऽपि ऋग्वेदप्रातिशाक्ख्यं शाकलबाष्कलशाखासाधारणमिति उक्तम्[9]। वाजसनेयिचरणे च पञ्चदशानां शाखानां साधारणमेकमेव प्रातिशाक्ख्यमुपलब्ध्यते[10]। तैत्तिरीयचरणे च औखेय–खाण्डिकेया–ऽऽत्त्रेयादि-

---

१. एतेषामाचार्याणामुल्लेखऽ 'प्राचीनाश् शिक्क्षाकाराः' इति प्रकरणेऽत्त्रैव करिष्ष्यते। २. मु. उ. १।१।५। ३. शु. य. प्रा. १।१६९, २।६५ इ.। ४. २।१।६, ४।३।५९; मा. धा. वृ. १।९०। ५. वै. वा. इ., प्र. भा., पृ. १७३। ६. ऋ. प्रा. व. ७। ७. तत्त्रैव। ८. ऋ. घ. सा., पृ. ८४। ९. तै. प्रा. वै. व्या. ४।११। १०. प्र. सू. अ. भा. २।१।

शाखानुशाखासाधारणमेकमेव तैत्तिरीयप्रातिशाख्यमस्ति । एवञ्च प्रातिशाख्येषु कासु चित् तत्तच्चरणमात्रविषयासु व्यवस्थासु सतीष्वपि सन्त्येव काश् चन सर्ववेदशाखालोकसाधारण्योऽपि व्यवस्थाः । नागोजिभट्टेनापि एवमेव स्वीकृतमिति प्रतीयते[1] ।

पार्षदमिति च प्रातिशाख्यस्यैव प्राचीनन् नाम । तथाहि आचार्य-यास्कः "पदप्रकृतीनि सर्वचरणानाम् पार्षदानि"[2] इत्याह स्म । 'पार्षदकृतिरेषा तत्तरभवताम्'[3] इति पाणिनीयव्याकरणभाष्यकारोऽपि । तद्व्याख्याने उद्द्योतकारश् च 'शास्त्रविशेषाद्ध्यायिनां समवाय× परिषत् पर्षद् वा तत्तर भवा कृतिरित्यर्थः' इति । विष्णुमित्तरोऽपि 'इदं शास्त्रम् पार्षदाख्यमखिलङ कृत्स्नमुत्तरत्तर वक्ष्ये वक्ष्याम इत्यर्थ':[4] इति । उव्वटव्याख्यायामपि 'इतिश्शरीपार्षदव्याख्यायावँ वज्जरटसुतोव्वटकृतौ परिभाषा प्रथमम् पटलम्'[5] इत्यादिकम् प्राप्यते । एवञ् च पार्षदशब्दस्य समाम्नायज्ज्ञानाम् परिषदा निर्णीतं शास्त्रमिति यौगिकोऽर्थः, योगरूढ्या च तादृशं शिक्षाशास्त्रमित्यर्थ उपलभ्यते ।

५. प्रातिशाख्यानां शिक्षाग्रन्थत्वम्

प्रातिशाख्यानि वैदिकव्याकरणान्यपीति केचन प्राचीना× प्रातिशाख्यव्याख्याकारा अपि मन्यन्ते[6] । किन्तु वाक्यान्तर्गतानाम् पदानाङ कर्तृकर्मादिकारकक्रियादिसम्बन्धस्य प्रकृतिप्रत्ययकल्पनयाऽवान्तरपदविभागेन पदस्स्वभावविशेषप्रतिपादनेन चाऽनूवाख्यानेन एवम्-

---

१. बृ. श. शे., प्र. भा., पृ. ३२–३३ । २. निरुक्ते १।६।१ । ३. पा. व्या. भा , द्वि. आ., एओङसूत्रे । ४. ऋ. प्रा., व. वृ. ७ । ५. ऋ. प्रा. १।१०३ । ६. 'शिक्षाछन्दोव्याकरणैस् सामान्यैनोक्तलक्षणम् । तदेवमिह शाखायामिति शास्त्रप्रयोजनम्' इति ऋग्वेदप्रातिशाख्यव्याख्यारम्भे उव्वटः । 'वृद्धमिदं शास्त्रमन्यानि शास्त्राण्यपेक्ष्य,शिक्षाविहितवँ व्याकरणविहितञ् चाऽस्मिन् शास्त्रे उभययँ यत× प्रक्रियते' इत्यपि स एवाऽऽह (शु. य. प्रा. व्या. १।१६९); गार्ग्यगोपालयज्ज्वाऽपि तैत्तिरीयप्रातिशाख्यवैदिकाभरणे 'शीक्षाव्याकरणानायँ यदयवँ विवरणात्मकः। ग्रन्थस् ततोऽत्तर नाऽतीव शब्दसङ्कोच इष्यते' (१।२१) इति,'व्याकरणप्रधानं ह्येतच् छास्त्रम् (१९।५) इति, 'व्याकरणप्रधानत्वात् प्रातिशाख्यस्य' (२४।४) इति च ।

प्रकारकवँ् वाक्क्यमेवम्प्रकारकेऽर्थे प्रयुज्ज्यते साधु वा भवति, इदम् एतादृशवँ् वा पदम् अस्मिन्नेतादृशे वाऽर्थे प्रयुज्ज्यते साधु वा भवतीति च प्प्रतिपादनं हि व्याकरणस्स्य मुक्ख्यङ्ग कार्यम्, तच् च प्रातिशाक्ख्येषु नोपलब्भ्यत इति प्रातिशाक्ख्यानि नैव व्व्याकरणानीति निश्चेतुं शक्क्यते। व्याकरणस्स्य मुक्ख्यङ्ग कार्यमुक्तविधमेवेति तैत्तिरीयश्श्रुत्त्यापि सूचितम्[1] पाणिनीयव्व्याकरणपरिशीलनेनापि बोद्धुं शक्क्यम्, विद्द्वद्भिरपि स्वीकृतम्[2]। तैत्तिरीयप्रातिशाक्ख्यव्याक्ख्याकारस् सोमयार्यस् तु प्रातिशाक्ख्यञ् छन्दोभाषाक्ख्यवँ् वेदलक्क्षणविशेषम् मन्न्यते इति कस्तूरिरङ्गाचार्येणोक्तम्[3], तथापि सोमयार्यलेखात् तत् स्फुटन् न प्प्रतीयते। यदि सोमयार्येण गणितेषु उपाङ्गेषु आगतञ् छन्दोभाषापदवँ्[4] वेदलक्क्षणपरन् तर्हि तद् वेदलक्क्षणम् प्रतिज्ज्ञासूत्त्रादिसदृशञ् चरणविशेषान्तर्गतशाखाविशेषाद्ध्ययनधर्मविशेषविधायकं शास्त्त्रवँ् वेदभाष्ष्यादिकवँ् वा भवितुम् अर्हति न तु प्प्रातिशाक्ख्यमिति वयम् मन्न्यामहे। यदि तु प्रातिशाक्ख्यमुपाङ्गम् भवेत् तर्हि तु 'प्रातिशाक्ख्येन सह शिक्क्षाया विरोधे प्रातिशाक्ख्यानुसारमेव व्यवस्स्था स्वीकार्या, प्रातिशाक्ख्यमेव तत्त्र बलीयः'[5] इति शिक्क्षाकाराणामुक्तिरपि व्याकुप्प्येत; वेदसम्मताच् शिक्क्षारूपाद् वेदाङ्गाद् वेदेऽनुल्लिखितस्स्योपाङ्गम्स्य बलीयस्त्वस्स्याऽन्न्याय्यत्वात्। प्रातिशाक्ख्यानां शिक्क्षाशास्त्रग्रन्थत्त्वेऽपि तानि परित्त्यज्ज्य तदानीन्तनलोकप्रसिद्ध्यनुसारलँ् लक्क्षणया शैशिरीयशिक्क्षा–पाणिनीयशिक्क्षा–याज्ज्ञवल्क्यशिक्क्षा–

---

१. "तामिन्द्रो मद्ध्यतोऽनक्क्रम्म्य व्व्याकरोत्"। तै. सं. ६।४।७। २. (क) वा. प. १।११–२६ (स्वोपज्ज्ञवृत्तिसहितम्); (ख) केषाञ् चित् पदावधिकमन्न्वाक्ख्यानवँ् वाक्क्यावधिकमेकेषाम्। –वा. प. वृ. १।२६ पृ. ६२; (ग) "व्याकरणमपि प्रकृतिप्रत्त्ययाद्द्द्युपदेशेन पदस्स्वरूपतदर्थनिश्चयायोपयुज्ज्यते" –ऋ. भा. भू. पृ. २६। ३. तै. प्रा. भू. पृ. १–४। ४. अनुपदञ् चानुपादञ् छन्दोभाषासमन्न्वितम्। मीमांसान्न्यायतर्काश् च उपाङ्गानि विदुर् बुधाः॥ –तै.प्रा.तिर.र. २४।६। ५. (क) तस्मात् तत्तत्समाम्म्नाये प्रातिशाक्ख्याऽविरोधतः। कार्यं सर्ववँ् व्यवस्स्थाप्प्यं शिक्क्षाव्याकरणोदितम्॥ पद्द्द्या. आपि. शि., श्लो. ५; (ख) शिक्क्षा च प्प्रातिशाक्ख्यञ् च विरुद्ध्येते परस्परम्। शिक्क्षैव दुर्वलेत्त्याहुस् सिंहस्स्यैव मृगी यथा॥ –स. स. शि., श्लो ४९।

व्यासशिक्क्षा–नारदीयशिक्क्षा–माण्डूकिशिक्क्षादिष्वेव शिक्क्षाशब्द-प्रयोगो नाऽनुपपन्नः ।

यदि प्रातिशाख्यानि न व्याकरणानि न चोपाङ्गानि तर्हि प्रातिशाख्यानि कस्य विद्द्यास्स्थानस्य ग्रन्थाः ? इति चेत्, प्रातिशाख्यानि शिक्क्षारूपस्य विद्द्यास्स्थानस्य ग्रन्था इति भणामः । तथाहि प्रातिशाख्येषु तैत्तिरीयारण्यकोक्तानावँ वर्णस् स्वरो मात्त्रा बलं साम सन्तान इत्त्येतेषां शीक्क्षाद्ध्यायविषयाणामेव भूम्ना प्रतिपादनम् प्राप्यते ।

तत्त्र प्रथमम् ऋग्वेदप्रातिशाख्यस्य पर्यालोचने कृते तत्त्र प्रथमे पटले वर्णानामुपदेशो मात्त्राविचारो वर्णस्स्थाननिरूपणञ् च प्राप्यते । द्वितीयाऽऽदिषु एकादशान्तेषु पटलेषु संहिताविषयोऽस्ति । तत्त्र च तृतीये पटले उदात्तादयस् स्वरास् तत्सन्धयश् चोक्ताः । संहिताप्रसङ्गे आगतौ पदपाठक्क्रमपाठावपि संहिताविधिविषयावेव । एतच् च वर्गद्द्वयेऽपि सूचितम्[1] । यद्द्यपि तत्त्र अखण्डपदसम्बद्धाश् शिक्क्षाशास्त्रीयपदान्तपदादिसंहिताधिकारबहिर्भूता अपि षत्त्व–टुत्त्व–द्वित्त्व–दीर्घतादयः केचन विषया अपि आगताः, तथापि "पदान्त–पदाद्द्योरेव विकारशास्त्रम् प्रवर्तते"[2] इति औत्सर्गिकीम् प्रतिज्ञामुल्लङ्घ्य प्रतिपादितास् ते प्रसक्तानुप्रसक्तन्न्यायेनैव प्रतिपादिताः प्रतीयन्ते । द्वादशे पटले संहिताशेषरूपः पदान्तपदादिगतवर्णादीनावँ विचारोऽस्ति । त्रयोदशे पटले बाह्य्याब्भ्यन्तरप्रयत्नयोर् विचारोऽस्ति । अयञ् च शिक्क्षाशास्त्रीय–बलप्रकरणान्तर्गत एव विषयः । तस्मिन्नेव पटले मन्द्र–मद्ध्यादिवाचस्स्थानानान् निषादादिस्स्वराणान् द्रुतादिवृत्तीनाञ् च विचारोऽस्ति । सोऽपि शिक्क्षाशास्त्रीयसाम–(साम्म्य-) प्रकरणान्तर्गतो विषयः । चतुर्दशे पटले वर्णाद्द्युच्चारणदोषा विचारितास् सन्ति । ते च शिक्क्षाशास्त्रविषयशेषभूता एव । पञ्चदशे पटले च अद्ध्यापनाद्ध्ययनविधिरस्ति । सोऽपि सम्प्रदायोच्चारणशुद्धिविधानशेषतयैवाऽऽगतो विज्ज्ञायते । ततः परेषु त्रिषु पटलेषु च्छन्दसो विचारोऽस्ति । स च विषयस् स्वतन्त्रस्य विद्द्यास्स्थानस्याऽस्ति। तथापि उपर्युक्तेषु संहिताविधिषु दीर्घसन्धिप्रकरणे ऋक्पादेषु षष्ठे सप्तमे दशमे चाऽक्क्षरे विशेषा उक्ता इति तदर्थमेव परि-

---

१. ऋ. प्रा. व. पृ. १८ (सन्धेर् विवर्तनमित्त्यादौ) ।
२. ऋ. प्रा. २।२; २।५ ।

शिष्टतयाऽयमपि विषयोऽत्र सङ्गृहीत इति बुद्ध्यते। चतुर्दशपटलान्ते शिक्षाशास्त्रस्य सप्रयोजनत्वम् प्रतिपादितम् प्राप्यते इति तत्रैव मुख्यग्रन्थार्थ-समाप्तिः प्रतीयते। ततः परश्च ग्रन्थोऽनुबन्धरूप एव प्रतीयते। तदेवम् ऋग्वेदप्रातिशाख्यम् मुख्यतया शिक्षाशास्त्र-ग्रन्थरूपमेवेति सुवचम्।

शुक्लयजुर्वेदप्रातिशाख्यविषयपर्यालोचने तस्यापि शिक्षा-ग्रन्थत्वं स्फुटम् भवति। तथाहि तत्र प्रथमेऽध्याये वर्णोत्पत्ति-प्रक्रियानिरूपणम्, वेदाध्ययनविधिः, मात्रानिरूपणम्, वर्णस्थान-करणनिर्देशः, अक्षरविचारः, संहिताजन्यविकारादिलक्षणानि; द्वितीयेऽध्याये उदात्तादिस्वरसम्बद्धाः नियमाः, तृतीये चतुर्थे चाऽध्याये संहिताविधयः क्रमपाठनियमाश्च, पञ्चमे अवग्रहनियमाः, षष्ठे च स्वरनियमविशेषाः पदविशेषाश्च, सप्तमे संहितासम्बद्ध एव विषयः, अष्टमे च वर्णसमाम्नायादयो विषयास् सन्ति। एवञ्चाऽत्राऽपि शिक्षाशास्त्रविषया एव प्राधान्येन प्रतिपादिता दृश्यन्ते।

तैत्तिरीय-प्रातिशाख्यस्य विषयाणाम् परीक्षणे कृते तस्यापि शिक्षाशास्त्रग्रन्थत्वं स्फुटम् भवति। तथाहि तत्र प्रथमेऽध्याये वर्णसमाम्नायः, वर्णवर्गीकरणम्, मात्राविचारः, स्वरविचारश्च; द्वितीयेऽध्याये वर्णोत्पत्तिप्रकारादिकम्, स्थानकरण-निरूपणादिकम्, तृतीयादिषु षोडशान्तेषु अध्यायेषु संहिताविषयाः, सप्तदशेऽध्याये अनुस्स्वाराद्द्च्चुच्चारणप्रकाराः, अष्टादशेऽध्याये ओङ्कारोच्चारणविधिः, एकान्नविंशविंशयोरध्याययोस् स्वरविशेषविचाराः एकविंशेऽध्याये व्यञ्जनस्य स्वराङ्गताया विचारः, प्रचय-नासिक्य-स्वरभक्तिनिरूपणम्, द्वाविंशे त्रयोविंशे चाऽध्याये वर्णविशेषोत्-पत्तिहेत्वादिविचारः, वाचस्स्थानविचारः, क्रुष्टादिस्वरविचारादयश्च, चतुर्विंशेऽध्याये च पदाक्षरवर्णाङ्गसंहिताविचारो वेदाध्यायिभिर् वैदिकाचार्यसभाप्रवेशार्थिभिश्च वेदितव्यानाव् विषयाणाव् विचारश्चेति विषयाः प्रतिपादितास् सन्ति। एते च सर्वेऽपि विषयाश् शिक्षा-शास्त्रसम्बद्धा एवेति अस्य प्रातिशाख्यस्याऽपि शिक्षाग्रन्थत्वं सुखेन निश्चेतुं शक्यम्।

ऋक्तन्त्राख्ये सामवेदप्रातिशाख्येऽपि प्रथमे प्रपाठके वर्णोत्-पत्तिप्रक्रियाविचारः, वर्णाः, आब्भ्यन्तर-बाह्ययप्रयत्नौ, वर्ण-वर्गाऽनुसारव् वर्णोपदेशः, अक्षरसमाम्नायाऽऽचार्यपरम्परा; द्वितीये

प्रपाठके वर्णस्थानानि, घोषसोष्मानुनासिक्यव्यवस्था, सयँयुक्तव्यञ्जनस्वर-व्यवस्था, मात्राविचारः, अक्षरव्यवस्था, स्वरव्यवस्था; तृतीये चतुर्थे पञ्चमे च प्रपाठके समस्ताऽसमस्तपदान्तविषयास् संहिताविधयः, सकारागम - व्यञ्जनद्वित्व – षत्व-णत्वानि तु पाणिनीयव्याकरणानुसार्य्यखण्डपदविषयाण्यपीत्येते विषयास् सन्ति। अतोऽस्य प्रातिशाख्यस्याऽपि 'प्रधानेन व्यपदेशा भवन्ति' इति न्यायाच् शिक्षाग्रन्थत्वन् निश्चेतुं सुखेन शक्यते।

शौनकीयचतुरध्यायिकानामकेऽथर्ववेदप्रातिशाख्येऽपि प्रथमेऽध्याये वर्णाः, वर्णवर्गाः, अक्षरविभागः, मात्राविचारः, वर्णविकारविशेषाः; द्वितीयेऽध्याये संहिताधिकारे पदान्तस्स्पर्शविकाराः, विसर्गविकारादयश् च; तृतीयेऽध्याये संहिताजन्यदीर्घत्वव्यवस्था, व्यञ्जनद्वित्वव्यवस्था, स्वरसन्धयः, स्वरितस्स्वरविशेषाः, नतिः; चतुर्थेऽध्याये पदपाठे उपसर्गयोगव्यवस्था, अवग्रहविचारः, पदपाठे क्रमपाठे च प्रगृह्यस्य व्यवस्था, क्रमपाठस् तत्प्रयोजनानि चेति मुख्या विषयास् सन्ति। पदपाठक्रमपाठयोरपि संहिताविधिविषयत्वादिमे सर्वेऽपि विषयाश् शिक्षाशास्त्रविषया एव। अत इदमपि प्रातिशाख्यं शिक्षाशास्त्रग्रन्थरूपमेवेति सुखेन वक्तुं शक्यम्।

एवमेव तत्तद्ग्रन्थविषयपरीक्षणेन अथर्ववेदप्रातिशाख्यफुल्लसूत्रादीनामपि अव्याकरणग्रन्थत्वं शिक्षोपकारकग्रन्थत्वञ् च बोद्धुं शक्यम्।

प्रातिशाख्यानां शिक्षाशास्त्रग्रन्थत्वमधोलिखितैः प्रमाणैरपि निश्चेतुं शक्यते। तथाहि ऋग्वेदप्रातिशाख्ये वर्गद्वये प्रातिशाख्यप्रयोजनप्रतिपादने "गुरुत्वलँ लघुता साम्यं ह्रस्स्वदीर्घप्लुतानि च। लोपागमविकाराश् च प्रकृतिर् विक्रमः क्रमः॥ स्वरितोदात्तनीचत्वं श्वासो नादस् तथोभयम्। एतत् सर्वन् तु विज्ञेयञ् छन्दोभाषामधीयता॥ छन्दोज्ञानमाकारम् भूतज्ञानञ् छन्दसावँ व्याप्तिं स्वर्गामृतप्राप्तिम्। अस्य ज्ञानार्थमिदमुत्तरत्र वक्ष्ये शास्त्रमखिलं शशिरीये॥ पदक्रमविभागज्ञो वर्णक्रमविचक्षणः। स्वरमात्राविशेषज्ञो गच्छेदाचार्यसम्पदम्"[1] इति येषावँ विषयाणाञ् ज्ञानाय प्रातिशाख्यमद्ध्येतव्यमित्युक्तन् तेषु बहवो विषयाश् शिक्षाशास्त्रसम्बद्धा एव। तत्र छन्दोज्ञानमित्यत्र छन्दः-

१. ऋ. प्रा., व., पृ. २५–२८।

पदवँ विष्णुमित्तरेण यद्द्यपि गायत्त्रयादिच्छन्दःपरतया नीतन् तथापि तत्त्रापि छन्दोभाषामित्त्यत्तरेव वेदपरमेवेत्त्यस्माकम् प्रतिभाति । अत ऋग्वेदप्रातिशाख्यवँ वर्गद्द्वयकारस्स्यापि शिक्षाशास्त्रत्त्वेनैवाऽभिमतमित्त्यवसीयते । ततः पूर्वन् तु विष्णुमित्तरेणाऽपि "अत आचार्यो भगवान् छौनको वेदार्थवित् सुहृद् भूत्वा ब्राह्मणेभ्योऽर्थवादानुत्सृज्य विधिं समाहृत्त्य पुरुषहितार्थम् ऋग्वेदस्य **शिक्षाशास्त्रं** कृतवानिति प्रदर्शनार्थवँ वर्णयन्ति"[1] इत्त्युक्तम् । ऋग्वेदप्रातिशाख्यचतुर्दशपटलान्ते शिक्षाशास्त्रस्स्य वेदाङ्गत्त्वेनाऽनिन्द्यतायाः प्रतिपादनमपि ऋग्वेदप्रातिशाख्यस्स्य शिक्षाग्रन्थत्त्वमेव दृढयति । अन्यथा शिक्षाशास्त्रस्स्याऽनिन्द्यत्त्वं शिक्षाशास्त्रेणैव प्रतिपादितं स्यादिति तत्प्रतिपादनमत्तरोपेक्षणीयमेवाऽभविष्यत् । तैत्तिरीयप्रातिशाख्येऽपि तद्ग्रन्थप्रयोजनप्रतिपादनावसरे "गुरुत्त्वलँ लघुता साम्यं ह्रस्स्वदीर्घप्लुतानि च । लोपागमविकाराश् च प्प्रकृतिर् विक्क्रमः क्रमः ।। स्वरितोदात्तनीचत्त्वं श्वासो नादोऽङ्गमेव च । एतत् सर्वन् तु विज्ज्ञेयन् छन्दोभाषामधीयता ।। पदक्क्रमविशेषज्ज्ञो वर्णक्क्रमविचक्क्षणः । स्वरमात्त्राविभागज्ज्ञो गच्छेदाचार्यसंसदम्"[2] इत्त्युक्तमिति पूर्ववदस्स्य ग्रन्थस्स्यापि शिक्षाग्रन्थत्त्वं स्फुटम् भवति । वाक्क्यपदीयस्स्य स्वोपज्ज्ञविवृतौ भर्तृहरिणाऽपि प्रातिशाख्यानां शिक्षाग्रन्थत्त्वं सूचितम्[3] । मधुसूदनसरस्स्वतीत्त्याख्येन यतिनाऽपि– "तत्त्र सर्ववेदसाधारणी शिक्षा अथ शिक्षाम् प्रवक्क्ष्यामीत्त्यादिनवखण्डात्मिका पाणिनिना प्रकाशिता, प्रतिशाखन् च भिन्नरूपाः प्रातिशाख्यसञ्ज्ञिता अन्न्यैरेव मुनिभिः प्रदर्शिताः"[4] इत्त्युक्त्वा प्रातिशाख्यानां शिक्षात्त्वमुक्तम्। मित्त्रमिश्रेणाऽपि "तत्त्र अथ शिक्षाम् प्रवक्क्ष्यामीत्त्यादिपञ्चखण्डात्मिका पाणिनिप्रोक्ता, प्रतिशाखन् चाऽन्न्याऽन्न्या तत्तन्मुनिप्रणीता प्रातिशाख्याऽभिधा च"[5] इत्त्युक्तम् । आधुनिका अन्न्ये विवेचका अपि प्रातिशाख्यानि शिक्षा एव मन्न्यन्ते[6] ।

उपर्य्युक्तात् प्रमाणनिवहादयन् निष्कर्ष आयाति यत् तैत्तिरीयाऽऽरण्यकानुसारिणां शिक्षाशास्त्रप्रतिपाद्द्यविषयाणां सम्म्यग्-

---

१. ऋ. प्रा., व. वृ. पृ. २५ । २. तै. प्रा. २४।५, ६ । ३. वा. प. १।११२–११५ । ४. म. स्तो. टी., श्लो. ७ । ५. वी. मि., प. प्र., पृ. २० । ६. (क) सामतन्त्रभूमिका (Intro.), पृ. २–३; (ख) पा. शि. शि. स. स., पृ. ७–८ ।

ज्ञानस्याऽभावात्, पाणिनीयव्याकरणे शिक्षाशास्त्रविषयस्य संहिताविधेरपि व्याकरणविषयेण प्रकृतिप्रत्ययसंहिताविधिना सहैव प्रायेण तन्त्रेणैव प्रतिपादनस्य दर्शनात्, शिक्षात्वेन प्रसिद्धासु पाणिनीयशिक्षादिषु अर्वाचीनासु शिक्षासु च संहिताविधेः पाणिनीयव्याकरणेनैव गतार्थत्वेनोपेक्षितत्वाच्[1] च सामान्यतया संहिताविधिवं व्याकरणविषयम् मन्यमानैः कैश्चन प्रातिशाख्यव्याख्याकारैरन्यैश्च वैदिकैः संस्कृतज्ञैश्च प्रातिशाख्येषु संहिताविधिबाहुल्यन् दृष्ट्वा विवेकशैथिल्यात् प्रातिशाख्यानि वैदिकव्याकरणानीत्युक्तम्; वस्तुतस्तु प्रातिशाख्यानि शिक्षाग्रन्था एवेति ।

६. प्रातिशाख्यानि

यद्द्यपि शाखायां शाखायाञ् चरणेचरणे वा एकैकम् प्रातिशाख्यन् तत्तच्छाखापर्षदा तत्तच्चरणपर्षदा वा व्यवस्थापितं स्यादिति संभाव्यते, यतो हि तत्तच्छाखागतानान् तत्तच्चरणगतानावं वा विशिष्टानां शिक्षाशास्त्रसम्बद्धानावं विषयाणाम् प्रतिपादनाय[2] प्रतिशाखम् प्रतिचरणवं वा तदावश्यकमभूत्, तथापि न सर्वासां शाखानाञ् चरणानावं वा प्रातिशाख्यानि अद्द्यत्वे उपलब्ध्यन्ते । तेषु बहूनि तत्तच्छाखाभिस् तत्तच्चरणैर् वा सहैव लुप्तानि सम्भाव्यन्ते; कानि चित् तु नदीयासु शाखासु अलुप्तास्स्वपि लुप्तानि विज्ज्ञायन्ते । यानि प्रातिशाख्यानि ग्रन्थतो नामत एव वाऽपि एतर्हि उपलब्ध्यन्ते तेषामुल्लेखोऽधो विधीयते–

(क) **ऋग्वेदप्रातिशाख्यम् ऋग्वेदपार्षदवं वा**– एतस्मिन् ग्रन्थे प्रतिपादिता विषयाः पूर्वमेव सङ्क्षेपेण वर्णिताः[3] । अयङ्ग ग्रन्थः पद्द्यवद्धोऽस्ति । तत्रादौ वर्गद्द्वयम्, ततस् त्रयोऽद्ध्यायाः, प्रत्यद्ध्यायं षट् पटलानि च सन्ति । अस्य रचयिता शौनक उच्च्यते ।

---

१ 'सन्तानस् संहिता, वायवायाहि इत्त्यत्तर अत्रादेशः, इन्द्राग्नी आगतम् इत्त्यत्तर प्रकृतिभावः । एतच् च व्याकरणेऽभिहितत्वाच् शिक्षायामुपेक्षितम्' इति ऋग्वेदभाष्यभूमिकायां सायणोऽपि । २. 'एवमिहेति च विभाषाप्राप्तं सामान्ये' इत्त्यथर्ववेदप्रातिशाख्यरूप–शौनकीयचतुरद्ध्यायिकावचनमप्यत्तर स्मरणीयम् (१।२); ऋ. प्रा. व्याख्यारम्भे उव्वटेन चेदवं वचनमुद्धृतम् । ३. अस्य उपबन्धस्य 'प्रातिशाख्यानां शिक्षाग्रन्थत्वम्' इति प्रकरणे ।

शौनकस्य समयस् तु निश्चेतुमशक्यः[१]। सर्वाण्येव उपलब्ध्यमानानि प्रातिशाख्यानि यास्ककृतान् निरुक्ताद् अर्वाचीनानि पाणिनीयव्याकरणाच् च प्राचीनानीति विवेचका मन्न्यन्ते[२]। प्रातिशाख्येषु च ऋग्वेदप्रातिशाख्यम् प्राचीनतममिति ते भणन्ति। शास्त्रावतारविषये विष्णुमित्त्रेण तु "शौनको वै गृहपतिर् नैमिषीयैस् तु दीक्षितैः। दीक्षासु चोदित× प्राह सत्त्रे तु द्द्वादशाहिके॥ इति शास्त्रावतारं स्मरन्ति"[३] इत्युक्तम्। अत्त्र गृहपतिशब्दस्य कुलपतिरित्यर्थो युधिष्ठिरमीमांसकृतो[४]ऽशुद्धः, गृहपतिशब्देन हि अत्त्र सत्त्रमासीनेषु सत्त्रिषु मद्ध्ये मुख्यो याजमानकर्मकृत् सत्त्री उच्यते। ऋग्वेदप्रातिशाख्ये आगस्त्यः[५], आन्न्यतरेयः[६] गार्ग्यः[७] पञ्चालाः[८], बाभ्रव्यः[९], माक्षव्यः[१०], माण्डूकेयः[११] यास्कः[१२], वेदमित्त्रः[१३], व्याडिः[१४], शाकटायनः[१५], शाकलाः[१६], शाकल्यः[१७], शाकल्यपिता[१८], शूरवीरः[१९], शूरवीरसुतः[२०], शौनकः[२१], स्थविरशाकल्यः[२२] इत्येते नाम्नोपात्ताः। इदम् प्रातिशाख्यं शाकलचरणान्तर्गतानां शाखानामिति युधिष्ठिरमीमांसकमतम्[२३], शाकलबाष्कलात्मकशाखाद्द्वयविषयमिति[२४] गार्ग्यगोपालयज्ज्वनोक्तम्, किन्तु इदम् प्रातिशाख्यं शैशिरीयाम्नायमधिकृत्य कृतमिति वर्गद्द्वये[२५] प्रतिपादितमस्ति। शैशिरश् च

---

१. ऋग्वेदपार्षदप्रवचनकालो विक्रमार्काद् वर्षसहस्रत्त्रयपूर्व इति केचित्। –सं. व्या. शा. इ., दू. भा., पृ. ३३७। २. ऋ. प्रा. भू., पृ. १४। ३. ऋ. प्रा. व. वृत्तिप्रारम्भे, पृ. ७। ४. सं. व्या. शा. इ., दू. भा., पृ. ३३६, टि. १। ५. ऋ. प्रा. व. १।२। ६. ऋ. प्रा. ३।२२। ७. तत्त्रैव १।१५, ६।३६, ११।१७, २६; १३।३१। ८. तत्त्रैव २।३३। ९. तत्त्रैव ११।६५। १०. ऋ. प्रा. व. १।२। ११. तत्त्रैव १।२, ऋ. प्रा. ३।१४। १२. ऋ. प्रा. १७।४२। १३. तत्त्रैव १।५१। १४. तत्त्रैव ३।२३, २८; ६।४३, १३।३१, ३७। १५. तत्त्रैव १।१६, १३।४९। १६. तत्त्रैव १।६४, ११।१९, ६२। १७. तत्त्रैव ३।१३, २२; ४।१३, १३।३१। १८. तत्त्रैव ४।४। १९. ऋ. प्रा. व. १।३। २०. तत्त्रैव। २१. तत्त्रैव १।१। २२. ऋ. प्रा. २।८१। २३. सं. व्या. शा. इ., दू. भा, पृ. ३३६। २४. तै. प्रा. वै. ४।११ (बह्वृचानां शाकलबाष्कलशाखाद्वयात्मकम् प्रातिशाख्यम् प्रसिद्धम्)। २५. ऋ. प्रा. व. १।७ (अस्य ज्ज्ञानार्थमिदमुत्तरत्त्र वक्ष्ये शास्त्रमखिलं शैशिरीये)।

शाखाभेदप्रवर्तकेषु शाकल्यस्य शिष्येष्वन्यतमः[1] । तथापि ऋग्वेदिनामिदमेकमेव प्रातिशाख्यमिदानीलँ लब्धप्रचारम् । इदानीन्तना अर्शशिरीया अपि बह्वृचा आत्मनो दशग्रन्थित्वं सम्पादयितुं शौनककृतमिदमेव प्रातिशाख्यम् पठन्ति[2] । वाराणसेय-संस्कृत-विश्वविद्द्यालयेऽपि बह्वृचाश् शौनककृतमिदमेव प्रातिशाख्यम् पाठ्यन्ते[3] । अस्मिन् प्रातिशाख्ये आदौ योजितस्य वर्गद्द्वयस्य विष्णुमित्रेण कृता वृत्तिर् मुद्द्रिताऽस्ति । अन्यस्य भागस्य तु सा वृत्तिर् हस्तलेखेष्वेव वर्तते[4] । तस्य वर्गद्द्वयस्य उव्वटेन कृता व्याख्या न दृश्यते । मूलभागस्य तु उव्वटेन व्याख्यानङ्ग कृतम्, मुद्द्रितञ् च तत् । अन्यैः कृतान्यपि ऋग्वेदप्रातिशाख्यव्याख्यानानि हस्तलेखेषु उपलब्ध्यन्ते[5] ।

(ख) आश्वलायनप्रातिशाख्यम्– इदङ्ग ग्रन्थतो नोपलब्ध्यते । अस्य पुराकाले सत्ता 'नाप्याश्वलायनाचार्यादिकृतप्रातिशाख्यसिद्धत्वम्'[6] इति उक्त्वा अनन्तेन सूचितेति ऐतिहासिकाः ।

(ग) बाष्कलप्रातिशाख्यम्– इदमपि ग्रन्थतोऽनुपलब्धम् । अस्य पुराकाले सत्ता 'उद्द्रुतो नाम सन्धिर् बाष्कलादीनाम् प्रसिद्धः', 'किन्तु बाष्कलानामप्रगृह्यस् तदर्थवँ वचनम्' इति शाङ्खायनश्रौतसूत्र–भाष्यवचनाब्भ्यामैतिहासिकैरनुमिताऽस्ति[7] । शाकलबाष्कलात्मकशाखाद्द्वयविषयम् बह्वृचानाम् प्रातिशाख्यवँ वैदिकाऽऽभरणकारेणोल्लिखितम्[8] अस्ति । किन्तु स उल्लेख उपलब्ध्यमानलब्धप्रचारकऋग्वेदप्रातिशाख्यविषयको वा प्रातिशाख्यान्तरविषयको वेति न विशेषतो ज्ञायते ।

(घ) शाङ्खायनप्रातिशाख्यम्– अस्य प्रातिशाख्यस्य हस्तलेखः अलवरस्य राजकीये सङ्ग्रहेऽस्तीति युधिष्ठिरमीमांसकेनोल्लिखितम्[9] । अस्य प्रातिशाख्यस्य उपर्युक्तऋग्वेदप्रातिशाख्येन (शैशि-

---

१. ऋ. प्रा. व. वृ., पृ. २७ (मुद्गलो गोखुलो वात्स्यश् शैशिरश् शिशिरस् तथा। पञ्चैते शाकलाश् शिष्याश् शाखाभेदप्रवर्तकाः)। २. ऋ. वे. घ., पृ. ८४ । ३. वा. सं. वि. वि., प. नि. (१९६७), पृ. १७६, २०८ । ४. सं. व्या. शा. इ., दू. भा., पृ. ३४४ । ५. तत्तरैव, पृ. ३४५ । ६. तत्तरैव पृ. ३४६ । ७. तत्तरैव, पृ. ३४८ । ८. तै. प्रा. वै. ४।११ । ९. सं. व्या. शा. इ., दू. भा., पृ. ३४८ ।

रीयप्रातिशाख्येन) तुल्यताऽपि तेनैवाऽऽशङ्किता । अस्य प्रातिशाख्यस्य हस्तलेखेऽद्ध्यायानाम् पटलानाञ् च सङ्ख्या शैशिरीयप्रातिशाख्यवदिति 'इति प्रातिशाख्येऽष्टादशम् पटलम्, तृतीयोऽद्ध्यायस् समाप्तः, शाङ्खायनशाखायाम् प्रातिशाख्यं समाप्तम्' इत्येवंरूपेणाऽस्य समाप्तिवाक्येन सूच्यते, 'स्वर्गञ् जयत्येभिरथाऽमृतत्वम्' इति अन्तिमवाक्यस्य तुल्यता च सूचीपत्तरादेव ज्ञायते इति च तेनैवोक्तम् ।

(ङ) **शुक्लयजुर्वेदप्रातिशाख्यवँ वाजसनेयिप्रातिशाख्यवँ वा**— अस्य प्रातिशाख्यस्यापि विषया× पूर्वमेव सङ्क्षेपेण प्रतिपादिताः । अस्मिन् ग्रन्थे अष्ट अद्ध्यायास् सन्ति । अस्य रचयिता श्रुतर्षि× कात्यायनोऽस्ति । एतत्सम्बन्धे ग्रन्थान्ते 'इत्याहस्स्वरसँस्कारप्प्रतिष्ठापयिता भगवान्कात्यायनः' इत्युल्लेख× प्राप्यते । अयङ् कात्यायनो याज्ञवल्क्यस्य कात्यायन्न्याञ् जातो दत्तको वा पुत्र इति ऐतिहासिका मन्न्यन्ते[1] । अयञ् च पाणिनीयव्याकरणवार्तिककाराद् भिन्न× प्राचीनश्चेति विवेचकाः[2] । शैलीविचारादपीदम् प्रातिशाख्यमपि पाणिनित× प्राचीनमेवेति प्रतीयते । प्रातिशाख्येष्विदन् तृतीयं स्थानङ् गृह्णातीति प्रातिशाख्यपर्यालोचकाः[3] । अस्मिन् प्रातिशाख्ये औपशविः[4], काण्वः[5], कात्यायनः[6], काश्यपः[7], गार्ग्यः[8], जातूकर्ण्यः[9], दाल्भ्यः[10], (माध्यन्दिनीयाः[11]), शाकटायनः[12], शाकल्यः[13], शौनकः[14] इत्येतेषान् नाम्न्नोपादानम् प्राप्यते । इदम् प्रातिशाख्यं शुक्लयजुर्वेदस्य पञ्चदशानामेव शाखानां साधारणम्[15] । अस्य प्रातिशाख्यस्य उव्वटेन मातृमोदाख्यवँ व्याख्यानङ् कृतमस्ति । तत्तर चोदाहरणानि माध्यन्दिनीयमन्तरसंहितात उद्धृतानि । अनन्तभट्टेन चास्य पदार्थप्रकाशाख्यवँ व्याख्यानम् प्रायेणोव्वटव्याख्यानोपजीवि कृतमस्ति । तत्तर चोदाहरणानि प्राय× काण्वमन्तरसंहितात उद्धृतानि । श्रीरामशर्मणाऽपि ज्योत्स्नाख्याऽस्य व्याख्या कृताऽस्ति, किन्तु सा

---

१. (क) आ. सू. पृ. ३५३, (ख) श. ब्रा. उ., पृ. २६–२७ । २. शु. य. प्रा., भू., पृ. १२ । ३. तत्तरैव, पृ. ७ । ४. शु. य. प्रा. ३।१३१ । ५. तत्तरैव १।१२३, १४९ । ६. तत्तरैव ८।६१ । ७. तत्तरैव ४।५ । ८. तत्तरैव ४।१६७ । ९. तत्तरैव ४।१२५, १६०; ५।२२ । १०. तत्तरैव ४।१६ । ११. तत्तरैव ८।३५ । १२. तत्तरैव ३।९, १२, ८७; ४।५, १२९, १९१ । १३. तत्तरैव ३।१० । १४. तत्तरैव ४।१२२ । १५. प्र. सू. अ. भा. २।१ ।

मुद्दर्च्यमाणैवाऽस्ति । तस्या उपयोगो युगलकिशोरपाठकेन शुक्लयजुर्वेद-प्रातिशाख्यस्य स्वकीये संस्करणे टिप्पणण्यादौ कृतो दृश्यते[1] । प्रातिशाख्यप्रदीपिकायां शिक्षायाम् बालकृष्णगोड्शयाऽपि तस्या उल्लेख× कृतोऽस्ति[2] । अस्य प्रातिशाख्यस्य अन्या अपि व्याख्या हस्तलेखेषूपलब्ध्यन्ते[3] ।

(च) **तैत्तिरीयप्रातिशाख्यम्**– अस्य प्रातिशाख्यस्यापि विषया× पूर्वमेव सङ्क्षेपेण वर्णिताः । अस्मिन् ग्रन्थे चतुर्विंशतिरद्ध्यायास् सन्ति । प्रथमा चतुरद्ध्यायी साधारणविधिरिति, तत× परा द्वादशाद्ध्यायी संहिताविधिरिति, तत× परा अष्टाद्ध्यायी च उच्चारणकल्प इति च व्यवहियते[4] । अस्य ग्रन्थस्य रचयिता क इति न ज्ञायते । अस्य ग्रन्थस्य कर्ता कार्त्तिकेय इति कस्यचिद् भणितिरस्ति[5] । इदम् प्रातिशाख्यम् पाणिनितोऽर्वाचीनमितिकेचन मन्यन्ते । किन्तु शैल्यद्ध्ययनेनाऽपि अस्य ग्रन्थस्य पाणिनित× प्राचीनत्वम् बोद्धुं शक्यम् । पदमञ्जरीकारोऽपि तथैवाऽमंस्तेति विज्ञायते[6] । अस्मिन् ग्रन्थे आग्निवेश्यः[7], आग्निवेश्यायनः[8], आत्त्रेयः[9], उक्थ्यः[10], उत्तमोत्तरीयः[11], काण्डमायनः[12], कौण्डिन्न्यः[13], कौहडीपुत्रः[14], गौतमः[15], (तैत्तिरीयाः[16]) पौष्करसादिः[17], प्लाक्षायणः[18], प्लाक्षिः[19], बाडवी- (भी-) कारः[20], भारद्वाजः[21], माचाकीयः[22], (मीमांसकाः[23]), वात्सप्रः[24], वाल्मीकिः[25], शाङ्खायनः[26], शैत्त्यायनः[27],

---

१. शु. य. प्रा. वि., पृ. २ । २. शि. स., पृ. २९३, २९८, ३०५, ३०६ । ३. सं. व्या. शा. इ. दू. भा., पृ. ३५४–५८ । ४. तै. प्रा. भू., पृ. १३–१४ । ५. A. Pr. (Sau. C.), Intro. p. VI. ६. सं. व्या. शा. इ., दू. भा., पृ. ३५९ । ७. तै. प्रा. ९।४ । ८. तत्त्रैव १४।३२ । ९. तत्त्रैव ५।३१, १७।८ । १०. तत्त्रैव ८।२२, १०।२०, १६।२३ । ११. तत्त्रैव ८।२० । १२. तत्त्रैव ९।१, १५।७ । १३. तत्त्रैव ५।३८, १८।३, १९।२ । १४. तत्त्रैव १७।२ । १५. तत्त्रैव ५।३८ । १६. तत्त्रैव २३।१८ (१६) । १७. तत्त्रैव ५।३७, ३८; १३।१६, १४।२, १७।६ । १८. तत्त्रैव ९।६, १४।११, १७; १८।५ । १९. तत्त्रैव ५।३८, ९।६, १४।१०, १७; १८।५ । २०. तत्त्रैव १४।१३। २१. तत्त्रैव १७।३। २२. तत्त्रैव १०।२२। २३. तत्त्रैव ५।४१। २४. तत्त्रैव १०।२३। २५. तत्त्रैव ५।३६, ९।४, १८।६ । २६. तत्त्रैव १५।७ । २७. तत्त्रैव ५।४०, १७।१, ८; १८।२ ।

स्थविर× कौण्डिन्न्यः[१], साङ्कृत्त्यः[२], हारीतः[३], इत्त्येतेषामुल्लेख× प्राप्यते। इदम् प्रातिशाख्यन् तैत्तिरीयचरणान्तर्गतानाम् औखेय-खाण्डिकेया-ऽऽत्त्रेय-कालेत-शाट्टचायन-हिरण्यकेशि-भारद्वाजा-ऽऽपस्तम्बशाखानां साधारणम् प्रतीयते[४]। सूर्यकान्तेन तु औखेयशाखाया इदम् प्रातिशाख्यमित्त्युक्तम्[५]। अस्य प्रातिशाख्यस्य वररुच्या-ऽऽत्त्रेय-माहिषेयकृतानि प्राचीनानि त्रीणि भाष्याणि बभूवुः। तेषामुल्लेखस् सोमयार्येण त्रिभाष्यरत्नारम्भे कृतोऽस्ति। किन्तु आद्द्ये द्वे भाष्ये अद्द्य यावद् अनुपलब्धे स्तः। माहिषेयकृतम् पदक्करमसदनाख्यम् भाष्यन् तूपलब्ध्यते मुद्द्रितञ् च। उक्तानान् त्रयाणाम् भाष्याणां सारमादाय सोमयार्येण कृतन् त्रिभाष्यरत्नव्याख्यानमपि प्राप्यते, मुद्द्रितञ् चाऽनेकवारम्। गार्ग्यगोपालयज्ज्वकृतवँ वैदिकाभरणवँ व्याख्यानञ् च प्रौढियुतमस्ति मुद्द्रितञ् च।

(छ) **मैत्त्रायणीयप्रातिशाख्यम्**– अस्य प्रातिशाख्यस्य हस्तलिखितम् पुस्तकम् महाराष्ट्रान्तर्गतनासिक्यजनपदनिवासिनोर् द्वयोर् मैत्त्रायणीयशाखाद्ध्यायिनोर् वैदिकयोस् सविधेऽस्तीति श्रीधरशास्त्रिणा अण्णाशास्त्रिपुत्त्रेण सूचितमिति युधिष्ठिरमीमांसकेन प्रतिपादितमस्ति[६]। अस्याऽपि प्रातिशाख्यस्य कर्त्ता अविज्ज्ञातः। अस्मिन् ग्रन्थेऽपि आग्निवेश्यः, आग्निवेश्यायनः, आत्त्रेयः, उक्थ्यः, काण्डमायनः, कौण्डिन्न्यः, कौहडीपुत्त्रः, गौतमः, पौष्करसादिः, प्लाक्षिः, भारद्वाजः, वात्सप्प्रः, वाल्मीकिः, शाङ्खायनः, शैत्त्यायनः इत्त्येते प्राचीना आचार्या उल्लिखिता इति श्रीधरशास्त्रिप्रोक्ततत्त्वेन युधिष्ठिरमीमांसकेन प्रतिपादितम्[७]। एतस्य ग्रन्थस्याऽपठितत्त्वादेतस्य विषये निश्चित्त्याऽधिकङ् किमपि वक्तुं न शक्यते। तथापि मैत्त्रायणीयप्रातिशाख्ये यावतिथेऽद्ध्याये यावतिथे सूत्त्रे च उपर्युक्तानामाचार्याणामुल्लेखोऽस्तीति श्रीधरशास्त्रिलेखम् उपजीव्य युधिष्ठिरमीमांसकेन प्रतिपादितम्[८] प्रायस् तावतिथेऽद्ध्याये तावतिथे सूत्त्रे एव च तैत्तिरीयप्रातिशाख्येऽपि उपर्युक्तानामाचार्याणामुल्लेख× प्राप्यते इति, यथा युधिष्ठिरमीमांसकस्य मनसि ऋग्वेदीययोश् शैशिरीयप्रातिशाख्य–

---

१. तत्त्रैव १७।४। २. तत्त्रैव ८।२१, १०।२१, १६।१६। ३. तत्त्रैव १४।१८। ४. तै. प्रा. वै. ४।११। ५. R. T. Intro. p. 6। ६. स. व्या. शा. इ., दू. भा., पृ. ३६५–६६। ७. तत्त्रैव, पृ. ३६६–६७। ८. तत्त्रैव।

शाङ्खायनीयप्रातिशाक्ख्ययोस् समानताया आशङ्का उत्थिता तथैवाऽस्माकम् मनस्यपि तैत्तिरीयप्रातिशाक्ख्य–मैत्रायणीयप्रातिशाक्ख्ययोस् समानताया आशङ्का उत्तिष्ठति। श्रीधरशास्त्रिभणित्यनुसारम्[1] मैत्रायणीयप्रातिशाक्ख्ये अद्ध्याय–कण्डिका–सूत्राणां सङ्केताय यथा ऋचङ्कस् स्थलनिर्देश× कर्तुं शक्यस् तथैव तैत्तिरीयप्रातिशाक्ख्येऽपि प्रश्नाद्ध्यायसूत्राणां सङ्केताय ऋचङ्कस् स्थलनिर्देश× कर्तुं शक्यः। मैत्रायणीयप्रातिशाक्ख्ये द्वावद्ध्यायौ प्रत्यद्ध्यायम् च द्वादश-द्द्वादश कण्डिका× प्रतीयन्ते तर्हि तैत्तिरीय–प्रातिशाक्ख्येऽपि द्वौ प्रश्नौ प्रतिप्रश्नम् च द्वादशद्द्वादश अद्ध्यायास् सन्ति। यद्द्यपि कस्तूरिरङ्गाचार्यसंस्करणे प्रश्नविभागो नोपलब्ध्यते तैत्तिरीयप्रातिशाक्ख्ये, तथापि वेङ्कटरामशर्मसंस्करणे माहिषेयभाष्ये प्रश्नविभागोऽस्त्येव। अतश् चोक्ता आशङ्का स्थिरा भवति।

(ज) चारायणीयप्रातिशाक्ख्यम्–लौगाक्षिगृह्ययसूत्रस्य व्याक्ख्यातुर् देवपालस्य "कृतस्य पापस्य च्छ्रदनङ् कृच्छ्रमिति निर्वचनम्। वर्णलोपश् छान्दसत्वात् कृच्छ्रशब्दस्य। तथा च चारायणिसूत्रम्–'पुरुकृते च्छच्छ्रयोः' इति पुरुशब्द× कृतशब्दश् च लुप्यते यथासङ्ख्यम् छे छ्रे परतः। पुरुच्छदनम् पुच्छङ् कृतस्य च्छ्रदनवं विनाशनङ् कृच्छ्रमिति" इत्यस्माद् वचनादस्य ग्रन्थस्य पुराकाले सत्ता युधिष्ठिरमीमांसकेन सम्भाविता[2]। कृष्णयजुर्वेदसम्बद्धा चारायणीयशिक्षा तु हस्तलिखितरूपोपलब्ध्यते। ततोऽप्यस्य प्रातिशाक्ख्यस्य पुराकाले सत्ताऽनुमीयते, यतो हि यस्याश् शाखायाश् शिक्षाऽस्ति तस्याश् शाखाया× प्राय× प्रातिशाक्ख्यमपि अस्ति, भवितुं शक्नोति वा।

(झ) ऋक्तन्त्रव्याकरणम् ऋक्तन्त्रं सामवेदप्रातिशाक्ख्यवं वा–सामवेद-सम्बद्ध-स्वतन्त्रग्रन्थत्वेन प्रसिद्धा अपि ऋक्तन्त्र-सामतन्त्राऽक्षरतन्त्र–फुल्ल–(पुष्प-) सूत्राक्ख्या ग्रन्था वस्तुतस् सामवेदप्रातिशाक्ख्यरूपस्यैव ग्रन्थस्य भागास् सन्ति। तत्र च ऋक्तन्त्रम् प्रथमो भागः। छन्दोगव्याकरणमित्यपि अस्यैव नामान्तरमिति सम्भाव्यते[3]। अस्य प्रातिशाक्ख्यभागस्य विषया अपि सङ्क्षेपेण पूर्वमेवोक्ताः। अयं सामवेदप्रातिशाक्ख्यखण्ड× प्रायेण सामवेदीयगीतीनामाधारभूतासु

---

१. सं. व्या. शा. इ., दू. भा., पृ. ३६६–६७। २. तत्रैव, पृ. ३६७। ३. तत्रैव, पृ. ३९१।

ऋक्षु वर्णस्स्वरमात्त्रावलसामसन्तानानावँ व्यवस्स्थावँ वर्णयति। अस्मिन् ग्रन्थे केषु चिदादर्शेषु पञ्च प्रपाठकाः, केषु चित् तु प्रपाठकपञ्चके प्रथमम् प्रपाठकवँ विहाय चत्त्वार एव प्रपाठका× प्राप्यन्ते। तथापि हरदत्तेन तु सामवेदसर्वानुक्क्रमणण्याम् पञ्चैव प्रपाठका उल्लिखिताः[1]। अस्स्य ग्रन्थस्स्य रचयिता शाकटायन इति सामवेदसर्वानुक्क्रमणण्यां हरदत्तः[2], लघुशब्देन्दुशेखरे नागोजिभट्टश् च[3], औदव्व्रजिरिति पाणिनीयशिक्क्षापञ्जिकाकार-प्रकाशकारौ[4], भट्टोजिदीक्क्षितश् च[5]। युधिष्ठिरमीमांसकस् तु ऋक्तन्त्रकारो नाम्म्ना औदव्व्रजिर् गोत्त्रेण शाकटायन इति मन्न्यते[6]। सूर्यकान्तस् तु ऋक्तन्त्रस्स्य कर्ता पुष्पयशा औदव्व्रजिः, प्रतिसँस्कर्ता शाकटायनः, पुन×प्रतिसँस्कर्ता पाणिनितोऽर्वाचीन× कश् चिद् अन्न्य इति भणति[7]। अस्मिन् ग्रन्थे इन्द्रः[8] औदव्व्रजिः[9], नैगिः[10], बृहस्पतिः[11], ब्रह्म्मा[12], भरद्द्वाजः[13], शाकटायन[14] इत्त्येते नाम्म्ना उल्लिखितास् सन्ति। वृत्तौ नकुलमुख उल्लिखितोऽस्ति[15]। इदम् प्रातिशाक्ख्यं राणायनीयानाम् इति 'राणायनीयानामृक्तन्त्रप्रसिद्धा विसर्जनीयस्स्याऽभिनिष्टानाक्ख्या' इति गोभिलगृह्य्यसूत्त्रस्स्य व्याक्ख्यातुर् भट्टनारायणस्स्य वचनम् प्रमाणङ्क कृत्त्वा युधिष्ठिरमीमांसकेनोक्तम्[16]। ऋक्तन्त्रञ् जैमिनीय-सात्त्यमुग्गिरराणायनीय-गौतम-नैगेय-शाखाभिर् मुक्ख्यतया सम्बद्धन् नास्ति, तासां शाखानावँ विशेषाणाम् अत्त्रानुपलब्भ्यमानत्वाद् इत्त्युक्त्वा, ऋक्तन्त्रोद्धृतास् सर्वे ऋगंशा× कौथुमशाखायाम् प्राप्यन्ते इति च भणित्त्वा, गोभिलगृह्य्यकर्मप्रकाशिकायान् 'द्विपञ्चाशदिमे ग्रन्थाश् शाखाया× कौथुमेरिह। प्रोक्ता सामोदधौ यस्माच् छ्रौते स्मार्ते सुनिश्चिताः' इति प्रतिज्ज्ञाय गणितेषु ग्रन्थेषु ऋक्तन्त्रस्स्योल्लेखाद् ऋक्तन्त्रङ्क कौथुमशाखासम्बद्धमिति सूर्यकान्तो निर्णयति[17]।

---

१. ऋ. त. सा. स., पृ. ३। २. तत्त्रैव। ३. ल. श. शे., पृ. ११। ४. सं. व्या. शा. इ., दू. भा., पृ. ३८३–८५। ५. श. कौ. १।१।८। ६. सं. व्या. शा. इ. दू. भा., पृ. ३८६। ७. R.T. Intro. p. 33–46। ८. ऋ. त. १।४। ९. तत्त्रैव २।६।१०। १०. तत्त्रैव २।६।९, ४।३।२। ११. तत्त्रैव १।४। १२. तत्त्रैव। १३. तत्त्रैव। १४. तत्त्रैव। १५. ऋ. त. वृ. ३।४।१०। १६. सं. व्या. शा. इ., दू. भा., पृ. ३८६। १७. R. T. Intro. p. 2–11।

किन्तु गौतम्म्याश् शिक्क्षाया गौतमशाखासम्बद्धाया अपि 'इति कौथुमशाखाया ग्रन्थसङ्ख्या यथाक्रमात्। एतानधीत्य निखिलान् वेदोक्तञ्ज्ञातुमर्हति' इत्युक्त्वा समापितायामुक्तायाङ्ग गोभिलगृह्यकर्मप्रकाशिकायाम् कौथुमशाखाग्रन्थानुक्रमणस्याम् उल्लेखादुक्तम् मतं सम्यक् पुष्टन् न प्रतिभाति। गौतम्म्यां शिक्क्षायाम् प्रातिशाक्ख्योदाहृततत्त्वेनोदाहृतमुदाहरणमृक्तन्त्रे कौथुमशाखायाञ् च न प्राप्यते इतीयं शिक्क्षा न कौथुमशाखासम्बद्धा, किन्तु नाम्म्नो वैशिष्ट्याद् गौतमशाखासम्बद्धेति विज्ज्ञायते। सूर्यकान्तेनाऽपि ऋक्तन्त्रस्यानेकशाखासाधारणतत्त्वमपि सूचितम्[1]। अस्य ग्रन्थस्य शैली विचित्रा वर्तते। पदानाम् प्रायेण प्रथमान्त्यक्क्षराणि त्यक्त्वा कृता वर्ग इति वक्तव्ये र्ग इति[2], दीर्घमिति वक्तव्ये र्घमिति[3], परादि इति वक्तव्ये रादि[4] इति, स्वरमिति वक्तव्ये रमिति[5] एतादृशाम् प्रयोगा अत्र बाहुल्येनोपलब्ध्यन्ते। अस्य प्रातिशाक्ख्यस्य वृत्तिर् वृत्तेर् विवृतिश् च प्राप्यते।

(ञ) **सामतन्त्रम्**– एषोऽपि सामवेदप्रातिशाक्ख्यरूपो ग्रन्थः। किन्त्वेष न स्स्वतन्त्रः। एष ऋक्तन्त्रमुपजीवतीति एतद्विवेचकाः[6]। अत्र च ग्रामेगेयगाने (वेयगाने) आरण्यकगाने च सामसु पर्वादीनाम् उच्चारणस्य व्यवस्था कृताऽस्ति। छन्दोगास् साम्नो यम् भागवँ विरामेण विच्छिद्द्य गायन्ति स भागम् पर्वेत्युच्यते। तच् च एकस्स्वरन् द्विस्स्वरञ् चेति प्रथमन् द्वेधा। एकस्स्वरम् पुनष् षड्धा, द्विस्स्वरञ् च त्रेधा भिन्नम्। यथा शुक्लयजुर्वेदप्रातिशाक्ख्यादौ[7] उदात्तस्स्वरापेक्क्षया नव पदशय्याम् प्रतिपादितास् तथैवाऽत्र सामतन्त्रे मूलरूपेण नव पर्वशय्याम् प्रस्ताररूपेण च त्रीणि शतानि पञ्च च पर्वशय्याम् प्रतिपादिताः। तत्सम्बद्धास् सन्ध्यगीत–ह्रस्स्वभावादयोऽन्येऽपि विषया उक्ताः। अस्य ग्रन्थस्य कर्ता औदव्रजिरिति सामवेदसर्वानुक्रमणीकारो हरदत्तः। केचन तु अस्य ग्रन्थस्य कर्तारङ्ग गार्ग्यम् मन्न्यन्ते[8]। इदम् प्रातिशाक्ख्यखण्डमपि भूम्ना कौथुमशाखामेवाऽवलम्बते। तथापि कौथुमशाखायामश्श्रुतानि सामगानान्न्यपि अत्रागतानीति तद्विदः[9]। अस्य ग्रन्थस्य व्याक्ख्यानमप्युपलब्ध्यते।

---

१. R.T. Intro. p.5–11। २. ऋ. त. २।२।३। ३. तत्त्रैव २।५।१०। ४. तत्त्रैव २।३।६। ५. तत्त्रैव। ६. सा. त. भू., पृ. ५१–५२। ७. शु. य. प्रा. २।१, पा. शि. श्लो. ४५। ८. सा. त. भू., पृ. ४२। ९. तत्त्रैव, पृ. ५०।

(ट) **अक्षरतन्त्रम्**– अयमपि सामवेदप्रातिशाख्यरूप एव ग्रन्थः। अस्यैव सञ्ज्ञालक्षणं सञ्ज्ञाप्रकरणमिति च नामनी। किन्तु अत्र सामवेदीयस्तोभानामेव कर्षण–लोप–विकारादीनामुच्चारणस्य व्यवस्था कृताऽस्ति। स्तोभ इति च गानकाले सामसु यावन्तस् स्वरा अपेक्षिता भवन्ति तावन्तस् स्वरा यदि ऋक्षु न भवन्ति तर्हि तन्न्यूनतापूरणाय पठनीयैरतिरिक्तैस् स्वरैर् युक्तम् पदमुच्यते। एतादृशानाम् पदानाम् प्रतिपादनं स्तोभानुसंहारग्रन्थे कृतमस्ति। स्तोभस्यैव अक्षरमिति नामान्तरम्[1]। अयञ्च ग्रन्थस् सामतन्त्रशेषभूत एव। अस्य ग्रन्थस्य कर्ता आपिशलिरिति सामशर्मि–सत्त्यव्रत–भट्टाचार्यः, औदव्रजिरेवेति सामवेदसर्वानुक्रमणीकारो हरदत्त इति रामनाथदीक्षितश्च प्रतिपादयति[2]।

(ठ) **पुष्पसूत्रम् फुल्लसूत्रवँ वा**– एषोऽपि सामवेदप्रातिशाख्यरूप एव ग्रन्थः। किन्तु अत्र माध्यन्दिनपवमानादिषु गेयानाम् पौरुषेयाणाम् ऊहगानरूपाणाम् उत्तरार्चिकसम्बद्धानां साम्नालँ लक्षणानि गानस्य व्यवस्थाश् चैव प्राप्यन्ते। अस्य ग्रन्थस्य कर्ता पुष्पाचार्य इति रामनाथदीक्षितः[3]; वररुचिरिति सामवेदसर्वानुक्रमणीकारो हरदत्तः[4]। अयमपि ग्रन्थश्च कौथुमशाखासम्बद्ध एव। वस्तुतो विचारणे तु ऋक्तन्त्र–सामतन्त्रा–ऽक्षरतन्त्र–फुल्लसूत्राणि एकस्यैव सामवेदप्रातिशाख्यस्य विभाग– (खण्ड–) रूपा ग्रन्था इति प्रतीयते।

(ड) **सात्त्यमुग्गिराणायनीयप्रातिशाख्यम्**– इदञ्च ग्रन्थतोऽनुपलब्धमेव एतर्हि। अस्य पुराकाले सत्ता च "ननु च भोश् छन्दोगानां सात्त्यमुग्गिराणायनीया अर्धमेकारमर्धमोकारञ् चाधीयते सुजाते एँ(अ)श्श्वसूनृते, अद्ध्वर्यो ओँ(अ)द्द्रिभिस् सुतम्, शुक्रन् ते एँ(अ)न्यद्, यजतन् ते एँ(अ)न्यदिति। पार्षदकृतिरेषा तत्र भवताम्, नैव हि लोके नान्यस्मिन् वेदेऽर्ध एकारोऽर्ध ओकारो वाऽस्ति"[5] इति पाणिनीयव्याकरणभाष्यकारवचनाद् विज्ञायते।

(ढ) **गौतमप्रातिशाख्यम्**– इदमपि ग्रन्थतोऽनुपलब्धम्। अस्य पुराकाले सत्ता च "अथ सप्ताक्षरमेकमुदाहृतम् प्रातिशाख्ये हि 'न

---

१. जै. ध. मी. सू. ९।२।३९। २. सा. त. भू., पृ. ४–५। ३. तत्रैव, पृ. ५। ४. ऋ.त.सा.स., पृ. ७। ५. १।१।१ (एओङसूत्रे)।

हि न घुनुघुनुक्षुङ्ङ क्ष्क्ष्वौ' इति ङ्ङकषकषवाः'' इति गौतमम्याश्शिक्षाया वचनाद् विज्ज्ञायते[1]। सामवेदशाखासु मद्ध्ये एतर्हि कौथुम-जैमिनीय-राणायनीय-गौतम-नैगेयशाखा[2] उपलब्ध्यन्ते इति गौतमशाखया सम्बद्धम् प्रातिशाक्ख्यम् पुराकाले स्थितमभूदिति सम्भावनायै बलम् प्राप्तम् भवति।

(ण) **शौनकीया चतुरद्ध्यायिका**– अस्स्य ग्रन्थस्स्य कुत्तरचिद् अथर्ववेदप्रातिशाक्ख्यमिति, कुत्तरचिच् च कौत्सव्याकरणम् इत्यपि व्यवहारो दृश्श्यते इति वदन्ति[3]। अस्स्य ग्रन्थस्स्य प्रतिपाद्द्या विषयाः पूर्वमेव सङ्क्षेपेणोक्ताः। अत्तर प्रातिशाक्ख्ये आदिपदेन (गणनिर्देशेन) अपि लक्क्ष्याणां सूचनङ्क क्रियते[4] अन्न्येषु तु प्रातिशाक्ख्येषु प्रायेण[5] लक्क्ष्याणि परिगणितान्न्येव। अत्तर क्वचित् तु बहुलमित्त्यप्प्युक्तम्[6]। अस्स्य ग्रन्थस्स्य कर्ता शौनक इति केचित् मन्न्यन्ते, कौत्स इति केचित्[7]। अस्स्य समयोऽप्प्यनिश्चितः। अनुपदवँ वर्णयिष्ष्यमाणाद् अथर्वप्रातिशाक्ख्यादियन् चतुरद्ध्यायिका प्राचीनेति विवेचकाः[8]। अत्तर च शाकटायनः[9], शाङ्खमित्त्रिः[10], शौनकः[11] इत्त्येतेषान् नाम्ना ग्रहणमस्ति। इदम् प्रातिशाक्ख्यं शौनकीयशाखाया इत्त्युच्च्यते। रोथेन ह्विट्निना च सम्पादिता अथर्ववेदसंहिता चतुरद्ध्याय्यनुकूलेति च विवेचकाः[12]। अस्स्य ग्रन्थस्स्य अज्ज्ञातकर्तृकम् भाष्ष्यमपि हस्तलिखितम् प्राप्प्यते। अस्स्य ग्रन्थस्स्य सम्पादकेनानुवादकेन तस्स्योपयोगः कृतो दृश्श्यते।

(त) **अथर्व- (वेद-) प्रातिशाक्ख्यम्**– अस्स्य प्रातिशाक्ख्यस्स्य लघुः पाठो विश्श्वबन्धुना सम्पादितः, वृद्धः पाठश् च सूर्यकान्तेन। अस्मिन् प्रातिशाक्ख्ये वर्णोत्पत्ति–स्थान-करणा-ऽनुप्प्रदानादीनाम् प्रति-

---

१. शि. स., पृ. ४५५। २. सा. त. भू., पृ. ५०। ३. सं. व्या. शा. इ., दू. भा., पृ. ३७८। ४. १।८५, २।२७, २९, ३०, ५९, ६७, ८०, ८४, ८५, ९८, १०३; ३।४, १२, १६, १७, ७६, ९२, ४।२१, २२, २३। ५. ऋक्तन्त्रेऽपि गणास् सन्त्यपरिगणिताः ३।५।६, ३।७।८, ४।१।१, ४।३।४, ४।३।६। ६. शौ. च. ३।८, १३। ७. सं. व्या. शा. इ. दू. भा., पृ. ३७८। ८. तत्तरैव, पृ. ३७४, ३७८। ९. शौ. च. २।२४। १०. तत्तरैव ३।७४। ११. तत्तरैव १।८। १२. A. Pr. Intro. p. 43–50।

पादनन् नास्ति । अत्तर स्वरनियम–विसर्जनीयाऽऽद्द्यन्तपदगणना–प्रगृह्यपदमद्ध्य–वाक्क्यगणना–यकारादिद्द्वययुक्तपदगणना–ऽवग्ग्रहरेफादिसहितपदगणना–षत्त्वणत्त्वाद्द्यपवाद– ह्रस्स्वभाव–दीर्घीभाव–विविध–सयँयोगयुक्तपदादिगणना–ऽवग्ग्रहादयो विषयास् सन्ति । एते च विषया भाष्ष्यकारेण एतावत्त्वम्, अपवादः, आबाधः, सावँवेदनम्, न्यायमुखन् चेति पञ्चधा विभक्ताः । तत्तर एतावत्त्वन् नाम एतानि पदानि एवमादिषु एवम् भवन्ति अतो नान्न्यथेति; अपवादस् स्फुटः, आबाधो नाम यत्तर तच्छब्दार्थतस् तुल्या संहिताऽन्न्यापि भवति तत्तर अवग्ग्रहविशेषाऽऽदानम्; सावँवेदनन् नाम अर्थादेस् स्वरभेदस्स्य व्यवस्थापनम्, न्यायमुखन् नाम न्याय्यस्स्य वर्णविकारस्स्य ज्ञानम् इति । वस्तुत इदम् प्रातिशाक्ख्यं शिक्क्षाशास्तर-संहिताप्रकरणा-ऽऽधारभूत-तत्थ्यसङ्कलनात्मकवँ विज्ज्ञायते । अस्स्य प्रातिशाक्ख्यस्स्य समयः पाणिनेः पश्चात् पतञ्जलेः प्रागिति सूर्यकान्तेनोक्तम्; युधिष्ठिरमीमांसकेन तु तदप्प्रामाणिकमित्त्युद्घोषितम्[1] । उपलब्ध्यमानस्स्य अथर्ववेदप्रातिशाक्ख्यस्स्य केचन भागाश्[2] शौनकीयचतुरद्ध्याय्या अंशान्[3] आधारीकृत्त्य प्रवर्तन्ते इति शौनकीयचतुरद्ध्यायीत इदम् प्रातिशाक्ख्यमर्वाचीनमिति सूर्यकान्तेनोक्तम्[4] । अस्स्य ग्रन्थस्स्य कर्ता क इति न ज्ज्ञायते । अस्मिन् ग्रन्थे शाकल्ल्यस्स्य उल्लेखोऽस्ति[5]। इदम् प्रातिशाक्ख्यं शौनकीयशाखाया नेति सूर्यकान्तस्स्य मतमस्ति । तत्तर शङ्करपाण्डुरङ्गसङ्गृहीता अथर्ववेदहस्तलेखा अस्स्य प्रातिशाक्ख्यस्स्याऽनुकूलाः, रोथ–ह्विट्नि–सम्पादिताऽथर्ववेदसंहिता तु शौनकीयचतुरद्ध्याय्या अनुकूला इति च स एव भणति[6] । अस्स्य ग्रन्थस्स्य भाष्ष्यमपि प्राप्प्यते ।

७. प्रातिशाक्ख्यपरिशिष्टरूपा ग्रन्थाः

प्रातिशाक्ख्यप्रतिपाद्द्य–वर्ण–स्वर–संहितापाठ–पदपाठादिबोधोपकारकाः प्रातिशाक्ख्यपरिशिष्टरूपा ग्रन्था अपि प्राचीना अर्वाचीनाश्च बहवः प्राप्प्यन्ते । तेषु केचन मुद्द्रिता अपि सन्ति । केचन तु हस्तलिखितरूपेणैव विविधेषु पुस्तकालयेषु स्थितास् सन्ति । तेषाम् मद्ध्ये

---

१. सं. व्या. शा. इ., द्वि. भा., पृ. ३७१–७३ । २. सू. १३६, १४७, २०१ । ३. २।५, २; ६९, ७०, ७३, ७५, ७६, ११२; ३।८६, ८७, ८८, ९२; २।६२ । ४. A. Pr. Intro. p. 61–66 । ५. ३।४।३ (सू. २१९, पृ. १६५) । ६. A. Pr. Intro. p. 43–50 ।

केषाञ् चित् प्रमुखाणाङ ग्रन्थानां सङ्क्षिप्तवँ विवरणमध उपस्थापितमस्ति—

(क) **ऋग्वेदसम्बद्धा× प्रातिशाक्ख्यपरिशिष्टरूपा ग्रन्थाः**

(१) **उपलेखसूत्रम्**– एष ग्रन्थ ऋग्वेद–पद–क्रम–पाठसम्बद्धो वर्तते। एतस्य रचयिता बृहस्पतिर् भारद्वाजस् सम्भावितोऽस्ति। एतस्य समयश् च पाणिनिसमय एवेति ऐतिहासिकाः। एतस्मिन् ग्रन्थे अष्ट वर्गास् सन्ति। तत्र स्वरव्यञ्जनादिसञ्ज्ञाविशेषाः, त्रिक्क्रम–चतुष्क्रमविशेषाः, एकपदा–द्विपदाऽऽदिऋग्गणना, परिगृह्य्यविशेषाः, टवर्गीयवर्णविषयका विशेषाः, पूर्पति–धूर्षदादि–परिग्रहविशेषाः, पूर्वपदान्तेतिकरणसन्धिविशेषाः, इतिकरणपदादिसन्धिविशेषाः, स्वरविशेषाः, कम्पविशेषाश् च प्रतिपादितास् सन्ति। एतस्य ग्रन्थस्यैकम् भाष्यमपि अनतिप्राचीनत्वेन सम्भाव्यमानम् प्राप्यते।

(२) **विकृतिवल्ली (व्याडिशिक्षा)**– एषा व्याडेश् शैशिरीय-ऋग्वेद–क्रमजटा–पाठादिविषयाऽष्टाविंशतिश्लोकात्मिका प्रातिशाक्ख्यपरिशिष्टरूपा कृतिः। व्याडेर् नाम पाणिनीयवैयाकरणनिकाये सङ्ग्रहकारत्वेन परिभाषापाठकारत्वेन च प्रसिद्धम्। ऋग्वेदप्रातिशाक्ख्यादिष्वपि व्याडेरुल्लेख× प्राप्यते। वैयाकरणसङ्ग्रहकार–विकृतिवल्लीकारयोर् ऐक्क्यम् पार्थक्क्यवँ वेति निश्चेतुङ किमपि प्रमाणन् नोपलब्ध्यते। विकृतिवल्ल्या गङ्गाधरभट्टाचार्यकृता विकृतिकौमुद्द्याक्ख्या व्याक्ख्या चोपलब्ध्यते।

(३) **अष्टविकृतिलक्षणानि**– सप्तदशकारिकात्मिका सटीकेयङ कृतिर् अविज्ज्ञातकर्तृका युगलकिशोरपाठकसम्पादिते शुक्लयजुर्वेदप्रातिशाक्ख्ये परिशिष्टतत्वेन सङ्गृहीता दृश्यते। एतस्याः कृतेश् शुक्लयजुर्वेदेन सह सम्बन्धस् तु कुतोऽपि प्रमाणान् न सम्म्यक् सिद्ध्यति। टीकाया अन्ते "जटादिविकृतीनान् तु सम्म्यग् ज्ञानयँ यथाऽऽप्प्यते। महर्षिणा व्याडिना यज् जटापटलसञ्ज्ञकम्। तद्भावं समनुज्ज्ञाय हयग्रीवेण भाषितम्। दौर्मित्त्रिणा गौतमेन रामेणाऽपि सुभाषितम्" इत्त्युल्लेख× प्राप्यते। एतस्मादुल्लेखात् कृतिरियं रामस्स्येति प्रतीयते। रामस्य कृतित्त्वण् टीकाया एव वा कारिकाणामपीति तु विमृश्यमेवाऽस्ति। एतस्य ग्रन्थस्य सङ्क्षिप्तं रूपम् प्रातिशाक्ख्य-प्रदीपशिक्षायामपि सङ्गृहीतमुपलब्ध्यते।

(४) **अष्टविकृतिविवृतिः (मधुसूदनशिक्षा)**– मधुसूदन-मस्करि-

कृतिरियञ् चतुष्पञ्चाशत्कारिकात्मिका व्याडिमतानुगामिनी पुरोगमाऽऽचार्यकृतप्रकाशटीकोपेता प्राप्यते।

(५) **वेदविकृतिविवरणम्**– 'दामोदरन्–नम्पूतिरिप्पाट्' इत्याख्येन वैदिकेन कृतं सटिप्पणीकमिदम् प्राप्यते, मुद्रितञ् चाऽस्ति।

(६) **जटापटलम्**– व्याडिकृताया विकृतिवल्ल्याः क्रमजटानिरूपणांशोऽपि जटापटलत्वेन व्यवहृतो दृश्यते। विकृतिवल्ल्यन्तर्भूतत्वादस्य पृथक् प्रतिपादनमनावश्यकम् भाति। तथापि नागदेवसुताऽनन्ताऽऽचार्येणाऽस्य भागस्य 'जटापटलकारिकाव्याख्या' इति नाम्नाऽङ्किता व्याख्याऽपि कृता प्राप्यते, तस्मादस्माभिरयम् पृथगुल्लेखस् सम्भावितभ्रान्तिहरणाय विहितः।

(७) **हयग्रीवकृतञ् जटापटलम्**– एकादशपद्द्यात्मिका द्वयोर् वर्गयोर् विभक्ता क्रमजटाविषया कृतिरियम्। अत्र कियताऽप्यंशेन व्याडिमताद् वैलक्षण्यमपि प्राप्यते। अस्य ग्रन्थस्य एकाऽविज्ञातकर्तृका सङ्क्षिप्ता टीका कृष्णाख्यपण्डितकृतित्वेन सम्भाव्यमाना, अन्या दीपिकाख्या वाराणसीवास्तव्यस्य धरणीधरसुत-दयाशङ्करस्य टीका च प्राप्येते। दयाशङ्करेण स्वकृतौ व्याडिमतानि ऋग्वेदप्रातिशाख्यकारमतानि चोल्लिखितानि दृश्यन्ते।

(८) **जटालक्षणम् (विकल्पकौमुदी ?)**– एष ग्रन्थः केरलविश्वविद्यालये तिरुवनन्तपुरा– (त्रिबेन्द्रम्–नगरा–) ऽन्तर्गतकार्यवट्टम्–प्रभागस्थे हस्तलिखितग्रन्थागारे वर्तते। अत्र प्रारम्भे– "गणनाथम् प्रणम्याद्यौ वाणीम् ब्रह्ममाणमेव च। व्यासादींश्च मुनीन् नत्वा शाकलं शैशिरन् तथा॥ बाभ्रव्यञ्च क्रमकर्तारवँ व्याडिन् नत्वा जटाविदम्। शौनकञ् च विशेषेण नत्वा गुरुपरम्पराम्॥ करोति नरसिंहाख्यो जटालक्षणमुत्तमम्" इत्युल्लिखितमस्ति।

(९) **ऋग्वेदजटालक्षणम्**– दशग्रन्थिना कृष्णपुराभिजनेन वेङ्कटरामेण सत्यव्रतसामश्रमिकृतटीकासहितमधुसूदनशिक्षामुपजीव्य विरचितोऽयञ् ग्रन्थो मुद्रणेन प्रकाशमागतो दृश्यते।

(१०) **ऋग्वेदघनसारः**– एषोऽपि ऋग्वेदविकृतिपाठसम्बद्धो वेङ्कटरामेण रचितः प्रकाशितश् च ग्रन्थो दृष्टिगोचरीभवति।

(११) **शमानशिक्षा**– अत्र शाकल–ऋग्वेद–मन्त्रसंहितायामागतानाँ लुप्तान्त्यविसर्जनीयकानाम् पदानाञ् गणनाऽस्ति।

(१२) **शमानपदानि**– शमानशिक्षासदृशो ग्रन्थः।

(१३) **शमानलक्क्षणम् (शमानप्रकरणम्)**– दशग्रन्थिना वेङ्कटरामेण रचित× प्रकाशितश् चाऽयङ्ग ग्रन्थः ।

(१४) **लघुशमानम्**– शमानशिक्क्षासदृशोऽयङ्ग ग्रन्थः ।

(१५) **पदगाढः**– अत्त्र संहितायाम् पदपाठे परिवर्तने यानि वर्णस्वरादिपरिवर्तनानि तेषाम् प्रातिपादनमस्ति, अत्त्र प्रथमैकवचनान्त-विसर्जनीयान्त–नान्तादिपदगणना, सन्धिविशेषोदाहरणसङ्ग्रहश् चेति विषयास् सन्तीति तद्विदो वदन्ति ।

(१६) **चतुर्ज्ज्ञानम्**– अत्त्र विसर्गान्त–नान्ता–ऽयवायावान्तैक-पदसूच्यस् सन्ति ।

(१७) **अवर्णदीपः**– अत्त्र शाकलऋग्वेदसंहितागतानाम् अकारादीनामाकारादीनाम् च पदानाङ्ग गणनाऽस्ति ।

(१८) **अवर्णि**– अवर्णदीपसदृशो ग्रन्थः ।

(१९) **ऋग्वेदपदादिसङ्ख्या (सप्तसङ्ख्या)**– अत्त्र ऋग्वेदवर्ग–प्रतीकमुपादाय तद्वर्गगतपदसङ्ख्या, इत्त्यन्तपदसङ्ख्या, समस्तपदसङ्ख्या, म–न–तान्तपदसङ्ख्या च दत्तेति तद्विदः।

(२०) **ऋग्वेदपरिभाषाकारिका**– कारिकात्मकः उक्त-ऋग्वेद-पदादिसङ्ख्याक्ख्य–ग्रन्थ–सदृशो ग्रन्थः ।

(२१) **बोन्दलक्क्षणम् (ऋग्वेदपदक्क्रमलक्क्षणम्)**– ऋग्वेदीयानाम् चतुष्षष्टेरेवाद्ध्यायानाम् विषये उच्चारणविशेष–वर्णानुपूर्वी-विशेष–स्वरविशेषादीनाम् प्रतिपादको ग्रन्थः ।

(२२) **गानिलक्क्षणम्**– अत्त्र विसर्जनीयान्तानां स्वरान्तानाम् असन्धेयानाम् प्रकृतिस्थान्त्यनकारकाणाम् एकारविकारजयकारवताम् पदानाम् च प्रतिपादनमस्ति । गानिलक्क्षणम् ऋग्वेदघनसारेण सह वेङ्कटरामेण प्रकाशितम् च दृश्यते ।

(२३) **एकाक्क्षरिबैठः (एकाक्क्षरिवैट्टः, एकाक्क्षरिवैड्)**– अत्त्र ऋग्वेदगतानां सर्वेषामेव वर्गाणाम् प्रत्त्येकम् एकाक्क्षरात्मकेन सङ्केतसूत्त्रेण इत्त्यन्त–नान्त–विसर्गान्त–स्यन्त–सेऽन्ता-ऽवग्रहवत्-पदानाम् प्रतिपादनमस्ति ।

(२४) **पदान्तदीपिनी**– ऋग्वेदसंहितान्तर्गत - पदविशेषान्त - प्रतिपादकोऽयङ्ग ग्रन्थः । अत्त्र प्रारम्भे "ऋग्वेदपाठे शाकल्यदृष्टे तद्वर्त्तमना कृतिम् । पदान्तदीपिनीन् नाम्ना करोम्म्यर्थानुबन्धिनीम् । बहुशस् संशयन् दृष्ट्वा बहुधा धीमतामपि । ऋगाम्नायपदान्तेषु तच्छेदाय यतामहे" इत्त्युक्तमस्ति ।

(२५) **ऋग्वेदानुक्रमणिका**– ऋग्वेदसंहितागत–पदविशेषसूची-रूपोऽयङ्ग ग्रन्थः ।

(२६) **ऋग्विलङ्घ्यम्**– अत्र ऋग्वेदसंहितान्तर्गतानाम् एकारान्तानामैकारान्तानाञ् च पदानां सूची दत्ताऽस्ति ।

(ख) **शुक्लयजुर्वेदसम्बद्धा× प्रातिशाख्यपरिशिष्टरूपा ग्रन्थाः**–

(१) **प्रतिज्ञासूत्रम्**– माध्यन्दिनीयाम्नायाध्ययनधर्म-विशेषाणाम् प्रतिपादक× कात्यायनप्रणीतत्वेन स्वीक्रियमाणो ग्रन्थः । एतस्य ग्रन्थस्य अनन्तकृता केशवकृता मधुसूदनकृता रामशर्मकृता चेति प्राचीनाष् टीका× प्राप्यन्ते । रामशर्मणष् टीका वेबरेण प्रकाशिता च । नित्यानन्दपर्वतीयकृता टीका माध्यन्दिनीय-वाजसनेयि-शतपथ-ब्राह्मणस्य सायणकृतव्याख्यासहितस्य पञ्चमभागस्याऽन्ते मुद्रिताऽस्ति । अनन्तदेवयाज्ञिककृता टीका च युगलकिशोरपाठकेन शुक्लयजुः-प्रातिशाख्यपरिशिष्टे प्रकाशिताऽस्ति ।

(२) **भाषिकसूत्रम्**–शतपथब्राह्मणादिब्राह्मणवेदाङ्गोपाङ्ग-स्स्वराद्द्यन्वाख्यायकमेतत् सूत्रम् । एतस्य ग्रन्थस्य महास्वामि-कृता अनन्तभट्टकृता चेति द्वे टीके प्राप्येते, मुद्रिते च ते ।

(३) **वाजसनेयि–संहिता–पदकारिका–रत्नमाला**– अत्र प्रति-यजु× पदसङ्ख्या, विसर्गसङ्ख्या, सवर्णसन्धिः, सन्धिजपरिवर्तनानि च निर्दिष्टानि कथ्यन्ते । एषा शङ्कराचार्यकृतित्वेनोल्लिखिताऽस्ति ।

(४) **वेदलक्षणम्**– महादेव–मनीषिकृतेऽस्मिन् ग्रन्थे एकार-लक्षणम्, नकारलक्षणम्, वर्णक्रमकारिका, तकारलक्षणम्, पूर्वा-परोभयदीर्घिणः, षड्विंशतिलक्षणम्, ककारान्तपदानि इति प्रकरणानि सन्तीति तदभिज्ञाः ।

(५) **पदज्योतिः**– शुक्लयजुर्वेदपदपाठसम्बद्धोऽयङ्ग ग्रन्थः ।

(६) **पदरत्न-क्रमरत्नम्**– नागदेवकृतोऽयङ्ग ग्रन्थ उक्तपदज्योतिर्-ग्रन्थतुल्यः ।

(७) **आवर्णि**– महाधिपति–तिन्तिरणिकृतो लुप्ताऽऽकारादिपद-विषयकोऽयङ्ग ग्रन्थः ।

(८) **तपरम्**– संहितावस्थायान् नान्ततत्वेन दृश्यमानानाम् पदपाठावस्थायान् तान्तानाम् पदानां सङ्ग्राहकोऽयङ्ग ग्रन्थः ।

(९) **नपरम्**–पदपाठे नान्तानाम् पदानां सङ्ग्राहकोऽयङ्ग ग्रन्थः ।

(१०) **नपर-तपर-लक्षणम्**– उक्त–नपर–तपरग्रन्थसदृशोऽयङ्ग ग्रन्थश् शौरिसूनुकृतः ।

(११) **विलिङ्घ्यलक्ष्णी**– नारायणकृता एकारान्तानामेकारान्तानाञ्च पदानां सूची। अस्याः प्रारम्भे "प्रणम्य भारतीन् देवीं सर्वलोकैकमातरम्। नारायणः प्रवक्ष्यामि विलिङ्घ्यानि पदान्यहम्॥ एकारैकारवर्णौ यौ संहितायाँ विकारिणौ। तदन्तानि विलिङ्घ्यानि उच्यन्ते वेदवित्तमैः" इत्युक्तमिति तत्परीक्षकाः।

(१२) **अवर्ण्यादिवर्णमालिका**– शुक्लयजुर्वेदीयसन्देहास्पदपदयुग्मानाम्, संहितायाम् पदादिस्थस्य अकारस्य आकारस्य वा लोपेन युतानाम् पदानां सङ्ग्राहकोऽयङ्ग ग्रन्थः।

(१३) **काण्वशाखीयपदलक्षणम् (षण्मुखम्)**– अनन्ताचार्येण कृतो ऽन्वर्थनामकोऽयङ्ग ग्रन्थः केरलविश्वविद्यालयस्थहस्तलिखितग्रन्थागारे दृश्यते।

(ग) **कृष्णयजुर्वेदसम्बद्धाः प्रातिशाख्यपरिशिष्टरूपा ग्रन्थाः** –

(१) **लक्षणरत्नम्**– पूर्वोक्त–पदगाढ–चतुर्ज्ज्ञानादिसदृशोऽयङ् ग्रन्थः।

(२) **अनिङ्ग्यम्**– श्रीवत्साङ्ककृत उपशतश्लोकात्मक आपाततस् समस्तानामिव प्रतीयमानानाँ वस्तुतोऽनवग्रहाणाम् पदानाम् प्रतिपादकोऽयङ् ग्रन्थः।

(३) **अनिङ्ग्यानृतं सव्याख्यानम्**– पूर्वग्रन्थसदृशो ग्रन्थः।

(४) **अनिङ्ग्यशतकम्**– पूर्वग्रन्थसदृशो ग्रन्थः।

(५) **त्वन्ताद्द्यनुक्वरमणिका**– तुकारान्तादिपदसूचीरूपा।

(६) **शाखाशमानम्**– तैत्तिरीयककाठकस्थानालँ लुप्तविसर्गान्तानाम् पदानां सूची।

(७) **शमानसन्धिः**– पूर्वग्रन्थसदृशो ग्रन्थः।

(८) **षड्विंशतिसूत्तरम्** - सदृशत्वेन सन्देहास्पदानाम् पदानाम् प्रतिपादको ग्रन्थः।

(९) **अवर्णि**–पूर्वोक्तावर्ण्यादिग्रन्थसदृशो ग्रन्थस् तैत्तिरीयाणाम्।

(१०) **अवर्ण्यादिवर्णमालिका**– पूर्वोक्तावर्ण्यादिग्रन्थसदृश्येव।

(११) **अवर्णदीपः**–पूर्वोक्तऋग्वेदीयावर्णदीपग्रन्थसदृशो ग्रन्थः।

(१२) **अवर्ण्यावर्णि**– अन्वर्थनामा ग्रन्थः।

(१३) **ईकारान्ताः**– पदपाठे ईकारान्तानाम् पदानां सूची।

(१४) **पूर्वोत्तरोभयदीर्घी**– पूर्वदीर्घिणाम् उत्तरदीर्घिणाम् उभयदीर्घिणाञ्च सन्धेयपदानां सूची।

(१५) **उभयपूर्वोत्तरदीर्घी**– पूर्वग्रन्थसदृशो ग्रन्थः ।

(१६) **यणादेशदीर्घी**– यणादेशविषयाणान् दीर्घान्तानाम् पदानां सूची ।

(१७) **यणादेशदीर्घादिविधिः**– पूर्वग्रन्थसदृशो ग्रन्थः ।

(१८) **उभयह्रस्स्वि**– पदपाठे ह्रस्स्वादिकानां ह्रस्स्वान्तानाम् पदानां सूची ।

(१९) **प्लुतानुशासनम्**– तैत्तिरीयसंहितान्तर्गतप्लुतस्स्वरगणनाऽऽत्मकोऽयङ् ग्रन्थः ।

(२०) **सकारपरविसर्जनीयः**–तैत्तिरीयसंहितान्तर्गतविसर्जनीयलोपादिस्स्थाननिर्देशविषयको ग्रन्थः ।

(२१) **थकारधकारसूत्तरम्**–तैत्तिरीयसंहिताया थकारवतान् धकारवताञ् च पदानाङ् गणनया युतो ग्रन्थः ।

(२२) **अन्तपप्रदीपिका**– दीर्घोत्तरवर्तिविसर्जनीयान्तपदनिर्देशात्मिका कृतिः ।

(२३) **नतान्तपदानि**– शेषनारायणकृतोऽयङ् ग्रन्थो नान्त–तान्तपदगणनात्मकः ।

(२४) **तैत्तिरीयपदस्वरलक्षणम्**– अन्वर्थनामको ग्रन्थः ।

(२५) **इङ्ग्यरत्नम्**– तत्तदनुवाकगतसमस्तपदसङ्ख्यानिर्देशकोऽयङ् ग्रन्थः ।

(२६) **वेदलक्षणम्**– पदपाठेऽवग्रहवताम् पदानाम् प्रतिपादकोऽयङ् ग्रन्थः ।

(२७) **अवग्रहलक्षणम्**– अवग्रहप्रतिपादको ग्रन्थः ।

(२८) **प्रगृह्यः**– प्रकृतिभावसन्धिप्रतिपादको ग्रन्थः ।

(२९) **अवेष्टनपदानि**– वर्णानुक्रमेणानुक्रान्तानामनवग्रहाणां सावग्रहाणामिव प्रतीयमानानाम् पदानाङ् गणनायाः प्रतिपादको ग्रन्थः ।

(३०) **अर्धान्ताः**– अनेकवाक्यवतामत एव मद्ध्यविरामयुतानामनुवाकानाङ् गणनायाः प्रतिपादको ग्रन्थः ।

(३१) **उच्चस्स्वरनिर्णयः**–खण्डद्द्वयात्मक आद्द्युदात्तकानामनुदात्तकानाञ् च पदानाङ् गणनया युतो ग्रन्थः ।

(३२) **स्वरशिक्षा**– उदात्तस्वरयुतपदप्रतिपादको ग्रन्थः ।

(३३) **विलङ्घ्यम्**– पदपाठे एकारान्तानाम् ऐकारान्तानाञ् च पदानाम् प्रतिपादको ग्रन्थः ।

(३४) **सप्तलक्क्षणम्**– सप्तानां सन्धीनावँ विश्श्लेषणस्य प्रतिपादको नपर–तपरा–ऽवर्ण्यादिपदप्प्रतिपादकश् च ग्रन्थः ।

(३५) **रावणभेटुः (रावणभेट् वा)**– शुद्धोच्चारणसम्बद्धो ग्रन्थः । वस्तुतस् तु ऋग्वेदसम्बद्धैकाक्क्षरिबैठग्रन्थसदृशोऽयङ्ग ग्रन्थ× प्रतीयते ।

(३६) **तैत्तिरीयस्स्वरावधानम्**– वेदलक्क्षणग्रन्थ× केरलविश्श्वविद्द्यालयीयहस्तलिखितग्रन्थागारे वर्तमानः, ग्रन्थमानम् ११०, लिपिः ग्रन्थलिपिः, लेखाधारस् ताडपत्त्रम्, ग्रन्थोऽपूर्णः ।

(घ) सामवेदसम्बद्धा× प्रातिशाक्ख्यपरिशिष्टरूपा ग्रन्थाः –

(१) **लघुऋक्तन्त्रसङ्ग्रहः**–ऋक्तन्त्रसारसङ्ग्रहरूपोऽयङ्ग ग्रन्थः।

(२) **सामवेदसप्तलक्क्षणम्**– शौरिसूनु-नारायणाब्भ्यावँ विरचितेऽस्मिन् ग्रन्थे शमानम्, विसर्गलोपालोपौ, रङ्गः, विलिङ्घ्यम्, नतपरे, अवर्णि, अनवग्ग्रहम् इति सप्त प्रकरणानि सन्ति ।

(३) **उत्तरर्ग्धारिमाला**– सामवेदोत्तरार्चिकस्थानान् धारिस्स्वराणाम् प्रतिपादकोऽयङ्ग ग्रन्थः । दीर्घोऽनुदात्तस् स्वरितपूर्वकस् स्वरो धारी प्रचयापरपर्यायः ।

(४) **उत्तरर्ग्गुदात्तमाला**– सामवेदोत्तरार्चिके उदात्तस्स्वराणाम् प्रतिपादको ग्रन्थः ।

(५) **उत्तरर्क्स्वरितमाला**– सामवेदोत्तरार्चिके स्वरितस्स्वराणाम् प्रतिपादकोऽयङ्ग ग्रन्थः ।

(ङ) अथर्ववेदसम्बद्धानाम् प्रातिशाक्ख्यपरिशिष्टरूपग्रन्थानामभावः

अथर्ववेदीयग्रन्थेषु तु अथर्व–(वेद–) प्रातिशाक्ख्यमेव शमानशिक्क्षादिकृतकार्यकारीति नैतादृशा अन्न्ये ग्रन्था अथर्ववेदसम्बद्धा× प्रचुरा× प्रचुरप्प्रचारा वा विज्ज्ञायन्ते[1] ।

८. शिक्क्षेति प्रसिद्धा ग्रन्थाः

प्रातिशाक्ख्येषु प्रतिपादितानां संहितादिविधीनाम् प्रायेण पाणिनीयेन व्याकरणेनैव कथञ्चिद् गतार्थत्त्वम् मन्न्वानानावँ वेदानावँ वेदलक्क्षणविशेषाणाञ् चाऽद्ध्ययने उत्साहेन रहितानाञ् जनानाम् प्रातिशाक्ख्याद्ध्ययनाय ग्लानत्त्वात्, अर्वाचीनानाञ् जनानाम् प्रायेण सङ्क्षेप-

---

१. प्रातिशाक्ख्यपरिशिष्टरूपाणामेतादृशानाङ्ग ग्रन्थानामधिकतरम् परिचयम् प्राप्तुं सूर्यकान्तकृतो लघुऋक्तन्त्रपरिचयो द्रष्टव्यः ।

रुचित्वात्[1], देशश्यभाषाप्रभावशिक्षाव्भ्यासादिमान्द्यप्रमादालस्स्यादि–दोषकृतवेदोच्चारणदोषवृद्धिपरिहारस्स्यावश्यकत्वात्, प्रातिशाख्येषु अप्रतिपादितानां सम्प्रदायप्रामाण्यत उपलब्धानाङ्कासाञ्चिद् विशिष्टानावँ व्यवस्थानाम् प्रतिपादनस्स्याऽऽवश्यकत्वाच् च अर्वाचीने काले विविधाश् शिक्षाग्रन्था आचार्यैः कृतास् सन्ति । तासु काश् चित् प्राचीनाः काश् चिदनत्यर्वाचीनाः काश् चिदर्वाचीनाः काश् चित् तत्तद्वेदशाखासम्बद्धाः काश् चित् सर्ववेदशाखालोकसाधारण्यश् च दृश्यन्ते । तासाम् परिचय ऋग्वेदादिशाखाविशेषसम्बन्धक्रमेण अधः प्रस्तूयते ।

(अ) ऋग्वेदीयशिक्षाग्रन्थाः

(क) **शैशिरीयशिक्षा**– अस्स्यां शिक्षायावँ वर्णसङ्ख्या, वर्णविभागाः, मात्रा, स्थानम्, करणधर्माः (आव्भ्यन्तरप्रयत्नरूपाः), करणोपसंहारभेदाभेदौ, अभिनिधानम्, सयँयोगविशेषाः, द्वित्वम्, तकारागमः, वर्गद्द्वितीयादेशः, स्वरभक्तिः, वर्णविशेषोच्चारणविधिः, विसर्गादेशाः, उदात्तादिस्स्वराः, कम्पः, पाठगुणाः, ह्रस्तस्स्वरविधिः, विवृत्तिः, स्वरभक्तिविशेषः, स्वरितोच्चारणम्, ऊष्मगतिः, यकारोच्चारणविशेषाः, यमनिषेधः, नादः, नकारविकाराः, रङ्गः, स्वरितस्स्वरविशेषाः, विवृतविचारः, अभिनिहिता वर्णाः, घोषवदादेशः, पदान्तस्था वर्णाः, मकारविकाराः, तकारविकाराः, ङकार–नकार–प्रकृतिभावौ, तकारथकारागमौ, ककारागमः, शकारविकारः, विसर्गविकारः, सयँयोगपिण्डविशेषाः, हकारोच्चारणविशेषः, वर्णधर्माः, प्रणवविचारः, वेदषडङ्गपरिचयश् चेति विषयाः प्रतिपादितास् सन्ति । अत्र कुत्र चिद् ग्रन्थस् त्रुटित इवाऽऽलक्ष्यते । तत्र जात्यादिस्स्वरितनिरूपणेऽत्र त्रुटितो भागस् स्वराङ्कुशशिक्षायामुपलब्ध्यते । अत्र ग्रन्थे "शैशिरोऽहम् प्रवक्ष्यामि शाखाया लक्षणवँ विधिम्"[2] इत्युक्तमिति अस्स्य ग्रन्थस्स्य कर्ता शाखाप्रवर्तकश् शैशिर इति वक्तुं शक्यते, तथापि शाखाप्रवर्तकेन तु प्रातिशाख्यमेव प्रोक्तं स्यादिति अस्स्य ग्रन्थस्स्य शैली चाऽर्वाचीनेव प्रतिभातीति च शैशिरीयशाखाद्ध्यायिना केनापि विदुषाऽयङ्ग ग्रन्थो रचित इति प्रतीयते । मङ्गलाचरण–समापन–शैली–विचारादिय

---

१. 'प्रायेण सङ्क्षेपरुचीनल्पविद्द्याऽपरिग्रहान् । सम्प्राप्य वैयाकरणान् सङ्ग्रहेऽस्तमुपागते' इति वाक्यपदीयभणितिरपि (२।४७६) अत्र स्मरणीया । २. शै. शि., श्लो. ४ ।

शिक्षा नातिप्राचीनेत्यनुमीयते। किन्तु कालोऽनिश्चितः। उपलब्ध्यमाना पद्द्यमयी पाणिनीयशिक्षा इमां शिक्षामुपजीवन्तीव दृश्यते। अस्या ऋग्वेदशैशिरीयशाखया सह सम्बन्धो नाम्ना उपक्रमस्थशाखाभेदप्रवर्तक-गणनादिना 'शैशिरोऽहम् प्रवक्ष्यामि शाखाया लक्षणवँ विधिम्' इति वचनेन च बुद्ध्यते। उपलब्ध्यमानम् ऋग्वेदप्रातिशाख्यमपि शैशिरीयशाखाया एवेति तु पूर्वमेवोक्तम्। अस्याश् शिक्षायाष् टीका नोपलब्ध्यते। मुद्द्रिता चेयम्।

(ख) **शौनकशिक्षा**– एकस्याश् शौनकशिक्षाया उल्लेख× काशिकायाम् अस्ति। एका शौनकशिक्षा एतर्हि केरलब्रह्मेषु बह्वृचेषु प्रसिद्धा। पद्द्यरूपा पाणिनीयशिक्षा एतां शिक्षाम् भूम्नोपजीवन्ती दृश्यते। पाणिनीयशिक्षाया× कतिपयानान् दुर्बोधार्थानाम् पद्द्यानामर्थोऽस्याश् शिक्षायास् सटीकाया अद्ध्ययनेन बुद्ध्यते। "बह्व्यस् सन्ति शिक्षाश् शौनकीयपाणिनीयशैशिरीयाऽऽपिशलीयाद्द्याः" इति कथनेन अर्वाचीने काले अप्प्रसिद्धे अपि शैशिरीयापिशलीयशिक्षे उल्लिखन्तीम् प्राचीनामपूर्णरूपेणोपलब्धाण् टीकाम् पूर्णाङ् कृत्वा तया सयँ योज्ज्यैषा शिक्षा दिवाकरनामकेन नम्बूतिरिद्द्विजेन्द्रेण मुद्द्रापयित्वा प्रकाशिताऽस्ति। किन्तु अत्रेदं स्मरणीयँ यद् देहलि–महानगरस्थितहौजखासटोल्लस्थसरस्वतीविहारपुस्तकालये वर्तमानायां शौनकशिक्षाटीकाप्रतिलिप्याम् तन्मूलभूते मद्द्रास–सर्वकार–हस्तलिखितपुस्तकालयस्थे हस्तलेखे च तस्याष् टीकायास् समाप्तिवाक्यम् "स्वशाखासंश्रितानायँ या कल्पवल्लीव काङ्क्षितम्। ददाति द्द्विजमुख्यानां सेयमृक् श्रेयसेऽस्तु वः" इत्यस्तीति प्राचीना टीका पूर्णरूपैवोपलब्ध्यमाना प्रतीयते, अतश् शौनकशिक्षाया× पुन× प्रकाशने सा टीका सयँ योजनीया विद्द्वद्भिरिति।

(ग) **पाणिनीयशिक्षा**– अद्द्यतत्वे पाणिनीयशिक्षा नाम एका पद्द्यबद्धा शिक्षा प्राप्यते। अस्याश् च त्रिविधा× पाठा× प्राप्यन्ते। अग्निपुराणे अस्या लघुतम× पाठ उपलब्ध्यते[1]। तत्र केवलन् द्वाविंशतिश् श्लोकास् सन्ति। अस्याश् शिक्षाया अन्यस्मिन् लघुपाठे पञ्चत्रिंशत् श्लोका× प्राप्यन्ते। शिक्षाप्रकाशटीका पञ्जिकाभाष्यञ् चाऽस्यैव पाठस्य प्रतीयेते। अयम् पाठो याजुषपाठ इत्युच्यते इति परीक्षकाः। अस्याश् शिक्षाया वृद्ध× पाठश् शिक्षासङ्-

---

१. ३३६।१–२२।

ग्रहे सस्स्वरसङ्केतम् मुद्द्रितोऽस्ति । अन्तिमौ द्विविधौ पाठौ वेबरेणापि मुद्द्रापितावभूताम्[१] । इयं शिक्क्षा पञ्चखण्डात्मिकेति मित्तरमिश्रः[२]; नवखण्डात्मिकेति मधुसूदनः[३] । इदानीन् त्वत्तर एकादश खण्डाऽ प्राप्प्यन्ते । अस्स्याश् शिक्क्षायाष् षष्टिश्लोकात्मके पाठे संहितावँ विहायाऽन्न्ये वर्ण-स्वरादयश् शिक्क्षाशास्त्रविया आयान्ति । अस्स्याऽ कर्ता च पाणिनिरिति केचित्[४], तद्भिन्न एव कश् चिदित्त्यपरे[५], पिङ्गल इत्त्यन्न्ये[६] । इयं शिक्क्षा शैशिरीयशिक्क्षासारसङ्ग्रहात्मिकेव दृश्श्यते । भारतवर्षे यवनानामाक्क्रमणे जातेऽस्स्याश् शिक्क्षाया रचनाऽभूदिति केचनाऽऽधुनिकाः । कय्यटेन एकादश बाह्य्य-प्रयत्ना उक्ताः, अस्स्याम् पाणिनीयशिक्क्षायान् तु नैकादश बाह्य्यप्रयत्ना उक्ता इति कय्यटादियमर्वाचीनेति च तेषाम् भणितिः[७] । भर्तृहरिणाऽपि पद्द्धात्मिकायाऽ पाणिनीयशिक्क्षाया अनन्न्यसाधारण एकश् श्लोक[८] आचार्यवचनत्त्वेन उद्धृत[९] इति भर्तृहरित इयम् प्राचीनेत्त्यन्न्ये[१०] । "मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् । मारुतस् तूरसि चरन् मन्द्रञ् जनयति स्वरम्" इति तु मैत्तरायणीयोपनिषदि (७।११) च प्राप्प्यते । इयं शिक्क्षा वेदाङ्गभूता शिक्क्षेति आचार्यसायणेनोक्तम्[११] । किन्तु कस्स्या वेदशाखाया इयं शिक्क्षेति तु न प्रतिपादितन् तेन । पाराशर्यां शिक्क्षायाम् 'पाणिन्न्यास् सर्ववेदेषु सर्वशास्त्रेषु गीयते'[१२] इत्त्युक्तम् । मधुसूदनसरस्स्वतीत्त्याक्ख्येन यतिना च "सर्ववेदसाधारणी शिक्क्षा 'अथ शिक्क्षाम् प्रवक्क्ष्यामि' इत्त्यादिनवखण्डात्मिका पाणिनिना प्रकाशिता"[१३] इति कथितम् । पाणिनिना यथा वेदलोकसाधारणं सर्ववेदपारिषदञ्[१४] च व्याकरणङ् कृतन् तथैव शिक्क्षाऽपि वेदलोकसाधारणी सर्व-

---

१. Indishe Studien, iv, 1858, pp. 345–71 .
२. वीरमित्तरोदये परिभाषाप्रकाशे, पृ. २० । ३. म. स्तो. टी., श्लो. ७ । ४. वी. मी. प. प्र., पृ. २०, म. स्तो. टी., श्लो. ७, पा. शि. प्रदी. पृ. १, १७ । ५. पा. शि., शि. स., पृ. १७ । ६. पा. शि. प्र., शि. स., पृ. ३८५ । ७. CSIPOIG, p. 5, 9 । ८. पा. शि. श्लो. ६ । ९. वा. प., ब्र. का., स्वो. वृ. श्लो. १३५ । १०. पा. शि. शि. स. स. पृ. १४ । ११. ऋ. वे. भा. भू., पृ. २५ । १२. शि. स. पृ. ६०, श्लो. ७८ । १३. म. स्तो. टी. श्लो. ७ । १४. पा. व्या. भा. २।१।५८, ६।३।१४, (पस्पशाह्न्निकप्रारम्भेऽपि)।

वेदपारिषदी एव कृतेति तस्याऽऽशयस् स्यात् । "यथोक्तलँ लोकवेदयोः"[1] इत्यपि एतस्यैवोपोद्वलकम् । किन् तु शिक्क्षासङ्ग्रहविज्ज्ञापने युगलकिशोरव्यासेन पाणिनीयशिक्क्षा ऋग्वेदस्येत्युक्तम् । ऋग्वेदिनां शिक्क्षादिवेदषडङ्गेषु पाणिनीयशिक्क्षाऽपि ऋग्वेदाद्ध्यायिनां सम्मतत्या सङ्गृहीता दृश्यते इति[2], वाराणसेय-सँस्कृतविश्वविद्द्यालयेनाऽपि ऋग्वेदपाट्ठ्यक्क्रमे पाणिनीयशिक्क्षा निर्धारितेति[3] च तस्या ऋग्वेदीयशिक्क्षामद्ध्येऽस्माभिः प्रतिपादनङ्ग क्रियतेऽत्तर । तत्तर पाणिनीयशिक्क्षायाम् प्रातस्सवनादिसवनभेदेन शस्त्रोच्चारणभेदस्योपदिश्यमानता[4] अपि इमम् पक्क्षम् पुष्णाति । यद्द्यपि सामवेदसर्वानुक्क्रमणण्यां हरदत्तेन पाणिनीयशिक्क्षाऽपि सामवेदीयशिक्क्षात्त्वेन प्रतिपादिता[5], उदात्तमाक्ख्याति वृषोऽङ्गुलीनामित्यादिना[6] सामवेदीयानां स्वरनिर्देशप्रकारश् चाऽत्तर प्रतिपादित इति रुद्द्रप्रतापादिभिर् व्याक्ख्यातमिति[7] च सामवेदीयशिक्क्षात्त्वमप्यस्या नाऽसम्भाव्यम्, तथापि तत्तराऽन्न्यत् सुदृढम् प्रमाणन् न दृश्यते । यद्द्यप्यत्तर 'प्राकृते सँस्कृते चाऽपि'[8] इत्युक्तत्वाद् अस्याश् शिक्क्षाया लोकवेदसाधारणसँस्कृतविषयत्त्वमपि प्रतीयते, तथाप्यत्तर दुस्स्पृष्ट[9]-विवृत्ति[10]-रङ्ग[11]-कम्प[12]-शस्त्रपाठ[13]-साङ्गवेदाद्ध्ययनविधि[14]-हस्तस्स्वरप्रदर्शनविधि[15]-वेदोच्चारणसम्पदावँ[16] वेदमात्तरविषयाणावँ विषयाणाम् प्रतिपादनस्य दर्शनादस्या वेदशाखाविशेषसम्बद्धत्त्वमपि प्रतीयत एव । यद्द्यपि हरदत्तेन सामवेदसर्वानुक्क्रमणण्याम् अस्याश् शिक्क्षायाः पिङ्गलाऽऽचार्यकृतम् भाष्यमुल्लिखितन् तथापि अस्याश् शिक्क्षायाः प्राचीनाष्टीका नैव प्राप्यन्ते । पञ्जिकाकारेण चाऽस्याश् शिक्क्षाया अन्न्यैरव्याक्ख्याततत्त्वमुक्तं स्वव्याक्ख्यारम्भे। प्रकाशटीकाऽपि नातिप्राचीना स्वल्पकाया च, तथाप्यस्याः कर्ता वेदाङ्गेषु निपुण एव दृश्यते ।

---

१. पा. शि. श्लो. १ । २. निर्णयसागरसँस्करणे, १९३४ । ३. निदर्शिकायाम् (१९७५), पृ. ७५ । ४. पा.शि.श्लो. ३६–३७ । ५. ऋ. त. सा. स., पृ. २, ७ । ६. पा. शि., श्लो. ४३ । ७. पा. शि., प्र., श्लो. ४३, पा. शि. अ. श्लो. ४३ । ८. पा. शि. श्लो. २ । ९. तत्तरैव, श्लो. ५ । १०. तत्तरैव, श्लो. २४ । ११. तत्तरैव, श्लो. २६–२९ । १२. तत्तरैव, श्लो. ३० । १३. तत्तरैव, श्लो. ३६–३७ । १४. तत्तरैव, श्लो. ४१–४२ । १५. तत्तरैव, श्लो. ४१–४२, ५४–५५ । १६. तत्तरैव, श्लो. ५१ ।

दर्ता- ०१४०२
१४०५५

कालीप्रसादमिश्र–रुद्द्रप्रताप–गुरुप्रसादादि–कृता अर्वाचीनाष् टीकास् तूपलब्ध्यन्त एवाऽस्स्याः ।

(घ) **स्वराङ्कुशशिक्क्षा–** अत्त्र उदात्तानुदात्तस्वरिततद्भेद-निरूपणङ् कृतमस्ति । अत्त्र मुद्द्रितपाठे पञ्चविंशतिश् श्लोकास् सन्ति । अस्स्याऽ कर्ता जयन्तस्स्वामी । केचन स्वराङ्कुशशिक्क्षाया एकस्स्याऽ कर्तारं रावणमुल्लिखन्ति[1] । अस्स्याश् शिक्क्षाया यजुर्वेदीयशिक्क्षा-त्त्वयँ युगलकिशोरपाठकेनोक्तम्[2], किन्तु तदसङ्गतम्, 'जयन्तस्स्वामिना प्रोक्ता श्लोकानामेकविंशतिः । स्वराङ्कुशेति विख्याता बह्वृचां (च) स्वरसिद्धये'[3] इति वचनात्, शैशिरीयशिक्क्षायास् स्वरितनिरूपणप्रकरणेन सह सर्वँवादाच् चाऽस्स्याश् शिक्क्षाया अंशानाम् ।

(ङ) **स्वरव्यञ्जनशिक्क्षा–** अस्स्यां शिक्क्षायाम् ऋग्वेदे कीदृशे स्थले रेफवन्ति पदानि कीदृशे स्थले च ऋकारवन्ति पदानि इति निरूपितम् । अस्स्याश् शिक्क्षाया हस्तलेखो भाण्डारकर्–ओरिएण्टल्–रिसर्च्–इन्ष्टिच्युट्(पुणे)इति प्रसिद्धायां संस्थायां शाकल्यसम्मतसर्वानुक्क्रम-प्रगृह्य्या–ऽवगृह्य्य–नकारान्तविसर्गान्तपदसङ्ख्या–छन्दोवर्ण–चारायणीयशिक्क्षाग्रन्थानां हस्तलेखैस् सहैकस्मिन्नेवाऽऽदर्शे वर्तते(हस्तलेख-सङ्ख्या २१/१८७५–७६) ।

(आ) शुक्लयजुर्वेदीयशिक्क्षाग्रन्थाः

(क) **याज्ञवल्क्यशिक्क्षा–** अस्स्याश् शिक्क्षायाऽ पाठोऽतीवाऽव्यवस्स्थितोऽस्ति । शिक्क्षासङ्ग्रहे मुद्द्रितऽ पाठः, १९५० खरैस्ताब्दे निर्णयसागरमुद्द्रणालये मुद्द्रितायां शुक्लयजुर्वेदमाद्ध्यन्दिनीयवाजसनेयि-संहितायाम् परिशिष्टरूपेण मुद्द्रितऽ पाठः, अमरनाथशास्त्रिसम्पादितश् शिक्क्षावल्ल्या विवृत्त्या सहितऽ पाठश् च परस्परम् भिन्ना दृश्यन्ते । तत्त्र अमरनाथसम्पादितपाठानुसारम् पूर्वार्द्धे स्वरप्रकरणम्, उत्तरार्द्धे वर्णप्रकरणञ् च प्राप्यते । तत्त्र स्वरप्रकरणे त्रयस् स्वराः, तेषां रूप–दैवत–वर्ण–छन्दो-गान्धर्व-स्वरसम्बन्धाः, मात्त्रा, अद्ध्ययनविधिः, हस्तेन स्वरादीनां सङ्केतस्स्य विधिः, स्वरसंहिताविधिश् चेति विषयाः; वर्णप्रकरणे च वर्णवर्गाणाम् पदवर्गाणाञ् च रूप–दैवत–वर्ण–गोत्त्र-लिङ्गानि, सन्धिभेदाः, विवृत्तिः, स्वरभक्तिः, ऐकारौकारयोस् स्वरूपम्, ओङ्कारादिप्लुतगणना, वाजसनेयिनां श्रुतौ लृकारस्स्य दीर्घताया अभावः,

१. म. श. शि., श्लो. ५ । २. शि. स. वि. पृ. १ ।
३. स्व. शि., श्लो. २३ ।

सयँ युक्त-व्यञ्जन-स्वरविचारः, अभिनिहित–वर्णोच्चारण–प्रकारविशेषः; पौष्करसादिमतानुगा प्रथमवर्णस्थानक–द्वितीयवर्णोच्चारण–व्यवस्था, ककार-टकारागमौ, परसवर्णादेशाः, अनुस्वारमात्त्रा, ऊष्मगतयः, यकार–वकारोच्चारणनियमाः, हकारस्थानविचारः, वर्णविशेषोच्चारणविधिः, पदोच्चारणविधिः, अयस्पिण्डादिसयँयोगविशेषाः, वर्ण–रूप–दैवत–करण-स्थानसम्बन्ध- (प्रयत्न-) स्थानानि, यमाः, वर्ग्यवर्ण-द्वित्त्वनियमाः, जश्त्वादिविधिः, अद्ध्येतृधर्माश् चेति विषयास् सन्ति। अस्याश् शिक्षाया रचयिता याज्ञवल्क्य इति प्रसिद्धिरस्ति। किन्तु याज्ञवल्क्यप्रोक्तवेदसम्बद्धत्वादेवाऽस्याश् शिक्षाया याज्ञवल्क्यशिक्षेति नाम जातमिति सम्भाव्यते। अत्तर सोमशर्मणः, याज्ञवल्क्यस्य, आपस्तम्बस्य, माध्यन्दिनस्य, वाजसनेयिनश् च[1] उल्लेखाः प्राप्यन्ते। अत्तर कातीय–प्रतिज्ञापरिशिष्टस्याऽनुवादोऽपि प्राप्यते[2]। अस्या रचनायाः कालो निश्चेतुमशक्यः। सोमशर्मण उल्लेखाद् वैक्रमाब्दानाम् पञ्चम्याश् शताब्द्याः प्राचीना नेयमिति केचित्[3]। स्पर्शानां शनैश्चर–दैवतत्त्वमुक्तमप्यर्वाचीनत्त्वमेवाऽस्या दृढयतीति च ते एव भणन्ति। उव्वटेनाऽपि अस्या उल्लेखः कृतोऽस्ति[4]। पाराशर्यां शिक्षायाम्[5], वर्णरत्नप्रदीपिकायां शिक्षायाम्[6], मल्लशर्म-शिक्षायाम्[7], प्रातिशाख्य-प्रदीप-शिक्षायाञ्चाऽस्या उल्लेखास् सन्ति। अस्याश् शिक्षायाः प्राचीनाष् टीका नोपलब्ध्यन्ते। अर्वाचीनाष् टीकाः प्राप्यन्ते। मुद्द्रिता चेयं शिक्षासङ्ग्रहादौ।

(ख) **कौषिकी शिक्षा**– एषा शिक्षा कालिघट्टस्थ–सँस्कृत–साहित्त्य–परिषदो मुखपत्त्रे (६२/१–४; १९७९) अशोककुमार–चट्टोपाद्ध्यायेन प्रकाशिताऽस्ति। एषा शिक्षा परिष्कृता नोपलब्ध्यते। अत्त्रोल्लिखितैरुदाहरणैरियं शुक्लयजुर्वेदसम्बद्धा प्रतीयते। वस्तुत एषा शिक्षा विषयप्रतिपादनदृष्ट्या महत्त्वहीना दृश्यते।

(ग) (**अमरेशनिर्मिता**) **वर्णरत्नप्रदीपिका शिक्षा**– अस्यां शिक्षायां शुक्लयजुर्वेदप्रातिशाख्यस्य विषया एव पद्द्यैः प्रतिपादि-

---

१. या. शि., श्लो. ६, १३, ८९, १६९; १०३, १०३, ९१।
२. तत्त्रैव, श्लो. १११–११४। ३. CSIPOIG, p. 31.
४. शु. य. प्रा. भा. ४।१६५। ५. शि. स., पृ. ६०, श्लो. ७७।
६. तत्त्रैव, पृ. १२४, श्लो. ८५। ७. तत्त्रैव, पृ. १५३, श्लो. ५।
८. तत्त्रैव, पृ. २१०, २१२–१६, २२३, २२६, २३४, २९४, २९७।

तास् सन्ति। कुत्रचित् तु अपेक्षिता विषया याज्ञवल्क्यशिक्षा-ऽऽदिकाद् ग्रन्थान्तरादपि सङ्गृहीता दृश्यन्ते[1]। अस्याः कर्ता भारद्वाजकुलोद्वहोऽमरेशः। अस्याश् शिक्षाया उल्लेखो बालकृष्णगोडशया 'शाके द्व्यब्भ्राष्टभूमिते शुभे विक्रमवत्सरे माघे मासि सिते पक्षे प्रतिपद्भानुवासरे' कृतायाम्[2] प्रातिशाख्यप्रदीपशिक्षायाङ्क कृतोऽस्ति[3]। अस्याः शिक्षायान् तु माध्यन्दिनौ-ऽज्जिहायनक-कातीय-याज्ञवल्क्य-शाकटायन-शाकल्य-शौनक-गार्ग्याणामुल्लेखास् सन्ति[4]। एते उल्लेखाः शुक्लयजुर्वेदप्रातिशाख्यन् तदीयमुव्वटभाष्यञ् चोपजीवन्तः प्रतीयन्ते। इयं शिक्षासङ्ग्रहे मुद्दरिताऽस्ति।

(घ) **प्रातिशाख्यप्रदीपशिक्षा**– अस्याः शिक्षायाः शुक्लयजुर्वेदप्रातिशाख्यात् प्रतिज्ञासूत्र–याज्ञवल्क्यशिक्षा–वासिष्ठशिक्षा–पाराशरशिक्षा–लघुमाध्यन्दिनीयशिक्षा-कात्त्यायनशिक्षा-ऽमोघानन्दिनी – मल्लशर्मशिक्षा – पाणिनीयशिक्षा – वर्णरत्नप्रदीपिका–श्लोकवार्त्तिक–क्रमसन्धानशिक्षा– माध्यन्दिनीयशिक्षाज्योत्स्ना–ऽनन्तयाज्ञिककृतप्रतिज्ञासूत्रभाष्य-नवाङ्कसूत्र-(परिभाषाङ्कशिक्षा)पाणिनीयव्याकरणवार्तिक-जटाद्द्यष्टविकृतिलक्षणेब्भ्यश्[5] चाऽपेक्षितानि वचनानि सङ्गृह्य्य विषयान् विविच्च्य शिक्षाशास्त्रसम्बद्धास् सर्वे विषयाः प्रतिपादितास् सन्ति। अस्याः कर्ता बालकृष्णो गोडशेः। समयश् च ग्रन्थान्ते १८०२ शकान्ताब्दा इति प्रोक्तः[6]।

(ङ) **तैत्तिरीयशिक्षा**– अस्याः शिक्षायायँ याज्ञवल्क्यशिक्षोक्ता एव विषयास् सङ्क्षिप्तीकृतैस् तदीयशिक्षाश्लोकैरेव प्रतिपादिताः। अस्याश् शिक्षाया हस्तलिखिता प्रतिकृतिर् मद्द्रासस्थसर्वकारीयहस्तलिखितग्रन्थालये देहलि-महानगरान्तर्गतहौजखासटोल्लस्-

---

१. श्लो. ४, ७–९, १५, १६, ३९, ४१, ४२, १६१–६२, १७७–७८, २१३–१४, २२०–२३। २. शि. स., पृ. ३०६, श्लो. १। ३. शि. स., पृ. २९५, २९८, २९९। ४. श्लो. ६९–७०, ७०, ८५, ८५, ११९, १२२, १२०, १२२, १६५। ५. शि. स., पृ. २११, २२४; २१०, २१२–१६, २२३, २२६, २३४, २९४, २९७; २२१; २२२, २९१; २२३, २२५, २९७, २९९; २२५, २९९; २२५, २५२; २५१–५२, २९५, २९८, २९९; २७०; २८९–९२; २१५, २९८; २९३, २९८; २९३; २५४, ९३–९४, २९६; २९६; ३००। ६. तत्रैव पृ. ३०६, श्लो. १।

स्थितसरस्वतीविहारपुस्तकालये चाऽस्ति ।

(च) **कात्त्यायनीयशिक्क्षा**– अस्स्या शिक्क्षाया शिक्क्षाशास्त्र-विषयेषु एकस्स्यैव विषयस्स्य स्वरस्स्य प्रतिपादनम् अस्ति । तत्त्राऽपि स्वरितस्स्वरभेदानामेव विशेषतः प्रतिपादनन् दृश्श्यते । नादस्स्वरविवेचना चाऽत्त्राऽस्ति । अस्स्याः कर्त्ता महर्षिः कात्त्यायन इत्त्युच्च्यते । अस्स्याः पाराशर्य्या शिक्क्षायामुल्लेखोऽस्ति[1] । अस्स्या जयन्तस्स्वामिना कृता टीकाऽप्प्यस्ति । तया सहैवेयं शिक्क्षासङ्ग्रहे मुद्द्रिताऽस्ति ।

(छ) **माद्ध्यन्दिनीयशिक्क्षा**– अत्त्र व्यञ्जनानान् द्वित्त्वम्, कवर्गीयखकारगणना, आर्ष्याम् माद्ध्यन्दिनीयवाजसनेयिमन्त्रसंहितायाङ्गलितानामृचाङ्गणनेति विषयास् सन्ति । अयमपि शिक्क्षाशास्त्रस्स्य न पूर्णो ग्रन्थः, किन्तु शिक्क्षाशास्त्रप्रकरणं शिक्क्षाशास्त्रपरिशिष्टमेव वा । मूर्धन्यस्य षकारस्स्यापि खकाररूपेण उच्चारणान् मन्त्रेषु ख-षयोर् विवेको दुष्करो जातोऽर्वाचीनानाम् अर्थज्ञानशून्यानाञ्च वैदिकानामिति एतस्माद् ग्रन्थादनुमीयते । अस्स्या रचयिता माद्ध्यन्दिनो मुनिरिति केचिन् मन्न्यन्ते । किन् तु माद्ध्यन्दिनीयशाखासम्बद्धत्त्वादेवेयम् माद्ध्यन्दिनीयशिक्क्षेत्त्युक्तेत्त्यस्माकम् प्रतिभाति । पाराशर्य्यां शिक्क्षायाम् माद्ध्यन्दिन्न्याश् शिक्क्षाया उल्लेखोऽस्ति[2] ।

(ज) **लघुमाद्ध्यन्दिनीयशिक्क्षा**– अस्स्यां शिक्क्षायां षकार-यकार-वकारोच्चारणानि, रेफस्स्य शषहेषु परेषु स्वरभक्तिः, लकारस्स्य स्वरभक्तिः, अनुस्स्वारभेदाः, स्थानादिभेदकृता विसर्गप्प्रकाराः, विसर्गस्स्य क्वचिद् हिकार-हुकार-हेकार-होकार-सदृशत्त्वम्, विसर्गविशेषेषु अङ्गुलिक्क्षेपविशेषस्स्य कर्त्तव्यताया विधानम्, ऋकारस्स्य एकार-सदृशत्त्वमिति विषयास् सन्ति । अयमपि न पूर्णश् शिक्क्षाग्रन्थः, शिक्क्षाशास्त्रप्रकरणग्रन्थ एवाऽयम् । अस्स्याश् शिक्क्षाया रचयिता क इति न ज्ज्ञायते । अस्स्याः प्रारम्भे 'अथ शिक्क्षाम् प्रवक्क्ष्यामि माद्ध्यन्दिनमतयँ यथा' इत्त्युक्तमस्ति । "तस्स्याः (लघुमाद्ध्यन्दिनीय-शिक्क्षायाः) माद्ध्यन्दिनमहर्षिप्रणीतत्त्वे मानाभावाच् च"[3] इत्त्युक्त्वा अमरनाथशास्त्रिणाऽपि अस्स्या अनार्षत्त्वं सूचितम् । इयमपि शिक्क्षा-सङ्ग्रहे मुद्द्रिताऽस्ति ।

(झ) **माण्डव्यशिक्क्षा**– अत्त्र माद्ध्यन्दिनीयवाजसनेयिशुक्ल-

---

१. शि. स., पृ. ६०, श्लो. ७७ । २. तत्त्रैव, श्लो. ७८ ।
३. या. शि. पृ. ११५, टि. ५ ।

यजुर्वेदमन्त्रसंहितायाम् ओष्ठ्यो बकारः कुत्तरकुत्तर वर्तते इत्येव प्रतिपादितमस्ति। अतोऽयमपि शिक्षाशास्त्रपरिशिष्टरूप एव ग्रन्थः। अतश् चाऽर्वाचीनेषु वैदिकेषु ब-वयोर् विवेको दुर्लभो जात इति स्वशाखाया मन्त्रसंहितायाम् बकाराणामल्पसङ्ख्याकत्वात् तेषाङ्ग गणनैव कृतेति प्रतीयते। अतोऽयङ्ग ग्रन्थोऽप्यर्वाचीन एव विज्ज्ञायते। अस्स्याश् शिक्षायाः पाराशर्या शिक्षायामुल्लेखोऽस्ति[1]। अस्स्याञ् च प्रारम्भे माण्डव्यस्स्य उल्लेखो वर्तते। इयमपि शिक्षा शिक्षासङ्ग्रहे मुद्द्रिता।

(ञ) **अमोघानन्दिनी शिक्षा**– अस्स्यां शिक्षायाम् माद्ध्यन्दिनीयमन्त्रसंहिताया बकारयुक्तानावँ वकारयुक्तानाञ् च पदानाङ्ग गणना, वकारोच्चारणप्रकाराः, नादवर्णाः, रङ्गवर्णाः, प्लुतगणना, यमाः, वर्णविशेषोच्चारणविशेषाः, माद्ध्यन्दिनीयमन्त्रसंहिताकण्डिकावाक्याऽक्षरगणना, शिक्षाशास्त्रलक्ष्यलक्षणसम्बन्धविचारश् चेति विषयास् त्रिंशं शतं श्लोकाश् च सन्ति। अस्स्यां शिक्षायां सुघटितम् प्रतिपादनन् न दृश्यते। स्वशाखावेदस्स्थलविशेषोच्चारणविशेषद्द्वारैवाऽत्तरोच्चारणादीनावँ व्यवस्था कृताऽस्ति। अस्स्या अन्ते यकारयुतक्षकाराणाङ्ग गणनाऽपि कृता दृश्यते इति एतद्रचनासमयेऽपि वैदिका यकाररहितस्स्य यकारसहितस्स्य च क्षकारस्स्योच्चारणे विवेकङ्ग कर्तुम् प्रायेण न शक्नुवन्ति स्स्मेति सम्भाव्यते। अस्स्याः कर्ताऽज्ज्ञातः। बयुतवयुतानाङ्ग क्षयुत-क्ष्ययुतानाञ् च पदानावँ विवेकस्स्याऽत्तर प्रतिपादितत्वादियं शिक्षाऽप्यर्वाचीनैवाऽऽभाति। अस्स्याश् शिक्षायाः पाराशर्या शिक्षायामुल्लेखोऽस्ति[2]। इयमपि शिक्षा शिक्षासङ्ग्रहे मुद्द्रिता वर्तते।

(ट) **लघ्वमोघानन्दिनी शिक्षा**– अत्तर अमोघानन्दिन्याश् शिक्षाया एव केचन मुख्या विषयाः प्रतिपादितास् सन्ति। वेदस्स्याऽशुद्धे उच्चारणे श्रुते शिक्षाशास्त्रविदः कर्तव्यमत्ताधिकमुक्तम्। अत्तर केवलं सप्तदश श्लोकास् सन्ति। अस्स्याः कर्ता रचनाकालश् चाऽविज्ज्ञातौ। इयं शिक्षा च शिक्षासङ्ग्रहे मुद्द्रितोपलब्ध्यते।

(ठ) **पाराशरी शिक्षा**– अस्स्यां शिक्षायाम् माद्ध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदमन्त्रसंहितायाः कण्डिकासु अक्षराणावँ वाक्यानाञ् च सङ्ख्याः प्रतिपादितास् सन्ति। मद्ध्येमद्ध्ये च शिक्षाशास्त्र-

---

१. शि.स.,पृ. ६०, श्लो. ७७। २. तत्तरैव, पृ.६०, श्लो. ७७।

सम्बद्धा महत्त्वपूर्णा अन्न्येऽपि विषया आगतास् सन्ति, किन्तु ते सुघटिता न सन्ति, विप्रकीर्णास् सन्ति। 'एववँ वर्णाऽ प्रयोक्तव्याः' इति वाक्यम् बहुषु स्थलेषु[1] अप्रासङ्गिकरूपेणाऽप्यागतमस्ति। अयम् पूर्णतया स्वशाखासमन्वितशिक्षाशास्त्रीयविषयप्रतिपादको ग्रन्थः। अत्र शुद्धश् शिक्षाशास्त्रीयो विषयोऽल्प एव प्राप्यते। अत्र पाराशरमतस्योल्लेखऽ प्राप्यते[2]। अत्र याज्ञवल्की, वासिष्ठी, कात्यायनी, पाराशरी, गौतमी, माण्डवी, अमोघाननन्दिनी, पाणिनी, माद्ध्यन्दिनी इत्येताश् शिक्षा उल्लिखितास् सन्ति[3]। तत्र 'पाणिन्यास् सर्ववेदेषु सर्वशास्त्रेषु गीयते' इत्युक्तम्, 'वाजसनेयशाखायान् तत्र माद्ध्यन्दिनी स्मृता' इति चोक्तम्[4]। अत्र अमोघाननन्दिन्न्या बहवश् श्लोका उपात्ता दृश्यन्ते[5]। क्ष–क्ष्य विवेकोऽत्राऽपि प्रतिपादितः[6]। अत इयं शिक्षा अर्वाचीनैव प्रतीयते। 'इति पाराशरेणोक्तवँ विप्राणां हितकाम्यया। शिष्याणामुपकाराय परलोकहिताय वै'[7] इति श्लोकोऽत्र द्विर् आगतः। इयमपि शिक्षा शिक्षासङ्ग्रहे मुद्रिताऽस्ति।

(ङ) **केशवीयशिक्षा परिभाषाङ्कसूत्रशिक्षा नवाङ्कसूत्रशिक्षा वा–** अस्यां शिक्षायाम् माद्ध्यन्दिनीयशाखीय–षकार–यकार–वकारोच्चारणविधयः, रेफस्स्वरभक्तिः, अनुस्स्वारोच्चारणविशेषः, स्पर्शद्वित्त्वम्, यवयोऽ परयोस् सतोस् सकारद्वित्त्वस्य निषेधः, ऋकारोच्चारणम्, ह्रस्स्वानाङ्ग क्वचिदीषद्दीर्घता चेति विषयास् सन्ति। इयमपि न पूर्णा शिक्षा, किन् तु शिक्षाप्रकरणमेव। तत्राऽपीयं शिक्षा

---

१. शि. स. पृ. ५३ (श्लो. १४), पृ. ६० (श्लो. ८०), पृ. ६१ (श्लो. ९१), पृ. ६६ (श्लो. ११९)। २. तत्रैव, पृ. ५२ (श्लो. १,२), पृ. ५३ (श्लो. १३), पृ. ६० (श्लो. ७६), पृ. ६६ (श्लो. ११८, १२५), पृ. ७१ (श्लो. १६०)। ३. तत्रैव, पृ. ६० (श्लो. ७७–७८)। ४. तत्रैव, श्लो. ७८। ५. पा. श्लो. २१–२२ = अ. श्लो. ८६–८७, पा. श्लो. ३५–३६ = अ. श्लो. ९८, पा. श्लो. ३६ = अ. श्लो. ४९; पा. श्लो. ३७–३८ = अ. श्लो. १०७, पा. श्लो. ३९–४६ = अ.श्लो. ३०–४०, पा. श्लो. ५८ = अ.श्लो. ५२, पा. श्लो. ५९ = अ. श्लो. ५०, पा. श्लो. ६०–६३ = अ. श्लो. २६–२९, पा. श्लो. ६४–६९ = अ. श्लो. ६२–६५; पा. श्लो. ८५ = अ. श्लो. ७३, पा. श्लो. ९५–९६ = अ. श्लो. ७७–७८ इ.। ६. पा. श्लो. १५८। ७. शि. स., पृ. ६६, ७१ (श्लो. १२५--२६, १६०)।

प्रायेण प्रतिज्ञापरिशिष्टमुपजीवति । अस्याः कर्ता आस्तिकमुनिवंशजदैवज्ञगोकुलचन्द्रसुतो दैवज्ञः केशवरामः । अस्याश् शिक्क्षाया बालकृष्णगोडशया प्रातिशाख्यप्रदीपशिक्क्षायामुल्लेखः कृतोऽस्ति[1] । इयमपि शिक्क्षासङ्ग्रहे मुद्द्रिता ।

(ढ) **कारिकावलिशिक्क्षा (पद्द्यात्मिका केशवीयशिक्क्षा)**– अस्याः शिक्क्षायाः हस्तेन करणीयस्य स्वरसङ्केतस्य विधानम्, यकारोच्चारणम्, रेफस्वरभक्तिः, लकारस्वरभक्तिः, वकारोच्चारणभेदाः, षकारोच्चारणविशेषः, अनुस्स्वारोच्चारणम्, अनुस्स्वारस्याशिकम् परसवर्णत्वम्, विसर्गे विरामः, अकारस्य क्वचिदीषद्दीर्घता चेति विषयास् सन्ति । अन्ते रचयितुः परिचयो दत्तोऽस्ति । इयमपि दैवज्ञकेशवरामेणैव कृता, शिक्क्षासङ्ग्रहे मुद्द्रिता च ।

(ण) **वर्णोच्चारणप्रकार-सन्धि-विवृत्ति-स्वरभक्ति-लक्क्षणपरिशिष्टशिक्क्षा**– अस्याः शिक्क्षायाः स्वरितस्स्वराः, कादीनां कादिसवर्णोच्चारणम्, प्रत्त्यारम्भनिषेधः, ककारागमः, टकारागमः, अनुस्स्वारपरसवर्णविधिनिषेधः, यकार–षकारोच्चारणव्यवस्था, ऊष्मपरकरेफोच्चारणप्रकारः (तस्योदाहरणन् त्वशुद्धम्), अनुस्स्वारस्योच्चारणविशेषः, व्यञ्जनद्वित्त्वविधिः, यकारवकारपरकसकारस्य द्विर्भावस्य निषेधः, हल्युक्तऋकारस्य रेकाररूपेणोच्चारणम्, ह्रस्स्वस्य किञ्चिद्दीर्घता, सन्धिभेदाः, स्वरभक्तिभेदाश् चेति विषया उक्ताः । अत इयं शिक्क्षा शिक्क्षाशास्त्रप्रकरणग्रन्थरूपा । यद्द्यप्यस्याः अन्ते 'इति कात्त्यायनेनैव परिशिष्टङ् कृतम् मुदा' इत्त्युक्तमस्ति, अण्णाशास्त्रिणाऽपि अस्याः कात्त्यायनप्रोक्तत्त्वं स्वीकृतम्[2], तथापि अत्त्र पाणिनेरुल्लेखो[3] वर्त्तते इति पाणिनीयप्रत्त्याहारेण व्यवहारोऽप्यस्तीति[4] च नाऽयं शुक्लयजुर्वेदप्रातिशाख्यकाराऽभिन्नः कात्त्यायनस् सम्भाव्यते । कात्त्यायनानुयायिनामुपयोगित्त्वेन कात्त्यायनपरिशिष्टत्त्वेनाऽस्याश् शिक्क्षायास् स्वीकारः कृतो भवेद् वैदिकैः । अर्वाचीनेन केनचित् कात्त्यायनसगोत्त्रेण कृता वास्यादियं शिक्क्षा । **स्वरभक्तिलक्क्षणपरिशिष्टशिक्क्षा** इति नाम्नाऽङ्किता मुद्द्रिता चेयं शिक्क्षासङ्ग्रहे ।

(त) **स्वरभक्तिशिक्क्षा**– षड्भिरेव श्लोकैर् युक्ता, स्वरभक्तिम् अनुस्स्वारमात्त्राञ् चाऽधिकृत्त्य प्रवृत्तेयं शिक्क्षा मधुकरफाटकेनोल्-

---

१. शि. स., पृ. २५४, २९३, २९४, २९७ । २. शु. य. वि. सू., पृ. ६२८ । ३. श्लो. २४ । ४. श्लो. १८, १९, २१, २७, २९ ।

लिखिता[1]; किन् तु कुत्तर केन रूपेण स्थितेयमिति तेन किमपि नोक्तम्। अत्तर स्वरभक्तिलक्षणपरिशिष्टप्रसङ्गेनेयमुल्लिखिताऽस्माभिः।

(थ) **स्वराष्टकशिक्षा**– अस्स्यां शिक्षायाम् अ इ उ ऋ लृ ए ऐ ओ औ इत्त्यष्टौ स्वराः परिगणिताः। ततोऽच्सन्धिः, उदात्तादिस्स्वर–तल्लिपिविचारः, ह्रस्तस्स्वरविचारः, हल्सन्धिः, विसर्गसन्धिरिति विषयाः प्रतिपादितास् सन्ति। अत्तर प्रायेण सन्तान-(=सन्धि-)विषयाणामेव प्रतिपादनम् प्राप्यत इतीयमपि शिक्षा शिक्षाशास्तरप्रकरणग्रन्थ एव। अस्स्याश् शिक्षायाः कर्ताऽनन्तः। शिक्षासङ्ग्रहे मुद्द्रिता चेयं शिक्षा।

(द) **सम्प्रदायप्रबोधिनी शिक्षा**– अस्स्यां शिक्षायाम् पार्षदशिक्षादिषु प्राचीनग्रन्थेषु अनुपलब्ध्यमानास् स्पष्टमनिरूपिता वा माद्ध्यन्दिनीय–वाजसनेयि–शुक्लयजुर्वेदमन्तरसंहिताद्ध्ययनधर्मादिविशेषा अन्ये च सम्प्रदायाद् विज्ज्ञायमाना बहवो विषयाः प्रतिपादितास् सन्ति। अत्तर सँस्स्था–गुणनी–चर्चा–पट्टिका–पट्टानावँ वेदाद्ध्ययनप्रथाविशेषाणामपि परिचयो दत्तोऽस्ति। ह्रस्तस्स्वरसङ्केताः परिशिष्टे चित्तरैरपि स्फुटीकृताः। अस्स्याश् शिक्षायाः कर्ता पण्डितश् श्रीगोपालचन्द्रमिश्श्रो वेदधर्मशास्तरमीमांसादर्शनाचार्यः। मुद्द्रिता प्रकाशिता चेयम् मिश्श्रानुसन्धानग्रन्थमालायां सप्तमग्रन्थत्त्वेन वाराणस्स्याम्। रचनाया मुद्द्रणस्स्य प्रकाशनस्स्य वा समयस् त्वत्तर न सूचितः। अचिरादेवेयम् प्रकाशमागता।

(ध) **(पदरूप-) वेदपरिभाषासूत्तरशिक्षा**[2]– अस्स्यां शिक्षायाम् माद्ध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदमन्तरसंहितायाम् प्रत्त्यनुवाकञ्च कति पदानि, कति च पदानि विसर्गान्तानि, कति सावग्ग्रहाणि, कति च प्रगृह्य्यसञ्ज्ञकस्वरयुक्तानि, कति नकारान्तानि, कति च मकारान्तानि, कति च कटतपञ्णान्तानि इति विवरणञ् चतुरक्षरात्मकैस् साङ्केतिकैस् सूत्तरैः कृतमस्ति। तत्तर प्रथमाक्षरेण व्यञ्जनसङ्केतितायां सङ्ख्यायां स्वरसङ्केतितायास् सङ्ख्याया योगेन सम्बद्धानुवाकस्स्थपदसङ्ख्या; द्वितीयाक्षरस्स्य व्यञ्जनेन सम्बद्धानुवाकस्स्थविसर्गसङ्ख्या, स्वरेण तु नकारान्तपदसङ्ख्या; तृतीयस्स्याऽक्षरस्स्य व्यञ्जनेन

---

१. पा. शि.शि.स.स., पृ. २४८। २. यद्द्यप्येतादृशा ग्रन्थाः प्रातिशाख्यपरिशिष्टरूपग्रन्थप्रकरणे एव वर्णनीयास् तथाऽपि एतेषां ग्रन्थानां शिक्षात्त्वेन प्रसिद्धिमनुरुद्ध्याऽत्तरैते वर्णिता बोद्ध्याः।

अवग्रहाणां सङ्ख्या, स्वरेण च प्रगृह्यस्वरयुक्तपदसङ्ख्या, चतुर्थाऽक्षरस्य व्यञ्जनेन मकारान्तानाम् पादानां सङ्ख्या, स्वरेण तु कटतपङ्णनान्तानाम् पदानां सङ्ख्या, विसर्गेण च सिशब्दान्तानि तुशब्दान्तानि च पदानि विषमसङ्ख्याकानि इति सूच्यते, तदभावेन च समसङ्ख्याकानीति, तदुत्तरवर्तिनाऽङ्केन च तादृशानाम् पदानां सङ्ख्या सूच्यते। तत्र व्यञ्जनानि व्यञ्जनेषु स्वस्य यावतिथं स्थानन् तावतीं सङ्ख्यां स्वराश् च स्वरेषु स्वस्य यावतिथं स्थानं तावतीं सङ्ख्याम् बोधयन्ति। प्रथमाक्षरस्य तु व्यञ्जनवँ व्यञ्जनेषु स्वस्य यावतिथं स्थानन् तावतीं सङ्ख्यान् दशगुणितां सङ्केतयति। स्वरेषु च अकारस्योच्चारणार्थमप्युपादेयत्वात् तेन सङ्ख्या न सूच्यते। अत आकारेण चन्द्रमिता सङ्ख्या इकारेण नेत्रमिता सङ्ख्येत्येवम्—प्रकारेण सङ्ख्या सूच्यते। स्वरलिपेरुपरि वर्तमानया कुण्डलिकया दशसङ्ख्या सूच्यते। सयँयुक्ताब्भ्यावँ व्यञ्जनाब्भ्यां स्वसूचितसङ्ख्ययोर् योगस् सूच्यते। अनेन च ग्रन्थेन पदपाठशुद्धये साहाय्यङ्ग क्रियत इति पदसंहितोपकारकोऽयङ्ग ग्रन्थ× प्रातिशाख्यपरिशिष्टरूप एव। अस्स्या× कर्ता पण्डितसिद्धेश्वरसूनु× पण्डितो रामचन्द्रः। रचना—समयस् त्वज्ज्ञातः। अर्वाचीन एवाऽयङ्ग ग्रन्थ× प्रतीयते। मुद्द्रितश् चाऽयङ्ग ग्रन्थश् शिक्षासङ्ग्रहे प्रातिशाख्यप्रदीपशिक्षायां सयँयोज्ज्येव वेदपरिभाषासूत्रशिक्षेति नाम्नाऽङ्कितः[1]।

(न) (पदरूप-) **वेदपरिभाषाकारिका शिक्षा**— अस्स्यां शिक्षायाम् उपर्युक्त— (पदरूप-) वेदपरिभाषासूत्रशिक्षाया रहस्यस्य उद्घाटनी कुञ्चिका दत्ताऽस्ति। अयमपि ग्रन्थश् शिक्षापरिशिष्टरूप एव। इयं शिक्षा सटीकाऽस्ति। अस्स्या अपि कर्ता पण्डितसिद्धेश्वरसूनु× पण्डितो रामचन्द्रः। इयमपि शिक्षा शिक्षासङ्ग्रहे प्रातिशाख्यप्रदीपशिक्षान्तर्गतत्वेनेव मुद्द्रिताऽस्ति[2]।

(प) **क्रमसन्धानशिक्षा**— अस्स्यां शिक्षायां संहितापाठे ययो× पदयोर् मद्ध्ये अवसानम् भवति पदान्तरवँ वा भवति, क्रमपाठे तु ययो× पदयोस् सन्धानम् भवति तादृशानि पदद्द्वन्द्वानि सङ्कलितानि सन्ति। तत्तत्तादृशानि च माद्ध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदमन्त्रसंहिताया× पञ्चदशं शतं स्थलानि प्रदर्शितानि सन्ति। अयङ्ग ग्रन्थोऽपि शिक्षाशास्त्रसंहिताप्रकरणान्तर्गतक्रमसंहितोपकारक इति शिक्षाशास्त्रस्य प्रकरणग्रन्थो वा परिशिष्टग्रन्थो वा न तु पूर्णश् शिक्षाग्रन्थः।

---

१. शि. स., पृ. ३०६—३२०। २. तत्तत्रैव, पृ. ३२०—३२६।

अस्य कर्ता रचनासमयश् चाऽज्ञातौ । शिक्षासङ्ग्रहेऽयम् मुद्रितः ।

(फ) **क्रमकारिका शिक्षा**– अस्यां शिक्षायाम् माध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदमन्त्रसंहितायाः क्रमपाठस्य विचारो वर्तते । एतच् च 'क्रमावसानविषयाङ्ग कारिकामारभामहे' इति प्रतिज्ञयैव स्फुटम् भवति । तत्राऽपि मुख्यरूपेण वेष्टनस्य विचारोऽस्ति । एतदपि 'न वेष्ट्याश् च द्विवेष्ट्याश् च त्रिवेष्ट्याश् च तथा परे । चतुर्वेष्ट्यो मध्यवेष्ट्यः पञ्चवेष्ट्य इतीरितः'[1] इति वचनात् स्फुटम् ज्ञायते । अयमपि ग्रन्थश् शिक्षाशास्त्रान्तर्गतसंहिताप्रकरणान्तर्गतक्रमसंहिताविषयक इति शिक्षाशास्त्रप्रकरणग्रन्थ एव । अस्य ग्रन्थस्य कर्ता शम्भुमिश्रः[2] । रचनासमयस् त्वज्ञातः, किन्त्वर्वाचीन एवाऽयङ ग्रन्थः प्रतीयते । शिक्षासङ्ग्रहे मुद्रितश् चाऽयङ ग्रन्थस् समुपलभ्यते ।

(ब) **अवसाननिर्णयशिक्षा**– अत्र माध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदमन्त्रसंहितायाः कण्डिकासु कुत्रकुत्र कतिकति च विरामा इति विचारितमस्ति । तत्र अन्त्यावसानाः कण्डिकास् त्रयस्त्रिंशदुत्तरशतद्वयमिताः, त्र्यवसानाः पञ्चाशं शतम्, चतुरवसाना द्वात्रिंशत्, निरवसानाष् षट्पञ्चाशत्, मध्यावसानाः पञ्च, द्व्यवसानास् त्रिनवत्त्युत्तरशतचतुष्टययुतसहस्रसङ्ख्याकाः,पञ्चावसाने द्वे, षडवसाने द्वे, नवावसाने द्वे इति निरूपितम् । इयं शिक्षाऽनन्तदेवकृता, मुद्रिता चेयं शिक्षासङ्ग्रहे प्राप्यते ।

(भ) **मनस्स्वारशिक्षा**– अस्यां शिक्षायाम् माध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदमन्त्रसंहितायाङ्ग कस्याङ्कस्याङ्ग कण्डिकायाम् आद्द्ये मध्येऽन्तिमे वा ऽवसाने ऽनुदात्त उदात्तः कम्पो जात्त्योऽन्न्यो वा स्वरः, तकारो नकारो वेत्त्यादिकमेव प्रतिपादितमस्ति । मकारान्तनकारान्तस्वरविशेषान्तावसाननिर्णयिनी शिक्षेति मनस्स्वारशिक्षेत्त्यस्यार्थो बोद्ध्यः । अयमपि शिक्षापरिशिष्टरूप एव ग्रन्थः । अस्य कर्ता ब्रह्मा, प्रवक्ता च महर्षियोगियाज्ञवल्क्य इत्त्युच्यते[3]। शिक्षासङ्ग्रहे मुद्रितश् चाऽयङ ग्रन्थः ।

(म) **मल्लशर्मकृता शिक्षा, हस्तस्स्वरप्रक्रियाग्रन्थो वा**– अस्यां शिक्षायां सविस्तरा हस्तस्स्वरप्रक्रिया, प्राचीनश् शुक्ल-

---

१. शि. स., पृ. ३६९, श्लो. ५ । २. तत्रैव, श्लो. ७ ।
३. शि. स., पृ. १८५, श्लो. १ ।

यजुर्वेदीयो स्वरसङ्केतरेखालेखनप्रकारः, ब्राह्मणस्वरप्रक्रिया, ठकारेण, रङ्गवर्णेन, मकारेण च युतानावँ विशिष्टानाम् पदानाङ्ग गणनेति विषयास् सन्ति। अयङ्ग ग्रन्थोऽपि शिक्षापरिशिष्टरूप एव। अस्य ग्रन्थस्य कर्ता कान्न्यकुब्ज उपमन्न्युसगोत्तरोऽग्निहोत्री वाक्पतिवेदस्वरूप-(खगपति-) सूनु× पितृभक्तो घाटमपुरवासी मल्लशर्मा विप्रः। इयञ् च शिक्षा एकाशीत्त्युत्तरसप्तदश–शततमे (१७८१) वैक्रमाब्दे विरचिता। बालकृष्णगोडशयाऽस्या उल्लेख× कृतः[1]। शिक्षासङ्ग्रहे मुद्द्रिता चेयं शिक्षा।

(य) **वासिष्ठी शिक्षा**– अस्यां शिक्षायाङ्ग केवलम् माद्ध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदमन्त्रसंहिताया× कण्डिकासु का× खलु ऋच× काश् च यजूंषि इत्त्येव विचारितम्। अतोऽयङ्ग ग्रन्थ उक्तमन्त्रसंहितायास् सर्वानुक्रमण्या एकस्य भागस्याऽनुवादक एव दृश्यते। अतो नाऽयवँ वस्तुतश् शिक्षाशास्त्रीयो ग्रन्थः। अत्तर प्रारम्भे 'अथ शिक्षाम् प्रवक्ष्यामि वासिष्ठस्य मतयँ यथा। सर्वानुक्रममुद्धृत्य ऋग्यजुषोस् तु लक्षणम्' इत्त्युक्तमस्ति। तथाप्येताण् टिप्पणीङ्ग कर्तुमेवा ऽयङ्ग ग्रन्थोऽत्तरोल्लिखितः। मुद्द्रितश् चाऽयङ्ग ग्रन्थश् शिक्षासङ्ग्रहे।

(र) **गलदृक्शिक्षा**– माद्ध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदमन्त्रसंहितायाङ्ग काश् चन ऋच× कण्डिका वाऽनेकवारमागतास् सन्ति। तासामृचाङ्ग कण्डिकानावँ वा कासाञ् चना ऽऽर्षसंहितायाम् प्रथमस्थाने पूर्ण× पाठो द्वितीयादिस्थानेषु च प्रतीकमात्तरेण पाठ× क्रियते। ब्रह्ममयज्ञसंहितायान् तु तासान् द्वितीयादिस्थानेषु अपि पूर्ण× पाठोऽपि कर्तुं शक्यते[2]। तत्तराऽऽर्षसंहितायान् द्वितीयादिस्थानेषु प्रतीकमात्तरेण पठिता ऋच× कण्डिका वा गलिता इत्त्युच्यन्ते। अस्यां शिक्षायान् तादृशीनाङ्ग गलितानामृचाङ्ग कण्डिकानावँ वैव गणना कृताऽस्ति। प्रत्त्यद्ध्यायङ्ग गलितामृचङ्ग कण्डिकावँ वा त्यक्त्वाऽवशिष्टानाङ्ग कण्डिकानां सङ्ख्याऽप्यत्तर दत्ताऽस्ति। अयङ्ग ग्रन्थो न शिक्षाग्रन्थः। क्रमपाठसम्बद्धत्वाच् शिक्षाशास्त्रपरिशिष्टग्रन्थत्वमस्य स्वीकर्तुं शक्यते। अस्य कर्ताऽज्ञातः। मुद्द्रितश्चाऽयङ्ग ग्रन्थश् शिक्षासङ्ग्रहे।

---

१. शि. स., पृ. २२५। २. शु. य. प्रा., अ. भा. ४।१७८; प्रा. प्र. शि., शि. स., पृ. २८५, सू. ३०७।

(ल) **पदकारिकारत्नमाला (शिक्षा)**– अस्यां शिक्षायाङ्ग काण्वसंहितामन्त्राणाँ विविधानाम् पदानाङ्ग गणना कृताऽस्ति । तत्र "पदानामावलिँ वेष्टविसर्गाणान् निरीक्षणम् । नान्तानाँ वक्ष्यते लक्ष्म निक्षिप्त्यैकाक्षरेऽक्षयम् ।" इति प्रतिज्ञाय तदनुसारमेव प्रतिपादनङ्ग कृतम् । अस्यां शिक्षायाम् चत्वारिंशदद्ध्यायास् सन्ति । अयमपि ग्रन्थश् शिक्षाशास्त्रपरिशिष्टरूप एव । अस्य ग्रन्थस्य कर्ता शङ्कराचार्य इति पुस्तके लिखितन् दृश्यते । स च शङ्कराचार्यस् संस्कृतभाषायामप्रवीणः प्रतीयते । दक्षिणभारते एवास्योपलम्भादस्य तैत्तिरीयचरणेन सह सम्बन्धस् सम्भाव्यते स्म । वस्तुतस् तु तत्र काण्ववाजसनेयिमन्त्रसंहिताया मन्त्राणामेव पदानाङ्ग गणना कृताऽस्ति । तत्र हि "यजुर्वेदमहाकल्पतरोरेकशतैर् युताः । शाखास् तत्र शिवा-(खा-) कारा प्रथमा काण्वसञ्ज्ञिका । पुण्यम् पवित्रम् पूतन् तु सर्वमन्त्रसमागमम् । यजुषाम् चैव सर्वेषान् तच् छ्रेष्ठसममुत्तमम् । ... इषेत्त्वेति समन्त्रस्य पदास् त्रयोदशैव च । वेष्टनञ् चैकमेव स्याद् विसर्गस् तु त्रयो भवेत्" इत्यादिक उल्लेखः प्राप्यते । अस्य हस्तलेखोऽपि मद्द्राससर्वकारहस्तलिखितपुस्तकागारेऽस्ति । देहलि-महानगरान्तर्गतहौजखासटोल्लकस्थसरस्वतीविहारपुस्तकालयेऽप्यस्ति ।

(व) **यजुर्विधानशिक्षा**– अस्मिन् ग्रन्थे माध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदमन्त्रसंहिताया मन्त्राणायँ यजुषाँ विविधानुष्ठानस्य कल्पा उपदिष्टाः । अतोऽयङ्ग ग्रन्थश् शिक्षाशास्त्रेण सह सर्वथैवाऽसम्बद्धः । तथाऽपि युगलकिशोरपाठकेन शिक्षासङ्ग्रहे शिक्षात्त्वेन सङ्गृहीत इति अत्रत्रेमाण् टिप्पणीङ्ग कर्तुमेवोल्लिखितो बोद्ध्यः ।

(इ) **कृष्णयजुर्वेदीयशिक्षाग्रन्थाः**

(क) **चारायणीयशिक्षा**– अस्यां शिक्षायां शिक्षाशास्त्रस्य सर्वे विषयास् सन्ति । अन्न्यासु शिक्षासु दुर्लभं संहिताप्रकरणमपि अस्यां शिक्षायान् तृतीयेऽद्ध्यायेऽस्ति । षष्ठेऽद्ध्याये छन्दोविचारोऽप्यस्ति । तत्र लौकिकानि इन्द्रवज्रा-प्रहर्षिण्यादीनि वृत्तान्न्यपि विचारितानि सन्ति । अस्यां शिक्षायां रेफ ऋकारश् च मूर्धन्न्य उक्तः । अत्र स्थानानि दन्तमूलेन सृक्क्वेण च सहितानि दश प्रोक्तानि । इयम् महाशिक्षेति उक्ता । अत्र इकारोकाररूपे स्वरभक्ती निषिद्धे । अत्र दशानां स्थानानामुक्तत्वादियं शिक्षा पाणिनीयशिक्षातोऽर्वाचीना विकसिततररूपा चेति सिद्धेश्श्वरो मेने[1]; किन् तु

---

१ CSIPOIG, p. 37.

प्राचीनतरायामापिशलशिक्षायामपि दन्तमूलस्स्थानस्स्य सृक्क्वस्स्थानस्स्य चोल्लेखः प्राप्यते[1] इति चिन्त्यमेव तत्। अस्स्यां शिक्षायावँ वाजसनेयिप्रातिशाख्यस्स्य वचनमुद्धृतमस्तीति च सिद्धेश्वरस्स्य कथनमस्ति[2]; किन् तु अत्तर प्रातिशाख्यस्स्य नाम नोल्लिखितम्, उद्धृतवँ "वर्णस्स्यादर्शनलँ लोपः"[3] इति 'स्वरोक्षरमितिप्राहुरार्या अक्षरचिन्तकाः' इति पद्द्यार्धे उद्धृतं 'स्वरोऽक्षरम्'[4] इति च वचनन् तु अन्न्यदीयमपि भवितुं शक्नोतीति तत् कथनमपि विचारणीयमेव। अस्स्याश् शिक्षायाश् चारायणीयचरणेन सह सम्बन्धो नाम्नैव स्फुटः। अस्स्याः कर्ताऽविज्ज्ञातः। मुद्द्रणमप्यस्या न जातम्। हस्तलिखितेयम् भाण्डारकर-प्राच्च्यशोधसंस्थायावँ वर्तते। शर्मण्यदेशस्थ-गोट्टिन्जेन्-विश्श्वविद्द्यालये च वर्तत इति सिद्धेश्वरवर्मणा प्रतिपादितम्[5]। भाण्डारकर-प्राच्च्य-शोधसँस्थातोऽस्स्याः प्रतिलिपिरस्माभिरप्युपलब्धा। किन् तु इयम् एकादशाद्ध्याये प्रारब्धे एव त्रुटितेति अस्स्याश् शिक्षाया इयत्ता न सम्म्यग् ज्ञायते। गोट्टिन्जेन्विश्श्वविद्द्यालयस्स्थायाः प्रतिकृतेरन्तिमवँ वाक्यमिति "य इदम् पठते नित्त्ययँ यश् चा (प्य) द्ध्यापयेद् द्विजम्। अस्स्यार्थम् बुद्ध्यते यो वै ब्रह्मलोकं स गच्छति" इति यश् श्लोकस् सिद्धेश्वरेणोल्लिखितस्[6] सोऽस्मदुपलब्धायाम् प्रतिलिप्यान् दशमाद्ध्यायान्त एव विद्द्यते। एकादशाद्ध्यायप्रारम्भे च पाठकदोषान् उल्लिक्ख्य दशविधाः पाठगुणा उद्दिष्टाः। ते च पाठगुणा नारदीयशिक्षायामुक्तैर् गानगुणैरभिन्नाः। अतो गोट्टिन्जेन्विश्श्वविद्द्यालयस्था प्रतिकृतिरपि अपूर्णैवाऽऽभाति।

(ख) **भारद्द्वाजशिक्षा**- तैत्तिरीयचरणसम्बद्धाश् शिक्षा दक्षिणभारते प्राप्यन्ते हस्तलिखितरूपेणेति ताश् शिक्षास् तत्तरैव रचिता इति सम्भाव्यते। तत्तर वेदलक्षणानुक्रमणिकायान् तैत्तिरीयचरणसम्बद्धा नव मुख्यशिक्षास् तिस्स्र उपशिक्षाश् च परिगणिताः[7]।

---

१. आ. शि., १।९, १२। २. CSIPOIG p. 37.
३. शु. य. प्रा. १।१४१। ४. तत्तरैव, १।१९, ऋ. प्रा. १८।३२।
५. CSIPOIG, p. 36. (BORI, Poona Mss No. 21/1875–76; Got. Sanskrit No. 25). ६. तत्तरैव, पृ. ३६।
७. भारद्द्वाज-व्यास-शम्भु-पाणिनि-कौहलीयकम्। बोधायनो वसिष्ठश् च वाल्मीकिर् हारीतन् नव। सर्वसम्मतमारण्यन् तथा सिद्धान्तमेव च। उपशिक्षा इमाः प्रोक्ता लक्षणज्ज्ञानकोविदैः॥

अस्स्य चरणस्स्य तदतिरिक्ता अपि शिक्क्षास् सन्ति। तासां सर्वासायँ यथोपलम्भम् परिचयाऽ क्रमेणाऽधो लिक्ख्यन्ते। तत्तर च प्रथमेयम् भारद्द्वाजशिक्क्षा। अस्स्यां शिक्क्षायान् तैत्तिरीयसंहितायाऽ कानि चन सन्देहास्पदानि पदानि विचारितानि सन्ति। केषु चित् तु भ्रान्तिकरस्स्थानेषु स्वरवर्णानुपूर्व्या विवेचना च कृताऽस्ति। लकारस्स्याक्क्षरात्मकत्त्वविषयेऽप्यस्स्यां शिक्क्षायावँ विचारोऽस्ति। वस्तुतस् तु अयङ्गरन्थश् शिक्क्षापरिशिष्टरूप एव। अस्स्याश् शिक्क्षाया उल्लेखो वेदलक्क्षणानुक्क्रमण्याम् मूलशिक्क्षारूपेण कृतोऽस्ति। सिद्धान्तशिक्क्षाटीकायामपि 'भारद्द्वाजव्यास-पाणिनि-शम्भु-कोहल-वसिष्ठ-वाल्मीकि-हारीत-बोधायनोक्तशिक्क्षादिकम् परामृश्श्य' इत्युक्त्वा अस्स्याश् शिक्क्षायाऽ प्राथम्येनोल्लेखऽ कृतो दृश्श्यते[1]। इयं शिक्क्षा मुद्द्रिता चाऽस्ति।

(ग) **व्यासशिक्क्षा**– अस्स्यां शिक्क्षायाम् भूम्ना शिक्क्षाशास्त्रीयसंहिताप्रकरणसम्बद्धा वर्णागमलोपविकारप्रकृतिभावादयो विषयाऽ प्रतिपादिताः। तथापि वर्णगणना, वर्णवर्गाः, वर्णधर्माः, हस्तस्स्वरविन्न्यासप्प्रकारः, वर्णोद्भवस्स्थानकरणप्रयत्नाः, मात्तरादयश् चेति विषया अपि प्रतिपादिताः। वर्णस्स्थानानि चाऽत्तर कण्ठः, वक्तरादिः, वक्तरमद्ध्यम्, वक्तरान्तः, दन्तमूलम्, दन्तान्तः, नासिका, तालु, ओष्ठौ, उर इति दश परिगणितानि[2]। अत्तर रेफस् तालव्य उक्तो[3] न तु मूर्धन्न्यो वर्त्तस्यो वा। इयं शिक्क्षा व्यासकण्ठनिस्सृतेत्युच्च्यते[4]। भाषाशैली त्वस्स्याश् शिक्क्षाया विसंस्थुला दृश्श्यते। तैत्तिरीयप्रातिशाक्ख्यस्स्य तिरभाष्ष्यरत्नटीका व्यासशिक्क्षानुसारिणीति कस्तूरिरङ्गाचार्येणोक्तमस्ति[5]। इयञ् च शिक्क्षा सव्व्याक्ख्या सटिप्पणीका च मुद्द्रिताऽस्ति।

(घ) **शम्भुशिक्क्षा**– अस्स्यां शिक्क्षायाम् प्रथमन् तैत्तिरीयसंहितास्थलविशेष-सञ्ज्ञाविशेषा उक्ताः। ततस् स्वरभक्तीनाञ् जटापाठस्स्य च विचारऽ कृतोऽस्ति। अङ्गुलिस्वरस्स्य, अनुस्स्वारमात्तराया विसर्गस्स्य (विवृत्तेश्) चाऽत्तर विचारऽ कृतोऽस्ति। प्रचय-स्वरस्स्य तु विशिष्टो विचारोऽत्तर प्राप्प्यते। व्यञ्जनविशेषद्वित्त्वापवादाः, वर्णोच्चारण-गत-प्रयत्नैक्क्यपार्थक्क्यविचारः, शब्दोत्पत्तिप्रक्क्रिया, 'हरिः

---

१. CSIPOIG, p. 38. २. व्या. शि. सू. ३९५–९६
३. तत्तरैव सू. ४०४। ४. तत्तरैव सू. ५२५। ५ तै. प्रा. भू., पृ. २२।

ओम्' इत्त्यस्योच्चारणस्य विधिः, मात्त्रा-ऽभिनिधान-यम-नासिक्क्या-दयश् चेति विषयाऽ प्रतिपादितास् सन्ति । इयं शिक्क्षा पाणिनीयश्लोका-ऽऽत्मकशिक्क्षातो भिन्ना सङ्क्षिप्ता तैत्तिरीयचरणमात्त्रसम्बद्ध-विषयप्प्रधाना च । याज्ञ्ज्ञवल्क्यशिक्क्षायाम्[1], पाणिनीयशिक्क्षायाञ्[2] चोल्लिखितश् शम्भुरेतच्शिक्क्षाकार एवाऽन्न्यो वेति विचारणेऽन्न्य एवाऽयमिति सम्भाव्व्यते । तैत्तिरीयप्रातिशाक्ख्यव्याक्ख्याने त्रिभाष्ष्य-रत्ने वैदिकाभरणे च अस्स्याश् शिक्क्षाया वचनानि नामग्ग्रहणवँ विनै-वोद्धृतानि दृश्श्यन्ते[3] । अस्स्या मुद्द्रणम् भूतन् नाऽस्ति । अस्स्या हस्तलेखो मद्द्राससर्व्वकारीयहस्तलिखितपुस्तकालये, तत्प्रतिलिपिश् च देहलिमहानगरस्थहौजखासटोल्लकवर्त्तिसरस्स्वतीविहारपुस्तकालये वर्त्तते । सरस्स्वतीविहारपुस्तकालयादेवास्स्याश् शिक्क्षायाऽ प्रतिलिपिम् उप-लब्भ्यैतद्विषये ऽस्माभिरत्त्र विवरणमुपस्थापितमस्ति ।

(ङ) **पाणिनीयशिक्क्षा**– अस्स्याश् शिक्क्षायाऽ पञ्चत्रिंशत्-पद्द्यात्मकस्स्य याजुषस्स्य पाठस्स्य सम्बन्धस् तैत्तिरीयचरणेन सहा-ऽस्तीति सम्भाव्व्यते; यतो हि तैत्तिरीयचरणसम्बद्धासु नवसु मूलशिक्-क्षासु पाणिनीयशिक्क्षाया अपि गणनाऽस्ति[4] । अस्स्याऽ पञ्चत्रिंशता श्लोकैर् युतस्स्य पाठस्स्याऽपि सम्पादनवँ वेबरेण कृतम् । मनोमोहन-घोषेणाऽपि शिक्क्षाप्रकाशानुसारी त्रयोविंशत्त्या श्लोकैर् युक्तऽ पाठऽ पृथक्, पञ्जिकानुसारी द्वात्रिंशता श्लोकैर् युक्तऽ पाठऽ पृथक्, पञ्च-त्रिंशच्छ्लोकात्मको याजुषऽ पाठऽ पृथक्, षष्टिश्लोकात्मक आर्च्चऽ पाठऽ पृथगित्त्यस्स्याश् शिक्क्षायाऽ पाठास् सम्पादिताः । आर्च्चपाठ-स्स्य विवरणन् त्वत्त्र ऋग्वेदीयशिक्क्षाग्रन्थविवरणप्रसङ्गे पूर्व्वमेव कृतमस्माभिः ।

(च) **कौहडेयशिक्क्षा**– अस्स्याँ शिक्क्षायाम् उदात्तादिस्स्वराः, स्वरितविशेषाः, कम्पः, स्वरक्क्रमविशेषः, विक्क्रमाक्ख्यस्स्वरः, ह्रस्त-स्स्वरसङ्केताः, अद्ध्ययनक्क्रमः, क्रमपाठस्स्वरूपम्, जटापाठस्स्वरूपम्, पदपाठादिप्प्रकृतिविचारः, आदर्शरूपमुच्चारणम्, मात्त्रा, प्रणवस्स्व-रूपम्, इत्त्येते विषयाऽ प्रतिपादितास् सन्ति । अस्स्याँ शिक्क्षायामेका-शीतिश् श्लोका गणिता दृश्श्यन्ते, किन् तु सप्तसु स्थलेषु त्रिषु श्लोका-

---

१. या. शि. १।२।३४ । २. पा. शि., श्लो. ३ । ३. त्रि. र. १।१, २१।१५ वै. आ. १।४० । ४. 'भारद्द्वाज-व्व्यास-शम्भु-पाणि नि-कौहलीयकम्' इत्त्यत्त्र ।

ऽर्धेषु श्लोकसङ्ख्या दत्ता दृश्यते, एकत्र च एकस्मिन्नेवाऽर्धे सा दत्तेति वस्तुतश् चतुरशीतिश् श्लोका दृश्यन्ते । अस्याश् शिक्षाया अधुना एक एव हस्तलेखः प्राप्तः । स च स्थानेस्थाने त्रुटितोऽपीति अस्याः पूर्णः पाठोऽनुपलब्ध एव । तथापि यावान् पाठ उपलब्धस् तावताऽपि अत्तरत्या विषयाः प्रायेण बोद्धुं शक्यन्त एव । अस्याः कर्ता "अथ शिक्षाम् प्रवक्ष्यामि कौहलीयमतानुगाम्" इति प्रतिज्ञातः कौहडेयमतानुसारी कश् चन विद्वान् प्रतीयते। कौहडस्योल्लेखः काशिकायामप्युपलब्ध्यते[1]; अष्टावक्रपिता कोहलो महाभारतेऽपि स्मर्यते[2]। कोहडश् च कहोडेन सह पाणिनीये गणपाठेऽपि पठ्यते[3] । एतत्सदृशानि नामानि अन्न्यत्तरापि श्रूयन्ते[4]। तैत्तिरीयप्रातिशाख्येऽपि कौहडीपुत्तरस्य अनुनासिकेषु वर्णेषु आनुनासिक्यं समानमिति मतमुल्लिखितमस्ति[5]। तन् मतमत्तर शिक्षायान् न प्राप्यते इति कौहडीपुत्तरेण सहैतच्– शिक्षाकारोपजीव्यस्य सम्बन्धो न वेति न ज्ज्ञायते। कौहलेयस्य मतन् त्रिभाष्यरत्नकारेण उद्धृतन् दृश्यते[6]। वैदिकाभरणेऽप्यस्याश् शिक्षाया वचनमुद्धृतम्[7]। अस्याः प्राचीनो हस्तलेखो मद्रास–सर्वकार–हस्तलिखित–पुस्तकागारे विद्यते। मुद्रिता चेयं साधुरामसम्पादिता। कौहलेयशिक्षाव्याख्याया अपि हस्तलेखः केरलविश्वविद्यालयीयहस्तलिखितग्रन्थालये दृश्यते (सङ्ख्या ४३५७) । तत्तर ग्रन्थमानम् २५० इत्यङ्कितमस्ति ।

(छ) **बोधायनशिक्षा** – उपर्युल्लिखितवेदलक्षणानुक्रमणिकादौ उल्लिखिता ग्रन्थतस् त्वप्राप्तैवेयं शिक्षा ।

(ज) **वासिष्ठशिक्षा** – तैत्तिरीयप्रातिशाख्यस्य वैदिकाभरणाख्यायावँ व्याख्यायावँ 'वासिष्ठशिक्षायाम् "लृवर्णदीर्घम् परिहाप्य स्वराष् षड्विंशतिः प्रोक्ताः" इत्यादिना अष्टषष्टिवर्णान् उक्त्वा अष्टपञ्चाशत्पक्षार्थम् पुनरपि ऋवर्णप्लुतम् लृवर्णप्लुतं सन्ध्यक्षरहरस्स्वप्लुताश्चेति दश स्वरान् परिहाप्य षोडशस्वरपक्ष उक्तः । स इहाऽविरुद्धत्वात् परिगृह्यते'[8] इति उक्तमस्ति । उपलब्ध्यमानायामपूर्णायावँ वसिष्ठशिक्षायान् तु केवलवँ वर्णद्वित्वमेव

---

१. २।४।५८ । २. आदि. ५३।९, अनु. १३७।२७,१६५।४५ । ३. ४।१।११२ । ४. श. ब्रा. २।४।३।१; बृ. उ. ३।५।१, आश्व. गृ. ३।४।४इ. । ५. १७।२। ६. तै. प्रा. १९।४, २३।१७, २१।१५ ७. तै. प्रा. ५।१४, २२।१३ । ८. तै. प्रा. १।१ ।

प्रतिपादितमिति सिद्धेश्श्वरवर्मणोक्तम्[1], केवलस् सन्धिविषयꙮ प्रतिपादित. इति मधुकरफाटकेनोक्तम्[2]। पूर्वोक्त-सरस्स्वतीविहार-पुस्तकालयादस्माभिꙮ प्राप्तायाम् प्रतिलिपावपि द्वित्त्वविषय एव प्रतिपादितो दृश्यते। इयं शिक्क्षा शिक्क्षासङ्गृहे मुद्द्रिताया वासिष्ठ्याश् शिक्क्षाया भिन्ना। इयन् तु अमुद्द्रितैवाऽऽस्ते।

(झ) **वाल्मीकिशिक्क्षा**– इयं शिक्क्षा उक्तवेदलक्क्षणानुक्क्रमणिकायामुक्ता; ग्रन्थतस् त्वद्द्यावधि अप्प्राप्तैव। वाल्मीकेर् मतन् तैत्तिरीयप्रातिशाख्येऽपि उद्धृतमस्ति[3]। अतो वाल्मीकिरपि शिक्क्षाशास्त्रग्रन्थस्स्य कर्तेति निश्चेतुन् तु शक्क्यते।

(ञ) **हारीतशिक्क्षा**– इयमपि शिक्क्षा उक्तवेदलक्क्षणानुक्क्रमणिकायामुक्ता। वर्णोत्पत्तिविषये अस्स्याश् शिक्क्षाया "मनꙮ कायाग्निमाहन्ति स प्प्रेरयति मारुतम्। मारुतस् तूरसि चरन् मन्द्रञ् जनयति स्स्वरम्" इति वचनम् पारिशिक्क्षाटीकायामुद्धृतमस्ति, तथापीयं शिक्क्षाऽद्द्य यावद् अप्प्राप्तैव। हारीतस्स्य मतमपि तैत्तिरीयप्रातिशाख्ये उल्लिखितमस्ति[4]।

(ट) **आत्त्रेयशिक्क्षा** – अस्स्याश् शिक्क्षाया उल्लेखो वेदतैजसाख्यायावँ् व्यासशिक्क्षाव्याख्यायाम् प्राप्प्यते[5]। किन्तु अस्स्याश् शिक्क्षायास् तैत्तिरीयचरणस्स्य शिक्क्षासु तस्स्योपशिक्क्षासु अपि गणना न क्क्रियते। अतोऽस्स्याश् शिक्क्षायास् तैत्तिरीय–चरण–सम्बद्धासु शिक्क्षासु नातिमहत्त्वपूर्णं स्थानम् प्रतीयते। अस्स्यास् सत्ताया उल्लेखो युधिष्ठिरमीमांसकमहाशयेन "सँस्कृत व्याकरणशास्त्र का इतिहास" इत्त्याख्ये ग्रन्थे "आत्त्रेय की एक शिक्क्षा भी है। इस का एक हस्तलेख विश्श्वेश्श्वरानन्द–शोधसँस्थान, होशियारपुर में है। द्र. सङ्ख्या ४३७ पृ. ३००" (आत्त्रेयस्स्यैका शिक्क्षाऽपि वर्तते, एतस्स्या एको हस्तलेखो विश्श्वेश्श्वरानन्द–शोधसँस्थाने होशियारपुरस्थे वर्तते) इत्त्येव कृतः[6]। अन्न्यद् विवरणङ् किमपि न दत्तम्। अतस् तत्सूचनाऽनुसारन् नेपालात् सुदूरन् धावित्त्वा होशियारपुरम् प्राप्प्य स ग्रन्थोऽस्माभिरन्न्विष्टः। किन्तु लिपिज्ञानाभावात् तत्त्र तङ् ग्रन्थम् पठितुवँ् वयन् नाऽशकाम। महता प्रयासेन तस्स्य ग्रन्थस्स्य च्छायाचित्त्रवँ्

---

१. CSIPOIG, p. 40. २. पा. शि. शि. स. स., पृ. २४५। ३. ९।४; १८।६। ४. १४।१८। ५. पृ. १७५; सू. ४६६। ६. दू. भा., पृ. ३४३।

विलम्बेन च प्राप्य तत्पठनाय प्रयासः कृतः। किन्तु चित्तरस्याऽस्फुटत्वात् पठनं सम्यङ् न सम्पन्नम्। ततस् सुमहता प्रयासेनाऽतिविलम्बेन च तस्य ग्रन्थस्य मूलमेवाऽऽदर्शम् प्राप्य ग्रन्थलिपेस् तद्विकासक्रमसहितस्याऽभ्यासङ् कृत्वाऽस्माभिः पठितस् स ग्रन्थः। तद्विवरणञ् चेदम्—भारद्वाजशिक्षाव्याख्या, जटावल्ली, भेदोच्चारणम्, वासिष्ठशिक्षा, वर्णसारवर्णक्रमः, पारिशिक्षामूलम्, आत्तरेयशिक्षा, सिद्धान्तशिक्षा इत्येतेषाङ् ग्रन्थानाङ् क्रमेण ५००, १००, २०, १२, २००, ३००, १००, १०० इति ग्रन्थमानैर् युतानाम् प्रायः क्रमेण २४, ३, १, १, ७, १०, ३, ३ इति सङ्ख्याकेषु द्व्यङ्गुलपार्श्वमानीकेषु चतुर्दशाङ्गुलतिर्यङ्मानीकेषु ताडपत्तरेषु पञ्चषशताब्दीपुराण्या सुवाच्यया ग्रन्थलिप्या लिखित आदर्शो विश्वेश्वरानन्दविश्वबन्धु–भारत–भारत्यनुशीलनसँस्थाने होश्यार्पुरेऽस्ति। तदीयहस्तलिखितग्रन्थसूचीपत्तरे ४३७१ सङ्ख्यायामेतेषाङ् ग्रन्थानामुल्लेखोऽस्ति[1]। तत्तर चेयमात्तरेयशिक्षा वस्तुतः पारिशिक्षानुतिमांशयुते पृष्ठे पञ्चसु पङ्क्तिषु, ततः परस्मिन् पृष्ठे दशसु पङ्क्तिषु, ततः परस्मिन् पत्तरे द्वयोरेव पृष्ठयोर् नवसुनवसु पङ्क्तिषु, ततः परस्मिन् सिद्धान्तशिक्षाऽऽदिमांशयुते पृष्ठे सप्तसु पङ्क्तिषु लिखिताऽस्ति। ग्रन्थसङ्ख्याऽपि प्रायः पञ्चाशद् (५०) एवाऽस्ति तत्तर। तत्तर द्वितीयपृष्ठादूर्ध्वं 'स्पर्शानायँ यवलानाञ् च मकारः पूर्वतस् स्थितः। तेषामवाप्नुयात्' इति ग्रन्थादूर्ध्वङ् ग्रन्थपातस् सम्भाव्यते। ग्रन्थस्य समाप्तिरपि विलक्षणाऽस्ति। तत ऊर्ध्वमपि ग्रन्थपातः सम्भाव्यत एव। वेदतैजसे आत्तरेयशिक्षावचनत्वेन उद्धृतस्य "अदुकारमकाराश् च ज्ञेयास् सन्ति सदात्तर तु। तस्मात् सर्वचतुर्मात्तर ओमिति प्रणवस् स्मृतः"[2] इति वचनस्याऽत्तराऽनुपलब्ध्यमानत्वमपि ग्रन्थपातस्य प्रमाणम् भवितुमर्हति। अस्स्या शिक्षायाम् 'अथ क्रमव्युत्क्रमाद्द्यतो जटा भवेदार्षिजसन्धिजस्स्वरात्। विलोक्य शिक्षादिकमादरात् ततः प्रकाश्यते सा विदुषाम् मुदे मया' इति प्रतिज्ञावाक्यमस्ति। तथाऽपि अत्तर अनुस्स्वारस्स्वरूपम्, णत्वम्, द्वित्वम्, विवृत्तिमात्तरा, वर्णसङ्ख्या, करस्स्वरन्यासः, मात्तरालक्षणम्, रङ्गप्लुतमात्तरा, अभिनिधानम्, यमाः, हकारस्य नासिक्यत्वमुरस्यत्वञ् कण्ठ्यत्वञ् चेत्यादयो विषया वर्णिताः। तत्तर 'अद-

---

१. पृ. ३००। २. व्या. शि. सू. ४६६।

ध्याये तैत्तिरीयाणामनुस्स्वारो यदा भवेत् । तदाद्द्यर्धगकार(स्)स्या-(त्) तच् चे (छे)षमनुनासिकः' इत्त्यत्तर तैत्तिरीयाणाम्, 'अनुस्स्वारो भवेदङ्गम् पूर्वस्स्यैव हि सर्वदा । वासश्शब्दादनुस्स्वार× पूर्वस्स्याङ्गन् न काठके' इत्त्यत्तर तैत्तिरीयचरणान्तर्गताऽऽत्रेयशाखाब्राह्म्मण-भागविशेषस्स्य काठकस्स्य[1], 'स्वराष् षोडश विज्ज्ञेयास् स्पर्शास् स्यु× पञ्चविंशतिः । अन्तस्स्थाश् च चतस्स्रश् चेदूष्माणश् च षडीरिताः । द्व्यनुस्स्वारो विसर्गश् च स्वरभक्तिश् चतु(र्)य्यमाः । वर्णानां षष्टिसङ्ख्या स्यादत्तर्च्युक्ता यजुषा(म्)मते' इत्त्यत्तर च अत्त्रेः (आत्त्रेयशाखाप्रवक्तुः ?) उल्लेख× प्राप्प्यते । अत्तर 'यत् स्वयं राजते वर्णस् स्वरमाह पतञ्जलिः ।' इत्त्युल्लेखोऽस्तीति चाऽयमात्त्रेयशिक्क्षाकार आत्त्रेयो न ह्य्यात्त्रेयशाखाया× प्रवक्ता प्राचीनोऽन्न्यो वाऽऽत्त्रेयो भवितुमर्हति । तथाऽपि उक्तवर्णसङ्ख्याया× प्रतिपादकोऽत्त्रिस् तु प्राचीन एवाऽपि भवितुमर्हति । आत्त्रेयस्स्य मतन् तु तैत्तिरीयप्प्रातिशाक्ख्येऽपि उल्लिखितम्[2] । सोमयार्येणोल्लिखित[3] आत्त्रेयस् तु तैत्तिरीयप्रातिशाक्ख्यव्याक्ख्याकार आत्त्रेय× प्रतीयते । उपर्य्युक्तैरुल्लेखैरस्स्याश् शिक्क्षायास् तैत्तिरीयचरणसम्बद्धत्त्वन् तु सुस्स्फुटम् । आत्त्रेयशिक्क्षाया हस्तलेख× केरलविश्श्वविद्द्यालयीय-हस्तलिखितग्रन्थालयेऽप्प्यस्ति, किन् तु सोऽप्प्यपूर्ण एव प्प्रतीयते ।

(ठ) **कौण्डिन्न्यशिक्क्षा**– साम्प्रदायिकैर् 'भारद्द्वाज–व्व्यास-शम्भु-पाणिनि-कौहलीयकम् । बोधायनो वसिष्ठश् च वाल्मीकिर् हारीतन् नव' इति परिगणितासु नवसु शिक्क्षासु अनुल्लिखिता, 'सर्वसम्मत-मारण्ण्यन् तथा सिद्धान्तमेव च । उपशिक्क्षा इमा× प्रोक्ता लक्क्षण-ज्ज्ञानकोविदैः' इत्त्युक्तासूपशिक्क्षासु चाऽनुपात्ताऽपि कृष्णयजुर्वेद-तैत्तिरीयशाखासम्बद्धत्त्वेनोच्च्यमानेय शिक्क्षेदानीमुपलब्भ्यमानाऽस्ति, मुद्द्रणेन प्रकाशमागता च । अत्तर च संहिताभेदाः, पदलक्क्षणानि, क्रमावश्श्यकता, क्रमपाठरचना, जटा, घनः, विकृतिपठनफलम्, गुण-सन्धिः, ऐकारौकारऋकारसन्धयः, स्वारसन्धिः, स्वरितभेदाः, कम्पः, वर्णसङ्ख्या (६०), द्वित्त्वम्, स्वरभक्तिः, ङकारद्वित्त्वम्, अष्ट विवृत्तयः, अनुस्स्वारभेदौ, 'हरिः ओम्' इत्त्यत्तर सन्धेरभावः, वर्ण-

---

१. 'भद्द्रञ् च सह सञ्ज्ञानलँ लोकस् तुब्भ्यमिति क्क्रमात् । एते काठकसञ्ज्ञास् स्यु× पञ्च प्रश्ना न चेतरे' इत्त्यारण्ण्य-शिक्क्षायाम् । २. ५।३१, १७।८ । ३. तै. प्रा. त्रि. र. ५।१ ।

क्रमाः पञ्च, लक्षणज्ञानप्रशंसा, विद्द्याप्राप्त्युपायाश् चेति विषयाः प्रमुखास् सन्ति ।

(ङ) **सर्वसम्मतशिक्षा**– अस्याश् शिक्षाया ओट्टोपर्चाङ्के–सम्पादिते पाठे एकान्नपञ्चाशदेव श्लोकास् सन्ति, तत्र स्वरस्य मात्रायाश् च प्रतिपादनमपि स्वल्पमेवाऽस्ति, तत्र टीकाऽपि विशदा नाऽस्ति सा च टीका मञ्चिभट्टस्य टीकया सह सर्वं वदति; ल्विडर्सस्य 'अस्यास् सर्वसम्मत-शिक्षायाः केचन विषया व्यास-शिक्षाविषयविस्तृतीकरणात्मका एव' इति कथनमपि पर्चाङ्के–सम्पादिते पाठे एव चरितार्थम् भवति इति सिद्धेश्वरवर्मणोक्तम्[1]। अस्याश् शिक्षाया मद्द्रास–सर्वकार–हस्तलिखितपुस्तकालये स्थिते पुस्तके तु सप्ततत्युत्तरं शतं श्लोकास् सन्ति इति च तेनैवोक्तम् । किन् तु अस्माभिर् उपर्युक्तसरस्वतीविहारपुस्तकालयादुपलब्धायाम् प्रतिलिप्यान् तु सत्स्वपि सङ्कलने सप्ततत्युत्तरशतमितेषु श्लोकाङ्केषु वस्तुतश् चतुस्त्रिंशं शतमेव श्लोकास् सन्ति । बहुषु स्स्थलेषु श्लोकार्धे एव सङ्ख्या दत्तास् सन्ति । अस्यां शिक्षायान् द्वित्त्वप्रकरणम्, पूर्वागमप्रकरणम्,अङ्गप्रकरणम्,उदात्तादिस्वरप्रकरणम्,पदशय्या,क्रमपाठः,प्रयत्नाऽन्तरारम्भादयः, प्रयत्नाः,स्पृष्टताविशेषः, विरामः,मात्रा,प्रणवोच्चारण-विधिः, वृत्तयः, साम्यम्, पाठकस्य दोषा गुणाश् च, स्वर-वर्ण-जातयः, अङ्गुलिस्स्वराः, सम्यगुच्चारणफलम् इत्यादयो विषयास् सन्ति । अस्याः कर्ता सूर्यदेवबुधेन्द्रसुतः केशवार्यः । अस्या उद्धरणञ् च तिरभाष्यरत्ने[2] वैदिकाभरणे[3] च प्राप्यते । अस्याश् शिक्षायास् 'सर्वसम्मतलक्षणम्' इत्यस्य नामान्तरस्य व्याख्यानञ् च मञ्चिभट्टेन "सर्वसम्मतं सर्वेषान् तैत्तिरीयशाखोपयोगिनाम् प्रातिशाख्यप्रभृतीनां सम्मतं समानार्थल् लक्ष्यन्ते प्रकाश्यन्तेऽनेनेति लक्षणम्" इति कृतम् । अतोऽस्या वेदशाखाविशेषसम्बन्धोऽपि स्फुटः ।

(ढ) **आरण्यशिक्षा**– अस्यां शिक्षायान् तैत्तिरीयारण्यकस्य स्वराणावं विचारः कृतोऽस्ति । तत्र आद्द्युदात्ताऽन्तोदात्तादिपदानाङ गणनाऽपि कृताऽस्ति । कम्पस्स्वरैकश्श्रुतिस्स्वर–रङ्ग–स्वरितस्स्वरविशेषादिविचारश् चाऽत्र प्राप्यते । अस्याः कर्ताऽज्ञातः । इयं शिक्षा तैत्तिरीयचरण सम्बद्धानान् नवानां शिक्षा-

---

१. CSIPOIG, p. 41. २. तै. प्रा. त्रि. र. १४।६; २१।५ । ३. तै. प्रा. वै. आ. १४।६ ।

णां सारमादाय रचितेति ग्रन्थकारेणैवोक्तमस्ति[1]। अस्याश् शिक्षाया हस्तलेखो मद्द्राससर्वकारहस्तलिखितपुस्तकागारेऽस्ति । पूर्वोक्तसरस्वतीविहारपुस्तकालयेऽपि अस्याश् शिक्षाया एका प्रतिकृतिरस्ति । तत एवाऽस्माभिरपि अस्याः प्रतिलिपिः कृत्वा उपयोगः कृतः ।

(ण) **सिद्धान्तशिक्षा**– अस्याः शिक्षायावँ् वर्णविशेषयुतानाम् पदानावँ् वर्णानुक्रमानुसारिणी सूची दत्ताऽस्ति । त्वम्पदस्य वेदे विकल्पेन त्वङ इत्त्युच्चारणम् भवतीत्त्यप्यत्तर उक्तम् । नाम्ना सिद्धान्तशिक्षाऽपीयं शिक्षाशास्त्रीयसिद्धान्तपक्षेण रहिताऽस्ति । अस्याः कर्ता श्रीनिवासाद्ध्वरीन्द्रः । अस्याः प्रतिज्ञावाक्यञ् च "सम्पूरणम्म्य सकलैककारणम् ब्रह्म्मरुद्द्रमुखमौलिभूषणम् । लक्षणं श्रुतिगिरावँ् विलक्षणं श्रीनिवासमखिना प्रणीयते । पूर्वशब्दाः (न्) परामृश्श्य प्रातिशाख्यञ् च सर्वशः । सिद्धान्तशिक्षावँ् वक्ष्यामि वेदभाष्यानुसारिणीम्" इति । अस्याः शिक्षायाञ् चतुस्सप्ततिश् श्लोकास् सन्ति । तदुक्तम्– "श्रीनिवासाद्ध्वरीन्द्रेण चतुष्कुलसुधांशुना । श्लोकास् सिद्धान्तशिक्षायाञ् चतुस्सप्ततिरीरिताः" इति । अस्याष् टीकाऽप्यनेनैव कृताऽस्ति । टीकायाञ् च तैत्तिरीयप्रातिशाख्यत्रिभाष्यरत्नटीकायाः, वैदिकाभरणटीकायाः, भट्टभास्करकृततैत्तिरीयशाखावेदव्याख्यायाश् चोल्लेखास् सन्ति । अत्तर सायणव्याख्यामुपेक्ष्य भट्टभास्करव्याख्याया उल्लेखादयङ ग्रन्थकारस् सायणान् नात्त्यर्वाचीन इति सिद्धेश्श्वरवर्मा सम्भावयति स्स्म[2]। उपर्य्युक्तात् कारणादयङ ग्रन्थकारो वैक्रमाब्दानाम् पञ्चदशाच् शतकादर्वाचीनो न ; अतश् च त्रिभाष्यरत्नटीकाया वैदिकाभरणटीकायाश् च कालस्य कल्पनाया साहाय्यम् भवति इति च सिद्धेश्श्वरवर्मा मन्न्यते स्म । किन् तु सायणाचार्यश् शङ्करभगवत्पादानुगामी भट्टभास्करश् च न तथेति, सायणाद् भट्टभास्करः प्राचीनतरश् चेति भट्भास्करस्स्योल्लेखश् श्रीनिवासाद्ध्वरीन्द्रेण कृतोऽपि भवितुं शक्नोति । अतस् सायणात् प्राचीनोऽनत्त्यर्वाचीनो वा श्रीनिवासाद्ध्वरीन्द्र इति कल्पना नातिदृढा भवति । अस्याश् शिक्षाया अपि हस्तलेखो मद्द्राससर्वकारहस्तलिखितपुस्तकागारेऽस्ति । तत्प्रतिलिपिश् च उपर्य्युक्तसरस्स्वतीविहारपुस्तकालयेऽस्ति ।

---

१ 'गणपतिमभिवन्द्याऽवद्द्यजालामयग्घ्नं स्वरपदमिव वर्णोद्बोधनं शीलनेन । क्षितिसुरगणहेतोरेतदारण्यशिक्षाऽमृतमिह नवशिक्षावारिधेरुद्धरामि' श्लो. १ । २. CSIPOIG, p. 43-44.

(त) आपिशलशिक्षा– पद्द्यवद्धायामपूर्णतयोपलब्ध्यमानायाम् आपिशलशिक्षायाम् अद्ध्यर्धा एकान्नविंशतिश् श्लोकास् सन्ति। इयं रघुवीरसम्पादितायाम् आपिशलशिक्षायाङ्ग गद्द्यसूत्तरमय्याम् प्राग्बन्धत्त्वेन मुद्द्रिताऽस्ति। "प्रथमा व्यासशिक्षा च लक्ष्मीशिक्षा द्वितीयिका। भारद्द्वाजी तृतीया च शिक्षारण्या तुरीयिका। पञ्चमी शम्भुशिक्षा च षष्ठी चापिशली तथा। सप्तमी पाणिनेश् शिक्षा अष्टमी कौहलेस् तथा। वासिष्ठी नवमी चैवन् नव शिक्षाः प्रकीर्तिताः"[1] इति शरीराजाघनपाठिकृतसर्वलक्षणमञ्जर्याम् आपिशलशिक्षाया अपि तैत्तिरीयचरणसम्बद्धासु नवसु शिक्षासु गणितत्त्वादियन् तैत्तिरीयचरणेन सह सम्बद्धेति सम्भाव्यते। अस्स्याश् शिक्षायास् सप्तमाऽष्टमनवमाश् श्लोकास् तैत्तिरीयशाखागतवर्णसङ्ख्याव्यवस्स्थापकतया वैदिकाभरणे उद्धृता[2] इति, प्रथमश्श्लोकांशोऽपि वैदिकाभरणे उद्धृत[3] इति चाऽस्स्यास् तैत्तिरीयचरणसम्बद्धत्त्वं स्फुटम् भवति।

(थ) कालनिर्णयशिक्षा– अस्स्यां शिक्षायाम् अखण्डानाँ वर्णानाम्, वर्णांशानाम्, विरामाणाञ् च कालस्स्य विषये स्फुटस् सूक्ष्मश् च विचारः कृतोऽस्ति। कालविचारश् चाऽयम् मद्ध्यमवृत्तिमाधारीकरोतीति चाऽत्तर स्फुटम् प्रतिपादितम्। मात्त्रायास् तदुपलक्षितस्स्य च कालस्स्य विषये इयं शिक्षाऽतीव महत्त्वपूर्णाऽस्ति। अत्तर वर्णानां सङ्ख्या त्रिसप्ततिरित्त्युक्तम्[4]। अस्स्याः कर्ता सायण इति केचित्। किन् तु वैक्करमाब्दानान् त्रयोदशे शतके विरचितत्त्वेन कैश्चित् सम्भावितायाँ व्यासशिक्षायाङ्ग कालनिर्णयशिक्षावचनस्स्योद्धृतत्वादियं शिक्षा सायणात् प्राचीना सम्भाव्यते इत्त्यन्न्ये[5]। त्रिभाष्यरत्ने[6] वैदिकाभरणे[7] च अस्स्याः पद्द्यानि उद्धृतानि सन्ति। अत्तर च "प्रातिशाख्यादिशास्त्राणि मया वीक्ष्य यथामति। वेदतत्त्वावबोधार्थमिह कालो निरूप्यते" इति प्रतिज्ञा कृताऽस्तीति इयन् तैत्तिरीयप्रातिशाख्यात् तत्सम्बद्धाब्भ्योऽन्न्याब्भ्यश् च शिक्षाब्भ्योऽर्वाचीना प्रतीयते[8]। अस्स्याश् शिक्षायाः कालनिर्णयदीपिकाख्या मुक्तीश्वराचार्यकृता टीकाऽप्यस्ति। अस्स्याश् शिक्षाया हस्तलेखोऽपि मद्द्राससर्वकारहस्तलिखितपुस्तकागारे उपर्य्युक्तसरस्स्वतीविहारपुस्तकालये चाऽस्ति।

---

१. व्या. शि., पृ. १८७, टि.। २. तै. प्रा. वै. आ. १।१। ३. तत्त्रैव। ४. व्या.शि.वे.तै.सू.१३,पृ.५। ५. CSIPOIG, p. 45 ६. तै.प्रा. १८।१। ७. तै.प्रा. १।३७। ८. CSIPOIG, p. 45

(द) **पारिशिक्क्षा**–अस्स्यां शिक्क्षायावँ् वर्णसमाम्नायः, परिभाषाः,वर्णसार-वर्णक्करमौ, शब्दोत्पत्तिः, सवँ्वारनादौ, महाप्प्राणताऽल्पप्प्राणते, हनूपसंहारः,स्थानङ करणञ् च, प्रयत्नाः, वेदवर्णदेवताः, व्यञ्जनस्स्य पूर्वाऽङ्गपराऽङ्गभावौ, वर्णसञ्ज्ञाः, मात्त्रा, उदात्तादि-स्वर-देवता-जाति-गुणाः, अङ्गुलिस्स्वरनिर्देशप्प्रकारः, गान्धर्वस्स्वर-वेदस्स्वरतुलना, उदात्तादयस् स्वराः, स्वरितभेदाः, कम्पः, स्वरभक्तिः, विवृत्तिः, रङ्गः, व्यञ्जनद्वित्त्वम्, अभिनिधानाः, यमाः, द्वितीयताप्राप्तिः, प्रथमताप्राप्तिः, द्वित्त्वनिषेध इत्त्यादयो विषयास् सन्ति। अस्स्या रचयिता क इति न ज्ज्ञायते। अस्स्याश् शिक्क्षाया याजुषभूषणाऽऽक्ख्या रामसूनुचक्करविरचिता टीकाऽप्प्यस्ति। यद्द्यपि"यस् स्वयं राजते तन् तु स्स्वरमाह पतञ्जलिः। उपरिस्स्थायिना तेन व्यङ्ग्यवँ् व्यञ्जनमुच्च्यते।" इति श्लोक आत्त्रेयशिक्क्षायामपि पट्ठ्यते तथाऽपि 'एष श्लोकः पारिशिक्क्षाया एव त्रिभाष्ष्यरत्ने[1] उद्धृतः' इति सिद्धेश्श्वरर्मा मन्न्यते स्म[2]। अस्स्याश् शिक्क्षाया विषयान् विचार्य, टीकायाम् "भारद्द्वाज-व्यास-पारि-शम्भु–कौहल-हारीत-बोधायन-वाल्मीक्क्यादीनाम् मतानि सङ्गृह्य्य सुबोधेयं शिक्क्षा विरचिता" इति वचनञ् च दृष्ट्वा अस्स्याश् शिक्क्षायास् तैत्तिरीय-चरण-शिक्क्षाकारोपजीवित्त्ववँ् विज्ज्ञाय चाऽस्स्या अपि तैत्तिरीय-चरण-सम्बद्धता सुखेन निश्चेतुं शक्क्या। किन्त्वस्स्या नामनि टीकायाञ् च श्रुतः पारिऋषिरन्न्यत्त्र न श्श्रूयते इति तस्स्य नाम्नो रहस्स्यं सम्म्यग् न बुद्ध्यते। सटीकाया अस्स्या हस्तलेखो मद्द्रास-सर्वकारहस्त-लिखित-पुस्तकागारे उपर्य्युक्त-सरस्स्वतीविहार-पुस्तकालये चाऽस्ति। मूलमात्त्रस्स्य हस्तलेखस् तु विश्श्वेश्श्वराननद-विश्श्वबन्धु–भारत–भारत्त्यनुशीलनसँस्थाने होश्श्यार्पुरे चाऽस्ति।

(ध) **लक्क्ष्मीकान्तशिक्क्षा**– अस्स्यां शिक्क्षायाम् अष्टोत्तरं शतवँ् वर्णास् स्वीकृतास् सन्नीति वेदतैजसाक्ख्यायावँ् व्यासशिक्क्षाव्याक्ख्यायाम् प्रतिपादितमस्ति[3]। वेङ्कटरामशर्मणाऽप्प्येवमेवोक्तम्[4]। किन्त्वस्माभिरुपलब्धायाल्ँ लक्क्ष्मीकान्तशिक्क्षायाम् "अन्तोदात्तम् पदञ् चेदमाद्द्युच्चमिदमीदृशम्। नियमो न कृतः कैश् चित् कस्मिंश्चित् स्वरलक्क्षणे।··· अन्तोदात्तम् पदयँ् यत् स्यादाद्द्युदात्तन् तथैव च। एवन् द्वैधम् पदञ् ज्ञातुमिदं शास्त्रम् प्रणीयते" इति प्रतिज्ज्ञाय

---

१. तै. प्रा. २१।१। २. CSIPOIG. p. 47. ३. व्या. शि. सू. १३, पृ. ५। ४. CSKSP, p. 198.

तदनुसारमेव अन्तोदात्तानि आद्द्युदात्तानि च पदानि प्रातिस्विकतयोपादाय प्रदर्शितानि । यद्द्यपि शरीराजाघनपाठिविरचितसर्वलक्क्षणमञ्जर्याम् उल्लिखिता वेदतैजसे उल्लिखिता वा लक्क्ष्मीशिक्क्षा लक्क्ष्मीकान्तशिक्क्षा वाऽप्यन्न्यैव प्रतिभाति सा चाऽन्न्वेषणीयैवाऽस्ति; तथापि इयमपि लक्क्ष्मीकान्तशिक्क्षाऽत्तरोपात्तेब्भ्यः पदेब्भ्य अस्याष् टीकाया उल्लेखाच् च तैत्तिरीयचरणसम्बद्धैव दृश्यते । अस्या अपि हस्तलेखो मद्द्राससर्वकारहस्तलिखितपुस्तकागारेऽस्ति । तत्प्रतिलिपिश् च उपर्य्युक्तसरस्वतीविहारपुस्तकालये वर्तते ।

(न) **नवशिक्क्षा**-नवशिक्क्षानामक एको ग्रन्थः कालिघट्टस्थ-सँस्कृत-साहित्त्यपरिषदो मुखपत्त्रे द्विषष्टितमस्य वर्षस्य प्रथम-द्वितीय-तृतीय-चतुर्थाङ्क-पिण्डीकरणात्मकेऽङ्के अशोककुमारचट्टोपाद्ध्यायेन प्रकाशितोऽस्ति (ख्रैस्ताब्दाः १९७९) । तत्त्र प्रारम्भे "प्रथमवँ व्यासशिक्क्षा तु लक्क्ष्मीशिक्क्षा द्वितीयकम् । भारद्द्वाजी तृतीया तु शिक्क्षाऽ रण्यन् तुरीयकम् । पञ्चमं शम्भुशिक्क्षा च षष्ठञ् चाऽऽपिशलन् तथा । सप्तमम् पाणिनेश् शिक्क्षा अष्टमङ्ग कौहलेस् तथा । वशिष्ठशिक्क्षा नवमी नवशिक्क्षाः प्रकीर्तिताः" इत्त्युक्तमस्ति । तत्त्र व्यञ्जनद्वित्त्वम्, अनुस्स्वारद्वित्त्वम्, अनुस्स्वारमात्त्रा, स्वरभक्तिमात्त्रा, अर्धगकाररूपोऽनुस्स्वारः, स्वरभक्तिविशेषाः, नादवर्णाः, कालभेदाः, हकारभेदौ, ओङ्कारमात्त्रा, ह्रस्तस्स्वरसङ्केतः, ह्रस्स्व-दीर्घ-प्लुतादि-मात्त्राभेदाः, कम्पः, इत्त्यादयो विषया वर्णितास् सन्ति । कृष्णयजुर्वेदीयशिक्क्षाग्रन्थानान् तुलनात्मकमद्ध्ययनङ्ग कर्त्तुमियं शिक्क्षा पठनीयैव दृश्यते ।

(प) **शिक्क्षासमुच्चयः** – यद्द्यप्यस्स्य ग्रन्थस्स्य शिक्क्षासङ्ग्रहेण सह तुलनाङ्ग कुर्वाणेन देवस्थलिमहाशयेन अस्स्य ग्रन्थस्स्यापि शिक्क्षावर्गीयग्रन्थानां समुच्चयताया भ्रम उत्पादितः, न चाऽस्स्य तेन महाशयेन विवरणन् दत्तम्[1], तथापि तदुल्लेखानुसारमन्न्वेषणङ्ग कुर्वाणैरस्माभिः केरलविश्श्वविद्द्यालयीय-कार्य्यवट्टम्-प्रदेशस्थ-हस्तलिखित-पुस्तकालये उक्तस्स्य शिक्क्षासमुच्चयस्स्य हस्तलेखो दृष्टः । तस्स्य विवरणमिदवँ वर्तते—COL No. 1726/N. 32 A, प्राचीनमलयालम-लिपिः, 7″ × 1¾″, १९ पत्त्राणि, प्रतिपृष्ठम् ८ पङ्क्तयः, प्रति-

---

१. वेदविकृतिलक्क्षणसङ्ग्रहे, Introduction, p. VI, तत्त्र सप्तमी टिप्पणी च द्रष्टव्या ।

पङ्क्ति २७ अक्षराणि, ग्रन्थसङ्ख्या २५० । तत्र प्रयत्नप्रकरणम्, नकारणकारप्रकरणम्, अनुस्वारप्रकरणम्, मात्राप्रकरणम्, काठकप्रकरणम्, द्विरुक्तप्रकरणम्, प्रकीर्णप्रकरणम्, विरुद्धप्रकरणम्, यमप्रकरणम्, क्रमप्रकरणम्, जटाप्रकरणम् रङ्गप्रकरणम्, कम्पप्रकरणम्, तिरस्स्रोवृत्तिप्रकरणम्, वर्णोत्पत्तिप्रकरणम्, अङ्गप्रकरणम् (द्विरोष्ठ्यप्रकरणम्, एकश्श्रुतिप्रकरणम्, अनुनासिकप्रकरणम्) इति प्रकरणानि सन्ति । अस्स्य ग्रन्थस्स्य वर्णोत्पत्तिप्रकरणे "आत्मा बुद्ध्या समेत्त्यार्थान् मनो युङ्क्ते विवक्षया । मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् । मारुतस् तूरसि चरन् मन्द्रम् जनयते स्वरम् । सोदीर्णो मूर्द्धिन निहतो वक्त्रमापद्द्य मारुतः" इत्यादिना प्रारम्भः कृतोऽस्ति । तस्स्य प्रकरणस्स्यान्ते च "आकाशवायुप्रभवश् शरीरात् समुच्चरन् वक्त्रमुपैति नादः । स्थानान्तरेषु प्रविभज्ज्यमानो वर्णत्वमागच्छति यस् (स) शब्दः । तमक्षरम् ब्रह्मम परम् पवित्त्रङ् गुहाशयं सम्म्यगुशन्ति विप्राः । स श्श्रेयसा चाऽभ्युदयेन चैव सम्म्यक् प्रयुक्तः पुरुषयँ युनक्ति । वर्णोत्पत्तिप्रकरणं समाप्तम्" इत्यस्ति । ग्रन्थस्स्यान्ते च "अनुपदम् चानुविदच्छन्दोभाषासमन्वितम् । मीमांसा न्यायतर्काश् च (उपाङ्गा) नि विदुर् बुधा इति । अङ्गप्रकरणं समाप्तम् । हरिः" इति वर्तते । एतेनैष सर्वसम्मतशिक्षा–पारिशिक्षादिसदृशः कृष्णयजुर्वेदसम्बद्धश् शिक्षाविषयसङ्ग्रहरूपो ग्रन्थो न तु शिक्षासङ्ग्रहसदृशश् शिक्षावर्गीयग्रन्थानां समुच्चय इति विज्ज्ञायते । काठकप्रकरणोल्लेखाद् अस्स्य कृष्णयजुर्वेदसम्बद्धत्वं स्फुटम् भवति । अस्स्य ग्रन्थस्स्य व्याख्याऽपि प्राप्यते । उपर्युक्तपुस्तकालये एव **शिक्षासमुच्चयव्याख्या** च दृश्श्यते । तद्विवरणयँ यथा – COL 1726 B, 7"×1¾", ११० पत्त्राणि, प्रतिपृष्ठम् ८ वा ९ वा पङ्क्तयः, प्रतिपङ्क्ति २४-३२ अक्षराणि, प्राचीनमलयालमलिपिः, ग्रन्थसङ्ख्या १६७५; अपूर्णा; प्रारम्भे ".....सा वर्णश्श्रुतिस् स वर्णस्स्याऽऽत्मलाभः । तत्त्र वर्णो ध्वानमुत्पद्द्यमान इति अनन्तरमेव वचनात्" इत्यस्ति । तत्त्र वसिष्ठशिक्षा, कौण्डिन्न्यशिक्षा, ऋक्प्रातिशाख्यम्, **वररुचिशिक्षा**, पतञ्जलिः, आपिशलिः, स्वरपञ्चशती, हारीतः, **अगस्त्यशिक्षा**, आश्श्वलायनः, महाभाष्यम्, आत्त्रेयः, स्वराष्टकम् इति ग्रन्था ग्रन्थकाराश् चोल्लिखिताः । व्याख्यायाम् मूलग्रन्थेऽनुक्तानि अपि प्रकरणानि उक्तानि । तत्त्र प्रकरणानि यथा–उपोद्घातप्रकरणम्, स्थानभेदत्त्वप्रकरणम्, वर्णोत्पत्तिप्रकरणम्, द्विरोष्ठ्यप्रकरणम्, प्रयत्नप्रकरणम्,

नकार-णकार-प्रकरणम्, प्रकीर्ण-प्रकरणम्, अनुनासिकप्रकरणम्, मात्त्रा-प्रकरणम्, एकश्श्रुतिप्रकरणम् इति ।

(ई) सामवेदीयशिक्षाग्रन्थाः

(क) **नारदीयशिक्षा**– अस्स्यां शिक्षायाम् प्रथमे प्रपाठके मुख्यतया गानस्स्वराः, तेषाँ वेणुस्स्वरैस् सह सम्बन्धः, ग्रामाः, मूर्छनाश् च निरूपितास् सन्ति । प्रथमप्रपाठकस्स्य अष्टमम्याऽ कण्डिकायाऽ प्रभृति तदुत्तरे ग्रन्थे तु आर्चिकस्स्वरादयो विषयाऽ प्रतिपादितास् सन्ति । तत्त्र प्रचयस्स्वरः, स्वरितस्स्वराः, कम्पः, वर्णद्वित्त्वम्, यमापत्तिः, यमनिषेधः, व्यञ्जनस्स्य पूर्वपरस्स्वराङ्गताया विचारः, यकारोच्चारणविशेषः, वाक्यपदस्वरसन्निवेशयोर् विशेषः, स्वरिते उदात्ताऽनुदात्तविभागः, मात्त्राकालः, अवग्रहविचारः, विवृत्तयः, पदान्तस्स्थमकारविकाराः, रङ्गः, पदान्तवर्णाः, स्वरव्यञ्जनयोरुदात्तादिस्स्वरधर्मकताया विचारः, ऊष्मगतयः, स्वरभक्तिः, पत्थ्याऽऽर्यालक्षणम्, लघुगुरुसञ्ज्ञा, पदशय्या, प्रचयोच्चारणविधिः, आचार्यकम्, शिक्षाशास्त्रलक्षणलक्ष्यसम्बन्धः, अद्ध्येतृधर्माश् चेति मुख्या विषयास् सन्ति । अस्स्या नारदकृतत्त्वम् भट्टशोभाकरेणोक्तं स्वकृत–विवरणाऽऽरम्भे । अस्स्यान् नारदस्स्योल्लेखास् सन्ति[1] । अस्स्यास् समयोऽनिश्चितः । किन् तु प्रातिशाख्येब्भ्यऽ पश्चाद् अन्न्येब्भ्य उपलब्भ्यमानेब्भ्यश् शिक्षाग्रन्थेद्भ्यऽ प्रागियं रचितेति विवेचका मन्न्यन्ते । कुमारिलभट्टेन तन्त्रवार्तिके[2] अभिनवगुप्तेनाऽभिनवभारत्त्याम्[3] चाऽस्स्या उद्धरणङ्ग कृतन् दृश्यते । अत्त्र गानविधानस्स्य दर्शनादियं शिक्षा सामवेदसम्बद्धेति निश्चीयते । शाखाविशेषसम्बन्धस् तु अस्स्फुटः । हरदत्तेन सामवेदसर्वानुक्रमण्याम् भट्टशोभाकरकृतभाष्यसहिताया नारदीयशिक्षायाऽ कौथुमशाखासम्बद्धग्रन्थत्त्वमुक्तम्[4] । भट्टशोभाकर–कृतेन शिक्षा–विवरणेन सहितेयं शिक्षा मुद्द्रिता चाऽस्ति ।

(ख) **लोमशीयशिक्षा**– अस्स्यां शिक्षायाङ्ग कम्पस्स्वरनिरूपणम्, रङ्गवर्णविचारः, सन्दिग्धकतिपयोदात्तस्स्वरनिरूपणोपायप्रदर्-

---

१. १।२।३, १।२।७; १।५।१३; २।४।९, २।७।११ । २. त.वा. १।३।२४; पृ. १९०–९१ । ३. २८।२१, पृ. ११, ३०; २८।६४–६५, पृ. ४३; २९।३७, पृ. ८९; ३०।२, पृ. १४१ । ४. ऋ. त. सा. स., पृ. २, ८ ।

शनम्, वर्णद्वित्त्वविचारः, संहितायाँ वर्णानामुच्चारणे करणोपसंहारभेदाभेदयोर् विचारः, नादवर्णव्यवस्था, हकारस्थानविशेषविचारः, रेफस्वरभक्तिः, ऋवर्णे रेफस्वरभक्तौ च **अकारोच्चारणविधमुच्चारणम्**, सामगाने श्वासादानविसर्गयोर् नियमः, अनुस्स्वारमात्त्रा, यकारवकारयोः पूर्वस्वराङ्गतायाः परस्वराङ्गतायाश् च विचारः, हकारस्य शषसानाञ् च द्वित्त्वस्य व्यवस्था, मात्त्रापरिभाषादयश् च विषयास् सन्ति। इयं शिक्षा गर्गाचार्येण चिन्तितेत्युक्तमस्ति ग्रन्थारम्भे। यथाऽग्निवेशकृतस्य तन्त्रस्य प्रतिसँस्कर्तुश् चरकस्य नाम्ना चरकसंहितेति प्रसिद्धिस् तथैव गर्गकृतायाश् शिक्षायास् तत्प्रवक्तुस् तत्प्रतिसँस्कर्तुर् वा लोमशस्य नाम्ना प्रसिद्धिर् जाता भवेत्। प्रसिद्धेर् गानविधानाच् च इयं शिक्षा सामवेदीयेति निश्चीयते। अस्या अपि हरदत्तेन सामवेदसर्वानुक्रमण्याङ् कौथुमशाखासम्बद्धत्वमुक्तम्[1]। मुद्रिता चेयं शिक्षासङ्ग्रहे।

(ग) गौतमीयशिक्षा– अस्यां शिक्षायां स्पर्शाः, अन्तस्थाः, ऊष्माण इति त्रयस्त्रिंशतो व्यञ्जनानान् निर्देशः, तेषाँ व्यञ्जनानां सयँयोगस्य भेदानामयस्पिण्डोर्णापिण्डदारुपिण्डानाँ वर्णनञ् च प्राप्यते। खछठथफघझढधभरहान् विहायाऽन्न्येषाँ व्यञ्जनानान् द्वित्त्वं सम्भवतीति नियमः, केषाञ् चिन् मते रहयोर् मध्ये वर्तमानस्य हकारस्य द्वित्त्वम् भवतीत्युल्लेखः, द्विव्यञ्जन–त्रिव्यञ्जन–चतुर्व्यञ्जन–पञ्चव्यञ्जन–षड्व्यञ्जन–सप्तव्यञ्जनानां सयँयोगानाम् प्रदर्शनम्, सप्ताधिकव्यञ्जनसयँयोगाऽसम्भावना चेति विषयास् सन्ति। अस्याः कर्ता गौतम उच्च्यते। अस्याश् शिक्षाया द्वितीयस्य प्रपाठकस्य अन्तिमायाङ् कण्डिकायाङ् गौतमस्योल्लेखोऽप्यस्ति। तत्त्रैव प्रातिशाख्यस्योलेखोऽपि वर्तते। अतः प्रातिशाख्येभ्य इयमर्वाचीनेति ज्ञायते; तथापि प्रपाठकयोर् गद्द्य–कण्डिकासु च विभक्तेयं शिक्षा प्राचीनैवेति मन्यते। प्रातिशाख्योदाहृतत्त्वेन अस्याश् शिक्षाया द्वितीयप्रपाठकस्याऽन्तिमायाङ् कण्डिकायाम् उदाहृतस् सप्तव्यञ्जनसयँयोग उपलब्ध्यमानेषु प्रातिशाख्येषु न प्राप्यते इति सामवेदस्य गौतमीयशाखायाः प्रातिशाख्ये इदानीमनुपलब्ध्यमाने स उदाहृतो भवेदिति सम्भाव्यते। अत्तरोदाहरणानां सामवेदादुद्धृतत्त्वात् प्रसिद्धेस् सामविशेषाणामुल्लेखाच् चेयं शिक्षा सामवेदसम्बद्धेति विज्ज्ञायते। इयं शिक्षा गौतमीयशाखया सम्बद्धेति अस्या नाम्नैव सूच्यते। मुद्रिता चेयं शिक्षासङ्ग्रहे।

---

१. ऋ. त. सा. स., पृ. २, ८।

(उ) अथर्ववेदीयशिक्षाग्रन्थाः

(क) माण्डूकी शिक्षा– अस्या शिक्षायान् द्रुत–मद्ध्यम-विलम्बितवृत्तिनिरूपणम्, सप्तानां स्वराणाम् प्रतिपादनम्, स्वराणा-मङ्गुलीभिस् सङ्केतः, गान्धर्वस्वराणामुदात्तादिभिस् सह सवँवादनम्, वेदाद्ध्ययनविधिः, ह्रस्तस्वरावश्यकता, वेदोच्चारणयोग्यतानिर्देशः, दन्तधावननिर्देशः, मद्ध्यमवृत्तिप्रयोगनियमः, प्रातस्सवनादौ उरस्था-दीनावँ वाणीनाम् प्रयोगस्य नियमः, उदात्तादिस्स्वरे विशेषः, व्यञ्-जनानां स्वरानुगामित्वम्, वर्णानामष्टौ स्थानानि, करणस्य स्पृष्ट-त्वादिधर्मैश् चतुर्विधत्वम्, जात्यादिस्स्वरितस्स्वराः, जात्यादि-स्स्वरित–तीक्ष्णता–प्रमाणम्, य-य(ज)-निरूपणम्, ह्रस्स्वदीर्घप्लुता-ऽनुस्स्वारविचारः, चतस्रो विवृत्तयः, विवृत्तेऽ कालस् स्वभावश् च, स्वर-भक्तिः, ऊष्मणोऽष्ट गतयः, विवृत्तिसहितस्य रक्तवर्णस्य व्यञ्जना-ऽनुतत्त्वम् (रङ्गानुतत्त्वम्), रङ्गनिरूपणम्, यमवर्णाः, द्वित्त्व-योग्या एकविंशतिर् वर्णाः, अद्ध्ययने निषिद्धाश् चेष्टाः, वर्गप्रथमस्य वर्गद्वितीयतुल्यत्वापत्तेर् नियमः, मात्रानिरूपणम्, विरामनिरूपणम्, ककार–टकार–नकार–मकारागमाः, निर्भयताया अब्भ्यासजन्यत्वम्, माधुर्यस्य निर्भयताजन्यत्वम्, सिद्धेर् माधुर्यजन्यत्वम्, दन्तोष्-ठ्यभेदादिसूक्ष्मविषयज्ञानादिकाश् शिक्षुकगुणाः, विद्द्यार्थिधर्माः, विद्द्याग्रहणोपायाः, अब्भ्यासप्रशंसा, विद्द्यावृद्धिहेतवः, विद्द्या-विनाशहेतवश् चेति विषयास् सन्ति। अस्याऽ कर्ता मण्डूक इति अस्याश् शिक्षाया अन्त्ये पद्द्ये उक्तमस्ति। सप्तदशे पद्द्येऽपि मण्डूकस्योल्लेखो वर्तते। एको मण्डूकऽ पाणिनिनाऽप्युल्लिखितोऽस्ति[1]। माण्डूकेयस्य तु अनेकेषु स्थलेषु उल्लेखाऽ प्राप्यन्ते[2]। यद्द्यपि ऋग्वेदशाखाद्ध्यायिनोऽपि माण्डूका दृश्यन्ते[3] तथाऽपि अथर्ववेदीया माण्डूक्योपनिषत् प्रसिद्धतराऽस्ति। सा हि मण्डूकप्रोक्तचरणान्त-र्गता प्रतीयते। यद्द्यपि पाणिनिना यथा छान्दोग्यादिकमन्वाख्यातन्[4] न तथा माण्डूक्यम्, तथापि न तावतैषा सम्भावनाऽपैति। अतस् तस्यैव शाखाप्रवक्तुर् मण्डूकस्य नाम्ना इयं शिक्षा प्रसिद्धेति प्रतीयते। अस्याश् शिक्षाया अथर्ववेदसम्बद्धत्वे तु अत्तर अथर्ववेदादुदाहरणा-

---

१. 'ढक् च मण्डूकात्' अष्टा. ४।१।११९। २. तै. आ. ३।१।५, ऋ. प्रा. ३।१४, अथ. प. ४३।४।४६। ३. अथ. प. ४९।१।६। ४. अष्टा. ४।३।१२९।

नामुद्धृतत्त्वम्[1], गोपथोक्तशिक्क्षुकपदप्प्रयोगः, अथर्ववेदाद्ध्यायिकुलेषु प्राप्तत्त्वम्, अथर्ववेदीयत्त्वेन प्रसिद्धिः, अथर्वपरिशिष्टे आगतं 'शिक्क्षा प्रकल्पिता सम्म्यङ् मण्डूकेन महर्षिणा। शिष्ष्याणामुपदेशार्थं सम्म्यगुच्चारणाय वै'।[2] इति वचनञ् च प्रमाणानि। गौडपादकृतवैतत्थ्याऽद्द्वैताऽलातशान्तिप्रकरणानाम् माण्डूक्क्योपनिषदनुबन्धरूपाणामपि अथर्ववेदीयोपनिषत्त्वेनोल्लेखङ् कुर्वति[3] अथर्ववेदचरणव्यूहे तु अथर्ववेदीयलक्क्षणग्रन्थेषु दन्त्योष्ठ्यविधेरुल्लेखोऽस्ति[4], अस्याश् शिक्क्षाया उल्लेखो नास्ति इति अस्या अर्वाचीनत्त्वं सम्भाव्यते। इयं शिक्क्षा शिक्क्षासङ्ग्रहे मुद्द्रिता। भगवद्दत्तेनाऽप्प्यस्यास् सम्पादनम् प्रकाशनञ् च कृतमस्ति।

(ख) **वर्णपटलम्**– इदमथर्ववेदपरिशिष्टेषु सप्तचत्त्वारिंशम् परिशिष्टम्। अत्तर वर्णपरिभाषा, वर्णवर्गीकरणम्, तत्तद्वर्गस्थवर्णसङ्ख्या, लौकिकवैदिकवर्णसङ्ख्या, घोषवदघोषव्यञ्जननिर्देशः, वर्णस्थानानि, वर्णनिष्पत्तिप्रक्क्रिया, ऋवर्णविशेषविचारः, ह्रस्स्वदीर्घप्लुतस्स्वरविचारश् चेत्त्यादयो विषयास् सन्ति। अतोऽयं शिक्क्षाशास्त्रीय एव ग्रन्थः। कुत्तर चिद् ग्रन्थस्य पतितत्त्वाद् विच्छिन्नाऽऽगमकत्त्वाच् च ग्रन्थो दुर्बोधो जातोऽस्ति। तथाप्प्ययङ् ग्रन्थश् शिक्क्षाशास्त्रिणाङ् कृते मननीयो वर्तते। अस्य प्रवक्ता कौशिक इति अथर्ववेदपरिशिष्टेषु एकान्नपञ्चाशस्य परिशिष्टस्य चरणव्यूहस्याऽद्ध्ययनाज् ज्ञायते। अस्य ग्रन्थस्य अथर्ववेदसम्बन्धस् तूक्तेऽथर्ववेदीचरणव्यूहे अथर्ववेदीयसप्तचत्त्वारिंशपरिशिष्टत्त्वेन अस्योल्लिखितत्त्वादेव सिद्ध्यति।

(ग) **दन्त्योष्ठविधिः** – अस्मिन् ग्रन्थे दन्त्यस्य (दन्तकरणकस्य) वकारस्य ओष्ठ्यस्य (पवर्गीयस्य) बकारस्य च विवेक× प्रतिपादितोऽस्ति इति अस्य ग्रन्थस्य शुद्धन् नाम दन्त्योष्ठ्यविधिरिति प्रतीयते। किन् तु अस्य मुद्द्रिते पुस्तके अथर्ववेदीयपरिशिष्टानाम् मुद्द्रिते पुस्तके च दन्त्योष्ठविधिरित्त्येव मुद्द्रितन् दृश्यते। **दन्त्यस्स्य** (दन्तकरणकस्य उपचाराद् दन्तेषु भवस्य) अन्तस्स्थान्त्यस्स्य **ओष्ठविधिर्** ईषत्स्पृष्टोष्ठविधिर् ओष्ठ्यस्य पवर्गीयबकारस्य स्पृष्टोष्ठविधेर् विविच्च्य प्रदर्श्यतेऽत्तरेति प्रकल्प्य उक्तन् नाम समर्-

---

१. श्लो. ७९, ८०, ८१, ८६ इ.। २. शि. स., पृ. ४७९, श्लो. ६। ३. अथ. प. ४९।४।४; १०। ४. तत्तरैव ४९।४।८।

थयितुं शक्यते । अस्मिन् ग्रन्थे अन्तस्स्थासु अन्त्यो वकारो दन्त्य उक्तोऽस्ति[1] । ओष्ठकरणकाद् ओष्ठ्यात् पवर्गीयाद् बकाराद् दन्तकरणकस्य ओष्ठ्यस्य अन्तस्थास्स्वन्त्यस्य वकारस्य विविक्तत्वेन बोधनायैव तस्याऽत्तर दन्त्यत्वमुक्तम् अथवा तैत्तिरीयप्रातिशाख्यव्याख्यायान् तिरभाष्यरत्नाख्यायामिव वकारस्य स्थानमेवोत्तरदन्ताग्राणि मत्वैवमुक्तमिति निर्णेतुं न शक्यते । अस्मिन् ग्रन्थे (बकारवकारयोरुच्चारणे भेदस्य सूक्ष्मत्वाद्) वैदिकानावँ विदुषामपि वेदाद्ध्ययनाऽवसरे अत्तर बकारो वा वकारो वेति संशयो भवतीति तन्निराकरणाय दन्त्यवकारयुक्तानाम् पदानाम् बहुत्वात् तानि विहाय आदौ पवर्गीयेण बकारेण युक्तानि पदानि वक्ष्ये इति प्रतिज्ञाय आदौ बकारेण युक्तानि पदानि द्वितीयाक्षरे तेन युक्तानि पदानि च परिगणितानि सन्ति[2] । तत्तर मुद्द्रितपाठानुसारम् प्रथमाद्ध्यायस्य द्वादशे पद्द्ये "ये नोक्तास् ते तु दन्तजाः" इति उक्तमस्ति । तत उत्तरे श्लोके (मुद्द्रितपाठानुसारन् द्वितीयस्याद्ध्यायस्य प्रथमे श्लोके) दन्त्यस्य (दन्तोष्ठ्यस्य) वकारस्योच्चारणप्रकारो वर्णितोऽस्ति । अस्य कर्ता क इति न विज्ज्ञायते । अथर्ववेदीयचरणव्यूहे "लक्षणग्रन्था भवन्ति चतुरद्ध्यायिका प्रातिशाख्यम् पञ्चपटलिका, दन्त्योष्ठविधिर् बृहत्सर्वानुक्रमणिका चेति"[3] इत्युक्तत्वादयम् प्राचीन एव ग्रन्थः प्रतीयते । अस्य ग्रन्थस्यादौ अथर्वण ऋषेर् नमस्कृतत्वाद् विवेच्यवर्णयुतानाम् पदानामथर्ववेदादुद्धृतत्वाद् अस्य ग्रन्थस्याऽथर्ववेदीयलक्षणग्रन्थेषु गणितत्वाच्[4] चाऽस्य ग्रन्थस्याऽथर्ववेदग्रन्थेन सह सम्बन्धस् स्फुटः । एवञ् चाऽथर्ववेदेऽपि बवयोश् श्रुतौ सूक्ष्म एव भेदो नाऽऽपामरवेद्द्य इत्यपि विज्ज्ञायते । अयङ् ग्रन्थो हिन्दिभाषाटीकया सह मुद्द्रितोऽप्यस्ति । मूलपाठस्याऽशुद्धत्वाट् टीकाकारेणाऽपि स्थानेस्थानेऽस्याऽर्थस् सम्यङ् न बुद्ध इति प्रतिभाति[5] ।

(घ) **अथर्ववेदपरिशिष्टम्**– अत्तर अथर्ववेदीया ग्रन्थाः परिगणिताः, केषाञ् चनाऽथर्ववेदीयमन्त्रानुष्ठानकल्पानाञ् च वर्णनङ् कृतमस्ति । अन्ते 'एतदथर्वविधानाख्यम् परिशिष्टन् निरूपितम्' इत्युक्तमस्ति । अस्य ग्रन्थस्य शिक्षाशास्त्रेण सह सम्बन्धो

---

१. १।२ । २. १।२–१२ । ३. अथ. प. ४९।४।८ ।
४. तत्तैव । ५. १।३, २।१ इ० ।

नाऽस्ति । तथापि शिक्क्षासङ्ग्रहेऽस्य मुद्द्रितत्त्वादिमामेव टिप्पणीङ्कर्तुमस्याऽत्तरोल्लेखꙮ कृतोऽस्माभिः ।

(ऊ) सर्ववेदशाखालोकसाधारणाश् शिक्क्षाग्रन्थाः

अद्ध्येतृषु सङ्क्षेपरुचिषु जातेषु सर्ववेदपारिषदो[1] लौकिकशब्दान्वाक्ख्यायकश् च[2] सङ्क्षिप्तो[3] व्याकरणग्रन्थꙮ पाणिनिना यथा रचितस् तथैव सर्ववेदशाखालोकसाधारणानां शिक्क्षाशास्त्रीयविषयाणाम् प्रतिपादकास् सङ्क्षिप्ताश् शिक्क्षाग्रन्था अपि आचार्यैर् विरचिता इति विज्ज्ञायते । तादृशेषु शिक्क्षाग्रन्थेषु तैत्तिरीयारण्यकप्रोक्तशिक्क्षाशास्त्रविषयाणाम् मद्ध्ये साम सन्तानश् च प्रायेण उपेक्क्षितौ दृश्यते । सन्तानस्य (संहिताविधेः) उपेक्क्षणे तस्य सर्वेषु प्रसिद्धेषु व्याकरणग्रन्थेषु प्रकृतिप्रत्ययसंहिताविधिना सह तन्त्रेणैव प्रतिपादितत्त्वलँ लोकस्य सङ्क्षेपरुचित्त्वञ् च निमित्तम् प्रतीयते । साम्न उपेक्क्षणे तु तस्य प्रायो वेदे एवाऽधिकम् महत्त्वमिति बुद्धिर् हेतुस् स्यात् । अत्तराऽस्मिन् प्रघट्टके तादृशानां शिक्क्षाग्रन्थानाम् परिचय उपस्थाप्यते येषावँ वेदशाखाविशेषसम्बद्धता न दृश्यते । तादृशाश् च शिक्क्षाग्रन्था यथा—

(क) आपिशलशिक्क्षा (गद्द्यसूत्तररूपा)— अस्स्यां शिक्क्षायां शब्दपरिचयः, वर्णानाङ्ग गणना, स्थानानि, करणानि, आब्भ्यन्तरप्रयत्नः, बाह्य्यप्रयत्नः, मात्राभेदादिकृता अवान्तरभेदाः, सवर्णाः, स्थान–करण–प्रयत्नपरिभाषाः, वर्णनिष्पत्तिप्रक्क्रियाविवरणम्, स्पृष्टता–विवृतता–सवँवृतता–सवँवार–नाद–विवार–श्वास-घोषवत्ताऽ-घोषता–महाप्राणता–ऽल्पप्प्राणतो–ऽष्मत्त्वो–ऽदात्ता–ऽनुदात्त–स्स्वरित–परिभाषाश् चेति विषयाꙮ प्रतिपादितास् सन्ति । अत्तर "कालो विवार–सवँवारौ श्वासनादावघोषता । घोषो ऽल्पप्प्रणता चैव महाप्राणस् स्वरास् त्रयः ।

---

१. पा. व्या. भा. २।१।५८, ६।३।१४ । २. तत्तरैव पस्पशाह्निकारम्भे । ३. महाभारतटीकायाञ् ज्ञानदीपिकायामागतम् 'न दृष्टमिति वैयासे पदे मा संशयङ्ग कृथाः । अज्ज्ञैरज्ज्ञातमित्त्येव पदन् न हि न विद्द्यते । यान्न्युज्जहार माहेन्द्राद् व्यासो व्याकरणाऽर्णवात् । पदरत्नानि किन् तानि सन्ति पणिनिगोष्पदे' इति देवबोधवचनम्, "समुद्द्रवद् व्याकरणम् महेश्श्वरेऽम्बुकुम्भतुल्य्यं हि मतम् बृहस्पतौ । तद्भागभागेन मितम् पुरन्दरे तृणाग्ग्रबिन्दुप्प्रमितं हि पाणिनौ" इति पुरुषोत्तमोद्धृतवँ वचनन् चाऽत्तर स्मरणीयम् ।

बाह्य्यङ करणमाहुस् तान् वर्णानावँ वर्णवेदिनः"[1] इति द्वादश बाह्य्यप्रयत्ना उक्ताः । अस्स्याश् शिक्क्षाया× कर्ता आपिशलिरित्युच्यते । व्याकरणकार आपिशलि× पाणिनिनाऽपि उल्लिखितः[2] । भर्तृहरिणा वाक्क्यपदीयब्रह्म्मकाण्डस्स्य स्वोपज्ज्ञवृत्तौ "बहुधा शिक्क्षासूत्तरभाष्य्यकारमतानि दृश्श्यन्ते" इति उक्त्वा उद्धृतन् "नाभिप्प्रदेशात् प्रयत्नप्रेरितो वायुरूर्ध्वमाक्क्रामन्नुरस्स्याऽऽदीनां स्थानानामन्न्यतमं स्थानमभिहन्ति, ततश् शब्दनिष्पत्तिः"[3] इति वचनमस्स्या एव शिक्क्षाया इति वृषभदेव आह स्म[4] । किन् तु तत्तर शिक्क्षासूत्तरादिवचनानि उद्धृत्त्य अन्ते "इत्त्येवमादि प्रतिशाखं शिक्क्षासु भिन्नमागमदर्शनन् दृश्श्यमानं सर्वम् प्रपञ्चेन समर्थयितव्य्यम्"[5] इत्त्युपसंहार× कृत इति तद्वचनङ कस्स्य चित् प्रातिशाक्ख्यस्स्य स्यादिति सम्भाव्य्यते । राजशेखरेणाऽपि आपिशलीयशिक्क्षाया उल्लेख× कृतोऽस्ति[6] । हैमशब्दानुशासनवृत्तावपि अस्स्या बहूनि सूत्तराणि उद्धृतानि दृश्श्यन्ते[7] । तैत्तिरीयप्रातिशाक्ख्यव्याक्ख्याने वैदिकाभरणेऽपि नामग्रहणपूर्वकमेवाऽस्स्याश् शिक्क्षाया वचनम् उद्धृतन् दृश्श्यते[8] । महास्वामिना अनन्तदेवेन च भाषिकसूत्तरव्याक्ख्यानेऽपि आपिशलिवचनमुद्धृतमस्ति[9] । प्राचीने शौनकशिक्क्षाव्याक्ख्यानेऽपि "बह्व्व्यस् सन्ति शिक्क्षाश् शौनकीयपाणिनीयशैशिरीयाऽऽपिशलीयाद्द्याः"[10] इत्त्युक्त्वा आपिशलशिक्क्षोल्लिखिताऽस्ति । अत× प्राचीने काले शिक्क्षासु आपिशलशिक्क्षाया× प्रसिद्धतमत्त्वङ गम्म्यते । तथाऽप्प्यर्वाचीने काले इयमप्प्रसिद्धा ग्रन्थतोऽनुपलब्भ्यमाना चाऽभूत् । एतादृश्श्यां स्थितौ अड्ड्यारपुस्तकालयेऽस्स्याश् शिक्क्षाया हस्तलिखिते पुस्तके प्राप्प्य रघुवीरेणाऽस्स्यास् सम्पादनम् प्रकाशनञ्[11] च कृतमितीदानीमियलँ लब्धप्रचाराऽस्ति ।

(ख) **पाणिनीयशिक्क्षा (गद्द्यसूत्तररूपा)**– अस्स्यां शिक्क्षायामपि प्राय आपिशलशिक्क्षाविषयैस् तुल्ल्या एव विषया× प्रतिपादिताः ।

---

१. आ. शि. ८।२६ । २. अष्टा. ६।१।९२ । ३. वा. प. १।११२–१५। ४. तत्तरैव व्याक्ख्याने । ५. तत्तरैव वृत्तौ । ६. 'शिक्क्षा आपिशलीयादिका'– का. मी. द्वि. अ. । ७. १।१।१७। ८. २।११, पृ. ७२; २।४६, पृ. ९०; २३।२, पृ. ५०७ । ९. भा. सू. ३।१४, पृ. ६२–६३ । १०. शौ. शि. श्लो. १, पृ. ३ । ११. JVS, i–2, (1934), p. 225.

अस्स्याऽ कर्ता पाणिनिरिति 'स्वामी' दयानन्दो युधिष्ठिरमीमांसकश् च। किन् तु तयोऽ पाठयोरन्तरमस्ति। 'स्वामिना' दयानन्देन प्रयागस्थे एकस्मिन् ब्राह्म्मणगृहे एकन् त्रुटितम् पाणिनीयशिक्क्षासूत्त्रहस्तलिखितपुस्तकम् प्राप्प्य तदीयऽ पाठस् सम्पादित इति युधिष्ठिरमीमांसकेनोक्तम्[1]। 'स्वामिना' तु हस्तलेखविवरणङ् ग्रन्थस्स्य त्रुटितत्त्वाऽत्रुटितत्त्वादिकम् प्राप्तिस्स्थानेतिवृत्तादिकञ् च किमपि नोल्लिखितम्। "बडे परिश्श्रम से पाणिनिमुनिकृत शिक्क्षाका पुस्तक प्राप्त कर"[2] (महता परिश्श्रमेण पाणिनिमुनिकृतायाश् शिक्क्षायाऽ पुस्तकम् प्राप्प्य) इत्त्येवोक्तम्। ग्रन्थेऽपि महाभाष्य्यकारवाक्क्यादीनि वाक्क्यान्तराणि अपि तेनैव प्रक्क्षिप्तानि, त्रुटितोऽपि ग्रन्थऽ पूर्ण इवैवोपस्स्थापितः। तथाऽपि स ग्रन्थपाठस् सर्वथा 'स्वामिना' दयानन्देनैव कल्पित इति वक्तुन् तु न शक्क्यते, तस्स्य पाणिनीयत्त्वे सन्देहे[3] सत्त्यपि आपिशलत्त्वादिना प्राचीनग्रन्थत्त्वस्स्य सम्भवात्, आपिशलशिक्क्षया सह तस्स्य बहुधा सादृश्श्यस्स्य दर्शनाच् च। युधिष्ठिरमीमांसकसम्पादितोऽपि 'पाणिनीयशिक्क्षासूत्त्र'–पाठस् सम्पादकमनीषया पाणिनीयत्त्वेन निर्धारितो[4] न तु सम्प्रदायप्रामाण्येन। त्रिभाष्य्यरत्ने यद्द्यपि "सन्ध्यक्क्षराणां ह्रस्स्वा न सन्ति इति पाणिनीयेऽपि"[5] इत्त्युक्तन् तथापि तत्त्र शिक्क्षाया अनुल्लेखात् 'पाणिनीये' इति अस्त्रीलिङ्गप्रयोगाच् च पाणिनीयव्याकरणव्याक्ख्यानङ् काशिकान्यासादिकमपि वार्तिक- भाष्य्यादिकमिव सामान्न्यतऽ पाणिनीयत्त्वेन गृहीत्त्वा सोमयार्येण तथोक्तं स्यादिति सम्भावनाऽपि न न प्प्रसरति। तथापि आपिशलशिक्क्षासूत्त्रसदृशम् पाणिनीयशिक्क्षासूत्त्रमपि सत्तासम्भावनाकोटिन् तु आरोहत्त्येव। यद्द्यपि महाभाष्य्यदीपिकायाङ् काशिकायाम् बोधिनन्न्यासे च शिक्क्षासूत्त्रवचनानि उद्धृतानि[6] तथापि तच्शिक्क्षासूत्त्रकारस्स्य नाम तु नोल्लिखितम्, न च 'यदाहाऽऽचार्यः' इत्त्यादिकम् उद्धृतवचनानाम् पाणिनीयशिक्क्षासूत्त्रवचनत्त्वस्स्य सूचकङ् किञ् चिदुक्तमिति न तदुद्धरणानि उद्धृतवचनानाम् पाणिनीयशिक्क्षासूत्त्रवचनत्त्वे दृढम् प्रमाणम्। सावर्ण्यसूत्त्रे तदुत्तरसूत्त्रे च पतञ्जलिना उद्धृतानि वचनानि तु 'पाणिनीयशिक्क्षासूत्त्र'-वचनैर् न सर्वं वदन्ते इत्त्यप्प्यत्त्र स्मरणीयमेव।

---

१. शि. सू., भू. पृ. ५, ६। २. वे. प्र. व. शि., भू. पृ. २।
३. पा. शि. शि. स.स., पृ. १८–१९। ४. शि. सू. भू., पृ. ५–१०।
५. तै. प्रा. त्रि. र. १८।१, पृ. ४५०। ६. अष्टा. १।१।९।

एवं सत्त्यपि, पाणिनीयस्य सावर्ण्यसूत्तरस्य व्याक्ख्याने[1] तदपेक्क्षितानि शिक्क्षासूत्तरवचनानि अपि भर्तृहरिणा, काशिकाकारेण, जिनेन्द्रबुद्धिना च पाणिनीयान्न्येव उद्धृतानि स्युरिति सम्भावना तु न नाऽस्माकम् बुद्धौ आरोहति। पाणिनिना च यथा सत्त्यपि आपिशलव्याकरणादौ सर्ववेदपारिषदो लौकिकशब्दान्न्वाक्ख्यायकश् च व्याकरणग्रन्थः कृतस् तथैव व्याकरणार्थम् पूर्वमावश्यकस्य[2] शिक्क्षाशास्त्रस्यापि तादृश एव ग्रन्थस् सत्त्यपि आपिशलशिक्क्षासूत्तरे नूनं रचितस् स्यादिति सम्भावनाऽपि जागर्त्येव। यदि तु युधिष्ठिरमीमांसकसम्पादितयोर् आपिशलशिक्क्षासूत्तर–पाणिनीयशिक्क्षासूत्तरयोर् यादृशं सादृश्यन् तादृशमेव सादृश्यम् आपिशलव्याकरण–पाणिनीयव्याकरणयोरपि[3] तदा तु पाणिनेर् यशो दैवादेव जातम् मन्तव्यं स्यात्। किन् तु शिक्क्षासूत्तरस्य विषयाणामल्पत्त्वाद् हेयोपादेयविषयाऽऽदिकृतस्य भेदस्याऽसम्भावनयाऽधिकतरं सादृश्यवं् व्याकरणस्य तु विषयाणाम् बाहुल्याद् हेयोपादेयसङ्क्षेपप्य–विस्तार्यविषयादि–विषययोजनाशैलीभेदादि–कृतस्य भेदस्य सम्भावनयाऽल्पतरं सादृश्यमपि भवितुं शक्नोति। अतः पाणिनेर् वैशिष्ट्येनैव कृतमपि यशो भवितुं शक्नोति। अस्यां हि शिक्क्षायायँ् युधिष्ठिरमीमांसकसम्पादिते पाठे आपिशलेरुल्लेखोऽस्ति नाभितलप्रकरणे पञ्चविंशे सूत्तरे। 'स्वामि'–दयानन्दसम्पादिते पाठे सप्तमे प्रकरणे द्वितीये सूत्तरे कौशिकस्योल्लेखोऽस्ति। अथर्ववेदीयवर्णपटलस्य प्रवक्ता एकः कौशिकोऽभूत्। किन् तु कौशिकोक्ततत्त्वेनाऽत्तरोद्धृतौ श्लोकौ वर्णपटले न प्राप्यते। पद्द्यात्मिकायाम् पाणिनीयशिक्क्षायावँ् वेदमात्तरसम्बद्धानावँ् विषयाणान् दुस्स्पृष्ट–विवृत्ति–रङ्ग–कम्प–शस्त्रपाठ–साङ्गवेदाद्ध्ययनविधि–ह्रस्तस्स्वरप्रदर्शनविधि–वेदोच्चारणसम्पदाम् बहूनाम् प्रतिपादनमस्ति[4]; अत्तर तु तादृशेषु विषयेषु कस्याऽप्युल्लेखो नाऽस्ति। अतः पद्द्यरूपायाः पाणिनीयशिक्क्षाया अपेक्क्षयाऽस्या गद्द्यसूत्तररूपायाः पाणिनीयशिक्क्षायास् सर्ववेदलोकसाधारणतत्त्वम् अधिकन् दृश्यते। मुद्द्रिता चेयम्।

(ग) **गालवशिक्क्षा**– इययँ् युधिष्ठिरमीमांसकेन उल्लिखिता[5]।

---

१. अष्टा. १।१।९। २. पा. व्या. भा. १।१।३२। ३. शि. सू. भू., पृ. २, ३। ४. पा. शि. श्लो. ४, ५, २४, २६–२९, ३०, ३६–३७, ४१–४२, ५४–५५, ५१। ५. सं. व्या. शा. इ. (प. भा.) पृ. १५४।

महाभारतेऽपि गालवस्य शिक्क्षायाः प्रणयनं स्मृतमस्ति[1] । अस्याश् शिक्क्षायाः प्रकृतेरनिर्ज्ञातत्वादियमत्राऽस्मिन् प्रकरणे उल्लिखिता । गालवस्य क्रमपाठप्रणेतृत्वेन सहैव शिक्क्षाप्रणेतृत्वं स्मृतम् इति, गालवश् च ऋग्वेदशाखाभेदप्रवर्तकत्वेन च स्मर्यते[2] इति चेयं शिक्क्षा ऋग्वेदसम्बद्धा स्यादित्यपि सम्भाव्यते । व्याकरणकारो गालवस् तु पाणिनिनाऽपि स्मृतः[3] । इयं शिक्क्षा ग्रन्थतस् तु अनुपलब्धैव ।

(घ) **चान्द्रवर्णसूत्रम्**– अस्मिन् ग्रन्थे वर्णानां स्थानानि, करणानि, आब्भ्यन्तरप्रयत्नाः, बाह्य्यप्रयत्नाः, अकारादिवर्णभेदाः, मात्राः, उदात्तादयस् स्वराश् च प्रतिपादितास् सन्ति । तत्र स्थाननिरूपणे इकारस्स्याऽपि कण्ठतालुकम्, उकारस्स्यापि कण्ठोष्ठं स्थानम् प्रतिपादितन् दृश्श्यते । किन् तु युधिष्ठिरमीमांसकादि–सम्पादिते पाठे 'ताल्विचुयशाम्' 'ओष्ठावुपूपध्मानीयानाम्' इत्त्यपि सूत्रे प्राप्प्येते इति तत्र सन्देहोऽपि भवति । घोषसंस्करणे 'ओष्ठौ पूपध्मानीययोः' इति पाठो युधिष्ठिरमीमांसकेनैव दृष्टोऽपि अबोधात् तेन खण्डितः । वस्तुतस् तु उकारस्स्य कण्ठोष्ठस्थानकत्वम् प्रथममेवोक्तन् तत् सूत्रञ् च युधिष्ठिरमीमांसकेनाऽपि तथैव प्रकाशितमिति 'ओष्ठावुपूपध्मानीयानाम्' इति पाठोऽसङ्गत एव । एवमेव 'ताल्विचुयशाम्' इति पाठोऽप्प्यसङ्गतः; 'तालु चुयशाम्' इत्त्येव चन्द्रगोमिकृतः पाठस् स्यात् । एतस्मिन्नपि पक्क्षे इकारोकारयोर् द्विस्स्थानकत्वमन्न्यैरप्प्रतिपादितञ् चन्द्रगोमिणा प्रतिपादितमित्त्यसामञ्जस्स्यमेव प्रतिभाति । तथापि इकारोकारोच्चारणे कण्ठेऽप्प्यसाधारण्ण्येनैव वर्णजनकवायुप्प्रतिघातश् चन्द्रगोम्म्यभिमतो वस्तुस्स्थित्त्यनुकूल इवैव प्प्रतिभाति । अस्मिन् वर्णसूत्रे वेदमात्रसम्बद्धो विषयः कोऽपि नाऽस्ति । अत्र यमानामप्प्युल्लेखो नैव वर्तते । अस्य कर्ता चन्द्रगोमीति 'इति चन्द्रगोमिकृतानि वर्णसूत्राणि समाप्तानि' इत्त्यादिकात् तद्ग्रन्थसमाप्तिलेखाद् विज्ज्ञायते । एकश् चन्द्राऽऽचार्यो भर्तृहरिणा वाक्क्यपदीये[4] कह्लणेन कश्मीरराजतरङ्गिण्यान्[5] च उल्लिखितोऽस्ति । कह्लणेन अस्स्य स्वतन्त्रव्याकरणकारत्वमप्प्युक्तम[6] । अयञ् चन्द्राऽऽचार्यश् चन्द्रगोमी च एका व्यक्तिरुत

---

१. म. भा. शा. ३४२।१०४ (क्रमम् प्रणीय शिक्क्षाञ् च प्रणयित्वा स गालवः [बभौ])। २. शै.शि.श्लो. ३ । ३. अष्टा. ४।३।१०६ । ४. २।४८९ । ५. १।१७६ । ६. सं. व्या. शा. इ. (प. भा.) पृ. ३५१, टि. १ ।

भिन्नेति विशेषतो निश्चेतुन् न शक्यते । एकैवेति ऐतिहासिका मन्यन्ते[1] । 'एकश् चन्द्रगोमी लिच्छवि-(निच्छिवि-)काले नेपालदेशेऽपि अभूत्, सोऽपि व्याकरणकारः, तद्रचितव्याकरणग्रन्थस्य हस्तलेखाश् च नेपालदेशे बहवः प्राप्यन्ते, अतश् चन्द्रगोमी न काश्मीरकः, किन्तु नेपाल एव' इति नेपालः कश् चन ऐतिहासिको मन्यते[2] ।

(ङ) **षोडशश्लोकी शिक्षा**– अस्स्यां शिक्षायान् त्रिषष्टेर् वर्णानाङ्ग गणना, अकारादीनाम् भेदाः, स्पर्शवर्णवर्गाः, हलित्यादीनाम् प्रत्याहाराणामुल्लेखः, स्पर्शाः, यमाः, ऊष्माणः, अन्तस्थाः, जिह्वामूलीयः, उपद्ध्मानीयः, विसर्गः, अनुस्स्वारः, लघु-गुरु-परिभाषा, वर्णानां स्थानानीति विषयास् सन्ति । अयवँ वेदलोकसाधारणश् शिक्षाग्रन्थोऽस्ति । केन हेतुना युगलकिशोर-पाठकेनाऽयङ्ग ग्रन्थो यजुर्वेदीयशिक्षाग्रन्थत्वेनोक्त[3] इति न बोद्धुं शक्यते । अस्स्याश् शिक्षायाः कर्ता रामकृष्णः । मुद्रिता चेयं शिक्षासङ्ग्रहे ।

(च) **बकारविवेकः**– अस्मिन् ग्रन्थे पवर्गीयबकारस्स्य अन्तस्थाया वकारस्स्य च स्थानप्रयत्नादिना भेदो वर्णितः, तयोश् श्रुतावपि ईषदेव भेद इत्युक्तम् । कुत्रकुत्र कीदृशेषु च संस्कृतशब्देषु पवर्गीयो बकार इति, कुत्राऽन्तस्था वकार इति, केषुकेषु संस्कृतधातुषु पवर्गीयो बकार इति केषुकेषु च पवर्गीयो बकारो वाऽन्तस्था वकारो वेति, पुनः पवर्गीयबकारयुक्तधातुगणना, दन्तोष्ठ्यवकारयुक्तधातुनिर्देशः, पवर्गीयबकारयुक्तप्रातिपदिकगणना, बकारेण वकारेण वा युक्तानाम्प्रातिपदिकानाङ्ग गणना चेत्त्येवँविधाः खलु विषयास् सन्ति अत्र । अस्स्य कर्ता शिवकुमारशास्त्रिशिष्ट्यो दीनबन्धुशर्मा मैथिलः । प्रकाशनकालश् चाऽस्स्य १९९६ वैक्रमाब्दा इत्यङ्कितः ।

(छ) **सप्तस्वरसिन्धुः** – एष ग्रन्थः केरलविश्वविद्यालयीयहस्तलिखित-ग्रन्थालये वर्तते । तद्विवरणयँ यथा– COL No. 199, कागदम्, १३''×८'', ३१५ पत्राणि, पूर्णः, देवनागरी लिपिः । अत्रोदात्तादि–स्वराणां षड्जादिगानस्वराश्शिरतत्त्वम् प्रतिपादितम् । तत्र व्याख्यायाम् "केचन कृष्णयजुःप्रथमशाखाविषये आन्ध्रपाठमनुसृत्यैवाऽध्येतव्यमिति वदन्ति, तत् सिद्धान्तविरुद्धम्, अत आर्यपाठमिति प्रसिद्धद्राविडपाठमनुसृत्यैवाऽध्येतव्यम्" इत्यप्युल्लिखितन् दृश्यते ।

---

१. सं.व्या.शा.इ.(प.भा.)पृ. ५६९–५७१। २. लि.अ., पृ. ३९६।
३. शि. स., वि., पृ. १।

(ज) उदात्तस्स्वरनिर्णयस् सव्व्याक्ख्यः – एष ग्रन्थोऽपि तत्तरैव वर्तते, ग्रन्थमानम् १५५, तेलगुलिपिः, ग्रन्थलेखाधारस् ताडपत्तरम्, ग्रन्थ× पूर्णः ।

९. शिक्क्षापरिशिष्टरूपा ग्रन्थाः

प्राग् वर्णितेषु शिक्क्षाग्रन्थेषु शिक्क्षाशास्त्रीयैस् सर्वैर् विषयैर् युक्ता ग्रन्था अल्पाः; शिक्क्षाशास्त्रीयविषयैकदेशेन युक्ताश् शिक्क्षाशास्त्रप्रकरणग्रन्था एव प्रभूताः, शिक्क्षाशास्त्रीयसंहितादि-विषयविशेषोपकारकाश् शिक्क्षापरिशिष्टरूपा ग्रन्था अपि बहवः । तत्तर प्रागुक्तेषु शिक्क्षाग्रन्थेषु उपलेखसूत्तरम्, स्वरव्यञ्जनशिक्क्षा, शमानशिक्क्षा, माण्डव्व्यशिक्क्षा, (पदरूप-) वेदपरिभाषासूत्तरशिक्क्षा, (पदरूप-)वेदपरिभाषा–कारिका–शिक्क्षा, पदकारिकारत्नमालाशिक्क्षा, क्रमसन्धानशिक्क्षा, अवसाननिर्णयशिक्क्षा, मनस्स्वारशिक्क्षा, मल्लशर्मशिक्क्षा, गलदृक्शिक्क्षा, भारद्द्वाजशिक्क्षा, सिद्धान्तशिक्क्षा, विलिङ्घ्यशिक्क्षा, बकारविवेकश् चेत्त्येवम्प्रकारा ग्रन्थाश् शिक्क्षापरिशिष्टरूपा एव । प्रातिशाक्ख्यपरिशिष्टरूपा ग्रन्था इत्त्युक्ते प्रकरणे उल्लिखिता ग्रन्था अपि अधिकताराश् शिक्क्षापरिशिष्टग्रन्थत्त्वेनाऽप्प्युपात्तुं शक्क्यास् सन्ति । वेदलोकसाधारणशिक्क्षापरिशिष्टरूपाश् शसभेदः, ऊष्मविवेकः, सकारनिर्णयः, नकारभेदः, शब्दभेदप्रकाशः, शनभेदः, शयुतषयुतपदविवेकः, दन्त्यसकारभेदः, नकारभेदः, जकारभेदश् चेत्त्येवमादयोऽन्न्येऽपि ग्रन्था बङ्गाल-मद्द्रासादि-प्रदेशस्थ-हस्तलिखितपुस्तकागारेषु प्राप्प्यन्ते[1] ।

१०. शिक्क्षाग्रन्थेषु शिक्क्षाशास्त्रविषयप्प्रतिपादनप्प्रगतिः

वेदानाम् अद्ध्ययना-ऽद्ध्यापनाऽऽदिषु यदा दोषसम्भावनाऽतीव स्वल्पाऽभूत् तदा प्राचीने काले ब्राह्म्मणादिषु विप्प्रकीर्णैरेव शिक्क्षाशास्त्रविषयैर् विदुषावँ् वेदाद्ध्यायिनावँ् वेदयथार्थोच्चारणरूपम् प्रयोजनं सिद्ध्यति स्स्म । भ्रश्श्यति तु काले वेदाद्ध्ययने शिथिलताम् जिगमिषति केषु चन ब्राह्म्मणपाठेषु उत्सन्नेषु[2] वेदेषु च दुर्ग्रहेषु जातेषु[3] वेदोच्चारणरक्क्षायै ब्राह्म्मणेब्भ्योऽर्थवादान् विहाय बीजरूपेणोक्तान् विधीन् समाहृत्त्य तान् विस्तृताँश् च कृत्त्वा शौनकप्रभृतयो मुनय× प्रातिशाक्ख्यरूपान् शिक्क्षाशास्त्रग्रन्थान् विरचयाञ्चक्क्रु× किल । तेषु च ब्राह्म्मणेषु बीजरूपेण स्थितानावँ् विषयाणां साधु विकसनन् दृश्श्यते ।

---

१. L. R. S., Intro. २. आ. ध. सू. १।४।१२।१०.
३. निरुक्ते १।६।४।

ततोऽप्यर्वाचीने काले भृशं शिथिलीभूते वेदाद्ध्ययने स्वल्पेषु सम्प्रदायज्ञानवत्सु वैदिकेषु अवशिष्टेषु देशश्यभाषाव्यवहारप्रवणेषु द्विजाग्र्येषु आचार्या वेदोच्चारणरक्षायै विविधान् शिक्षाग्रन्थान् रचयितुम् प्रवृत्ताः प्रतीयन्ते। वर्तमानायामपि शताब्द्याम् अयङ्करमः प्रचलन्नस्ति। तत्र प्रातिशाख्यभिन्नेषु शिक्षाग्रन्थेषु प्राप्याः परिस्थित्यनुसारिणीं शिक्षाशास्त्रविषयप्रतिपादनप्रगतिं सूचयन्तो विषया अध उल्लिख्यन्ते-

(क) शिक्षाशास्त्ररूपलक्षणलक्ष्यसम्बन्धनिरूपणं शिक्षाशास्त्रमहत्त्वस्स्पष्टीकरणम्[1] च।

(ख) सुस्स्वास्थ्यम्, प्रशान्ततत्त्वम्, निर्भीतत्त्वम्, शोभनदन्तोष्ठयुतत्त्वम्, व्यक्तवाक्त्वम्, गद्गदत्त्वजिह्वाजाड्यवत्त्वादिरहितत्त्वम्, प्रगल्भत्त्वमित्यादीनाम् पाठकगुणानान् तद्विरोधिनाम् पाठकदोषाणाञ्च प्रतिपादनम्[2]।

(ग) स्वरसौष्ठवाद्द्यर्थस्स्य दन्तधावनजिह्वानिर्लेखनादेर् विधानम्[3]।

(घ) अद्ध्येतृधर्माणावँ विस्तरेण प्रतिपादनम्[4]।

(ङ) क्ष-क्ष्ययोर् बवयोर् खषयोश् च विवेकस्स्य प्रतिपादनम्[5]।

(च) नादवर्णादिव्यवस्थायाः करणम्[6]।

---

१. पा. शि. श्लो. ४१-४२; या. शि. १।४३; अ. शि. श्लो.१२०, १२१, १२३-२६, ल. अ. शि. श्लो. १४, १७; व. शि. श्लो. ४,९, २२३-२४,२२६; सम्. शि. श्लो. १; चा. शि. पृ. ११, १८, २३; व्या. शि. सू. ५१६, आरण्यशिक्षोपान्त्यपद्द्यम्; ना. शि. १।२।३०-३१, २।७। १०-११, २।८।१२; मा. शि. श्लो. १५५-५६। २. शै. शि. श्लो. ७२-७७, ९७-९८; पा. शि. श्लो. ३२-३५, या. शि. श्लो. २१,२६, २७, १९७-९९, चा. शि. पृ. २३, व्या. शि. सू. ५०२-४, ना. शि. १।३।११-१२, १।६।१५-१९, २।८।८-१०, २।८।३०-३१, लो. शि. ३।५, ५।६, मा. शि. श्लो. १४१। ३. या. शि. श्लो. ३३-३६; ना. शि. २।८।३०-३१,मा. शि. श्लो. ३७-३९। ४. या. शि. श्लो. १६२-१७६; ना. शि. २।८। १-३२; मा. शि. श्लो. १५३-१८२। ५. पारा. शि. श्लो. १५८, अ. शि. श्लो. १२९-३०, माण्डव्यशि. १-४०, द. वि. १-२३, अ. शि. ३-२५; माद्ध्य. शि., शि. स. पृ. ११०। ६. शै. शि. श्लो. १०१-२; या. शि. श्लो. १७९, का. शि. ८-९; पारा. शि. श्लो. ३९-५४; अ. शि. श्लो. २, ३०-३४, ४०; व्या. शि. सू.१६,३१६-१७,४६४; लो.शि.५।२-५।

(छ) रङ्गवर्णविवेचनम्[1]।

(ज) स्वरभक्तिस्स्पष्टीकरणम्[2]।

(झ) वर्णविशेषोच्चारणविशेषविवरणम्[3]।

(ञ) उदात्तादिस्स्वराणावँ वेणुवीणास्स्वरादिभिस् सह तुलनया स्स्पष्टीकरणम्[4]।

(ट) स्वरिततीक्ष्णताविशेषस्स्य स्वारबलाबलस्स्य च विवरणम्[5]।

(ठ) पदशय्याप्रतिपादनम्[6]।

(ड) अक्षरविभागस्स्य व्यञ्जनस्स्वरविधानस्स्य च स्स्पष्टीकरणम्[7]।

(ढ) हस्तस्स्वरसङ्केतस्स्य विस्तृतवँ विवरणम्[8]।

---

१. शौ. शि. श्लो. १०३–१०७, शौ. शि. श्लो. २४–२९; पा. शि. श्लो. २६–२९, या. शि. श्लो. ६२, १८९–९४, २१६–१७; अ. शि. श्लो. ४१–४६; मल्ल. शि. श्लो.४३–४७; व्या. शि. सू. ६; ना. शि. २।३। ५-९; लो. शि. १।६–९; मा. शि. श्लो. ११०–१५। २. शौ. शि. श्लो. ५२–५५; शौ. शि. श्लो. ४३–४४; या. शि. श्लो. ९८–१०४; लघुमा. शि. श्लो. १०–१२, व. शि. श्लो. ५२–५४; प. सू. शि. ४; के. शि. श्लो. ९–१०, मल्ल. शि. श्लो. ३९, स्वरभक्तिशि. श्लो. १८, ३६–४१; प्रा. प्र. शि. (शि. स., पृ. २९२); चा. शि. पृ. ३०; व्या. शि.सू. ३८१, शम्भुशि. श्लो. १७–१८, कौ. शि. श्लो. ७७–७८; सर्व. शि. श्लो २४, २८–३६, पारिशि. श्लो. १२०–१३१ ना. शि. २।६।२–९; लो. शि. २।२–४,६।१–४; मा. शि. श्लो. ९९–१०६, १२७–२९। ३. या. शि. श्लो. ७०–७४, १७९–८८, पारा.शि.श्लो. ६४, ६५,६८, ६९, ७१,८६; अमो. शि.श्लो.५१, ५३–६०, ६२–६५; स्वरा. शि. श्लो. १८–१९; चा. शि. पृ. १८, २९; व्या. शि. सू. ४३७–४०; लघुमा. शि. श्लो. २२। ४. शौ. शि. श्लो. ८२, पा. शि. श्लो. १२, या. शि. श्लो. १–७; पारिशि.सू.८३–९७; ना. शि. १।१।९–१४,१।५।१–२,१।८।८; मा. शि. श्लो. ७–१४, १७–१९. । ५. व. शि. श्लो. १०२-३, व्या. शि. सू. ३१४–१५, सम्. शि. श्लो. ४८-५४, पारिशि. सू. १०९–११; ना. शि. २।५।४, मा. शि. ६४–६७,८२–८३। ६. पा. शि. श्लो. ४५, कौ. शि. श्लो. ३४–३५, ना. शि. २।७।५; मा. शि. श्लो. १२०। ७. या. शि. श्लो. ११८–१९, व. शि. श्लो. ८६–८७; व्या. शि. सू. ३१६–१७, ना. शि. २।५।२–४। ८. शौ. शि. श्लो. ७९, पा. शि. श्लो. ४३–४४, ५४–५५; या. शि. श्लो. १२–१३,

(ण) स्वरदीर्घवद्भावादेर् व्यवस्थायाᳬ करणवँ् व्यञ्जनमात्त्रा-विशेषप्प्रतिपादनञ् च[1]।

(त) हकारविशेषस्स्य अयोगवाहानाञ् च स्थानानां स्पष्टीकरणम्[2]।

(थ) पाठदोष–पाठगुणविवरणम्[3]।

(द) वर्णद्द्वित्त्वविधानस्स्पष्टीकरणम्[4]।

(ध) सयँ्योगपिण्डोच्चारणविधिविशेषनिरूपणम्[5]।

(न) वाक्क्ये पदानामुच्चारणस्स्य रीतेᳬ प्रतिपादनम्[6]।

(प) (क्रम–) जटादिपाठविधानम्[7]।

२३, ३८–४३, ४६–५३, ५६–६१, ६४, ६६, ६७, ६८, ७१–७३ १२१, १५९–१६०; पारा. शि. श्लो. ३६–३७, ७२, १४३; के.शि.श्लो. १–६; मल्ल.शि.श्लो. ५–६५; अ.शि.श्लो. ४९, ९३; लघुमा.शि.श्लो. २३–२६; प्रा. प्र. शि., पृ. २२३–२२६; चा. शि. पृ. २४; कौ.शि.श्लो. ३६–४२; व्या.शि.सू. ३२६–३३६।

१. शौ.शि.श्लो. ९३; व.प्र.शि.१९०–१९१; प.सू.शि.सू. ९; के.शि.श्लो. १९–२०; स्वरभक्तिशि. श्लो. २७–२९; प्रा. प्र. शि. पृ. २५५–२५६, ३००; ना.शि. १।३।७, २।६।१०, २।७।२–४; पारा. शि. २७, ४३; तै. प्रा.वै.आ. १।३७, पृ. ३९–४२। २. शौ.शि.श्लो. १५६; पा.शि.श्लो. १६, २२; या. शि. श्लो. १७७–१७८; लो.शि. ५।९–११; लघुमा. शि. श्लो. १६,२२। ३. शौ.शि.श्लो. ७२–७७, ९७–९८; पा. शि. श्लो. ३२–३५; या. शि. श्लो. २१, २६, २७, १९७–१९९; चा. शि. पृ. २३; व्या. शि. सू. ५०२–५०४; सर्व. शि. श्लो. ११५–११६; ना.शि. १।३।११–१२,१।६।१५–१९, २।८।८–१०, २।८।३०–३१; लो. शि.३।५,५।६; मा.शि.श्लो.१४१। ४. शौ. शि. श्लो. ४०–४४; शौ.शि. श्लो.४६–४७,४८; या.शि.श्लो.२२१; पारा.शि.श्लो. १०४–१०८; माद्व्य. शि.श्लो.२–८; व.प्र.शि. श्लो. ५५, १४७–१७४, १७९–१८२; प.सू.शि. सू.६–७; स्वरभक्तिशि.२२–२५; प्रा.प्र.शि.पृ.२५०–२५४,२९५; चा.शि. पृ.१५, १६, १७, १८; व्या.शि.सू. ३३७–३७०; शम्भुशि.श्लो.३७–३८; सर्व.शि.श्लो. २–१६; पारिशि. सू. १५८–१६५; ना. शि. २।२।७; गौ. शि. २, ६; लो. शि. २।५–६,३।६, ८।४–६; मा.शि.श्लो.१२२, १२६, १२७–१३०। ५. शौ.शि.श्लो.२९–३५,१५०–१५७; शौ.शि.श्लो.३६–४०; या.शि.श्लो.२०२; व.प्र.शि.श्लो. १७७–१७९; गौ.शि. १।१; मा.शि.श्लो. १११। ६. शौ.शि.श्लो. ५१; या.शि.श्लो. ४५, १९७, १९९; चा.शि.पृ. २६; मा.शि.श्लो.१३२। ७. व्याडिशिक्क्षायाम् (विकृतिवल्ल्याम्); हयग्रीवकृतजटापटले; व्या.शि.सू.३७; कौ.शि.श्लो. ५३-५८; शम्भुशि. श्लो. २३-२८; आत्त्रेयशि.श्लो. १–५; कौण्डिन्न्यशि.श्लो. १३–२८।

(फ) प्रातिशाक्ख्येष्वागतानान् दुर्बोधानावँ विषयाणां स्पष्टीकरणम्[1]।

(ब) केषाञ् चन नवीनानाञ् चपलाऽऽदीनावँ विषयाणाम् प्रतिपादनञ् च[2]।

(११) प्राचीनाश् शिक्क्षाशास्त्रकाराः

येषाम् प्राचीनानामाचार्याणां शिक्क्षाशास्त्रसम्बद्धानि मतानि प्रातिशाक्ख्येषु तादृशेषु अन्न्येषु वा प्राचीनेषु ग्रन्थेषु उल्लिखितानि तेषामाचार्याणान् नामानि प्रागपि स्थानेस्स्थाने निर्दिष्टान्न्येव, तथाप्यत्तर तानि स्थलनिर्देशसहितानि एकप्रघट्टकगतानि[3] कृत्त्वाऽकारादि-

---

१. वर्णरत्नप्रदीपिका शिक्क्षा, प्रातिशाक्ख्यप्रदीपशिक्क्षा, व्यासशिक्क्षादयश् च परिशीलनीयाः। २. पारा.शि. २१, २२, ८३–८४, ८५, १५६–१५७; अमो.शि. ६८–७२, ७३, ८६–७७, ९१, १०७; व्या. शि. सू. ३९२–३९४। ३. एतादृशं सङ्कलनवँ विधाता मिश्र इत्त्याक्ख्येन ग्रन्थकारेण (CSSP, p.22–24), युधिष्ठिरमीमांसकेन (सं.व्या.शा.इ.(प.भा.) पृ.६९–७२) च कृतन् दृश्यते। तथापि तयोस् त्रुटेस् संशोधनमपि कृत्त्वा तयोस् साहाय्येन स्वपरिश्रमेण च अस्माभिरिदं सङ्कलनङ्ग कृतमस्ति। तत्तर प्रथमे द्वितीये च ग्रन्थे अग्निवेश्य अग्निवेश्यायनः, अन्न्यतरेयः, नैगी इति अशुद्धानि नामानि दत्तानि, तानि अस्माभिर् मूलग्रन्थावलोकनेन वैदिकपदानुक्क्रमकोशसाहाय्येन च संशोधितानि। प्रथमे ग्रन्थे द्वापञ्चाशन् नामानि, द्वितीये च एकान्नषष्टिर् नामानि, दत्तानि, तत्तरापि द्वितीये ग्रन्थे तैत्तिरीयकम् इति वुञ्प्रत्त्ययान्तस्स्याऽऽम्नायनाम्नोऽपि भ्रमेणाऽऽचार्यनामत्त्वमुक्तम्, अतोऽत्तर तत् परित्त्यक्तम्। यथायथम् प्रथमे द्वितीये च ग्रन्थे उपात्तानाम् अव्व्यक्तिनाम्नान् तैत्तिरीय–पाञ्चाल–प्राच्च्य-पाञ्चाल–माद्ध्यन्दिन–मीमांसक–शाकलानाम् परित्त्यागश्च कृतोऽत्तर। यास्कस्य ऋग्वेदप्रातिशाक्ख्ये छन्दश्शास्त्रीयविषयप्रकरणे एवोल्लिखितत्त्वात् सोऽपि परित्त्यक्तः। द्वितीयग्रन्थे स्थविरकौण्डिन्न्य–स्थविरशाकल्ल्य–साङ्कृत्त्य–हारीत–नकुलमुखानामुल्लेखे वर्णाऽनुक्क्रमो विकृत इति सोऽपि शुद्धश्च कृतोऽत्तर; काश्यप–वाल्मीकि–शाकल्ल्य–शौनक–साङ्कृत्त्यानां स्थलनिर्देशे यथायथम् प्रथमे द्वितीये च ग्रन्थे वर्तमाना त्रुटिरशुद्धिर् वाऽपि परिमृष्टा। आपस्तम्बौऽज्जिह्वायनक–कौशिक – कौहलेय – गर्गाऽऽचार्य –गालव – तुम्बुरु – नारद– पाञ्चाल – पाराशर – प्राचीनौदब्ब्रजि – प्रातीबोधीपुत्तर –

वर्णाऽनुक्रमानुसारम् प्रदर्शयन्ते बोधसौकर्याय निर्देशोद्धरणाऽऽदिसौविद्ध्याय च–

(१) आगस्त्यः – ऋ. प्रा., व. १।२ ।
(२) आग्निवेश्श्यः – तै. प्रा. ६।४; मै. प्रा. ६।४ ।
(३) आग्निवेश्श्यायनः – तै. प्रा. १४।३२, मै.प्रा. १४।३२[1] ।
(४) आत्त्रेयः – तै. प्रा. ५।३१, १७।८ ।
(५) आन्न्यतरेयः – ऋ. प्रा. ३।२२ ।
(६) आपस्तम्बः – या. शि. श्लो. १३१ ।
(७) इन्द्रः – ऋक्तन्त्रे १।४ ।
(८) उक्ख्यः – तै.प्रा. ८।२२, १०।२०, १६।२३; मै.प्रा. ८।२१, १०।२१, १६।२५ ।
(९) उत्तमोत्तरीयः – तै. प्रा. ८।२० ।
(१०) औज्जिहायनकाः – व. प्र. शि. श्लो. ७०।
(११) औदव्रजिः – ऋक्तन्त्रे ३।६।१० ।
(१२) औपशविः[2] – शु. य. प्रा. ३।१३१; भा. सू. २।२०, २२ ।
(१३) काण्डमायनः – तै.प्रा.९।१, १५।७; मै.प्रा. ९।१,१५।७ ।
(१४) काण्वः – शु.य.प्रा. १।१२३, १४९ ।
(१५) कात्त्यायनः – शु. य. प्रा. ८।६१ ।
(१६) काश्श्यपः – शु. य. प्रा. ४।५; मा. शि. १२।१ ।
(१७) कौण्डिन्न्यः – तै. प्रा. ५।३८, १८।३, १९।२; मै. प्रा. ५।४०, १७।४, १८।३, १९।६ ।

मण्डूक – माण्डव्य – याज्ञवल्क्य– रावण–वसिष्ठ– विश्श्वावसु–सोमशर्म–ह्रस्स्वमाण्डूकेयानाम् उक्तसङ्कलनद्द्वयेऽसमाविष्टानाम् अत्तर समावेशः कृतः ।

१. यद्द्यपि एतत्स्थलनिर्देशश् श्रीधरशास्त्रिणा मैत्त्रायणीयसंहिताप्राग्बन्धे, युधिष्ठिरमीमांसकेन च स्वकीयग्रन्थे '२।२।३२' इत्त्येवंरूपेण कृतस् तथापि यथा तैत्तिरीय प्रातिशाक्ख्ये प्रश्नद्द्वयात्मकवँ विभागङ कृत्त्वा प्रतिप्प्रश्नम् अद्ध्यायात्मका विभागाः क्रियन्ते, केवला अद्ध्यायात्मका विभागा अपि क्रियन्ते; तथैव मैत्त्रायणीयप्रातिशाक्ख्येऽपि भवितुमर्हतीति तैत्तिरीयप्रातिशाक्ख्येन सह तुलना सुकराङ कर्तुम् अस्माभिरेतादृशस् स्थलनिर्देशः कृतो बोद्ध्यः । २. 'औपशिविः' इति भाषिकसूत्त्रे पाठः ।

(१८) कौशिकः – लघौ पाणिनीयशिक्क्षासूत्तरे परक्करमपरकरणे ।
(१९) कौहडी- (ली-) पुत्तरः – तै.प्रा. १७।२; मै.प्रा. १७।२ ।
(२०) कौहलेयः – तै. प्रा. तिर. र. १९।४ ।
(२१) गर्गाचार्यः – लो. शि. १।१ ।
(२२) गार्ग्यः – ऋ.प्रा. १।१५, ६।३६; ११।१७, २६; १३।३१; शु. य. प्रा. ४।१६७ ।
(२३) गालवः – महाभारते १२।३४२।१०४ (चित्तरशालास्करणे), अष्टा. ६।३।६१,७।१।७४, ७।३।९९, ८।४।६७ ।
(२४) गौतमः – तै.प्रा. ५।३८, मै.प्रा. ५।४०; गौ. शि. २।७।
(२५) जातूकर्ण्यः – शु. य. प्रा. ४।१२५, १६०; ५।२२ ।
(२६) तुम्बुरुः – ना. शि. १।५।१४; २।७।११; (द्रष्टव्या– लो. शि. ७।७) ।
(२७) दाल्भ्यः – शु. य. प्रा. ४।१६ ।
(२८) नकुलमुखः – ऋक्तन्त्तरवृत्तौ ३।४।१० ।
(२९) नारदः – ना. शि. २।७।११ ।
(३०) नैगिः – ऋक्तन्त्तरे २।६।९, ४।३।२ ।
(३१) पाञ्चालः[1] – ऋ. प्रा. उ. भा. ११।७० ।
(३२) पाणिनिः – लघुऋक्तन्त्तरे, पृ. ४६ ।
(३३) पाराशरः – पारा.शि.श्लो. १,२,१३,७६,१०८,१२५,१६० ।
(३४) पौष्करसादिः – तै. प्रा. ५।३७, ३८; १३।१६, १४।२, १७।६; मै. प्रा. ५।३९, ४०; १३।१६; १७।६ ।
(३५) प्राचीनौदव्व्रजिः – ना. शि. २।८।५ ।
(३६) प्रातीबोधीपुत्तरः – ऐ. आ. ३।१।५ ।
(३७) प्लाक्क्षायणः – तै. प्रा. ९।६, १४।११, १७; १८।५; मै. प्रा. ९।६, १८।२,३ ।
(३८) प्लाक्क्षिः – तै.प्रा. ५।३८; ९।६; १४।१०, १७; १८।५; मै. प्रा. २।६, ५।४०; ९।६ ।
(३९) बाडबी- (भी-) कारः – तै. प्रा. १४।१३ ।
(४०) बाभ्रव्व्यः – ऋ. प्रा. ११।६५ ।
(४१) बृहस्पतिः – ऋक्तन्त्तरे १।४ ।
(४२) ब्रह्म्मा – ऋक्तन्त्तरे १।४ ।

---

१. अयम् पाञ्चालो व्यक्तिविशेषरूप एव ।

(४३) भरद्द्वाजः – ऋक्तन्त्रे १।४; तै. प्रा.तिर. र. ५।४० ।
(४४) भारद्द्वाजः – तै.प्रा.१७।३,मै.प्रा.१७।३;भा.सू.२।१९,३।६ ।
(४५) मण्डूकः – मा. शि. श्लो. १७, १८२ (२।३, १६।१६)।
(४६) माक्क्षव्व्यः – ऋ. प्रा. व. १।२ ।
(४७) माचाकीयः – तै.प्रा. १०।२२[1] ।
(४८) माण्डव्व्यः – माण्डव्व्यशि. श्लो. १ ।
(४९) माण्डूकेयः – ऋ. प्रा. व. १।२, ऋ.प्रा. ३।१४ ।
(५०) याज्ज्ञवल्क्यः – या. शि., पृ. १३, ८९, १६९ ।
(५१) रावणः – मल्ल. शि. श्लो. ५ (शि. स. पृ. १५३) ।
(५२) वसिष्ठः – ना. शि. २।७।११; वासिष्ठ्यां शिक्क्षायाम् प्रथमे अनुत्ये च श्लोके ।
(□)वाडबी-(भी-)कारः – बाडबी(भी)कार इत्यस्स्यैव पाठान्तरम्।
(५३) वात्सप्प्रः – तै. प्रा. १०।२३, मै. प्रा. १०।२३ ।
(५४) वाल्मीकिः – तै.प्रा. ५।२६,९।४, १८।६; मै.प्रा.२।६,३०; ५।३८, ९।४ ।
(५५) विश्श्वावसुः – ना. शि. २।७।११ ।
(५६) वेदमित्तरः – ऋ. प्रा. १।५१ ।
(५७) व्याडिः – ऋ. प्रा. ३।२३, २८; ६।४३, १३।३१, ३७ ।
(५८) शाकटायनः – ऋ.प्रा.१।१६,१३।४९; शु.य.प्रा.३।९,१२,८७; ४।५, १२९, १९१; ऋक्तन्त्रे १।१; शौ. च. २।२४ ।
(५९) शाकल्यः – ऋ. प्रा. ३।१३, २२; ४।१३, १३।३१; शु.य. प्रा. ३।१०;अ.प्रा. ३।४।३ ।
(६०) शाकल्यपिता – ऋ. प्रा. ४।४ ।
(६१) शाङ्खमित्तिरः – शौ. च. ३।७४ ।
(६२) शाङ्खायनः – तै.प्रा. १५।७, मै. प्रा. १५।७ ।
(६३) शूरवीरः – ऋ.प्रा.व. १।३ ।
(६४) शूरवीरसुतः – ऋ.प्रा.व. १।३ ।
(६५) शैत्त्यायनः – तै. प्रा. ५।४०, १७।१, ८; १८।२; मै. प्रा. १७।१, ६;१८।२,३ ।

---

१. मैत्त्रायणीयप्रातिशाक्ख्यस्स्य आत्मना पठितुमप्प्राप्तत्वात् तत्र माचाकीयस्स्य उल्लेखोऽस्ति न वेति निश्चित्त्य वक्तुन् न शक्क्यते । एवमेव स्थविरस्स्य कौण्डिन्न्यस्स्याऽन्न्येषाञ् चैवंविधानाम् ।

(६६) शौनकः – ऋ.प्रा.व. १।१; शु.य.प्रा. ४।१२२; शौ.च.१।८, अ.प्रा.भा. १।२; अमोघानन्दिन्न्याम् श्लो.१०६।

(६७) साङ्कृत्त्यः – तै. प्रा. ८।२१, १०।२१, १६।१६; मै. प्रा. ८।२०, १०।२२, १६।१७।

(६८) सोमशर्मा – या. शि. श्लो. ८; ना. शि. २।३।८।

(६९) स्थविरऽ कौण्डिन्न्यः – तै.प्रा. १७।४; तै.प्रा.मा.भा.५।४०।

(७०) स्थविरश् शाकल्ल्यः – ऋ.प्रा. २।८१।

(७१) हारीतः – तै. प्रा. १४।१८।

(७२) ह्रस्स्वो माण्डूकेयः– ऐ. आ. ३।१।५।

१२. शिक्क्षाग्रन्थकारत्त्वेन सम्भाविताश् शिक्क्षाग्रन्थकाराश् च प्राचीना अर्वाचीनाश् च व्याकरणकाराः

प्राचीनानायँ येषावँ व्याकरणकाराणामद्द्यत्त्वे शिक्क्षाग्रन्था नोपलब्ध्यन्ते, यैश् च प्राचीनैर् व्याकरणकारैश् शिक्क्षाग्रन्थाऽ कृता इत्त्यत्त्र साक्क्षात् प्रमाणमपि नोपलब्ध्यते तैरति व्याकरणकारैश् शिक्क्षाशास्त्रग्रन्था अवश्श्यङ कृतास् स्युः, यतो हि शिक्क्षा व्याकरणस्स्याऽपेक्क्षणीया व्याकरणात् पूर्वा च विद्द्या। अत्त्राऽऽपिशलि-पाणिनि–चन्द्रगोमिणा शिक्क्षाव्याकरणोभयग्रन्थकर्तृत्त्वमप्युपोद्वलकम्। यदि तैऽ कथञ्चन पृथक् शिक्क्षाग्रन्था न कृता भवेयुस् तथापि कातन्त्रव्याकरणे इव तद्व्याकरणेष्वपप्याऽऽदौ शिक्क्षाशास्त्रविषयस् सङ्क्षेपेणोक्त एव भवेदिति च दृढं सम्भाव्यते। अतस् सम्भावित–शिक्क्षाशास्त्रग्रन्थकारत्त्वकाश् शिक्क्षाशास्त्रग्रन्थकाराश् च प्राचीनाऽ केचन अर्वाचीनाश् च व्याकरणकारा अपि अत्त्र नाम्नोल्लिक्ख्यन्ते–

(१) ब्रह्म्मा – म.भा. १२।५९।२९–३०; कामसूत्त्रे १।१।५।

(२) महेश्श्वरः – म. भा. १२।३८४।९२।

(३) बृहस्पतिः – पा.व्या.भा. १।१।१।

(४) इन्द्रः – तै. सं. ६।४।७; नि.दु.वृ. १।१।१।

(५) वायुः – वायुपुराणे २।४४।

(६) भरद्द्वाजः – ऋक्तन्त्रे १।४।

(७) भागुरिः – काशिकाविवरणपञ्जिकायाम् ६।२।३७।

(८) पौष्करसादिः – पा. व्या. भा. ८।४।४८।

(९) चारायणिः – लौगाक्क्षिगृह्य्यसूत्त्रदेवपालभाष्ये ५।१।

(१०) काशकृत्त्स्नः(त्स्निः)– पा. व्या. भा. १।१।१; काशिकायाम् ४।३।१०१; ५।१।५८।

(११) शन्तनुश् शान्तनवो वा (फिट्सूत्रकारः)– काशिकापदमञ्जर्याम् ७।३।४ ।

(१२) वैयाघ्रपद्द्यः – काशिकायाम् ४।२।६५,५।१।५८,७।१।९४।

(१३) माद्ध्यन्दिनिः – काशिकायाम् ७।१।९४ ।

(१४) रौढिः – काशिकायाम् ६।२।३६ ।

(१५) शौनकिः – भट्टिकाव्यजयमङ्गलायाम् ३।४७ ।

(१६) गौतमः – पा. व्या. भा. ६।२।३६ ।

(१७) व्याडिः– पा. व्या. भा. ६।२।३६; काशिकायाम् २।४।४१; भाषावृत्तौ ६।१।७७ ।

(१८) वाजप्प्यायनः – पा. व्या. भा. १।२।६४, वा. ३५ ।

(१९) काश्श्यपः – अष्टा. १।२।२५, ८।४।६७ ।

(२०) आपिशलिः – अष्टा. ६।१।९२ ।

(२१) गार्ग्यः – अष्टा. ७।३।९९,८।३।२०,८।४।६७ ।

(२२) गालवः – अष्टा. ६।३।६१,७।१।७४,७।३।९९,८।४।६१ ।

(२३) चाक्क्रवर्मणः – अष्टा. ६।१।३० ।

(२४) भारद्द्वाजः – अष्टा. ७।२।६३ ।

(२५) शाकटायनः – अष्टा. ३।४।१११,८।६।१८,८।४।५० ।

(२६) शाकल्ल्यः –अष्टा. १।१।१६,६।१।१२७, ८।३।१९,८।४।५१; प्रौढमनोरमायाम् च– "अप्प्राकृतस् तु यस् स्वारस् स्वरितोदात्तपूर्वगः । उदादायार्धमस्स्याऽथ शिष्टन् निगृघ्नन्ति कम्पितम्" इति स्वरितस्वरविशेषोच्चारणविषयकं शाकल्ल्यस्स्य वचनमप्प्युद्धृतन् 'तस्स्यादित उदात्तमर्धह्रस्स्वम्' इति सूत्रस्स्य व्याक्ख्याने ।

(२७) सेनकः – अष्टा. ५।४।११२ ।

(२८) स्फोटायनः – अष्टा. ६।१।१२३ ।

(२९) पाणिनिः (अष्टाद्ध्यायीकारः) ।

(३०) शर्ववर्मा (कातन्त्रकारः) ।

(३१) चन्द्रगोमी (चान्द्रव्याकरणकारः) ।

(३२) क्षपणकः (क्षपणकव्याकरणकारः) ।

(३३) देवनन्दी पूज्ज्यपादो वा (दिग्वस्त्रः) (जैनेन्द्रव्याकरणकारः) ।

(३४) वामनः (विश्श्रान्तविद्द्याधरव्याकरणकारः) ।

(३५) भट्टाऽकलङ्कदेवः (अकलङ्कव्याकरणकारः)।
(३६) पाल्यकीर्तिः (जैनशाकटायनः) (जैनशाकटायनव्याकरणकारः)।
(३७) शिवस्स्वामी (शिवस्स्वामिव्याकरणकारः ?)।
(३८) भोजराजः (सरस्स्वतीकण्ठाभरणव्याकरणकारः)।
(३९) बुद्धिसागरसूरिः (पञ्चग्रन्थीकारः)।
(४०) हेमचन्द्रः (सिद्धहैमशब्दानुशासनकारः)।
(४१) भद्रेश्वरसूरिः (दीपकव्याकरणकारः)।
(४२) मलयगिरिः (मुष्टिव्याकरणकारः)।
(४३) क्रमदीश्वरः (जौमरव्याकरणकारः)।
(४४) अनुभूतिस्वरूपः (सारस्स्वतव्याकरणकारः)।
(४५) वोपदेवः (मुग्धबोधव्याकरणकारः)।
(४६) पद्मनाभदत्तः (सुपद्मव्याकरणकारः)।
(४७) रूपगोस्स्वामी (हरिनामामृतव्याकरणकारः)।
(४८) रामकिङ्करः (आशुबोधव्याकरणकारः)[1]।

इति वेदाङ्ग–शिक्षा–शास्त्रेतिहासरूप उपबन्धस् समाप्तः।

---

१. इयं सूची युधिष्ठिरमीमांसककृतसंस्कृतव्याकरणशास्त्रेतिहासग्रन्थसाहाय्येनाऽत्तर दत्ता, उल्लिखितानाँ व्याकरणकाराणाँ व्याकरणानाँ वा विषयेऽधिकञ् जिज्ञासुभिस् स एव हिन्दिभाषामयो ग्रन्थोऽवलोकनीयः। अस्य विषयस्याऽत्तर गौणत्वादस्माभिर् विस्तरो न कृतः।

अथ कौण्डिन्न्यायनशिक्षा

प्रथमोऽध्यायः

शिक्षाया उपक्रमः

१. प्रतिज्ञा

अथ शिक्षाम् प्रवक्ष्यामि शौनकादिमतानि हि ।
सम्यगालोड्य चोद्धृत्य सारन् तेभ्यो यथामति ।।१।।

२. अथ शिक्षापरिभाषा

वर्णानाञ् च स्वराणाञ् च मात्रायाः बल-साम्ययोः ।
पदान्ताद्द्योस् संहितायाः विचारो यत्र लभ्यते ।।२।।
तत्सम्बद्धाश् चाऽपरेऽपि विषया यत्र वर्णिताः ।
भवन्ति सा हि प्रथमा विद्द्या शिक्षेति भाषिता ।।३।।

अकारादीनाँ वर्णानाम्, उदात्तादीनां स्वराणाम्, मात्रायाः, स्थान-करण-प्रयत्नानाम् बलाभिधेयानाम्, उच्चारणगुणादीनां साम-साम्य-पदाभिधेयानाम्, पदान्तस्य पदादिना सह एकप्राणयोगरूपे[1] परे सन्निकर्षे सति जनितॄणाँ वर्णलोपागमविकारप्रकृतिभावाख्यपरिणामानां हेतुभूतायास् संहितायास् सन्तानाख्यायास् सन्ध्यपरपर्यायाश् च यस्यावँ विद्द्यायावँ विचारो भवति मुख्यरूपेण, यत्र चोपर्य्युक्तैर् विषयैस् सम्बद्धा अन्न्येऽपि प्रयोजनाधिकार्य्यद्ध्ययनाद्ध्यापनविद्ध्यादयो विषया वर्णिता भवन्ति सा वेदाङ्गेषु विश्श्लेषणात्मिकासु विद्द्यासु च प्रथमा विद्द्या ऋषिभिश् शिक्षेत्युक्ताऽस्तीत्यर्थः । शिक्ष्यते अनया वर्णाद्द्युच्चारणप्रकारादयो विषया इति शिक्षा[2] । तथा च तैत्ति-

---

१. वर्णानामेकप्राणयोगः संहिता–शु य.प्रा.१।५८ । २. (क) "शिक्षा शिक्ष्यतेऽनयेति वर्णाद्द्युच्चारणलक्षणम्" इति तैत्तिरीयारण्यकशीक्षाद्ध्यायव्याख्यायां शङ्करभगवत्पादः; (ख) "वर्णानां स्थान-करण-प्रयत्नादिभिर् निष्पत्तिनिर्णयिनी शिक्षाऽऽपिशलीयादिका" इति काव्यमीमांसायान् द्वितीयेऽद्ध्याये राजशेखरः;

रीयारण्यके श्रूयते– "शीक्क्षावँ व्याक्ख्यास्स्यामः। वर्णस् स्वरः। मात्त्रा बलम्। साम सन्तानः। इत्त्युक्तश् शीक्क्षाद्ध्यायः"[1] इति। यद्द्यपि "प्रथमे हि विद्द्वांसो वैयाकरणाः"[2] इति लौकिकानाम् प्रवादः, वैदिकस्स्याऽपि कस्स्य चन "पूर्वे वैयाकरणाः, एतच्छास्त्रस्स्य मूलभूतवँ व्याकरणङ्ग कृतवन्तो हि ते। अथ पूर्वे विद्द्वांस इति विद्द्वदपेक्क्षम् प्राथम्म्यन् तेषाम्। प्रथमे हि वैयाकरणा इति प्रसिद्धेः"[3] इत्त्युक्तिꝏ प्राप्प्यते, तथापि शिक्क्षैव प्रथमा वेदाङ्गविद्द्येति शास्त्रमर्मज्ज्ञाः। तथाहि पाणिनीयव्याकरणभाष्ष्यकारो "व्याकरणन् नामेयमुत्तरा विद्द्या योऽसौ छन्दश्शास्त्रेष्ष्वभिविनीतस् सोऽयमुपलब्ध्याऽधिगन्तुमुत्सहते"[4] इति वदन् व्याकरणाच् शिक्क्षाया पूर्वतामभिप्प्रैति। अथवोक्तलोकप्प्रवादगर्भस्स्थवँ व्याकरणपदयँ यौगिकमेव न यौगिकरूढमिति शिक्क्षासहितं शब्दानुशासनन् तेन व्याकरणपदेनोच्च्यते; प्रयुङ्क्ते हि पाणिनीयव्याकरणभाष्ष्यकारोऽपि व्याकरणपदं शिक्क्षापरतयाऽपि "पुराकल्प एतदासीत् सँस्कारोत्तरकालम् ब्राह्म्मणा व्याकरणं स्माऽधीयते। तेब्भ्यस् स्थानकरणनादानुप्प्रदानज्ज्ञेब्भ्यो वैदिकाश् शब्दा उपदिश्श्यन्ते"[5] इति। अत्त्र हि व्याकरणशब्दो यौगिको व्याक्रियात्मकशिक्क्षारूपशास्त्रपरस् स्थानकरणनादानुप्प्रदानज्ज्ञेब्भ्य इति वाक्क्यशेषात्। स्थानादयश् च शिक्क्षाशास्त्रविषया इत्त्यावेदितमेव श्रुतिप्प्रमणव्यपाश्श्रयात्। अथवा उक्तलोकप्प्रवादे लोके उत्कृष्टतमविद्द्वत्त्वेन प्रसिद्धत्त्वमेव प्राथम्म्यवँ वैयाकरणानाम् प्रतिपादितम् बोद्ध्यम्। एवञ् च शिक्क्षाशास्त्रस्स्य व्याकरणापेक्क्षयाऽपि पूर्वशास्त्रत्त्वे न लोकप्प्रवादस्स्यापि विरोधः। अपि च शिक्क्षया संहितानियमानुगमने कृते सति यदा वाक्क्ये पदानावँ विभागो भवति

(ग) "शीक्क्षा वर्णानां स्थानप्प्रयत्नादिकम् अद्ध्ययनकाले कर्मणि च मन्त्राणामुच्चारणप्प्रकारं शिक्क्षयतीति, पृषोदरादित्त्वाद् दीर्घः" इति आपस्तम्बधर्मसूत्रव्याक्ख्याने (२।४।२।११) हरदत्तः; (घ) "वर्ण–स्वराद्द्यच्चारणप्प्रकारो यत्त्रोपदिश्श्यते सा शिक्क्षा" इति ऋग्वेदव्याक्ख्याभूमिकायां सायणः; (ङ) शिक्क्ष्यतेऽनया वर्णोच्चारणमिति शिक्क्षा" इति पाणिनीयशिक्क्षापञ्जिकायाम्।

१. तै.आ. प्र. ७, अनु. २। २. ध्व. १।१३ (वृत्तिभागे)। ३. तै.प्रा.वै.टी. १५।९। ४. पा. व्या. भा. १।२।३२। ५. तत्त्रैव, पस्पशाह्निके।

तदेव[1] पदगतप्रकृतिप्रत्ययविभाग–पदतदर्थसम्बन्ध–पदस्वरादिप्रदर्शनात्मकम् पदद्वारक–वाक्यतदर्थसम्बन्धादिप्रदर्शनात्मकञ्च व्याकरणस्य शब्दानुशासनापरपर्यायस्य मुख्यङ्ग कारयम् प्रवर्तते इति युक्तितोऽपि व्याकरणात् पूर्वं व शिक्षाविद्द्या। ये च शब्दानुशासने प्रयोक्तव्या व्याकरणाधारभूता न्याया अन्वयव्यतिरेकनियमादिमूलास् ते शिक्षायामपि वर्णवर्गीकरणादौ संहितानियमनिर्धारणादौ च प्रयुज्ज्यन्त एवेति विश्लेषणात्मिकाया विद्द्याया अपि शिक्षैव प्रथमा प्ररोहभूरिति स्वीकर्तुयँ युज्ज्यते । अत एव आचार्यकात्यायनोऽपि शुक्लयजुर्वेदपारिषदशिक्षायां शुक्लयजुर्वेदप्रातिशाख्यापराभिधायावँ वेदाङ्गशास्त्रेषु निरतिशयवृद्धं शिक्षाशास्त्रम् पठतो वृद्धिर् भवतीत्यभिप्रायेण "वृद्धवँ वृद्धिः"[2] इति पुनःपुनर् वदति । मुण्डकोपनिषदि च शिक्षैव वेदाङ्गेषु प्राथम्येन श्रूयते[3] ॥२–३॥

३. अथ शिक्षाप्रयोजनादिनिरूपणम्

(क) शिक्षाप्रयोजनम्–

मन्त्रो[4] हीनस् स्वरतो वर्णतो वा मित्थ्याप्रयुक्तो न तमर्थमाह ।
स वाग्वज्ज्रो यजमानं हिनस्ति यथेन्द्रशत्रुस् स्वरतोऽपराधात् ॥४॥[5]

उदात्तादिना न्याय्येन स्वरेण न्याय्येन वर्णेन वाऽपि तत्त्वतो हीनोऽत एव मित्थ्याप्रयुक्तो मन्त्रो विवक्षितमर्थन् नैवाऽऽह; स एतादृशो मित्थ्याप्रयुक्तमन्त्ररूपो वाग्वज्ज्रो माद्ध्यन्दिनीय-वाजसनेयि–शतपथ-

---

१. अयवँ विषयोऽस्यैव ग्रन्थस्योपबन्धे शिक्षाशास्त्रेतिहासप्रसङ्गे विस्तरेण प्रतिपादितोऽस्ति (पृ. ६–८)। २. शु.य. प्रा. १।१६९, २।६५, ३।१५२, ४।१९७, ५।४६, ६।३१, ७।१२,८।५५ । ३. १।१।४–५ । ४. "दुष्टश् शब्दः" इति पाणिनीयव्याकरणभाष्ये पस्पशाह्निके पठ्यते । "एवञ् च मन्त्रशब्दश् शब्दमात्रपरो बोद्ध्यः" इति तत्र नागोजिभट्टः । "दुष्टश् शब्द इत्यत्रापि बहुजनप्रसिद्धशिक्षाकारपठितमन्त्रपदोद्धारेण शब्दपदम् प्रक्षिपता स्वपक्षानुरागो दर्शितः । दुष्टमन्त्रप्रयोगेत्विष्यत एव यजमानस्य प्रत्यवायः" इति तु तन्त्रवार्तिके व्याकरणाऽधिकरणपूर्वपक्षे कुमारस्स्वामी (कुमारिलभट्टः) (पृ.२०२)। ५. पा. व्या. भा. (पस्पशाह्निके), पा. शि. श्लो. ५२, चा. शि. पृ. २३, ना. शि. १।१।५ ।

ब्राह्म्मणादौ "इन्द्रशत्त्रुर्व्वर्द्धस्स्व"[1] इति वाक्ये श्रुत इन्द्रशत्त्रुशब्द इन्द्रस्स्य शातयितुः प्रतिपिपादयिषया तत्पुरुषत्वेनाऽन्तोदात्ततत्वेन विवक्षितोऽपि प्रमादात् स्वरव्यत्यासेन आद्द्युदात्तत्वेन बहुव्रीहिरूपेण प्रयुक्तस् सन् प्रतिपिपादयिषितमर्थम् परित्यज्य इन्द्रश् शातयिता यस्स्य स इत्यर्थको भूत्वा यथा इन्द्रद्द्वारा त्वष्टुः पुत्त्रवँ वृत्त्रं हतवान्,[2] तेन हननेन च यजमानन् त्वष्टारम् चोपहतवान् तथैव यजमानं हिनस्तीत्यर्थः । तथा चाऽन्न्यत्त्राऽपि–"यद्ध वाऽ अत्त्राऽग्गँ निहोत्त्रम् जुह्वद्द्वाद्द्येन वा कर्म्मणा वा मित्थ्या करोत्त्यात्मनस्त्तदवद्द्यत्त्यायुषो वा वर्च्चसो वा प्प्रजायै वा"[3] इति । वाद्द्येन=व्याहारसाद्ध्येन मन्त्रोच्चारणेनेति च तत्त्र सायणव्याक्ख्या । अन्न्यच् च 'प्रहीणस् स्वरवर्णाब्भ्यायँ यो विमन्त्रः प्रयुज्यते । यज्ञेषु यजमानस्स्य रुषत्त्यायुः प्रजाम् पशून्"[4] इति । अपि च– "अशुद्धपठनाच् चैव नैव मोक्षम् प्रपेदिरे । तस्मात् सर्वप्रयत्नेन शुद्धपाठी भवेन् नरः । अन्न्यथा नरकयँ याति कुम्भीपाकं सुदारुणम्"[5] इति विद्द्वांसो वदन्ति । वैद्द्येकेऽपि "मन्त्रास् स्वविधिना प्प्रोक्ता हीना वा स्स्वरवर्णतः । यस्मान् न सिद्धिमायान्ति तस्माद् योज्ज्योऽगदक्करमः"[6] इति ॥४॥

गुरुत्वलँ लघुता साम्म्यं ह्रस्स्वदीर्घप्प्लुतानि च ।
लोपागमविकाराश् च प्रकृतिर् विक्करमः करमः ॥५॥
स्वरितोदात्तनीचत्त्वं श्वासो नादोऽङ्गमेव च ।
एतत् सर्वन् तु विज्ज्ञेयञ् छन्दोभाषामधीयता ॥६॥[7]

स्वरस्स्याऽक्षरस्स्य वा गुरुत्वम्, वर्णोच्चारणे प्रयत्नस्स्याऽऽधिक्क्यवँ वा गुरुत्वाक्ख्यम्; स्वरस्स्याऽक्षरस्स्य वा लघुत्वम्, वर्णोच्चारणे प्रयत्नस्स्य शैथिल्ल्यवँ वा लघुत्वाक्ख्यम्; अक्षरपदवाक्याद्द्युच्चारणे यद् वृत्तेस् साम्म्ययँ यच् च माधुर्यादिपाठगुणयोगित्वन् तद्द्रूपं साम्म्यम्, वर्णोच्चारणे स्थानकरणप्रयत्नानायँ यथौचिति उपयोजनवँ वा साम्म्याक्ख्यम्; ह्रस्स्व-

---

१. १।६।३।८; तै.सं. २।५।२।१ । २. मा. वा. श. ब्रा. १।६।३।१० । ३. तत्त्रैव २।३।४।१८ । ४. ना. शि. १।१।६ । ५. पारा. शि. श्लो. ११३–११४ । ६. सुश्श्रुतसंहितायाङ्ग कल्पस्थाने ५।१३ । ७. तै. प्रा. २४।५; ऋ. प्रा. ब. १।५–६ (अत्त्र 'श्वासो नादस् तथोभयम्' इति पाठः) ।

त्वम्, दीर्घत्वम्, प्लुतत्वम्, संहिताजन्यो वर्णलोपो वर्णागमो वर्णविकारो वर्णप्रकृतिभावश् च; अविकृतालुप्तविसर्गविशेषस् स्वरविशेषो वा विक्रमाख्यः, वर्णानान् द्वित्वञ् क्रमाख्यम्, स्वरितत्वम्, उदात्तत्वम्, अनुदात्तत्वम्, श्वासप्रधानो विवारादिप्रयत्नसमूहः, नादप्रधानस् सवँवारादिप्रयत्नसमूहः, सयँयुक्तानावँव्यञ्जनानाम् पूर्वाक्षराङ्गभावः पराक्षराङ्गभावो वेति एतत् सर्वञ् छन्दोभाषां संस्कृताख्यावँ वेदभाषामधीयता विशेषेणाऽवश्यवँ वेदितव्यम् इत्यर्थः। अपि चाऽऽहुः "स्वरो वर्णोऽक्षरम् मात्रा दैवयँ योगार्षमेव च। मन्त्रञ् जिज्ञासमानेन वेदितव्यम् पदेपदे"[1] इति। दैवन् देवता। योगो विनियोगः। आर्षम् ऋषिः। स्वार्थिकोऽण् नपुंसकत्वञ् चेति द्वितयमेवाऽऽर्षम्। सायणेन तु द्वितीयः पादो "विनियोगोऽर्थ एव च" इति पठितः। तस्याऽर्थस् स्फुट एव। अमरेशेन च वर्णरत्नप्रदीपिकायां शिक्षायान् द्वितीयः पादस् "तत्प्रयोगोऽर्थ एव च" इति पठितः ॥५-६॥

जपादिशुभकार्येषु पुमान् नाऽधिकृतो भवेत्।
सम्यक्पाठवँ विना यस्मात् तस्माच् शिक्षाम् पठेद् बुधः॥७॥[2]

शुद्धपाठसामर्थ्येन रहितः पुरुषो महद्भिर् विज्ञैर् यजमानैर् जपादौ धर्मकार्येऽधिकृतो न भवेत्, स्वीयेष्वपि जपादिषु धर्मकार्येषु स्वयमपि नाधिकारी स्यात्, 'स्वरवर्णपदैर् वाक्यं शुद्धमावर्तयेज्

---

१. शुक्लयजुर्वेदप्रातिशाख्य-व्याख्यायामुव्वटेनाऽनन्तभट्टेन च (१।३४), ऋग्वेदप्रातिशाख्यवर्गद्वयव्याख्यायामुपोद्घाते विष्णुमित्तरेण, ऋग्वेदव्याख्याभूमिकान्ते सायणेन, वर्णरत्नप्रदीपिकायाममरेशेन (श्लो. ८), पाणिनीयशिक्षाप्रकाशे चोद्धृतमिदं स्मृतिवचनम्। शिक्षाप्रकाशे (शि. स. पृ. ३८६) इदम् बृहद्देवतास्थं वचनमित्युक्तम्, किन् तु मुद्रितायाम् बृहद्देवतायामिदवँ वचनन् नोपलभ्यते। २. "जपादौ नाऽधिकारोऽस्ति सम्यक्पाठमजानतः। प्रातिशाख्यमतो ज्ञेयं सम्यक्पाठस्य सिद्धये" इति शुक्लयजुर्वेदप्रातिशाख्यभाष्यारम्भे उव्वटः। अनन्तस् तु इदवँ वचनम् प्रातिशाख्यस्यैवेतीव व्याख्याति। "जपादिशुभकार्येषु पुमान् नाऽधिकृतो भवेत्। सम्यक्पाठवँ विना यस्मात् तन्निमित्तवँ वदाम्यहम्" इति तु वर्णरत्नप्रदीपिकायां शिक्षायाम् पाठः, श्लो. ४।

जपन् । न कम्पयेच् छिरो ग्रीवान् दन्तान् नैव प्प्रदर्शयेत्"[1] इति विशेषेण विधानात्; शुद्पाठसामर्थ्यञ् च वेदादिविषये भूम्ना शिक्क्षाशास्त्राद्ध्ययनायत्तम्; अत आर्त्विजीनस् स्यामिति च द्विजाग्ग्रचश् शिक्क्षाम् पठेदित्त्यर्थः । शब्दानुशासनप्रयोजनप्रतिपादनावसरे पाणिनीयव्याकरणभाष्ये च "यो वेमाम् पदशस् स्वरशोऽक्क्षरशो वाचवँ् विदधाति स आर्त्विजीनो भवति"[2] इति पट्ठ्यते । स्वरशोऽक्क्षरशश् च वाचस् सम्म्यक् सम्पादनञ् च शिक्क्षाशास्त्राद्ध्ययनाधीनमेव । अत आर्त्विजीनत्त्वं स्वस्स्य कामयमानैश् शिक्क्षाशास्त्रमद्ध्येतव्यमेव । एकस्स्याऽपि शब्दस्स्य सम्म्यग्ज्ञानपूर्वकश् शास्त्रानुसारी प्रयोगस् स्वर्ग्यो भवतीति विज्ज्ञायाते । तथाहि पाणिनीयव्याकरणभाष्यकार× पठति "एकश् शब्दस् सम्म्यग्ज्ञातस्श् शास्त्रान्न्वितस् सुप्प्रयुक्तस् स्वर्गे लोके कामधुग् भवति"[3] इति । शब्दस्स्य सम्म्यग् ज्ञानञ् च तत्-स्वर-वर्णाऽऽनुपूर्वीज्ज्ञानपूर्वकमेव भवति, स्वरवर्णानुपूर्व्यास् सम्म्यग् ज्ञानञ् च स्वर-वर्ण-सम्म्यग्ज्ञानाधीनम्, स्वर-वर्ण-सम्म्यग्ज्ञानञ् च शिक्क्षाशास्त्रायत्तमित्त्यतिरोहितम् । अक्क्षरसमाम्नायसम्म्यग्ज्ञान-माहात्म्यमपि शास्त्रेषु प्रतिपाद्द्यते । तथाहि कात्त्यायनवचनम् "एते पञ्चषष्ट्टिवर्णाब्ब्रह्म्मराशिरात्मवाचः"[4] इति । पाणिनीय-व्याकरणवार्तिककारोऽपि "वर्णज्ज्ञानवँ् वाग्विषयो यत्तर ब्रह्म्म च वर्त्तते"[5] इति । तद्भाष्यकारोऽपि "सोऽयमक्क्षरसमाम्नायो वाक्समाम्नाय× पुष्पित× फलितश् चन्द्रतारकवत् प्रतिमण्डितो वेदितव्यो ब्रह्म्मराशिः । सर्त्रवेदपुण्यफलावाप्तिश् चाऽस्स्य ज्ज्ञाने भवति, मातापितरौ चाऽस्स्य स्वर्गे लोके महीयेते"[6] इति । ऋक्तन्त्रारम्भेऽपि "इदमक्क्षरञ् छन्दोवर्णशस् समनुक्क्रान्तम् । यथाऽऽचार्या ऊचुर् ब्रह्म्मा बृहस्पतये प्रोवाच बृहस्पतिरिन्द्रायेन्द्रो भारद्द्वाजाय भारद्द्वाज ऋषिब्भ्य ऋषयो ब्राह्म्मणेब्भ्यस् तङ खल्विममक्क्षरसमाम्नायमित्त्याऽऽचक्क्षते । न भुक्त्वा न नक्तम् प्रब्ब्रूयाद् ब्रह्म्मराशिरिति च ब्ब्रह्म्मराशिरिति च"[7] इति । अत्तरा-

---

१. स्मृतिचन्द्रिकायां (१।१४६) शङ्खवचनत्त्वेनोद्धृतमेतद् वचनम् । २. पा. व्या. भा. (पस्पशाह्न्निके)। ३. तत्तरैव ६।१।८४ । ४. शु. य. प्रा. ८।१५ । ५. पा. व्या. भा., प्रत्त्याहाराह्न्निके श्लोकवार्तिकम् । ६. तत्तरैव भाष्यम् । ७. ऋक्तन्त्रे १।४ ।

ऽक्षरसमाम्नायो वर्णसमाम्नायश्च चेति समानार्थकौ शब्दौ। वर्णानालँ लाक्षणिकङ्[1] क्वाचित्कम् पारिभाषिकवँ[2] वाऽक्षरत्वमिति पाणिनीयव्याकरण–वार्तिक–भाष्य–तद्व्याख्यानादौ स्फुटम्। शिक्षाविहिताऽक्षरादिलक्षणवत्पदवाक्यादियुतऋग्यजुषाऽऽदद्यु च्चारणस्य माहात्म्यं रामायणादावपि प्रतिपादितम्; तथाहि "आहृव्वयाञ्चक्रिरे तत्र शक्रादीन् विबुधोत्तमान्। ऋष्यशृङ्गादयो मन्त्रैश् शिक्षाऽक्षरसमन्वितैः"[3] इति; "षण्मासाँश् चतुरो वेदान् सम्बभाषे बृहस्पतिः। ब्रह्ममणो वितते यज्ञे परया ब्रह्मसम्पदा। शिक्षाक्षरसमेताया मधुरायास् समन्ततः। सानुस्वरितरामायास् सरस्वत्याऽ प्रभाषते"[4] इति; "त्रिषष्टि–वर्णसयँ युक्तमष्टस्थान–समीरितम्। वाचयेद् वाचकस् स्वस्थस् स्वाधीनस् सुसमाहितः"[5] इति; "स्वरवर्णपदैर् वाक्यं शुद्धमावर्तयेज् जपन्। न कम्पयेच् छिरो ग्रीवान् दन्तान् नैव प्रदर्शयेत्"[6] इति च। ॥७॥

ऋक्सामयजुरङ्गानि ये यज्ञेषु प्रयुञ्जते।
अविज्ञानाद् धि शास्त्राणान् तेषाम् भवति विस्स्वरः ॥८॥[7]

ननु शिक्षाशास्त्राद्ध्ययनवँ विनाऽपि शुद्धमुच्चारणङ्कर्तुं शक्यते सम्म्यगाम्नानादित्याऽऽशङ्क्येतेत्याह–ऋक्सामेत्यादि। अतिप्राचीनानि अनादीन्न्येव वा दुर्ग्रहस्वरूपाणि स्वाभाविकाऽपवभ्रंशरूपमातृभाषोच्चारणाब्भ्यासशिथिलया जिह्वया सुखेन प्रयोक्तुमशक्यानि खलु ऋग्–यजुस्–साम–निवित्–प्रैष–विधि–पद्धति–सङ्कल्पादिवाक्यरूपाणि गीर्वाणवाणीवाक्यानि येऽपूर्वफलकेषु यज्ञेषु प्रयुञ्जते तेषां

---

१. पाणिनीयव्याकरणभाष्यप्रत्याहारान्निकान्तस्थस्य 'अक्षरन् न क्षरवँ विद्द्यात्' इति श्लोकवार्तिकस्य प्रदीपे "तच्च (अक्षरम्) ब्रह्ममतत्त्वम् परमार्थतो नित्यम्। व्यवहारनित्यतया तु वर्ण–पद–वाक्यस्स्फोटानाञ् जातिस्स्फोटस्य वा" इति, तत्रैवोद्द्योते च "एवञ् च शब्दे औपचारिकोऽक्षरपदप्रयोग इति भावः" इति। २. तत्रैव "वर्णवँ वाऽऽहुऽ पूर्वसूत्रे" इति वार्तिकन् तद्भाष्यञ् च विचारणीयम्। ३. वा. रा. १।१४।८। ४. हरिवंशे भविष्यपर्वणि २३।१४-१५। ५. तत्रैव भविष्यपर्वणि १३२।२२। ६. शङ्खस्मृतिवचनम् (स्मृतिचन्द्रिकायाम् १।१४९)। ७. ना. शि. १।१।४।

शिक्क्षाशास्त्रज्ज्ञानाभावे सति उक्तप्प्रकारकेषु गीर्वाणवाणीवाक्क्येषु तैः प्रयुक्तेषु विस्स्वरत्त्वादिको दोषोऽदोषज्ज्ञैः परिहर्त्तुमशक्क्यः कथमपि कुतोऽपि कियताऽप्प्यंशेनाऽपि प्रविशत्येवेति तत्परिहाराय तैश् शिक्क्षाशास्त्रवँ विशेषेण ज्ञेयमेवेत्त्यभिप्प्रायः। दुस्तरो हि खलु मन्त्रादिसागरः; आह च "संहितासारबहुलः पदसञ्ज्ञासमाकुलः। क्रमसन्धिसमाकीर्णो दुस्तरो मन्त्रसागरः।"[1] इति ॥८॥

शिक्क्षायँ यो न विजानाति देववाङ्मयरूपिणाम्।
अद्ध्यापने च शास्त्राणान् न स योग्ग्यो भवेद् द्विजः ॥९॥[2]

यश् शिक्क्षावँ विशेषेण न जानाति स द्विजाग्ग्र्यो ऽपि सन् अद्ध्याप्प्यशास्त्रार्थतत्त्वञ् जानन्नपि गीर्वाणवाणीनिबद्धानाम् अत एवोत्कर्षविशेषम् प्राप्तानान् दृष्टफलकानामपि शास्त्राणामद्ध्यापने योग्ग्यो भवितुन् नैव शक्नुयादित्त्यर्थः। न हि दोषज्ज्ञा नियोजका अविज्ज्ञातशिक्क्षाशास्त्रम् पुरुषङ्ग गीर्वाणवाणीनिबद्धशास्त्राद्ध्यापने नियोक्क्ष्यन्ति गीर्वाणवाणीमप्प्ययमपब्भ्रंशीकरिष्ष्यत्त्युच्चारणदोषैर् विनेयांश् च तज्जन्न्यैः कुसँस्कारैर् योजयिष्ष्यतीति भयादिति भावः ॥९॥

वेदस्याऽद्ध्ययनाद् धर्मस् सम्प्रदानात् तथा श्रुतेः।
वर्णशोऽक्क्षरशो ज्ज्ञानात् पदशो वाक्क्यशोऽपि च ॥१०॥[3]

वेदस्याऽद्ध्ययनाद् अद्ध्यापनाच् श्रवणाद्; वेदस्य वर्णानाम्, अक्क्षराणाम्, पदानावँ वाक्क्यानाञ् चैकैकशो ज्ज्ञानङ् कृत्त्वा वेदस्य ज्ज्ञानाच् च धर्मः कृतो भवतीत्त्यर्थः। अन्न्यच् चोच्च्यते—"ज्ज्ञाने"[4]

---

१. या.शि. श्लो. २८–२९। २. तुलना कार्या "रहस्स्यँ यो न जानाति लक्क्षणञ् चार्षकादिकम्। सोऽद्ध्यापने न योग्ग्यस् स्याज् जपहोमादिकर्मसु"—व.प्र.शि. श्लो. २२६। ३. (क)शु.य. प्रा. ८।२७, तत्त्र 'विभक्तिपदशोऽपि च' इति चतुर्थचरणपाठो युगलकिशोरपाठकसम्पादिते सँस्करणे, तत्त्राऽस्स्योत्तरार्धस्स्यैव प्रातिशाक्ख्यसूत्त्ररूपेण मुद्द्रणन् दृश्श्यते, भाष्ष्यद्द्वययुते मद्द्रासस्सँस्करणे तु इदम् भाष्ष्यान्तर्गतत्त्वेन मुद्द्रितमस्ति। जीवानन्दसँस्करणेऽप्प्यस्स्य मुद्द्रणयँ युगलकिशोरपाठकसँस्करणवत्। ४. शु. य. प्रा. ८।२० युगलकिशोरपाठकसँस्करणे, मद्द्राससँस्करणे तु ८।२९ (अष्टमाद्ध्यायसूत्त्रसङ्ख्यायायँ युगलकिशोरपाठकसँस्करणे मद्द्राससँस्करणे च महदन्तरमस्ति, जीवानन्दसँस्करणे तु युगलकिशोरपाठकसँस्करणवदेवाऽष्टमाद्ध्यायसूत्त्रसङ्ख्या बोद्ध्या)।

"पौरुष्यम्"[१] "स्वर्ग्यम्"[२] "यशस्यम्"[३] "आयुष्यम्"[४] इति। महद्धि पुण्यवेद-सम्पाठ-पठन-मात्रेणाऽपि भवतीति वदन्ति। तथा हि—"ऋक्संहितान् त्रिरभ्यस्य यजुषाञ्च समाहितः। साम्नावा वा सरहस्याञ्च सर्वपापैः प्रमुच्यते॥ संहिता नयते सूर्यम् पदञ्च शशिनः पदम्। क्रमश्च नयते सूक्ष्मयत् तत् पदमनामयम्॥ कालिन्दी संहिता ज्ञेया पदमुक्ता सरस्वती। क्रमेणाऽवर्तिता गङ्गा शम्भोर् वाणी तु नाऽन्यथा॥ यथा महाह्रदम् प्राप्य क्षिप्तो लोष्टो विनश्यति। एवन् दुश्चरितं सर्ववेदे त्रिवृति मज्जति"[५] इति, "वेदमेव सदाऽभ्यस्येत् तपस् तप्स्यन् द्विजोत्तमः। वेदाभ्यासो हि विप्रस्य तपः परमिहोच्यते"[६] इति च। वेदस्य वर्णशोऽक्षरशश्च ज्ञानङ्कार्त्स्न्येन शिक्षाशास्त्रायत्तम्। पदस्य वाक्यस्य च व्यवस्था प्रायस् स्वरायत्ता, स्वरज्ञानञ्च शिक्षाशास्त्रमूलमिति धर्मार्थिना द्विजेन शिक्षाऽध्येतव्यैवेति भावः। अपि च वेदस् साङ्ग एवाऽध्येतव्य इति वेदाङ्गभूता शिक्षाऽप्यध्येयैव। आहुर् हि—"छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते। ज्योतिषामयनञ्चक्षुर् निरुक्तं श्रोत्रमुच्यते। शिक्षा घ्राणन् तु वेदस्य मुखवा व्याकरणं स्मृतम्। तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते।"[७] इति; "छन्दः पादौ ज्योतिषन् नेत्रयुग्मं हस्तौ कल्पश् श्रोत्रयुग्मन् निरुक्तम्। शिक्षा घ्राणवा व्याकरणन् तथाऽऽस्यवा वेदात्मने विष्णवेऽस्मै नमोऽस्तु॥ विष्णुं षडङ्गेन्द्रियमादिदेववा वेदात्मानम् पुरुषवा विश्वरूपम्। सञ्चिन्त्य देवम् पठते द्विजो यस् स याति विष्णोः परमम् पदन् तत्"[८] इति च। अपि चाऽऽहुः "ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश् च"[९] इति। षट्सु चाऽङ्गेषु शिक्षैव प्रथमा प्रधानभूता च। तथा हि "द्वे विद्ये वेदितव्ये इति ह स्म यद् ब्रह्मविदो वदन्ति परा चैवाऽपरा च। तत्राऽपरा ऋग्वेदो यजुर्वेदस् सामवेदोऽथर्ववेदश् शिक्षा कल्पो व्याकरणन् निरुक्तञ् छन्दो ज्योतिषमिति। अथ परा यया तदक्षरमधिगम्यते।"[१०] इति शिक्षैवाऽङ्गेषु प्राथम्येन श्रूयते।

---

१. शु.य.प्रा.८।२१ यु., ८।३० म.। २. तत्रैव ८।२२ यु., ८।३१म.। ३. तत्रैव ८।२३ यु., ८।३२ म.। ४. तत्रैव ८।२४ यु., ८।३३ म.। ५. या. शि. श्लो. २९-३३। ६. मनु. २।१६६। ७. च. व्यू. यजुर्वेदखण्डे। ८. शं. शि. श्लो. १६५-१६६। ९. पा. व्या. भा. पस्पशाह्निके। १०. मु. उ. १।१। ४-५।

प्राधान्यमूलकमेव च प्राथम्यम् भवितुमर्हति । अपि च शिक्षया वेदस्य स्वरवर्णानुपूर्व्यास् सुरक्षणे कृते एव वेदस्स्वरूपमवधृतं स्याद्, वेदस्स्वरूपेऽवधृते सत्त्येव च तत्प्रयोगाय तदर्थज्ञानाद्द्वयर्थञ् च कल्प- व्याकरण- निरुक्तादीन्यङ्गानि प्रवर्तेरन्, वेदस्स्वरूपे एवाऽनवधृते तु "छिन्ने मूले नैव शाखा न पत्तरम्" इति न्याय एव चरितार्थस् स्यात् । एवञ् च वेदस्स्वरूपस्याऽवधारणं रक्षणञ् च भूम्ना शिक्षाशास्त्रायत्तमिति वेदाङ्गेषु शिक्षायाऽ प्राधान्यं स्फुटम्। अत एव शिक्षामाहात्म्यप्रदर्शने शौनकशिक्षायावँ "वेदो हि वर्णसङ्घातो वेदो ब्रह्ममेति कीर्त्यते।तस्मात् तद्वेदवर्णज्ञो ब्रह्ममलोके महीयते।।एतत् पुण्यम् पापहरवँ वाङ्मलस्य विशोधनम् । भक्त्या ज्ञात्वा च सङ्गृह्य ब्रह्ममलोकं स गच्छति ।। अनेन विधिना वेदयँ योऽधीते श्रद्धयाऽन्वितः । सर्वपापैर् विमुक्तस् सन् ब्रह्ममलोके महीयते।।"[1] इत्युक्तम् । अत एव चाऽर्थज्ञानप्रधानत्वादुपनिषदो ग्रन्थपाठे यत्नोपरमो मा भूदिति तैत्तिरीयास् तेषामारण्यकोपनिषदऽ प्रारम्भेऽ पि शीक्षाद्ध्यायमधीयते[2] । कर्मकाण्डे स्वरादिकृतवँ वैगुण्यम् प्रायश्चित्तादिनाऽपि परिमार्ष्टुं शक्यतेऽपि, ज्ञान-काण्डे तु स्वरादि-वैशिष्ट्या-ऽवबोध-रहितैरन्यथा-ऽर्थग्रहणे कृते सति नैव सम्भवति प्रायश्चित्तादिना तत्-समाधानं सम्यग्ज्ञानमूलकत्वाच् चतुर्थस्य पुरुषार्थस्य मित्थ्याज्ज्ञानेन तस्य कथमपि लब्धुमशक्यत्वादिति[3] समुचितमेवोपनिषदऽ प्रारम्भेऽपि शीक्षाद्ध्यायाऽद्ध्ययनम् ।।१०।।

द्वे ब्रह्ममणी वेदितव्ये शब्दब्रह्मम परञ् च यत् ।
शब्दब्रह्ममणि निष्णातऽ परम् ब्रह्ममाऽधिगच्छति ।।११।।[4]

शब्दब्रह्मम परम् ब्रह्मम चेति द्वे एव ब्रह्ममणी वेदितव्ये त्रिवर्गार्थम् मोक्षार्थञ् च पुरुषार्थसिद्धिञ् कामयमानैर् द्विजैः । तत्रापि शब्दब्रह्ममणि निष्णातऽ परम् ब्रह्ममाऽधिगच्छतीति प्रथमं शब्दब्रह्ममैव वेदाख्यमुपायरूपवँ वेदितव्यमिति भावः । परम् ब्रह्मम च वेदैकगम्यम् "तन् त्वौपनिषदम् पुरुषम् पृच्छामि"[5], "ना-

---

१. श्लो.६५,६६,६७ । २. तै.आ. ७।२, (शङ्करभगवत्पादकृता व्याख्या दृश्या) । ३.तत्रैव सायणकृता व्याख्या दृश्या । ४. मै. उ. ५।२२, म. भा.शा. प. २३२।३०, २७०।१-२ । ५. मा. वा. बृ. उ. ३।९।२८।

ऽवेदविन् मनुते तम् बृहन्तन् "[१] "यदा चर्मवदाकाशवँ वेष्टयिष्यन्ति मानवाः । तदा देवमविज्ज्ञाय दुःखस्यान्तो भविष्यति "[२] इत्यादिब्भ्यश् श्रुतिब्भ्यो युक्तितश् च । ये तु शब्दब्रह्म स्वप्रधानम् मन्यन्ते ते त्वागमार्थप्रतिपत्तिवन्ध्या आत्महनो जना अनुकम्पनीया आगमार्थसतत्त्वप्रकाशनेन । "अनादिनिधनम् ब्रह्म शब्दतत्त्वयँ यदक्षरम् । विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः "[३] इत्यत्तराऽपि अनादिनिधनं शब्दतत्त्वम् ब्रह्म वेदरूपमेव, " अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा । आदौ वेदमयी नित्या यतस् सर्वाः प्रवृत्तयः "[४], " सर्वेषान् तु स नामानि कर्माणि च पृथक्पृथक् । वेदशब्देब्भ्य एवादौ पृथक् सँस्थाश् च निर्ममे "[५] । " स भूरिति व्याहरत् स भूमिमसृजत् "[६] "शब्द इति चेन् नाऽतः प्रभवात् प्रत्यक्षानुमानाब्भ्याम् "[७] इत्यादिवचनानुकूलम् जगत्प्रक्रियाहेतुभूतवँ वेदरूपमेव शब्दब्रह्मऽत्तर निर्दिष्टमिति बोद्ध्यम् । अथवा औपनिषदम् परम् ब्रह्मैव अनादिनिधनमित्यादिनोक्तम् । तस्य वेदशब्दोपग्राह्यतया विवर्तावस्थायां शब्दोपग्राहितया वा तदेव शब्दतत्त्वमित्युच्यते । तथा च श्रुतिः " तन् त्वौपनिषदम् पुरुषम् पृच्छामि "[८] इति, "वाचारम्भणवँ विकारः "[९] इति च । " प्राप्त्युपायोऽनुकारश् च तस्य वेदो महर्षिभिः । एकोऽप्यनेकवर्त्मेव समाम्नातः पृथक्पृथक् "[१०] इत्युत्तरो ग्रन्थोऽपि अस्मिन्नेव पक्षे सुसङ्गतो भवति । औपनिषदम् परम् ब्रह्मैव कयाचिद् विवक्षया शब्दब्रह्मेत्युच्यते तर्हि उच्यताम्, औपनिषदब्रह्मप्रतिपादनद्वारा वैयाकरणानां स्वप्रधानम् ब्रह्म तु शब्दब्रह्माख्यन् नैवाऽभिप्रेयते वेदवादिभिर् वैयाकरणैः । वेदार्थव्यञ्जनमात्तर-परत्वेन वेदाङ्गम्, परब्रह्मप्राप्ति- सोपान-पर्वणाम् प्रथमपदस्थानमेव हि व्याकरणमभिप्रयन्ति वैदिका वैयाकरणाः । एवं हि आह– "आसन्नम् ब्रह्ममणस् तस्य तपसामुत्तमन् तपः । प्रथमन् छन्दसामङ्गमाहुर् व्याकरणम् बुधाः "[११] इति, " इदमाद्द्यम् पदस्थानं सिद्धिसोपान-पर्वणाम् । इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः "[१२]- इति च । प्रथममुत्तमम् । यदि तु स्थूलशब्दविचारेण शब्दोपाधिकचिद्विशेषरूपस्य ज्योतिषो विचारे प्रवृत्तिः, ततश् च निरुपाधिकस्य

---

१. तै.ब्रा.३।१२।९।७। २.श्वे.उ.६।२०। ३.वा.प.१।१। ४.शा.मी.भा. १।३।२८,(म.भा.१२।२३२।२५)। ५.मनु.१।२१। ६.तै.ब्रा.२।२।४।२(द्र.मा. वा.श.ब्रा.२।१।४।११)। ७.ब्र.मी. १।३।२८। ८.मा.बृ.उ.३।९।२८। ९.छा. उ.६।४।१-४। १०. वा.प. १।५। ११. वा.प.१।११। १२.तत्रैव १।१६।

प्रत्यगात्माभिन्नस्य चिद्रूपस्य परब्रह्मणो विचारे प्रवृत्तिरितीयवँ वैयाकरणानावँ विलक्षणा ब्रह्मप्राप्तिराजपद्धतिरिति कश्चिद् ब्रूयात् तदा तदनिराकरणीयमेव; अशनायापिपासयोर् विचारेणाऽपि ब्रह्मणऽ प्राप्तिन् दर्शयति चेच् श्रुतिः[1] किमिति न सम्भवेद् ब्रह्मणऽ प्राप्तिर् वाचो विचारेणेति । एवञ् च– "इह जगति हि सर्व एव जन्तुर् निरतिशयं सुखमुत्तमम् ममाऽस्तु । उपरमतु तथोपघातरूपवँ विषयजदुऽखमिति स्स्पृहाङ्ग करोति ।। निरतिशयसुखञ् च दुऽखजातव्युपरमणञ् च वदन्ति मोक्षतत्त्वम् । उभयमपि जनोऽभिवाञ्छतीति स्स्फुटतरमस्ति सदाऽस्य मोक्षवाञ्छा"[2] इति सर्वस्स्येष्टम् मोक्षलँ लिप्सुना द्विजेन वेदो वेदितव्यः, वेदस्स्वरूपज्ज्ञानाय च शिक्षाशास्त्राद्ध्ययनसहितवँ वेदाद्ध्ययनङ्ग कर्तव्यमेवेति शिक्षाऽद्ध्येतव्यैवेति भावः । पुराकल्पे तु शिक्षा-व्याकरणाद्ध्ययनपूर्वकं हि वेदाद्ध्ययनङ्ग क्रियते स्स्म । तदाह पाणिनीयव्याकरणभाष्यकारः- "पुराकल्प एतदासीत् सँस्कारोत्तरकालम् ब्राह्मणा व्याकरणं स्माऽधीयते, तेभ्यस्स्थान-करण-नादानुप्रदानज्ज्ञेभ्यो वैदिकाश् शब्दा उपदिश्यन्ते"[3] इति । अत्तर च व्याकरणपदं शिक्षाशास्त्रमपि वरोडीकरोति इति विज्ज्ञायते वाक्यशेषादिति चोक्तमेव । मोक्षार्थिभिरुपनिषदद्ध्ययनशीलैरपि शिक्षा शीलनीयैवेति तैत्तिरीयश्रुत्यभिप्रायश् च पूर्वश्लोकव्याख्याने प्रकाशित एव ।।११।।

लक्षणन् न त्यजेद् धीमान् सम्प्रदायोऽन्यथा भवेत् ।
लक्षणेन विना शिष्यसम्प्रदायो विनाशवान् ।।१२।।[4]

ननु सम्प्रदाय एव मुख्यः, आतश् च सुसम्प्रदायस्य दाने ग्रहणे च महान् यत्नऽ कार्य इत्त्येव युक्तम्; उच्च्यते च "आगमङ्ग कुरु यत्नेन करणं हि तदात्मकम्"[5] इति । करणं शिक्षादिरूपलँ लक्षणशास्त्रम् । अन्न्येऽपि "वेदान् नो वैदिकाश् शब्दास् सिद्धा लोकाच् च लौकिकाः"[6] इत्त्याहुः। तत् किन्नु शिक्षाशास्त्राद्ध्ययनस्स्येयमतिप्रशंसा क्रियते इति मन्दैराशङ्क्येतेत्त्युच्च्यते- **लक्षणन् न त्यजेदित्त्यादि** । प्रतिपाद्द्यप्रतिपादकयोर् आलस्स्याच् शिक्षणाभ्यासादिमान्याद्

---

१. छा.उ. ६।८।३। २. सङ्क.शा. १।६६-६७। ३. पा. व्या. भा. पस्पशाह्न्निके । ४ अमो.शि.श्लो. १२३। ५. या.शि. श्लो. ३८ । ६. पा. व्या. भा. पस्पशाह्न्निके ।

वृत्तिकार्श्याद् अशक्तेर् देशश्यमातृभाषादिप्रभावाच् च सम्प्रदायोऽन्यथा भवितुमपि शक्नोति, सम्प्रदायप्रतिकञ्चुकत्वाय च लक्षणमाश्रयणीयमिति मतिबुद्धिप्रज्ञाधृतिमान् पुरुषो लक्षणन् न त्यजेद्, यतो हि लक्षणप्रतिकञ्चुकरहितश् शिष्येभ्यो दीयमानस् सम्प्रदायो नित्यमतिशयेन च विकारेण युज्यते इति । अतोऽत्र क्रियमाणा शिक्षाप्रशंसा न्यूनैव, अतोऽप्यधिकाम् प्रशंसामर्हति शिक्षा, भूतार्थवादरूपेणैवात्र विञ्चिदुक्तमिति भावः । अत एव च लक्षणाऽद्ध्ययनस्य माहात्म्यं साधु प्रतिपाद्द्यते व्यासशिक्षायाम् – "लक्षणेन विनाऽद्ध्याययँ यः पठेदपि सर्वदा । नैव तत्फलमाप्नोति स विप्रस् सुजनोऽपि हि"[1] इति । भ्रष्टस्यापि सम्प्रदायस्यैव प्रामाण्ये तु शिक्षाशास्त्रवँ व्यर्थमेव स्यात्; न च व्यर्थमेव, वेदसम्मतत्वाद्[2] वेदोक्ततत्वाच्[3] च । अद्द्यतत्वे तु वेदसम्प्रदायज्ञता सर्वथा शिक्षाशास्त्रायत्तेति वैदिकधुरीणा अपि स्वीकुर्वते एव । तथाहि– "शुक्लयजुर्वेदीयप्रातिशाख्यपुस्तकम्... ... आधुनिकशुष्कवैदिकस्वरवर्णोच्चारणपरिपाटीशोधनार्थञ् च ... ... (१९४५ वैक्रमाब्देषु प्राप्तेषु) प्रकाशितम्" इति अनेकप्रातिशाख्यशिक्षाग्रन्थानां समुद्धारकेण प्रभुदत्तशास्त्रिप्रभृतीनामाचार्येण युगलकिशोरपाटकेन शुक्लयजुर्वेदप्रातिशाख्यस्य विज्ञापने (भूमिकायाम्) उक्तम्[4]; "बोधः प्रयोगस् संसिद्धिस् सम्प्रदायश् च सद्गुरुः । यस्मादिमे प्रवर्तन्ते शिक्षाशास्त्रन् तदाश्रये" इति, "गुरोस् साधुत्वमपि शिक्षाशास्त्रानुसारित्वे एव जना अभिप्रयन्ति" इति च वेदमीमांसाधर्मशास्त्राद्द्याऽऽचार्येण याज्ञिकतिलकेन गोपालचन्द्रमहाशयेनाऽपि उक्तम्[5] । तस्मात् प्रमादालस्य-शिक्षाणब्भ्यासादिमान्द्य-देशश्यभाषाप्रभाव-करणवैगुण्यादिभिर् वर्णतो हीनस्य परम्पराऽऽगतस्योच्चारणस्य ये वर्णस्वरूपादिगता दोषास् तेषां शिक्षाशास्त्रानुसारन् निराकरणे नाऽस्ति तावता सम्प्रदायान्यथाकरणदोषस् तस्यापि शिक्षाशास्त्रप्रयोजनाऽनृतपातित्वादिति बोद्ध्यम् । यदपि अथर्ववेदप्रातिशाख्यभाष्यान्ते उक्तम्- " न तर्वबुद्ध्या न च शास्त्रदृष्ट्या यथाऽऽम्नातमन्यथा नैव कुर्यात् । आम्नातम् परिषत् तस्य शास्त्रन् दृष्टो विधिर्व्यत्ययः

---

१. व्या.शि.सू.५१५-५१६। २.मु.उ.१।१।४-५। ३. तै.आ.७।२, गो.ब्रा. १।१।२४-२७। ४. शु.य.प्रा.(वाराणसी,१८८८क्रै.)। ५. सम्.शि.,१-२।

पूर्वशास्त्रे''[1] इति, तदपि पाणिनीयव्याकरणादिप्रोक्तसुप्तिङादिव्यत्त्ययपरामर्शकवँ विभक्ति-लोपाऽन्न्यथाभावादि-संशोधन-निषेधकन् न तूक्तविध-हेतूद्गतवर्णाद्द्यु च्चारणदोषनिराकरणनिवारकम्; सुसम्प्रदायवित्परिषदश् शास्त्रतत्त्वेनोक्त्या सुसम्प्रदायज्ज्ञानां शिक्क्षाशास्त्राऽभिज्ज्ञानाङ्ग कुसम्प्रदायागते शिक्क्षाशास्त्रानभिज्ज्ञानामुच्चारणे आपतितानावँ वर्णादिगतानामुच्चारणदोषाणाम् प्रमार्जने अधिकारित्वस्य सूचितत्वात् ॥१२॥

द्वैधीभावे समुत्पन्ने लक्क्षणान् निर्णयो भवेत् ।
लक्क्षणन् त्वविनाशि स्यात् सम्प्रदायो विनश्यति ॥१३॥[2]

इतश् च शिक्क्षाशास्त्र-रूपलँ लक्क्षणन् न त्याज्ज्यम्, यतो हि नानादेशभवानान् नानातीर्थागतानाञ् च सम्प्रदायानाङ्ग कुत्त्र चित् केनाऽप्यंशेन भेदे दृश्यमाने सति एतादृशꣳ पाठो वा साधुरेतादृशो वा साधुरिति संशये विकटतयोत्पन्नेऽपि शिक्क्षाशास्त्ररूपाल् लक्क्षणाद् एतादृश एव पाठस् साधुरिति निर्णयो भवितुं शक्नोति; यतꣳ खलु सुबधार्यलँ लघु चाऽर्थप्प्रधानञ् च लक्क्षणं शीघ्रमवश्यञ् च न नश्यति, सम्प्रदायस् तु गुरुश् शब्दप्प्रधानो दुर्धर इति लक्क्षणप्प्रतिकञ्चुकाभावे शीघ्रमवश्यञ् च नश्यति। सम्प्रदायस्य विनाशवत्त्वे प्रमाणन् तु इदानीन्तनानाम् प्रायस् सर्वेषाम् भारतवर्षीयाणामपब्भ्रंशीभूतसँस्कृतोच्चारणमेवेति न श्रमेण गवेषणीयङ्ग किञ्चित्। राजशेखरसमये वैक्क्रमाब्दानान् दशमे शतके कश्मीरभवा वाराणसीतꣳ पूर्वेण स्थिता मगधादयश् च केचन पुरुषास् सँस्कृतं सुष्ठु पठन्ति स्मेति सत्स्वपि सँस्कृते सम्म्यगभिविनीतेषु शुद्धसँस्कृतोच्चारणाभिज्ज्ञेषु केषु चिद् विद्द्वत्सु सुराष्ट्र-त्रवणादयस् सँस्कृतवचांस्यपि अपब्भ्रंशमिश्शिरतानि कृत्वा पठन्ति स्स्म, कश्मीरेब्भ्यꣳ पूर्वे उत्तरापथे निवासिनꣳ कवयो निरनुनासिकानपि सँस्कृतस्स्वरान् आनुनासिक्क्यानुरञ्जनेन विकृतानेवोच्चारयन्ति स्स्मेति तल्लेखाद् ज्ञायते। तथाहि—''पठन्ति सँस्कृतं सुष्ठु कुण्ठाꣳ प्राकृतवाचि तु। वाराणसीतꣳ पूर्वेण ये केचिन् मगधादयः॥ पठन्ति लटभलँ लाटाꣳ प्राकृतं सँस्कृतद्द्विषः। जिह्व्वया ललितोल्लापलब्धसौन्दर्यमुद्द्रया॥ सुराष्ट्रत्त्रवणाद्द्या ये पठन्त्यर्पितसौष्ठवम्। अपब्भ्रंशावदंशानि ते

१. अ. प्रा., दिल्लिसँस्करणे। २. व. प्र. शि. श्लो. २१३।

संस्कृतवचांस्यपि ।। शारदायाः प्रसादेन काश्मीरस् सुकविर् जनः । कर्णे गुडूचीगण्डूषस् तस्य पाठक्रमः किमु ।। ततः पुरस्तात् कवयो ये भवन्त्युत्तरापथे । ते महत्त्यपि संस्कारे सानुनासिकपाटिनः''[1] इति । आचार्यशौनकस्य समये आचार्योवटस्य समये च वेदस्याऽपि अत्यन्तमेवापभ्रष्टेन रूपेण उच्चारका वैदिका बभूवुः किलेति आचार्योवटलेखाद् विज्ज्ञायते । तथाहि— ''किमर्थमनुस्वारस्य दीर्घपूर्वस्य पदमध्ये वर्तमानस्य बहुभिश् श्लोकैर् लक्षणङ्क्रियते ? ननु पाठादेव सिद्धयँ यथाऽन्न्येषावँ वर्णानाम् ? सत्यम्, किन्तु दुराम्नाननिवृत्त्यर्थमनयोश् शिक्षापटलयोर् बहूनावँ वर्णानालँ लक्षणङ्क्रियते । कथम् पुनर् दुराम्नानप्रसङ्गः ? सन्ति हि अतीर्थोषिता अलसा अगुणदोषज्ज्ञा अनन्योन्न्याद्ध्यापकास् सर्ववर्णान्न्यथात्वजनयितारः, तद्दोषनिवृत्त्यर्थमाचार्येण शिष्यहितार्थमिदमारब्धम्''[2] इति । शतपथब्राह्मणेऽपि कुरुपञ्चालेषु उत्कृष्टतरा (शुद्धतरा) वाक् प्र चरतीत्युक्तम्[3] । शाङ्खायनब्राह्मणे तु उदीच्यान् दिशि प्रज्ज्ञाततरा वागुद्द्यते इति वाचं शिक्षितुमुदीचीन् दिशम् प्रति यान्ति, उदीच्या दिश आगतस्य वाचं श्रोतुमिच्छन्तीति चोक्तम्; तथाहि— '' उदीच्यान् दिशि प्रज्ज्ञाततरा वागुद्द्यत उदञ्च उ एव यन्ति वाचं शिक्षितुयँ यो वा तत आगच्छति तस्य वा शुश्रूषन्ते''[4] इति । अतोऽपभ्रष्टसंस्कृतवाग्भिर् जनैस् सदैवाऽनपभ्रष्टाम् अनपभ्रष्टवाग्भिश्शिक्षाशास्त्रादिकुशलैः प्राज्ज्ञैर् यथाशास्त्रमुच्चारिता संस्कृतवाचं शिक्षितुयँ यत्नः कार्य एवेति वेदसम्मत एवाऽर्थः। एवञ् च पुराकालेऽपि देववाण्या वेदवाण्याश् चोच्चारणस्योक्ततथ्यसूचिता तादृशी चेदवस्थ तर्हि का कथा खल्विदानीन्तनस्य समयस्य,यदा प्रायस् सर्वे संस्कृताऽध्यायिनश् शिक्षाशास्त्राद्ध्ययने सर्वथोदासते।अतश् शिक्षाशास्त्ररूपस्य लक्षणशास्त्रस्याऽध्ययनमिदानीमधिकतरमावश्यकमिति भावः।।१३।

प्रमाणाऽनुगतवँ वाक्यँ यो मोहाद् हातुमिच्छति ।
प्रतिवातं स मूढात्मा पांसुम् प्रक्षिपति स्वयम् ।।१४।।[5]

---

१. काव्य-मीमांसायां सप्तमेऽध्याये पाठप्रतिष्ठा-प्रकरणे । २. ऋ. प्रा. भा. ३।१।२२ (१३।२२)। ३. ''उदीचीमेव दिशम् पत्थ्यया स्स्वस्त्या प्प्राजानँस्तत्तस्म्मादत्त्रोत्तरा हि वाग्वदति कुरुपञ्चालत्त्रा'' - मा. वा .श. ब्रा. ३।२।३।१५ । ४. शाङ्ख.ब्रा.७।६। ५. व. प्र. शि. श्लो. २२४।

कुसम्प्रदाय-श्रद्धा-ऽतिशयाऽऽदि-जाड्याद् यः प्रामाणिकल् लक्षणवाक्यन् त्यक्तुवँ वाञ्छति स मूढबुद्धिः पुरुषो यथा बालस्स्वम् प्रति प्रवृत्ते प्रतिकूले वायौ अपि इयन् धूलिर् ममैव शरीरे अक्षणोश् च क्षणान्तरे एव पतिष्यतीत्यप्यज्ज्ञात्वा स्वयन् धूलिम् प्रक्षिपति तथैव मया प्रमाणानुगते प्रामाणिकैश् शिष्टैश् च परिगृहीते लक्षणवाक्ये दीयमानोऽयन् दोषश् शास्त्रसम्प्रदायरहस्स्याऽज्ज्ञत्वरूपेण परिणत्य मय्येवाऽऽपतीष्यति इत्यप्यज्ज्ञात्वा तादृशेऽपि लक्षणवाक्ये जाड्यपरवशो दोषन् दातुमिच्छतीत्यर्थः। मूढस्स्य तादृशः प्रयत्नस् तम् प्रत्यत्येवाऽनर्थकारी भवतीति भावः ॥१४॥

शास्त्रवँ विप्रतिपद्द्येत यदि न्न्यायेन कुत्रचित् ।
न्यायो बली सन् मानं स्यात् तत्र पाठो हि नश्यति ॥१५॥[1]

यदि कुत्र चिच् शास्त्रस्स्य उपलब्ध्यमानः पाठो लक्षणवाक्याद्द्यनुगृहीतेन न्यायेन विरुद्धो भवेत् तत्र न्यायो बली सन्मानं स्याद्, आरस्स्य- शिक्षणादिमान्द्या-ऽशक्ति-गुरुशिष्य-परम्पराविच्छेदादिभिरशुद्धिम् प्राप्तस् सम्प्रदायपाठो मानन् न भवति, यतो हि परम्परागतो महाकायग्रन्थपाठः आरस्स्यादिभिरद्ध्यापकाद्ध्येतृदोषैर् यथा झटित्येव विकर्तुं शक्नोति न तथा लघु लक्षणवाक्यन् तदनुगृहीतो वा न्यायः ॥१५॥

लक्षणयँ यो न वेत्त्यृक्षु न कर्मफलभाग् भवेत् ।
लक्षणज्ज्ञो हि मन्त्राणां सकलम् भद्रमश्नुते ॥१६॥[2]

अत्राऽर्थे पाणिनीय-व्याकरण-वार्तिककारोऽप्याह– "शास्त्रपूर्वके प्रयोगेऽभ्युदयस् तत् तुल्यवँ वेदशब्देन"[3] इति । तद्व्याख्याने भाष्यकारोऽपि– "शास्त्रपूर्वकयँ यश् शब्दान् प्रयुङ्क्ते सोऽभ्युदयेन युज्यते । तत् तुल्यवँ वेदशब्देन । वेदशब्दा अप्येवमभिवदन्ति योऽग्निष्टोमेन यजते य उ चैनमेववँ वेद, योऽग्निन् नाचिकेतन् चिनुते य उ चैनमेववँ वेद । अपर आह- तत् तुल्यवँ वेदशब्देनेति यथा वेदशब्दा नियमपूर्वमधीताः फलवन्तो भवन्त्येवयँ यश् शास्त्र-

---

१. कौ. अ. ३।१।१२८; तत्र "शास्त्रवँ विप्रतिपद्द्येत धर्मन्न्यायेन केन चित् । न्यायस् तत्र प्रमाणं स्यात् तत्र पाठो हि नश्यति" इति पठ्यते । २. ऋ.प्रा.व.वि.वृ. (उपक्रमग्रन्थे) । ३. पा. व्या. भा. पस्पशाह्निके ।

पूर्वकं शब्दान् प्रयुङ्क्ते सोऽभ्युदयेन युज्यत इति ।"[1] इति । आचार्य-कात्यायनस्य "अथ विज्ञायैतानि योऽधीते तस्य वीर्य्यवदथ योऽर्त्थवित् तस्य वीर्य्यवत्तरम् भवति, जपित्वा हुत्वेष्ट्वा तत्फनेन युज्यते"[2] इति वचनमप्युक्तार्थस्योपोद्बलकमेव । व्यास-शिक्षायामपि–"लक्षणेन विनाऽध्याययँ यः पठेदपि सर्वदा । नैव तत्फलमाप्नोति स विप्रस् सुजनोऽपि हि"[3] इति । एवञ् च न केवलँ लक्ष्यज्ञानायैव लक्षणशास्त्रम् अध्येतव्यङ किन् तु धर्मायाऽपीति बोद्धव्यम् इति भावः । अतत्र मूलश्लोकस्य पूर्वार्धस्य 'ऋचालँ लक्षणस्य ज्ञानेऽसति कर्मसु ऋचाम् प्रयोक्ता सोऽज्ञः कर्मणाम् पूर्णम् फलन् न लभते' इत्यर्थस् स्वीकर्तव्यो वाक्यशेषानुरोधात् ।।१६।।

लक्षणेन विना वाणी निर्मलाऽपि न शुद्ध्यति ।
प्रमदा रूपसम्पन्ना दरिद्रस्येव योषिता ।।१७।।[4]

सुसम्प्रदायाऽऽगता निर्मलाऽपि वेदरूपा अनन्या च देववाणी लक्षण-प्रतिकञ्चुकरहिता सती पुरुषदोषसङ्क्रमणाद् वैगुण्यम् प्राप्ता वा इत्याशङ्कया ग्रस्ता मलिनीभवति; एवञ् च देववाण्या अपभ्रंशी-करणेन नेत् प्रायश्चित्तीयास् स्यामेति धर्मभीरूणां सुसम्प्रदायायामपि तस्यान् देववाण्यां सकम्पा एव प्रवृत्तिर् भवेत्, अत एव च यौवनेन प्रकृष्टेन मदेन च युक्ता ह्रिया श्रिया च सम्पन्नाऽपि दरिद्रस्य योषिन् मृजया सुवसनैरलङ्कारैश् च रहिता सती यथा नातिरोचते तथैव लक्षण-परिष्कार-रहिता देववाणी अपि नात्यन्तं शुद्धतया रोचते इत्यर्थः । आरण्यशिक्षाऽन्तेऽपि- "लक्षणेन विना विद्द्या निर्-मलाऽपि न शोभते। अप्राणस्येव देहस्य भूषणैरप्यलङ्कृतिः"इति पठ्यते। अपि चैवमाहुः- "लक्षणैर् वा विहीनन् तु भुक्तमव्यञ्जनयँ यथा"[5] इति ।।१७।।

लक्षणस्य विरोधेऽपि पाठैक्ययँ यदि दृश्यते ।
तत् तथा प्रतिपत्तव्यम् यज्ञायज्ञा निदर्शनम् ।।१८।।[6]

वेदस्य कुत्तर चिच् चरणे शाखायाम् अनुशाखायावँ वा कस्मिँश् चित् पाठविशेषे शिक्षाशास्त्राऽऽदि-रूपस्य लक्षण-शास्त्रस्य

---

१. पा.व्या.भा. पस्पशाह्निके। २. का.मा.वा.शु.य.सं.स.सू.१।१। ३.व्या.शि.सू.५१६। ४. अमो.शि.श्लो.१२५-१२६। ५. पारा.शि.श्लो.७१। ६. ल. अमो.शि., श्लो १४; तत्तर 'यज्ञायज्ञा च इत्यथ' इति चतुर्थचरणपाठः।

विरोधे दृश्यमानेऽपि यदि स पाठो नानादेशभवेभ्यस् सुसम्प्रदायज्ञेभ्यो नानातीर्थेभ्य आगतेषु अतीव विश्वसनीयेषु उच्चारणेषु समानरूप उपलभ्यते तर्हि स पाठस् तेनैव रूपेण शुद्धो ज्ञेयः, तत्र लक्षण-विरोधन् दृष्ट्वा तस्या-ऽशुद्धत्वन् नैव मन्तव्यम्; नैव च लक्षणाऽनुसारन् तस्य परिवर्तनङ्ग कर्तव्यम्। एतस्य सिद्धान्तस्य निदर्शनम् माध्यन्दिनीय-वाजसनेयि- शुक्लयजुर्वेदमन्त्रसंहितायास् सप्तविंशतितमाध्यायस्य द्वाचत्वारिंशत्तम्याङ्ग कण्डिकायाँ 'यज्ज्ञायज्ज्ञाः' इति पाठोऽस्ति। तत्र कात्त्यायनकृतपार्षदशिक्षापरिशिष्टरूप- प्रतिज्ञासूत्रस्य द्वितीयस्याऽ कण्डिकायाऽ प्रथमेन "अथाऽन्तस्त्थानामाद्द्यस्य पदादिस्थस्स्या-ऽन्न्यहलसयँ युक्तस्य सयँ युक्तस्याऽपि रेफोष्मभ्यामृकारेण चाऽविशेषेणाऽऽदिमद्ध्याऽवसानेषूच्चारणे जकारोच्चारणम्" इति सूत्रेण विरुद्धमपि द्वितीयस्य यज्ज्ञा इति पदस्यादौ स्थितस्य यकारस्य यकाररूपेणैवोच्चारणं सुसम्प्रदाय- सर्वँवाद-प्प्रामाण्यात् तथैव शुद्धम् मन्यते न तु तत्र प्रोक्तकात्त्यायनसूत्रानुसारम् परिवर्तनङ्ग क्रियते। एवमेवाऽन्न्यत्राऽपीदृशस्स्थलेषु वेदितव्यम्। "उपसर्गपरो यस् तु पदादिरपि दृश्यते। ईषत्स्पृष्टो यथा वियत् पदच्छेदे परो भवेत्॥ विभाषया यकारश् च नित्यमाम्रेडितेऽपि च। यत्रयत्रेति मा यज्ज्ञन् तथा मेति पदादपि॥ अथात उत्तरो यस् स्यात् तथा नेति-पदात् परः। भवतीत्यपि पूर्वैव तथा च सपदादपि॥ अथा वयमादित्यादावथो येऽग्रस्य दृश्यते। न यत्परो यथा च स्स्यात् सपदे तदुदाहृताः"[1] इत्यादीनि वचनानि तु सम्प्रदाय- विशेष-प्रकाशनपरेभ्यो-ऽर्वाचीनेभ्यश् शिक्षाग्रन्थेभ्य[2] आदाय प्राचीनासु याज्ज्ञवल्क्यशिक्षादिष्वपि[3] प्रक्क्षिप्तानीत्येव वेदितव्यम्। अत्रेदन् तु विवेक्तव्यम्— मूलश्लोके यज्ज्ञायज्ज्ञा इति यदुदाहृतन् तत्र वस्तुत एकपदवद्भावाद् एव द्वितीय-यकारस्य जकारोच्चारणस्याऽप्प्रसङ्गः। उपसर्गपर इत्यादिषु केषु उपात्तेषु उदाहरणाऽन्तरेष्वपि यथायथवँ विवेकऽ र्यः॥१८॥

---

१. एते श्लोका लग्ध्वमोघानन्दिन्न्यां सन्ति, श्लो.५-८। २. या. शि. पृ.११५-११६; तत्राऽमरनाथटिप्पणी च द्रष्टव्या।

कस्य चिद् यदि वर्णस्य करणन् नोपलब्ध्यते ।
प्रतिज्ञास् तत्र बोढव्या: करणं हि तदात्मकम् ।।१९।।[1]

यदि कस्य चिद् वर्णस्य करणापरपर्यायलँ लक्षणन् नोपलब्ध्यते तदा प्रतिज्ञापरपर्यायास् सुसम्प्रदायाऽऽगतोच्चारणविशेषा एव परिपालयितव्या:; यतो हि लक्षणम् मूलतस् सुसम्प्रदाय-ज्ञोच्चारणाद्द्यनुगमनरूपमेवेत्यर्थः ।।१९।।

शास्त्रापवादात् प्रतिपत्तिभेदान् निन्दन्त्यकृत्स्नामिति वर्णशिक्षाम्।
सैतेन शास्त्रैर् न विशिष्यतेऽन्यैः कृत्स्नञ् च वेदाङ्गमनिन्द्यमार्षम्।।२०।।[2]

शिक्षाशास्त्रे प्रतिपादितानां सिद्धान्तानां सापवादत्वाद्,वर्णाना-मेवाऽपि केषाञ् चिद् विषये शिक्षकेषु मतभेदस्य दर्शनात्, शिक्षाशास्त्रानुसारं स्वरवर्णादेश् पूर्णरूपेण शुद्धमुच्चारणञ् कर्तुञ् कोऽपि न शक्नोतीति "तुम्बुरु- नारद-वसिष्ठा विश्वामित्रा-दयश् च गन्धर्वा: । सामसु निभृतञ् करणं स्वरसौक्ष्म्यात् तेऽपि न हि कुर्युः" इत्यादि वदद्भिश् शिक्षकैरेव स्वीकृतत्वाच् च शिक्षाशास्त्रम् अकृत्स्नम् प्रयोजनविकलत्वादिति वर्ण-शिक्षान् निन्दन्ति के चन शास्त्रचिन्तकाः । किन् तु सा शिक्षैव एतेन दोषेणाऽन्यैश् शास्त्रैर् न विशिष्यते; व्याकरणादिशास्त्रे-ष्वपि अपवादा मतिभेदा अपूर्णताश् च भवन्त्येव, व्याकरणेऽ-धीतिनोऽपि प्रमादादशक्त्यादितो वाऽपि अपभाषन्त एव; एतेन शिक्-षाशास्त्रेणाऽपि एतेभ्योऽन्यैरेतच्छास्त्रमात्राश्रितैर् दोषैर् विशिष्टेन तु नैव भूयते इति समीक्ष्यवादिनो वदन्ति । अतश् शिक्षाशास्त्रमपि शास्त्रान्तरमिव सप्रयोजनत्वात् पूर्ण-मार्षवँ वेदाङ्गञ् चेत्यनिन्द्यमेवेत्यर्थः ।।२०।।

(ख) शिक्षकप्रशंसा

स्वारात् स्वरे सङ्क्रमणे स्वरसन्धिमनुल्लबणम् ।
अविच्छिन्नं समञ् कुर्यात् सूक्ष्मञ् छायातपोपमम् ।२१।।[3]
अक्षरज्ञो विरामज्ञः प्रत्यारम्भी य एव च ।
स्वरमात्राविभागज्ञस् स विप्रो वक्तुमर्हति ।।२२।।[4]

---

१. ना. शि. २।७।१०, तत्र 'यस्य कस्य चिद् वर्णस्य' इति पाठः । २. ऋ. प्रा. ३।२।६८(१४।६८)। ३. ना.शि.२।७।११। ४. ना.शि. १।६।१८; मा.शि.श्लो. ३४-३५। ५. मा.शि.,श्लो.३५-३६।

उदात्तात् स्वरात् स्वरितं स्वरम्, स्वरितात् स्वरादनुदात्तं स्वरम्, अनुदात्तात् स्वराद् उदात्तं स्वरमित्येवम्प्रकारेण यस् स्वरात् स्वरं सङ्करमितुं शक्नोति, यो वेदमन्त्रादौ एकं स्वरम् उच्चार्य समनन्तरमेव तद्विजातीयमन्यं स्वरम्, ततस् तद्विजातीयमन्यं स्वरमित्येवम्प्रकारेण स्वरान् उच्चारयितुं शक्नोति, तथाकरणे च स्वरयोः परस्परेण योगमनुत्कटम् अविच्छिन्नं समं सूक्ष्मम् छायातपयोर् योगमिव परस्परेण सुसङ्गतङ् कृत्वोच्चारणङ् कर्तुं शक्नोति, यश् च सयँ युक्तव्यञ्जनानाम् पूर्वाङ्गपराङ्गभावादिव्यवस्थाया ज्ञानेन अक्षरविभजनं सम्यग् जानाति, कुत्र कीदृशः कियत्कालव्यापी विरामः कर्तव्य इति जानाति; यः प्रत्यारम्भापरपर्यायम् पुनः पुनः प्रारब्धमभ्यासङ् करोति, अथवा प्रत्यारम्भाक्ख्यवँ विरामे विरम्य करणीयम् उत्तरस्य ग्रन्थस्योच्चारणप्प्रारम्भविशेषम् जानाति, उदात्तादिस्स्वरविभागं ह्रस्स्वदीर्घ-प्लुत-वृद्धादीनां स्वराणाम् मात्रायाः विभागम् च लक्षणतोऽपि सम्यग् जानाति स एव विप्प्रो वेदान् अध्येतुम् अध्यापयितुम् प्रयोक्तुम् चाऽर्हो भवति नान्य इत्यर्थः । इत्थम् च शिक्षकस्याऽनन्यसाधारणीम् अर्हतामनूद्द्य स भूतार्थवादेन स्तुतो वेदितव्यः ॥२१-२२॥

पदक्रमविशेषज्ञो वर्णक्रमविचक्षणः ।

स्वरमात्राविभागज्ञो गच्छेदाचार्यसम्पदम् ॥२३॥[1]

यः प्रतृण्णसंहितापरपर्यायस्य पदपाठस्य, क्रमसंहितापरपर्यायस्य क्रमपाठस्य च विशेषज्ञः; वर्णसंहितायां संहितानिर्भुजसंहिताद्द्यपरपर्यायाम्, वर्णानान् द्वित्वस्य विधौ वा यो विचक्षणः, यस् स्वरमात्राविभागानाम् च विशेषेण ज्ञाता स आचार्येऽपेक्षणीयानाङ् गुणानाम् परिपूर्णताम् प्राप्नुयादित्यर्थः । एवम् च शिक्षकरूप एव गुण्यवेदाचार्यतत्वम् प्राप्तुं शक्नोति नान्य इति शिक्षकस् स्तुतो वेदितव्यः ॥२३॥

---

१. ऋ. प्रा. व. १।८; तै. प्रा. २४।६, तत्र ह्विट्निसम्पादिते सँस्करणे – 'सम्पदम्' इत्यस्य स्थाने–'संसदम्' इति पाठः । तथा पाठे उक्तगुणयुक्तः पुरुष आचार्याणां सभास्वपि गन्तुयँ योग्यस् स्यादित्यर्थस् स्यात् । व्यासादीनाम् ब्रह्मलोके यत् स्थानन् तद् गच्छेदित्यर्थ इत्यन्ये ।

ब्राह्मणेषु समेतेषु विद्वत्सु च बहुष्वपि ।
ब्रह्मोद्घे सम्प्रवृत्ते यश् शंक्विषकस् स विराजते ।।२४।।[1]

अदोषज्ञमण्डले 'निरस्तपादपे देशे एरण्डोऽपि द्रुमायते' इति न्यायेन दाम्भिकोऽपि अपभ्रंशीकृतदेववाणीभाषी राजेत, यावद् वेदपाठो न प्रवर्तते तावद् भुक्तपीतश् चन्दनचर्चितभालो महार्घोज्ज्वलनेपत्थ्यभृद् रिक्तगुरुरपि "जिता सभा वस्त्रवता", "तावच् च शोभते मूर्खो यावत् किञ् चिन् न भाषते" इत्यादिन्यायेन शोभेत, नानादेशाऽऽगतेषु वेदाद्ध्यायिषु बहुषु शिक्षादिषट्शास्त्रज्ञेषु च सङ्गतेषु, वेदपाठे देववाणीप्रवचनादौ वाऽपि प्रवृत्ते तु यश् शिक्षामुपादाय तदनुसारञ् चरति स एव विशेषेण राजते नाऽन्य इत्यर्थः ।।२४।।

उत्तमो लक्षणज्ञानी लक्ष्यज्ञानी तु मद्ध्यमः ।
लक्ष्य-लक्षणयोर् ज्ञानी तद् धि पात्तरम् प्रचक्षते ।।२५।।[2]

यश् शिक्षादिलक्षणशास्त्रस्य प्रशस्तेन ज्ञानेन युक्तो वेदाद्ध्यायी स उत्तमः, यो लक्षणशास्त्रन् न जानाति किन् तु मन्त्रसंहितादेर् लक्ष्यस्य प्रशस्तेन ज्ञानेन युक्तस् स तु मद्ध्यमः, यस् तु लक्ष्यस्य लक्षणस्य च प्रशस्तेन ज्ञानेन युक्तस् स उत्तमोत्तमः, तं हि विवेकशीला विद्द्यानुसारन् देयानाम् महादानानाम्, आर्त्विज्ज्यस्य, आचार्यकस्य च पात्तरम् प्रचक्षते इत्यर्थः । लक्षणज्ञानी दुष्टम् पाठादिकमपि लक्षणाऽवष्टम्भेन विमलीकर्तुं शक्नोति, लक्ष्यमात्तरज्ञानी तु शुद्धेऽपि लक्ष्ये आशङ्कायामुत्थापितायामुन्मुह्यति, विपरीतवँ् वाऽद्ध्यवस्यति, न च सम्भविनान् दोषाणाम् परिहारेण लक्ष्यम् अन्यान् ग्राहयितुं शक्नोति प्रायेणेति वरलँ् लक्ष्यमात्तरज्ञानितो मन्दलक्ष्यज्ञानो लक्षणज्ञानी इत्युक्तमित्यत्तर विवेकः कार्यः । लक्ष्यलक्षणयोर् द्वयोरेव सम्यग् ज्ञानञ् कर्तव्यमित्यत्तरैव तात्पर्यन् नेयम् । एवञ् च लक्षणज्ञानस्याऽपरिहार्यताया बोधनेन लक्षणज्ञानी स्तुतो वेदितव्यः ।।२५।।

---

१. ऋ. प्रा.भा. ३।२।६९(१४।६९) २. अमो.शि. श्लो. १२४; तत्तर "तद्धि पात्तरम् प्रशस्यते" इति पाठः ।

(ग) वेदस्य विकृते उच्चारणे श्रुते शिक्षकस्य धर्म्यङ्ग कर्तव्यम्-

आगमैरधिकाः केचिद् विज्ञानैरपरेऽधिकाः ।
प्रयोगसौष्ठवाद्यन्ये नाऽहमस्मीति हि[1] स्मयः ॥२६॥[2]

वेदाध्यायिषु केचित् सदाचार्यलाभात् सम्प्रदायस्य सम्यगागमनेन अधिका भवन्ति, किन्तु ते शुका इव यथाश्रुतमावर्तयितुमेव कुशला अपि भवन्ति, न तु सम्प्रदायरहस्यवं विज्ञातुम्, अपरे पुनः परिस्थितिवशात् सदाचार्याऽलाभादिना आगमे नातितीक्ष्णा अपि लब्धस्य सम्प्रदायस्य विविधैः प्रकारैः परीक्षाङ्ग कृतत्रोपार्जितेन तत्सतत्त्वज्ञानेनाऽधिका भवन्ति, किन् तु तेऽपि विज्ञातुमेव कुशला अपि भवन्ति, न तु प्रयोक्तुम्; भवन्ति हि 'विज्ञातुङ कुशला के चिद् ग्रन्थान् धारयितुम् परे''[3]। अन्न्ये पुनर् विज्ञानेन दुर्बला अपि सम्प्रदायस्य यज्ञादौ व्यवहारे प्रयोगस्य सौष्ठवेन अधिका भवन्ति। आगमे तद्विज्ञाने तत्प्रयोग- सौष्ठवे चाऽद्द्वितीयः पुरुषस् तु सुदुर्लभ एव । अतः परमदुर्लभ एव शास्त्रस्य पारो-ऽल्प-वीर्य-बल-बुद्धिना मानुषकेण। तस्मादेवाऽहमेवाऽस्मि अद्द्वितीयश् शास्त्रपारदृश्श्वेति मदो न हि कार्यः। मदोन्मत्तानां सदुद्देश्यम् प्रति चिरञ् च सम्भूयकारित्वस्याऽसम्भवाद् एकेन च शास्त्ररक्षाया अशक्यत्वाद् अनेन श्लोकेन शास्त्रनाशबीजभूतो मदो निषिद्धो वेदितव्यः। स्वस्मिन् दोषमनुपलभमानस्य च मन्दकस्य मदो भवतीति सर्वत्र अल्पज्ञत्वादिदोषसम्भावना ऽप्यनेन श्लोकेन प्रदर्शिता। नीतिविदोऽप्याहुः- "दाने तपसि शौर्ये च विज्ञाने विनये नये । स्मयः खलु न कर्तव्यो बहु-रत्ना वसुन्धरा''[3] इति ॥२६।

एकस् सर्वन् न जानाति सर्व एकन् न विन्दति ।
एवम् मन्त्रा न गुह्यन्ते सर्वनाशस् ततो भवेत् । २७॥[4]
तस्मात् सर्वैर् मिलित्वा हि रक्षण्यो वेदोऽङ्गयुक् सदा ।
तन्मूलाः पुरुषार्थास् स्युस् ततस् सर्वे सुरक्षिताः ॥२८॥

---

१. 'हि स्स्मयः' इत्त्वस्य स्स्थाने 'विस्स्मयः' इति पाठः, मा शि.श्लो. १५८। २. मा.शि.,श्लो. १५८। ३. म.भा.आ.प.१।५३। ४. चा.नी. द. १४।८। ५. अमो. शि.श्लो. १२०, तत्र 'एवम् मन्त्रा न गुहन्ति पण्डिताश् शुद्धभाविनः' इति मुद्रितपाठः ।

एक एव पुरुषस् साङ्गोपाङ्गङ् कृत्स्नवँ् वेदं सम्म्यग् ज्ञातुन् न प्रभवति; यदि निरवधौ काले विपुलायाञ् च पृथ्व्याङ् कदाचित् कुत्र चिज् जातः कश् चिद् अतिमानवस् साङ्गोपाङ्गं सरहस्यञ् च कृत्स्नवँ् वेदं सम्म्यग् ज्ञातुम् प्रभवेत् तथापि नानाकालभवो नानादेशजातस् सर्वो जनस् तमेकम् पुरुषम् आर्त्विज्ज्याय आचार्यत्वाय प्रतिग्रहाय च न प्राप्नोति । अतस् साङ्गोपाङ्गं सरहस्यञ् च कृत्स्नवँ् वेदम् अजानता ऽपि यथास्स्वज्ज्ञानम् आर्त्विज्ज्यादि कर्तव्यम् भवति । एवम् प्रवृत्ते चार्त्विज्ज्यादिके तावन्मात्रेण सन्तुष्टैरलसैरगुणदोषज्ञैर् वृत्तिमात्रगृद्धनुभिरल्पज्ञैर् मन्त्रास् सम्म्यग् न गुह्यन्ते; ततश् च वैदिकानाञ् जनानां सर्वनाश एव स्स्यात् । अत एकेन साङ्गोपाङ्गस्स्य सरहस्यस्स्य कृत्स्नस्स्य वेदस्स्य रक्षितुम् अशक्यत्वाद् एकस्मिन् विषये विशिष्टैस् सद्भिरपि अवलेपानभिभूतैर् विषयान्तरे विशिष्टमन्यम् मानयद्भिः परस्परम् भावयद्भिस् सर्वैर् मिलित्वा साङ्गोपाङ्गस् सरहस्यः कृत्स्नो वेदस् सर्वैरुपायैस् सर्वथा रक्ष्यः । स्वगौरवानुभूतेस् स्वाभिमानस्स्य वैदिकानामेकगणाब्भ्यन्तरताया व्यवस्थायाः प्रेयसश् श्रेयसश् चाऽऽधारभूते तस्मिन् वेदरूपे सर्वस्स्वे सुरक्षिते एव तन्मूला वैदिकानाञ् चत्वारोऽपि पुरुषार्था बीजरूपेण सुरक्षितास् सन्तः कार्यरूपेणाऽपि सुरक्षिता भवितुं शक्नुयुरित्यर्थः ॥२७-२८॥

श्रुत्वा वेदविनाशन् तु नोच्चैर् ब्रूयाद् विनाशिनम् ।
आहूय तवँ् विविक्ते तु ब्रूयाद् धर्मन् न हापयेत् ॥२९॥[1]

वेदो रक्षणीय इति पूर्वमुक्तम् । तदर्थञ् च पूर्वं सम्म्यक्स्वरवर्णानुपूर्वीज्ज्ञानङ् कृत्वा वेदस्स्वरूपावधारणा कार्या, असति स्वरवर्णानुपूर्वीनिश्चये कल्पव्याकरणादीन्यङ्गानि निराधाराणि सन्ति वेदप्रयोगरक्षाद्द्वारार्थन् न प्रवर्तेरन्निति । वेदस्स्वरूपावधारणा च सम्म्यग् वेदस्स्वरवर्णानुपूर्व्युच्चारणेन कार्या । किन् तु जना आलस्याच् शिक्षणाब्भ्यासादिमान्द्याद् वृत्तिकार्श्यपीडनाद् अशक्तेर् देशश्यमातृभाषादिप्रभावाच् च प्रायेण स्वरतो वर्ण-

---

१. अमो.शि.,श्लो.१२१; तत्र "श्रुत्वा वेदविनाशन् तु सम्म्यग् ब्रूयान् न वै बुधः । आहूय तवँ् विविक्ते वै तस्य धर्मो न हीयते" इति पाठः; द्र.ल.अमो. शि., श्लो. १७ ।

तश् च हीनवँ् वेदमुच्चारयन्ति । तादृशे भ्रष्टे वेदोच्चारणे श्रुतेऽपि यदि विज्ज्ञा अपि किमपि न भणेयुस् तर्हि तद् भ्रष्टमेवोच्चारणं शुद्धमिति भ्रमो रूढमूलस् स्यात्, वेदविनाशोपेक्क्षकास् ते विज्ज्ञा अपि प्रायश्चित्तीयास् स्युः । अतस् तादृशमशुद्धोच्चारणरूपवँ् वेदविनाशं श्रुत्त्वा दोषज्ज्ञश् शिक्क्षको यदि सोऽशुद्धोच्चारणरूपस्स्य वेदविनाशस्स्य कर्ता अनसूयको विविदिषुर् धर्मभीरुश् च स्स्यात् तर्हि तवँ् वेदविनाशिनमपि सभायाञ् जनौघे वा सर्वशराव्यत्त्वेन तस्स्योच्चारणस्स्य वैगुण्यन् न ब्रूयात् तद्वृत्त्युत्साहस्वान्तादिवधभयात्, तवँ् विविक्ते विहूय तस्स्य वेदोच्चारणे यद् वैगुण्यन् तत् तत्परिहारविधिञ् च सामपूर्वकम् अनुत्सिक्तो ब्रूयाद्; वेदविनाशं श्रुत्त्वाऽपि तस्स्योपेक्क्षणेन प्रायश्चित्तीयो न भवेत् । यस् तु असूयकोऽविविदिषुरुत्सिक्तो दाम्भिकोऽशुद्धवेदपाठी तन् तु सभायामपि जनौघेऽपि आहूय तद्दोषं सर्वशराव्यत्त्वेन ब्रूयाद् दाम्भिकदर्पादिदलनस्स्य धर्म्यत्त्वाद्; विविक्ते विहूय सामपूर्वकञ् चोक्तोऽपि स नैव स्वदोषपरिहारङ् करिष्यतीति च । अथवा तङ् किमपि न ब्रूयात् तद्दोषान् अन्येषु ख्यापयेद् गतानुगतिकान् परप्प्रत्त्ययनेयबुद्धीञ् शालीनान् तद्दोषेब्भ्यो रिरक्क्षिषुः, यथास्वज्ज्ञानशक्ति वेदरक्क्षार्थम् प्रवर्तितव्यत्त्वाच् शिक्क्षकेणेति ॥२९॥

(घ) शिक्क्षाविद्द्यारहितस्स्य निन्दा

स्थानञ् च करणम् मात्त्रां सम्म्यगुच्चारणन् तथा ।
यो न वेद स निर्लज्जः पठामीति कथवँ् वदेत् ॥३०॥ [1]

यो वर्णानाङ् कण्ठजिह्व्वामूलादिकं स्थानम्, जिह्व्वामूलमद्ध्योपाग्ग्राग्ग्रादिकङ् करणम्, मात्त्राम्, आयाऽपायव्व्यथननिरस्तपीडनादिब्भ्योऽव्भ्याहननिर्हणनादिदोषेब्भ्यश् च विविक्तम् माधुर्यादिगुणवत् सम्म्यगुव्चारणञ् च न जानाति स शास्त्रवचनमुल्लङ्घ्यापि निर्लज्जो वर्तमानः पुरुषश् शास्त्रज्ज्ञानान् धार्मिकाणां समवाये अहवँ् वेदन् देववाणीनिबद्धङ् ग्रन्थान्तरवँ् वेदाङ्गादिकवँ् वा पठामीति वक्तुङ् कथं शक्नोति, नैव शक्नोतीत्त्यर्थः ॥३०॥

उक्त्वोदाहरणङ् किञ्चिद् बहुग्रन्थधरो नरः ।
आक्क्षिप्तश् शैक्क्षिकेणेह तृणाग्निरिव शाम्म्यति ॥३१॥ [2]

---

१. व. प्र. शि. श्लो. ९। २. ऋ. प्रा. भा. ३।२।६९(१४।६९)

बहूनाङ्गरन्थानान् धारयिताऽपि नरस् तस्योच्चारणे वर्तमानानान् दोषाणां स्थालीपुलाकन्न्यायेन किञ्चिदेवाऽप्युदाहरणमुक्त्वा शिक्षामनुसृत्य प्रवर्तमानेन पुरुषेणाऽऽक्षिप्तस् सन्निह यथा तृणाग्निः क्षणादेवोपशाम्यति तथैवोपशाम्यति, दलितदर्पो विगलित-मान-धनश् च भवतीत्यर्थः ॥३१॥

सुबहुज्ज्ञोऽपि यो भूत्वा शिक्षाज् चेन् नाधिगच्छति ।
न राजते सभायां स शैक्षिकस्य समीपतः ॥३२॥[1]

योऽन्न्यानि सुबहून्न्यपि शास्त्राणि ज्ञातवानपि शिक्षाशास्त्रन् न जानाति स विमन्त्रीकरणोच्चारणदोषैस् स्वर्गादिफलात् तु भ्रश्यत्येवेति नाके तु नैव राजते; इहाऽपि शिक्षकरहितायां सभायान् तु कथञ्चिद् राजेताऽपि सः, शिक्षामनुसृत्य देववाणीप्रयोगे प्रवर्तमानेन पुरुषेण युक्तायान् तु सभायां स नैव राजते इत्यर्थः। एवञ् च विद्द्वल्लोकलज्जाम् परिहर्तुमपि शिक्षाम् पठेदेवेत्युपदेशेऽस्य श्लोकस्य तात्पर्यम् । लौकिका अपि निन्दन्त्येवाऽशुद्धपाठिनम् । तथा हि– "अविदित-शषसविशेषा वाणी वदनाद् विनिर्गता येषाम् । गुद-वदन–विवरभेदो रदनैरेवोपलक्ष्यते तेषाम्"[2] इति । अपि चाऽऽह–"गौर् गौः कामदुघा सम्म्यक् प्रयुक्ता स्मर्यते बुधैः । दुष्प्रयुक्ता पुनर् गोत्त्वम् प्रयोक्तुस् सैव शंसति"[3] इति । वर्णोच्चारणपदवाक्यादिप्रयोग-सौष्ठवमूलं हि गोः प्रयोगे सम्म्यक्त्वमिति बोद्ध्यम् ॥३२॥

४. अथाऽधिकारिनिरूपणम्

(क) नित्त्यायाऽद्ध्ययनाय शिष्ष्यस्य परीक्षा–

ब्राह्मणः क्षत्त्रियो वैश्यो निभृतो जनकादिभिः ।
उपनीतो द्विजाग्र्यैणाऽद्ध्याप्प्यो वेदवं् वटुर् व्रती ॥३३॥

"ब्राह्मणेन निष्कारणो धर्मष् षडङ्गो वेदोऽद्ध्येयो ज्ञेयश् च"[4] इत्त्यागमात्, "योऽनधीत्त्य द्द्विजो वेदमन्न्यत्त्र कुरुते श्रमम् । स जीवन्नेव शूद्द्रत्त्वमाशु गच्छति सान्न्वयः"[5] इति वेदाद्ध्ययन-

---

१. ऋ. प्रा. भा. ३।२।६९ (१४।६९) । २. भ. का. सु. श्लो. २; सुभाषितावली तु "घझढधभणनविशेषो वक्तुर् वक्त्रान् न लब्भ्यते यस्य । मुखगुदरन्ध्रविशेषो दन्तैरुपलब्भ्यते तस्य" इति पाठो दृश्यते, श्लो. २३९७। ३. का. श्रा. १।६। ४. पा.व्या.भा. (पस्पशाह्न्निके)। ५. मनु. २।१६८ ।

रहितस्य द्विजस्य निन्दितत्वात्, "स्वाद्ध्यायोऽद्ध्येतव्यः"[1] इति नित्त्याद्ध्ययनविधेः, विज्ञपित्त्रादिना प्रेरितो वा यो वेदाद्ध्ययनाऽभिकामो योनितो ब्राह्मणः क्षत्त्रियो वैश्यो वा मूकत्वाद्द्यद्ध्ययनात्त्यन्तविरोधिदोषरहितः पित्त्रा ज्येष्ठेन भ्रात्त्राऽन्येन वाऽधिकारिणा, स्वयवँ वटुनैव वा अद्ध्यापनार्थं स्वस्मै समर्पितो यथाविधि उपनीतो यथाविधि ब्रह्मचारिव्रत-तत्तद्वेदभागविशेषाद्ध्ययनाङ्गभूत-सावित्त्रा-ऽऽग्नेय-शुक्रियौपनिषद-शौलभ-महानाम्न्यादिव्रत- पालनतत्परो वटुर् द्विजाग्रर्चेणाऽऽचार्येण पित्त्रादिना यथार्हं साङ्गोपाङ्गान् वेदान् तादृशौ वेदौ तादृशवँ वेदवँ वा[2] सकल्पमेव वा वेदम्[3] आह्नन्निकादिन्यूनतमवैधद्द्विजकर्मबध्यः पर्याप्तैर् मन्त्रैस् सहिताङ्गायत्त्रीङ्[4] गायत्त्रीमेव[5] वाऽपि अद्ध्याप्य इति भावोऽस्य श्लोकस्य बोद्ध्यः ।

यद्द्यपप्यत्त्र शिक्षैव प्रकृता तथापि येषावँ वेदेऽधिकारस् तेषामेव शिक्षायामपि तदङ्गभूतायाम् मुख्योऽधिकार इति वेदाधिकारिणैव निरूपितेन शिक्षाया अपि अधिकारी निरूपितो भवतीतीदमत्त्रोक्तम् बोद्ध्यम् । शिक्षाशास्त्रस्य प्रयोजनञ् च वेदरक्षादिकमेव, तच्चाऽद्ध्यापनाऽद्ध्ययनमूलमिति अद्ध्यापनाऽद्ध्ययनविधयस् तदङ्गभूतमधिकार्य्यनधिकारिनिरूपणादि च शिक्षाशास्त्रविषयकोटावागन्तुमर्हन्ति इति ऋग्वेदप्रातिशाख्य-याज्ञवल्क्यशिक्षा- नारदीयशिक्षा-मण्डूकशिक्षाद्द्यनुरूपमेवात्त्राऽपि तेषान् निरूपणङ् कृतम् बोद्ध्यम् ।।३३।।

प्रकृतिर् यस्य कल्याणी दन्तोष्ठयँ यस्य शोभनम् ।
विनीतश् च प्रगल्भश् च स वर्णान् वक्तुमर्हति ।।३४।।[6]

वेदाद्ध्ययनाधिकारिविषये इदमप्यवधेयम्-यस्य स्वभावो धीरगम्भीररूपः कल्याणोऽस्ति, यस्य दन्तोष्ठजिह्वास्वरयन्त्रादीनि उच्चारणाङ्गानि शोभनानि प्रकृतिस्थानि च सन्ति, य इन्द्रियाणि वशे कर्तुं समर्थोऽस्ति विनयेन, यश् चाऽनावश्यकभयलज्जासङ्कोचादिरहितोऽशालीनस् स एव वेदवर्णान् देववाणीवर्णाँश् च सम्यगुच्चारयितुं समर्थो भवतीति ।।३४।।

---

१. मा. वा.श.ब्रा. ११।५।६।३। २. मनु.३।२,पा.गृ.सू. २।६।१-६। ३. पा.गृ.सू. २।६।८। ४. वी.मि.आ.प्र.पृ. ३२९ द्र. । ५. मा.वा.श. ब्रा.११।५।७।१०,मनु.२।७८,१०४,११८,पराशरस्मृतौ १२।३२,बौधायनगृह्यसूत्त्रे १।७।२ (निर्दिष्टा भागा एतदर्थपोषकाबोद्ध्याः)। ६.या.शि. १।२।२७-२८("दन्तोष्ठौ यस्य शोभनौ" इति तत्त्र पाठः)।

न करालो न लम्बोष्ठो नाऽव्यक्तो नाऽनुनासिकः ।
गद्गदो बद्धजिह्वश्च न वर्णान् वक्तुमर्हति ॥३५॥[1]

करालः करालाख्यदन्तरोगवान्, अत्युन्नतदन्त इत्यर्थः, स हि असर्वावृतमुखत्वाद् ओष्ठ्यान् स्पर्शवर्णान् सम्यगुच्चारयितुं न शक्नोति । लम्बोष्ठो बहिर्निर्गतात्यायतोपरितनोष्ठो यो दन्ताग्ररकरणकर्वं वर्णमुच्चारयितुन् न शक्नोति । अव्यक्तोऽव्यक्तवचनः । अनुनासिको मिन्मिनः, यस् स्वभावतस् सर्वदाऽनुनासिकस्स्वराणाम् प्रयोक्ता सन् अननुनासिकान् स्वरान् उच्चारयितुन् न शक्नोति । गद्गदः पदादिस्थादिवर्णानान् द्वित्वेन त्रित्वादिना वोच्चारयिता; 'भक्भके' इति नैपालीयभाषायाम् प्रसिद्धः । बद्धजिह्वो मद्ध्येमद्ध्ये विरम्म्यविरम्म्योच्चारयिता स्वभावतः । एते सर्वे मन्त्रादिवर्णान् सम्म्यगुच्चारयितुन् न शक्नुवन्तीति भावः । एतच् चोपलक्षणम् । शिक्षाशास्त्रोक्तलक्षण-युत-वर्णोच्चारण-प्रतिबन्धक-दोष-युता अन्न्येऽपि शास्त्रीयान् वर्णानुच्चारयितुन् न शक्नुवन्तीति बोद्ध्यम् । अयञ् चाऽनधिकारविचारो धर्मसम्बद्धवेदादिविद्द्याविषयक एवाऽभिप्रेतो मुख्यरूपेणेति बोद्ध्यम् ॥३५॥

(ख) शास्त्रविशेषस्स्याद्ध्यापनाय शिष्यस्स्य परीक्षा—

प्रशान्तमार्यचरितङ् क्षुद्रकर्मनिरादरम् ।
धृतिमन्तमहङ्कारशून्यम् मेधाविनन् तथा ॥३६॥

वितर्कस्स्मृतिसम्पन्नन् तत्त्वे चाऽभिनिवेशिनम् ।
उदारसत्त्वन् निभृतन् तद्विद्द्यकुलजन् तथा ॥३७॥

तद्विद्द्यवृत्तं वेशेनाऽनुद्धतञ् चाऽप्यकोपनम् ।
व्यसनस्स्पर्शरहितमर्थतत्त्वस्स्य भावकम् ॥३८॥

अव्यङ्गमिन्द्रियैस् सर्वैर् युक्तं शीलादिभिस् शुभैः ।
सम्पादिनञ् चाऽद्ध्ययनाऽभिकाममनुरक्तकम् ॥३९॥

दाक्षिण्यन सदाचारैर् युक्तञ् चाऽप्यनसूयकम् ।
अलुब्धकञ् चाऽनलसं सर्वभूतहितैषिणम् ॥४०॥

धर्म्याऽऽचार्यानुशिष्टीनां सर्वथा पालकं सदा ।
शिष्यं समद्ध्यापयेद् धि स्वशास्त्रं सकलम् बुधः ॥४१॥

---

१. या. शि. १।२।२६–२७ ।

यस्स्य कस्स्य चिच् शास्त्रस्स्य नित्त्यायाऽपि विशिष्टाया-ऽध्ययनाय, काम्म्याय लौकिकविद्द्याद्ध्ययनाय च शिष्ष्येऽपेक्ष्ष-णीयानाङ्ग गुणानाम् प्रदर्शनेन शिष्ष्यस्स्य परीक्षायाꣳ प्रकारस् सूच्च्यते– **प्रशान्तमार्यचरित**मित्त्यादिना । आर्यचरितम् न केवल-मर्थकामयोꣳ किन् तु चतुर्वर्गस्स्यैवाऽप्प्रतिकूलेन चरितेन युक्तम् । मेधाविनम् अर्थस्स्य तत्त्वतो ग्रहणस्स्य शक्त्या युक्तम् । उदार-सत्त्वम् महामनसम् । निभृतं समर्पितम् पित्त्रादिना स्वयन् दृढम् प्रपन्नवँ् वा । अर्थतत्त्वस्स्य भावकम् अर्थतत्त्वस्स्य पुनꣳपुनर् विचारकम् । दाक्षिण्ण्येन मेलनशीलत्त्वेन । तथा च प्राणाऽऽचार्यश् चरकोऽप्प्याह स्स्म– "अद्ध्यापने कृतबुद्धिराचार्यश् शिष्ष्यमेवाऽऽदितꣳ परीक्षेत । तद् यथा— प्रशान्तमार्यप्रकृतिमक्षुद्द्रकर्माण-मृजुचक्कुर्मुखनासावंशन् तनुरक्तविशदजिह्वमविकृतदन्तोष्ठमभिन्-मिनन् धृतिमन्तमनहङ्कृतम् मेधाविनवँ् वितर्कस्स्मृतिसम्पन्नमव्-यङ्गमव्व्यापन्नेन्द्रियन् निभृतमनुद्धतवेशमव्व्यसनिनमर्थतत्त्व-भावकमकोपनं शीलशौचाऽऽचारानुरागदाक्ष्यप्प्रादक्षिण्ण्योपपन्नमद्-ध्ययनाऽभिकाममर्थविज्ज्ञाने कर्मदर्शने चाऽनन्न्यकार्यमलुब्धम-नलसं सर्वभूतहितैषिणमाचार्यसर्वानुशिष्टिप्प्रतिकरमनुरक्तमेवङ्गुण-समुदितमद्ध्याप्प्यमेवाऽऽहुः"[१] इति । एवञ् च स्वकीया सकला विद्द्या अधिकारिणे शिष्ष्याय निश्छलन् देयैवेति नियमोऽपि सूचितꣳ प्राणाऽऽचार्येण चरकेण । तथा च श्रुतिरपि— "तस्मै स विद्द्वा-नुपसन्नाय सम्म्यक् प्रशान्तचित्ताय शमान्वियाय । येनाऽ-क्षरम् पुरुषवँ् वेद सत्त्यम् प्रोवाच तान् तत्त्वतो ब्रह्म्म-विद्द्याम्"[२] इति, "यद्द्यहमिममवेदिषङ्ग कथन् ते नावक्ष्यम्"[३] इति, "सवँ्वत्त्सरवासिनेऽनुब्ब्रूयात्"[४] इत्त्यादिका च । तथैव च स्मृति-रपि– "सवँ्त्सरोषिते शिष्ष्ये गुरुर् ज्ञानमनिर्दिशन् । हरते दुष्कृतन् तस्स्य शिष्ष्यस्स्य वसतो गुरुः"[५] इति, "स चूतवृक्षो विप्प्रो-ऽभूद् विद्द्वान् वै वेदपारगः । विद्द्या न दत्ता विप्रेब्भ्यस् तेनैव तरुताङ्गतः"[६] इति, "ज्ञानं सम्प्राप्प्य संसारे यꣳ परेब्भ्यो न यच्छति। ज्ञानरूपी हरिस् तस्मै प्रसन्न इव नेक्षते"[७] इति च ॥३६-४१॥

---

१. च.सं.३।८।७(८)। २. मु. उ. १।२।१३ । ३. प्र.उ. ६।१। ४. मा.वा.श.ब्रा. १४।१।१।२७। ५. वी.मि.सं.प्र.,पृ. ५१५ (चौ.सं.)। ६. स्मृतिकौस्तुभे, २६२ पृ. । ७. स.ना.ब्र.क., १।१५।

(ग) अथ विद्द्याग्रहणेऽनधिकारिणः

पञ्च विद्द्यान् न गृह्णन्ति चण्डास् स्तब्धाश् च ये नराः ।
अरसा रोगिणश् चैव येषाञ् च विसृतम् मनः ॥ ४२ ॥[1]

अल्पकमपि निमित्तमुपलब्ध्य निमित्तवँ विनैव वाऽपि ये भृशङ्कुप्यन्ति ते, गुरुजनोपदिष्टा अपि ये तदनुकूलमाचरणन् न कुर्वते अमृदुस्स्वभावाऽ परमवमानयितारश् च ते, ये विद्द्यार्जनादिकोद्द्योगेषु रसन् नानुभवन्ति ते, दीर्घतया शरीरेन्द्रियमनसां शिथिलीकरणेन च प्रकृष्टो यो रोगस् तेन युक्ताः, येषाञ् च मनो विषयाद् विषयवँ विशेषेणाऽनन्ताभिश् शाखाभिस् सृतं सद् व्यवसायरहितम् भवति ते इत्त्येते पञ्चविधाऽ पुरुषा विद्द्यान् न गृह्णन्तीत्त्यर्थः । अपि चोच्च्यते– "नान्न्योद्द्योगवता न चाऽप्प्रवसता नाऽत्मानमुत्कर्षता नाऽऽलस्स्योपहतेन नाऽऽमयवता नाऽऽचार्यविद्द्वेषिणा । लज्जाशीलविनम्म्रसुन्दरमुखीं सीमन्तिनीन् नेच्छता लोके ख्यातिकरस् सतामभिमतो विद्द्यागुणऽ प्राप्प्यते ।"[2] इति, "अलसो मन्दबुद्धिश् च सुखितो व्याधिपीडितः । निद्द्रालुऽ कामुकश् चैव षडेते शास्त्रवर्जिताः"[3] इति च । अन्न्यच्चोच्क्यते– "येषाञ् च न ग्रहणशक्तिरतिप्प्रचण्डा लब्ध्वा च ये न शतशऽ परिवर्तयन्ति । निद्द्राञ् च ये प्रियसखीमिव न त्त्यजन्ति ते तादृशा गुरुकुलेषु जरावँ व्रजन्ति"[4] इति । विद्द्यार्थिनो ब्राह्म्मणस्य अप्प्रवासे महान्तन् दोषवँ व्यासोऽपि स्स्मरति– "अपि च ज्ज्ञानसम्पन्नस् सर्वान् वेदान् पितुर् गृहे । श्लाघमान इवाऽधीयाद् ग्राम्म्य इत्त्येव तवँ विदुः"[5] इति, "भूमिरेतौ निगिरति सर्पो बिलशयानिव । राजानञ् चाऽविरोद्धारम् ब्राह्म्मणञ् चाऽप्प्रवासिनम्"[6] इति च । पञ्चतन्त्रकेऽपि– "विद्द्यावँ वित्तं शिल्पन् तावन् नाप्नोति मानवस् सम्म्यक् । यावद् व्रजति न भूमौ देशाद् देशान्तरं हृष्टः"[7] इति । चाणक्क्यनीतिदर्पणेऽपि– "गृहासक्तस्स्य नो विद्द्या नो दया मांसभोजिनः । द्रव्यलुब्धस्स्य नो सत्त्यं स्त्रैणस्स्य न पवित्त्रता"[8] इति ॥४२॥

---

१. या. शि. २।५।९९, ना. शि. २।८।१४; मा. शि. श्लो. १६९ । २. प्रा. भा. शि. प., पृ. १९ । ३. व्या. सु. सङ्ग. श्लो. ७५ । ४. मा. शि. श्लो. १६८ । ५. म. भा. १३।३६।१५ ६. तत्त्रैव १२।१३।१५, १३।३६।१६। ७. मि. भे. श्लो. ४०२ । ८. ११।५ ।

पदेनैकेन मेधावी पदानावँ विन्दते शतम् ।
मूर्खः पदसहस्रेण पदमेकन् न विन्दति ॥४३॥[1]

अर्थतत्त्वस्य ग्रहणे धारणे च पटुः शिष्य एकेन पदेन सम्यक् शिक्षितेन ज्ञातेन च पदानां शतवँ व्युत्पत्तिबलादेव स्वयमेव विन्दते, मूढबुद्धिस् तु शिष्यः पदानां सहस्रेणाऽपि शिक्षितेन एकमपि पदं सम्यङ् न जानीते इत्यर्थः । अथवा गुरुमनुगच्छन् मेधावी शिष्य एकेनैव गमनपदेन शब्दपदानां शतवँ विन्दते, मूर्खस् तु गमनपदसहस्रेणाऽपि एकमपि शब्दपदं सम्यङ् न गृह्णीते इत्यर्थः ॥४३॥

यस्य नाऽस्ति स्वयम् प्रज्ञा तस्य शास्त्रङ् करोति किम् ।
लोचनाभ्यावँ विहीनस्य दर्पणः किङ् करिष्यति ॥४४॥[2]

यस्य शिष्यस्य स्वकीया वस्तुतत्त्वम् प्रविश्य तत् सर्वथा बोद्धुं समर्था बुद्धिर् नास्ति, तस्य शास्त्रङ् किङ् करोति, न किमपि करोति; न हि शास्त्रं जडमपि शास्त्रार्थतत्त्वम् बोधयितुमलम्, शास्त्रन् तु केवलम् प्रज्ञां सत्पथे प्रवर्तयति, कतिपयान् पूर्वपुरुषैरवगतान् विषयाँश् च बोधयति; यथा शोभनोऽप्यादर्शोऽन्धस्य कृते प्रतिबिम्बस्य प्रकाशने मोघस् तथैव शास्त्रमपि जडस्य कृते शास्त्रार्थतत्त्वप्रकाशने मोघमित्यर्थः । विष्णुगुप्तोऽप्याह– "कृतकस् स्वाभाविकश् च विनयः, क्रिया हि द्रव्यवँ विनयति नाऽद्द्रव्यम् । शुश्रूषा-श्रवण-ग्रहण-धारण-विज्ञानो-ऽहा-ऽपोह-तत्त्वाभिनिविष्टबुद्धिवँ विद्द्या विनयति नेतरम्"[3] इति । अन्न्येऽप्याऽऽहुः– "नाऽद्रव्ये निहिता का चित् क्रिया फलवती भवेत् । न व्यापारशतेनाऽपि शुकवत् पाठ्यते बकः"[4] इति । अपि चोच्यते– "वितरति गुरुः प्राज्ञे विद्द्यायँ, यथैव तथा जडे न तु खलु तयोर् ज्ञाने शक्तिङ् करोत्यपहन्ति वा । भवति हि पुनर् भूयान् भेदः फलम् प्रति तद् यथा प्रभवति शुचिर् बिम्बग्राहे मणिर् न मृदश् चयः"[5] इति, "यस्य नाऽस्ति विवेकस् तु केवलयँ, यो बहुश्श्रुतः । न स जानाति शास्त्रार्थन् दर्वी पाकरसानिव"[6] इति च । पञ्चतन्त्रकेऽपि–"वरम् बुद्धिर् न सा विद्द्या विद्द्याया बुद्धिरुत्तमा । बुद्धिहीना विनश्यन्ति यथा ते सिंहकारकाः"[7] इति ॥४४॥

---

१. मा. शि. श्लो. १७२ । २. हि. उ. ३।११९ । ३. कौ. अ. १।५ । ४. हि. उ., प्र. श्लो. ४३ । ५. उ. रा. च. २ (विष्कम्भके), श्लो. ४ । ६. म. भा. २।५५।१ । ७. अपरीक्षितकारके, श्लो. ३६ ।

न शठाः प्राप्नुयुर् विद्द्यान् न क्लीबा न च मानिनः ।
न च लोकरवाद् भीता न च श्वश्श्वः प्रतीक्षकाः ।।४५।।[1]

अग्रतः प्रियं वदन्ति कुर्वन्ति च किन्तु पृष्ठतो विप्रियं वदन्ति कुर्वन्ति चेति विदिता ये ते, ये पौरुषोत्साहरहितास् ते, अभिमानिनः, ये 'असुको गुरुविनयवृत्त्यादिविषमन् दीर्घकालापेक्षम् प्रवासार्थापगमादिनाऽतीव कष्टमद्ध्ययनवं विनैव प्रभूततरन् धनं समर्चैषीद् राजादिसम्मानञ् च प्रापत्, त्वन् तु एतावता कष्टेन एतावता व्ययेन कुटुम्बपीडनेन एतावता कालेन च वेदादिकमधीत्यापि नाऽर्थोपार्जनङ कुरुषे, अथ चाऽधिजिगांससे न चाऽर्थाद्द्द्युपार्जनङ करिष्यसे, यदि करिष्यसे तदापि अल्पमेव न प्रभूतम्, अतस् त्वमसमीक्ष्यकारी मन्दकोऽसि' इत्यादेर् लोकप्रवादाद् बिभ्यति ते, श्वोऽद्ध्येतास्महे श्वोऽद्ध्येतास्महेऽलमद्द्य इति शश्श्वत् प्रतीक्षकाश् च ये ते च विद्द्यामधिगन्तुन् नैव शक्नुयुरित्यर्थः । लोको हि रजोमोहावृतः प्रियमेव सिषेविषते न हितम्, अतस् सता विचारकेण न सर्वत्तर लोकः प्रमाणयितव्यः । अत एव यद्द्यपि 'आचार्यस् सर्वचेष्टासु लोक एव हि धीमतः । अनुकुर्यात् तमेवाऽतो लौकिकेऽर्थे परीक्षकः''[2] इत्यपि केचिद् वदन्ति, तथापि प्राणाचार्यश् चरकः– ''सुखार्थास् सर्वभूतानाम् मतास् सर्वाः प्रवृत्तयः । ज्ञानाऽज्ज्ञानविशेषात् तु मार्गाऽमार्गप्रवृत्तयः । हितमेवाऽनुरुद्ध्यन्ते प्रपरीक्ष्य परीक्षकाः । रजोमोहावृतात्मानः प्रियमेव तु लौकिकाः । श्रुतम् बुद्धिस् स्मृतिर् दार्ढ्यन् धृतिर् हितनिषेवणम् । वाग्विशुद्धिश् शमो धैर्यमाश्रयन्ति परीक्षकम् । लौकिकन् नाश्रयन्त्येते गुणा मोहतमश्शिरतम् । (तत् स्युस् तस्यैव बहुला रोगाश् शारीरमानसाः)''[3] इत्याह । व्यासोऽपि ''कारणाद् धर्ममन्विच्छेन् न लोकाचरितञ् चरेत्''[4] इति प्राह ।।४५।।

(घ) अथ विद्द्याग्रहणानुकूल्यसम्पादका विद्द्यार्थिनो नियमाः

न भोजनविलम्बी स्यान् न च नारीनिबन्धनः ।
सुदूरमपि विद्द्यार्थवं वरजेद् गरुडहंसवत् ।।४६।।[5]

---

१. ना. शि. २।८।२६, म. भा. १२।१४०।२३ । २. अ. हृ., सू. स्था. २।४५ । ३. च. सं. १।१८। ३४–३७ । ४. म. भा. १२।१६२।५३ । ५. ना. शि. २।८।२४, या. शि. २।५।१०१, मा. शि. श्लो. १६२ ।

अहेरिव गणाद् भीतस् सम्मानान् नरकादिव ।
राक्षसीभ्य इव स्त्रीभ्यस् स विद्द्यामधिगच्छति ॥४७॥[1]
सुखार्थी चेत् त्यजेद् विद्द्यावँ् विद्द्यार्थी चेत् त्यजेत् सुखम् ।
सुखार्थिनः कुतो विद्द्या विद्द्यार्थिनि कुतस् सुखम् ॥४८॥[2]
अन्नवव्यञ्जनयोर् भागौ तृतीयमुदकस्य च ।
वायोस् सञ्चरणार्थाय चतुर्थमुपकल्पयेत् ॥४९॥[3]
कौक्षेयाग्निं सदा रक्षेदश्नीयादशनं हितम् ।
जीर्णाहारः प्रबुद्धस् सन्नुषसि ब्रह्मम चिन्तयेत् ॥५०॥[4]
हयानामिव जात्यानामर्धरात्रार्धशायिनाम् ।
न हि विद्द्यार्थिनान् निद्द्रा चिरन् नेत्रेषु तिष्ठति ॥५१॥[5]
शरद्विषुवतोऽतीतादुषस्युत्थानमिष्यते ।
यावद् वासन्तिकी रात्रिर् मद्ध्यमा पर्युपस्थिता ॥५२॥[6]
रात्रेः पूर्वोत्तरौ यामौ वेदाभ्यासेन यो नयेत् ।
यामद्द्वयं शयानश् च ब्रह्मम्मभूयाय कल्पते ॥५३॥[7]
युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ।
युक्तस्स्वप्नावबोधस्य योगो भवति दुःखहा ॥५४॥[8]

नारीनिबन्धनो नारीपरतन्त्रः । गरुडहंसवत् यथा गरुडो हंसश् च सुदूरमपि मानसादि-स्वेष्टस्स्थानङ गच्छतस् तथा, गरुडस्स्येव वेगवत्त्या हंसस्स्येव धैर्यपूर्वकया च गत्येत्त्यर्थो वा बोद्ध्यः । सुखार्थी वैषयिकं सुखम् प्रार्थयिता । आमाशयस्स्य चतुरो भागान् कल्पयित्त्वा तत्र अन्नादीनाम् भागान् कल्पयेदित्त्यर्थः । जात्यास् श्रेष्ठजातिकाः । अर्धरात्रार्धं रात्रेश् चतुर्थो भागः । अथवा रात्रेरर्धम् भागमेव अर्धेन एकेनैव पार्श्वेन शयितुं शीलयँ् येषान् तेषामित्त्यर्थो बोद्ध्यः । शरद्विषुवतश् शारदात् समरात्त्रिन्दिवात् कालात् । मद्ध्यमा दीर्घतमाया ह्रस्स्वतमायाश् च रात्रेर् मद्ध्ये समाने दूरत्त्वे स्थिता रात्त्रिः । दिवसेन समा वसन्तविषुवद्रात्त्रिरित्त्यर्थः । विद्द्यार्थिनस् समुपकारका अन्न्येऽपि नियमा अत्त्रैवोपक्षेप्तव्याः – "एकाकिना तपो द्वाभ्याम् पठनङ गायनन् त्रिभिः । चतुर्भिर् गमनङ क्षेत्त्रम् पञ्चभिर्

---

१. ना. शि. २।८।२५, या. शि. २।५।१००, मा. शि. श्लो. १६४ ।
२. या.शि. २।५।१०२ । ३. तत्त्रैव २।५।१०९ । ४. ना.शि.२।८।१।
५. ना. शि. २।८।२३, या. २।५।१०८, मा. शि. श्लो. १६३ ।
६. ना. शि. २।८।२ । ७. द. स्मृ. ७।७१ । ८. गी. ६।१७ ।

बहुभी रणम्"[1] इति, "विद्द्यार्थी सेवकꣳ पान्थꣳ क्षुधार्तो भयकातरः। भण्डारी प्रतिहारश् च सप्त सुप्तान् प्रबोधयेत्"[2] इति, "श्वाननिद्द्रो बकद्ध्यानस् तथा काकावधानकः। अल्पाहारस् त्यक्तगृहो विद्द्यार्थी पञ्चलक्षणः"[3] इति, "कामक्रोधौ तथा लोभं स्वादु शृङ्गार-कौतुके। अतिनिद्द्राऽतिसेवे च विद्द्यार्थी ह्यष्ट वर्जयेत्"[4] इति च ॥४६-५४॥

५. अथ अद्ध्ययनविधिनिरूपणम्

(क) नित्त्यमद्ध्ययनम्

वेदष् षडङ्गो विप्रेणाऽद्ध्येतव्यो ज्ञेय एव च।
अनपेक्ष्यैव किमपि गृह्यमाणन् निमित्तकम् ॥५५॥
योऽनधीत्त्य द्द्विजो वेदमन्यत्त्र कुरुते श्रमम्।
स जीवन्नेव शूद्द्रत्त्वमाशु गच्छति सान्वयः ॥५६॥[5]
इत्त्याचार्याश् च स्वाद्ध्यायोऽद्ध्येतव्य इति वेदवाक्।
शास्ति चाऽतो यथाशक्ति द्विजो वेदम् पठेद् व्रती ॥५७॥

"ब्राह्म्मणेन निष्कारणो धर्मष् षडङ्गो वेदोऽद्ध्येयो ज्ञेयश् च"[6] इत्त्यागमाद्, "योऽनधीत्त्य द्द्विजो वेदम्"[7] इत्त्यादिना स्मृतिवचनेन वेदाद्ध्ययनरहितस्य द्विजस्य, "यथा दारुमयो हस्ती यथा चर्ममयो मृगः। ब्राह्म्मणश् चाऽनधीयानस् त्रयस् ते नाम बिब्भ्रति"[8] इति महाभारतादिवचनेन, "न वै सोम्म्याऽस्मत्कुलीनोऽननूच्च्य ब्रह्म्मबन्धुरिव भवति"[9] इति श्रुत्त्या च द्विजाग्र्यस्य वेदाद्ध्ययनरहितस्य विशेषतो निन्दितत्त्वाद्, प्रशंसार्थवादेषु वेदाद्ध्ययनफलत्त्वेन श्रुतानामपि लोकपूजावृत्त्यादीनावँ वेदाद्ध्ययनफलत्त्वेनाऽस्वीकाराद् वेदाद्ध्ययनस्य काम्म्यत्त्वे वेदार्थावबोधे वेदद्द्वारा प्राप्प्याणां स्वर्गादिफलानाङ्कामना, वेदद्द्वारा प्राप्प्याणां स्वर्गादिफलानाङ्कामनायां सत्त्यां षडङ्गोपेतवेदाद्ध्ययनप्रवृत्तस्यार्थावबोध इत्त्यन्न्योन्न्याश्रयतायाꣳ प्रसङ्गाद्, "अथब्ब्रह्म्मयज्ञः स्वाद्ध्यायो वै ब्ब्रह्म्मयज्ञस्तत्तस्य वा एतस्य ब्ब्रह्म्मयज्ञस्य वागेव जुहूर्म्मन उपभृच् चक्षुरद्ध्रुवा मेधा स्स्रुवः सत्त्यमवभृथः स्वर्ग्गो लोक उदयनयँ यावन्तं ह वा इमाम् पृथिवीवँ वित्तेन पूर्ण्णान् ददल् लोकञ् जयति त्रिस् तावन्तञ्

---

१. चा.नी. ४।१२। २. तत्त्रैव ९।६। ३. लौकिकं सुभाषितम्। ४. चा. नी. ११।१०। ५. मनु. २।१६८। ६. पा. व्या. भा. (पस्पशाह्न्निके)। ७. मनु. २।१६८। ८. म. भा. १२।३६।४६; मनु. २।१५७। ९. छा. उ. ६।१।१।

जयति भूयांसञ् चाऽक्षय्ययँ य एवँ विद्वानहरहः स्वाध्यायमधीते, तस्मात्स्वाध्यायोऽध्येतव्यः"[1] इत्यादौ स्वाध्यायाध्ययनस्य नित्यताया दर्शनात्, "अथातः स्वाध्यायप्रशंसा प्रियेण स्वाध्यायप्रवचने भवतो युक्तमना भवत्यपराधीनोऽहरहरर्थानुत्साधयते सुखं स्वपिति परमचिकित्सक आत्मँ मनो भवतीन्द्रियसयँयमश्चैकाऽऽरामता च प्रजज्ञावृद्धिर्यशो लोकपक्तिः प्रजज्ञा वर्द्धमाना चतुरो धर्मान्ब्राह्मणमभिनिष्पादयति ब्राह्मणस्य प्रतिरूपचर्यायँ यशो लोकपक्तिलँ लोकः पच्यमानश्च चतुर्भिर्धर्मैर्ब्राह्मणम् भुनक्त्यर्चया दानेन चाऽजय्येयतया चाऽवध्यतया च"[2] इत्यादेस् स्वाध्यायप्रशंसार्थवादस्य श्रवणाच् च ब्रती द्विजो यथाशक्ति वेदम् पठेदित्यर्थः। शक्त्यादिकमपेक्ष्यैव शास्त्रन् नियुङ्क्ते[3] इति स्वस्य शक्तिवँ वृत्तिसम्भावनाञ् करमक्षेत्तरलँ, लौकिकीमेषणाञ् चानुरुद्ध्य शिक्षा-कल्प-व्याकरण-निरुक्तच्छन्दो-ज्योतिषैष् षड्भिरङ्गैस् सहिताँश् चतुरो वेदाँस् त्रीन् वा, तादृशौ वेदौ, तादृशं स्वशाखावेदवँ वा अधीयीत[4], कल्पेनैव सहितवँ वा स्वशाखावेदमधीयीत,[5] आह्नन्निकादिन्यूनतमद्द्विजकर्मबभ्यः पर्याप्तैर् मन्त्रैस् सहितां सावित्त्रीमेव वाऽपि[6] अधीयीतैव, न वेदं सर्वथा परित्यज्ज्यान्ऽन्यत्तर व्यासक्तो भवेद् द्विजत्वबीजमपि नङ्क्ष्यतीति भयात्। न च सर्वेषामेवाऽनूचानत्वं राष्ट्रहिताय भवतीति न सर्वैरनूचानत्वप्राप्तये आग्रहातिशयः कर्तव्य इति आह्नन्निकादिन्यूनतम-द्विजकर्मपर्याप्तैर् मन्त्रैस् सहितां सावित्त्रीमधीत्य यथावश्यकयँ यथारुचि यथाशक्ति धन्न्यानि हितानि बुद्धिवृद्धिकराणि च दृष्टफलानि वार्ताशास्त्र-दण्डनीत्याऽऽदीनि शास्त्राण्यधीयीत, वार्तायां सेवायाम् भृतके वा प्रवृत्तो भवेद् यथार्हम्। तथा च धर्मविदो ब्राह्मणमप्यधिकृत्य प्राहुः—"अजीवँस् तु यथोक्तेन ब्राह्मणस् स्वेन कर्मणा। जीवेत क्षत्त्रधर्मेण स ह्यस्य प्रत्यनन्तरः॥ उभाभ्यामप्यजीवँस् तु कथं स्यादिति चेद् भवेत्।

---

१. मा. वा. श. ब्रा. ११।५।६।३। २. तत्तैव। ३. ध. मी. ६।१।१-५२, ६।३।१-७। ४. पा. गृ. २।६।१-६, मनु. ३।२। ५. पा. गृ. २।६।८ ६. मनु. २।७८, १०४, ११८; पराशरस्मृतौ १२।३२; बौधायनगृह्यसूत्रे १।७।२; मा. वा. श. ब्रा. ११।५।७।१० (निर्दिष्टानि ग्रन्थस्थलानि मूलोक्तस्यार्थस्योपोद्बलकानि बोद्ध्यानि)।

कृषिगोरक्ष्यमास्थाय जीवेद् वैश्यस्य जीविकाम्"[1] इति; दण्डनीतिविदोऽपि– "कारुशिल्पिगणान् राष्ट्रे रक्षेत् कार्यानुमानतः। अधिकान् कृषिकृत्सेवाभृत्यवर्गे नियोजयेत्"[2] इति, "अनन्योन्यरक्षकः खन्याकर-द्रव्यनागवनवान् अनतिवृद्धानतिहीनग्रामो बहुसारविचित्रधान्यपण्योत्पत्तिरदेवमातृकः पशुमनुष्यहितश्शरेणिशूद्ररक्षकप्राय इति जनपदगुणाः"[3] इति च। लोकस्य वार्तामूलत्वाद् वार्ताऽपि न ह्युपेक्षणीया, तथा चाऽऽहुः – "वार्तामूलो ह्ययलं लोकस्त्रय्या वै धार्यते सदा। तत् सर्वं वर्तते सम्यग् यदा रक्षति भूमिपः।"[4] इति। तत्र ब्राह्मणस् तु "ऋतञ् च स्वाध्यायप्रवचने च, सत्यञ् च स्वाध्यायप्रवचने च, तपश्च स्वाध्यायप्रवचने च, दमश्च स्वाध्यायप्रवचने च, शमश्च स्वाध्यायप्रवचने च, अग्नयश्च स्वाध्यायप्रवचने च, अग्निहोत्रञ् च स्वाध्यायप्रवचने च, अतिथयश्च स्वाध्यायप्रवचने च, मानुषञ् च स्वाध्यायप्रवचने च, प्रजा च स्वाध्यायप्रवचने च, प्रजनश्च स्वाध्यायप्रवचने च, प्रजातिश्च स्वाध्यायप्रवचने च, सत्यमिति सत्यवचा राथीतरः, तप इति तपोनित्यः पौरुशिष्टिः, स्वाध्यायप्रवचने एवेति नाको मौद्गल्यः, तद् धि तपस्तद् धि तपः"[5] इति, "ऋणं ह वै जायते योऽस्तीति। स जायमान एव देवेभ्य ऋषिभ्यः पितृभ्यो मनुष्येभ्यः"[6] इत्यादिकाञ् च श्रुतिम्, "वेदमेवाभ्यसेन्नित्यं यथाकालमतन्द्रितः। तं ह्यस्याऽऽहुः परन् धर्ममुपधर्मोऽन्य उच्यते"[7] इति स्मृतिम्, "परिनिष्ठितकार्यस् तु स्वाध्यायेनैव ब्राह्मणः। कुर्यादन्यन् न वा कुर्यान् मैत्रो ब्राह्मण उच्यते"[8] इति महाभारतवचनञ् च विचार्य स्वाध्यायाध्ययने विशिष्टमभिनिवेशङ्कुर्यादिति विवेकोऽपि कार्यः ॥५५–५७॥

(ख) अथ सुसम्प्रदायप्रशंसा

सुतीर्थादागतवं व्यक्तं स्वाध्यायं सुव्यवस्थितम्।
सुस्वरेण सुवक्त्रेण प्रयुक्तम् ब्रह्म राजते ॥५८॥[9]

---

१. मनु. १०।८१–८२। २. शु. नि. ४।३७८। ३. नी. वा. १९।८। ४. म. भा. १२।६८।३५। ५. तै. आ. ७।९। ६. मा. वा. श. ब्रा. १।७।२।१–६। ७. मनु. ४।१४७। ८. म. भा. १२।६०।१२, २३८।१३। ९. ना. शि. २।८।११, मा. शि. श्लो. १५९, पा. शि. श्लो. ५१।

सुयोग्यादाचार्यादधीतस् स्पष्टस् सम्यगद्ध्ययनेन गृहीतो लक्षणशास्त्रेणाऽनुगतत्वात् सुसम्प्रदायसर्ववादाच् च सुनिर्णीतेन स्वरूपेण युक्तस् स्वरमाधुर्यादिपाठगुणवता शोभनदन्तोष्ठाद्द्च्युच्चारणाङ्गशालिना पुरुषेणोच्चारितो वेदश् शोभया प्रभावेण च दीप्प्रो भवतीत्यर्थः ॥५८॥

येषान् तीर्थाऽऽगता विद्द्या नित्त्याब्भ्यासेन वर्तिता ।
ते भवन्ति दुराधर्षास् ससिंहा इव पर्वताः ॥५९॥[1]

सदाचार्यादागता नित्त्येनाब्भ्यासेन स्वस्मिन् स्थिरतया वर्तमाना कृता विद्द्या येषाम् भवति ते ससिंहगह्वरा× पर्वता इव केनापि धर्षयितुमशक्या भवन्तीत्यर्थः ॥५९॥

वटव× पण्डिता मूर्खा अनन्योन्याद्ध्यापकाश् च ये ।
दोषङ्ग कुर्वन्ति ते मूढास् तस्माद् वृद्धन् तु सेवयेत् ॥६०॥[2]

अचिराद् वेदाम्नाने प्रवृत्ताश् चञ्चला वटवः, ये सदाचार्याद् वेदं सम्यग् नाऽधीतवन्तस् तथापि शास्त्रान्तरपाण्डित्त्यावष्टम्भाद् वेदेऽपि विनैव सदाचार्योपासनम् प्रवेशङ्ग कर्तुमिच्छन्ति ते पण्डिताः, अविचारशीला अल्पश्श्रुता मन्दबुद्धयः, सदाचार्याद् ये वेदन् नाधीतवन्तः किन्तु "पुस्तकप्प्रत्त्ययाधीतन् नाऽधीतङ्ग गुरुसन्निधौ । न शोभते सभामद्ध्ये जारगर्भ इव स्त्रियाः"[3] इत्त्यादेर् निन्दायाश् श्रवणाद् "वेदस्स्याद्ध्ययनं सर्वङ्ग गुर्वद्ध्ययनपूर्वकम् । वेदाद्ध्ययनरूपत्वादधुनाऽद्ध्ययनयँ यथा ।"[4] इत्त्यादेश् शिष्टप्प्रसिद्धेश् च स्वकृतस्स्य वेदोच्चारणस्स्य गुरूच्चारणपूर्वकत्त्वं सम्पिपादयिषवो "यथा खरश् चन्दनभारवाही भारस्स्य वेत्ता न तु चन्दनस्स्य । एवं हि शास्त्राणि बहून्न्यधीत्त्य चाऽर्थेषु मूढा× खरवद् वहन्ति"[5] इति न्न्यायेन उक्तवचनबाह्य्यार्थमेव गृह्णन्नानास् तद्रहस्स्यबोधविधुरा अनन्योन्यमद्ध्यापयन्ति ते च विवेकाक्षमा× पदेपदे मुह्य्यमाना वेदसम्पाठपठने दोषन् जनयन्ति । अतो यस् सुसम्प्रदायम् प्राप्तुवँ वाञ्छति स वक्ष्यमाणलक्षणवँ वृद्धं सेवेत, वेदे विनेयान् स्वानपि वेदग्रहणार्थन् तादृशस्स्यैव वृद्धस्स्य सेवायायँ योजयेदित्त्यर्थः ॥६०॥

उच्चारणायाङ्ग करणे मुखन्न्यासे च य× पटुः ।
प्रतिज्ज्ञायां स्वरावेशे स वृद्धश् शास्त्रसम्मतः ॥६१॥

---

१. मा. शि. श्लो. १६१ । २. ऋ. प्रा. व. वृ. श्लो. ८ ।
३. ना. शि. २।८।१९ "जारगर्भा इव स्त्रियः" इति तत्तर पाठः ।
४. श्लो. वा., वाक्य. ३६६ । ५. सुश्श्रुतसंहितायाम् १।४।४ ।

यथासम्प्रदायम् यथाशिक्षाशास्त्रञ्च शुद्धेन रूपेणोच्चारणे, करणापरपर्याये शिक्षादिलक्षणशास्त्रे, वेदप्रवचनादौ हस्ताग्रे दृष्टिन्दत्त्वा मुखं स्थिरञ्च कृत्वा करणीयेषु आसनविशेषेषु, आचार्यपरम्परागतमन्त्रादिस्वरूपनिर्णये, अङ्गुलिपर्वसु अङ्गुष्ठं सञ्चार्य हस्तचलनादिकञ्च कृत्वा वा उदात्तानुदात्तस्वरितादीनाम्, क्रुष्ट-प्रथम-द्वितीय-तृतीय-तुर्य-मन्द्रा-ऽतिस्वार्य-नीचानां सामस्वराणाञ्च वा यथायथं सङ्केतने च यत्पटुस् स शास्त्रसम्मतस् सेवनीयो वैदिको विद्वानाचार्य इत्यर्थः। तथा हि नारदीयशिक्षायामपि पठ्यते- "पञ्चविधमाचार्यकन् नाम मुखन्यासस् स्वरनिवेशत्करणम् प्रतिज्ञोच्चारणा"[1] इति।

(ग) अथ कुसम्प्रदायनिन्दा

कुतीर्थादागतन् दग्धमपवर्णञ् च भक्षितम्।
यत् तत्पाठे न मोक्षोऽस्ति पापाहेरिव किल्बिषात् ॥६२॥[2]

येनाऽऽचार्यात् साङ्गो वेदो नाऽधीतस् तस्मादल्पश्श्रुतादुपाद्ध्यायादागतम्, अत एव भस्मेव गतरसन् दीप्तिरहितञ् च, वर्णानां सदुच्चारणेन रहितम्, त्वरया उच्चारणदोषप्रकाशभयेन वा अन्तरदन्तकेनाऽस्पष्टमुच्चारितञ् च यद् ब्रह्मम तस्य पाठे प्रकोपिताद् असन्दश्श्याऽनिवर्तिनत् पापसर्पादिव किवँ विषसदृशाद् (मन्दविषसदृशाद्) अनर्थमजनयित्त्वाऽनिवर्तिनत् पापाद् मोक्षो नैव भवतीत्यर्थः ॥६२॥

पुस्तकप्रत्त्याधीतन् नाधीतञ् गुरुसन्निधौ।
न ब्भ्राजते सभामद्ध्ये जारगर्भ इव स्त्रियाः ॥६३॥[3]

आचार्यमुखादश्श्रुतम् श्रुतमपि आचार्यस्य समीपे तत्संश्रवे स्थित्त्वा कृतेनाऽब्भ्यासेन रहितम् पुस्तकलेखमात्त्रप्रत्त्ययात् केवलं स्वमनीषिकयाऽधीतम् ब्रह्मम यथा स्त्रिया जाराहितो गर्भो धर्मनिर्णेतृपरिषदि न ब्भ्राजते तथैव दोषज्ञमण्डले न ब्भ्राजते इत्यर्थः ॥६३॥

(घ) अथ काम्यविद्द्यावरणविचारः

विद्द्यासाधनकार्यस्य तत्फलस्य च गौरवम्।
लाघवन् देशकालौ च स्वसामर्थ्यम् परिस्थितिम् ॥६४॥
विदित्त्वा स्वस्य साद्ध्याञ् च फलगौरवशालिनीम्।
रुच्यामपि च मन्न्येत यान् तावँ विद्द्यां श्रयेद् बुधः ॥६५॥[4]

---

१. ना. शि. २।७।९। २. पा. शि. श्लो. ५०; ना. शि. २।८।१०, मा. शि. श्लो. १६०। ३. ना. शि. २।८।१९। ४. तुलना कार्या— च. सं. ३।८।२।

धर्मायाऽधर्मनिवारणाय च त्रयी अध्येतव्या, अर्थाय वार्ता, नयायाऽपनयनिवारणाय च दण्डनीतिः, त्रयी-वार्ता-दण्डनीतिषु पक्षप्रतिपक्षयोर् बलाबलयोरन्वीक्षणाय व्यसने उदये च बुद्धेरवस्थापनाय प्रज्ञावाक्यक्रियावैशारद्याय च आन्वीक्षिकी नाम मीमांसा-साङ्ख्य-योग-लोकायतयक-न्यायादिका विचारपद्धतिः[1]। तत्राऽपि विद्याप्रियैः कस्याञ् चिद् विद्यायामभियोगःकार्य इति विद्याविशेषो वरणीयः। तत्र विद्याविशेषवरणवैचक्षण्यायोपदिश्यते-**विद्यासाधनकार्यस्स्ये**त्यादिना। विद्याविशेषसाधनकार्यस्य गौरवलाघवे साधितविद्याविशेषफलस्य च गौरवलाघवे विचार्य, देशकालौ, विद्याविशेषसाधने स्वस्य द्रव्य-शरीर-बुद्धिकृतं सामर्थ्यम् परिस्थितिञ् च विदित्वा स्वस्य साध्याङ गुरुणा फलेनाऽनुबद्धां स्वाभिरुचेरनुकूलाञ् च यावँ विद्याम् मन्येत तामेव विद्यावँ विचारशीलः पुरुषः प्राणिनामनुग्रहाय राष्ट्रहिताय शास्त्रानुपालनाय वृत्तये च सेवेत स्वकीयाँश् च भ्रातापुत्रादीनेवमेव प्रवर्तितुमुपदिशेच्चेत्यभिप्रायः ॥६४-६५॥

(ङ) अथ पाठ्यग्रन्थचयनविचारः

लेखसम्पत्समायुक्तः ख्यातो धीरैश् च सेवितः।
समासेन च व्यासेनाऽप्यर्थानाम् प्रतिपादकः ॥६६॥
मन्दमध्यमप्रज्ञैश् च सुग्राह्यो धार्य एव च।
अकष्टशब्दो विशदोऽविच्छिन्नागमकस् तथा ॥६७॥
लक्षणोदाहृतियुतस् तत्त्वनिश्चयकारकः।
स्वाभीष्टविद्याग्रन्थो यस् तम् पठेद् बुद्धिमान् नरः ॥६८॥

लेखसम्पच् च विष्णुगुप्तकौटल्योक्ता यथा- "अर्थक्रमस् सम्बन्धः परिपूर्णता माधुर्यमौदार्यं स्पष्टत्वमिति लेखसम्पत्। तत्र यथावदनुपूर्वक्रिया प्रधानस्यार्थस्य पूर्वमभिनिवेश इत्यर्थक्रमः। प्रस्तुतस्यार्थस्याऽनुपरोधादुत्तरस्य विधानमासमाप्तेरिति सम्बन्धः। अर्थपदाक्षराणामन्यूनाऽनतिरिक्तता हेतूदाहरणदृष्टान्तैरर्थोपवर्णनाऽश्रान्तपदतेति परिपूर्णता। सुखोपनीतचार्वर्थाभिधानम् माधुर्यम्। अग्राम्यशब्दाभिधानमौदार्यम्। प्रतीतशब्दप्रयोगस् स्पष्टत्वमिति।"[2] इति। "इष्टं हि विदुषाँ लोके

---

१. तुलना कार्या— कौ. अ. १।२। २. कौ. अ. २।१०।

समासव्यासभाषणम्"[1] इति हि बह्वर्थग्रन्थरक्षावरतिनः। एवं हि विद्द्यातद्ग्रन्थवरणवैचक्षण्यमुपदिशति प्राणाचार्यश् चरकोऽपि– "बुद्धिमानात्मनः कार्यगुरुलाघवे कर्मफलमनुबन्धन् देशकालौ च विदित्वा युक्तिदर्शनाद् भिषग् बुभूषुश् शास्त्रमेवादितः परीक्षेत। विविधानि हि शास्त्राणि प्रचरन्ति लोके। तत्र यन् मन्येत सुमहद् यशस्स्वि धीरपुरुषसेवितमर्थबहुलमाप्तजनपूजितन् त्रिविधशिष्यबुद्धिहितमपगतपुनरुक्तदोषमार्षं सुप्रणीतसूत्रभाष्यसङ्ग्रहक्रमं स्वाधारमनवपतितशब्दमकष्टशब्दम् पुष्कलाभिधानङ् क्रमाऽऽगतार्थमर्थतत्त्वनिश्चयप्रधानं सङ्गतार्थमसङ्कुलप्रकरणमाशुप्रबोधकलँ लक्षणवच् चोदाहरणवच् च तदभिप्रपद्द्येत शास्त्रम्। शास्त्रं ह्येवँविधममल इवादित्यस् तमो विधूय प्रकाशयति सर्वम्।"[2] इति ॥६६–६८॥

(च) अथ आचार्यवरणविचारः

अवदातश्श्रुतवँ विज्ज्ञन् दृष्टकर्माणमेव च।
नानागमविचारेण चोपसृतनिजागमम् ॥६९॥
एकान्तागग्रहशून्यञ् च तत्त्वे त्वभिनिवेशिनस्।
अहङ्कारेण रहितं शिष्यप्रियमतन्द्रितम् ॥७०॥
शुचिं शिक्षोपकरणैर् युक्तं स्वस्थेन्द्रियन् तथा।
अकोपनङ् क्लेशसहम् प्रतिपत्तिज्ज्ञमेव च ॥७१॥
प्रकृतिज्ज्ञञ् ज्ञापने च समर्थमनसूयकम्।
विद्द्याप्रचारणधियमुपयायात् तु सद्गुरुम् ॥७२॥

एकान्तागग्रहशून्यम् अनवस्थितेषु वादेषु एकतमपक्षे आग्ग्रहातिशयमकर्तारम्। तत्त्वे त्वभिनिवेशिनन् निर्णीते व्यवस्थिते तु तत्त्वे सदाग्ग्रहङ कर्तारम्। प्रतिपत्तिज्ज्ञं शिष्यस्स्य बोधाबोधौ बोधशक्तिवँ वा ज्ञातारम्। प्रकृतिज्ज्ञं शिष्यस्स्य मन्दमद्ध्यमोत्तमप्रज्ज्ञत्वम् प्रवृत्तिं स्वभावादिकञ् च विवेक्तुङ कुशलम्। तथा हि प्राणाचार्यश् चरकोऽपि आचार्यपरीक्षामुपदिशति– "ततोऽनन्तरमाचार्यम् परीक्षेत। तद् यथा– पर्यवदातश्श्रुतम् परिदृष्टकर्माणन् दक्षन् दक्षिणं शुचिञ् जितहस्तमुपकरणवन्तं सर्वेन्द्रियोपपन्नम् प्रकृतिज्ज्ञम् प्रतिपत्तिज्ज्ञमुपसृतविद्द्यमनहङ्कृतमनसूयकमकोपनङ क्लेशक्षमं शिष्यवत्सलमद्ध्यापकञ् ज्ञापनसमर्थञ् चेति। एवङ्गुणो ह्याचार्यस् सुक्षेत्तरमार्तवो

---

१. म. भा. १।१।५१; काम. सू. १।१।२४। २. च. सं. वि. स्था. ८।२।

मेघ इव सस्यगुणैस् सुशिष्यमाशु वैद्यगुणैस् सम्पादयति ।"[१] इति । महाकविरप्याह "श्लिष्टा क्रिया कस्य चिदात्मसंस्था सङ्क्रान्तिरन्यस्य विशेषरूपा । यस्योभयं साधु स शिक्षकाणां धुरि प्रतिष्ठापयितव्य एव"[२] इति । कस्य चिच् छास्त्रस्य आचार्येण शिष्येण वाऽपि आवश्यकानां शास्त्रान्तरोक्तानामर्थानामपि विज्ञेयत्वम् "अन्यशास्त्रोपपन्नानाञ् चार्थानामिहोपनीतानामर्थवशात् तेषान् तद्विद्यैवाभ्य एव व्याख्यानमनुश्रोतव्यम् । कस्मात् ? न ह्येकस्मिन् शास्त्रे शक्यस् सर्वशास्त्राणामवरोधं कर्तुमिति"[३] इति सुश्रुतोक्तमपि अत्र स्मरणीयम् । यस् तु वृतोऽप्याचार्यस् सम्यङ् नाध्यापयति तन् तु जह्यात् । तथा हि महाभारतेऽप्युक्तम्– "षडेतान् पुरुषो जह्याद् भिन्नान् नावमिवार्णवे । अप्रवक्तारमाचार्यमनधीयानमृत्विजम् । अरक्षितारं राजानम् भार्याञ् चाऽप्रियवादिनीम् । ग्रामकामञ् च गोपालवँ वनकामञ् च नापितम् ।"[४] इति । आपस्तम्बोऽपि– "पुत्रमिवैनमनुकाङ्क्षन् सर्वधर्मेष्वनपच्छादयमानस् सुयुक्तो विद्याङ् ग्राहयेत्"[५] इति, "अनन्तेवास्यनन्तेवासी भवति विनिहितात्मा गुरावनैपुण्यमापद्यमानः, आचार्योऽप्यनाचार्यो भवति श्रुतात् परिहरमाणः"[६] इति चाऽऽह । श्रुतिरपि– "सह नाववतु सह नौ भुनक्तु सह वीर्यङ् करवावहै । तेजस्वि नावधीतमस्तु मा विद्विषावहै"[७] इति गुरुशिष्यसुसम्बन्धबीजं सूचयति । अपि च "सवँ वत्सरोषिते शिष्ये गुरुर् ज्ञानमनिर्दिशन् । हरते दुष्कृतन् तस्य शिष्यस्य वसतो गुरुः ।"[८] इति स्मर्यते । अधिकारिणे विद्या देयैवेत्यत्र "स चूतवृक्षो विप्रोऽभूद् विद्वान् वै वेदपारगः । विद्या न दत्ता विप्रेभ्यस् तेनैव तरुताङ् गतः"[९] इति च स्मरन्ति । नीतिरपि– "त्यजेद् धर्मन् दयाहीनवँ विद्याहीनङ् गुरुन् त्यजेत् । त्यजेत् क्रोधमुखीम् भार्यान् निस्स्नेहान् बान्धवाँस् त्यजेत्"[१०] इति । अत्र ऋत्विग्यजमानयोश् शिष्याचार्ययोर् मित्रयोरन्येषावँ वा परस्परत्यागस्थानवँ विष्णुगुप्तेन कौटल्येन प्रतिपादितमपि अनुसन्धेयम् । तद् यथा– "अनाहिताग्निश् शतगुरयज्वा

---

१. च. सं. वि. स्था. ८।३ । २. माल. १।१६ । ३. सु. सं. १।४६ । ४. १२।५७।४४–४५ । ५. आ. ध. सू. १।२।८।२४ । ६. तत्रैव । ७. तै. आ. ८।१ । ८. वी. मि. सँ. प्र. पृ. ५१५ (चौ. सँ.) । ९. स्मृ. कौ. (नि. सा., क्रै. १९०९) पृ. १७४ (अनन्तचतुर्दशीकथायाम्) । १०. चा. नी. ४।१६ ।

च सहस्रगुः। सुरापो वृषलीभर्ता ब्रह्महा गुरुतल्पगः। असत्प्रतिग्रहे युक्तस् स्तेनश्च कुत्सितयाजकः। अदोषस् त्यक्तुमन्न्योन्न्यङ्कर्मसङ्करनिश्चयात्"[1] इति। वेदविद्द्याया विषये आचार्यस्य ब्राह्मणताया आवश्यकत्वम्, तत्रापि आपदि ब्राह्मणालाभे क्षत्रियस्य वैश्यस्य वाऽपि वरणीयत्वम्[2], शुभाया विद्द्याया अवरादपि ग्राह्यत्वञ् च[3] बोद्ध्यम् ॥६९–७२॥

(छ) अथ वेदादिविद्द्याग्रहणनियमाः

हस्तौ सुसयँ्यतौ धार्यौ जानुनोरुपरिस्स्थितौ।
ऊरुभागे तृतीये तु कूर्परन् न्यस्स्य दक्षिणम् ॥७३॥[4]
अदध्यासीनस् समं शुद्धं सुखञ् च लघु चाऽऽसनम्।
गुरोरनुमतिङ्कुर्यात् पठन् नाऽन्न्यमतिर् भवेत् ॥७४॥[5]
कूर्मोऽङ्गानीव संहृत्य चेष्टान् दृष्टिञ् चलम् मनः।
स्वस्थश्च प्रशान्तो निर्भीतो वर्णानुच्चारयेद् बुधः ॥७५॥[6]
नाऽब्भ्याहन्न्यान् न निर्हन्न्यान् न गायेन् नैव कम्पयेत्।
यथादावुच्चरेद् वर्णाँस् तथैवैनान् समापयेत् ॥७६॥[7]
सममुच्चारयेद् वर्णान् हस्तेन च मुखेन च।
हस्तबभ्रष्टस् स्वरबभ्रष्टो न वेदफलमश्नुते ॥७७॥[8]
हरिशब्दन् तथोङ्कारवँ् व्याहृतीस् तदनन्तरम्।
सावित्त्रीञ्च प्रयुञ्ज्य प्राङ् नित्यवँ् वेदम् पठेद् बुधः ॥७८॥[9]
हरिशब्दन् तथोङ्कारम् पाठान्तेऽपि प्रयोजयेत्।
स्रवत्त्यनोङ्कृतम् पूर्वम् परस्ताच् च विशीर्यति ॥७९॥[10]
वर्णशोऽक्षरशश् चैव स्वरशश् च विनिश्चितम्।
पदम् पादन् तथार्धर्चमिति सेवेत यत्नतः ॥८०॥[11]
उपांशु त्वरितञ् चैव योऽधीते वित्त्रसन्नपि।
अपरूपसहस्राणां सन्देहे स प्रवर्तते ॥८१॥[12]

---

१. कौ. अ. ३।१४ (श्लो. १४३–१४४)। २. मनु. २।१४१। ३. तत्त्रैव ३।२३८–२३९। ४. या.शि. १।२।१९–२०। ५. तत्त्रैव १।२।२० (उत्तरार्धमात्त्रन् तत्त्रत्त्यम्)। ६. तत्त्रैव १।२।२३। ७. तत्त्रैव १।२।२४। ८. तत्त्रैव १।२।२५–२६। ९. तुलना कार्या– या. शि. १।२।२२। १०. तुलना कार्या– मनु. २।७४। ११. तुलना कार्या– मा. शि. श्लो. १७३, शु. य. प्रा. ८।२७। १२. या. शि. २।५।९८; ना. शि. २।८।१८, मा. शि. श्लो. १६७।

अभ्यासार्थे द्रुतावं वृत्तिम् प्रयोगार्थे तु मध्यमाम् ।
शिष्याणामुपदेशार्थे कुर्याद् वृत्तिवं विलम्बिताम् ॥८२॥[1]
सर्वा एव तु निर्दोषा वृत्तयस् समुदाहृताः ।
स्वधीतस्स्य सुवक्त्रस्स्य शिक्षकस्स्य विशेषतः ॥८३॥[2]

ब्रुवन् भ्रुवौ नेत्त्रललाटनासिका
न कम्पयेदोष्ठचलू न निर्भुजेत् ।
न स्याच् च विक्लिष्टमुखो निदन्तको
न चापि सन्दष्टहनुर् न बाह्यवाक् ॥८४॥[3]
न रूक्षवाक् स्यान् न हि चोत्स्वरवं वदेन्
न चाऽनिमेषो न च गर्ववानपि ।
न चानुकूजेत् पदमादितो ब्रुवन्
न नासया नित्त्यमनुष्ठितवं वदेत् ॥८५॥[4]
उपांशु दष्टन् त्वरितन् निरस्तवं
विलम्बितङ् गद्गदितम् प्रगीतम् ।
निष्पीडितङ् ग्रस्तपदाक्षरञ् च
वदेन् न दीनन् न च सानुनास्स्यम् ॥८६॥[5]
न चाऽपदान्ते श्रमपीडितश् श्वसेन्
न चोच्छ्वसेदुक्तपदोऽप्यभीक्ष्णशः ।
गजव्यवेषी तु पठेदतन्द्रितो
व्यपेतरोषश्श्रमशोकहर्षभीः ॥८७॥[6]
नातिनिष्पीडयेद् वर्णान् न चाव्यक्तानुदाहरेत् ।
समान् श्लक्ष्णानसन्दिग्धान् वर्णानुच्चारयेद् बुधः ॥८८॥[7]
यथा खनन् खनित्त्रेण नरो वार्य्यधिगच्छति ।
तथा गुरुगतावं विद्द्यां शुश्रूषुरधिगच्छति ॥८९॥[8]
शुश्रूषारहिता विद्द्या अपि मेधागुणैर् युता ।
वन्ध्येव युवती तस्स्य न विद्द्या फलिनी भवेत् ॥९०॥[9]

---

१. या. शि. १।२।४९–५०, ना. शि. १।६।२२, मा. शि. १–५ ।
२. मा. शि. श्लो. ६ । ३. तत्त्रैव श्लो. १३० । ४. तत्त्रैव श्लो.१३१–१३२ । ५. पा.शि.श्लो. ३५ । ६. मा.शि.श्लो.१३१–१३२ । ७. तत्त्रैव, श्लो. १३३ । ८. या. शि. २।५।१०, मा. शि. श्लो. १७०, मनु. २।२१८ । ९. या. शि. २।५।१११, ना. शि. २।८।२८।

गुरुशुश्रूषया विद्द्या पुष्कलेन धनेन वा ।
अथवा विद्द्यया विद्द्या चतुर्थेन न लब्ध्यते ॥९१॥[1]
शनैः पन्थाश् शनैः कन्था शनैः पर्वतलङ्घनम् ।
शनैर् विद्द्या शनैर् वित्तम् पञ्चैतानि शनैश्शनैः ॥९२॥[2]
जलबिन्दुनिपातैश् च क्रमशः पूर्यते घटः ।
तथाऽऽपूर्तिश् च विद्द्यानान् धर्मस्य च धनस्य च ॥९३॥[3]
देहवाक्चेतसाञ् चेष्टाः प्राक् श्रमाद् विनिवर्तयेत् ।[4]
पुनर्नवस् सुविश्रम्य सिद्ध्यै चेष्टेत युक्तितः ॥९४॥
पिपीलिकाऽपि गच्छन्ती पर्वतानपि लङ्घयेत् ।
नाऽपि क्रीडापर्वतकमगच्छन् खगराडपि ॥९५॥[5]
गतेऽपि वयसि ग्राह्यया विद्द्या सर्वात्मना बुधैः ।
इह स्यादप्यफलदा सुलभा साऽन्यजन्मनि ॥९६॥[6]
युक्तियुक्तवँ वचो ग्राह्यन् न ग्राह्यङ् गुरुगौरवात् ।
विद्द्याऽऽदानरहस्यन् तद् याज्ञवल्क्येन भाषितम् ॥९७॥[7]
दुर्गृहीतङ् क्षिणोत्त्येव शास्त्रं शस्त्रमिवाबुधम् ।
सुगृहीतन् तदेव ज्ञं शास्त्रं शस्त्रञ् च रक्षति ॥९८॥[8]
तस्माद् विद्द्याप्रियैस् सर्वैस् सुधीभिर् दूरदर्शिभिः ।
समाम्नानेऽर्थविज्ञानेऽन्वीक्षणेऽन्यकृतस्य च ॥९९॥
प्रयोगस्यावेक्षणे स्वप्रयोगेऽपि कृतश्रमैः ।
सदा सुग्रहणे यत्नो विधेयश् शास्त्रपाठिभिः ॥१००॥
सुप्रसन्नमना भूत्वा किञ्चिन् नम्रस् त्वधोमुखः ।
निवेश्य दृष्टिं हस्ताग्रे शास्त्रार्थमनुचिन्तयेत् ॥१०१॥[9]

अत्र प्रथमं शब्दप्रधानवेदविद्द्याग्रहणे प्रायेणोपयोगिनो नियमास् ततस् त्वर्थप्रधानादिसर्वविद्द्याग्रहणनियमाऽप्रतिपादिता इत्य-

---

१. या.शि.२।५।११२, ('चतुर्थन् नोपलब्ध्यते' इति तत्र पाठः)। २. तुलना कार्या– ना. शि. २।८।१५ । ३. तुलना कार्या– चा. नी. १२।२२ । ४. अ. हृ. १।२।३७ । ५. तुलना कार्या– ना. शि. २।८।१६ । ६. सुभा. श्लो. २६४५ "पलितेनापि कायेन कर्तव्यश् श्रुतसङ्ग्रहः । न तत्र धनिनो यान्ति यत्र यान्ति बहुश्श्रुताः" इति सु. र. भा. सा. नी. श्लो. ५६०, (अष्टमसंस्करणे)। ७. या. शि. २।५।११६ । ८. च. सं. सि. १२।८७ । ९. या. शि. १।२।२१ ।

वधेयम् । गुरोरनुमतिम् 'अधीष्व भोः' इति गुरुणा दत्तावँ वेदाध्ययनानुमतिङ्ग कुर्यात् पालयेत् । अनन्येष्वधीयानेषु अनन्योद्देशेनाध्यापितमुपगृह्य नैवाधीयीतेति भावः । स्मृतिश्च– "ब्रह्मम यस् त्वननुज्ञातमधीयानादवाप्नुयात् । स ब्रह्मस्तेयसयँयुक्तो नरकम् प्रतिपद्यते ।"[1] इति । अत एव गुरोरनुज्ञाप्रदानमपि उपदिशति स्मृतिः– "अध्येष्यमाणन् तु गुरुर् नित्यकालमतन्द्रितः । अधीष्व भो इति ब्रूयाद् विरामोऽस्त्विति चाऽऽरमेत्"[2] इति । ऋग्वेदप्रातिशाख्ये तु शिष्याणाङ्ग गुरुम् प्रति 'अधीष्व भोः' इत्यभिचोदनम् गुरोरोङ्कारेणाभिक्रमणन् च प्रतिपादितम्[3] । तच् छान्दोग्योपनिषत्सप्तमाध्यायप्रारम्भोक्तनारदव्यवहारानुकूलमिति श्रुतिसम्मतमपि चरणभेदेन व्यवस्थापनीयम् प्रतीयते । वङ्क्षणाज् जानु यावद् दक्षिणमूरुन् त्रिभागम् प्रकल्प्य जानुसमीपे तृतीये भागे न्यस्तस्य वामकरमुष्टेरङ्गुष्ठतर्जनीमूलभागे । कूर्परङ्ग कफोणिम् प्रकोष्ठप्रगण्डयोस् सन्धिमिति यावत् । न्यस्स्य संस्थाप्य । इदम् माध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदसंहितादिग्रहणादावेव आवश्यकम् । अब्भ्याहननवँ वर्णव्यत्ययेनोच्चारणम् । निर्हणनं स्थानाद्द्यन्यतमवैगुण्येनोच्चारणम् । गानन् नियतमात्तरापरिमाणमुल्लङ्घ्य न्यूनाभिरधिकाभिर् वा मात्त्राभिरनपेक्षितस्वरविशेषयोजनेन च गीतमिव पठनम् । कम्पनन् नाम तत्तद्वर्णस्स्थानतो वर्णमुच्चारयितुम् प्रवृत्तेन पाठकेन तस्मात् स्थानात् करणवँ विचलय्य पुनस् तत्तद्वर्णस्स्थानत एव कृतमुच्चारणम् । अथवा नियतमात्तरात× कियताऽप्यंशेन स्वरवँ वर्धयित्वा कृतं स्वरस्स्योच्चारणम् । हरिशब्दन् चेत्यादिश्लोकद्वयवँ वेदाध्ययनविषयम् । हरिशब्दप्रयोगोऽयम् प्रातिशाख्यादावनुक्तोऽपि[4] व्यासशिक्षादावप्युपेक्षितोऽपि[5] "प्रश्नानुवाकाद्द्यारम्भे सविसर्गोच्चरो हरिः । ससन्धिꣳ प्रणवस्स्यादि (द्धि) विरामे स्वरितो भवेत्"[6] इति शम्भुशिक्षावचनम्, "आद्द्यन्तप्रणवौ नित्यौ यथा हरिपदन् तथा । सविसर्गं हरिपदम् प्रणवात् पूर्वमिष्यते ।। हरिपदे विसर्गस्स्य न सन्धिꣳ प्रणवोत्तरे । विसर्गस्स्यार्धमात्तरत्वँ विरामो मात्त्रिकस् स्मृतः ।। वत्सानुसृतिसञ्ज्ञा च विवृत्तेरिष्यते बुधैः । तस्मात् परश् चतुर्मात्तरस् त्रिमात्तरꣳ

---

१. मनु. २।११६ । २. तत्रैव २।७३ । ३. १५।४–५ ।
४. ऋ. प्रा. १५।५–७, शु. य. प्रा. १।१६ । ५. व्या. शि. सू. ५०५-५०८; सर्व. शि. ८९-९० । ६. श. शि. श्लो. ४४ ।

प्रणवꣳ क्रमात् ॥ आदौ हरिपदं सर्वमुदात्तञ्च चेष्यते बुधैः । अन्ते रिशब्दस् स्वारस् स्याद् विसर्गꣳ प्रचयस् स्मृतः ॥ ओमो नित्यमुदात्तत्वं सर्वत्तर प्प्रोच्यते तथा । प्रमाणलं लक्षणयं यद्वच् छिष्टपाठस् तथैव च"[1] इति सर्वलक्षणमञ्जरीकारनिर्दिष्टवचनानि, "वेदे रामायणे चैव पुराणेषु च भारते । आदिमद्ध्यावसानेषु हरिस् सर्वत्तर गीयते"[2] इति अमरनाथादिधृतवं वचनम्, आधुनिकप्प्रथाञ् चानुसृत्य विहितः । वस्तुतस् तु अमरनाथादिधृतवचनस्य तात्पर्यवं वेदादिप्रतिपाद्द्यवस्तुसारपरत्वेन नेयमिति वेदपाठारम्भादौ हरिशब्दस्याप्प्रयोगेऽपि नैव क्षतिः । तैत्तिरीयोपनिषदि शीक्षाद्ध्यायेऽष्टमेऽनुवाके च "ओमिति ब्रह्हं मणꣳ प्रवक्ष्यन्नाह" इति श्रूयते । पाणिनीय-व्याकरण-भाष्येऽपि "ओमित्युक्त्वा वृत्तान्ततश् शमित्येवमादीञ् शब्दान् पठन्ति"[3] इत्येवोक्तन् न हरिशब्दस्योल्लेखꣳ कृतः । "प्रणवाद्द्यास् तथा वेदाꣳ प्रणवे पर्यवस्थिताः । प्रणवो व्याहृतयश् चैव नित्यम् ब्रह्मम सनातनम्"[4] इति वचनमपि तदनुकूलमेव । तथाप्याधुनिकप्प्रथानुसारं हरिशब्दस्य प्रयोगोऽपि सहनीय एव । किन्तु वेदावसाने 'हरिः ओम्' इत्युच्चारणे लौकिकशब्दस्योङ्कारावव्यवहितस्य वैदिकशब्देन सह सयं योगोऽधर्म्यꣳ प्रसज्यते इति तत्तरावधानङ् कर्तव्यम् वैदिकधुरीणैः । स्वाद्ध्यायारम्भादेर् हरिशब्दस्य प्रणवेन सह सन्धिर् न भवतीति मञ्जरीकारनिर्दिष्टे वचने स्स्फुटम् । प्रणवस्याऽप्प्युत्तरेण सह सन्धिर् न भवतीति "न चैतत् सन्दद्ध्यात् स्वाद्ध्यायगतम् परेण"[5] इति वचनेन ऋग्वेदप्रातिशाख्ये प्रतिपादितम् । "यज्ञकर्मणि तु सन्धानम् भवति चोदितत्वात्"[6] इति च तद्व्याख्याने उव्वटः । स्मार्तकर्ममन्तरादौ प्रयुक्तादोङ्कारात् परत्तर स्वल्पो विरामः कृष्णयजुर्वेदशिक्षाग्रन्थेषु विहित इति न तस्योत्तरेण सन्धिः । माद्ध्यन्दिनीयवाजसनेयिनान् तु "प्राशनान्ते प्प्रत्यङ्मुखेब्भ्य उपविष्टेब्भ्य ओङ्कारमुक्त्वात्तिरश्च च सावित्तरीमद्ध्यायादीन्प्रब्रूयात्"[7] इति स्वगृह्ययानुरोधात् स्वाद्ध्यायादौ हरिशब्दोऽपि अप्प्रयोज्यो व्याहृतयश्

---

१. व्या. शि., पृ. १८८ । २. या. शि. १।२।२२ (अमरनाथकृतशिक्षावल्ल्याम्) । ३. पा. व्या. भा. १।१।१ । ४. स्मृतिसन्दर्भे (बौधायनधर्मसूत्रे), पृ. १८६६; द्र. तत्रैव बृहत्पराशरस्स्मृतौ (३।२९), पृ. ७१३ । ५. १५।७ (३।३।७) । ६. आश्व. श्रौ. १।२ । ७. पा. गृ. सू. २।१०।१८ ।

चाऽप्प्रयोज्ज्या इति विज्ज्ञायते। माद्ध्यन्दिनीयवाजसनेयिसर्वानुक्रमण्याम् मन्त्रसंहिताचत्वारिंशत्तमाद्ध्यायप्रसङ्गे कात्त्यायनोऽपि "ओ३मिति परमाक्षरस्य योगिनामालम्बभूतस्य परस्य ब्रह्मणः प्रणवाक्ख्यस्याऽस्थूलत्वादिगुणयुक्तस्य ब्रह्मम ऋषिश् छन्दो गायत्त्रम् परमात्मा देवता ब्रह्मारम्भे विरामे च यागहोमादिषु शान्तिपुष्टिकर्मसु चान्येष्वपि काम्यनैमित्तिकादिषु सर्वेषु विनियोगः" इत्याह। वेदाद्ध्ययननियमश् शुक्लयजुर्वेदप्रातिशाक्ख्योक्तोऽयमप्यत्त्राऽऽकलनीयः – "ओङ्कारस् स्वाद्ध्यायादौ", "प्रयतः" (सन्नधीयीत), "भोजनान् न परम्" (अधीयानो गच्छेत्) "भोजनम् मधुरं स्निग्धम्"[1] इति; "शूद्द्रपतितयोरसंश्रावं स्वाद्ध्यायोऽद्ध्येतव्यः"[2] (शूद्द्रपतितौ सम्म्यग्ग्रहणपर्यन्तं श्रवणङ्कर्तुयँ यथा न शक्नुयुस् तथा स्वाद्ध्यायोऽद्ध्येतव्य इत्त्यर्थः) इति च। वर्णशोऽक्षरशश् चेत्त्यादिना प्रतिपादिता नियमास् सर्वशास्त्राद्ध्ययनाद्ध्यापनसाधारणा वेदितव्याः। तथा च सुश्श्रुतवचनम्– "अथ शुचये कृतोत्तरासङ्गायाऽव्याकुलायोपस्थितायाऽद्ध्ययनकाले शिष्ष्याय यथाशक्ति गुरुरुपदिशेत् पदम् पादं श्लोकवँ वा। ते च पदपादश्श्लोका भूयः क्रमेणाऽनुसन्धेयाः। एवमेकैकशो घटयेदात्मना चाऽनुपठेत्। अद्द्रुतमविलम्बितमशङ्कितमननुनासिकवँ व्यक्ताक्षरमपीडितवर्णमक्षिबभ्रुवौष्ठहस्तैरनभिनीतं सुसंस्कृतन् नात्त्युच्चैर् नातिनीचैश् च स्वरैः पठेत्। न चाऽन्तरेण कश्चिद् व्रजेत् तयोरधीयानयोः। भवतश् चाऽत्त्र– "शुचिर् गुरुपरो दक्षस् तन्द्रानिद्द्राविवर्जितः। पठन्नेतेन विधिना शिष्ष्यश् शास्त्रान्तमाप्नुयात्॥ वाक्सौष्ठवेऽर्थविज्ज्ञाने प्रागल्भ्ये कर्मनैपुणे। तदब्भ्यासे च सिद्धौ च यतेताऽद्ध्ययनान्तगः"[3] इति। वेदाद्ध्ययने च पूर्वङ्गुरूक्तन् तूष्णीं शृणुयात्, ततो गुरूक्तमनूच्चारयेत्[4], ततो ग्रहणाय त्रिः पञ्चकृत्वस् सप्तकृत्वो वा दिनं सप्ताहम् पक्षवँ वा गुरुसन्निधौ गुरोस् संश्रवे आवर्तयेत्। सेयमावृत्तिस् संस्थेत्त्युच्च्यते वैदिकैः[5]। चुलुः प्रसृतिविशेषः। न निर्भुजेत् कौटिल्ल्यम् प्रापय्य पुनःपुनर् न चलयेत्। निदन्तको निर्गतदन्तको दशनवासोब्भ्यामनाच्छादिता दन्ता यस्स्य स इति यावत्। वर्णेषूच्चारणीयेषु यथायथं सञ्चारणीयामप्यधोहनुयँ यो विष्टब्धाङ्कृत्वा ऊर्ध्वाधोदन्तपङ्क्त्योः परस्परयँ योगेनैव वर्णानुच्चारयति

---

१. शु.य.प्रा. १।१६, २०, २१, २२, २४, २५। २. तत्त्रैव ८।९।

३. सु.सं. १।३।५४–५६। ४. द्र.ऋ.७।१०३।५। ५. सम्.शि.श्लो.१८।

अविवृतास्यस् स उच्च्यतेऽत्र सन्दष्टहनुरिति। अद्द्यत्वेऽपि अनुनासिक-व्यञ्जनसन्निहितान् प्रायस् सर्वान् अननुनासिकानपि संस्कृतभाषास्स्वरान् सानुनासिकतयैवोच्चारयन्ति प्रायस् सर्वेऽपि भारतवर्षीयास् संस्कृत-पाठिनो विद्द्वांसोऽपि स्वस्स्वमातृभाषादिप्रभावात्, अतो महता प्रयत्नेन परिहरणीयोऽयन् दोष इति सङ्गृह्यते– न नासया नित्यमनु-ष्ठितवँ वदेदिति। गजवव्यवेषीति गजो यथा धीरं समवँ व्यवस्थितन् निष्क्रम्पञ् च क्रमते तथैव पदेषु क्रमितेत्यर्थः। निष्पीडनम् अधिकतरेण प्रयत्नेनोच्चारणम्। आचार्यसमाराधनादेव हि विद्द्या सम्म्यगवाप्यते इत्युच्यते– यथा खनन्नित्यादिना। तथा हि गीता-यामपि– "तद् विद्धि प्रणिपातेन परिप्रश्नेन सेवया। उपदेक्ष्यन्ति ते ज्ञानञ् ज्ञानिनस् तत्त्वदर्शिनः"[1] इति। तथा च प्राणाचार्यश् चरकोऽपि– "तमाचार्यमुपसृत्यारिराधयिषुरुपचरेदग्निवच् च देववच् च राजवच् च पितृवच् च भर्तृवच् चाऽप्रमत्तः। ततस् तत्प्रसादात् कृत्स्नं शास्त्रमधिगम्यं शास्त्रस्य दृढतायामभिधानसौष्ठवेऽर्थस्य विज्ञाने वचनशक्तौ च भूयोभूयश्च प्रयतेत सम्म्यक्"[2] इति। शक्यम् मानमकुर्वते वेदाद्द्या विद्द्या नोपदेष्टव्येति शास्त्रमेव विदधाति। तथा हि स्मृतिः – "दहत्यग्निर् यथा कक्षम् ब्रह्मम पृष्टमनादृतम्। न ब्रह्मम तस्मै प्रब्रूयाच् छक्यम् मानमकुर्वतः"[3] इति। धर्मसूत्रकारादिभिश् च आचार्यसमाराधनविधिर् विस्तरेणोक्तः[4]। तत्राऽऽपस्तम्बो गुरौ विद्द्यमानमपि दोषम् प्रकाशन् न ब्रूयादित्या-द्द्यपि वदति[5]। एते च नियमा आ समावर्तनाच् शिष्येण नियमतश् पालनीयाः। समावृत्तस्य शिष्यस्य तु अनाज्ञाप्यत्वम् बोधयति शास्त्रम्[6]। यद्द्यपि– "षडेते ह्यवमन्यन्ते नित्यम् पूर्वोपकारिणम्। आचार्यं शिक्षिताश् शिष्याः कृतदाराश् च मातरम्॥ नारीवँ विगत-कामास् तु जातापत्यास् स्त्रियश् पतिम्। कृतार्थास् स्वामिनञ् चैव गतरोगाश् चिकित्सकम्"[7] इति, "गुरुम् प्रयोजनोद्देशादर्चयन्ति न

---

१. ४।३४। २. च. सं. वि. स्था. ८।४। ३. व. स्मृ. २।१८। ४. आ. ध. सू. १।२।६।१–३७, १।२।७।१–३१, १।२।८। १–३०, गौ. ध. सू. १।२।२०, २१, २४, २६, २७, २८, ३०–३६; बौ. ध. सू. १।२।२०, २१, ३४, ३७; श. स्मृ. ३।४,५, १०–१२; मनु. २।१९१–२०६; याज्ञ्ज. २।२६, २७। ५. आ. ध. सू. १।१।४। २५। ६. तत्त्रैव १।४।१३।१५। ७. म. भा. ५।३३।९२–९३।

भक्तितः। दुग्धदेति हि गौर् गेहे पोष्यते न तु धर्मतः"[१] इति च लोकस्स्वभावस् तथापि "एकाक्षरप्रदातारङ् गुरुर्यः यो नाभिनन्दति। श्वानयोनिशतम् भुक्त्वा चण्डालेष्वभिजायते"[२] इत्यादीनि, "शिवे रुष्टे गुरुस् त्राता गुरौ रुष्टे न कश् चन" इत्यादीनि, विद्द्यादानविषयेऽनुपदमेवात्तरैव वक्ष्यमाणानि "अध्यापिता ये गुरुम्" इत्यादीनि वचनानि च न विस्मरणीयानि ॥७३–१०१॥

(ज) अथ विद्द्याधारणनियमाः

गुणिता शतशो विद्द्या सहस्रावर्तिता पुनः।
आगमिष्यति जिह्वाग्रे प्रोच्चान् निम्नमिवोदकम् ॥१०२॥[३]
शतेन गुणिताऽऽयाति सहस्रेण च तिष्ठति।
शतानाञ् च सहस्रेण प्रेत्य चेह च तिष्ठति ॥१०३॥[४]
आम्नायात् प्रपदस् स्याद् धि प्रपदो निर्भयो भवेत्।
निर्भयो याति माधुर्यम् माधुर्यात् सिद्धिमाप्नुयात् ॥१०४॥[५]
आम्नायकरणं श्रेष्ठवं वर्णानाञ् चाऽवधारणम्।
अप्रमत्तस् स्वरान् ब्रूयादेतदाचार्यशासनम् ॥१०५॥[६]
ऊर्ध्वं सहस्रादाम्नानं सततञ् चानूववेक्षणम्।
आप्तैश् च सह सम्पाठस् त्रिविधा धारणा स्मृता ॥१०६॥[७]
वेदस्स्वीकरणम् पूर्ववं विचारोऽभ्यसनञ् जपः।
तद्दानञ् चैव शिष्येभ्यो वेदाभ्यासस् तु पञ्चधा ॥१०७॥[८]
जलमभ्यासयोगेन शिलानाङ् कुरुते क्षयम्।
कर्कशानाम् मृदुस्स्पर्शङ् किमभ्यासान् न साध्यते ॥१०८॥[९]
उपोदिकाभिः क्षुद्द्राभिः क्रियते मृत्तिकोच्चयः।
न हि तासाम् बलाधिक्यमुद्द्यमस् तत्तर कारणम् ॥१०९॥[१०]
अञ्जनस्य क्षयन् दृष्ट्वा वल्मीकस्य च सञ्चयम्।
अवनध्यन् दिवसङ् कुर्याद् दानाद्ध्ययनकर्मसु ॥११०॥[११]

---

१. सु. र. भा., सा. नी., श्लो. ७१४। २. चा. नी. १३।१९। ३. या. शि. २।५।१०३, मा. शि. श्लो. १६५। ४. या. शि. २।५।१०४, मा. शि. श्लो. १६६। ५. तुलना कार्या– मा. शि. श्लो. १५१। ६. मा. शि. श्लो. १५२, 'अप्रमत्तश् च स्वार्येत' इति तत्तर तृतीयचरणपाठः। ७. तत्तरैव श्लो. १६९। ८. द. स्मृ. २।३४। ९. या. शि. २।५।१०५, मा. शि. श्लो. १७५। १०. तुलना कार्या– या. शि. २।५।१०६, ना. शि. २।८।२१। ११. या. शि. २।५।१०७; ना. शि. २।८।२०।

अजरामरवत् प्राज्ञो विद्द्यामर्थञ् च चिन्तयेत् ।
गृहीत इव केशेषु मृत्युना धर्ममाचरेत् ॥१११॥[1]

इति नीतिविदः प्राहुस् तस्मादशरान्तमानसः ।
यावज्जीवमधीयीत बुधो विद्द्यावरती द्द्विजः ॥११२॥

शास्त्रदार्ढ्याय मतिमान् सायम्प्रातर् दिवानिशम् ।
अर्थतत्त्वप्रधानन् तु शास्त्रञ् चित्तेन शीलयेत् ॥११३॥

सम्यक् चाऽनुप्रविश्यार्थतत्त्वं शास्त्रम् पुनःपुनः ।
मनःपुरस्सराभिश् च वाग्भिरावर्तयेत् क्रमात् ॥११४॥

सुगृहीतन् धृतमपि शास्त्रङ काले पुनःपुनः ।
नैवाऽनुसंहितञ् चेत् तत् कार्यकाले न संस्फुरेत् ॥११५॥

विस्स्मर्येतापि तत् पक्षे सप्ताहे वा त्र्यहेऽपि वा ।
दिनेदिने वा मतिमान् प्रातरुत्थाय चोद्धरेत् ॥११६॥

गुणिता शब्दतोऽर्थत उभयतो वाऽप्यावर्तिता । आप्तैस् सह सम्पाठो गुणनीति प्रसिद्धश् चर्चेति प्रसिद्धश् च । तत्र गुणनन्यां सतीर्थ्या गुरुसान्निद्ध्याभावेऽपि सम्भूय गुरुणाद्ध्यापितस्य मन्त्रपाठस्य प्रत्यहं सप्तावराभिश् शतपराभिर् गुरुनियमिताभिरावृत्तिभिस् सप्ताहम् पक्षवँ् वाऽऽवर्तनङ कुर्वते । तत्र पूर्ण एकैको मन्त्रो दण्डकलितवदावर्त्यते, अग्रिममन्त्रस्य द्विपदकः प्रतीकोऽपि पूर्वमन्त्रेण सहाभ्यस्यते मन्त्रपाठक्रमव्यत्यासनिरासार्थम् । चर्चायान् तु मन्त्राद्ध्येतार आत्मनो द्वयोः परस्पराभिमुखयोः पङ्क्त्योर् विभज्ज्य पठन्ति । तत्र च यथाक्रममेकैकः पक्षो मन्त्रसंहितायाङ क्रमादिसंहितायाञ् च एकैकमवसानम्, पदपाठे तु एकैकम् पदयँ् यथापाठम् प्रापयति । संस्था पूर्वमुक्ता[2] । संस्था-गुणनिका-चर्चा-समवायरूपस् सम्पाठस् सतीर्थ्यैः कृतः पट्टीति, सतीर्थ्यासतीर्थ्यव्यामिश्रैः कृतस् तु पट्ट इत्युच्यते[3] । उद्धरेत् संस्काररूपेणान्तःकरणान्तस्तले स्थितं शास्त्रमनुभवे स्मृतौ वाऽऽनेतुमुत्कर्षेदित्यर्थः । उद्धरणशब्दमूलको हि नैपालीयभाषाया 'उद्धरनु'- शब्द इति "सति च साधुप्रयोगात् संशये यस् तस्स्यापभ्रंशस् तेन सम्प्रति निर्णयः क्रियते"[4] इति शिष्टसरणिमेवानुसृत्य च उद्धरेदिति पदमुक्तेऽर्थेऽत्र प्रयुक्तवँ् वेदितव्यम् ।

---

१. हि. उ. प्र. श्लो. ३ । २. पृ. १३४, पङ्क्ति. २६ ।
३. सम्. शि. श्लो. १९–२२ । ४. वा. प. १।१५३ (वृत्तिभागे)।

विद्द्याधारणविषयकाणि इमान्न्यपि सुभाषितानि अत्तर सङ्गराह्य्याणि– "अब्भ्यासाद् धार्यते विद्द्या कुलं शीलेन धार्यते"[1] इति, "सत्त्येन रक्ष्यते धर्मो विद्द्या योगेन रक्ष्यते। मृजया रक्ष्यते रूपङ्ग कुलवँ वृत्तेन रक्ष्यते"[2] इति, "क्षणशऽ कणशश् चैव विद्द्यामर्थञ् च साधयेत्। क्षणत्त्यागे कुतो विद्द्या कणत्त्यागे कुतो धनम्"[3] इति; "अनभ्यासे विषवँ विद्द्या अजीर्णे भोजनवँ विषम्। विषं सभा दरिद्द्रस्य वृद्धस्य तरुणी विषम्"[4] इति; "प्रथमे नार्जिता विद्द्या द्वितीये नार्जितन् धनम्। तृतीये नार्जितो धर्मश् चतुर्थे किङ्ग करिष्यति"[5] इति; "शास्त्रं सुचिन्तितमथो परिचिन्तनीयमाराधितोऽपि नृपतिऽ परिसेवनीयः। अङ्के धृताऽपि तरुणी परिरक्षणीया शास्त्रे नृपे च युवतौ च कुतो वशित्त्वम्"[6] इति। प्राणाचार्यश् चरकोऽपि एवं ह्यद्ध्ययनाब्भ्यासादिविधिमाह– "तत्त्रायमद्ध्ययनविधिः। कल्ल्यकृतक्षणऽ प्रातरुत्थायोपव्व्यूषवँ त्रा कृत्त्वाऽऽवश्श्यकमुपस्पृश्श्योदकन् देवगोब्राह्मणगुरुवृद्धसिद्धाचार्येब्भ्यो नमस्कृत्त्य समे शुचौ देशे सुखोपविष्टो मनऽपुरस्सराभिर् वाग्भिस् सूत्त्रमनुपरिक्क्रामन् पुनऽपुनरावर्त्तयेद् बुद्ध्याऽनुप्प्रविश्श्यार्थतत्त्वं स्वदोषपरिहारपरदोषप्प्रमाणार्थम्। एवम् मद्ध्यन्दिनेऽपराह्णे रात्त्रौ च शश्श्वदपरिहापयन्नब्भ्यस्स्येदित्त्यद्ध्ययनविधिः"[7] इति ॥१०२–११६॥

(झ) अथ विद्द्यावर्धनोपायाः

आचार्योपासनाद् योगात् तपसा प्राज्ज्ञसेवनात्।[8]
तद्विद्द्यसम्भाषणतो विगृह्य्य कथनादपि ॥११७॥
सुदीर्घञ् चिन्तनात् कालात् स्मर्तुयँ यत्नात् पुनऽपुनः।
अद्ध्यापनात् प्रयोगाच् च विद्द्यैति वर्धतेऽपि च ॥११८॥

योगोऽभियोगः। महाभारतेऽपि– "सत्त्येन रक्ष्यते धर्मो विद्द्या योगेन रक्ष्यते। मृजया रक्ष्यते रूपङ्ग कुलवँ वृत्तेन रक्ष्यते"[9] इति प्रोक्तम्। तपो नाम कथवँ विद्द्या लब्धव्व्या वर्धनीया चेति मनसस् तापः। प्राज्ज्ञऽ परीक्षकः। तद्विद्द्यसम्भाषाया गुणानाह प्राणा-

---

१. चा. नी. ५।८। २. म. भा., उ. प. ३४।३९। ३. तुलना कार्या– "षडिमानि विनश्श्यन्ति मुहूर्तमनवेक्षणात्। गावस् सेवा कृषिर् भार्या विद्द्या वृषलसङ्गतिः" इति म. भा. उ. प. ३३।९१।
४. हि. उ. प्र. श्लो. २२। ५. सु. र. भा., सा. नी. श्लो. ४१९।
६. तत्त्रैव श्लो. ९६२। ७. च. सं. वि. स्था. ८।६।
८. मा. शि. श्लो. १७७। ९. म. भा. उ. प. ३४।३९।

चार्यश् चरकोऽपि– "तद्विद्द्यसम्भाषा हि ज्ज्ञानाभियोगसंहर्षकरी भवति, वैशारद्द्यमपि चाभिनिर्वर्तयति, वचनशक्तिमपि चाऽऽधत्ते, यशश् चाभिदीपयति, पूर्वश्श्रुते च संशयवतः पुनश्श्रवणात् संशयमपकर्षति, श्रुते चाऽसंशयवतो भूयोऽद्ध्यवसायमभिनिर्वर्तयति, अश्श्रुतमपि च कञ्चिदर्थं श्रोतृत्वविषयमापादयति, यच् चाऽऽचार्यश् शिष्ष्याय शुश्रूषवे प्रसन्नः क्रमेणोपदिशति गुह्य्याभिमतमर्थजातन् तत् परेण सह जल्पन् विजिगीषुराह पिण्डीकृत्य संहर्षात्, तस्मात् तद्विद्द्यसम्भाषामभिप्रशंसन्ति कुशलाः"[1] इति; "तद्विद्द्यसम्भाषा बुद्धिवर्धनानाम् (श्रेष्ठा)"[2] इति च। "सतताद्ध्यनवं वादः परतन्त्रावलोकनम्। तद्विद्द्याचार्यसेवा च बुद्धिमेधाकरो गणः"[3] इति सुश्श्रुतः। अपि च– "आचार्यात् पादमादत्ते पादं शिष्ष्यस् स्वमेधया। पादं सब्रह्मचारिब्भ्यः पादङ्ग कालक्क्रमेण तु"[4] इति; "विद्द्या कालेन पच्च्यते" इति च। विदुषाञ् जीवनचरित्तराणाम् पठनं श्रवणम् मननं सद्विद्द्वद्गुणकीर्तनञ् च विद्द्यावृद्धिभावनावर्धकवं विद्द्यावृद्ध्युपायप्रतिभाजननञ् च; अतस् तदपि कर्तव्यम्। आह च विद्द्याप्रसादो वैदिकनीतिमञ्जर्याम्– "वैदुष्ष्यमिच्छता कार्यं सद्विद्द्वद्गुणकीर्तनम्। विदुषोरश्श्विनोः कीर्त्या कक्क्षीवानप्यभूद् विदन्"[5] इति। विद्द्यार्थिनस् स्वकीया प्रज्ज्ञाऽपि विद्द्यावृद्धिकारणम्। तदुच्च्यते– "जले तैलङ्ग खले गुह्य्यम् पात्तरे दानम् मनागपि। प्राज्ज्ञे शास्त्रं स्वयं याति विस्तारवं वस्तुशक्तितः"[6] इति। अपि च– "यः पठति लिखति पश्श्यति परिपृच्छति पण्डितानुपाश्श्रयति। तस्स्य दिवाकरकिरणैर् नलिनीदलमिव विकासते बुद्धिः"[7] इति ॥११७-११८॥

(ञ) अथ तद्विद्द्यसम्भाषणादिविधिः

ज्ञानविज्ज्ञानवचनशक्तियुक्तं शुचिं शुचिः।
विद्द्यावृद्ध्यै सविश्श्रम्भम् पृच्छेदर्थान् समाहितः ॥११९॥
शुचिना चेच्छता विद्द्यावृद्धिवं विद्द्यावता सता।
असूयारहितेनाऽपि पृष्टोऽर्थमविकत्थनः ॥१२०॥

---

१. च. सं. वि. स्था. ८।१४। २. तत्तरैव सूत्तरस्स्थाने २५।३९। ३. सुश्श्रुतसंहितायाञ् चिकित्सास्स्थाने २८।२७। ४. प्रा. भा. शि. प., पृ. १२७। ५. श्लो. ३५ (एष श्श्लोकोऽत्तर संशोद्ध्योपस्स्थापितोऽस्ति)। ६. चा. नी. १४।५। ७. प. त., अप. श्लो. ८७।

ज्ञातं सुविशदम् ब्रूयादज्ज्ञातन् नैव वर्णयेत् ।
निग्ग्रहान् नोद्विजेताऽपि न हृष्ष्येद् विनिगृह्य च ॥१२१॥
तद्विद्द्चेन च सन्धाय सम्भाषायाङ्ग गतो बुधः ।
नैकान्ताभिनिवेशी स्स्याद् गृह्णणीयाद् युक्तियुग् हि यत् ॥१२२॥
असत्पक्क्षाऽक्क्षणित्त्वार्तिदम्भपारुष्ष्यसाधनाः ।
भवन्त्यनाप्तास् स्वे तन्त्रे प्रायꣳ परविकत्थकाः ॥१२३॥[1]
तान् कालपाशसदृशान् वर्जयेच् छास्त्रदूषकान् ।
प्रशमज्ज्ञानविज्ज्ञानपूर्णास् सेव्व्याꣳ परीक्क्षकाः ॥२२४॥
प्रायेण सुमुखास् सन्तो विज्ज्ञा युक्ताल्पभाषिणः ।
तत्त्वज्ज्ञानप्प्रकाशार्थमहङ्कारमनाश्शिताः ॥१२५॥
दम्भिनो मुखरास् त्वज्ज्ञाः प्रभूताबद्धभाषिणः ।
तान् स्वल्पाधारमुखरान् मर्षयेन् न विवादिनः ॥१२६॥
पशुꣳ पशूनान् दौर्बल्ल्यात् कश् चिन् मद्ध्ये वृकायते ।
स सत्त्यवँ वृकमासाद्द्च प्रकृतिम् भजते पशुः ॥१२७॥
तद्वदज्ज्ञोऽज्ज्ञमद्ध्यस्स्थः कश् चिन् मौखर्यसाधनः ।
स्थापयत्त्यात्मनाऽऽत्मानमाप्तमासाद्द्च भिद्द्चते ॥१२८॥
बब्भ्रुर् मूढ इवोर्णाभिरबुद्धिरबहुश्श्रुतः ।
किवँ वै वक्क्ष्यति सज्जल्पे कुण्डकीटो जडो यथा ॥१२९॥
सन्ति पाल्लविकोत्पातास् सङ्क्षोभज् जनयन्ति ये ।
वर्तकानामिवोत्पातास् सहसैवाऽविभाविताः ॥१३०॥
तस्मात् तान् पूर्वसज्जल्पे पृच्छेत् तन्त्रार्थसङ्ग्रहम् ।
परावरपरीक्क्षार्थन् तत्त्र शास्त्रविदाम् बलम् ॥१३१॥
सद्वृत्तैर् न विगृह्णणीयाद् विद्द्वानल्पश्श्रुतैरपि ।
हन्त्यात् त्वादावेव प्रश्नैरितरान् प्राज्ज्ञमानिनः ॥१३२॥
परो भूतेष्ष्वनुक्क्रोशस् तत्त्वज्ज्ञाने परा दया ।
येषान् तेषामसद्वादनिग्ग्रहे निरता मतिः ॥१३३॥

सैवैका समाना विद्द्चा यस्स्य स तद्विद्द्चः । ऊर्णाराशिमद्ध्ये पतित ऊर्णाभिस् सर्वँवेष्टितो मूढताम् प्राप्तो नकुल इवेति बब्भ्रुर् मूढ इत्त्यादेरर्थः । कुण्डकीट इत्त्यस्स्य स्थाने कुण्डभेद इत्त्याकरे पाठः,

---

१. असत्पक्क्षेत्त्यादयश् श्लोकाश् चरकसंहितायां सूत्त्रस्स्थाने त्रिंशेऽद्ध्याये आनुपूर्व्या पाठेन च क्वचिद् भिन्नाꣳ पट्ठ्यन्ते (श्लो. ७०-८१) ।

तस्यार्थश् च निन्दितजातिरिति शिवदासः। कुण्डकीटश् चार्वाक-विशेषो जडवादी। असत्पक्षा नाम परपक्षदोषकथनमात्ररूपा स्वपक्षस्थापनाहीना वितण्डाभिधाना कथा, अक्षणित्वङ्कार्यान्तर-गौरववत्त्वम्, अर्तिश् शिरोवेदनादिका, दम्भः, वाग्व्यवहारपारुष्यञ् च साधनयँ येषान् ते, परविनिन्दका अत्यात्मशश्लाघिनो वाऽपि च जनास् स्वकीये शास्त्रे प्रायोऽनाप्ता भवन्तीत्यर्थः। ज्ञानं शास्त्रजो बोधः। विज्ज्ञानं शास्त्रार्थानुभवप्रयोगादिसमुपस्कृतञ् ज्ञानम्। अनुक्रोशऽ परेषु दुःखेन क्रोशत्सु तेषान् दुःखेन दुःखितस्य तेषाङ् क्रोशनमनु क्रोश-नम्, अनुकम्पेति यावत्। दयन्ते रक्षन्त्यनया हेतुभूतयेति दया रिरक्षिषा।

तद्विद्द्यसम्भाषा हि विद्द्यावृद्धेर् महानुपाय इत्याचार्याः। श्रुतिरपि "त्रयो होद्गीथे कुशला बभूवुश् शिलकश् शालावत्यश् चैकि-तायनो दाल्भ्यऽ प्रवाहणो जैवलिरिति। ते होचुरुद्गीथे वै कुशलास् स्मो हन्तोद्गीथे कथाव् वदामेति"[1] इति तद्विद्द्यकथेतिहासम् प्रदर्शयति। तथा च शङ्करभगवत्पादोऽपि तद्व्याख्याने "तथा च तद्विद्द्यसवँवादे विपरीतग्रहणनाशोऽपूर्वविज्ज्ञानोपजनस् संशयनिवृत्तिश् चेति। अतस् तद्विद्द्यसयँयोगऽ कर्तव्य इति चेतिहासप्रयोजनम्" इत्याह। प्राणा-चार्यश् चरकोऽपि शास्त्रदृढताद्द्यर्थन् तद्विद्द्यसम्भाषाविधिमुप-दिशति– "द्विविधा खलु तद्विद्द्यसम्भाषा भवति सन्धायसम्भाषा विगृह्ययसम्भाषा चेति। तत्र ज्ञानविज्ज्ञानवचनप्रतिवचनशक्ति-सम्पन्नेनाकोपनेनोपसृतविद्द्येनाऽनसूयकेनानुनयकोविदेन क्लेशक्षमेण प्रियसम्भाषणेन च सन्धायसम्भाषा विधीयते। तथाविधेन सह कथयन् विश्श्रब्धऽ कथयेत्, पृच्छेदपि विश्श्रब्धः, पृच्छते चाऽस्मै विश्श्रब्धाय विशदमर्थम् ब्रूयात्, न च निग्रहभयादुद्विजेत, निगृह्यय चैनन् न हृष्येत्, न परेषु विकत्थेत, न च मोहादेकान्तग्राही स्यात्, न चाविदितमर्थमनुवर्ण-येत्, सम्यक् चानुनेयाननुनयेच् च, अनुनये तत्र चाऽवहितस् स्यादित्यनु-लोमसम्भाषाविधिः। अत ऊर्ध्वमितरेण सह विगृह्ययसम्भाषायाञ् जल्पेच् श्रेयसा योगमात्मनऽ पश्यन्। प्रागेव च जल्पाज् जल्पान्तरम् परावरान्त-रम् परिषद्विशेषाँश् च सम्यक् परीक्षेत, सम्यक्परीक्षा हि बुद्धिमताङ् कार्यप्रवृत्तिनिवृत्तिकालौ शंसति; तस्मात् परीक्षामभिप्रशंसन्ति कुशलाः। परीक्षमाणस् तु खलु परावरान्तरमिमाञ् जल्पकगुणान्

---

१. छा. उ. १।८।१।

श्रेयस्करान् दोषवतश् च परीक्षेत सम्यक् । तद् यथा– श्रुतवँ् विज्ज्ञानन् धारणम् प्रतिभानवँ् वचनशक्तिरित्येतान् गुणान् श्रेयस्करानाहुः । इमान् पुनर् दोषवतः । तद् यथा– कोपनत्वमवैशारद्द्यम् भीरुत्वमधारणत्वमनवहितत्वमिति । एतान् द्वयानपि गुणान् गुरुलाघवतऽ परस्य चैवाऽत्मनश् च तोलयेत् । तत्र त्रिविधऽ परस् सम्पद्द्यते प्रवरऽ प्रत्यवरस् समो वा गुणविनिक्षेपतो न त्वेव कार्त्स्न्येन । परिषत् तु खलु द्विविधा ज्ञानवती मूढपरिषच् च । सैव द्विविधा सती त्रिविधा पुनरनेन कारणविभागेन– सुहृत्परिषद् उदासीनपरिषत् प्रतिनिविष्टपरिषच् चेति । तत्र प्रतिनिविष्टायाम् परिषदि ज्ञानविज्ज्ञानवचनप्रतिवचनशक्तिसम्पन्नायामपि, मूढायाञ् च न कथञ्चित् केन चित् सह जल्पो विधीयते । मूढायान् तु सुहृत्परिषदि उदासीनायावँ् वा (स्वकीयावँ् विशिष्टाञ्) ज्ञानविज्ज्ञानवचनप्प्रतिवचनशक्तिमन्तरेणाऽपि अदीप्तयशसा महाजनविद्द्विष्टेन सह जल्पो विधीयते । तद्विधेन च सह कथयता आविद्धदीर्घसूत्तरसङ्कुलैर् वाक्क्यदण्डकैऽ कथयितव्यम् । अतिहृष्टम् मुहुर्मुहुरुपहसता च परं रूपयता च परिषदम् आकारैर् ब्रुवता चाऽस्य वाक्क्यावकाशो न देयः । कष्टशब्दम् ब्रुवता (अप्प्रतिभानवानयवँ्) वक्तव्यो 'नोच्च्यते?' इति, अथवा 'पुनर् हीना ते (अहन् त्वत्तऽप्रवर इति) प्रतिज्ज्ञा' इति।पुनश् चाह्वयमानऽ प्रतिवक्तव्यः 'परिसवँ्वत्सरो भव, अपि शिक्षस्स्व तावत्, पर्याप्तमेतावत् ते' इति । सकृदपि परिक्षेपिकन् निहतन् निहतमाहुरिति नाऽस्य पुनर् योगऽ कर्तव्यऽ कथञ् चिदपि । एवं श्रेयसा सह विगृह्य वक्तव्यमित्याहुरेके । न त्वेवञ् ज्यायसा सह विग्ग्रहम् प्रशंसन्ति कुशलाः । प्रत्यवरेण तु सह समाभिमतेन वा विगृह्य जल्पता सुहृत्परिषदि कथयितव्यमथवाऽप्युदासीनपरिषदि अवधानशश्रवणज्ज्ञानविज्ज्ञानोपधारणवचनशक्तिसम्पन्नायाम् । कथयता चाऽवहितेन परस्य साद्गुण्यदोषबलमवेक्षितव्यम्, समवेक्ष्य च यत्तरैनं श्रेष्ठम् मन्येत नाऽस्य तत्र जल्पयँ् योजयेदनाविष्कृतमप्प्रयोगङ् कुर्वन्; यत्तर त्वेनमवरम् मन्येत तत्तरैवैनमाशु निगृह्णीयात् । तत्र खल्विमे प्रत्यवराणामाशुनिग्ग्रहे भवन्त्युपायाः । तद् यथा– श्रुतहीनम् महता सूत्तरपाठेनाभिभवेत्, विज्ज्ञानहीनम् पुनऽ कष्टशब्देन वाक्क्येन, वाक्क्यधारणाहीनमाविद्धदीर्घसूत्तरसङ्कुलैर् वाक्क्यदण्डकैः, प्रतिभाहीनम् पुनर् वचनेनैकविधेनाऽनेकार्थवाचिना,वचनशक्तिहीनमर्धोक्तस्य वाक्क्यस्याक्षेपेण,अविशारदमपहर्रेपणेन,कोपनमायासनेन,भीरुवँ्

वित्त्रासनेन, अनवहितन् नियमनेनेत्त्येवमेतैरुपायैः परमभिभवेत्"[1] इति ।

विद्द्या रिरक्षुणा व्यामोहाल् लोकमुद्दिधीर्षुणा चाऽसद्वाद-निग्ग्रहे जागरूकेण भाव्यम् । तथा च मोक्षशास्त्रिकोऽपि भगवान् बादरायणो लोके प्रायेण परप्रत्त्ययनेयबुद्धीन् जनान् विलोक्य ताँश् च मोक्षमार्गत्त्वेनाभिमतेभ्यः कपिलादिमार्गेभ्यः परित्त्रातुमिच्छुर् ब्रह्ममीमांसासूत्त्रद्वितीयाद्ध्यायपाददद्वयेन कापिलाद्द्यसद्वादान् निगृह्णाति । श्रुतिरपि "तद्धैक आहुरसदेवेदमग्ग्र आसीदेकमेवाद्द्वि-तीयन् तस्मादसतस् सज् जायत । कुतस् तु खलु सोम्यैवं स्यादिति होवाच कथमसतस् सज् जायेतेति । सत् त्वेव सोम्येदमग्ग्र आसीदेकमेवाद्द्वि-तीयम्"[2] इति असद्वादनिग्ग्रहम् प्रदर्शयति । अतोऽसद्वादिनान् निग्ग्रहो-ऽपि श्रुतिसम्मतो धर्म्यो लोक्यश् शिष्टपरिगृहीतश् चेति विद्द्यावृद्धिं कामयमानेन तत्त्र मतिर् निरता कार्येति उपदेशः प्राणाऽऽचार्यस्याऽपि मननीयो माननीयश् च सर्वैरपि परीक्षकैः । पूर्वोक्तविधस्य विवा-दस्य परिग्ग्राह्यत्त्वम् महाकविरप्याह- "लब्धाऽऽस्पदोऽस्मीति विवादभीरोस् तितीक्षमाणस्य परेण निन्दाम् । यस्याऽऽगमः केवल-जीविकायै तज् ज्ञानपण्यवँ वणिजवँ वदन्ति"[3] इति । यत् तु "अधीयानः पण्डितम्मन्यमानो यो विद्द्यया हन्ति यशः परेषाम् । तस्याऽन्तवन्तश् च भवन्ति लोका न चाऽस्य तद् ब्रह्मम फलन् ददाति"[4] इति, "आजिजी-विषवो विद्द्यायँ यशःकामास् समन्ततः । ते सर्वे नृप पापिष्ठा धर्मस्य परिपन्थिनः"[5] इति, "स्वयम् पण्डितमान्यज्ज्ञो विदुषो हेलयन् मदात् । निर्द्दरुमाम्बूषरे देशे जायते ब्रह्मराक्षसः"[6] इति च, तत् पुनरहङ्कार-मात्त्रमूलकस्य परमतनिरसनप्रयासस्य,लोभमूलकस्य स्ववैदुष्यकौशला-ऽऽदिक्ख्यापनप्रयासस्य च निषेधकम् बोद्ध्यम् । एतेन "प्रक्ख्यापनम् प्राद्ध्ययनम् प्रश्नपूर्वः प्रतिग्ग्रहः । याजनाद्ध्यापने वादष् षड्विधो वेदविक्क्रयः"[7] इत्त्याद्द्यपि व्याक्ख्यातम् ॥११९–१३३॥

(ट) अथ विद्द्यासमाराधनरहस्यम्

समस्तैर् धीगुणैस् सम्यक् प्रयुक्तैरेव भारती ।
शक्या समाराधयितुन् नान्यथेति तु निश्चितम् ॥१३४॥

---

१. च. सं. विमा. ८।१५–२१ । २. छा. उ. ६।२।१–२ । ३. माल. १।१७ । ४. म. भा., आदि ९०।२३ । ५. म.भा. शान्ति. १४२।१२ । ६. वासुदेवरसानन्दे अङ्गिरसो वचनम्, पृ. ९४ । ७. वाधूलस्स्मृतौ, श्लो. १५८ ।

शुश्रूषा श्रवणञ् चैव ग्रहणन् धारणन् तथा ।
ऊहापोहौ च विज्ञानन् तत्त्वज्ञानञ् च धीगुणाः ॥१३५॥[1]
प्रज्ञा विवेकलं लभते भिन्नैरागमदर्शनैः ।
कियद् वा शक्यमुन्नेतुं स्वतर्कमनुधावता ॥१३६॥[2]
तत्तदुत्प्रेक्षमाणानाम् पुराणैरागमैर् विना ।
अनुपासितवृद्धानाम् विद्द्या नातिप्रसीदति ॥१३७॥[3]
तस्मात् कामयमानेन विद्द्यावृद्धिन् तु धीमता ।
स्वविद्द्या समुपस्कार्या श्रुत्वा नानागमान् हितान् ॥१३८॥
"श्रद्धायत्नौ यदि स्स्याताम् मेधया किम् प्रयोजनम् ।
तावुभौ यदि न स्स्याताम् मेधया किम् प्रयोजनम्" ॥१३९॥
किञ्चित् प्रश्नोत्तरञ् ज्ञातुन् निद्द्रास्स्यन् प्रविचारयन् ।
चेन् निद्द्रायत्त्युत्तरञ् च विबुद्धस्स्य स्स्फुरेत् क्वचित् ॥१४०॥
व्याख्यानशक्तिमिह कर्मसु कौशलञ् च
विज्ञानवर्धनरुचिम् प्रगुणाञ् च सिद्धिम् ।
लिप्सुर् यथोत्तरमथो परिचिन्तनाद्द्यैश्
शास्त्रज्ञसंसदि भवेत् स्वयमद्द्वितीयः ॥१४१॥[4]
भवेन् न वा यद्द्यपि पूर्ववासना-
गुणानुबन्धि प्रतिभानमद्भुतम् ।
श्रुतेन यत्नेन च वागुपासिता
ध्रुवङ् करोत्त्येव कमप्यनुग्रहम् ॥१४२॥[5]

(ठ) अथ विद्द्याविनाशहेतुनिरूपणम्

अशुश्रूषा त्वरा श्लाघा विद्द्यायाश् शत्त्रवस् त्रयः ।[6]
आभिस् तु भोषिता विद्द्या नाऽऽयाति द्द्राक् च नश्यति॥१४३॥
द्यूतम् पुस्तञ् च वाद्द्यञ् च नाटकेषु च सक्तिका ।
स्त्रियस् तन्द्रा च निद्द्रा च विद्द्याविघ्नकराणि हि॥१४४॥[7]

---

१. तुलना कार्या– कौ. अ. १।५ । २. वा. प. २।४८४ ।
३. तत्त्रैव २।४८५ । ४. अस्मज्ज्येष्ठपितृव्येण प्राणाचार्येणोमानाथशर्मणा विरचितं संहितासारवाङ्मयया स्थितममुद्द्रितम् पद्द्यमिदम् । ५. काव्यादर्शे १।१०४, तत्त्र भवेन्नवेत्त्यस्स्य स्स्थाने 'न विद्द्यते' इति पाठः । ६. म. भा. उद्द्योग. ४०।४ ।
७. ना. शि. २।८।२९, तत्त्र च 'द्यूतम् पुस्कवाद्द्यञ् च नाटकेषु च सक्तिका । स्त्रियस् तन्द्रा च निद्द्रा च विद्द्याविघ्नकराणि

आलस्यान् मूर्खसंसर्गाद् भयाद् रोगनिपीडनात् ।
अशक्त्या चैव मानाच् च ध्रुवँ विद्द्या प्रणश्यति ।।१४५।।[1]
अर्थौत्सुक्यं श्ववृत्तिश् च लौकिकत्वमलक्ष्यता ।
अपरीक्ष्यप्रवृत्तिश् च विद्द्यासिद्धिवँ विरुन्धते ।।१४६।।

श्लाघा अद्ध्येतुर् गुरुमित्त्रादिभिः कृता तस्य सम्यगद्ध्ययनवत्ताया उक्त्या युक्ता प्रशंसा । पुस्तकं चित्त्रलेखनादिकलँ लेप्यकर्म । सुख-स्वप्राधान्यादिषु प्रयोजनेषु औत्सुक्ययँ यस्य कस्यापि साद्ध्यस्य विरोधीति "यशोऽधिगन्तुं सुखलिप्सया वा मनुष्यसङ्ख्यामतिवर्तितुवँ वा । निरुत्सुकानामभियोगभाजां समुत्सुकेवाङ्कमुपैति सिद्धिः"[2] इति वदन् महाकविरपि अभिप्रैति । लौकिकत्वमत्त्र- "श्रुतम् बुद्धिस् स्मृतिर् दार्ढ्यन् धृतिर् हितनिषेवणम् । वाग्विशुद्धिश् शमो धैर्यमाश्रयन्ति परीक्षकम् । लौकिकन् नाश्रयन्त्येते गुणा मोहतमश्चितम्"[3] इति वदता प्राणाचार्येण चरकेणाऽभिप्रेतस्य लौकिकजनस्य भावः । महाभारतेऽपि अर्थकामप्रधानकगतानुगतिकाऽविवेकिलोकाचरितन् नाऽनुसरणीयमित्युक्तम् । तद् यथा- "कारणाद् धर्ममन्विच्छेन् न लोकाऽऽचरितन् चरेत्"[4] इति । इदमपि सुभाषितमत्त्र स्मरणीयम्- "काव्येन हन्यते शास्त्रङ काव्यङ गीतेन हन्यते । गीतन् च स्त्रीविलासेन स्त्रीविलासो बुभुक्षया"[5] इति । अपि च- "लुब्धस्य नश्यति यशः पिशुनस्य मैत्त्री नष्टक्रियस्य कुलमर्थपरस्य धर्मः । विद्द्या च कुव्यसनिनः कृपणस्य सौख्यं राज्यम् प्रमत्तसचिवस्य नराधिपस्य"[6] इति । आलस्याद् विद्द्या विनश्यतीत्यत्त्रेदमपि सुभाषितं स्मरणीयम्- "आलस्येन हता विद्द्या परहस्ते हतन् धनम् । अल्पबीजं हतङ क्षेत्त्रं हतं सैन्यमनायकम्"[7] इति ।।१४३-१४६।।

षट्' इति पाठः । पुस्तकवाद्द्यमित्त्यस्य स्थाने पुस्तकवाच्यमिति पुस्तकशुश्रूषेति वा केचित् पठन्ति ।

१. मा. शि. श्लो. १७८, तत्त्र ध्रुवमित्त्यस्य स्थाने षड्भिरिति पाठः । २. किरातार्जुनीये ३।४० । ३. च. सं. १।२९।३६-३७ । ४. १२।२६२।५३ । ५. सुभाषितावलौ 'खशभाषयन् तु काव्येन' इति पाठः, सुभाषितरत्नभाण्डागारे तु 'शेषभाषयन् तु काव्येन' इति । ६. प. त., काको. श्लो. २११ । ७. चा. नी. ५।७ ।

६. अथ अध्यापनविधिनिरूपणम्

(क) अथ विद्द्यादाननियमाः

आचार्यपुत्रश् शुश्रूषुर् ज्ञानदो धार्मिकश् शुचिः ।
आप्तश् शक्तोऽर्थदस् साधुस् स्वोऽध्यापय्या दश धर्मतः॥१४७॥[1]

आचार्यस्य पुत्रो गुरुपुत्रः, विद्द्यां श्रोतुं शिक्षितुवँ वाऽतीवोत्सुकस् सन् यो गुरुगृहकार्ये गुर्वङ्गसवँवाहनादौ च प्रवर्तते सः, कस्य चन ज्ज्ञानस्य दाता, यो धर्मञ् चरति सः, निष्कपटः, विश्वसनीयः, विद्द्याङ् ग्रहीतुन् धारयितुञ् च समर्थः, वृत्तिदो धनदो वा, लोकहितैषी, बन्धुश् चेत्येते दशविधा जनाः प्रत्येकं स्वविद्द्यां साकल्येन दातुयँ योग्या इत्यर्थः । आचार्ययास्कोऽप्याह– "उपसन्नाय तु निर्ब्रूयाद् यो वाऽलवँ विज्ज्ञातुं स्यान् मेधाविने तपस्विने वा"[2] इति; उदाजहार च– "विद्द्या ह वै ब्राह्मणमाजगाम गोपाय मा शेवधिष्टेऽहमस्मि । असूयकायाऽनृजवेऽयताय न मा ब्रूया वीर्यवती तथा स्याम् । य आ तृणत्त्यवितथेन कर्णावदुःखङ् कुर्वन्नमृतं सम्प्रयच्छन् । तम् मन्येत पितरम् मातरञ् च तस्मै न द्रुह्येत् कतमच्चनाह ॥ अध्यापिता ये गुरुन् नाद्द्रियन्ते विप्रा वाचा मनसा कर्मणा वा । यथैव ते न गुरोर् भोजनीयास् तथैव तान् न भुनक्ति श्रुतन् तत् ॥ यमेव विद्द्याश् शुचिमप्रमत्तम् मेधाविनम् ब्रह्मचर्योपपन्नम् । यस् ते न द्रुह्येत् कतमच्चनाह तस्मै मा ब्रूया निधिपाय ब्रह्मन् ॥"[3] इति । शीलशौचादिपरीक्षोपायाश् च– "शीलं सवँवसनाद् ज्ञेयं शौचं सवँव्यवहारतः । प्रज्ज्ञा सङ्कथनाद् ज्ञेया त्रिभिः पात्तरम् परीक्ष्यते"[4] इत्यादयो ज्ञेयाः । "सर्वेषामेव दानानाम् ब्रह्मदानवँ विशिष्यते । वार्यन्नगोमहीवाससतिलकाञ्चनसर्पिषाम्"[5] इति च विचार्याऽधिकारिणे वेदविद्द्या देयैव । शब्दप्रधानस्य वेदस्य ग्रहणधारणयोश् शक्तेः परीक्षाया उपायाश् च– "प्रकृतिर् यस्य कल्याणी दन्तोष्ठौ यस्य शोभनौ । प्रगल्भश् च विनीतश् च स

---

१. मनु. २।१०९ । २. निरुक्ते २।१।३ । ३. निरुक्ते २।१।४; व. स्मृ. २।१४–१७ । तुलना कार्या– संहितोपनिषद्ब्राह्मणे ३।९–१९ । ४. दानसागरे पृ. १५ । ५. मनु. ४।२२३ ।

वर्णान् वक्तुमर्हति"[1] इत्यादद्यु पदेशानुसारञ् ज्ञेयाः। अधिकारि-परीक्षायामुक्ता विषयाश् चाऽनुसन्धेया अत्र। "व्याख्यातुङ् कुशला केचिद् ग्रन्थान् धारयितुम् परे"[2] इति प्रोक्तलँ लोकबुद्धि-शक्तिवैलक्षण्यञ् च विवेक्तव्यम् ॥१४७॥

(ख) अध्यापनपद्धतिः

वृत्तचौडं स्फुटगिरवँ वर्णमालान् तथा लिपिम्।
ग्राहयेल् लेखनञ् चैव सङ्ख्यानञ् चोपयोजयेत् ॥१४८॥
यथा जागर्ति शुश्रूषा श्रवणे ग्रहणे तथा।
धारणे च गतिश् चोहापोहयोश् शक्तिरेव च ॥१४९॥
बुद्धेर् विज्ञानशक्तिश् च तत्त्वे चाऽभिनिवेशिता।
वाग्विशुद्धिश् शमो धैर्यन् ढार्ढ्यं हितनिषेविता ॥१५०॥
स्मृतिꣳ परीक्ष्यकारित्वङ् कार्यमत्त्ववँ वीरता बलम्।
शिष्ये स्वधर्मभक्तिश् च वैदग्ध्यञ् च तथाऽऽचरेत् ॥१५१॥
कर्तारङ् करणङ् कार्ययोनिङ् कार्यम् फलन् तथा।
फलानुबन्धन् देशञ् च कालञ् चैव क्रियामपि ॥१५२॥
उपायाँश् च विदित्वैव सम्यक् कार्यङ् करोति यः।
परीक्ष्यकारी स हि स कार्यं साद्ध्नोति सुष्ठु च ॥१५३॥[3]
दैव्यावँ वाचि निनीषुस् तं शाकटायनसम्मताम्।
वर्णमालामेव पूर्वम् प्रयत्नेन सुशिक्षयेत् ॥१५४॥
येषान् तु प्रथमा भाषा देववाणीतरा हि तान्।
वयोबुद्ध्यनुरूपान् हि विषयाञ् ज्ञातभाषया ॥१५५॥
शिक्षयित्वा पाठ-लेख-सङ्ख्यान-वचनेषु च।
समर्थान् देववाण्यावँ हि विनेयान् सम्प्रवर्तयेत् ॥१५६॥
वर्णानां स्थान-करण-नाद-श्वासादिकान् गुणान्।
बोधयित्वा देववाणीं शुद्धामेव प्रयोजयेत् ॥१५७॥
देश्यभाषाप्रभावेण यतोऽशुद्धिꣳ प्रजायते।
तस्माद् देश्यासु भाषासु ये तु वर्णा न सन्ति हि ॥१५८॥
तेषां संस्कृतवर्णानामुपदेशे यतेत च।
देश्यसंस्कृतवर्णानालँ लिपेर् भेदञ् च बोधयेत् ॥१५९॥

---

१. या. शि. १।२।२७–२८। २. म. भा. १।१।५३।
३. तुलना कार्या– च. सं. विमा. ८।७९।

ततश् च सरलैर् वाक्यैस् स्वब्भ्यस्तैर् व्यावहारिकैः ।
वटोर् मनो हरन्तीभिः कथाभिर् नीतिवर्त्तमभिः ॥१६०॥
सद्वृत्तबोधकैः पद्यैस् सरलैस् सरसैस् तथा ।
सानुप्रासैस् सुरम्यार्थवर्णनेन युतैश् च तैः ॥१६१॥
गद्यैश् च रुच्यविषयैर् बालकौतूहलानुगैः ।
रूपैर् नाम्नाञ् च धातूनां स्वब्भ्यस्तैस् सुनियोजितैः ॥१६२॥
भाषापटूँस् तान् प्राक् कुर्यात् ततस् साधारणीन् तु ये ।
शिक्षाञ् जिघृक्षन्ति ताँस् तु विषयान् गहनानपि ॥१६३॥
रीत्त्याऽनयैव विबुधो यथौचिति प्रयुक्तया ।
शिक्षयेत् पञ्चतन्त्रादि कौटलीयाङ् कृतिन् तथा ॥१६४॥
बार्हस्पत्त्यञ् चौशनसं शास्त्रम् भारतमेव च ।
शिक्षयेत् पुरुषार्थाँश् च चतुरस् सुविबोधयेत् ॥१६५॥
लौकिके वैदिके चार्थे यथा सामयिकेऽपि च ।
सम्यक्परिचयप्रौढिश् छात्त्रस्स्य स्स्यात् तथाऽऽचरेत् ॥१६६॥

वृत्तं सम्पन्नन् चौडन् चूडाकर्म यस्स्य स तम् । तथा हि विष्णुगुप्तोऽप्याह– "वृत्तचौलकर्मा लिपिं सङ्ख्यानञ् चोपयुञ्जीत । वृत्तोपनयनस् त्रयीमान्वीक्षिकीञ् च शिष्टेब्भ्यो वार्तामद्ध्यक्षेब्भ्यो दण्डनीतिवँ वक्तृप्रयोक्तृब्भ्यः"[1] इति । विज्ञानशक्तिर् विशिष्टज्ञानशक्तिर् विवेकशक्तिरिति यावत् । विवेकशक्तिर् हि अतीवाऽऽवश्यकी । तदाहुः – "यस्स्य नास्ति विवेकस् तु केवलयँ यो बहुश्श्रुतः । न स जानाति शास्त्रार्थान् दर्वी पाकरसयँ यथा"[2] इति, "वरम् बुद्धिर् न सा विद्द्या विद्द्याया बुद्धिरुत्तमा । बुद्धिहीना विनश्श्यन्ति यथा ते सिंहकारकाः"[3] इति च । कर्मशीलता कर्मठता वा हि लोके विद्द्याफलम् । तदाह– "पठकाः पाठकाश् चैव ये चाऽन्ये शास्त्रचिन्तकाः । सर्वे व्यसनिनो मूर्खा यः क्रियावान् स पण्डितः"[4] इति, "शास्त्राण्यधीत्त्यापि भवन्ति मूर्खा यस् तु क्क्रियावान् पुरुषस् स विद्द्वान् । सुचिन्तितञ् चौषधमातुराणान् न नाममात्त्रेण करोत्त्यरोगम्"[5] इति, "अवशेन्द्रियचित्तानां हस्तिस्स्नानमिव क्क्रियाः । दुर्भगाऽऽभरणप्रायो ज्ञानम् भारः क्रियावँ विना"[6] इति, "चतुर्भिश्

---

१. कौ. अ. १।५ । २. म. भा. २।५५।१ । ३. पं.त., अप., श्लो. ३६ । ४. म. भा. वन. ३१३।२१० । ५. हि. उ. मित्त्र. श्लो. १७१ । ६. तत्त्रैव, श्लो. १८ ।

च प्रकारैर् विद्द्योपयुक्ता भवति– आगमकालेन स्वाध्यायकालेन प्रवचनकालेन व्यवहारकालेनेति"[1] इति च। शाकटायनसम्मता संस्कृत-वर्णमाला वर्णाध्याये प्रतिपादयिष्यते। संस्कृतस्य दीर्घोऽवर्णः, ऋकारः, लृकारः, एकारः, ओकारः, अनुस्वारः, विसर्गः, जकारः, वकारः, शषौ चेति वर्णा आधुनिकीषु भारतवर्षीयदेशीयभाषासु प्रायो दुर्लभाः। अतस् तेषां शुद्धमुच्चारणञ्च कर्तुं शिक्षिता अपि वटवः प्रायेणाऽसमर्था भवन्ति; तान् वर्णानुच्चारयितुम् प्रवर्तिता अनन्यानेव वर्णानुच्चारयन्ति, अतस् तेषाँ वर्णानामुच्चारणस्य शिक्षणे सम्यक् प्रयत्नञ्च कृत्वा वटून् तत्र समर्थान् अभ्यस्ताँश् च कुर्यात्। वर्णविवेकरहितं संस्कृतोच्चारणं हि न केवलम् पुण्यजनने वन्ध्यम् अपि तु लोकेऽपि दोषजज्जैरतीव निन्दितम्। तथा चाऽऽहुः – "यद्द्यपि बहु नाऽधीषे तथापि पठ पुत्र व्याकरणम्। श्वजनस् स्वजनो मा भूच् शकलं सकलं शकृत् सकृत्"[2] इति। अत्र व्याकरणशब्दस्य यौगिक-तया शिक्षाशास्त्रपरताऽपि स्वीकर्तव्या वर्णोच्चारणविवेकस्य शिक्षाशास्त्रविषयत्वात्, पाणिनीयव्याकरणभाष्यकारेणाऽपि व्याकरण-शब्दस्य यौगिकतामाश्रित्य शिक्षाशास्त्रपरत्वेनाऽपि "पुराकल्प एतदासीत् संस्कारोत्तरकालम् ब्राह्मणा व्याकरणं स्माऽधीयते, तेभ्यस् स्थानकरणनादानुप्प्रदानजज्जेभ्यो वैदिकाश् शब्दा उपदिश्यन्ते"[3] इत्यत्र प्रयुक्तत्वाच् च। "प्रकारान्तरेण तु न शक्यो व्याकर्तुम् आनन्त्यात् तत्प्रभेदानाम्"[4] इत्यादावर्थान्तरेऽपि व्याकृतेः प्रयोगस्य दर्शनाच् च। अपि च– "अविदितशषसविशेषा वाणी वदनाद् विनिर्गता येषाम्। गुदवदनविवरभेदो रदनैरेवोपलक्ष्यते तेषाम्"[5] इति "घझढधभण-नविशेषो वक्तुर् वक्त्रान् न लभ्यते यस्य। मुखगुदरन्ध्रविशेषो ज्ञातै-रुपलभ्यते तस्य"[6] इति च। अत्र शषसविशेषो घझढधभणनविशेषश् च वर्णविवेकस्योपलक्षणे वेदितव्ये ॥१४६–१६८॥

(ग) शास्त्रविशेषाद्ध्यापननियमाः

ये तु वेदादिशास्त्रेषु वैशिष्ट्यलं लिप्सवो जनाः।
विद्द्यार्थमुपसन्नाँस् ताँश् छात्रान् सम्यक् परीक्षितान् ॥१६७॥

---

१. पा. व्या. भा. १।१।१ (पस्पशाह्निके)। २. सु.र.भा., वै. प्र. श्लो. २। ३. पस्पशाह्निके। ४. काव्यप्रकाशे सू. २१२, श्लो. १४०, वृत्तौ। ५. भट्टिकाव्यसुधारणायाम्, श्लो. २। ६. सुभाषितावलौ, श्लो. २३९७।

उपनीयाऽनुशिष्याच्च चाऽध्यापयेद्विद्यानुरूपकान् ।
विद्यार्थिनियमाँश्चापि तद्विद्याचरणानि च ॥१६८॥
विचारपद्धतौ शब्दकोशे व्याकरणे च तान् ।
अभियोज्य पटून् कुर्यात् ततश्शास्त्राणि पाठयेत् ॥१६९॥
विनेयस्य रुचिं शक्तिवँ वीक्ष्य सम्यग् यथारुचि ।
यथाशक्ति हि शास्त्रेषु विनेयं सम्प्रवर्तयेत् ॥१७०॥

ये प्राथमिकीं शिक्षाङ्ग गृहीतवन्तस् सँस्कृतभाषाबोधञ् च लब्धवन्तो विद्यार्थिजनास् तानुक्तप्रकारकाञ् जनान् वेदादीनि शास्त्राणि पाठयेत् । वेदादीनि शास्त्राणि च– ऋग्यजुस्सामाथर्ववेदा नानाशाखाभेद-भिन्नास् सब्ब्राह्म्मणास् सरहस्स्याः, शिक्षा, कल्पश् श्रौतगृह्यधर्मकल्पभेदेन त्रिधा भिन्नस् सपरिशिष्टो धर्ममीमांसासहितः, व्याकरणम्, निरुक्तं सनिघण्टुकम्, छन्दश्शास्त्रम्, ज्योतिषम्; ब्रह्म्ममीमांसा, स्मृतयो दृष्टार्थव्यवहारादीनामपि प्रतिपादका धर्मसंहितापरपर्याया मनुस्स्मृत्यादयः, इतिहासपुराणे, वार्ताशास्त्रङ्ग कृषिपाशुपाल्यवणिज्ज्यास्स्थापत्त्यादिविषयकम्, अर्थशास्त्रम् (शासनविधिः), धनुर्वेदः, गान्धर्ववेदः, आयुर्वेदः, कामशास्त्रम्, वेदाविरोधिन आगमाः, लोकायतकादिका आन्वीक्षिकी, प्रज्ञापरिष्कारफलानि अन्न्यान्न्यपि कापिलादिदर्शनादीनि च । वैशिष्ट्यम् आचार्यकयोग्यतादिरूपम् । तत्तच्छास्त्रानुरूपाणि हि विविधान्न्युपनयनानि । तत्तर वेदवेदाङ्गोपनयनम् प्रसिद्धम् । अन्न्यशास्त्रोपनयनदिक्प्रदर्शनार्थमायुर्वेदोपनयनस्स्वरूपञ् चरकोक्तमत्तर लिक्ष्यते । तद् यथा– "एववँ विधमध्ययनार्थमुपस्स्थितमारिराधयिषुमाचार्यश् चाऽनुभाषेत– अथोदगयने शुक्लपक्षे प्रशस्तेऽहनि तिष्यहस्तश्रवणाऽश्श्वयुजामन्न्यतमेन नक्षत्तरेण योगमुपगते भगवति शशिनि कल्याणे कल्याण च करणे मैत्तरे मुहूर्ते मुण्डस्स्नातx कृतोपवासx काषायवस्त्रसवँ वीतस् समिधोऽग्निमाज्ज्यमुपलेपनमुदकुम्भाँश् च गन्धहस्तो माल्यदामप्प्रदीपहिरण्यहेमरजतमणिमुक्ताविद्द्रुमक्षौमपरिधिकुशलाजसर्षपाक्षताँश् च शुक्लाँश् च सुमनसो ग्रथितानग्ग्रथिताँश् च मेद्ध्याँश् च भक्ष्यान् गन्धाँश् च घृष्टानादायोपतिष्ठस्स्वेति । अथ सोऽपि तथा कुर्यात् । तमुपस्थितमाज्ज्ञाय समे शुचौ देशे प्राक्प्रवणे उदक्प्रवणे वा चतुष्किष्कुमात्त्रञ् चतुरस्स्रं स्थण्डिलङ्ग गोमयोदकेनोपलिप्तङ्ग कुशास्तीर्णं सुपरिहितम् परिधिभिश् चतुर्भिश् चतुर्दिशयँ यथोक्तचन्दनोदकुम्भक्षौमहेमहिरण्यरजतमणिमुक्ताविद्द्रुमा -

ऽलङ्कृतम् मेद्ध्यभक्ष्यगन्धशुक्लपुष्पलाजसर्षपाक्षतोपशोभितञ्च कृत्वा तत्र पालाशीभिरैङ्गुदीभिरौदुम्बरीभिर् माधुकीभिर् वा समिद्भिरग्निमुपसमाधाय प्राङ्मुखश् शुचिरद्ध्ययनविधिमनुविधाय मधुसर्पिर्भ्यान् तिस्तिर् जुहुयादग्निमाशीस्समप्रयुक्तैर् मन्त्रैर् ब्रह्मणमग्निन् धन्वन्तरिम् प्रजापतिमश्विनाविन्द्रमृषींश् च सूत्रकारानभिमन्त्रयमाणꣳ पूर्वं स्वाहेति। शिष्यश् चैनमन्वालभेत। हुत्वा च प्रदक्षिणमग्निमनुपरिक्रमेत्। ततोऽनुपरिक्रम्य ब्राह्मणान् स्वस्ति वाचयेत्। भिषजश् चाऽभिपूजयेत्।"[1] इति। अद्ध्यापयिद्द्यानुरूपान् विद्द्यार्थिनियमान् तद्विद्द्यसदाचरणानि च शिष्यमनुशिष्यात्। तत्र वेदब्रह्मचारिनियमा वेदविद्द्या - व्रतस्स्नातक - सदाचरणानि च प्रसिद्धानि; वक्ष्यन्ते चाऽत्र सङ्क्षेपेण। अनन्यविद्द्यार्थिनियमाऽनन्यविद्द्यसदाचरणदिक्प्रदर्शनाय च चरकोक्तमिदमत्रोल्लिख्यते– "अथैनमग्निसकाशे ब्राह्मणसकाशे भिषक्सकाशे चाऽनुशिष्याद्– ब्रह्मचारिणा श्मश्रुधारिणा सत्यवादिनाऽमांसादेन मेद्ध्यसेविना निर्मत्सरेणाऽशस्त्रधारिणा च भवितव्यम्; न च ते मद्वचनात् किञ्चिदकार्यं स्यादन्यत्र राजद्द्विष्टात् प्राणहराद् विपुलादधर्म्यादनर्थसम्प्रयुक्ताद् वाऽप्यर्थाद्; मदर्पणेन मत्प्रधानेन मदधीनेन मत्प्रियहितानुवर्तिना च शश्वद् भवितव्यम्; पुत्रवद् दासवद् अर्थिवच्चोपचरताऽनुवस्तव्योऽहमनुत्सेकेनाऽवहितेनाऽनन्यमनसा विनीतेनाऽवेक्ष्यकारिणाऽनसूयकेन; न चाऽनभ्यनुज्ञातेन प्रविचरितव्यम्; अनुज्ञातेन प्रविचरता पूर्वञ्च गुर्वर्थोपान्वाहरणे यथाशक्ति प्रयतितव्यम्; कर्मसिद्धिमर्थसिद्धिंयं यशोलाभम् प्रेत्य च स्वर्गमिच्छता त्वया गोब्राह्मणमादौ कृत्वा सर्वप्राणभृतां शर्माऽऽशासितव्यम्, अहरहरुत्तिष्ठता च सर्वात्मना चाऽऽतुरेभ्यो नाऽभिद्द्रोग्धव्यम्; मनसाऽपि च परस्त्रियो नाभिगमनीयास् तथा सर्वमेव परस्स्वम्; निभृतवेशपरिच्छदेन भवितव्यमशौण्डेनाऽपापेनाऽपापसहायेन च श्लक्ष्णशुक्लधर्म्यधन्यसत्यशर्म्यहितमितवचसा देशकालविचारिणा स्मृतिमता ज्ञानोत्थानोपकरणसम्पत्सु नित्यंयं यत्नवता; न च कदाचिद् राजद्द्विष्टानां राजद्द्वेषिणावं वा महाजनद्द्विष्टानाम् महाजनद्द्वेषिणावं वाऽप्यौषधमनुविधातव्यम्, तथा सर्वेषामत्यर्थविकृतदुष्टदुःखशीलाचारोपचाराणामनल्पप्रवादप्रतीकाराणाम् मुमूर्षूणाञ् च तथैवा-

---

१. च. सं., विमान. ८।८–१०।

ऽसन्निहितेश्श्वराणां स्त्रीणामनद्ध्यक्क्षाणावँ वा; न च कदाचित् स्त्रीदत्तमामिषमादातव्यमननुज्ञातम् भर्त्राऽथवाऽद्ध्यक्क्षेण; आतुर-कुलञ् चाऽनुप्प्रविशता त्वया विदितेनाऽनुमतप्प्रवेशिना सार्धम् पुरुषेण सुसवँवीतेनाऽवाक्शिरसा स्मृतिमता स्तिमितेनाऽवेक्क्ष्यावेक्क्ष्य मनसा सर्वमाचरता बुद्ध्या सम्म्यगनुप्प्रवेष्टव्यम्, अनुप्प्रविश्श्य च वाङ्मनोबुद्धीन्द्रियाणि न क्वचित् प्रणिधातव्यानि अनन्यत्त्रातुरोप-करणार्थाद् वाऽऽतुरगतेष्वन्न्येषु वा भावेषु; न चाऽऽतुरकुलप्प्रवृत्तयो बहिर् निश्चारयितव्याः, हसितन् चाऽऽयुषऽ प्रमाणमातुरस्य न वर्णयितव्यन् जानताऽपि तत्त्र यत्त्रोच्च्यमानमातुरस्याऽन्न्यस्य वाऽप्प्युपघाताय सम्पद्द्यते; ज्ञानवताऽपि च नात्त्यर्थमात्मनो ज्ञाने विकत्थितव्यम्, आप्तादपि हि विकत्थमानादत्त्यर्थमुद्विजन्त्यनेके; न चैव ह्यस्ति सुतरामायुर्वेदस्य पारम्, तस्मादप्प्रमत्तश् शश्श्व-दभियोगमस्मिन्नभिगच्छेत्, एतच् च कार्यम्, एवम् भूयश् च वृत्त-सौष्ठवमनसूयता परेब्भ्योऽप्प्यागमयितव्यम्, कृत्स्नो हि लोको बुद्धि-मतामाचार्यश् शत्त्रुश् चाऽबुद्धिमताम्; अतश् चाऽभिसमीक्क्ष्य बुद्धिमताऽमित्त्रस्याऽपि धन्न्ययँ यशस्यमायुष्यम् पौष्टिकलँ लोक्क्य-मब्भ्युपदिशतो वचश् श्रोतव्यमनुविधातव्यमिति । अतऽ परमिदम् ब्रूयात्– देवताग्निद्विजातिगुरुवृद्धसिद्धाचार्येषु ते नित्त्यं सम्म्यग् वर्तितव्यम्; तेषु सम्म्यग् वर्तमानस्स्यायमग्निस् सर्वगन्धरसरत्न-बीजानि यथेरिताश् च देवताश् शिवाय स्स्युः, अतोऽन्न्यथा वर्त-मानस्स्याऽशिवायेति । एवम् ब्रुवति चाऽऽचार्ये शिष्ष्यस् तथेति ब्रूयात् । तद् यथोपदेशङ् कुर्वन्नद्ध्यापप्यो ज्ज्ञेयोऽन्न्यथा त्त्व-नद्ध्यापप्यः"[1] इति । **यथाशक्ति** इति शिष्ष्यस्स्य प्रकृतिसिद्धाम् मेधाशक्तिम् पूर्वाद्ध्ययनाद्द्चुपस्कृतावँ वाऽपि मेधाशक्तिमन्न्यशक्तिन् च विचार्य आशु वा मन्दम्मन्दवँ वा अल्पमल्पवँ वा प्रभूतम्-प्रभूतवँ वा यथाकालयँ यथार्हमद्ध्यापयेद् इत्त्यर्थः । एकस्मिन् शास्त्रे प्रहतऽ खलु तादृशं शास्त्रान्तरमपि आशु ग्रहीतुं शक्नोति । तथा हि चरकसंहितायान् दृढबलऽ प्राह– "एकस्मिन्नपि यस्स्येह शास्त्रे लब्धास्पदा मतिः । स शास्त्रमन्न्यदप्प्याशु युक्तिज्ज्ञत्त्वात् प्रबुद्-ध्यते"[2] इति ॥१६७–१७०॥

---

१. च. सं., विमान. ८।११–१३ । २. तत्त्रैव सिद्धि. १२।८५ ।

(घ) वेदाध्यापननियमाः

उपनीतन् तु विधिना शौचाचारान् सुशिक्षयेत् ।
शिक्षामध्यापय्य वर्णानां स्थानादौ विनयेत च ॥१७१॥
शिष्यस्य मातृभाषायाँ ये वर्णा नैव सन्ति हि ।
तेषाँ वैदिकवर्णानामुपदेशे यतेत च ॥१७२॥
वर्णाक्षरस्स्वरादेश् च सङ्केतादेरपि स्स्फुटम् ।
स्वरूपाणि शिक्षयित्वा प्रब्रूयान् मन्त्रसंहिताम् ॥१७३॥
नात्युच्चैर् नातिनीचैर् वा धीरवँ व्यक्तम् पुनःपुनः ।
प्रब्रूयान् नातितीक्ष्णेन कण्ठेन मृदुनाऽपि वा ॥१७४॥[1]
वर्णशोऽक्षरशोऽध्यापय्य वेदं शुद्धं हि ग्राहयेत् ।
यतस् सुदुष्परिहरा ह्यशुद्धिर् देशश्यवाग्भवा ॥१७५॥
अत एव विशिष्टाऽसौ वेदाध्यापनपद्धतिः ।
निर्दिष्टा वेदरक्षार्थमृषिभिर् दूरदर्शिभिः ॥१७६॥
पदम् पादन् तथाऽर्धर्चमृचम् प्रश्नयँ यथाविधि ।
अध्यापयेत् सावधानमित्याहुश् शौनकादयः ॥१७७॥
शास्त्रप्रवृत्तितत्त्वज्ञश् शिष्यशक्त्यादिमानवित् ।
अध्यापयेत् सदाचार्यो वेदान् सर्वाङ्गसयँ युतान् ॥१७८॥
द्वौ वेदौ वा तादृशौ स्ववँ वेदवँ वाऽङ्गैस् समैर् युतम् ।
सकल्पवँ वाऽपि सावित्त्रीवँ वाऽप्यल्पैर् मनुभिर् युताम् ॥१७९॥
वेदञ् चाऽनूच्य तत्सारं सदाचारयँ यथाविधि ।
अनुशिष्याद् विदन् शास्त्रं सदाचारफलम् भुवि ॥१८०॥

विधिनोपनीतवँ वटुं शौचविधिम् आचमन–स्नान–मार्जन–प्राणायाम–सम्प्रोक्षण–सान्ध्यसूर्योपस्थाना–ऽग्निकार्या – ऽभिवादनादिविधीं श्च सम्यक् शिक्षयेत् । यथावश्यकं शिक्षामर्थतोऽध्यापय्य वर्णानां स्थानकरणनादश्वासादिके गुणे, उदात्तादिस्स्वरस्स्वरूपे, मात्राविवेके, उच्चारणगुणदोषयोः, अध्येतृनियमे, अध्ययनादिविधौ च शिष्यं सम्यगभिविनीतङ् कुर्यात् । प्राथमकल्पिकान् शिष्यान् शिक्षाशास्त्रङ् ग्रन्थतस् तु नाऽध्यापयेत् तैस् तस्य सुग्ग्रहणन् दुष्करमिति । वैदिकेषु वर्णेषु दीर्घोऽवर्णः, ऋकारः, लृकारः, एकारः, ओकारः, उदात्तस्स्वरविशिष्टास् स्वराः, अनुस्स्वारस्

---

१. मा. शि. श्लो. ४०–४१, तत्र 'घोषणस् सदनस्य खम्' इति द्द्वितीयचरणपाठः ।

तद्विशेषाश् च, रङ्गवर्णाः, ञकारः, अभिनिहितवर्णविशेषाः, यमाः, वकारस् तद्विशेषाश् च, शकारः, षकारश् चेत्यादयो वर्णा आधुनिकस्य कस्याऽपि द्विजस्य मातृभाषायाम् प्रायेण न सन्ति; अत एव तेषामुपदेशे सम्यग् यतेत। वैदिकानाँ विशिष्टानाँ वर्णाक्षरस्वरादीनाम्, तेषाँ लेख-हस्ताङ्गुलिचलनादिसङ्केतानाम्, आसनादीनाञ् च स्वरूपाणि स्फुटं शिक्षयित्वा यथाविधि मन्त्रसंहिताम् ब्राह्मणादींश्च ग्रन्थान् सम्यक् प्रब्रूयात्। शिष्यास् सम्यग् गृह्णीयुरिति पाठमित्थम् प्रब्रूयादित्युपदेशोऽयन् नात्युच्चैरित्यादिः। याज्ञे प्रयोगे तु "प्राभातिके नित्यमुस्थितेन स्वरेण शार्दूलरुतोपमेन। माध्यन्दिने कण्ठगतेन चैव चक्राह्वसङ्कूजितसन्निभेन। मयूरहंसान्यभृतस्स्वराणान् तुल्येन नादेन शिरस्स्थितेन। तारेण शंसेत् सवने तृतीये सोमेषु यागेषु तु शस्त्रमन्त्रान्"[1] इति, "यज्ञे यजुर्वेदमन्त्रा उपांशु प्रयोक्तव्याः, ऋग्वेदसामवेदयोस् तु मन्त्रा उच्चैः प्रयोज्याः, प्रैषास् तु यजुर्वेदविहिता अपि उच्चैः प्रयोक्तव्याः"[2] इत्यादिकान् वाचस्स्थाननियमानुपदिशन्ति। गाननियमाँस् तु- "कृत्वा चाऽऽवश्यकान् धर्माञ् जठरम् पर्युपास्य च। पीत्वा धूमञ् घृतञ् चैव शुचिर् भूत्वा ततो वदेत्। मन्द्रेणोपक्रमेत् पूर्वं सर्वशाखास्वयवँ विधिः। सप्तमन्त्रानतिक्रम्य यथेष्टवँ वाचमुत्सृजेत्। न तामुदीरयेद् वाचयँ या प्राणमुपरोधयेत्। प्राणानामुपरोधेन वैस्स्वर्यञ् चोपजायते। स्वरव्यञ्जनमाधुर्यलँ लुप्यते नाऽत्र संशयः"[3] इत्यादिकानुपदिशन्ति। अत्रोपदिष्टन् धूमपानन् त्वाऽऽयुर्वेदसम्मतन् न लौकिकम्; आयुर्वेदसम्मतो धूमपानविधिश् चरकसंहितायां श्लोकस्स्थाने पञ्चमेऽध्याये वर्णितोऽस्ति। देशश्यवाक्प्रभावाद् याऽशुद्धिर् जायते साऽतीव दुष्परिहरा भवतीति भारतवर्षीयाऽऽधुनिकदेशश्यभाषासु च बहवो वैदिका वर्णा एव न सन्तीति च वेदस्य शुद्धमुच्चारणमधुना सुदुष्करम् भारतवर्षीयैर् द्विजैरपि। अतो वर्णशोऽक्षरशोऽप्यध्यापयन् सुमहता यत्नेन सावधानतया च शुद्धं हि वेदवँ वटुना ग्राहयेत्। समीचीनाम् पद्धतिमवलम्ब्याऽध्यापनेनैवेदन् दुष्करमपि कार्यञ् कर्तुं शक्यत इति बोधस्य दृढीकरणाय वेदाध्यापनपद्धतिविशेषनिदर्शनाय च शौनकोक्ता ऋग्वेदाऽध्यापनपद्धतिरत्रोदाहियते सङ्क्षेपेण। सा चेयम्-

---

१. तुलना कार्या- पा. शि. श्लो. ३६-३७। २. का. श्रौ. १।३।१०-११; सत्या. श्रौ. १।१।१। ३. ना. शि. २।८।७-१०।

"पारायणवँ वर्तयेद् ब्रह्मचारी गुरुश् शिष्येब्भ्यस् तदनुव्रतेब्भ्यः। अद्ध्यासीनो दिशमेकाम् प्रशस्ताम् प्राचीमुदीचीमपराजितावँ वा"[1] (अद्ध्यापनादव्यवहितम् पूर्वमहोरात्रम् ब्रह्मचारी [त्यक्तमैथुनः] सन् गृहम् पूर्वेणोत्तरेण पूर्वोत्तरेण वा स्थितेऽवकाशे आसीनो गुरुर् गुरोरद्ध्ययनस्य च भक्तेब्भ्यो धृततत्तदद्ध्ययनार्थावश्यकव्रतेब्भ्यश् शिष्येब्भ्यो वेदप्रवचनङ कुर्यात्); **"एकश् श्रोता दक्षिणतो निषीदेद् द्वौ वा भूयांसस् तु यथावकाशम्। तेऽधीहि भो ३ इत्यभिचोदयन्ति गुरुं शिष्या उपसङ्गृह्य सर्वे"**[2] (एकश् चेच् शिष्यस् स गुरोर् दक्षिणम् बाहुम् प्रत्युपविशेत्, द्वौ चेच् शिष्यौ तावपि गुरोर् दक्षिणम् बाहुम् प्रत्येव निषीदेताम्, भूयांसश् चेच् शिष्यास् ते गुरोर् यस्स्यायँयस्स्यान् दिशि अवकाशस् तस्स्यान्तस्स्यान् दिशि निषीदेयुः; गुरोर् दक्षिणम् पादं सव्यपाणेरुपरि स्थितेनोत्तानेन दक्षिणेन पाणिना सव्यं सव्येनोत्तानेन पाणिना गृहीत्वा तौ शिरसि कृत्वा उक्तनियममनुसृत्योपविष्टाश् शिष्या गुरुमधीहि भो ३ इति प्रार्थयन्ते); **"स ओमिति प्रस्स्वरति त्रिमात्रः प्रस्स्वारस्स्थाने स भवत्युदात्तः। चतुर्मात्रो वाऽर्धपूर्वानुदात्तष् षण्मात्रो वा भवति द्विस्स्वरस् सन्"**[3] (शिष्यैरद्ध्ययनाय प्रार्थितो गुरुर् ओ३म् इति प्रस्स्वारङ करोति, प्रस्स्वारस्स्थाने आगतस् स ओङ्कारस् त्रिमात्र उदात्तश् च भवति; अथवा स ओङ्कारश् चतुर्मात्रः पूर्वार्धेऽनुदात्त उत्तरार्धे उदात्तश् च भवति; अथवा त्रिमात्रकेण अकारेण त्रिमात्रकेण उकारेण चेति स्वतन्त्राब्भ्यामिवोच्चरिताब्भ्यान् द्वाब्भ्यांस्वराब्भ्यामेकवर्णीभूताब्भ्यायँ युक्तस् स ओङ्कारष् षण्मात्रो भवति); **"अद्ध्येतुरद्ध्यापयितुश् च नित्यं स्वर्गद्द्वारम् ब्रह्मम बरिष्ठमेतत्। मुखं स्वाद्ध्यायस्स्य भवेत्"**[4] (शिष्यस्स्य गुरोश् च कृते एतदोङ्काररूपवँ वरिष्ठम् ब्रह्मम ध्रुवं स्वर्गद्द्वारम् भवेत्, एतत् स्वाद्ध्यायस्स्यादौ मुखमिव च भवेत्); **प्रचोदितोऽभिक्रमते यथाऽस्स्य क्रमः परस्ताद् विहितस् तथैव"**[5] (शिष्येणाद्ध्ययनाय प्रार्थितो गुरुरस्स्याऽद्ध्ययनस्य यथा क्रम उत्तरत्तर विहितस् तथैव अभिक्रमङ करोति) **"गुरुश् शिष्याय पदमाह मुख्यं समासश् चेदसमासो यदि द्द्वे"**[6]

---

१. ऋ.प्रा. ३।३।१ (१५।१)। २. तत्रैव ३।३।२–४ (१५।२–४)।
३. तत्रैव ३।३।५ (१५।५)। ४. तत्रैव ३।३।६ (१५।६)।
५. तत्रैव ३।३।८ (१५।८)। ६. तत्रैव ३।३।१४ (१५।१४)।

(प्रवचनीयस्य भागस्य मुखमिव स्थितम् प्रथमम् पदं समस्तञ् चेदेकमेवाऽसमस्तञ् चेद् मुक्ख्ये द्वे पदे गुरुऽ प्रथमस्य शिष्यस्य कृते [प्रथमश् शिष्यो गृह्णीतेति] उच्चारयति); "**सर्वोदात्तन् त्विह तस्मिन्नपृक्तमक्षैप्प्रयुक्तन् द्विरुपस्थितवँ वा**"[1] (इह तस्मिन्नभिक्रमणे [प्रवचने] गुरुश् शिष्यबोधाय सर्वोदात्तम् पदम्, संहितायाङ् क्षैप्प्रसन्धिना रहितमपृक्तम् पदम्, पदपाठे इतिपदेन योजनीयम् पदञ् चाऽपि द्विरुच्चारयति); "**अभिक्रान्ते द्वैपदवँ वाऽधिकवँ वा पूर्वम् पदम् प्रथमऽप्राह शिष्यः**"[2] (गुरुणा द्वयोऽ पदयोऽ प्रोक्तयोरधिकेषु पदेषु वा प्रोक्तेषु शिष्येषु प्रथमः [=प्रगततमः, पटुतमः] शिष्यऽ पूर्वङ् गुरूक्तम् पदमुच्चारयति); "**निर्वाच्च्ये भो इति चोदना स्स्यान् निरुक्त ओम् भो ३ इति चाऽब्भ्यनुज्ज्ञा**"[3] (गुरुणोक्तङ् ग्रहीतुमशक्तस्य शिष्यस्य पुनर् निष्कृष्य वक्तव्ये विषये गुरुम् प्रति भो इति प्रार्थना स्यात्, निर्वाच्च्यमुक्तवतो गुरोर् निरुक्ते विषये प्रत्त्याम्नानाय शिष्यम् प्रति ओम् भो ३ इत्त्यब्भ्यनुज्ज्ञा स्यात्); "**प्रत्त्युच्चार्यैतद् वचनम् परस्य शिष्यस्य स्स्याद् भो इति चोदना वा। अर्धर्चोदर्केषु तु वर्जयेयुरद्ध्यायान्तेषूभयथा स्स्मरन्ति**"[4] (परस्य [=गुरोः] एतत् प्रोक्तन् निरुक्तवँ वा वचनम् प्रत्त्युच्चार्य [=अब्भ्यस्य] उत्तरस्य पदस्य पदसमुदायस्य वा प्रवचनाय गुरुम् प्रति भो ३ इति चोदना स्यात्, अथवाऽचोदित एव गुरुश् शिष्यकृतमाम्नानं सुग्ग्रहणञ् च विचार्य उत्तरम् पदम् पदसमुदायवँ वा प्रब्रूयात्; अर्धर्चसमाप्तिषु तु शिष्याश् चोदनावँ वर्जयेयुः, यावद् गुरुरधिकं स्वविचारेणैव न प्प्रवक्ति तावत् प्रोक्तमर्धर्चमेवाब्भ्यस्स्येयुः, अद्ध्यायान्तेषु तु स्वब्भ्यस्ताद्ध्यायाश् शिष्या उत्तरस्य ग्रन्थस्य प्रवचनाय गुरुम् प्रति चोदनाङ् कुर्वीरन्, अथवा ताञ् चोदनावँ वर्जयेयुर् यावद् गुरुरधिकं स्वविचारेणैव न प्प्रवक्ति तावत् तमेवाऽद्ध्यायमब्भ्यस्स्येयुरिति उभयथा नियमं स्मरन्त्याचार्याः); "**दक्षिणाय प्प्रथमम् प्रश्नमाह प्प्रदक्षिणन् तत ऊर्ध्वम् परीयुः**"[5] (गुरुऽ पूर्वन् दक्षिणेन शिष्येण प्रश्नङ्[6] ग्राहयति; तत ऊर्ध्वमन्ये शिष्याऽ

---

१. ऋ.प्रा. ३।३।१० (१५।१०)। २. तत्त्रैव ३।३।९ (१५।९)।
३. तत्त्रैव ३।३।११ (१५।११)। ४. तत्त्रैव ३।३।१३ (१५।१३)।
५. तत्त्रैव ३।३।२१ (१५।२१)। ६. प्रश्नस् तृचऽ पङ्क्तिषु तु द्द्वृचो वा द्वेद्द्वे च पङ्क्तेरधिकाक्षरेषु। एका च सूक्तं समयास्त्वगण्या परावरार्ध्या द्विपदे यथैका॥ सूक्तस्य शेषोऽल्पतरो यदि

प्रश्नस्य सम्यग् ग्रहणायाऽब्भ्यासाय च तम् प्रकृष्टन् दक्षिणं सतीर्थ्यम् परिगच्छेयुः); "**एतेन कल्पेन समाप्य प्रश्नम् प्रत्त्याम्नायुस् तम् पुनरेव सर्वे**"[1] (एतेन विधिना एकर्चन् द्वृचन् तृचमधिकवँ वा यथायथम् प्रश्नं सर्वमागमय्य तमेव प्रश्नं सर्वे शिष्याः पुनःपुनरब्भ्यस्स्येयुः); **तत ऊर्ध्वं सन्ततं सर्वं वृतेन प्रविग्ग्रहेण मृद्द्ववग्ग्रहेण। सर्वोदात्तेन च चर्चयेयुस् सर्व इमान्न्युपस्थापयन्तः पदानि**"[2] (तस्मादब्भ्यासादूर्ध्वम् आदिपदिकाश् च उत्तरपदिकाश् च भूत्वा द्वयोः पक्षयोः प्रविभक्तास् सर्वे शिष्या निर्दिष्टानि उपस्थाप्यानि [=इतिकरणेन योज्ज्यानि] पदानि प्राद्द्युपसर्गरूपाणि चघहिवेति निपातरूपाणि च यथाविधानं सम्प्रदायानुसारं सेतिकरणानि कुर्वाणा एकःपक्षो यावत् स्वपक्षविरामसमीपं स्वपक्षपदविरामसमीपवँ वाऽऽगच्छति तावदेवान्न्यः पक्षस् स्वपक्षपदाद्द्युच्चारणप्प्रारम्भङ कुरुते इत्त्यनया रीत्त्या अविच्छेदेन समेन स्स्वरेण सन्धिजप्प्रश्श्लिष्टवर्णयुक्तानि पदानि विश्श्लिष्टवर्णयुक्तानि कृत्त्वा तमेव प्रश्नम् पुनःपुनरुच्चारयेयुः, ततस् सर्वम् प्रश्नं सर्वोदात्तङ कृत्त्वा उदात्तेन च स्स्वरेण उक्तेनैव प्प्रकारेण पुनःपुनरुच्चारयेयुः); "**समस्स्यन्तश् च द्द्विपदाद्द्चर्धर्चौ व्यवस्स्यन्त इतराश् चर्चयेयुः**"[3] (पश्वा न तायुम्[4] इत्त्येवमादीनान् द्विपदासूक्तानां समसङ्ख्याकद्द्विपदाकानान् द्वौद्वावर्धर्चौ समस्स्य एकैकामृचङ कुर्वाणा विषमसङ्ख्याकद्द्विपदाकानावँ वनेम पूर्वीर्[5] इत्त्येवमादीनान् तु अन्तिमान् द्विपदामेकामृचङ कुर्वाणा अन्न्येषामर्धर्चानान् तु द्वौद्द्वावर्धर्चौ समस्स्यैकैकामृचङ कुर्वाणाः पूर्ववच् चर्चयेयुः); "**भो ३ इत्त्यर्धर्चे गुरुणोक्त आह शिष्य ओम् भो ३ इत्त्युचितामृचञ् च**"[6] (तस्य दिनस्याऽद्ध्ययनस्यान्तिमेऽर्धर्चे शिष्यैस् सम्यगब्भ्यस्ते सति गुरुस् तद्दिनप्रवचनाद्ध्ययनविरामाय शिष्यान् प्रति भो३ इति भणति, ततश् च शिष्या ओम् भो३ इत्त्युक्त्वा "शतधारमुत्समक्षीयमाणवँ विपश्चितम् पितरवँ वक्त्वानाम्। मेडिम् मदन्तम् पित्त्रोरुपस्थे तं रोदसी पिपृतं सत्यवाचम्"[7] इति ऋचम्, आश्श्वलायनीयनित्त्यस्वाद्ध्यायपरिधानीयान्

स्स्यात् पूर्वं स गच्छेद् यदि तु द्द्वृचो वा।– ऋ.प्रा. १५।२३–३०।

१. ऋ. प्रा. ३।३।१५ (१५।१५)। २. तत्त्रैव ३।३।१६ (१५।१६)। ३. तत्त्रैव ३।३।२० (१५।२०)। ४. ऋ.सं. १।६५।१। ५. तत्त्रैव १।७०।१। ६. ऋ. प्रा. ३।३।३२ (१५।३२)। ७. ऋ. सं. ३।२६।९।

"नमो ब्रह्मणे नमोऽस्त्वग्नये नमः पृथिव्यै नम ओषधीभ्यः। नमो वाचे नमो वाचस्पतये नमो विष्णवे महते करोमि"[1] इति ऋचञ् च आहुः); "**एवं सर्वे प्रश्नशोऽध्यायमुक्त्वोपसङ्गृह्य्याऽतिसृष्टा यथार्थम्**"[2] (एतेन प्रकारेण सर्वे शिष्या एकैकम् प्रश्नमभ्यस्याऽध्यायन् [तस्य दिनस्य प्रवचनाद्ध्ययनं] समाप्य गुरोऽ पादावुपसङ्गृह्य गुरुणाऽनुज्ञाताः सन्तो [गुरुम् प्रदक्षिणीकृत्य[3] निर्गम्य] येषुयेषु कर्मसु गुरुणाऽनुज्ञाता वा नियुक्ता वा तेषुतेषु कर्मसु प्रवर्तेरन्); "**अथैके प्राहुरनुसंहितन् तत् पारायणे प्रवचनम् प्रशस्तम्**"[4] (अत्तराऽनुपदम् प्रवचनम् प्रशस्तमिति विचारात् तदेव प्रतिपादितम्, अन्ये केचिदाचार्यास् तु आचार्यस्य शिष्यान् प्रति ऋचां संहितानुसारि प्रवचनम् प्रशस्तमित्याहुः) इति। पदशऽ प्रवचने कृते, संहितानुसारम् पादशोऽर्धर्चश ऋक्शो वाक्यशऽ कण्डिकाशो वा प्रवचने कृतेऽपि वा वेदाक्षरग्राहणे गुरुर् ग्राहणीयं शब्दम् प्रथममुच्चारयति शिष्या यथा गुरुरुच्चारयति पूर्णतया तथैव गुरूक्तमनूच्चारयितुम् प्रयतमाना उच्चारयन्तीति वेदाद्ध्यापनतत्त्वम्। एतच् च ऋग्वेदमण्डूकसूक्तस्य "यदेषामन्न्यो अन्न्यस्य वाचं शाक्तस्येव वदति शिक्षमाणः"[5] इत्त्यर्धर्चादपि स्स्फुटमवगम्यते। एतेनैतस्या वेदोच्चारणपद्धतेरतीव प्राचीनत्वमपि स्स्फुटम् भवति। "शास्त्राणि अधिकारिणं शक्तिमन्तमेव कर्मसु नियोक्तुम् प्रभवन्ति"[6] इति शास्त्रप्प्रवृतितत्त्वस्य ज्ञाता द्विजोत्तमस् सदाचार्यश् शिष्यशक्त्यादिमानवित् सन् षड्भिरङ्गैस् सहिताँश् चतुरस् त्रीन् वा वेदान्, तादृशौ वेदौ, तादृशं स्वशाखावेदवँ् वाऽद्ध्यापयेत्[7]। शाखा च मन्त्रसंहिता ब्राह्मणङ्ग कल्पश् चेत्त्याहुः। शिष्यस्य शक्तिङ्ग कामनाङ्ग कर्मक्षेत्रादिकवँ् वृत्तिसम्भावनाञ् च तत्त्वतो जानन्नाचार्यो याज्ञिककुलोत्पन्नो याज्ञिको बुभूषुश् चेच् छिष्यऽ केवलेन कल्पेनैव सहितवँ् वेदमद्ध्यापयेत्[8]। अथवा सर्वथाऽप्यसमर्थम् ब्राह्मनिकादिन्यूनतमद्द्विजकर्मपर्याप्तैर् मन्त्रैस् सहिता सावित्त्रीङ्ग गायत्त्रीमेव वाऽपि परिस्थितिविवशमद्ध्यापयेत्, ततऽ

---

१. आश्व. गृ. सू. ३।३।४। २. ऋ. प्रा. ३।३।२२ (१५।२२)।
३. आप. ध. सू. १।२।७।२। ४. ऋ. प्रा. ३।३।२२ (१५।२२)।
५. ७।१०३।५। ६. धर्ममी. ६।१।१–५२; ६।३।१–७।
७. पा. गृ. २।६।१–६; मनु. ३।२। ८. पा. गृ. २।६।८।

काम्यशास्त्राद्ध्ययनादिकार्थमनुमतवँ विसृजेदित्यर्थः। यद्द्यपि न केनाऽपि गृह्यसूत्रकारेण सावित्त्रगायत्त्र्यादिमात्त्राद्ध्ययनपक्षप्रतिपादितस् तथाऽपि शतपथब्राह्मणे[1] अवरत एकस्स्या अपि ऋचोयजुषो गाथाया कुम्ब्याया वाऽपि अहरहोऽद्ध्ययनं स्वाद्ध्यायाऽद्ध्ययनव्रतस्स्याऽविच्छेदाय कार्यमित्युक्तमिति, मनुस्स्मृतौ[2] अपि ब्रह्मयज्ञार्थं सावित्त्रगायत्त्रीमात्त्रस्स्याऽप्यद्ध्ययनवँ विहितमिति, पराशरेण च– "अग्निकार्यात् परिभ्रष्टास् सन्ध्योपासनवर्जिताः। वेदाँश् चैवाऽनधीयानास् सर्वे ते वृषलास् स्मृताः॥ तस्माद् वृषलभीतेन ब्राह्मणेन विशेषतः। अद्ध्येतव्योऽप्येकदेशो यदि सर्वो न शक्यते"[3] इति स्मृतमिति चाऽस्माभिरिदमुक्तम्। सदाचारोपदेशविधिश् च तैत्तिरीयारण्यके यथा– "वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति। सत्यवँ वद। धर्ममञ् चर। स्वाद्ध्यायान् मा प्रमदः। आचार्याय प्रियन् धनमाहृत्य प्रजातन्तुम् मा व्यवच्छेत्सीः। सत्यान् न प्रमदितव्यम्। धर्मान् न प्रमदितव्यम्। कुशलान् न प्रमदितव्यम्। भूत्यै न प्रमदितव्यम्। स्वाद्ध्यायप्रवचनाभ्यान् न प्रमदितव्यम्। देवपितृकार्याभ्यान् न प्रमदितव्यम्। मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव। यान्न्यनवद्द्यानि कर्माणि तानि सेवितव्यानि नो इतराणि। यान्न्यस्स्माकं सुचरितानि तानि त्वयोपास्यानि नो इतराणि। ये के चास्स्मच्छ्रेयांसो ब्राह्मणास्तेषान् त्वयाऽऽसनेन प्रश्वसितव्यम्। श्रद्धया देयम्। अश्रद्धयाऽदेयम्। श्रिया देयम्। ह्रिया देयम्। भिया देयम्। सवँविदा देयम्। अथ यदि ते कर्ममविचिकित्सा वा वृत्तविचिकित्सा वा स्स्याद् ये तत्त्र ब्राह्मणास् सम्मर्शिनो युक्ता आयुक्ता अलूक्षा धर्ममकामास् स्युर् यथा ते तत्त्र वर्त्तेरन् तथा तेषु वर्त्तेथाः। एष आदेशः। एष उपदेशः। एषा वेदोपनिषत्। एतदनुशासनम्। एवमुपासितव्यम्। एवमु चैतदुपास्स्यम्"[4] इति। शास्त्रं हि इह व्यवहारफलकम्, तथा हि रावणम् प्रति विभीषणवाक्यम्– "गृह्यन्ते यदि रोषेण त्वादृशोऽपि विचक्षणाः। ततश् शास्त्रविपश्चित्त्वं श्रम एव हि केवलम्"[5] इति। तत्त्राऽपि "ऋतञ् च स्स्वाद्ध्यायप्रवचने च, सत्यञ् च स्स्वाद्ध्यायप्रवचने च तपश्च स्स्वाद्ध्यायप्रवचने च

---

१. मा. वा. श. ब्रा. ११।५।७।१०। २. २।७८, १०४, ११८।
३. परा. स्मृ. १२।३१–३२। ४. तै. आ. ७।११।
५. वा. रा., सु. का. ५२।८।

दमश्च स्स्वाद्ध्यायप्प्रवचने च''[1] इत्त्याद्द्चया श्रुत्त्या, ''वेदमेवाब्भ्यसेन् नित्त्ययँ यथाकालमतन्द्रितः । तं ह्यस्स्याऽऽहुऽ परन् धर्ममुपधर्मोऽन्न्य उच्च्यते''[2] इत्त्याद्द्चया स्मृत्त्या, ''ब्राह्म्मणस्स्य तु यो धर्मस् तन् ते वक्क्ष्यामि केवलम् । दममेव महाराज धर्ममाहुऽ पुरातनम् ।। स्वाद्ध्यायाब्भ्यसनञ् चैव तत्त्र कर्म समाप्प्यते । तञ् चेद् वित्तमुपागच्छेद् वर्तमानं स्वकर्मणि ।। अकुर्वाणवँ विकर्माणि शान्तम् प्रज्ज्ञानतर्पितम् । कुर्वीताऽपत्त्यसन्तानमथो दद्द्याद् यजेत च । सर्वँ विभज्ज्य च भोक्तव्व्यन् धनं सद्भिरितीर्यते ।। परिनिष्ठितकार्यस् तु स्वाद्ध्यायेनैव ब्राह्म्मणः । कुर्यादन्न्यन् न वा कुर्यान् मैत्त्रो ब्राह्म्मण उच्च्यते''[3] इति महाभारतवचनेन च स्वाद्ध्यायप्प्रवचने ब्राह्म्मणम् प्रति नित्त्यत्त्वेन सर्वप्प्रधानधर्मत्त्वेन च विहिते इति तत्त्र कथमप्प्यप्प्रमदितव्व्यत्त्वञ् च यथार्हम् बोधयेत्. ''यथा दारुमयो हस्ती यथा चर्ममयो मृगः । ब्राह्म्मणश् चाऽनधीयानस् त्रयस् ते नाम बिब्भ्रति''[4] इति; ''ब्राह्म्मणस्स्य च देहोऽयङ् क्षुद्द्रकामाय नेष्ष्यते । इह कृच्छ्राय तपसे प्रेत्त्याऽनन्तसुखाय च''[5] इत्त्यादि च स्स्मारयेत् ।।१७१–१८०।।

(ङ) अथ अर्थतत्त्वप्प्रधानशास्त्राद्ध्यापननियमाः

अर्थतत्त्वप्प्रधानन् तु शास्त्रयँ यत्नेन ग्राहयेत् ।
तत्त्राऽयन् तु विधिर् दृष्टो महद्भिर् गुरुभिश् श्रितः ।।१८१।।
विचारयिष्ष्यमाणस्स्य स्स्पष्टार्थं प्रतिपत्तये ।
प्रतिभोत्पादनायै च जिज्ज्ञासोद्बोधनाय च ।।१८२।।
चेतस्समाधये पूर्वबोधज्ज्ञानाय वा पुनः ।
व्याक्ख्यानाऽऽदावेव प्रश्नान् शिष्ष्यान् पृच्छेद् यथौचिति ।।१८३।।
विषयञ् चार्थसम्बन्धम् प्रयोजनमपि स्स्फुटम् ।
प्रतिपाद्द्य च सन्देहपूर्वपक्क्षनिरासनैः ।।१८४।।
समासेन च व्यासेनाऽप्प्यर्थानाम् प्रतिपादनैः ।
अनन्वीक्क्षणोदाहरणप्प्रयोगादिप्प्रदर्शनैः ।।१८५।।
समाम्म्नानार्थविज्ज्ञानप्प्रयोगादेऽ परीक्क्षणैः ।
प्रब्ब्रूयाच् शास्त्रमखिलङ् ग्राहयेच् च क्क्रमादिति ।।१८६।।

---

१. तै. आ. ७।९; छा. उ. ८।१५।१ । २. मनु. ४।१४७, २।१६६–१६७; १२।९२ । ३. १२।६०।८–१२; २३८।१३; २६।२–३; द्र.मनु.२।८७ । ४. म.भा. १२।३६।४६; मनु.२।१५७; व्या.स्मृ.४।३७ । ५. भागवते ११।१७।४२ ; म. भा. १२।३२१।२३ ।

ग्रन्थस्य क्लिष्टान् भागाँस् तु सम्यग् व्याख्याय बोधयेत् ।
व्याख्यायाः पद्धतिश् चेयम् बुधानां सम्मता हिता ॥१८७॥
पदच्छेदः पदार्थोक्तिर् विग्रहो वाक्ययोजना ।
आक्षेपोऽथ समाधानं शरेष्ठवं व्याख्यानमुच्यते ॥१८८॥[1]

शिष्ये प्रतिभाया उत्पादनाय पूर्वबोधपरीक्षायै च आचार्याणावं विद्द्वार्थिनः प्रति प्रश्ना ब्राह्मणग्रन्थेष्वपि उपलब्ध्यन्ते । तथाहि वैशश्वानरविद्द्वाद्ध्ययनायाऽऽगतान् प्राचीनशालसत्ययज्ञ्ले-नद्रद्द्युम्नजनबुडिलोद्दालकान् कैकेयोऽश्वपतिरुपदेशात् पूर्वमेवो-पदेशश्यवस्तुविषये क्रमेण प्रश्नान् पप्रच्छेति छान्दोग्योपनिषद्-ब्राह्मणे श्रूयते । तत्प्रकरणव्याख्याने शङ्करभगवत्पाद आह— "ननन्वयमनन्याय आचार्यस् सन् शिष्यम् पृच्छतीति; नैष दोषः, 'यद् वेत्थ तेन मोपसीद ततस् त ऊर्ध्ववं वक्ष्यामि'[2] इति नन्याय-दर्शनात् । अनन्यत्तरापप्याचार्यस्याऽप्रतिभानवति शिष्ये प्रतिभोत्-पादनार्थः प्रश्नो दृष्टोऽजातशत्रोः 'क्वैष तदाऽभूत्कुत एतदागात्'[3] इति"[4] इति । बादरायण-जैमिनि-प्रभृतिभिश् च महद्भिराचार्यैर् वेदार्थप्रकाशनीय विषयार्थसम्बन्धादिभिरधिकरणानि अद्ध्यायेषु पादेषु च यथार्हन् निबद्ध्य वेदार्थनिर्णयो दर्शितः । अधिकरण-लक्षणञ् च— "विषयो विशयश् चैव पूर्वपक्षस् तथोत्तरम् । निर्णयश् चेति पञ्चाङ्गं शास्त्रेऽधिकरणवं विदुः"[5] इति । केचित् तु "प्रयोजनं सङ्गतिश् च प्राञ्चोऽधिकरणवं विदुः"[6] इति द्वितीयार्धम् पठन्ति । अन्ये पुनः "पक्षद्द्वयफलञ् चैव शास्त्रेऽ-धिकरणवं विदुः"[7] इति पठन्ति । भारतीतीर्थस् तु "तत्त्रैकैकमधिकरणम् पञ्चावयवम् । विषयस् सन्देहस् सङ्गतिः पूर्वपक्षस् सिद्धान्तश् चेति पञ्चाऽवयवाः"[8] इत्याह । अत एवार्थतत्त्वप्रधानस्य शास्त्रस्याऽद्ध्यापने इयमधिकरणपद्धतिरवलम्बिता शिष्यहितायाऽऽ-

---

१. रामकृष्णकृतायाम् पञ्चदशीव्याख्यायाम् (७।३), तत्र 'आक्षेपस्य समाधानवं व्याख्यानम् पञ्चलक्षणम्' इति पाठः ।
२. छा. उ. ७।१।१ । ३. का. वा. बृ. उ. २।१।१६ ।
४. छा. उ. वि. ५।१२।१ । ५. मीमांसानुक्रमणिकोपोद्घाते ।
६. ब्रह्मसूत्रवृत्तेर् मिताक्षरायाः प्रास्ताविके, पृ. VII.
७. मीमांसान्यायप्रकाशस्य प्रास्ताविके वासुदेवशास्त्रिकृते, पृ. ९ ।
८. वैयासकन्यायमालायाम् ।

शुबोधाय च भवेत्। प्राणाचार्यश् चरकोऽपि शास्त्रविदां शास्त्रप्रवचनविधिमेतादृशम् प्रतिपादयति– "तन्त्रमार्षञ्च कार्त्स्न्येन यथाम्नायमुच्यमानवँ वाक्यशो भवत्युक्तम्; बुद्ध्या सम्यगनुप्रविश्यार्थतत्त्ववँ वाग्भिर् व्याससमासप्रतिज्ञाहेतूदाहरणोपनयनिगमनयुक्ताभिस् त्रिविधशिष्यबुद्धिगम्याभिरुच्यमानवँ वाक्यार्थशो भवत्युक्तम्, तन्त्रनियतानामर्थदुर्गाणाम् (पारिभाषिकाणान् दुरवधारणीयानाञ् चाऽर्थानाम्) पुनर् विभावनैरुक्तमर्थावयवशो भवत्युक्तम्"[1] इति। शास्त्रव्याख्याने वाक्यार्थनिर्णये च "अतश् च प्रकृतम् बुद्ध्वा देशकालान्तराणि च। तन्त्रकर्तुरभिप्रायानुपायांश् चाऽर्थमादिशेत्"[2] इत्यादिवचनानुसारम् प्रवर्तितव्यम्। व्याख्यासु वेदव्याख्याया विशिष्टा धर्मास् सन्ति; ते च बृहद्देवतायां शौनकेन विस्तरेण प्रोक्ताः[3]। ते एव उव्वटेन माध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदमन्त्रसंहिताव्याख्याया उपक्रमे उक्तास् सङ्क्षेपेण। ते यथा– "अतिरिक्तम् पदन् त्याज्यं हीनवँ वाक्ये निवेशयेत्। विप्रकृष्टञ् च सन्दद्ध्यादानुपूर्वीञ् च कल्पयेत्। लिङ्गन् धातुर् विभक्तिश् च योज्या वाक्याऽनुलोमतः। यद्यत् स्याच् छान्दसम् मन्त्रे तत्तत् कुर्यात् तु लौकिकम्"[4] इति। प्रकरणविशेषतात्पर्यनिर्णये च जैमिनीयधर्ममीमांसा–बादरायणीयब्रह्ममीमांसा–न्यायफलितार्थकथनपरश् शिष्टपरम्पराऽऽगतः "उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम्। अर्थवादोपपत्ती च लिङ्गन् तात्पर्यनिर्णये" इति श्लोकोऽपि सततं स्मरणीयः ॥१८७–१८८॥

शिष्यधीवृद्धये बुद्धिव्यायामे तान् हि योजयेत्।
तैस् स्वबुद्ध्यैव प्रश्नानां समाधानञ् च कारयेत् ॥१८९॥
लेखने भाषणे वाद-कथास्स्वपि च योजयेत्।
सर्वैरुपायैस् तान् प्रौढान् स्वशास्त्रे विदधीत च ॥१९०॥

शिष्यान् अधीतशास्त्राद्ध्यायपादाधिकरणप्रकरणादीनां सारस्य, समीक्षायाः, विवादास्पदानावँ विषयाणाञ् च लेखने, तेषु विषयेषु भाषणे, वादजल्पवितण्डारूपासु त्रिविधास्स्वेव कथासु च प्रेरयेत्; किमधिकवँ वक्तव्यम्, यद्द्यपि "मातृमान्पितृमानाचार्यवान्पुरुषो

---

१. च. सं. १।३०।१६। २. तत्रैव १।२६।५०।
३. २।९९–१२२। ४. 'योज्यवँ वाक्यानुलोमतः' इति तत्र पाठः।

ब्रूयाद्"[1] इति विद्द्यासम्पत्तितत्त्वन् तथापि "अतीत्य बन्धूनवलङ्घ्य शिष्यानाचार्यमागच्छति शिष्यदोषः"[2] इति लोकप्रवादः, "राजा राष्ट्रकृतम् पापं राज्ञ्ञ× पापम् पुरोहितः । भर्ता च स्त्रीकृतम् पापं शिष्यपापञ्च गुरुर् भजेत्"[3] इति च नीतिज्ञा वदन्ति; मनुरपि– "अन्नादे भ्रूणहा मार्ष्टि पत्यौ भार्याऽपचारिणी । गुरौ शिष्यश् च याज्यश् च स्तेनो राजनि किल्बिषम्"[4] इत्याह; अतो यथासम्भवयं यथौचिति सर्वैरत्तरोपदिष्टैरन्यैश् च स्वप्रतिभाकल्पितैरुपायैश् शिष्यान् पात्तरभूतान् स्वशास्त्रे प्रौढान् विदधीत इत्यभिप्रायः ।।१८९–१९०।।

(च) विद्द्यारक्षार्थवँ विद्द्याविवृद्ध्यर्थञ् च स्नातकस्य अद्ध्यापकस्य च व्यवहारविशेषे नियमाः

सर्वान् परित्यजेदर्थान् स्वाद्ध्यायस्य विरोधिनः ।
यथा तथाऽद्ध्यापनयँ यत् सा ह्यस्य कृतकृत्यता ।।१९१।।[5]

स्वाद्ध्यायस्याऽविरोधिना केन चिद् धर्म्येण कर्मणा यथा तथा जीवनयात्तराम् प्रसाद्ध्य अद्ध्यापनञ्च कुर्वन् स्नातको धनिबलिनामतिसेवाम् अर्थकामपराविवेकिलौकिकप्रवृत्तिम् अन्न्याँश् च स्वाद्ध्यायाद्ध्ययनस्य स्वाद्ध्यायार्थस्य (वेदार्थस्य) च विरोधिनस् सर्वानेवार्थान् परित्यजेत्; यदस्य धर्म्येण कर्मणा यथा तथा जीवनयात्तराम् प्रसाद्ध्य अद्ध्यापनवँ वेदार्थानुपालनञ् च सा हि अस्य कृतकृत्यतेत्यर्थः ।।१९१।।

वयस× कर्मणोऽर्थस्य श्रुतस्याऽभिजनस्य च ।
वेषवाग्बुद्धिसारूप्यमाचरन् विचरेदिह ।।१९२।।[6]

यदि विद्द्याव्रतस्स्नातकोऽद्ध्यापको वाऽपि श्रुतस्य (शास्त्रस्य) अनुरूपवँ वेषवँ वाचम् बुद्धिञ् च न कुर्वीत तर्हि तस्मिन् श्रुते लोकस्य श्रद्धा न स्यात्, लोकश्रद्धाऽभावे च तच्छास्त्रानुपालनन् तेन शास्त्रेण लोककल्याणस्य सम्पादनञ् च अशक्यमेव स्यादिति च यथोक्तमाचरेदित्यभिप्रायः । एतेन स्वपुत्त्राद्द्यभिविनये च स्वशास्त्रानुकूल्यविचारः सूक्ष्मेक्षिकया कर्तव्य एवेत्यपि

---

१. मा.वा.श.ब्रा. १४।६।१०।२ । २. प्रा.भा.शि.प., पृ. ४२ । ३. चा. नी. ६।१० । ४. मनु. ८।३१७ (मनुस्स्मृतौ किञ्चित् पाठान्तरमस्ति) । ५. तत्त्रैव ४।१७ । ६. तत्त्रैव ४।१८ ।

सूचितम् भवति। "रहस्यं सर्ववेदानामनैतिह्यमनागमम्। आत्मप्रत्ययिकं शास्त्रमिदम् पुत्रराऽनुशासनम्। धर्माख्यानेषु सर्वेषु सत्याख्याने च यद् वसु। दशेदमृक्सहस्राणि निर्मथ्यामृतमुद्धृतम्॥ नवनीतयँ तथा दद्धनः काष्ठादग्निर् यथैव च। तथैव विदुषाज्ज्ञानम् पुत्रहेतोस् समुद्धृतम्"[1] इति व्यासवचनमपि पुत्रादीनां स्वशास्त्रानुकूलतयाऽभिविनयनस्य कर्तव्यतायास् सूचकन् दृश्यते। "यस्य पुत्रास् सदाचाराश् श्रुतिज्ज्ञा धर्मसम्मुखाः। पितृभक्तिरता दान्ता न वैधुर्यम् मृतस्स्तिरयि"[2] इत्यादौ पुत्रसौशील्यस्य पितृयोग्यतातिशयाधायकत्वस्य दर्शनाच् च उक्तोऽर्थो विशेषेणोपोद्बलितो भवति। "तमेतन् नाऽपुत्राय वाऽनन्तेवासिने वा ब्रूयात्"[3] इति विद्द्याविशेषमाहात्म्यम् प्रदर्शयन्ती श्रुतिरपि स्वकीयश्रेष्ठविद्द्यायाम् पुत्रस्स्याऽभिविनेयतां सूचयति। शङ्करभगवत्पादोऽपि छान्दोग्योपनिषदि आरुणेश् श्वेतकेतोश् चाऽऽख्यायिकाया विद्द्यायास् सारिष्ठतायाम् प्रतिपादने तात्पर्यवँ वर्णयन् पित्रा स्वविद्द्यायाम् पुत्रस्स्य नेयत्वमभिप्रैति "पितापुत्राख्यायिका विद्द्यायास् सारिष्ठत्वप्रदर्शनार्था"[4] इति वदन्। पूर्वलँ लोकसङ्ग्रहार्थं स्नातकेनाऽध्यापकेन यथाशास्त्रवँ व्यवहर्तव्यमित्युक्तम्, किन् तु न केवलँ लोकसङ्ग्रहार्थमेव किन् तु धर्मार्थमपीदङ्ग कर्तव्यम्। तथा हि छान्दोग्यश्श्रुतिः — "आचार्यकुलाद् वेदमधीत्य यथाविधानङ्ग गुरोम् कर्मातिशेषेणाऽभिसमावृत्य कुटुम्बे शुचौ देशे स्वाध्यायमधीयानो धार्मिकान् विदधदात्मनि सर्वेन्द्रियाणि सम्प्रतिष्ठापयन्नऽहिंसन्ननन्यत्तर तीर्थेब्भ्यस् स खल्वेववँ वर्तयन् यावदायुषम् ब्रह्मलोकमभिसम्पद्द्यते न च पुनरावर्तते न च पुनरावर्तते"[5] इति; बृहदारण्यकश्श्रुतिश् च– "तस्मात्पुत्रमनुशिष्टलँ लोक्यमाहुस् तस्मादेनमनुशासति"[6] इति ॥१९२॥

बुद्धिवृद्धिकराण्याशु धन्यानि च हितानि च।
नित्यं शास्त्राण्यवेक्षेत निगमांश् चैव वैदिकान् ॥१९३॥[7]

---

१. म. भा. शान्ति २४६।१३–१५। २. प्रजापतिस्स्मृतौ, श्लो. ७८। ३. मा. वा. श. ब्रा. १४।९।३।२०, शाङ्. आ. १३।१। ४. छा. उ. वि. ६।१।१। ५. छा. उ. ८।१५।१। ६. का. वा. बृ. उ. १।५।१७। ७. मनु. ४।१९।

विचारशक्तिवर्धकानि शिक्षाव्याकरणमीमांसालोकायतकान्वीक्षिकीगणितशास्त्रादीनि, धनोपार्जनोपकारकाणि बार्हस्पत्यौशनसकौटलीयार्थशास्त्रादीनि, नक्षत्रशास्त्रादीनि, वार्ताशास्त्राणि च; लोकहितसाधकानि आयुर्वेदशास्त्रादीनि शास्त्राणि, वेदार्थबोधकान् वेदार्थोपबृंहणान् निगमाख्यान् ग्रन्थान् पुराणस्मृत्यादिकाँश् च ग्रन्थान् नित्यम् अवेक्षेत। क्षुधा सीदन् याचमानो कुटुम्बभरणाऽसमर्थो न हि शास्त्राऽनुपालनङ्कर्तुं शक्ष्यतीति रागतः प्राप्तमपि जीवनयात्राप्रसिद्धिपर्याप्तधनोपार्जनमुपदिश्यते विद्द्याव्रतस्स्नातकस्स्याऽद्ध्यापकस्स्याऽवश्यकर्तव्यत्वेन। न्यायेनोपार्जितन् धर्म्यञ् च धनमनिन्द्यमावश्यकञ् च। तथाहि ऋषिरपि– "न पापासो मनामहे नाऽरायासो न जल्हवः"[1] इति। तद्व्याख्याने यास्कश् च– "न पापा मन्न्यामहे नाऽधना न ज्ज्वलनेन हीनाः। अस्त्यस्मासु ब्रह्मचर्यमद्ध्ययनन् तपो दानकर्मेति ऋषिरवोचत्"[2] इति ॥१९३॥

यथायथा हि पुरुषश् शास्त्रं समधिगच्छति।
तथातथा विजानाति विज्ज्ञानञ् चाऽस्य रोचते ॥१९४॥[3]

विजानाति शास्त्रार्थतत्त्वस्य विशिष्टमनुभवादिसाक्षिकञ् ज्ञानम् प्राप्नोति, विज्ज्ञानं शास्त्रार्थसतत्त्वज्ज्ञानञ् चाऽस्य रोचते प्रीणनङ्करोति प्रियम् भवतीत्यर्थः। ततश् च सिद्धिङ् गच्छतीति भावः। उक्तञ् च– "यथायथा हि पुरुषश् शास्त्रं समधिगच्छति। तथातथा विजानाति विज्ज्ञानमथ रोचते॥ अविज्ज्ञानादयोगो हि पुरुषस्योपजायते। विज्ज्ञानादपि योगश् च योगो भूतिकरः परः"[4] इति ॥१९४॥

समारूढोऽधिकारन् तु तम् प्रयुञ्जीत युक्तितः।
प्रोत्साहयेच् च विदुषश् छात्राँश् च प्रतिभायुतान् ॥१९५॥
विद्द्वद्द्वेषन् धूर्तपूजान् न कुर्याद् दिगियम् मता।
सर्वान् परिहरेदर्थान् विद्द्यावृद्धिविरोधिनः ॥१९६॥

विद्द्वद्भिः परीक्ष्य याथातत्थ्येनाऽभिनन्दिताः प्रपूजिताश् च खलु विद्द्वांसः प्रसिद्धिमुपगतास् स्वस्स्वविद्द्याप्रचारेण लोकमनुगृह्णन्तीति विद्द्याप्रचारणधिया शक्तेनाऽधिकारिणा विदुषा तथाविधैर् विद्द्वद्भिश् च परिषदि गतैर् विदुषः परीक्षापूजे च कार्ये। तथा हि प्राचाम् पद्धितिर् विज्ज्ञायते। चरकसंहितायामपि ऋषि-

---

१. शा. ऋ. म. सं. ८।६१।११। २. निरुक्ते ६।५।३।
३. मनु. ४।१९। ४. म. भा. शान्ति. १३०।१०–११।

गोष्ठ्याम् अग्निवेशादिप्रणीताऽऽयुर्वेदतन्त्राणाम् परीक्षा, तेषाम् ऋषिभिः कृताऽनुमतिः, ततस् तेषाम् भुवि प्रतिष्ठा च वर्णिताः। तथाहि– "अथ मैत्त्रीपरः पुण्यमायुर्वेदम् पुनर्वसुः। शिष्येभ्यो दत्तवान् षड्भ्यस् सर्वभूताऽनुकम्पया॥ अग्निवेशश् च भेडश् च जतूकर्णः पराशरः। हारीतः क्षारपाणिश् च जगृहुस् तन् मुनेर् वचः॥ बुद्धेर् विशेषस् तत्त्रासीन् नोपदेशान्तरम् मुनेः। तन्त्रस्स्य कर्ता प्रथममग्निवेशो यतोऽभवत्॥ अथ भेडादयश् चक्रुस् स्वं स्वन् तन्त्रङ्कृतानि च। श्रावयामासुरात्त्रेयं सर्षिसङ्घं सुमेधसः। श्रुत्वा सूत्त्रणमर्थानामृषयः पुण्यकर्मणाम्। यथावत् सूत्त्रितमिति प्रहृष्टास् तेऽनुमेनिरे। सर्व एवाऽभ्तुवँस् तांश् च सर्वभूतहितैषिणः। साधु भूतेष्वनुक्रोश इत्त्युच्चैरब्रुवन् समम्। ... ... तानि चाऽनुमतान्न्येषान् तन्त्राणि परमर्षिभिः। भवाय भूतसङ्घानाम् प्रतिष्ठाम् भुवि लेभिरे।"[1] इति। राजशेखरोऽप्याह स्स्म– "महानगरेषु काव्यशास्त्रपरीक्षार्थम् ब्रह्मसभाः कारयेत्। तत्त्र परीक्षोत्तीर्णानाम् ब्रह्मरथयानम् पट्टबन्धश् च। श्रूयते चोज्जयिन्न्याङ्ग काव्यकारपरीक्षा– इह कालिदासमेण्ठावत्त्राऽमररूपसूरभारवयः। हरिचन्द्रचन्द्रगुप्तौ परीक्षिताविह विशालायाम्॥ श्रूयते च पाटलिपुत्त्रे शास्त्रकारपरीक्षा–अत्त्रोपवर्षवर्षाविह पाणिनिपिङ्गलाविह व्याडिः। वररुचिपतञ्जली इह परीक्षिताः ख्यातिमुपजग्मुः"[2] इति। यद्द्यपि "न लोके दीप्यते मूर्खः केवलात्मप्रशंसया। अपि चाऽपिहितश् श्वब्भ्रे कृतविद्द्यः प्रकाशते"[3] इति, "असन्नुच्चैरपि प्रोक्तश् शब्दश् समुपशाम्म्यति। दीप्यते त्त्वेव लोकेषु शनैरपि सुभाषितम्"[4] इत्त्यपि वस्तुतत्त्वम्, तथापि 'गुणवानपि नोपयाति पूजाम् पुरुषस् सत्पुरुषैरकत्थ्यमानः। न हि सौरमणिस् स्वभावकान्तिं रविपादैरनधिष्ठितः करोति"[5] इत्त्यपि लोकप्रवृत्त्यनुसारिण्येव भणितिः; अतो विद्द्याप्रचारमिच्छद्भिर् विद्द्वद्भिर् विद्द्वांसः परीक्षणीया अभिनन्दनीयाश् चैव यथार्हम्॥१९५–१९६॥

नापृष्टः कस्स्य चिद् ब्रूयान् न चाऽन्न्यायेन पृच्छतः।
जानन्नपि हि मेधावी जडवल् लोक आचरेत्॥१९७॥[6]

---

१. च. सं. सूत्त्र. १।२९–३९। २. का. मी. दशमेऽद्ध्याये।
३. म. भा. शान्ति. २८७।३१। ४. तत्त्रैव २८७।३२।
५. सु. र. भा., सा. नी. श्लो. ९३४। ६. मनु. २।११०।

अधर्मेण च यत् प्राह यच्चाऽधर्मेण पृच्छति ।
वचनवँ् विफलन् तत्र प्रद्द्वेषो वा भवेन् मिथः ।।१९८।।[1]

"धर्मं शुश्रूषमाणेब्भ्यः पृष्टेन च सता पुनः । वक्तव्यवँ् विदुषा चेति धर्ममाहुर् मनीषिणः"[2] इत्त्यादयो धर्माद्द्च्युपदेशनियमा अपि यथायथम् पालनीयाः । एते उपदेशनियमास् स्नातकस्स्याऽद्ध्यापकस्स्याऽनद्ध्यापकस्स्य वाऽपि लोकम् प्रत्त्येव । पुत्त्रशिष्ष्यमित्त्रादीन् प्रति तु "शुभवँ् वा यदि वा पापन् द्वेष्ष्यवँ् वा यदि वा प्रियम् । अपृष्टस् तस्स्य तद् ब्रूयाद् यस्स्य नेच्छेत् पराभवम्"[3] इति; लोकम् प्रत्त्यपि "आपद्द्च्युन्मार्गगमने कार्यकालात्त्ययेषु च । कल्ल्याणवचनम् ब्रूयादपृष्टोऽपि हितो नरः"[4] इति चोपदेशनियमो वेदितव्यः ।।१९७–१९८।।

इत्त्युपक्क्रमाद्ध्याय४ प्रथमः ।

---

१. मनु. २।१११; तत्त्र 'तयोरन्न्यतर४ प्रैति विद्द्वेषवँ् वाऽधिगच्छति' इत्त्युत्तरार्धपाठः । २. म. भा. शान्ति. ५४।३७–३८ । ३. तत्त्रैव. उद्द्योग. ३४।४ । ४. सु.र.भा., सा. नी. श्लो. ४८४ ।

अथ द्द्वितीयोऽद्ध्यायः

वर्णनिरूपणम्

१. वर्णोत्पत्तिशारीराधिकारः

तप्तायऽपिण्डन्यायेन मनसा ह्येकताङ्ग गतः ।
आत्मा विवक्क्षुर् हि किञ्चित् प्रयुङ्क्ते करणानि च ।।१।।

चेतना ह्यस्माकं सर्वत आब्ध्यन्तरतमं स्वरूपम् । अन्न्येषाम् पदार्थानामन्तोऽनुभूयते न तु स्वचेतनाया इति, "सत्त्यञ् ज्ञानमनन्तम् ब्रह्हँ म"[1] इति श्रुतिरप्प्यात्मानञ् ज्ञानरूपमेव प्रतिपादयतीति चात्मा चिद्भिन्ननिरपेक्क्षस् सच्चिदानन्दमात्त्ररूपश् चेत्त्यवगम्म्यते । किन्तु तादृश आत्मा व्यवहारपथन् नावतरति । अनन्तोऽप्प्यात्मा येन सह परस्पराद्ध्यासात् परिच्छिन्न इव प्रतीयते तद् बहिरिन्द्रियाऽग्ग्राह्य्यम् मद्ध्यमपरिमाणयुक्तम्[2] भौतिकञ्[3] चेतनमिव प्प्रतीयमानवँ वस्तुतोऽचेतनमन्तऽकरणं स्वीक्रियते[4] । जडानीन्द्रियाणि च कल्प्यन्ते[5] । जडो देहोऽपि प्रतीयते । तेषान् धर्मा अपि लौकिकानुभवपथमायान्ति । आत्मनि अन्तऽकरणेन्द्रियदेहादीनान् तद्धर्माणाञ् च, अन्तऽकरणेन्द्रियदेहादिषु आत्मनश् चेतनत्त्वादेश् च परस्पराद्ध्यासाद् 'अहमयमस्मि' 'अहञ् चेतनः' 'अहञ् जानामि' 'अहमेववँ विचारयामि' 'अहमेवमिच्छामि' 'अहमेतादृशङ्ग कर्म कुर्वे' 'अहयँ युवाऽस्मि' 'अहवँ वृद्धोऽस्मि' इत्त्येवमभिमन्न्यमानो लौकिको जीवात्मा सर्वेषामनुभवस्य गोचरः । स हि किञ्चिद् वक्तुमिच्छुस् सन् वागिन्द्रियसम्बद्धानवयवान् प्रयुङ्क्ते ।।१।।

---

१. तै. उ. २।१।१ । २. ब्र.मी.सू., शा. मी. भा. २।४।७ ।
३. छा. उ. ६।५।४ । ४. का.बृ.उ. १।५।३, ब्र.मी.सू. २।३।३२ ।
५. ब्र. मी. सू., शा. मी. भा. २।४।१ ।

तानि मस्तिष्कतन्तरञ् च फुस्फुसौ स्वरयन्तरकम् ।
तन्मुखं स्वरतन्तर्चश् च कण्ठ× काकलकन् तथा ॥२॥
कोमलन् तालु नासायास् सुरुङ्गा मूर्धकोऽपि च ।
तालु बर्स्वो दन्तवेष्टौ दन्तमूलञ् च दन्तकाः ॥३॥
ओष्ठाधरौ च जिह्वव्वाया मूलमद्ध्याग्रप्रान्तकाः ।
हनू चेति प्रधानानि कीर्तितानीह नामतः ॥४॥

यानि करणानि वागिन्द्रियसम्बद्धानवयवान् किञ्चिद् विवक्षुर् जीव× प्रयुङ्क्ते तानि मस्तिष्कतन्तरादीनि अत्तरोद्देशरूपेण कथितानि बोद्ध्यानि ॥२–४॥

अथ तेषावँ वर्णनन् तु सङ्क्षेपेणोपक्रम्यते ।
मस्तिष्कतन्तरे मस्तिष्कः प्रधानस् स च तिष्ठति ॥५॥
करोटिसम्पुटे गूढस् स महल्लघुभेदतः ।
द्वेधाऽस्ति तत्तर महतो मूले पिण्डद्द्वयं स्थितम् ॥६॥
तत्तराज्ज्ञाकन्दकौ तौ हि मनस्स्थानवँ विदुर् बुधाः ।
जीवस् तत्तर स्स्थितस् सूत्तरैस् सञ्ज्ञावाहिभिरर्थकान् ॥७॥
वेत्ति चेष्टावहै× कायावयवाँश् चेष्टयत्यपि ।
इत्थम् मस्तिष्कतन्तरन् तु समासेनोपवर्णितम् ॥८॥

यद्द्यपि जीवात्मा सर्वस्मिन्नेव देहे सन्निहितो भवति, तथापि तस्स्य विशिष्टं स्थानम् ब्रह्म्मगुहाऽस्तीति षट्चक्करविदस् तदनुसारिणश् च वदन्ति[1]। जीवात्मा च कार्यार्थङ करणान्यपेक्षते । तेषु चाऽन्त×करणम् प्रधानम् । अन्त×करणं स्वयमेवाऽचेतनमपि आत्माद्ध्यासाच् चेतनवद् व्यापारङ करोति । अन्त×करणमपि बाह्य्येषु विषयेषु स्वातन्तर्चेण प्रवर्तितुन् न शक्नोति । अतस् तदर्थमपि तदपि किञ्चिद् द्वारमपेक्षते । इदं हि द्द्वारम् मस्तिष्कतन्तरम् । तत्तर मस्तिष्क× प्रधानः । स च शिरसि कपालानां सम्पुटे गूढस् तिष्ठति । तस्स्य च द्वौ विभागौ लघुमस्तिष्को बृहन्मस्तिष्कश् चेति । तत्तर बृहन्मस्तिष्को मुक्ख्यतया चेतनाकेन्द्रम् । तत्तराऽपि बृहन्मस्तिष्कमूलस्स्थम् पिण्डद्द्वयमाज्ज्ञाकन्दाक्ख्यम् मनसो मूलं स्थानमिति तद्विदः[2]। अस्स्य च सञ्ज्ञावाहिनीभिश् चेष्टावाहिनीभिश् च तन्तरीभिस् साक्क्षात् परम्परया वा सम्पूर्णेन शरीरेण सह सम्बन्धो भवति । एताभिरेव तन्तरीभिर् बृहन्मस्तिष्कस्स्थेन मनसा तप्ताय×पिण्डन्यायेनैकताङ गत आत्मा बाह्य्यानावँ वस्तूनाञ् ज्ञानङ कुरुते, कायावयवाँश् चेष्टयति च ॥५–८॥

---

१. प्र. शा., तृ. भा., पृ: ७९ । २. तत्तरैव ।

स्वरयन्त्रमुखान्न्येन च्छिद्द्रेण परिवर्जिता ।
महाप्राचीरया पेश्या बुद्ध्नदेशस्स्थया युता ॥९॥
पर्यायजन्न्यविस्तारसङ्कोचाभ्याङ्क्रियान्न्विना ।
पर्शुकावेष्टिता चाऽस्ति मद्ध्यकाये उरोगुहा ॥१०॥
तत्त्र वृन्तनिभश्श्वासनालीशाखासु सयँयुतैः ।
स्थितिस्स्थापकतन्तूनां समूहेन च निर्मितैः ॥११॥
द्राक्क्षागुच्छनिभैर् वायुकोशपुञ्जैर् हि निर्मितौ ।
उरोगुहाया विस्तारं सङ्कोचमनुसृत्य च ॥१२॥
विस्तारमथ सङ्कोचम् भजमानौ च फुस्फुसौ ।
स्थितौ स्स्तस् तौ हि प्रश्श्वासनिश्श्वासद्द्वयसाधनम् ॥१३॥
श्वासनालीपथेनाऽथ स्वरयन्त्रपथेन च ।
प्रवृत्तम् पवनं स्वेष्टगतत्या तावत् प्रवर्त्य च ॥१४॥
स्वेष्टस्थानेऽभिघात्त्याऽपि वर्णोत्पत्तिꣳ प्रसाद्ध्यते ।
इति सङ्क्षेपतꣳ प्रोक्तौ सकार्यौ फुस्फुसाविह ॥१५॥

स्वरयन्त्रादीनां स्वरूपाणि प्रतिपादयिष्यन्ते । महाप्राचीरा नाम उदरगुहोरोगुहयोर् मद्ध्ये वृतिरूपेण वर्तमाना उरोगुहाभूमिभूता उदरगुहाच्छदीरूपा कूर्मपृष्ठाकारसन्निवेशयुता उरोगुहाम् भस्त्रिकानिभाङ्कर्तुं सहायिका पटाकारा पेशी शारीरविदाम् प्रसिद्धा[1] । प्रश्श्वासश्श्वासस्स्थानतꣳकर्षणम् । निश्श्वासश् श्वासस्स्य बहिर् निस्सारणम् ॥९–१५॥

श्वासनाल्यूर्ध्वभागे च तरुणास्थिविनिर्मितः ।
सम्पुटश् छिद्द्रयुक् चोर्ध्वमधस् तत् स्वरयन्त्रकम् ॥१६॥
कृशेषु पुरुषेष्वेतद् बहिर् भवति लक्षितम् ।
तदूर्ध्वं सङ्गतञ् जिह्वामूलेनाधस् तु सयँयुतम् ॥१७॥
क्लोम्ना तदूर्ध्वच्छिद्द्रन् तु द्वारवँ वायोꣳ कपाटयुक् ।
अन्नादीनान् निगलने कपाटस् सहसा पतन् ॥१८॥
स्वयमाच्छादयति तत् स श्श्वासोच्छ्वासकर्मसु ।
वचने च समुत्थाय कुर्याद् द्वारमनावृतम् ॥१९॥
कपाटोऽयन् तु शारीरेऽधिजिह्वेति च भण्यते ।
तदिदं स्वरयन्त्रन् तु समासेनोपर्णितम् ॥२०॥

तरुणास्थि नाम कोमलमाढिकम् ॥१६–२०॥

---

१. प्र. शा., द्वि. भा., पृ. ३२–३३ ।

स्वरयन्त्रे तन्मुखस्य किञ्चिदेव त्वधस् स्थिते ।
प्राक्पश्चाल् लम्बिते यन्त्रच्छिद्द्रन् तूभयतो गते ॥२१॥
प्राग् लग्नेऽवटुकस्यास्थ्नः पत्त्रयोस् सन्धिजस्य च ।
कोणस्य दक्षिणे वामे भागे चैकैकमेव च ॥२२॥
पश्चात् तु घाटिकास्थ्नोश् चाऽङ्कुशयोश् शीर्षके गते ।
गौण्यौ तु स्स्वरतन्त्र्यौ स्स्तः कलास्स्नायुविनिर्मिते ॥२३॥
ते च पश्चात्कोणयुक्तम् प्राक्कोणद्द्वयशोभितम् ।
दीर्घत्त्रिकोणाकृतिकङ्कुरुतो यन्त्रच्छिद्द्रकम् ॥२४॥
वाचो निमदरूपायाश् श्वासमय्याः प्रयोगके ।
उपबृंहितस्वरूपाया वा कार्यन् तु तयोर् मतम् ॥२५॥
मन्द्रमद्ध्यमताराणाम् प्रयोगे वचसान् तयोः ।
नास्ति कार्यमिति प्प्राहुश् शिक्षाशारीरकोविदाः ॥२६॥

अवटुकास्थि नाम किञ्चिदायतपक्षद्द्वयात्मकम् प्रधानन् तरुणास्थि स्वरयन्त्रसम्पुटप्राग्भागस्स्थम्; अस्स्यैव पक्षद्द्वयसयँयोगयुतं स्थानङ्ग्रीवायाः पुरस्तादुन्नतन् दृश्यते । पुंसान् तद् विशेषत उन्नतम् भवति । घाटिके नाम तरुणास्थिनी कृकाटकशिरसि सम्बद्धे स्वरयन्त्रपश्चिमभागे । तयोर् हि अङ्कुशरूपयोश् चूडयोः पृष्ठतस् स्वरतन्त्रीचतुष्टयं सयँयुज्यत इति शारीरविदः[1] । निमदाख्यो वाग्भेदा यथास्स्थानम् प्रतिपादयिष्यन्ते ॥२१–२६॥

गौण्योर् हि स्स्वरतन्त्र्योस् तु किञ्चिदेव त्वधस्स्थिते ।
आकारेण च स्स्थितत्या च तयोरेवाऽनुकर्त्रिके ॥२७॥
द्वे मुख्ये स्वरतन्त्र्यौ स्स्तस् ते श्वासोच्छ्वासकर्मणि ।
पृथक्पृथक् च दूरेण स्थिते दीर्घे अकम्पिते ॥२८॥
भवतो वचने ते च समीपस्स्थे परस्परम् ।
स्यातान् नादेऽधिकं सन्निहिते ह्रस्स्वे प्रकम्पिते ॥२९॥
सघोषव्यञ्जनस्वरोदात्तादिषु तयोस् स्थितौ ।
सामीप्यतारतम्येन कम्पेऽप्यधिकताऽथवा ॥३०॥
न्यूनता च भवेत् तेन विभेदो नादगो भवेत् ।
स्वरतन्त्रीकम्पजातं स्वरयन्त्रोदरोत्थितम् ॥३१॥
प्रतिद्ध्वनेर् गुञ्जितं हि नादमाहुर् विवेचकाः ।
तदेवं वर्णिते मुख्ये स्वरतन्त्र्यौ समासतः ॥३२॥

---

१. प्र. शा., द्वि. भा., पृ. १७६–१७७ ।

स्वरतन्त्र्चोऽ कम्पाकम्पौ वाग् वाक् इत्त्यादौ घोषवद्वर्णोच्चारणेऽघोषवर्णोच्चारणे च कण्ठमणिपार्श्वयोरङ्गुष्ठतर्जन्योश् शङ्खचक्रादियुतौ भागौ संस्थाप्य परीक्क्षणेनाऽपि बोद्धुं शक्क्यौ। घोषवद्वर्णाद्द्युच्चारणे स्वरतन्त्र्यादिवैशिष्ट्यम् प्रातिशाख्यशिक्क्षादिप्रतिपादितम् बलाद्ध्याये यथास्स्थानं स्फुटीकरिष्ट्यते ।।२७–३२।।

मुख– नासाकुहरिकाविभागस्स्थानतस् त्वधः ।
स्वरयन्त्रमुखादूर्ध्वः प्रदेशऽ कण्ठ उच्च्यते ।।३३।।

यद्द्यपि लौकिकऽ कण्ठऽ 'कण्ठो गलः'[1] इति नामलिङ्गानुशासनात् कविभिर् ग्रीवापर्यायत्त्वेनाऽपि कण्ठशब्दस्य प्रयुक्तत्त्वाच् च[2] एतद्भिन्नस् तथापि शिक्क्षाशास्त्रे कण्ठशब्देन कारिकायामुक्तो भागोऽभिप्रेयते इति बोद्ध्यम् ।।३३।।

मुखपश्चिमसीमायाम् मद्ध्यभागेऽवलम्बिता ।
पेशी काकलकम् प्रोक्ता सैव स्स्याद् गलशुण्डिका ।।३४।।

यद्द्यपि काकलकमिति 'ग्रीवायामुत्कृष्टऽ प्रदेश उच्च्यते' इति भर्तृहरिणा पाणिनीयव्याकरणभाष्यदीपिकायामुक्तम्[3], 'काकलकन् नाम ग्रीवायामुन्नतप्रदेशो लोके यऽ कण्ठमणिरित्युच्च्यते'[4] इति जिनेन्द्रबुद्धिनोक्तम्, तदनुसारमेव च हरदत्तकय्यटादिभिरप्युक्तम्; तथा च तेषाम् मते अवटुकमेव काकलकमिति विज्ज्ञायते; तथापि पतञ्जलिना– "बाह्य्यं ह्यास्स्यात् स्थानमवर्णस्स्य"[5] इत्त्युक्तमिति, अवर्णस्स्थानस्स्य कण्ठस्स्य "लौकिकमास्स्यम् ओष्ठात् प्रभृति प्राक् काकलकात्"[6] इति पतञ्जलिपरिभाषितादास्स्याद् बहिष्ट्वमावश्श्यकमिति च अस्माभिऽ काकलकस्स्य गलशुण्डिकायाश् चाऽभिन्नत्त्वमुक्तम् बोद्ध्यम्। गलशुण्डिका च "कोमलतालुनऽ पश्चिमसीम्नि मद्ध्यरेखायान् दृश्श्या ताल्वस्थिकण्टकावलम्बिनी क्षुद्द्रा शुण्डिकाकारा पेशी गलशुण्डिका काककलवँ वा नाम। सा कोमलतालुन उत्पतनसहायभूता"[7] इति गणनाथसेनेनाऽपि काकलकाभिन्नतया प्रतिपादिता। यदि 'गलशुण्डिके'[8] इति याज्ज्ञवल्क्यस्स्मृतौ पाठात् 'गलशुण्डिके हनुमूलगल्लयोस् सन्धी' इति मिताक्क्षरायान् तद्विवरणाच् च न काकलकङ्ग गलशुण्डिकेत्त्युच्च्यते,

---

१. अ.को. २।६।८८। २. मे. दू. १।३; २।३४,४८। ३. १।१।९।
४. का. वि. प. १।१।९। ५. पा. व्या. भा. १।१।९। ६. तत्तैव।
७. प्र.शा., द्वि.भा., पृ. १८७। ८. प्रायश्चित्ताद्ध्याये श्लो. ९८।

तथापि कारिकोक्तङ्ग काकलकविवरणयँ यथोक्तमेवेत्त्यत्तर न बाधकङ्ग किञ्चित् ॥३४॥

गलशुण्डचाऽ पुरोभागे तन्मूले समवस्स्थितः ।
भागश् श्लथो मांसलश् च वेद्द्यङ्ग कोमलतालुकम् ॥३५॥

अस्स्योपयोगो बलाद्ध्याये स्थानादिनिरूपणे प्रतिपादयिष्यते ॥३५॥

आ नासाविवराब्भ्याञ् च नासापश्चिमद्वारतः ।
स्थिते सुरुङ्गे तु मते विदान् नासासुरुङ्गिके ॥३६॥

गले उपरिभागे वर्तमानाब्भ्यान् नासापश्चिमद्वाराब्भ्याम् प्रभृति ओष्ठस्स्योपरि वर्तमाने नासाविवरे यावत् प्रसृते क्षुद्द्रगुहाकारे सुरुङ्गिके नासासुरुङ्गिके वेद्द्ये । अनयोरपि वर्णोत्पत्तावुपयोगित्वम् बलाद्ध्याये स्थाननिरूपणादौ प्रतिपादयिष्यते ॥३६॥

मद्ध्यस् तथोन्नततमो भागो मुखबिलस्स्य तु ।
छदिषोऽभिमतो मूर्धा शिक्क्षकाणावँ विपश्चिताम् ॥३७॥

यद्द्यपि मूर्धेति लोके शिर उच्च्यते तथापि शिक्क्षाशास्त्रेऽयमेव मूर्धाऽभिसंहितो बोद्ध्यः ॥३७॥

उक्ताद् मूर्द्धनऽ पुरऽ पश्चाद् बर्स्वाद् यो भाग आस्स्यगः ।
तत् तालु शिक्क्षाशास्त्रे तु विदुषामभिसंहितम् ॥३८॥

यद्द्यपि लोके ताल्विति सोऽपि मनुष्यशिरोभाग उच्च्यते योऽचिरजातानां शिशूनान् निम्नो भवति कालेन च पूर्यते, तथाऽपि शिक्क्षाशास्त्रे इदमेव परिभाषितन् तालु बोद्ध्यम् ॥३८॥

दन्तवेष्टाग्रग्रचभागस्स्स्योर्ध्वस्स्य पश्चिमतस् स्थितः ।
धारामद्ध्यस्स्थ उत्सेधो बर्स्ववँ वर्त्तसञ् च भण्ण्यते ॥३९॥

अस्स्य रेफोच्चारणादावुपयोगऽ प्रतिपादयिष्यते ॥३९॥

दन्तमांसे दन्तवेष्टौ प्रतीतौ लोकतस् स्फुटम् ।
तयोर् मद्ध्येऽत्तरोर्ध्वगस्स्येप्सितोऽग्रग्रचो भाग आन्तरः ॥४०॥

दन्तवेष्टौ नाम यत्तर दन्ता निमग्नाऽ प्रतिबद्धाश् च भवन्ति तौ दृढस्स्नायुसूत्तरनिर्मितौ श्लेष्मलकलापरिवृतौ दन्तमूलानाम् मांसमयौ वेष्टनकौ, ययोर् दन्तपाल्ल्याविति च स्मृतिशास्त्रव्याक्ख्याने व्यवहारः[1] । तत्तर ऊर्ध्वस्स्य दन्तवेष्टस्स्य राजदन्तसमीपस्स्थ आब्भ्यन्तरो भाग मुक्ख्यतयाऽपेक्क्षितो भवति वर्णानामुच्चारणे ॥४०॥

---

१. या. स्मृ., मि. ३।९६–९९ ।

दन्तमूलम् प्रतीतं हि लोकतस् तत्तर चेह तु ।

ऊर्ध्वस्स्थराजदन्ताऽऽब्भ्यन्तरम् मूलमीप्सितम् ॥४१॥

राजदन्तौ नाम ऊर्ध्वमधश् च द्वौद्वावग्रग्रौ मद्ध्यौ प्रायस् स्थूलौ दन्तौ । दन्तानाम् मद्ध्ये राजानः (प्रधानाः) राजदन्ता इति हि पाणिनिसम्मता[1] तत्पदव्युत्पत्तिः ॥४१॥

मूलम् मद्ध्यम् मद्ध्यप्रान्तावुपाग्ग्रज् चाऽग्ग्रमेव च ।

जिह्वायास् स्युरवयवाः प्रतीता लोकतस् स्फुटम् ॥४२॥

एतेषाङ्ग करणत्वेनोपयोगो बलाद्ध्याये वक्ष्यते ॥४२॥

उच्चारणे हनूश् चोपकरणं शिक्षकैस् स्मृता ।

अन्न्यानि करणानि स्स्युः प्रतीतानि हि लोकतः ॥४३॥

हनूर् नाम चिबुकास्थि यस्स्य चलनेन मुखकुहरो विवृतो विवृततरस् सवँ वृतस् सवँ वृततरश् च भवति ॥४३॥

स्वाणुनारीकेलफलोदराकारञ् च काकलात् ।

प्रभृत्त्यौष्ठाद् बिलं ह्यास्स्यकुहरम् प्रोच्च्यते बुधैः ॥४४॥

"लौकिकमास्स्यमोष्ठात् प्रभृति प्राक् काकलकाद्"[2] इति पाणिनीयव्याकरणभाष्यकारः । सुष्ठु आ समन्ताद् अणु स्वाणु । काकलकात् प्रभृति आ ओष्ठाद् बिलम् आस्स्यकुहरमित्त्यर्थो बोद्ध्यः ॥४४॥

उच्चारणार्थावयवा ये तद्व्यूहो हि कर्मणा ।

रूपाच् च वीणातुल्यत्वाद् वीणा सारस्स्वती मता ॥४५॥

ऐतरेयारण्यके हि उच्चारणावयवसमुदायरूपाया दैव्यास् सारस्स्वत्त्या वीणाया अनुकरणेनैव काष्ठचर्मतन्त्रचादिभिर् मानुषी वीणा रचितेति प्रतिपाद्द्यते । तथा हि– "अथ खल्वियन् दैवी वीणा भवति तदनुकृतिरसौ मानुषी वीणा भवति । यथाऽस्स्याश् शिर एवममुष्याश् शिरो यथाऽस्स्या उदरमेवममुष्या अम्भणयँ यथास्स्यै जिह्वैवममुष्यै वादनयँ यथास्स्यास् तन्त्रय एवममुष्या अङ्गुलयो यथास्स्यास् स्वरा एवममुष्यास् स्वरा यथास्स्यास् स्पर्शा एवममुष्यास् स्पर्शा यथा ह्यय्येवेयं शब्दवती तर्द्मवत्त्येवमसौ शब्दवती तर्द्मवती यथा ह्यय्येवेयलँ लोमशेन चर्मणाऽपिहिता भवत्त्येवमसौ लोमशेन चर्मणाऽपिहिता । लोमशेन ह स्स्म वै चर्मणा पुरा वीणा अपिदधति । स यो हैतावँ वीणावँ वेद श्रुतवदनो भवति भूमिप्राऽस्स्य कीर्तिर् भवति यत्तर क्व चाऽऽर्या वाचो भाषन्ते विदुरेनन् तत्तर"[3] इति ॥४५॥

---

१. अष्टा. २।२।३१ । २. १।१।९ । ३. ३।२।५ ।

२. वर्णोत्पत्त्यधिकारः

संस्कारेण प्रयुक्ता वा परिस्थित्या विबोधिताः ।
नराः किञ्चिद् विवक्षन्ति सा चेच्छाशक्तिरुच्यते ॥४६॥
मस्तिष्कस्थे चेतसि सा जायमाना दुरूहया ।
मायया च क्रियाशक्तावकस्मात् परिवर्तते ॥४७॥
चेष्टावेगस्स्वरूपा च क्रियाशक्तिः प्रधावति ।
मस्तिष्कोत्थक्रियावेगहारितन्तरीभिरञ्जसा ॥४८॥
फुस्फुसौ स्वरयन्त्रञ्च जिह्वाभागान् हनून् तथा ।
अन्यानपि च व्यापार्यान् मुखस्यावयवान् द्रुतम् ॥४९॥
चेष्टावेगापीडितौ तु फुस्फुसौ भस्त्रिकानिभौ ।
वायुम् प्रथमतश् चोर्ध्वं स्वरयन्त्रादिकास् तथा ॥५०॥
उच्चारणस्याऽवयवाश् चेष्टन्ते स्वेषु कर्मसु ।
एवं वायुर् निर्गतस् तु विवक्षावशतः पुनः ॥५१॥
करणैः खलु कण्ठादिस्थानेषु प्रतिहन्यते ।
तदा स वर्णतामेति सा वर्णश्श्रुतिरुच्यते ॥५२॥

वासनातः, क्षुत्-तृष्णा-श्रमादीनां स्वानुभवसिद्धादनेन्द्रियकाद् ज्ञानाद्, दर्शन-श्श्रवण-ग्रहण-स्स्पर्शन-रसनेन्द्रियद्द्वारा प्राप्ताद् बाह्यविषयज्ज्ञानाच् च आलोचन-द्ध्यान-स्मरणादियुताद् मनुष्याणामिच्छा जायन्ते । तास्स्वेवैकतमा विवक्षा । वक्तुमिच्छा हि विवक्षा । सा चेयम् मस्तिष्कस्याज्ज्ञाकन्दारूढे मनसि जायते । चेतसश् शिरसि स्थातृत्वम् प्राणाचार्येण चरकेण "प्राणाः प्राणभृतायँ यत्तत्र श्शिरतास् सर्वेन्द्रियाणि च । तदुत्तमाङ्गमङ्गानां शिरस् तदभिधीयते"[1] इति, भेडेन च "शिरस्ताल्वन्तरगतं सर्वेन्द्रियपरम् मनः । तत्तरस्स्थन् तद्धि विषयानिन्द्रियाणां रसादिकान् । समीपस्थान् विजानाति त्रीन् भावांश्च नियच्छति । मनसः परभवञ् चाऽपि सर्वेन्द्रियमयम् बलम्"[2] इति प्रोक्तम् । महाभारतेऽपि "शिरतो मूर्धानमग्निस् तु शरीरमनुपालयन् । प्राणो मूर्धनि चाग्नौ च वर्त्तमानो विचेष्टते ॥ स जन्तुस् सर्वभूतात्मा पुरुषस् स सनातनः । मनो बुद्धिरहङ्कारो भूतानि विषयश् च सः"[3] इत्युक्त्वा तत् प्रतिपादितम् । तथा च तत्तर जाता इच्छा मायामय्या अनिर्ज्ञातया प्रक्क्रिययाऽकस्मादेव क्रियाशक्ति-

---

१. १।१७।११ । २. भे. सं. चिकित्सा. ८।२-४, पृ. १४९ ।
३. १२।१८५।३-४ ।

रूपताम् प्राप्नोति । उक्ता च चरकेण– "इन्द्रियेणेन्द्रियार्थो हि समनस्केन गृह्यते । कल्प्यते मनसाऽप्यूर्ध्वङ्ग गुणतो दोषतो यथा । जायते विषये तत्र या बुद्धिर् निश्चयात्मिका । व्यवस्यति तथा वक्तुङ्ग कर्तुवँ् वा बुद्धिपूर्वकम्"[1] इति विवक्षाचिकीर्षोदयपर्यन्ता प्रक्क्रिया । इच्छाशक्तेऽ क्रियाशक्तौ परिवर्तनस्य प्रक्क्रिया तु आकस्मिकी मायामयी चेति न तेनाऽपि प्रोक्ता । यया कयाऽपि वा प्रक्क्रियया जाता सा क्रियाशक्तिऽ क्रियावेगहारितन्त्रीद्वारा फुस्फुसादीन् अवयवान् प्रति गच्छति । ततस् तेऽवयवा इच्छानुरूपाञ् चेष्टाङ्ग कुर्वन्ति । स्फुटमन्यत् । इयञ् च वर्णोत्पत्तिप्रक्क्रिया प्रातिशाख्यकारादिभिरनेकैश् शिक्षाशास्त्रकारैर् वर्णिता । तथा हि शुक्लयजुर्वेदप्रातिशाख्ये– "वायुः खात्, शब्दस्तत्, सङ्करोप, ससङ्घातादीन् न्वाक्, त्रीणिस्त्थानानि, द्वे करणे, शरीरात्, शरीरम्, शरीरे, तेषां समूहात् स उदयँस्तत्रैकाल्यम्"[2] इति; ऋग्वेदप्रातिशाख्ये च— "वायुऽ प्राणऽ कोष्ठ्यमनुप्प्रदानङ्ग कण्ठस्य खे विवृते सवँ्वृते वा । आपद्द्यते श्वासतान् नादतावँ् वा वक्त्रीहायामुभयवँ् वाऽन्तरोभौ । ता वर्णानाम् प्रकृतयो भवन्ति"[3] इति; तैत्तिरीयप्रातिशाख्ये च– "वायुसमीरणात् कण्ठोरसोस् सन्धाने, तस्य प्प्रातिश्शरुत्कानि भवन्ति उरऽ कण्ठश् शिरो मुखन् नासिके इति"[4] इति; ऋक्तन्त्रेऽपि– "अथ वाचो वृत्तिवँ् व्याक्ख्यास्स्यामः । वायुम् प्रकृतिमाचार्याः । वायुर् मूर्छन् श्वासीभवति । श्वासो नाद इति शाकटायनः । वायुरयमस्मिन् काये मूर्छत्त्यटत्त्येषोऽर्थः । स खलु खविशेषम् प्रतिपन्नऽ कण्ठम् प्रतिपन्नश् श्वसितिर् भवति । स श्वसितिश् शिरऽ प्रतिपन्न आकाशमद्द्वारकन् नदतिर् भवति । तस्येदानीन् नदतेर् जिह्वाग्रेणेर्यमाणस्य व्यक्तयऽ प्रादुर्भवन्ति वर्णानामोष्ठ्याऽ कण्ठ्यास् तालव्या मूर्धन्या दन्त्या नासिक्या जिह्वामूलीया इति । तद् यथा त्रपुकारस् त्रपु विलाप्य बिम्बे निषिञ्चेद् यद्यद् बिम्बदेशन् तत् त्रपु निषिच्यते ततस्ततो द्रव्याणावँ् व्यक्तिर् भवति काञ्चिमणिके रुचकस् स्वस्तिक इत्त्येवयँ् ययँ्यमयङ्ग खविशेषञ् जिह्वाग्रेण स्पृशति ततस्ततो वर्णानावँ् व्यक्तिर् भवति ओष्ठ्यानाङ्ग कण्ठ्यानान् तालव्यानाम् मूर्धन्यानान् दन्त्यानान् नासिक्यानाञ् जिह्वामूलीयानामिति ।"[5] इति; आपिशलशिक्षायाञ् च– "तत्र नाभिप्प्रदेशात् त्प्रयत्नप्प्रेरितऽ प्राणो नाम

१. च. सं. ४।१।२१–२२ । २. १।६–१५ । ३. १३।१–३ । ४. २।२–३ । ५. १।१ ।

वायुरूर्ध्वमनुक्रामन्नुरःप्रभृतीनां स्थानानामन्यतमस्मिन् स्थाने प्रयत्नेन विधार्यते। स विधार्यमाणो वायुस् स्थानमभिहन्ति। तस्मात् स्थानाभिघाताद् ध्वनिरुत्पद्द्यत आकाशे। सा वर्णश्श्रुतिः। स वर्णस्स्यात्मलाभः"[1] इति; पद्द्यब्रद्धपाणिनीयशिक्षायाञ् च– "आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया। मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्॥ मारुतस् तूरसि चरन् मन्द्रञ् जनयति स्स्वरम्। प्रातस्सवनयोगन् तञ् छन्दो गायत्त्रमाश्श्रितम्॥ कण्ठे माद्ध्यन्दिनयुगम् मद्ध्यमन् त्रैष्टुभानुगम्। तारन् तार्तीयसवनं शीर्षण्यञ् जागतानुगम्॥ सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्द्य मारुतः। वर्णाञ् जनयते तेषावँ् विभागः पञ्चधा स्स्मृतः॥"[2] इति; शम्भुशिक्षायाञ् च– "मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्। मारुतस् तूरसि चरन् मन्द्रञ् जनयति स्स्वरम्"[3] इति। महाभारतेऽपि– "उदानादुच्छ्वसिति च प्रतिभेदाच् च भाषते"[4] इति। उव्वटोल्लिखिताः केचन आर्याश् च– "उपरिष्टान् मुखादग्र ऊर्ध्वयँ् यो वर्ततेऽनिलः। ऊर्ध्वकर्मक्रियास् सर्वाः प्राणिनां सम्प्रवर्तयन्॥ नाब्भ्युरोऽर्थ शिरोभागङ गच्छन् करणसयँ्युतः। कण्ठताल्वोष्ठदन्तानां सप्रयत्नस् समीरितः॥ ह्रस्स्वदीर्घप्लुतान् वर्णान् स्निग्धान् रूक्षांश्च नैकधा। उदात्तानुदात्तांश्च स्वरितान् कम्पितानपि॥ समान् विकीर्णांश्च तथा सवँ्वृतान् विवृतानपि। देहिनामवबोधार्थन् तेनोदानस् स उच्च्यते"[5] इति। "सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत"[6] "सम्म्यक्स्रवन्ति सरितो न धेनाऽ अन्तर् हृदा मनसा पूयमानाः"[7] "अपरिमिततरमिव हि मनःपरिमिततरेव हि वाक्"[8] "न वै मया (मनसा) त्वङ (वाक्) किञ्चनाऽनभिगतवँ् वदसि"[9] "यद्द्वै मनसा द्ध्यायति तद्द्वाचा वदति"[10] "मनो वाव वाचो भूयो यथा वै द्वे वाऽऽमलके द्वे वा कोले द्वौ वाऽक्षौ मुष्टिरनुभवत्त्येववँ् वाचञ् च नाम च मनोऽनुभवति, स यदा मनसा मनस्स्यति मन्त्रानधीयीयेत्त्यथाधीते कर्माणि कुर्वीयेत्त्यथ कुरुते पुत्त्रांश्च पशूंश्चेच्छेयेत्त्यथेच्छते"[11]

---

१. ८।१। २. श्लो. ६–९। ३. श्लो. ४३। ४. शान्ति. १८५।२५। ५. ऋ.प्रा. व्या. १३।१ (३।१।१)। ६. शा. ऋ. म. सं. ८।१००।११। ७. मा. वा. शु. य. वे. म. सं. १७।९४। ८. मा. वा. श. ब्रा. १।४।४।७। ९. तत्त्रैव १।४।५।९। १०. तत्त्रैव १२।९।१।१३। ११. छा. उ. ७।३।१–२।

"यद् वै मनसा ध्यायति तद् वाचा वदति"[1] इत्यादिकासु श्रुतिषु चेयवँ वर्णोत्पत्तिप्रक्रिया सूचिता बोद्ध्या। भर्तृहरिणाऽपि मतभेदप्रदर्शनपूर्वकमियम् प्रक्रिया प्रतिपादिता। तथाहि– "वायोरणूनाञ्ज्ञानस्य शब्दत्वापत्तिरिष्यते। कैश्चिद् दर्शनभेदो हि प्रवादेष्वनवस्थितः। तत्र वायोस्तावच्छब्दभावापत्तिमाचक्षते– 'लब्धक्रियꣳ प्रयत्नेन वक्तुरिच्छानुवर्तिना। स्थानेष्वभिहतो वायुश्शब्दत्वम् प्रतिपद्यते॥ तस्य कारणसामर्थ्याद् वेगप्रचयकर्मणः। सन्निपाताद् विभज्यन्ते सारवत्त्योऽपि मूर्तयः॥ इत्येवमादि सर्वमनुगन्तव्यम्। अणूनां शब्दत्वापत्तिमपरे प्रतिपन्नाः, त एवमाहुः— अणवस् सर्वशक्तित्वाद् भेदसंसर्गवृत्तयः। छायातपतमश्शब्दभावेन परिणामिनः। स्वशक्तौ व्यज्ज्यमानायाम् प्रयत्नेन समीरिताः। अब्भ्राणीव प्रचीयन्ते शब्दाख्याꣳ परमाणवः' इत्यादि सर्वमनुगन्तव्यम्। ज्ञानस्य खल्वपि शब्दत्वापत्तिमपरे वर्णयन्ति– 'अथायमान्तरो ज्ञाता सूक्ष्मे वागात्मनि स्थितः। व्यक्तये स्वस्य रूपस्य शब्दत्वेन विवर्तते॥ स मनोभावमापद्य तेजसा पाकमागतः। वायुमाविशति प्राणमथासौ समुदीर्यते॥ अन्तꣳकरणतत्त्वस्य वायुराश्रयताङ्गतः। तद्धर्मेण समाविष्टस् तेजसैव विवर्तते॥ विभजन् स्वात्मनो ग्रन्थीन् श्रुतिरूपैꣳ पृथग्विधैः। प्राणो वर्णानभिव्यज्ज्य वर्णेष्वेवोपलीयते' इत्येवमादि सर्वमनुगन्तव्यम्। निदर्शनमात्रञ् चेदम्। बहुधा शिक्षासूत्रभाष्यकारमतानि दृश्यन्ते। तद् यथा– 'अन्तर्वर्तिना प्रयत्नेनोर्ध्वमुदीरितꣳ प्राणो वायुस् तेजसाऽनुगृहीतश् शब्दवहाभ्यश् शुषिभ्यस् सूक्ष्मांशन् धूमसन्तानवत् संहन्ति। स स्थानेषु शब्दघनस् संहन्यमानꣳ प्रकाशमात्रया कया चिदन्तस्सन्निवेशिनश् शब्दस्याऽविभक्तम् बिम्बमुपगृह्णाति' इत्येवमादि सर्वमनुगन्तव्यम्। तद् यथा– 'नाभिप्रदेशात् प्रयत्नप्रेरितो वायुरूर्ध्वमाक्रामन्नुरस्यादीनां स्थानानामन्यतमं स्थानमभिहन्ति, ततश् शब्दनिष्पत्तिः'[2] इत्यादिशिक्षाकारमतभेदप्रबन्धोऽनुगन्तव्यः। आचार्यꣳ खल्वप्याह– आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया। मनꣳ कायाग्निमाहन्ति स प्रेरयति मारुतम्'[3] इत्येवमादि। तथाऽपरꣳ पठति– 'वायुꣳ कोष्ठस्स्थानमनुप्रदानमापद्यते, स कण्ठगतश् श्वासतान् नादतावँ

---

१. जै. उ. ब्रा. १।१३।१–७। २. तुलना कार्या– प्रा. शि. सू. ८।१। ३. पा. शि., श्लो. ६।

वा'[1] इत्यादि। अथाऽपर आह– 'मनोऽभिहतः कायाग्निः प्राणमुदीरयति, स नाभेरुद्द्यन् मूर्धन्यभिहतोऽन्येन पुनरुद्द्यता मरुताभिहन्यमानो ध्वनिस् सम्पद्द्यते क इति वा ख इति वा' इत्येवमादि प्रतिशाखं शिक्षाभु भिन्नमागमदर्शनन् दृश्यमानं सर्वम् प्रपञ्चेन समर्थयितव्यम्''[2] इति। इयञ् च प्रक्क्रिया वर्णानान् नित्यानामेव सतामभिव्यक्तिरिति दर्शने वर्णानामुत्पत्तिरिति दर्शने च योजयितुं शक्यैव; तथापि शिक्षाकाराणावँ वायोश् शब्दत्वेन परिणाम इत्येतावदेव कथनमिति शाबरभाष्यादिब्भ्योऽप्यवगन्तव्यम्[3]। एवञ् च शिक्षाकारैरुच्चारणीयश्श्रवणीयवर्णात्मकशब्दस्यैव मुख्यतया विचारः कृतो नित्यस्य शब्दस्य न निषेधः कृतो न च प्रतिपादनञ्च कृतमिति न तेषान् धर्ममीमांसकैर् वैयाकरणैश् च सह विरोधः, एकस्मिन् विषये विरुद्धकोटिद्द्वयावलम्बने एव विरोधस्योद्भवात्। आपिशलशिक्षासूत्रे तु ''आकाशवायुप्प्रभवश् शरीरात् समुच्चरन् वक्त्रमुपैति नादः। स्थानान्तरेषु प्प्रविभज्ज्यमानो वर्णत्वमागच्छति यस् स शब्दः॥ तमक्षरम् ब्रह्म परम् पवित्रञ्च गुहाशयं सम्म्यगुशन्ति विप्राः। स श्रेयसाऽभ्युदयेन चैव सम्म्यक् प्रयुक्तः पुरुषयँ युनक्ति''[4] इत्युक्तमिति स्फोटशब्दब्रह्मवादिनावँ वैयाकरणानाम् मतस्याऽनुकूलमेव शिक्षाकारापिशलिमतमिति विज्ज्ञायते। वैयाकरणानां शब्दब्रह्माऽपि औपनिषदब्रह्मणो न प्प्रतिद्द्वन्द्वीति तु प्रागेव प्प्रतिपादितम्[5]। एतेन तान्त्रिकाणाम् ''परा वाग् मूलचक्रस्था पश्यन्ती नाभिसँस्थिता। हृदिस्था मद्ध्यमा ज्ज्ञेया वैखरी कण्ठदेशगा'' इत्येतस्य सिद्धान्तस्यापि शिक्षाकारैर् नाऽपि निषिद्धत्वन् नाऽप्यनुसृतत्वँ वक्तुं शक्यम्; वैदिकानां सिद्धान्तानां वैष्णवशैवशाक्तादितन्त्रनिरपेक्षत्वाद्[6] वेदाङ्गशिक्षाकाराणामपि तन्निरपेक्षत्वयँ युक्तमेवेति॥ ४६–५२॥

३. वर्णाधिकारः

(अ) वर्णलक्षणम्

पृथग्यत्नजभागाब्भ्यां रहिता नुर् गिरश् श्रुतिः।
स्वतन्त्रयत्ननिर्वर्त्या वर्णो भक्त्याऽक्षरञ् च तत्॥५३॥

---

१. तुलना कार्या– ऋ. प्रा. ३।१।१ (१३।१)। २. वा. प. (वृ.)१।११२–११५(१।१०७)। ३.ध.मी.सू.१।१।२२। ४.उपक्रमे। ५. उपक्रमाद्ध्याये, एकादशश्श्लोकव्याख्याने। ६. कण्व-

मनुष्यस्य वाण्या× पृथग्यत्नजाभ्याम् भागाभ्यान् तादृशैर् भागैर् वाऽपि रहिता स्वतन्त्रेण यत्नेन निर्वर्त्या श्रुतिश् शब्दविशेषो वर्ण इत्युच्यते। तथा च काशिकाकारः "पृथक्प्रयत्ननिर्वर्त्यं हि वर्णमिच्छन्त्याचार्याः"[1] इति ब्रुवाणः अ औ इत्यत्र अकारभागस्य इकारोकारभागयोश् च पृथक्प्रयत्ननिर्वर्त्यत्वाभावान् न पृथक्पृथग् वर्णत्वमिति प्रतिपादयति। तत्र प्रयत्नशब्दश् च न पारिभाषिकः, अतस् तस्य इच्छायोनिर् जीवगुण एवाऽर्थः। वर्णानाम् पृथक्प्रयत्नोच्चार्यत्वम् पाणिनीयव्याकरणभाष्यकारोऽप्याह स्म– "येनैव यत्नेनैको वर्ण उच्चार्यते विच्छिन्ने वर्णे उपसंहृत्य तमन्यमुपादाय द्वितीय× प्रयुज्यते तथा तृतीयस् तथा चतुर्थः"[2] इति। पाणिनीयव्याकरणवार्तिककारोऽपि– "एकैकवर्णवर्तित्वाद् वाच उच्चरितप्रद्ध्वंसित्वाच् च वर्णानाम्"[3] इति तद् ध्वनयति। वर्णशब्दप्रवृत्तिनिमित्तञ् च कालकपिलरक्तादिवर्णकया मस्स्या लिक्ष्यमानत्वाद् उच्चार्यमाणानां श्रुतीनावँ वर्णत्वमिति केचित्[4] प्रतिपादयन्ति; वयन् तु वर्णयन्ति चित्तरयन्ति रूपविशेषम् प्रापयन्ति ध्वनिमिति वर्णा इति वर्णनिर्वचनं रोचयामहे, यथा पशूनाङ् कण्ठान् निस्सृतो ध्वनिरेकरूपो न तथा मनुष्याणाङ् कण्ठान् निस्सृतः; स हि अ–इ–उ–क–खादिभिश् चित्तरतावँ विविधरूपताम् प्राप्त इति अकारादिभिर् मनुष्यकण्ठद्ध्वनेश् चित्तिरतत्वम् बोद्ध्यम्। वर्णानालँ लक्षणया परिभाषया वाऽप्यक्षरशब्दबोद्ध्यत्वम् पाणिनीयव्याकरणवार्तिककारभाष्यकारौ एव आहतुस् स्म– "अक्षरन् न क्षरवँ विद्द्यादश्नोतेर् वा सरोऽक्षरम्"[5] इति, "न क्षीयते न क्षरतीति वाऽक्षरम्। अश्नोतेर् वा पुनरयमौणादिकस् सरन् प्रत्ययः। अश्नुत इत्यक्षरम्"[6] इति च प्रवाहनित्यतया व्यापकतया वा परमार्थनित्येन ब्रह्मणा सादृश्याद् वर्णानामौपचारिकमक्षरत्वमित्यभिप्रायेणोक्तम्; "वर्णवँ वाऽऽहु× पूर्वसूत्रे"[7] इति, "अथवा पूर्वसूत्रे वर्णस्याऽक्षरमिति सञ्ज्ञा क्रियते"[8] इति च पारिभाषिकवँ वर्णानामक्षरत्वमित्यभिप्रायेण।

स्मृ. श्लो. ४०८; स्कन्दपुराणसूतसंहितायज्ञवैभवखण्डोपरिभागे सूतगीतायाम् ८।६१।

१. 'अ औच्' इति प्रत्याहारसूत्रस्य वृत्तौ। २. १।४।१०९।
३. १।४।१०९, वा. १०। ४. प्र. सि. कौ., पू., पृ. ४।
५. पा.व्या. भा. (प्रत्याहाराह्निके)। ६. तत्रैव।
७. तत्रैव। ८. तत्रैव।

केचित् तु स्वरा अक्षराणि व्यञ्जनानि वर्णा इत्यपि मन्यन्ते[1]। शिक्षाशास्त्रे तु यद्यपि ऋक्तन्त्रादौ अक्षरसमाम्नाय इत्यादौ[2] वर्णार्थेऽक्षरशब्दप्रयोगस् तथापि अक्षरमिति "सव्यञ्जनस् साऽनुस्स्वारश् शुद्धो वाऽपि स्स्वरोऽक्षरम्"[3] इति परिभाषितेऽर्थे एव प्रायः प्रयुज्यते ॥५३॥

(आ) वर्णविवेकहेतुः

श्रुतौ हि भेदो वर्णानाम् पार्थक्ये हेतुरिष्यते।
अनुप्रदानादयस् स्युश् श्रुतिभेदस्य हेतवः ॥५४॥
अनुप्रदानात् करणात् स्थानात् संसर्गतस् तयोः।
जायते वर्णवैशेष्यम् परीमाणाच् च पञ्चमात् ॥५६॥[4]

वर्णानाम् परस्परम् पार्थक्यस्य प्रयोजकन् तेषां स्वं स्वं रूपमेव। वर्णानां रूपञ् च श्रुत्यात्मकमेवेति वर्णानाम् पार्थक्ये तेषां श्रवणे भेद एव हेतुरिति स्स्वीक्रियते। तथा हि तैत्तिरीयप्रातिशाक्ख्यकार आह— "शब्दः प्रकृतिस् सर्ववर्णानाम्; तस्य रूपान्यत्त्वे वर्णान्यत्त्वम्"[5] इति। वर्णानां श्रुतौ भेदश् चाऽनुप्रदानादिभिर् भवति। अनुप्रदानन् नाम वर्णानामुपादानभूतो नादात्मकश् श्वासात्मक उभयात्मको वा प्राणवायुः[6]। करणञ् जिह्वामूलादि। स्थानञ् कण्ठादि। तयोस् संसर्गस् सम्बन्धस् स्थानकरणयोः, विवृतसंवृतस्स्पृष्टत्वादिक आभ्यन्तरप्रयत्नाख्यः। परीमाणम् मात्रा ह्रस्स्वादिका। एतैर् वर्णस्य श्रुतौ वैशेष्यञ् क्रियते इत्यर्थः। ऋग्वेदप्रातिशाक्ख्येऽपि— "प्रयोक्तुरीहागुणसन्निपाते वर्णीभवन् गुणविशेषयोगात्। एकश् श्रुतीः कर्मणाऽऽप्नोति बह्वीः"[7] इति प्रोक्तम् ॥ ५४–५५ ॥

(इ) वर्णगणना

ऊना वा त्र्यधिका पञ्चाशद् वा सप्ताधिकाऽपि वा।
अष्टाधिका षष्टिरूनैकाधिका त्र्यधिका तथा ॥५६॥
चतुर्युक् पञ्चयुक् षड्युक् सप्तयुग् वाऽष्टयुक् तथा।
त्रिसप्ततिश् शतं साष्टवं वेति वर्णा विकल्पिताः ॥५७॥

---

१. 'वर्णशब्दोऽत्र व्यञ्जनपर्यायस् तथा प्रसिद्धत्वात्' इति कुन्तकः (२।१ वृत्तौ); व्या.शि.भूमिकायाम् (पृ. ५)। २. ऋक्त. १।१, गौ. शि. १।१–७, २।१–७। ३. ऋ. प्रा. १८।३२। ४. तुलना कार्या— तै. प्रा. २३।३। ५. तै. प्रा. २२।१,२। ६. ऋ.प्रा. १३।१,तै.प्रा., त्रि.भा.र. २३।३। ७. ऋ.प्रा. १३।१३।

संस्कृतभाषायावँ वर्णसङ्ख्या ऊना पञ्चाशदिति केचित्, त्र्यधिका पञ्चाशदिति केचित्, सप्ताधिका पञ्चाशदित्यन्ये, अष्टाधिका पञ्चाशदित्यपरे, ऊना षष्टिरित्येके, षष्टिरिति केचित्, एकाधिका षष्टिरित्यन्ये, त्र्यधिका षष्टिरिति केचित्, चतुर्युक् षष्टिरित्यपरे, पञ्चयुक् षष्टिरित्यन्ये, षड्युक् षष्टिरिति केचित्, सप्तयुक् षष्टिरिति अपरे, अष्टयुक् षष्टिरिति परे, त्रिसप्ततिरित्येके, साष्टं शतमिति चान्ये इत्येवम्प्रकारेण शिक्षकैर् वर्णसङ्ख्या विकल्पिता इत्यर्थः। दिङ्मात्रमिदम्; अन्यान्यपि वर्णसङ्ख्याविषये मतानि सम्भवन्तीति भावः। उक्तञ्च मधुसूदनशर्मणा विद्द्यावाचस्पतिना 'पत्थ्या स्वस्तिः' इत्याख्ये ग्रन्थे "तदित्थञ् छन्दोभाषायां सप्ताशीतिशतवँ वर्णास् सिद्ध्यन्ति। येषान् तु मते विंशतिर् यमा इष्यन्ते तेषां त्र्यधिकं शतद्द्वयवँ वर्णनामुपपद्द्यते। तथा च सप्तनवतिर् वा सप्ताशीतिशतवँ वा त्र्यधिके द्वे शते वा वर्णा यत्तत्र मतभेदेनाम्नायन्ते, सैषाऽऽर्षेयी वर्णमातृका पत्थ्या स्वस्तिः प्रतिपत्तव्या"[1] इति।

तत्तत्र ऋग्वेदप्रातिशाख्ये लृकारवँ विहाय समानाक्षराणि अष्ट, सन्ध्यक्षराणि चत्वारि, स्पर्शाः पञ्चविंशतिः, अन्तस्स्थाश् चतस्रः, ऊष्माण अष्ट इति ऊनपञ्चाशदेव वर्णा गणिताः[2]। तदीये वर्गद्द्वये तु लृकारस्स्यापि गणितत्वात् तत्तत्र एकपञ्चाशद् वर्णास् स्वीकृताः। तत्तत्र लृकारस्स्य दीर्घत्वाभावे स्वीकृते पञ्चाशदेव वर्णा भवन्ति। किन् तु ऋग्वेदप्रातिशाख्ये एव स्थानेस्स्थाने स्वीकृता अपि प्लुतस्स्वराः[3] ड़ढ़ौ[4] यमाः[5] नासिक्याः[6] यँ–लँ–वाँश् च[7] तत्तत्र न गणिता इति तत्तत्र सङ्ख्यायान् न्यूनता बोद्ध्या। शुक्लयजुर्वेदप्रातिशाख्ये पञ्चषष्टिर् वर्णा उक्ताः[8]। तत्तत्र ड़ढ़जिह्वामूलीयोपद्ध्मानीयनासिक्या दीर्घ लृकारः प्लुताश् च केचन माद्ध्यन्दिनीयानामाम्नाये न सन्तीत्युक्मिति[9] तत्तत्र नैव पञ्च–षष्टिर् वर्णा भवन्ति। तैत्तिरीयप्रातिशाख्ये तु त्रिपञ्चाशद् वर्णा माहिषेयेण प्रदर्शिताः[10]। किन् तु षष्-

---

१. १५–१६ पृ.। २. १।१–१०। ३. १।३०–३१। ४. १।५१–५२। ५. १।४८–५०, ६।६२। ६. १।४८। ७. ४।७। ८. ८।२५। ९. ८।३९। १०. 'वर्णानां समाम्नायो वर्णसमाम्नायः। ... आम्नाय इत्यानुपूर्व्येणाकारादयो यमपर्यवसानाः पूर्वाचार्यैरुपदिष्टा वर्णाः। यथा अ आ आ३, इ ई ई३, उ ऊ ऊ३, ऋ ॠ, ऌ, ए ऐ ओ औ; क ख ग घ ङ, च छ ज झ ञ, ट ठ ड ढ ण,

टिर् वर्णास् सूत्रेणैव प्रदर्शिता इति त्रिभाष्यरत्नकारः[1]। वैदिकाभरणकारेण तत्र ऊनषष्टिर् वर्णा अस्मत्स्वाद्ध्यायवर्तिन इत्युक्तम्[2]। त्रिभाष्यरत्नकारेण स्वरभक्तिर् गणिता वैदिकाभरणकारेण तु न गणिता; उभाभ्यामेव केचन स्वरा यँलँवाँश् च न गणिता इति वर्णसङ्ख्यायान् न्यूनता बोद्ध्या। ऋक्तन्त्रे तु सप्तपञ्चाशद् वर्णा निर्दिष्टाः[3]। तत्र प्लुतानाम्, यँलँवाँनाम्, दुस्स्पृष्टयोर् ड़ढ़योश् च गणना नास्ति। अथर्ववेदीये शौनकीयचतुरद्ध्यायिकाख्ये प्रातिशाख्ये तु सूत्रे वर्णा न गणिताः। व्याख्यानुसारन् तु तत्र एकषष्टिर् वर्णास् स्वीकृता दृश्यन्ते[4]। तत्रापि यँलँवाँश् च ड़ढ़ौ च न गणिताः। लृकार एक एव गणितः।

ऋग्वेदीयायां शैशिरीयशिक्षायान् त्रिषष्टिश् चतुष्षष्टिर् वेत्येव वर्णसङ्ख्या निर्दिष्टा[5] किन् तु तत्र स्वीकृतानावँ वर्णानां सर्वेषाङ गणने तु सङ्ख्याऽधिका भवति[6]। ऋग्वेदीयशिक्षात्वेन कैश्चिद् गृहीतायाम् पद्द्यरूपायाम् पाणिनीयशिक्षायामपि 'त्रिषष्टिश् चतुष्षष्टिर् वा वर्णा'[7] इत्येवोक्तम्। तत्र गणना तु दुष्करा। पञ्जिकाकारश् च[8] तत्र दुस्स्पृष्टमगणयित्वा अनुस्स्वारौ द्वौ स्वीकृत्य तयोर् द्वयोरेव गणने चतुष्षष्टिः, एकस्यैव गणने त्रिषष्टिर् वर्णा इति ब्रूवीति। तत्र च शिक्षाप्रकाशकारेण रङ्गो द्वितीयोऽनुस्स्वार उक्तः[9], पञ्जिकाकारेण ह्रस्स्व-दीर्घौ द्वावनुस्स्वारौ उक्तौ[10]। किन् त्वेतन्मते वर्णगणनाश्लोकयोर् आगतः 'अनुस्स्वारः' इत्येकवचनान्तम् पाठो विरुद्ध्यते; दुस्स्पृष्टोल्लेखश् च, दुस्स्पृष्ट इत्यस्य गणेयागणेयप्प्लुतलृकारपरतया व्याख्यानेऽपि तादृशऋकारस्यापि गणनाया दुर्वारत्वात्। कालीप्रसादमिश्ररुद्द्रप्रतापशर्मप्प्रभृतयः पुनरनुस्स्वारमेकमेव गणयन्ति, दुस्स्पृष्टण् ड़कारमपि गणयन्ति। किन्त्वेतन्मते दुस्स्पृष्टो ढ़कारः[11] किमिति न गण्यते इति न ज्ज्ञायते। तत्र अनु-

---

त थ द ध न, प फ ब भ म, य र ल व; श ष स ह, क ं ख ं ग ं घम्' इति– तै. प्रा; छ. भा. प्रा. व्या. १।१।

१. तै. प्रा., त्रिभा. र. १।१। २. तै. प्रा., वै. आ. १।१। ३. १।२। ४. १।१९–२८। ५. श्लो. ५–१४। ६. श्लो. १०। ७. श्लो. ३। ८. पा. शि. प. श्लो. ४, ५। ९. शि. स. पृ. ३८९, 'रङ्गन् द्वितीयमनुस्स्वारम् जानीयात्' इति। १०. पा. शि. प. श्लो. ३। ११. ऋ. प्रा. १।५१–५२।

स्स्वारस्स्याऽप्येकत्वेनैव गणनायाङ्क कृतायाम्, दुस्स्पृष्टत्वेन प्लुत लृकार एव विशेष्यते, लृकारस्स्यैव प्लुततायान् दुस्स्पृष्टताया आगमनात्, तस्स्य पूर्वमगणितत्वाच् च, ऋकारस्स्य तु प्लुतत्वे दुस्स्पृष्टतायास् सत्वेऽपि पूर्वमेव तस्स्य गणितत्वान् न पुनर् गणना; न च कात्त्यायनोक्तयोर् विलक्षणयोर्[1] ऋकारलृकारयोर् अत्त्र ग्रहणम् इति स्वीकृते तु वर्णगणनोपपद्द्यते। अस्मिन् पक्षेऽनुस्स्वारस्स्य द्वित्वे स्वीकृते तु वर्णसङ्ख्या चतुष्षष्टिर् भवति। किन् तु ऋकारलृकारयोर् दीर्घीभावे प्लुतीभावे च रेफलकाराब्भ्याम् परस् स्वरभाग एव वर्धते[2] इति लृकारप्लुतीभावो विशेषेण न दुस्स्पृष्टताया निमित्तम् भवितुमर्हतीति उक्तन् दुस्स्पृष्टताव्याख्यानन् तदुपजीविनी वर्णगणना च न सुप्प्रतिपदा। शिक्षाप्रकाशकारेण तु "अनुस्स्वारद्द्वयग्रहणन् चतुष्षष्टिसङ्ख्यामास्कन्दति"[3] इति "अनुस्स्वारादयः प्लुतान्ताः पञ्च षड् वा, एवमेते त्रिषष्टिश् चतुष्षष्टिर् वा व्याख्याताः"[4] इति चोक्तम्। दुस्स्पृष्टत्वम् प्लुतलृकारधर्मत्वेनैव तत्त्र गृहीतम्[5]। अत एतन्मतेऽपि अनुस्स्वारस्स्यैकत्वे त्रिषष्टिर् द्वित्वे च चतुष्षष्टिर् वर्णा इत्त्येवोक्तम् भवति। अतः 'अनुस्स्वारद्द्वयगणनन् चतुष्षष्टिसङ्ख्यामास्कन्दति (अतिक्रामति)' इति कथमुक्तमिति न ज्ज्ञायते। अस्मिन्नपि मते ऋग्वेदे श्रूयमाणावपि ऽढौ कथन् नोपात्ताविति इदमपि मतन् चिन्त्यमेव। अत्त्राऽपि यँलँवाँस् तु नैव गणिताः।

शुक्लयजुर्वेदीयायाँ याज्ज्ञवल्क्यशिक्षायान् त्रयोविंशतिस् स्वराः, पञ्चविंशतिस् स्पर्शाः, चतस्स्रोऽन्तस्स्थाः, चत्त्वार ऊष्माणः, विसर्गजिह्वामूलीयोपद्ध्मानीयनासिक्यानुनासिक्यरङ्गाः, चत्त्वारो यमाः, द्वावनुस्स्वारौ इति अष्टषष्टिर् वर्णा उक्ताः[6]। किन् तु तत्त्राऽनुनासिक्यो नाम वर्णोऽप्प्रसिद्धोऽविवृतश् च। वर्णरत्नप्रदीपिकायां शिक्षायाम् प्रातिशाख्यप्रदीपशिक्षायाञ् च वर्णसङ्ख्याने न काऽपि विशेषता दृश्यते।

तैत्तिरीयचरणसम्बद्धासु शिक्षासु च व्यासशिक्षायां षट्षष्टिर् वर्णा उक्ताः[7]। तत्त्र ऋकार द्विविध एवोक्तः, लृकार एकविध एव; रङ्गौ तु

---

१. पा. व्या. भा. ६।१।१०१। २. शौ. च. १।३८।
३. शि. स., पृ. ३८९। ४. तत्त्रैव पृ. ३८९–३९०।
५. तत्त्रैव, पृ. ३८९। ६. या. शि. श्लो. २१२, (शि. स., पृ. ३२–३३)। ७. सू. ४३२।

स्स्वरेषु गणितौ। ओङ्कारस् स्वतन्त्रस्वरत्त्वेनोपात्तः। अे अै ओ औ इति चत्त्वारो दीर्घा एव, ऊष्माणष् षडेवेति चोक्तम्[1]। शम्भुशिक्क्षायावँ् वर्णसङ्ख्या न प्रतिपादिता। तथैव कौहलीयशिक्क्षायामपि। "वासिष्ठशिक्क्षायाम् लृवर्णदीर्घम् परिहाप्य 'स्वराष् षड्विंशतिꝏ प्रोक्ताः' इत्यादिना अष्टषष्टिवर्णानुक्त्वा अष्टपञ्चाशत्पक्क्षार्थम् पुनरपि ऋवर्णप्लुतम् लृवर्णप्लुतं सन्ध्यक्क्षरह्रस्स्वप्लुताँश् चेति दशस्स्वरान् परिहाप्य षोडशस्स्वरपक्क्ष उक्तः" इति वैदिकाभरणे उक्तम्[2]। किन् तु उपलब्ध्यमानायावँ् वासिष्ठशिक्क्षायाङ्ग केवलन् द्वित्त्वमेव प्रतिपादितम् प्राप्प्यते। त्रुटितत्त्वेनोपलब्ध्यमानायाम् आपिशलिशिक्क्षायाम् पद्दचमय्याञ् च "ह्रस्स्वदीर्घप्लुतावर्णेवर्णो-वर्णा ऋ ॠ लृ च। अेदैदोदौदिति ज्ज्ञेयाष् षोडशेहादितस् स्वराः। कखौ गघौ ङचछजा झञौ टठडढा णतौ। थदौ धनौ पफवभा मस् स्पर्शाꝏ पञ्चविंशतिः। यरौ लवौ चतस्स्रोऽन्तस्स्थाश् च ꝏकशषसꝏ पहाः। षडूष्माणो विसर्गोऽनुस्स्वारो ङो नास्स्यपञ्चकम्"[3] इति ऊनषष्टिर् वर्णाꝏ प्रतिपादिताः। एते च श्लोका वैदिकाभरणेऽपि उद्धृता दृश्यन्ते[4]। कालनिर्णयशिक्क्षायावँ् वर्णानां सङ्ख्या त्रिसप्ततिरित्युक्तमिति वेदतैजसकारः[5]। उपलब्ध्यमानायाङ्ग कालनिर्णयशिक्क्षायान् तु नैतत् प्राप्प्यते। पारिशिक्क्षायामपि उक्तैरेव श्लोकैरूनषष्टिर् वर्णा गणिताः[6]। तत्त्र "पञ्चाशदर्णा ऋषिभिस् तु गीताः"[7] इति चोक्तम्। लक्क्ष्मीकान्तशिक्क्षायान् तु वर्णानां सङ्ख्या अष्टोत्तरं शतमुक्तमिति वेदतैजसकारः[8]; किन् तु उपलब्ध्यमानायालँ् लक्क्ष्मीकान्तशिक्क्षायान् तु उच्चस्स्वरनिर्णय एव प्राप्प्यते, न वर्णगणनादिकम्। आत्त्रेयशिक्क्षायान् तु "स्वराष् षोडश विज्ज्ञेयास् स्पर्शास् स्युꝏ पञ्चविंशतिः। अन्तस्स्थाश् च चतस्स्रश् चेदूष्माणश् च षडीरिताः। द्व्यनुस्स्वारो विसर्गश् च स्वरभक्तिश् चतुर्यमाः। वर्णानां षष्टिसङ्ख्या स्स्यादत्त्रचुक्ता याजुषे मते" इति वर्णसङ्ख्या प्रोक्ता।

चारायणीयशिक्क्षायाञ् च– "अकारप्प्रमुखैर् वर्णैर् हकारान्तैस् त्रिषष्टिभिः। विबद्धवँ् वाङ्मयं सर्वमप्प्रमेयमपारगम्॥ अकारा-

---

१. सू. ५–१२ (वेदतैजसव्याक्ख्या च दृश्श्या)। २. तै. प्रा., वै. १।१। ३. श्लो. ७-९। ४. तै. प्रा. वै. १।१। ५. व्या. शि. वे. तै. सू. १३। ६. पारिशिक्क्षायाꝏ प्रारम्भे एव। ७. सू. ५८। ८. व्या. शि. वे. तै., सू. १३।

द्द्या औकारान्तास् स्वरा ज्ञेयाश् चतुर्दश। शिष्टानि व्यञ्जनान्न्येव प्रोक्तान्न्यक्षरचिन्तकैः॥ कादयो मावसानाश् च स्पर्शास् स्युः पञ्चविंशतिः। यादयश् च तथान्तस्था ऊष्माणश् च शषसहाः"[1] इत्यादिना "एते स्स्थानसमुत्पन्ना वर्णाष् षष्टिस् त्रयस् तथा। यैरेव त्त्वखिलवँ् विश्श्ववँ् व्याप्तवँ् वाङ्मयमण्डलम्॥ स्वराश् चतुर्दश प्प्रोक्तास् स्पर्शास् स्युः पञ्चविंशतिः। यादयश् च स्स्मृताश् चाष्टौ षोडशैव पराश्श्रयाः॥ एते वर्णास् त्रिषष्टिश् च विहिताक्षरचिन्तकैः। एतैरेवाखिलो व्याप्तो वाक्समुद्द्रस् त्वपारगः॥"[2] इत्यादिना च त्रिषष्टिरेव वर्णा उल्लिखिताः।

सामवेदीयासु शिक्षासु नारदीयशिक्षादिषु वर्णसङ्ख्याविषये स्पष्टम् प्रतिपादनङ् किमपि न प्प्राप्प्यते।

अथर्ववेदीयायाम् माण्डूक्क्यां शिक्षायां सप्तषष्टेर् वर्णानामस्तित्त्वस्य सङ्केतः प्राप्प्यते[3]; स्पष्टतया तु वर्णसङ्ख्याविषये न किमप्प्युक्तम्। वर्णपटले तु "वर्णाः पञ्चषष्टिः, स्वरा द्वाविंशतिः, समानाक्षराणि चतुर्दश, अष्टौ सन्ध्यक्षराणि, एकोनविंशतिर् नामिनः, त्रिचत्त्वारिंशद् व्यञ्जनानि, स्पर्शाः पञ्चविंशतिः, चत्त्वारस् त्वन्तस्स्थाः, चत्त्वारो यमाश् च, अष्टौ ऊष्माणः, अयोगवाहा दश"[4] इत्युक्तम्।

सर्ववेदशाखालोकसाधारणीषु शिक्षासु तु आपिशलिशिक्षायां 'स्थानकरणप्रयत्नेभ्यो वर्णास् त्रिषष्टिः'[5] इत्युक्तम्। किन् तु तत्त्र प्रतिपादितानावँ् वर्णभेदानां सर्वेषाङ् गणनायाङ् कृतायान् तु एकं शतन् चतुर्नवतिश् च वर्णानां सङ्ख्या सम्भवति। तथा हि अ इ उ ऋ लृ × १८=९०, ए ओ × १८=३६, ऐ औ × १२=२४ इति स्वराः १५० + स्पर्शाः २५ + अन्तस्थाः ७ + ऊष्माणः ४ + अयोगवाहाः ५ + यमाः ४ = १९४ इति। अत्त्राऽपि अभिनिहितवर्णसङ्ख्या त्त्वसमाविष्टैव भवति। गद्द्यसूत्त्रमय्याम् पाणिनीयशिक्षायामपि वर्णसङ्ख्याप्रतिपादनमापिशलिशिक्षातुल्यमेव। किन् तु तत्त्र 'स्थानकरणप्रयत्नेभ्यो वर्णास् त्रिषष्टिः, चतुष्षष्टिरित्त्येके'[6] इत्युक्तम्। कस्स्य वर्णस्स्य त्यागे त्रिषष्टिस् समावेशे च चतुष्षष्टि-

---

१. पृ. ११। २. पृ. १४। ३. मा. शि. श्लो. ६८, ७०, ९१, १११-१२, ११६, १२२, १३०। ४. अ. प. ४७।३।६। ५. उपक्क्रमप्प्रकरणे, सू. ४। ६. उपक्क्रमप्प्रकरणे सू. ५।

रिति तु तत्र न प्रतिपादितम्। कौटलीयेऽर्थशास्त्रेऽपि 'अकारादयो वर्णास् त्रिषष्टिः'[1] इत्युक्तम्। भरतनाट्यशास्त्रेऽपि– 'स्वराश् चतुर्दश, कादीनि व्यञ्जनानि (त्रयस्त्रिंशत्)' इत्युक्त्वा ते स्फुटन् निर्दिष्टाः; विसर्जनीयः, जिह्वामूलीयः, उपध्मानीयश् च स्थान-निर्देशप्रसङ्गे उपात्ताः[2]। चान्द्रवर्णसूत्रे वर्णसङ्ख्या न निर्दिष्टा, तथापि तत्रत्यवँ वर्णानाम् प्रतिपादनम् प्राय आपिशलि-शिक्षानुसार्येव, किन् तु तत्र यमा नोल्लिखिताः, लृवर्णस्य द्वादशैव भेदा उक्ताः, अकारस्य ओकारस्य च ह्रस्वत्वम् अपि तत्र नोल्लिखितमिति तावपि द्वादशविधावेवोक्तौ। षोडशश्लोक्या शिक्षायान् त्रयस्त्रिंशद् व्यञ्जनानि द्वाविंशतिस् स्वराः, चत्वारो यमाः, विसर्गजिह्वामूलीयोपध्मानीयानुस्वाराश् चेति त्रिषष्टिर् वर्णा गणिताः।

तन्त्रप्रक्रियायान् तु अकारादय४ क्षकारान्ता४ पञ्चाशद् वर्णा गण्यन्ते, सा चेयवँ वर्णमालाऽक्षमालेत्युच्यते[3]। किन् तु तत्र वर्णा४ पदार्थादिसङ्केतोपयोगायोपात्ता इति न वर्णगणनायान् तत्र तात्पर्यमिति विज्ञायते।

इत्येववँ वर्णसङ्ख्याया विषये नानाप्रकाराणि दर्शनानि सन्ति शिक्षाकारादीनाम्। तानि च स्वस्वशाखासूपलब्ध्यानावँ वर्णानामेव गणनया, लौकिकसँस्कृतवर्णानामेव गणनया, प्रयोगेऽनुपलब्ध्य-मानानामपि सम्भावनया कल्पितानामपि वर्णानाङ गणनया, अवान्तरभेदा-नान् त्यागेनाऽन्तर्भावणेन वा, तेषामपि गणनया; मात्राप्रधानया गणनया, करणप्रधानतया गणनया, सर्वभेदसङ्कलनेन[4] चेत्त्येवम्प्रकारेण[5] जाता-नीति सर्वाण्यपि दर्शनानि यथायथं समर्थयितव्यानि ॥५६–५७॥

(ई) वर्णसमाम्नायस्येतिहासो महत्त्वञ् च

वर्णानामानुपूर्व्येणोपदेशो बरहृम्मणा पुरा।
कृतो वर्णसमाम्नायो बरहृम्मराशिरिति स्स्तुतः॥५८॥
बृहस्पत्यादिकाऽऽचार्य-पारम्पर्यात् समागतः।
सैवाक्षरसमाम्नायो वर्णराशिश् च भण्यते॥५९॥

---

१. २।१० (अष्टाविंशे प्रकरणे)। २. १४।८–२३।
३. प्र. सि. कौ., पू. भा., पृ. ४। ४. व्या. सि. वे. तै. सू. १३।
५. अ. प. ४७।१।५।

तत्र वर्णसमाम्नायस्याऽक्षरसमाम्नाय इत्युपचारेण पूजितस्य परम्परादिकम् ऋक्तन्त्रे वर्णितम्, यथा— "ब्रह्मा बृहस्पतये प्रोवाच, बृहस्पतिरिन्द्रायेन्द्रो भरद्वाजाय भरद्वाज ऋषिब्भ्य ऋषयो ब्राह्मणेब्भ्यः; तङ खल्विममक्षरसमाम्नायमित्याचक्षते; न भुक्त्वा न नक्तम् प्रब्रूयाद् ब्रह्मराशिरिति ब्रह्मराशिरिति च"[1] इति। वर्णसमाम्नायश् च ऋग्वेदप्रातिशाख्ये वर्गद्वये वर्णराशिरित्युक्तः[2]; शुक्लयजुर्वेदप्रातिशाख्ये वर्णसमाम्नाय इत्येवोक्तः[3]; वर्णसङ्ग्रह इति चोक्तः[4], ब्रह्मराशिरिति आत्मवाच इति च स्स्तुतः[5]; तैत्तिरीयप्रातिशाख्येऽपि वर्णसमाम्नाय इत्येवोक्तः[6], सामवेदीये ऋक्तन्त्राख्ये प्रातिशाख्ये तु अक्षरसमाम्नाय इत्युक्तो ब्रह्मराशिरित्युपचारेण स्स्तुतश् च[7]। अथर्ववेदीययोः प्रातिशाख्ययोस् तु वर्णसमाम्नाय इति अक्षरसमाम्नाय इति वा पदन् न प्रयुक्तम्। वर्णपटले तु वर्णसमाम्नायो वर्णसञ्चय इत्युक्तः[8]। पाणिनीय-व्याकरण-भाष्यकारेणाऽपि— "सोऽयमक्षरसमाम्नायो वाक्समाम्नायः पुष्पितः फलितश् चन्द्रतारकवत् प्रतिमण्डितो वेदितव्यो ब्रह्मराशिः, सर्ववेदपुण्यफलावाप्तिश् चाऽस्य ज्ञाने भवति, मातापितरौ चाऽस्य स्वर्गे लोके महीयेते"[9] इति वर्णसमाम्नायोऽक्षरसमाम्नायशब्देन वाक्समाम्नायशब्देन चोक्तः, ब्रह्मराशिरित्युक्त्वा तज्ज्ञानफलवर्णनेन च स्स्तुतः ॥६०॥

आचार्यैरुपदिष्टोऽयम् यथाशाखम् पृथक्पृथक्।
समाहृत्योच्यतेऽस्माभिस् सोऽयमत्र यथामति ॥६१॥

तत्र ऋग्वेदप्रातिशाख्ये "अष्टौ समानाक्षराण्यादितः (अ आ ऋ ॠ इ ई उ ऊ), ततश् चत्वारि सन्ध्यक्षराणि (अे ओ अै औ), एते स्स्वराः, अनुस्स्वारो व्यञ्जनवद् वा स्स्वरो वा, सर्वश् शेषो व्यञ्जनान्येव, तेषामाद्द्यास् स्पर्शाः (क ख ग घ ङ, च छ ज झ ञ, ट ठ ड ढ ण, त थ द ध न, प फ ब भ म), पञ्च ते पञ्चवर्गाः, चतस्स्रोऽन्तस्स्थास् ततः (य र ल व), उत्तरेऽष्टा ऊष्माणः (ह श ष स अः क प अं)"[10] इति वर्णसमाम्नायस् सूचितो न तु कोष्ठकेषु प्रदर्शितानाम् वर्णानां साक्षादुपदेशः कृतः। ऋग्वेदप्रातिशाख्यस्य

---

१. १।४। २. २।१०। ३. ८।१। ४. ८।३८।
५. ८।२५ ६. १।१। ७. १।४। ८. अ. प. ४७।१।३।
९. पा. व्या. भा. (द्वितीयाह्निके)। १०. १।११–१०।

प्राग्बन्धे वर्गद्द्वये तु "अकारर्कारावित्रेओऐऔ, पदाद्द्यन्तयोर् न लृकारस् स्वरेषु, आकारादीन् दीर्घरूपान् द्वितीयान् ह्रस्स्वेषु, पञ्च-स्स्वपि तानि सन्ति, कखौ गघौ ङः, चछौ जझौ ञः, टठौ डढौ णः, तथौ दधौ नः, पफौ बभौ मः, य र ल वाः, ह श ष साः, अः ᳵक ᳵप अं इति वर्णराशिᳵ क्रमश् च"[1] इति वर्णसमाम्नाय उपदिष्टो दृश्यते। शुक्लयजुर्वेदप्रातिशाख्ये च "अथातो वर्णसमाम्नायवँ् व्याख्या-स्स्यामः, तत्र स्स्वराः प्रथमम्, अ इति आ इति आ ३ इति[2], इ इति ई इति ई ३ इति, उ इति ऊ इति ऊ ३ इति, ऋ इति ॠ इति ॠ ३ इति, लृ इति लॄ इति लॄ ३ इति (इति समानाक्क्षराणि[3]); अथ सन्ध्यक्क्ष-राणि, ए इति ए ३ इति, ऐ इति ऐ ३ इति, ओ इति ओ ३ इति, औ इति औ ३ इति, इति स्स्वराः; अथ व्व्यञ्जनानि, किति खिति गिति घिति ङिति कवर्गः, चिति छिति जिति झिति ञिति चवर्गः; टिति ठिति डिति ढिति णिति टवर्गः; तिति थिति दिति धिति निति तवर्गः; पिति फिति बिति भिति मिति पवर्गः; इति स्प्पर्शाः; अथान्त-स्त्थाः, यिति रिति लिति विति; अथोष्म्माणः, शिति षिति सिति हिति; अथायोगवाहाः,ᳵक इति जिह्व्वामूलीयः, ᳵप इत्त्युपद्ध्मानीयः, अं इत्न्यनुस्स्वारः, अः इति विसर्ज्जनीयः, हँ इति नासिक्क्यः, कँ खँ गँ घँ इति यमाः, एते पञ्चषष्टिवर्णा ब्रह्म्मराशिरात्तँ्मवाचः"[4] इति वर्णसमाम्नायᳵ प्रतिपादितः। तैत्तिरीयप्प्रातिशाख्येऽपि— "अथ वर्ण्णसमाम्न्नायः, अथ नवादितस् समानाक्क्षराणि, द्वेद्द्वे सवर्ण्णे ह्रस्स्वदीर्घे, न प्प्लुतपूर्वम्, षोडशादितस् स्वराः (अ आ आ३ इ ई ई३ उ ऊ ऊ३ ऋ ॠ लृ ए ऐ ओ औ), शेषो व्यञ्जनानि, आद्द्याᳵ पञ्चविंशतिस् स्पर्शाः (क ख ग घ ङ, च छ ज झ ञ, ट ठ ड ढ ण, त थ द ध न, प फ ब भ म), पराश्श्चतस्स्रोऽन्तस्स्थाः (य र ल व), परे षडूष्माणः (ᳵक श ष स ᳵप ह"[5] इति वर्णसमाम्नायस् सूचितो न तु कोष्ठकेषु प्रदर्शितानावँ् वर्णानां साक्क्षादुपदेशᳵ कृतः। सामवेदीये ऋक्तन्त्राख्ये प्रातिशाख्येऽपि— "अथ वर्ण्णास् सञ्ज्ञाप्रत्त्याहार-समाः, अ इति आ इति इ इति ई इति उ इति ऊ इति ऋ इति ॠ इति

---

१. २।१–१०। २. यद्द्यपि अङ्केनैव त्रिमात्त्रत्त्वं सूच्यते इति अ३ इ३ इत्त्यादिरूपेणैव लेखनङ्ग कर्तुं शक्क्यन् तथापि परम्परानु-रोधाद् आ३ ई३ इत्त्यादिकमेव लिक्ख्यते। ३. इदम् बोधसौकर्यायाऽ-स्माभिरेव निवेशितम्। ४. ८।१–२५। ५. १।१–९।

लृ इति लॄ इति समानानि, अ ए इति अै इति ओ इति औ इति सन्ध्यक्षराणि, (अयाहीवोयीनाम्, गतिरन्तः) इति स्वराः; अथ व्यञ्जनानि, किति खिति गिति घिति ङिति कवर्गः चिति छिति जिति झिति ञिति चवर्गः, टिति ठिति डिति ढिति णिति टवर्गः, तिति थिति दिति धिति निति तवर्गः, पिति फिति बिति भिति मिति पवर्गः, इति स्पर्शाः, अथान्तस्थाः, यिति रिति लिति वित्त्यन्तस्थाः, अथोष्माणो हिति शिति षिति सिति योगवाहाः, अथाऽयोगवाहाः, अः इति विसर्जनीयः, ×क इति जिह्वामूलीयः, ×प इत्त्युपद्ध्मानीयः, हँ इत्त्यनुनासिक्यः, अथ यमाः, कँ इति खँ इति गँ इति घँ इति यमाः, अनन्त्यान्त्यसयँ योगे मद्ध्ये यम× पूर्वगुणः; अथानुस्वारौ अं आं इत्त्यनुस्वारौ, ह्रस्वाद् दीर्घो दीर्घाद् ह्रस्वः"[1] इति। वर्णपटलेऽपि– "इति वर्णास् स्वरा× प्रोक्तास् तेषामाद्द्याश् चतुर्दश। समानाक्षराण्युच्यन्ते शेषस् सन्ध्यक्षराणि तु॥ अनवर्णस् स्वरो नामी काद्द्यो (कादिकवँ) व्यञ्जनं स्मृतम्। पञ्चविंशतिराद्द्यैषा स्पर्शा वर्गाश् च पञ्चकाः॥ चत्वारो यादयोऽन्तस्थाश् शादिरूष्माष्टको गणः। अयोगवाहा विद्द्यन्ते तेषामाद्द्या× पृथग्विधाः॥ विसर्जनीयोऽनुस्वारो जिह्वामूलीय इत्त्यथ। उपद्ध्मानीय इत्त्येते चत्वारोऽत× परे यमाः। नासिक्याभिनिधानौ च विद्द्यते येन पूरणम्। पञ्चषष्टिरियान् वाचो राशिर् यो वेदलोकयोः"[2] इति वर्णसमाम्नायस् सूचितः। एतावताऽऽचार्याणावँ वर्णसमाम्नायोपदेशरीतिस् स्फुटम् बोद्धुं शक्या। अन्न्यास्स्वपि शिक्षासु वर्णसमाम्नायो वर्णगणनयैव सूचित× प्रायेण[3]। न हि तास्स्वपि वर्णानामानुपूर्व्येण पूरणरूपेणोपदेश× कृतो दृश्यते। पद्द्यबद्धायामापिशलिशिक्षायान् तु– "ह्रस्वदीर्घप्लुतावर्णेवर्णोवर्णा ऋ ॠ लृ च। अ ए दो दौ दिति ज्ञेयाष् षोडशेहादितस् स्वराः। कखौ गघौ ङचछजा झञौ टठडढा णतौ। थदौ धनौ पफबभा मस् स्पर्शा× पञ्चविंशतिः। यरौ लवौ चतस्स्रोऽन्तस्थाश् च ×क श ष स ×पहाः। षडूष्माणो विसर्गोऽनुस्वारो ङो नास्स्यपञ्चकम्"[4] इति तैत्तिरीयप्रातिशाख्यानुसारी वर्णसमाम्नाय× प्रतिपादित इति विशेषः। एते च श्लोका× पारिशिक्षायामपि प्राप्यन्ते[5]; वैदिकाभरणे चोल्लिखिताः[6], एतानेवाऽऽचार्याणावँ वर्णसमाम्नायोपदेशान् समाहृत्य स्वबुद्ध्या च

---

१. १।२–३। २. अ. प. ४७।१।७–११। ३. चा.शि. पृ. ११, १४। ४. श्लो. ७–९। ५. प्रारम्भे एव। ६. तै.प्रा. वै.१।१।

किञ् चित् सयँ योज्ज्य अत्तर अस्माभिर् वर्णसमाम्नाय उत्तरैश् श्लोकैः प्रतिपाद्द्यते ।।६२।।

(उ) वर्णसमाम्नायस् तत्तर वर्णक्क्रमश् च

अ इ उ ऋ लृ अे अै ओ औ एते खलु भेदकैः ।
दैर्घ्यप्लुतत्यानुनासिक्क्यस्स्वरैर् भिन्ना यथाथम् ।।६२।।
कखौ गघौ ङः कवर्गे चवर्गे चछजझञाः ।
टठौ डढौ णष् टवर्गे तवर्गे तथदधनाः ।।६३।।
पफौ बभौ मः पवर्गे वर्गाः पञ्चेति कीर्तिताः ।
रक्तारक्ता यरलवा रवँ विहाय द्द्विधा ततः ।।६४।।
शषसहा विसर्गश् च जिह्वामूलीय एव च ।
उपद्ध्मानीयश् च ततोऽनुस्स्वारा रङ्गका अपि ।।६५।।
अभिनिधाना द्ध्रुवञ् च यमा नासिक्क्य एव च ।
स्वरभक्ती ड़ढौ वर्णराशिर् वर्णक्क्रमोऽप्य्यम् ।।६६।।

यद्द्यपि ऋग्वेदप्रातिशाक्ख्ये तैत्तिरीयप्रातिशाक्ख्ये च प्लुतास् स्वरा अपि वर्णसमाम्नाये सामान्यतया न गणिताः; सर्वेष्वेव प्रातिशाक्ख्येषु आनुनासिक्क्येन उदात्तादिस्वरैश् च भिन्नास् स्वरा वर्णसमाम्नाये नैव गणितास् तथाऽपि आद्द्यानाञ् चतुर्णान् दैर्घ्यादिभिरष्टादशप्रभेदकत्त्वं सर्वसम्मतम्[1], लृवर्णस्य दीर्घा न सन्ति सामान्यतया सर्वेषाम् मते[2] विशेषतो माद्ध्यन्दिनीयानाञ् च[3]; यदृच्छाशक्तिजानुकरणादौ यदा लृवर्णा दीर्घा अपि स्स्युस् तदा तेषामपि अष्टादशप्रभेदकत्त्वम् भवति[4]; सन्ध्यक्क्षराणां सामान्यतया ह्रस्स्वा न सन्ति इति तेषान् द्वादशप्रभेदकत्त्वम्[5], छन्दोगानाम् मद्ध्ये सात्त्यमुग्गिरराणायनीयाश् छन्दोगा एकारमोकारञ् चाऽर्धम् (ह्रस्स्वम्) अपि पठन्ति स्स्मेति तेषाम् मते एकारस्स्य ओकारस्स्य च अष्टादशप्रभेदकत्त्वं सम्भवति स्स्म[6]। एवञ् च सम्भवन्तस् सर्वसम्मतास् संस्कृतभाषास्स्वरा द्द्वात्त्रिंशं शतम्; क्वाचित्कानामपि योजने तु पञ्चाशं शतं संस्कृतभाषास्स्वराः, उदात्ततरादिस्स्वरैर्[7] भिन्नानामपि

---

१. आ. शि. सू. वृत्तिकारप्रकरणे सू. १–३। २. तत्तरैव सू. ४–५। ३. शु. य. प्रा. ८।३९, या. शि. २।२३ (पृ. ९१)। ४. आ. शि. सू. वृत्तिकारप्रकरणे, सू. ६। ५. तत्तरैव, सू. ९–१०। ६. तत्तरैव। ७. पा. व्या. भा. १।२।३३।

स्स्वराणाङ्ग गणनायाङ्ग कृतायान् तु तेऽधिकतरा अपि स्स्युः। कादयो मान्ताऽ पञ्चविंशतिस् स्पर्शास् सर्वसम्मताः। अनुनासिका यँलँवाँ यद्द्यपि कुत्रापि वर्णसमाम्नाये न गणितास् तथापि तेऽपि सर्वेषां सम्मता एवेति य यँ र ल लँ व वँ इति सप्ताऽपि अन्तस्स्थास् सर्वसम्मताः। श ष स हा विसर्गश् च सर्वसम्मताः। जिह्वामूलीय उपद्ध्मानीयश् च माद्ध्यन्दिनीयानामसम्मतावप्यन्न्येषाम् प्रायस् सम्मतौ। अनुस्स्वारो लौकिकसँस्कृतभाषायामेकविध एव स्स्वीकृतः, वेदेषु तु ह्रस्स्वदीर्घप्लुतभेदैस् त्रिविधोऽपि स्स्वीकृतः[1], माद्ध्यन्दिनीयानान् तु ६ ७ इति चान्न्यौ केन चिद् धर्मणा विलक्षणौ दीर्घह्रस्स्वौ गुरुलघू वाऽपि अनुस्स्वारौ सम्मतौ[2], तैत्तिरीयाणामपि अनुनासिकार्धगकारविधोऽनुस्स्वारस् सम्मतः[3]। रङ्गवर्णा लौकिकसँस्कृतभाषायामनुपलब्ध्यमाना अपि वेदेषु श्श्रूयन्ते[4]। स्वरभक्ती द्वे वेदे एव प्रायऽ प्रसिद्धे[5], भागवतादौ तु पूर्णस्स्वरताङ्ग गते[6]। ड़ढ़ौ दुस्स्पृष्टौ द्विस्स्पृष्टौ वा ऋग्वेदेऽन्न्यत्तर च प्रसिद्धौ, आचार्यवेदमित्तरसम्मतत्वेन ऋग्वेदप्रातिशाख्ये प्रतिपादितौ[7]। अभिनिहितेषु क ख ग घ ङ च छ ज झ ञ ट ठ ड ढ ण त थ द ध न प फ ब भ म य यँ ल लँ व वँ इत्त्येतेषु वर्णेषु मद्ध्ये वर्गप्प्रथमतृतीया दश अभिनिहिता वर्णास् सर्वसम्मताः[8] अन्न्ये शाकल्यादिमते स्वीकृताः[9]। ध्रुवमपि ऋग्वेदप्रातिशाख्ये उक्तम्[10] अथर्ववेदीये वर्णपटले च सङ्केतितमिव दृश्यते[11]। कँ खँ गँ घँ इति लिपिभिस् सङ्केतिता अपि कँ खँ गँ घँ इत्त्येतेब्भ्योऽक्षरेब्भ्यो विलक्षणा अनुनासिकाभिनिहितककारादिरूपा यमाख्या वर्णाः। ते च वैदिके सँस्कृते एव स्वीकृता

---

१. मा. शि., श्लो. ९१। २. शु. य. प्रा. ४।१५०. प्र. सू. ३।१–२। ३. तै. प्रा. वै. २।३० (पृ. ८३); पारिशि. सू. १६१; व्या. शि. सू. २३९, आत्त्रेयशि. श्लो. ११। ४. शै. शि. श्लो. १०४–१०८, या. शि. १८९–१९४, व्या. शि. सू. ६, ना. शि. २।४। ५–९, मा. शि. ११०–१५। ५. शै. शि. श्लो. ५२–५५, या. शि. ९८–१०४, ना. शि. २।६।२–९, ऋ. प्रा. १।३२, ६। ३६, ४६–५३, शु. य. प्रा. ४।१७, तै. प्रा. २१।१५, शौ. च. १।१०२। ६. भाग. १०।९०।१०; १२।९।१४। ७. ऋ. प्रा. १।५१–५०, शु. य. प्रा. ४।१४६, ८।३९, तै. प्रा. १३।१६। ८. ऋ. प्रा. ६।१७–१९। ९. तत्त्रैव ६।२०–२३। १०. तत्त्रैव ६।३९। ११. अ. प. ४७।१।४–६।

इत्येके । महाभारतखिलभागरूपहरिवंशवचनात् तु पुराणादावपि ते स्वीकृता दृश्यन्ते[1] । ते च यमाश् चत्वार एवेति केचित्; विंशतिरित्यपरे । एतेषाँ विशिष्टवँ विवेचनमेतेषां स्वरूपस्य निरूपणे करिष्यते । हूँ इति लिप्या सङ्केतितोऽपि हूँ इत्यस्मादक्षराद् विलक्षणो नासिकास्थाने एवोच्चार्योऽनुनासिकहकाररूपो वर्णः कृष्णयजुर्वेदे[2] सामवेदे[3] अथर्ववेदे[4] च प्रसिद्धः । किट्किडाकाराख्य एकोऽन्योऽपि वर्ण ऋक्तन्त्रादौ उक्तः[5] । सोऽत्रोपेक्षितोऽनिर्ज्ञातत्वात् । तस्य यथाग्रन्थवँ विवरणम् पश्चात् करिष्यतेऽत्रैव प्रकरणे । अत्राऽस्मत्प्रतिपादिते वर्णसमाम्नाये पूर्वाचार्याणावँ वर्णसमाम्नायेषु अनुपात्ता वर्णा अपि तेषामेव ग्रन्थेभ्यस् सङ्गृह्याऽस्माभिर् योजिता बोद्धव्याः ।

एतद्वर्णसमाम्नायस्थवर्णक्रमोपपत्तिस् तु वर्णस्स्थानकरणप्रयत्नादिज्ज्ञानानन्तरमेव सम्यग् बोद्धुं शक्याऽपि अत्रैव प्रतिपाद्यते प्रसङ्गप्राप्तत्वात् भवन्ति हि शास्त्रेषु उत्तरभागस्थविषयबोधसापेक्षा अपि विषयाः प्रसङ्गवशात् पूर्वभागेषु प्रतिपादिताः । तत्र वर्णेषु स्वराणां स्वतन्त्रतयाऽपि सूच्चार्यत्वाद् अक्षरात्मकत्वाच् च प्रधानत्वाद् व्यञ्जनेभ्यः पूर्वन् तेषामुपदेशः । तत्रापि आभ्यन्तरतमकण्ठस्स्थानकरणकत्वात् प्रथममकारः, ततस् तत्प्रसङ्गात् तस्य दीर्घप्लुतरूपे । ततः कण्ठबाह्यतालुस्स्थानकजिह्वोपाग्रकरणक इकारः, ततस् तत्प्रसङ्गात् तस्य दीर्घप्लुतरूपे । ततस् तालुबाह्योष्ठस्स्थानकरणक उकारः, ततस् तत्प्रसङ्गात् तस्य दीर्घप्लुतरूपे । ततो मिश्रस्स्वराः । तत्र च प्रथमम् आदावन्ते च अकाररूपस्स्वरभागाभ्यायँ युक्तत्वाद् ऋकारः, ततस् तत्प्रसङ्गात् तस्यैव दीर्घप्लुतरूपे । ऋकारस्य संश्लिष्टवर्णताया उपेक्षणे तु तस्याऽकारभागप्रधानत्वाज् जिह्वामूलस्स्थानकरणकत्वाच् च इकारात् पूर्वन् तस्योपदेश आवश्यकः । एवमेव च ऋग्वेदप्रातिशाख्ये ऋकारस्य इकारात् पूर्वं स्थानन् दृश्यते[6] । ऋकारस्य मूर्धस्स्थानकेन बर्स्वस्स्थानकेन वा रेफेण युक्तत्वाद् लृकारस्य च दन्तमूलस्स्थानकेन

---

१. भविष्यपर्वणि १३२।१२ (गीताप्रेससंस्करणे) । २. तै. प्रा. २१।१४ (ऋ. प्रा. १।४८ ?) ३. ऋ. त. १।४८ । ४. शौ. च. १।१०० । ५. ऋ. त. २।१।१०; लो. शि. २।१, ७।५ । ६. ऋ. प्रा. १।६५, ऋ. प्रा. व. २।१ ।

लकारेण युक्तत्वाच् च तत्स्थानक्रमानुसारं स्वरभागमात्तरदृष्ट्या ऋकारेण तुल्यस्यापि लृकारस्य ऋकारात् परत्तरोपदेशः, ततस् तत्-प्रसङ्गात् तस्य दीर्घप्लुतरूपे। ततो घटकवर्णभागस्स्थानक्रमानुसारम् अकारभागेण इकारभागेण च घटितौ अे अै इति स्स्वरौ, तत्तर च अेकारापेक्षया अैकारे तालव्यभागस्याऽधिक्याद् अेकारात् परत्तर अैकारस्योपदेशः। ततोऽकारभागेण उकारभागेण च घटितौ ओ औ इति स्स्वरौ,तत्तर च ओकारापेक्षया औकारे ओष्ठ्यभागस्याऽधिक्याद् ओकारात् परत्तर औकार उपदिष्टः। एकारस्य ओकारस्य चैकस्स्थानकत्वे स्वीकृते तु ए ओ अै औ इति क्रम आवश्यको भवति; दृश्यते चाऽयङ्क्रमः ऋग्वेदप्रातिशाख्ये[1]। ततश् च व्यञ्जनेषु कण्ठस्स्थानकरणकानाम् जिह्वामूलस्स्थानकरणकानावँ् वा कवर्गीयवर्णानाम् प्रथममुपदेशः, ततश् च स्स्थानदृष्ट्या टवर्गीयवर्णेब्भ्यः पश्चाद् उपदेश्यानामपि चवर्गीयवर्णानाङ्क करणदृष्ट्या टवर्गीयवर्णेब्भ्यः पूर्वमुपदेशः, चवर्गीयवर्णानाम् जिह्वोपाग्ररकरणकत्वेन टवर्गीयवर्णानाम् च जिह्वाग्ररकरणकत्वेन टवर्गीयवर्णकरणाच् चवर्गीयवर्णकरणस्य आब्भ्यन्तरतरत्वात्। एवम् चाऽत्तर करणमेव वर्णक्रमनिर्धारणे हेतुरित्त्यवगम्यते। अत एव च स्स्थानकरणपौर्वापर्यविसर्वँ्वादे करणपौर्वापर्यमेव वर्णक्रमनिर्धारणे हेतुरिति चाऽवसीयते। ततश् च दन्तमूलस्स्थानका दन्तस्स्थानका वा तवर्गीयवर्णाः। ततश् च ओष्ठस्स्थानकरणकः पवर्गः। तत्तद्वर्गीयेषु वर्णेष्वपि घोषवद्-वर्णेब्भ्योऽघोषाणावँ् वर्णानामल्पतरधर्मवत्त्वेन लघुतयाऽघोषाणाम् प्रथममुपदेशस् ततो घोषवताम्; तत्तराऽपि अल्पप्राणानाम् प्रथमन् ततो महाप्राणानाम्, ततश् चाऽऽनुनासिक्यगुणाधिक्येन भूयस्तरधर्मवताङ्क ङकारदीनावँ् वर्गेषु पञ्चमानामुपदेशः। स्पर्शापेक्षयाऽन्तस्स्थासु व्यञ्जनधर्मस्य वर्णजनकवायुप्रतिघातस्य स्थानकरणस्स्पर्शस्य च आल्प्यात् स्पर्शाननन्तरमन्तस्स्थानामुपदेशः। तासाम् च स्स्थानक्रमानुसारङ्क क्रमः। ततश् च अन्तस्स्थापेक्षयाऽपि ऊष्मसु व्यञ्जनधर्मस्य वर्णजनकवायुप्रतिघातस्य स्थानकरणसामीप्यस्य च आल्प्यादन्तस्स्थाननन्तरमूष्मणामुपदेशः। तत्तर च शषयोस् स्थानक्रमेणाऽन्न्यथोपदेश्ययोरपि करणक्रमेण क्रमश् चवर्गीय-टवर्गीयवर्णानामिव, षसयोस् तु करणसाम्यात् स्थानक्रमेणैव क्रमः। व्यञ्जन-

---

१. ऋ. प्रा. १३।३८, ऋ. प्रा. व. २।१।

क्रमे च स्पर्शानुतस्थोष्मसु स्पृष्टतत्वेषत्स्पृष्टतत्वविवृततत्वानामपि निमित्ततत्वेनोपात्ततत्वाद् हकारस्स्योष्मसु विवृततमत्वाद् ऊष्मसु अनुन्येब्भ्यः पश्चाद् हकारस्स्योपदेशः। ऊष्मणां सर्वेषां समानतयैव विवृतत्वे स्वीकृते तु स्स्थानकरणक्रमाद् ऊष्मसु हकारस्स्य प्रथममुपदेश आवश्यकः। एतेनैवाऽभिप्रायेण ऋग्वेदप्रातिशाख्ये 'हशषसाः' इति क्रमस् स्वीकृतोऽस्ति[1]। एवं स्वपूर्ववर्तिनस् स्वपरवर्तिनश् चाऽपि स्वरस्स्याङ्गताङ्ग गन्तुं शक्तेषु योगवाहेषु मुख्येषु व्यञ्जनेषु समाप्तेषु स्वपूर्वर्तिन एव स्वरस्स्याङ्गताङ्ग गन्तुं शक्ता अयोगवाहा उपदिश्यन्ते। तत्तर च प्रथमङ्ग कण्ठस्स्थानकरणको विसर्गः, तत्परसङ्गेन च तदुत्तरञ् जिह्वामूलीयोपध्मानीयौ। ततो नासिकास्स्थानको जिह्वामूलकरणकोऽनुस्स्वारस् तत्परसङ्गेन च रङ्ग उपदिष्टः। अयञ् चाऽयोगवाहक्रम ऋग्वेदप्रातिशाख्याऽनुकूलः[2]। तैत्तिरीयप्रातिशाख्ये तु ऊष्मणायँ योगवाहत्वाऽयोगवाहत्वयोरुपेक्षणेन स्स्थानकरणविवृतत्वदृष्ट्यैव 'क श ष स प ह' इति क्रम आश्रितो दृश्यते[3]। पाणिन्यादीनाङ्ग केषाञ् चिन्मतेऽनुस्स्वारविसर्गयोरक्षु अपि ग्रहणाल् लौकिके वर्णसमाम्नाये कादिव्भ्यः पूर्वन् तयोरुपदेशः। एवं समाप्तेषु मुख्येषु वर्णेषु उपदिष्टानामेव वर्णानामवान्तरभेदरूपा वर्णास् सन्निवेशिताः। तत्तर च पूर्णवर्णरूपौ अत एव प्रथममुपदेष्टव्यौ अपि ढ़ौ उपेक्ष्य अयोगवाहसधर्माणस् स्वपूर्ववर्तिस्स्वराङ्गताप्राप्तिशीला उपदिष्टवर्णभागरूपा वर्णाः। तत्तर च कादिभागरूपा अभिनिहिताः प्रथमम्; ततस् तत्परसक्तो ध्रुवः, ततश् च सानुनासिककादिभागनिभा यमाः, ततश् चाऽनुनासिकीभूतहकारभागरूपो नासिक्यः; तत उपदिष्टवर्णभागरूपवर्णपरसङ्गेन स्वभक्ती। स्वरभक्त्योरपि अयोगवाहसधर्मत्वेऽपि अयोगवाहव्यञ्जनपरसङ्गाद् अयोगवाहसधर्मकव्यञ्जनानामेव प्रथममुपदेशस् ततस् स्वरभक्त्योः। ततश् च उपदिष्टवर्णावान्तरभेदरूपौ पूर्णवर्णौ ड़ढ़ौ[4] इति वर्णक्रमोपपत्तिः।

---

१. ऋ. प्रा. १३।१०, ऋ. प्रा व. २।११। २. ऋ. प्रा. १।११, ऋ. प्रा. व. २।१२; लौकिकवर्णमालायान् तु अनुस्स्वारविसर्गयोर् अकारे सयँयोज्य तदुत्तराङ्गतत्वेनोपदेष्टव्यत्वादनुस्स्वारस्स्य केषाञ् चिन् मते स्वरत्वाच् च स्वराणामन्ते क्रमेणोपदेशः। ३. १।९; आपि. शि. श्लो. ९। ४. आपिशलिशिक्षायान् तु यमेब्भ्यः पूर्वण् ड़ उक्तः श्लो. ९।

यद्द्यपि डढयोरिव यँलँवाँनामप्यन्ते एव निवेशस् तुल्यन्न्यायेनोचितस् तथापि यँलँवाँनालँ लोकवेदसर्वशाखासाधारणत्वात् यलवतुल्यत्वात् तैस् सहैवोल्लेख उचित इति तथैवाऽकारि। नादाक्ख्यानान् दीर्घीभूतानावँ वर्गपञ्चमानावँ वर्णानामपि वर्णसमाम्नाये उल्लेक्ख्यत्वे डढयोरिवाऽन्ते एवोल्लेखः कार्यः।

यद्द्यप्याधुनिकाश् शिक्षाशास्त्रविचारकाः खलु बालाः प्राग् ओष्ठ्यानि व्यञ्जनानि उच्चारयन्तीति, लोके निरीक्षणे स्थानेषु प्राग् ओष्ठावेव दृश्येते अन्यानि स्थानानि तु प्रयत्नेन पश्चादेव धेक्क्यन्ते इति प्रथममोष्ठ्यानावँ वर्णानामुपदेशस् ततो दन्त्यानान् ततस् तालव्यानामित्येव रूपेणोपदेश उचित इति मन्न्यन्ते; प्रौढैस् स्वानुभावानुसारिभिर् ऋषिभिर् आत्मनि निरीक्ष्याऽयवँ वर्णराशिरुपदिष्ट इति अत्र आब्भ्यन्तरतमात् स्थानात् प्रारम्भः कृतो वेदितव्यः। यन्त्रसाहाय्यस्य साधारणानाञ् जनानाङ् कृते दुर्लभत्वाल् लोके प्रचारायापि अयमेव आत्मसाक्षिकः क्रम उपयुक्ततरश् चेति बोद्ध्यम् ॥६२–६६॥

४. अथ वर्णविशेषविवेचनाधिकारः

सन्देहोच्छित्तये वाऽपि प्रसिद्ध्यै वाऽत्र केचन।
वर्णास् स्फुटवँ विविच्यन्ते स्वरूपादिनिरूपणैः ॥६७॥

(क) दीर्घाऽवर्णविवेकः

यथा दैर्घ्यादिकारादिष्वाकृतिर् नाऽन्न्यथा भवेत्।
तथाऽवर्णस्याऽपि दैर्घ्येऽप्याकृतिर् नैव भिद्द्यते ॥६८॥

यथा इ ई इत्यत्र दीर्घे इवर्णेऽपि ह्रस्स्वो य इवर्णस् स एव द्द्विगुणित इव श्रूयते एकवर्णीभूतस् तथैव अ आ इत्यत्राऽपि दीर्घे अवर्णे ह्रस्स्वो योऽवर्णस् स एव द्द्विगुणित इव भूत्वा एकवर्णीभूतो भवति, न तु ह्रस्स्वदीर्घावर्णयोराकृतौ भेदः। अतस् सँस्कृते दीर्घोऽवर्णस् तथैवोच्चार्यः। न त्वयन् दीर्घोऽवर्ण आधुनिकीनान् देशभाषाणायँ य आकारः 'आयो', 'आया' इत्यादौ श्रूयमाणस् स इवोच्चार्य इत्यर्थः। 'अ' इत्यस्स्य 'आयो' 'आया' इत्यादेर् 'आ' इत्यस्स्य च आकृतौ भेदस् स्फुटतया श्रोत्त्रेणोपलब्भ्यः। सँस्कृतस्स्य दीर्घावर्णस्स्य, 'आयो' 'आया' इत्यादेर् 'आ' इत्यस्स्य च लिप्योरभेदाद् अपब्भ्रंशवासनया च पण्डिता अपि तयोरैक्क्यम् मन्न्यन्ते। अतोऽत्र अधिकतरो विचार आवश्यकः।

ननु ह्रस्स्वेऽवर्णे य अकारस् स एव दीर्घेऽवर्णे द्विगुणितो

भूत्वा एकवर्णीभूतो भवति इत्यत्र किम् प्रमाणम्? आकृत्या ऽभिन्नानावँ वर्णसमाम्नायेऽनुपदेशकस्य आकृत्या भिन्नानामेवोपदेशकस्य आचार्यस्य पाणिनेर् दीर्घस्याऽवर्णस्य वर्णसमाम्नाये पृथगनुपदेश एव अत्र प्रथमम् प्रमाणमिति बोद्धव्यम्। पाणिनीयव्याकरणवार्तिककारस्य कात्यायनमुनेर् 'वर्णैकदेशा वर्णग्रहणेन (गृह्यन्ते) चेत्'' दीर्घे ह्रस्वविधिप्रतिषेधः, एकवर्णवच् च, नाऽव्यवकृतस्याऽवयवे तद्विधिर् यथा द्रव्येषु'' इति वार्तिकानि[1] अत्र द्वितीयम् प्रमाणम्। अत्र हि दीर्घे प्रश्लिष्टयोर् द्वयोर् ह्रस्वयोस् स्थितिमपि स्वीकृत्याऽऽशङ्कातत्समाधाने कृते स्तः। पाणिनीयव्याकरणभाष्यकारस्य पतञ्जलिमुनेः खट्वाभिर् मालाभिर् याता वाता इत्यादौ दीर्घेऽवर्णे वर्तमानम् प्रश्लिष्टमकारमाश्रित्य ऐस्विद्ध्यादेः प्रसङ्गस्य प्रदर्शनम्, तत्समाधानप्रकारः, 'न आकारस्थस्य अकारस्य लोपो भवति' इति वचनम्, 'वाचा तरति' इत्यर्थे वाच्-प्रातिपदिकस्य दीर्घेऽवर्णे प्रश्लिष्टौ द्वावकारौ आश्रित्य द्व्यञ्जलक्षणस्य ठन आशङ्कनम्, तत्समाधानप्रकारः, व्यपवर्गाभावाद् दीर्घे वर्तमानम् प्रश्लिष्टं ह्रस्वँ वर्णमादाय कार्यन् न भवतीति निष्कर्षायोपयोगि व्याख्यानञ्[2] चाऽत्र तृतीयम् प्रमाणम्। ''ननु चाऽनन्याऽऽकृतिरकारस्य आकारस्य च'' इति शङ्काया वार्तिककारकृतम् ''अननन्यत्वाच् च, अनेकान्तो ह्यनन्यत्वकरः'' इति समाधानम्, तस्य ''अननन्या आकृतिरकारस्य आकारस्य च, यो ह्यनेकान्तेन भेदो नासावनन्यत्वङ करोति, तद् यथा न यो गोश् च गोश् च भेदस् सोऽनन्यत्वङ करोति; यस् तु खलु गोश् चाऽश्वस्य च भेदस् सोऽनन्यत्वङ करोति''[3] इति भाष्यकारकृतवँ व्याख्यानञ् चाऽत्र चतुर्थम् प्रमाणम्।

ननु ह्रस्वदीर्घयोरिवर्णयोर् उभयोरपि समानाभ्यन्तरप्रयत्नकत्वात् तयोश् श्रवणे तुल्यता समुचिता, ह्रस्वदीर्घयोरवर्णयोस् तु भिन्नाभ्यन्तरप्रयत्नकत्वाच् छ्रुतौ वैलक्षण्यं समुचितमिति चेदत्रोच्यते— पाणिनीये वर्णसमाम्नाये अकारस्य विवृतस्योपदेशः कृतोऽस्तीति व्याख्यानम्, कर्तव्यमिति चोदनवँ वा वार्तिककारेण

---

१. पा.व्या.भा. 'ऐ औच्' इति प्रत्याहारसूत्रे वा. ६,७,८,९।

२. तत्रैव। ३. पा. व्या. भा. १।१।६९।

कृतमस्ति[1] । यदि सवँवृतत्व–विवृतत्वाभ्यावँ वैलक्षण्यं श्रुतावपि विजातीयतामानयेत् तदा तद् व्याख्यानञ् चोदनवँ वाऽसङ्गतं स्याद्, अकारस्य विवृतत्वेनोपदेष्टुमशक्यताया आपत्तेः; विवृतत्वे आकृतिभेदापत्त्या वर्णान्तरत्वापत्तेश् च । आचार्यपाणिनिना धात्वादिस्थस्य प्रक्रियावस्थस्य विवृतस्य अकारस्य प्रयोगावस्थे सवँवृते अकारे प्रत्यापत्तिर् 'अ अ'[2] इति सूत्रेण प्रतिपादिता इतीदमपि सवँवृतत्वविवृतत्वभेदमात्रेण श्रुतिवैलक्षण्यवँ वर्णवैजात्यवँ वा न भवतीत्यत्र प्रमाणम् । प्लुतस्य अवर्णस्य "एहि कृष्ण३ अत्र गौश् चरति"[3] इत्यादौ प्रसिद्धा अकारसदृश्येव श्रुतिरपि ह्रस्वदीर्घावर्णयोश् श्रुतौ अवैजात्ये मानम् । यदि विवृतत्वमात्रेण श्रुतौ वैजात्यं स्यात् तदा प्लुतस्याऽवर्णस्य विवृतत्वाद्[4] ह्रस्वस्याऽवर्णस्य च सवँवृतत्वात्[5] तयोरपि श्रुतौ वैजात्यं स्यात् । ननु प्राचीनपरम्परागतेषु लेखेषु 'उद्धरा३ उद्धर' 'आहरा३ आहर' 'चौरा३ चौर' 'कुशीला३ कुशील' 'अगमा३ः पूर्वान् ग्रामान्' 'अग्निभूता३इ' 'पटा३उ' 'होतव्यन् दीक्षितस्य गृहा३इ'[6] इत्यादौ प्लुतस्याऽवर्णस्य अकारविजातीयम् 'आयो' 'आया' इत्यादेर् 'आ' इत्येतेन सदृशमेवोच्चारणं सूचितमिति चेत्, न, एतेषालँ लेखानान् तादृशोच्चारणसूचकत्वस्याऽभावात् । यथा इकारोकार्योऽप्लुतयोर् लेखनीययोस् सतोरपि ई३ ऊ३ इत्येव लिख्यते स्म[7]; न च तत्र इकारविजातीयम् 'ई' इत्येतादृशमुच्चारणञ् कर्तव्यमित्यभिप्रायस् तथैवाऽत्राऽपि न हि अकारविजातीयऽप्लुतोऽवर्ण उच्चारणीय इत्यभिप्रायः । प्लुते स्वरे लेखनीये दीर्घवँ वर्णलँ लिखित्वा तदग्रे '३' इत्यङ्कस् तस्य त्रिमात्रकतायास् सूचको लेख्य इत्येतावती प्रथा एव केवलम्, न तत्र कोऽप्यभिप्रायविशेषः, अतो ह्रस्वँ वर्णलँ लिखित्वा तदग्रे '३' इत्यस्य तत्त्रिमात्रकतायास् सूचकस्याऽङ्कस्य लेखनेऽपि नास्ति क्षतिः ।

---

१. पा. व्या. भा., अ इ उण् इति सूत्रे । २. अष्टा. ८।४।६८। ३. वै. सि. कौ., अच्सन्धिप्रकरणे, पृ. २६, बम्बइ, १९०९ । ४. पा.व्या.भा. अ इ उण् इति प्रत्याहारसूत्रे वा.३ । ५. तत्रैव । ६. पा. व्या. भा. ८।२।९२,९५; काशिकायाम् ८।२।९२,९४,९५,९७; वै. सि. कौ. वै. प्र., सङ्केतितेषु सूत्रेषु । ७. पा. व्या. भा. ८।२।८२, ८३; शु. य. प्रा. ८।३ ।

अत एव केचन आधुनिकास् तथैव लिखन्ति[1]। युक्ततरश् चाऽयमेव लेखनप्प्रकारो ह्रस्स्वस्स्यैव त्रिगुणितत्त्वे त्रिमात्त्रकतायास् सम्पत्तेर् दीर्घस्स्य त्रिगुणितत्त्वे तु षण्मात्त्रकताया प्राप्तेः। ननु 'अग्निभूता३इ' 'पटा३उ' इत्त्यादौ अकारविलक्क्षणम् आधुनिकीनान् देशश्यभाषाणाम् 'आयो' 'आया' इत्त्यादौ श्रूयमाणेन 'आ' इत्त्यनेन सदृशमेव हि प्लुतमुच्चारयन्ति वैयाकरणाः षण्डिताः, अतः प्लुतोऽवर्णो ह्रस्स्वाकारविजातीय एवेति चेत्, न, देशश्यभाषावासितमतीनायँ यथालिखितपाठकानान् तेषामुच्चारणस्स्याऽप्प्रामाणिकत्त्वात् तस्स्योच्चारणस्स्य प्लुतस्स्यावर्णस्स्य ह्रस्स्वाकारवैजात्त्ये प्रामाण्यस्स्याऽभावात्। ननु पाणिनीये व्याकरणेऽभियुक्तेन नागोजिनाऽपि 'एचोऽप्प्रगृह्य्यस्स्याऽदूराद्धूते पूर्वस्स्यार्धस्स्यादुत्तरस्स्येदुतौ'[2] इति सूत्त्रे 'पूर्वस्स्यार्धस्स्याद्' इत्त्यत्त्र 'पूर्वस्स्यार्धस्स्य आत्' इति च्छेदो लघुशब्देन्दुशेखरे प्रदर्शित इति चेत्, सोऽप्प्यनन्न्याय्यत्वादनादरणीय एवेति ब्रूमः। ह्रस्स्वस्स्याऽवर्णस्स्य दीर्घस्स्यावर्णस्स्य च प्लुते रूपे भिन्ने अकारस्स्याष्टादशविधत्त्वन् त्यक्तं स्यात्, अभिन्ने तु 'पूर्वस्स्यार्धस्स्य अत्' इत्त्यनेनैव च्छेदेनाऽभीष्टे सिद्धे 'पूर्वस्स्यार्धस्स्य आत्' इति च्छेदोऽनावश्श्यको गौरवदोषयुक्तश् च स्वीकृतस्स्यात्। पूर्वार्धस्स्य दीर्घमात्त्रत्त्वमुत्तरार्धेन योगात् त्रिमात्त्रत्त्वमिति प्लुतत्त्वमिति कल्पना च सर्वव्याक्ख्यानविरोधान् न प्प्रसरति, भाष्ष्येऽपि चतुर्मात्त्रस्स्यापि प्लुतस्स्य स्वीकृतत्त्वाच् च[3], पूर्वार्ध एव प्लुतचिह्नस्स्याऽङ्कस्स्य लेखनस्स्य सार्वत्त्रिकत्त्वाच् च[4]। अतो न प्लुतस्स्याऽप्प्यवर्णस्स्य अकारविजातीयश्श्रुतिमत्त्वम्। अतो ह्रस्स्वावर्णदीर्घावर्णयोः प्राचीनेऽनपब्भ्रंशीकृते सँस्कृते सजातीयश्श्रुतिमत्त्वमेवेति सिद्धम्। भष्ष्ये उत्थापिता "ननु चाऽन्न्याऽऽकृतिरकारस्स्याऽऽकारस्स्य च"[5] इति शङ्काऽपि असति कियत्त्यप्प्याधारे तु नैवोत्थिता स्स्यादिति भाष्ष्यकारकाले तत्पूर्वकाले एव वाऽपि प्राचीनस्स्य दीर्घावर्णस्स्य अतिविवृतीकरणाद् दोषाच्[6] श्रुतौ कियानपि विकारो जातोऽभूदिति

---

१. वै. सि. कौ., मोतिलाल, १९५१; वै. प्र. ८।२।९५,९८,९९, १००; प्र. सि. कौ. पूर्वार्धे, पृ. २३। २. अष्टा. ८।२।१०७। ३. पा. व्या. भा. ८।२।१२६। ४. पा. व्या. भा., काशिकायाम्, वै. सि. कौ.; मा. वा. शु. य. म. स. ८।१०। ५. १।१।६९। ६. तुलना कार्या– तै. प्रा. २।१२।

सम्भाव्यते । "अनन्या आकृतिरकारस्य आकारस्य च"[1] इति भाष्यकारोक्तिश् च प्राचीनतरम् अकारस्य आकारस्य च सर्वथा तुल्याकृतिकत्वमुपजीव्य प्रवर्ते इत्यपि सम्भावयितुं शक्यते । तथापि संस्कृते प्राचीनतमस्य दीर्घावर्णस्य ह्रस्वावर्णाविजातीयत्वन् तु सर्वथैव सिद्धम् भवति । ततश् चाऽनादितयाऽनपब्भ्रष्टतया च प्रमाणीकरणीये संस्कृते दीर्घावर्णस्य ह्रस्वावर्णाविजातीयत्वेन स्वीकरणम् अतीवाऽऽवश्यकम् भवति ॥६८॥

(ख) ऋकारलृकारविवेकः

ऋकारो रेफगर्भत्वादकाराद् भिन्नताङ्गतः ।
लगर्भत्वाद् लृकारोऽपि द्वौद्वौ वा गर्भितौ क्वचित् ॥६९॥

ऋकारे अकारसदृशयोस् स्वरभागयोर् मद्ध्ये एकवर्णीभावाविघातेन रेफस् स्थितो भवति । अतश् शुद्धादकाराद् रेफगर्भकाऽकारात्मक ऋकारो लकारगर्भकाऽकारात्मक लृकारश् च भिन्नः । द्वयोर् ऋकारयोस् स्थाने जाते वैकल्पिके ऋकारे तु स्वरभागयोर् मद्ध्ये एकवर्णीभावाविघातेन द्वौ रेफौ स्थितौ भवतः ; तथैव द्वयोर् लृकारयोस् स्थाने जाते वैकल्पिके लृकारे तु स्वरभागयोर् मद्ध्ये एकवर्णीभावाविघातेन द्वौ लकारौ स्थितौ भवत इति पाणिनीयव्याकरणवार्तिककारस् सूचयति[2] । स्पष्टञ् चेदङ्ग काशिका–पदमञ्जरी–भाष्यप्रदीपादिषु[3] ।

ऋकारस्य लृकारस्य च पृथग्वर्णत्वं सर्वेषु वर्णसमाम्नायेषु[4] तयोस् स्वतन्त्रवर्णत्वेनोपदेशादेव स्फुटम् । ऋकारे रेफ लृकारे लकारश् च स्वरभागयोर् मद्ध्येऽस्तीत्यत्र च ऋग्वेदप्रातिशाख्यस्य "रेफोऽस्त्यृकारे च परस्य चाऽर्धे पूर्वे ह्रसीयाँस् तु नवेतरस्मात् । मद्ध्ये स तस्यैव लकारभावे धातौ स्वरꣳ कल्पयता लृकारः"[5] इति वचनम् प्रमाणम् । शुक्लयजुर्वेदप्रातिशाख्यस्य "ऋलृवर्णे रेफलकारौ संश्लिष्टावशश्रुतिधरावेकवर्णौ"[6] इति वचनमपि तत्र प्रमाणम् । शौनकीयचतुरद्ध्यायिकाया अथर्ववेदप्रातिशाख्यरूपायास् "संस्पृष्टरेफमृवर्णम्, सलकारम्लृवर्णम्"[7] इति वर्णनमप्यस्यैवाऽर्थस्य प्रतिपादकम् । ऋकारलोपे स्वरभागस्य

---

१. पा. व्या. भा. १।१।६९ । २. तत्रैव ६।१।१०१ । ३. सम्बद्धवार्तिकव्याख्याने । ४. ऋ. प्रा. व. २।१, ऋ. प्रा. १।४१, शु. य. प्रा. १।६५, ८।२, ऋ. त. १।२ इ. । ५. ऋ. प्रा. १३।३४, ३५ । ६. ४।१४८ । ७. १।३७, ३९ ।

तन्मद्ध्यस्स्थस्स्य रेफस्स्य च लोपो भवति इति स्वीकृत्य ऋकारलोपन् द्विवर्णलोपोदाहरणत्वेन प्रतिपादयतो भगवतो यास्कस्स्य "अथापि द्द्विवर्णलोपस् तृचः"[1] इति वचनमप्यत्तरैवाऽनुकूलम्। आचार्यपाणिनेः 'कृपो रो लः'[2] इति सूत्तरमप्यत्तर प्रमाणम्। तद्व्याक्ख्यानन् च काशिकाक्ख्यवँ वामनकृतयँ यथा–"कृपेर् धातो रेफस्स्य लकारादेशो भवति। र इति श्रुतिसामान्यमुपादीयते। तेन य× केवलो रेफो यश् च ऋकारस्स्थस् तयोर् द्वयोरपि ग्रहणम्। ल इत्यपि सामान्यमेवोपादीयते। ततोऽयङ केवलस्स्य रेफस्स्य स्स्थाने लकारादेशो विधीयते ऋकारस्स्याऽप्येकदेशविकारद्द्वारेण लृकारः, तथा च 'लुटि च क्लृपः'[3] इत्येवमादयो निर्देशा उपपद्द्यन्ते। कल्प्ता कल्प्तारौ कल्प्तारः; क्लृप्तः क्लृप्तवान्"[4] इति। एतच् च व्याक्ख्यानम् "अथवोभयतस् स्फोटमात्तरन् निर्दिश्यते रश्श्रुतेर् लश्श्रुतिर् भवतीति"[5] इति वदता भाष्यकारेणाऽपि स्वीकृतां सरणिमेवानुसरतीति बोद्ध्यम्। न च स्स्वराणावँ विवृतत्वस्स्य पाणिनिना[6] उक्तत्वात्, स्वरभागयोर् मद्ध्ये ऋकारे रेफस्स्य लृकारे लकारस्स्य च सत्त्वे तयोर् विवृतत्वस्स्य (अस्स्पृष्टत्वस्स्य) असम्भवान् नेदयँ युक्तमिति वाच्यम्, सत्सु वचनेषु सम्भावनामात्तरात्मिकाया अस्स्या उक्तेरप्परसरात्। यद्द्यपि याज्ञवल्क्यशिक्क्षायाम् "ऋलोर् मद्ध्ये भवत्यर्धमात्तरा रेफलकारयोः। तस्मादस्स्पृष्टता न स्स्यादृलृकारनिरूपणे"[7] इत्यपि क्वचित् पठ्यते, तथापि तत्तराऽपि ऋकारे लृकारे च क्रमेण रेफस्स्य लकारस्स्य च गर्भितत्वन् तु प्रतिपादितमेव। वस्तुतस् तु इदवँ वचनन् चिन्त्यमेव, मद्ध्यस्स्थरेफश्श्रुतिघटितस्स्य ऋकारस्स्याऽस्माभिरप्यद्द्यापि अस्स्पृष्टत्वेनैवोच्चार्यमाणत्वात्। अत एवोक्तस् तर्कोऽपि नैव बलीयान्। यद्द्यपि तैत्तिरीयप्रातिशाक्ख्येऽपि– "उपसंहृततरे च (हनू) जिह्वाग्रमृकारर्कारल्कारेषु बर्स्वेषूपसंहरति"[8] इत्युक्तन् तथापि उपसंहारो नाम समीपे प्राप्तिरेव न तु स्स्पर्श एवेति तैत्तिरीयप्रातिशाक्ख्यवचनं रेफलकारगर्भकयोर् ऋकारलृकारयोर् अस्स्पृष्टप्रयत्नकताया एव प्रतिपादकम् बोद्ध्यम्। एतेन "बर्स्वेष्वादौ तु जिह्वाग्रमुप-

---

१. निरुक्ते २।१।२। २. अष्टा. ८।२।१८।
३. तत्तरैव १।३।९३। ४. काशिकायाम् ८।२।१८। ५. पा.व्या.भा. ओ ओङ औ औच् इत्यत्तर। ६. पा. शि. श्लो. २१, ३८।
७. या. शि. श्लो. २११, शि. स. पृ. ३२। ८. २।१८।

संहरति त्रिके (ऋॠऌ)। हनूपसंहृततरे स्यातामोष्ठो वकारवत्"[1] इति पारिशिक्क्षावचनमपि व्याक्ख्यातम्। ऋकारलृकारयोस् समानाक्क्षरत्त्वमपि[2] न तयो रेफलकारघटितत्त्वे बाधकम्। समानाक्क्षरत्त्वं हि असमानस्स्वराघटितत्त्वमूलकमेवेति यथास्स्थानम् प्रतिपादयिष्याम:। पाणिनीयव्याकरणवार्तिककारस्स्य "(वर्णैकदेशानावँ वर्णग्रहणेन) अग्ग्रहणञ् चेन् नुड्विधिलादेशविनामेषु ऋकारग्ग्रहणम्"[3] इति, "एकदेशे नुडादिषु चोक्तम्"[4] इति च वचनमप्यत्तर प्प्रमाणम्। पाणिनीयव्याकरणभाष्यकारेण च "योऽसौ ऋकारे रेफस् तदाश्श्रयण् णत्त्वम् भविष्यति"[5] इति वदता ऋकारे रेफस्स्याऽस्तित्त्वं स्वीकृतम्। तथा च ऋकारे आदावनृते वा यदि रेफस् स्यात् तर्हि तस्स्यैकवर्णीभावोऽसम्भवी स्यादिति मद्ध्ये एव स स्वीकर्तव्य इति उक्ताद् भाष्यकारवचनादपि ऋकारस्स्य रेफमद्ध्यकस्स्वरभागद्द्वयघटितत्त्वङ कण्ठरवोक्तकल्पम् भवति। अत एव नागोजिनाऽपि एवमेव व्याक्ख्यातम्[6]। भाष्यकारस्स्य "ऋवर्णस्स्याऽनृतरतो रेफवतो रेफवानकार एवानृतरतमो भवति"[7] इति वचनात् तु ऋकारस्स्य रेफगर्भकत्त्वमतीव स्स्फुटम् भवति। यद्द्चप्यत्तर 'ऋवर्णस्स्यानृतर्यतो रेफवत:'[8] इत्यपि पाठ उपलब्ध्यते लेखेषु तथाऽपि सोऽसङ्गत इति हेय एव। ऋकारस्स्य रेफवत्ताया उल्लेखस् तु पाणिनीयव्याकरणभाष्येऽनन्यत्तराऽपि उपलब्ध्यते[9]। उपर्य्युद्धृतनिरुक्तवचनव्याक्ख्याने आचार्य्यदुर्गेणाऽपि— "अत्तर ऋवर्णरेफयोर् लोप:, रेफ एव ऋवर्णोदरङ कृमिवदनुप्प्रविष्टो द्रष्टव्य:। स लुप्यते ऋवर्णेन साकम्"[10] इत्युक्त्वा ऋकारस्स्य रेफमद्ध्यकस्स्वरभागद्द्वयघटितत्त्वम् प्रतिपादितम्। तत्तर ऋवर्ण इति ऋवर्णस्स्वरभाग उपलक्क्षितो बोद्ध्य:, ऋवर्णम् पृथक् स्वीकृत्य तत्तर रेफस्स्य प्प्रवेशस्स्य स्वीकर्तुमशक्क्यत्त्वात्। त्रिभाष्यरत्नकारेणाऽपि "मात्त्रिकस्स्य ऋकारस्स्याऽऽदिरणुमात्त्रा स्वरभागो मद्ध्ये रेफोऽर्धमात्त्रा शेषोऽप्यणुमात्त्रा स्वरभाग:, एतद् ऋकारस्स्वरूपम्"[11] इत्यु-

---

१. सू. ३३। २. ऋ. प्रा. १।१, तै. प्रा. १।२। ३. पा. व्या. भा., ग्रे ग्रोङ ग्रै ग्रौच् इत्यत्तर। ४. पा. व्या. भा. ८।४।१। ५. तत्तरैव १।१।९। ६. तत्तरैव भाष्यप्प्रदीपव्याक्ख्याने। ७. १।१।५०, वा. १३ (हरियाणासंस्करणे)। ८. कौलहर्नादिसंस्करणे। ९. ६।१।१७ वा. ३, ६।१।४७ वा. २। १०. निरुक्तटीकायाम् २।१।२। ११. तै.प्रा.त्रिभा.र. २१।१५।

क्तम्।तैत्तिरीयप्रातिशाख्यव्याख्याकारो वररुचिरपि'ऋकारादिरणुमात्त्रा, रेफोऽर्धमात्त्रा मद्ध्ये, शेषा स्वरभक्तिरणुमात्त्रा' इत्त्याह स्स्मेति च तेनैवोक्तम्[1]। तैत्तिरीयसर्वसम्मतशिक्षायामपि— "ऋकारस्स्य स्स्वरूपं हि श्लिष्टम् पादचतुष्टयम्। पादेषु तेषु विज्ज्ञेयावादावन्ते स्वरात्मकौ। अणू रेफस्स्य मद्ध्ये तु विज्ज्ञेयौ व्यञ्जनात्मकौ"[2] इति। न केवलम् वैदिकग्रन्थेषु प्रातिशाख्यादिष्वेव ऋकारस्स्यैतद् रूपम् प्रतिपादितञ्च किन् तु तान्त्रिकग्रन्थेष्वपि। तथा हि प्रपञ्चसारतन्त्रे— "लृवर्णर्वर्णयोर् व्यक्तिर् लरोस् सम्म्यक् प्रदृश्यते"[3] इति वचनम् प्राप्यते। एतेन च ऋकारस्स्य लृकारस्स्य च क्रमेण रेफवत्त्वलँ लकारवत्त्वञ् च प्रतिपादितम्। तन्त्रसारे अभिनवगुप्तेनाऽपि— "यदा तु इच्छायाम् ईशने च कर्म अनुप्प्रविशति यत् तद् इष्यमाणम् ईश्यमानम् इति च उच्यते। तदा अस्स्य द्वौ भेदौ प्रकाशमात्त्रेण रश्श्रुतिः, विश्श्रान्त्या लश्श्रुतिः, रलयोऽ प्रकाशस्स्तम्भस्स्वभावत्त्वात्, इष्यमाणञ् च न बाह्यवत् स्फुटम्, स्फुटरूपत्त्वे तदेव निर्माणं स्यात्,न इच्छा ईशनवँ वा, अतः अस्स्फुटत्त्वादेव श्श्रुतिमात्त्रं रलयोर् न व्यञ्जनवत् स्थितिः। तदेतद् वर्णचतुष्टयम् उभयच्छायाधारित्त्वान् नपुंसकम्— ऋ ॠ ऌ ॡ इति"[4] इत्त्युक्त्वा ऋकारस्स्य रेफश्श्रुतियुक्ततत्त्वम्, लृकारस्स्य लकारश्श्रुतियुक्ततत्त्वम् ऋकारे रेफस्स्य लृकारे लकारस्स्य प्रविष्टत्त्वञ् च सूचितम्।कामधेनुतन्त्रेऽपि ऋकारस्स्य ब्रह्ममविष्णुमहेशरूपत्त्वमुक्तमिति तदपि ऋकारस्स्य स्वरभागरेफस्स्वरभागघटितत्त्वं सूचयतीति च वदन्ति।

ऋकारपरकऋकारलृकारान्न्यतरस्स्य ऋकारस्स्य च स्स्थाने आदिष्टो य ऋकारः[5], लृकारपरकऋकारलृकारान्न्यतरस्स्य लृकारस्स्य च स्स्थाने आदिष्टो य लृकारस्[6] तयोस् स्वरूपस्स्य पाणिनीयाक्षरसमाम्नायिकऋकारलृकाराब्भ्यावँ विलक्षणत्त्वम् पाणिनीयव्याकरणभाष्यकारेण "न च ऋकार लृकारो वाऽजस्ति"[7] इति सूचितम्। तयोस् स्वरूपे तु हरदत्तेन 'ऋति सवर्णे ऋ वा' 'लृति सवर्णे लृ वा' इत्त्यनयोर् वार्तिकयोर् व्याक्ख्याने "मद्ध्ये रेफभक्ती द्वे, आदितोऽज्भक्तेरर्धमात्त्रा एवमन्ततः। एवम् लृतीत्त्यत्त्राऽपि मद्ध्ये द्वे लकारभक्ती

---

१. तै. प्रा. त्रिभा. र. २१।१५। २. सू. २३,२४। ३. तृतीये पटले, श्लो. ६४। ४. पृ. १३,१४। ५. पा. व्या.भा. ६।१।१०१। ६. तत्त्रैव। ७. तत्त्रैव १।१।९, वा. ४।

अभित× पूर्ववत्। एवन् द्विमात्तरयोरप्येतयोरीषत्स्पृष्टत्वाद् विवृताब्भ्याम् ऋकारलृकाराब्भ्यामसावर्ण्यादग्रहणाद् दीर्घसञ्ज्ञाया अभावाद् वचनम्''[1] इति प्रतिपादिते। हरदत्तवचनमेवाऽनूदितं सिद्धान्तकौमुदीकारादिभिरपि[2]।

एतावता च ऋकारे लृकारे च स्वरभक्त्योर् मद्ध्ये क्रमेण रेफो लकारश् च एकवर्णीभावाविघातेन स्थितावेति प्रतिपादितम्। स्वरभक्तिरित्त्यस्स्य च स्वरभाग इत्त्यर्थः। 'अन्वर्थसञ्ज्ञा चेयम्, स्वरभक्तिस् स्वरप्रकार इत्त्यर्थः'[3] इति उव्वटः, 'भक्तिरवयव एकदेश इति यावत्'[4] इति सोमयार्यः। तत्तर ऋकारे लृकारे च कतमस्स्य स्वरस्स्य भागस् स्वीकर्तव्य इति प्रश्न उत्तिष्ठति। तत्तर शुक्लयजुर्वेदप्रातिशाख्ये ''ऋलृवर्णौ रेफलकारौ संश्लिष्टावश्श्रुतिधरावेकवर्णौ''[5] इत्त्युक्तम्। तस्स्यार्थश् च ऋवर्णे लृवर्णे च क्रमेण रेफो लकारश् च संश्लिष्टौ अकारश्श्रुतियुक्तौ एकवर्णीभूतौ च भवत इति बोद्ध्यः। यद्द्यपि उव्वटेन अनन्तेन च ऋकारलृकारयोर् वर्तमाना स्वरभक्ति× कण्ठ्या इति स्वीकृतन् तथापि 'अश्श्रुतिधरौ' इत्त्यस्स्य उव्वटेन 'अविद्द्यमानपृथक्श्रुतिधरौ' इत्त्यर्थ उक्तः[6], तदनुयायिनाऽनन्तेनाऽपि स एवाऽर्थोऽनूदितः[7]। किन् तु सोऽर्थोऽनुपपन्नः। तथा हि तस्मिन्नर्थे स्वीकृते 'अश्श्रुतिधरौ' इत्त्यस्स्य यथाश्श्रुतार्थस्स्य 'अस्स्य श्रुतेर् धरौ' इत्त्यस्स्य परित्त्यागेन लक्षणा आश्श्रयणीया भवति, तावँ विना 'अश्श्रुतिधरौ' इत्त्यस्स्य 'अविद्द्यमानपृथक्श्रुतिधरौ' इत्त्यर्थो न प्राप्तुं शक्यते। न चाऽत्तर मुख्यार्थबाधतात्पर्यानुपपत्त्यादिकङ् कञ् चन लक्षणाहेतुम् पश्श्यामः। कथञ् चिल् लक्षणामाश्श्रित्त्य तस्मिन्नर्थे स्वीकृते च 'एकवर्णौ' इति पुनरुक्तम् भवति; 'एकवर्णौ' इति पदस्स्य हि ऋवर्णे लृवर्णे च क्रमेण रेफो लकारश् च स्वरभक्तिब्भ्यां सह एकवर्णीभूतौ अविद्द्यमानस्स्वतन्तरश्श्रुतिकौ भवत इत्त्येवार्थ इति। तस्माद् 'अश्श्रुतिधरौ' इत्त्यस्स्य उव्वटोक्तोऽर्थो हेयः। यथाश्श्रुत एवार्थस् स्स्वीकार्यः। स च अस्स्य श्रुतिः अश्श्रुतिः, धरत इति धरौ, अश्श्रुतेर् धरौ अश्श्रुतिधरौ इति यौगिकोऽर्थो महीधरादिवत्। तस्-

---

१. पदमञ्जर्याम् ६।१।१०१। २. वै. सि. कौ., अच्सन्धौ, दीर्घप्रकरणे। ३. ऋ. प्रा. उ. भा. १।३२। ४. तै. प्रा. तिरभा. र. २१।१५। ५. ४।१४८। ६. शु य.प्रा.उ. भा. ४।१४८। ७. तत्तरैव, अ. भा.।

माद् ऋकारे लृकारे च स्वरभागौ अकारभागात्मकाविति निश्चीयते। यद्द्यपि यजुर्वेदे माद्ध्यन्दिनीयके ऋकारस्य एकारसहितमुच्चारणवँ विहितन्[1] तथापि काण्वाम्नायादौ तु न तत् प्रवर्तते इति तत्र ऋकार-लृकारयोरिदम् अशश्रुतिधरत्वन् चरितार्थम् भवत्येव। ननु भवेतान् नाम शुक्लयजुर्वेदप्रातिशाक्ख्यवचनाच् शुक्लयजुर्वेदसर्वशाखासाधारणाच् शुक्लयजुर्वेदे काण्वशाखादौ ऋकारे लृकारे च अकारभागात्मिके स्वर-भक्ती, किन् तु कथं शुक्लयजुर्वेदप्रातिशाक्ख्यवचनात् सर्ववेदशाखा-लोकसाधारणस्य ऋकारस्य लृकारस्य च स्वरभक्त्योस् स्वरूपस्य निर्णयो भवितुं शक्नोति? अत्रोच्यते– किम् प्रातिशाक्ख्येषूक्तास् सर्वे वर्णास् तत्तच्छाखामात्रविषया उत तत्तत्प्रातिशाक्ख्येष्वेव विशेषेणोपलब्ध्यमाना अन्यत्र अनुपलब्ध्यमाना वर्णा एव तत्तच्छाखामात्रविषयाः? तत्तत्प्रातिशाक्ख्येष्वेव विशेषेणोपलब्ध्य-माना अन्यत्राऽनुपलब्ध्यमाना वर्णा एव तत्तच्छाखामात्रविषया इत्येव स्वीकर्तव्यम्; यथा ह्रस्स्व एकार ओकारश् च, नासिक्क्यः, किट्किडाकार इति। पाणिनीयव्याकरणभाष्यकारोऽपि "पार्षदकृतिरेषा तत्र भवताम्; नैव हि लोके नान्यस्मिन् वेदेऽर्ध एकारोऽर्ध ओकारो वाऽजस्ति"[2] इति ब्रुवाण एवमेव मन्यते स्म। यद्द्येवं नाऽमंस्यत तर्हि 'पार्षदकृतिरेषा तत्र भवताम्' इत्येवाऽभणिष्यत् सः। एवन् तर्हि अन्यस्मिन् वेदे लोके च ऋकारलृकारयोर् अकारभागात्मकौ स्वर-भागौ स्वीक्रियेते इति प्रमाणयितव्यमिति चेत् तत्रोच्यते– ऋग्वेद-प्रातिशाक्ख्ये तावद् वर्णराशौ 'अ ऋ (लृ) इ उ ए ओ अै औ' इति स्स्वरक्क्रमस् स्वीकृतः[3]। तत्र अकारानन्तरम् ऋकारस्योपदेशे ऋकारे अकाररूपस्स्वरभागस्य सत्ता हि कारणम् प्रतीयते। यथा शुक्ल-यजुर्वेदप्रातिशाक्ख्ये ऋकारस्स्थानन् जिह्वामूलमुक्तन्[4] तथैव ऋग्वेद-प्रातिशाक्ख्येऽपि ऋकारस्स्थानन् जिह्वामूलमेवोक्तम्[5] इति एतदपि एत-स्स्यैवोपोद्बलकम्; स्वरभक्तेर् ऋकाररूपताया उक्तिस्[6] तस्स्याश् च इकारोकारविलक्क्षणत्वमुव्वटप्प्रतिपादितमपि[7] अत्र प्प्रमाणम्। यत् तु केचन ऋग्वेदे ऋकारं रु इत्युच्चारयन्ति तत् तु दुष्टमिति ऋग्वेद-

---

१. प्र. सू. २।५। २. पा. व्या. भा. अे ओङ अै औच् इत्यत्र, वा. ४; १।१।४८। ३. ऋ.प्रा.व. २।१, ऋ.प्रा. १।६५। ४. १।६५। ५. १।४१। ६. ऋ. प्रा. ६।४६। ७. ऋ. प्रा. उ. भा. ६।५३।

प्रातिशाख्ये एव स्पष्टम्[1]। अत ऋग्वेदिनामपि ऋकारस्य अकारस्वरभागघटितत्वन् न प्रतिकूलम्। यद्यपि तैत्तिरीयप्रातिशाख्ये ऋकारलृकारयोर् बर्स्वं स्थानम् प्रतिपादितन्[2] तथापि तद् रेफलकारभागाभिप्रायेण न तु स्वरभागाभिप्रायेणेति तदप्युक्तस्यार्थस्याऽप्रतिकूलमेव। तैत्तिरीयसर्वसम्मतशिक्षायामागतम्– 'ऋकारस्य स्वरूपन् तद् बुद्ध्वा बोद्धुं हि शक्यते। स्वरभक्तिरतो विद्द्यादृकारमिह विस्तरात्॥ ऋकारस्य स्वरूपं हि श्लिष्टम् पादचतुष्टयम्। पादेषु तेषु विज्ज्ञेयावादावन्ते स्वरात्मकौ। अणू रेफस्य मद्ध्ये द्वौ विज्ज्ञेयौ व्यञ्जनात्मकौ। स्वरात्मकेन पादेन ह्युत्तरेणोत्तरन् तथा। स्वरपादान्वितौ भागौ स्वरभक्तिरितीरितौ॥ हकारे पूर्वभागस् स्यादुत्तरश् शषसेषु च। हकारे सर्वं वृतावँ विद्द्याद् विवृतामितरत्तर तु॥ पूर्वस्स्वरस्य चाल्पत्वमित्वमुत्वमिति त्तरयम्। एतत् त्तरयवँ विसृज्ज्यैव स्वरभक्तिं समुच्चरेत्"[3] इति प्रकरणञ् च ऋकारस्स्वभागस्य अकारभागतायाऽ प्रतिपादकम् बोद्ध्यम्। इत्वस्स्योत्वस्य च परित्यागे अत्वमेवावशिष्टमनुज्ज्ञातम् भवति 'अ–इ–उकाराणां सन्धिपरिवृत्तित अनन्ये स्वरवर्णास् सम्भूताः' इति स्थितेः। पारिशिक्षायामपि– "स्वरोत्तरोष्मणण्यपि पूर्वरेफलकारयोश् च स्स्वरभक्तिसञ्ज्ञा। स्यादर्धमात्त्रा रलयोस् तदादावन्ते स्वरांशावणुमात्त्रयुक्तौ॥ रलौ तु यस्मात् स्वरपादयुक्तौ तस्मात् तयोश् च स्स्वरभक्तिसञ्ज्ञा। पूर्वांशपादद्वययुग् घलन्ता स्यात् सर्वं वृताख्या हपरे तु भक्तिः॥ परांशयुक्ता शषसेषु भक्तिऽ परेष्वजन्ता विवृताभिधाना। पूर्वस्स्वराल्पत्वकमित्वमुत्वन् त्तरयवँ विसृज्ज्यैव वदेद् (विपश्चित्)"[4] इत्त्येवोक्तम्। एतदपि सर्वसम्मतशिक्षावचनवदेव ऋकारस्स्वरभागस्य अकारभागताम् प्रतिपादयति। चारायणीयशिक्षायामपि– "स्वरभक्तिर् द्विधा ज्ज्ञेया लकारे रेफ एव च। स्वरोदा व्यञ्जनोदा च विहिताक्षरचिन्तकैः। रहयोऽ करिणीवँ विद्द्यात् कर्विणीं रशकारयोः। लशयोर् हरिणीवँ विद्द्याद् रात्त्रीन् तु रसकारयोः। या तु हंसपदा नाम सा स्स्याद् रेफश(ष)कारयोः। अभक्तयाऽ क्रमवर्ज्याश् च पञ्चैतास् स्वरभक्तयः। एकपदा भवेद् यत्तर स्वरभक्तिस् स्वरोदया। द्विपदा चैव या दृष्टा व्यञ्जनोदा च सा स्स्मृता। अणुमात्त्रञ् च रेफस् स्याद्

---

१. १४।१३। २. तै. प्रा. २।१८। ३. सू. २२–२९।
४. सू. १२०–१२६।

व्यञ्जनस्य तथैव च । स्वरस्य सार्धमात्तरञ् च स्वरभक्तिवँ विनिर्दिशेत् । स्वरभक्तीऽ प्रयुञ्जानस् त्रीन् दोषान् वर्जयेद् बुधः । इकारञ् चाऽप्युकारञ् च रस्तदोषान् विवर्जयेत् ।"[1] इति । एतेनाऽपि स्वरभक्तौ अकारभागमेव परिशेषयति शिक्षाकारः । स्वरभक्तिश् च ऋकारलृकारभागात्मिकैवेति ऋकारलृकारस्स्वरभागयोरकारभागात्मकत्वञ् कृष्णयजुर्वेदेऽपि विद्द्यत इति चातस् सिद्धम् भवति । यद्द्यपि सामवेदीये ऋक्तन्त्राख्ये प्रातिशाख्ये अन्यत्र इवैव ऋकारवँ विजातीयवर्णद्द्वयैकवर्णीभावनिष्पन्नं स्वरं स्वीकृत्य अतथाविधेव्भ्यस् स्वरेव्भ्यऽ पश्चादेव (उकारात् पश्चाद्) ऋकारो निवेशितः[2], तथापि तत्रापि ऋकारो जिह्वामूलीय एवोक्त[3] इत्ययमपि ऋकारश् शुक्लयजुर्वेदप्रातिशाख्योक्ताद् ऋकाराद् अभिन्न एव विज्ज्ञायते । सामवेदीयायालँ लोमशीयशिक्षायामपि "रेफस्य च ऋवर्णस्य स्वरभक्तेस् तथैव च । अवर्णवत् प्रयोगस् स्यात्"[4] इति ऋकारस्य अकारभागघटितत्वं सूच्यते । अथर्ववेदप्रातिशाख्यरूपायाश् शौनकीयचतुरद्ध्यायिकाया व्याख्यात्तराऽपि ऋकारो जिह्वामूलीय[5] एव स्स्वीकृत इति अथर्ववेदीयोऽपि ऋकारश् शुक्लयजुर्वेदप्रातिशाख्योक्ताद् ऋकाराद् अभिन्न एव विज्ज्ञायते । स्वरभक्तेर् ऋकारभागरूपताया ऋग्वेदप्रातिशाख्ये[6] शुक्लयजुर्वेदप्रातिशाख्ये[7] तैत्तिरीयप्प्रातिशाख्यव्याख्यायाम्[8] व्यासशिक्षायाञ्[9] कौहलीयशिक्षायाञ्[10] चान्यत्तर[11] च प्रतिपादितत्वाच् शौनकीयचतुरद्ध्यायिकायां "रेफादुष्मणि स्वरपरे स्वरभक्तिरकारस्स्यार्धञ् चतुर्थमित्त्येके,अन्यस्मिन् व्यञ्जने चतुर्थमष्टमवँ वा"[12] इति रेफस्स्वरभक्तौ अकारभागस्य स्थितेरुक्तत्वाच् चैतदेव प्रमाणितम् भवति । लोकेऽपि अहिर्बुद्ध्न्यसंहितायाम् "एकत्रिभागयोर् ऋद्ध्या अरयोर् ऋ स्स्मृतो बुधैः । अलयोश् च तथा क्लृप्तमकारस् स्यादनुत्तरः । भूयोऽप्यनुत्तराद् योगात् प्लवमानस् तथा स्स्मृतः"[13] इति ऋकारलृकारयोरकारभागघटितत्वमुक्तम्। यादवप्रकाशादीनाञ् ग्रन्थेषु बृसीत्यादेर् अपभ्रंशीकरणेन ब्रसीत्या-

---

१.पृ.३०। २. १।२। ३. २।१।४। ४. ६।४ (शि. स. पृ. ४६०)। ५. १।२०। ६. ६।४६। ७. ४।१७। ८. २१।१५ (त्रिभाष्यरत्ने)। ९. सू. ३८१–३८८। १०. श्लो. १७–१८। ११. ना. शि. २।६।२–९, लो. शि. ६।१, मा. शि. श्लो. ९९–१०६ इ.। १२. १।१०१, १०२। १३. १।१६।५३–५४, पृ. १४९–१५०।

दिरूपेण पठनम्[1] अपि ऋकारस्स्वरभागस्य अकाररूपताया उपोद्बलकत्वं दृश्यते। ऋकारभागरूपायास् स्वरभक्तेर् भागवते "कान्तं स्म रेचकजिहीरषयोपगुह्य"[2], "आपूर्यमाणो वरवद्भिरम्बुदैः"[3] इत्यादौ अकाररूपत्वेन प्रयोगश् च ऋकारस्स्वरभागस्य लोकेऽपि अकाररूपतायास् समर्थको भवति। यत् तु पाणिनीयव्याकरणभाष्यकारेण "यत्तद् रेफात् परम् भक्तेस् तेन व्यवहितत्वान् न प्राप्नोति। अड्व्यवाये इत्येवम् भविष्यति। न सिद्ध्यति। किङ कारणम्? वर्णैकदेशा४ के वर्णग्रहणेन गृह्यन्ते ये व्यपवृक्ता अपि वर्णा भवन्ति। यच् चाऽत्र रेफात् परम् भक्तेर् न तत् क्वचिदपि व्यपवृक्तम् दृश्यते"[4] इति ऋकारे रेफात् परस्य स्स्वरभागस्य व्यपवृक्तस्याऽन्न्यत्राऽलब्ध्यत्वमुक्तम् न तद् ऋकारस्य अकारभागघटितत्वस्स्वीकारे बाधकम्, अकारभागात्मकस्यापि तस्य अणुमात्रस्य अणुमात्रासहितमात्रात्मकस्य वाऽप्यन्न्यत्राऽलब्ध्यत्वेनैवाऽपि भाष्यकारोक्तेरुपपद्द्यमानत्वात्। कय्यटनागोजी अपि एवमेवाऽऽहतुस् सम्बद्धभाष्यवाक्यव्याख्याने। यत् तु नागोजिभट्टेन "ऋकारभागम् तदनन्तरवर्त्यज्भागमित्यर्थः। इकारभागमिति पाठोऽज्भाग इकारसदृश इति मतेन बोद्ध्यः। अत एवाऽवकहडचक्करे ऋ ॠ ऌ ॡ इति चतुर्णाम् इकारराशश्या निर्णय उक्तस् स्वरशास्त्रे"[5] इत्युक्तम्, यच् च "रं इत्यग्निबीजम्, इ इति इच्छा, तेन अग्निमयज्ञानशक्तिसाहचर्येण उद्दीप्ता विश्वनिर्माणेच्छा ऋकारेण प्रतीयते इति तान्त्रिकाः"[6] इति तान्त्रिकाणाम् मते ऋकारस्स्य इकारभागरेफेकारभागघटितत्वलँ लडुकेश्वरशतपथिनोक्तम्[7] तदुभयङ कस्मिन्नपि प्रातिशाख्यादिके वैदिकशिक्षाशास्त्रग्रन्थे ऋकारस्स्य तालव्यत्वेनाऽप्रतिपादितत्वाच् चोपेक्षणीयम्, तत्तच्छास्त्रीयसङ्केतादिमात्रोपयोगित्वेन व्यवस्थापनीयँ वा। 'इकारभागमिति पाठोऽज्भाग इकारसदृश इति मतेन' इति नागोजिभट्टोक्तिरपि ऋकारस्स्वरभागस्य इकारसदृशत्वङ केषाञ् चिदेव मते न सर्वेषाम् मते इति सूचयत्येव। ऋषिः इत्यादेर् यो 'रिखि' 'रिसि' इत्यादिकोऽपभ्रंशस् सोऽपि 'रुसि' 'रेसि' इत्यादेरपभ्रंशस्यापि दर्शना-

---

१. वैजयन्त्याम् ३।६।१४९। २. १०।९०।१०। ३. १२।९।१४।
४. पा. व्या. भा. ८।४।१। ५. तत्रैव भाष्यप्रदीपव्याख्याने।
६. ऋवर्णस्य स्वरभक्तेश् च स्वरूपम् इति निबन्धे, पृ. ३, २(॥)।
७. तत्रैव।

दविनिगमक एव। यत् तु लडुकेशश्वरशर्मणा "कृष्ण इत्यस्य क्रष्णः किरष्णः क्रुष्णः क्रेष्ण इत्यादीनि उच्चारणानि तत्तद्देशप्रसिद्धानि इति सर्वोऽप्ययम् ऋकारोच्चारणप्रकारस् तत्तद्देशकालेषु तत्तद्भाषासु च स्वस्वक्क्षेत्रेषु उपादेयो न तु कश् चन प्रकारो हेयः"[1] इति निष्कर्षः कृतस् सोऽपि याज्ञ्ये कर्मणि प्रयोज्ज्यायान् देववाण्यान् तु न कथमपि स्वीकर्तुं शक्यः, तत्तद्देशश्यापभ्रंशभाषाप्रभावाद् अपभ्रंशीभूतानां संस्कृतोच्चारणानायँ याज्ञ्ये कर्मणि हेयत्वस्य पाणिनीयव्याकरणादौ[2] प्रतिपादितत्वात्। एतेन 'अस्याश् च ऋकारलृकारस्वरभक्तेश् चतुर्धोच्चारणं सम्प्रदायभेदादवगम्यते अकाराभास एकेषाम्, ऋषिरिति रषिवत्; इकाराभासः प्राच्यानाम्, ऋषिरिति रिषिवत्; उकाराभास उदीच्यानाम्, ऋषिरिति रुषिवत्; एकाराभासो माध्यन्दिनानाम्, ऋषिरिति रेषिवत्" इति 'पत्थ्या स्वस्तिः' इति ग्रन्थे[3] मधुसूदनोक्तमपि व्याख्यातम् ॥६९॥

(ग) अे अै ओ औ इत्येतेषावँ विवेचनम्

अेकार ओकारस् सन्ध्यक्क्षरत्वेनोदितौ बुधैः।
क्वचिद् द्विस्स्थानकावुक्तौ तावेकस्स्थानकौ क्वचित् ॥७०॥
तयोर् द्विवर्णकत्वेऽपि तत्तर पूर्वोत्तरांशयोः।
साम्यात् साम्येन विवृतत्वाच् चैऔब्भ्याम् पृथग् हि तौ ॥७१॥
अै औ इत्यत्तरोत्तरांशभूयस्त्वाद् भागयोर् द्वयोः।
विवृतत्वात् सर्वं वृतत्वाच् चेति व्यक्ता श्रुतिस् तयोः ॥७२॥

अेकार ओकारश् च सर्वैः प्रातिशाख्यकारादिभिर् बुधैस् सन्ध्यक्क्षरतया प्रतिपादितौ। तथा हि ऋग्वेदप्रातिशाख्ये "ततश् चत्वारि (अे ओ अै औ) सन्ध्यक्क्षराणि"[4] इति, "सन्ध्यानि सन्ध्यक्क्षराण्याहुरेके द्विस्स्थानतैतेषु तथोभयेषु"[5] इति च; शुक्लयजुर्वेदप्रातिशाख्येऽपि– "सन्ध्यक्क्षरम् परम्"[6] इति, "अथ सन्ध्यक्क्षराणि"[7] इति च; ऋक्तन्त्रेऽपि "अे इति अै इति ओ इति औ इति सन्ध्यक्क्षराणि"[8] इति; शौनकीयचतुरध्यायिकायामपि– "सन्ध्यक्क्षराणि संस्पृष्टवर्णानन्येकवर्णवद् वृत्तिः"[9] इति, आपिशलिशिक्षासूत्रेऽपि–

---

१. ऋवर्णस्य स्वरभक्तेश् च स्वरूपम् इति निबन्धे। २. पा. व्या. भा. (पस्पशाह्निके); ध. मी. सू. १।३।२४–२९। ३. पृ. ३। ४. १।२। ५. १३।३८। ६. १।४५। ७. ८।४। ८. १।२। ९. १।४०।

"द्विवर्णानि सन्ध्यक्षराणि"[1] इति; पाणिनीयशिक्षासूत्रेऽपि— "द्वेद्द्वेवर्णे सन्ध्यक्षराणामारम्भके भवतः"[2] इति, पाणिनीय-व्याकरणवार्तिकेऽपि– "सन्ध्यक्षरेषु तपरोपदेशश् चेत् तपरोच्चारणम्"[3] इति, "वर्णैकदेशा वर्णग्रहणेन चेत् (गृह्यन्ते) सन्ध्यक्षरे समानाक्षरविधिप्रतिषेधः"[4] इति, "सन्ध्यक्षरेषु विवृतत्वाद्"[5] इत्यादि च; कातन्त्रव्याकरणेऽपि– "एकारादीनि सन्ध्यक्षराणि"[6] इति, चान्द्रस्वर्णसूत्रेऽपि– "सन्ध्यक्षराणां ह्रस्वाभावात् तान्यपि द्द्वादशधा"[7] इति। सन्ध्यक्षरम् इत्यस्य च न सन्धिजातमक्षरमिति यौगिक एवार्थः, तथा सति दीर्घावर्णेवर्णोवर्णादीनामपि तथात्वापत्तेः, किन् तु विजातीययोस् स्वरयोस् सम्मेलनेन एकवर्णीभावेन जातस् स्वर इति एवाऽर्थः। तथा च उव्वटोऽपि "अकारस्य इकारेण उकारेण अेकारेण ओकारेण च सह सन्धौ यान्यक्षराणि निष्पद्द्यन्ते तानि तथोच्च्यन्ते यथा अे ओ अै औ"[8] इति ब्रुवाणस् सन्ध्यक्षरत्वं स्पष्टीकर्तुम् प्रयतते। 'अेकारेण ओकारेण' इति तद्व्याख्यानन् तु हेयम् महाग्रन्थविरोधात्[9]। एवन् च सति यथा अैकारे औकारे च अकारस्य इकारेण उकारेण च सह क्रमेण एकवर्णीभावेन स्स्थितिः, तथैव अेकारे ओकारे च द्वयोर् वर्णयोर् एकवर्णीभावेन स्स्थितिरनुमीयते। सन्ध्येष्वकारोऽर्धमिकार उत्तरयँ युजोरुकार इति शाकटायनः"[10] इति प्रतिपादिते शाकटायनमते अेकारे ओकारे च पूर्वा मात्तरा अकार४ परा च क्रमेण इकार उकारश् चेति स्फुटमेवोक्तम्। 'अग्ने इन्द्रम्' 'वायो उदकम्' इत्यत्तर 'अकस् सवर्णे दीर्घः'[11] इति दीर्घत्वम् प्राप्नोति इति वदन्[12] पाणिनीयव्याकरणभाष्यकारोऽपि अेकारे उत्तरार्ध इकार ओकारे च उकार इति स्वीकुर्वाणो विज्ज्ञायते। "उच्च्यते हि अयम् पञ्चखट्ट्वोऽयम् पञ्चखट्ट्व इत्येवं सन्ध्यक्षरेषु प्रयत्नस्य विरामोपादानाब्भ्यालँ लक्ष्य४ पृथग्भाव इति"[13] इति वदन् भर्तृहरिरपि एकारौकारयोरपि स्फुटद्द्विवर्णकत्वम् प्रतिपादयन् प्रतीयते। पाणिनीय-

---

१. स्थानप्रकरणे सू. २०। २. स्थानप्रकरणे सू.२१(लघुपाठे)। ३. पा. व्या. भा. अे ओङ अै ओच् इत्यत्तर, वा. १। ४. तत्तरैव, वा. ६। ५. तत्तरैव, वा. १०। ६. १।१।८। ७. सू. ४३। ८. ऋ.प्रा.उ.भा. १।२। ९. ऋ.प्रा. १३।३९। १०. तत्तरैव। ११. अष्टा. ६।१।१०१। १२. पा. व्या. भा. अे ओङ अै औच् इत्यत्तर, वा. ६। १३. म. भा. दी., पृ. ८८।

शिक्षायामपि पद्द्यबद्धायाम् अकारे ओकारे च अकारे औकारे इवैव पूर्वो भाग× कण्ठ्य उत्तरो भाग× क्रमेण इकार उकारश् च इत्युक्तम्[1]। तत्र च यद्द्यपि बहव× पाठभेदा अर्थभेदाश् चाऽऽधुनिकानामभिमतास् तथापि अकारे औकारे च मात्रासन्निवेशस्य स्फुटत्वाद्[2] अकारे ओकारे च तयोरस्स्फुटत्वाद्, अकारैकारयोरोकारौकारयोश् च स्वरूपगतवैशिष्ट्यस्य स्फुटीकरणस्याऽऽवश्यकत्वाच् च एकारस्य अकाराद् ओकारस्य औकाराच् च मात्रासन्निवेशादिवैशिष्ट्याद् विवेकङ कर्तुम् च तद् वचनम् प्रवर्तते इति बोद्ध्यम्। एवम् च तत्र पाठोऽपि 'अर्धमात्रा तु कण्ठ्यस्य अकारौकारयोर् भवेत्। अकारौकारयोर् मात्रा तयोर् विवृतसवँवृतम्' इत्येव सुसङ्गतस् स्याद् अकारौकारयोरुत्तरभागयोर् भूयस्त्वात्[3]। अ अै ओ औ इति प्राचीनपरम्परागतो लौकिकस्[4] सन्ध्यक्षरक्रमोऽपि अकारस्य ओकारस्य च द्विवर्णकत्वस्यैव परिपोषकः। अकारस्य ओकारस्य च इदानीमस्माकन् देश्यभाषोच्चारणे इव एकवर्णत्वे (एकस्थानकत्वे) तु अकारात् परागेव ओकारस्य निवेश आवश्यको भवति। अकारस्य ओकारस्य च द्विवर्णताया आनुकूल्याय च तयोर् द्विस्थानकत्वमपि आवश्यकम्। स्वीकृतम् चैतत् कैश् चित्। तथाहि– "सन्ध्यानि सन्ध्यक्षराण्याहुरेकेद्विस्थानतैतेषु तयोभयेषु" इति ऋग्वेदप्रातिशाख्ये[5], अदैतौ कण्ठतालव्यौ, ओदौतौ कण्ठोष्ठ्यौ" इत्यापिशलिशिक्षासूत्रे[6]; तथैव पाणिनीयशिक्षासूत्रेऽपि[7]; चान्द्रवर्णसूत्रेऽपि "कण्ठतालुकम् इदेदैताम्, कण्ठोष्ठम् उदोदौताम्"[8] इति; "अ अै तु कण्ठतालव्या ओ औ कण्ठोष्ठजौ स्मृतौ"[9] इति पद्द्यबद्धपाणिनीयशिक्षायामपि। किन् तु ऋग्वेदप्रातिशाख्यादिषु बहुषु ग्रन्थेषु अकारस्य ओकारस्य चैकस्थानकत्वम् उक्तमित्यप्यत्र स्मर्तव्यम्। एतच् च बलाद्ध्याये स्थानाधिकारे एव विस्तरेण प्रतिपादयिष्यामः। एकस्थानकत्वे तु अकारस्य ओकारस्य च स्वरूपतस् सन्ध्यक्षरत्वम् (विजातीयस्वरमिश्रस्वरत्वम्) न भवितुमर्हति। तथापि भूतपूर्वगत्या एकस्थानकत्ववादिभिरपि अकारौकारयोस् सन्ध्यक्षरत्वमुक्तम् प्रतिभाति। एवम्

---

१. श्लो. १८, १९। २. पा. व्या. भा., अ ओङ अै औच् इत्यत्र वा. ९, १०।
३. पा. व्या. भा. १।१।४८, वा. ४। ४. ऋ. प्रा. उ. भा. १।३।
५. १३।३८। ६. स्थानप्रकरणे सू. १७–१८। ७. स्थानप्रकरणे सू. १९–२०। ८. सू. ४, ५। ९. श्लो. १८।

च शाकटायनसम्मतयोः अकारौकारयोस् स्वरूपयोरर्वाचीने काले परिवर्तनमभूदिति च सम्भाव्यते। सात्त्यमुग्गिरराणायनीयानां सामगानामर्ध अकारोऽर्ध ओकारश् च[1] अकारौकारस्वरूपविवेकप्रसङ्गे न विस्मर्तव्यौ, तयोरेकारौकारस्वरूपविचारे प्रभावम् पातयितुं समर्थत्वात्; द्विस्थानकत्वे द्विवर्णकत्वे वा तयोर् ह्रस्वताया दुरुपपादत्वात्। शाकटायनसम्मतम् अकारौकारयोस् स्वरूपवँ् विचार्यैव वैदिकैरार्यैः अकारौकारयोः इकारोकारयोरिव स्वतन्त्रस्स्वरत्वन् न स्स्वीकृतम्; किन् तु सन्ध्यक्षरत्वं स्वीकृतम्, न तु अर्वाचीनापभ्रंशभाषासु श्रूयमाणं सर्वथैव एकस्थानकम् इकारेण उकारेण च सदृशम् अमिश्रस्स्वरमेकारमोकारञ्चादाय तयोस् सन्ध्यक्षरत्वं स्वीकृतमित्यपि अत्र स्स्मरणीयम्। एवञ् च एतद्विषयकऽ पाश्चात्त्याक्षेपो[2] निराधारोऽबोधमूलकश् चेत्त्यपि सिद्ध्यति।

द्विस्थानकत्वेऽपि अकारस्य ओकारस्य च क्रमाद् अकाराद् औकाराच् च श्रुतौ भेद ऋग्वेदप्रातिशाख्ये प्रतिपादितः[3]। एवञ् च अकारे ओकारे च पूर्वोत्तरयोर् मात्त्रयोस् समभागत्वात्[4], कण्ठ्या पूर्वा मात्त्राऽपि विवृता[5], क्रमात् तालव्या ओष्ठ्या चोत्तरा मात्त्राऽपि विवृता[6] एवेति च तयोरामिश्रणाच् श्रुतौ भागद्द्वयानुभवोऽस्स्फुटः; अकारे औकारे च तु पूर्वऽ कण्ठ्यो भागोऽर्धमात्त्रः[7], उत्तरऽ क्रमात् तालव्य ओष्ठ्यश् च भागोऽद्ध्यर्धमात्त्र[8] इति असमत्वात् पूर्वोत्तरभागयोः, पूर्वाऽर्धमात्त्रा विवृततरा[9] उत्तराऽद्ध्यर्धमात्त्रा

---

१. आ. शि. सू. वृत्तिकारप्रकरणे सू.९–१०,पा.व्या.भा. अ ओङ् अ औच् इत्त्यत्त्र, १।४।४८ इत्त्यत्र च। २. S.H.P.p.23–24. ३. १३।४०–४१। ४."सिद्धमेङस् सस्थानत्वादैचोश् चोत्तरभूयस्त्वाद्" (पा.व्या.भा. १।१।४८) इति कथनाद् एङोऽ पूर्वोत्तरमात्त्रयोस् समत्वववँ् विज्ञायते। ५. "सन्ध्यक्षरेषु च विवृतत्वात्। यदत्त्राऽवर्णवँ् विवृततरन् तदन्न्यस्मादवर्णाद्, ये अपीवर्णोवर्णे विवृततरे ते अन्न्याब्भ्यामिवर्णोवर्णाब्भ्याम्"– पा. व्या.भा.,अ ओङ् अ औच् इत्त्यत्त्र वा.१०। ६.प्रमाणम् अनुपदमेवोक्तम् (पूर्वटिप्पण्ण्याम्)। ७. तै. प्रा. २।२६, २७,२८,२९; पा.व्या.भा.१।१।४८,वा.४। ८.प्रमाणम् पूर्वटिप्पण्ण्युक्तमेव। ९. "सवँ्वृतावर्णस्स्य (अकारस्स्य ओकारस्स्य वा) सवँ्वृतावर्णः (अय् अव् वा) विवृतावर्णस्स्य (अकारस्स्य औकारस्स्य वा) विवृतावर्णः (आय् आव् वा)"– पा. व्या. भा. १।३।१०,

तु पूर्वार्धमात्तरापेक्षया सर्वावृता[1] इति च श्रुतौ भागद्वयानुभवस्स्फुटः। तत्र इकारभाग उकारभागश्च यथाऽनुस्स्वारोऽकारात् पश्चादागच्छन्ननकारे सङ्गतो भवति तथैव अकारेण सङ्गतौ भवतः[2]। एवञ्च अकारस्य औकाराद् ओकारस्य औकाराद् वैलक्षण्यमपि सम्यग् व्याख्यातम् भवति ॥७०–७२॥

(घ) चवर्गपञ्चमवर्णविवेकः

चवर्गपञ्चमो वर्णश् श्रुत्या नसदृशः क्वचित्।
क्वचिच् श्रुत्या यसदृशो वस्तुतस् तु पृथग् हि सः ॥७३॥

स्वपूर्ववर्तिना स्वपरवर्तिना वा चवर्गीयेणाऽन्येन वर्णेन सहितश् चवर्गपञ्चमवर्णस् संस्कृतपदेषु सुखेन प्राप्यते, यथा याच्ञा, पञ्च, उञ्छः, ज्ञाता, यज्ञः, झञ्झावात इत्यादौ। किन्तु स्वपूर्ववर्तिना स्वपरवर्तिना वा चवर्गीयेणाऽन्येन वर्णेनाऽसयुक्तश् चवर्गपञ्चमवर्णस् तु संस्कृतपदेषु दुर्लभः; ञुङुवे ञुङुवाते ञुङुविरे इत्यादिषु अप्प्रसिद्धेषु प्रयोगेष्वेव स प्राप्यते। अत एव आधुनिकानाम् चवर्गपञ्चमो वर्णो वस्तुतोऽन्यचवर्गीयवर्णप्रभावजन्यनकारविशेषरूप एव न स्वतन्त्रो वर्ण इति भ्रमः, अत एव च तैराधुनिकीषु देशभाषासु चवर्गपञ्चमवर्णस्याऽस्तित्वमपि प्रत्यक्ख्यायते[3]। किन् तु पाणिनिना चवर्गपञ्चमो वर्णो बहुषु धातुषु प्रत्ययेषु चाऽनुबन्धत्वेन योजितः[4]। यदि तस्य वर्णस्य स्वतन्त्रं रूपं श्रोतुमुच्चारयितुञ् च कष्टमभविष्यत् तर्हि सोऽन्यमेव कञ्चन सुखेनाऽन्यवर्णेब्भ्यः पृथक्तया श्रव्यं सूच्चार्यञ् च वर्णन् तस्य स्स्थानेऽस्स्थापयिष्यद् इति पाणिनिसमयेऽपि चवर्गपञ्चमवर्णोच्चारणम् अनन्यवर्णोच्चारणविलक्षणतया सुप्प्रयोज्यं सुश्श्रव्यञ् चाऽभूदिति विज्ञायते। पालिभाषायामपि चवर्गपञ्चमवर्णस् सुलभः[5]। माहाराष्ट्र्याम् प्राकृतभाषायान् तु चवर्गीय

वा. ७; "अवर्णस्य तर्ह्यैचोश् च सवर्णसञ्ज्ञा प्राप्नोति, विवृततराऽवर्णावेतौ"– पा. व्या. भा. १।१।९, वा. २।

१. इवर्णस्य उवर्णस्य च सर्वावृतत्वम् पाणिनीयव्याकरणभाष्ये अ इ उण् इत्यत्तर तृतीयवार्तिकभाष्ये उक्तम्।

२. ऋ. प्रा. १३।४१। ३. ने. श. को., प्र., पृ. ११।

४. शिञादयः, षुञादयः, डुकरीञादयश् च धातवो दृश्याः; अष्टा. ३।२।५७, ६०, ६५, १४६ इत्यादौ प्रत्ययया दृश्याः।

५. धम्मपदे यमकवग्गे, श्लो. ८।

वर्णपरक एव चवर्गपञ्चमवर्णः प्राप्यते[1], स्वरपरकस् तु स नैव प्राप्यते। मागध्यान् तु स्वरपरकोऽपि चवर्गपञ्चमवर्णः प्राप्यते[2]। तथैव पैशाच्याम्[3] अपभ्रंशे[4] च स सुलभः। अत आर्यभाषासु चवर्गपञ्चमवर्णः पृथक् स्वीक्रियते एव। यच् च अञ्जल्यादिपदेषु चवर्गपञ्चमवर्णस्य नकारस्येव श्रुतिश् श्रूयते तत् तु चवर्गपञ्चमवर्णस्य अभिनिहितीभावेन[5] उच्चारणस्याऽपूर्णत्वाद् मुखनासिकावचनस्य तस्य मुखे करणस्य धारणात् तदुच्चारणे नासिकात एव श्वासस्य निस्सरणादिति बोद्ध्यम्। एवञ् च यथा कुक्कुट इत्यादौ सयुक्तयोः ककारयोर् मध्ये पूर्वस्य ककारस्याभिनिहितीभावेऽपि तस्य ककारत्वेनैव ग्रहणन् तथैव चवर्गपञ्चमवर्णस्यापि अभिनिहितीभावेऽपि तत्त्वेनैव ग्रहणन् न्याय्यम्। अत एव माहाराष्ट्र्याम् प्राकृतभाषायामपि वररुचिप्रभृतिभिः पूर्णस्य चवर्गपञ्चमवर्णस्याऽनुपलम्भेऽपि अभिहितीभूतस्य तस्योपलम्भस् स्वीकृतः[6]। एवं हि नकाराच् चवर्गपञ्चमवर्णस्य विवेकः कर्तव्यः। अनुनासिकायाः प्रथमाया अन्तस्थाया अपि चवर्गपञ्चमवर्णस्य स्थानकरणश्रुतिभेदैरीषत्स्पृष्टकरणकत्वस्स्पृष्टकरणकत्वाभ्याञ् च भेदो भवति। श्रुतौ भेदो यद्द्यपि सूक्ष्मस् तथापि सूक्ष्मेक्षिकायाङ् कृतायामुपलभ्यते एव। एतेन विद्द्यावाचस्पतिना मधुसूदनशर्मणा 'पत्थ्या स्वस्तिः' इत्याख्ये ग्रन्थे यदुक्तम् "अत्र तालव्यानामल्पप्राणघोषस्स्पृष्टदुस्स्पृष्टेषत्स्पृष्टानामनुनासिकत्वे समानमुच्चारणम् भवतीति अनुनासिकेषत्स्पृष्टापेक्षया पृथक्त्वेन चवर्गपञ्चमनासिक्यस्य वर्णान्तरत्वव्यवस्थापनन् नोपपद्द्यते। तथापि चिरन्तनलोकव्यवहारानुरोधादिह वर्णान्तरत्वमाख्यातमिति सन्तोष्टव्यम्"[7] इति, तदबोधाऽविवेकमूलकमिति विवेकशीलैस् सम्यग् विवेक्तव्यम्। तस्माद् यज्ञ्ज इत्यस्य यद्न इति यग्ग्यँ इति ज्यन्न्य इति चोच्चारणम् अपभ्रंशादिदेशश्यभाषाप्रभावादिना विधीयमानमपभ्रंशरूपमेव। अतस् तेषामुच्चारणानां साधुतायाः प्रतिपादनङ् कैश्चित्[8] कृतमनादरणीयमेव। तस्माद् यज्ञ्ज इत्यादौ यथाशास्त्रमेव[9]

---

१. प्रा. ल. सू. (प्राकृतप्रकाशे) ४।१७। २. C. G. P. L. Para 274. ३. सि. हे. श. ८।४।३०३–३०५। ४. तत्रैव ८।४।३९२। ५. ऋ. प्रा. ६।१७। ६. प्रा. ल. सू. ४।१७। ७. पृ. १५। ८. पा. शि. प्र. (यमसङ्ख्यानिरूपणे)। ९. अष्टा. ३।३।९०, ८।४।४०; (जञोर् ज्ञः इति तु लिपिपरिचायकम् अर्वाचीनानाञ् वाक्यन् न शास्त्रम्)।

जकारश्चवर्गपञ्चमवर्णसयँयोगादेरुच्चारणङ्ग कर्तव्यमिति सिद्ध्यति। एतद्विषयेऽधिकं सयँयुक्तजकारञकारद्द्वयोच्चारणविवेके वक्ष्यामः। ॥७३॥

(ङ) टवर्गीयपञ्चमवर्णविवेकः

नकाराभोऽपि पञ्चादौ वर्णो यद्वच्च चवर्गगः।
अनुत्य एवेति निर्णीतस् तथा दण्डादिकेऽपि णः ॥७४॥

यथा पञ्चादौ चवर्गपञ्चमवर्णस्याभिनिहितीभावेन[1] उच्चारणस्याऽपूर्णत्वाद् मुखनासिकावचनस्याऽपि तस्य मुखे तत्स्थाने करणस्य धारणात् तदुच्चारणे नासिकात एव श्वासस्य निस्सरणात् तस्य श्रुतौ नकाराभतायां सत्यामपि स न नकारः किन् तु चवर्गपञ्चमवर्ण एवेति निर्णीतम् पूर्वत्तर तथैव दण्डादौ टवर्गपञ्चमवर्णस्य णकारस्य अभिनिहितीभावेन[2] उच्चारणस्याऽपूर्णत्वाद् मुखनासिकावचनस्यापि तस्य मुखे तत्स्थाने करणस्य धारणात् तदुच्चारणे नासिकात एव श्श्वासस्य निस्सरणात् तस्य श्श्रुतौ नकाराभतायां सत्यामपि स न नकारः किन् तु टवर्गपञ्चमवर्णो णकार एव इति निर्णीयते इत्यर्थः। एतेन "सञ्चारः। सञ्जयः। कण्ठः। काण्डः। दन्तः। स्कन्दः। इत्येवमेषामुच्चारणे विशेषानुपलब्धेः" इति 'पत्थ्यास्वस्तिः' इत्याख्ये ग्रन्थे मधुसूदनविद्द्यावाचस्पतिनोक्तम्[3] अपास्तवँ वेदितव्यम् ॥७४॥

(च) वकारश्श्रुतिविवेकः

बकारस्याऽनुकार्य्यस्ति वकारो यद्द्यपि श्श्रुतौ।
तथाप्यस्ति तयोर् भेदश् श्रुतौ स्थानादिकेषु च ॥७५॥

वकारादेस् स्थानकरणादीनाम् प्रतिपादनन् तत्तत्प्रकरणे एव करिष्यते। वकारस्य श्रुतिरुच्चारणप्रकारश् च पण्डितानामप्युच्चारणे प्रायेण बकारवदेवोपलब्ध्यते। केचन आधुनिकाश् शिक्षितास् तु 'मद्ध्वरिः' इत्यादौ यथा प्रायेण सर्वेऽपि पण्डिता वकारस्योच्चारणम् उकारोच्चारणे इव ओष्ठौ कृत्वा कुर्वते तथैव सर्वत्तर वकारस्योच्चारणङ्ग कुर्वते[4]। किन् तु तन् न शास्त्रानुकूलमिति वकारस्थानकरणादिनिरूपणे स्फुटम् भविष्यति। आधुनिकशिक्षितानान् तादृशमुच्चारणन् न परम्पराप्रात्तम्, किन् तु बवयोर् लिपिकृतम् भेदन्

---

१. ऋ. प्रा. ६।१७। २. तत्तरैव। ३. १५ पृ.।
४. J. L. S. I., 21-62-72 (1960), P. 76.

दृष्ट्वा तयोश् श्रुतिकृतोऽपि भेद आवश्यक इत्येतावदेव विचार्य शास्त्रं सम्यगविमृश्यैव कल्पितमिति विज्ज्ञायते। वकारोऽपि सामिस्स्वर इति तस्य आङ्लसामिस्स्वरेण तत्स्थानीयेन 'W' इत्यनेन तुल्यता आवश्यकीति च तेषान् तर्कस् स्यात्। किन् तु एष तर्कोऽत्तर न प्रसरतीति अधोनिर्दिष्टैर् विविधैः प्रमाणैर् विमर्शैर् वकारस्स्थानकरणादिनिरूपणैश् च स्फुटम् भविष्यति। 'मद्ध्वरिः' इत्यादौ पण्डितानामुपर्युक्तविधे उच्चारणे या वकारश्श्रुतिस् साऽपि न सार्वत्रिकी वकारश्श्रुतिरिति च तलत उपस्स्थापितैर् विमर्शैस् स्पष्टम् भवति। (क) अथर्ववेदपरिशिष्टेऽपि अथर्ववेदीयलक्षणग्रन्थत्वेनोल्लिखिते दन्त्योष्ठविधिनामके ग्रन्थे 'वैदिकानान् धीमतावँ विदुषामपि पदेषु अत्तर ओष्ठ्यः पवर्गीयो बकारो वा दन्त्यः (दन्तकरणकः) अन्तस्थारूपो वकारो वेति नित्यं सन्देहो भवति'[1] इत्युक्तम् अस्ति। आधुनिकैः पण्डितैर् मद्ध्वर्यादौ यादृशी वकारश्श्रुतिरुच्चार्यते तादृशी एव वकारश्श्रुतिर् यदि सार्वत्रिकी अभविष्यत् तर्हि ततः पवर्गीयबकारश्श्रुतेर् भेदः पामरेणाऽपि वेदितुं शक्य इति न बवयोरुच्चारणे धीमतावँ वैदिकानां सन्देहोऽभविष्यदिति बकारश्श्रुतिसदृशी एव वकारश्श्रुतिरिति विज्ज्ञायते। अथर्ववेदे माद्ध्यन्दिनीयानामाम्नाये इव पदादिस्स्थस्य वकारस्य सुस्स्पृष्टत्वेनोच्चारणमपि न विहितम्, प्रत्युत वकारस्य सुस्स्पृष्टत्वन् निषिद्धम्[2] इत्यप्यत्तर न विस्मर्तव्यम्। अपि च पदेषु द्द्वितीयेऽक्षरे बकारेण युक्तानाम् पदानामपि बवविवेकाय तत्तर निर्देशः कृत[3] इति च न केवलं सुस्स्पृष्टवकारनिबन्धन एव ब्भ्रम इति सुखेनैव विज्ज्ञातुं शक्यम्। (ख) एवमेव माण्डव्यां शिक्षायाङ् कृता माद्ध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदमन्तरसंहितायाम् प्राप्याणाम् बकाराणाङ् गणनाऽपि उक्ते विषये प्रमाणमेव। तत्राऽपि पदमद्ध्यगता अपि बकारा गणितास् सन्ति[4]। यद्द्यपि माद्ध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदमन्तरसंहितादौ पदादिस्स्था वकारास् सुस्स्पृष्टकरणकास् तथापि वकारस्स्योच्चारणे उह्ते मद्ध्वर्यादिवकारोच्चारणे

---

१. "छन्दस्स्यद्ध्ययने प्राप्ते विदुषामथ धीमताम्। बकारे संशयो नित्यमौष्ठ्यन् दन्त्यमिति स्स्म ह"– श्लो. १।२।

२. दन्त्योष्ठविधौ २।१। ३. तत्तरैव १।११, २।२,३,६।

४. दब्ध्रायो, अदब्ध्रासः, अम्बिकया, त्र्यम्बकम् (शि. स. पृ. ७३), सबन्धुः (तत्तरैव, पृ. ७४)।

इवैव यदि ओष्ठौ उकारोच्चारणे इव भवतस् तदा वकारस्स्य सुस्स्पृष्ट-करणकत्वेऽपि तस्स्य श्रुतेश्च पवर्गीयबकारस्स्य श्रुतेश् चाऽन्तरम् पामरेणाऽपि वेद्द्यमेव भवेत्। तस्मादिदमपि बकारपरिगणनम् बवयोश् श्रुतौ महति सादृश्ये प्रमाणमेव। (ग) लौकिके संस्कृतेऽपि बवयोश् श्रुतौ सूक्ष्मस्स्यैवाऽन्तरस्स्य सत्वात् तस्स्य पण्डितैरपि दुर्बोधत्वाद् बहुषु संस्कृतपदेषु पदादिस्स्थे वकारे बकारो वा वकारो वेति च सन्देह उत्पन्नो दृश्यते। अत एव शब्दकल्पद्रुमादौ बकः – वकः, बकुलः–वकुलः, बडवा–वडवा, बणिजः–वणिजः, बदरम्–वदरम्, बलक्षः–वलक्षः, बला – वला, बलाका – वलाका, बलाहकः – वलाहकः, बलिध्वंसी – वलिध्वंसी, बलिनः – वलिनः, बलिपुष्टः – वलिपुष्टः, बलिभः – वलिभः, बलीवर्दः – वलीवर्दः, बाणः – वाणः, बाधितः – वाधितः, बाष्पः–वाष्पः, बालुका–वालुका, बटुः – बटुः, वलिशः – बलिशः, वलूकः–बलूकः, वल्कः – बल्कः, वलूलः – बलूलः, वल्गुः – बल्गुः, वल्मीकः–बल्मीकः, वाणी – बाणी, वाहुलः – बाहुल इत्यादौ बवयोर् वैकल्पिकत्वं स्वीकृतम्। (घ) भाषाविकासक्रमे पदादिस्स्थस्स्य असयँयुक्तस्स्य व्यञ्जनस्स्य सत्यपि अविकारित्वे संस्कृतप्राकृतदन्तोष्ठ्यवकाराणान् तु पदादिस्स्थानामस्यँयुक्तानामपि आधुनिकीषु भाषासु बकाररूपेण परिणतिर् दृश्यते; यथा— वर्षाः – बर्खा, वार्ता – बात्, वंशः – बाँस्, वासः – बास्, वर्तुलः – बाटुलो, वनम् – बन् इत्यादौ नैपालीयभाषायाम्; वरुणः – बोरुन् इति बङ्गभाषायाम्, बारुणा इति उत्कलभाषायाम् वमिः – बोमि इति बङ्गभाषायाम्, बामि इति कामरूपभाषायाम्, वान्तिः – बान्ति इति उत्कलभाषायाम्, वर्षाकालः – बार्शाकाल् इति बङ्गभाषायाम्, बार्हाकाल् इति कामरूपभाषायाम्, बार्साकाला इति उत्कलभाषायाम् बर्खाकाल् इति नैपालीयभाषायाम्। एतदपि बवयोश् श्रुतौ सादृश्यस्स्य स्वीकारे आधारभूतमेव तत्थ्यम्। (ङ) यद्द्यपि 'भारतीय–योरपीय– भाषामूलभाषायावँ वकार आङ्ग्ल–वकार(W)– सदृशोऽभूत्, किन् तु स प्रातिशाक्ख्यकारसमयात् प्रागेव विकृतः प्रातिशाक्ख्यप्रतिपादितवकारे परिणतः' इति ह्विट्निर् मन्यते[1] 'प्राचीन–यवन[2]–डाइ्गाम्मा (F)– लिप्प्या आङ्ग्ल–व(W)– श्रुत्त्या तुल्यायाश् श्रुतेः

---

१. शौ. च. १।२५ (आङ्ग्लानुवादानन्तरे व्याक्ख्याने, पृ. २६)।

२. यवनाः = आय्योनिया– (Ionia) निवासिनः (ग्रिसनिवासिनः)।

प्रातिनिद्ध्यङ् क्रियते स्स्म' इति च ऐतिहासिका वदन्ति[1], तथापि प्राचीनलातिनस्वर्णशिरोभूषणाभिलेखे[2] यवन-डाइ्गाम्मालिपिः ऊष्म-(H)-लिप्प्या सह सयँ्योज्ज्य लातिनदन्तोष्ठ्य-'फ'[3]- श्रुतेस् सङ्केताय यवनलिपिमालां स्वीकृतवद्भिर् लातिनभाषाभाषिभिः प्रयुक्ता दृश्यते इति यवनडाइ्गाम्मालिपिर् दन्तोष्ठ्यानूष्मवकारसङ्केताय प्रयुज्ज्यते स्स्मेति विज्ज्ञायते; यतो हि प्राचीनयवनभाषायान् दन्तोष्ठ्यफश्रुतिर् नाऽभूत्, प्राचीनलातिनभाषायाञ् च सा उपस्थिताऽभूत्; अत एव अनूष्म-दन्तोष्ठ्यवश्रुतेर् लिपौ डाइ्गाम्मायाम् ऊष्मलिपिं सयँ्योज्ज्य स्वभाषाया दन्तोष्ठ्यसोष्मश्रुतेस् सङ्केतः प्राचीनलातिनभाषाभाषिभिर् यवनलिपिमालां स्वीकृतवद्भिः कृत इति तु उपपन्नतरम् भवति। कालान्तरे च यदा डाइ्गाम्मालिप्प्या प्राचीनयवनभाषायामेतादृश्याश् श्रुतेः प्रातिनिद्ध्यङ् क्रियते स्स्मेति तत्थ्यलँ् लातिनभाषाभाषिणाम् बुद्धौ अनुपस्थितमभूत् तदा एकाकिन्न्याऽपि डाइ्गाम्मालिप्प्या लातिन-दन्तोष्ठ्यसोष्मफश्रुतेः प्रातिनिद्ध्यङ् कर्तुं शक्क्यते इति मत्त्वा तैस् तत ऊष्मलिपिरपाकृता। इदञ् च ड्वेनोसाभिलेखाद् विज्ज्ञायते[4]। प्राचीनयवनभाषायाम् प्रयुक्ता डाइ्गाम्मालिपिः(F) इत्तुरुरिया-वर्णमालायाम् प्राचीनलातिनवर्णमालायाम्, रोमीयवर्णमालायाङ् क्यारो-लीयवर्णमालायाम् आधुनिकाङ्गलवर्णमालायाञ् च समानेनैव रूपेण प्रयुक्ता दृश्यते इति ऐतिह्यविदः। एतच् च तया लिप्प्या सङ्केतत्यायाश् श्रुतेस् साजात्यस्य समानवर्गीयत्वस्य च सूचकम्। इत्तुरुरिया-भाषायालँ् लातिन-रोमीया-ऽऽङ्गलभाषासु च डाइ्गाम्मालिपिसङ्केतत्या श्रुतिर् दन्तोष्ठ्याऽस्ति[5]। अतः प्राचीनयवनभाषायामपि डाइ्गाम्मा-लिपिसङ्केतत्या श्रुतिर् दन्तोष्ठ्यैवाऽभून् न तु ओष्ठ्या[6] इति कल्प-यितुं शक्क्यते। यवनानामवनतौ प्रारब्धायान् तु तेषाम् भाषायाश् श्रुतीनावँ् विकाराल् लिपिप्प्रयोगे दोषस्य प्रवेशाद् वाऽपि प्राचीन-

---

१. E. B. Vol. I., P. 665; E.A. Vol. I, p. 438 b.

२. E. B. Vol. I., P. 667; E. A. Vol. I, p. 438 c.

३. अनुकरणमात्त्रमेतत्, तेषां हि फकारस्य (F इत्त्यस्य) उच्चारणम् उपरितनैर् दन्तैरधरोष्ठं स्पृष्ट्वा क्रियते। ४. E.B. Vol. I, p. 667. ५. पूर्वटिप्पणीषूक्तयोर् विश्श्वकोशयोस् समबद्धम् प्रकरणन् द्रष्टव्यम्। ६. ओष्ठ्यशब्दोऽत्त्र केवलोष्ठजन्न्यः (bilabial) इत्त्यस्स्यार्थे प्रयुक्तोऽस्ति।

डाइ्गाम्माया अप्प्रयोगस् तत्तत्स्थाने अनन्यस्स्या[1] लिपेरयथार्थप्रयोगश् च प्रारब्धोऽपि भवितुं शक्नोति[2]। एतेन प्राचीनभारतीययोरपीयभाषामूलभाषायाम् प्रातिशाक्ख्यप्रतिपादितवकारसदृशो वर्णो नाऽभूदिति कथनमपुष्टमिति स्स्पष्टम् भवति। आङ्ल-व(W)- कारसदृशस्स्य वकारस्स्य पदादिस्थस्य पदमद्ध्यस्थस्य पदान्तस्थस्याऽपि प्रातिशाक्ख्यप्रतिपादितरूपे वकारे परिणतिरपि भाषायावँ विकारस्स्य प्रवृत्तेरननुकूलमेव प्रतिभाति। आङ्ल-व (W)- सदृशी श्रुतिराधुनिकीषु फरान्स-शर्मण्य - रस्स्यादिभाषास्स्वपि नास्तीति[3] आङ्ल-व(W)- लिपिरपि अर्वाचीने काले एव कल्पिता[4] इति च तत्सङ्केतत्यायाश् श्रुतेप्राचीनभारतीययोरपीयभाषामूलभाषायावँ वर्तमानत्वन् न हि विचारसहम् प्रतीयते। (च)संहितायामुकारस्स्य विकारेण जातो वकारस् तु कियताप्प्यंसेन उकारोच्चारणोपयोग्योष्ठविन्न्याससदृशौष्ठविन्न्यासेन उच्चारणीयोऽपि भवति प्रकृतिधर्मसङ्क्रमणात्[5], तस्स्यैव हि सामिस्स्वरत्वमपि उचितमाधुनिकानान् दृष्ट्याऽपि, तस्स्यैव च लघुप्प्रयत्नतरत्वमपि शास्त्रेण प्रतिपाद्द्यते[6]; तथापि तस्स्यापीषत्स्पृष्टत्वमावश्यकमिति न सर्वथा वर्तुनीभूताब्भ्यामोष्ठाब्भ्यान् तस्स्योच्चारणङ करणीयम्, न च तस्स्यापि सर्वथा आङ्लभाषाया व(W)- श्रुत्या सदृशी श्रुतिरुत्पाद्द्या। बभूवुः, गुर्वोः इत्यादौ तु वकारस्स्य आङ्लभाषा-व-(W)-कार-सदृशमुच्चारणं सर्वथाऽसम्भवीत्यपि सम्म्यग् विचार्यं सुधीभिः ॥७५॥

---

१. बिटा (beta) इत्याक्ख्याया युप्साइ्लन् (upsilon) इत्याक्ख्यायाश् च। २. इदमस्माभिः पूर्वटिप्पण्युपात्तविशश्वकोशभागाद्द्यद्ध्ययनेन सम्भावितन् तद्विशेषज्ज्ञैर् विवेक्तव्यम्। ३. Casell's French-English Dictionary, Casell's German-English Dictionary, Chamber's Twentieth Century Dictionary इत्याक्ख्येषु ग्रन्थेषु दत्तन् तत्तद्भाषाश्रुतिविवरणन् दृश्यम्। ४. Chamber's Twentieth Century Dictionary 1964, p. 1234. ५. "स्थानी प्रकल्पयेदेतावनुस्स्वारो यथा यणम्" (पा. व्या. भा., अ इ उण् इत्यत्तर वा. ३) इत्यपि विमृश्य विचार्यम्। ६. अष्टा. ८।३।१८; शौ. च. २।२४।

(छ) श– ष– स– श्रुतिविवेकः

भिन्ना हि श- ष- साश् श्रुत्या स्स्थानेन करणेन च ।
विदामप्यत्तर मोहो यश् छेत्स्यतेऽनुपदं हि सः ॥७६॥

यद्द्यपि श्रुतौ भेदस् तूच्चार्य श्रावयितुमेव शक्यते न लेखित्वा यथातथम् प्रतिपादयितुम्, तथापि यथा श्रुतिविवेको भवति तथोच्चारणस्य रीतिर् बलाद्ध्याये करणाधिकारे सम्म्यक् प्रतिपादयिष्यते । तेन च श–ष–स– विषयको मन्दानावँ विद्द्वन्मन्न्यानामपि सर्वोप्यविवेकस् समूलकाषङ्कषित्वा निवारयिष्यते । तेनैव च 'पत्थ्या स्वस्तिः' इत्याख्ये ग्रन्थे मधुसूदनशर्मणा विद्द्वावाचस्पतिनोक्तम् "मद्ध्यस्स्थानत्तरये त्वर्धस्स्पृष्टत्वे हकारादभिन्नरूपत्वेऽपि तरयाणामूष्मणामत्यल्पभेदं समानमिव रूपञ् जायते श ष स इति"[1] इत्यपि निराकृतम् भविष्यति ॥७६॥

(ज) जिह्वामूलीयोपद्ध्मानीयविसर्जनीयविवेकः

उच्चारणाय परयोऽ कखयोस् स्थानतुल्ययोः ।
विच्छिन्नोऽर्धविसर्गस् तु जिह्वामूलीय उच्च्यते ॥७७॥

यथा कुक्कुट इत्यादौ सयँयुक्तयोऽ ककारयोर् मद्ध्ये समानस्स्थानस्स्योत्तरस्स्य ककारस्स्योच्चारणाय विच्छिन्नोऽभिनिहितीभूतऽ ककारोऽर्ध एवोच्चार्यते तथैव ब्राह्मणऽ कथयति शूद्द्रऽ खनति इत्यादौ विसर्गोऽपि उत्तरयोस् समानस्स्थानकयोऽ ककारखकारयोरुच्चारणाय विच्छिन्नस् सन् पूर्वार्धभागमात्तर उच्चार्यते । सोऽयमर्धविसर्गो जिह्वामूले भव[2] इति जिह्वामूलीय इत्युच्च्यते ॥७७॥

परयोऽ पफयोरुच्चारणे हि स्स्थानसाम्म्यतः ।
विच्छिन्नोऽर्धो विसर्गोऽयमुपद्ध्मानीय उच्च्यते ॥७८॥

पूर्वोक्तप्रकारेणैव कालऽ पचति भूतानि वृक्षऽ फलति इत्यादौ विसर्ग उत्तरयोस् समानस्स्थानयोऽ पकारफकारयोरुच्चारणे विच्छिन्नस् सन् पूर्वार्धभागमात्तर उच्चार्यते । सोऽयवँ विसर्ग उपद्ध्मानयोर् (ओष्ठयोर्) भव इति उपद्ध्मानीय[3] इत्युच्च्यते ॥७८॥

---

१. १४ पृ. । २. अष्टा. ४।३।६२ । ३. "उश् च पश् च द्ध्मायेते अनेन, तत्तर भव इति योगेन उपद्ध्मानीयस्स्यौष्ठ्यत्वम्" इति लघुशब्देन्दुशेखरे वैयाकरणसिद्धान्तकौमुदीस्स्थानकरणप्रकरणव्याख्याने नागोजिः'

(झ) अनुस्स्वारविवेकः

अनुस्स्वारो ङकारादेस् स्फुटवँ् वर्णान्तरात् पृथक् ।
वेदशाखास्स्वस्स्य नाना-विधास् सन्ति प्रभेदकाः ॥७९॥

सिंहः मीमांसा इत्यादौ इदानीम् प्रायस् सर्वैरपि पण्डितैरपण्डितैश् च सिम्ह-सिङ्ह-सीँह - (सिङ्घ) - मीमाम्सा - मीमाङ्सा-मीमान्सेत्यादिरूपेण अयथावदुच्चार्यमाणोऽपि संस्कृत-संस्थेत्यादौ संस्कृतज्ञैः प्रायेण शुद्धरूपेणोच्चार्यमाणोऽनुस्स्वारो ङकार-नकार-मकारादिब्भ्योऽन्येब्भ्यो वर्णेब्भ्यस् स्फुटम् पृथगिति तस्य स्वतन्त्रवर्णतास्स्पष्टा भवति । अनुस्स्वारस्योच्चारणे ङकाराद्द्युच्चारणे प्रयोज्यानि करणानि न व्याप्रियन्ते; ओष्ठावपि विश्श्लिष्टौ भवतः[1] । एतच् च बलाद्ध्याये स्फुटतरम् प्रतिपादयिष्यते । एतस्याऽनुस्स्वारस्य च वेदशाखासु विविधानि रूपाणि श्रूयन्ते । तेषावँ् विवरणमस्मिन्नेवाद्ध्याये वर्णविशेषोच्चारणविशेषप्रतिपादनाधिकारे करिष्यते ॥७९॥

(ञ) रङ्गविवेकः

नस्स्य लोपविकाराब्भ्याम् प्राक्स्वरे रक्तताङ् गते ।
अरक्तन् तत्पूर्वभागमुच्चार्य खलु वैदिकाः ॥८०॥
उच्चारयन्ति तत्प्रान्तङ् कृत्वा नासिक्यमात्तरकम् ।
तन् नासिक्यं रङ्गमाहुर् वेदे नैकविधश् च सः ॥८१॥

यत्तर नकारस्स्य विकारो लोपो वा भवति तत्तर तस्मान् नकारात् पूर्वस्स्य स्वरस्स्याऽनुनासिकत्वम् ऋग्वेदप्रातिशाक्ख्यस्स्य "नकार आकारोपधः पद्द्यान्तोऽपि स्वरोदयो लुप्यते"[2] "नकारस्स्य लोपरेफोष्मभावे पूर्वस् तत्स्थानादनुनासिकस् स्वरः"[3] इत्यादिभिर् वचनैः, शुक्लयजुर्वेदप्रातिशाक्ख्यस्स्य "अनुनासिकमुपधा प्रागन्तस्त्थायाः"[4] "नुः"[5] इत्यादिभिर् वचनैः, तैत्तिरीयप्रातिशाक्ख्यस्स्य "नकारस्स्य रेफोष्मयकारभावाल् लुप्ते च मलोपाच् च पूर्वस्स्वरोऽनुनासिकः"[6] इत्यादिभिर् वचनैः, ऋक्तन्तरस्स्य "घान् नो डि विसर्जनीयं यवोहिषु"[7] "व्यवधानोऽन्त्यविकारे"[8] इत्यादिभिर् वचनैः, शौनकीयचतुरद्ध्यायि-

---

१. पा. शि. श्लो. २४ । २. ४।६५ । ३. ४।८० ।
४. ३।१३१ । ६. ३।१३३ । ५. १५।१ । ७. ३।६।२ (११२) ।
८. ४।५।१ (१८५) ।

कायाः "नकारस्य चटतवर्गेष्वघोषेष्वनूष्मपरेषु विसर्जनीयः"[१] इत्यादिभिर् वचनैः, पाणिनीयव्याकरणस्य "अत्तरानुनासिकः पूर्वस्य तु वा"[२] "आतोऽटि नित्यम्"[३], "नश् छव्व्यप्रशान्"[४] "दीर्घादटि समानपादे"[५] इत्यादिभिर् वचनैरन्वाख्यायते। तत्तरैतैर् वचनैरनुनासिकत्वेनाऽन्वाख्यातस्य स्वरस्योच्चारणे असत्यपि प्रातिशाख्येषु विशेषवचने[६] केचिद् वैदिकास् तत्पूर्वभागमननुनासिकमेवोच्चार्य तदुत्तरभागमनुस्वारसदृशम् अन्ते उँ इतीव श्रूयमाणन् नासिकामात्तरस्थानकङ् कृत्वा उच्चारयन्ति। तञ् च नासिकामात्तरस्थानकवँ् वर्णभागं स्वतन्त्रवर्णमिव व्यवहृत्य तं रङ्ग इति व्यपदिशन्ति। यत् तु मधुकरफाटकेन सर्वस्यापि स्वरस्य (पूर्णस्यैव स्वरस्य) रङ्गसञ्ज्ञा इत्युक्तन्[७] तदसत्, नासिक्क्यभागस्यैव रङ्गतायाः प्राचाङ्ग्रन्थेषूक्तत्वात्[८]; रङ्गस्य व्यञ्जनरूपतायाश् च प्रतिपादितत्वात्[९], तस्यैव चाऽनुस्वारसदृशत्वेन द्वितीयानुस्वारतायाः[१०] प्राचामभिमताया उचितत्वाच् च। यच् च तेनैव हरदत्तमनुगच्छता "आतोऽटि नित्यम्"[११] इति पाणिनीयसूत्तरेणान्वाख्यातस्य अनुनासिकस्वरस्य स्थाने तैत्तिरीया अननुनासिकं स्वरमनुस्वारञ् चाऽधीयते इत्युक्त्वा तस्याऽनुस्वारस्याऽपि रङ्गत्वेवँ् व्यवह्रियते इत्युक्तम्[१२], तदपि न विचारसहम्, तथा सति अनुस्वारस्य रङ्गत्वेन व्यवहारस् तैत्तिरीयाणान् निष्प्रयोजनस् स्यादिति। उच्चारणेऽप्यस्याऽनुस्वारविलक्क्षणत्वे तु रङ्गत्वमेवास्य व्यवहर्तव्यं स्याद् रङ्गानुस्वारत्वमेव वा। यद्द्यपि "आतोऽटि नित्यम्"[१३] इति पाणिनीयसूत्तरे वार्तिकम् भाष्यञ् च

---

१. २।२६। २. ८।३।२। ३. ८।३।३। ४. ८।३।७। ५. ८।३।९। ६. प्रातिशाख्येऽनुक्तानामुच्चारणसम्बद्धानावँ् विषयाणां शिक्क्षावचनैर् विधानङ् क्रियते इति वैदिकाभरणकारेणाऽपि स्वीकृतमस्ति (तै. प्रा. ११।९)। ७. पा. शि. शि. स. स., पृ. २२५। ८. "पञ्च रङ्गाः प्लुता दीर्घाश् चत्वारस् तैत्तिरीयके। (श्लोकाँ सुमङ्गलाँ यद्घराँ उपहूताँ ममाँ प्लुताः। दीर्घास् ताँ इमि देवाँ उ स्वाँ अहम् ममृवाँ अव।) तेषामन्त्येषु नासिक्क्यं रङ्गसञ्ज्ञमितीर्यते।" इति आरण्यशिक्क्षायाम्। ९. मा. शि. श्लो. ११२। १०. पा. शि. प्र. (शि.स. पृ. ३८९)। ११. अष्टा. ८।३।३। १२. पा. शि. शि. स. स., पृ. २२५। १३. अष्टा. ८।३।३।

नोपलब्ध्येते, तथापि काशिकाकारेण तत्र "महाँ असि, महाँ इन्द्रो य ओजसा, देवाँ अच्छादिव्यत्" इत्युदाहृत्य "के चिदनुस्स्वारमधीयते स च्छान्दसो व्यत्ययो द्रष्टव्यः" इत्युक्तम्, पदमञ्जरीकारेण च "के चिदिति तैत्तिरीयाः, अनुस्स्वारमधीयते शुद्धाकारात् परम्" इति तद् व्याख्यातम्। एतच् च व्यासशिक्षायामनुनासिकपक्षस्यैवोक्तत्वात्[1] तस्या अननुकूलमपि तैत्तिरीयप्रातिशाख्यस्य तिरभाष्यरत्नव्याख्यानस्य[2] तु अनुकूलमेव। एवञ् च तैत्तिरीयाणामेव एवमादिषु अनुस्स्वारस्य अनुस्स्वारविशेषरूपस्य रङ्गस्य वा उच्चारणमिति प्रतीयते, तथापि रङ्गो बह्वृचानां शिक्षायां शैशिरीयशिक्षायाम्[3], पाणिनीयशिक्षायाम्[4], याजुषाणां शिक्षायायँ याज्ञवल्क्यशिक्षायाम्[5], अमोघानन्दिन्यां शिक्षायाम्[6] चारायणीयशिक्षायाम्[7], व्यासशिक्षायाम्[8]; सामगानां शिक्षायान् नारदीयशिक्षायाम्[9], लोमशीयां शिक्षायाम्[10]; आथर्वणानां शिक्षायाम् माण्डूक्यां शिक्षायाञ्[11] च विहित इति रङ्गस् सर्ववेदशाखासाधारणः प्रतीयते। रङ्गोच्चारणविधिरपि उपर्युक्तासु सर्वासु शिक्षासु अन्यास्स्वपि बह्वीषु शिक्षासु विशेषविवरणैः प्रतिपादितः। तथाहि **शैशिरीयशिक्षायाम्**– "लाक्षारक्तयँ यथा तोयन् नकाराङ्गस्स्वरन् तथा। सर्वस(र)ङ्गवँ विजानीयाद् बन्धूरिति निदर्शनम्॥ हृदयादुत्थितं रङ्गङ कांस्येन समसुस्स्वरम्। मातृत्रिकञ् च द्विमात्रञ् च जघन्यां इति निदर्शनम्॥ यथा सौराष्ट्रिका नारी तक्करां इत्यभिधीयते (?)। एवं रङ्गाः प्रयोक्तव्याः खे अराँ इव खेदया॥ लुप्ते नकारे यत् स्वारं रञ्जनूति शौनकादयः। आदिरङ्गमिति प्रोक्तन् न त्वा भीरिव विन्दतीँ३॥"[12] इति। **शौनकशिक्षायान्** तु शैशिरीयशिक्षायां स्वकीयरङ्गविलक्षणतया प्रोक्तस्य आदिरङ्गस्य "नकारस्य पदान्तस्य रेफोऽन्तस्थास्स्वरोष्मसु। लोपस् त्वाकारपूर्वस्य सशौ तु तचयोः परे। पूर्वस्स्वरश् च नासिक्यस् स च रङ्गः प्रकीर्तितः। पूर्वकालो यथा तस्य रज्यमाने स एव च"[13] इति

---

१. सू. ४१५–४१७। २. १५।२,३। ३. श्लो. १०३–१०८।
४. श्लो. २६–२९। ५. श्लो. १८९–१९४ (शि. स.)।
६. श्लो. ४१–४६। ७. पृ. ३०–३१। ८. सू. ६; ४१५–४१७।
९. २।४।५–९। १०. १।६–९। ११. श्लो. ११०–११५।
१२. श्लो. १०५–१०८। १३. श्लो. २३–२४।

प्रतिपादनन् दृश्यते। **पाणिनीयशिक्क्षायामपि-** "यथा सौराष्ट्रिका नारी तक्करँ इत्यभिभाषते। एवं रङ्गाऽ प्रयोक्तव्याऽ खे अराँ इव खेदया॥ रङ्गवर्णम् प्रयुञ्जीरन् नो ग्रसेत् पूर्वमक्क्षरम्। दीर्घस्स्वरम् प्रयुञ्जीयात् **पश्चान् नासिक्क्यमाचरेत्**॥ हृदये चैकमात्तरस् तु अर्धमात्तरस् तु मूर्धनि। **नासिकायान् तथार्धञ् च** रङ्गस्स्यैवन् द्विमात्तरता॥ हृदयादुत्करे तिष्ठन् कांस्येन समनुस्स्वरन्। मार्दवञ् च द्द्विमात्तरञ् च जघन्न्वाँ२ इति निदर्शनम्। मद्ध्ये तु कम्पयेत् कम्पमुभौ पार्श्वौ समौ भवेत्। सरङ्गङ कम्पयेत् कम्पं रथीवेति निदर्शनम्॥"[1] इति। **याज्ज्ञवल्क्यशिक्क्षायाञ् च-** "रङ्गे चैव समुत्पन्ने नो ग्रसेत् पूर्वमक्क्षरम्। स्वरन् दीर्घम् प्रयुञ्जीत पश्चान् नासिक्क्यमुच्चरेत्॥ यथा सौराष्ट्रिका नारी अराँ२॥ इत्यभिभाषते। एवं रङ्गः प्रयोक्तव्यो ङकारपरिवर्जितः। द्विमात्तरो मात्तिरको वाऽपि नासामूलं समाश्रितः। अन्ते प्रयुज्ज्यते रङ्गऽ पञ्चमैस् **सर्वनासिकः**। (अनन्तरम् मकारस्स्य यो रङ्गस् तत्तर रज्ज्यते। सर्वानुनासिकवँ विद्द्यादेषा मन्न्योपधानिका॥ यरलवाः शषसहा अष्टैते चोपधानिनः। वर्गान्तै रज्ज्यते यस् तु सर्वैस् सर्वानुनासिकः।) नस्त उत्पद्द्यते रङ्गः कांस्येन समनिस्स्वनः। मृदुश् चैव द्द्विमात्तरश् च वृष्टिमारँ॥ इव दर्शनम्॥ यादृशी रक्तवर्णाभा जपायाः कुसुमेऽथवा। तादृशं रञ्जयेद् वर्णम् **प्रान्ते नासिक्क्यमाचरेत्**॥ लाक्क्षारक्तयँ यथा तोयन् नकारान्तम् पदन् तथा। सर्वं रङ्गवँ विजानीयाच् छत्तरूनिति निदर्शनम्॥ लुप्ते नकारे यत् स्वारं रञ्जन्ति शौनकादयः। एवं रङ्गवँ विजानीयात् नाब्भ्याऽआसीन् निदर्शनम्॥ पञ्च रङ्गाः प्रवर्तन्ते घात-निर्घात-वज्जिरणः। अहिणः प्रहिणो ज्ञेय आ ई ऊ ऋ ॠ ओ दर्शनम्।"[2] इति। **अमोघानन्दिन्न्यामपि-** "जहि शत्तरून् करतून् वनस्पतीन् परिधीन् क्षिणन्ति शत्तरूँ रनपव्ययन्तः। अनुरङ्गाः पञ्चैकार्धमात्तिरका भवन्ति। पूषा मित्तरो वसुश् चैव अञ्जनाः परिकीर्तिताः। एकार्धमात्तिरकां स्थित्वा पञ्चैते चाऽनुनासिकाः। पञ्च रङ्गाः प्रवर्तन्ते घातनिर्घातवज्जिरणः। अहिणः प्रहिणो ज्ञेयो यथाऽऽ ई ऊ ऋ निदर्शनम्। देवाँ२॥ऽआसादयेति घातः। देवा२॥ऽइदेवीति निर्घातः। देवाँ२॥ऽउपागा इति वज्जिरणः। देवाँ२॥ऽऋतुभिरिति अहिणः। अमित्तराँ२॥ऽओषतादिति प्रहिणः॥ द्विमात्तरो मात्तिरको वाऽपि नासामूलं

---

१. श्लो. २६-३०। २. श्लो. १८९-१९४, २१६-२१७ (शि.स.)।

समाश्रितः । अन्ते प्रयुज्यते रङ्गः पञ्चमैस् सर्वनासिकैः । बण् महाँश् च बडादित्यो ह्यद्धादेव महाँ२।।ऽअसि । बट् सूर्यस्य तु सत्त्रातो महारङ्गाः प्रकीर्तिताः ।। परि ते परि माग्ने च अदृश्रम् परिकीर्तिताः । यस्याद्वयम् प्रदृश्यन्ते अतिरङ्गाः प्रकीर्तिताः ।।"[1] इति । **मल्लशर्मशिक्षायाम् च–** "सुसन्धेश् चाऽवसानस्य साऽर्धद्द्व्यङ्केन बिन्दुना । भङ्गं स्याद् यत्तर मन्तरेण वै रङ्गस् तु भवेदिति ।। महाशब्दोऽतिशब्दश् च यद्वर्णात् प्राक् प्रवर्तते । महारङ्गोऽतिरङ्गश् च सञ्ज्ञा तस्यैव निश्चिता ।। ह्रस्स्वात् तु द्द्विगुणो दीर्घो दीर्घादेकगुणः प्लुतः । प्लुतादेकगुणो रङ्गो रङ्गादेकगुणाधिकः । महाशब्देन सयँयुक्तो व्यञ्जनम् चार्धमात्त्रिकम् । अतिरङ्गो महारङ्गाद् वृद्धो ह्येकगुणाधिकः । एतत् तु किल वेदे वै ज्ञेयम् पूर्णेऽपि सुस्थिरम् ।।"[2] इति । **चारायणीयशिक्षायामपि–** "यथेन्द्रनीलप्रभयाऽभिभूतश् शुक्लो मणिर् याति हि नीलभावम् । तथैव नासिक्यगुणाभिभूतस् स्वरोऽपि रङ्गतत्वमुपैति कृत्स्नम् । हृदयाज् जायते रङ्गऽ कांस्यवच् चैव निस्स्वनः । लघुश् चैव द्द्विमात्त्रश् च दव (देव?) त्त्वेति निदर्शनम् ।। [दधत्वार्यो नर्यः । हकारे व्यञ्जनोदस् स्याच् शश(ष)सेषु स्स्वरोदयः । शषसैर् विवृतवँ विद्द्यात् तद्धरि (?) सवँवृतवँ विदुः । सयँयोगे रशयोर् दोषश् शतवत्सो निदर्शनम् (?)।।] तस्य मात्त्रा तु हृदये अणुमात्त्रा तु मूर्धनि । नासाग्रे त्त्वणूनाम् मात्त्रा रङ्गस् स परिकीर्तितः ।। न स्स्वरेण विना रङ्गो ङकारेण तथैव च । उभयोर्धान– (ध्वान ?) सयँयोगाद् रङ्ग इत्यभिधीयते ।। र–परे रङ्गमित्त्याहुरघोषे मुखनासिकः । स्वरपरे तु नासिक्यस् तनुमद्ध्यन् दधत्त्वयोः ।। ऋतूं ऋतुपते भ्रातृव्यवोह्यनन्ते (?) गोमां अग्ग्रे ।"[3] इति । **व्यासशिक्षायाम् च–** "अकारान्तऽ प्लुतो यश् चेदनुनासिक उच्च्यते । अमत्त्रद्ध्वनितुल्यश् च रङ्गसञ्ज्ञ इतीर्यते । श्लोकाँ गलाँ ममाँ हूताँ यद्धराँ एवेति च प्प्लुताः । दीर्घा देवाँ उ ताँ इमि ममृवाँ अ स्वाँ अहङ कठे"[4] इति । **शम्भुशिक्षायामपि–** "रङ्गप्प्लुतश् चतुर्मात्त्रश् शुद्धप्प्लुतस् त्रिमात्त्रिकः ।"[5] इति । **सर्वसम्मतशिक्षायाम् च–** "प्लुतो वर्णऽ पदान्तस्स्थो नासिक्यो रङ्गसञ्ज्ञकः । चत्त्वारऽ काठके रङ्गा दीर्घा ह्यारण्यके विदुः ।। पञ्च रङ्गाऽ

---

१. श्लो. ४१–४६ । २. श्लो. ४३–४७ । ३. पृ. ३०–३१ ।
४. सू. ४१५–४१८ । ५. श्लो. ४७ ।

प्लुता दीर्घाश् चत्वारस् तैत्तिरीयके । श्लोकाँ सुमङ्गलाँ यद्घराँ उपहूताँ ममाँ प्लुताः । दीर्घास् ताँ इमि देवाँ उ स्वाँ अहम् ममृवाँ अवा"[1] इति, "नासिक्यो व्यक्तिमद्ध्यस्स्थस् सपादो मात्त्रिको भवेत्"[2] इति च । **आरण्यशिक्षायाञ् च–** "श्लोकाँ सुमङ्गलाँ यद्घराँ उपहूताँ ममाँ प्लुताः । दीर्घास् ताँ इमि देवाँ उ स्वाँ अहम् ममृवाँ अव । पञ्च रङ्गप्प्लुता दीर्घाश् चत्वारस् तैत्तिरीयके । **तेषामन्त्येषु नासिक्यं रङ्गसञ्ज्ञमितीर्यते ।** रङ्गे स्वरे च मात्त्रैका प्रत्त्येकं रङ्गदीर्घयोः । रङ्गे स्वरे च द्वे मात्त्रे तथावत् प्लुतरङ्गयोः । रङ्गप्प्लुतश् चतुर्मात्त्र इत्युक्तो याजुषां (षे ?) मते । ऊष्मरेफस्स्वरेब्भ्यः प्रागनुस्स्वारः प्रवर्तते । परमात्मं सरूपम् प्राक् मकारस् सानुनासिकः (?)"[3] इति । **पारिशिक्षायाञ् च–** "रङ्गे मुखे व्याग्घरुतोपमं स्याद् मात्त्राद्द्वयं हृज्जनितन् त्वनास्स्यम् । मात्त्राद्द्वयं स्यादिह कांस्यघण्टानादस् सकम्पस् स तु मूर्धजातः ।। नासिक्यरन्ध्रद्द्वयनिस्सृतोऽन्त्ये स्यादेकमात्त्रस् स तु काकली स्यात् । सौराष्ट्रिकागोपवधूस् सुकण्ठस्स्वरेण तक्क्राँ इति भाषते यथा । तथा समुच्चार्य वदेत् स्वकालाद् रङ्गश् च कम्पः खलु वर्धते सः । देवा उदा इम् ममृवा अव स्वा अहङ कठे स्युः खलु रङ्गदीर्घाः ।। एते द्विमात्त्राश् च सपादमात्त्रनासिक्ययुक्ताश् च विवृत्तिपूर्वात् । सपादमात्त्रत्त्रितये हृदि स्स्यादेकस् ततो मूर्धनि चार्धमात्त्रः ।। भवेद् विशेषो मुखनासिके च व्यक्तेश् च तस्मा अपि साणुमात्त्रः"[4] इति । **सर्वलक्षणमञ्जर्याञ् च–** "रङ्गप्प्लुते व्याग्घरशब्दः पूर्वभागे विधीयते । मात्त्राद्द्वयन् तु तत्त्रैव तथा निरनुनासिकम् ।। मूर्धस्स्थाने तृतीयांशः कांस्यद्ध्वनिसमस् तथा । कम्पश् श्लिष्टस् तथा चैव मात्त्रिकासहितस् तथा ।। चरमांशस् तु नासिक्ये तथैव च बिलद्द्वये । निस्सृतांशस् तु तत्त्रैव मात्त्रिकासहितस् तथा । एवं रङ्गप्प्लुताः प्रोक्ताश् चतुर्मात्त्रास् समीरिताः ।।"[5] इत्यादि प्रोक्तम् । **नारदीयशिक्षायाञ् च–** "नकारान्ते पदे पूर्वे स्वरे च परतस् स्थिते । अकारं रक्तमित्त्याहुर् नकारेण तु रज्ज्यते ।। नकारान्ते पदे पूर्वे व्यञ्जनैश् च यवोहिषु । अर्धमात्त्रा तु पूर्वस्स्य रज्ज्यते त्त्वणुमात्त्रया ।। नकारस् स्वरसयँयुक्तश् चतुर्युक्तो विधीयते । रेफो रङ्गश् च लोपश् चाऽऽनुस्स्वारोऽपि (च) वा क्वचित् ।। हृदयादुत्तिष्ठते रङ्गः कांस्येन समनि-

१. श्लो. ७६–७८ । २. श्लो. १०० । ३. श्लो. १०२–१०४ ।
४. सू. १५३–१५७ । ५. व्या. शि. टि., पृ. १५९ ।

स्स्वनः। मृदुश् चैव द्द्विमात्तरश् च दधन्न्वाँ इति दर्शनम्। यथा सौराष्ट्रिका नारी अराँ इत्त्यभिभाषते। एवं रङ्गऽ प्रयोक्तव्यो नारदस्य मतयँ यथा"[1] इति। **लोमशश्यां शिक्क्षायाञ् च**– "रङ्गस् तु द्द्विविधो ज्ज्ञेयस् स्वरपरो व्यञ्जनपरः। पारावतसवर्णाभो विहितोऽक्क्षरचिन्तकैः॥ तस्स्य मात्त्रा तु हृदये अणुमात्त्रा तु मूर्धनि। नासाग्रे त्वणूनाम् मात्त्रा रङ्गस्स्य परिकीर्तिता॥ रङ्गे चैव समुत्पन्ने नो ग्रसेत् पूर्वमक्क्षरम्। स्वरन् दीर्घम् प्रयुञ्जीत तस्स्य नासिक्क्यमुच्चरेत्॥ द्विमात्त्रो मात्त्रिको वाऽपि नसि मूलं समाश्श्रितः। अन्ते प्रयुज्ज्यते रङ्गऽ पञ्चमैस् सर्वनासिकः॥"[2] इति। **माण्डूक्क्यां शिक्क्षायामपि**– "नकारान्ते पदे पूर्वे स्वरे च परसंस्थिते। रक्तवँ वर्णवँ विजानीयान् नो ग्रसेत् पूर्वमक्क्षरम्॥ रक्तवँ वर्णयँ यदा पश्श्येद् विवृत्त्या सह संस्थितम्। व्यञ्जनान्तवँ विजानीयाद् गोमाँ इति निदर्शनम्॥ यथा सौराष्ट्रिका नारी अराँ इत्त्यभिभाषते। एवं रङ्गाऽ प्रयोक्तव्या ङकारपरिवर्जिताः॥ नासादुत्पद्द्यते रङ्गऽ कंसेन समनिस्स्वनः। मृदुश् चैव द्द्विमात्तरं स्याद् वृष्टिमाँ इति निदर्शनम्॥"[3] इति। एतेषावँ वचनानाम् पर्यालोचने मधुकरफाटकस्स्य "अनुनासिकस्स्वरस्स्यैव रङ्गव्यवहारे तु न काऽप्प्यनुपपत्तिः"[4] इति "रक्तो रङ्गश् चेत्त्यनर्थान्तरमेव"[5] इति च कथनमसङ्गतमिति निश्चेतुं शक्क्यम्। अतोऽस्माभिऽ कारिकाव्भ्याम् प्रतिपादितमेव रङ्गस्स्वरूपयँ यथार्थमिति बोद्ध्यम्। अतऽ प्रान्ते पूर्वस्स्वरावयवरूपत्त्वेन औकारे उकार इव आगच्छन् नासिकामात्त्रस्स्थानोऽनुस्स्वारसदृशोऽपि ततो मृदुतरत्त्वात् ततो भिन्नऽ प्रातिशाक्ख्यकारादिवचनैरलब्भ्योऽपि शिक्क्षाकारवचनैस् सिद्धः, पाणिनीयेन "आतोऽटि नित्त्यम्"[6] इत्त्यादिना वचनेनाऽलब्भ्योऽपि "व्यत्त्ययो बहुलम्"[7] इति वचनेन लब्धुं शक्क्यश् च हि रङ्ग इति विवेक्तव्व्यं सुधीभिः। यच् च रङ्गस्स्य अनुनासिकत्त्वम् प्रतिज्ज्ञाय तत्समर्थनाय "मुखनासिकावचनोऽनुनासिकः"[8] इति पाणिनीयं सूत्त्रन् तद्व्याक्ख्यानानि च प्रमाणीकृतानि तेनैव; तदपि उपेक्क्ष्यम्; रङ्गस्स्य "नासिक्क्यं रङ्गमुच्च्यते"[9], "पश्चान्नासि-

---

१. २।४।५–९। २. १।६–९। ३. श्लो. ११०–११५।
४. पा. शि. शि. स. स., पृ. २२७। ५. तत्त्रैव, पृ. २२६।
६. अष्टा. ८।३।३। ७. अष्टा. ८।१।८५ (भाष्ष्यवँ विमृश्श्यम्)।
८. अष्टा. १।१।८। ९. शै. शि. श्लो. ७।

क्क्यमाचरेत्"[१] "नासिकायान् तथाऽर्धञ् च"[२], "पश्चान् नासिक्क्यमुच्चरेत्"[३], "अन्ते प्रयुज्यते रङ्गम× पञ्चमैस् सर्वनासिकः"[४], "प्रान्ते नासिक्क्यमाचरेत्"[५], "तेषामन्त्येषु नासिक्क्यं रङ्गसञ्ज्ञमितीर्यते"[६], "रङ्गे स्स्वरे च मात्त्रैका प्रत्त्येकं रङ्गदीर्घयोः। रङ्गे स्स्वरे च द्वे मात्त्रे तथा तत्प्लुतरङ्गयोः।"[७], "रक्तवँ वर्णयँ यदा पश्श्येद् विवृत्त्या सह संस्थितम्। व्यञ्जनान्तवँ विजानीयाद् गोमाँ इति निदर्शनम्"[८] इत्त्यादिभिर् वचनैर् नासिक्क्यत्त्वस्स्य (न तु अनुनासिकत्त्वस्स्य) प्रतिपादितत्त्वात्, व्यञ्जनरूपत्त्वस्स्य सूचितत्त्वाच् च। शैशिरीयशिक्क्षायामस्स्य स्स्पष्टतया व्यञ्जनेषु गणितत्त्वाच् च[९]। रक्तशब्दो हि अनुनासिकपर्यायो मुखनासिकावचनपर्याय इति यावत्[१०]। रङ्गस् तु न मुखनासिकावचन× किन् तु नासिक्क्य एवाऽनुस्स्वार इवेति 'रक्तो रङ्गश् चेत्त्यनर्थान्तरम्' इत्त्यपि अनुपपन्नमेव, सर्वेषामनुनासिकस्स्वराणां रङ्गत्त्वेन व्यवहारस्स्याभावात्, प्रातिशाक्ख्यपाणिनीयव्व्याकरणादिनाऽनुनासिकत्त्वेनाऽन्न्वाक्ख्यातानामपि शिक्क्षावचनै रूपान्तरवत्त्वेन प्प्रतिपादितानामेव स्स्वराणां रङ्गवत्तायास् स्वीकाराच् च। यच् च अनुनासिकस्स्याऽपि स्स्वरस्स्य पूर्वस्मिन् परस्मिन् वैकस्मिन्नेव भागे अनुनासिकत्त्वम् भागान्रे त्त्वननुनासिकत्त्वमेवेति "मुखनासिकावचनोऽनुनासिकः"[११] इति सूत्त्रे वर्त्तमानेब्भ्यो भाष्य्यन्यासपदमञ्जर्यादि- ग्रन्थेब्भ्यस् स्पष्टम् भवति[१२] इति तेनैवोक्तम्, तदपि न विचारसहम्, भाष्य्ये तस्स्य मतस्स्याऽनुल्लेखात्, प्रत्त्युत 'प्रासादवासिन्न्यायमाश्श्रित्त्य तत्त्र मुखग्ग्रहणं शक्क्यमकर्त्तुम्' इति उक्तत्त्वात् सर्वस्स्यैव स्स्वरस्स्य मुखनासिकावचनत्त्वस्स्य प्रतिपादितत्त्वात्, न्यास–पदमञ्जर्योश् चैतद्विषये भाष्य्याननुकूलत्त्वेनोपेक्क्षणीयत्त्वात्, तत्त्र चिकीर्षितस्स्य अनुनासिकस्स्वरे अननुनासिकस्स्वरभागसत्तायाः अननुभवपराहतताया अपलापस्स्यापि अश्श्रद्धेयत्त्वात्, तत्त्रैव भर्तृहरिणा "स हि वर्णः (अनुनासिकवर्णः) न मुख एव नाऽपि नासिकायामेव चात्मवृत्तिलँ लभते किन् तु वायुनाऽन्न्यतरस्स्मिन्ननुपरतशक्तिनाऽन्न्यतरकरणेऽभिहन्न्यमाने स वर्ण आत्म-

---

१. पा. शि. श्लो. २७। २. तत्त्रैव, श्लो. २८।
३. या. शि. श्लो. १८९ (शि. स.)। ४. तत्त्रैव, श्लो. १९१।
५. तत्त्रैव, श्लो. २१६। ६. आर. शि. श्लो. १०३।
७. तत्त्रैव, श्लो. १०४। ८. मा. शि. श्लो. ११२।
९. श्लो. ६–७। १०. ऋ. प्रा. १।३६; ६।१९; १३।२०।
११. अष्टा. १।१।८। १२. पा. शि. शि. स. स., पृ. २२७।

व्यक्तिम् प्रतिपद्द्यते इति ईषन्मुखस्य व्यापार ईषन् नासिकायाः''[1] इत्युक्तत्वाद्; अनुनासिकेषु ङञणनमेषु यँलँवँषु तु एकस्मिन् भागे अननुनासिकत्वस्य भागान्तरे अनुनासिकत्वस्य निरूपयितुङ कथमप्यशक्यत्वाच्च । आचार्येण पाणिनिना तु सुहृद्भूतेन अनुनासिकवर्णस्स्वरूपविषये मन्दान् व्युत्पादयितुम् मुखग्रहणङ कृतवता प्रातिशाख्यप्रसिद्ध्यनुरोधेन महासञ्ज्ञा कृता बोद्ध्या । तस्मात् सामान्न्यानुनासिकस्स्वरविलक्षणो हि उक्तशिक्षाप्रतिपादितो रङगवर्णो विज्ञायते । तत्र उच्चारणे तुल्यतायां सत्यामपि 'जहि शत्रू१।।ँरप'[2] इत्यादौ रङगत्वेन व्यवहारः, 'यामैरयँश्चन्द्रमसि'[3] इत्यादौ तु नेति केचिद्[4] । यदि तत्र रङगव्यवहारो नाऽस्ति तर्हि तत्र पूर्वस् स्वरस् सर्व एवाऽनुनासिक उच्चार्यः, न तु 'माउँस्पचन्न्याः'[5] इत्यादिरूपेणोच्चाणीय इति युक्ततरमुत्पश्यामः । यदि तु 'यामैरयउँश्चन्द्रमसि' इत्यादिरूपेणैवोच्चारणन् तर्हि तु एतादृशेषु स्स्थलेष्वपि रङगत्वेनैव व्यवहारो उचितो यदि व्यवहारस् समूलः । लोमश्श्यां शिक्षायान् तु न केवलं रेफपरकस्य किन् तु व्यञ्जनमात्रपरकस्यापि रङगस्य सत्ता[6] प्रतिपादितेति तदनुसारन् तु 'यामैरयउँश्चन्द्रमसि' इत्यादावपि रङगतायास् सम्भावनोदेति ।

अस्य च रङगस्य मात्रिकत्वेन द्विमात्रत्वेन चेति द्द्वेधा विभागश् शैशिरीयशिक्षाकाराभिमतः प्रतीयते[7], पाणिनीयशिक्षायामस्य द्विमात्रत्वमेवोक्तम्[8]; याज्ञवल्क्यशिक्षायाम् मात्रिकत्वेन द्विमात्रत्वेन च द्विविधत्वङ घातनिर्घातादिभेदैः पञ्चविधत्वञ् चोक्तम्[9], एवमेवामोघाननन्दिन्न्यां शिक्षायामप्युक्तम्[10], तत्र महारङगातिरङगौ च प्ररोक्तौ[11]; व्यासशिक्षायान् तु दीर्घप्लुतौ द्वौ रङगावुक्तौ[12], तौ च स्वरेषु गणितौ[13]; शम्भुशिक्षायाम्–''रङगप्लुतश् चतुर्मात्रश् शुद्धप्लुतस् त्रिमात्रकः''[14] इत्युक्त्वा प्लुत-

---

१. म. भा. दी. १।१।८ । २. मा.वा.शु.य.वे.म.सं. ७।३७ । ३. तत्रैव, १।२८ । ४. या. शि. शि. व. वृ., पृ. १२९, १३१; सम्.प्र.शि., पृ. १९ । ५. या. शि. शि. व.वृ., पृ. १३३–१३४ । ६. १।६–७ । ७. श्लो. १०६ । ८. श्लो. २९ । ९. श्लो. १९१ (शि.स., पृ. २८); या.शि.शि.व.वृ., पृ. १२८, १३२ । १०. श्लो. ४१, ४३, ४४ । ११. श्लो. ४५, ४६ । १२. सू. ४१७–४१८ । १३. सू. ६ । १४. श्लो. ४७ ।

रङ्गरूपो रङ्गभेद एव उल्लिखितः, सर्वसम्मतशिक्षायामपि– "पञ्च रङ्गाः प्लुता दीर्घाश् चत्वारस् तैत्तिरीयके"[1] इत्युक्त्वा रङ्गस्य दीर्घप्लुतभेदौ प्रोक्तौ; आरण्यशिक्षायाम् च– "रङ्गे स्वरे च मात्तरैका प्रत्येकं रङ्गदीर्घयोः। रङ्गे स्वरे च द्द्वे मात्तरे तथावत् प्लुतरङ्गयोः"[2] इत्युक्त्वा रङ्गस्य मात्रिकद्द्विमात्तरौ भेदौ सूचितौ; नारदीयशिक्षायान् द्विमात्तरस्यैव रङ्गस्योल्लेखोऽस्ति[3], लोमशीयां शिक्षायान् तु व्यञ्जनपरकस् स्वरपरकश् चेति द्द्वेधा, मात्रिको द्विमात्तरश् चेति च द्वेधोक्तः[4], माण्डूक्यां शिक्षायामपि द्विमात्तर–ह्रस्व–लघु–भेदैर् भिन्नत्वमस्योक्तम्[5] ॥८०–८१॥

(ट) अभिनिहितवर्णविवेकः

उच्चारयितुमारब्धस् स्थाने तत्करणस्य तु ।
धारणेनार्धोच्चरितो वर्णोऽभिनिहितस् स्मृतः ॥८२॥

कुक्कुटः पिप्पल इत्यादौ सयुक्तयोर् वर्णयोर् मध्ये प्रथमवर्णम् उच्चारयितुन् तत्करणन् तत्स्थानयं याति, किन्तु तत् तत्तरैव सन्धीयते, द्वितीये वर्णे उच्चार्यमाणे एव तत्र स्थानकरणयोर् विश्लेषो भवति। एवञ् च प्रथमवर्णोच्चारणे स्थानकरणविश्लेषाऽभावाद् वायोरनिस्सरणात् तस्य वर्णस्योच्चारणमर्धमेव भवति; वर्णोऽपि वस्तुतोऽर्धोच्चरितत्वादर्ध एव भवति। एतादृशोऽर्धोच्चरितोऽसम्यगुच्चरितोऽनुच्चरित एव वा वर्णश् शास्त्रेषु अभिनिहित इत्युच्यते। कुत्र चिद् भक्ष्य इति भुक्त इति चोच्यते[6]। एतादृशमुच्चारणमभिनिधानम्[7] इति व्यवहियते, ततश् च वर्णोऽपि अभिनिधान इत्यप्युच्यते[8]। एतद्विषये च ऋग्वेदप्रातिशाख्ये– "अभिनिधानञ् कृतसंहितानां स्पर्शान्तस्थानामपवाद्द्य रेफम्। सन्धारणं सर्वरणं श्रुतेश् च स्पर्शोदयानामपि चाऽवसाने ॥ अन्तस्थास् स्वेस्वे च परेऽपि रक्ता लकार ऊष्मस्स्वपि शाकलेन। खकारे चैवमुदये ककारः ख्यातेर् धातो रप्शतेर् वा पकारः ॥ पदान्तीया यरवोष्मोदयाश् च स्पर्शाः पदादिष्ष्ववरे मकारात्। असयुक्तं शाकलन् तन् न पद्द्ये स्वित्त्युत्तरे वा त्वनेकाक्षरान्त्याः ॥ सर्वत्तरैके करण-

---

१. श्लो. ७७। २. श्लो. १०४। ३. २।४।८।
४. १।६,९। ५. श्लो. ११४–११५। ६. चा. शि., पृ. २८।
७. ऋ. प्रा. ६।१७। ८. तत्तरैव, ६।३१, ३९, ४३।

स्स्थानभेदे वा शाकलम् प्रथमे स्पर्शवर्गे ।"[1] इति, "न स्पर्शस्स्योष्म-प्प्रकृतेऽ प्रतीयाद् यमापत्तिन् नाऽभिनिधानभावम्"[2] इति, "व्याडेस् सर्वत्तराऽभिनिधानलोपः"[3] इति च वचनानि प्राप्प्यन्ते । शुक्लयजुर्वेद-प्रातिशाख्ये तु– "द्विवर्णमेकवर्णवद् धारणात् स्वरमद्ध्ये समान-पदे"[4] इत्त्येवाऽयवँ विषयस् सूचितोऽस्ति । तैत्तिरीयप्प्रातिशाख्येऽपि कश्चिदभिनिधानस् सूचितोऽस्ति[5] । अभिनिधानस्स्य पूर्वस्वराङ्गताया उल्लेख ऋक्तन्त्रेऽपि प्राप्प्यते[6] । शौनकीयचतुरद्ध्यायिकायामपि– "व्यञ्जनविधारणमभिनिधानऽ पीडितस् सन्नतरो हीनश्श्वासनादः, स्पर्शस्स्य स्स्पर्शेऽभिनिधानः, पदान्तावग्ग्रहयोश् च, लकारस्स्योष्मसु, ङणनानां हकारे, आस्थापितञ् च"[7] इत्त्ययवँ विषयऽ प्रतिपादितः । पाणिनीयव्याकरणवार्तिककारभाष्यकाराब्भ्यामपि– "अथवा हरादाऽवि-रामस् संहिता इत्त्येतल् लक्क्षणङ करिष्ष्यते । हरादाविरामे स्पर्शा-ऽघोषसयँयोगेऽसन्निधानादसंहितम् । हरादाविरामे स्पर्शानामघोषाणां सयँयोगेऽसन्निधानात् संहितासञ्ज्ञा न प्प्राप्नोति– कुक्कुटः पिप्पका पित्तमिति"[8] इति एष विषयस् सूचितः । शिक्क्षेति प्रसिद्ध्येषु ग्रन्थेषु तु केषु चिदेवाऽयवँ विषयऽ प्रतिपादितोऽन्न्येषु तु प्रायेणाऽस्स्फुटतयैव सूचित उपेक्क्षित एव वा । तथाहि शैशिरीयशिक्क्षायाम्– "परस्परस्स्य सयँयोगस् स्पर्शानां सम्भवेद् यदि । तत्पूर्वस्स्य श्श्रुतिर् नाऽस्ति विरामे व्यञ्जनस्स्य च ।। वाग्देवी विट्कुलाद् विब्भ्राड्बृहदारैक् पन्थायँ यदग्घ्नन् । त्रिष्टुब् गायत्त्री अस्मद् अनुष्टुबिति निदर्शनम्"[9] इति, "स्पर्शानान् तु सह स्स्पर्शैस् सयँयोगो यो भवेन् मिथः । पूर्वस्स्य सन्धृतिर् वक्त्रे न तु तस्स्येष्ष्यते श्रुतिः"[10] इति चाऽयवँ विषयस् स्फुटम् प्रतिपादितः । शौनकशिक्क्षायाञ् च– "परस्परस् तु सयँयोगस् स्पर्शानां सम्भवेद् यदि । तत्पूर्वस्स्य श्श्रुतिर् नाऽस्ति विरामे व्यञ्जनस्स्य च । वाक्पूता वाग्देवी विट्कुलाद् विब्भ्राड्बृहत् तत्पुनः । जङ्घ्नन्ति त्रिष्टुब् गायत्त्रर्चवाग् वितदनुष्टुप् ।"[11] इति स्स्फुटमेव प्रतिपादितोऽयवँ विषयः । पाणिनीयशिक्क्षायान् तूपेक्क्षित एवैष विषयः । याज्ञ्ज्ञवल्क्यशिक्क्षायान् तु "कुक्कुटऽ कामलुब्ध्रो यऽ ककारद्द्वयमु-

---

१. ऋ. प्रा. ६।१७–२७ । २. तत्त्रैव, ६।३०–३१ ।
३. तत्त्रैव, ६।४३ । ४. ४।१४४ । ५. १४।९ ।
६. २।३।१ । ७. १।४३–४८ । ८. १।४।१०९ ।
९. श्लो. ३६–३७ । १०. श्लो. ११७ । ११. श्लो. ३४–३५ ।

च्चरेत् । एववँ् वर्णाऽ प्रयोक्तव्याः कुक्कुटोसि निदर्शनम्'[1] इति केवलं सूचितोऽयवँ् विषयः । अमोघानन्दिन्न्यामपि "ऊष्माणो यत्तर दृश्श्यन्ते ह्यन्तस्थाश् च तथैव च । गुरुस् तथैव विज्ज्ञेय ऋवर्ण-सहसयँ्युतः । अन्तस्थपद- (स्पर्श ?-) सयँ्योगे विशेषो नोपपद्द्यते । अशरीरयँ् यमवँ् विद्द्यादन्तस्थऽ पिण्डनायकः ।। सद्द्यो जातस् समुद्द्रोऽसि प्रथमा अथ व्यृद्ध्यया । एववँ् वर्णाऽ प्रयोक्तव्या गुरवोऽत्तर न संशयः"[2] इति अभिनिहितवर्णोच्चारणं सूचितम् । पाराशर्याः शिक्क्षायाञ् च- "कुक्कुटऽ कामलुब्धः"[3] इत्त्यादिना "तकारान्ते पदे पूर्वे शकारे परतस् स्थिते । क्षणिकन् तवँ् विजानीयात् तच्छकेयन् निदर्शनम्"[4] इति चाऽयवँ् विषयऽ केवलं सूचितः । स्वरभक्तिशिक्क्षायाञ् च- "चकारान्ते (चकारादौ ?) पदे तान्ते पूर्त्रञ् च समवस्स्थिते । प्रत्त्यारम्भो न तत्तर स्स्याद् यच्चाहमिति दर्शनम्"[5] इत्त्ययवँ् विषयऽ केवलं सूचितः । वर्णरत्नदीपिकायान् तु- "वर्णन् द्विवर्णसयँ्योगे एकवर्णवदुच्च्यते । स्वरमद्ध्ये सजातीये विजातीये द्वयोश् श्रुतिः ।। कुक्कुटोसि तथा तन्न आज्ज्यम् भुज्ज्युश् श्रुतिर् द्वयोः । स्पर्शात् परककारस्स्य स्फोटनन् दोषकृन् न वा ।। तत्तराऽऽचार्याशयाद् द्वित्त्वं स्फोटनन् द्वित्त्वनाशनम् । अयस्पिण्डेन तत् तुल्त्यन् तस्मादुच्चारणन् तथा ।। काण्डात्त्काण्डाद् वषट्कृतयँ् यकृत्त्क्लोमादिकन् तथा । स्ववर्गीयैस् तु सयँ्योगस् स्पर्शानां सम्भवेद् यदि । तत्पूर्वस्स्य श्श्रुतिर् नाऽस्ति विरामव्यञ्जनस्स्य च"[6] इति विशेषाऽवधारणपूर्वकमभिनिधानविषयऽ प्रतिपादितः । चारायणीयशिक्क्षायाञ् च- "वर्गाणाम् प्रथमा भुक्ता भुक्ता एव तु पञ्चमाः । अन्तस्थानालँ् लवौ भुक्तौ शेषाश् चाऽन्न्ये बुभुक्क्षिताः । वर्गेवर्गे द्विकञ् चाद्द्यन् दशकवँ् वर्णसञ्चयम् । परेषां सहयोगेन भक्क्ष्यवृत्तिऽ प्रशस्स्यते । यज्ज्ञ(?)- हलिक्क्ष्ण-पत्त्नीवान् । परस्स्परं स्प(र्)शौ भुक्तौ वर्जयित्त्वा तु पञ्चमौ । ङ(क)कारऽ पञ्चमैर् यत्तर भोक्तव्यन् तत् प्रयत्नतः । रुक्क्ममुपदधाति वाङ्नोय(प ?)धक्क्ष्यति । पञ्चाऽन्त्यैस् त्रीणि वाऽन्तस्स्थापदे चैके लवद्द्वयम् । प्रागन्त्येनान्त्या चतुरो भक्क्ष्याऽ पञ्चदशाक्क्षराः । अर्वन्यज्ञः । यकारादि हकारान्तमष्टकञ् च

---

१. श्लो. १८५ (शि. स., पृ. २७) । २. श्लो. ९५-९६ ।
३. श्लो. ६९ । ४. श्लो. १४० । ५. श्लो. १२ ।
६. श्लो. १८३-१८७ ।

परस्परम् । चतुरश् चतुरो वाऽपि त्वभक्क्ष्यं षोडशाक्क्षरम् ।। विप्रुड् वातो वान्तः । तृतीयाऽ पञ्मा वर्ज्याश् शेषा भक्क्ष्यास् तु वर्गिणः । एकपदेन नासिक्क्या उपनो तस्स्य मधि च । मुद्धा(?) च मे विण्निन्वाधे । परस्परं स्पर्शभक्क्ष्यास् तृतीयाऽ पञ्चमादृताः । स्पर्शा अन्तस्थसयँ युक्ता मदिरेव द्विजातिभुक् ।। सप्तते अग्ने युष्मदयुजौ । तृतीयश् च चतुर्थश् च ह्यन्तस्थोष्माणसयँ युतः । सन्धिन् तु पञ्चमा यत्तर न वक्क्ष्यामीति मे मतिः । वाग्घुता जिह्व्वा मे आगतात्तरेति । सप्रेष्याणान् तु पिण्डानाम् भक्क्ष्यञ् चारायणीयके । यकारं रहयोर् युक्तं स्फुटमन्यत्र न क्क्वचित् । हकारे तु स्स्फुटम् प्र(ो) क्तमेकारे रेफ ऋक्स्वरे । सह्यग्ग्निस् तन् मनुष्येषु वीर्यमस्त मे वचः । सह्यग्ग्निस् तन् मनुष्येषु वीर्यमस्पृतमसि ।।"[1] इति अभिनिहितानायँ यमानायँ च प्रतिपादनवँ विस्तरेणैव कृतन् दृश्यते । व्यासशिक्क्षायान् तु— "स्पर्शयोस् सयँ युते यत्तर पाठे चावसरे सति । आदेरीषच्छ्रुतिर् ज्ञेया विरामे मस्स्य चैव हि । विरामे वर्ग्यपूर्वस्स्य प्रयत्नऽ क्रियते पृथक् । ओमऽ पवर्ग ऊर्ध्वे च न प्रयत्नऽ पृथक् तथा"[2] इत्त्यभिनिधानविषयस् सङ्क्षेपेण प्रोक्तः । शम्भुशिक्क्षायामपि— "परस्परस्स्य सयँ योगस् स्पर्शानां सम्भवेद् यदि । तयोरादेश् श्रुतिर् नास्ति विरामव्व्यञ्जनस्स्य च"[3] इत्त्यभिनिधानविषयऽ प्रोक्तः । सर्वसम्मतशिक्क्षायामपि— "स्पर्शानायँ यत्तर सयँ योगऽ पाठे यदि भवेत् तदा । तयोरादेश् श्रुतिर् नास्ति विरामव्व्यञ्जनस्स्य च"[4] इत्त्येवोक्तम् । आत्तरेयशिक्षायामपि— "परस्परस्स्य सयँ योगस् स्पर्शानां सम्भवेद् यदि । तयोरादिश्श्रुतिर् नास्ति विरामे व्यञ्जनस्स्य च"[5] इत्त्येवोक्तम् । पारिशिक्क्षायाञ् च— "हान्न्योष्मणस् स्पर्शपरात् परस् तत्त्स्पर्शस्स्य सं(स)स्थान इहाऽऽगमस् स्यात् । सकृच् च वर्गप्रथमस् स चाऽभिनिधीयतेऽत्तराऽभिनिधान उच्च्यते"[6] इति अभिनिधान उल्लिखितः । अन्न्यासु शिक्क्षासु तु अयवँ विषयस् सङ्क्षेपरुचित्त्वादिना हेतुनोपेक्क्षित इति विज्ज्ञायते ।

तत्तर च क-ग— च-ज— ट-ड— त-द— प-बानाञ् क्रमेण कखयोर् गघयोश् चछयोर् जझयोष् टठयोस् तथयोर् दधयोऽ पफयोर् बभयोश् च परयोस् सतोः, ञकारणकारयोश् च स्वस्स्ववर्गीयेषु वर्णेषु परेषु अभि-

---

१. पृ. २८–२९ । २. सू. ४३७–४४० । ३. श्लो. ४८ ।
४. श्लो. ८२ । ५. श्लोकेऽन्ततश् चतुर्थे । ६. सू. १६७ ।

निहितीभावो वेदलोकसाधारणो विज्ज्ञायते[1]। अन्न्येषां स्पर्शानान् तथा य-यँ-ल-लँ-व वाँनान् तु अभिनिहितीभावो वेदेष्वेव केषाञ् चिदाम्म्नायेष्वेव चेति विज्ज्ञायते[2] ॥८२॥

(ठ) ध्रुवविवेकः

सघोषस्स्याऽभिनिहितवर्णस्स्य विरतौ श्रुतेः।
ततऽ परश् श्रूयमाणो नादो यस् तद् ध्रुवं स्मृतम् ॥८३॥

अभिनिहितेषु वर्णेषु मद्ध्ये ये सघोषा अभिनिहिता वर्णास् तेषामुच्चारणाय स्थानम् प्रति गतस्स्य करणस्स्य तत्त्रैव सन्धारणाद् विच्छिन्नताम् प्राप्तानान् तेषावँ् वर्णानां श्रुतेरपि विरामे सत्त्यपि तदा वर्णव्यक्तिविशेषाभिव्व्यक्तिरहितऽ कश्चन नादश् श्रूयते। स एव नादो ध्रुवम् इत्त्युच्च्यते। तथा हि ऋग्वेदप्रातिशाक्ख्ये– "नादऽ परोऽभिनिधानाद् ध्रुवन् तत् तत्कालस्स्थानमश्श्रुति त्त्वघोषात्"[3] इति। ध्रुवोदाहरणस्स्थलावि च व्याग्घ्रम्, मज्जानम्, अवाड्ढव्व्यानि, राद्ध्यताम्, बाहुब्भ्याम्, अङ्गानि, पञ्च, काण्डात्, आनन्दः, स्कम्भनीः, धाय्या, यय्यँम्, मल्लः, तल्लँ्लोकम्, पृथिव्व्याम्, तवँ्वः इत्त्यादीनि यथायथम् बोद्ध्यानि। यद्द्यपि अन्न्येषु प्रातिशाक्ख्येषु शिक्क्षेति प्रसिद्धेषु ग्रन्थेषु च न ध्रुवस्स्य प्रतिपादनम् प्राप्प्यते, न चाऽयवँ् वर्णस् स्फुटश्श्रुतिकस् तथापि "ये व(क)र्णाव्भ्याञ् च श्रूयन्ते येषान् नास्ति विभागतः। मानसाँश् चापि सङ्गराह्य्यानुपदेशेन वर्तयेत्"[4] इति वर्णविषये वैदिकानां सिद्धान्त इति अयवँ् वर्णोऽस्माभिरत्त्र सङ्गृहीतो बोद्ध्यः। ऋग्वेदप्रातिशाक्ख्ये एव प्रतिपादितोऽपि अयवँ् वर्णोऽन्न्यत्त्रापि सामान्न्यतयोपलब्भ्य एव स्स्यादिति वयं सम्भावयामः। इदञ् च ध्रुवम् अनुनासिकादभिनिहितात् परन् नासिकास्थानकमेव भवति, अन्तस्स्थाया अभिनिहितीभूतायाऽ परन् ध्रुवन् तु अभिनिहितीभूतान्तस्स्थासरूपमेव भवतीति ऋग्वेदप्रातिशाक्ख्ये एवोक्तमस्ति। तथा हि "नासिकास्स्थानमनुनासिकाच् चेदन्तस्स्थायाऽ पूर्वस्वरूपमेव"[5] इति ॥८३॥

(ड) यमविवेकः

स्पर्शात् परेऽपञ्चमास् तु वर्ग्या एकपदे स्स्थिते।
पञ्चमे तु परे नासिक्क्याश् चाऽभिनिहिता यमाः ॥८४॥

स्ववर्गीयाद् अन्न्यवर्गीयाद् वाऽपि स्स्पर्शात् परत्त्र वर्तमाना

---

१. पा. व्या. भा. १।४।१०९, अ ओङ् अ औ ओच् इत्त्यत्त्र च वा. १३; ऋ. प्रा. ६।२७। २. ऋ.प्रा. ६।२०–२३। ३. ६।३९–४०। ४. अथ. प. ४७।१।५। ५. ६।४१–४२।

वर्गेषु भवा अपञ्चमा वर्णास् समानपदे वर्तमाने स्ववर्गीयेऽन्यवर्गीये वाऽपि वर्ग्यपञ्चमे वर्णे परत्तर स्स्थिते सति नासिक्क्यीभूताभिनिहितवर्णताङ्गतास् सन्तो यमा इति उच्च्यन्ते इत्त्यर्थः। यम्म्यन्ते मुखभवश्श्रुतिनिरोधेन निर्वर्त्यन्ते इति यमाः। पाणिनीयशिक्क्षापञ्जिकाकारस् तु "यच्छन्तीति यमाः। स्वयमेवोपरमेरन्"[1] इत्त्याह। अतो यमलरूपवर्णस्य यमत्त्वङ्ग कैश्चित्[2] प्रतिपादितमबोधमूलम् बोद्ध्यम्। यमानाम् मुखभवाश्रुतिर् न भवतीति तु तेषां शुक्लयजुर्वेदप्रातिशाक्ख्ये विच्छेद[3] इत्त्यनया अनन्वर्थया सञ्ज्ञया व्यवहारादपि ज्ज्ञायते। यमस्य मुखभवश्श्रुतेरभावाद्धि तत्कालेन मुखभवयोः पूर्वोत्तरयोर् वर्णयोर् विच्छेद इव क्क्रियते इति तस्यास् सञ्ज्ञाया अनन्वर्थता बोद्ध्या। "अशरीरयँ यमवँ विद्द्यात्"[4] इति शिक्क्षावचनमपि एतस्यैवार्थस्य प्प्रतिपादकम् बोद्ध्यम्। "श्रुतिर् वा न मुक्ख्याऽस्ति समानकाला"[5] इति ऋग्वेदप्रातिशाक्ख्यवचनेन तु स्फुटमेवाऽयमर्थः प्रतिपादितः। एवञ् च "अग्घँन्या"[6] इत्त्यादौ सयँयुक्तेषु वर्णेषु मद्ध्ये गकारादेरुच्चारणाय तत्त्स्थाने गतङ्ग करणन् तत्त्रैव सन्धृत्त्य घकारादेरुच्चारणस्य समयेऽपि तत् करणन् तत्त्रैव दृढमविचलं संस्थाप्प्य मुखेन घकारादिश्श्रुतिमकृत्त्वा घकारादेरुच्चारणाय प्रवृत्तवँ वायुम् मुखतोऽनिस्सार्य तङ्ग केवलन् नासिकातो निष्काल्ल्य ततः परन् नकारादिके वर्गपञ्चमे वर्णे उच्चारिते सति गकारादि–नकारादिश्श्रुतिमद्ध्ये मुखभवश्श्रुतिरहिता केवलनासिकाभवा अंशांशेन घकारादिना सदृशी अपि वर्णव्व्यक्तिविशेषाभिव्व्यक्तिरहिता या श्रुतिस् सैव यम इति बोद्ध्यम्। एतेन यमस्याऽशरीरत्त्वन् नासिक्क्यत्त्वङ्ग ककारादिस्स्वप्प्रकृतितुल्ल्यत्त्वञ् च व्याक्ख्यातम्। एवञ् च यमस्य अशरीरत्त्वन् नाम मुखभवश्रुतिरहितत्त्वम्, नासिक्क्यत्त्वन् नाम नासिकामार्गेण निस्सरता वायुनाऽभिव्व्यञ्जनीयत्त्वम्, ककारादिस्वप्रकृतितुल्ल्यत्त्वञ् च ककारादद्द्युपादानभूतेन श्वासेन नादेन वाऽभिव्व्यञ्जनीयत्त्वङ्ग ककारादेस् स्थाने तत्करणस्य सन्धारणादभिव्व्यङ्ग्यत्त्वञ् चेति स्पष्टतयाऽऽकलनीयम्।

---

१. श्लो. ४। २. तै. प्रा. (ह्विट्नेः) २१।१२; शौ. च. (ह्विट्नेः) १।९९; CSPOIG, p. 79; PAI p. 75; प्र. सि. कौ. पूर्वार्धे पृ. ७–८; CSSP p. 87. ३. ४।१६३। ४. या. शि. श्लो. २०३, पारा. शि. श्लो. ५८। ५. ऋ.प्रा. ६।३३। ६. मा. वा. शु. य. म. सं. १।१।

वर्णसमाम्नाये यमोपदेशस्य कँ खँ गँ घँ इति लिपिभिरुपस्थापनस्याऽभिप्रायोऽप्येतेन व्याख्यातः। तत्र ककारादिना यमानाङ्ककारादिसदृशता सूच्यते, अर्धचन्द्रकेण च तेषान् नासिक्यता सूच्यते; उकारेण चोच्चारणविधा सूच्यते यमसङ्केतीभूतकँकाराद्द्यु च्चारणसौविद्ध्यञ् च क्रियते। अमरनाथशास्त्रिणा कृतयँ यमव्याख्यानमपि अत्रैवाऽनुकूलम्[1]। एवञ् च यमानाञ् ज्ञानेनैव फलन् न तेषामुच्चारणविशेषोऽस्तीति प्रतिपादयन्तो ज्योत्स्नाकारः[2] बालकृष्णो गोडशेः[3] तदनुयायिनोऽन्ये[4] च भ्रान्ता एवेति बोद्ध्यम्। न हि सर्वथाऽनुच्चारणीयानां शब्दानां स्वेस्वे ग्रन्थे वर्णसमाम्नाये वा प्रातिशाख्यकारादयो वर्णतत्त्वेनोपदेशमकार्षुरिति आस्थातुयँ युज्यते।

यमस्स्वरूपादिविषये च ऋग्वेदप्रातिशाख्ये "स्पर्शा यमाननुनासिकास्स्वान् परेषु स्पर्शेष्वनुनासिकेषु। न स्स्पर्शस्योष्मप्रकृते× प्रतीयाद् यमापत्तिन् नाऽभिनिधानभावम्॥ यम× प्रकृत्यैव सदृक् श्रुतिर् वा यमे न मुख्याऽस्ति समानकाला। अनन्यस् तु प्रकृते× प्रत्ययार्थे"[5] इति, शुक्लयजुर्वेदप्रातिशाख्ये च "अन्तःपदेऽपञ्चमः पञ्चमेषु विच्छेदम्"[6] इति, "ऊष्मम्भ्यः पञ्चमेषु यमापत्तिर् द्दोषः"[7] इति च, तैत्तिरीयप्रातिशाख्येऽपि "स्पर्शादनुत्तमादुत्तमपरादानुपूर्व्यान् नासिक्याः, तान् यमानेके"[8] इति, ऋक्तन्त्रे च– "अथ यमाः कँ इति खँ इति गँ इति घँ इति यमाः। अनन्त्यान्त्यसयँ योगे मद्ध्ये यम× पूर्वगुणः"[9] इति, शौनकीयचतुरद्ध्यायिकायाञ् च "समानपदेऽनुत्तमात्त्स्पर्शादुत्तमे यमैर् यथासङ्ख्यम्"[10] इति वचनानि प्राप्यन्ते। "अस्थँ नश्छिन्नस्स्येति सथनाः, यथास्स्थानयँ यमः"[11] इत्यादीनि वचनानि सन्ति अथर्ववेदप्रातिशाख्येऽपि। एतस्य वचनस्य तत्त्वयवँ विशेषो यद् यादृशे स्स्थले शुक्लयजुर्वेदप्रातिशाख्ये यमापत्तिर् दोषत्त्वेनोक्ता तादृशे स्स्थलेऽनेनोद्धृतेनाऽथर्ववेद–प्रातिशाख्यवचनेन यमापत्ति× प्रतिपाद्द्यते इति।

---

१. या. शि. शि. व. वि., पृ. १५५–१५६। २. सू. ३५३।
३. 'एते ज्ञेयाः। न तत्त्वेषामुच्चारणम्। अशरीरयँ यमम् प्राहुरिति-शिक्क्षायामुक्तत्त्वात् केवलञ् ज्ञानमात्त्रफलम्' इति, प्रा. प्र. शि., शि. स., पृ. २५२–२५३। ४. सम्. प्र. शि., पृ. २२।
५. ६।२९–३४। ६. ४।१६३। ७. ४।१६४
८. २१।१२,१३। ९. १।२। १०. १।९९
११. सू. १७२, १७६–१७९, १८४, १८९।

पाणिनीयव्याकरणभाष्यकारेणाऽपि यमा उल्लिखिताः[1]। शिक्षाग्रन्थेष्वपि प्रायस् सर्वेष्वेव यमानामुल्लेखः प्राप्यते। तत्र यमस्थानकरणप्रयत्नविषयाणि वचनानि बलाद्ध्याये एव यथास्थानमुपस्थापयिष्यन्ते। यमस्वरूपाद्द्वयवबोधनाय विशेषेणोपयोगीनि वचनानि तत्तत्रैवोपस्थाप्यन्ते। तत्र शौशिरीयशिक्षायाम् "चत्वारस् तु यमाः प्रोक्ता अव्यक्तास् सानुनासिकाः।" इति, "प्रथमोत्तमवर्गीये वर्गान्त्यैस् सह सङ्गते। नासिक्यङ्ग गुरुमुच्चार्य यमस्थानगतवँ वदेत्॥ नादस् तु श्रूयते घोषाद् विरामाद् द्वित्वतस् तथा। अनासिक्योऽथ नासिक्यो जायते वर्णरूपतः"[2] इति च। शौनकशिक्षायामपि "चत्वारस् तु यमाः प्रोक्ता अव्यक्तास् सानुनासिकाः"[3] इति। याज्ञवल्क्यशिक्षायाम् च– "रुक्कँमेति प्रथमो ज्ञेयस् सक्थँना इत्यपरो भवेत्। विद्दँमा ते तु तृतीयश् च जम्भे दद्धँमश् चतुर्थकः॥ अपञ्चमैश् चैकपदे सयँयुक्तम् पञ्चमाक्षरम्। उत्पद्द्यते यमस् तत्र सोऽङ्गम् पूर्वाक्षरस्य हि"[4] इति। अमोघाननदिन्या शिक्षायामपि– "शून्ये गृहे पिशाचोऽपि गर्जते न च दृश्यते। एववँ वर्णाः प्रयोक्तव्या उपज्जँमन्निति दर्शनम्" इति, "जकारौ द्वौ मकारश् च रेफस् तदुपरि स्थितः। अशरीरयँ यमवँ विद्द्यात् सम्मार्ज्जँमीति निदर्शनम्"[5] इति च। एवमेव पाराशर्या शिक्षायामपि[6]। वर्णरत्नप्रदीपिकायाम् च— "अपञ्चमात् पदे नित्यम् पञ्चमेषु परेषु च। यमोत्पत्तिर् भवेत् तत्र रुक्कँमः पाप्पँमा निदर्शनम्॥ स्वरात् सयँयोगपूर्वस्य द्वित्वाज् जातो द्वितीयकः। तस्यैव यमसञ्ज्ञा स्यात् पञ्चमैरन्वितो यदि॥ स्पर्शानाम् पञ्चमैर् योगे चत्वारो ये यमास् स्मृताः। अयस्पिण्डेन ते तुल्या घनबन्धाः प्रकीर्तिताः॥ यमास् तदा निवर्तन्ते ऊष्मा मद्ध्ये भवेद् यदि। ऊर्णापिण्डेन ते तुल्याः पाशैस्तत्मन्या निदर्शनम्"[7] इति। चारायणीयशिक्षायाम् च–"अनन्त्यश् च भवेत् पूर्वः अन्त्यश् च परतो यदि। तत्र मद्ध्ये यमस् तिष्ठेत् सवर्णः पूर्ववर्णयोः॥ अपञ्चमस् त्वेकपदे सयँयुक्तः पञ्चमेऽक्षरे। यमो ज्ञेयो यथा रुक्मसंख्यग्निर्घ्नन्ति

---

१. हयवरट् इत्यत्र षष्ठवार्तिकप्रस्ताविकायाम्। २. श्लो. १२, १०१, १०२। ३. श्लो. ७। ४. श्लो. २१३–२१४ (शि. स.)। ५. श्लो. ५०, ५२। ६. श्लो. ५८, ५९। ७. श्लो. १७४–१७७।

चैव हि"[1] इति, "स्पर्शनासिक्क्यसयँ युक्तास् तत्तर मद्ध्ये यमास् स्थिताः। अशरीराश् चतुर्भेदा सञ्ज्ञाभिर् विहिताऽ पृथक् ॥ प्रथमाऽ पञ्चमैर् युक्ताऽ कयमन् तत्तर मद्ध्यगम् । द्वितीयेष्वेव खयमन् तृतीये गयमं स्मृतम् ॥ चतुर्था यत्तर दृश्यन्ते वर्गान्तैस् सह सयँ युताः। घयमस् तत्तर मद्ध्यस्स्थो ज्ञेयश् चारायणीयके"[2] इति च। व्यासशिक्क्षायाञ् च— "यत्तरोष्माविकृते स्पर्शादुत्तमोर्ध्वे त्वनुत्तमात्। आनुपूर्व्याद् यमानेतान् वर्णयन्त्यागमान् बुधाः"[3] इति। शम्भुशिक्क्षायाञ् च— "अनन्त्यञ् च भवेत् पूर्वमन्त्यञ् च परतो यदि। तयोर् मद्ध्ये यमस् तिष्ठन् नासिकास्स्थानमुच्यते"[4] इति। सर्वसम्मतशिक्क्षायाञ् च "अनूष्मप्रकृतेस् स्पर्शादुत्तमेऽनुत्तमाद् यमान्। वर्णयन्त्यानुपूर्व्येण वर्णक्रमविचक्क्षणाः"[5] इति। पारिशिक्क्षायाञ् च— "स्पर्शाद् यदोष्माविकृतेरनुत्तमात् स्यादुत्तमोऽर्ध्वे सति चाऽनुपूर्व्यात्। नासिक्क्यसञ्ज्ञा इह चाऽऽगमास् स्युरेतान् यमानेव वदन्ति केचित्"[6] इति। नारदीयशिक्क्षायाञ् च— "अनन्त्यश् च भवेत् पूर्वो ह्यन्त्यश् च परतो यदि। तत्तर मद्ध्ये यमस् तिष्ठेत् सवर्णऽ पूर्ववर्णयोः"[7] इति। एतद् वचनमभिनिहितीभूतान् नासिक्क्याद् वर्णात् परत्तर स्थितन् ध्रुवयँ यमत्वेन प्रतिपादयत् प्रतीयते 'सवर्णऽ पूर्ववर्णयोः' इति विशेषणात्। गौतम्म्यां शिक्क्षायाञ् च "अथाननत्या विंशतिर् भवन्ति ते कचटपतपाऽ खछठथफा गजडदबा घझढधभाश् चेति, अथानत्याऽ पञ्च ते च ङञणनमाश् चेति; अथाऽननत्याश् चत्वारस् ते सयमास् ते कं खं गं घं इत्यननत्यानत्यसयँ योगेऽननत्यपूर्वेऽनत्योत्तरे व्यवधानवर्जिते तत्तर यमा वर्तन्ते न संशय इति"[8] इति।

यमानां सङ्ख्याया विषये च ऋग्वेदप्रातिशाक्ख्ये स्फुटवँ वचनङ किमपि नाऽस्ति। शुक्लयजुर्वेदप्रातिशाक्ख्येऽपि "कँ खँ गँ घँ इति यमाः"[9] इत्येवोक्तम्, सङ्ख्या स्फुटन् नोक्ता, किन् तु तत्तरोक्तायाऽ पञ्चषष्टेर् वर्णसङ्ख्यायाः[10] पूरणाय चत्वार एव यमा आवश्यका भवन्ति। तैत्तिरीयप्रातिशाक्ख्ये च सङ्ख्या नैव निर्दिष्टा, शुक्लयजुर्वेदप्रातिशाक्ख्ये इव निर्देशोऽपि न कृतः। ऋक्तन्तरेऽपि "कं

---

१. पृ. १२। २. पृ. १३। ३. सू. ३५५–३५६।
४. श्लो. ४९। ५. श्लो. २०–२१। ६. श्लो. १६८।
७. २।२।८। ८. १।२। ९. ८।२४। १०. ८।२५।

इति खं इति गं इति घं इति यमाः"[1] इति निर्देश एव कृतस् सङ्ख्या तु तेषान् नोक्ता। शौनकीयचतुरद्ध्यायिकायामपि न यमानां सङ्ख्योक्ता, न च पूर्वोक्तविधौ निर्देशोऽपि कृतः। शिक्षेति प्रसिद्धेषु ग्रन्थेषु तु शैशिरीयशिक्षायाम् "चत्वारस् तु यमाः प्रोक्ताः"[2] इति, शौनकशिक्षायामपि "चत्वारश् च यमाः प्रोक्ताः"[3] इति, पाणिनीयशिक्षायामपि "चत्वारश् च यमास् स्मृताः"[4] इति, याज्ञवल्क्यशिक्षायामपि– "चत्वारो यमाः कँ खँ गँ घँ इति"[5] इति, वर्णरत्नप्रदीपिकायाम् च "कँ खँ गँ घँ इति च ते चत्वारो नात्र पञ्चमः"[6] इति, चारायणीयशिक्षायान् तु "अशरीराश् चतुर्भेदास् सञ्ज्ञाभिर् विहिताः पृथक्"[7] इति; व्यासशिक्षायाम् च— "चतुर्भक्तियमाश् चेति"[8] इति, आपिशलिशिक्षायाम् पद्दचरूपायाम् च "नास्स्यपञ्चकम्"[9] इति, गौतमस्यां शिक्षायाम् च "अथाऽन्त्याश् चत्वारस् ते सयमास् ते कं खं गं घं इति"[10] इति, माण्डूक्यां शिक्षायाम् च "स्पर्शानामुत्तमैस् स्पर्शैस् सयँयोगश् चेदनुक्रमात्। आनुपूर्व्या यमांस् तत्र जानीयाच् चतुरस् तथा"[11] इति यमसङ्ख्या प्रतिपादिता। आपिशलिशिक्षासूत्रेऽपि "वर्गाणाम् प्रथमद्वितीया शषसविसर्जनीयजिह्वामूलीयोपध्मानीया **यमौ च प्रथमद्द्वितीयौ** विवृतकण्ठाश् श्वासानुप्रदाना अघोषाः"[12] इति, "वर्गाणान् तृतीयचतुर्था अन्तस्था हकारानुस्स्वारौ **यमौ च तृतीयचतुर्थौ** सवँवृतकण्ठा नादानुप्रदाना घोषवन्तः"[13] इति यमसङ्ख्या सूचिता, तत्रोक्तायास् त्रिषष्टेर् वर्णसङ्ख्यायाः पूरणायाऽपि चत्वार एव यमा आवश्यका भवन्ति। दयानन्दसरस्स्वती-प्रकाशिते पाणिनीयशिक्षासूत्रेऽपि "तत्रैते कौशिकीयाश् श्लोकाः— सर्वान्तेऽयोगवाहत्वाद् विसर्गादिरिहाष्टकः। अकार उच्चारणार्थो व्यञ्जनेष्वनुबद्ध्यते॥ कक-पयोः कपकारौ च तद्वर्गीयाश्श्रयत्वतः। पलिक्नीश् चखनतुर् जगग्मिर् जघघ्नुरित्यत्र यद्वपुः॥ नासिक्येनोक्तन् (नास्स्यत्वङ्) कादीनान् त इमे यमाः। तेषामुकारस् संस्थानवर्गीय (-त्वस्स्य) लक्षकः"[14] इति यमसङ्ख्या प्रतिपादिता। किन् तु यमसङ्ख्याविषये

---

१. १।२। २. श्लो. १२। ३. श्लो. ७। ४. श्लो. ४।
५. शि. स., पृ. ३३। ६. श्लो. १७। ७. पृ. १३।
८. सू. ४३२। ९. श्लो. ९। १०. १।२। ११. श्लो. ११७।
१२. बाह्ययप्रयत्नप्रकरणे, सू. २। १३. तत्रैव, सू. ४।
१४. सप्तमे प्रकरणे, सू. ३–४, पृ. २१।

विचारकाणाम् मतभेदो दृश्यते । उव्वटेनाऽपि ऋग्वेदप्रातिशाख्ये एकत्र "पलिक्नी इत्यत्र ककाररूपो यमः, चख्नथुः इत्यत्र खकारसरूपो यमः, जग्मतुः इत्यत्र गकाररूपो यमः, जघ्नतुः इत्यत्र घकारसरूपो यमः। वक्ष्यति यमः प्रकृत्यैव सदृक् इति । एवं विंशतिर् यमा बह्वृचानाम् भवन्ति, स्वरूपैश् चत्वार एव । तदुत्तरत्र यमलक्षणे विचारयिष्यामः"[1] इति उक्तम्, अनन्यत्र च "स्वान् इति किमर्थमुच्यते ? सञ्ज्ञाप्रकरणे 'चतस्रोऽन्तस्थाः' 'अष्टा ऊष्माणः' इति (अन्ये) वर्णाऽ कृतसङ्ख्या निर्दिश्यन्ते, न तथा यमाः । तस्मादिह 'स्पर्शा यमाननुनासिकाः' इति (एतावति एव) उच्यमाने विंशतित्वात् तत्स्थानिनाम् आदेशानामपि यमानावं विंशतित्वप्रसङ्गः । स मा भूत् चतुर्णामेव यमानाम् प्रथमाऽ प्रथमन् द्वितीया द्वितीयम् एवम् आ पञ्चमाद् आपद्द्वेरन्नित्युच्यते"[2] इत्युक्तम्; शुक्लयजुर्वेदप्रातिशाख्यभाष्येऽपि कुत्र चित् "चत्वारो यमा अनुस्वारनासिक्यौ चेति षड् वर्णाः"[3] इति, "यमाश् चत्वारो नासिकामूलेन क्रियन्ते"[4] इति चोक्तम्, अनन्यत्र पुनः "इति यमसञ्ज्ञका वर्णा विंशतिसङ्ख्याका भवन्तीत्येतच् चतुर्थाद्ध्याये व्याख्यातम्"[5] इत्युक्तम् । तद् व्याख्यानन् तु चतुर्थाद्ध्याये न प्राप्यते इति त्वन्न्यत् । तैत्तिरीयप्रातिशाख्यभाष्ये त्रिभाष्यरत्ने सोमयार्येण "चत्वारो यमाः"[6] इत्युक्तम्, वैदिकाभरणकारेणाऽपि चत्वार एव यमा गणिताः[7] । जिनेन्द्रबुद्धिनाऽपि 'कँ खँ गँ घँ इत्येते च यमाः'[8] इत्येवोक्तम् । हरदत्तस् तु— 'यमा नाम वर्गेष्वादितश् चतुर्णाम् पञ्चमेषु परतस् त एव नासिक्या भवन्ति । तद् यथा पलिक्नीरिन्, चख्नथुः, अग्मन्नापः, जघ्नतुः, अप्नस्वतीमित्यादि'[9] इत्येवाऽऽह न सङ्ख्याविशेषम् । तथापि तद्वचनाद् वर्गेष्वादितश् चत्वारश्चत्वार इति विंशतिरेव नासिक्यीभूता वर्णा यमा इति प्रतीयते । भट्टोजिदीक्षित-नागोजिभट्टादयश् च कखगघसदृशाँश् चतुर एव यमान् प्रत्यपीपदन्[10] । पाणिनीयशिक्षाप्रकाशकारश् च "च=पुनश् चत्वारो यमाऽ कं खं गं घं इति ।...

---

१. १।५० । २. ६।२९ । ३. १।७४ । ४. १।८२। ५. ८।२४ । ६. १।१, पृ. ३ । ७. १।१, पृ. ९ । ८. का. वि. प. १।१।९, पृ. १०१ । ९. श. शा. स. पा. प. म. १।१।९, पृ. ९९ । १०. वै. सि. कौ. (सञ्ज्ञाप्रकरणे, बाह्ययप्रयत्नविचारे) शब्देन्दुशेखरे च ।

अयमपि वर्णागमो विधीयतेऽस्माच् छास्त्रात्, चत्त्वारश् च यमा इति वर्णान्तरत्त्वेनोपदेशस् सयँ योगशास्त्रात् ।..... यथा पलिक्क्नीरिति ककाररूपऽ पूर्ववर्णसवर्णो यथासङ्ख्यऽ प्रथमस् तकारस् तेनायवँ वर्णक्रमः । ककार-यमककाररूपतकार-नकारईकाराः अन्तर्वत्नुक्रीत्यादि । चर्ख्ख्नतुरित्यत्तर खकाररूपः । अग्निरित्यत्तर गकाररूपः । जघ्नतुरित्यत्तर घकाररूपः । यज्ज्ञ इत्यत्तर जज्ञाः । अत्तर चवर्गतृतीयो जस् तस्य सङ्ख्यासवर्णो जुंकारसमावेशः । वर्णक्रमे यकार-जकार-पूर्ववर्णवर्गसङ्ख्यसवर्णयमगकारजकाराः"[1] इति वदन् यमानाम् चतुष्ट्ववँ विंशतित्त्वम् च प्रतिपादयन्निव प्रतीयते । पाठस्याऽव्यवस्थितत्त्वान् निर्णयस् तु दुष्करः । शौनकशिक्षाटीकायान् तु 'एवम् च विंशतिर् यमा न चत्त्वार इति, सत्यम्, स्पर्शानाम् प्रथमद्वितीयतृतीयचतुर्थसामान्याच् चत्त्वार एव यमाः । तदुक्तयँ 'यमऽ प्रकृत्त्यैव सदृक्' इति । तत्तर प्रथमवर्णानाम् पञ्चमैर् योगे प्रथमो यमः, पलिक्क्नीः । द्वितीयानाम् पञ्चमैर् योगे द्वितीयो यमः (अमथ्नात्)। तृतीयानाम् पञ्चमैर् योगे तृतीयो यमः (अरुग्णम्)। चतुर्थानाम् पञ्चमैर् योगे चतुर्थो यमः, वृत्तरघ्नः इत्यादि"[2] इति स्फुटमुक्तम् । आधुनिककल्पेषु विचारकेषु मद्ध्ये युगलकिशोरपाठकऽ पाणिनीयशिक्षाप्रकाशकारमनुगच्छन्निव "यज्ज्ञ इत्यत्तर जगज्ञाः । अत्तर चवर्गतृतीयो जकारस् तस्य सङ्ख्यासवर्णो गकारसमावेशः (सङ्ख्यासवर्णस्य गकारस्य समावेशः?) वर्णक्रमे यकार-जकार-पूर्ववर्ग-(ण-)-समसङ्ख्यसवर्णयमगकार- ञकाराः । अत्तर जकार-यमगकार-ञकारसयँ योगे स्थानकरणपरित्यागेन वर्णान्तरोत्पत्तिः, यथा ताम्म्रत्तरपुसयँ योगे कांस्यस्योत्पत्तिरेवम्"[3] इति भाषाप्रयोगदृष्ट्याऽपि बहु अशुद्धम् जल्पँश् चकारादिसयँ योगस्थलेऽपि ककारादिविशेषाणामेव यमत्त्वन् न तु चकारादिविशेषाणामपीति मन्त्वानऽ प्रतीयते । तदेवाऽनुसरन्निव शिवदत्तशर्मा दाधिमथस् तु- "तत्सदृशा एव यमाः" इति भट्टोजिवाक्क्ये "तत्सदृशा एवेति कवर्गीया एव, न त्वन्यवर्गीयाः, अत एव 'श्रीश्च्च ते लक्ष्मीश्च्च पत्क्न्यौ' इत्यत्तर तकारनकारयोर् मद्ध्ये, 'सूर्य्य आत्क्मा' इत्यत्तर तकारमकारयोर् मद्ध्येऽपि ककार एव दृश्यते । 'त्रिषष्टिश् चतुष्षष्टिर् वा वर्णाश् शम्भुमते मताः' इत्युक्तसङ्ख्योपपादनावसरे

---

१. शि. स., पृ. ३८८ । २. श्लो. ७ । ३. शु. य. प्रा. की. प्र. टि. (१८८८ [१९४५]) पृ. ३०३ ।

'चत्त्वारश् च यमास् स्मृताः' इति चतुस्सङ्ख्योपपद्द्यते"[1] इति टिप्पणीङ्करोति स्स्म। कालीप्रसादमिश्रस् तु "तस्माच् चत्त्वार एव यमाः, किन् तु ककारे पञ्चमे परे यादृशी श्रुतिर् भवति तादृशी श्रुतिराद्द्येषु कचटतपेषु सर्वेषु, एवङ्ग खकारगकारघकारेषु यादृशी श्रुतिर् भवति तादृशी छकारादिषु सर्वेषु; अर्थाच् छ्रुतयश् चतस्स्रस् सन्ति या वर्णानावँ् विंशतौ वर्तन्ते। एतेन 'वर्गेषु आद्द्यानाञ् चतुर्णाम् पञ्चमे परे मद्ध्ये यमो नाम' इत्त्यादिषु वर्गेष्ष्विति बहुत्त्वं समाहितम् भवति। श्रुतेरेकत्त्वादेव ज्ञानमित्त्यस्स्य ग्यानमिति ज्ञानमिति द्नानमिति यथेच्छमुच्चारयन्ति तत्तद्देशीयाः" इति जल्पित्त्वा "न च यमानावँ् विंशतित्त्वेऽपि प्रथमयमद्वितीययमादिभेदेन सङ्ख्याचतुष्टयत्त्वलाभ इति वाच्च्यम्, प्रथमो द्वितीयादयश् च धर्मिणस् तेषां स्वेन रूपेण विभागाऽसम्भवात्; प्रथमत्त्वादिना विभागे तदीयतात्पर्यमिति चेत् प्रथमत्त्वादीनावँ् विंशतियमगतानावँ् विंशतित्त्वस्स्यैव वाच्च्यत्त्वात्, अन्न्यथा यमेष्ष्वपि विंशतित्त्वङ्ग खपुष्पायमाणं स्यात्, न च यमा विंशतिस् तद्गताऽ प्रथमत्त्वादयश् च चत्त्वार एवेति वाच्च्यम्, चत्त्वारश् च यमा इति शिक्क्षोक्तिविरोधात्। प्रथमत्त्वादिना अनुगतीकृता नासिक्क्याश् चत्त्वारश् श्रुतिविशेषा एव यमपदेनोच्च्यन्ते, अत एव 'अशरीरयँ् यमवँ् विद्द्यात्' इति 'शून्न्यालये पिशाचोऽपि गर्जते न तु दृश्श्यते' इति चाप्तवाक्क्ये समाहिते भवत इति चेदोमिति ब्रूमः"[2] इति उपसंहारङ्ग कुरुते स्स्म। अमरनाथशास्त्री दीक्क्षितोऽपि "तथा च गुरुवर्याश् श्रीरामभवनशर्माणस् 'तत्तर तावद् यमविषये वर्तते वैमत्त्यम् बहूनामद्ध्यापकानाम्, परन् तु प्रातस्स्मरणीयस्वर्गीयमहामहोपाद्ध्यायगुरुवरदामोदरशास्त्रिणां सिद्धान्तस् तु एववँ् विध आसीद् यद् यमाश् चत्त्वार एवेति न पुनर् विंशतिरिति, विंशतिसङ्ख्यासन्निवेशश् च प्रकृतिगतसङ्ख्यानुसारेण यथाकथञ्चिदुपपादनीयः"[3] इत्त्युक्त्वा "एवम् उत्पत्तिकाले प्रकृतिगतस्थानेषु नासामूलकरणेन नासायाञ् च वर्गप्रथमद्वितीयतृतीयचतुर्थत्त्वेतिचतुर्भिरनुपप्रदानैश् चतस्स्र एव यमश्श्रुतयो मुखस्स्थाश् श्रूयन्ते इति सर्वशाखासिद्धान्तः"[4] इत्त्यभणीत्। स एव पुनरन्न्यत्तर "इत्थयँ् यदि कवर्गीया एव चत्त्वारो यमास् सम्मता अभविष्ष्यन् तर्हि

---

१. वै. शि. कौ. (बम्बइ, सन् १९०९), पृ. ६।

२. पाणिनीयशिक्क्षाप्रकाशिकायायँ् यमसङ्ख्याविचारे।

३. या. शि. शि. व. वि., टि., पृ. १५६।

४. तत्तरैव।

सक्थ्नादिषु यदधानायँ यमत्त्वञ्च कथन् निरदेक्क्ष्यदाचार्यः। अतो विंशतिस्स्थानिनां सरूपा वर्गप्प्रथमत्त्वादिचतुर्धर्मविशिष्टा नासिक्क्यगुणाश् चतुर्विधा अप्प्रत्त्यक्क्षवर्णशरीराश् श्रुतिविशेषा एव यमा विसर्गानुस्स्वारादिवद् इति सिद्धम्"[1] इत्त्युक्त्वा विंशतेरेव यमव्यक्तीनाञ् चतुर्विधत्त्वेन चतुष्ट्वमुच्च्यते इति सूचयतीव प्प्रतीयते। सूर्यनारायण–सूरावधानी च व्यासशिक्क्षाव्याक्ख्याने वेदतैजसे "तस्मात् पञ्चविंशतिर् यमा इति शिक्क्षानन्तरमतमत्त्र न प्प्रसरति"[2] इति वदन् यमसङ्ख्याविषयकम् मतान्तरमुदलेखीत्।

वयन् तु यमसङ्ख्याविषये एवन् निर्णयञ्च कुर्महे— यदि श्रुतिभेदादेव वर्णभेद इत्त्ययं सिद्धान्तो यमविषयेऽपि दृढमनुस्स्रियते तर्हि यमस्स्य वर्णव्यक्तिविशेषाभिव्यक्तिरहितश्श्रुतिकत्त्वादेकत्त्वेनैव गणना न्याय्या; यदि श्रुतौ व्यक्तस्स्य भेदस्स्याऽभावेऽपि तदीयस्स्थानकरणप्रयत्नानुप्प्रदानभेदमादाय भेदस् स्वीक्रियते तर्हि तु यमानावँ विंशतिसङ्ख्याकत्त्वेनैव गणना न्याय्या इति; सूक्क्ष्मदृष्टचा निरूपणे विंशतिसङ्ख्यावतामपि यमव्यक्तीनां स्थूलदृष्टचा व्यक्तिभेदानामगृह्यमाणत्त्वाद् अघोषाल्पप्प्राणयमत्त्वेन, अघोषमहाप्प्राणयमत्त्वेन, घोषवदल्पप्प्राणयमत्त्वेन, घोषवन्महाप्प्राणयमत्त्वेन च सङ्गृह्य तत्सङ्केतत्वेन च 'कँ खँ गँ घँ' इत्त्यङ्गीकृत्त्य चतुष्ट्वेन यमानाम् प्रतिपादनञ्च कृतमिति व्याक्ख्यातव्यमिति च। अत्त्रेदमपि अविस्स्मरणीययँ यत् कादीनाम् पूर्णरूपाणां स्पर्शानामेव वर्णसमाम्नायेषूपदिष्टत्त्वेऽपि न हि अभिनिहितीभूतानामर्धरूपाणान् तेषाञ्च गणनायास् तत्तद्वर्णसमाम्नायोपदेशकृन्मतविरुद्धत्त्वन् तेषाम् मतेऽभिनिहितीभूतानान् तेषामनस्तित्त्वमेव वाऽप्प्यास्स्थातुयँ युज्ज्यते इति।

यमानामुदाहरणानि च उव्वटोक्तानि यथा– पलिक्नीरित्[3], चख्नथुः, जग्मतुः[4] (परिग्मन्[5]), वृत्त्रघ्ने परि[6], निदो यत्त्र मुमुच्महे[7], परिज्मानमिव[8], आत्मा ते वातः[9] अमथ्नादनन्यम्[10], वद्मा सूनो[11], आ

---

१. या.शि.शि.व.वि., टी.पृ.१५७। २. सू.३५५–३५६। ३. ऋ.प्रा. उ.भा. १।५०, ६।२९ (शा.ऋ.म.सं. ५।२।४)। ४. तत्त्रैव, १।५० (शा. ऋ. म. सं. १०।४०।१४)। ५. तत्त्रैव, ६।२९ (शा.ऋ.म.सं ४।४३।६)। ६. तत्त्रैव, (शा.ऋ.म.सं. ९।९८।१०)। ७. तत्त्रैव, (शा.ऋ.म.सं. ९।२९।५)। ८. तत्त्रैव, (शा.ऋ.म.सं. १।१२७।२)। ९. तत्त्रैव, (शा.ऋ.म.सं. ७।८७।२)। १०. तत्त्रैव, शा.ऋ.म.सं. १।९३।६)। ११. तत्त्रैव, (शा.ऋ.म.सं. ६।१३।६)।

ते दारूणि दध्मसि[1], आप्नानन् तीर्थम्[2], गृभ्णामि ते[3] इति । लेखकप्रमादात् सम्पादकप्रमादाद् वा उक्तानि उदाहरणानि मुद्रितेषु पुस्तकेषु अयथार्थानि सञ्जातानि दृश्यन्ते, तत्र यमप्रतिनिधिलिपीनामदर्शनात्; तथाप्येतामेव समालोचनाम् प्रदर्शयितुमस्माभिरप्यत्र तथैवोपस्थापितानि तानि । यच् च वैयाकरण– सिद्धान्तकौमुद्द्याम् "पलिक्क्नीः चख्ख्नतुः अग्ग्निः घ्घ्नन्ति इत्यत्र क्रमेण कखगघेब्भ्य× परे तत्सदृशा एव यमाः"[4] इत्युक्तन् तदप्यशुद्धम्, चख्ख्नतुः इत्यत्र पूर्वस्य खकारस्य चर्त्वस्याऽऽवश्यकत्वात्, "अनन्यस् तु प्रकृते× प्रत्ययार्थे"[5] इति ऋग्वेदप्रातिशाख्यवचनस्य उव्वटकृततद्व्याख्यानस्य च जागरूकत्वात्; घ्घ्नन्ति इत्यत्र घकारद्वित्वनिमित्तस्याऽऽभावात् पूर्वपदकल्पनया कथञ्चित्तस्योपपादनेऽपि जस्त्वस्याऽऽवश्यकत्वात् । तत्राऽयम् भट्टोजेर् दोषस् तदनुयायिषु तद्ग्रन्थव्याख्यातृषु च मद्ध्ये केनाऽपि नैव दृष्टः, तत्समाधानस्य वार्ता तु दूरे एव, इति तेषाँ वेदाद्ध्ययनस्य मन्दत्वमेव दृश्यते इति न खलु वैदिकैस् तेषामेतद्विषयके वचने आदर× कर्तव्यः । एतेन अन्यत्राऽपि दृश्यमाना एतादृशा लेखा× प्रत्याख्याता वेदितव्याः । तस्मादत्र उव्वटादिप्रदर्शितानि उदाहरणानि समाहृत्य सम्भवन्ति अन्यानि चोदाहरणानि सयँ योज्य युक्तियुक्तलिपिप्रयोगेण यमोदाहरणानि प्रदर्शयामः । तानि यथा— वृक्कँ णासः[6], पलिक्कँ नीः[7], रुक्कँ मः[8], निचक्खँ नुः[9], चक्खँ नतुः[10], अरुग्गँ णम्[11], अग्गँ निम्[12], जग्गँ मतुः[13], वृत्तरग्घँ ने[14], जङ्घँ नन्ति[15], अग्घँ न्या[16], स्तिग्घँ नोति[17], याच्चँ ञा[18], मुमुच्चँ महे[19], यज्जँ ञपतिः[20],

---

१. ऋ.प्रा. ६।२९ (शा.ऋ.म.सं. ८।१०२।२०)। २. तत्तरैव, (शा. ऋ. म. सं. १०।११४।७) । ३. तत्तरैव, (शा. ऋ. म. सं. १०।८५।३६) । ४. सञ्ज्ञाप्रकरणे बाह्ययप्रयत्ननिरूपणे । ५. ६।३४ । ६. शा.ऋ.म.सं. ३।८।७ । ७. तत्तरैव, ५।२।४ । ८. तत्तरैव, १।८८।२, या. शि. श्लो. २१२ (शि.स.)। ९. शौ. अ. म.सं. ५।३१।८; १०।१।१८ । १०. व.शि., सप्तमे प्रकरणे, सू. ४ । ११. शा.ऋ.म.सं. ६।३९।२ (शौ.शि.टी.श्लो. ७)। १२. शा.ऋ.म.सं. १।१।१ । १३. तत्तरैव, १०।४०।१४ । १४. तत्तरैव, ९।९८।१० । १५. शौ.शि.श्लो. ३५ । १६. मा. वा. शु. य. म. सं. १।१ । १७. सम्भावितमेवेदमुदाहरणम् । १८. आ. तै. सं. १।५।७।४ । १९. शा. ऋ. म. सं. ९।२९।५ । २०. मा.वा.शु.य.म.सं. १।२ ।

परिज्जँमानम्[१], सम्मार्ज्जँमि[२], अट्टँणारः[३], हेट्ठँनाति[४], कुड्डँमलः[५], रत्तँनधातमम्[६], प्रत्तँनवत्[७], सक्थँना[८], अमत्थँनात्[९], रत्थँनाति[१०], मृद्दँनाति[११], विद्दँमा[१२], दद्धँना[१३], साद्धँनोति[१४], दद्धँमः[१५], आप्पँनानम्[१६], पाप्पँमा[१७], गृब्भँणामि[१८], अगृब्भँणन्[१९], दब्भँनोति[२०], ररब्भँमा[२१] इति । छझढफबयमानामुदाहरणानि नोपलब्धानि अस्माभिः । यद्द्यपि ह्विट्निना तैत्तिरीयप्रातिशाक्ख्यव्याक्ख्यायाम् छकारमकार-सयँयोगोऽपि यमोत्पत्तिस्स्थानत्वेनोपात्तस्[२२] तथापि 'यच्छ्मश्श्रुणः'[२३] इत्यादौ, 'प्रदोधुवच्छ्मश्श्रुषु'[२४] इत्यादिषु "न स्स्पर्शस्स्योष्म-प्प्रकृतेऽ प्रतीयाद् यमापत्तिम्"[२५] इत्यादिभिर् वचनैर् यमभावस्स्य निषिद्धत्वात् तदनन्यस्स्य छकार-पञ्चम-सयँयोगस्स्य एकपदस्स्थस्स्य चाऽदृश्श्यमानत्वात् तदशुद्धमेव । यद्द्यपि याज्ञवल्क्यशिक्क्षा-याम् "पञ्चमाश् शषसैर् युक्ता अन्तस्स्थैर् वाऽपि सयँयुताः । यमास् तत्तर निवर्तन्ते श्मशानादिव बान्धवाः"[२६] इति, नारदीयशिक्क्षायाम् च– "वर्गान्त्याञ् छषसैस् सार्धमन्तस्स्थैर् वापि सयँयुतान् । दृष्ट्वा यमा निवर्तन्ते आदेशिकमिवाद्ध्वगाः"[२७] इति उपलब्ध्यते, शुक्लयजुर्-वेदप्रातिशाक्ख्ये च– "ऊष्मबभ्यऽ पञ्चमेषु यमापत्तिर् दोषः"[२८] इति

---

१. शा. ऋ. म. सं. १।१२७।२ । २. मा. वा. शु. य. म. सं. १।२९, (अमो. शि. श्लो. ५२, पारा. शि. श्लो. ५८) । ३. आ. तै. सं. ५।६।५।३ । ४. सम्भावितमेवेदमुदाहरणम् । ५. सम्भावितमिदमुदाहरणम् । ६. शा. ऋ. म. सं. १।१।१ । ७. आ. तै. सं. २।२।१२।१ । ८. मा. वा. शु. य. म. सं. २३।२९ (या. शि. श्लो. २१२) । ९. शा. ऋ. म. सं. १।९३।६ । १०. मै. सं. ३।८।७ । ११. सम्भावितमेवेदमुदाहरणम् । १२. शा. ऋ. म. सं. १।१०।१० । १३. शा.ऋ.म.सं. ८।२।९ । १४. सम्भावितमेवेदमुदाहरणम् । १५. मा. वा. शु. य. म. सं. १६।६४ (या.शि.श्लो. २१२) । १६. शा.ऋ.म.सं. १०।११४।७ । १७. शौ.अ.म.सं. ५।२२।१२ । १८. शा.ऋ.म.सं. १०।८५।३६ । १९. मा. वा. शु. य. म. सं. १०।१ । २०. आ.तै.सं. ४।१।१० । २१. शा.ऋ.म.सं. ८।४५।२० (शौ. शि. श्लो. ३७)। २२. २१।१२, पृ. ३९० । २३. आ.तै.सं. २।१।१।५। २४. शा. ऋ. म. सं. २।११।१७ । २५: ऋ. प्रा. ६।३०, तै. प्रा. वै. २१।१३ । २६. श्लो. २१४, (शि. स.) । २७. २।२।९ । २८. ४।१६४ ।

वचनमुपलब्ध्यते तथापि अत्तर यमविधायकशास्तरस्य प्राप्तेरभावाद-प्प्राप्तप्प्रतिषेधोऽयम् चिन्तनीय एव दृश्यते। स्यान् मन्दशङ्का-परिहाराद्द्यर्थमिदं शास्तरम् प्रावृत्तम्; अथवा सर्ववर्णान्न्यथात्त्व-जनयितॄणामतीर्थोषितानामुच्चारणे सम्भावितन् दोषम् परिहर्तुम् प्रवृत्तं स्याद्। यद् वा पञ्चमद्वित्त्वेऽपि प्रथमस्स्य मकारभिन्नस्य पञ्चमस्याभिनिधानात्[1] ततः परन् नासिक्यस्स्य ध्रुवस्य प्राप्तेस् सत्त्वात्[2] तद् ध्रुवयँ यमसदृशमिति तद् यमत्त्वेनोपचर्य तन्निवारणा-येमानि वचनानि इति व्याख्येयम्। वैदिकाभरणकारेणापि एवमेव व्याख्यातम्[3]। यद्द्यपि माध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदमन्तर-ब्रह्मयजुस्संहितापुस्तकादिषु अपि सचन्द्रबिन्दुका यमलिपिर् न प्प्रयुज्यते तथापि यमानान् नासिक्यत्त्वादत्तर तथा कृतमिति वेद्द्यम्। यद्द्यपि उक्तसंहितापुस्तकादिषु तकारजयमस्स्य ककारेण सङ्केतः क्रियते, तथापि अन्न्येषायँ यमानां सङ्केताय न काऽपि विशिष्टा लिपिस् तत्तर प्रयुज्यते इति अव्व्यवस्स्थित एव तत्तरत्त्यो यमलिपिप्प्रयोग इति तं सर्वथा परित्त्यज्य नव्यैर् विद्द्वद्भिस् संसूचिताम्[4] पद्धति-मवलम्ब्य नियतरूपेणात्तर यमलिपिः प्रयुक्तेत्त्ययम् प्रयोगस् सम्म्यगा-कलनीयः परीक्ष्यग्राहिभिर् विचक्षणैः।

(ढ) नासिक्यविवेकः

हकाराद् णनमेष्वेकस्मिन् हि एकपदे स्स्थिते।
परेऽन्तरागतो रक्तो हँस् तु नासिक्य उच्च्यते ॥८५॥

अपराह्हँणे, अह्हँनाङ्केतुः, ब्रह्हँमवादिन इत्त्यादौ[5] हकाराद् णनमानामेकतमस्मिन् परे हकारस्स्य णनमानामेकतमस्स्य च मद्ध्ये योऽ-नुनासिकहकाररूपो वर्ण उपजायते स हि नासिक्य उच्च्यते। स च केषाञ्चिदेवाभिमतः। एतादृशस्स्य वर्णस्स्याऽऽगमाय हकारस्स्य द्वित्-त्वन् तत्तरोत्तरस्स्य हकारस्स्य नासिक्यीभावः, हकारात् परस्स्य णकारस्स्य नकारस्स्य मकारस्स्य वा द्वित्त्वन् तत्तर पूर्वस्स्य तस्स्य हकारसादृश्येन सोष्मभावो वाऽपि आवश्यको भवति। हकारस्स्य कुत्तरचिद् द्वित्त्वम् ऋग्वेदप्रातिशाख्येऽन्न्वाख्यायते[6] शुक्लयजुर्वेद-

---

१. ऋ. प्रा. ६।१७। २. तत्तरैव, ६।४१। ३. तै.प्रा. वै. २१।१३। ४. ऋग्वर्णक्करमलक्षणटीकायाम्, श्लो. १७; या. शि. शि. व. वि., पृ. १४४–१४५। ५. आ. तै. कृ. य. सं. २।१।२।५, २।४।१४।१, १।७।१।४। ६. ६।६, ९।

प्रातिशाख्ये तु अस्स्पर्शपरस्स्यापि सयँयोगादिस्थस्स्य हकारस्स्य द्वित्त्वस्स्याभावस्स्याऽनूनवाख्यायकम् "परन् तु रेफहकारावभ्याम्"[1] इति वचनमस्ति; हकारात् स्वरपूर्वकात् स्पर्शे परे तु स्स्पर्शस्स्यैव द्वित्त्वन् तत्तराऽनूनवाख्यायते "ऊष्मानतस्तथावभ्यशच् च स्पर्शः"[2] इति। तैत्तिरीयप्रातिशाख्ये तु रेफपरकस्स्य हकारस्स्य द्वित्त्वाभावेऽनूनवाख्याते[3]ऽपि णनमैकतमपरकस्स्य हकारस्स्य तु द्वित्त्वाभावो न तत्तर प्रतिपाद्द्यते। ऋक्तनतराख्ये सामवेदप्रातिशाख्येऽपि सयँयोगादौ स्थितयो रेफहकारयोर् द्वित्त्वस्स्याभावोऽनूनवाख्यायते[4]। शौनकीयचतुरद्ध्यायिकाख्ये अथर्ववेदप्रातिशाख्येऽपि सयँयोगादिस्थस्स्य हकारस्स्य द्वित्त्वस्स्याभाव× प्रतिपादितोऽस्ति[5]। एवञ् च बाह्वृच्ये णकारादेर् हकारस्स्य वा द्वित्त्वेन, वाजसनेयके छान्दोग्ये आथर्वणे च णकारादेरेव द्वित्त्वेन तैत्तिरीयके च हकारस्स्य द्वित्त्वेन[6] नासिक्यस्स्योपजनस् सम्भाव्यते। किन् तु तैत्तिरीयाणाम् आथर्वणिकानाञ् च प्रातिशाख्ये विहायाऽनूनयत्तर नासिक्यागमो नोल्लिखित इति अनूनयेषु ग्रन्थेषु तत्तरतत्तर वर्णस्स्थानादिनिरूपणस्स्याऽवसरे नासिक्यवर्णस्स्योल्लेख× प्रप्प्रसिद्धिमनुरुद्ध्यैव कृत इति सम्भाव्यते।

नासिक्यवर्णस्स्योल्लेखश् च ऋग्वेदप्रातिशाख्ये "नासिक्ययमानुस्स्वारान्"[7] इति कृतोऽस्ति, किन् तु तस्स्य स्वरूपादिकन् तत्तर सूत्तरकारेण भाष्यकारेण उव्वटेन वाऽपि नैव प्रतिपादितन् दृश्यते; न च यमागमप्प्रकरणादौ नासिक्यागमस् तत्तरोक्तः। शुक्लयजुर्वेदप्रातिशाख्येऽपि– "यमानुस्स्वारनासिक्यानान् नासिके"[8] इति, "समानस्तथानकरणा नासिक्यौष्ट्ठ्याः"[9] इति च नासिक्यस्स्योल्लेख× कृतोऽस्ति। "हँ इति नासिक्यः"[10] इति तस्स्य स्वरूपञ् च प्रतिपादितमस्ति। तत्तर च उव्वटेन "अयम् ऋक्शाखायाम् प्रसिद्धः" इत्त्युक्तम्; किन् तु ऋग्वेदप्रातिशाख्यभाष्येऽपि तेनाऽस्स्य स्वरूपस्थित्त्यादिकङ् किमपि न निरूपितमिति पूर्वमेवोक्तम्। शुक्लयजुर्वेदप्रातिशाख्य-

---

१. ४।१०२। २. ४।१०३। ३. १४।१९। ४. ५।६।५ (२७०)। ५. ३।३१। ६. "सूत्तरकारस् तु समाम्नायसिद्धत्त्वाद् अत्तर 'हकारान् नणमपरात्' (२१।१४) इति हकारद्वित्त्ववत् पञ्चमन् नासिक्यवँ विधास्स्यति"– तै. प्रा. वै. १।१ (पृ. ९)। ७. १।४८। ८. १।७४। ९. १।८०। १०. ८।२३।

कारेण तु "तस्म्मिण् ड़ढ़जिह्व्वामूलीयोपद्ध्मानीयनासिक्क्या न सन्ति माद्ध्यन्दिनीयानाम् लृकारो दीर्ग्घः प्प्लुताश्च्चोक्क्तवर्ज्जम्"[१] इति उक्त्वा नासिक्क्यस्स्य माद्ध्यन्दिनीयानामाम्म्नायेऽभाव उक्तः। तैत्तिरीयप्रातिशाक्ख्ये तु "न विसर्ज्जनीयजिह्व्वामूलीयोपद्ध्मानीयानुस्स्वारनासिक्क्यानाम्"[२] इत्त्यत्त्र, "नासिक्क्या नासिकास्स्थानाः"[३] इत्त्यत्त्र च यमैस् सह नासिक्क्यस्स्योल्लेखः कृतः, "हकारान् नणमपरान् नासिक्क्याम्"[४] इति नासिक्क्यागमश् च प्प्रतिपादितः। तस्स्य नासिक्क्यस्स्य परिचयश् च तत्त्र "सानुनासिक्क्यो हकारः" इति त्रिभाष्ष्यरत्नकारेण दत्तः। ऋक्तन्त्रेऽपि "हुमित्त्यनुनासिकः"[५] इति, नासिकायायँ यमानुस्स्वारनासिक्क्याः"[६] इति चोल्लेखोऽस्स्य प्राप्प्यते। शौनकीयचतुरद्ध्यायिकायाम् च– "नासिक्क्यानान् नासिका"[७] इति नासिक्क्यस्स्य स्स्थानन् निर्दिष्टम् "(समानपदे) हकाराद् (उत्तमे स्पर्शे) नासिक्क्येन (व्यवधानम् भवति)"[८] इत्त्यस्स्याऽऽगमः प्रतिपादितः। पाणिनीयव्याकरणभाष्ष्येऽपि "नासिक्क्यो वर्णः" इत्त्युल्लेखोऽस्ति[९]। शिक्क्षेति प्रसिद्धेषु ग्रन्थेषु तु अस्स्य नासिक्क्यस्स्योल्लेखो दुर्लभः। याज्ञ्ज्ञवल्क्यशिक्क्षायाम्[१०], चारायणीयशिक्क्षायाम्[११], व्यासशिक्क्षायाम्[१२], शम्भुशिक्क्षायाम्[१३], सर्वसम्मतशिक्क्षायाम्[१४], पारिशिक्क्षायाम्[१५], पद्द्चात्मकापिशलिशिक्क्षायाम्[१६] चैव तदुल्लेखः प्राप्प्यते। कुत्त्रचिदस्स्य नादत्त्वेनोल्लेखः कृतः प्रतीयते, तदुत्तरत्त्राऽनुपदमेव प्प्रतिपादयिष्ष्यामः ॥८५॥

(ण) स्वरभक्तिविवेकः

स्वरांशस् स्वरभक्तिस् स्याद् ऋकारस्स्यांशको हि सः।
एकारांश इकारांश उकारांशोऽपि वा क्वचित् ॥८६॥

स्वरभागस् स्वरभक्तिरित्त्युच्च्यते। तथा च उव्वटः "अनुन्वर्थसञ्ज्ञा चेयं स्वरभक्तिस् स्वरप्प्रकार इत्त्यर्थः"[१७] इति, सोमयार्योऽपि "भक्तिरवयव एकदेश इति यावत्"[१८] इति, नागोजिभट्टोऽपि "भक्तिर्

---

१. ८।३९। २. १।१८। ३. २।४९। ४. २१।१४। ५. १।२। ६. २।२।२ (१२)। ७. १।२६। ८. १।१००। ९. ६।१।६३। १०. शि. स., पृ. १३–१४। ११. पृ. १८, ३०। १२. सू. ४११, ४१४। १३. श्लो. ५०। १४. श्लो. ७५। १५. सू. १७५। १६. श्लो. ९। १७. ऋ.प्रा.उ.भा. १।३२। १८. तै.प्रा.त्रिभा.र. २१।१५।

भागः"[1] इति। अयञ् च स्स्वरभागो यम-वर्गपञ्चमवर्णमद्ध्ये, रेफाद् व्यञ्जनेऽथवा ऊष्मणि स्स्वरोदये ऋकारे चैव परे; लकाराच् चोष्मणि स्वरोदये परे तन्मद्ध्ये उपजायते ऋषौ आर्षत्त्वेनाऽभिमते वा ग्रन्थे। अभिनिहिताद् घोषिणस् स्पर्शोष्मपराच् च परत्त्राऽप्ययमुपजायते। तथा च ऋग्वेदप्रातिशाक्ख्ये– "यमान् नासिक्क्या स्वरभक्तिरुत्तरा गार्ग्यस्स्य, ऊष्मा सोष्मणः"[2] इति, "रेफात् स्वरोपहिताद् व्यञ्जनोदयाद् ऋकारवर्णा स्स्वरभक्तिरुत्तरा"[3] इति, "विच्छेदात्त्स्पर्शोष्मपराच् च घोषिणः"[4] इति च। शुक्लयजुर्वेदप्रातिशाक्ख्येऽपि–"रलावृलृवर्ण्णाव्भ्यामूष्म्मणि स्स्वरोदये सर्व्वत्तर"[5] इति, प्रतिज्ञासूत्त्रेऽपि–"अथापरान्तस्त्थस्स्यसयँ युक्तस्स्याऽयुक्तान्यहलूष्म्मऋकारैरेकारसहितोच्चारणम्"[6] इति; तैत्तिरीयप्रातिशाक्ख्येऽपि– "रेफोष्मसयँ योगे रेफस्वरभक्तिः"[7] इति; शौनकीयचतुरद्ध्यायिकाक्ख्ये अथर्ववेदप्रातिशाक्ख्ये च "रेफादूष्मणि स्वरपरे स्वरभक्तिरकारस्स्यार्धञ् चतुर्थमेके, अनन्यस्मिन् व्यञ्जने चतुर्थमष्टमवँ वा"[8] इति। शिक्क्षेति प्रसिद्धेषु ग्रन्थेष्वपि स्वरभक्तेर् विधानानि सर्वत्तर प्राप्यन्ते। तथा हि शैशिरीयशिक्क्षायाम्– "रलौ स्वराद् यत्तर पूर्वा ऊष्मसञ्ज्ञे परे स्थिते। पूर्वस्स्वरस्स्य सम्भाव्या स्वरभक्तिऽ प्रकीर्त्यते ॥ अदर्शि शीर्षाऽग्निर् होता सर्सृते च न जल्हवः। शतवल्शोऽर्षाण अर्षन्नेंतदत्तर निदर्शनम् ॥ व्यञ्जनान्तेषु युक्तेषु सैव स्स्यात् पादमात्त्रिका। शीर्ष्णश्शीर्ष्णऽ प्रसर्स्राणस् तर्ह्येवैतन् निर्दशनम् ॥ स्वरभक्तिम् प्रयुञ्जानस् त्रीन् दोषान् परिवर्जयेत्। इकारञ् चाऽप्युकारञ् च ग्रस्तदोषन् तथैव च ॥"[9] इति; शौनकशिक्क्षायाञ् च "ऋलृस्स्वरौ यत्तर पूर्वौ ऊष्मसञ्ज्ञे परे स्थिते। पूर्वस्स्वरस्स्य सम्भाक् स्यात् स्वरभक्तिऽ प्रकीर्त्यते"[10] इति, "व्यञ्जनानान् त्वर्धमात्त्रा स्वरभक्तेस् तथैव च। सयँ योगे पादमात्त्रा स्स्यात् स्वरभक्तिऽ प्रकीर्त्यते"[11] इति च; याज्ञवल्क्यशिक्क्षायाञ् च– "करिणी कुर्विणी चैव हरिणी हरिता तथा तद्वद् हंसपदा नाम पञ्चैतास् स्वरभक्तयः ॥ करिणी रहयोर् योगे कुर्विणी लहकारयोः।

---

१. पा. व्या. भा. प्र. उ. ८।४।१। २. ६।३६–३७। ३. ६।४६। ४. ६।४७। ५. ४।१७। ६. २।३ (अत्तर मुद्द्रितपुस्तकेषु असङ्गतम् पाठान्तरन् दृश्यते)। ७. २१।१५। ८. १।१०१, १०२। ९. श्लो. ५२–५५। १०. श्लो. ४३। ११. श्लो. ११।

हरिणी रशयोर् योगे हरिता लशकारयोः ।। या तु हंसपदा नाम सा तु रेफसकारयोः । देवम् बर्हिरिति करिणी उपबल्हेति कुर्विणी । हरिणी दर्शतमिति शतवल्शेति हारिता ।। वर्षो वर्षीयसीत्त्याहुस् तथा हंसपदेति च । रलाब्भ्याम् पर ऊष्माणो यत्तर स्स्युस् तु स्स्वरोदयाः । स्वरभक्तिरसौ ज्ञेया पूर्वमाक्करम्म्य पट्ठ्यते ।। स्वरभक्तिम् प्रयुञ्जानस् त्रीन् दोषान् परिवर्जयेत् । इकारञ् चाप्युकारञ् च रस्तदोषन् तथैव च"[1] इति; अनन्तकृते प्रतिज्ञासूत्तरभाष्ये माद्ध्यन्दिनशिक्क्षावचनञ् च– "शषसहा यत्तर दृश्यन्ते रेफेणाङ्कितमस्तकाः । स्वरभक्तिम् प्रयुञ्जीत सयँ योगे नैव कारयेत्"[2] इति; लघुमाद्ध्यन्दिनीयशिक्क्षायाञ् च– "रेफो रेकत्त्व–(रेकार–? रेभाव–?) माप्नोति शषहेषु परेषु च । ददर्श वर्षोऽग्रर्हाच् च सयँ योगे नैव कारयेत् । वर्षम्मन् वर्षप्यायाऽन्तर्हृदा तत्तर तावदुदाहृतिः । लकारोऽपि च सावर्ण्यादेकारसदृशो भवेत् । शतवल्शा च वल्हा च तत्तर तावदुदाहृतिः"[3] इति । वर्णरत्नप्रदीपिकायाञ् च– "स्वरभक्तिश् च पूर्वाङ्गन् देवम् बर्हिरुदाहृतिः । इकारे च तथोकारे तायँ यत्नेन विवर्जयेत् ।। रेफो वाऽथ लकारो वा यत्तरोष्मणि स्वरोदये । स्वरभक्तिर् भवेत् तत्तर पूर्वमाक्करम्म्य पट्ठ्यते ।। ऊष्मणामुपरिस्स्थस् तु रेफो याति रेवर्णताम् । रेफत्त्वम् पुनरायाति यद्द्यूष्माणोऽन्यसयँ युताः ।। ऊष्मणां स्वरभक्तिस् तु द्विर्भावम् बाधते यथा । वर्षो वर्षीयसि ह्वार्षीच् छतवल्शोऽपि सिद्ध्यति"[4] इति । परिभाषाङ्कसूत्तरेऽपि "अहल्शलि ऊर्ध्वरेफस्स्य सैकारꣳ प्राक् च"[5] इति; केशवीयशिक्क्षायाङ्कारिकावल्ल्यामपि– "अनुतस्स्थानान् द्वितीयस्स्य सैकारोच्चारणम् भवेत् । अयुक्तहल्भिश् शषसैर् ऋकारेण युतस्स्य च ।। एवमेव तृतीयस्स्य शषसैस् सयँ युतस्स्य च । सैकारोच्चारणङ् कुर्यादिति शास्तरव्यवस्स्थितिः"[6] इति । मल्लशर्मशिक्क्षायाञ् च– "अक्क्षराणामुपरि यो वेदे रेफꣳ प्रवर्त्तते । स एव शषहर्ऋणावँ विपरीतन् तु यद् भवेत्"[7] इति । स्वरभक्तिशिक्क्षायाञ् च– "ऊष्मोर्ध्वरेफस्स्योच्चारस् सैकारो

---

१. श्लो. ९८–१०४ (शि. स., पृ. १७) । २. शु. य. प्रा. (वाराणस्स्याम् मुद्द्रिते, १९४५) पृ. ४२१, (प्र. सू. २।३) । ३. श्लो. १०–१२ (शि. स., पृ. ११४–११५) । ४. श्लो. ५२–५५ (शि. स., पृ. १२१–१२२) । ५. सू. ४ (शि. स., पृ. १४१) । ६. श्लो. ९–१० (शि. स., पृ. १५०) । ७. श्लो. ३९ (शि. स., पृ. १५७) ।

हल्युता न चेत्"[1] इति, तत्तरोक्तम् "पितॄणामिह पित्रेणामित्यादि च निदर्शनम्"[2] इत्युदाहरणवाक्यन् तु असङ्गतन् दृश्यते। तत्तरैव पुनः "स्वरभक्तिꣳ पञ्चधा स्स्यात् तत्तराऽऽद्द्या करिणी स्स्मृता। रकारेण हकारेण सयँयोगो यत्तर दृश्यते। करिणी सा तु विज्ज्ञेया बर्हिरसीति दर्शनम्। लकारेण हकारेण सयँयोगो यत्तर दृश्यते। कुर्विणी सा हि विज्ज्ञेया उपवल्हेति पश्यति॥ रकारस्स्य शकारेण सयँयोगो यत्तर दृश्यते। हरिणी सा तु विज्ज्ञेयाऽर्शस इत्यादि दर्शनम्॥ लकारस्स्य शकारेण सयँयोगो यत्तर जायते। हरिणीन् तावँविजानीयाच्छतवल्शेति दर्शनम्॥ रेफस्स्याथ षकारेण सयँयोगो यत्तर दृश्यते। हंसपादेति विज्ज्ञेया वर्षो वर्षीयसीति च॥ एतल् लक्क्षणमाक्ख्यातं स्वरभक्तेर् विचक्क्षणैः"[3] इति च। चारायणीयशिक्क्षायाञ् च— "स्वरभक्तिर् द्विधा ज्ज्ञेया लकारो रेफ एव च। स्वरोदा व्यञ्जनोदा च विहिताऽक्क्षरचिन्तकैः। रहयोꣳ करिणीवँ विद्द्याच्छात् कर्विणीं रशकायोः। लशयोर् हरिणीवँ विद्द्याद् रात्तरीन् तु रसकारयोः॥ या तु हंसपदा नाम सा स्स्याद् रेफशकारयोः। अभक्क्ष्याꣳ करमवर्ज्याश् च पञ्चैतास् स्वरभक्तयः। एकपदा भवेद् यत्तर स्वरभक्तिस् स्वरोदया। द्विपदा चैव या दृष्टा व्यञ्जनोदा च सा स्स्मृता। अणुमात्रञ् च रेफस्स्याद् व्यञ्जनस्स्य तथैव च। स्वरस्स्य सार्धमात्तरञ् च स्वरभक्तिवँ विनिर्दिशेत्॥ स्वरभक्तीꣳ प्रयुञ्जानस् त्रीन् दोषान् वर्जयेद् बुधः। इकारञ् चाऽप्युकारञ् च रस्तदोषान् विवर्जयेत्॥ दर्शपूर्णमासौ, वार्षुकेस्मै"[4] इति। व्यासशिक्क्षायाञ् च— "स्वरोर्ध्वोष्मणि रेफस्स्य लस्स्यापि स्स्वरभक्तिता। तन्मद्ध्ये ऋत्त्वलृत्त्वे च स्वरभक्तिम् प्रकल्पयेत्। हपरे तु हलन्ता स्स्यात् स्वरभक्तिस् तु सर्वँवृता। अजन्ता शषसोर्ध्वे च विवृता समुदीरिता॥ स्वरभक्तिꣳ करेणू रो होर्ध्वो लꣳ कर्विणी भवेत्। हरिणी शषसोर्ध्वो रो लकारो हरितोच्च्यते॥ दीर्घात् स्वारादनन्त्या च स्वाराद् भक्तिꣳ पृथग् भवेत्। प्रत्त्येकस्स्वरभाग् यश् च न भक्तिर् निहिते च हे"[5] इति। शम्भुशिक्क्षायाञ् च— "रेफꣳ करेणुश् च हकार ऊर्ध्वे लꣳ कर्विणीति स्स्वरभक्तिरुक्ता। लो हारिता शे हरिणी च हस्तिनी (रेफस् तथा) हंसपदाऽपि षोर्ध्वे"[6] इति। कौह-

---

१. श्लो. १८ (शि. स., पृ. १७३)। २. तत्तरैव।
३. श्लो. ३६–४० (शि. स., पृ. १७५)। ४. चा. शि., पृ. ३०।
५. सू. ३८१–३८८। ६. श्लो. १६।

लीयशिक्क्षायाञ् च— "रेफस्स्य ऊष्मसयँ योग एष याति स्स्वरात्मताम् । (स्वरोऽयं स्यात् तु रेफेण) समानकरणरूपभाक् ।। ऋकार आदिरणुमात्तरो मद्ध्ये रेफोऽर्धमात्तिरकः । अणुमात्तरस् तथानृत्यांशो मद्ध्ये भक्तिर् विधीयते"[1] इति । सर्वसम्मतशिक्क्षायाञ् च— "स्वरोत्तरोष्मणऽ पूर्वरेफस्स्य स्स्वरभक्तिता । ऋकारस्स्य स्स्वरूपन् तद् बुद्ध्वा बोद्धुं हि शक्क्यते । स्वरभक्तिरतो विद्द्याद्ऋकारमिह विस्तरात् । ऋकारस्स्य स्स्वरूपं हि श्लिष्टम् पादचतुष्टयम् । पादेषु तेषु विज्ज्ञेयावादावन्ते स्वरात्मकौ । अणू रेफस्स्य मद्ध्ये द्द्वौ विज्ज्ञेयौ व्यञ्जनात्मकौ ।। स्वरात्मकेन पादेन ह्युत्तरेणोत्तरन् तथा । स्वरपादान्वितौ भागौ स्वरभक्तिरितीरितौ ।। हकारे पूर्वभागस् स्यादुत्तरश् शषसेषु च ।। हकारे सवँवृतावँ विद्द्याद् विवृतामितरत्तर तु । पूर्वस्स्वरस्स्य चाल्पत्त्व-(तुल्यत्त्व-?) मित्त्वमुत्त्वमिति त्तरयम् । एतत् त्तरयवँ विसृज्ज्यैव स्वरभक्तिं समुच्चरेत् ।। स्वरभक्तिऽ परा स्वारात् प्रचयत्त्वमवाप्नुयात् । स्वारे दीर्घे तु नानृत्या या स्वतन्तरा धूर्षदम् भवेत् ।"[2] इति, पारिशिक्क्षायाञ् च— "स्वरोत्तरोष्मण्यपि पूर्वरेफलकारयोश् च स्स्वरभक्तिसञ्ज्ञा । स्यादर्धमात्तरा रलयोस् तदादावन्ते स्स्वरांशावणुमात्तरयुक्तौ ।। रलौ तु यस्मात्त्स्वरपादयुक्तौ तस्मात् तयोश् च स्स्वरभक्तिसञ्ज्ञा । पूर्वांशपादद्द्वययुग् घलन्ता स्यात् सवँवृताक्ख्या हपरे तु भक्तिः । परांशयुक्ता शषसेषु भक्तिऽ परेष्वजन्ता विवृताभिधाना ।। पूर्वस्स्वराल्पत्त्वकमित्त्वमुत्त्वन् त्तरयवँ विसृज्ज्यैव वदेद् (विपश्चित्?)। करेणुसञ्ज्ञा रहयोश् च योगे सा कर्विणी स्स्याल् लहकारयोगे । भक्तिस् तु या रेफसकारयोगे तां हस्तिनीति प्रवदन्ति केचित् ।। सा धूर्षमित्त्यत्तर तु या च भक्तिस् सेयं स्वतन्तरा स्वरभक्तिरुक्ता । सा हारिता स्स्याल् लशयोस् तथैव क्करमेण सप्त स्स्वरभक्तयस् ताः । उदाहरिष्ये स्स्वरभक्तयस् ताऽ क्रमात् करेणुण्वादि च हारितान्तम् । बर्हिर् यजत्त्यर्हति गार्हपत्त्यङ करेणु मल्हा इति कर्विणी स्स्यात् । सहर्षभा हंसपदा सुवर्षा दर्शश् च पर्शुर् हरिणी च वर्षम् । दीर्घाच् च ह्रस्स्वात् स्वरितादनन्त्यात् पृथग् भवेद् भक्तिरसंहिता च । पृथक् स्वरयँ यो भजतीह वर्णऽ पृथक् च भक्तिर् निहितेन होर्ध्वे"[3] इति । नारदीयशिक्क्षायाञ् च—"ऋवर्णं स्वरभक्तिञ् च च्छन्दोमानेन निर्दि-

---

१. श्लो. ७७–७८ । २. श्लो. २४–३१ ।
३. सू. १२०–१३१ ।

शेत् । प्रत्त्ययेन सहारेफम् मिमीत स्स्वरभक्तिषु । ऋवर्णे तु पृथग् रेफ× प्रत्त्ययस् तु पृथग् भवेत् । विद्द्याल् लघुमृकारन् तु यदि तूष्मणा सयँ युतः । ऊष्मणैव हि सयँ युक्त ऋकारो यत्तर पीड्ड्यते । गुरुवर्णस् स विज्ज्ञेयस् स्वृचन् चात्तरानुदर्शनम् । ऋषभन् च गृहीतन् च बृहस्पतिम् पृथिव्यान् च । निर्ऋतिपञ्चमा ह्यत्तर ऋकारा नात्तर संशयः । शषसहरादौ रेफस् स्वरभक्तिर् जायते द्विपदासन्धौ । इउवर्णाव्भ्यां हीना क्वचिदेकपदा क्रमवियुक्ता ।। स्वरभक्तिर् द्विविधा (स्याद्) ऋकारो रेफ एव च । स्वरोदा व्यञ्जनोदा च विहिताऽक्क्षरचिन्तकैः ।। शषसेषु स्स्वरोदयां हकारे व्यञ्जनोदयाम् । शषसेषु विवृत्तान् तु हकारे सवँ वृतावँ विदुः ।। स्वरभक्तिम् प्रयुञ्जानस् त्रीन् दोषान् परिवर्जयेत् । इकारन् चाप्प्युकारन् च ग्रस्तदोषन् तथैव च''[1] इति । लोमशीयायां शिक्क्षायामपि— ''करेणु× कुर्विणी चैव हरिणी हरितेति च । तथा हंसपदा नाम पञ्चैतास् स्वरभक्तयः । करेणुलँ लहयोर् विद्द्यात् कुर्विणीम् ऋहकारयोः । हरिणीलँ लशयोर् विद्द्याद् हारिता ऋशकारयोः । तथा रेफषकारे तु हंसपदा प्रकीर्तयेत् । या तु रेफसकारे स्स्यात् काकिनीन् तावँ विनिर्दिशेत्''[2] इति; ''व्यञ्जनशिरसि निविष्टो रेफ (ो हि) ऋवर्णतायँ याति । स तु सर्वत्तर न कार्यश् शषसहकारेषु कार्यः (कर्तव्यः ?) । अक्क्षरं शषसञ् चैव यत्तर तिष्ठति सयँ युतम् । ऋवर्णन् तत्तर विद्द्येत व्यञ्जनन् तु विनिर्दिशेत् ।··· रेफस्स्य च ऋवर्णस्स्य स्वरभक्तेस् तथैव च । अवर्णवत् प्रयोगस् स्याद् द्विवच् च व्व्यञ्जनस्स्य तु''[3] इति च । माण्डूक्क्यां शिक्क्षायान् च– ''ऊष्मस्स्थौ यत्तर दृश्यैते स्वरवर्णौ स्वरोदयौ । ऋलृवर्णौ तथा ज्ज्ञेयौ स्वरभक्तीति संस्थितौ ।। तां ह्रस्स्वाम् प्रतिजानीयाद् यथा मात्तरा भवेद् यदि । सम्म्यगेनावँ विजानीयाद् द्वौ दोषौ परिवर्जयेत् । सम्म्यगेनायँ यदा पश्यैच् छतवल्शेति निदर्शनम् ।। अकारन् चाप्प्युकारन् च विच्छिन्नवँ विवृतन् तथा । करिणी कर्विणी चैव हरिणी हरितेति च । तथा हंसपदा नाम पञ्चैतास् स्वरभक्तयः । करिणीं रहयोर् विद्द्यात् कर्विणीलँ लहकारयोः । हरिणीं रशयोर् विद्द्याद् धारितालँ लशकारयोः । या तु हंसपदा नाम सा तु रेफषकारयोः । या तु रेफसकारौ स्यात् काकिनीन् तावँ विनिर्दिशेत्''[4] इति, ''ऋवर्णरेफसयँ युक्तं स्वरितं स्यादनन्तरम् ।

---

१. २।६।२–९ । २. २।२–४ । ३. ६।१, २, ४ ।
४. श्लो. ९९–१०६ ।

ऋकाररेफसयँ युक्तयँ यत् पूर्ववँ व्यञ्जनोदये । ऋकारे लघु तद् विद्द्याद् रेफे तद् गुरुसञ्ज्ञकम्"[1] इति च ।

स्वरभक्तेस् स्वरूपन् तु ऋकारांशलृकारांशरूपमिति प्रातिशाख्ययोरुक्तम्[2] ऋकारलृकारौ च अकारांशघटितौ[3] इति स्वरभक्तेरपि अकारविधता आयाति । शौनकीयचतुरद्ध्यायिकाख्येऽथर्ववेदप्रातिशाख्ये[4] सामवेदसम्बद्धायालँ लोमशशिक्षायाञ् च[5] स्वरभक्तेरकारविधत्वं स्फुटमुक्तम् । माद्ध्यन्दिनीयाम्नाये तु स्वरभक्तेरेकाररूपता उक्ता[6], किन् तु तत्र एकार४ पूर्ण इव प्रतीयते न स्स्वरभागरूपः[7] । केषाञ् चिन् मते स्वरभक्ते४ पूर्वोत्तरस्स्वरसरूपता विज्ञायते[8] । तत्र च उकारांशरूपा इकारांशरूपा च स्वरभक्तिर् उव्वटेनोदाहृता[9] । छन्दोमानविशेषेण स्वरभक्तिरुत्पद्द्यते इति नारदीयशिक्षायामुक्तम्[10] । दृश्यते च छन्दोवृत्तपूरणाय भागवतेऽपि "अद्ध्यात्मदीपमतितीर्ष-(रष-) तान् तमोऽन्धम्"[11], "अर्ह(रह)णमुपपेद ईक्षणीयः"[12] इत्यादिषु बहुषु स्स्थलेषु[13] स्वरभक्तेरुच्चार्यत्वम् । "कान्तं स्म रेचकजिहीरषयोपगुह्य्य"[14], "आपूर्यमाणो वरषद्भिरम्बुदैः"[15] इत्यादिषु तु स्वरभक्तेरकाररूपपूर्णस्स्वरतया लेखोऽपि तत्र दृश्यते आदर्शेषु । अतश् चाऽपि स्वरभक्तेरकारविधताऽपि स्स्फुटीभवति ।

स्वरभक्तेश् च द्द्वौ भेदौ ऊष्मपरा स्वरभक्तिर् द्राघीयसी भवति[16], अनन्यव्यञ्जनपरा द्विर्भूतोष्मपरा च स्स्वरभक्तिस् तदपेक्षया ह्रस्स्वतरा भवति[17] इत्युक्त्वा ऋग्वेदप्रातिशाख्ये प्रतिपादितौ ।

---

१. श्लो. १२९ । २. ऋ. प्रा. ६।४६, शु. य. प्रा. ४।१७ । ३. एतद् ऋकारस्स्वरूपनिरूपणे सम्म्यक् प्रतिपादितन् तत एव बोद्ध्यम्। ४. १।१०१, १०२ । ५. ६।४ (शि.स., पृ. ४६०)। ६. प्र. सू. २।३ । ७. सैकारेतिवचनात् तथैव तत्तरोच्चार्यमाणत्वाच् च माद्ध्यन्दिनीयैः । ८. ऋ. प्रा. ६।५३ । ९. धूर्षदम् (ऋ. १।१४३।७) बर्हिषदः (ऋ. ९।६८।१) । १०. २।६।२ । ११. १।२।३ । १२. १।९।४१ । १३. १।९।११, ३।९।८,१३; ३।१५।४५, ३।१६।२३, ३।२८।३५, ४।९।९, ४।११।३; ४।१६।२४, ७।८।४५, ७।९।२०,३९,५०; १०।८।३०, ११।९।२६ इत्यादिषु । १४. १०।९०।१० । १५. १२।९।१४ । १६. ऋ.प्रा. १।३३, ६।४८ । १७. तत्तरैव १।३५ ।

चारायणीयशिक्षायावँ[1] व्यासशिक्षायान्[2] त्रिभाष्यरत्ने[3] नारदीय-शिक्षायाञ्[4] च व्यञ्जनान्ता स्वरान्ता (ऋकारलृकार–पूर्वार्धरूपा ऋकारलृकारोत्तरार्धरूपा) चेति प्रकारान्तरेण स्वरभक्तेर् द्वौ भेदौ प्रतिपादितौ। करिण्यादयः पञ्च षट् सप्त वा स्वरभक्तेर् भेदा अपि शिक्षासूक्ताः[5], किन् तु ते स्वरभक्तीनां श्रुतिगतवँ वैशिष्ट्यमादा-योक्ता न प्रतीयन्ते, तच्छ्रुतिवैशिष्ट्यस्य कुत्रापि प्रतिपादित-त्वात्।

अत्रेदमपि विचिन्तनीयम्। काण्वाम्नायमाध्यन्दिनीयाम्नाय-साधारणे शुक्लयजुर्वेदप्रातिशाख्ये तादृश्यायँ याज्ञवल्क्यशिक्षा-यान् तदनुयायिनीषु अन्यास्वपि शिक्षासु रेफाद् ऋकारे परे स्वर-भक्तेरनुल्लेखात् काण्वानामाम्नाये रेफाद् ऋकारे परे स्वरभक्तेर-भावेऽपि माध्यन्दिनीयाम्नायमात्रविषयके प्रतिज्ञासूत्रे तु रेफाद् ऋकारे परे स्वरभक्तेरन्वाख्यातत्वात्[6] केशवीयकारिकावल्ल्यां शिक्षायाञ्च "अन्तस्थानान् द्वितीयस्य सैकारोच्चारणम् भवेत्। अयुक्तहल्भिश् शषसैर् ऋकारेण युतस्य च"[7] इत्युक्तत्वाद् गौडसम्-प्रदाये तस्या मन्त्रसंहितायामपि उच्चार्यमाणत्वाच् च माध्यन्-दिनीयाऽऽम्नाये रेफस्य ऋकारे परे स्वरभक्तित्वेनोच्चारणं शास्त्रीयं सम्प्रदायप्राप्तञ्च दृश्यते। अतो महाराष्ट्रभवैर् माध्यन्दिनीयैर् वैदिकैः क्रियमाणन् तस्या ब्राह्मणभागे एव प्रयोज्यतायाः प्रति-पादनमनुपपन्नवँ विज्ञायते। प्रातिशाख्यप्रदीपशिक्षायाम् बालकृष्ण-गोडशेर् वचनमपि[8] न्यायपरिहीणमेवेति सुधीभिर् विभावनीयम्॥८६॥

(त) ड़ढ़विवेकः

द्वयोस् तु स्वरयोर् मध्ये ड़ढौ स्याताण् ड़ढ़ौ क्वचित्।
वेदमित्तरोक्ताविमौ द्विस्स्पृष्टौ द्विस्स्पृष्टकावपि॥८७॥

ऋग्वेदेऽन्यत्तत्र च क्वचित् समानपदस्थयोर् द्वयोस् स्वरयोर् मध्ये व्यञ्जनान्तराव्यवधानेनाऽऽगतो डकारो ड़कारो भवति ढकारश् च ढ़कारो भवति। माध्यन्दिनीयानान् तु इमौ वर्णौ न स्तः[9]। इमौ ड़ढ़ौ आचार्यवेदमित्तरेण विशेषेणोक्तौ इति ऋग्वेदप्रातिशाख्यकार आह।

---

१. पृ. ३०। २. सू. ३८३–३८४। ३. तै. प्रा. २१।१५। ४. २।६।७–८। ५. स्वरभक्तिविषये पूर्वमुद्धृतानि वचनानि दृश्यानि। ६. प्र. सू. २।३ ७. श्लो. ९। ८. शि.स., पृ. २९२–२९५। ९. शु. य. प्रा. ४।१४६, ८।३९।

तथाहि "जिह्वामूलन् तालु चाऽऽचार्य आह स्स्थानण् डकारस्स्य तु वेदमित्तरः। द्वयोश् चाऽस्स्य स्स्वरयोर् मद्ध्यमेत्त्य सम्पद्द्यते स डकारो ड़कारः॥ ढ़कारतामेति स एव चाऽस्स्य ढकारस् सन्नूष्मणा सम्प्रयुक्तः। इड़ा साढ़ा चाऽत्तर निदर्शनानि वीड्वङ्गमित्त्येतद-वग्ग्रहेण"[1] इति। ड़कारस्स्य तूल्लेखस् तैत्तिरीयप्रातिशाख्येऽप्यस्ति। अनयोर् ड़ढ़योरुच्चारणे च जिह्वाग्ग्रस्स्य भागाभ्याङ्क्रमेण तालौ द्विस् स्पर्शऽ क्रियते इतीमौ द्विस्स्पृष्टौ उच्च्येते[2]। केचित् तु द्विस् स्पर्शेऽपि स्पर्श ईषदेव क्क्रियते इति दुस्स्पृष्टौ ताविति मन्न्यन्ते[3]। दुस्स्पृष्टौ ईषत्त्स्पृष्टौ इत्त्यर्थः। प्रयुज्यते च "दुस्स्पृष्टन् तु प्प्राग् घकाराच् चतुर्णाम्"[4] "दुस्स्पृष्टमन्तस्स्थानाम्"[5] इत्त्यादौ ईषत्त्स्पृष्टमित्त्यर्थे दुस्स्पृष्टमिति। अनयोर् वर्णयोरुल्लेखश् शिक्षासु मद्ध्ये शैशिरीयशिक्षायाम् "अनुस्स्वारो विसर्गश् च डकारश् च तथैव च। दुस्स्पृष्टश् चेति विज्ज्ञेयो नासिक्क्यं रङ्गमुच्च्यते॥"[6] इति, "दुस्स्पृष्टश् चेति विज्ज्ञेयो ड़ढ़योस् स्वरमद्ध्ययोः"[7] इति च; शौनकशिक्षायाञ् च "दुस्स्पृष्टश् चेति विज्ज्ञेयो ड़ढयोस् स्वरमद्ध्ययोः"[8] इति, पाणिनीयशिक्षायाञ् च "दुस्स्पृष्टश् चेति विज्ज्ञेय लृकारऽ प्लुत एव च"[9] इति, वर्णरत्नप्रदीपिकायाञ् च– "उपद्ध्मानीय इति च द्विस्स्पृष्टश् च तथाऽपरः। द्विस्स्पृष्टता च विज्ज्ञेया ड़ढयोस् स्वरमद्ध्ययोः। पदकाले वियुज्ज्येत द्विस्स्पृष्टो न भवेत् तदा"[10] इति; व्यासशिक्षायाञ् च "नव दशाचो हलो ड़ोऽप्यनुस्स्वारौ विसर्गजौ। चतुर्भक्तियमाश् चेति वर्णाष् षट्षष्टिरीरिताः"[11] इति, शम्भुशिक्षायाञ् च "टवर्गे वक्तरमद्ध्ये ड़ जिह्वाग्ग्रेण तथा स्स्पृशेत्"[12] इति, पारिशिक्षायाम् पद्द्यरूपायामापिशलिशिक्षायाञ् च क्रमेण "विसर्गानुस्स्वारड़ाश् च नासिक्क्याऽ पञ्च चोदिताः"[13] इति, "षड़ूष्माणो विसर्गोऽनुस्स्वारो ड़ो नास्स्यपञ्चकम्"[14] इति च, लोमशीयायां शिक्षायाञ् च– "पादपूर्वा

---

१. १।५१–५२। २. व. प्र. शि. श्लो. १५–१६ (शि. स., पृ. ११८), पा. शि. अभि. श्लो. ५। ३. पा. शि. प्रदीपे श्लो. ५; पा. शि. प्र. (शि. स., पृ. ३८९)। ४. ऋ. प्रा. १३।१०। ५. ऋक्तन्त्रे १।३। ६. श्लो. ७। ७. श्लो. १०। ८. श्लो. ५। ९. श्लो. ५। १०. श्लो. १५–१६ (शि. स., पृ. ११८)। ११. सू. ४३१–४३२। १२. श्लो. १६। १३. सू. ६। १४. श्लो. ९, तै. प्रा. वै. १।१, पृ. ९।

ये डकाराः पदपूर्वास् तथैव च। ड इति चेति विज्ज्ञेयो ड-(ऽथ?) ढकारेऽप्ययवँ विधिः"[1] इति कृतो दृश्यते ॥८७॥

(थ) किट्किडाकारविवेकः

ककारस्स्य टकारस्स्य चाऽर्धाब्भ्यामिव सयँ युतः।
यो वर्णस् साम्नि दृष्टस् स किट्किडाकार उच्च्यते ॥८८॥

अस्स्य वर्णस्स्य ऋक्तन्त्रेऽपि "किट्किडाकारो हन्वाम्"[2] इत्युल्लेखः प्राप्यते। लोमशीयायां शिक्षायाञ् च— "ककारार्धण् टकारार्धं हन्वान् तिष्ठति दक्षिणे। जिह्वाग्रेण तु आभाष्येत् किट्किटाकार एव च"[3] इति अस्स्य स्थानकरणस्स्वरूपाणि उक्तानि। तत्त्रैव "प्राणापाननिगारे च(-राश् च?) संस्वाद (र?) ऋषभे (-भौ?) तथा। प्रथमस्स्वरे तु कर्तव्या किट्किडाकार एव च"[4] इति चास्स्य धर्मविशेषः प्रतिपादितः। यद्द्यपि ऋक्तन्त्रस्स्य वेदाङ्गेब्भ्यो बहिष्करणेनाऽन्न्येन वाऽज्ज्ञातेन कारणेन वैदिकपदानुक्रमकोशकारैरपि तस्स्य कोशस्स्य वेदाङ्गविभागेऽप्ययङ किट्किडाकार उपेक्षितो दृश्यते; सामान्यतया संस्कृतवाङ्मये चाऽस्स्याऽन्न्यत्त्राऽनुपलम्भ एव, तथापि सामगानविशेषे प्रयोज्ज्योऽयन् नरसिंहन्न्यायेन पृथगुल्लिक्ष्यमानो वर्णोऽस्स्माभिर् वर्णसमाम्नायेऽनुल्लिखितोऽप्यत्त्र संसूचितो बोद्ध्यः। भर्तृहरिणाऽपि भाष्यदीपिकायाञ् छन्दोगपार्षदकृतिवैशिष्ट्यरूपेण किट्किडाकार उल्लिखितः "एवम्प्रकाराश् च तेषाम् बहवो व्यवहाराः किट्किटाकारस्स्तोभादयः"[5] इति ॥८८॥

(द) नादविवेकः

घोषवद्व्यञ्जनैर् युक्ता अवसाने स्स्थिता अपि।
दीर्घीभूतास् तु वर्गान्त्या वर्णास् स्युर् नादसञ्ज्ञकाः ॥८९॥

बाह्ययप्रयत्नविशेषरूपो नादोऽन्न्यः। स च बलाद्ध्याये एव यथास्स्थानन् निरूपयिष्ध्यते। इह तु व्यञ्जनवर्णविशेषरूपस्स्य नादस्स्य विवेकः क्रियते। परस्स्थेनाऽन्न्येन घोषवद्व्यञ्जनेन, हकारेण तु पूर्वस्स्थेनाऽपि युक्ता अथवा अवसाने स्थिता दीर्घीकृत्त्योच्चारिता ङ-ञ-ण-न-मा नादसञ्ज्ञकास् स्युरित्त्यर्थः। यद्द्यपि अमोघानन्दिन्न्यां शिक्षायाम्

---

१. ७।८,९ (शि. स., पृ. ४६१)। २. २।१।१०।
३. २।१, (शि. स., पृ. ४५६)। ४. ७।५ (शि. स., पृ. ४६०)।
५. अे ओङ अँ औच् इत्त्यत्त्र, पृ. ८१।

पाराशर्यां शिक्क्षायाञ् च "अष्टौ नादाः"[1] इत्युक्तम्; तत्र वर्गतृतीयस्य वर्गचतुर्थस्य हकारस्य च नादीभाव[2] उक्त इति च प्रतीयते, किन्तु वर्ग्यतृतीयचतुर्थयोर् दीर्घीभावस्याऽसम्भवित्वात्, तेषाँ व्यासशिक्क्षादौ नादत्वेनाऽनुल्लिखितत्वाच् च तेऽस्माभिरुपेक्षिताः। तत्र नादविषये च शैशिरीयशिक्क्षायाम्— "प्रथमोत्तमवर्गीये वर्गान्त्यैस् सह सङ्गते। नासिक्क्यङ् गुरुमुच्चार्य यमस्स्थानगतवँ वदेत्। नादस् तु श्रूयते घोषाद् विरामाद् द्वित्वतस् तथा। अनासिक्क्योऽथ नासिक्क्यो जायते वर्णरूपतः। दद्ध्यङ् ह परमे व्योमन् वीर्यञ् चेति निदर्शनम्"[3] इति; कात्त्यायनशिक्क्षायाञ् च— "पदकाले यदा नादस् स्वरितस् स च इष्यते। सन्धिकाले यदा तस्मात् स्वार्यꣳ पूर्वपदे तु यः। व्यञ्जनं स्वरितात् पूर्वम् पञ्चमेनान्वितयँ यदि। स्वरितादुत्तरन् तस्मात् स्वार्यो नादस् त्वनन्तरः"[4] इति; अमोघाननदिन्न्यां शिक्क्षायाम् "ओष्ठ्या दन्त्या लघुश् चैव पुनरेव लघूतरः। नादनासिक्क्यसहितालँ लक्क्षणानि पृथक्पृथक्"[5] इति, "नादसञ्ज्ञा भवन्तीमे ङञणनमाश् चाऽनुनासिकाः। भवन्ति प्रत्त्यये येषामन्तस्स्थासयँयुतास् स्वराः। हकारञ् चैव वर्णानान् तृतीयञ् च चतुर्थकम्। अथ दीर्घा विसर्गान्ता अष्टौ ते नादसञ्ज्ञकाः। आद्द्यन्तयोर् मकारौ द्वौ हकारो यत्र मद्ध्यतः। तत्र नादम् प्रकुर्वीत अग्ग्ने व्रतपते निदर्शनम्। मकारान्ते पदे पूर्वे अकारे परतस् स्थिते। तत्र नादम् प्रकुर्वीत मक्क्षिकेति निदर्शनम्। नमौ गुरू नादसञ्ज्ञौ लघू चैवानुनासिकौ। सयँयुक्तौ च विसर्गौ च (चाऽवसानस्थौ ?) नादावेतौ प्रकीर्तितौ। पञ्चमा यत्र दृश्यन्ते पञ्चमे परतस् स्थिते। नासिकन् तत्र कुर्वीत मात्त्रिकत्वे न संशयः"[6] इति, "हकारो रेफसयँयुक्तो नादिर् भवति नित्त्यशः। द्वितीयेन प-(य ?-) दाक्क्रान्तो न तु नादꣳ कदाचन"[7] इति च। पाराशर्यां शिक्क्षायाञ् च— "नादसञ्ज्ञा भवन्तीमे ङञणनमाश् चाऽनुनासिकाः। भवन्ति प्रत्त्यये येषामन्तस्स्थास् सयँयुतास् तथा। हकारञ् चैव वर्गाणान् तृतीयञ् च चतुर्थकम्। अथ दीर्घविसर्गान्ता अष्टौ ते नादसञ्ज्ञकाः।

---

१. श्लो. ३१ (शि. स., पृ. ९५), श्लो. ४१ (शि. स., पृ. ५६)।
२. श्लो. ३१; श्लो. ४०–४१। ३. श्लो. १०१–१०२।
४. श्लो. ८–९, (शि. स., पृ. ४९–५०)। ५. श्लो. २, (शि. स., पृ. ९३)। ६. श्लो. ३०–३५, (शि. स., पृ. ९६)।
७. श्लो. ४०. (शि. स., पृ. ९७)।

नमौ गुरू नादसञ्ज्ञौ लघू चैवाऽनुनासिकौ। सयँयोगौ (सयँयुक्तौ) च विसर्गौ च (चाऽवसानस्थौ ?) नादावेतौ प्रकीर्तितौ। पञ्चमा यत्तर दृश्यन्ते पञ्चमे परतस् स्थिते। नासिकन् तत्तर कुर्वीत मात्तरैकत्वे न संशयः। सयँयुक्ताग्रे विरामस् तु विवृत्तिस् तु विशेषतः। सयँयुक्ताग्रे ह्यघोषस् तु नासिकन् तु विधीयते। प्रत्त्यये च स्थिता ये च अघोषाऽ पञ्चमास् स्वराः। पदान्ते सयँयुता ह्रस्स्वाऽ पञ्चैवैतेऽनुनासिकाः। विवृत्तौ चाऽवसाने च ऋगर्धे च तथा परे। पदे च पादसंस्थाने नासिकन् तु विधीयते॥ हकारो रेफसयँयुक्तो नादो भवति नित्त्यशः। द्वितीयेन प-(य-?) दाक्करान्तो न तु नादऽ कदाचन॥ आद्द्यन्तस्थौ सकारौ द्वौ हकारो यत्तर मद्ध्यगः। उभौ नादौ प्रयुज्येताम् अग्रे व्रतपते निदर्शनम्। नकारस्य मकारस्य अनुस्स्वारो यदा भवेत्। तदाऽनुनासिके विद्द्यादुभयोर् ह्रस्स्वदीर्घयोः। नकारस्य मकारस्य अन्तस्थाश् च समीपगाः। नासिको नाव (नैव ?) मन्तव्यस् तत्तर नादऽ प्रकीर्तितः। तवर्गान्ते पवर्गान्ते व्यञ्जनान्ते पदे परे। तत्तर नादम् प्रकर्तव्यन् नान्तिमङ्ग क्षिप्प्रकीर्तितम्। पूर्वतऽ परतो वाऽपि हकारो यत्तर दृश्यते। तत्तर नादो भवत्त्येव न विकल्पऽ कदाचन। नकारात् परतो यत्तर मकारात् परतस् तथा। हकारो यत्तर दृश्येत तत्तर नादो भवेद् ध्रुवम्। नमौ गुरू यत्तर दृश्येते अघोषाऽ परतस् स्थिताः। नादङ्ग कुर्वीत यत्नेन तत्तर घोषवलन् न हि"[1] इति। व्यासशिक्क्षायाञ् च— "अवसानेऽन्त्यवर्णाश् च नादा इति बुधैस् स्मृताः"[2] इति, "नादानुस्स्वारयोऽ पूर्वस् स्वारभागुच्चवत् स्थितः। स्वर्येतेऽस्मात् परावेव नादानुस्स्वारकावपि"[3] इति, "ह्रस्स्वान् नादो द्विमात्तरस् स्यादन्न्यत्तराप्प्येकमात्त्रिकः"[4] इति च, सर्वसम्मतशिक्क्षायाञ् च "नादानुस्स्वारयोऽ पूर्वं स्वरस् स्वरितभाक् स्थितः। न ह्यन्याक्क्षेपस् स्वरे तत्तर नादेऽनुस्स्वार एव सः। विरामे पञ्चमानान् तु नादसञ्ज्ञा प्रकीर्तिता"[5] इति, लोमशीयायां शिक्क्षायाञ् च—"नमौ गुरू नादसञ्ज्ञौ लघू चैवाऽनुनासिकौ। सयँयोगौ (सयँयुक्तौ ?) सविसर्गौ च (च विरामस्थौ ?) नादावेव प्प्रकीर्तितौ॥ विवृत्तौ च विरामे च सवर्णे प्रत्त्यये परे। अनुनासिकास् तु विज्ञेयाश् शेषा नादाऽ प्रकीर्तिताः। मात्त्रिका नासिका ज्ञेया द्विमात्तरा नादसञ्-

---

१. श्लो. ३९–५४, (शि. स., पृ. ५६–५७)। २. सू. १६।
३. सू. ३१६–३१७। ४. सू. ४६४। ५. श्लो. ५५–५६।

ज्जकाः। सविसर्गास् तु नादास् स्युस् सानुस्स्वाराश् च पूर्वशः। अनुनासिकास् तु ये वर्णा घोषास् तु प्रत्यया यदि। नादन् तत्र विजानीयादनुदहेति निदर्शनम्। नासिकेष्वपि वर्णेषु यो यत्र भजते स्स्वरः। तन्तमेवोपजीवन्ति नासादोषांश्च वर्जयेत्"[1] इति वचनानि प्राप्यन्ते ॥८९॥

५. अथ वर्णविशेषोच्चारणनिदर्शनविशेषाधिकारः

वर्णोच्चारणसम्पत्त्यै प्राज्ञैश् शिक्क्षुकदर्शितम्।
बोद्ध्यवँ वर्णविशेषाणामुच्चारणनिदर्शनम् ॥९०॥

तत्र अभिनिहितीभूतककारादिवर्णोच्चारणनिदर्शनं शिक्क्षाशास्त्रविद्भिः प्रदर्शितयँ यथा— "कुक्कुटः कामलुब्धो यत् ककारद्द्वयमुच्चरेत्। एववँ वर्णाः प्रयोक्तव्याः कुक्कुटोऽसीति निदर्शनम्"[2] इति। अनेन च अभिनिहितीभूतककारादिवर्णोच्चारणे करणसन्धारणेन क्षणवँ विराम इव कर्तव्य इति सूचितम् बोद्ध्यम्।

यमवर्णोच्चारणनिदर्शनयँ यथा— "शून्ये गृहे पिशाचोऽपि गर्जते न तु दृश्यते। एववँ वर्णाः प्रयोक्तव्या उपज्जँमन्निति दर्शनम्"[3] इति। एतेन च यमवर्णोच्चारणे वर्णव्यक्तिविशेषस्य स्फुटाया अभिव्यक्तेरभावः प्रतिपादितो वेदितव्यः।

ञकारोच्चारणनिदर्शनयँ यथा— "यथा पुत्त्रवती स्नेहाच् चुम्बते निजमौरसम्। एववँ वर्णाः प्रयोक्तव्या युञ्जान इति निदर्शनम्"[4] इति। अनेन ञकारोच्चारणे चछजझोच्चारणे इव स्थानकरणसम्बन्धः कर्तव्यतयोपदिष्टो वेदितव्यः।

फकारविशेषोच्चारणनिदर्शनयँ यथा—"दर्दुरोदरदेशौ तु प्रफुल्लेते पुनर् यथा। एववँ वर्णाः प्रयोक्तव्या अपाम्फेने निदर्शनम्"[5] इति, "स्फुरितञ् चिबुकोन्मूलवँ वायुना सम्प्रपूरितम्। मण्डूकस्स्फुरणन् नाम अपाम्फेने निदर्शनम्"[6] इति च।

ओष्ठ्यवर्णविशेषोच्चारणनिदर्शनयँ यथा— "सयँयुक्तश्

---

१. ५।२–५। २. या. शि. श्लो. १८५ (शि. स., पृ. २७), पारा. शि. श्लो. ६९ (शि.स., पृ. ५९)। ३. अमो. शि. श्लो. ५० (शि. स., पृ. ९८), पारा. शि. श्लो. ५९ (शि. स. पृ. ५८)। ४. या. शि. श्लो. १८२, पारा. शि. श्लो. ६४, अमो. शि. श्लो. ६२ (शि. स., पृ. २६, ५८, १००)। ५. या. शि. श्लो. १८३, (शि. स., पृ. २६–२७)। ६. अमो. शि. श्लो. ५१ (शि.स., पृ. ९८)।

चोष्ठ्यमद्ध्ये हो विसर्गादुत्तरश् च पः। तालुब्भ्यावँ वायुमापूर्य माण्डूकोष्ठ्यꣳ परस् स्मृतः। (जुहुव्वो जातवेद इति च शतायुꣳ पुरुषश् च दिक्)"[1] इति।

षकारोच्चारणनिदर्शनयँ यथा–"यथा भारभराक्क्रान्तो निश्श्वसेल् लघुचेतसः। एववँ वर्णाꣳ प्रयोक्तव्व्या होता यक्षन् निदर्शनम्"[2] इति।

उरस्स्यहकारोच्चारणनिदर्शनयँ यथा– "मेघदुन्दुभिनिर्घोषो जायते पयसो हरदात्। एवन् नादꣳ प्रकर्तव्व्यस् सिंहस्य रुदितयँ यथा। मासे भाद्द्रपदे मेघाश् शब्दङ्ग कुर्वन्ति यादृशम्। एवङ्ग गहव्वरमासाद्द्य शुक्करन्दुदुहरे निदर्शनम्"[3] इति। अनेन च उरस्स्ये हकारे श्वासवत्ताया अल्पता नादस्य प्राचुर्यञ् चोक्तम् बोद्ध्यम्। चारायणीयशिक्क्षायामपि "न वायुं हमसयँ योगे नासिकाब्भ्यां समुत्सृजेत्। नात्त्यन्तमुरसा नादन् तथा हयवने(रे?)षु च"[4] इत्त्युक्तम्। सर्वसम्मतशिक्क्षायामपि– "नासाब्भ्यान् नोत्सृजेद् वायुमत्त्यन्तं हमसङ्गमे। न त्रदेदुरसाऽत्त्यन्तमन्तस्स्थाभिश् च सङ्गमे"[5] इति। वैदिकाभरणेऽपि– "न वायुं हमसयँ योगे नासिकाव्भ्यां समुत्सृजेत्। न वदेदुरसाऽत्त्यन्तन् तथा यरलवेषु च"[6] इति शिक्क्षान्तरवचनमुद्धृतम्।

विसर्गोच्चारणनिदर्शनानि यथा– "यथा भारभराक्क्रान्ता निश्श्वसन्ति नरा भुवि। एववँ वर्णाꣳ प्रयोक्तव्व्या अद्भ्यः सम्भूत इत्त्यपि"[7] इति, "यथा बालस्स्य सर्पस्स्य निश्श्वासो लघुचेतसः। एवमूष्मा प्रयोक्तव्व्यो हकारपरिवर्जितः"[8] इति; "देवो वः सविता चाऽत्तर हकारसदृशो भवेत्। देवीस् तिस्स्रो विसर्गस् तु हिकारसदृशो भवेत्। आखुस् ते पशुरित्त्यादौ हुकारसदृशो भवेत्। विसर्गश् चाग्ग्नेरित्त्यादौ हेकारसदृशो भवेत्। विसर्गो बाहव्वोरित्त्यादौ होकारसदृशो भवेत्। अथ स्स्वैर् दृक्क्षैरित्त्यादौ हिकारसदृशो भवेत्। विसर्गो द्यौष्पितेत्त्यादौ हुकारसदृशो भवेत्। हकारो नैव मन्तव्व्य इति शास्तरव्व्यवस्स्थितिः। फणिनिश्श्वाससदृशो विसर्गो भवति द्ध्रुवम्"[9] इति च।

---

१. व्या. शि. सू. ४३५–४३६। २. अमो. शि. श्लो. ६० (शि. स., पृ. ९९); पारा. शि. श्लो. ८६ (शि. स., पृ. ६१)। ३. या. शि. श्लो. १७९ (शि. स., पृ. २६)। ४. पृ. २९–३०। ५. श्लो. ७५–७६। ६. तै. प्रा. २१।१४ (पृ. ४८५)। ७. या. शि. श्लो. १८४ (शि. स., पृ. २७)। ८. अमो. शि. श्लो. ६१ (शि. स., पृ. ९९–१००)। ९. ल. मा. शि. श्लो. १८–२२।

गुर्वनुस्स्वारोच्चारणनिदर्शनयँ यथा— "यथा कामातुरा नारी शब्दङ्ग कुर्याद् दिनेदिने। तच्छब्दङ्ग कुरुते प्राज्ञस् सिंहयसीति निदर्शनम्"[1] इति।

रङ्गवर्णोच्चारणनिदर्शनानि यथा— "यथा सौराष्ट्रिका नारी तक्करा२।ाँऽइत्यभिभाषते। एवं रङ्गऽ प्रयोक्तव्यो ङकारपरिवर्जितः"[2] इति। "नस्त उत्पद्यते रङ्गऽ कांस्येन समनिस्स्वनः। मृदुश् चैव द्दविमात्तरस् स्याद् वृष्टिमा२।ाँऽ इव दर्शनम्॥ यादृशी रत्नवर्णाभा जपायाऽ कुसुमेऽथवा। तादृशं रञ्जयेद् वर्णम् प्रानते नासिक्यमाचरेत्॥ लाक्षारक्तयँ यथा तोयन् नकारान्तम् पदन् तथा। सर्वं रङ्गवँ विजानीयाच् छत्तरूनिति निदर्शनम्"[3] इति; "रङ्गे मुखे व्याघ्ररुतोपमं स्याद् मात्तराद्द्वयं हृज्जनितन् त्वनास्स्यम्। (मात्तराद्द्वयं स्याद्) इह कांस्यघण्टानादस् सकम्पस् स तु मूर्धजातः॥ नासिक्यरन्ध्रद्द्वयनिस्सृतोऽन्त्ये स्यादेकमात्तरस् स तु काकली स्यात्। सौराष्ट्रिका गोपवधूस् सुकण्ठस्स्वरेण तक्करा२।ाँऽ इति भाषते यथा। तथा समुच्चार्य वदेत् स्वकालाद् रङ्गश् च कम्पऽ खलु वर्धते सः"[4] इति।

तकारसकारसयँयोगोच्चारणनिदर्शनयँ यथा— "आपऽ क्षिपत्तञ् च यच् छब्दम् प्रथमोच्चारणलक्षणम्। ससवान्त्सन्त्स्तूयसे विराट्सम्म्राट् (चेति?) निदर्शनम्"[5] इति, "लोहकार इवाकर्म्म भस्मसात् कुरुते यदि। एववँ वर्णाऽ प्रयोक्तव्यास् सवँवत्तसरो निदर्शनम्। आयसञ् च यथा तप्तन् निऽक्षेपादप्सु मद्ध्यतः। तच्छब्दङ्ग कुरुते प्राज्ञः परिवत्तसरो निदर्शनम्"[6] इति च।

वर्गद्वितीयस्स्य षकारेण सकारेण वा सयँयोगे तत्सयँयोगोच्चारणस्स्य निदर्शनयँ यथा—"आपऽ क्षिपत्तञ् च यच्छब्दन् द्वितीयोच्चारणलक्षणम्। वृक्ष्षेवृक्ष्षे सवँवत्थ्सरन् त्वान्थ्सारी तमप्पसन्त च। मत्थ्सरो मत्थ्स्यपायी (चेत्त्यते तत्तर) निदर्शनम्"[7] इति॥९०॥

---

१. या. शि. १८७, अमो. शि. ६३, पारा. शि. श्लो. ७१।
२. या. शि. श्लो. १९०। ३. या. शि. श्लो. १९४, २१६, २१७ (शि. स., पृ. २८, ३३–३४)। ४. पारिशि. सू. १५४–१५५।
५. शं. शि. श्लो. ४६–४७। ६. अमो. शि. श्लो. ५३–५४ (शि. स., पृ. ९९)। ७. शं. शि. श्लो. ४९–५०।

६. वेदशाखाविशेषप्रसिद्धवर्णविशेषोच्चारणप्रकाराधिकारः

वेदशाखाविशेषेषु लोकाच् शाखान्तरादपि ।
विलक्षणास् समुच्चार्याऽ प्रोक्ता वर्णास् तु केचन ।।६१।।
क्व चिद् वेदेषु कति चिद् वर्णा वर्णान्तरायिताः ।
कृत्त्वोच्चार्या भवन्त्यत्तर तद्विवेको विधीयते ।।६२।।

(क) ऋकारलृकारोच्चारणविशेषौ–

स्वरभागावृकारस्स्य एकारांशस्स्वरूपताम् ।
नीत्त्वोच्चार्यौ स्मृतौ माद्ध्यन्दिनीयानां श्रुतौ सदा ।।६३।।
लृकारस्स्यापि तद्वद् धि भवेतां स्वरभागकौ ।
इत्त्याहुऽ क्वचिदेवन् तच्छाखिनोऽधीयतेऽपि च ।।६४।।

यद्द्यपि प्रतिज्ञासूत्तरे "ऋकारस्स्य तु सयँयुक्तासयँयुक्तस्स्य विशेषेण सर्वत्तरैवम् (एकारसहितोच्चारणम्)"[1] इत्त्येवोक्तम्, लघुमाद्ध्यन्दिनीयशिक्षायाञ् च "ऋकारऽ खलु सर्वत्तर ह्येकारसदृशो भवेत् । हृदे मृगस् तृतीया च ऋचवँ वाचन् निदर्शनम्"[2] इत्त्येवोक्तम्, परिभाषाऽकसूत्तरे केशवेनाऽपि "हल्युतायुतस्स्य उस् सैकारश् च (पदान्तमद्ध्ये हल्युतायुतस्स्य ऋकारस्स्य सैकार इवोच्चारस् स्याच् छन्दसि माद्ध्यन्दिनीयके)"[3] इत्त्येवोक्तम्, तथाऽपि वर्णोच्चारणप्रकारपरिशिष्टे– "पितृणामिह पित्रेणामित्त्यादि च निदर्शनम्"[4] इति, "हल्युक्त ऋकारस् तु रेकारश् छन्दसि स्स्मृतः । पितृणामिति पित्रेणामित्त्यादि च निदर्शनम्"[5] इति च, परिभाषाऽकसूत्तरव्याक्ख्यायाञ् च "उदाहरणानि यथा द्वितीयेऽद्ध्याये कृष्णोसीत्त्यत्तर क्रेष्णोसीत्त्युच्चारो न ऋकारः, अग्गँनये इत्त्यृङमद्ध्ये पितृमते इत्त्यत्तर पित्त्रेमते स्स्वाहेत्त्युच्चारः । तृतीयाद्ध्याये अयन् ते योनिर् ऋत्त्विय इत्त्यृङमद्ध्ये रेत्त्विय इत्त्युच्चार इत्त्यादि सर्वत्तर ज्ञेयम्"[6] इति, प्रातिशाक्ख्यप्रदीपशिक्षायाञ् च "पदान्तमद्ध्यादिषु सयँयुक्तासयँयुक्तस्स्य ऋवर्णस्स्य रेकारस् स्यात् सर्वत्तर संहितायाम् पदे च, यथा कृष्णोसीत्त्यत्तर क्रेष्णोसीत्त्युच्चारः, ऋत्त्वियो यत इत्त्यत्तर रेत्त्विय इत्त्युच्चारः"[7] इति च वचनानि उपलब्ध्य तत्प्रामाण्याऽप्रामाण्य-

---

१. २।५ । २. श्लो. २८ (शि. स., पृ. ११६) । ३. सू. ८ (शि. स., पृ. १४७) । ४. श्लो. १८ (शि. स., पृ. १७३) । ५. श्लो. २६ (शि.स., पृ. १७४)। ६. प.सू.८, (शि.स., पृ. १४७)। ७. शि. स., पृ. २९६ ।

मीमांसायामकुशला गतानुगतिका माध्यन्दिनीया वैदिका अपि प्रायस् सर्व एव ऋकारोच्चारणे ऋकारस्य मध्ये स्थितं रेफमादावाकृष्य तमेकारेण सयँ योज्य रे इत्येवोच्चारयन्ति। वस्तुतस् तु ऋकारस्य स्वरभागावेव एकाररूपौ कार्यौ, ऋकारस्स्वरूपस्य सर्वथा विघटनन् तु नैव कार्यम्, तत्र प्रतिज्ञासूत्रतात्पर्यस्याऽभावात्, तदुपजीविनावँ वचने च तदनुकूलत्वे एव प्रामाण्यस्य सम्भवात्। एवञ् च माध्यन्दिनीयके ऋकारोच्चारणे एकारसरूपयोस् स्वरभागयोर् मध्ये रेफन् निवेश्यैकवर्णीकृत्य (एँ+र्+एँ इति) उच्चारणञ् कर्तव्यन् न तु रे (र्+ए) इत्युच्चारणञ् कर्तव्यमिति युक्ततरमुत्पश्यामः।

यद्द्यपि प्रतिज्ञासूत्रे सैकारोच्चारणप्रसङ्गे लृकारस्य ग्रहणन् न कृतम्, सवर्णेन सवर्णस्य ग्रहणञ् च पारिभाषिकम् पाणिनीये व्याकरणे प्रवर्तमानमपीह न साधारणतया प्रवर्तितुमुत्सहते; तथापि अनन्तदेवयाज्ञिकः प्रतिज्ञासूत्रभाष्ये माध्यन्दिनीयके लृकारस्याऽपि सैकारोच्चारणञ् कर्तव्यमिति प्रतिपादयति[1], केशवीयकारिकावल्ल्यामपि "ऋकारस्य च सयँयुक्तासयँयुक्तस्यापि सर्वतः। सैकारोच्चारणञ् कुर्याद् लृकारस्य तथा भवेत्"[2] इत्युक्त्वा तथैव प्रतिपादितम् अस्ति; प्रातिशाख्यप्रदीपशिक्षायामपि "एवम् ऋलृवर्णयोर् मिथस् सावर्ण्यवँ वाच्यम् इति वार्तिकेन लृकारस्यापि ले इत्युच्चारः। क्लृप्तमित्यत्र क्लेप्तमित्युच्चारः"[3] इति उक्तवँ वर्तते। शुक्लयजुर्वेदप्रातिशाख्यस्य ज्योत्स्नायावँ वृत्तौ सङ्गृहीते प्रतिज्ञासूत्रव्याख्यानेऽपि प्राय एवमेवोक्तमस्ति[4]; एतच्छाखाद्ध्यायिनश् च येन प्रकारेण ऋकारमुच्चारयन्ति तेनैव प्रकारेण लृकारस्यापि उच्चारणञ् कुर्वते प्रायेण। सम्प्रदायप्रबोधिनीकारेण तु लृकारोच्चारणव्यवस्था नैवोल्लिखिताऽस्ति ॥९३-९४॥

(ख) जकारोच्चारणविशेषः

स्वरात् परो जोऽनृकारे स्वरे चैकपदे परे।

स्याद् यकारतयोच्चार्यो विकल्पेन क्वचिच् छ्रुतौ ॥९५॥

अस्य विषयस्य प्रतिपादनं "स्वरात्स्वरे समानपदे जो यन् न तु ऋकारे"[5] इति सूत्रेण शुक्लयजुर्वेदप्रातिशाख्ये कृतमस्ति।

---

१. प्र. सू. भा. २।५, शु. य. प्रा. (सवँ. १९४५), पृ. ४२२।
२. श्लो. ११ (शि. स., पृ. १५१)। ३. शि. स., पृ. २९६।
४. पृ. २१२। ५. ४।१६६।

अस्य सूत्रस्योदाहरणम् प्रत्युदाहरणानि च उव्वटेन अनन्तेन च समानान्येव दत्तानि । तानि च माध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदमन्त्रब्राह्मणसंहितायाम् प्राप्यन्ते[1] । अनेन च जकारयकारयोरुच्चारणे विशिष्टस् सम्बन्धस् सूच्यते इति पदादौ वर्तमानस्य यकारस्य जकारतयोच्चारणेऽपि भाषागतङ किञ्चिद् वैशिष्ट्यमपि निमित्तभूतमनुमीयते ॥९५॥

(ग) सयँयुक्तजकारञकारद्वयोच्चारणविवेकः

जञौ सयँयुक्तौ तु कैश् चिद् ग्यँ इत्यथ द्दन इत्यपि ।
उच्चार्येते न्य इति च तद् हेयं सर्वथा बुधैः ॥९६॥

लोके सयँयुक्तौ जञौ 'ज्ञ' इति च लिपिविशेषन् दृष्ट्वा ग्यँ इति प्रयेणोच्चार्येते[2], वेदेऽपि क्वचिदेवमुच्चार्येते; महाराष्ट्रभवैर् वैदिकैश् च द्दन इत्युच्चार्येते, नैपालैश् च वैदिकैर् न्य इत्युच्चार्येते । किन्तु एते सर्वेऽपि उच्चारणप्रकारा अशास्त्रीया एवेति सम्प्रदायविगानदूषिताश् चेति च सर्वथा हेया एव । एतेषामशास्त्रीयत्वञ् च 'राज्ञः' 'यज्ञः' इत्यादौ पाणिनीयव्याकरणेन जकारञकारसयँयोगपर्यन्तायाः प्रक्क्रियाया एव प्रदर्शितत्वात् स्फुटञँ विज्ञायते । यच् च कैश् चिद् "जयोर् ज्ञः"[3] इति वचनाज् जकारञकारयोस् सयँयोगे नरसिंहन्यायेन वर्णान्तरत्वप्राप्तिर् भवतीत्यभिप्रेयते[4] तदप्यनुपपन्नमेव; तस्य वचनस्य लिपिपरिचायनपरत्वात्[5]; वर्णान्तरत्वप्राप्तिपरकत्वे तु निर्मूलतयाऽप्रमाणत्वात् । यत् तु मधुसूदनशर्मणा "यज्ञ इति वर्णागमत्वात् कञौ यमौ । ङकारे यमे तन्निबन्धनञ् जस्य कुत्वमिति यज्ञशब्दे गकारङकारञकारास् सयँयोगः । आर्षोच्चारणप्रचारभूयस्त्वादिह यमसहितोच्चारणसम्प्रदायप्रवृत्तिः । लोकमात्तरप्रयुक्ते तु शब्दविशेषे तथोच्चारणसम्प्रदायो नास्ति । याज्ञा"[6] इत्यादि[6] जल्पितम्, तदस्त्, तकारस्य यमत्वे क्वचित् तत्स्थाने ककारस्य लेखने परम्पराऽऽगते दृश्यमानेऽपि अन्यवर्गीययमवर्णानाङ कवर्-

---

१. १३।५१, १०।२४, १८।४२, २।८,१७।३४, २२।७ । २. The Pronunciation of Sanskrit– S. K. Chatterji, J.L.S. (1960) p. 78. ३. वै. सि. कौ., ह. पु., राज्ञ्ज इति प्रयोगे । ४. शु.य.प्रा. (सर्व. १९४५) पृ. ३०३; पा.शि.प्र. यमसङ्ख्याविवेचने । ५. या. शि. शि. व. वृ. टि., पृ. १५६ । ६. 'पत्थ्या स्वस्तिः' इति ग्रन्थे, पृ. ८–९; २५–२६ ।

गीयवर्णतत्त्वेनोच्चारणस्य सम्प्रदायेष्वनुपलब्धेः; यमस्यैव उच्चारणे कवर्गीयवर्णतत्त्वेऽसिद्धे तन्निबन्धनतत्त्वेन पूर्ववर्णकुत्त्वस्य दूरेऽपास्ततत्त्वात्; पाणिनीयप्रक्रिययाऽपि 'अनचि च'[1] इति विहितन् द्वित्त्वमुपजीवन्तयँ यमन् निमित्तीकृत्य 'चोः कुः'[2] इत्यादेः प्रवृत्तौ "पूर्वत्रासिद्धम्"[3] इति बाधात्। ङ्ञणनमानामझल्त्वेन द्वितीयस्य जकारस्य कुत्त्वस्यैवाऽप्राप्तेश् च। एतेन "कषसयँ योगे क्षः"[4] इत्यपि व्याख्यातम्, तत्रराऽपि पाणिनीयव्याकरणेन 'वक्क्ष्यति' 'वाक्षु' इत्यादौ कषसयँ योगपर्यन्ताया एव प्रक्रियायाः प्रदर्शितत्वात्। एतेन शौवशाक्ततन्त्रादिषु तत्त्वविशेषसङ्केततत्त्वेन स्वतन्त्रवर्णत्वेनेव 'क्ष' इत्यस्योपादानेऽपि तस्य स्वतन्त्रवर्णत्वमपि दूरापास्तमेव बोद्ध्यम्, प्रातिशाख्यपाणिनीयव्याकरणादिषु वेदाङ्गेषु तथात्वस्याऽनुल्लेखात्, प्राचीनाषु गुप्तादिलिपिषु तत्र कषभागयोस् स्फुटत्वाच् च ॥९६॥

(घ) यकारोच्चारणविशेषः

अयुक्तोऽन्न्यव्व्यञ्जनेन यकारस् तु पदादिगः।
स्याज् जकारतयोच्चार्यो विभिन्नासु श्रुतिष्वपि ॥९७॥
रेफेण च हकारेण ऋकारेणाऽपि सयँ युतः।
द्वित्त्वम् प्राप्तो यकारश् च जस् स्यान् माद्ध्यन्दिनीयके ॥९८॥

अनन्येन व्यञ्जनेनाऽयुक्तस्य पदादौ वर्तमानस्य यकारस्य जकारतया उच्चारणवँ विभिन्नवेदशाखासम्बद्धासु शिक्षासु विहितन् दृश्यते। तथा हि ऋग्वेदसम्बद्धायां शैशिरीयशिक्षायाम्— "पादादौ च पदादौ च सयँ योगावग्ररहेषु च। जश् शब्द इति विज्ञेयो अनन्यत्तर य इति स्स्मृतः[5] इति। शुक्लयजुर्वेदसम्बद्धायायँ याज्ञवल्क्यशिक्षायाम्[6], सामवेदसम्बद्धायान् नारदीयशिक्षायाम्[7], अथर्ववेदसम्बद्धायाम् माण्डूक्यां शिक्षायान्[8] च इदवँ वचनम् प्राप्यते। तत्र माद्ध्यन्दिनीयवाजसनेयिशाखासम्बद्धासु शिक्षासु तु एतद्विषये भूयान् विस्तरः प्राप्यते। तथा हि— प्रतिज्ञासूत्रे "अथानुतस्तथानामाद्द्चस्य पदादिस्तथस्याऽनन्यहलसयँ युक्तस्य सयँ युक्तस्यापि रेफो-

---

१. अष्टा. ८।४।४७। २. तत्रैव ८।२।३०। ३. तत्रैव ८।२।१। ४. या. शि. शि. व. वृ., पृ. १४८। ५. श्लो. ९५। ६. श्लो. १५० (शि.स., पृ. २३)। ७. २।२।१६ (शि.स., पृ. ४३०)। ८. श्लो. ८७ (शि. स., पृ. ४७०)।

ष्मान्त्याब्भ्यामृकारेण चाविशेषेणादिमद्ध्यावसानेषूच्चारणे जकारोच्चारणम्''[1] इति, ''द्विर्ब्भावेऽप्येवम्''[2] इति च। याज्ज्ञवल्क्यशिक्षायाम् च ''यवर्णस् त्रिविधः प्रोक्तो गुरुर् लघुर् लघूतरः''[3] इति, ''हकाररेफसयँयुक्त ऋवर्णोदय एव वा। भुस्स्पृष्टन् तवँ विजानीयाद् यकारो नान्न्ययुग् यदि''[4] इति, ''सन्धिजौ च पदान्तीयावुपसर्गपरौ लघू। अथ-मा-स-न-शब्देब्भ्यो विभाषाऽऽम्म्रेडिते यवौ''[5] इति च। लग्घ्वमोघानन्दिन्न्यां शिक्क्षायाम् च— ''पादादौ च पदादौ च सयँयोगावग्ग्रहेषु च। जश् शब्द इति विज्ज्ञेयो योऽन्न्यस् स य इति स्स्मृतः। युक्क्तेन मनसा तद्वत् तत्त्वा यामि तथाऽपरम्। अनूकाशेन बाह्य्यञ् च तुरीयमनुया पदे। पदादावप्यविच्छेदे सयँयोगान्ते च तिष्ठताम्। वर्जयित्त्वा रहौ यानामीषत्त्स्पृष्टत्त्वमिष्यते। विद्द् यदी न्यमित्तराँश्च् च रोचनास्स्य यथा भवेत्। तथा पर्य्याय सूर्य्यश् च्च मुह्य्यन्त्वन्न्ये समूह्य्यवत् ॥ उपसर्गपरो यस् तु पदादिरपि दृश्यते। ईषत्त्स्पृष्टो यथा वियत् पदच्छेदात् परो भवेत्। विभाषया यकारश् च नित्त्यमाम्म्रेडितेऽपि च। यत्रयत्रेति मा यज्ज्ञन् तथा ये(से)तिपदादपि। अथात उत्तरो यस् स्यात् तथा नेतिपदात् परः। भवन्त्येतेऽपि पूर्वत्तर तथा च सपदादपि। अथा वयमादित्त्यादावथो येऽअस्स्य दृश्यते। न यत्परो यथा च स्स्यात् स पदे तदुदाहृताः''[6] इति। लघुमाद्ध्यन्दिनीयशिक्क्षायाम् च— ''पदादौ विद्द्यमानस्स्य ह्यसयँयुक्तस्स्य यस्स्य च। आदेशो हि जकारस् स्याद् युक्तस् सन् हरणेन तु। यज्ज्ञेन यज्ज्ञवँ वै लक्क्ष्यम् मयूरे प्रत्त्युदाहृतिः। तस्म्माद्द्यज्ज्ञात्त्सर्वहुतस् समस्म्माद् यत् तथैव च। रेफेणाथ हकारेण युक्तस्स्य सर्वथा भवेत्। सूर्य्यो बाह्य्यन् तु वै लक्क्ष्यं शप्प्य्याय प्प्रत्त्युदाहृतिः। यकाररकारयुक्तस्स्य जकारस् सर्वथा भवेत्। सह रय्या तथा व्यृद्ध्यं चोपसर्गपरस्स्य न। उपयज्ज्ञम् मनुष्याणामपि यन्तीत्त्युदाहृतिः''[7] इति। वर्णरत्नप्रदीपिकायां शिक्क्षायामपि ''पादादौ च पदादौ च सयँयोगावग्ग्रहेषु च। यश् शब्द इति विज्ज्ञेयो योऽन्न्यस् स य इति स्स्मृतः। युक्क्तेन मनसा यद्वत् तत्त्वा यामि तथाऽपरम्। अनूकाशेन बाह्य्यञ् च योगेयोगे निदर्शनम्। उपसर्गपरो

---

१. २।१। २. २।२। ३. श्लो. १५६ (शि.स., पृ.२३)।
४. श्लो. १६१ (शि.स., पृ. २४)। ५. श्लो. १५७ (शि.स., पृ.२३)।
६. श्लो. १–८ (शि.स., पृ.१०७)। ७. श्लो.२–६ (शि.स., पृ.११४)।

यस् स पदादिरपि दृश्यते । ईषत्स्पृष्टो यथा वियत् पदच्छेदे परो भवेत्"[1] इति, "उपसर्गपरौ यत्तर यवकारौ पदादिगौ । ईषत्स्पृष्टौ ततो ज्ञेयावभियुद्ध्य उपा यथा । परिवाजपतिꣳ कविः प्रवोचञ् च निदर्शनम् । अनु योजान्विन्द्र ते तु उप यज्ज्ञवँ विना तथा"[2] इति च । परिभाषाऽकसूत्तरेऽपि— "पदादौ पूर्वाहल्व्योर् द्विर्व्योच्चारो सम्पूर्वयोश् (च) छन्दसि, पदान्तमद्ध्यऋहरेफयुग्यस्स्य यश् च"[3] इति; केशवीयकारिकावल्ल्यामपि— "आद्द्यान्तस्थस्स्य जोच्चारꣳ पदादौ पठितस्य च । उपसर्गपरो यस् तु यस्स्य च्छन्दसि नेष्यते । पदस्याद्द्यन्तमद्ध्ये स्स्यादृरहैस् सयँ युतस्य च । द्विर्भावेऽप्येवमेव स्स्यादिति कात्त्यायनश्श्रुतिः"[4] इति । वर्णोच्चारणप्रकारपरिशिष्टेऽपि— "पदमद्ध्ये पदाद्द्यन्ते (पदादौ पदमद्ध्यान्ते ?) ऋहरेफैश् च सयँ युते । यकारे जवँ विजानीयाद् युञ्जानेत्त्यादिकयँ यथा"[5] इति । प्रातिशाक्ख्यप्रदीपशिक्षायामपि अयवँ विषय उक्तानि शिक्षावचनानि सङ्गृह्य सोदाहरणवँ व्याक्ख्याय च विस्तरेण प्रतिपादितः[6] । तत्तर "तयँ यज्ज्ञम्" इत्त्यादावपि 'द्विर्भावदचनलब्ध्यञ् जकारोच्चारणम् भवति इति स्वीकृत्त्योदाहृतमिति[7], 'पदादित्त्वेन सिद्धे पादादौ पुनर् जकारोच्चारणविधानाद् यज्ज्ञञ् च मानुषाणान् तथा च योजान्विन्द्र इत्त्यत्तर पादादिस्स्थत्त्वाद् उपसर्गपरत्त्वेऽपि जकारोच्चारणम्, उपयज्ज्ञं हविरित्त्यत्तर पादादिस्स्थत्त्वाभावाद् यकारत्त्वमेव'[8] इति, 'विभाषाऽऽम्म्रेडिते यवौ' इति विकल्पविषये सम्प्रदाय एव शरणम्[9] इति च प्रतिपादितमिति च विशेषो दृश्यते । तत्तर 'तयँ यज्ज्ञम्'[10] इत्त्यादौ नापि यकारस्य द्विर्भावो नापि सयँ युक्तयोर् यकारयोस् समानरूपतेति च 'द्विर्भावेऽप्येवम्'[11] इति वचनस्य तत्तर प्रवृत्तिर् दुरुपपादा दृश्यते; तथापि एतादृशेषु स्थलेषु माद्ध्यन्दिनीयाꣳ परस्य यकारस्य जकारतयोच्चारणञ्च कुर्वते । तत्तर पूर्वस्य यँकारस्य तु

---

१. श्लो. २०४–२०६ (शि. स., पृ. १३५) । २. श्लो. २०८–२१० (शि. स., पृ. २३५–२३६) । ३. सू. १ (शि. स., पृ. १३८) । ४. श्लो. ७–८ (शि. स., पृ. १५०)। ५. श्लो. १६ (शि. स., पृ. १७३) । ६. शि. स., पृ. २९६–२९८ । ७. शि. स., पृ. २९७ । ८. तत्तरैव, पृ. २९७–२९८ । ९. तत्तरैव, पृ. २९८ । १०. मा. वा. शु. य. म. व्र. य. सं. ३१।९। ११. प्र. सू. २।२ ।

यँकारतया लेखनेऽपि जकारतयैवोच्चारणं सम्भवति, जकारस्यानुनासिकतायाञ् जकारत्वस्य प्राप्तेः[1]। तयँ यज्ञमित्यादौ 'द्विर्भावेऽप्येवम्' इति वचनेन जकारोच्चारणे साधिते सति 'सयँयौमि'[2] इत्यादौ अपि तेनैव वचनेन जकारोच्चारणे लब्धे "सम्पूर्वयोः"[3] इति केशवदैवज्ञवचनमपि अनावश्यकमापद्द्यते। न च "उपसर्गपरौ लघू"[4] इति वचनस्यापवादत्वेन तदावश्यकमेवेति वाच्यम्, "उपसर्गपरौ लघू" इत्यस्य असयँयुक्तयकारविषयकताया विज्ञायमानत्वात्। तस्मात् 'तयँ यज्ञम्' इत्यादौ 'द्विर्भावेऽप्येवम्' इति वचनस्य प्रवृत्तिर् दुरुपपादैव। माद्ध्यन्दिनीयाम्नाये अनुस्वारस्य परसवर्णादेशेऽपि उच्चारणे तस्य पूर्वार्धे वेदलोकसाधारणस्याऽनुस्वारस्याऽणुमात्रा उत्तरार्धे च परसवर्णस्य वर्णस्याऽणुमात्रा उच्चार्येति प्रतिज्ञासूत्रे[5] एव प्रतिपादितमिति च तयँ यज्ञमित्यादौ पूर्वस्य यँकारस्य उत्तराद् यकाराद् भूयान् भेद इति चाऽत्र द्विर्भाववाचोयुक्तिर् नैव योजनीया शास्त्रीयस्य पूर्ववर्णस्वरूपस्य विनाशस्य भयादिति च विचिन्तनीयं सुधीभिः। तस्मात् तयँ यज्ञमित्यादौ यकारस्य जकारोच्चारणञ् चिन्त्यमेव; शास्त्रान्वितताया अभावे सम्प्रदायस्याऽपि शिक्षाव्याख्यादिमान्द्याऽपव्भ्रंशोच्चारणशिथिलकरणवैगुण्यादिपुरुषदोषदुष्टताया लक्षणवाक्यार्थाद् भ्रान्तग्रहणकात् प्रवृत्ततायाश् च सम्भावनयाऽनाश्वासास्पदत्वात्। ऋवर्णोदयस्य यकारस्य जकारतयोच्चारणे 'व्यृद्ध्यै'[6] इत्यादौ सम्प्रदाये विसर्वादो दृश्यते[7]। यद्द्यपि 'सदोस्यृतस्य'[8] 'सामान्यृग्भिः'[9] इत्यादौ ऋकारयुतयकारस्य जकारतयोच्चारणे तत्पूर्ववर्णस्याऽपि विकारः प्राप्नोति अन्यत्तत्र तु प्रतिज्ञासूत्रविहिते सयँयुक्तस्थले यकारस्य जकारतयोच्चारणेऽपि रेफहकारयोरविकारित्वात् पूर्ववर्णस्य विकारो न हि प्राप्नोति,

---

१. "यथा तृतीयास् तथा पञ्चमा आनुनासिक्यवर्जम्, आनुनासिक्यमेषामधिको गुणः" इति (पा. व्या. भा. १।१।९) वचनमत्र स्मरणीयम्। २. मा. वा. शु. य. म. ब्र. य. सं. १।२२। ३. प. सू., सू. १ (शि. स., पृ. १३८)। ४. या. शि. श्लो. १५७ (शि. स., पृ. २३)। ५. ३।३। ६. मा. वा. शु. य. म. ब्र. य. सं. ३०।१७। ७. सम्. प्र. शि. श्लो. १०५, पृ. २२। ८. मा. वा. शु. य. म. ब्र. य. सं. ५।३। ९. तत्रैव, २०।१२।

तथापि व्यञ्जनान्तरसयँ योगरहितस्य ऋकारोदययकारस्याऽलाभाद् वचनसामर्थ्याद् 'व्यृद्ध्यै' इत्यादौ ऋकारोदययकारस्य जकारतयोच्चारणमेव ज्यायो विज्ज्ञायते। "यकारर्कारयुक्तस्य जकारस् सर्वथा भवेत्। सह रय्या तथा व्यृद्ध्यै चोपसर्गपरस्य न"[1] इति लघुमाद्ध्यन्दिनीयशिक्षावचनमप्यत्तरैवाऽनुकूलम्।

यत् तु केचन पदादिस्थादिकयकारस्य 'ज्य' इत्युच्चारणङ्कुर्वते, तद् अशास्त्रीयवँ विज्ज्ञायते। यद्द्यपि कुत्तरचिच् शिक्षारत्नथकोशेषु "जश् शब्दः" इत्यनुल्लिक्ख्य तत्स्थाने 'यश् शब्दः' इति उल्लिखितमपि दृश्यते, अतश् च जकारात् पृथगेवाऽयं सुस्स्पृष्टो यकारो ज्यसदृश इत्यपि आपाततः प्रतीयते एव; एतदेव मतङ्कैश्चित् समर्थितञ् च दृश्यते[2]; तथापि प्रतिज्ज्ञापरिशिष्टसूत्तरे "जकारोच्चारणम्"[3] इति स्स्फुटम् पट्ठ्यमानत्वाद्, मिथिलामहाराष्ट्रादिदेशजानावँ वैदिकानामुच्चारणे स्फुटञ् जकारस्यैव श्श्रूयमाणत्वाच् च परिभाषितयकारस्य जकाररूपेणैवोच्चारणं शास्त्रीयवँ वेदितव्यम्। यद्द्यपि सत्त्यामप्यस्य प्रतिज्ज्ञासूत्तरस्य शुक्लयजुर्वेदप्रातिशाख्यकारकात्यायनकृतत्वेन वैदिकेषु प्रसिद्धौ अत्तर व्यञ्जनार्थे हल्शब्दप्प्रयोगो[4]ऽस्य तत्कृतत्वं शङ्कास्पदङ्करोति, तथापि अस्य सूत्तरस्य प्रामाण्यन् तु माद्ध्यन्दिनीयैर् निर्विवादमेव स्स्वीक्रियते। शुक्लयजुर्वेदप्रातिशाख्ये जकारस्य क्वचिद् यकाररूपेणोच्चारणस्य विधानमुपलब्ध्यमानं सज्[5] जकारयकारयोः क्वचित् परस्परविनिमेयत्वं सूचयतीति च उक्तेषु स्थलेषु यकारस्य जकारतयैवोच्चार्यत्वन् ततोऽपि दृढीभवति। तस्मान् निर्दिष्टेषु स्स्थलेषु यकारस्य जकारतयैवोच्चारणञ् ज्यायो न तु 'ज्य' इत्युच्चारणमिति निर्णेयवँ विपश्चिद्भिः। ब्राह्म्मणे श्रौतसूत्तरगृह्य्यसूत्तरयोश् चाऽयँ यकारोच्चारणविशेषो माद्ध्यन्दिनीयैरनुस्स्रियते। तत्तर प्रापकवँ वचनन् तु न दृश्यते। अतस् तत्तर परम्परानुधावनमेव शरणम्। अथवा "शेषं सामान्यशास्त्राद्"इति भाषिकसूत्तरात्[6] माद्ध्यन्दिनीयमन्तरसंहिताद्ध्ययनधर्मा अपि केचन ब्राह्म्मणादिष्वप्यतिदिष्टा मन्तव्याः ॥९७–९८॥

---

१. श्लो. ५–६ (शि.स., पृ. ११४)। २. सं. व्या. शा. इ. (दू. भा.), पृ. ३८१। ३. २।१। ४. तत्तरैव। ५. ४।१६६। ६. ३।१३।

(ङ) वकारोच्चारणविशेषः

वस्स्येषत्तत्स्पृष्टदन्ताग्रकरणस्स्योष्ठजस्स्य च ।
स्पृष्टतेषत्तरस्स्पृष्टताऽपि च स्स्यात् क्वचिच्छ्रुतौ ॥९९॥

यद्द्यपि पदादौ वर्तमानस्स्य वकारस्स्य सुस्स्पृष्टता शुक्लयजुर्वेदसम्बद्धासु शिक्क्षासु एव कण्ठरवेण प्रतिपादिता, तथापि अथर्ववेदसम्बद्धे दन्त्योष्ठविधिनामके ग्रन्थेऽपि "छन्दस्स्यद्ध्यने प्राप्ते विदुषामथ धीमताम् । बकारे संशयो नित्त्यमौष्ठ्यन् दन्त्यमिति स्स्मृह"[1] इति वचनेन बवयोर् भेदो विदुषाव् वैदिकानाङ्ग कृतेऽपि सन्देहास्पदत्त्वेन प्प्रतिपादित इति अथर्ववेदेऽपि तस्स्य वकारस्स्य सुस्स्पृष्टता सम्भाव्यते । शुक्लयजुर्वेदसम्बद्धासु शिक्क्षाषु तु अयव् विषयो विस्तरेण प्रतिपादितो दृश्श्यते । तथा हि–प्रतिज्ञ्ञासूत्त्रे "अथानृत्यस्स्यानृतस्त्थानाम् पदादिमद्ध्यानृतस्त्थस्स्य त्रिविधङ्ग गुरुमद्ध्यमलघुवृत्तिभिरुच्चारणम्"[2] इति । याज्ञ्ञवल्क्यशिक्क्षायाञ् च— "त्वदर्थवाचिनौ वो वाव् वा वै यदि निपातजौ । आदेशाश् च विकल्पार्था ईषत्स्पृष्टा इति स्स्मृताः ।.... यदेव लक्क्षणयँ यस्स्य वकारस्स्याऽपि तद् भवेत् । यत्त्रयत्र विशेषस् स्यादिदानीं स तु कत्थ्यते । वकारस् त्रिविधꣳ प्रोक्तो गुरुर् लघुर् लघूतरः । आदौ गुरुर् लघुर् मद्ध्ये पदान्ते च लघूतरः ।.... सन्धिजौ च पदान्तीयावुपसर्गपरौ लघू । अथ-मा-स-न-शब्देब्भ्यो विभाषाऽऽम्म्रेडिते यवौ । पञ्चमादुत्तरो यो त्रो यदि चैकपदे भवेत् । संहितायालँ लघुस् सोऽपि पदकाले गुरुर् भवेत्"[3] इति । तत्त्र यदेव लक्क्षणयँ यस्स्येत्त्यादिकाद् वचनाद् ऋकारोदयस्स्य रेफयुक्तस्स्य हकारयुक्तस्स्य द्विगुणितस्स्य च वकारस्स्य सुस्स्पृष्टत्त्वम् भवतीति प्प्रतीयते । किन् तु प्रतिज्ञ्ञासूत्त्रादौ स्फुटस्स्य वचनस्स्याऽनुपलम्भाट् टीकाकृतान् तूष्णीम्भावाच् चाऽत्त्र मीमांसनीयता प्रतीयते । अमोघाननदिन्न्या शिक्क्षायाञ् च– "एकाक्क्षरवँ वकारश् च निपातस्स्थो यदा भवेत् । संहितायालँ लघुर् जातꣳ पदकाले गुरुर् भवेत् । वकारस् त्रिविधꣳ प्रोक्तो गुरुर् लघुर् लघूतरः । आदौ गुरुर् लघुर् मद्ध्ये पदान्ते च लघूतरः । पदान्ते पदमद्ध्ये च वकारो दृश्श्यते यदि । लघुरेव स मन्तव्यो ह्यनन्यत्त्राऽपि लघूतरः । औकारे च पदे पूर्वे अकारे परतस् स्थिते । लघूतरवँ विजानीयादग्गँ नावग्गँ निर्

१. १।२ । २. २।६ । ३. श्लो. १५२, १५४–१५५, १५७–१५८ (शि. स., पृ. २३–२४) ।

निदर्शनम्"[१] इति। लग्घ्वमोघानन्दिन्न्यां शिक्क्षायाञ् च— "वो वावँ् वा वै वि वौ पाठे उपसर्गात् परो लघुः। अथ-मा-स-न-शब्देब्भ्यो विभाषाऽऽम्म्रेडिते यवौ ॥ यदेव लक्क्षणयँ् यस्स्य वकारस्स्याऽपि तद् भवेत्। यत्रयत्र विशेषस् स्यात् तदिदानीन् तु कत्थ्यते। त्वदर्थ-वाचिनौ वो वावँ् वा वै यदि निपातजौ। आदेशाश् च विकल्पार्था ईषत्स्पृष्टाश् च ते स्स्मृताः॥ देवो वः सविता या वावँ् वातो वेति तथा न तत्। तव वायवृतस्प्पते तानऽग्रावेति कीर्तिताः"[२] इति। लघुमाद्ध्यन्दिनीयशिक्क्षायाञ् च— "गुरुर् वकारो विज्ज्ञेयꣳ पदादौ पठितो भवेत्। विब्भ्राडुदाहृतिर् ज्ज्ञेया सविताऽन्तर् लघुस् स्मृतः। पदान्ते वै लघुतरस् तव वायवृतस्प्पते। उपसर्गपरो यस् तु स वकारो लघुर् मतः। वो वावँ् वा वै मन्त्रपाठे लघवो गुरवꣳ पदे। प्रवायु-मच्छा बृहती वातो वेति निदर्शनम्"[३] इति। वर्णरत्नप्रदीपिकायां शिक्क्षायाञ् च— "यदेव लक्क्षणयँ् यस्स्य वकारस्स्यापि तद् भवेत्। यत्रयत्र विशेषस् स्यादिदानीं स तु कत्थ्यते। वकारस् त्रिविधꣳ प्रोक्तो गुरुर् लघुर् लघूतरः। आदौ गुरुर् लघुर् मद्ध्ये पदस्स्यान्ते लघूतरः। उपसर्गपरौ यत्र यवकारौ पदादिगौ ईषत्स्पृष्टौ ततो ज्ज्ञेयावभियुद्ध्य उपा यथा। परिवाजपतिः कविः प्रवोचञ् च निदर्-शनम्। अनु योजान्विन्द्र ते तु उपयज्ज्नवँ् विना तथा। त्वदर्थवाचिनौ वो वावँ् वा वै यदि निपातजौ। आदेशाश् च विकल्पास् स्युरीषत्-स्पृष्टा हि ते स्मृताः"[४] इति। परिभाषाङ्कसूत्तरेऽपि— "पदादौ पूर्वा-हल्व्योर् द्विर्व्योच्चारौ सम्पूर्वयोश् (च) छन्दसि"[५] इति। अत्तर सूत्तरे व्याक्ख्यायाञ् च सुस्स्पृष्टस्स्य वकारस्स्य द्विर्वकारत्त्वेन द्वित्त्ववकारत्त्वेन चोल्लेखꣳ प्राप्प्यते। किन् तु स भ्रमजनक इति हेयः। लेखेऽपि सुस्स्पृष्टवकारप्रातिनिद्ध्याय व्व इति द्विर्वकारलेखनम् भ्रमजनकमेव। अतꣳ पाराशरशिक्क्षायाः "वकारस्स्य यकारस्स्य मद्ध्ये बिन्दुꣳ प्रतिष्ठितः। अन्त्य-(न्तर्-?) बिन्दुवँ् विना ये च शेषान्तस्स्थाꣳ प्रकीर्तिताः"[६] इति वचनमनुसृत्त्य बिन्दुगर्भको वकार एव सुस्स्पृष्ट-वकारप्प्रातिनिद्ध्याय प्रयोक्तुमुचिततर इति तदर्थवँ् वैदिकैर् यतनीयम्।

---

१. श्लो. २६–२९ (शि. स., पृ. ९५)। २. श्लो. ९–१२ (शि. स., पृ. १०७–१०८)। ३. श्लो. ७–९ (शि. स., पृ. ११४)। ४. श्लो. २०७–२११ (शि. स., पृ. १३५–१३६)। ५. सू. १ (शि. स., पृ. १३८)। ६. श्लो. ११०–१११ (शि. स., पृ. ६५)।

केशवीयशिक्षायाङ्कारिकावल्ल्याम्[1] पाराशर्यां शिक्षायाम्[2] च एष विषयः प्रतिपादितोऽस्ति। प्रातिशाख्यप्रदीपशिक्षायामपि एष विषय उक्तानि शिक्षावचनानि उद्धृत्य प्रतिपादितः[3]। तत्र चाऽऽगतम् "अत्राऽपि सम्पूर्वकस्य वकारस्य द्वित्वमेव, यथा सर्वाम्"[4] इति वचनन् तु भ्रमजनकम्, तत्रोदाहरणे लेखे उच्चारणे च द्वित्वस्याऽभावात्; अत उक्ते उदाहरणे वकारस्य विषये यदि किञ्चिद् वक्तव्यन् तर्हि सुस्पृष्टत्वमेव वक्तव्यन् न तु द्वित्वम्। एतेन "सम्पूर्वकस्योदाहरणानि संहितायाम् प्रथमेऽध्याये देवस्य त्वेतिऋङ्मद्ध्ये संवपामीत्यत्र सँव्वपामीत्युच्चारः, संवर्च्चसेत्यत्र सँव्वर्च्चसेत्युच्चारः··· इत्यादिषु पदादित्वात् सम्पूर्वत्वाच् च यवयोर् द्वित्वं वकारयकारौ स्तः"[5] इति केशवदैवज्ञजल्पितमपि व्याख्यातम्।

सन्धिजस्य पदान्तस्थस्य वकारस्य कुत्रचिद् ईषत्तरस्स्पृष्टत्वन् तु शाकटायनमते वेदलोकसाधारणवँ विज्ञायते। "व्योर् लघुप्रयत्नतरश् शाकटायनस्य"[6] इति वदता पाणिनिनाऽपि तदनुमतन् दृश्यते। एतदीषत्तरस्स्पृष्टत्वन् तैत्तिरीयप्रातिशाख्ये "लेशो वात्सप्रस्यैतयोः"[7] इति, शौनकीयचतुरध्यायिकाञ् च– "लेशवृत्तिरधिस्स्पर्शं शाकटायनस्य"[8] इति उल्लिखितमस्ति ॥९९॥

(च) मूर्धन्यषकारोच्चारणविशेषः

मूर्धन्यष् षष् टवर्गीयवर्णेनाऽसयँयुतस् तथा।
ककारेणाऽयुतः पाठे खस् स्यान् माध्यन्दिनीयके ॥१००॥

यद्यपि यकारषकारादीनाम् प्रतिज्ञासूत्रे प्रतिपादिता उच्चारणविशेषा जकारखकारादिभिन्नास् तत्सदृशाः प्राचीने संस्कृतवाङ्मये वर्तमाना अर्वाचीने काले उच्चारणदोषान् नष्टास् स्वतन्त्रवर्णविशेषा न तु जकारखकारादय एव इति केचन मन्यन्ते[9] तत्र च अनन्तदेवयाज्ञिकव्याख्यांशान् प्रमाणीकुर्वते; तथापि "अन्तस्थानामाद्यस्य ··जकारोच्चारणम्"[10] इति, "अथो मूर्द्धन्यस्योष्मणोऽसयँयुक्तस्य टुमृते सयँयुक्तस्य च खकारोच्चारणम्"[11] इति च मूल-

---

१. श्लो. १२–१३ (शि. स., पृ. १५१)। २. श्लो. ६०–६३ (शि. स., पृ. ५८)। ३. शि. स., पृ. २९८–२९९। ४. तत्रैव पृ. १९९। ५. तत्रैव, पृ. १३९। ६. अष्टा. ८।३।१८। ७. १०।२३। ८. २।२४। ९. सं. व्या. शा. इ. (दू. भा.) पृ. ३८१। १०. प्र. सू. २।१। ११. तत्रैव २।७।

वचनयोर् 'जकारोच्चारणम्' इत्त्येव, 'खकारोच्चारणम्' इत्त्येव चोक्तन् न तु 'जकारसदृशोच्चारणम्' इति 'खकारसदृशोच्चारणम्' इति चोक्तमिति न तन्मतम् मीमांसासहम् पश्श्यामः। अनन्तदेवयाज्ञिकेन च अर्थवेलायाँ यकारादिरूपेणैव ग्राह्य्यत्त्वलँ लेखेऽपि जकारादिभावापत्त्यभावञ् च दृष्ट्वा चवर्गतृतीयसदृशत्त्वादिकम् उक्तन् न तूच्चारणेऽपि जकारादिब्भ्यो वैलक्क्षण्यं सूचयितुमित्त्येव युक्ततरमुत्पश्श्यामः, "यो ह्युत्सूत्त्रञ् कथयेन् नाऽदो गृह्य्येत"[1] इति न्न्यायात्। एतेन "तत्त्रमद्ध्यमस्स्य मूर्धन्न्यषकारस्स्य कवर्गद्द्वितीयवदुच्चारणम् माद्ध्यन्दिनीयाः कुर्वन्ति। यथोक्तञ् केशवी-(य?-) सूत्त्रे "षः खष् टुमृते च" इति। सोऽयमज्ज्ञाननिमित्तस् सम्प्रदायविशेषो नत्त्वत्त्र प्रयत्नदोषादिकारणम् प्रतिपद्द्यते। उच्चारणमात्त्रमन्न्यथा क्रियते, न तु लिपौ व्यत्त्यास इति बोद्ध्यम्"[2] इति मधुसूदनोक्तमपि व्याक्ख्यातम्। एवञ् च निर्दिष्टेषु स्थानेषु षकारस्स्य खकारोच्चारणमेव कर्त्तव्यम् माद्ध्यन्दिनीयके आम्नाये इति बोद्ध्यम्। एतस्मिन् विषये अन्न्यास्स्वप्य्येतदाम्नायसम्बद्धासु शिक्षासु वचनानि प्राप्य्यन्ते। तथा हि लघुमाद्ध्यन्दिनीयशिक्क्षायाम्- "षकारस्स्य खकारस् स्याट् टुकयोगे तु नो भवेत्। इषे लक्क्ष्यञ् कृष्ण्ण उक्क्षा समुद्द्रऽ प्रत्त्युदाहृतिः"[3] इति, वर्णोच्चारणप्रकारपरिशिष्टेऽपि- "टवर्गमन्तरा षस्स्य खोच्चारश् छन्दसीरितः। प्रत्त्युदाहरणम् पृष्ट्टो दिवीषे त्त्वा निदर्शनम्"[4] इति, परिभाषाङ्कसूत्त्रेऽपि- "षऽ खष् टुमृते च"[5] इति, केशवीयशिक्क्षायाञ् कारिकावल्ल्याञ् च "असयँ युक्तस्स्य मूर्धन्न्योष्मणऽ खोच्चारणम् मतम्। टुमृते सयँ युक्तस्स्याऽपि कस्स्य योगे ष एव हि। छन्दसीत्त्येव खोच्चारो लोके प्रकृतिरिष्ष्यते"[6] इति; प्रातिशाक्ख्यप्रदीपशिक्क्षायाञ् च "अथ षकारोच्चारणविषयः। तथा च प्रतिज्ज्ञासूत्त्रे 'अथो मूर्द्धन्न्योष्मणोऽसयँ युक्क्तस्स्य टुमृते सयँ युक्क्तस्स्य च खकारोच्चारणम्'। अथान्तस्थकथनानन्तरम् मूर्धस्स्थानस्स्योष्मणष् षकारस्स्य असयँ युक्तस्स्य टवर्गवँ विना अन्न्यहला सयँ युक्तस्स्य च खकारोच्चारणम्, इषे त्त्वा, विभर्ष्ष्यस्त् तवे, शुष्क्क्याय। टुमृते किम्? प्रत्त्युष्ट्टम्, श्रेष्ट्ठतमाय,

---

१. पा. व्या. भा., पस्पशाह्न्निके, व्याकरणाधिकरणे।

२. 'पत्थ्या स्वस्तिः' इति ग्रन्थे, पृ. १४। ३. श्लो. १-२ (शि. स., पृ. ११४)। ४. श्लो. १७ (शि. स., पृ. १७३)। ५. सू. ३ (शि.स., पृ.१४०)। ६. श्लो, १४-१५(शि.स.,पृ.१५१)।

कृष्णः। क्षकारे षकारवत्, अवयवसम्भावनेऽपि मातृकादौ गणनाद् एकवर्णत्वात् अवयवविभागाभावेन खकारोच्चारणम् भवति। ककारयोगे खकारोच्चारणाभाव इति नियमस् तु '(दृतिन्) न शुष्क्कम् इत्यादौ विपरीतसयँयोगे, (अतः क्षकारे?) ककारयोगेऽपि खकारोच्चारणम् भवति। तथा च कात्त्यायनशिक्क्षायाम्— 'असयँयुक्तस्य मूर्धन्न्योष्मणः खोच्चारणम् मतम्। टुमृते सयँयुक्तस्स्याऽपि कस्य योगे ष एव हि। छन्दसीत्येव खोच्चारो लोके प्रकृतिरिष्यते'[1] इति षकारोच्चारणविषयः''[2] इति। तत्तर च क्ष(क्ष) इत्येतस्मिन् ककारषकारसयँयोगे षकारस्य असयँयुक्तस्य षकारस्येव खकारोच्चारणमित्युक्तिर् लघुमाद्ध्यन्दिनीयशिक्क्षाया 'उक्क्षा समुद्द्रः प्रत्युदाहृतिः'[3] इति वचनेन विरुद्धा दृश्यते। साम्प्रदायिका वैदिका अपि ''अयक्क्ष्मा'' ''अधुक्क्षः'' इत्यादौ खकारोच्चारणन् नैव कुर्वते इति सम्प्रदायेनाऽपि सा विरुद्धैव दृश्यते। पूर्वं 'शुष्क्क्याय' इत्यपि षकारस्य खकारतयोच्चारणे उदाहरणत्वेन प्रतिपाद्द्यापि ''ककारयोगे खकारोच्चारणाभाव इति नियमस् तु न शुष्क्कमित्यादौ विपरीतसयँयोगे'' इति चोक्तमिति वदतोव्याघातेन दोषेणाऽपि दूषितमेव गोऽशेवचनम्। तथापि शुष्क्क्याय इत्यादौ ककारे परे खकारस्स्योच्चारणम् मनुष्यवाग्यन्तरस्स्यातीव प्रतिकूलमिव प्रतीयते इति तादृशेषु स्थलेषु षकारस्य खकारतयोच्चारणम् प्रतिषेधनीयमेव विज्ज्ञायते; अत एव पाणिनिरपि ''खरि च''[4] इति चर्त्वम् प्रतिपादयँस् तादृशं सयँयोगन् नानुमन्न्यते। साम्प्रदायिका वैदिकास् तु तादृशेषु स्थलेषु षकारस्य खकारोच्चारणम् भवतीति मन्न्यते[5]; किन् तु तत्तर 'शुख्क्-क्याय' इत्येवाक्क्षरविभाग आवश्यकः[6], तथोच्चारणञ् चाऽतीव दुष्करम्, 'शुख्-क्याय' इति एव कथञ् चिदस्स्थाने विरम्म्येव विच्छेदेनोच्चारयितुं शक्क्यते इति अत्तर भृशवँ विचारणीयवँ विद्द्वद्भिर् माद्ध्यन्दिनीयैर् विगानञ् च परिहरणीयम्। अस्मन्मते तु 'टुकयोगे तु नो भवेत्'[7] 'कस्य योगे ष एव हि'[8] इति वचनयोः कपूर्वके कोत्तरके च ककारषकारसयँयोगे तुल्यैव प्राप्ति-

---

१. एतद् वचनङ् केशवीयकारिकावल्ल्यामेव प्राप्प्यते। २. शि. स., पृ. २९९। ३. श्लो. २ (शि. स., पृ. ११४)। ४. अष्टा. ८।४।५५। ५. या. शि. शि. व. वि. टि., पृ. १४८। ६. शु. य. प्रा. १।१०२, १०४। ७. ल. मा. शि. श्लो. १ (शि. स., पृ. ११४)। ८. के. शि. का., श्लो. १५ (शि. स., पृ. १५१)।

रिति 'अयक्ष्मा' 'अधुक्षः' इत्यादौ 'हविष्कृदेहि' इत्यादौ च षकारस्य षकाररूपेणैवोच्चारणम् ज्यायो न खकाररूपेणेति स्फुटम् विज्ञापयितुमिच्छामः । "चरिष्यामि" "शमीष्व" इत्यादौ च पूर्वस्य षकारस्य अभिनिहितीभूतककारत्वेनैव उच्चारणङ्क कर्तुं शक्यते क्रियते च वैदिकैरिति तत्राऽपि अवधानम् देयमेव सुधीभिः । यद्द्यपि ऋग्वेदे एकत्र 'अख्खलीकृत्य'[1] इति प्राप्यते तथापि तदपि विचिन्तनीयमेव दृश्यते । अनुकरणात्मकशब्दत्वात् तस्य तादृशत्वेऽपि तादृशसंयोगस्याऽन्यत्र स्वाभाविके प्रयोगेऽनुपपत्तिरेव विज्ञायते ॥१००॥

(छ) अनुस्स्वारोच्चारणविशेषः

श्रुतौ माध्यन्दिनीयानामनुस्स्वारे तु कश् चन ।
विशेषोऽस्ति प्रयोज्यस् स सम्यग् बुद्ध्वा हि वैदिकैः। ।१०१॥
उच्चारणेऽनुस्स्वारस्य तेषाङ्कालेऽधिकत्वतः ।
जिह्वामूलातियोगाच् चाऽन्ते स्यादर्धगयुक् श्रुतिः ॥१०२॥
तैत्तिरीयाणाञ् च शषसहेषु हि परेष्वयम् ।
गकारेण युतो वैतदर्धरूपोऽपि वा भवेत् ॥१०३॥

माध्यन्दिनीयानामनुस्स्वारविशेषोच्चारणस्य विषये प्राचीनेषु अर्वाचीनेष्वपि शिक्षाग्रन्थेषु विस्तरयुतम् प्रतिपादनम् प्राप्यते । तथाहि प्रतिज्ञासूत्रे "अथानुस्स्वारस्य ६ इत्यादेशः शषसहरेफेषु, तस्य त्रैविध्यमाख्यातं ह्रस्स्वदीर्घगुरुभेदैर् द्दीर्घात्परो ह्रस्स्वो ह्रस्स्वात्परो दीर्घो गुरौ परे गुरुः"[2] इति । याज्ञवल्क्यशिक्षायाञ् च "वर्णे तु मात्रिके पूर्वे ह्यनुस्स्वारो द्विमात्रिकः । द्विमात्रिके मात्रिकस् स्यात् संयोगाद्द्यश् च यो भवेत् । अनुस्स्वारस्योपरिष्टात् संयोगो यत्र दृश्यते । ह्रस्स्वन् तन् तु विजानीयात् स७स्थामिति निदर्शनम् । अनुस्स्वारो द्विमात्रस् स्याद्वर्णव्यञ्जनादिगः । ह्रस्स्वाद् वा यदि वा दीर्घाद् देवानाङ् हृदये यथा । अनुस्स्वारस् तु यो दीर्घादक्षराद् यो भवेत् परः । स तु ह्रस्स्व इति ज्ञेयो मन्त्रेष्वेव विभाषया"[3] इति । पाराशर्या शिक्षायाम्प्येतानि वचनानि प्राप्यन्ते । तत्राऽधिकञ् च "अनुस्-

---

१. शा. ऋ. म. सं. ७।१०३।३; ऋ. प्रा. ७।३३ २. ३।१,२।
३. श्लो. १३८–१४२ (शि. स., पृ. २१–२२) ।

स्वारस्योपरिष्टात् सर्वं वृतयँ यत्तर दृश्यते। दीर्घन् तन् तु विजानीयाच् छ्रोता ग्रावाणेति[1] निदर्शनम्"[2] इति। लग्घ्वमोघानन्दिन्न्याञ् च— "अनुस्स्वारो द्विमात्तरस् स्यादृवर्णव्व्यञ्जनोदये। ह्रस्स्वाद् वा यदि वा दीर्घाद् देवानाꣳ हृदयेब्भ्यः। सꣳ स्रष्टा सिꣳ ह्यसि सयँयोगे ह्रस्स्व इष्यते। मद्ध्यमꣳ श्रथायेति सयँयोगो न द्द्विरुच्यते"[3] इति। लघुमाद्ध्यन्दिनीयशिक्क्षायाञ् च— "अनुस्स्वारो यत्तर कुत्तर ꣳ कारो भवति द्ध्रुवम्। ह्रस्स्वो दीर्घो गुरुश् चेति त्रिविधꣳ परिकीर्तितः। ह्रस्स्वात् परो भवेद् दीर्घो हꣳस इति निदर्शनम्। दीर्घात् परो भवेद् ह्रस्स्वो माꣳसेब्भ्य इति दर्शनम्। गुरौ परे ह्यनुस्स्वारो गुरुरेव हि स स्स्मृतः। सिꣳ ह्यसीति तत्तर तावदृकारे दीर्घ एव सः। देवनाꣳ हृदये तद्वत् तस्क्कराणान् तथा सृके"[4] इति, वर्णरत्नप्प्रदीपिकायाञ् च "अनुस्स्वारश्च् च रोष्स्मसु मकारस्स्येति यो विधिः। पदयोरन्तरे स स्स्यात् पदमद्ध्ये तु नस्स्य च। यथाऽपाꣳरसञ् चैव त्वाꣳशश्वन्त एव च। यजूꣳषि च तपूꣳषि च उरुꣳहीति निदर्शनम्।...एकमात्तरो(एकमात्तराद्?)द्विमात्तरस् स्यात् त्रिमात्तरान् (द्विमात्तरान्?) मात्त्रिको यथा। त्वꣳसोम च हवीꣳषि च सꣳस्रष्टा च न सयँयुजि। अनुस्स्वारो द्विमात्तरस् स्याद् ऋवर्णव्व्यञ्जनोदयः। ह्रस्स्वाद् वा यदि वा दीर्घाद् देवानाꣳ हृदये यथा"[5] इति; परिभाषाङ्कसूत्तरे च— "अनुस्स्वारस्स्य ꣳ शलि रेफे च परे ह्रस्स्वाद् दीर्घो दीर्घाद् ह्रस्स्वो सयँयोगे गुरुश् च"[6] इति। केशवीयशिक्क्षायाङ् कारिकावल्ल्याञ् च— "अनुस्स्वारस्स्य ꣳ कार आदेशश् छन्दसि स्स्मृतः। ऊष्मरेफेषु परतस् तस्स्य त्रैविद्ध्यमुच्च्यते। ह्रस्स्वाद् दीर्घाद् दीर्घह्रस्स्वौ गुरौ च परतो गुरुः। ऋकारपर ऊष्मान्त्ये दीर्घाद् दीर्घोऽपि जायते। परसवर्णेऽनुस्स्वारस्स्येषत्प्रकृतिरुच्यते। अणुमात्तरमनुस्स्वारो ह्युत्तमञ् चाऽणुमात्तरकम्"[7] इति। वर्णोच्चारणप्रकारपरिशिष्टेऽपि— "ꣳ कारस् स्यादनुस्स्वारस्स्थाने शलि च रे परे। ह्रस्स्वाद् दीर्घो भवेद् दीर्घाद् ह्रस्स्वो गुरुरथो मतः। सयँयोगे परतो हꣳस इत्त्यादि

---

१. मा. वा. शु. य. म. ह्र. य. सं. ६।२६। २. श्लो. २८–३३ (शि. स., पृ. ५५)। ३. श्लो. १५–१६ (शि. स., पृ. १०८)। ४. श्लो. १२–१५ (शि. स., पृ. ११५)। ५. श्लो. १४०–१४५ (शि. स., पृ. १२९)। ६. सू. ५ (शि. स., पृ. १४२)। ७. श्लो. १५–१८ (शि. स., पृ. १५१)।

च निदर्शनम् । ता७ं सवितुरित्यादि स्याद् द७ंष्ट्रेत्यादिकन् तथा । ह्रस्वदीर्घगुरूच्चार४ कर्तव्योऽत्र यथाक्रमम् । शल्रेफयोरभावेन सि६ं ही तु प्रत्यत्युदाहृतिः"[1] इति । प्रातिशाख्यप्रदीपशिक्षायामप्ययवँ विषयस् सोदाहरणं समूलवचनोद्धरणवँ विस्तरेण प्रतिपादितोऽस्ति[2] । तत्र ऋकारोदये ऊष्मणि परे दीर्घात् परस्याऽप्यनुस्वारस्य दीर्घत्वे 'स६ं सृष्ट्टजित्' 'स६ं सृष्ट्टाम्' इत्यप्युदाहरणत्वेनोल्लिखिते इति विशेषः ।

अथाऽत्र माध्यन्दिनीयानामनुस्वारोच्चारणवँ विशेषेण विविच्यते । तत्र माध्यन्दिनीया अनुस्वारस्य ग्वङ्ग गुङ्ग इति उच्चारणे ग्गँ ग्गँ इति उच्चारणे वा कुर्वते । ग्वङ्ग गुङ्ग इत्युच्चारणे सामान्यतया माध्यन्दिनीयैर् वैदिकैरेव अशुद्धे इत्युद्घोषिते[3] इति, बहवस् साम्प्रदायिका माध्यन्दिनीया ग्गँ ग्गँ इत्येवोच्चारयन्तीति च ग्वङ्ग गुङ्ग इत्युच्चारणयोर् विषये नाऽधिकवँ वक्तव्यङ्ग किञ् चित् । तस्माद् ग्गँ ग्गँ इत्येतयोरुच्चारणयोर् विषये एव अत्र विशेषेण विचारङ्ग कुर्मः । तत्र शुक्लयजुर्वेदप्रातिशाख्ये अनुस्वारस्य स्स्थानयँ यमानामिव नासिके उक्ते[4], करणञ् च हनुमूलम् उक्तम्[5]; अन्यत्र तु अनुस्वारस्य करणं सामान्यतया नासिकेत्येवोक्तवँ विज्ज्ञायते[6] । आपिशलिशिक्षासूत्रे एकेषाम् मतेऽनुस्वारस्य कण्ठनासिक्यत्वम् प्रतिपादितमस्ति[7] । एतच् च शुक्लयजुर्वेदप्रातिशाख्यकारमतस्याऽनुरूपन् दृश्यते; यतो हि हनुमूलकरणकत्वेऽनुस्वारस्य कण्ठस्स्थानकत्वमपि वक्तुं शक्यते, कण्ठस्य हनुमूलसन्निहितत्वात्, हनुमूलव्यापारे च अनुस्वारनिष्पादकवायो४ कण्ठेनाऽपि कियताऽप्यंशेन विशिष्टस्स्य सम्बन्धस्य सम्भवात् । दृश्यते हि केषाञ् चिन् मते जिह्वामूलीयानामपि कवर्गीयवर्णानामन्येषाम् मते कण्ठ्यत्वेनोपादानम् । अतश् शुक्लयजुर्वेदप्रातिशाख्यसम्मतस्याऽनुस्वारोच्चारणप्रकारस्य अन्यानुस्वारोच्चारणाद् विलक्षणता आपिशलिशिक्षासूत्रादपि प्रतीयते । तत्र प्रतिज्ज्ञासूत्रे "अथाऽनुस्वार-

---

१. श्लो. १९–२१ (शि. स., पृ. १७३–१७४) । २. शि. स., पृ. २२४–२२५ । ३. सम्. प्र. शि. श्लो. ८०, या. शि. शि. व. वि., पृ. १०६, तत्र टिप्पण्यञ् च । ४. १।७४ । ५. १।८३ । ६. आ. शि. सू. स्थानप्रकरणे सू. १४, करणप्रकरणे सू. ९ । ७. स्थानप्रकरणे, सू. १५ ।

स्स्य ६· इत्त्यादेशः शषसहरेफेषु"[1] इति उक्तमिति तु वेदलोकसाधारणादनन्यस्मादनुस्स्वारान् माद्ध्यन्दिनीयानामनुस्स्वारस्स्य वैलक्षण्यं स्फुटतरम्भवति। न ह्यर्थभेदे सति प्रयोजनान्तरस्स्याप्यभावे च सति आदेशादेशिव्यवहारः क्रियेत। न च मित्थ्याभिनिविष्टविचारकगतानुगतिकतया लिपिविधानपरतयेदवँ वचनन् नेयम्[2] अर्वाचीनासु कतिपयीषु शिक्षासु पाराशरकृतशिक्षानिभासु अनन्यत्तर च क्वचिल् लिपेरपि विचारे सत्त्यपि[3] कात्त्यायनीयत्त्वेनाऽभिमते प्राचीनतरे श्रुतेरद्ध्ययनधर्मविशेषाणाम् अनन्वाक्ख्यायके प्रतिज्ञा–पराभिधानस्स्य सम्प्रदायज्ञोच्चारणस्स्य[4] अनन्वाक्ख्यायकतया अनन्वर्थनामके प्रतिज्ञासूत्तरे लिपिपरिचायकत्त्वस्स्य लिपिविधायकत्त्वस्स्य वाऽऽरोपस्स्याऽनुचितत्त्वात्। आधुनिकप्रचलित- हिन्द्यादि– भाषाव्याकरणादिषु ष्विव सँस्कृतभाषाव्याकरणे संस्कृतशिक्षाशास्त्रे वा लिपिविधायकत्त्वस्स्याऽदृश्यमानत्त्वाच्च। "अनुस्स्वारस्स्य ६· इत्त्यादेशः" इति वाक्ये श्रुतिविशेषस्स्य स्स्थाने श्रुतिविशेषादेशस्स्यैव प्रतीयमानत्त्वाच् च। लिपिपरिचायकत्त्वे तु द्विविधस्स्य त्रिविधस्स्य वाऽनुस्स्वारस्स्य कृते द्वित्त्रविधलिपिप्रदर्शनस्स्याऽऽवश्यकताया आपाताच् च। वाक्यशेषे श्रूयमाणस्स्य मात्त्राविशेषाणामनन्वाक्ख्यानस्स्य लिपिविधानपक्षेऽनुपपत्तेश् च। नाऽप्यस्स्याऽनुस्स्वारविशेषस्स्य सामान्यानुस्स्वारविलक्षणत्त्वयँ यदि शुक्लयजुर्वेदप्रातिशाक्ख्यकारस्स्य सम्मतमभविष्यत् तर्हि माद्ध्यन्दिनीयानामाम्नाये सामान्यानुस्स्वारस्स्याभावस्स्याऽऽपातात् तस्स्यापि "तस्मिन् ड़ढ़जिह्वामूलीयोपद्ध्मानीयनासिक्या न सन्ति माद्ध्यन्दिनीयानाम्, लृकारो दीर्घः प्लुताश्च् चोक्तवर्ज्जम्"[5] इत्त्यत्तर स उल्लेखमकरिष्यत्, न च तथाऽकार्षीत्, अतो माद्ध्यन्दिनीयानामनुस्स्वारस्स्य सामान्यानुस्स्वारविलक्षणत्त्वं शुक्लयजुर्वेदप्रातिशाक्ख्यकारमतविरुद्धमिति विरोध उद्भावनीयः,[6] अनुस्स्वारविशेषस्स्यापि अनुस्स्वारत्त्वस्स्याऽनपायाद् माद्ध्यन्दिनीयानामाम्नायेऽनुस्स्वारविशेष-

---

१. ३।१। २. मा. सं. पद., परि. ३, पृ. ६३९। ३. पारा. शि. श्लो. ५५, ११०, १३८; चारा. शि., पृ. १५–१६; वै. सि. कौ. सञ्ज्ञाप्रकरणे स्थानादिनिरूपणे मनोरमायाम्, बृ. श. शे. प्र. भा., पृ. ५८ इ.। ४. प्रतिज्ञाशब्दार्थो दृश्यो ना. शि. २।७।९। ५. शु. य. प्रा. ८।३९। ६. मा. सं. पद. परि. ३, पृ. ६३९।

स्स्य सत्त्वे अनुस्स्वाराभावस्स्य प्रतिपादयितुमशक्यत्वात्। यदि द्विविधमनुस्स्वारं स्वीकृत्यापि[1] तयोस् सामान्यतयैकत्वं स्वीकृत्य वर्णसमाम्नाये गणनं[2] शुक्लयजुर्वेदप्रातिशाख्यकारस्स्य न विरुद्धम् भवति तर्हि अनुस्स्वारविशेषस्स्याऽपि अनुस्स्वारत्वसामान्याऽऽलिङ्गितत्वं स्वीकृत्य माध्यन्दिनीयानामाम्नाये अनुस्स्वारविशेषस्स्य सत्त्वात् तत्र अनुस्स्वाराभावास्स्याऽप्प्रतिपादनङ्ग कथवँ विरुद्धं स्यात्। तस्मान् माध्यन्दिनीयानामनुस्स्वारो वेदलोकसाधारणादनुस्स्वारात् कतिपयैर् धर्मैर् भिन्न इति स्स्वीकारे नास्त्येव काऽप्प्यनुपपत्तिरिति वयम् मन्यामहे। एवञ् च सति किन् तर्हि माध्यन्दिनीयानामनुस्स्वारस्स्य स्वरूपमिति प्रश्न उत्तिष्ठति। तत्र इदानीन्तनैर् बहुभिर् माध्यन्दिनीयैरुच्चार्यमाणङ्ग ग्गँ इति ग्गँ इति चैव तस्स्य रूपमिति के चन मन्यन्ते। तथाहि याज्ञवल्क्यशिक्षाव्याख्यायामरनाथः– "तेन ह्रस्स्वे गुरुत्वङ्ग कृत्वा ६·कारे उच्चारिते 'गणपतिह· हवामहे' इत्यत्र 'तिऽगँ ह' इत्येवं श्रुतिर् भवति। ये च 'गणपति ग्ग्वङ्ग घवामहे' इत्येवमुच्चारयन्ति तेऽनधीतविद्द्याऽ प्रातिशाख्याद्द्यनभिज्ञाश् च"[3] इति; तट्टिप्पण्याञ् च स एव "यमानुस्स्वारनासिक्यानान् नासिके इति अनुस्स्वारस्स्य स्स्थानन् नासिका जिह्वामूलीयानुस्स्वारा हनुमूलेन इति करणञ् च हनुमूलम् उक्तम्। एवञ् च हनुमूलेन नासिकायावँ वर्णे उच्चारिते गँकारश्श्रुतिरेव श्श्रूयते, न पुनर् ग्वङ्कारश्श्रुतिः, तथा च केशवी–(य?–) शिक्षायाम्— अनुस्स्वारस्स्य गँकार आदेशश् छन्दसि स्स्मृतः। ऊष्मरेफेषु परतस् तस्स्य त्रैविद्ध्यमुच्यते इति। एवम् प्रतिज्ञासूत्रादिषु, तत्र आदेशश् च द्विमात्रिकाद्द्युपलक्षितवर्णविशेषोच्चारणरूप एव। न च, नासिकायां हनुमूलेन अनुस्स्वारस्स्योच्चारणे कृते गँ–(गँ?–) कारश्श्रुतिरुपपन्ना, परन् तु गकारोत्तरमुकारसदृशो ध्वनिऽ कथम् प्रयुज्यते इति वाच्यम्; नासिकायां हनुमूलेन अनुस्स्वारे उच्चारिते गँकार–(गँकार?–) श्श्रुतिरर्धमात्रिका जाता, ततस् समनन्तरमेव अनुस्स्वारस्स्य द्विमात्रिकत्वादिविधानात्, तथा (एवन् दीर्घत्वे च) 'ह्रस्स्वो दीर्घऽ प्लुत इति कालतो नियमा अचि'[4] इति नियमेन (दीर्घस्स्याऽनुस्स्वारस्स्य ह्रस्स्वस्स्य च तस्स्य अर्धमात्रप्राप्त्या ?)

---

१. शु.य.प्रा. ४।१५०, १५१। २. तत्रैव ८।२१, २५।
३. या. शि. शि. व. वि., पृ. १०६। ४. पा. शि. श्लो. ११।

अस्स्पृष्टस्स्वरस्य (अस्स्पृष्टस्स्वरतया ?) उच्चारणे प्राप्ते हनुमूलस्य नासिकायाङ (नासिकामूले ?) गमनेन तथा 'अनुस्स्वारे विवृत्त्याञ् च विरामे चाक्क्षरद्द्वये । द्विरोष्ठ्यौ तु विगृह्णीयाद् यत्तरौकारवकारयोः'[1] इति पाणिनीयाद् ओष्ठ्योर् विश्श्लेषणे च ओष्ठस्स्थानिकस्य (स्वरस्य) एवोत्पत्तिस् सम्भाव्यते, एकप्रयत्नत्वात् प्रयत्नान्तरेणोच्चारणे मानाभावाच् च (अतो गकारोत्तरम् प्रयुज्यमान उकारसदृशो ध्वनिरपि उपपद्द्यते ?)''[2] इति । सम्प्रदायप्रबोधिनीकारोऽपि—''अनुस्स्वारस् स्वराभावान् न मात्तराकालभाक् परम् । भिन्नश्श्रुतिश्शषसहरेफेषु तत्तर मात्तिरता । पूर्वश्श्लिष्टो ग४ प्रणवद्द्वितीयमात्तरया युतः । सनादो गुँश्श्रुतिर् बिन्दुर् न ग्वं गोमादि वा भवेत्''[3] इति । किन् तु ६ इत्त्यस्स्यापि अनुस्स्वारविशेषत्त्वात् तस्स्य पूर्वाक्क्षराङ्गताया४ पूर्वाक्क्षरोदात्तादिस्स्वरभागितायाश् च आवश्श्यकत्त्वाद्[4] इदानीन्तनानाम् प्रायस् सर्वेषामेव माद्ध्यन्दिनीयानाङ ग्गुँ इत्त्युच्चारणे ग्गूँ इत्त्युच्चारणे च पूर्वाक्क्षराङ्गताया अभावात्, स्वतन्त्राक्क्षरताया अनेकवर्णघटिततायाश् च उपलभ्यमानत्त्वात्, गकारस्स्य पूर्वं श्लेषेऽक्क्षरभेदस्स्याऽपरिहार्यत्त्वाच् च तेषामिदङ ग्गुँ इति ग्गूँ इति चोच्चारणमशास्त्रीयमपभ्रष्टरूपञ् चेति विज्ज्ञायते । न च ''अनुस्स्वारो यत्तरकुत्तर ६कारो भवति द्ध्रुवम्''[5] ''अनुस्स्वारस्स्य ६कार आदेशश् छन्दसि स्स्मृतः''[6] ''६कारस् स्यादनुस्स्वारस्स्थाने शलि च रे परे''[7] इत्त्यादौ माद्ध्यन्दिनीयानुस्स्वारविशेषस्स्य स्वतन्त्राक्क्षरतया पठितत्त्वात् क्वचित् तु अर्वाचीनशिक्क्षाग्रन्थतद्व्याक्ख्यानादिषु[8] गुँ गूँ इत्त्येव लिक्ख्यमानत्त्वाच् च आधुनिकानाम् माद्ध्यान्दिनीयानामपि तस्स्य स्वतन्त्राक्क्षरत्त्वेन पठनयँ युक्तियुक्तमेव न दुष्टमिति वाच्यम्, मूले प्रतिज्ज्ञासूत्तरे ६ इत्त्येव तस्स्योपदिश्श्यमानत्त्वाद् गुँ इत्त्यनुल्लिखितत्त्वात्, तस्स्य स्वतन्त्राक्क्षरत्त्वे प्रातिशाक्ख्योक्तस्स्य तदीय—पूर्वाक्क्षराङ्गत्त्वस्स्य बाधने समर्थस्स्य प्रमाणस्स्याऽभावात् प्रातिशाक्ख्योक्तायास् तस्स्य पूर्वाक्क्षराङ्गतायाः परि-

---

१. पा. शि. श्लो. २४ । २. या. शि. शि. व. वि., टि., पृ. १०६–१०७ । ३. श्लो. ७९–८०, पृ. १७ । ४. शु. य. प्रा. १।१०२, ८।३९ । ५. ल. मा. शि., श्लो. १२ (शि. स., पृ. ११५) । ६. के. शि. का., श्लो. १५ (शि. स., पृ. १५१) । ७. व. प्र. पं., श्लो. १९ (शि. स., पृ. १७३)। ८. या. शि. शि. व. वि., पृ. १०६; टि., पृ. १०६–१०७; सम्. प्र. शि. श्लो. ८०, पृ. १७।

त्यागे मानाभावात्, तस्य स्वतन्त्राक्षरत्वे तस्याऽपि स्वतन्त्रस्-स्वरभाक्त्वस्याऽऽवश्यकत्वात् तस्य स्वपूर्ववर्तिस्वरभाक्त्वस्य सर्वसाम्प्रदायिकप्रसिद्धस्य बाधाऽऽपातात्, विसर्गजिह्वामूलीयोपध्मानीयसामान्यानुस्वारनासिक्ययमानामिव तस्याऽपि स्वतन्त्रतया याथार्थ्येनोच्चारयितुमशक्यत्वात् तत्प्रतिनिधित्वेन गँ इत्याकारेणाऽन्येनैवाऽऽकारेण वाऽपि कँ खँ गँ घँ इत्याकारैर् यमानामिव हँ इत्याकारेण नासिक्यस्येव उपदिश्यमानतायाः प्रतीयमानत्वाच्च। न हि खलु यमानाङ्क कँ खँ गँ घँ[1] इत्याकारैरुपदिष्टानामपि तदाकारतयैव प्रयोगः, न वा नासिक्यस्य हँ[2] इत्याकारेणोपदिष्टस्याऽपि तदाकारतयैव प्रयोगः। तस्मान् न खलु लघुमाध्यन्दिनीयशिक्षादिश्लोकावष्टम्भेनैव अस्याऽनुस्वारविशेषस्य स्वतन्त्राक्षरत्वम् पूर्वाक्षराऽनङ्गत्वमास्थातुं शक्यम्, माध्यन्दिनीयशिक्षादेर् माध्यन्दिनादिमुनिकृतत्वेऽनाश्वासाच्च[3]। लघुमाध्यन्दिनीयशिक्षादिषु "अनुस्वारो यत्र कुत्र ६·कारो भवति ध्रुवम्" इत्यादिषु, सत्यपि अनुस्वारस्य अकारव्यवहितेन कारेण निर्देशस्य 'नानुस्वारयमविसर्जनीयजिह्वामूलीयोपध्मानीयाः' इत्यादिना[4] निषेधे कारेणाऽनुस्वारविशेषस्य निर्देशः, प्रतिज्ञासूत्रे तत्त्वस्य "अथाऽनुस्वारस्य ६·इत्यादेशः"[5] इति इतिना निर्देश इति लघुमाध्यन्दिनीयशिक्षादिकृताम् प्रातिशाख्यकारादिप्राचीनाचार्यप्रसिद्ध्यनभिज्ञत्वञ्च स्फुटम्। न चाऽनुस्वारविशेषस्याऽस्य ह्रस्वतायाः दीर्घतायाश् चोपपत्तये उकारादिस्वरयुक्तत्वमावश्यकम्, लौकिकसामान्यानुस्वारतुल्यानुस्वारके ऋग्वेदेऽपि अनुस्वारस्य त्रिपादमात्रात्मकतायास् सत्त्वात्[6] ह्रस्वतायाः दीर्घतायाश् च सामवेदेऽपि उपलब्ध्यमानत्वात्[7]। न चेदानीन्तनानाम् अधिकतराणाम् माध्यन्दिनीयानाङ्क गँ इति गँ इति चोच्चारणे ओष्ठयोर् विश्लेषः। तस्माद् इदानीन्तनानाम् माध्यन्दिनीयानाम् अनुस्वारस्य ग्गँ इति ग्गँ इति चोच्चारणमपभ्रष्टरूपमेवेति निश्चीयते। शास्त्रानुसारन् तु अस्याऽनुस्वारस्योच्चारणे वेदलोकसाधारणाऽनुस्वारानुसारिणि एवोच्चारणे

---

१. शु. य. प्रा. ८।२४। २. तत्रैव ८।२३। ३. या.शि. शि. व. वि. टि., पृ. ११५ (टि. ५)। ४. शु. य. प्रा. १।४१; तै. प्रा. १।१८। ५. ३।१। ६. ऋ. प्रा. १३।३२–३३; शी. शि. श्लो. १२–१३। ७. ऋ. त. १।२,३।

अधोहनुमूलप्रयत्नमधिकतरञ्च कृत्वा हनुमूलप्रयत्नाऽऽधिक्क्याय च हन्वग्रे ओष्ठौ चाऽधिकतरन् दूरस्स्थौ कृत्वा यथायथन् दीर्घीभावञ् च कृत्वा उच्चारणचेष्टा कर्तव्या। तस्यैतस्याऽनुस्स्वारविशेषस्योच्चारणस्याऽन्ते हनुमूले जिह्वामूलप्रदेशे नासिकामूलभागे दृढतरं संश्लिष्टे सति तद्विश्लेषे प्रयत्नविशेषादुपजातोऽर्धगकारोऽस्याऽनुस्वारस्य अन्ते प्रश्लिष्ट इव श्रूयते इति विज्ञायते। एवंविधोऽनुस्वारश् च सत्त्यपि दीर्घीभावे पदान्तस्थो नाद इव स्वपूर्ववर्त्यक्षराङ्गत्वन् नैव जहाति। शक्यते चाऽस्माभिरेवंविधोऽनुस्स्वार उच्चार्य श्रावयितुम्। वेदलोकसाधारणादनुस्स्वारान् माध्यन्दिनीयानामनुस्स्वारस्य एतदेव वैलक्षण्यम् मनसि निधाय प्रतिज्ञासूत्रकारेण सामान्यानुस्स्वारस्स्थानेऽयमनुस्स्वारविशेष आदिष्ट इति बुद्ध्यते। एवञ् चाऽस्यैवाऽनुस्स्वारस्य विपर्यासञ् कृत्वा गकारविधम् भागमग्रतस् संश्लिष्टवंविधायाऽनुस्स्वारभागञ् च उँकाररूपेण विकार्य अपभ्रष्टीकरणेन गकारभागस्य द्वित्त्वञ् च कृत्वा ग्गँ इति ग्गँ इति चोच्चारितमर्वाचीनैर् माध्यन्दिनीयैर् वैदिकैराचार्यककामैरपि अविज्ञातशिक्क्षाशास्त्रैरिति विज्ञायते। केचित् तु अस्यैव माध्यन्दिनीयानुस्स्वारविशेषस्याऽनुस्स्वारभागमर्धगकारविधोपजनभागञ् च आमिश्रितञ् कृत्वा तौ ङकाररूपताम् प्रापय्य लोकेऽप्यनुस्स्वारमुच्चारयन्तीति च प्रतीयते। उक्तञ् च मधुसूदनशर्मणाऽपि—"अथैतेष्वेव प्रदेशेषु अनुस्स्वारस्य ङकारसदृशद्ध्वनिरद्ध्वर्युणाम्। तंङ रामंङ रावणारिम्। सिंङहः, वंङशः, कंङसः। कण्ठ्यानुनासिकत्वाद् ङकाराभासमात्त्रन् न तत्त्वयङ ङकार एव। ङकारसदृशद्ध्वनेस् तस्य गुंकार इति सञ्ज्ञा क्रियते व्यवहारार्थम्। अद्द्यत्त्वे तु वेदोच्चारका गुं-शब्दमेवोच्चारयन्ति, तदज्ञानात्"[1] इत्यादि। अतो गँ इत्यस्य ङकाररूपस्य चापभ्रंशीभूतानुस्स्वारस्य मूलभूतोऽयमस्माभिः प्रतिपादितोऽनुस्स्वारविशेषो माध्यन्दिनीयैस् सम्यग् बुद्ध्वा यथाशास्त्रं सम्यक् प्रयोक्तव्य इति निर्णीयते। न च सम्प्रदायविरोधादियम् भणितिरवधीरणीयेति वाच्यम् "एकश् शब्दस् सम्यग् ज्ञातश् शास्त्रान्वितस् सुप्रयुक्तस् स्वर्गे लोके कामधुग् भवति"[2] इति पाणिनीयव्याकरणभाष्यकारधृताद् आगमाच् शास्त्रविरुद्धतायास् सत्त्वेन शास्त्रान्वित-

---

१. 'पत्थ्या स्वस्तिः' इति ग्रन्थे पृ. ५–६। २. ६।१।८४।

ताया अभावे सम्प्रदायस्यऽपि शिक्क्षाव्भ्यासादिमान्द्यापबभ्रंशो-च्चारणशिथिलकरणवैगुण्यादिपुरुषदोषदुष्टतायास् सम्भावनयाऽनाश्वासास्पदत्वात् । स्मृतिरूपस्य प्रातिशाख्यादिशास्त्रस्य आचाररूपस्याऽद्ध्ययनस्य च विरोधे पूर्वस्यैव बलीयस्त्वस्य न्याय्यत्वाच्[1] च । अतस् सम्प्रदायाद्ध्ययनेनापीदानीन् तु शास्त्रान्वितत्वमधिकतरमपेक्क्षणीयमेवेति च सुवचम् ।

तैत्तिरीयाणामप्येकोऽनुस्स्वारभेदो वस्तुत एतादृश एवेति सम्भाव्यते, व्यासशिक्क्षाटीकायाँ वेदतैजसाक्ख्यायान् "द्वौ अनुस्स्वारौ तं घ्नन्तीति केवलः, सऽशितमित्यत्तर गकारसयँ युतः"[2] इत्युक्तत्वात् । वैदिकाभरणकारेण तु अनुस्स्वारस्यार्धगकाररूपतैवोल्लिखिता "अनुस्स्वारोऽप्युत्तमवद् व्यञ्जनमेवास्मच्छाखायाम् अर्धगकाररूपत्वाद्"[3] इति । आत्तरेयशिक्क्षायाञ् च— "अद्ध्याये तैत्तिरीयाणामनुस्स्वारो यदा भवेत् । तदाद्द्व्यर्द्धगकारस् स्यात् तच्छेषमनुनासिकः"[4] इति । पारिशिक्क्षायाञ् च—"यजुष्यनुस्स्वार इहापि यत्तर भवेत् तदाद्द्व्यर्द्धगकारयुक्तः । स रूपशान्तिश् शबरो यदि स्स्याद् न स्स्याद् गकारस्स्य तु केवलाक्ख्या"[5] इति । आत्तरेयशिक्क्षावचनात्, पारिशिक्क्षावचनात्, 'सग्ऽशरवाह' 'वायव्यग्ऽश्वेतम्' इत्यादौ ह्रस्स्वात् परस्य सयँयोगपरकस्य द्विर्भूतस्याऽनुस्स्वारस्य गकारादिकानुस्स्वारतया प्रतिपादनस्य वेदतैजसे दृश्यमानत्वाच्[6] च तैत्तिरीयाणामयम् मात्तिरकोऽनुस्स्वारो[7] माद्ध्यन्दिनीयानामनुस्स्वाराद् विलक्क्षण एव प्रतीयते ॥१०१–१०३॥

७. अथ वर्णवर्गीकरणाधिकारः

(क) वर्णवर्गीकरणसाधननिरूपणम्

केन चिद् हि विशेषेण सामान्न्येन च केन चित् ।
पृथक्कृत्य च सङ्गृह्य वर्णान् वर्गाऽकृता बुधैः ॥१०४॥

मनुष्याणां स्पष्टार्थाया वाण्याऽ पृथक्प्रयत्नोच्चार्यभागरहितैकप्रयत्नोच्चार्यतत्त्वेन सामान्न्येन समानतत्त्वेऽपि अक्क्षरात्मकत्त्वेन अनक्क्षरात्मकत्त्वेन च विशेषेण पृथक्कृत्य स्वरा व्यञ्जनानि इति

---

१. तन्त्रवार्तिके १।३।८–९ । २. सू. ४३१–४३२ ।
३. तै. प्रा. २।३ (मैसूरसँस्करणे पृ. ८३) । ४. श्लो. ११ ।
५. सू. १६१ । ६. व्या. शि. सू. ३४१, ३४२ । ७. तत्तरेव. सू. ४६० ।

वर्गौ विधीयेते, उक्ते विशेषे सत्त्यपि उक्तेन सामान्येन स्वरान् व्यञ्जनानि च सङ्गृह्य वर्णा इत्यपि व्यवहारः क्रियते। एवमेव सत्त्यपि स्वरत्वेन समानत्वे विजातीयस्स्वरमिश्रणरहितत्वेन विजातीयस्स्वरमिश्रणसहितत्वेन च विशेषेण काँश्चित् स्वरान् पृथक्कृत्य समानाक्षराणि सन्ध्यक्षराणि इति च वर्गौ विधीयेते; तथैव उक्ते विशेषे सत्त्यपि अक्षरात्मकवर्णत्वेन सामान्येन सर्वेषां स्वराणां सङ्ग्रहङ्कृत्वा स्वरा इत्येको वर्ग इत्यपि व्यवह्रियते। सत्त्यपि अनक्षरात्मकत्वेन समानत्वे पूर्वपराक्षराङ्गतायोग्यत्वेन पूर्वाक्षराङ्गतामात्रयोग्यत्वेन च विशेषेण पृथक्कृत्य योगवाहा अयोगवाहा इति द्वौ वर्गौ विधीयेते, उक्तेन सामान्येन योगवाहान् अयोगवाहांश्च सङ्गृह्य व्यञ्जनानि इत्येकवर्गतयाऽपि व्यवहारः क्रियते। तेनैव प्रकारेण पूर्वपरस्स्वराङ्गतायोग्यवर्णत्वेन समानत्वेऽपि स्पृष्टकरणत्वेन, करणान्तोच्चार्यत्वेन, सामान्यवायुशब्दरूपस्वरूपकत्वेन च विशेषेण काश्चिद् योगवाहान् पृथक्कृत्य स्पर्शा अन्तस्स्था ऊष्माण इति वर्गाः क्रियन्ते, उक्तेन सामान्येन स्पर्शान् अन्तस्स्था ऊष्मणश्च सङ्गृह्य योगवाहा इत्येकवर्गतयाऽपि व्यवहारः क्रियते। एवमेव स्पृष्टकरणकत्वे सामान्ये सत्त्यपि जिह्वव्यत्त्वतालव्यत्त्वादिना विशेषेण कवर्गचवर्गादिरूपेण विभागः, उक्तैर् विशेषैर् भेदे सत्त्यपि उक्तेन सामान्येन सङ्गृह्य स्सपर्शा इति वर्गश्च क्रियते इत्येवमादि बोद्ध्यम् ॥१०४॥

(ख) वर्णविभागपरदर्शनम्

स्वरा इति व्यञ्जनानि चेति वर्णा खलु द्वयोः।
वर्गयोर् हि विभज्यन्ते शिक्षाशास्त्रविचक्षणैः ॥१०५॥

स्वरव्यञ्जनलक्षणे अनुपदमेव वक्ष्येते ॥१०५॥

(ग) स्वरपरिभाषा

स्वतन्त्रा अपि ये वर्णास् सूच्चार्यास् ते स्स्वरा मताः।
राजन्ते वाऽक्षरात्मत्वात् स्वयं ये ते स्स्वरास् स्मृताः॥१०६॥

तथाहि पाणिनीयव्याकरणभाष्यकारः—"स्वयं राजन्त इति स्स्वराः"[1] इति। तत्र "न पुनरन्तरेणाचवँ व्यञ्जनस्योच्चारणमपि भवति, अन्त्यवर्थङ खल्वपि निर्वचनं स्वयं राजन्त इति स्स्वरा अन्त्यवग् भवतीति व्यञ्जनम्" इति उक्तमिति 'स्वतन्त्रा अपि सुष्ठु उच्चारयितुं शक्या

---

१. १।२।२९–३०।

(अक्षरात्मकाः) वर्णास् स्वराः' इति अपि अर्थादायाति। स्वाभाविकक्या संस्कृतभाषायाङ ङ-ञ-ण-न-मादीनामपि अक्षरात्मकत्वस्याऽभावादिदं स्वरलक्षणन् न तत्त्वाऽतिप्रसक्तम् भवति। यत् तु कैश् चिद् आधुनिकनव्यभाषाशास्त्रिगतानुगतिकतया "यस्य (वर्णस्य) उच्चारणे वायुर् मुखाद् अप्रतिहतगतिस् सन्नेव निर्गच्छति स स्वरः"[1] इति उक्तन् तत् तु ईषत्स्पृष्टयोः[2] कात्यायनोल्लिखितयोः[3] ऋकारलृकारयोरसङ्ग्राहकम् भवतीति न तत् स्वीकर्तुं शक्यम्। स्वराश् च अकारादय ओकारान्ता वर्णास् सावान्तरभेदा बोद्ध्याः। केषाञ् चिन् मतेऽनुस्स्वारविसर्गयोरपि[4] स्वरत्वम्। तत्र ऋग्वेदप्रातिशाख्ये- "अष्टौ समानाक्षराण्यादितः, ततश् चत्वारि सन्ध्यक्षराण्युत्तराणि, एते स्स्वराः, ··· अनुस्स्वारो व्यञ्जनवँ वा स्स्वरो वा"[5] इति; शुक्लयजुर्वेदप्रातिशाख्ये च- "तत्र स्स्वराः प्रथमम्, अ इति आ इति आ३इति; इ इति ई इति ई३इति; उ इति ऊ इति ऊ३इति; ऋ इति ॠ इति ॠ३ इति; ऌ इति ॡ इति ॡ३ इति, अथ सन्ध्यक्षराणि, ए इति ए३ इति, ऐ इति ऐ३ इति, ओ इति ओ३ इति, औ इति औ३ इति, इति स्स्वराः"[6] इति; "त्रयोविंशतिरुच्यन्ते स्स्वराः शब्दार्थचिन्तकैः"[7] इति च; तैत्तिरीयप्रातिशाख्ये च "अथ नवाऽऽदितस् समानाक्षराणि, द्वेद्द्वे सवर्णे ह्रस्स्वदीर्घे, न प्लुतपूर्वम्, षोडशाऽऽदितस् स्वराः"[8] इति; ऋक्तन्त्रे च- "अ इति आ इति इ इति ई इति उ इति ऊ इति ऋ इति ॠ इति ऌ इति ॡ इति समानानि; ए इति ऐ इति, ओ इति औ इति सन्ध्यक्षराणि ··· इति स्स्वराः"[9] इति; शैशिरीयशिक्षायाञ् च- "द्विविधवँ वर्णजातं हि स्वरो व्यञ्जनमेव च। अकारादिस् स्वरो ज्ञेयः कादि व्यञ्जनमुच्यते"[10] इति, शौनकशिक्षायामपि एवमेव[11]; पाणिनीयशिक्षायाञ् च-"स्वरा विंशतिरेकश् च"[12] इति; वर्णरत्नप्रदीपिकायां शिक्षायाञ् च- "एकविंशतिरुच्यन्ते स्स्वराश् शब्दार्थचिन्तकैः। द्विगुणानि व्यञ्जनानि ह्यतावान् वर्णसङ्ग्रहः। ऋपर्यन्तास् स्वरास् त्रेधा लृकारो ह्रस्स्व एव च। सन्ध्य-

---

१. पा. शि. शि. स. स, पृ. ५२। २. पा. व्या. भा. ८र. ६।१।१०१; पा. व्या. भा. १।१।९। ३. पा. व्या. भा. ६।१।१०१। ४. पाणिनीयव्याकरणे अक्षु अपि तयोर् ग्रहणात्। ५. १।१-३,५। ६. ८।२-६। ७. ८।३८। ८. १।२-५। ९. १।२। १०. श्लो. ८। ११. श्लो. ३। १२. श्लो. ४।

क्क्षराण्यह्रस्स्वानि ते चैवमेकविंशतिः"[1] इति; चारायणयशिक्क्षायाञ् च– "अकारादद्या औकारान्तास् स्वरा ज्ञेयाश् चतुर्दश"[2] इति; व्यासशिक्क्षायाञ् च– "अवर्णेवर्णकोवर्णा ऋवर्णौ लृत्त्वमेत्त्वमैत् । ओदौद् रङ्गौ क्रमादोम्म्योत् स्वरास् स्युर् (व्यञ्जनान्यथ)"[3] इति; पद्द्यात्मकापिशलिशिक्क्षायाम्[4] पारिशिक्क्षायाञ् च[5]– "ह्रस्स्वदीर्घप्लुतावर्णेवर्णोवर्णा ऋ ॠ ऌ च । एदैदोदौदिति ज्ञेयाष् षोडशेहाऽऽदितस् स्वराः" इति ॥१०६॥

(घ) व्यञ्जनपरिभाषा

वर्णास् तु खलु ये प्राग् वा पश्चाद् वाऽपि स्स्वरात् स्थिताः ।
अक्क्षरेषु स्स्वरस्स्यैवाङ्गान्येव व्व्यञ्जनानि ते ॥१०७॥

तथाहि पाणिनीयव्याकरणभाष्यकारोऽपि– "न पुनरन्तरेणाचवँ व्यञ्जनस्स्योच्चारणमपि भवति, अन्वर्थञ्च खल्त्वपि निर्वचनम्– स्वयं राजन्त इति स्स्वरा अन्वग् भवतीति व्व्यञ्जनम्"[6] इति । अन्वग् भवतीत्त्यस्स्य स्वपूर्ववर्तिनस् स्वपरवर्तिनो वा स्वरस्स्य अङ्गतयाऽनुगतम् भवतीत्त्येवाऽर्थ इति अस्मदुक्ता व्यञ्जन-परिभाषाऽपि भाष्यकारवचनादेवार्थादायाति । यद्द्यपि उक्तभाष्यवचनव्याक्ख्याने कय्यटेन व्यञ्जनस्स्य परेणैव स्स्वरेणोपरागो भवतीति उक्तन् नागोजिभट्टेनाऽपि तत् समर्थितन् तथापि तत् तयोरबोधस्स्यैव सूचकन् दृश्यते । एतद्विषयेऽनुपदमेव स्वरव्व्यञ्जनायोगवाहस्स्वभावविशेषेण सहाऽक्क्षरलक्क्षणस्स्य प्प्रतिपादनेऽत्त्तरैवाऽद्ध्याये विस्तरेण स्फुटतया च विहिते सर्वं स्पष्टम् भविष्यति । एतेन "यस् स्वयं राजते तन् तु स्स्वरमाह पतञ्जलिः । उपरिस्स्थायिना तेन व्यङ्ग्यवँ व्यञ्जनमुच्च्यते"[7] इति पारिशिक्क्षावचनस्स्थ[8] "उपरिस्स्थायिना तेन" इत्त्यंशोऽपि व्याक्ख्यातः । तत्त्र "समीपस्स्थायिना तेन" इति पाठेऽर्थस् सुसङ्गतस् स्यात् । उव्वटेन तु– "व्यञ्जयन्ति प्प्रकटान् कुर्वन्त्यर्थान् इति व्यञ्जनानि' इति'[9] ऋग्वेदप्प्रातिशाक्ख्यव्याक्ख्याने उक्तम् । कूप–यूप–सूपादिषु ककारादेस् तथात्त्वस्स्य दर्शनात् तेन तथोक्तं स्यात् । किन् तु तन् नाऽतिरमणीयन्[10] न च व्यञ्जनानावँ वस्तुगतस्स्य स्वभावस्स्य प्प्रतिपादकम्

---

१. श्लो. ११–१२ (शि. स., पृ. ११८) । २. पृ. ११ ।
३. सू. ५–६ । ४. श्लो. ७ । ५. सू. ६ । ६. १।२।२९–३० ।
७. आत्त्रेयशिक्क्षायामपीदवँ वचनमस्ति । ८. सू. १२ ।
९. १।६ । १०. पा. व्या. भा., ह य व र ट् इत्त्यत्त्र वा. १० ।

इत्त्युपेक्षणीयमेव । स्वरभिन्ना सर्वेऽपि वर्णा व्यञ्जनानि । एतद्-विषये च वचनानि ऋग्वेदप्रातिशाख्ये– "सर्वश् शेषो व्यञ्जनान्येव"[1] इति; शुक्लयजुर्वेदप्रातिशाख्ये च– "व्यञ्जनङ् कादि"[2] इति, "अथ व्व्यञ्जनानि, किति खिति गिति घिति ङिति कवर्ग्गः, चिति छिति जिति झिति ञिति चवर्ग्गः, टिति ठिति डिति ढिति णिति टवर्ग्गः, तिति थिति दिति धिति निति तवर्ग्गः, पिति फिति बिति भिति मिति पवर्ग्गः, इति स्प्पर्शाः, अथान्तस्त्थाः, यिति रिति लिति विति, अथोष्म्माणः, शिति षिति सिति हिति, अथायोगवाहाः, ×क इति जिह्व्वा-मूलीयः, ×प इत्त्युपद्ध्मानीयः, अं इत्त्यनुस्स्वारः, अः इति विसर्ज्-जनीयः, हुँ इति नासिक्क्यः, कुँ खुँ गुँ घुँ इति यमाः"[3] इति, "द्वि-चत्त्वारिंशद् व्यञ्जनानि"[4] इति च; तैत्तिरीयप्रातिशाख्ये च "षोडशा-ऽऽदितस् स्वराः, शेषो व्यञ्जनानि"[5] इति; ऋक्तन्त्रेऽपि– अथ व्यञ्ज-नानि, किति खिति गिति घिति ङिति कवर्ग्गः, चिति छिति जिति झिति ञिति चवर्ग्गः, टिति ठिति डिति ढिति णिति टवर्ग्गः, तिति थिति दिति धिति निति तवर्ग्गः, पिति फिति बिति भिति मिति पवर्ग्गः, इति स्स्प-र्शाः, अथान्तस्थाः, यिति रिति लिति वित्त्वन्तस्थाः, अथोष्माणो हिति शिति षिति सिति योगवाहाः, अथाऽयोगवाहाः, अः इति विसर्जनीयः, ×क इति जिह्व्वामूलीयः, ×प इत्त्युपद्ध्मानीयः, हुमित्त्यनुनासिकः, अथ यमाः कुं इति खुं इति गुं इति घुमिति यमाः, अनन्त्यान्त्यसयँ योगे मद्ध्ये यम× पूर्वगुणः, अथाऽनुस्स्वारौ, अं आं इत्त्यनुस्स्वारौ, ह्रस्-स्वाद् दीर्घो दीर्घाद् ह्रस्स्वः"[6] इति । उपलेखसूत्त्रेऽपि– "अकारादयो द्द्वादश सुस्वराः, शिष्टवँ व्यञ्जनम्"[7] इति । वर्णपटले च– "इति वर्णास् स्वरा× प्रोक्तास् तेषामाद्द्याश् चतुर्दश । समानाक्षर-राण्युच्च्यन्ते शेषस् सन्ध्यक्षराणि तु । अनवर्णस्स्वरो नामी कादि-कवँ व्यञ्जनं स्मृतम् । पञ्चविंशतिराद्द्यैषा स्परशा वर्गाश् च पञ्चकाः । चत्त्वारो यादयोऽन्तस्थाश् शादिरूष्माष्टको गणः । अयोग-वाहा वर्तन्ते तेषामाद्द्या× पृथग्विधाः । विसर्जनीयोऽनुस्स्वारो जिह्व्वा-मूलीय इत्त्यथ । उपद्ध्मानीय इत्त्येते चत्त्वारोऽत× परे यमाः । नासिक्क्याभिनिधानौ च विद्द्यते येन पूरणम् । पञ्चषष्टिरियान् वाचो राशिर् यो वेदलोकयोः"[8] इति । "त्रिचत्त्वारिंशद् व्यञ्जनानि"[9] इति च ।

---

१. १।६ । २. १।४७ । ३. ८।७–२४ । ४. ८।३८ ।
५. १।५–६। ६. १।२,३। ७. सू. १,२। ८. १।७–११। ९. ३।६।

भरतनाट्यशास्त्रेऽपि— "स्वराश् चतुर्दश, कादीनि व्यञ्जनानि (त्रयस्त्रिंशत्)"[1] इत्युक्त्वा स्वरा व्यञ्जनानि च सुस्फुटन् निर्दिष्टानि । शैशिरीयशिक्षायां[2] शौनकशिक्षायाञ् च[3]. "द्विविधवर्णजातं हि स्वरो व्यञ्जनमेव च । अकारादिस् स्वरो ज्ञेयः कादिव्यञ्जनमुच्यते" इति । वर्णरत्नप्रदीपिकायान् तु शुक्लयजुर्वेदसम्बद्धायामपि शुक्लयजुर्वेदप्रातिशाख्यस्य "त्रयोविंशतिरुच्यन्ते स्वराः शब्दार्थचिन्तकैः । द्विचत्वारिंशद्व्यञ्जनानि एतावान् वर्णसङ्ग्रहः"[4] इति श्लोकं संशोध्यैव "एकविंशतिरुच्यन्ते स्वराश् शब्दार्थचिन्तकैः । द्विगुणानि व्यञ्जनानि ह्येतावान् वर्णसङ्ग्रहः"[5] इति उक्त्वा स्वरान् निर्दिश्य "ककारादिमकारान्तास् स्पर्शास् स्युः पञ्चविंशतिः । चतस्रो यादयोऽन्तस्था ऊष्माणश् शषसास् सहाः । स्पर्शानाम् पञ्चमैर् योगे चत्वारश् च यमास् स्मृताः । अनुस्वारो विसर्गश् च जिह्वामूलीय एव च । उपध्मानीय इति च द्विस्स्पृष्टश् च तथाऽपरः"[6] इति व्यञ्जनानि निर्दिष्टानि । चारायणीयशिक्षायाञ् च— "अकाराद्द्या औकारान्तास् स्वरा ज्ञेयाश् चतुर्दश । शिष्टानि व्यञ्जनान्येव प्रोक्तान्यक्षरचिन्तकैः"[7] इत्युक्त्वा व्यञ्जनानि प्रदर्शितानि । व्यासशिक्षायाञ् च— "अवर्णेवर्णकोवर्णा ऋवर्णो लृत्वमेत्वमैत् । ओदौद् रङ्गौ करमादोम्म्योत् स्वरास् स्युर् व्यञ्जनान्यथ । कादिमान्तास् स्मृतास् सार्शा अन्तस्था यादिवोत्तराः । जिह्वामूल्यादिहान्ताश् च षडूष्माण उदीरिताः"[8] इति शास्त्रव्यवहार्यसञ्ज्ञानिर्देशप्रसङ्गे स्वरा व्यञ्जनानि च निर्दिष्टानि ।।१०७।।

(ङ) स्वरविभागप्रदर्शनम्

स्वरास् समानाक्षराणि तथा सन्ध्यक्षराणि च ।
विजातीयस्स्वराब्भ्यान् तान्न्ययुतानि युतानि च ।।१०८।।

स्वरास् समानाक्षराणि सन्ध्यक्षराणि चेति द्वयोर् वर्गयोर् विभज्यन्ते । यत्र स्वरे विजातीयस्स्वरयोर् मिश्रणन् न भवति अमिश्रितो मिश्रितो वाऽपि समान (एक) एव स्वरो भवति स समानाक्षरवर्गेऽन्तर्गतो भवति; यत्र तु विजातीययोस् स्वरयोर् मिश्रणम् भवति स सन्ध्यक्षरवर्गेऽन्तर्गतो भवति । यत् तु कैश् चित् समाना-

---

१. १४।८–२३ । २. श्लो. ८ । ३. श्लो. ३ । ४. ८।३८ । ५. श्लो. ११ (शि. स., पृ. ११८) । ६. श्लो. १३–१५ (शि. स., पृ. ११८) । ७. पृ. ११ । ८. सू. ५–८ ।

क्षराणि इति सरलास् स्वरा (simple vowels) उच्च्यन्ते इत्युक्तन्[1] तन् न मनोहरम्, तथा वचने संश्लिष्टस्स्वराणान् दीर्घावर्णादीनाम् ऋकारलृकारयोश् चाऽपि समानाक्षरत्वम् वक्तुन् न शक्येत; अस्मदीयव्याख्यानुसारन् तु एतेष्वपि स्वरेषु सजातीयस्स्वरमिश्रणे सत्यपि विजातीयस्वरमिश्रणस्याऽभावादेतेषां समानाक्षरत्वं सुवचम्। यद्यपि अवर्णभिन्नानां स्वराणां स्वपरस्थसकारकरणनामकतया नामित्वेन अवर्णस्य चाऽनामित्वेनाऽपि वर्गीकरणन् दृश्यते[2] तथापि तल्लक्षणस्य स्वरेषु स्वतोऽप्परस्स्फुटतया, वर्णान्तरे दृश्येन परभावेणैवाऽवगमनीयतया च तदत्राऽवधीरितम् बोद्धव्यम्। समानाक्षरसन्ध्यक्षरविषये च ऋग्वेदप्रातिशाख्ये– "अष्टौ समानाक्षराण्यादितः (अ आ ऋ ॠ इ ई उ ऊ), ततश् चत्वारि सन्ध्यक्षराण्युत्तराणि (ए ओ ऐ औ)"[3] इति; शुक्लयजुर्वेदप्रातिशाख्ये च "सिमादितोष्टौ स्स्वराणाम् (अ आ इ ई उ ऊ ऋ ॠ), सन्ध्यक्षरम् परम् (ए ऐ ओ औ)"[4] इति; तैत्तिरीयप्प्रातिशाख्ये च "अथ नवाऽऽदितस् समानाक्षराणि (अ आ आ३ इ ई ई३ उ ऊ ऊ३ ? अथवा अ आ इ ई उ ऊ ऋ ॠ लृ ?)"[5] इति, ऋक्तन्त्रे च "अ इति आ इति इ इति ई इति उ इति ऊ इति ऋ इति ॠ इति लृ इति लॄ इति समानानि; ए इति ऐ इति ओ इति औ इति सन्ध्यक्षराणि"[6] इति वचनानि प्राप्प्यन्ते। समानाक्षरशब्दो हि पाणिनीयव्याकरणस्य वार्तिककारेण भाष्यकारेण च प्रयुक्त उक्तेऽर्थे एव[7], सन्ध्यक्षरशब्दोऽपि व्यवहृतस् ताभ्याम्[8]। कातन्त्रे व्याकरणेऽपि "दश समानाः (अ आ इ ई उ ऊ ऋ ॠ लृ लॄ), एकारादीनि सन्ध्यक्षराणि"[9] इति, सिद्धहेमशब्दानुशासनेऽपि "लृदन्तास् समानाः, ए ऐ ओ औ सन्ध्यक्षरम्"[10] इति उपलब्ध्यते ॥१०८॥

(च) व्यञ्जनविभागप्प्रदर्शनम्

योगवाहास् तथाऽयोगवाहा इति क्रमाद् द्विधा।
वर्गयोः प्रविभज्यन्ते व्यञ्जनानि तु शिक्षकैः ॥१०९॥

---

१. तै. प्रा. व्या., ह्विट्निः १।२, PIAI p. 63, CSSP p. 132. २. ऋ. प्रा. १।६५, शु. य. प्रा. १।४६, ऋ. त. ३।७।१० (१३०) शौ. च. २।८१। ३. १।१,२। ४. १।४४–४५। ५. १।२। ६. १।२। ७. ए ओङ ऐ औच् इत्यत्तर वा. ६। ८. तत्तरैव वा. १, ६, १०; १।१।३ वा. १ इ.। ९. १।१।३, ८। १०. १।१।७, ८।

योगवाहायोगवाहपरिभाषे अनुपदमेव स्फुटे करिष्येते । यद्द्यपि अयोगवाहभिन्नानावँ व्यञ्जनानायँ योगवाहशब्देन व्यवहारोऽप्रसिद्धस् तथापि ऋक्तन्त्रे कादिसान्तानावँ व्यञ्जनानायँ योगवाहत्वेन निर्देशऽ प्राप्यते[1] । पाणिनीयव्याकरणभाष्यकारप्रदर्शितया "कथम् पुनरयोगवाहाः ? यदयुक्ता वहन्ति अनुपदिष्टाश् च श्रूयन्ते"[2] इत्यनया व्युत्पत्त्याऽपि ये तूपदिष्टाश् श्रूयन्ते तेषायँ योगवाहत्वन् ध्वनितमेव ॥१०९॥

(छ) योगवाहपरिभाषा

व्यञ्जनानि तु यानि स्युरपि स्वपरवर्तिनः ।
स्वरस्याङ्गानि तान्येव योगवाहा इति स्मृताः ॥११०॥

व्यञ्जनेषु मध्ये यानि व्यञ्जनानि स्वपूर्ववर्तिनस् स्वरस्याऽङ्गताऽ गच्छन्त्यपि स्वपरवर्तिनस् स्वरस्याऽपि अङ्गानि भवितुं शक्नुवन्ति तानि व्यञ्जनानि योगवाहा इत्युच्यन्ते । योगेन स्वेन सह युक्तेन स्वरेण सह सर्वथा तत्परवशतया ततऽ पूर्वम् पश्चाद् वा वहन्ति गच्छन्तीति योगवाहाः । योगवाहिन इत्यर्थः । आयुर्वेदेऽपि परानुगामिनि योगवाहिशब्दऽ प्रयुज्यते । तथा हि– "गृह्णाति योगवाहि द्रव्यं संसर्गिवस्तुगुणान्"[3] इति । योगवाहाश् चाऽस्मत्प्रोक्तवर्णसमाम्नायस्थाऽ कादयो हान्ता वर्णा बोद्ध्याः । ऋक्तन्त्रे हि "अथ व्यञ्जनानि । किति खिति गिति घिति ङिति कवर्गः, चिति छिति जिति झिति ञिति चवर्गः, टिति ठिति डिति ढिति णिति टवर्गः, तिति थिति दिति धिति निति तवर्गः, पिति फिति बिति भिति मिति पवर्गः, इति स्पर्शाः । अथान्तस्थाः । यिति रिति लिति वित्त्यन्तस्थाः । अथोष्माणो हिति शिति षिति सिति योगवाहाः । अथाऽयोगवाहाः ।"[4] इति योगवाहा अयोगवाहेभ्यऽ पृथक्कृत्य निर्दिष्टाः ॥११०॥

(ज) अयोगवाहपरिभाषा

स्वपूर्ववर्तिनो यानि स्वरस्याङ्गानि सर्वदा ।
व्यञ्जनानि तु तान्येवाऽयोगवाहाऽ प्रकीर्तिताः ॥१११॥

व्यञ्जनेषु मध्ये यानि व्यञ्जनानि सदैव स्वपूर्ववर्तिन एव स्वर-

---

१. १।२ । २. हयवरट् इत्यत्तर षष्ठवार्तिकस्याऽवतरणिकायाम् । ३. भावप्रकाशे १।५।२४६ । ४. १।२।

स्स्याऽङ्गानि भवन्ति स्वपरवर्तिनस् स्वरस्स्याङ्गानि भवितुङ्ग कर्हयपि न शक्नुवन्ति तानि व्यञ्जनानि अयोगवाहा उच्च्यन्ते । यत् तु "वास-शेशब्दादनुस्स्वार× पूर्वस्स्याङ्गन् न काठके"[1] इत्यादि तत् तत्स्थान-मात्तराऽसाधारणमिति अवधीरितम् । तत्तर अयोगवाहेषु प्रधानयोर् विसर्गानुस्स्वारयोर् वर्णसमाम्नायेषु आदितोऽकारयोगेन उपदिश्यमान-त्वात् तयोः 'अयोगेन वहतस् स्वरूपन् निर्वहतः' इति अयोगवाहौ इति व्यवहारः, स्वपूर्ववर्तिस्स्वरमात्तराङ्गत्वरूपेण तत्सादृश्येन चाऽन्न्येषा-मपि अयोगवाहशब्देन व्यवहारः । यद्द्यपि अन्न्येषामपि व्यञ्जनानाम् परवर्त्यकारयोगेनोपदेश× कृतो दृश्यते[3] तथापि तत्तर व्यञ्जनाच्छन्न-त्वमकारस्स्य । क्वचित् तु तेषाङ्ग किति खितीत्यादिरूपेणाऽकारवँ विनैवोपदेशः[3] । अथवा यथा योगवाहास् सर्वथा योगपरवशतया योगस्स्य स्वरस्स्य पूर्वतः परतो वा सलँ लग्नास् सन्तो वहन्ति न तथा इमेऽनु-स्स्वारादयः, किन् तु सदमिद् योगस्स्य परत एव सलँ लग्ना वहन्तीति योगवाहभिन्नत्वादेवेमे अयोगवाहा इत्युच्च्यन्ते । पाणिनीयव्याकरण-भाष्यकारेण तु पाणिनीयव्याकरणमात्तरविचारेण अयोगवाहशब्दस्स्य "कथम् पुनरयोगवाहाः ? यदयुक्ता वहन्ति अनुपदिष्टाश् च शश्रूयन्ते'[3] इति व्युत्पत्तिर् दर्शिता । अस्माभिस् तु शुक्लयजुर्वेदप्रातिशाक्ख्यादि-वर्णसमाम्नायेषु विसर्जनीयजिह्वामूलीयोपद्ध्मानीयानुस्स्वारादीनामपि उपदिष्टत्वात् तावँ व्युत्पत्तिन् त्यक्त्वाऽन्न्याऽन्न्वर्था अयोगवाहत्वेन प्रसिद्धानावँ वर्णाना स्वभावविशेषस्स्य सूचनी व्युत्पत्ति× प्रदर्शिता । "अकारादिना वर्णसमाम्नायेन सहितास् सन्त एते वहन्त्यात्मलाभम् प्राप्नुवन्तीत्ययोगवाहाः"[5] इत्येषा उव्वटप्रदर्शिता व्युत्पत्तिरपि वस्तुतोऽस्माभिरवधीरितैव पक्षान्तरप्रदर्शनेन । अयोगवाहशब्दश् च शुक्लयजुर्वेदप्रातिशाक्ख्ये[6] ऋक्तन्त्रे[7] पाणिनीयव्याकरणवार्तिकभाष्य-योश्[8] च प्रयुक्तो दृश्यते । यद्द्यपि शुक्लयजुर्वेदप्रातिशाक्ख्ये ऋक्-तन्त्रे पाणिनीयव्याकरणभाष्ये च विसर्जनीयजिह्वामूलीयोपद्ध्मानीया-नुस्स्वार-(नासिक्य-)यमा एवाऽयोगवाहत्वेनोक्तास् तथापि यथा यमा

---

१. स. स. शि. श्लो. ३७ । २. ऋ. प्रा. व. २।५-११ । ३. शु. य. प्रा. ८।८-१७, ऋक्तन्त्रे ११२ । ४. पा. व्या. भा., हयवरट् इत्यत्तर षष्ठवार्तिकस्स्याऽवतरणिकायाम् । ५. शु य. प्रा. भा. ८।१८ । ६. ८।१८ । ७. १।२ । ८. हयवरट् इत्यस्स्य विचारणे ।

अयोगवाहास् तथैव अभिनिहिताश् च सद्ध्रुवा इति तेऽपि अस्माभिर् अयोगवाहमद्ध्ये निवेशिताः । एवञ् चाऽस्मदुक्ते वर्णसमाम्नाये विसर्जनीयादयो नासिक्यान्ता अयोगवाहा बोद्ध्याः ।।१११।।

(झ) योगवाहविभागाः

स्पर्शा अनुतस्स्था ऊष्माणो योगवाहास् त्रिधा मताः ।
स्पर्शानाङ्ग कादयो वर्गाः पञ्च स्स्युः पञ्चकैः क्रमात् ।।११२।।

।।। योगवाहास् स्पर्शा अनुतस्स्था ऊष्माण इति त्रिषु वर्गेषु विभज्यन्ते । स्पर्शाश् च पुनर् जिह्वामूलीय-तालव्य-मूर्धन्य-दन्त्यौष्ठ्येषु कवर्ग-चवर्ग-टवर्ग-तवर्ग-पवर्गेषु इति मुख्या वर्णविभागाः ।।११२।।

(ञ) स्पर्शानुतस्स्थोष्मपरिभाषाः

स्युस् स्पृष्टकरणास् स्पर्शाः करणानुतैस् तु व्यञ्जिताः ।
अनुतस्स्थास् स्युरथोष्माणो वायुशब्दप्प्रधानकाः ।।११३।।

येषामुच्चारणे जिह्वामूलमद्ध्योपाग्राऽग्रादिकङ्ग करणं स्थाने तत्तद्वर्णसम्बद्धे सम्यग् लग्नम् भवति ते स्स्पर्शाः कादयो मानुताः; यास् तु करणप्प्रान्तभागेन तत्तद्वर्णस्स्थाने ईषत्स्पर्शङ्ग कृत्वा निष्पाद्द्यन्ते ता अनुतस्स्था यर्यरललवाः, समानुन्यवायुशब्दरूपस्स्वरूपकाश् च ऊष्माणश् शषसहाः । यद्द्यपि योगवाहाश् शषसहा यथोष्माणस् तथैव विसर्जनीयजिह्वामूलीयोपद्ध्मानीया अपि ऊष्माणः, ऋग्वेदप्रातिशाख्यमते तु अनुस्स्वारोऽप्प्यूष्मा तथाप्प्ययोगवाहा एते योगवाहभेदरूपेषु ऊष्मसु नोदाहरणीया इति शषसहा एवाऽत्तरोष्मत्वेनोदाहृता बोद्ध्याः । यत् तु कैश् चित् स्पर्शोष्ममद्ध्यस्स्थितत्त्वमनुतस्स्थत्वमुक्तम्[1], तन् नाऽतिरमणीयम्; यथा अनुन्येषाव् वर्णानान् तत्तदुच्चारणवैशिष्ट्यसूचकन् नाम स्पर्शा इति ऊष्माण इत्यादि च, तथैव एतासामपि एतदुच्चारणवैशिष्ट्यसूचकत्वेनैव नाम व्यवहृत स्यादिति । उक्तञ् च वैदिकाभरणकारेण– "निर्वचनन् तु जिह्वामद्ध्यप्प्रभृतीनाङ्ग करणानामनुतैर् जनुत्यत्वाद् यरलवा अनुतस्था इत्याख्यायन्ते"[2] इति । कातन्त्रटीकास्स्वपि 'स्वस्स्यस्वस्स्य स्स्थानस्स्यानुते तिष्ठन्तीति अनुतस्स्थाः' इत्युक्तमिति अनुतस्स्थशब्दे संस्कृतव्याकरणकोशे उक्तम् ।

१. तै. प्रा. व्या. (हिवट्निकृतायाम्) १।८, PIAI p. 29, CSSP. p. 72, ऋ. प्रा. व्या. १।९, प्र. सि. कौ. पूर्वार्द्धे पृ. ७ ।
२. तै. प्रा. वै. १।८, २।४३ ।

यद्द्यपि अयोगवाहानामपि ऊष्मत्वेनाऽनुष्मत्वेन च विभागः प्रतिपादयितुं शक्यस् तथापि स न व्यवहारे प्रसिद्ध इत्यस्माभिरवधीरितः ॥११३॥

८. अथाऽक्षरलक्षणाऽक्षरविभजनाधिकारः

(क) अक्षरलक्षणम्

वर्णो वर्णसमूहो वैकयैकीभूतयाऽपि वा ।
मानस्स्या चेष्टयोच्चार्यस् सम्यक् पिण्डीकृतोऽक्षरम् ॥११४॥

एकेन एकीभूतेन वा इच्छायोनिना भूतात्मगुणेन प्रयत्नेन सम्यग् उच्चार्यो वर्णो वर्णसमूहो वा अक्षरमुच्यते इत्यर्थः । अक्षरम्-इत्यत्र हि 'अक्' इति 'क्ष' इति 'रम्' इति च प्रयत्नसमूहविशेषविराम-प्रयत्नान्तरसमूहविशेषोपादानक्रमेणोच्चार्या एकैकपिण्डीकृतवर्णसमूहा अक्षराणि । एतच् चाऽऽक्षरलक्षणम् "अथ हाऽस्य पुत्र आह मद्ध्यमः प्रातीबोधीपुत्रोऽक्षरे खल्विमे अविकर्षन्ननेकीकुर्वन् यथावर्णमाह तद् याऽसौ मात्रा पूर्वोत्तररूपे अन्तरेण सन्धिविज्ञपनी साम तद् भवति सामैवाऽहं संहिताम् मन्ये"[1] इत्यनूतैः ऐतरेयारण्यके श्रूयमाणैस् संहितालक्षणैर् ध्वनितम् ॥११४॥

(ख) अक्षरे स्वरव्यञ्जनयोस् स्थितौ विशेषः

स्याद् व्यञ्जनयुतो वाऽपि शुद्धो वाऽपि स्स्वरोऽक्षरम् ।
व्यञ्जनन् तु स्स्वरस्स्यैवाऽङ्गम् पूर्वस्स्य परस्स्य वा ॥११५॥

तथा हि ऋग्वेदप्रातिशाख्ये "सव्यञ्जनस् सानुस्स्वारश् शुद्धो वाऽपि स्स्वरोऽक्षरम्"[2] इति, "उभये (ह्रस्स्वा दीर्घाश् च स्वरास्) त्वक्षराणि"[3] इति च । शुक्लयजुर्वेदप्रातिशाख्ये च "स्वरोऽक्षरम्, सहाद्द्यैर् व्यञ्जनैः, उत्तरैश्च् चावसितैः"[4] इति । व्यञ्जनानि तु अनक्षरात्मकत्वादक्षरात्मकस्य स्वरस्स्यैव स्वपूर्ववर्तिनस् स्वपरवर्तिनो वाऽङ्गानि भवन्ति । तदुक्तम् ऋग्वेदप्रातिशाख्ये— "अनुस्स्वारो व्यञ्जनञ् चाऽक्षराङ्गम्"[5] इति, शुक्लयजुर्वेदप्रातिशाख्येऽपि— "स्वरोऽक्षरम्, सहाद्द्यैर् व्यञ्जनैः, उत्तरैश्च्चावसितैः"[6] इति, तैत्तिरीयप्रातिशाख्येऽपि— "व्यञ्जनं स्वराङ्गम्"[7] इति । एवञ् च येन स्स्वरेण सह एकपिण्डताम् प्रापय्य यानि व्यञ्जनानि

---

१. ३।१।५ । २. १८।३२ । ३. १।१९ । ४. १।९९-१०१ ।
५. १।२२ । ६. १।९९-१०१ । ७. २१।१ ।

उच्चार्यन्ते तानि व्यञ्जनानि तस्यैव स्वरस्य अङ्गानि भवन्तीति बोद्धव्यम्। कीदृश्यां स्थितौ स्थितवँ व्यञ्जनं स्वपूर्वस्य स्वपरस्य वा कतरस्य स्वरस्याऽङ्गम् भवतीति तु अनुपदमेव प्रतिपादयिष्यते॥११५॥

(ग) व्यञ्जनपूर्वाङ्गतापराङ्गतानिरूपणम्

वाक्यादिस्थवँ व्यञ्जनञ् चाऽसयँयुक्तञ् च पदादिगम्।
परस्याङ्गं सदैवाऽवसानस्थम् प्राक्स्वरस्य हि ॥११६॥
स्वरमद्ध्यस्थेषु सयँयोगाद्द्वयम् प्रायेण पूर्वगम्।
परमजादुत्तरं स्पर्शे परे पूर्वस्स्वराङ्गकम् ॥११७॥
यमाश् चाभिनिधानाश् च करमाद्द्वयश् चापि पूर्वगाः।
शिष्टा व्यञ्जनवर्णास् तु प्रायेण परगा मताः ॥११८॥

एतद्विषये च ऋग्वेदप्रातिशाख्ये "अनुस्स्वारो व्यञ्जनञ् चाक्षराङ्गम्, स्वरानन्तरे व्यञ्जनान्न्युत्तरस्य, पूर्वस्याऽनुस्स्वारविसर्जनीयौ, सयँयोगादिर् वा, च परक्करमे द्द्वे (सयँयोगादेऽ परस्य व्यञ्जनस्य करमणे सयँयोगादिस्थन् तत्परञ् चेति द्वे व्यञ्जने पूर्वस्य वा परस्य वाऽङ्गे भवतः)[1] इति, शुक्लयजुर्वेदप्रातिशाख्ये च— "स्वरोक्षरम्, सहाद्द्वयैर्व्यञ्जनैः, उत्तरैश्चावसितैः, सयँयोगादिः पूर्वस्य, यमश्च च, करमजञ् च, तस्मम्माच् चोत्तरं स्पर्शे, अवसितञ् च"[2] इति। तैत्तिरीयप्रातिशाख्येऽपि— "व्यञ्जनं स्वराङ्गम्, तत् परस्स्वरम्, अवसितम् पूर्वस्य, सयँयोगादि, परेण चाऽसंहितम्, अनुस्स्वारस्स्वरभक्तिश् च, नान्तस्थापरमसवर्णम्, नासिक्याः, स्पर्शश् चोष्मपर ऊष्मा चेत् परस्य"[3] इति; ऋक्तन्त्रेऽपि— "व्यञ्जनम् पूर्वस्यानन्तस्वरम्, अभिनिधानः, व्यञ्जने, अनुस्स्वारौ च, रलावव्यपरौ, स्पर्शस् स्वे, (प)रादि (स्व)रमन्न्यत्"[4] इति; शौनकीयचतुरद्ध्यायिकायाञ् च— "परस्य स्वरस्य व्यञ्जनानि, सयँयोगादि पूर्वस्य, पद्द्वयञ् च, रेफहकारक्करमजञ् च"[5] इति, शिक्षासु च वर्णरत्नप्रदीपिकायां शिक्षायाम्— "अथातोऽवरतो वक्ष्मि चर्चाम् पूर्वपराङ्गयोः। स्वारप्रयोजना चासौ वेदितव्या विचक्षणैः॥ सयँयोगस्स्यादिभूतो यस् स पूर्वाङ्गम् भवेद् यथा। अश्श्वश् शशवसयँयोगे शऽ पूर्वाङ्गश् शवोऽन्न्यतः॥ यमश् च पूर्वस्स्याङ्गं स्याच् चकारात् पूर्वसयँयुतः। रुक्कँमः पूर्वस्य कयमावुत्तरस्य तु मस् स्मृतः॥

---

१. १।२२–२६। २. १।९९–१०६। ३. २१।१–९।
४. २।२।१०–२।३।६। ५. १।५५–५८।

सयँ योगादिपरद्द्वित्त्वे पूर्वाङ्गङ्क्रमजयँ यथा। पार्श्वं रशौ तु पूर्वस्स्य परस्स्य शवयात्मकम् ॥ क्रमजाच् चोत्तरं स्पर्शे परे पूर्वाङ्गकयँ यथा। पार्ष्ष्ण्या पूर्वस्स्य रषयाः परस्स्याङ्गण् णयात्मकम् ॥ यद् व्यञ्जनञ् च यस्स्याङ्गन् तत् तेन सस्स्वरम् भवेत्। एतदर्थमिदम् प्रोक्तं स्वारसन्देहभेदकम् ॥ अनुस्स्वारो विसर्गश् च नासिक्क्योऽथ यमास् तथा। जिह्वामूलमु-(ल्ल्य उ-?) पद्ध्मा च नवैते स्स्युऽ पराश्रयाः ॥ सयँ योगवाहा एवैते निजस्स्वरविवर्जिताः। पूर्वस्स्याङ्गम् भवन्त्येते स्वर एतेषु पूर्ववत् ॥ स्वरभक्तिश् च पूर्वाङ्गन् देवम् बर्हिरुदाहृतिः। इकारे च तथोकारे तायँ यत्नेन विवर्जयेत् ॥ रेफो वाऽथ लकारो वा यत्तरोष्मणि स्वरोदये। स्वरभक्तिर् भवेत् तत्तर पूर्वमाक्क्रम्य पट्ठ्यते ॥"[1] इति, व्यासशिक्क्षायाम् च— "स्वराणाम् पूर्वतश् चैव ह्युदात्तादिस्स्वरास् स्मृताः। व्यञ्जनानान् तदापत्यर्थमङ्गताद्द्च विधीयते ॥ परस्स्य व्यञ्जनञ् चाङ्गम् पूर्वस्स्याचोऽवसानगम्। **ऋकारे परभूते च रेफऽ पूर्वाङ्गतामियात्**। अनुस्स्वारो बिसर्गश् च स्वरभक्तिरसयँ युतः। योगादि च परायुक्तम् पूर्वस्स्याङ्गन् तथा स्मृतम्। न पूर्वाङ्गम् भवेत्स्पर्श ऊष्मणो विकृतिर् यदि। पराङ्गम् प्रचयाद् भक्तिऽ प्रचये त्वपरे च रः। अन्तस्थोदयमङ्गं स्यादसवर्णम् परस्स्य च। ऊष्मण्यूर्ध्वे पराङ्गे तु स्पर्शश् चैव यमास् त्विति"[2] इति, सर्वसम्मतशिक्क्षायाम् च—"इदानीं हस्तविन्न्यासभेदोच्चारणसिद्धये। अनुक्तानामुदात्तादिवर्णानां सिद्धयेऽपि च ॥ व्यञ्जनं स्यात् परस्स्याङ्गम् पूर्वस्स्यावसितम् भवेत्। परायुक्तमनुस्स्वारो योगादिर् भक्तिरेव च। असवर्णम् परस्स्याङ्गमन्तस्थापरमक्क्षरम्। पराङ्गोष्मपरस्स्पर्शो यमश् चैवाऽङ्गनिर्णयः।"[3] इति, "वासशब्दादनुस्स्वारऽ पूर्वस्स्याङ्गन् न काठके। न ह्यूष्मपरकृतिस् स्पर्शऽ पूर्वाङ्गतत्वमवाप्नुयात्"[4] इति च, आरण्यशिक्क्षायाम् च— "वासशब्दादनुस्स्वारऽ काठके नीच इष्यते"[5] इति 'वासाँसि' इत्यत्तराऽनुस्स्वारस्स्य पराङ्गतया पूर्वस्स्वरस्वरानुगताया अभावस्स्य प्रतिपादकवँ वचनम्; आत्तरेयशिक्क्षायाम् च— "अनुस्स्वारो भवेदङ्गम् पूर्वस्स्यैव हि सर्वदा। वासशब्दादनुस्स्वारऽ पूर्वस्स्याङ्गन् न काठके"[6] इति; पारिशिक्क्षायाम् च— "यद् व्यञ्जनन् तद् भजते

---

१. श्लो. ४४–५२ (शि.स., पृ. १२१)। २. सू. ३७१–३८०।
३. श्लो. २१–२४। ४. श्लो. ३७। ५. श्लो. ४९।
६. श्लो. २०।

स्वराङ्गन् तदङ्गभूतन् तु परस्स्वराङ्गम् । पूर्वस्स्वराङ्गन् त्ववसानवर्ति भवेत् परायुक्तमसयँयुतो नः । योगाद्द्व्यनुस्स्वारविसर्गभक्तयो रेफस् त्वृकारे परतस् तथा स्यात् । अच्पूर्वकवँ व्यञ्जनमेति हल्परं स्पर्शो द्विवर्ण (त्त्वम्) । यत्तराऽसवर्णन् तु परस्स्य रस्स्यान्तस्थोदयवँ व्यञ्जनमङ्गमेव । पूर्वस्स्वराङ्गन् न भवेद् य ऊष्मणस् स्पर्शो यदि स्स्याद् विकृतिस् तथापि । भक्तिऽ पराङ्गम् प्रचयात् परा स्यात् तथा धृते सत्त्यृपरे च रेफः । परे सति ह्य्यूष्मणि वै पराङ्गे स्पर्शो यमाश् चैव परस्स्वराङ्गम्''[1] इति; नारदीयशिक्षायाञ् च— ''सयँयोगे यत्तर दृश्यते व्यञ्जनवँ विरते पदे । पूर्वाङ्गन् तद् विजानीयाद् येनाऽऽरम्भस् तत् पराङ्गम् ।··· अनुस्स्वारऽ पदान्तश् च क्रमजऽ प्रत्त्यये स्वके । स्वरभक्तिस् तथा रेफस् सर्वम् पूर्वाङ्गमुच्यते''[2] इति; लोमशीयायां शिक्षायाञ् च— ''यवौ तु रेफसयँयुक्तौ रेफ आद्द्यो भवेद् यदि । पूर्वाङ्गन् तद् विजानीयात् सूर्यपूर्वे निदर्शनम् ।। यवौ तु रेफसयँ-युक्तौ विरते च भवेद् यदि । पराङ्गन् तद् विजानीयात् तरो-(तर्वोः?-) हर्येति लक्षणम्''[3] इति वचनानि प्राप्प्यन्ते ।

व्यञ्जनानाम् पूर्वस्वराङ्गतायाऽ परस्वराङ्गतायाश् च प्प्रतिपादकेषु उपर्य्युद्धृतेषु वचनेषु परस्परवँ विरोधोऽपि दृश्यते; यथा ऋग्वेदप्रातिशाख्यवचने सयँयोगादेस् स्वरमद्ध्यस्स्थस्य पराङ्गत्त्वमप्प्युक्तम्, किन्त्वन्न्यत्तर तस्य पूर्वाङ्गत्त्वमेव प्प्रतिपादितम्; शुक्लयजुर्वेदप्रातिशाख्यवचने यमानाम् पूर्वाङ्गत्त्वम् प्रतिपादितम्, तैत्तिरीयप्रातिशाख्यवचने तु पराङ्गत्त्वमुक्तमिति । एतस्य विरोधस्य च तत्तच्छाखाविषयतया, यमविषये तु दृष्टिभेदमूलकतयाऽपि परिहारो भवति । लौकिकसँस्कृतभाषायान् तु प्रायस् सर्वत्तर सयँयोगादेऽ पूर्वाङ्गता स्वीक्रियते, अत एव वृत्तेषु[4] गद्द्ये[5] च सयँयोगात् पूर्वस्य गुरुता भवति, उक्तञ् च— ''गुर्वक्षरे द्विमात्त्रत्त्वं सर्वशास्त्रेषु सुस्स्फुटम् । ह्रस्स्वे गुरौ तत्सम्पत्तिऽ परव्यञ्जनकालतः''[6] इति । कुत्तर चित् तु सयँयोगादेरपि पराङ्गतया सयँयोगादिस्थेन व्यञ्जनेन पूर्वस्स्वरस्य गुरुताया अकरणात् सयँयोगे परेऽपि पूर्वाक्षरस्य गुरुता न भवति; उक्तञ् च ''प्रह्रे वा''[7] इति, ''अथ

---

१. सू. ६०-६७ । २. २।२।१२-१५ (शि. स., पृ. ४२९-४३०)।
३. ८।१-२ (शि. स., पृ. ४६१) । ४. पि. छ. सू. १।११ ।
५. अष्टा. १।४।११ । ६. तै. प्रा. वै. २२।१५ ।
७. छन्दोमञ्जरीप्प्रभायाम्, पृ. ७ ।

विभाषितगश् चरणान्तिमो हरप्परो ग्रपरोऽपिच के चन''[1] इति च। प्रयुज्यते च — ''सा मङ्गलस्नानविशुद्धगात्री गृहीतप्रत्युद्गमनीयवस्त्रा''[2] इति, ''प्राप्तनाभिह्रदमज्जनमाशु''[3] इति, ''भ्रमति भ्रमरमाला काननेषू-न्मदाऽसौ''[4] इति च।

इदमप्यत्र विवेक्तव्यम्। तत्र ऋग्वेदप्रातिशाख्यस्य व्याख्याने ''च परक्क्रमे द्द्वे''[5] इति सूत्रे उव्वटेन ''पार्ष्ण्या वा इति रेफस् षकारौ द्वौ णकारो यकारश् च सयँयोगः। तत्र रेफस् स्वरभक्त्या सहितX पूर्वस्वरस्याङ्गम् तस्य चोदात्तत्वादुदात्त-वच् छ्रूयते। षकारौ पूर्वस्य वा स्वरस्याङ्गमुत्तरस्य वा। सयँ-योगादिर् णकारो यकारश् चोत्तरस्य स्वरस्याङ्गम्, तस्य स्वरितत्वात् स्वरितवच् छ्रूयते'' इति वदता रेफात् परयोर् द्वयोरेव षकारयोस् सहैव पूर्वाङ्गता पक्क्षान्तरे सहैव पराङ्गताऽपि स्वीकृता, किन् तु साऽ-नुपपन्ना तथोच्चारणस्याऽसम्भवात्; कथञ् चित् तथोच्चारणस्य प्रयत्ने कृतेऽपि एक एव दीर्घीभूतष् षकार उच्चारितस् स्यान् न तु द्द्वौ षकारौ इति। अस्माकम् मते तु 'परक्क्रमे च द्द्वे' इति रेफाद् हकारादन्यतो वा वर्णात् परस्य व्यञ्जनस्य द्वित्त्वे जाते सति रेफो हकारोऽन्यो वा वर्ण इत्त्येकवँ व्यञ्जनन् तदुत्तरवर्ति व्यञ्जनन् द्वितीयमिति द्वे व्यञ्जने पूर्वस्याङ्गे भवत इति व्याख्यानात् पार्ष्-ष्ण्या इत्त्यत्तर सयँयुक्तेषु व्यञ्जनेषु मद्ध्ये रेफषकारौ पूर्वस्य स्वरस्य षकारणकारयकाराX परस्याङ्गानि इति व्यवस्था भवति; तथा चोच्चारणं स्वाभाविकन् दृश्यते; एवं स्वीकृते एव च षकारस्य द्वित्त्वमपि उपपन्नतरम् भवति। शुक्लयजुर्वेदप्रातिशाख्यस्य ''तस्-म्माच्चोत्तरं स्पर्शे''[6] इति सूत्रस्य व्याख्याने च उव्वटेन ''तस्-मात् क्रमजाद् यदुत्तरवँ व्यञ्जनन् तत् पूर्वाङ्गम् भवति स्पर्शे परभूते यथा पार्ष्ण्-ण्या (इति), रेफषकारौ द्वौ णकारौ यकारश् च सयँयोगः, तत्र रेफस् सयँयोगादिरिति कृत्वा, षकारX क्रमजमिति कृत्वा, तस्म्माच् चोत्तरं स्पर्शे इति कृत्वा पूर्वणकारश् च (इति) एते पूर्वाङ्गम् द्वितीयणकारो यकारश् चोत्तरस्य स्वरस्याऽङ्गम्'' इत्त्युक्तम्; अनन्तेनाऽपि उव्वटोक्तमेवाऽनूक्तम्; किन् तु एतत्सूत्रार्थ-

---

१. छ. शा. (काव्यमाला ९१) टि., पृ. ४। २. कु. सं. ७।४।
३. शि. व. १०।६०। ४. काव्यालङ्कारे भामहकृते ४।२७।
५. १।२६। ६. १।१०५।

सङ्ग्रहावसरे अमरेशेन तु "क्रमजाच्च चोत्तरं स्पर्शे परे पूर्वाङ्गकयँ यथा। पार्ष्ण्या पूर्वस्य रषा परस्याङ्गण् णयात्मकम्"[1] इत्युक्तम्; बालकृष्णगोडशया च — "तस्मम्माच् चोत्तरं स्पर्शे, क्रमजादुत्तरवँ व्यञ्जनं स्पर्शे परे पूर्वाङ्गम् भवति, पार्ष्ण्या वा, रेफो द्वौ षकारौ पूर्वस्य णकारयकारौ परस्य; वर्ष्मन्, रेफो द्वौ षकारौ पूर्वाङ्गम् मकारX पराङ्गम्"[2] इत्युक्तम्। तदनुसारमेव च गङ्गेशश्वरानन्देन तत्सहायकैश् चाऽपि 'भगवान् वेदः' इत्याख्ये वेदसङ्ग्रहे पार्ष्ण्या[3] इत्येव पाठX परिगृहीतो दृश्यते। अमरनाथशास्त्रिणा तु याज्ञवल्क्यशिक्षाव्याख्यायाम् "तस्मम्माच् चोत्तरं स्पर्शे इति, यथा पार्ष्ण्या इत्यत्र रेफषकारौ, द्वौ णकारौ, यकारश् च सयँयोगः, तत्र रेफस् सयँयोगादिः, षकारX क्रमजः, ऊष्मम्मान्तस्त्थेत्यादिना[4] द्विर् भूतX पूर्वो णकारX क्रमजोत्तरश् च पूर्वस्याऽऽकारस्याङ्गम्, द्वितीयणकारो यकारश् च परिशेषात् परस्याऽङ्गम्। शुक्लयजुर्वेदप्रातिशाख्यसूत्रे "क्रमाज् जातङ क्रमजम्, यत् सयँयोगादेX परस्य वर्णस्य द्विरुक्त्या जायते तत् क्रमजम् इत्युच्यते"[5] इत्युव्वटाचार्यव्याख्याते क्रमज इति सयँयोगादेX परो वर्णो लक्ष्यते; अत एव उत्तरसूत्रे "यथा पार्ष्ण्या, रेफषकारौ, द्वौ णकारौ, यकारश् च सयँयोगः, तत्र रेफस् सयँयोगादिरिति कृत्वा, षकारX क्रमजमिति कृत्वा"[6] इत्यादिना द्विरुक्तिवँ विना वर्तमानस्य षकारस्य क्रमजत्वेन व्याख्यानं सङ्गच्छते। ननु "नाऽस्स्वरपूर्वा ऊष्मम्मान्तस्त्थाः"[7] इत्यपवादात् 'पार्ष्ण्या' इत्यत्र "ऊष्मम्मान्तस्त्थाब्भ्यश् च स्पर्शः"[8] इति द्वित्त्वाऽप्प्रवृत्तौ 'रेफषकारौ', 'द्वौ णकारौ' इत्युव्वटोक्तिरसङ्गतेति चेत्, मैवम्, ऊष्मम्मान्तस्त्थेत्यत्र द्वन्द्वगर्भैकशेषसमासाश्रयणेन व्यस्तसमस्तेत्युभयस्यापि निमित्तत्वमित्यङ्गीकारात्। न च शिक्षान्तरवचोविरोधश् शङ्क्यः, तद्वचनानां शुक्लयजुर्भिन्नशाखाविषयत्वेनाऽङ्गीकारात्, शुक्लयजुषि विशिष्य ऊष्मम्मान्तस्त्थाब्भ्यस् स्पर्शद्वित्त्वनियमनाच्

---

१. श्लो. ४८ (शि. स., पृ. १२१)। २. प्रा. प्र. शि., शि. स., पृ. २५५। ३. य. वे. २५–४०। ४. शु. य. प्रा. ४।१०३। ५. शु. य. प्रा. उ. भा. १।१०४। ६. तत्रैव १।१०५। ७. शु. य. प्रा. ४।१०६। ८. तत्रैव ४।१०३।

च"[1] इति प्प्रोक्तम्। वयन् तु ब्रूमः—पार्ष्ण्या इति पदस्स्वरूपे द्वयोप्षकारयोः× पूर्वोक्तेन हेतुना पूर्वाङ्गता नोपपद्द्यत इति अमरेशबालकृष्णादिवचनमनुपपन्नमेव, एतत्पक्क्षे पार्ष्—ष्ण्या इत्त्येवाक्क्षरविभागस्स्वीकर्तव्यः, तदर्थञ् च 'तस्म्माच् चोत्तरं स्पर्शे' इति सूत्त्रमनावश्श्यकमेव, रेफस्स्य सयँयोगादित्त्वेन पूर्वषकारस्स्य क्रमजत्त्वेन पूर्वाङ्गतायास् सिद्धेः, द्वितीयस्स्य षकारस्स्य णकारयकारयोश् च पारिशेश्ष्यादुत्तराङ्गतायास् सिद्धेश् च। यदि तु 'पार्ष्ण्-ण्या' इति पदस्स्वरूपन् तदा 'पार्ष्ण् ण्या' इत्त्यक्क्षरविभागश् शक्क्योच्चारणकतया उपपद्द्यत एवेति साद्ध्वेव लक्क्ष्यदृष्ट्या उव्वटव्याक्ख्यानम्। लक्क्षणदृष्ट्या तु 'निमित्तभिन्नव्व्यवधानस्स्यैव व्यवधानत्त्वमिति सम्भविनिमित्तरूपेण रेफेण पूर्वस्स्वरे व्यवहितेऽपि षकारस्स्य स्वरपूर्वत्त्वन् द्वित्त्वनिमित्तत्त्ववँ वाऽपि भवत्त्येव' इति व्याक्ख्यानङ्ग कर्तव्यम् भवति। एतद् व्याक्ख्यानङ्ग कर्तृञ् च "ये ऊष्माणोऽन्तस्थाश् च व्यञ्जनपूर्वास् ते द्विर्वचनस्स्य निमित्तन् न भवन्ति, वर्ष्मन्, पार्ष्ण्या वा"[2] इति वदता बालकृष्णगोडशयाऽन्तरन् न रक्क्षितम् तथापि "अन्तस्स्थाभिर् यदा युक्ता ऊष्माणो रेफपूर्वकाः। वर्ष्ष्याय चान्तःपार्श्श्व्यञ् च रेफाद् द्वित्त्वम् भजन्ति ते"[3] इति रेफात् परेषामूष्मणामन्तस्थासु परास्स्वेव द्विर्भावमुल्लिखता, "यदि चाऽस्स्वरपूर्वास् स्युरूष्मान्तस्स्था न तत्परः। स्पर्शो द्वित्त्वमवाप्नोति स्थालीभिर् दिवःस्कम्भनीः"[4] इति च अपूर्वस्स्य विसर्गपूर्वस्स्य चैवोष्मणस् स्वोत्तरवर्तिस्स्पर्शद्विर्भावनिमित्तत्त्वाभावमुदाहरता अमरेशेन तु तद् रक्क्षितमाभाति। गङ्गेश्श्वरतत्सहायकादिभिश् च 'यज्ज्ञपतिर्ह्व्वार्षीत्'[5] इत्त्यत्तर वकारद्वित्त्वम् प्रदर्शयद्भिस् तद् रक्क्षितमिव प्प्रतीयते। यदि तु हकारयोगे वकारस्स्य सुस्स्पृष्टता यद्द्यपि न प्रतिज्ज्ञासूत्त्रे विहिता न च व्याक्ख्यातऽन्न्यत्त्राऽपि, तथापि "यदेव लक्क्षणयँ यस्स्य वकारस्स्याऽपि तद् भवेत्। यत्त्रयत्त्र विशेषस् स्यादिदानीं सस कत्थ्यते"[6] इति याज्ज्ञवल्क्यशिक्क्षावचनात् सा समायातीति सुस्स्पृष्टतामेव दर्शयति सा लिपिर् न

---

१. या. शि. शि. व. वि., टि., पृ. ९३। २. प्रा. प्र. शि. शि. स., पृ. २५१। ३. प्रा. प्र. शि. श्लो. १५३–१५४; शि.स., पृ.१३०। ४. तत्त्रैव श्लो. १५६–१५७, शि. स., पृ. १३१। ५. मा. वा. शु. य. वे. म. ब्र. य. सं. १।२। ६. शि. स., पृ. २३ (श्लो. १५४)।

तु वकारस्य द्विर्भावमित्युच्यते तर्हि तैस् तन् नैव रक्षितमिति मन्तव्यम्। पाणिनीयव्याकरणे तु "(द्विर्वचने) शरऽ खय इति वक्तव्यम्, किमुदाहरणम्? यदि शर इति पञ्चमी खय इति षष्ठी स्थाली स्थातेत्युदाहरणम्, अथ खय इति पञ्चमी शर इति षष्ठी दत्सस: कष्णीरम् अप्सरा इत्युदाहरणम्"[1] इति वदता भाष्यकारेण अस्वरपूर्वस्याऽपि शरो द्वित्वनिमित्तत्वं स्वीकृतमिति एतदपि उक्ते व्याख्यानेऽनुकूलम् भवति। पदपाठे च प्रायेण 'पार्ष्ण्या' 'वर्ष्मन्' इत्येवमादिकम् प्राप्यते[2]। एवञ् च 'पार्ष्ण्-ण्या'[3] इति 'वर्ष्म्-मन्'[4] इत्यादौ च पदस्वरूपे स्वीकृते सति "तस्माच् चोत्तरं स्पर्शे"[5] इति शुक्लयजुर्वेदप्रातिशाख्यसूत्रमेवँ व्याख्येयम्– 'तस्मात् सयँयोगादेर् व्यञ्जनाद् उत्तरम् परवँ व्यञ्जनञ् च स्पर्शवर्णे परे सति पूर्वस्य स्वरस्य अङ्गम् भवति' इति। एतदर्थञ् च परोक्षार्थनिर्देशकेन तस्माद्दित्यनेन व्यवहितस्याऽपि सयँयोगादेर् निर्देशस् स्वीकर्तव्यः; अथवा 'सयँयोगादिः पूर्वस्य, यमश्च च, करमजञ् च, तस्माच् चोत्तरं स्पर्शे' इति सूत्रक्रमस्थाने 'सयँयोगादित पूर्वस्य, तस्माच् चोत्तरं स्पर्शे, यमश्च् च, करमजञ् च' इति सूत्रक्रमस् स्वीकर्तव्यः, वास्तविकात् क्रमजादुत्तरस्य यमभिन्नस्य पूर्वाङ्गत्वेनोच्चारयितुमशक्यत्वात्। एवं हि सूत्रमेतत् सार्थकम् भवति। तथा हि 'पार्ष्ण्-ण्या' इत्यत्र रेफस्य सयँयोगादिरिति कृत्वा, षकारस्य सयँयोगादेरुत्तरं स्पर्शपरकवँ व्यञ्जनमिति कृत्वा, पूर्वस्य णकारस्य च करमजमिति कृत्वा पूर्वाङ्गता उत्तरस्य णकारस्य यकारस्य च पारिशेष्यादुत्तराङ्गतेति। सयँयोगाद्द्व्युत्तरस्य व्यञ्जनस्य पूर्वाङ्गताया विधायकस्याऽस्य सूत्रस्याऽभावे तु 'पार्ष्ण्ण्या' इत्यत्र पूर्वस्य णकारस्य करमजञ् चेति कृत्वा पूर्वाङ्गता स्यात्, षकारस्य तु पारिशेष्यादुत्तराङ्गता स्यात्, न चैवम् भवितुमर्हति उत्तरस्य णकारस्य पूर्वाङ्गताम् पूर्वस्य षकारस्योत्तराङ्गताञ्च कृत्वोच्चारयितुमशक्यत्वात्, एवञ् च सर्वमाकुलं स्यात्। अत एवेदं सूत्रमावश्यकम्। करमजस्य पूर्वस्य

---

१. ८।४।४७, वा. २। २. मा. सं. पद., पृ. ४७२, ४९४ (पञ्चषष्टितमे पृष्ठे तु 'वर्ष्मन्' इत्येव प्राप्यते)। ३. मा. वा. शु. य. म. ब्रा. य. सं. २५।४०। ४. तत्रैव ५।१७, २८।१। ५. १।१०५।

णकारस्स्य पूर्वाङ्गता तु क्रमजत्वं चेति सूत्रेणैव सिद्धा; अक्रमजस्-स्य षकारस्स्य लक्षणया क्रमजत्वेनोव्वटकृतङ्ग्रहणन् तु सम्भवति सति एवम् मुख्यार्थग्रहणेन व्याख्याने अनन्यायमेव, लक्षणाहेतोर् मुख्यार्थबाधादेरभावात् । एतस्मादेव "तस्मात् चोत्तरं स्पर्शे" इति सूत्राज् ज्ञापकाद् निमित्तजातीयभिन्नव्यवधानस्यैव व्यवधान-त्वमिति सम्भविनिमित्तरूपेण रेफेण पूर्ववर्तिनि स्स्वरे व्यवहितेऽपि षकारादेर् नोत्तरस्स्पर्शद्विर्भावऽहेतुत्वमिति च सिद्ध्यति, 'नास्स्वर-पूर्वा ऊष्मानतस्तथाः'[1] इति सूत्रन् तु "दिवःस्कम्भनीः"[2] इत्यादौ चरितार्थम् । एवमस्स्वीकारे तु 'पार्ष्षण्या' इति षकारस्स्यैव द्वित्वे उच्चारणस्स्य शक्यत्वाशक्यत्वविचारेण खलु 'पार्ष्-ष्ण्या' इत्ये-वाऽक्षरविभागे कर्तव्ये रेफस्स्य सयोगादिरिति कृत्वा, पूर्व-षकारस्स्य क्रमजमिति कृत्वा पूर्वाङ्गत्वे उत्तर-षकार-णकार-यका-राणाञ् च पारिशेष्यादुत्तराङ्गत्वे "तस्मात् चोत्तरं स्पर्शे"[3] इति सूत्रवद् व्यर्थमेव स्स्यात् । यदि तु यथा 'अयक्ष्मा'[4] 'वृत्रतूर्य्ये'[5] 'शमीष्व'[6] 'क्षत्रवनि'[7] 'उपोत्तस्थितः'[8] इत्यादौ अस्स्वाभाविकतया विसंस्थुलानि उच्चारणान्यपि वचनबलात्[9] क्रियन्ते, यथा च 'सम्बर्-हिरङ्गक्तम्'[10] 'भद्द्रेण पृङ्गक्तम्'[11] इत्यादौ ङकारस्स्य दीर्घी-करणेनैव द्विर्भावश् चरितार्थीक्रियते, तथैव 'पार्ष्ष्-ण्या' इत्यत्तर वर्ष्ष्-मन् इत्यादौ च अस्स्वाभाविकरूपेणाऽपि षकारन् दीर्घीकरणे-नोच्चार्य तस्स्य द्विर्भावञ् चरितार्थीकृत्य द्वयोरेव षकारयोः पूर्वाङ्गता निरुह्यते; एवञ् च सर्ववद् वचनबलेनैव समर्थ्यते क्रियते चेति न 'क्रमजञ् च' इति सूत्रस्स्य लाक्षणिकोऽर्थस् स्वीक्रियते, न च 'तस्मात्च् चोत्तरं स्पर्शे' इत्यत्तर तच्छब्देन व्यवहितपरामर्शो वा सूत्रक्रमानन्यथाकरणवद् वा स्वीक्रियते, नैव च 'नाऽस्स्वरपूर्वा ऊष्मानतस्तथाः' इत्यत्तर रेफस्स्य पूर्वस्स्वरावव्यवधायकत्वस्स्वी-कारेण रेफोष्मद्द्वयात् परस्स्य स्पर्शस्स्य द्विर्भावस्स्याऽनिषेधस्

---

१. शु. य. प्रा. ४।१०६ । २. मा. वा. शु. य. म. ब्र. य. सं. १।१९ । ३. शु. य. प्रा. १।१०५ । ४. मा. वा. शु. य. म. ब्र. य. सं. १।११ । ५. तत्रैव १।१३ । ६. तत्रैव १।१५ । ७. तत्रैव १।१७ । ८. तत्रैव ८।५५ । ९. शु. य. प्रा. ४।१०५; ६।२७, २९, ३०; प्र. सू. २।७ । १०. मा. वा. शु. य. म. ब्र. य. सं. २।२२ । ११. तत्रैव ९।४ ।

स्वीक्रियते इत्युच्यते तर्हि अस्त्वेवम्, शास्त्रस्य तत्कबुद्ध्याऽन्वय-थयितुमनुचितत्वात् ॥११६-११८॥

९. अथ सयँयोगपिण्डोच्चारणविद्ध्यधिकारः

अयस्पिण्डो दारुपिण्ड ऊर्णापिण्डस् तथैव च ।
ज्वालापिण्डश् च मृत्पिण्डो वायुपिण्डस् ततः परः ॥११९॥
वज्रपिण्डश् चैकस्वराङ्गभूतैर् व्यञ्जनैः कृताः ।
सयँयोगपिण्डास् सयँयोगोच्चारणस्य विशेषतः ॥१२०॥
अयस्पिण्डस् स्पर्शयम-पिण्डोऽग्घँन्या[1] स्स्यादुदाहृतिः ।
अन्तस्स्थास्स्पर्शयोर् दारु-पिण्डस् स्याद् बिल्म्मिने[2]यथा॥१२१॥
ऊष्मपञ्चमपिण्डस् तूर्णापिण्डोऽशम्मन्नितीह[3] दिक् ।
स्याद् ह-पञ्चमयोर् ज्वालापिण्डो ब्रह्म्मेत्त्युदाहृतिः[4] ॥१२२॥
अनुस्स्वारोष्मसयँयोगो मृत्पिण्डस् संस्तुबत्तर[5] दिक् ।
ऊष्मयोगे पसस्य वायुपिण्डस् स्याद् द्यौष्पपिता[6] यथा ॥१२३॥
योग ऊष्मकयोर् वज्रपिण्डोऽस्ककन्नमुदाहृतिः[7] ।
अन्वर्थतत्वम् पिण्डनाम्नाज् ज्ञेयम् पिण्डस्स्वभावतः ॥१२४॥
सयँयोगपिण्डरूपादि परसङ्गादत्तर दर्शितम् ।
सामाद्ध्याये विस्तरेण दृश्यमस्य निरूपणम् ॥१२५॥

यत्तर सयँयुक्तयोरेकस्वराङ्गयोर् व्यञ्जनयोरुच्चारणे करणं स्थानाद् न प्रचलति तयोस् सयँयोगो दृढ इति कृत्वा अयस्पिण्ड इत्युच्यते, यथा अग्घँन्येत्यादौ यमतत्पूर्ववर्णयोः; बिल्म्मिने इत्यादौ अन्त-स्थास्पर्शयोस् सयँयोगस् स्पर्शोदयश् श्लथबन्ध इति कृत्वा दारुपिण्ड उच्यते, अशम्मन्नित्यादौ ऊष्मपञ्चमस्पर्शसयँयोगस् स्पर्शोदय ऊष्मणः पञ्चमवर्णस्य च परपीडनापीडनानुसारं सङ्कोचविस्तार-शीलत्वादूर्णापिण्डतुल्यतया ऊर्णापिण्ड उच्यते; ज्वालाया यथा स्वेनाऽऽवरणेनेव स्वानुगतकाष्ठाश्लेषस् तथा ऊष्मान्त्यस्य हकारस्य स्वेनाऽऽवरणेनेव स्वानुगतवर्गपञ्चमवर्णाश्लेष इति ब्रह्म्मेत्त्यादौ ऊष्मान्त्यवर्गपञ्चमसयँयोगो वर्गपञ्चमोदयको ज्वालापिण्ड उच्यते; मृत्पिण्डो यथा स्फुटनशीलस् तथा विश्लेषशीलयोर् अनुस्स्वारतदुत्तर-

---

१. मा. वा. शु. य. म. ब्र. य. सं. १।१। २. तत्तत्रैव १६।३६।
३. तत्तत्रैव १७।१। ४. तत्तत्रैव १३।३। ५. तत्तत्रैव १५।५।
६. तत्तत्रैव २।११। ७. तत्तत्रैव २।८।

वर्तिवर्णयोस् संस्तुबित्त्वादाविव सयँ योगो **मृत्पिण्ड** उच्च्यते, येषाम्-मतेऽनुस्स्वारात् परस्य व्यञ्जनस्यापि व्यञ्जने परे द्वित्त्वन् तन्मते मृत्पिण्डोऽयमस्स्फुटितोऽन्यत्तर तु स्स्फुटत्त्येव; ऊष्मपवर्गीयापञ्चम-वर्णयोस् सयँ योगे पवर्गीयोदये ऊष्मोच्चारणे विसृज्ज्यमानो वायुऽ पकारादद्द्यु च्चारणे ओष्ठमुद्द्रणेन मुखान्तऽ पिण्डीभूत इव लक्क्ष्यते इति द्यौष्प्-पितेत्त्यादौ तादृशस् सयँ योगो **वायुपिण्ड** उच्च्यते; ऊष्मकवर्गीयापञ्चमसयँ योगे कवर्गीयोदये अस्क्-कन्नमित्त्यादौ उष्मो-च्चारणे प्रवृत्तवँ वायुञ् झटित्त्येव जिह्वामूलकोमलतालुसयँ योगेन विच्छेद्द्य ककारादिर् ऊष्मणि दृढतम संश्लिष्ट इव उच्चार्यते इति एतादृश ऊष्मजिह्वामूलीयवर्णसयँ योगो हीरकाणुसयँ योगतुल्यतया **वज्ज्रपिण्ड** इति व्यवहिरयते इति विज्ज्ञायते। शौनकशिक्क्षाया 'शक्-क्यम्' 'कृच्-छ्रम्' 'मीड्-ढ्वा' इत्त्यादौ परस्स्वराङ्गभूतस्पर्शान्त-स्थासयँ योगानामपि दारुपिण्डत्त्वमुक्तम्। 'अस्-स्य' 'अजुष्-ष्टन्' 'सम्मिश्-श्नः' इत्त्यादौ परस्स्वराङ्गभूतस्य ऊष्मान्तस्थासयँ योग-स्य च ऊर्णापिण्डत्त्वम् प्रतिपादितम्। याज्ज्ञवल्क्यशिक्क्षायाञ्च गौतम्म्यां शिक्क्षायाञ् च ऊर्णापिण्डत्त्वम् अन्तस्थावर्जितानां सयँ योगानामेवोक्तम्; शैशिरीयशिक्क्षायामप्येतन् नोक्तम्; अतोऽस्माभि-रपि शौनकशिक्क्षोक्तस्येतस्य ऊर्णापिण्डस्य कारिकायामुल्लेखो नैव कृतः।

एते च सयँ योगपिण्डव्यवहाराऽ प्रायेण एकस्स्वराङ्गभूतव्यञ्जन-सम्बद्धा एव, भिन्नस्स्वराङ्गभूतव्यञ्जनेषु तु स्फोटनात् सयँ योगे सत्-त्यपि नैकपिण्डतेति विवेक्तव्यं सुधीभिः। स चाऽयमर्थ उव्वटेनापि सूचितः[1]। एतत्सिद्धान्तविरुद्धानि उदाहरणानि अपि उपन्न्यस्स्यतेऽपि "यथा अयऽपिण्डादीनाञ् गुरुतम-गुरुतर-गुरु-संश्लेषस् तथा एषावँ व्यञ्जनानामुच्चारणे संश्लेषस् साद्ध्यः"[2] इति वदता अनन्तेनाऽपि अय-मर्थस् सूचित इवैव भाति। "शक्क्यमित्त्यत्तर पूर्वककारस्स्य अभि-निधानम्। पुनऽ ककारयकारयोगो दारुसंश्लेषतुल्य इत्त्यादि द्रष्ट-व्यं सर्वत्तर"[3] इति वदता शौनकशिक्क्षाटीकाकारेणाऽपि अयमेवार्थऽ प्रतिपादितः। अमरनाथशास्त्रिणाऽपि "यमेषु तथा विच्छेदऽ कर्तव्यो यथा लोहपिण्डाऽ प्रतिखण्डम् परस्परसंश्लिष्टावयवा उच्छिद्द्यन्ते;

---

१. शु. य. प्रा. भा. ४।१६५। २. तत्तैव ४।१६५।
३. श्लो. ३८।

यथा रुक्कँ्म[1] इत्त्यत्तर रुक्कँ् इति सयँ्योगादिककारस्स्य पूर्वाङ्गत्त्वेन रेफोत्तरोकारेण सहोच्चारणाद् यदा मकाराद् विच्छेदऽ क्रियते तदा ककारमकारयोर् मद्ध्यवर्ती यमो मकारगुणोऽनुनासिकऽ ककारप्रतिसङ्ख्यकस् तेन सहैवोच्छिद्द्यते, अतोऽस्स्याऽयऽपिण्डतेति भावः; अत्तर यमस्स्य उत्पत्तिकालिकपूर्वककारात् पार्थक्क्येन शश्रवणाभावात् तेन सह सम्म्यक् श्लेषात् संश्लिष्टतेत्त्यर्थः"[2] इत्त्यादिकवँ् वदता मृत्पिण्डवज्ज्रपिण्डोदाहरणेषु तु मुह्य्यताऽपि अयमेवार्थऽ प्रायेण प्प्रतिपादितः। अत एवाऽस्माभिस् सर्वा असङ्गतीऽ परिहृत्त्याऽस्मदीयासु कारिकासु अयस्पिण्डादिलक्क्षणानि तदुदाहरणानि च सङ्क्षेपेण स्फुटतरतया च प्प्रतिपादितानि ।

सयँ्योगपिण्डविषये च कासुचिदेव शिक्क्षासु वचनानि प्राप्प्यन्ते न सर्वासु । तत्तर **शैशिरीयशिक्क्षायाम्**— "स्पर्शानाम् पञ्चमैर् योगे भवन्तीह यमास् स्मृताः । अयऽपिण्डेन तत् तुल्ल्यङ घनबन्धाऽ प्रकीर्तिताः ।। सऽ पलिक्क्रँ्नीरग्गँ्निर् यज्जँ्नम् पत्तँ्नी विद्दँ्म । आत्तँ्मानम् पप्पँ्मा जगृब्भँ्णामित्त्येतन् निदर्शनम् ।। स्पर्शास्त्वपञ्चमाश् चैवमन्तस्स्थाभिश् च (सयँ्युताः) । दारुपिण्डेन तत् तुल्ल्यं श्लथबन्धाऽ प्रकीर्तिताः ।। शत्त्रुं सक्ख्यमग्गर्च्चङ कृच्छ्रङ क्व वज्ज्रयँ् यज्ज्वा राष्ट्रर्च्चति । प्नायोगिर् विद्धिर् (वद्धिर् ?) मेड्ढ्रवँ् वाद्ध्र्चश्श्वेति निदर्शनम् ।। वकारस् तु नकारेण णकारेण च सयँ्युतः । श्लथबन्धस् स विज्ज्ञेयो दुस्स्पृष्टश् चात्तर चोच्च्यते । भूरिदाव्न एवयाव्न प्रातर्याव्ण दधिक्क्राव्णः । ईड्ड् द्यावापृथिवी मीढ्ढ् सप्तिर् इत्त्यत्तर तु निदर्शनम् (?) ।। सयँ्योगे शसषाऽ पूर्वे परञ् चेदनुनासिकम् । ऊर्णापिण्डेन तत् तुल्ल्यं श्लथबन्धाऽ प्रकीर्तिताः । अश्श्नोतु विष्ष्णुर् घृतस्स्नू कार्ष्ष्म वेति निदर्शनम्"[3] इति; "यथा योक्त्तरेण सवँ्वेष्ट्च तृणम् बद्ध्नन्ति वाहकाः । एववँ् वेष्ट्च यकारेण वैदिकम् पिण्डमुच्च्यते ।। वाद्ध्र्चश्श्व सुपित्त्र्च वद्ध्र्चश्श्वस्स्य सुमित्त्र्चाः रान्द्र्चा त्र्चम्ब्रकङ कृतान्न्यृजीषिणः, सद्ध्र्चग् ध्यृतँ्श् च तौग्र्च वज्ज्र्चृचीषम एष्यृक्क्वा द्र्वन्नः । अशत्त्रर्वर्यो रात्त्र्चुषसेऽस्यृषिकृत् ।। जिह्व्वाग्र्रीयफलितमृकारद्द्वयसयँ्युतम् । एकीकृत्त्योच्चारणीयन् निस्सन्धि वर्त्ति वर्त्तुलम् ।। प्रातर्ऋषयो निर्-

---

१. मा. वा. शु. य. म. ब्र. य. सं. १२।१ । २. या. शि. शि. व. वि., पृ. १४४ । ३. श्लो. २९–३५ ।

ऋत्त्या निर्ऋतिन् निर्ऋथं सचन्ताम्। अग्गँ्निः [पूर्वेभिर्] ऋषिभिः आविर् ऋजीक ऋतँ्र्ऋतुपते। गीर्भिर् ऋणो [मि] दुर्हृणायून् जर्हृषाणो जर्हृषन्तः। मतिर् हृदऽ पत्तँ्नीर् हृषितन् ज्योतिर् हृदयन् च निदर्शनम्"[1] इति च। **शौनकशिक्क्षायामपि**— "स्पर्शानाम् पञ्चमैर् योगे भवन्तो हि यमास् स्मृताः। अयऽपिण्डेन तत् तुल्यङ्ग घनबन्धाऽ प्रकीर्तिताः। पलिक्कँ्नीर् यज्जँ्ञ रत्तँ्नानि विद्दँ्माऽऽप्पँ्नानं ररब्भँ्म च॥ स्पर्शाश् च पञ्चमाश् चैवमन्तस्स्थाभिश् च सयँ्युताः। दारुपिण्डेन तत् तुल्यङ्ग घनबन्धाऽ प्रकीर्तिताः। शक्क्यं सरव्व्यङ्ग (सक्ख्यङ्ग ?) कृच्छ्रवँ् वज्ज्रं राष्ट्रच्चत्त्येतीड्ड्यं सम्म्राट्। मीड्ढ्वान् तत्थ्यवँ् वाद्ध्रच्चश्श्वोताऽपम्म्लुक्तवँ् विब्भ्वीरुच्च्यते॥ ऊष्माणऽ पञ्चमैर् युक्ता अन्तस्स्थाभिश् च सयँ्युताः। ऊर्णापिण्डेन तत् तुल्यं श्लथबन्धाऽ प्रकीर्तिताः। अश्श्नोतु विष्ष्णुर् घृतस्स्नु अस्स्मे युष्ष्मे इति स्स्नुषे। अस्स्य वामस्स्याऽजुष्ष्रन्नन्नश्श्वस् सम्मिश्श्ल इत्त्यपि॥वकारस् तु नकारेण णकारेण च सयँ्युतः। श्लथबन्धस् स विज्ज्ञेयो (दुस्स्पृष्टश् चात्त्र चोच्च्यते)"[2] इति। **याज्ज्ञवल्क्यशिक्क्षायाञ् च**—"अथ सप्त सयँ्योगपिण्डाः, अयस्पिण्डो दारुपिण्ड ऊर्णापिण्डो ज्वालापिण्डो मृत्पिण्डो वायुपिण्डो वज्ज्रपिण्डश् चेति॥ यमान् विद्द्यादयस्पिण्डान्तसान्तस्थान् दारुपिण्डवत्। अन्तस्थयँ् यमवर्जन् तु ऊर्णापिण्डवँ् विनिर्द्दिशेत्। अन्तस्थयमसयँ्योगे विशेषो नोपलब्भ्यते। अशरीरयँ् यमवँ् विद्द्यादन्तस्थम् पिण्डनायकम्। ज्वालापिण्डान् सनासिक्क्यान् सानुस्स्वारांस्तु मृन्मयान्। सोपद्ध्मान् वायुपिण्डाँस् तु जिह्व्वामूले तु वज्ज्रिणः॥ तत्त्रायस्पिण्डो यथा— अग्गँ्निः, पत्तँ्नीः, तनच्चँ्मीति। यक्कँ्नेति। दारुपिण्डो यथा— अश्श्वः, सूर्य्यः, बिल्म्मिने, विश्श्वजनस्स्य, वीर्य्यम्। ऊर्णापिण्डो यथा— अश्म्मन्, कृष्ण्णः, अस्म्मिन्, कुक्कुटः, अमुष्म्मिन्, यस्म्मिन्, अस्म्मँ इति। ज्वालापिण्डो यथा—ब्रह्म्म, वह्न्नितमम्, गृह्ण्णामीति। मृत्पिण्डो यथा— सऽंस्थाम्, सऽंस्तुप्, सिऽं ह्यसि, उद्दिवऽं स्तभानेति। वायुपिण्डो यथा— उपहूतो द्द्यौष्प्पिता, देव सवितः प्प्रसुव, युञ्जानः प्प्रथमम्। वज्ज्रपिण्डो यथा— इष्कृतिः, निष्कृतीः, ऋक्क्षामयोरिति, हविष्कृदेहि, दिवः ककुत्, व्यदधुः कति-

---

१. श्लो. १५१–१५६। २. श्लो. ३६–४१।

धेति ''[1] इति । उव्वटेनाऽपि सयँयोगपिण्डविषये याज्ज्ञवल्क्यनामग्रहणपूर्वकवँ ''यमान् विद्द्यादयस्पिण्डान्'' इत्यादिकं श्लोकमुद्धृत्य ''यथायस्पिण्डादीनामाश्लेषस् तथैतेषावँ व्यञ्जनानामिति श्श्लोकार्थः''[2] इत्युक्तम् । 'काण्डात्त्काण्डात्' 'वषट्कृतम्'इत्यादिषु परस्स्वराङ्गभूतस्य तकारककारसयँयोगस्य टकारककारसयँयोगस्य च अयस्पिण्डत्वम् उव्वटेन स्वीकृतमिव च तद्ग्रन्थात् प्रतीयते । अनन्तेनाऽपि ''तथा चोक्तं शिक्क्षायाम्'' इत्युक्त्वा ''यमान् विद्द्यादयस्पिण्डान् सान्तस्थान् दारुपिण्डवत् । अन्तस्थायमवर्जन् तु ऊर्णापिण्डवँ विनिर्दिशेत् ।। ज्वालापिण्डस् सनासिक्क्यस् सानुस्स्वारश् च मृन्मयः । सोपद्ध्मो वायुपिण्डश् च जिह्वामूले च वज्ज्रवत् ।। सप्त पिण्डान् विदित्त्वाऽपि साक्क्षाद् ब्रह्म्मणि लीयते'' इति वाक्क्यानि उद्धृत्य अयस्पिण्डादीनामुदाहरणानि अपि प्रायो याज्ज्ञवल्क्यशिक्क्षायाम् प्राप्प्यमाणान्न्येवोपन्न्यस्तानि[3] । **वर्णरत्नप्रदीपिकायां शिक्क्षायाज् च**— ''स्पर्शानाम् पञ्चमैर् योगे चत्त्वारो ये यमास् स्मृताः । अयस्पिण्डेन ते तुल्ल्या घनबन्धाः प्रकीर्तिताः । यमास् तदा निवर्तन्ते ऊष्मा मद्ध्ये भवेद् यदि । ऊर्णापिण्डेन ते तुल्ल्याः पाशैस्त्त्मन्न्या निदर्शनम् । स्पर्शा अपञ्चमा ये च अन्तस्थाभिश् च सयँयुताः । दारुपिण्डेन ते तुल्ल्याश् श्लथबन्धाः प्रकीर्तिताः''[4] इति, ''अयस्पिण्डेन तत् तुल्ल्यन् तस्मादुच्चारणन् तथा । काण्डात्त्काण्डाद् वषट्कृतयँ यकृत्त्क्लोमादिकयँ यथा''[5] इति, ''द्वितीयाश् च चतुर्थाश् च वर्णास् सोष्मांण एव हि । यदैते पञ्चमैर् युक्ता वायुस् सम्म्यगृते मुखात् । तन् धारयेत् प्रयत्नेन घनबन्धं समुच्चरेत् । सक्थँना दद्धँमस् तथा दद्धँना अग्घँन्या इति निदर्शनम्''[6] इति च । **गौतमस्यां शिक्क्षायान् तु**— ''अथ त्रिविधस् सयँयोगपिण्डो भवति अयस्पिण्डो दारुपिण्डस् तथोर्णापिण्डश् चेति । यमसहितमयस्पिण्डम्, दारुपिण्डमन्तस्थैर् युक्तम्, यमान्तस्थवर्जन् तूर्णापिण्डमिति । अन्तस्थयमसयँयोगे विशेषो नोपलब्भ्यते इत्यशरीरयँ यमवँ विद्द्यादन्तस्थ×

---

१. या. शि. श्लो. २०२–२०५ (शि. स., पृ. २९–३१) । २. शु. य. प्रा. भा. ४।१६५(१६३) । ३. शु. य. प्रा. भा. ४।१६५ । ४. श्लो. १७७–१७९ (शि. स., पृ. १३२–१३३) । ५. श्लो. १८६ (शि. स., पृ. १३३) । ६. श्लो. १८८–१८९ (शि. स., पृ. १३३–१३४) ।

पिण्डनायकः"[1] इति । माण्डूक्यां शिक्षायाञ् च— "दारुसङ्घातवत् श्लिष्टं सयँयोगवशवर्तिनाम् । वर्णानायँ युगसम्पन्नमेकवँ वर्णमिवोत्सृजेत्"[2] इति ।

एतेषु वचनेषु शैशिरीयशिक्षावचने प्रातर्ऋषय इत्यादीनान् दुर्हृणायून् इत्यादीनाञ् च सवर्गीयत्वन् दुर्बोधन् दृश्यते । ऋकारे परेऽपि स्वरभक्तेस् स्वीकारे तु प्रातर्ऋषय इत्यादौ सवर्गीयत्वं स्यात् । शौनकशिक्षाया वचनेषु 'सरव्यम्' इति पाठो भ्रष्टः प्रतीयते, 'सक्ख्यम्' इत्येव साधुः पाठस् स्यात् । याज्ञवल्क्यशिक्षायामुपलभ्यमानेषूदाहरणेषु अश्श्वः, सूर्य्यः, विश्श्वजनस्य वीर्य्यम् इति दारुपिण्डोदाहरणानि असङ्गतानि प्रतीयन्ते, दारुपिण्डे अन्तस्थास्पर्शसयँयोगस्याऽऽवश्यकतायाश् शौनकशिक्षावचनाद् वर्णरत्नप्रदीपिकावचनाच् च ज्ञायमानत्वात् । ऊर्णापिण्डोदाहरणेषु कुक्कुट इत्यसङ्गतम्, तत्र ककारयोस् स्फोटनात् सयँयोगपिण्डस्यैवाऽभावात् । वज्रपिण्डोदाहरणेषु अपि ऊष्मणः परस्य कवर्गीयवर्णस्य द्वित्वेन युतानि उदाहरणानि आवश्यकानीति तत्रोपात्तानि उदाहरणानि न समीचीनानि दृश्यन्ते । यदपि अमरनाथेन वज्रपिण्डव्याख्याने इष्कृतिरित्युदाहरणम् पठितन् तत्र ककारद्वित्वमशुद्धमृवर्णे परे द्वित्वस्य निषिद्धत्वात्[3] । उदाहरणेषु असङ्गतीनान् दर्शनाद् उदाहरणसङ्ग्रहात्मको याज्ञवल्क्यशिक्षाया 'एष पाठष् टिप्पणीभूतः केन चिद् मूले प्रक्षिप्त इति भाति'[4] इति अमरनाथभणितिर् विश्वासयोग्या एव भाति । किन् त्वत्र सर्वेषु याज्ञवल्क्यशिक्षाकोशेषु तेषामुपलभ्यमानत्वन् तेषाम् प्रक्षिप्तत्वस्य स्वीकारे बाधकमिव भवति । अनन्तेनाऽपि प्रायेणैतान्येवोदाहरणानि उपात्तानीति[5] चैतेषामप्रक्षिप्तत्वस्य पक्षो बलीयानिव भवति । किन् तु असङ्गततराणि 'कुक्कुटः', 'इष्कृतिः''निष्कृतीः' 'हविष्कृदेहि' इत्युदाहरणानि तु अनन्तेन नोल्लिखितानि इति तु नात्र विस्मर्तव्यम्।वर्णरत्नप्रदीपिकायाऊर्णापिण्डप्रतिपादनन् तु शैशिरीयशिक्षादिविसवँवादाच् चिन्त्यन् दृश्यते । गौतमम्याश् शिक्षाया दारुपिण्डोर्णापिण्डप्रतिपादने असस्फुटे याज्ञ-

---

१. १।१ (शि. स., पृ. ४५०) । २. श्लो. १२१ (शि. स., पृ. ४७२); तत्राऽयं श्लोकोऽस्स्थाने मुद्द्रितोऽस्ति; (अस्माकम् मते तु श्लो. १२३)। ३. शु. य. प्रा. ४।११३ । ४. या. शि. शि. व. वि., टि. १, पृ. १४९ । ५. शु. य. प्रा. भा. ४।१६५ ।

वल्क्यादिवचनसमन्वयकरणेन व्याख्येये। तत्तराऽपि गौतम्याश् शिक्क्षाया वचनात् प्रतीयमानमन्तस्थाभिर् यमैश् च रहितानां सर्वेषां सयँ-योगपिण्डानाम् ऊर्णापिण्डत्वन् तु तेषां समानस्वभावकत्वाभावस्य याज्ञवल्क्यशिक्क्षादिवचनाद् ज्ञायमानत्वादसङ्गतमेवेति तच् शैशिरीय-शिक्क्षादिवचनसमन्वयेन व्यवस्थापनीयम्। माण्डूक्याश् शिक्क्षाया वचनन् तु अल्पमपि सयँयोगपिण्डस्य एकस्वराङ्गतायास् सूचकमिति महत्त्वपूर्णम् ॥११९-१२५॥

१०. अथ वर्ण-रूप-जाति-लिङ्ग-देवता-निरूपणाधिकारः

वर्णरूपादयो लोकबुद्ध्याऽग्राह्यया अपीह च।
धर्माय प्रतिपाद्यन्ते शिष्टाचार्योपदेशतः ॥१२६॥

व्यासशिक्क्षायायँ "यदनन्यजातिरुच्चेत तत्तत्संहारको भवेत्। तज्जात्युच्चारणे तेषान् तज्जातिपरिरक्क्षणम्। ··· ध्वनिस् स्थानञ् च करणम् प्रयत्नश्च कालता स्वरः। देवता जातिरेतैश् च वर्णा ज्ञेया विचक्क्षणैः। ··· लक्क्षणेन विनाऽद्ध्यायँ यश्च पठेदपि सर्वदा। नैव तत्फलमाप्नोति स विप्रस् सुजनोऽपि हि"[1] इति वर्णजातिदेवतादि-ज्ञानस्याऽपि कर्तव्यता धर्मजनकता चोक्ता विज्ज्ञायते ॥१२६॥

(क) वर्णरूपनिरूपणम्

स्वराश् शुक्लास् समाख्यातास् स्पर्शाश्च कृष्णा बुधैस् स्मृताः।
अन्तस्थाश्च कपिलाश्च प्रोक्ता ऊष्माणस् त्वरुणा मताः ॥१२७॥
श्वेतो विसर्गो रक्तस् तु जिह्वामूलीय उच्यते।
उपद्ध्मानीयस् तु पीतोऽनुस्स्वारोऽपि तथा स्मृतः ॥१२८॥
रङ्गस् तु शबलश्च प्रोक्तो नीलाश्च प्रोक्ता यमा बुधैः।
नासिक्क्यो हरितश्च प्रोक्तोऽतिनीला अनुनासिकाः ॥१२९॥

वर्णरूपविषये याज्ञवल्क्यशिक्क्षावचनयँ यथा— "तत्तर स्वराश् शुक्ला नानादैवत्यः, स्पर्शाः कृष्णाः, अन्तस्थाः कपिलाः, ऊष्माणोऽरुणाः, यमा नीलाः, अनुस्स्वारः पीतः, विसर्जनीयः श्वेतः, जिह्वामूलीयो रक्तः, उपद्ध्मानीयः पीतः, नासिक्क्यो हरितः, अतिनीला अनुनासिक्क्याः, शबलो रङ्गः"[2] इति। चारायणीयशिक्क्षायाञ् च— "सितवर्णास् स्वरास् सर्वे ईकारं स्पर्शसन्निभम्। स्पर्शान्तस्थास्

---

१. सू. ४९९, ५००, ५११, ५१२, ५१५, ५१६। २. या. शि. श्लो. ८६ (शि. स., पृ. १३-१४)।

तथोष्माणश् श्यामपीतारुणास् स्मृताः। अयोगवाहाश् श्यामास् तु सितास् सर्वे स्मृतास् स्वराः। अन्तस्था हरिता ज्ञेया ऊष्माणश् चारुणप्रभाः॥ स्पर्शा ईकारसहिताः कृष्णवर्णा न संशयः"[1] इति। रङ्गस्य पारावतसवर्णत्वलँ लोमशशिक्क्षायामप्युक्तम्[2] ॥१२७-१२९॥

(ख) वर्णजातिनिरूपणम्

स्वरा वर्गेषु प्रथमा द्वितीया अपि ब्राह्मणाः।
ये वर्गेषु तृतीयाश् च चतुर्थास् ते हि क्षत्रियाः ॥१३०॥
वर्गाणाम् पञ्चमा अन्तस्थाश् च वैश्यास् स्मृता बुधैः।
शूद्रास् सर्वेऽप्यूष्मविसर्गानुस्स्वाराः प्रकीर्तिताः ॥१३१॥

वर्णजातिविषये याज्ञवल्क्यशिक्क्षावचनयँ यथा— "स्वरास् तु ब्राह्मणा ज्ञेया वर्गाणाम् प्रथमाश् च ये। द्वितीयाश् च तृतीयाश् च चतुर्थाश् चाऽपि भूमिपाः। वर्गाणाम् पञ्चमा वैश्या अन्तस्थाश् च तथैव च। ऊष्माणश् च हकारश् च शूद्रा एव प्रकीर्तिताः"[3] इति। वर्णरत्नप्रदीपिकायान् तु याज्ञवल्क्यशिक्क्षाया अत्तरोद्धृतः प्रथमश् श्लोक एव पट्ठ्यते[4]; अतस् तत्तर पाठब्भ्रंशोऽनुमीयते। व्यासशिक्क्षायान् तु— "स्वराश् च प्रथमाश् चैव द्वितीया ब्रह्मजातयः। तृतीयाश् च चतुर्थाश् च क्षत्तरजातय ईरिताः। उत्तमाश् चैवमन्तस्था वैश्या हि परिकीर्तिताः। अनुस्स्वारो विसर्गश् च ह्यूष्माणोऽवरजास् स्मृताः"[5] इति। सर्वसम्मतशिक्क्षायाञ् च— "वर्गाणाम् प्रथमा वर्णा स्वराश् च ब्रह्मजातयः। द्वितीयाश् च तृतीयाश् च चतुर्थाः क्षत्तरियास् तथा। अन्तस्थाश् चोत्तमाश् चापि वैश्या हि परिकीर्तिताः। अनुस्स्वारो विसर्गश् च ह्यूष्माणोऽवरजास् स्मृताः"[6] इति। पारिशिक्क्षायाञ् च— "ब्राह्मास् तु वर्गप्रथमास् स्वराश् च क्षात्तरास् तथा द्वित्तिरतुरीयवर्णाः। वैश्या यकारादिचतुस् तथोत्तमाश् शूद्रा अनुस्स्वारविसर्ग ऊष्मा"[7] इति। तत्तर याज्ञवल्क्यशिक्क्षाव्याक्खायाम् अमरनाथशास्त्रिणा स्वराणामेव ब्राह्मणत्वम् प्रतिपादितम्, वर्गप्रथमद्वितीयतृतीयचतुर्थानाङ् क्षत्तरियत्वञ् चोक्तम्[8]; तदेतदुक्तव्यासशिक्क्षावचनेन विरुद्ध्यते। अतो याज्ञ-

---

१. पृ. १४। २. १।६ (शि. स., पृ. ४५६)।
३. श्लो. ८६-८७ (शि. स., पृ. १४)। ४. श्लो. २२० (शि. स., पृ. १३६)। ५. सू. ४९५-४९८। ६. श्लो. ११८-११९।
७. सू. ५९। ८. या. शि. शि. व. वृ., पृ. ७९।

वल्क्यशिक्षावचनमपि स्वराः,ये च वर्गाणाम् प्रथमा द्वितीयाश् च ते च ब्राह्मणा इति व्याख्येयम् प्रतिभाति। किन् तु वर्गद्द्वितीयविषये व्यासशिक्षायां सर्वसम्मतशिक्षायाम् पारिशिक्षायाञ् च विगानन् दृश्यते; तद् व्यासशिक्षादिग्रन्थशुद्धपाठान्वेषणेन परिहरणीयवँ विचक्षणैः ॥१३०-१३१॥

(ग) वर्णलिङ्गनिरूपणम्

स्वरा विसर्जनीयाश् च यमाऽ पुलँ लिङ्गकास् स्मृताः।
प्रथमाश् च तथान्तस्स्थास् स्त्रीलिङ्गाऽ परिकीर्तिताः ॥१३२॥[1]
शेषाष् षण्ढा वर्णलिङ्गवेदिभिऽ कथिता बुधैः।
इत्त्येतद् वर्णलिङ्गञ् च प्रोक्तं शिष्टोपदेशतः ॥१३३॥

एतच् चाऽस्माभिऽ केवलयँ याज्ञवल्क्यशिक्षावचनमुपजीव्य प्रतिपादितम् बोद्ध्यम् ॥१३२-१३३॥

(घ) वर्णदेवतानिरूपणम्

देवताऽग्निर् हि कण्ठ्यानावँ वर्णानामथ निर्ऋतिः।
जिह्वामूलीयवर्णानां सोमस् तालुभुवान् तथा ॥१३४॥
मूर्धन्यानान् तु वायुस् स्याद् दन्त्यानां रुद्द्र उच्च्यते।
ओष्ठ्यानामश्विनौ विश्वे देवा हि परिशेषिणाम् ॥१३५॥

वर्णदेवताश् शुक्लयजुर्वेदप्रातिशाख्येऽपि प्रतिपादिताः। तथा हि- "वर्णदेवताः, आग्नेयाः कण्ठ्याः, नैर्ऋत्त्या जिह्वामूलीयाः, सौम्यास्त् तालव्याः, रौद्द्रा दन्त्याः, ओष्ट्ठ्या आश्विनाः, वायव्या मूर्द्धन्याः, शेषा वैश्वदेवाः"[2] इति। याज्ञवल्क्यशिक्षायामपि— "कण्ठ्या आग्नेया अकारादयः, जिह्वामूलीया नैर्ऋत्त्याः ककारादयः, तालव्याः सौम्याश्च् चकारादयः, मूर्धन्या वायव्याष् टकारादयः, दन्त्या रौद्द्रास्त् तकारादयः, ओष्ठ्या आश्विनाऽ पकारादयः, शेषा वैश्वदेवा यमादयः"[3] इत्त्येकत्तर, "एते ककारादयो मकारावसानाः कृष्णाः पञ्चविंशतिः स्पर्शा व्याख्याताः शनैश्चरदेवत्त्याः। चत्त्वारोऽन्तस्था यरलवाः कपिलवर्णा अग्निदेवत्त्याः। चत्त्वार ऊष्माणः शषसहा अरुणवर्णा आदित्त्यदेवत्त्याः"[4] इत्त्यन्न्यत्तर। इदञ् च वैषम्म्यङ कथं समन्वयम् प्रापणीयमिति विचिन्तनीयं

---

१. या. शि. श्लो. ९१-९२, (शि. स., पृ. १५)। २. ८।४०-४७। ३. शि. स., पृ. १४, या. शि. शि. व. वि., पृ. ७८। ४. शि. स., पृ. ३२, या. शि. शि. व. वृ., पृ. १५०।

सुधीभिः । अस्मद्विचारे तु शनैश्चरदेवत्त्यादिकथनम् प्रातिशाक्ख्येन वर्णरत्नप्रदीपिकया चाऽसमन्वितमिति प्रक्क्षिप्तत्वेनाऽऽस्थेयमिति भाति । वर्णरत्नप्रदीपिकायाम् च— "कण्ठ्या वर्णाऽग्निदेवत्त्यास् तालव्यास् सोमदेवताः । जिह्वामूलीया नैर्ऋत्त्या रौद्द्रा दन्त्याऽ प्रकीर्तिताः । ओष्ठ्याश् चैवाऽऽश्विना ज्ञेया वायव्या मूर्ध्नसम्भवाः । शेषास् तु वैश्वदेवास् स्युरिति कात्त्यायनोऽब्रवीत्"[1] इति । चारायणीयशिक्षायाम् च— "सौम्म्योऽत्तर तालव्यगणो जिह्वामूलास् तु नैर्ऋताः । आग्नेयाऽ कण्ठजाश् चैव मूर्धन्न्यो वायुदैवतः । दन्त्या रौद्द्रास् तु विज्ञेया ओष्ठ्याश् चैवाऽऽश्विना मताः । वैश्वदेवास् तु विज्ज्ञेयाश् शेषा वर्णा न संशयः ।"[2] इति । व्यासशिक्क्षायान् तु— "आदेत्प्रथमयशा लृनासिक्क्याश् च ङोत्तराः । अनिलाग्निमहीन्द्वर्काऽ पञ्चानामधिदेवताः"[3] इत्त्युक्तम् । तच् च सर्वलक्क्षणमञ्जरीकार एवँ व्याक्ख्यत्— "अवर्ग एत् प्रथमाश् च यशौ वाय्व्यधिदेवताः । इवर्ण ऐद् द्वितीयाश् च रषौ वह्न्न्यधिदेवताः । उवर्ण ओत् तृतीयाश् च लसौ भूम्म्यधिदेवताः । ऋवर्णावौच् चतुर्थाश् च वहौ चन्द्राधिदेवताः । लृकारऽ पञ्चमाश् चान्न्ये दुश्श्लिष्टो (दुस्स्पृष्टो ?)ऽर्काधिदेवताः"[4] इति । पारिशिक्क्षायाम् च— "वाय्व्वग्निभूचन्द्रदिवाकराश् च वेदाक्क्षराणामधिदेवतास् स्युः । अवर्णवर्गादियर्षत् समीरा इदैद्द्वितीयारष वह्न्निसञ्ज्ञाः । भौमा उवर्णश् (च) ह ओत् तृतीयास् चान्द्रा ऋवर्णो व इ (ल ?) औच् चतुर्थाः । सौर्या लृकारोत्तमशास् तथैवम् पञ्चाशदर्णा ऋषिभिस् भुगीताः"[5] इति । तत्तर याज्ज्ञवल्क्यशिक्क्षाचारायणीयशिक्क्षोक्ताभिर् वर्णदेवताभिर् व्यासशिक्क्षोक्तानावँ वर्णदेवतानावँ विसवँवादो दृश्श्यते । स च शाखाभेदमूलकतया समाधेयऽ प्रतिभाति ॥१३४–१३५॥

इति वर्णनिरूपणाद्ध्यायो द्वितीयः ॥

---

१. श्लो. १५–१६ (शि. स., पृ. १३६) । २. पृ. १४ ।
३. सू. ४८९–४९० । ४. व्या. शि. टि., पृ. १८२ ।
५. सू. ५६–५८ ।

अथ तृतीयोऽध्यायः

स्वरनिरूपणम्

१. स्वरपरिचयः

स्वरो ध्वनिविशेषो हि नृकण्ठविवरोत्थितः ।
वर्तमानो व्यञ्जनेऽपि स स्स्वरेऽस्ति विशेषतः ।।१।।

यद्द्यपि स्वरशब्दः पाणिनीये व्याकरणेऽजिति व्यवह्रियमाणानाम् वर्णानामपि वाचकः[1], "उपदीनस् स्वरश् शिक्षकस्य" इत्यादौ सामान्यतया कण्ठनिर्गतद्ध्वनेर् वाचकः, वीणादितन्त्र्युत्थस्य वेणुवादिसुषिरवाद्द्योत्थस्य च वाचकः, स्वरशब्दस्य व्युत्पत्तिश् च "स्वृ शब्दोपतापयोः"[2] इति पठिताच् शब्दनार्थवृत्तेस् स्वृधातोर् भवतीति विद्द्वांसो मन्यन्ते[3], तथापि वर्णरूपशब्दविशेषस्य धर्मविशेषरूपेऽर्थेऽत्तर स्वरशब्दः प्रयुक्तो ज्ञेयः । यद्द्यपि सर्वेष्वपि वर्णेषु अयन् धर्मो भवतीति व्यञ्जनेष्वपि स्वरो भवत्येव, तथा च पाणिनीयव्याकरणभाष्यकारः— "वाढमर्थो यद्द्यते व्यञ्जनस्यापि गुणा लक्ष्यन्ते । ननु च प्रत्यक्षमुपलब्ध्यन्ते इषेत्वोर्ज्जे त्वा"[4] इति वदन् व्यञ्जने स्वरविशेषधर्मश्श्रवणम् प्रतिपादयति; शिक्षाकारा अपि व्यञ्जनेष्वपि स्वरविशेषश्श्रुतिम् प्रतिपादयन्ति[5]; तथापि व्यञ्जनानि पदेषु वाक्येषु च स्वतन्तरं स्वरन् नोपगृह्णन्ति प्रायेण[6], किन्तु स्वाश्श्रयभूतस्य अकारादेस् स्वरस्य उदात्तादिकं स्वरमेवोपगृह्णन्ति इति अयं स्वररूपो धर्मो विशेषतस् स्वराणामेवेति मन्यते । अस्य स्वररूपस्य वर्णधर्मविशेषस्य स्वरूपम् उदात्तत्वादिनिरूपणेनैव स्फुटम् भवितुमर्हति ।।१।।

---

१. ऋ. प्रा. १।३; तै. प्रा. १।५ । २. पा. धा. पा. १।६५४ । ३. ऋ. प्रा. उ. भा. १।३; धातुकाव्यव्याख्यायाम् २।२३ । ४. १।२।२९–३० । ५. व. प्र. शि. श्लो. ८६–८७; ना. शि. २।५।२–४; या. शि. श्लो. ११८–११९ (शि. स., पृ. १९) । ६. व्या. शि. सू. ३१६–३१७, स. स. शि. श्लो. ५५ ।

२. स्वरभेदाः

उदात्तश् चाऽनुदात्तश् च स्वरितश् चेति स त्रिधा ।
कम्पो वा प्रचयो वोच्चतर-सन्नतरौ क्वचित् ॥२॥
कम्पञ् च प्रचितञ् चोच्चतर-नीचतरावपि ।
मुख्येषु त्रिषुसम्मेलत्य प्रोक्तास् सप्त स्स्वराः क्वचित् ॥३॥

उक्तस्वरूपा वर्णधर्मविशेषा मुख्यतया त्रय एवोक्ताः प्रायेण सर्वत्र[1] उदात्तोऽनुदात्तस् स्वरित इति । किन् तु उक्तेभ्यस् त्रिभ्यो विलक्षणः कम्पो बहुषु ग्रन्थेषु उल्लिखितः[2] । कम्पस्स्य योजनेन चत्वारस् स्वरभेदा भरतनाट्यशास्त्रेऽपि गणिताः । तथाहि— "उदात्तश् चाऽनुदात्तश् च स्वरितः कम्पितस् तथा । वर्णाश् चत्वार एव स्स्युः पाठ्ययोगे तपोधनाः"[3] इति । प्रचयोऽपि बहुषु ग्रन्थेषु उल्लिखितः । तथा हि प्रचयस्स्य योगेन चत्वारस् स्वरभेदास् शैशिरीयशिक्षायाम् "उदात्तश् चाऽनुदात्तश् च स्वरितः प्रचयस् तथा"[4] इति; स्वराष्टकशिक्षायामपि "उदात्तानुदात्तस्वरितप्रचयास् स्वराः"[5] इति; व्यासशिक्षायाञ् च "नीचोच्चस्वारप्रचयाः क्रमाद् ज्ञेयाः प्रजापतौ"[6] इति, कौहलीयशिक्षायाञ् च— "उदात्तश् चाऽनुदात्तश् च स्वरितः प्रचयस् तथा। इति चत्वार भागे(?) हि स्वराः प्रोक्ता मनीषिभिः"[7] इति; माण्डूक्या शिक्षायाञ् च "उदात्तश् चाऽनुदात्तश् च स्वरितः प्रचयस् तथा । चतुर्विधस् स्वरो दृष्टस् स्वरचिन्ताविशारदैः"[8] इति गणितास् सूचिता वा । "सैषा ज्ञापकाभ्यामुदात्तानुदात्तयोर् मद्ध्यमेकश्श्रुतिरन्तराल हिरयते"[9] इति वदन् पतञ्जलिमुनिरपि एकश्श्रुत्यपरपर्यायस्स्य प्रचयस्स्य त्रिभ्यस् स्वरेभ्यो भिन्नत्वं सूचयति । "अनुदात्तो हृदि ज्ञेयो मूर्ध्न्युदात्त उदीरितः । स्वरितः कर्णमूलीयस् सर्वस्मिन् प्रचयस् स्मृतः"[10] इत्यादीनि वचनानि, स्वरजातिवर्णगुणप्रतिपादकानि

---

१. ऋ.प्रा. ३।१; शु.य.प्रा. १।१०८–१३२; तै.प्रा. १।३८–४७; ऋ. त. सू. ५१–६६; शौ. च. १।१४–१६ । २. ऋ. प्रा. ३।२४; शु. य. प्रा. ४।१४०; तै. प्रा. १९।३; शौ. च. ३।६५; शै. शि. श्लो. ६७, ९४; पा.शि.श्लो. ३०, व. प्र. शि. श्लो. ६८, ७०, ७१, ७३, ७४; ना. शि. २।१।१०, २।२।१–४ इ. । ३. १७।१०९ । ४. श्लो. ९ । ५. शि. स., पृ. ३६३ । ६. सू. २९३ । ७. श्लो. २ । ८. श्लो. १९ । ९. पा.व्या.भा.१।२।३३ । १०. पा.शि.श्लो. ४८ ।

वाक्यानि[1] अपि प्रचयस्य चतुर्थस्वरत्वे मानानि । आचार्येण पाणिनिना उच्चतरस् सन्नतरोऽनुदात्ततरापरपर्यायश् च पृथक् प्रतिपादितौ प्रतीयेते[2]। वर्णरत्नप्रदीपिकायामपि अनुदात्ततरो वैयाकरणसम्मतत्वेनोल्लिखितः[3]। नारदीयशिक्षायान् तु "उदात्तश् चाऽनुदात्तश् च स्वरितप्रचिते तथा । निघातश् चेति विज्ञेयस् स्वरभेदस् तु पञ्चधा"[4] इति पञ्चविधत्वं स्वरस्योक्तम् । यद्द्यपि भट्टगोभाकरेण प्रचयपरकस् स्वरित एव निघात इत्युक्तन् तथापि तत्तर निघातस् सन्नतरापरपर्यायत्वेन प्रयुक्तः प्रतीयते । पाणिनीयव्याकरणभाष्यकारेण तु "त एते तन्तरे तरनिर्देशे सप्त स्वरा भवन्ति– उदात्त उदात्ततरोऽनुदात्तोऽनुदात्ततरस् स्वरितस् स्वरिते य उदात्तस् सोऽन्येन विशिष्ट एकश्श्रुतिस् सप्तमः"[5] इति । अत्तर 'स्वरिते य उदात्तस् सोऽन्येन विशिष्टः' इति कम्पः प्रोक्त इति अस्माकम् प्रतिभाति । कय्यटनागोजिभट्टादीनामपि एतदेवाऽभिमतम् प्रतीयते । एकश्श्रुतिस् तु प्रचय एव, "स्वरितात् संहितायामनुदात्तानाम्"[6] इति पाणिनिनाऽनुशिष्टाया एकश्श्रुतेरेव शिक्षासु प्रचयत्वेन प्रतिपादनस्य दर्शनात्[7]। केचित् तु "उच्चादुच्चतरन् नास्ति नीचान् नीचतरन् तथा"[8] इति वचनादुदात्ततरानुदात्ततरयोस् स्वीकारन् न कुर्वते । अयम् पक्षः पाणिनीयव्याकरणभाष्यकारेणाऽपि "अतन्तरन् तरनिर्देशः"[9] इति प्रथमकल्पत्वेन प्रदर्शितः प्रतीयते । स्वरितभेदास् तु स्वरप्रभेदा इति ते न स्वरभेदगणने गण्यन्ते ।।२–३।।

३. स्वराणावँ वर्णभेदस्य जनकता

स्वरभेदा इमे वर्णभेदञ् च जनयन्ति हि ।
अष्टादशप्रभेदयँ यदवर्णादिकुलं स्मृतन् ।।४।।

एते उदात्तादिस्वररूपधर्मभेदा वर्णभेदञ् च जनयन्ति । अत एव च उदात्तादिधर्मभेदभिन्नतत्वेन अवर्णादेरष्टादशविधत्वमापिशलिमुनिप्रभृतिभिः प्रतिपादितम्[10] । पाणिनीयव्याकरणवार्तिकेऽपि— "भेद-

---

१. व्या. शि. सू. ४९१–४९२ । २. अष्टा. १।२।३५, ४० । ३. श्लो. ८३ (शि.स., पृ.१२४)। ४. १।७।१९ । ५. १।२।३३ । ६. १।२।३९ । ७. व. र. प्र. शि. श्लो. ७६; ना. शि. २।७।७; व्या. शि. सू. २९३ । ८. पारा. शि. श्लो. ७; अमो. शि.श्लो. ८२; मा. शि. श्लो. ५५ । ९. १।२।३३ । १०. आ.शि.सू. ६।२ ।

कत्त्वात् स्वरस्य"[१] इति पठ्यते। तद्भाष्ये च— "भेदका उदात्तादयः। कथम् पुनर् ज्ञायते भेदका उदात्तादय इति। एवं हि दृश्यते लोके। य उदात्ते कर्तव्येऽनुदात्तङ करोति खण्डिकोपाध्यायस् तस्मै चपेटान् ददाति अन्न्यत्त्वङ करोषीति"[२] इति। ननु तत्र "अभेदका गुणा इत्येव न्याय्यम्। कुत एतत्। यदयम् 'अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः'[३] इत्युदात्तग्रहणङ करोति। यदि भेदका गुणास् स्युरुदात्तमेवोच्चारयेत्"[४] इत्यप्युक्तमिति चेत् तत्रैव "यदि तर्ह्यभेदका गुणा अनुदात्तादेरन्तोदात्ताच् च यदुच्यते तत् स्वरितादेस् स्वरितान्ताच् च प्राप्नोति। नैष दोषः। आश्रीयमाणो गुणो भेदको भवति। तद् यथा। शुक्लमालभेत, कृष्णमालभेत। तत्र यश् शुक्ल आलब्धव्ये कृष्णमालभते न हि तेन यथोक्तङ कृतम् भवति"[५] इति उदात्ततत्वादीनाम् भेदकतायास् समर्थनमपि कृतमेव मन्तव्यम्। पाणिनिनाऽपि उक्तस्स्थले उदात्तोच्चारणेनैवोदात्ततत्वानुशासनस्य कर्तुं शक्यत्वेऽपि शास्त्राविनाशदृढतायै स्पष्टतादिप्रयोजनाय वा उदात्त इति पदम् प्रयुक्तम् भवेत्। अत उदात्ततत्वादीनावँ वर्णश्रुतिभेदजनकत्वन् निर्विवादमेव स्वीकर्तव्यम्। उदात्तलक्षणस्य उच्चैस्त्वस्य "आयामो दारुण्यमणुता खस्येत्युच्चैःकराणि शब्दस्य"[६] इति शब्दधर्मतायाः प्रतिपादनादुच्चैस्त्वादयो हस्तादिशरीराऽवयवधर्मा इति मन्दकतराणाम् भ्रमोऽपि सुदूरमपास्तः। यथा तु उच्चैस्त्वादिकस्य शब्दधर्मपरतायाः (न तु स्थानभागपरतायाः) पाणिनीयव्याकरणवार्तिककारभाष्यकारसम्मतत्वन् तथा प्रतिपादयिष्यतेऽनुपदमेवोदात्तलक्षणप्रतिपादने। यद्द्यपि तैत्तिरीयप्रातिशाख्यादौ "अनुप्रदानात् संसर्गात् स्थानात् करणविन्न्ययात्। जायते वर्णवैशेष्यम् परीमाणाच् च पञ्चमात्"[७] इत्यादौ वर्णभेदजनकत्वेन स्वराणाम् पृथग् गणना स्फुटन् न कृता तथापि अनुप्रदानान्तर्गततत्वेन साऽप्यभिप्रेतैवेति व्याख्यातुं सुशकम्। अथवा यथा कृष्णोऽपि गौश् शुक्लोऽपि गौरिति शुक्लकृष्णयोर् गोत्वजातिम् प्रति अकिञ्चित्करत्वम्, व्यक्तिम् प्रति तु भेदकत्वमेव; तथैव उदात्तोऽप्यकारोऽनुदात्तोऽप्यकार इति उदात्ततत्वादेरपि वर्णजातिम् प्रत्यकिञ्चित्-

---

१. पा. व्या. भा. १।१।१ वा. १३। २. तत्रैव।
३. अष्टा. ७।१।७५। ४. पा. व्या. भा. १।१।१, वा. १३।
५. तत्रैव। ६. पा. व्या. भा. १।२।२९–३०। ७. २३।२।

करत्वम् वर्णव्यक्तिम् प्रति तु भेदकत्वमेवेति वर्णजातिभेदकरेषु अनुप्प्रदानादिषु उदात्तत्वादीनामनुपादानमेव। पाणिनीयशिक्षादौ तु "... तेषाम् (वर्णानाम्) विभागः पञ्चधा मतः। स्वरतः कालतः स्थानात् प्रयत्नाऽनुप्प्रदानतः"[1] इत्यादिना उदात्तादीनां स्वराणामपि वर्णभेदजनकत्वं स्फुटम् प्रोक्तम् ॥४॥

४. उदात्तलक्षणम्

आयामः कण्ठतन्त्र्यो रौक्ष्यन् ध्वनेस् स्वाणु कण्ठखम्।
उच्चारणे यस्स्य तीक्ष्णस् स्वरस् सोदात्त उच्च्यते ॥५॥

यस्स्य स्वरस्स्योच्चारणे श्वासनलिकामुखपार्श्वयोस् स्थितयोस् तन्त्र्योर् निग्रहाद् आयामो दैर्घ्यापरपर्यायो भवति, स्वरजनकवायोः प्रभूततया वेगेन निस्सरणेन च कण्ठस्स्याऽऽपेक्षिकतयाऽधिकतरं शुष्कीकरणात् स्वरोपादानद्ध्वने रूक्षता च भवति, श्वासनलिकाविवरञ्च आयतस्वरतन्त्र्यवरोधेन शुष्ठु आ समन्ताद् अणु भवति, स तीक्ष्णस् स्वर उदात्त इत्युच्च्यते इत्यर्थः। तन्त्र्योर् निग्रहमूलक आयाम इत्युपलक्षणम्, सर्वेषामेवोच्चारणावयवानाम् निग्रहेण दार्ढ्यञ्च करणीयम्। उदात्तनिर्वचनञ्च "अनन्वर्थग्रहणम् विज्ञास्स्यते ...ऊर्ध्वमात्तमिति चाऽत्र उदात्तम्"[2] इति पतञ्जलिमुनिना प्रदर्शितम्। उदात्त उच्च इति च पर्यायवचनौ। उदात्तलक्षणञ्च ऋग्वेदप्रातिशाख्ये "उदात्तश् चाऽनुदात्तश् च स्वरितश् च तत्रयस् स्वराः। आयामविश्श्रम्भाक्षेपैस् त उच्च्यन्तेऽक्षराश्श्रयाः"[3] इत्यत्तर सङ्क्षेपेणोक्तम्। शुक्लयजुर्वेदप्रातिशाख्येऽपि "आयाम-मार्द्दवा-ऽभिघाताः, उच्चनीचविशेषः"[4] "उच्चैरुदात्तः, नीचैरनुदात्तः, उभयवान्त्स्वरितः"[5] इति उदात्तादिलक्षणानि उक्तानि। तैत्तिरीयप्रातिशाख्येऽपि— "उच्चैरुदात्तः, नीचैरनुदात्तः, समाहारस् स्वरितः"[6] इति, "आयामो दारुण्यमणुता खस्स्येत्युच्चैःकराणि शब्दस्स्य, अनन्ववसर्गो मार्दवमुरुता खस्स्येति नीचैःकराणि"[7] इति च उदात्ताऽऽदिलक्षणानि स्फुटतरम् प्रतिपादितानि। शौनकीयचतुरद्ध्यायिकाख्ये अथर्ववेदप्रातिशाख्ये च "समानयमेऽक्षरमुच्चैरुदात्तन् नीचैरनुदात्तमाक्षिप्तं स्वरितम्"[8] इत्युक्तम्। आपिशलिशिक्षासूत्रे च—

---

१. श्लो. ९–१०। २. पा. व्या. भा. १।२।३२। ३. ३।१। ४. १।३१, ३२। ५. १।१०८–११०। ६. १।३८–४०। ७. २२।९–१०। ८. १।१४–१६।

"यदा सर्वाङ्गानुसारी प्रयत्नस् तीव्रो भवति तदा गात्तरस्स्य निग्ग्रहꣳ कण्ठबिलस्स्य चाऽणुत्त्वं स्वरस्स्य च वायोस् तीव्रगतित्त्वाद् रौक्क्ष्यम् भवति तमुदात्तमाचक्क्षते, यदा तु मन्दꣳ प्रयत्नो भवति तदा गात्तरस्स्य स्रंसनङ्ग कण्ठबिलस्स्य महत्त्वं स्वरस्स्य च वायोर् मन्दगतित्त्वात् स्निग्धता भवति तमनुदात्तमाचक्क्षते, उदात्तानुदात्त-स्वरसन्निपातात् स्वरित इति"[1] इति उदात्तादिलक्क्षणं स्फुटतमम् प्रतिपादितम्। शैशिरीयशिक्क्षायाम् च "नीचैस्स्वरोऽनुदात्तस् स्यादुच्चैश् चोदात्त उच्च्यते। स्वरितन् तत्समाहारस् तदैक्क्यम् प्रचयस् स्मृतः"[2] इति उदात्तलक्क्षणे उच्चैस्त्वं श्रुतिगतत्त्वेनैवोक्तम्[3]। वर्णरत्नप्रदीपिकायां शिक्क्षायाम् च— "वर्णेषूच्चार्यमाणेषु विकारास् त्रयस् तनोः। आयाममार्दवौ चोभौ (आयाममार्दवे चोभे?) तृतीयश् चाऽभिघातकः। गात्तरस्स्योच्च-(र्ध्व-) मधस् तिर्यग्गमनं स्याद् यतꣳ क्रमात्। तच् चोदात्तेऽनुदात्ते च स्वरिते च प्रकीर्तितम्"[4] इति उदात्तादद्द्युपलक्क्षणानि प्रोक्तानि। व्यासशिक्क्षायाम् च— "उदात्तोच्चारणे तस्स्य देहदैर्घ्यम् भवेद् यतः। उच्चारणेऽनुदात्तस्स्य देहस्स्य ह्रस्स्वता भवेत्। भवेत् तत्तर समाहारस् स्वरितश् चोच्चनीचयोः"[5] इत्युदात्तादद्द्युच्चारणोपलक्क्षणानि वर्णितानि। कौहलीयशिक्क्षायाम् च—"उच्चैरुच्चार्यते यस् तु स उदात्त उदाहृतः। आयामो दृढता रौक्क्ष्यङ्ग गात्त्रेऽङ्गेषु तथा गले। उच्चत्त्वकारकानेतानाहुꣳ प्राज्ज्ञा विशेषतः। नीचैरुच्चार्यते यस् तु सोऽनुदात्तोऽभिधीयते। प्रस्रता (प्रसृतिः? श्लथता?) मृदुता स्स्थौल्ल्यङ्ग गात्तरादेꣳ कारकवँ विदुः। नीचत्त्वे, स्वरितꣳ प्रोक्तस् तयोस् सन्धान इष्यते। तस्स्य तु स्स्वरितस्स्याद्द्व्यमर्धमुच्चैस्तरावँ विदुः। शेषस्स्यार्धस्स्य नीचत्त्वङ्ग किञ्चित्त्वाद् भृशमिष्यते। केचिदस्स्याऽऽदिमम् भागमुदात्तसदृशवँ विदुः। अनुदात्तसमश् शेष एतावन्तो द्विधा स्मृताः"[6] इति उदात्तादिविवरणङ्ग कृतम्। सर्वसम्मतशिक्क्षायामपि— "उदात्तादिस्स्वराधारवर्णानामिह संस्थितेः। प्रोच्च्यते स्वरसंस्थानमज्ज्ञानाम् ज्ञानसिद्धये। यदेतद् देहदीर्घत्त्वमङ्गानान् दृढता च या।

---

१. ८।२१, २२, २३। २. श्लो. ६०। ३. शौनकशिक्क्षायामप्ययं श्लोकꣳ पट्ठ्यते, श्लो. ५४। ४. श्लो. ८८–८९ (शि. स., पृ. १२४–१२५)। ५. सू. २८८–२९०। ६. श्लो. ३–६।

कण्ठाकाशस्य कृशता निमित्तान्युच्चजन्मनि। ह्रस्वत्वयं यच्च देहस्य त्वङ्गानाम् मृदुता च या। कण्ठाकाशमहत्त्वञ्च नीचजन्मनि हेतवः। कारणं स्वरितोत्पत्तौ समाहारोऽनयोर् भवेत्"[1] इति श्रुतिगतोच्चैस्त्वादिकमेवोदात्तादौ स्वीकृत्योदात्तादिविवरणञ्च कृतम्। पारिशिक्षायाञ्च— "यद् गात्त्रदैर्घ्यन् दृढता च या ध्वनेस् तथाऽणुता कण्ठबिलस्य या च। एतानि कुर्वन्ति च शब्दमुच्चैर् यद् ध्रस्वता या मृदुता स्वरस्य। या विस्तृता (-तिः?) कण्ठबिलस्य चैता४ कराणि शब्दन् निहतञ् च नित्यम्"[2] इति शब्दगतोच्चतादिरूपमेव उदात्तत्वादिकमभिप्रेतम्। न केवलं शिक्षका एव उदात्तादीनां श्रुतिगतोच्चैस्त्वादिप्रयुक्तानि स्वरूपाण्याहु४ किन् तु वैयाकरण४ पाणिनिमुनिरपि "उच्चैरुदात्तो नीचैरनुदात्तस् समाहारस् स्वरितः"[3] इति उदात्तादीनां शिक्षकै४ प्रतिपादितानि स्वरूपाण्येवाऽनुवदति। तद्व्याख्याने वार्तिककारभाष्यकारौ च— "उच्चनीचस्याऽनवस्थितत्वात् सञ्ज्ञाऽप्रसिद्धिः। इदमुच्चनीचमनवस्थितपदार्थकम्। तदेव हि कञ् चित् प्रति उच्चैर् भवति कञ् चित् प्रति नीचैः। एवङ् कञ् चित् कश् चिदधीयानमाह किमुच्चै रोरूयसेऽथ नीचैर् वर्ततामिति। तमेव तथाऽधीयानमपर आह किमन्तर्दन्तकेनाऽधीषे उच्चैर् वर्ततामिति। एवमुच्चनीचमनवस्थितपदार्थकन् तस्याऽनवस्थानात् सञ्ज्ञाया अप्रसिद्धिः। एवन् तर्हि लक्षणङ् करिष्यते। आयामो दारुण्यमणुता खस्येत्युच्चै४कराणि शब्दस्य[4]। आयामो गात्त्राणान् निग्रहः। दारुण्यं स्वरस्य दारुणता रूक्षता। अणुता खस्य कण्ठस्य सर्वावृतता। उच्चै४कराणि शब्दस्य। अथ नीचै४कराणि शब्दस्य। अनुन्ववसर्गो मार्दवमुरुता खस्येति नीचै४कराणि शब्दस्य[5]। अनुन्ववसर्गो गात्त्राणां शिथिलता। मार्दवं स्वरस्य मृदुता स्निग्धता। उरुता खस्य महत्ता कण्ठस्य। इति नीचै४कराणि शब्दस्य। एतदप्यनैकान्तिकम्। यदल्पप्राणस्य सर्वोच्चैस् तन् महाप्राणस्य सर्वनीचैः। सिद्धन् तु समानप्रक्रमवचनात्। सिद्धमेतत्। कथम्। समाने प्रक्रम इति वक्तव्यम्। क४ पुन४ प्रक्रमः। उर४ कण्ठश् शिर इति"[6] इति शङ्कासमाधानपूर्वकम् उदात्तानुदात्तयो४

---

१. श्लो. ३८–४१। २. सू. ८१–८२। ३. अष्टा. १।२।२९–३१। ४. तै. प्रा. २२।९। ५. तत्त्रैव २२।१०। ६. पा. व्या. भा. १।२।२९–३०।

प्रातिशाख्यशिक्षाकारैः प्रतिपादिते एव स्वरूपे समर्थयेते। शब्दस्य उच्चैस्त्वन् तारत्वन् तीक्ष्णत्वञ् चेत्यनर्थान्तरमेवेति च उदाहृतशिक्षावचनेभ्यः, स्वरितविशेषतीक्ष्णता–तारतम्यप्रतिपादकेभ्य उदाहरिष्यमाणशिक्षावाक्येभ्यश् च निश्चेतुं शक्यते। "तीव्रार्थतरमुदात्तम्", "अल्पीयोऽर्थतरमनुदात्तम्"[1] इति यास्कवचनमपि उदात्तानुदात्तयोस् तैक्ष्ण्याऽतैक्ष्ण्ये सूचयत् प्रतीयते।

ननु पाणिनीयव्याकरणभाष्यकारेण उदात्ततत्वस्य शब्दगतोच्चैस्त्वरूपताया अनुदात्ततत्वस्य शब्दगतनीचैस्त्वरूपतायाश् च अनैकान्तिकत्वम् प्रदर्श्य तम् पक्षन् दूषयित्वा शब्द-(वर्ण-)स्थानगतोच्चैस्त्वनीचैस्त्वप्रयुक्ततायाः प्रतिपादनञ् कृतमिति स्वीकृत्य काशिकाकारेण "ताल्वादिषु हि भागवत्सु स्थानेषु वर्णा निष्पद्द्यन्ते, तत्र यस् समाने स्थाने ऊर्ध्वभागनिष्पन्नोऽच् स उदात्तसञ्ज्ञो भवति"[2] इति, "समाने स्थाने नीचभागे निष्पन्नोऽच् अनुदात्तः"[3] इति चोक्तम्, न्यासपदमञ्जरीकाराभ्यामपि तदेव समर्थितम्, भाष्यप्रदीपकारेणाऽपि "एकस्मिँस्ताल्वादिके स्थाने ऊर्ध्वाधरभागयुक्ते ऊर्ध्वभागेनोच्चार्यमाण उदात्तः"[4] इत्युक्तम्। वैयाकरणसिद्धान्तकौमुदीकारेण च "ताल्वादिषु सभागेषु स्थानेषूर्ध्वभागे निष्पन्नोऽनुदात्तसञ्ज्ञस् स्यात्।"[5] इत्येवोक्तम्; काशिकाविवरणपञ्जिकाकारेण शब्दशास्त्रसहकारपादपपदमञ्जरीकारेण च "(उच्चैस्त्वेन श्रुतिप्रकर्षो) यदि गृह्यते, उपांशुप्रयोगे उदात्तादिसञ्ज्ञा न स्यादित्यव्याप्तिः"[6] इत्युक्त्वा शब्द–(श्रुति–) गतस्योच्चैस्त्वस्य ग्रहणेऽनुपपत्तिः प्रदर्शिता, सैव चाऽनुपपत्तिर् नागेशेन बृहति लघौ च शब्देन्दुशेखरे[7] वासुदेवदीक्षितादिभिर् बालमनोरमादौ[8] च समर्थितेति कथं शब्द–(श्रुति–) गतोच्चैस्त्वनीचैस्त्वयोः उदात्तताऽनुदात्ततयोः प्रतिपादकैर् ऋग्वेदप्रातिशाख्य– तैत्तिरीयप्रातिशाख्या-ऽऽपिशलिशिक्षाऽऽदिवचनैस् सह पाणिनीयव्याकरणभाष्यकारवचनस्याऽविरोधस् समानार्थकत्ववँ् वा प्रतिज्ज्ञायते? इति केचिद् भणेयुः।

---

१. निरुक्ते ४।४।४, (४।२५)। २. १।२।२९।
३. १।२।३०। ४. १।२।२९–३०। ५. सञ्ज्ञाप्रकरणे।
६. १।२।२९। ७. १।२।२९ इति सङ्केत्त्ये सूत्त्रे, सञ्ज्ञाप्रकरणे।
८. वै. सि. कौ. सञ्ज्ञाप्प्रकरणव्याख्याने। प्रतिसँस्कृतसिद्धान्तकौमुद्द्याञ् च।

तत्तरेदवँ वक्तव्यम्— पाणिनीयव्याकरणभाष्यकारवचनम् प्रमाणन् न वा ? बाढम् प्रमाणम् । ऋग्वेदप्रातिशाख्यतैत्तिरीयप्रातिशाख्याऽऽपिशलिशिक्षासूत्रादिवचनम् प्रमाणन् न वा ? प्रमाणमेव । कथन् तर्हि प्रमाणवचनयोर् विरोधस् स्यात् ? प्रमाणप्रमाणाभासयोरेव हि विरोधः प्रतीयते इति चेत् ? नाऽस्ति विरोधः, विषयव्यवस्थयाऽविरोधस्स्याऽऽस्थेयत्वात् । तत्तत्प्रातिशाख्यविषयेषु चरणेषु तत्तत्प्रातिशाख्योक्तरूपता उदात्तत्वादेः, सामान्यतया वेदेषु लोके च पाणिनीयव्याकरणभाष्यकारोक्तरूपतेति विषयविभाग इत्यविरोध इति। एवन् तर्हि किन् नु पाणिनीयव्याकरणभाष्यकारोऽर्धकाराऽर्धौकारविषये इव "पार्षदकृतिरेषा तत्तर भवताम्" इत्युक्त्वा अस्मिन् विषयेऽपि त्वदुक्त्यनुग्राहिणीवँ व्यवस्थामप्रदर्श्य तैत्तिरीयप्रातिशाख्यादिवचनेऽनैकान्तिकत्वन् दर्शयित्वा तद् दूषयति ? अस्य प्रश्नस्य युक्तियुक्तमुत्तरन् न माम् प्रति भाति, त्वयाऽपि अस्य प्रश्नस्योत्तरमवश्यन् देयमिति चेद् अत्तरोच्यते–वार्तिककारेण भाष्यकारेण च प्रथम सूत्तरस्थयोर् उच्चैर्नीचैःपदयोश् शब्दस्य दूरश्श्रवणीयत्वप्रयोजकपरिमाणाऽऽधिक्यरूपमुच्चत्वन् दूराऽश्श्रवणीयत्वरूपपरिमाणाल्प्यरूपन् नीचत्वञ् चोपादाय अनवस्थितार्थकत्वाऽऽपत्तिरूपस् सन्देहः प्रदर्शितः, लोके परिमाणाधिके (स्थूले) शब्देऽपि उच्चैस्त्वस्य परिमाणेनाल्पे (स्वाणौ) शब्देऽपि नीचैस्त्वस्य प्रसिद्धेः; अयञ् च सन्देहश् शब्दस्य उच्चारणवैशिष्ट्यप्रयुक्तन् तैक्ष्ण्यरूपमुच्चैस्त्वम् मन्द्ररूपन् नीचैस्त्वञ् च व्याख्यायाऽपाकरिष्यते इत्युक्तम्–"एवन् तर्हि लक्षणङ् करिष्यते"[२] इत्यादिना । शब्दस्य (श्रुतेस्) तीक्ष्णत्वरूपे उच्चैस्त्वे मन्द्रत्वरूपे नीचैस्त्वे च स्स्वीकृतेऽपि मनुष्याणाम् उरःकण्ठशिरःप्रभृतीनामुच्चारणाङ्गानान् नैकविधत्वान् नैकविधशक्तियुक्तत्वाच् च केन चित् तीक्ष्णत्वेन प्रयुज्यमानस् स्वरो यादृशो भवति अन्न्येन मन्द्रत्वेन प्रयुज्यमानस् स्वरोऽपि तादृशो भवति, तीक्ष्णत्वेन प्रयुज्यमानस् तु पूर्वोक्ततीक्ष्णस्वरापेक्षया तीक्ष्णतरो भवति इति पुनरपि शब्दगतस्य उच्चैस्त्वस्य नीचैस्त्वस्य च अनवस्थितार्थकत्वम् इत्याऽऽपत्तिरित्येवंरूपस् सन्देहो भवत्येवेत्युक्म्— "एतदप्यनैकान्तिकम्, यदल्पप्राणस्य सर्वोच्चैस् तन् महाप्राणस्य सर्वनीचैः"[३] इति ।

---

१. एओङ ऐऔच् इत्यत्तर वा. ४; १।१।४८, वा. ३ ।
२. पा. व्या. भा. १।२।२९–३० । ३. तत्तरेव ।

तस्य सन्देहस्य समाधानञ् च "सिद्धन् तु समानप्रक्रमवचनात्। सिद्धमेतत्। कथम्। समाने प्रक्रम इति वक्तव्यम्। कꣳ पुनꣳ प्रक्रमः। उरꣳ कण्ठश् शिर इति"[1] इति कृतम्। अस्य समाधानस्य च "समाने प्रक्रमे उच्चैरुदात्तो नीचैरनुदात्तस् समाहारस् स्वरितः" इति व्याख्यातव्यमित्यर्थः। एवञ् च सति उच्चारयितृपुरुषभेदमुपादाय यो दोष आशङ्कितस् स लक्षणे उच्चारयितृपुरुषाभेदस्योपादेयत्वस्य प्रतिपादनेन परिहृतो भवतीति भावो बोद्ध्यः। उक्तं हि कथञ् चित् काशिकाविवरणपञ्जिकाकारेणाऽपि— "तत् पुनस् समानत्वव् वक्तृरभिन्नत्वाद् वेदितव्यम्, न तु ताल्वादिस्थानस्याऽभिन्नत्वात्; अन्यथा तालव्यमेवापेक्ष्योदात्तस् स्यात्, न तु कण्ठ्यादीन्, वक्तुरभेदात् तद्द्वारेण भिन्नानामपि ताल्वादीनां समानत्वेऽपि विज्ञायमाने एष दोषो न भवति"[2] इति। ननन्वयञ् चेदभिप्रायोऽभविष्यत् तर्हि "सिद्धन् तु समानपुरुषवचनात्" इति स्फुटमवक्ष्यन् न तु 'समानप्रक्रमवचनाद्' इति चेत्, सत्यम्; किन् तु प्राचामुक्तेरनुसरणेन तथा प्रयुक्तम्। तथा हि "समानयमेऽक्षरमुच्चैरुदात्तन् नीचैरनुदात्तम् आक्षिप्तं स्वरितम्"[3] इति उक्तिर् दृश्यते पाणिनीयव्याकरणभाष्यकारात् प्राचीनस्य आचार्यशौनकस्य। यद्द्यपि समानयम— समानप्रक्रमशब्दयोरर्थौ पृथक् तथापि शैलीसादृश्यमस्त्येव। युक्तैवाऽपि चेयमुक्तिः। तथा हि पुरुषभेदेऽपि न तद्भेदात् साक्षात् स्वरतैक्ष्ण्यादिभेदꣳ किन् तु तदीयोरꣳकण्ठशिरꣳप्रधानानामङ्गानां संस्थानादिविशेषत एव पुरुषेपुरुषे स्वरतैक्ष्ण्यादिभेद इति पुरुषोरꣳकण्ठशिरꣳप्रधानानामङ्गानामेव पुरुषेपुरुषे स्वरतैक्ष्ण्यादिभेदस्य साक्षाज् जनकतेति तेषामेवाऽभेदमुपादाय समाधानयँ युक्ततरमिति प्रतिभाति। 'सिद्धन् तु समानप्रक्रमवचनात्' इत्युक्तेऽपि सन्देहो महाप्राणाऽल्पप्राणपुरुषभेदमुपादाय उपस्थापितः, समाधानम् पुरुषाभेदमुपादाय लक्षणस्य प्रवृत्तिम् प्रदर्श्य कृतमिति सन्देहोपस्थापनसमाधानशैल्याꣳ परिशीलनेनाऽपि सुज्ज्ञानमेव। "उरꣳ कण्ठश् शिरः" इति भाष्योक्तेर् न च ताल्वादिस्थानोपलक्षकता नागोजिभट्टाद्द्युक्तोचिता, तेषामुरꣳप्रभृतीनां स्वत एव स्वरविशेषनिष्पादकतायाꣳ प्रसिद्धेः। तथाहि भरतनाट्यशास्त्रे— "शारीर्यामथ वीणायान् त्रिरब्भ्यस् स्थानेब्भ्य एत्र

---

१. पा. व्या. भा. १।२।२९–३०। २. १।२।२९।
३. शौ. च. १।१४–१६।

तु। उरसश् शिरसश्च कण्ठात् स्वरश्च काकुश्च प्रवर्त्तते"[1] इति। एवमपि उदात्तत्वादीनामापेक्षिकत्वमेवार्थात् प्रतिपादितम् भवतीति अनियताऽर्थकत्वमेव तेषाम् पर्यवसितमिति चेद् इष्टापत्तेः। यथा व्याकरणादौ मात्राव्यवहार आपेक्षिकः[2], यथा च तन्त्रीस्वरसप्तकविवेकोऽप्यापेक्षिकस्[3] तथैवाऽयमुदात्तादिव्यवहारोऽपीति। आपेक्षिकत्वेऽपि 'समानपुरुषस्य समानशब्दपरिमाणके उच्चारणे तीक्ष्णस् स्वर उदात्तो मन्द्रोऽनुदात्त उभयवान् स्वरितः' इति लक्षणानां सिद्धौ बाधकस्याऽभावात्। न च उच्चैस्त्वादेश् शब्द- (श्रुति-) धर्मत्वे उपांशुप्रयोगे उदात्तत्वस्य असम्भवः, मानसजपादौ श्रुतिविशेषरूपाऽकारादिविभागस्येव तत्राऽपि तस्य सम्भवात्। उपांशुप्रयुक्तमन्द्रस्स्वरापेक्षयैव तीक्ष्णत्वस्य तत्राऽऽवश्यकात्, तादृशस्य तस्य तत्राऽपि सुतरां सम्भवाच्च।

एवञ्च सति न प्रमाणभूतयोर् मुनिवचनयोर् विरोधस्याऽऽपत्तिः; न च "समानयमे (समानप्रक्रमे वा) उच्चैरनुदात्तो नीचैरनुदात्तः"[4] इत्यार्षरन्थेषु श्रुतम् परित्यज्य अश्श्रुतस्य 'समानस्थानस्योच्चैर्भागे उत्पन्नोऽनुदात्तो नीचैर्भागे उत्पन्नोऽनुदात्तः' इत्यश्श्रुतस्य कल्पनाया अन्यथाऽनुपपत्तिशून्याया आवश्यकतेति सर्वमवदातम्। उच्चैस्त्वनीचैस्त्वयोस् साक्षादज्विशेषणत्वञ् चोदाहृतप्रातिशाख्यशिक्षाव्याकरणादिवाक्येषु स्फुटम्। तैत्तिरीयप्रातिशाख्यवाक्ये तु शब्दस्यैव (श्रुतेरेव) उच्चैस्त्वन् नीचैस्त्वञ् च कण्ठरवेणैव प्रतिपादितमिति तत्स्फुटतरम्।

इदमप्यत्रावधेयम्— यद्द्यपि काशिकाकार- काशिकाविवरणपञ्जिकाकार - शब्दशास्त्रसहकारपादपपदमञ्जरीकार - प्रासादकारादिभिरपि पाणिनीयसूत्रेऽज्विशेषणत्वेन श्रुते उच्चैस्त्वनीचैस्त्वे स्थानपरतया बलान् नीते, तथापि तैस् तेषान् तादृशमपि व्याख्यानम् "आयामो दारुण्यमणुता खस्स्येत्युच्चैश्च कराणि शब्दस्य, अनन्वसर्गो मार्दवमुरुता खस्स्येति नीचैश्च कराणि शब्दस्य" इति वचनेन सहाऽपि समन्वितमेवेति स्वीकृतमिति तत्तद्व्याख्यानगतवाक्यशेषेभ्योऽवसीयते। यद्-

---

१. १७।१०६। २. पा. व्या. भा. १।१।७०।
३. पा. शि. शि. स. स., पृ. १००, १०६। ४. पाणिनीये उच्चैरुदात्त इति सूत्रेऽपि अजित्यनुवर्तते इति तद्भाष्ये प्रतिपादितमस्ति।

द्यप्येतावताऽपि तेषाँ व्यामोह इवैव सूच्यते; तथापि प्रदीपकारो-द्द्योतकारशब्दकौस्तुभवैयाकरणसिद्धान्तकौमुदीकारादिभिस् तु स्वकीय-स्य व्याख्यानस्य "आयामो दारुण्यम्" इत्यादिना मुनिवचनेन सहाऽसमन्वितत्वमेव स्वीकृतम् प्रतीयते इति एतेषामस्मिन् विषये गाढ-तरो व्यामोहः प्रतीयते ।

एवञ् च वेदैकप्रवणानाम् प्रातिशाख्यशिक्षादिकाराणाँ वेद-विदुषाम् पाणिनिकात्यायनपतञ्जलीनाञ् च वचनमेवाऽत्र उदात्तादि-स्स्वरस्वरूपविषये सर्वथा ग्राह्यम्, वेदोच्चारणे एव स्वराणाँ याथार्थ्येन प्रयोगे सातिशयजागरूकतायास् स्वाभाविकत्वेनाऽऽवश्य-कत्वेन च तेषान् तत्स्वरूपयथार्थज्ज्ञानस्य सुलभत्वाद्, भाषायामपि तेषामेव समये स्वराणाम् प्रयोगस्य परम्पराया अविच्छिन्नतत्वात्, न तु वेदनिरपेक्षकल्पस्य जैनस्य जयादित्यस्य तदनुयायिनाञ् जिनेन्द्र-बुद्धि-हरदत्तादीनाँ वा, नैव वाऽङ्गिनाँ विस्मृत्यैकमङ्गमेव संसम्मृशतामर्वाचीनानाम् भट्टोजिदीक्षितनागोजिभट्टप्रभृतीनाँ वचनञ् ग्राह्यमिति निष्कर्षः ।।५।।

५. अनुदात्तस्वरूपम्

मन्द्रस् स्वरोऽनुदात्तस् स्याद् यस्य ह्युच्चारणे भवेत् ।
तन्त्र्योरन्वसर्गस् स्नैग्ध्यन् ध्वनेश् चोरु कण्ठखम् ।।६।।

यस्य स्वरस्योच्चारणे श्वासनलिकामुखविवरपार्श्वयोस् स्थितयोस् तन्त्र्योरन्वसर्गश् श्लथत्वापरपर्यायः, अस्या भणितेरुपलक्षणा-त्मकत्वाद् अन्येषामप्युच्चारणावयवानां श्लथता भवति, स्वरजनक-वायोरल्पतया वेगस्य मान्द्याच् च कण्ठस्योल्लेख्यतया शुष्की-करणस्याऽभावात् स्वरोपादानद्ध्वनेस् स्निग्धता च भवति, श्लथस्वर-तन्त्र्योः परस्परन् दूरस्थत्वेन तदवरोधस्याऽऽल्प्याच् श्वासनलिका-मुखबिलवँ विस्तृतञ् च भवति स मन्द्रस् स्वरविशेषोऽनुदात्तस् स्यादि-त्यर्थः । नीचो निहतोऽनुदात्त इत्यनर्थान्तरम् । न्यास-नियत—न्यस्त[1]-सन्न[2]-शब्दैरपि अनुदात्त एव उच्यते । अन्यत् सर्वमुदात्त-स्वरविवरणप्रसङ्गे एवाऽनुपदमेव विविच्य प्रतिपादितन् तत एवाऽ-वगन्तव्यम् ।।६।।

---

१. ऋ. प्रा. ३।१७, २३, २७ । २. अष्टा. १।२।४० ।

६. स्वरितस्स्वरूपम्

यस्स्याऽऽद्द्यभागस् तूदात्त उदात्ततर एव वा।
शेषोऽनुदात्तो वाऽप्यप्येकश्श्रुतिस् स स्स्वरितस् स्मृतः ॥७॥

यस्स्य स्वरस्स्याऽऽद्द्यो भाग उदात्त उदात्ततरो वाऽवशिष्टो भागस् तु अनुदात्तो वा एकश्श्रुतिर् वा स स्वरस् स्वरित इति स्मृतोऽस्ति मुनिभिरित्यर्थः। स्वरितस् स्वार इत्यपि व्यवहियते। कुत्रचित् प्रवण इत्यप्युच्यते[1]। द्वियम[2]-द्विस्स्वर[3]-चय[4]-शब्दैरपि स्वरित× प्रतिपाद्द्यते। यत् तु ऋक्तन्त्रे उन्नीचशब्देनाऽपि स्वरित× प्रतिपाद्द्यते इति केन चिदुक्तन्[5] तदशुद्धमेव; उन्नीचेमे इति ऋक्तन्त्रसूत्रे (स्वरितम्) उत् = उच्चीभवति नीचे = अनुदात्ते परे मे = विरामे परे वेत्यर्थस्स्याऽऽश्श्रयणीयत्वात्। ऋक्तन्त्रकारशैलीविशेषेण प्रतारित× खलु मनुष्यस् तच्शैल्यपरिज्ञानादेवाऽन्यथा मनुते। तत्र सामवेदे आर्चिके शौनकिनामथर्ववेदे शुक्लयजुर्वेदे लोके च स्वरितस्स्याऽऽद्द्यो भाग उदात्तः; ऋग्वेदे तैत्तिरीयाणाय् यजुर्वेदे च स्वरितस् स्याऽद्द्यो भाग उदात्ततर इति तत्तत्प्रातिशाख्य-पाणिनीयव्याकरणादिपर्यालोचनयाऽवसेयम्। अन्यत्तराऽपि यथालक्ष्यवँ व्यवस्था वेदितव्या। शुक्लयजुर्वेदप्रातिशाख्ये स्वरितभेदानामाद्द्यस्स्य भागस्स्य तीक्ष्णताया तारतम्यमपि प्रतिपादितमिति[6] तदपि स्वरितभागविशेषस्वरूपव्यवस्थायां स्मरणीयम्। एवमेव स्वरितोत्तरार्धस्स्याऽपि "अनुदात्त× परश् शेषस् स उदात्तश्श्रुतिर् न चेत्। उदात्तवँ वोच्यते किञ्चित् स्वरितवँ वाऽक्षरम् परम्"[7] इति ऋग्वेदप्रातिशाख्यवचनम्, "उदात्तसमश् शेषः, अनन्तरो वा नीचैस्तराम्, अनुदात्तसमो वा, आदिरस्स्योदात्तसमश् शेषोऽनुदात्तसम इत्याचार्याः, सर्व× प्रवण इत्येके"[8] इति तैत्तिरीयप्रातिशाख्यवचनञ् चाऽनुसृत्य तत्तच्छाखायावँ व्यवस्था बोद्ध्या। शुक्लयजुर्वेदप्रातिशाख्ये ऋक्तन्त्रे पाणिनीयव्याकरणे च स्वरितोत्तरार्धविषये विशिष्टस्स्य वचनस्स्याऽभावाद् "उभयवान् स्वरितः"[9] इति वचनस्स्य बलाद्, "समाहारस् स्वरितः"[10] इति वचनात्, "तदाचार्यस् सुहृद् भूत्वाऽन्वाचष्टे इयदुदात्तमियद-

---

१. व्या. शि. सू. ३०२। २. तै. प्रा. १९।३। ३. ना. शि. २।३।७। ४. मा. शि. श्लो. ८५। ५. PIAI p. 88। ६. १।१२५। ७. ३।५, ६। ८. १।४२-४७। ९. शु. य. प्रा. १।११०। १०. अष्टा. १।२।३१।

नुदात्तमस्मिन्नवकाशे उदात्तमस्मिन्नवकाशेऽनुदात्तम्"[1] इत्यादेर् व्याख्यानाच् च तत्तच्छाखायालँ लोके च स्वरितस्योत्तरभागस्याऽनुदात्तता बोद्ध्या ॥७॥

(क) स्वरितपूर्वोत्तरभागव्यवस्था

तत्तरार्धह्रस्वमात्तरस् तूदात्तस् स्याद् वेदलोकयोः ।
दीर्घे प्लुते च स्वरिते स्वरार्धन् तु श्रुतौ क्वचित् ॥८॥

तत्तर ह्रस्वस्य दीर्घस्य प्लुतस्य वाऽपि स्वरितस्य ह्रस्वस्वरार्धप्रमित आद्द्यो भाग उदात्तस् स्याद् उत्सर्गतो वेदे लोके च । तथा च पाणिनीयं सूत्तरम्— "तस्याऽऽदित उदात्तमर्धह्रस्वम्"[2] इति । तद्व्याख्यानञ् च पतञ्जलिमुनिकृतम्— "अर्धह्रस्वमित्युच्यते, तत्तर दीर्घप्लुतयोर् न प्राप्नोति कन्या, शक्तिके ३ शक्तिके । नैष दोषः । मात्तरचोऽत्तर लोपो द्रष्टव्यः । अर्धह्रस्वमात्तरमर्धह्रस्वमिति । किमर्थमिदमुच्यते । आमिश्रीभूतमिवेदम् भवति । तद् यथा क्षीरोदके सम्पृक्ते आमिश्रीभूतत्वान् न ज्ञायते कियत् क्षीरङ्ग कियदुदकङ्ग कस्मिन्नवकाशे क्षीरङ्ग कस्मिन्नवकाशे उदकमिति । एवमिहापि आमिश्रीभूतत्वान् न ज्ञायते कियदुदात्तङ्ग कियदनुदात्तङ्ग कस्मिन्नवकाश उदात्तङ्ग कस्मिन्नवकाशेऽनुदात्तमिति । तदाचार्यस् सुहृद्भूतत्वाऽन्वाचष्ट इयदुदात्तमियदनुदात्तमस्मिन्नवकाश उदात्तमस्मिन्नवकाशेऽनुदात्तमिति"[3] इति । भर्तृहरिरपि अत्तराऽर्धह्रस्वशब्दे ह्रस्वशब्दस्य ह्रस्वस्वरपरिमाणमात्तरपरत्वं सम्प्रदायप्राप्तमित्यभिप्रायेणाऽऽह स्म— "परमाणमेव- (मर्ध-) ह्रस्वादावनुपात्तम् प्रतीयते"[4] इति । तद्व्याख्याने पुण्यराजश् चाऽऽह— "इह उदात्तानुदात्तस्वरसमाहारस् स्वरित इत्युक्तम्, ह्रस्वदीर्घप्लुताश् च मात्रिक-द्द्विमात्त्रिक-त्त्रिमात्तर-लक्षणा उदात्तानुदात्तस्वरसमाहाररूपा भवन्ति । तत्तर ह्रस्वस्वस्वरितादीनाङ्ग कियदुदात्तङ्ग कियदनुदात्तम् ? आदौ किमुदात्तमथानुदात्तम् मद्ध्येऽन्ते वेति सन्देहाऽपाकरणायोक्तम्—' तस्याऽऽदित उदात्तमर्धह्रस्वम्"इति । अत्तर चाऽर्धह्रस्वग्रहणमर्धमात्तरालक्षणस्य प्रमाणस्योपलक्षणमिति तदेव तस्मात् प्रतीयते इति अर्धह्रस्वग्रहणप्रतिपाद्द्यस्याऽप्रधानस्य (ह्रस्वस्य) अविवक्षैवोक्ता"[5] इत्यादि । हेलाराजोऽपि एव-

---

१. पा. व्या. भा. १।२।३२ । २. अष्टा. १।२।३२ । ३. पा. व्या.भा.१।२।३२। ४. वा.प.२।३०७। ५. वा.प.द्वि.का.टी.२।३०७।

मेव व्याक्ख्यदिति लघुशब्दरत्नतो ज्ज्ञायते। काशिकाकारोऽपि—"अर्ध-ह्रस्स्वमिति चाऽर्धमात्त्रोपलक्ष्यते । ··· सर्वेषामेव ह्रस्स्वदीर्घ-प्लुतानां स्वरितानामेष स्वरविभागः । शिक्क्षमित्त्यत्त्राऽर्धमात्त्रा आदित उदात्ता अपराऽर्धमात्त्रा अनुदात्ता एकश्श्रुतिर् वा । कन्न्या इत्त्यत्त्राऽर्धमात्त्राऽऽदित उदात्ता अद्ध्यर्धमात्त्राऽनुदात्ता । माण-वक३ माणवकेत्त्यत्त्राऽर्धमात्त्राऽऽदित उदात्ता अर्धतृतीयमात्त्राऽनु-दात्ता"[1] इति स्फुटम् प्राह । न्यासकार–पदमञ्जरीकाराव्भ्यामपि चाऽ-यमर्थो नाऽन्न्यथा कृतः । तैत्तिरीयप्रातिशाक्ख्ये तु "समाहारस् स्वरितः, तस्स्यादिरुच्चैस्तरामुदात्तादनन्तरे यावदर्धं ह्रस्स्वस्स्य"[2] इत्त्युक्त्वा ह्रस्स्वदीर्घप्लुतेषु सर्वेषु स्वरितेषु उदात्तादनन्तरेषु ह्रस्स्वस्वरार्ध-भागप्रमितस्स्यैवाऽऽद्द्यस्स्य भागस्स्योदात्ततरताऽन्न्वाक्ख्याता । सेय-मुदात्ततरता तच्चरणविषया बोद्ध्या । यद्द्यपि तैत्तिरीयाणान् नवसु शिक्क्षासु परिगणितायाङ्ग कौहलीयशिक्क्षायां स्वरिते उदात्तानुदात्त-भागविभागः "तस्स्य तु स्स्वरितस्स्याऽऽद्द्यमर्धमुच्चैस्तरावँ विदुः । शेषस्स्याऽर्धस्स्य नीचत्त्वङ्ग किञ्चित्त्वाद् भृशमिष्यते । के चिदस्स्या-ऽऽदिमम् भागमुदात्तसदृशवँ विदुः । अनुदात्तसमश् शेष एतावन्तो द्विधा स्मृताः"[3] इति अन्न्यथा वर्णितस् तथापि तैत्तिरीयप्रातिशाक्ख्यसूत्त्रा-क्क्षरवैशिष्ट्याद् दीर्घप्लुतस्वरितभागव्यवस्थाविधायकसूत्त्रान्तरा-भावाच् च यथाश्श्रुतात् सूत्त्रार्थो न कौहलीयशिक्क्षावचनादेव विचा-लयितुं शक्क्यते । कौहलीयशिक्क्षायास् तैत्तिरीयप्रातिशाक्ख्यसूत्रेण सह समन्न्वयस् तैत्तिरीयचरणविशेषज्ज्ञैश् चिन्त्यः । यदि तु न कथमपि समन्न्वयस् सम्भवति तदा "शिक्क्षा च प्प्रातिशाक्ख्यञ् च विरुद्ध्येते परस्परम् । शिक्क्षैव दुर्बला ज्ज्ञेया सिंहस्स्येव (सिंहस्स्याऽग्ग्रे ?) मृगी यथा"[4] इति लघुसर्वसम्मतशिक्क्षाकारोक्तिम्, "शिक्क्षा च प्प्रातिशाक्ख्यञ् च विरुद्ध्येते यदायदा । प्रातिशाक्ख्यम् बलीयस् स्याद-वकाशो न चेत् सदा"[5] इति सर्वलक्क्षणमञ्जरीकारोक्तिवँ वाऽप्प्य-नुसृत्त्य प्रातिशाक्ख्यस्स्यैव बलवत्तरतया व्यवस्थापकत्त्वम् आस्थेयम् । सामवेदार्चिक–भागसम्बद्धे ऋक्तन्त्राक्ख्ये सामवेदप्रातिशाक्ख्येऽपि— "आद्द्द्याऽर्धमात्त्रा स्वरितम् (आद्द्द्याऽर्धमात्त्रा उत्– [आत्त–]

---

१. १।२।३२ । २. १।४०, ४१ ।
३. श्लो. ५, ६ । ४. PIAI p. 5. footnote 6 ।
५. व्या. शि. पृ. १२४ ।

सञ्ज्ञा भवति, तत् स्वरितन् नाम)"[१] इति स्स्फुटम् अर्धमात्रात्मकस्यैव भागस्य स्वरिते उदात्ततत्वम् प्रतिपादितम् । सामवेदसम्बद्धायान् नारदीयशिक्षायामपि इत्थमेव प्प्रतिपादितम्— "मात्रिकवँ वा द्विमात्रवँ वा स्वर्यते यदिहाक्षरम् । तस्स्याऽऽदितोऽर्धमात्रा वै शेषन् तु परतो भवेत्"[२] इति । शौनकीयचतुरध्यायिकाख्ये अथर्ववेदप्रातिशाख्येऽपि–"स्वरितस्स्याऽऽदितो मात्रार्धमुदात्तम्"[३] इति स्स्फुटमुक्तम् । ऋग्वेदप्रातिशाख्येऽपि— "एकाक्षरसमावेशे पूर्वयोस् स्वरितस् स्वरः । तस्योदात्ततरोदात्तादर्धमात्राऽर्धमेव वा"[४] इति ह्रस्स्वे दीर्घे वाऽपि स्स्वरिते अर्धमात्रात्मकस्स्याऽऽद्द्यभागस्स्याऽथवा तत्तत्स्वरितस्स्वरार्धभागस्य वा उदात्ततरता उक्ता । सोऽयवँ विकल्पश् शाखाभेदेन वा संहितापाठ–पदपाठभेदेन वा कतिचित्प्रदेशविशेषविषयकत्वेन वा कथञ् चन ऋग्वेदविशेषज्ञैर् व्यवस्थापनीयः । शाकल्यवचनतया प्रौढमनोरमायामुद्धृताद् "अप्प्राकृतस् तु यस् स्वारस् स्वरितोदात्तपूर्वगः । उदादायार्धमस्स्स्याऽथ शिष्टन् निगृह्णनृति कम्पितम्"[५] इति वचनात् तु गौणे स्वपूर्ववर्तिस्स्वरोपरागाज् जाते स्वरिते पूर्वार्धस्स्योदात्तता, मुख्ये स्वतन्त्रे उदात्तानुदात्तसन्धिजे च स्स्वरिते तु पूर्वस्स्य अर्धमात्रात्मकस्स्य भागस्स्य उदात्ततरता स्याद् ऋग्वेदे इत्त्यपि प्प्रतीयते,'अप्प्राकृतस् तु' इत्त्यत्तर स्स्थितेन तुकारेण प्राकृते स्वरिते गौणे उदात्ताक्षरपूर्वकत्वाज् जाते स्वरिते च विभिन्नाया व्यवस्थायास् सूच्यमानत्वात् । उक्तशाकल्यवचनस्स्य पूर्वपरभागयोरनुपलब्ध्यमानत्वान् निश्चित्त्य तु किमपि वक्तुन् न शक्यते । यत् तु उपर्य्युद्धृते ऋग्वेदप्रातिशाख्यसूत्तरे उव्वटेन अर्धमात्रापक्षस्स्य ह्रस्स्वस्वरितविषयकता अर्धपक्षस्स्य तु दीर्घस्वरितविषयकता इति व्याख्यातन् तत् सूत्तराक्षराऽननुकूलन् दृश्यते इति तद् हेयमेव, "यो ह्युत्सूत्तरञ्च कथयेन् नाऽदो गृह्यत्येत"[६] इति न्न्यायात् । यदपि भट्टोजिदीक्षितेन प्रौढमनोरमायान् दीर्घस्वरिते सर्वथैव आद्द्यार्धभागस्स्यैवोदात्ततरत्त्वं सकलबह्वृचसाम्प्रदायिकपाठसिद्धमिति अर्धमात्रापक्षो नाऽत्तर सूत्तरेऽनुमतोऽस्तीत्त्युक्तन् तदपि मन्दम्, अनेकशाखोपशाखाविषयकस्स्य प्रातिशाख्यसूत्तरस्स्य कतिचित्पदपाठप्रसिद्धि-

---

१. २।६।३ (५३) । २. २।३।६ । ३. १।१७ ।
४. ३।३, ४ । ५. सञ्ज्ञाप्रकरणे तस्स्यादित इत्त्यादिसूत्तरस्स्य व्याख्याने । ६. पा. व्या. भा., पस्पशाह्निके वा. १४ ।

मात्त्रेण एकशाखिसकलबह्वृचपाठप्रसिद्धिमात्त्रेण वाऽपि विचालयितुमशक्यत्वात् । प्रातिशाख्यस्याऽस्य शैशिरीयशाखामात्त्रविषयकत्वे तु तच्छाखाऽध्यायिनाम् भट्टोजिदीक्षितसमयेऽपि अनुपलब्ध्यमानत्वाद् भट्टोजिदीक्षितवचनस्याऽविचारितरमणीयता सुतरां सिद्ध्यति । "मात्त्रिकवँ वा द्विमात्त्रवँ वा स्वर्यते यदिहाक्षरम् । तस्यान्ततोऽर्धमात्त्रा वै मात्त्राधिक्यन् तथैव सा"[1] इति वचनमपि न तत्त्राऽनुकूलम् । शुक्लयजुर्वेदप्रातिशाख्ये तु—"तस्याऽऽदित उदात्तं स्वरार्धमात्त्रम्"[2] इति उक्तम् । यद्द्यपि तद्व्याख्यानेऽनन्तेन "तस्य स्वरितस्यादौ उदात्तम् ज्ञेयम्, तच्चार्धमात्त्राकालम्, यद्द्येकमात्त्रो यदि द्विमात्त्रो यदि त्रिमात्त्रस् स्वरितस् तथापि स्वरितस्यादौ अर्धमुदात्तम् । ··· यथा धान्न्यम् इत्त्यत्त्र पूर्वाऽर्धमात्त्रा उदात्तः (उदात्ता), उत्तराऽनुदात्ता सार्धा (अर्धा), कन्न्या इत्त्यत्त्राऽपि पूर्वा अर्धमात्त्रा अपरा अर्द्ध्यर्धमात्त्रा । एवम् प्लुतेऽपि"[3] इति उक्तम्, तथापि सङ्कुलमेतद् व्याख्यानन् न हि सूत्त्राक्षरानुगुणम्; यदि अनन्तकृतोदाहरणव्याख्यानानुकूलस् सूत्रकारस्याभिप्रायोऽभविष्यत् तर्हि "तस्यादित उदात्तम् मात्त्रार्धम्" इति वा "तस्यादित उदात्तमर्धमात्त्रामात्त्रम्" इत्त्येव सूत्त्रमकरिष्यत् सः । उव्वटस् तु सूत्त्राक्षरानुकूलमर्थमाह— "स्वरितस्य स्वरस्यादौ उदात्तम् ज्ञातव्यम्, तच् च स्वरार्धमात्त्राकालम् । यद्द्येकमात्त्रो यदि द्विमात्त्रो यदि त्रिमात्त्रस् स्वरस् तथाप्यर्धमुदात्तम् परमनुदात्तम्"[4] इति । किन् तु प्रातिशाख्यसूत्त्रस्येदमुव्वटकृतवँ व्याख्यानयँ याज्ञवल्क्यशिक्षायाम् अस्मद्दृष्टेषु पञ्चस्स्वपि सँस्करणेषु उपलब्ध्यमानेन "मात्त्रिकवँ वा द्विमात्त्रवँ वा स्वरितयँ यदिहाक्षरम् । तस्यादितोऽर्धमात्त्रा वै शेषञ् च परतो भवेत्"[5] इति वचनेन विरुद्ध्यते इति अत्त्र समाधानवँ वाजसनेयिभिर् वैदिकधुरीणैरन्वेष्टव्यम् । अस्मन्मनसि तु 'याज्ञवल्क्यशिक्षापाठस्याऽपूर्णत्वात् स भ्रष्ट इति, नारदीयशिक्षायामपि अस्य वचनस्य अक्षरशस् साम्-

---

१. शै. शि. श्लो. ९१ । २. १।१२६ । ३. का. प्रा. सू. व्या. १।१२६ । ४. शु. य. प्रा. उ. भा. १।१२६ ।
५. या. शि. श्लो. ११५ (शि. स., पृ. १८; शि. व. वि., पृ. ७४; शु. य. वे. सं. परि. (काशि.) पत्त्रे ७६, पृ. क; (निर्णय.) पृ. १८५ भाष्यदृष्टपुस्ते शु. य. वे. परिशिष्टेषु, पृ. ५ ।

म्येनोपलब्ध्यमानत्वाद्[1] अविवेकिनेदयँ याज्ञवल्क्यशिक्षायान् तत एवाऽऽदाय प्रक्षिप्तमित्यपि सम्भवति इति; प्रातिशाख्यसूत्रतोऽव्यवस्थितपाठाया उपलब्ध्यमानाया याज्ञवल्क्यशिक्षायास् सर्वथा दुर्बलत्वमिति च याज्ञवल्क्यशिक्षासंस्करणेषु उपलब्ध्यमानमिदवँ वचनमनादरणीयम्' इति विचार आयाति। कैश् चित् तु स्वरितस्स्वरस्स्य प्रवणताऽपि उक्ता[2]। एतन्मते उदात्तानुदात्तयोर् न स्फुटो विभागस् स्वरिते, किन् तु स्वरितस्स्यादौ उच्चत्वन् ततश् चोत्तरत्तर क्रमेण नीचनीचतरनीचतमतेति बोद्ध्यम्। नारदीयशिक्षायां स्वरितस्स्य "उच्चादुच्चतरन् नास्ति नीचान् नीचतरन् तथा। तस्वर्ये स्वारसञ्ज्ञायाङ्ग किंस्थानं स्वार उच्च्यते। उच्चनीचस्स्य यन् मद्ध्ये साधारणमिति श्श्रुतिः। तं स्वारं स्वारसञ्ज्ञायाम् प्रतिजानन्ति शैक्षिकाः"[3] इति यद् रूपम् प्रतिपादितन् तदनुसारङ्ग केषाञ् चिन् मते स्वरिते क्षीरोदकन्न्यायेन उदात्तानुदात्तयोरामिश्श्रणन् न तु कट्टारिकावृन्तफलन्न्यायेनेत्त्यवगम्यते। एतन्मते च उदात्तानुदात्तान्तरालवर्तिता स्वरितस्स्य विज्ञायते न तु भागेनोदात्तता भागेनाऽनुदात्ततेति च विवेक्तव्यम्।

एवञ् च सति यद् भट्टोजिदीक्षितेन सिद्धान्तकौमुद्द्यान् "तस्स्यादित उदात्तमर्धह्रस्स्वम्" इति सूत्तरस्स्य व्याख्याने "ह्रस्स्वग्रहणमतन्तरम्। स्वरितस्स्यादावर्धमुदात्तम् बोद्ध्यम्, उत्तरार्धन् तु परिशेषादनुदात्तम्"[4] इति उक्तम्, तत्समर्थनाय प्रौढमनोरमायाञ् चाऽनल्पञ् जल्पितम्, यच् च शब्दकौस्तुभे[5] सङ्कुलम् प्रलपितन् तत् सर्वम् अनेकप्रातिशाख्यशिक्षाग्रन्थभाष्य-तत्प्रदीप-वृत्ति-न्यास-पदमञ्जर्यादिमहाग्रन्थैर् विरुद्धत्वात् सर्वथा हेयम्। बृहच्छब्दरत्न-लघुशब्दरत्न-शब्देन्दुशेखर-व्याकरणसिद्धान्तसुधानिधि-स्वरचन्द्रिका-तट्टीका-कारादिभिश् च भट्टोजिदीक्षितोक्तेरनादरणीयत्वं सुष्ठु प्प्रदर्शितम्। अत्तर च यदि "तस्स्याऽऽदित उदात्तमर्धह्रस्स्वम्"[6] इत्त्यस्स्य पाणिनीयसूत्तरस्स्य दीर्घ-प्प्लुतस्वरितयोः पूर्वार्धस्स्योदात्तताया अनुन्वाख्यायकत्वन् न प्रदर्श्यते तर्हि कथन् तस्स्य शुक्लयजुर्वेदप्रातिशाख्यादिवचनैस् सह समन्वयस् स्यादिति शङ्का जागर्ति। स्वहृदयस्स्थाया एतस्स्याश् शङ्कायास् समाधानञ् च हरिदीक्षितेन बृहच्छब्दरत्ने "अर्धह्रस्स्वम् इत्त्यत्तर ह्रस्स्वग्रहणमतन्तरम्, ततश् च

---

१. २।३।६। २. तै. प्रा. १।४७। ३. १।८।६-७।
४. सञ्ज्ञाप्रकरणे। ५. १।२।३२। ६. १।२।३२।

अर्धमित्यवशिष्यते; तस्य च लेशः (भागः) इत्येवार्थः, स च भागो लक्ष्यानुसारङ्क्वचिद् दीर्घप्लुतस्वरितयोरपि आद्द्योऽर्धमात्रा-प्रमितो भागः क्वचिद् दीर्घप्लुतस्वरितयोः पूर्वभागः"[1] इत्यर्थतः प्रतिपाद्द्य कृतम्। किन् तु तथा सति "समाहारस् स्वरितः"[2] इत्यनेन सूत्रेणैवेदं सूत्रङ्गतार्थप्रायं स्यादिति, तादृशवँ् व्याख्यानम् भाष्योक्तसूत्रव्याख्यान- सूत्रप्रयोजनप्रदर्शनयोर् विरुद्धमिति, "प्रमाणमेव ह्रस्स्वादावनुपात्तम् प्रतीयते"[3] इत्यादिना भर्तृहरिग्रन्थेन च विरुद्धमिति च तदनादरणीयमेव। कस् तर्हि निस्तारोऽत्रेति चेदु-च्यते— उक्तस्य पाणिनीयसूत्रस्य भाष्यवृत्त्यादिप्रतिपादितोऽर्थोऽ-धिकतरप्रातिशाख्यशिक्षाग्रन्थानुकूल इति पूर्वोपस्थापितप्रातिशाख्यादिवचनैर् बोद्धुं शक्यते, पाणिनिना च सर्ववेदपारिषदे स्वकीये व्याकरणे औत्सर्गिका अधिकतरशाखानुकूला वा वैदिका विषया विस्तरेण प्रतिपादिताः, अपवादरूपा अल्पलक्ष्यास् तु ते प्रायेण "व्यत्ययो बहुलम्"[4] इत्युक्त्या यथालक्ष्यमनुसर्तव्यत्वेन प्रतिपादिताः। अतो-ऽत्राऽपि "व्यत्ययो बहुलम्" इत्युक्तिमादायैव पाणिनीयव्याकरणस्य शुक्लयजुर्वेदप्रातिशाख्यादिवचनैस् सह समन्वयः कर्तव्य इति ॥८॥

(ख) स्वरितभेदाः

जात्योऽभिनिहितः क्षैप्रः प्रश्लिष्टश् च ततः परः।
तैरोव्यञ्जनसञ्ज्ञश् च तथा तैरोविरामकः ॥९॥
पादवृत्तस् ततस् ताथाभाव्योऽष्टौ स्वरितास् स्वराः।
तदुत्पत्त्यादिवैशिष्ट्याद् वैदिकैः परिकीर्तिताः ॥१०॥

एतेषां स्वरूपवैशिष्ट्यादिकमनुपदमेव वक्ष्यते। एते च स्स्वरा बहुषु प्रातिशाख्येषु उल्लिखिताः[5]। तत्तद्वेदशाखासम्बद्धासु बहुषु शिक्षासु च एते स्वराः परिगणिताः। तथा हि शैशिरीयशिक्षायाम्— "सप्त स्स्वरान् प्रवक्ष्यामि तेषामेव तु लक्षणम्। जात्यः क्षैप्रोऽ-भिनिहितस् तैरोव्यञ्जन एव च।··· जात्यस् स्वारस् सजात्येन श्रुष्-ट्यग्ने क्षैप्र उच्च्यते। तेऽवर्धन्ताऽभिनिहितस् तैरोव्यञ्जन ऊतये। तिरोविरामो विष्कमिते प्राश्लिष्टो हीन्द्र गीर्वणः। पादवृत्तः क ईवँ् वेद स्वरास् सप्तैवमादयः। जात्यादिपादवृत्तान्तस् स्वरितश् च

---

१. वै. सि. कौ. व्या. सञ्ज्ञाप्रकरणे। २. १।२।३१।
३. वा. प. २।३०७। ४. अष्टा. ३।१।८५। ५. ऋ. प्रा. ३।८; शु.य.प्रा. १।१११–१२०; तै.प्रा. २०।१–८; शौ.च. ३।५५–६४।

स्वरास् त्रय (स्वराश्श्रयः ?)"[१] इति; स्वराङ्कुशशिक्षायाम् जात्त्यादि-लक्षणप्रदर्शनाननन्तरम् "जात्त्यस् स्वारः" इत्यादयश् श्लोकाः पठिताः[२], तत्तरानन्ते "पादवृत्तस्य विद्द्यात् तु ता अस्स्येति निदर्शनम्"[३] इति विशेषः; तत्तर "जात्त्योऽभिनिहितः क्षैप्रस् तैरोव्यञ्जन एव च। तिरोविरामः प्रश्श्लिष्टः पादवृत्तस् तु सप्तमः"[४] इति सप्तैव स्वरिता गणिताः। याज्ञवल्क्यशिक्षायाम् च— "अष्टौ स्वरान् प्रवक्ष्यामि तेषामेव तु लक्षणम्। जात्त्योऽभिनिहितः क्षैप्रः प्रश्श्लिष्टश् च ततः परः। तैरोव्यञ्जनसञ्ज्ञश् च तथा तैरोविरामकः। पादवृत्तो भवेत् तद्वत् ताथाभाव्य इति स्स्वराः"[५] इति। वर्णरत्नप्रदीपिकायाँ[६] वर्णोच्चारणप्रकारपरिशिष्टे[७] च एते स्वराः परिगणिताः। व्यासशिक्षादिष्वपि एते उल्लिखिताः[८]। नारदीयशिक्षायाम् च "जात्त्यः क्षैप्रोऽभिनिहितस् तैरोव्यञ्जन एव च। तिरोविरामः प्रश्श्लिष्टः पादवृत्तश् च सप्तमः"[९] इति पठ्यते। माण्डूक्यां शिक्षायाम् च— "सप्त स्स्वरान् प्रवक्ष्यामि तेषाम् चैव बलाबलम्। लक्षणानि च सर्वेषाँ युक्तास् तानि निबोध मे। अभिनिहितः प्राक्श्लिष्टो जात्त्यः क्षैप्रश् च पादवृत्तश् च। तैरोव्यञ्जनषष्ठस् तिरोविरामश् च सप्तमः (प्रोक्तः)"[१०] इति वचनमस्ति ॥९–१०॥

(ग) स्वरितभेदानावँ वर्गीकरणम्

जात्त्य आजानिकस् तस्मात् परे स्स्युस् सन्धिजास् त्रयः।
अन्त्याश् चत्त्वारस् स्वपूर्व-वर्त्युदात्तोपरागजाः ॥११॥

उक्तानामष्टानां स्वरितभेदानाम् आजानिकत्त्व–सन्धिजातत्त्व–स्वपूर्ववर्त्युदात्तोपरागजत्त्वरूपैस् त्रिभिर् धर्मैः पृथक्कृत्य सङ्गृह्य च त्रयो वर्गाः क्रियन्ते बोधसौकर्यादर्थम्। जात्त्यादयश् चत्त्वारस् स्वारास् स्थितस्स्वारास् स्थितस्स्वरिता वाऽप्युच्च्यन्ते[११], परोपरागाऽजातत्त्वात् स्वयंसिद्धत्त्वेन स्स्थितत्त्वाद् वा। स्वपूर्ववर्त्युदात्तोपरागजास् स्वरिताः प्राकृता इत्यप्युच्च्यन्ते; उदात्तम् प्रकृतिङ्कृत्वा जाता इति; तथा हि कौहलीयशिक्षायाम्— "उदात्तादुत्तरो

---

१. श्लो. १०९–१११। २. श्लो. १३–१४ (शि. स., पृ. १६२)। ३. श्लो. १४ (शि. स., पृ. १६२)। ४. श्लो. १५ (शि. स., पृ. १६२)। ५. श्लो. ७५–७६ (शि. स., पृ. ९)। ६. श्लो. ५६–५७ (शि.स., पृ. १२२)। ७. श्लो. १–३ (शि.स., पृ. १७२)। ८. सू. २९७–३१२। ९. १।८।१०–११। १०. श्लो. ७१–७२ (शि. स., पृ. ४६९)। ११. व्या. शि. सू. ३०२।

नीचस् सन्धाने स्वरितस् स्मृतः। स्वारोदात्तपरश् चेत् स्यात् तदा निहत इष्यते। स्वरितस्स्याऽस्स्य मन्न्यन्ते प्रज्ञानम् प्राकृतस् त्विति"[1] इति। एतेषाञ् चतुर्णां स्वपूर्ववर्त्युदात्तप्प्रभावजत्वम् पाणिनिनाऽपि "उदात्तादनुदात्तस्य स्स्वरितः"[2] इति प्प्रतिपादितम् ॥११॥

(घ) जात्त्यनिरूपणम्

अपूर्वो नीचपूर्वो वा सयँयुक्ताद् यात् परोऽथ वात् ।
स्वारस् स्वतन्त्रश् च पदे जात्त्यो नित्त्योऽपि स स्स्मृतः ॥१२॥

क्व न्यक् स्वर् इत्त्यादौ अविद्द्यमानपूर्वस्स्वरकः, कन्न्या धान्न्यम्, सुप्प्वा हृदय्यया इत्त्यादौ अनुदात्तस्स्वरपूर्वकः, कन्न्या धान्न्यम् न्यक् हृदय्यया इत्त्यादौ अन्न्येन व्यञ्जनेन सयँयुक्ताद् यकारात् परः, क्व सुप्प्वा स्वर् इत्त्यादौ अन्न्येन व्यञ्जनेन सयँयुक्ताद् वकारात् परः, एकस्मिन् पदे स्वतन्त्रतया वर्त्तमानस् स्वरितस् स्वरो जात्त्य इति मुनिभिस् स्मृतोऽस्ति, नित्त्य इति चाऽपि स एव मुनिभिस् स्मृतोऽस्तीत्त्यर्थः। ऋग्वेदप्रातिशाक्ख्येऽपि "उदात्तपूर्वं स्वरितमनुदात्तम् पदेऽक्षरम्। अतोऽन्न्यत् स्वरितं स्वारञ् जात्त्यमाचक्ष्वते पदे"[3] इत्त्युक्त्वाऽयं स्वारꣳ प्रतिपादितः। तद्भाष्ये उव्वटेन च "जात्त्या स्वरूपेणैव उदात्तानुदात्तसङ्गतिवँ विना जातो जात्त्यः" इति जात्त्यशब्दार्थो वर्णितः। शुक्लयजुर्वेदप्रातिशाक्ख्येऽपि "एकपदे नीचपूर्वस् सयवो जात्त्यः"[4] इति; तैत्तिरीयप्रातिशाक्ख्ये च— "सयकारवकारन् त्वक्षरयँ यत्तर स्वर्यते स्थिते पदेऽनुदात्तपूर्वेऽपूर्वे वा नित्त्य इत्त्येव जानीयात्"[5] इति। शौनकीयचतुरद्ध्यायिकायाञ् च— "अनुदात्तपूर्वात् सयँयोगाद् यवान्तात् स्वरितम् परमपूर्ववँ वा जात्त्यः"[6] इति स्स्वरितोऽयम् प्रोक्तः। शैशिरीयशिक्षायान् तु— "जात्त्यस् स्वरस् सजात्त्येन"[7] इति उदाहरणमात्त्रेणाऽयन् निर्दिष्टः। स्वराङ्कुशशिक्षायान् तु— "व्यञ्जनैस् तु यवौ यत्तर प्रयुज्ज्येते ततꣳ परम्। अपूर्वो नीचपूर्वो वा जात्त्यस् स्वारस् स उच्च्यते"[8] इति स्फुटमुक्तम्। याज्ञवल्क्यशिक्षायामपि— "एकपदे नीचपूर्वः सयवो जात्त्य इष्यते। अपूर्वोऽपि परस् तद्वद् धान्न्यं सुप्प्वा स्वरित्त्यपि"[9] इति प्प्रतिपादितोऽयम्। एवमेव

---

१. श्लो. १०। २. अष्टा. ८।४।६६। ३. ३।७, ८। ४. १।१११। ५. २०।२। ६. ३।५७। ७. श्लो. ११०। ८. श्लो. ३ (शि. स., पृ. १६१)। ९. श्लो. ७७ (शि. स., पृ. ९–१०)।

वर्णरत्नप्रदीपिकायामपि[1]। वर्णोच्चारणप्रकारपरिशिष्टे तु जात्यस्योल्लेखस् तु प्राप्यते[2], तल्लक्षणग्रन्थस् तु त्रुटितो विज्ञायते। अनन्तेन स्वराष्टकेऽपि अयम् प्रतिपादितः[3]। व्यासशिक्षायाञ् च "अखण्डे सयवो नित्यो नीचपूर्वस् स्वयञ् च वा"[4] इति। कौहलीयशिक्षायाञ् च– "अविकारस् त्वसावेव नित्य इत्यभिधीयते"[5] इति। सर्वसम्मतशिक्षायाञ् च– "सयवं स्वर्यते यत्तर पदस्थन् नीचपूर्वकम्। अपूर्ववँ वा स नित्यस् स्याद् वदेद् दृढतरम् बुधः। पदान्तरोच्चपूर्वोऽपि नित्य एव च नाऽन्यथा"[6] इति। पारिशिक्षायाञ् च— "स्थिते पदे यत्तर तु नीचपूर्वे व्यपूर्वके वा यवपूर्वमक्षरम्। यत् स्वर्यते तत् स्वरितन् तु नित्य एवेति विद्द्यान् न यथाक्रमोऽत्तर"[7] इति। नारदीयशिक्षायामपि— "सयकारं सववँ वाऽपि अक्षरं स्वरितम् भवेत्। न चोदात्तम् पुरस् तस्य जात्यस् स्वारस् स उच्च्यते"[8] इति। माण्डूक्या शिक्षायामपि— "सयकारं सववँ वापि अक्षरं स्वरितम् भवेत्। न चोदात्तम् पुरस्तात् स्याज् जात्यस् स्वर् द्वृत्य एव तु"[9] इति स्वरोऽयवँ वर्णितः ॥१२॥

(ङ) अभिनिहितनिरूपणम्

उच्चादेकारादोकाराद् वा पदान्तस्स्थितात् परे।
लुप्तेऽकारेऽनुदात्ते यस् स्वारोऽभिनिहितो हि सः ॥१३॥

पदान्ते स्थिताद् उदात्ताद् एकारात् तादृशादोकाराद् वा परत्तर स्स्थिते अनुदात्ते ह्रस्स्वेऽवर्णे लुप्ते सति यः पदान्तस्स्थ एकार ओकारो वा स्वरितो भवति सोऽभिनिहित इति ज्ञेयः। तम् अभिनिहतम् अभिहतमेव वाऽपि केचिद् वदन्ति। तदुदाहरणानि च— तेऽप्सरसाम्, तेऽवन्तु, वेदोऽसि, तुथोऽसि, सोऽब्रवीत्, तेऽवदन्, तेऽक्करन्, योऽस्स्य इति। अयमपि ऋग्वेदप्रातिशाख्ये– "वैवृत्ततैरोव्यञ्जनौ क्षैप्राभिनिहितौ च तान्। प्रश्लिष्टञ् च यथासन्धि स्वरानाचक्षते पृथक्"[10] इति शब्दप्रवृत्तिनिमित्तसूचनपूर्वकम् प्रतिपादितः। यत्तरोत्तरपदादिस्स्थोऽकारः पूर्वपदान्तस्थे एकारे ओकारे वा (एकारस्यौकारस्य वा अब्भ्यन्तर्) निधीयते प्रवेश्श्यते स सन्धिरभिनिहितः, तादृशे सन्धौ निष्पन्नस् स्वारोऽपि अभिनिहित इति उक्तवचने मुनेरभिप्रायः। शुक्लयजुर्वेद-

---

१. श्लो. ५८ (शि. स., पृ. १२२)। २. श्लो. २ (शि. स., पृ. १७२)। ३. शि. स. पृ. ३६३–३६४। ४. सू. ३०१। ५. श्लो. १३। ६. श्लो. ५२–५३। ७. सू. १०३। ८. २।१।१। ९. श्लो. ७५ (शि. स., पृ. ४६९)। १०. ३।१८।

प्रातिशाख्ये च "एदोद्भ्यामकारो लुगभिनिहितः"[1] इति सङ्क्षेपेणोक्तम्। तैत्तिरीयप्रातिशाख्ये तु— "तस्मादकारलोपेऽभिनिहतः"[2] इत्युक्तम्। अत्तर अभिनिहत इत्येव सञ्ज्ञा। शौनकीयचतुरध्यायिकायाम् च— "एकारौकारौ पदान्तौ परतोऽकारं सोऽभिनिहितः"[3] इत्युक्तम्। शैशिरीयशिक्षायाम्— "तेऽवर्धन्ताऽभिनिहितः"[4] इत्युदाहरणेनाऽयन् निर्दिष्टः। स्वराङ्कुशशिक्षायाम् च "एदोतोरुच्चयोर् यत्तर नीचोऽकारꣳ परो यदि। एकीभावे भवेत् तत्तर स्वरोऽभिनिहितस् तदा"[5] इति प्रतिपादितोऽयम्। याज्ञवल्क्यशिक्षायाम् च— "ए ओ आब्भ्यामुदात्ताब्भ्यामकारो रिफितश् (निहतश्) च यः। स च यत्र प्रलुप्येत तम् चाऽभिनिहितवँ् विदुः"[6] इति। वर्णरत्नप्रदीपिकायाम् च— "ए ओ आब्भ्यामुदात्ताब्भ्यामकारो नीच एव च। लुप्यते सन्धिकार्ये यत् तम् चाऽभिनिहितवँ् विदुः। तेऽप्सरसाम् च तेऽवन्तु वेदोऽसीति तुथोऽस्स्यपि"[7] इति। वर्णोच्चारणप्रकारपरिशिष्टे च "अकार एकोदात्तेन रेफेणापहृतो (?) भवेत्। तम् चाऽभिनिहितम् प्राहुꣳ कुक्कुटोऽसि निदर्शनम्"[8] इति प्रतिपादितोऽयम्। अनन्तेनाऽपि स्वराष्टकेऽयमुल्लिखितोऽस्ति[9]। व्यासशिक्षायाम् च— "नीचोर्ध्वाकारसम्मिश्र उच्च एङ स्वरितो भवेत्। अत्तराऽभिनिहतश् चायमिति सञ्ज्ञायते बुधैः"[10] इति। कौहलीयशिक्षायाम् च— "ओकारो य उदात्तस् स्यादेकारश् च पदान्तगः। तयोर् यस् स्वरिते सन्धौ निहतेनोत्तरेण तु। एषोऽभिनिहताख्यस् तु स्वरꣳ प्रोक्तो मनीषिभिः"[11] इति। सर्वसम्मतशिक्षायाम् च—"लुप्ताकारोऽनुदात्तश् चेत् पूर्वोच्चस्स्वरितो भवेत्। एषोऽभिनिहितो ज्ञेयो वदेद् दृढतरम् बुधः"[12] इति। पारिशिक्षायाम् च— "लुप्ते पृथग्भूतपदस्स्थितोच्चात् परेऽनुदात्ते यदि तर्ह्यकारे। पूर्वोच्चकोऽयं स्वरितस्स्वरस् स्याद् नाम्ना भवेत् सोऽभिहतश् च पश्चात्"[13] इति। नारदीयशिक्षायाम् च— "ए ओ आब्भ्यामुदात्ताब्भ्यामकारो निहितश् च यः। अकारयँ् यत्तर लुम्पन्ति तमभिनिहितवँ्

---

१. १।११४। २. २०।४। ३. ३।५५। ४. श्लो. ११०। ५. श्लो. ४ (शि. स., पृ. १६१)। ६. श्लो. ७८ (शि. स., पृ. १०)। ७. श्लो. ६० (शि. स., पृ. १२२)। ८. श्लो. ८ (शि. स., पृ. १७२)। ९. शि.स., पृ. ३६४। १०. सू. २९६–२९७। ११. श्लो. १४। १२. श्लो. ४८–४९। १३. सू. १०५।

विदुः"[1] इति । माण्डूक्क्यां शिक्क्षायाम् च— "एओ आब्भ्यामुदात्ताब्भ्यामकारो रेफितश् च यः । अकारयँ यत्तर लुम्पन्ति तमभिनिहितवँ विदुः"[2] इति स्वरोऽयम् प्रतिपादितः ॥१३॥

(च) क्षैप्रनिरूपणम्

नीचे स्वरे परे सर्वात्मनाऽनुतस्स्थात्मताङ्ग गते ।
उच्चे स्वरे क्क्षैप्रसन्धेर् जात क्षैप्रस् स्वरस् स्मृतः ॥१४॥

अनुदात्ते स्वरेऽव्यवहितत्वेन परत्तर वर्तमाने सति इकारे उकारे ऋकारे वाऽपि उदात्ते स्वरे सर्वात्मना क्रमेण यकारतावँ वकारतां रेफतावँ वा गते क्षैप्रसन्धिजातस् स्वरितस् स्वर× क्षैप्रो वेदितव्य इत्यर्थः । स्वरे परे पूर्वत्तर स्स्थितानाम् इकारादीनां संहितावशात् क्षिप्रमुच्चारणे यकारादिभावेन यस् सन्धिस् स क्षैप्रसन्धिः । क्षैप्रस्वरितोदाहरणानि च— त्र्यम्बकम्, वाज्ज्यर्वन्, न्विन्द्र, द्र्वन्नः, कृधी स्स्वस्मान्, वीड्वङ्गः, मात्तरर्थम्, पित्तरर्थम् इति । अयमपि स्स्वार ऋग्वेदप्रातिशाख्ये "वैवृत्ततैरोव्यञ्जनौ क्षैप्राऽभिनिहितौ च तान् । प्रश्लिष्टञ् च यथासन्धि स्वरानाचक्क्षते पृथक्"[3] इत्युल्लिखितः; शुक्लयजुर्वेदप्रातिशाख्येऽपि—"युवर्णौ यवौ क्क्षैप्रः"[4] इत्युक्तः; तैत्तिरीयप्रातिशाख्येऽपि "इवर्णोकारयोर् यवकारभावे क्षैप्र उदात्तयोः"[5] इति प्रतिपादितः, शौनकीयचतुरद्ध्यायिकायाम् च— "अनुतस्स्थापत्तावुदात्तस्याऽनुदात्ते क्षैप्रः"[6] इति निरूपितः । शैशिरीयशिक्क्षायाम् च— "श्रुष्ट्यग्ने क्षैप्र उच्यते"[7] इत्युदाहरणमात्तरेणाऽपन् निरूपितः; स्वराङ्कुशशिक्क्षायाम् च— "इउवर्णौ यदोदात्तावापद्द्यते यवौ क्वचित् । अनुदात्तस्स्वरे नित्यवँ विद्द्यात् क्षैप्रस्य लक्क्षणम्"[8] इति; याज्ञवल्क्यशिक्क्षायामपि सर्वथा एवमेव[9]; वर्णरत्नप्रदीपिकायाम् च— "इउवर्णावुदात्तौ चेदनुदात्तस्स्वरोदयौ । यवाब्भ्याम् चैव सयँयुक्तौ तदा क्षैप्रस् स्वरो भवेत् । वाज्ज्यर्वँस्त्र्यम्बकयँ यद्वद् द्र्वन्नो योजा न्विन्द्रेति च"[10] इति । वर्णोच्चारणप्रकारपरिशिष्टे च— "इकारोकारयोस् स्थाने यवौ स्याता-

---

१. २।१।३ । २. श्लो. ७३ (शि. स., पृ. ४६९) ।
३. ३।१८ । ४. १।११५ । ५. २०।१ । ६. ३।५८ ।
७. श्लो. ११० । ८. श्लो. ५ (शि. स., पृ. १६१) ।
९. श्लो. ७९ (शि. स., पृ. ११) । १०. श्लो. ६१–६२ (शि. स., पृ. १२२) ।

मुदात्तयोः। अनुदात्ते पदे (परे ?) नित्त्यं स क्क्षिप्प्र(क्क्षैप्प्र ?) इति कीर्तितः। त्र्यम्बकन् द्र्वन्न इत्यादि लक्क्ष्यन् ज्ञेयवँ विचक्क्षणैः"[1] इति; स्वराष्टकेऽपि– "उदात्तऽइऽउस्थाने यवयोर्× परोऽनुदात्तर× क्षैप्प्रः। यु्योद्ध्यस्म्मत्, न्विन्द्र"[2] इति; व्यासशिक्क्षायामपि– "यवत्त्वे ह्युच्चयोर् यत्तर इवर्णोकारयोरपि। परतस् स्वर्यते नीचस् स्वरित× क्षैप्प्र उच्च्यते"[3] इति; कौहलीयशिक्क्षायामपि– "इवर्णोकारयोस् सन्धौ य-व-भाव उदात्तयोः। तत्तर यस् स्वर्यते स्वार× क्षैप्प्र एष उदाहृतः"[4] इति; सर्वसम्मतशिक्क्षायान् च– "इवर्णोकारयोस् स्थाने यवत्त्वे सत्त्युदात्तयोः। तस्मात् परं हि यन् नीचं स्वरितस् तस्य वै भवेत्। नाम्ना तु क्क्षैप्प्र एव स्स्यादमुन् दृढतरवँ वदेत्"[5] इति; पारिशिक्क्षायान् च– "इवर्णकोतोर् यवकारभावे यस् स्वर्यते क्क्षैप्प्र उदात्तयोस् स्यात्"[6] इति; नारदीयशिक्क्षायान् च– "इउवर्णौ यदोदात्तावापद्द्येते यवौ क्वचित्। अनुदात्ते प्रत्त्यये नित्त्यवँ विद्द्यात् क्षैप्प्रस्स्य लक्क्षणम्"[7] इति; माण्डूक्क्यां शिक्क्षायान् च– "इ-उ-वर्णौ यदोदात्तावापद्द्येते यवौ क्वचित्। अनुदात्त-प्प्रत्त्यये स्याद् विद्धि क्क्षैप्प्रस्स्य लक्क्षणम्"[8] इति अयं स्वर× प्रतिपादितोऽस्ति ॥१४॥

विभक्तौ प्रातिपदिकस्स्यान्तयोगेन चोद्गतः।
क्वचित् स्वार× क्षैप्प्र इति प्प्राहाऽऽथर्वणिको मुनिः ॥१५॥

तथा हि "अन्त×पदेऽपि पञ्चपद्द्याम्"[9] इति। अस्स्यार्थश् च— उदात्तान्तस्स्य प्रातिपदिकस्स्य प्रथमायावँ विभक्तौ द्वितीयाया एकवचने द्विवचने च यानि रूपाणि अन्तस्स्थाऽऽपत्तियुतानि तत्तर यस् स्वरितोऽन्तस्स्थोपलक्क्षितस् सोऽपि क्क्षैप्प्र इति। उदाहरणानि च नद्द्यः, पिप्पल्ल्यः, रुदत्त्यः इति। "ऊकारस्स्य सर्वत्तर"[10] इति च। अस्स्यार्थश् च दीर्घोदात्तोकारान्तस्स्य प्रातिपदिकस्स्य सर्वास्स्वेव विभक्तिषु यानियानि अन्तस्स्थापत्तियुतानि रूपाणि तत्तर यस् स्वरितोऽन्तस्स्थोपलक्क्षितस् सोऽपि क्क्षैप्प्र इति। उदाहरणानि च— तन्न्वा,

---

१. श्लो. ५–६ (शि.स., पृ. १७२)। २. शि.स., पृ. ३६४।
३. सू. २९८–२९९। ४. श्लो. १२। ५. श्लो. ४९–५०।
६. सू. १०२। ७. २।१।२। ८. श्लो. ७६ (शि. स., पृ. ४६९–४७०)। ९. शौ. च. ३।५९। १०. तत्तरैव ३।६०।

तन्वे, चम्स्वोः, वद्ध्वः इति । "ओण्योश् च"[1] इति च । अस्स्याऽर्थश् च "ओण्योः" इत्यत्तर अनृतऽपदेऽपि स्वरितऽ क्षैप्र उच्च्यते इति । तैत्तिरीयचरणसम्बद्धायाम् उपशिक्षात्त्वेन तदीयवेदलक्षणाऽनुक्रमणिकायामुल्लिखितायाम् आरण्यशिक्षायान् तु—"क्षैप्रस् स्वार इवर्णस्य गायत्त्री श्रीश् श्रिया हिया । केवलयँ यवयोस् स्वारश् चाऽग्नयऽ पशवो यथा ॥ तत्तर नित्यस्य विद्द्या य-दि प्रजा द्वौ महान् रसः । एकारौकारयोस् तत्तर स्वारोऽभिनिहितो भवेत् । सेन्द्रयोनिरदुऽखस् तु तत्ताऽभिनिहितऽ कषोत् । सांहिते स्स्वरितेऽप्युच्चपरऽ प्रातिहतो भवेत् । अमुमाहुरूर्ध्वरेतयँ यथा ते त्त्विह चेति च । उकारस्स्वरितस् तत्तर प्रश्शिलष्टोऽभूतमित्यपि । केवलयँ यस् स्वरस्स्वारऽ पादवृत्तस् त्वसन्चयः । तस्स्यां हि पूर्वमुच्चस् तु तैरोव्यञ्जनकऽ पुरः"[2] इति प्रायस् सर्वेषां स्वरितानामेकपदगतान्न्येवोदाहरणानि, उपन्न्यस्तानि, न चाऽन्न्यासु तच्चरणसम्बद्धासु शिक्षासु एवम्प्रकारकाणि उदाहरणानि, तदनुकूलानि लक्षणानि वाऽपि प्राप्प्यन्ते इति अत्तर विशेषविचारस् तच्चरणाऽध्यायिभिर् लक्षणज्ञानकोविदैऽ कार्यः ॥१५॥

(छ) प्रश्शिलष्टनिरूपणम्

उच्चे ह्रस्स्वे इवर्णे वोवर्णे श्लिष्टे क्रमात् परे ।
नीचे ह्रस्स्वे इवर्णे वोवर्णे प्रश्शिलष्टकस् स्वरः ॥१६॥

पूर्वत्तर स्स्थिते उदात्ते ह्रस्स्वे इकारे परत्तर स्स्थिते अनुदात्ते ह्रस्स्वे इकारे प्रकर्षेण श्लिष्टे सति यस् स्वरितस् स्वरो जायते सः, पूर्वत्तर स्स्थिते उदात्ते ह्रस्स्वे उकारे परत्तर स्स्थिते अनुदात्ते ह्रस्स्वे उकारे प्रकर्षेण श्लिष्टे सति यस् स्वरितस् स्वरो जायते स च प्रश्शिलष्टो ज्ञेय इत्यर्थः । प्रश्शिलष्ट एव प्राश्शिलष्ट इति प्राक्शिलष्ट इति चोच्च्यते । तत्तर च इकारप्प्रश्शिलष्ट ऋग्वेदादिषु उकारप्प्रश्शिलष्टश् च तैत्तिरीयके एव उपलब्भ्यते इति उद्धरिष्यमाणैर् वचनैरपि व्यक्तीभविष्यति । अत्तर उदाहरणानि च— हीन्द्र, अभीन्धताम्, स्रुचीव, दिक्षूपदधाति, मासूत्तिष्ठन् इति । अयन् च स्स्वार ऋग्वेदप्रातिशाख्ये "वैवृत्ततैरोव्यञ्जनौ क्षैप्राऽभिनिहितौ च तान् । प्रश्शिलष्टन् च यथासन्धि स्वारानाचक्षते पृथक्"[3] इति

---

१. शौ. च. ३।६१ । २. एते श्लोका उक्तारन्थस्स्याऽन्तिमे भागे पठिताः । ३. ३।१८ ।

उल्लिखितः। शुक्लयजुर्वेदप्रातिशाख्ये च इवर्ण उभयतोह्रस्स्वऽ प्रश्श्लिष्टः"[1] इति प्रतिपादितोऽयम्। तैत्तिरीयप्रातिशाख्ये च "ऊभावे प्रश्श्लिष्टः"[2] इति; शौनकीयचतुरद्ध्यायिकायाम् च– "इकारयोऽ प्राश्श्लिष्टः"[3] इति। शैशिरीयशिक्षायाम् च– "प्रश्श्लिष्टो हीनूद्र गीर्वणः"[4] इति उदाहरणेन प्रदर्शितोऽयम्। स्वराङ्कुशशिक्षायाम् च "इकार उच्चऽ पूर्वस्मिन् परस्मिन् नियतस् स च। प्रश्श्लिष्टमाहुराचार्यास् स्वरवर्णविदस् तदा"[5] इति, याज्ञवल्क्यशिक्षायाम् च– "इकारो यत्तर दृश्श्येत इकारेणैव सयँयुतः। उदात्तश् चाऽनुदात्तेन प्रश्श्लिष्टो भवति स्स्वरः"[6] इति; वर्णरत्नप्रदीपिकायाम् च– "उच्चऽ पूर्वऽ परो नीच इकारोऽन्न्योन्न्यसङ्गतः। प्रश्श्लिष्टस् स स्स्वरो ज्ञेयस् स्रुचीवाऽभीनूधतायँ यथा"[7] इति; वर्णोच्चारणप्रकारपरिशिष्टे च– "यत्तरोदात्त इकारो हि निपा(घा)तै(ते)कारसयँयुतः। स प्रश्श्लिष्ट इति ज्ञेयोऽभीममित्त्यादि दर्शनम्"[8] इति; स्वराष्टकशिक्षायाम् च– "उदात्तानुदात्तयोर् ह्रस्स्वयोस् स्थानेऽइकारऽ प्रश्श्लिष्टः, विऽइतः वीतः"[9] इति; व्यासशिक्षायाम् च– "उच्चोत्त्वान् नीच उत्त्वे स्यात् प्रश्श्लिष्टस् सन्धितो यमः"[10] इति, कौहलीयशिक्षायाम् च– "द्वयोरुकारयोस् सन्धावुदात्ततपरयोऽ करमात्। तत्तर यस् स्वर्यते स्स्वारः प्रश्श्लिष्टस् सोऽभिधीयते"[11] इति; सर्वसम्मतशिक्षायाम् च–"उकारादुच्चकान् नीचे ह्यकारे चोत्तरस्स्थिते। ऊकारऽ क्रियमाणोऽत्तर स्वरितस् सन्धितो भवेत्। प्रश्श्लिष्टोऽप्युपदिष्टोऽयवँ वदेन् मृदुतरम् बुधः"[12] इति; पारिशिक्षायाम् च– "उच्चादुकारादनुदात्तधरम उकार ऊर्ध्वे सति सन्धितोऽत्तर। ऊभाव एष स्स्वरितश् च तत्तर प्रश्श्लिष्ट इत्त्युच्च्यत एव सद्भिः"[13] इति; नारदीयशिक्षायाम् च—"इकारयँ यत्तर पश्श्येयुरिकारेणैव सयँयुतम्। उदात्तमनुदात्तेन प्रश्श्लिष्टन् तन् निबोधत"[14] इति; माण्डूक्या शिक्षायाम् च– "इकारयँ यत्तर पश्श्येयुरिकारेणैव सयँयुतम्। उदात्तोऽप्यनुदात्तस्स्य प्राक्श्लिष्टोऽभीनूधतामपि"[15] इति स्वरोऽयन् निरूपितः ॥१६॥

---

१. १।११६। २. २०।५। ३. ३।५६। ४. श्लो. १११। ५. श्लो. ६ (शि. स., पृ. १६१)। ६. श्लो. ८० (शि.स., पृ. ११)। ७. श्लो. ६३ (शि. स., पृ. १२२)। ८. श्लो. १० (शि. स., पृ. १७२–१७३)। ९. शि. स., पृ. ३६४। १०. सू. ३००। ११. श्लो. १६। १२ श्लो. ५१–५२। १३. सू. १०६। १४. २।१।६। १५. श्लो. ७४ (शि. स., पृ. ४६९)।

(ज) तैरोव्यञ्जननिरूपणम्

उच्चात् परो यस् स्वरितस् तन्मद्ध्यवद्व्यञ्जनान्वितः ।
सर्वत्तर बाहुल्येनाऽऽप्प्यस् तैरोव्यञ्जन उच्च्यते ।।१७।।

उदात्तात् परत्तर स्स्थितस् तन्मूलको यस् स्वरित उदात्तस्वरित-मद्ध्यस्स्थव्यञ्जनयुक्त ऋग्वेदे युजुर्वेदे सामवेदेऽथर्ववेदे च सर्वत्तर बाहुल्येन प्राप्प्योऽत एव बहुस्स्वार इत्त्यपि कैश्चिद् विशेषितस् स स्वरितस् तैरोव्यञ्जन उच्च्यते इत्त्यर्थः। उदाहरणानि च– ऊतये, इडे, रन्ते, हव्ये, काम्म्ये, इदमिन्द्र, इदन्देवा इति । अस्स्याऽप्प्युल्लेख ऋग्वेद-प्रातिशाक्ख्ये "वैवृत्ततैरोव्यञ्जनौ क्वैप्प्राऽभिनिहितौ च तान् । प्रश्श्लि-ष्टञ् च यथासन्धि स्वारानाचक्क्षते पृथक्"[1] इति; शुक्लयजुर्वेदप्रातिशाक्ख्ये च– "स्वरो व्व्यञ्जनयुतस्त् तैरोव्व्यञ्जनः"[2] इति, तैत्तिरीयप्रातिशाक्ख्ये– "उदात्तपूर्वस् तैरोव्यञ्जनः"[3] इति; शौनकीयचतुरद्ध्यायिकायाञ् च– "व्यञ्जनव्यवेतस् तैरोव्यञ्जनः"[4] इति; शैशिरीयशिक्क्षायाञ् च– "तैरो-व्यञ्जन ऊतये"[5] इति; स्वराङ्कुशशिक्क्षायाञ् च– "उदात्तपूर्वयँ यत् किञ् चिच् छन्दसि स्स्वरितम् भवेत् । एष सर्वबहुस्स्वारस् तैरोव्यञ्जन एव च"[6] इति, याज्ञवल्क्यशिक्क्षायाञ् च "उदात्तपूर्वस् स्वरितो व्यञ्जनेन युतो यदि । एष सर्वो बहुस्स्वारस् तैरोव्यञ्जन उच्च्यते"[7] इति; वर्णरत्नप्रदीपिकायाञ् च– "उदात्तपूर्वो यत्तर स्स्यान् नीचो व्यञ्जनसयँ युतः । स तैरोव्यञ्जन इति स्वरो भवति तद् यथा । इडे रन्ते हव्ये काम्म्ये चन्द्रे ज्योते निदर्शनम्"[8] इति, वर्णोच्चारण-प्रकारपरिशिष्टे च– "स्वरितञ् छन्दसि पदयँ यत् किञ्चिदपि दृश्यते । उदात्तपूर्वन् तत् सर्वन् तैरोव्यञ्जन(म्?) उच्च्यते । इडे रन्ते तथा हव्ये काम्म्ये इत्त्यादि दर्शनम्"[9] इति; व्यासशिक्क्षायाञ् च– "यस् समानपदे स्वारस् तैरोव्यञ्जन उच्च्यते"[10] इति; सर्वसम्मत-शिक्क्षायाञ् च– "उच्चात् परोऽनुदात्तो यस् स्वरितत्त्वमवाप्नुयात् । तैरोव्यञ्जनसञ्ज्ञोऽयमुच्चपूर्वऽ प्रकीर्तितः"[11] इति; पारिशिक्क्षा-

---

१. ३।१८। २. १।११७। ३. २०।७। ४. ३।६२। ५. श्लो. ११०। ६. श्लो. १० (शि. स., पृ. १६१–१६२)। ७. श्लो. ८१ (शि. स., पृ. १२)। ८. श्लो. ६४–६५ (शि. स., पृ. १२२)। ९. श्लो. ६–७ (शि. स., पृ. १७१)। १०. सू. ३११। ११. श्लो. ४२।

याञ् च– "पदे समाने य उदात्तपूर्वस् तैरो अथो व्यञ्जन उत्तरस् सः"[1] इति, नारदीयशिक्षायाञ् च "उदात्तपूर्वयँ यत् किञ्चिच् छन्दसि स्स्वरितम् भवेत्। एष सर्ववहुस्स्वारस् तैर(रो?)व्यञ्जन उच्च्यते"[2] इति; माण्डूक्या शिक्षायाञ् च "उदात्तपूर्वे सार्द्धे (?) तु द्वितीये अक्षरे तु यः। तैरोव्यञ्जन इत्त्येष सा(स्वा)रस् स्याद् दधिमद्धिति"[3] इति प्राप्यते ॥१७॥

तैत्तिरीया एकपदस्स्थनिमित्तवँ वदन्त्यमुम्।
नानापदस्स्थहेतुन् तु प्प्रातिहतमुशन्ति ते ॥१८॥

अमुन् तैरोव्यञ्जनाख्यं स्वारं समानपदस्स्थादुदात्तात् परत्तर समवस्स्थायिनञ् तैत्तिरीया वदन्ति; भिन्नपदस्स्थाद् उदात्तात् परत्तर स्स्थितमन्त्यँस् तैरोव्यञ्जनत्वेन व्यवहियमाणमपि स्स्वरितन् तैत्तिरीया× प्रातिहतम् भणन्ति, न तैरोव्यञ्जनम्। तथा च तैत्तिरीयप्रातिशाख्ये— "उदात्तपूर्वस् तैरोव्यञ्जनः"[4] इति, तद्व्याख्यातारश् च "उदात्त-पूर्वाधिकारे सति पुनरत्तर तत्कथनाद् एकपदस्स्थोदात्तविशेषोऽवगम्यते; तस्माद् एकपदस्स्थोदात्तपूर्वो यस् स्वरितस् स तैरोव्यञ्जनो वेदित-व्यः"[5] इत्त्याहुः। व्यासशिक्षायामपि— "यस् समानपदे स्स्वारस् तैरोव्यञ्जन उच्च्यते"[6] इति। प्रातिहतलक्षणञ् च— "अपि चेन् नानापदस्स्थमुदात्तमथ चेत् सांहितेन स्स्वर्यते स प्प्रातिहतः"[7] इति तैत्-तिरीयप्रातिशाख्ये उक्तम्; तद्व्याख्यानञ् च "नानापदस्स्थमक्षर-मुदात्तपूर्वञ् चेत् परतो नीचं सांहितेन विधिना स्वर्यते चेत् स प्प्राति-हतोऽत्तर वेदितव्यः"[8] इति; व्यासशिक्षाव्याख्याने तदुदाहरणानि च— "गच्छन्त्वाहुतिङ घृतस्स्य, प्रार्प्पयतु, श्रेष्ठतमाय, नास्स्येन्द्रियम्, वीक्षिताय स्स्वाहा"[9] इति। कौहलीयशिक्षायान् तु— "एकादिष्ट उदात्तेन नित्त्य× प्रातिहतामिधः"[10] इति। सर्वसम्मतशिक्षायाञ् च— "स प्प्रातिहतनामा स्स्यात् स्वर्यते यस् तु सांहिते। अत्त्यन्तमार्द्दवन् तत्तर कार्य स्वरविचक्षणैः"[11] इति; पारिशिक्षायाञ् च— "नाना-पदस्स्थेऽपि च सांहितेन यस् स्वर्यते प्रातिहतस् स उच्चैः"[12] इति। प्रातिहतस्स्य तैरोव्यञ्जनापवादत्त्वञ् च "पादवृत्तहतौ स्यातान् तैरो-

---

१. सू. १०८। २. २।१।४। ३. श्लो.७८ (शि.स.,पृ. ४७०)।
४. २०।७। ५. तिरभा. र. २०।७। ६. सू. ३११।
७. २०।३। ८. तिरभा. र. २०।३। ९. व्या. शि. सू. ३१२।
१०. श्लो. १५। ११. श्लो. ४४। १२. सू. १०४।

व्यञ्जनबाधकौ"[1] इति सर्वसम्मतशिक्क्षायामुक्तम् ॥१८॥

(झ) तैरोविरामनिरूपणम्

योऽवग्ग्रहविरामेणोदात्ताद् व्यवहितꣳ परः ।
स्वरितꣳ पदपाठेषु स हि तैरोविरामकः ॥१९॥

योऽवग्ग्रहविरामेण व्यवहितो भूत्वा स्वनिमित्ताद् उदात्तात् परत्तर स्स्थितः पदपाठेषु प्राप्य्यस् स्वरितस् स तैरोविराम इत्त्यर्थः । उदाहरणानि यथा वि-ष्कभिते, गो-पतौ, यज्ज्ञ-पतिम् इति । तैत्तिरीयाणायँ ये नानापदस्स्थोदात्तनिमित्तका प्रातिहतास् स्वारास् तेषामपि पदपाठे तैरोविरामत्त्वं सम्भवति । अयञ् च स्स्वरश् शुक्लयजुर्वेदप्रातिशाक्ख्ये "उदवग्ग्रहस्त् तैरोविरामः"[2] इति; शौनकीयचतुरद्ध्यायिकायाञ् च "अवग्ग्रहे सविधः"[3] इति; शैशिरीयशिक्क्षायाञ् च "तिरोविरामो विष्कभिते"[4] इति, स्वराङ्कुशशिक्क्षायाञ् च— "अवग्ग्रहात् परयँ यत्तर स्वरितस् स्यादनन्तरः । तैरोविरामन् तवँ विद्द्यादुदात्तो यद्द्यवग्ग्रहः"[5] इति; याज्ज्ञवल्क्यशिक्क्षायामपि— "उदात्तावग्ग्रहाद् यस् तु स्वरितस् स्यादनन्तरः । तैरोविरामन् तवँ विद्द्यात् तैरोव्यञ्जनमन्न्यथा"[6] इति क्व चित्, "अवग्ग्रहात् परो यस् तु स्वरितस् स्यादनन्तरः । तैरोविरामन् तवँ विद्द्यादुदात्तो यद्द्यवग्ग्रहः"[7] इत्त्येव च क्क्व चित्; वर्णरत्नप्रदीपिकायाञ् च-"उदात्तावग्ग्रहो यत्तर स तु तैरोविरामकः । स्वरो ज्ज्ञेयꣳ पदेऽन्न्यत्तर तैरोव्यञ्जन एव तु । यथा गोपताविति गो-पतौ यज्ज्ञपतिस् तथा"[8] इति; वर्णोच्चारणप्रकारपरिशिष्टेऽपि- "अवग्ग्रह उदात्तश् चेत् स्वरितस् स्यात् ततꣳ परम् । अवग्ग्रहात् पदयँ (परो ?) यस् तु तवँ विद्द्यात् प्रथमं स्वरम् । लक्क्ष्यमस्स्य तु विज्ज्ञेयङ् गोपताविति गो-पतौ"[9] इति; नारदीयशिक्क्षायामपि "अवग्ग्रहात् परयँ यत्तर स्वरितं स्यादनन्तरम् । तिरोविरामन् तवँ विद्द्यादुदात्तो यद्द्यवग्ग्रहः"[10] इति; माण्डूक्क्यां शिक्क्षायाञ् च- "अवग्ग्रहात् परयँ यत्तर स्वरितं स्यादनन्-

---

१. श्लो. ४५ । २. १।११८ । ३. ३।६४ ।
४. श्लो. १११ । ५. श्लो. ११ (शि. स., पृ. १६२) ।
६. श्लो. ८२, (शि.स.,पृ.१२) । ७. या. शि. शि. व. वि. पृ. ६६ ।
८. श्लो. ६५-६६ (शि. स., पृ. १२२-१२३) । ९. श्लो. ३-४ (शि. स., पृ. १७२) । १०. २।१।५ ।

तरम्। तिरोविरामम् जानीयात् प्रजापतेर् निदर्शनम्"[1] इति प्रदर्शितः ॥१९॥

(ञ) पादवृत्तनिरूपणम्

सविवृत्तेऽ पदान्तस्स्थादुच्चाद् यस् स्वरितऽ परः।
स पादवृत्तो वैवृत्तोऽथवा पादान्तवृत्तकः ॥२०॥

विवृत्त्या युक्तात् पदान्तस्स्थाद् उदात्तादक्क्षरात् परो यस् स्वरितस् स पदान्तविवृत्तो भव इति पादान्तविवृत्तो वा पादान्तवैवृत्तो वाऽपि भणनीयोऽपि, अथवा पदविवृत्तो भव इति कृत्वा पादविवृत्त इति पादवैवृत्त इति वा वक्तव्योऽपि वर्णविकारनाशादिना पादवृत्त इति वा वैवृत्त इति वा पादान्तवृत्त इति वा उच्च्यते। अथवा पदे वृत्ते भव इति पादवृत्त उच्च्यते। अस्स्योदाहरणानि च– ध्रुवाऽअसदन्, काऽईम्, ताऽअस्मात्, सऽइद्वानः, यऽउपसदः, याः कृत्त्याऽआङ्गिरसीः, याः कृत्त्याऽआसुरीः, याऽउ चान्न्येभिराभृता इति। अयम् च स्स्वार ऋग्वेदप्रातिशाक्ख्ये– वैवृत्ततैरोव्यञ्जनौ क्षैप्प्राभिनिहितौ च तान्। प्रश्श्लिष्टम् च यथासन्धि स्वारानाचक्क्षते पृथक्"[2] इति, शुक्लयजुर्वेदप्रातिशाक्ख्ये च– "विवृत्तिलक्क्षणः पादवृत्तः"[3] इति, तैत्तिरीयप्रातिशाक्ख्ये च– "पदविवृत्त्याम् पादवृत्तः"[4] इति, शौनकीयचतुरद्ध्यायिकायाम् च– "विवृत्तौ पादवृत्त"[5] इति, शैशिरीयशिक्क्षायाम् च– "पादवृत्तऽ कऽ ईवँ वेद"[6] इति, स्वराङ्कुशशिक्क्षायाम् च– "स्वरे चेत् स्वरितयँ यत्तर विवृत्त्या तत्तर सयँयुतम्। एतत् तु पादवृत्तस्स्य लक्क्षणं शास्तरनिश्चितम्"[7] इति; याज्ञवल्क्यशिक्क्षायाम् च— "स्वरयोरन्तरे काले विवृत्तिर् दृश्श्यते यदि। स स्स्वारः पादवृत्तस् स्यात् काऽ ईमिति निदर्शनम्"[8] इति क्क्व चित्, "स्वरे च स्स्वरिते चैव विवृत्तिर् यत्तर दृश्श्यते। पादवृत्तो भवेत् स्वारः श्वित्रऽआदित्त्य दर्शनम्"[9] इति च क्क्व चित्; वर्णरत्नप्रदीपिकायाम् च– "स्वरयोरन्तरे यत्तर विवृत्तिर् यदि दृश्श्यते। स पादवृत्त इत्त्याक्ख्यः काऽ ईमरे निदर्शनम्"[10] इति, वर्णोच्चारणप्रकारपरिशिष्टे च– "विवृत्त्या दृश्श्यते यत्तर स्वरम्

---

१. श्लो. ७९ (शि. स., पृ. ४७०)। २. ३।१८। ३. १।११९। ४. २०।६। ५. ३।६३। ६. श्लो. १११। ७. श्लो. १२ (शि. स., पृ. १६२)। ८. श्लो. ८३ (शि. स., पृ. १३)। ९. मा. शि. शि. व. वि. पृ. ६८। १०. श्लो. ६७ (शि. स., पृ. १२३)।

च स्स्वरिते पदे। स स्स्वरश्च पादवृत्तस् स्यात् पुत्तरऽईधे निदर्शनम्"[1] इति; व्यासशिक्षायाञ् च– "पादवृत्तस् तयोर् व्यक्तौ"[2] इति, कौहलीयशिक्षायाञ् च– "पादवृत्ताऽभिधस् स्वारो विवृत्तौ यश्च पदस्य तु"[3] इति; सर्वसम्मतशिक्षायाञ् च– "विवृत्त्याम् पदयोर् यस् तु पादवृत्तश्च प्रकीर्तितः"[4] इति, पारिशिक्षायाञ् च– "या स्स्यात् समाने (?) तु पदे विवृत्तिस् तस्स्याश्च परे यस् स्वरितश् च लब्धः। स पादवृत्ताह्वय एव नान्न्य एतद् विवृत्तेरपि चाऽर्धमात्तरः"[5] इति; नारदीयशिक्षायाञ् च– "स्वरे चेत् स्वरितयँ यत्तर विवृता यत्तर संहिता। एतत् पादान्तवृत्तस्स्य लक्षणं शास्तरचोदितम्"[6] इति; माण्डूक्या शिक्षायाञ् च– "स्वरिते स्वरितयँ यत्तर विवृत्त्या यत्तर संहिता। तम् पादवृत्तञ् जानीयात् ते त्त्वस्स्मिन् यवमादधुः"[7] इति प्रतिपादितः ॥२०॥

(ट) ताथाभाव्यनिरूपणम्

उदात्ताक्षरयोर् मद्ध्ये नीचस् साऽवग्ग्रहो हि यः।
स्वरितत्त्वञ्च क्वचिद् गच्छेत् स ताथाभाव्य उच्च्यते ॥२१॥

तनू–नप्तरे, तनू–नपात् इत्यादौ पदपाठेऽवग्ग्रहे क्रियमाणे आपस्तम्बादीनामाम्नाये उदात्ताक्षरयोर् मद्ध्ये वर्तमानो नीचस् स्वरितस्तयोच्चार्यते, स च स्वरितस् ताथाभाव्य इत्युच्च्यते। एतादृशस्स्य स्वरितस्स्य कासु चिद् वेदशाखासु सत्ता "नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम्"[8] इति पाणिनीयसूत्तरेणाऽपि सूच्च्यते। ऋग्वेदप्रातिशाख्येऽपि "जात्त्यवद् वा तथा वान्तौ तनूशचीति पूर्वयोः"[9] इति पदपाठे एतादृशस् स्वरितोऽनुमन्न्यते। "उदाद्द्च्यन्तो न्न्यवग्ग्रहस् त्ताथाभाव्यः"[10] इति सूत्तरेण कात्त्यायनमुनिनाऽपि सूचिता सा सत्ता। माद्ध्यन्दिनीयानामाम्नाये तु नाऽयं स्वरितो विद्द्च्यते। तथा चोक्तम्– "माद्ध्यन्दिनविरोधी स्यात् ताथाभाव्यस् तु यस् स्वरः। स्वरौ चैवाऽत्तर दृश्येते भिन्नोदात्तानुदात्तकौ"[11] इति याज्ञ्यवल्क्यशिक्षायाम्। लक्षणन् त्वस्स्य "उदात्ताक्षरयोर् मद्ध्ये भवेन् नीचस् त्ववग्ग्रहः।

---

१. श्लो. ९ (शि. स., पृ. १७२)। २. सू. ३१२।
३. श्लो. १७। ४. श्लो. ४३। ५. सू. १०७। ६. २।१।७।
७. श्लो. ७७ (शि. स., पृ. ४७०)। ८. अष्टा. ८।४।६७।
९. ३।२६। १०. १।१२०। ११. श्लो. ८५, (शि. स., पृ. १३)।

ताथाभाव्यो भवेत् स्वारस् तनूनप्त्रे निदर्शनम्"[1] इति; वर्णरत्नप्रदीपिकायाम् च— "उदात्तादिरुदात्तानतो नीचोऽवग्रह एव च। ताथाभाव्यो भवेत् कम्पस् तनूनप्त्रे निदर्शनम्। माद्ध्यन्दिनविरोधी स्यात् ताथाभाव्यस् तु यस् स्वरः। भिन्नौ यतोऽत्र दृश्येते तावुदात्तानुदात्तकौ। तस्मान् माद्ध्यन्दिनीयानाम् पदे कम्पो विधीयते। तथोक्तमौज्जिहायनकैर् माद्ध्यन्दिनानुसारिभिः। अवग्रहो यदा नीचः प्रोच्चयोर् मद्ध्यतः क्वचित्। ताथाभाव्यो भवेत् कम्पस् तनूनप्त्रे निदर्शनम्"[2] इति। अयमेवार्थ उव्वटेनाऽपि शुक्लयजुर्वेदप्रातिशाख्यसूत्रस्य व्याख्याने प्रतिपादितः[3]। वर्णोच्चारणप्रकारपरिशिष्टेऽपि स्वारोऽयमुद्देशे उल्लिखितोऽस्ति, लक्षणग्रन्थस् त्वस्स्य तत्रुटितो विज्ज्ञायते। माण्डूक्या शिक्षायामपि स्वरितभेदप्रकरणान्ते कम्पप्रूपतया ताथाभाव्यस्स्योल्लेखः कृतः, तथा हि— "द्वयोरुदात्तयोर् मद्ध्ये नीचो यस् स्यादवग्रहः। ताथाभाव्यो भवेत् कम्पस् तनूनपान् निदर्शनम्"[4] इति, "ताथाभाव्यस् तु तालव्यो न कम्पस् स्वरसञ्ज्ञकः। स तालव्यो भवेत् कम्प एजातीति निदर्शनम्"[5] इति च।

कौहलीयशिक्षायाम्— "अणुमात्रक इत्येके स्वरमन्यम् प्रचक्षते"[6] इति योऽणुमात्रकस् स्वरित उक्तस् स खलु अयमेव ताथाभाव्यस् सम्भाव्यते।

यत् तु तैरोव्यञ्जनादीनाम् चतुर्णां स्वरितानां स्वपूर्ववर्त्युदात्तसन्निधिजत्वे सत्यपि तेभ्यः पृथगेव सन्निधिजस् स्वरितः केनचिद् गणितः[7], तदुदाहरणतया च 'अग्निमीडे पुरोहितम्' इत्यादिकमुपदर्शितम् तदविचारितरमणीयम्, उदाहृतानां स्वरितानाम् तैरोव्यञ्जनरूपत्वात्। यच् च तेनैकपदस्थोदात्तात् परस्यैव स्वरितस्य तैरोव्यञ्जनत्वम् प्रातिशाख्यानुसारेण व्यवह्रियते इत्युक्तम्[8], तदपि मन्दम्, ऋग्वेदप्रातिशाख्ये[9] शुक्लयजुर्वेदप्रातिशाख्ये[10] शौनकीयचतुरद्ध्यायिकायाम्[11] च तादृश्या व्यवस्थाया अभावात्। यद्द्यपि तैत्तिरीयप्रातिशाख्ये एकपदस्थनिमित्तकस्य तैरोव्यञ्जनत्वम्[12] भिन्न-

---

१. या. शि. श्लो. ८४ (शि. स., पृ. १३)। २. श्लो. ६८–७१ (शि. स., पृ. १२३)। ३. १।१२०। ४. श्लो. ८० (शि.स., पृ. ४७०)। ५. श्लो. ८१ (शि. स., पृ. ४७०)। ६. श्लो.९। ७. वै. स्व. मी., पृ. २८। ८. तत्रैव टि. २। ९. ३।१७, १८। १०, १।११७। ११. ३।६२। १२. २०।७।

पदस्स्थनिमित्तकस्स्य तु प्रातिहतत्त्वम्[1] उक्तन् तथापि दशमस्वरित-त्त्वेन प्प्रातिहतस्स्याऽपि तेन गणितत्त्वात्[2] ततः पृथगेव सन्निधिज-स्वरितस्स्य गणनन् तेन कृतमनुपपन्नमेव। यदि तु पादवृत्तस्य भिन्नपद-स्स्थनिमित्तकत्त्वमेवेति एकपदस्स्थनिमित्तकत्त्वमेवेति वा स्वीकियेत तदा भिन्नपदस्स्थनिमित्तकैकपदस्स्थनिमित्तकयोरेकतरस्स्य पादवृत्तेऽसङ्-गृहीतत्त्वात् तस्स्य तैरोव्यञ्जनादावप्प्यननुतरभावणीयत्त्वात् तस्स्य सन्निधिजस्वरितत्त्वेन व्यवहार उचितस् स्यात्। किन् तु प्रातिशाक्ख्य-सूत्रेषु तदनुयायिनीषु शिक्क्षासु च पादवृत्तलक्क्षणेषु एकपदस्स्थ-निमित्तकत्त्वानेकपदस्स्थनिमित्तकत्त्वयोः प्रवेशस्स्याऽदर्शनाद् द्वयोरेव पादवृत्तत्त्वेन सङ्गरहो न्याय्यः प्रतीयते। यत् तु ऋग्वेदप्रातिशाक्ख्ये "यथासन्धि"[3] इति पदन् तद् यथौचिति एव योजनीयम्, अनन्यथा तद्वचनेन एकपदस्स्थनिमित्तकतैरोव्यञ्जनानाम् असङ्गरहस्स्य प्प्रसङ्गात्। यैः पदवृत्तिसन्धेर् व्यवहारो न कृतस् तैरपि कात्त्यायनादिभिः पाद-वृत्तस्स्य व्यवहृतत्त्वाच् च। नारदीयशिक्क्षायाम् माण्डूक्क्यां शिक्क्षा-यान् च श्रूयमाणं संहितापदमपि वर्णानामतिशयितस्स्य सन्निधेर् वाच-कत्त्वेनाऽप्प्युपपन्नमेव। पारिशिक्क्षावचनन् च तस्स्याश् शिक्क्षायास् तैत्तिरीयवेदलक्क्षणानुक्क्रमणिकायामनुल्लिखितत्त्वाद् माहिषेयादिवचन-विरुद्धत्त्वाच् चोपेक्क्षणीयम्, "विरोधो यत्तर वाक्क्यानाम् प्रामा-ण्यन् तत्तर भूयसाम्। तुल्ल्यप्प्रमाणकत्त्वे तु न्याय एवम् प्रकीर्तितः"[4] इति न्यायाच् चेति सूक्क्ष्मेक्क्षिकया विचारणीयं सुधीभिः ॥२१॥

(ठ) प्रासङ्गिकवँ विक्क्रमनिरूपणम्

स्वारयोर् वोदात्तयोर् वा स्वरितोदात्तयोरपि।
मद्ध्ये स्स्थितो नीच एको विक्क्रमस् तैत्तिरीयके ॥२२॥

ताथाभाव्व्यप्रसङ्गात् ताथाभाव्व्यतुल्ल्यस्स्थितिको विक्क्रमोऽत्तर उल्लिखितो बोद्ध्यः। अस्स्य विक्क्रमस्स्य प्रतिपादनन् च तैत्तिरीय-प्रातिशाक्ख्ये 'स्वरितयोर् मद्ध्ये यत्तर नीचं स्यादुदात्तयोर् वाऽन्न्य-तरतो वोदात्तस्वरितयोस् स विक्क्रमः, प्रचयपूर्वश् च कौण्डिन्न्यस्स्य"[5] इति, "स्वारविक्क्रमयोर् दृढप्प्रयत्नतरः पौष्करसादेः"[6] इति च। व्यासशिक्क्षायान् च– "मद्ध्यस्स्थ एकनीचोऽतिप्प्रयत्नो विक्क्रमो

---

१. २०।३। २. वै. स्व. मी., पृ. ३८। ३. ३।१८।
४. कर्मप्प्रदीपाक्ख्यायाङ् गोभिलस्स्मृतौ २८।१७। ५. १९।१-२।
६. १७।६।

भवेत्"[1] इति; कौहलीयशिक्षायाञ्च– "उच्च्यन्ते विक्रमास् तेऽपि विज्ञेयाष् षड्विधा बुधैः। उभयस्स्वरितꣳ कश् चिदुभयोदात्तकꣳ परः। उदात्तपूर्वकस् स्वारपर एकस् तु विद्द्यते। एतस्स्य विपरीतोऽन्न्यस् तथा प्रचयपूर्वकः। परोदात्तस् तथा स्वारपर एव निबोधत। उभयोस् स्वारयोर् मद्ध्ये निहतो यत्तर दृश्श्यते। उच्च्यते विक्रमस् त्वेष उभयस्स्वरिताभिधः। इतरे विक्रमा एवमूहनीया मनीषिभिः। प्रयत्नस् स्याद् दृढतरो विक्रमेष्वेषु सयँयतः"[2] इति; सर्वसम्मतशिक्षायाञ्च— "यत्तरैको मद्ध्यको नीचो विक्रमस् स उदाहृतः। स्वरितवँ विक्रमञ् चैव वदेद् दृढतरम् बुधः"[3] इति, "विक्रमꣳ पदमद्ध्ये च नेङ्गयमद्ध्ये विधीयते। वाक्यान्ते च पदान्ते च विक्रमस् तु विधीयते"[4] इति च ॥२२॥

(ङ) स्वरित–तीक्ष्णता–तारतम्य–विवेचनम्

सर्वतीक्ष्णोऽभिनिहितꣳ क्षैप्रश् च तदनन्तरम्।
ततो मृदुतरो जात्त्यꣳ प्रश्श्लिष्टस् तु ततोऽपि च ॥२३॥
ततोऽपि स्स्यान् मृदुतरस् तैरोव्यञ्जनकस् स्वरः।
तैरोविरामस् ततोऽपि पादवृत्तस् ततोऽपि च ॥२४॥
तथाभावव्यस् सर्वमृदुरित्त्येवन् तीक्ष्णतास्स्थितिः।
स्वारेषु मुनिभिꣳ प्रोक्ता क्रमान् न्यूनोत्तरोत्तरम् ॥२५॥
तैत्तिरीयश्श्रुतौ तुल्य-तैक्ष्ण्याꣳ पूर्वे त्रयस् स्वराः।
प्रश्श्लिष्टकप्रातिहतावुभौ तुल्यतया मृदू ॥२६॥
तैरोव्यञ्जनकꣳ पादवृत्तो मृदुतरावुभौ।
तत्तरोदात्तस्स्थितेर् वैशिष्ट्यन् निमित्तवँ विचारयेत् ॥२७॥

स्वाराणान् तीक्ष्णत्वमृदुत्वयोस् सामान्न्यतयोल्लेख ऋग्वेदप्रातिशाख्ये "पृथग् वा"[5] इति सूत्तरेण कृत इत्त्युव्वटः। शुक्लयजुर्वेदप्रातिशाख्ये तु स्वरिततीक्ष्णतातारतम्यं स्फुटम् प्रतिपादितम्— "तीक्ष्णोऽभिनिहितः, परम्परम् मृदुस् त्वन्न्यः"[6] इति। यद्द्यप्येतेन सूत्तरेणाऽतꣳ पूर्वं स्वरितविशेषस्वरूपप्रतिपादनावसरेऽभिनिहितात् पूर्वमुपात्तो जात्त्योऽसङ्गृहीतो भवति, तथापि तत्तर क्षैप्रेण जात्त्यस्स्याऽप्युपलक्षणमित्त्यभिप्रायेण "क्षैप्रे जात्त्यस्स्याऽन्तर्भावो द्रष्टव्यः"[7] इत्त्युव्वटꣳ प्राह। तैत्तिरीयप्रातिशाख्ये च—"क्षैप्र-

---

१. सू. २९४। २. श्लो. २६–२९। ३. श्लो. ५६–५७।
४. श्लो.११२। ५. १३।४५। ६. १।१२५। ७.१।१२५(भाष्ये)।

नित्त्ययोर् दृढतरः, अभिनिहिते च, प्रश्श्लिष्टप्रातिहतयोर् मृदुतरः, तैरोव्यञ्जनपादवृत्तयोरल्पतरोऽल्पतरः"[1] इत्युक्तम् । वर्णरत्नप्रदीपिकायान् तु "सर्वतीक्क्ष्णोऽभिनिहितः प्रश्श्लिष्टस् तदनन्तरम् । ततो मृदुतरौ स्वारौ जात्यक्क्षैप्रावुभौ स्मृतौ । ततो मृदुतरस् स्वारस् तैरोव्यञ्जन उच्च्यते । पादवृत्तो मृदुतरस् त्वेतत् स्वारबलाबलम्"[2] इत्युक्तम्; किन् तु "उत्पन्नो यस् स्तुते वंशे बुद्धिमान् कृतनिश्चयः । अमरेश इति क्ख्यातो भारद्द्वाजकुलोद्वहः । सोऽहं शिक्क्षाम् प्रवक्क्ष्यामि प्रातिशाक्ख्यानुसारिणीम् । बालानाम् पाठशुद्ध्यर्थवं् वर्णज्ञानादिहेतवे" इति प्रतिज्ञाय रचितायां शिक्क्षायामपि अमरेशेन कथं स्वकीयप्रातिशाक्ख्याऽननुकूलोऽर्थः प्रतिपादित इति चिन्तनीयवं् विचक्क्षणैः । तेन विवेचनवं् विनैव माण्डूक्क्याश् शिक्क्षाया वचनं स्वकीयशिक्क्षायां सङ्गृहीतमिति हेतुनैवाऽयं स्वकीयप्रातिशाक्ख्येन सह तदीयायाश् शिक्क्षाया विसवं्वादस् समागतस् सम्भाव्यते । यद्द्यपि उव्वटेनापि इमौ श्लोकौ उद्धृतौ[3] तथापि तस्स्य क्षैप्रजात्त्यतंक्क्ष्ण्यसान्निद्ध्यप्रतिपादने एव तात्पर्यवं् विज्ञायते, न सर्वथा श्लोकार्थानुसरणे । अनन्तेन तु स्वप्रातिशाक्ख्याऽननुकूलौ तौ श्लोकौ परम्परमित्त्यस्स्याऽव्ययस्स्यार्थं स्फुटीकर्तुमेवोद्धृतौ[4] दृश्श्येते । व्यासशिक्क्षायाम् च— "नित्त्योऽत्त्युच्चनीचः क्षैप्रस् तत्समो न्यूनतः परः । दृढतरः प्रयत्नस् स्यान् नित्त्ये क्षैप्रे च वा दृढः । प्रश्श्लिष्टे चाऽभिनिहिते मृदुता स्वल्पताऽन्न्यतः"[5] इति । सर्वसम्मतशिक्क्षायामपि— "सयवं स्वर्यते यत्तर पदस्स्थन् नीचपूर्वकम् । अपूर्ववं् वा स नित्त्यस् स्याद् वदेद् दृढतरम् बुधः"[6] इति, "लुप्ताकारोऽनुदात्तश् चेत् पूर्वोच्चस्स्वरितो भवेत् । एषोऽभिनिहितो ज्ञेयो वदेद् दृढतरम् बुधः"[7] इति, "इवर्णोकारयोस् स्थाने यवत्त्वे सत्त्युदात्तयोः । तस्मात् परं हि यन्नीचं स्वरितस् तस्स्य वै भवेत् । नाम्ना तु क्क्षैप्र एव स्स्यादमुन् दृढतरवं् वदेत्"[8] इति, "उकारादुच्चकान् नीचे ह्युकारे चोत्तरस्स्थिते । ऊकारः क्रियमाणोऽत्तर स्वरितस् सन्धितो भवेत् । प्रश्श्लिष्टोऽप्युपदिष्टोऽयवं् वदेन् मृदुतरम् बुधः"[9] इति, "उच्चात् परोऽनुदात्तो यस्

---

१. २०।९–१२ । २. श्लो. १०२–१०३ (शि. स., पृ. १२६) ।
३. शु. य. प्रा. भा. १।१२५ । ४. शु. य. प्रा. अ. भा. १।१२५ ।
५. सू. ३१३–३१५ । ६. श्लो. ५२–५३ । ७. श्लो. ४८–४९ ।
८. श्लो. ४९–५० । ९. श्लो. ५१–५२ ।

स्वरितत्वमवाप्नुयात् । तैरोव्यञ्जनसञ्ज्ञोऽयमुच्चपूर्वः प्रकीर्तितः । अमुञ्च पादवृत्तञ्च वदेदल्पतरम् बुधः । विवृत्त्याम् पद्रयोर् यस् तु पादवृत्तः प्रकीर्तितः । स प्रातिहतनामा स्यात् स्वर्यते यस् तु सांहिते । अतत्यन्तमार्दवन् तत्तर कार्यं स्वरविचक्षणैः । पादवृत्त-हतौ स्यातान् तैरोव्यञ्जनबाधकौ"[1] इति, "उक्तलक्षणशून्यो यस् स्वर्यते कुत्तरचिद् यदि । अल्पवायुर् भवेत् सोऽपि पादवृत्त इतीरितः"[2] इति च । पारिशिक्षायाञ् च— "क्षैप्रे च नित्त्येऽतिदृढः प्रयत्नो दृढोऽतिपूर्वोऽभिहते प्रयत्नः । प्रश्लिष्टके प्रातिहते च कार्यस् स्वारे तथैवाऽतिमृदुः प्रयत्नः । स्यात् पादवृत्ते खलु सप्तमे च स्स्वारे भवेद-ल्पतरः प्रयत्नः"[3] इति । माण्डूक्यां शिक्षायाञ् च— "सर्वतीक्ष्णोऽभिनिहितस् ततः प्राक्श्लिष्ट उच्यते । ततो मृदुतरौ स्वारौ जात्त्यः क्षैप्रश् च तावुभौ । ततो मृदुतरस् स्वारस् तैरोव्यञ्जन उच्यते । पादवृत्तो मृदुतर इति स्स्वारबलाबलम् । उपन्न्यासस् तु कर्तव्यः कण्ठे निक्षेपसञ्ज्ञकः । उपन्न्यासात् परं हन्न्याद् भूमौ शङ्कुपदयँ यथा"[4] इति ।

एतस्मिन् स्वरितगततैक्ष्ण्यमात्तरास्स्थितिविशेषे तत्तर-तत्तर स्वरितविशेषे उत्पत्त्यादौ उदात्तस्स्य स्थितेर् विशेष एव निमित्तत्वं विभाव्यते । तथाहि अभिनिहिते पूर्व उदात्तो दीर्घ एकार ओकारो वाऽनुदात्तमकारन् निगिरतीति अत्तरोदात्ततत्वस्स्य उत्कटतया स्वरितेषु सर्वतीक्ष्णतत्वमेतस्स्य युक्तियुक्तन् दृश्यते । क्षैप्रे पूर्ववर्तिन उदात्तस्स्य दीर्घतत्वस्स्यापि सम्भवात् प्रश्लिष्टे तु तस्स्य सदा ह्रस्स्वतत्वात् प्रश्लिष्टापेक्षया क्षैप्रस्स्य तीक्ष्णतरत्वम् उप-पन्नम् । अभिनिहिते इव क्षैप्रे उदात्तवर्णोऽनुदात्तवर्णन् न निगिर-तीति अभिनिहितात् क्षैप्रस्याऽल्पतैक्ष्ण्यकत्वमपि सुष्ठूपपन्नम् । तैरोव्यञ्जनादौ पूर्ववर्तिन उदात्तस्स्य उपरागमात्तरमिति तेषाम् पूर्वा-पेक्षया अल्पतरतैक्ष्ण्यकत्वमुपपद्यते । तत्तरापि तिरोविरामपाद-वृत्तयोरवग्रहेण विवृत्त्या च क्रमाद् व्यवधानादुदात्तोपरागस्स्या-ल्पतेति तैरोव्यञ्जनापेक्षया एतयोरल्पतरतैक्ष्ण्यकत्वम्, तथा-भाव्ये पूर्वोत्तरोदात्तयोर् विविक्तता रक्षितुमल्पतम एवोदात्तो-परागः क्रियत इति तस्स्य सर्वाल्पतैक्ष्ण्यकत्वमुपपन्नमिति सूक्ष्मेक्ष-

---

१. श्लो. ४२–४५ । २. श्लो. ५४ । ३. सू. १०९–१११ ।
४. श्लो. ८२–८४ (शि. स., पृ. ४७०) ।

क्षिकया बुधैर् विचारणीयम् । जात्यस्य तु तीक्ष्णत्वम् मृदुत्ववँ वाऽपि आजानजमेवेति च मन्तव्यम् ॥२३–२७॥

७. कम्पस्वरनिरूपणम्

तुल्ययोस् स्वरयोर् मद्ध्ये स्यादणुव्या मात्तरया क्वचित् ।
स्वरान्तरयँ यदुच्चार्यन् तं हि कम्पम् प्रचक्षते ॥२८॥
कम्पयोगात् स्वरऽ कम्पः कम्पितो वा विकम्पितः ।
बाह्वृचे चाऽऽथर्वणे च क्ख्यातस् सोऽन्न्यत्तर च क्क्वचित्॥२९॥
स्वारो जात्योऽभिनिहितऽ वर्षप्परऽ प्रश्शिलष्टकोऽपि वा ।
उच्चोदयो वा स्स्वरितोदयोऽपि स्स्याद् विकम्पितः ॥३०॥
प्राक् तस्मादनुदात्तस् स्यादुदात्तो वा तथापि च ।
उक्तेन लक्ष्मणा योगात् सम्भवत्त्येव कम्पता ॥३१॥
पूर्वे नीचेऽपेक्ष्य तत्र च कम्पितत्त्ववँ विभाव्यते ।
प्रोच्चे तु पूर्वे हेतुस् स न कम्पत्त्वविभावने ॥३२॥

समानयोस् स्वरयोरुदात्तयोरनुदात्तयोर् वा मद्ध्ये अनुदात्तरूपमुदात्तरूपवँ वा स्वरान्तरयँ यद् उच्चार्यम् भवेत् तद्ध कम्पम् भणन्ति वैदिकाः । पूर्वस्य परस्य च स्वरस्योच्चारणेन पीडनादत्त्यल्पीकृतोच्चारणसमयो मद्ध्यवर्तिस्स्वरलेशो न सम्म्यक् स्वस्स्थानद्ध गच्छति, किन् तु गत्वेव प्रतिनिवर्तते झटित्त्येव, एवन् चाऽस्य पूर्वस्स्वरात् स्वस्स्थानम् प्रति गमनम् उत्तरस्वरम् प्रत्त्यागमनन् च न स्वतन्तरस्वरप्रयुक्ततया किन् तु पूर्वोत्तरस्वरविकम्पितत्त्वमात्तररूपेणाऽनुभूयते इति तदिदं स्वरोच्चारणद्ध कम्प इवेति कृत्वा विकम्पितमेवेति वा कृत्वा कम्प इति वा कम्पितम् इति वा विकम्पितमिति वोच्च्यते; एतादृशकम्पविशिष्टत्वाद् एतद्घटितस् स्वरितविशेषोऽपि कम्प इत्त्युच्च्यते, कम्पित इति विकम्पित इति च व्यवहिरयते । सोऽयद्ध कम्पस्स्वरो बाह्वृचे आथर्वणे च बाहुल्येनोपलब्ध्यतया प्रक्ख्यातः, अन्न्यत्तराऽपि तैत्तिरीयकादौ अयमुपलब्ध्यते; शुक्लयजुर्वेदे तु संहितायान् न प्राप्प्यते; पदपाठे क्वचित् प्राप्प्यते इति उव्वटादयो भणन्ति । उक्तरूपस्य कम्पस्योल्लेख ऋग्वेदप्रातिशाक्ख्ये स्पष्टतया तु न प्प्राप्प्यते, तद्भाष्यकारेण उव्वटेन तु कृतः[1] । यद्द्यपि ऋग्वेदप्रातिशाक्ख्यस्य तृतीयपटलस्याऽन्ते "जात्त्योऽभिनिहितश् चैव क्क्वैप्परऽ प्रश्शिलष्ट एव च ।

---

१. ३।६ ।

एते स्वारा४ प्रकम्पन्ते यत्तरोच्चस्स्वरितोदयाः" इति श्लोक४ प्राप्यते, तथापि तत्तरोव्वटभाष्यस्स्याऽनुपलम्भात् स अनाकर इति प्रतीयते। न च तस्माच् श्लोकात् कम्पस्स्य स्वरूपवँ विवृतम् भवति। शुक्लयजुर्वेदप्रातिशाक्ख्येऽपि स्फुटतया तु कम्पो नोल्लिखितः, किन् तु तद्भाष्ये तूल्लिखितः। यद्द्यपि "स्वरितस्स्य चोत्तरो देशः प्रणिहन्न्यते"[1] इति सूत्तरं शाखान्तरपरतया व्याक्ख्यातृभिर् नीतम्, तथापि तत् सूत्तरं शुक्लयजुर्वेदेऽपि कम्पस्स्य सत्ताङ कस्स्याञ् चिच् छाखायान् तु सूचयत् प्रतीयते; कम्पसूचकस्स्य ऋग्वेदप्रातिशाक्ख्यसूत्तरस्स्य[2] तैत्तिरीयप्रातिशाक्ख्यसूत्तरस्स्य[3] कम्पप्रतिपादकस्स्य शौनकीयचतुरद्ध्यायिकासूत्तरस्स्य[4] च शैल्ल्या सह एतत्सूत्तरशैल्ल्यास् सर्वँवादात्। तैत्तिरीयप्रातिशाक्ख्येऽपि कम्पस्स्य नाम्नोल्लेखस् तु नास्ति; किन् तु कम्पनिभविक्करमप्रसङगे "द्वियम एके द्वियमपरे ता अणुमात्तराः"[5] इति सूत्तरन् तत्तर पट्ठ्यते। इदं सूत्तरङ कम्पपरतया व्याक्ख्यातृभिर् व्याक्ख्यातम्। शौनकीयचतुरद्ध्यायिकायान् तु "अभिनिहितप्राश्लिष्टजात्यक्क्षैप्राणामुदात्तस्वरितोदयानामणुमात्तरा निघाता, विकम्पितन् तत् कवयो वदन्ति"[6] इति कम्पस्स्य स्फुटमुल्लेखस् तत्स्वरूपस्स्य सङक्षिप्तम् प्रतिपादनञ् च प्राप्यते। शाकल्यस्स्यापि "अप्राकृतस् तु यस् स्वारस् स्वरितोदात्तपूर्वगः। उदादायार्धमस्स्याऽथ शिष्टन् निग्घ्नन्ति कम्पितम्"[7] इति वचनम् प्राप्यते। **शैशिरीयशिक्क्षायान्** तु कम्पविधिर् विस्तरेण प्रोक्तः, तथा हि— "मद्ध्ये तु कम्पयेत् कम्पमुभौ पार्श्वौ समौ भवेत् (उभे पार्श्वे समे वदेत्?)। द्विगुणवँ वर्णकालाच् च पादः४ कम्पार्थ इष्यते। अनुदात्तमुपादाय स्वरितं ह्यवलम्बयेत्। पुनर् निहतमागच्छेद् एष कम्पविधिस् स्मृतः। क्व१ वोऽश्वा युजानो३स्माभिस् त्वं हीन्द्रेति निदर्शनम्। सरङगङ कम्पयेत् कम्पं रथीवेति निदर्शनम्। उदात्तः पूर्वभागस् तु परभागो निहन्न्यते। उदात्तकम्प इत्युक्तः४ कुत्तरचिच् चापि दृश्यते। शची३पतिन् तनू३नपात् स्थानान् न (न्नेति?) निदर्शनम्। क्रमकाले रथानान् न संहितावन् न कम्पयेत्। नीचस्स्वरितमेवात्तर एष कम्पविधिस् स्मृतः"[8] इति; "स्वरा४ (स्वारा४?) कम्पाश् च रङगाश् च ये यत्कालास् स्वभावतः। वर्धन्ते प्रोच्च्यमानास् ते क्षिप्र-यत्ने वि(ऽपि?)

---

१. शु. य. प्रा. ४।१४०। २. ११।५६। ३. १९।३। ४. ३।६५। ५. १९।३। ६. ३।६५। ७ प्रौढमनो. (सन्ज्ञाप्रकरणे)। ८. श्लो. ६७–७१।

वक्तरि"[1] इति च। एवञ् च शैशिरीयशिक्क्षायाङ् कम्पस्वरूपम् अनुदात्तपूर्वकोदात्तपूर्वककम्पयोर् वैशिष्ट्यञ् च कम्पविधिप्रदर्शनेन सूचितन् दृश्यते। **शौनकशिक्क्षायाञ् च**— "मद्ध्ये तु कम्पयेत् कम्पमुभौ नीचौ समौ भवेत् (वदेत्?)। द्विगुणवँ वर्णकालाच् च पादऽकम्पार्थमिष्यते॥ अनुदात्तमुपादाय स्वरितं ह्यवलम्बयेत्। पुनर् निहतमागच्छेदेष कम्पविधिस् स्मृतः॥ क्ववोश्श्वास् त्वां हीन्द्रावसेव्व्यन्धौ अख्यन्नदद्द्यो न पीपेः॥ उदात्तऽ पूर्वभागस् तु परभागो निहन्यते। उदात्तकम्प इत्युक्तऽ कुत्तर चिच् चाऽपि दृश्यते"[2] इति। **उपलेखसूत्तरे च**— "कम्पयेन् नीचस्स्वरितं ह्रस्स्वदीर्घाभुवौ स्वरौ। ह्रस्स्वदीर्घाविति तावुभौ स्वरावपि कम्पयेत्॥ ह्रस्स्वे ह्रस्स्ववँ विजानीयाद् दीर्घे दीर्घन् तथैव च। स्वरितस्स्यानुरूपेण कम्पङ् कुर्वीत शास्तरवित्॥ अनन्यम् (अनन्यत्?) पदवँ विचार्येत उदात्तो यत्तर दृश्यते। कम्पन् तत्तर न कुर्वीत न चोदात्तेन सयँ युतम्। उदात्तात् स्वरिताद् वाऽपि कम्प उत्पद्द्यते क्वचित्। संहितायाम् पदे वाऽपि नीचस्स्वरितमुच्च्यते। तत् पदं हि भवेत् कम्पमाकारान्तञ् च वर्जयेत्। क्रमकाले तत्वकम्पस् स्यान् नीचञ् चेदुत्तरम् पदम्। न्यगित्त्येतस्स्याऽनीचानामपि कम्पो व्योमेत्त्युदात्तादीनाम्। व्यक्तारीत्यापेत्याकारान्तयोरपि च। प्रशस्तिकृदेकस्स्य चिदतो नो रुद्द्राऽ क्व १ वोश्श्वा इति प्प्रथमन् नाना ह्य१ग्ने त्वां हीन्द्रकदून्वस्स्याभ्यार्षमूर्जङ् क्रमकाले नव कम्पलोपः"[3] इति। **पाणिनीयशिक्क्षायामपि**— "मद्ध्ये तु कम्पयेत् कम्पमुभौ पार्श्वौ समुन्नयेत्। सरङ्गङ् कम्पयेत् कम्पं रत्थ्यो३वेति निदर्शनम्"[4] इति कम्पोच्चारणविधिः, सरङ्गकम्पोच्चारणविधिश् च प्प्रदर्शितः। यत् तु केन चिन् नाऽयङ् कम्पविधिरिति जल्पितन्[5] तद् अस्स्यामुक्तौ शैशिरीयशिक्क्षादिसवँ वादस्स्य दर्शनाच् चाऽनादरणीयमेव। **स्वराङ्कुशशिक्क्षायाञ् च**— "कम्पन्ते ते (जात्त्यादयश्) च चत्त्वारस् स्वरितोच्चोदयास् स्वराः। एतत् सम्म्यक्प्रकारेण ज्ञात्त्वाऽसौ कम्पविद् भवेत्। नीचेन स्वरितस् स्वारमेकीभावेऽनुगच्छति। नीचन् नीचस् तिरभिश् चोच्च उच्चत्त्वमभिगच्छति। उदात्तात् स्वरिताद् यस्स्य स्वरितोदात्तवच् छ्रुतिः। प्रकृत्त्या निहितञ् चाऽऽहुराचार्यास् स्वरवित्तमाः"[6] इति,

---

१. श्लो. ९४। २. श्लो. ५६–५८। ३. अष्टमेवर्गे।
४. श्लो. ३०। ५. पा. शि. शि. स. स., पृ. ९३; तत्तरैव टि. १।
६. श्लो. ७–९ (शि. स., पृ. १६१)।

"स्वरितस्स्याऽनुरूपेण कम्पञ्च कुर्वीत शास्त्रवित्। ह्रस्स्वे ह्रस्स्वं विजानीयाद् दीर्घे दीर्घन् तथैव च। स्वरितान् नियतञ्च गच्छेत् स्वरितो नियतश् च नौ (स्वरितन् नियताच् च तौ ?)। द्विमात्तरो यत्तर दृश्यते ह्रस्स्वकम्पस् स उच्च्यते। अनुदात्तञ्च करमात् कुर्यात् स्वरितं ह्यवलम्बयेत्। पुनर् नियतमागच्छेद् दीर्घकम्पस् स उच्च्यते"[1] इति च; **याज्ञवल्क्यशिक्षायामपि**— कम्पोल्लेखयुतः "उदात्ताक्षरयोर् मद्ध्ये भवेन् नीचस् त्ववग्ग्रहः। ताथाभाव्यो भवेत् कम्पस् तनूनप्प्तरे निदर्शनम्"[2] इति पाठ× प्राप्प्यते। अमरनाथो यद्द्यपि कम्प इत्यस्स्य स्स्थाने स्वार इति पठति[3], तथापि कम्पपदयुक्त एव पाठ× प्रातिशाक्ख्यप्रदीपशिक्षायामपि धृतो दृश्यते[4]। **वर्णरत्नप्रदीपिकायाञ् च**— "उदात्तादिरुदात्तान्तो नीचोऽवग्ग्रह एव च। ताथाभाव्यो भवेत् कम्पस् तनूनप्प्तरे निदर्शनम्॥ माद्ध्यन्दिनविरोधी स्यात् ताथाभाव्यस् तु यस् स्वरः। भिन्नौ यतोऽत्तर दृश्यते तावुदात्तानुदात्तकौ॥ तस्मान् **माद्ध्यन्दिनीयानाम्** पदे कम्पो विधीयते। यथोक्तमौज्जिहायनकैर् माद्ध्यन्दिनानुसारिभिः। अवग्ग्रहो यदा नीच× प्रोच्चयोर् मद्ध्यत× क्वचित्। ताथाभाव्यो भवेत् कम्पस् तनूनप्प्तरे निदर्शनम्। जात्त्याभिनिहितक्षैप्प्रश्लिष्टास् स्वरिता इमे। नीचपूर्वा यदा तत्वेते तिर्यक्स्वारस् ततो भवेत्॥ जात्त्योऽभिनिहित× क्षैप्प्र× प्रश्लिष्टश् च चतुर्थकः। एते स्वरा× प्रकम्पन्ते दृष्ट्वोदात्तम् पुरस्स्थितम्॥ यथा वरुण पस्तत्यास्स्वा युद्ध्योऽसम्माकन् तथा परम्। परमेष्ट्ठ्यभिधीतोऽभीममित्त्यादि निदर्शनम्॥ नीचपूर्वोदात्तपरस् स्वरोऽसौ प्रणिहन्न्यते। अन्न्यथा नीच एव स्स्यात् स्वर्णघर्म्मादिकयँ यथा"[5] इति। अत्तर च जात्त्यादीनाञ्च कम्पताया माद्ध्यन्दिनीयके काण्ण्वानामाम्नाये चाऽभावेऽपि वर्णरत्नप्रदीपिकाया× पञ्चदशशाखासाधारणप्रातिशाक्ख्यानुसारितया तस्स्याञ् जात्त्यादिकम्पानामुल्लेख× कृत इति मन्तव्यम्। **व्यासशिक्षायाञ् च**— "स्थितस्स्वारस्स्य चाऽन्त्योऽणुर् नीचस् स्यात् प्रवणोत्तरे। स्वरद्द्वयस्स्य चैकस्मिन् कम्पसञ्ज्ञा च दीर्घता। क्षैप्प्रकम्पश् चतुर्धैवमादूदेदैद्भिरुच्च्यते। प्रश्लिष्टो नित्त्य ऊदाद्भ्यामेङाऽभिनिहितस् स्मृतः।

---

१. श्लो. २०–२२ (शि स., पृ. १६२–१६३)। २. या.शि. शि. व. वृ., पृ. ६८, टि. ३। ३. या. शि. पृ. ६८ श्लो: ८५। ४. शि.स.पृ. २१५। ५. श्लो. ६८–७५ (शि. स., पृ. १२३)।

उच्चोर्ध्वौ यददीव्यादि त्रिके न कञ् चनेति च। उच्चकम्पौ स्थितेङ्-रूपौ स्वाराः कम्पाश् च सांहिताः"[1] इति, तद्व्याख्याने वेदतैजसे च— "तत्र नीचस्स्याणुत्वे सति द्रुतवृत्तिकत्वात् कम्पसञ्ज्ञा स्यादिति केचित्"[2] इति। **कौहलीयशिक्षायान् च**— "कम्पेषु प्रथमस्स्वारो अणुमात्रिक इष्यते। त्रयाणामादितस् तेषु सन्निपातो मिथो यदि। अपरः प्रथमस्स्यार्धन् निहतन् तु विधीयते। तृतीयो वा चतुर्थो वा भागो निहत इष्यते। प्रश्लिष्टस्य च सयँयोगस् तेषामन्यतमेन चेत्। स्वेच्छाप्रयोग इच्छन्ति कम्पन् तत्रापि केचन। अदीर्घन् दीर्घवत् कार्यन् तत्र ह्रस्वस्य कर्षणात्। अथ स्स्वायम्भुवे काण्डे कम्पाः केचिदुदाहृताः॥ तत्रोदात्ताः प्रयोक्तव्या निहतांशस् तु पूर्ववत्। वीर्यम् बलमिति ह्यत्तत्र ह्रस्वकम्प उदीरितः॥ तन्न्वा स्वायामितीत्यादि दीर्घः कम्पो विधीयते। ते अस्मदिति वाक्यांशे कैश्चित् कम्पो न पठ्यते॥ लक्षणप्रतिकूलन् तद् ब्रुवते केऽपि सूरयः। ये-पदन् न हतङ् कस्मात् स्यादानर्थक्यमस्य तु। एवम् बहुविधा दोषाः प्रदृश्यन्ते मनीषिभिः"[3] इति। **सर्वसम्मतशिक्षायान् च**— "स्वरिते परभूते च स्स्वरितस्योत्तरार्धकम्। नीचङ् कुर्यात् स कम्पस् स्याद् यथा दीर्घन् तमुच्चरेत्"[4] इति। तट्टीकायान् च **शिक्षान्तरवचनम्**— "मद्ध्ये तु कम्पयेत् कम्पमुभे पार्श्वे समे वदेत्" इति। **पारिशिक्षायान् च**— "प्रश्लिष्टनित्त्याभिहताश् च यत्तत्र क्षैप्रस् तथोच्चस्स्वरितोदयास् स्युः। तत्र प्रकम्प्यन्त इमे हि सन्धौ पूर्वस्स्वरान्ते निहतन् च कुर्यात्॥ स कम्प एवात्र यथा हि दीर्घन् तथोच्चरेद् ह्रस्वमपि प्रकम्पे। कम्पो द्विधा स्स्वार उदात्तकश् च स्स्वाराख्यकम्पास् त्विह संहितायाम्॥ शाखान्तरेष्वेव उदात्तकम्पाः पुनर् द्विधा तौ खलु ह्रस्वदीर्घौ। तस्स्याऽऽदितस् स त्र्यणुमात्रकालस्स्वारस् तदन्त्ये निहतोऽणुमात्रः॥ उच्चस् तथा स त्र्यणुमात्र आदौ तस्स्याऽन्त्यभागेऽप्यणुमात्रनीचः। सम्मेलनेनैव तयोर् द्विमात्रस् स एव कम्पस् स्वरितोच्चयोश् च॥ क्षैप्रस्य कम्पस् तु चतुर्भिरादूदेदैर्दभिरेङोऽभिहतस्य कम्पः। प्रश्लिष्ट ऊत्वात् कथितोऽत्र नित्त्य आतोच्यतेऽसौ क्वचिदेव ओङः॥ एङरूपनित्त्यौ स्स्त उदात्तकम्पा-

---

१. सू. ३०२-३०७। २. सू. ३०३। ३. श्लो. १८-२४।
४. श्लो. ५७-५८।

वित्थङ्क कृतꣳ कम्पविनिर्णयश् च"[1] इति; **कालनिर्णयशिक्षायाञ् च** तिरमात्तरवर्णपरदर्शनप्रसङ्गे— "पदान्ते च तथा कम्पा अन्ततो निहताणुकाः। शेषस्योदात्तता वा स्यात् स्वारता च व्यवस्थया"[2] इति। **नारदीयशिक्षायाञ् च**— "चत्वारस् त्वादितस् स्वाराꣳ कम्पम् पुष्यन्ति शास्तरतः। उदात्ते वैकनीचे वा जुह्वग्निस् तत्तर दर्शनम्"[3] इति, "इकारान्ते पदे पूर्वे उकारे परतस् स्थिते। ह्रस्वङ्क कम्पवँ विजानीयान् मेधावी नात्तर संशयः॥ इकारान्ते पदे चैवोकारद्द्वयपदे परे। दीर्घङ्क कम्पवँ विजानीयाच् छग्ध्यूष्ष्विति निदर्शनम्॥ तरयो दीर्घास् तु विज्ज्ञेया ये च सन्ध्यक्षरेषु वै। मान्न्या पत्थ्या न इन्द्राद्द्या शेषा ह्रस्त्वाꣳ प्रकीर्तिताः। अनेकानामुदात्तानामनुदात्तꣳ प्रत्त्ययो यदि। शिवकम्पवँ विजानीयादुदात्तꣳ प्रत्त्ययो यदि"[4] इति। अत्तराऽन्तिमे श्लोके तु शोभाकरव्याख्यानुसारं 'शिवकन् तवँ विजानीयात्' इति पाठस् सम्भाव्यते। तथा सति कम्प प्रसङ्गेऽयं श्लोको नोल्लेख्यः। **लोमशीयशिक्षायाञ् च**—कम्पस्स्वरूपस्स्फुटीकरणायोक्तम्— "केन कम्पातितꣳ कम्पस् सयँ योगो येन कम्पते। किवँ वा कम्प इति प्रोक्तो येनाऽसौ कम्प उच्च्यते॥ पूर्वाङ्गेण हतम् पूर्वम् पराङ्गेण तु धारितम्। व्यञ्जनेन द्विधा भिन्नस् स्वरो भीतस् तु कम्पते। दीर्घकम्पेऽद्ध्यर्धमात्तरा तृतीये परिकीर्तिता। द्वितीये अर्धमात्तरा तु प्रयोगो **घण्टलालवत्**"[5] इति। **माण्डूक्यशिक्षायाञ्** तु कम्पनिभो विक्क्रम उल्लिखितः। तथाहि "स्वरितात् पराणि यानि स्स्युरनुदात्तात् पराणि कानि चित्। सर्वाणि प्रचयँ यान्ति ह्युपोदात्तन् न विद्द्यते (निहन्यते?)॥ स्वरितावधृत उदात्ते परस् त्रिपूर्वो विक्क्रमोच्च्युते (विक्क्रम उच्च्यते?)। स्वरितावधृत उदात्ते पादस् स्यात् स हि विक्क्रमः। ननु धारयेद् धृतमुपस्स्पर्शमुपोदात्तन् निपातयेत्। एकाक्षरे पतनन् न च धृतमुच्चारयेत् स्वरे वाऽपि। न्यासमेवादितꣳ कुर्याꣳ कुर्यान् नियतेषु बहुष्वपि। शेषमाद्द्यवदुकृत्वा तु तत्पदेषु समेषु च"[6] इति। कम्पोल्लेखश् च— "द्वयोरुदात्तयोर् मद्ध्ये नीचो यस् स्यादवग्रहः। तथाभाव्यो भवेत् कम्पस् तनूनपान् निदर्शनम्॥ तथाभाव्यस् तु तालव्यो न कम्पस्

---

१. सू. ११२–११९। २. श्लो. १७। ३. २।१।११।
४. २।२।१–४। ५. १।३–५। ६. श्लो. ५७–६०
(शि. स., पृ. ४६८)।

स्वरसञ्ज्ञकः। स तालव्यो भवेत् कम्प एजातीति निदर्शनम्"[1] इति; "उपन्न्यासस् तु कर्तव्यः कण्ठे निक्षेपसञ्ज्ञकः। उपन्न्यासात् परं हन्न्याद् भूमौ शङ्कुपदयँ यथा। प्राक्श्लिष्टजात्यक्षैप्राश् च ये चाऽभिनिहितश् च यः। उदात्तोपस्थिते तेषामेकदेशम् प्रकम्पयेत्"[2] इति च। एवञ् च वेदशाखाविशेषेषु कम्पस्य भावोऽभावो वा उच्चारणविधिविशेष् चाऽपि सामान्न्यतया प्रदर्शितो भवति। अयङ् कम्पविशेषः **पाणिनीये व्याकरणे** तु न सूत्रे प्रोक्तः। जात्यादिरूपाः खलु कम्पास् तत्र स्वरितसामान्न्यतयैव प्प्रतिपादिताः, "तित् स्वरितम्"[3], "उदात्तस्वरितयोर् यणस् स्वरितोऽनुदात्तस्य"[4] "एकादेश उदात्तेनोदात्तः"[5] "स्वरितो वाऽनुदात्ते पदादौ"[6] इति। तथाभाव्यरूपः कम्पस् तु विकल्पेन स्वरितरूपेण अनुदात्तरूपेण च प्रतिपादितः "उदात्तादनुदात्तस्य स्स्वरितः, नोदात्तस्वरितोदयमगार्ग्यकाश्श्यपगालवानाम्"[7] इति। **भाष्ये** तु केषाञ् चिन् मते सप्त स्वराः प्रदर्शिताः। तत्र च उदात्तस्वरितपरत्वे कम्परूपेणाऽनुदात्तेनोपरक्तस् स्वरितविशेषः "स्वरिते य उदात्तस् सोऽन्न्येन विशिष्टः"[8] इति कम्पतया सूचितः। यत् तु केन चित् "उदात्तस्स्वरितपरस्स्य सन्नतरः"[9] इति सूत्रेण कम्पस्य सङ्केतः पाणिनीयव्याकरणे कृत इत्युक्तन् तन् न; तेन हि सूत्रेण प्रचयात् परस्य उदात्तस्वरितपरकस्याऽनुदात्तस्य प्रचयत्वप्राप्तिवतः प्रचयीभूतस्य वा सन्नतरो विहित इति; प्रचयात् परस्य स्वतन्त्रस्याऽनुदात्तस्य कम्पता च कुत्रापि प्रातिशाख्यशिक्षादिग्रन्थेषु नोक्तेति; कम्पस्य विकम्पितरूपत्वान् न चाऽऽहननरूपः कम्प इति च। यदपि तेनैव कम्पप्रतिपादके शैशिरीयशिक्षाग्रन्थे कम्पस्यादौ अनुदात्तस्योल्लेखस् तदनुसारिणाम् ऋग्वेदसम्पाठपाठिनां साम्प्रदायिककम्पस्स्वरूपाभिमानश् च अनुपपद्द्यमानत्वाद् अनादरणीय इत्युक्तम्[10]; तदपि न, शैशिरीयशिक्षायाः "अनुदात्तमुपादाय स्वरितं ह्यवलम्बयेत्। पुनर् निहतमागच्छेदेष कम्पविधिस् स्मृतः"[11] इति वचनस्य शौनकशिक्षायामपि

---

१. श्लो. ८१ (शि. स., पृ. ४७०)। २. श्लो. ८४–८५ (शि.स., पृ. ४७०)। ३. अष्टा. ६।१।८५। ४. तत्रैव ८।२।४। ५. तत्रैव ८।२।५। ६. तत्रैव ८।२।६। ७. तत्रैव ८।४।६६–६७। ८. पा. व्या. भा. १।२।३३। ९. अष्टा. १।२।४०। १०. पा. शि. शि. स. स., पृ. ९३, ९४। ११. श्लो. ६८।

अक्क्षरशस् समानरूपेणोपलब्ध्यमानत्वाज्[1] जयन्तस्स्वामिना स्वराङ्कुश-शिक्क्षायामप्यविकलरूपेणोपात्तत्वाद्[2], "मद्ध्ये तु कम्पयेत् कम्पमुभौ पार्श्वौ समौ भवेत्"[3] इति वचनस्य च पाणिनीयशिक्क्षायामपि उपलब्ध्यमानत्वात्[4], सर्वसम्मतशिक्क्षाटीकायाञ् चाऽस्य वचनस्य प्रमाणत्वेन उद्धृतत्वात्[5], शौनकशिक्क्षायाञ् च "मद्ध्ये तु कम्पयेत् कम्पमुभौ नीचौ समौ भवेत्"[6] इति पाठस्योपलम्भाद्, उक्तशैशिरीय-शिक्क्षावचनस्य व्याक्ख्यानविशेषेणोपपादयितुं शक्क्यत्वाच् च। तत्तर च कम्पादौ अनुदात्तस्य य उल्लेखस् स स्वरितात् पूर्वत्तर वर्तमान-स्याऽनुदात्तस्य तदुपरागाद् अनुदात्ततालेशवत्तया भासमानस्य स्वरिताद्द्व्याणुभागस्य वाऽपि सम्भवति। एवं सति कम्पत्वेन व्यव-हियमाणस्य स्वरितस्य आदौ अनुदात्तस्य सत्वाद् उत्तरभागे च उत्तरवर्तिनस् स्वरितस्योदात्तस्य वा प्रभावाद् अनुदात्तताया जाय-मानत्वात् तयोर् मद्ध्ये स्वरितगतोदात्तभागस्य सत्वात् कम्पोच्-चारणे प्रथमम् अनुदात्तम् उपादाय ततस् स्वरितमुपाददीत ततः पुनर-नुदात्तमागच्छेदिति वचनमुपपन्नम् भवति। उक्तञ् च वचनम् अनुदात्त-पूर्वककम्पस्वरितोच्चारणमभिप्रेत्यैव प्रवृत्तमिति "उदात्तः पूर्व-भागस् तु परभागो निहन्यते। उदात्तकम्प इत्युक्तः कुत्तरचिच् चाऽपि दृश्यते"[7] इति वचनेन उदात्तपूर्वकस्य कम्पस्य पृथक् प्रतिपादनाच् च स्फुटम् भवति। एतद् वचनञ् च शौनकशिक्क्षायामपि उपलब्ध्यते[8]। "मद्ध्ये तु कम्पयेत् कम्पमुभौ पार्श्वौ समौ भवेत्"[9] इति वचनन् तु अनु-दात्तपूर्वके कम्पस्स्वरिते तत्पूर्वमनुदात्तमुपादाय आदौ, कम्पस्वरिता-न्त्यभागमनुदात्तमुपादाय अन्ते च समयोरनुदात्तभागयोस् सत्वाद् मद्ध्ये-ऽणुमात्तरकनिभस्य स्वरितगतोदात्तभागस्य विकम्पितन्न्यायेन द्रुत-तरमुच्चारणीयस्य सत्वादुपपद्द्यते। उदात्तपूर्वके कम्पस्स्वरिते च कम्पस्स्वरितस्यादौ वर्तमानस्य उदात्तभागस्य आदौ सत्वात् कम्पस्स्वरितात् परत्तर वर्तमानस्य स्वरितस्यादौ वर्तमानमुदात्त-मुदात्तमेव वोपादायाऽन्तेऽपि उदात्तभागस्य सत्वात् तयोर् मद्ध्ये च अणुमात्तरस्य कम्पस्स्वरितानुदात्तभागस्य विकम्पितन्न्यायेन द्रुततर-

---

१. श्लो. ५७। २. श्लो. २२ (शि. स., पृ. १६३)।
३. श्लो. ६७। ४. श्लो. ३०। ५. श्लो. ५७–५८(३।२५)।
६. श्लो. ५६। ७. शौ. शि. श्लो. ७०। ८. श्लो. ५८।
९. शौ. शि. श्लो. ६७, पा. शि. श्लो. ३०।

मुच्चारणीयस्य सत्त्वादुपपद्द्यते । यदपि शैशिरीयशिक्षानुसारिणि परम्परागते ऋग्वेदिनाङ्ग कम्पोच्चारणे मात्तराधिक्क्यापत्तिरूपन् दूषणन् तेनैवारोपितम्[१], तदपि असङ्गतमेव, कम्पोच्चारणे मात्तराधिक्क्यस्य शास्त्रेणाऽनुमतत्त्वात्; तथा हि "द्विगुणवँ वर्णकालाच् च पादऽ कम्पार्थ इष्यते"[२] इति, "स्व(ा)राऽ कम्पाश् च रङ्गाश् च ये यत्कालास् स्वभावतः । वर्धन्ते प्रोच्यमानास् ते क्षिप्प्रयत्ने वि (ऽपि ?) वक्तरि"[३] इति च **शैशिरीयशिक्षायाम्**; "द्विगुणवँ वर्णकालाच् च पादऽ कम्पार्थमिष्यते"[४] इति **शौनकशिक्षायाञ् च । नारदीयशिक्षायामपि**— "अदीर्घन् दीर्घवत् कुर्याद् द्विस्स्वरयँ यत् प्रयुज्यते । कम्पोत्स्वरिताभिगीतं ह्रस्स्वकर्षणमेव च"[५] इति । शैशिरीयशिक्षाया उक्तन् द्वितीयवँ वचनङ्ग गार्ग्यगोपालयज्ज्वना[६] सर्वलक्षणमञ्जरीकारेण[७] च प्रमाणतयोद्धृतम् । **व्यासशिक्षायामपि**– "स्वरद्द्वयस्य चैकस्मिन् कम्पसञ्ज्ञाऽस्ति दीर्घता"[८] इति कम्पस्स्वरस्य ह्रस्स्वत्वेऽपि तस्य दीर्घीकरणमनुमतम् । **कौहलीयशिक्षायामपि**– "अदीर्घन् दीर्घवत् कार्यन् तत्तर ह्रस्स्वस्य कर्षणात्"[९] इति; **सर्वसम्मतशिक्षायामपि**– "स्वरिते परभूते च स्स्वरितस्योत्तरार्धकम् । नीचङ्ग कुर्यात् स कम्पस् स्याद् यथा दीर्घन् तमुच्चरेत्"[१०] इति । **पारिशिक्षायामपि**— "स कम्प एवात्तर यथा हि दीर्घन् तथोच्चरेद् ध्रस्स्वमपि प्रकम्पे"[११] इति, **कालनिर्णयशिक्षायामपि** कम्पस् तिरमात्तरवर्णतया उल्लिखितः[१२] । एवञ् च यद् ऋग्वेदप्रातिशाख्ये वर्णानामयथाकालतयोच्चारणस्य दोषत्वमुक्तन्[१३] तदुत्सर्गमात्तरतया नेयम्; अतश् च 'अपवादविषयम् मुक्त्वोत्सर्गोऽभिनिविशते' इति न तद् वचनङ्ग कम्पस्य मात्तराधिक्क्यस्य बाधनायाऽलमिति विवेक्तव्यम् । कम्पप्रदर्शने भागत्तरयस्स्योल्लेखो "मद्ध्ये तु कम्पयेत् कम्पमुभौ पार्श्वौ समौ भवेत्"[१४] इति शास्त्रेण कृत एव; स च कम्पस्स्वरितात् पूर्वस्स्याऽनुदात्तस्योपादानेनाऽनुदात्तकम्पे, परस्य स्वरितोदात्तभागस्योदात्तस्य वोपादा-

---

१. पा. शि. शि. स. स., पृ. ९४ । २. श्लो. ६७ ।
३. श्लो. ९४ । ४. श्लो. ५६ । ५. २।३।७ । ६. तै. प्रा. वै. टी. १।३७, १९।३ । ७. व्या. शि., पृ. १६० । ८. सू. ३०३।
९. श्लो. २० । १०. श्लो. ५७–५८ (३।२५) । ११. सू. ११३।
१२. श्लो. १७ । १३. १४।१०; ऋ. प्रा. उ. भा. ३।६ ।
१४. शै. शि. श्लो. ६७, पा. शि. श्लो. ३० ।

नेनोदात्ततकम्पे समर्थनीय इति च "कथङ्ग खलु ..... (कम्प-)स्वरिते भागत्तरयंप्रदर्शनञ्च शास्त्रीयम्"[1] इति तेनैव कृतः प्रयनुयोगोऽपि निरनुयोज्ज्यानुयोग एव । "मद्ध्ये तु कम्पयेत् कम्पमुभौ नीचौ समौ भवेत्"[2] इति वचनन् तु अनुदात्तात् परङ्ग कम्पमुपादायैवोपपादयितुं शक्यते इति च विवेक्तव्यम् । एवञ् च सति "उदात्तपूर्वास् सर्व एव कम्पास् स्युः, अनुदात्तपूर्वेषु तु क्रियमाणेषु मात्तराऽऽधिक्यं स्यात्, स च दोषः"[3] इति उव्वटवचनमपि चिन्त्यमेव । यच् च केन चित् स्वरिताद्द्यभागस्य उदात्ततरतायास् स्वीकारे सत्त्येव उपपद्द्यमानतया कम्पस्योच्चारणविधिराकृतिचित्तरादिकमपि दत्त्वा प्रतिपादितः, कम्पस्स्वरितादुत्तरस्य उदात्ततरस्योदात्तस्य वोच्चारणे काठिन्यात् कम्पो भवतीति चोक्तन्[4] तदपि अनुपपन्नमेव, अथर्ववेदादौ स्वरितस्याद्द्यभागस्य उदात्ततरताया अभावेऽपि[5] कम्पस्य सत्त्वात्[6], तथाभाव्यस्य प्राकृतस्स्वारस्यापि (सामान्यस्स्वरितस्याऽपि) कम्पताया वर्णरत्नप्रदीपिकायाँ[7] याज्ञवल्क्यशिक्षायाम्[8] माण्डूक्या शिक्षायां[9] शुक्लयजुर्वेदप्रातिशाख्ये[10] च स्वीकृतत्वात्, कम्पे **घण्टलालन्न्यायस्यैव**[11] प्रयोज्ज्यत्वात्[12], काठिन्न्याकाठिन्न्यस्याऽविचारणीयत्वाच्च ॥२८–३२॥

८. प्रचयस्वरनिरूपणम्

अनुदात्तोदात्तयत्नाऽऽमिश्रणोच्चारणस् तथा ।
उच्चनीचान्तरालस्थस् स्वरो हि प्रचयस् स्मृतः ॥३३॥
स प्रचः प्रचितो वाऽपि निचितो वा धृतोऽपि वा ।
एकश्रुतिर् वा तानो वा तथोदात्तमयोऽपि वा ॥३४॥
एकस्स्वरो वाऽपि धृतप्रचयो वाऽप्युदात्तकः ।
उच्चश्रुतिर् वैकयमो धार्यो वाऽपि प्रकीर्तितः ॥३५॥

---

१. पा. शि. शि. स. स, पृ. ९४ । २. शै शि. श्लो. ६७, पा. शि. श्लो. ३० । ३. ऋ. प्रा. उ. भा. ३।६ । ४. वै. स्व. मी., पृ. ९१–९३ । ५. शौ. च. १।१७ । ६. तत्तरैव ३।६५। ७. श्लो. ६८, ७१ (शि. स., पृ. १२३) । ८. प्रा. प्र. शि., शि. स., पृ. २१५ । ९. श्लो. ८० (शि. स., पृ. ४७०) । १०. १।१२० । ११. यथा घण्टाया लालो घण्टाया एकम् पार्श्वन् निहत्त्य झटित्त्येव निवर्तते तथा एकं स्वरम् प्राप्य झटित्त्येव निवृत्तिर् घण्टलालन्यायार्थः । १२. लो. शि. १।५ ।

अक्षरेषु स्वराऽऽरोहावरोहाभ्यां विवर्जितः ।
उदात्तयत्नेनोच्चार्यस् स्वरो वैकश्रुतिस् स्मृतः ॥३६॥
अनुदात्तोदात्तयत्नाऽऽमिश्रणेनाऽपि वर्जितः ।
स्वाभाविकस् स्वरो नृणां स्याद् वा तान इतीरितः ॥३७॥

वेदलोकसाधारणस्य सर्ववेदपारिषदस्य च पाणिनीयव्याकरणस्य व्याख्याने मुनिना पतञ्जलिना "किम् पुनरियमेकश्रुतिरुदात्ता आहोस्विदनुदात्ता ? नोदात्ता । कथम् ज्ञायते यदयम् 'उच्चैस्तरां वा वषट्कारः'[1] इत्याह । कथञ्चैतत्वा ज्ञापकम् ? अतन्तरन् तरनिर्देशः, यावदुच्चैस् तावदुच्चैस्तराम् । यदि तर्हि नोदात्ता, अनुदात्ता । अनुदात्ता च न । कथम् ज्ञायते ? यदयम् 'उदात्तस्वरितपरस्य सन्नतरः'[2] इत्याह । कथञ्चैतत्वा ज्ञापकम् ? अतन्तरन् तरनिर्देशः । यावत् सन्नस् तावत् सन्नतरः । सैषा ज्ञापकाभ्यामुदात्तानुदात्तयोर् मध्यमेकश्रुतिरन्तरालं हियते"[3] इति भाषितम् । तद्व्याख्याने कथ्यते च— "क्षीरोदकवदुदात्तानुदात्तयोर् भेदतिरोधानमेकश्रुतिरित्यर्थः, स्वरिते तु विभागेन तयोरुपलब्धिः"[4] इत्युक्तम् । एवम् च उदात्तानुदात्तान्तरालस्थस्वरोच्चारणे उदात्तोच्चारणयत्नाऽनुदात्तोच्चारणयत्नयोरन्तराले स्थित उक्तयत्नव्यामिश्रणजन्यो यत्नोऽपि आवश्यको बोद्धव्यः । "उदात्तानुदात्तस्वरितानाम् परस् सन्निकर्ष एकश्रुतित्यम्"[5] इत्याश्वलायनसूत्रवचनमपि भाष्यकारवचनानुकूलमेव । प्रचयपर्यायाणाम् प्रयोगा अनुपदमुद्धरिष्यमाणैः प्रातिशाख्यशिक्षादिग्रन्थवचनैरेव प्रदर्शिता भविष्यन्ति । तैस्स्वर्यं हि आपेक्षिकमिति पूर्वमेवोक्तम् । एवम् च स्वरितस् स्वरस् तु उदात्तानुदात्तयोश् शाशवृन्तफलन्न्यायेन सयोगेन निष्पन्न इति स न एकश्रुतित्वेनोपादातुं शक्यते इति उदात्तानुदात्तयोरेकतरस्याऽनुपस्थितौ अन्यतरस्य एकश्रुतित्वं स्वीकर्तुं शक्यते । तत्र च ऋग्वेदप्रातिशाख्ये शुक्लयजुर्वेदप्रातिशाख्येऽन्यत्र च प्रचयस्योदात्तश्रुतित्वेन उदात्तमयत्वेन चोल्लिखितत्वाद् वेदशाखाविशेषरहस्यमयज्ञादौ प्रचयस्य तैस्स्वर्यान्तर्गतोदात्तोच्चारणे यादृश उरःकण्ठादीनायं यत्नस् तादृशेन यत्नेनोच्चार्यत्वमवगम्यते । कात्यायन-

---

१. अष्टा. १।२।३५ । २. तत्तैव १।२।४० ।
३. पा. व्या. भा. १।२।३३ । ४. पा. व्या. भा. प्र. १।२।३३ ।
५. आ. श्रौ. सू. १।२।६ ।

श्रौतसूत्रे "तानो वा नित्यत्वात्"[1] इत्यत्र अभियुक्तैर् व्याख्यातृभिस् तानस्य नित्यत्वं वर्णोच्चारणे कथमपि परिहर्तुमशक्यत्वमिति[2] व्याख्यातमिति मनुष्याणाम् उदात्तोच्चारणयत्नादियत्नविशेषाश्रयगनिरपेक्षस् स्वाभाविकस् स्वरस् तान इति विज्ञायते। अयम् च तान एकश्रुतिपर्याय इति तानविधानसमर्थनाय कात्यायनमुनिना उद्धृताद्[3] वचनादवसीयते। "उभयकरणरहितः प्रचयः, उभयकरणसमावेशजन्यस् स्वरितः"[4] इति गार्ग्यगोपालयज्ववचनमप्यत्रानुकूलम्। "एकश्रुतिस् स्वरसर्वनाम यथा नपुंसकलिङ्गसर्वनाम"[5] इति पाणिनीयव्याकरणभाष्यकारवचनमपि प्रचयस्य उक्तत्रिविधरूपतायास् समर्थकम्। उक्तभाष्यवचनस्यार्थश् च यद्द्यपि कृतपातञ्जलमहाभाष्याद्ध्ययनभूरिपरिश्रमम्मन्न्येन नागोजिभट्टेन "यथा सर्वनामशब्दास् तदादयस् सर्वपदस्थाने प्रयुज्यन्ते, एवं सर्वस्वरस्थाने एकश्रुतिः प्रयोक्तव्येति तदर्थः"[6] इति कृतस् तथाऽपि वयन् तु "सर्वनामशब्दैस् सर्वादिभिर् यथा देवमनुष्यादयः पदार्था ग्रहीतुं शक्यन्ते यथाप्रकरणन् तथैव एकश्रुतिनाऽपि उदात्तादयस् सर्वे स्वराः प्रत्येकङ्ग ग्रहीतुं शक्यन्ते" इत्येव तदर्थम् मन्न्यामहे। नागोजिनाऽपि उद्द्योते तु "यथा 'तस्यापत्यम्' इत्यादावुपगुप्प्रभृतीन् विशेषानभेदेन सर्वनाम प्प्रतिपादयति तथा एकश्रुतिरपि उदात्तादीन् विशेषान् इति सर्वस्वरसङ्ग्रहसिद्धिः"[7] इत्येवोक्तम्।

अथ प्रचयस्वरूपादिप्प्रतिपादनपराणि प्रातिशाख्यादिवचनानि प्रदर्श्यन्ते। तत्र ऋग्वेदप्रातिशाख्ये— "उभाब्भ्यान् तु परवं विद्द्यात् ताब्भ्यामुदात्तमक्षरम्, अनेकमप्यनुदात्तम्"[8] इति। अत्र उदात्तमिति प्रचय एवोक्तः, तथा च तत्र उव्वटोऽपि— "उदात्तमक्षरम् उदात्तश्श्रुति, उदात्तवद् धि प्रचितश् श्रूयते"[9] इति। पुनश् च तत्रैव— "स्वरितादनुदात्तानाम् परेषाम् प्रचयस् स्वरः। उदात्तश्श्रुतितायैं यान्ति एकन् द्वे वा बहूनि वा"[10] इति। शुक्लयजुर्वेदप्रांति-

---

१. १।८।१८। २. का. श्रौ. सू. स. वृ. १।८।१८।
३. का. श्रौ. सू. १।८।१९। ४. तै. प्रा. वै. २३।१९।
५. ६।४।१७४ वा. ४। ६. सि. कौ. साधारणस्वरप्प्रकरणे ल. श. शे. विभाषाछन्दसीतिसूत्रवृत्तिव्याख्याने। ७. पा. व्या. भा. प्र. उ. ६।४।१७४। ८. ३।९। ९. तत्रैव भाष्ये।
१०. ३।१९।

शाक्ख्ये च— "उदात्तमयोऽन्न्यत्तर नीच एव"[१] इति "स्वरितात् त्परमनुदात्तमुदात्तमयम्"[२] इति च। एतद्व्याक्ख्याने उव्वटश् च— "उदात्तमयम् प्रचितमेकश्श्रुतिरिति पर्यायाः"[३] इति। तैत्तिरीयप्रातिशाक्ख्ये च— "स्वरितात् संहितायामनुदात्तानाम् प्रचय उदात्तश्श्रुति"[४] इति, "सर्वमेकयमम् पूर्वेषां सर्वमेकयमम् पूर्वेषाम्"[५] इति, "घृतप्प्रचयऽ कौण्डिन्न्यस्स्य"[६] इति च। ऋक्तन्त्रे च— "तस्मादुच्चश्श्रुतीनि"[७] इति। शौनकीयचतुरद्ध्यायिकायान् च— "स्वरितादनुदात्त एकश्श्रुतिः"[८] इति। शैशिरीयशिक्षायान् च— "द्विविधश् च स्स्वरो ज्ज्ञेयोऽनासिक्क्यस् सानुनासिकः। उदात्तश् चाऽनुदात्तश् च स्वरितऽ प्रचयस् तथा"[९] इति, "नीचैस् स्वरोऽनुदात्तस् स्यादुच्चैश् चोदात्त उच्च्यते। स्वरितन् तत्समाहारस् तदैक्क्यम् प्रचयस् स्मृतः। अनुदात्तो हृदि ज्ज्ञेयो मूर्द्ध्न्युदात्त उच्च्यते। स्वरितऽ कर्णमूलीयस् सर्वस्मिन् प्रचयस् तथा। इमम् मे गङ्गे यमुने सरस्स्वति निदर्शनम्"[१०] इति च। पाणिनीयशिक्षायान् च— "उदात्तम् प्रदेशिनीवँ विद्द्यात् प्रचयम् मद्ध्यतोऽङ्गुलिम्। निहतन् तु कनिष्ठिक्क्यां स्वरितोपकनिष्ठिकाम्"[११] इति, "अनुदात्तो हृदि ज्ज्ञेयो मूर्ध्न्युदात्त उदाहृतः। स्वरितऽ कर्णमूलीयस् सर्वास्स्ये प्रचयस् स्मृतः"[१२] इति च। शौनकशिक्षायान् च— "नीचैस् स्वरोऽनुदात्तस् स्यादुच्चैश् चोदात्त उच्च्यते। स्वरितस् तत्समाहारस् तदैक्क्यम् प्रचयस् स्मृतः। अनुदात्तो हृदि ज्ज्ञेयो मूर्द्ध्न्युदात्त उदाहृतः। स्वरितऽ कर्णमूलीयस् सर्वस्मिन् प्रचयस् स्मृतः"[१३] इति। स्वराङ्कुशशिक्षायान् च— "उदात्तान् निहतस् स्वारस् स्वरितात् प्रचयो भवेत्। उदात्तात् स्वरितात् पूर्वो नान्न्यमापद्द्यते स्वरम्"[१४] इति। याज्ञ्ज्ञवल्क्यशिक्षायान् च— स्वरितादुत्तरे ये च प्प्रचयाँस् तान् प्रचक्क्षते। एकस्स्वरानपि च तानाहुस् तत्त्वार्थचिन्तकाः। प्रचया यत्तर दृश्श्यन्ते तत्तर हन्न्यात् स्वरम् बुधः। स्वरितऽ केवलो यत्तर मृदुन् तत्तर निपातयेत्"[१५] इति; "उच्चादुच्चतरन् नास्ति नीचान् नीच-

---

१. १।१५०। २. ४।१४१। ३. तत्तरैव भाष्ये।
४. २१।१०। ५. १५।९। ६. १८।३। ७. ३।१।१(६१)।
८. ३।७१। ९. श्लो. ९। १०. श्लो. ६०–६१।
११. श्लो. ४४। १२. श्लो. ४८। १३. श्लो. ५४–५५।
१४. श्लो. २ (शि. स., पृ. १६१)। १५. श्लो. १०९–११०
(शि. स., पृ. १८)।

तरन् तथा। अक्क्षराणि च तुल्यानि प्रचितान्युच्चगानि च"[1] इति, "उदात्तान् निहितस् स्वारस् स्वरितात् प्रचयो भवेत्। उदात्तात् स्वरितात् पूर्वो नान्य आपद्द्यते सुस्वरः। पदकाले यस् स्वरितस् संहितायान् तथैव च। स्वरिताच् चेद् भवेत् पश्चात् स एव निचितस् स्वरः"[2] इति, "उदात्तान् निहतस् स्वार्यस् स्वारोदात्तौ न तत्परौ (चेत् परौ ?)। स्वरितो यस् तथाभूतो ज्ञेयस् स प्रचयस् सदा। उच्चानुदात्तयोर् योगे स्वरितस् स्वार उच्च्यते। ऐक्क्यन् तत् प्रचयः (तदैक्क्यम् प्रचयः?) प्रोक्तस् सन्धिरेषाम् (रेष ?) मिथोऽद्भुतः"[3] इति च। वर्णरत्नप्रदीपिकायाम् च— "स्वरितादनुदात्तयँ यत् तत् सर्वम् प्रचयाह्वयम्। स्यादुदात्तमयम् चैव त्वामद्द्यैत्यादिकयँ यथा। तिर्यक्स्थानगते हस्तेऽनुदात्तो दृश्यतेऽपरः। प्रचितन् तवँ विजानीयादुदात्तं स्वरमाप्नुयात्। जात्त्यङ कृत्वा ततः पश्चात् प्रचितो दृश्यते यदि। तन् तु तत्तरैव निर्वर्त्य पश्चाद् हस्तम् प्रचालयेत्। नोदात्तस्वरितात् पूर्वम् प्रचितं स्यादुदात्तवत्। कृत्वानुदात्तमथ तमुदात्तस्स्वरमाचरेत्। यथा स्यात् स्वरितात् स्वारो वाजेवाजेऽवतेति च। स्वरितोदये सेनानीग्रामण्यौ सहस्स्याय च। तैरोव्यञ्जनवज् ज्ञेयो जात्त्योऽभिनिहितः प्रचः। यथा धान्यङ कन्न्या इव वेदोसीति तुथोऽस्स्यपि। वत्सरोऽसि भवेत् तद्वद् वाज्ज्यर्वंश्च स्स्रुचीव च। उदात्तस्वरितपरप्रचितस्स्याऽपि नित्त्यशः। भवेन् नीचतरादेशो वैयाकरणसम्मतः"[4] इति। प्रातिशाक्ख्यप्रदीपशिक्क्षायाम् च "प्रचयस्वरलक्क्षणमाह— स्वरितात् परमनुदात्तमुदात्तमयमेकमनेकवँ वा। स्वरितात् परमनुदात्तमेकमनेकवँ वाऽक्क्षरमुदात्तवत् एकश्श्रुत्त्या उच्चारणीयं स्यात्। अयमेव **प्रचयः प्रचितः प्रचो निचित उदात्तमय** इति वैदिकैर् व्यवहियते"[5] इति। स्वराष्टकशिक्क्षायामपि— "उदातानुदात्तस्वरितप्रचयास् स्वराः"[6] इति, "स्वरितपराऽग्रताम्स्राः प्रचयाः"[7] इति, "स्वरितादनुदात्तानाम् प्रचयः"[8] इति, "अनुदात्तो हृदि ज्ञेयो मूर्द्धन्युदात्तऽउदाहृतः। स्वरितः कर्णमूले स्स्यान् नासाग्रे प्रचयस्

---

१. श्लो. ११७ (शि. स., पृ. १९)। २. श्लो. २२४–२२५ (शि.स., पृ.३४–३५)। ३. श्लो.२२७–२२८ (शि.स., पृ.३५)। ४. श्लो. ७६–८३ (शि. स., पृ. १२३–१२४)। ५. शि. स., पृ. २१६। ६. शि. स., पृ. ३६३। ७. तत्तरैव। ८. तत्तरैव, पृ. ३६४।

स्मृतः"[१] इति च। चारायणीयशिक्क्षायान् च– "स्वरितानन्तरवँ वर्णयँ यत् किञ्चित् तत्तर विद्द्यते। प्रचयन् तद् विजातीयादेवमाहुर् मनीषिणः"[२] इति। व्यासशिक्क्षायान् च— "प्रचयश् च बुधैऽ प्रोक्त उदात्तश्श्रुतिरित्त्यपि। स्वारश् शीर्षे मुखेऽप्युच्चप्प्रचयौ निहतो हृदि"[३] इति, "स्वारोऽयम् प्रचयश् चैव नोदात्तस्वरितोत्तरे। स्वारादुपरि नीचानाम् प्रचयऽ परिकीर्तितः"[४] इति च। शम्भुशिक्क्षायान् च— "उदात्तात् परतो नास्ति प्रचयऽ पूर्वतोऽपि वा। स्वरितऽ प्रचयादूर्ध्वन् निहतात् प्रचयऽ परम्"[५] इति, "कनिष्ठिकाऽनामिका च मद्ध्यमा च प्प्रदेशिनी। नीचस्स्वारधृतोदात्तानङ्गुष्ठाग्रेण दर्शयेत्। अनुदात्तऽ कनिष्ठाद्यौ नाम्म्यन्ते स्वरितस् स्मृतः। प्रचयो मद्ध्यमामद्ध्ये तर्जन्न्यादावुदात्तकः। अनुदात्तो हृदि ज्ञेयो मूर्ध्न्युदात्त उदाहृतः। स्वरितऽ कर्णमूलीयस् सर्वास्स्ये प्रचयस् स्मृतः"[६] इति च। कौहलीयशिक्क्षायान् च— "उदात्तश् चाऽनुदात्तश् च स्वरितऽ प्रचयस् तथा। इति चत्त्वारभागे हि स्वराऽ प्रोक्ता मनीषिभिः"[७] इति, "प्रचयऽ कत्थ्यते सद्भिरुदात्तसदृशश्श्रुतिः"[८] इति, "स्वरितादुत्तरो नीचस् सन्धौ प्रचय इष्यते। बहुत्वेऽथ तथा ते स्स्युस् स्वारोदात्तपरो न तु"[९] इति च। सर्वसम्मतशिक्क्षायान् च– "उदात्तश्श्रुतिरेवेति प्रचयस्स्य प्रसिद्धता"[१०] इति, "स्वरितादनुदात्ताश् च प्रचयत्त्वमवाप्नुयुः। स्वरितोदात्तयोर् यत्तर परत्तर स्स्थितयोस् सतोः। स्वरितो न भवेत् तत्तर प्रचयश् च निवर्त्यते"[११] इति, "कनिष्ठानामिकामद्ध्यातर्जनीमद्ध्यपर्वसु। नीचस्स्वारधृतोदात्तान् क्रमेणैव विनिर्दिशेत्"[१२] इति च। पारिशिक्क्षायान् च— "ते संहितायां स्वरितात् परे स्म्युरेकोऽथवा द्द्वौ बहवोऽनुदात्ताः। पदस्स्थिता ये प्रचयस्स्वरात्मकङ्ग गुणम् भजन्त्यत्तर स उच्चकश्श्रुतिः"[१३] इति। नारदीयशिक्क्षायान् च— "उदात्तश् चाऽनुदात्तश् च स्वरितप्प्रचिते तथा। निघातश् चेति विज्ञेयस् स्वरभेदस् तु पञ्चधा"[१४] इति, "य एवोदात्त इत्युक्तस् स एव स्स्वरितात्

---

१. शि. स., पृ. ३६५। २. पृ. २४–२५। ३. सू. २९१–२९२।
४. सू. ३०९–३१०। ५. श्लो. ३१। ६. श्लो. ३४–३६।
७. श्लो. २। ८. श्लो. ७। ९. श्लो. ११।
१०. श्लो. ४१ (३।५)। ११. श्लो. ४६–४७ (३।११–१२)।
१२. श्लो. १२२ (३।१०९)। १३. सू. १०१।
१४. १।७।१९।

परः। प्रचयम् प्रोच्यते तज्ज्ञैर् न चाऽत्तराऽन्यत् स्वरान्तरम्"[1] इति, "स्वरितात् पराणि यानि तानि (स्युर् ?) धार्याक्षराणि तु। सर्वाणि प्रचयस्स्थानि उपोदात्तन् निहन्यते। प्रचयो यत्तर दृश्येत तत्तर हन्न्यात् स्वरम् बुधः। स्वरितम् केवलो यत्तर मृदुन् तत्तर निपातयेत्"[2] इति च। माण्डूक्यां शिक्षायाञ् च "उदात्तश् चाऽनुदात्तश् च स्वरितम् प्रचयस् तथा। चतुर्विधस् स्वरो दृष्टस् स्वरचिन्ताविशारदैः"[3] इति, "यदुदात्तमुदात्तन् तद् यत् स्वरितन् तत् पदे भवति नीचम्। यन् नीचन् नीचमेव तद् यत् प्रचयस्स्थन् तदपि नीचम्"[4] इति; "स्वरितप्प्रभवम् (–प्रभवात् ?) प्रचितात् (न ?) स्वरितवँ् विद्द्यत उदात्तवँ् वा। अनुदात्तमेव तद् विद्द्याद् यदृतन् (यद् धृतन् ?) च तद् विद्धि यत् प्रचितम्॥ स्वरितात् पराणि यानि स्स्युरनुदात्तान्न्युदात्तवत्। सर्वाणि प्प्रचययँ् यान्ति ह्युपोदात्तन् न विद्द्यते"[5] इति, "ननु धारयेद् धृतमुपस्स्पर्शमुपोदात्तन् निपातयेत्। एकाक्षरे धारयेन् न च धृतमुच्चारयेत् स्वरे वाऽपि"[6] इति च॥३३–३७॥

९. उदात्ततरस्वरनिरूपणम्

स्वारादौ क्वचिदुच्चार्यो वौषडित्यत्तर वाऽपि च।
उदात्तादप्युच्चतरस् स्यादुदात्ततरस् स्वरः॥३८॥

ऋग्वेदशाखाविशेषे कृष्णयजुर्वेदतैत्तिरीयचरणेऽन्न्यत्तर च क्वचित् स्वरितस्स्यादौ उच्चारणीयस् स्वरितस्वरांशरूप उदात्तादपि उच्चतरोऽधिकतरदारुण्यायामादिवता यत्नेन उच्चार्यस् तीक्ष्णतरस् स्वरः, क्वचिद् आश्वलायनशाखादिषु 'वौषट्' इत्यत्तर अन्त्येऽक्षरेऽथवा द्वयोरप्यक्षरयोरुच्चार्य उदात्तादपि उच्चतरोऽधिकतरायामदारुण्यादिवता यत्नेनोच्चार्यस् तीक्ष्णतरस् स्वरश् च उदात्ततर इत्युच्यते इत्यर्थः। यद्द्यपि याज्ञवल्क्यशिक्षायाम्– "उच्चादुच्चतरन् नास्ति नीचान् नीचतरन् तथा। अक्षराणि च तुल्यानि प्रचितान्न्युच्चगान्न्यपि"[7] इत्युक्तम्, अमोघानन्दिन्न्यां शिक्षायामपि— "उच्चादुच्चतरन् नास्ति नीचान् नीचतरन् तथा। एववँ् वर्णाम्

---

१. १।८।२। २. २।७।७–८। ३. श्लो. १९।
४. श्लो. ५४ (शि. स., पृ.४६७–४६८)। ५. श्लो. ५६–५७ (शि. स., पृ. ४६८)। ६. श्लो. ५९ (शि. स., पृ. ४६८)।
७. श्लो. ११७ (शि. स., पृ. १९)।

प्रयोक्तव्या इषेत्त्वेति निदर्शनम्"[१] इत्यभिहितम्, पाराशर्यां शिक्षायाम् च तदेवानूदितम्[२]; नारदीयशिक्षायाम् च— "उच्चादुच्चतरन् नास्ति नीचान् नीचतरन् तथा। वैस्वर्ये स्वारसञ्ज्ञायाङ्ग किं स्थानं स्वार उच्च्यते"[३] इति स्वरितलक्षणप्रसङ्गे प्रोक्तम्, माण्डूक्यां शिक्षायाम् च— "उदात्ताच् च न कर्तव्यमुदात्तं स्वरितन् तथा। नीचान् नीचतरन् नास्ति उच्चादुच्चन् न विद्द्यते। उच्चादुच्चतरन् नास्ति नीचान् नीचतरङ्ग कुतः। स्वरितात् स्वरितन् नास्ति कम्पिताच् चैव कम्पितम्"[४] इति प्रतिपादितम्; तथापि एतानि वचनानि तत्तच्छाखामात्तरविषयतया उत्सर्गमात्तरतया वा नेयानि। उक्तशिक्षासम्बद्धासु शाखासु स्वरिताद्द्यभागरूपस्योदात्ततरस्याभावात्, वौषडित्यत्तरोदात्ततरस्य सत्त्वेऽपि तस्याऽपवादविषयत्त्वेन प्रतिपादयितुं शक्यत्त्वाच् च उक्तानि वाक्यानि उपपद्द्यन्ते। ऋग्वेदप्रातिशाख्ये "एकाक्षरसमावेशे पूर्वयोस् (उदात्तानुदात्तयोस्) स्वरितस् स्वरः। तस्योदात्ततरोदात्तादर्धमात्तरार्धमेव वा।"[५] इति स्वरिताद्द्यभागस्योदात्ततरत्त्वमुक्तम्; तैत्तिरीयप्रातिशाख्येऽपि "समाहारस् स्वरितः, तस्यादिरुच्चैस्तरामुदात्तादनन्तरे यावदर्धं ह्रस्स्वस्य"[६] इति तथैव प्रतिपादितम्; कौहलीयशिक्षायाम् च "तस्य तु स्स्वरितस्याद्द्यमर्धमुच्चैस्तरावँ विदुः"[७] इत्येवोक्तम् इति एतद्ग्रन्थसम्बद्धासु वेदशाखासु स्वरिताद्द्यांशरूप उदात्ततरो नाऽपोहितुं शक्यः। "वौषड्" इत्यत्तर च "वषट्कारोऽन्त्यस् सर्वत्तरैवोच्चैस्तराम् बलीयान् याज्ज्यायाः"[८] इत्यादिब्भ्यो वचनेब्भ्यः, "उच्चैस्तरावँ वा वषट्कारः"[९] इति पाणिनीयसूत्तराच् चोदात्ततरस्य स्वरस्य प्रयोगः कतिचिद्वेदशाखाकर्मसु भवत्त्येवेति निश्चेतुं शक्यते। पतञ्जलिना मुनिनाऽपि परमतस्याऽत्त्यन्तं हेयत्त्वमास्थातुमशक्नुवता "अपर आह— किमियमेकश्श्रुतिरुदात्ता आहो स्विदनुदात्ता। उदात्ता। कथञ् ज्ञायते। यदयम् 'उच्चैस्तरावँ वा वषट्कारः' इत्याह। कथङ्कृत्वा ज्ज्ञापकम्। तन्तरन् तरनिर्देशः। उच्चैर् दृष्ट्वा उच्चैस्तरामित्त्येतद् भवति। यदि तर्ह्युदात्ता नाऽनुदात्ता। अनुदात्ता च।

---

१. श्लो. ८२ (शि. स., पृ. १०२)। २. श्लो. ७–८ (शि. स., पृ. ५२)। ३. १।८।६। ४. श्लो. ५२–५३ (शि. स., पृ. ४६७)। ५. २।३, ४। ६. १।४०, ४१। ७. श्लो. ५। ८. आ. श्रौ. सू. १।५।५। ९. १।२।३५।

कथम् ज्ञायते । यदयम् 'उदात्तस्वरितपरस्य सन्नतरः' इत्याह । कथञ्चकृत्वा ज्ञापकम् । तन्तरन् तरनिर्देशः । सन्नन् दृष्ट्वा सन्नतर इत्येतद् भवति । त एते तन्तरे तरनिर्देशे सप्त स्स्वरा भवन्ति— उदात्तः, उदात्ततरः, अनुदात्तः, अनुदात्ततरः, स्वरितः, स्वरिते य उदात्तस् सोऽन्न्येन विशिष्टः, एकश्श्रुतिस् सप्तमः"[1] इति उक्त्वा उदात्ततरस्य पृथक्त्वम् प्रदर्शितम् । कौहलीयशिक्षायामपि— "उदात्तान्न्यनुदात्तानि बहुलानि प्रता(चा ?)न्न्यपि । निरन्तराणि दृश्यन्ते स्वरितस्य न संहतिः । उदात्तास् सहका (गा ?) यत्तर दृश्यन्ते च निरन्तराः । उच्चादुच्चतरन् तेषु क्रमात् तत्तर विधीयते । समता(संहता)वनुदात्तानान् नीचान् नीचतरवँ विदुः । स्वरितस्य सन्निपाते कम्पस् त्वभिहितꣳ पुरा"[2] इति उक्त्वा उदात्ततरानुदात्ततरयोरुल्लेखꣳ कृतः ॥३८॥

१०. अनुदात्ततरस्वरनिरूपणम्

स्वारादुच्चाद् वाऽपि पूर्वो नीचो यꣳ प्रचितात् परः ।
अनुदात्तान् नीचतरस् सोऽनुदात्ततरस् स्वरः ॥३९॥

स्वरिताद् अथवा उदात्तात् पूर्वत्तर स्थितꣳ प्रचितात् परत्तर स्थितोऽनुदात्तादपि नीचतरोऽधिकतरान्न्ववसर्गमार्दवादिवता यत्नेनोच्चार्यो मन्द्रतरो यस् स्वरस् सोऽनुदात्ततर इत्युच्यते इत्यर्थः । एतद्विषये कर्तव्यमपि अधिकतरवँ विवेचनम् प्रसङ्गादुदात्ततरनिरूपणे एव कृतन् तत एवाऽवगन्तव्यम् । अवशिष्टन् तूच्यते । तत्तर यद्द्यपि ऋग्वेदप्रातिशाख्ये "न चेत् पूर्वन् तथागतात्"[3] इति, "न चेदुदात्तस्स्वरितोदयम्"[4] इति, "नियुक्तन् तूदात्तस्वरितोदयम्"[5] इत्यादिना च, तथा शुक्लयजुर्वेदप्रातिशाख्येऽपि—"निहितमुदात्तस्स्वरितपरम्"[6] इति, "नोदात्तस्स्वरितोदयम्"[7] इति च, एवमेव तैत्तिरीयप्रातिशाख्येऽपि "नोदात्तस्वरितपरः"[8] इति, तथैव शौनकीयचतुरद्ध्यायिकायाञ् च "नोदात्तस्वरितपरम्"[9] इति, "स्वरितोदात्तेऽनन्तरमनुदात्तम्"[10] इति च उदात्तात् स्वरिताद् वा पूर्वस्स्य सम्भावितस्वरितभावस्स्य सम्भावितैकश्श्रुतिकत्वस्स्य वाऽनुदात्तस्स्य अनुदात्ततत्वमेवोक्तन् न तत्व-

---

१. पा. व्या. भा. १।२।३३ । २. श्लो. ३०–३२ ।
३. ३।१० । ४. ३।१७ । ५. ३।२१ । ६. ४।१३८ ।
७. ४।१४३ । ८. १४।३१ । ९. ३।७० ।
१०. ३।७४ ।

नुदात्ततरत्वम् तथापि पाणिनीये व्याकरणे— "उदात्तस्वरितपरस्य सन्नतरः"[1] इति अनुदात्ततरो विहितः। ननु यत्तर प्रातिशाख्यैरनुदात्तो विहितस् तत्तरैव पाणिनीयव्याकरणेन यदि अनुदात्ततरो विधीयेत तदा प्रातिशाख्यैस् सह पाणिनीयव्याकरणस्य विरोधस् स्यादिति चेद् अत्तरोच्यते—पतञ्जलिप्रोक्ते तरनिर्देशात्तरत्वस्वीकाररूपे प्रथमे कल्पे न कोऽपि विरोध इति स्फुटम्; तरनिर्देशतत्तरत्वस्वीकाररूपेऽनुकल्पेऽपि सूक्ष्मेक्षिकातारतम्यकृतदृष्टिभेदेनैव स एव स्वरः केन चिद् आचार्येणाऽनुदात्तत्वेनैवोपादीयतेऽन्येन चाऽनुदात्ततरत्वेनेति न कोऽपि वस्तुगतो विरोध इति वक्तुं शक्यते इति। प्लुतयोः कयोश् चित् प्रचयस्स्वरविशेषयोरन्त्याया मात्तराया न्यस्ततरत्वम् (=नीचतरत्वम्) तु ऋग्वेदप्रातिशाख्येऽपि "तिरमात्तरयोरुत्तरयोरन्त्याऽपि प्रचयस्स्वरे। मात्तरा न्यस्ततरैकेषाम्"[2] इति प्रतिपादितम्। 'स्वरितस्य चोत्तरो देशः प्रणिहन्यते"[3] इति सूत्तरयन् कात्त्यायनो मुनिरपि 'निहन्यते' इत्येतावदेवाऽनुक्त्वा 'प्रणिहन्यते' इति वदन् उदात्तस्स्वरितपरस्य स्वरितस्योत्तरभागस्य प्रचयेण निघातं सन्नतरत्वम् वा प्रतिपादयतीति प्रतीयते। अमोघानन्दिन्या शिक्षायाम् च—"निपातम् चाऽभिनीतम् च शेषन् नीचतरङ्करमात्। तिरस्स्वरन् तवं विजानीयाद् धोता ओजो निदर्शनम्"[4] इति, पाराशर्या शिक्षायाम् च "निपातम् चाऽभिनीतम् च शेषन् नीचतरङ्करमात्। तिरस्स्वरन् तवं विजानीयादाज्ज्येनेति निदर्शनम्"[5] इति कस्य चन नीचतरस्वरभागस्योल्लेखो दृश्यते। वर्णरत्नप्रदीपिकायाम् च— "उदात्तस्वरितपरप्रचितस्याऽपि नित्यशः। भवेन् नीचतराऽऽदेशो वैयाकरणसम्मतः"[6] इति अनुदात्ततरस्योल्लेखस् स्फुटङ्कृतः। भाषिकसूत्तरेऽपि कम्पाक्ष्योऽनुदात्ततर उल्लिखित इति तद्विदः[7] ॥३९॥

११. भाषिकस्वरनिरूपणम्

उदात्तस्याऽनुदात्ततत्वन् तथा स्वाराऽनुदात्तयोः।
उदात्ततत्वन् चैवमादिश् श्रुतश् शतपथादिषु ॥४०॥

---

१. १।२।४०। २. ३।२७। ३. ४।१४०।
४. श्लो. १०७ (शि. स., पृ. १०४)। ५. श्लो. ३७–३८ (शि. स., पृ. ५६)। ६. श्लो. ८२–८३ (शि. स., पृ. १२४)।
७. १।१९–२१।

शब्दे स्वरविपर्यासो भाषिकस्स्वर उच्च्यते ।
उदात्तादिस्स्वरूपे तु तत्र भेदो न कश्चन ॥४१॥

भाषिकस्स्वर× कात्यायनश्रौतसूत्रेऽपि "भाषिकस्स्वरो वोपपन्नमन्त्रोपदेशात्"[1] इति उल्लिखितः । धर्ममीमांसासूत्रे जैमिनिनाऽपि– "भाषास्वरोपदेशादैरवत् प्रावचनप्रतिषेधस् स्यात्"[2] इति, "मन्त्रोपदेशो वा न भाषिकस्य प्रायापत्तेर् भाषिकश्श्रुतिः"[3] इति च 'भाषास्वरः' इति, 'भाषिकश्श्रुतिः' इति चाऽस्योल्लेख× कृतः । शबरस्स्वामिना च "छन्दोगा बह्वृचाश् चैव तथा वाजसनेयिनः । उच्चनीचस्स्वरम् प्राहुस् स वै भाषिक उच्च्यते"[4] इति भाषिकस्स्वरपरिचयकारिका प्रोक्ता । भाषिकस्स्वरप्रतिपादनञ् च भाषिकसूत्रे "उदात्तानुदात्तौ भाषिकस् त्तत्सन्धिः । अनुदात्तावन्तरेणोदात्तः । आप्प्रपूर्व्व आक्ख्यातपरो न । समासश् च्चाऽनाक्ख्यातपरोऽपि । अपूर्व्वश् च्च समासो नैव। जात्यभिनिहितक्क्षैप्प्रप्प्रश्श्लिष्टाश् च्च । उतो यो मो नो सो च । ओ चैकेषाम् । उदात्तमेतत् । स्वरितानुदात्तौ च । उदात्तमनुदात्तमनन्त्यम् । अनन्त्यं संहतानाम् । भाषिके चोभयेषाम् । एकस्स्यापि । तेषाञ् च प्रागुत्तमादनन्तराणाञ् च कम्पनम् । उदात्तपूर्व्वस्स्याऽनुदात्तस्स्य च । उदात्तपूर्व्वस्य स्स्वरितस्स्य च । अत्तरान्त्यस्स्योदात्तस्स्यानुदात्तताम् प्रत्त्येके विवदन्ते"[5] इति कृतम् ॥४०–४१ ॥

१२. वैदिकस्वरगान्धर्वस्वरतुलना

गान्धर्ववेदे ये प्रोक्तास् सप्त षड्जादयस् स्वराः ।
ते हि प्रायेण वेदेऽपि स्वरा नीचादयस् स्मृताः ॥४२॥
षड्जोऽनुदात्त× कथित ऋषभस् स्वरितस् तथा ।
धैवत× प्रचित× प्रोक्तो निषादश् चाऽप्युदात्तकः ॥४३॥
उच्चौ निषादगान्धारौ नीचावृषभधैवतौ ।
पञ्चमो मद्ध्यमष् षड्जस् स्वरिता इति के चन ॥४४॥
नीचात् षड्जर्षभौ जातावुच्चाद् गान्धारमद्ध्यमौ ।
धैवताद्द्व्यास् तु स्वरिताज् जाता इत्त्यपि के चन ॥४५॥

तथाहि प्रतिपादितम् माण्डूक्क्यां शिक्क्षायाम्—"सप्त स्स्वरास् तु गीयन्ते सामभिस् सामगैर् बुधैः । चत्त्वार एव च्छन्दोब्भ्यस् (–भिस् ?) त्रयस् तत्त्र विवर्जिताः । षड्जऋषभगान्धारा मद्ध्यम× पञ्चमस् तथा ।

---

१. १।८।१७ । २. १२।३।२०। ३. १२।३।२१ ।
४. ध. मी. सू. भा, १२।३।२० । ५. १।५–२२ ।

धैवतश् च निषादश् च स्वरास् सप्तेह सामसु"[1] इति, "प्रथमावन्तिमौ चैव वर्तन्ते छन्दसि स्स्वराः। त्रयो मध्या निवर्तन्ते मण्डूकस्य मतयँ यथा। द्वितीयं स्वरितम् प्राहुष् षष्ठꣳ प्रचित उच्च्यते। उच्चवँ विद्द्यान् निषादन् तु नीचं षड्जमुदाहृतम् (–हरेत् ?)"[2] इति च। यथाऽनुदात्तस्वरितप्रचितोदात्तानामुच्चत्त्वनीचत्त्वतारतम्यकृतानि स्वरूपाणि,उरꣳकण्ठशिरोरूपाणि स्स्थानानि, आयामदारुण्यान्न्ववसर्गमार्दवादीनि निमित्तानि तथैव षड्जऋषभगान्धारमध्यमपञ्चमधैवतनिषादानामपीति च अयवँ वैदिकस्वर–गान्धर्वस्वरसवँवादस् सुष्ठु उपपन्नो भवति। अनुदात्तादीनान् नीचत्त्वोच्चत्त्वतारतम्यन् "नीचैरनुदात्तः"[3] "उभयवान् त्स्वरितः"[4], "प्रचय उदात्तश्श्रुतिः"[5] "उच्चैरुदात्तः"[6] इत्त्यादिभिर् वचनैः, तन्निमित्तानि च "आयामो दारुण्यमणुता खस्स्येत्त्युच्चैꣳकराणि शब्दस्य, अनुन्ववसर्गो मार्दवमुरुता खस्स्येति नीचैꣳकराणि"[7] इत्त्यादिभिर् वचनैः, स्थानानि च "सिद्धन् तु समानप्प्रक्क्रमवचनात्, ··· कꣳ पुनꣳ प्रक्क्रमः ? उरꣳ कण्ठश् शिर इति"[8] इत्त्यादिभिर् वचनैस् स्फुटम् बोद्धुं शक्क्यन्ते। षड्जादीनान् नीचत्त्वोच्चत्त्वतारतम्यञ् च सामविधानब्राह्मणे क्रुष्टस्य क्रुष्टतम इत्त्युल्लेखात्[9] तस्य च उच्चतम इति व्याक्ख्यातत्त्वात्[10], तत्प्रसङ्गेन व्याक्ख्यातृभिꣳ 'क्रुष्टादयस् स्वरा यमा उच्च्यन्ते, ते च उत्तरोत्तरन् नीचा भवन्ति'[11] इत्त्युक्तत्त्वात्, "उच्चनीचविशेषाद् धि स्वरान्न्यत्त्वम् प्रवर्तते"[12] इति वचनेन सार्ववैदिकस्वरविषयेण, "आयतात्त्वम् भवेन् नीचे मृदुत्त्वन् तु विपर्यये। स्वे स्वरे मध्यमत्त्वन् तु तत् समीक्क्ष्य प्प्रयोजयेत्"[13] इति एकतमस्स्वरापेक्क्षयाऽन्न्यतमस्वरस्स्योच्चत्त्वन् नीचत्त्वँ वोपजीव्य परस्वरापेक्क्षया पूर्वस्वरस्स्य आयतत्त्वादेर् व्यवस्थाम् प्रदर्शयता वचनेन, "आरोहन्ति स्स्वरा यत्त्राऽऽरोहीति स तु सञ्ज्ञितः। यत्त्र चैवावरोहन्ति सोऽवरोही प्रकीर्तितः"[14] इत्त्या-

---

१. श्लो. ७–८ (शि. स., पृ. ४६३)। २. श्लो. १७–१८ (शि. स., पृ. ४६४)। ३. शु. य. प्रा. १।१०९, तै. प्रा. १।३९। ४. शु. य. प्रा. १।११०। ५. तै. प्रा. २१।१०। ६. शु. य. प्रा. १।१०८, तै. प्रा. १।३८। ७. तै. प्रा. २३।९–१०। ८. पा. व्या. भा. १।२।२९–३०। ९. १।१।३। १०. तत्त्रैव भरतस्स्वामिविवृतौ, सायणीये च। ११. तत्त्रैव। १२. ना. शि. १।१।१। १३. तत्त्रैव १।७।१२। १४. ना. शा. २९।१५।

दिभिस् स्वरेषु आरोहावरोहशालितायास् सूचकैर् वचनैः, "कृष्टप्रथम-द्वितीयतृतीयचतुर्थमन्द्रातिस्वार्याः, तेषान् दीप्तिजोपलब्धिः"[1] इति अतिस्वार्यमन्द्रादिषु वर्तमानाया यथापूर्वञ्च क्रमेणाधिकाऽधिकाया दीप्तेः (तारतरत्वस्य) प्रतिपादकेन वचनेन, गायकनिकायप्रसिद्ध्या[2], प्रयोगेण चेति; स्थानानि च उरःकण्ठशिरोरूपाण्येवेति च "शारीर्यामथ वीणायान् तिरव्यस् स्थानेभ्य एव तु। उरसश् शिरसः कण्ठात् स्वरः काकुः प्रवर्तते"[3] इति वचनेन, आयामदारुण्यान्वसर्गमार्दवादीनि निमित्तानि च उच्चत्वनीचत्वतारतम्येनैवाऽऽक्षिप्तानि अपि आयामो दारुण्यमित्यादिना तैत्तिरीयप्रातिशाख्यस्थेनैव[4] कृष्टाद्द्युदात्ता-दिसाधारणतया प्रवृत्तेन वचनेन च बोद्धुं शक्यन्ते। यद्द्यपि बृहद्देव-तायां शौनकमुनिना "करुष्टो मूर्धनि विज्ञेयस् तालव्यः प्रथमस् स्वरः। द्वितीयस् तु भ्रुवोर् मध्ये तृतीयः कर्णसंश्रितः। चतुर्थो नासिकाग्रे स्यादौरसे मन्द्र उच्यते। मन्द्रकर्षणसयुक्तमति-स्स्वारम् प्रशंसति"[5] इति, भाषिकसूत्रे कात्यायनमुनिना च "सप्त साम्नाम्, षड्जर्षभगान्धारमध्यमपञ्चमधैवतनिषादाः, तेषाम् योनयः, कण्ठात् षड्जः, शिरस ऋषभः, नासिकाया गान्धारः, उरसो मध्यमः, उरसश् शिरसः कण्ठात् पञ्चमः, धैवतो ललाटात्, निषादस् सर्वत इति"[6] इति; नारदीयशिक्षायाञ् च "कण्ठादुत्तिष्ठते षड्जश् शिरसस् त्वृषभस् स्मृतः। गान्धारस् त्वनुनासिक्य उरसो मध्यमस् स्वरः। उरसश् शिरसः कण्ठादुत्थितः पञ्चमस् स्वरः। ललाटाद् धैवतवँ् विद्-द्यान् निषादं सर्वसन्धिजम्"[7] इति षड्जादीनां स्थानानि प्रतिपादि-तानि विस्तरेण, तान्येव चानूदितानि सङ्गीतरत्नाकर-भावप्रकाशन-पारिशिक्षादिषु च, तथापि तानि समासात् प्रतिपादितैर् उरःकण्ठ-शिरोरूपैस्स्थानैर् न विरुद्ध्यन्ते इति विज्ञायते। गान्धर्ववेदीयैस् स्वरैरुदात्तादीनामभेदे इमानि भूयः प्रमाणानि। तथा हि ऋग्वेदप्राति-शाख्ये "त्रीणि मन्द्रम् मध्यममुत्तमञ् च स्थानान्याहुस् सप्तयमानि वाचः। अनन्तरश् चाऽत्तर यमोऽविशिष्टस् सप्त स्स्वरा ये यमास् ते पृथग् वा"[1] इति असति उदात्तादीनां षड्जादिभिः करुष्टादिभिर् वा सम्बन्धे अप्प्रासङ्गिकत्वापत्त्याऽनुपपद्द्यमानेन सप्तस्वरोल्लेखेन तत्-

---

१. तै. प्रा. २३।१२-१३। २. पा. शि. शि. स. स. पृ. ९९।
३. ना. शा. १७।१६। ४. २३।९-१०। ५. ८।११२-११३।
६. ३।१६-२५। ७. १।५।५-६। ८. १३।४२-४५।

स्पष्टीकरणेन च उभयेषाङ्ग केनापि रूपेण सर्वं वादस् सूच्यते। शुक्ल-यजुर्वेदप्रातिशाख्ये च— "सप्त, त्रीन्, द्वौ, एकम्, सामजपन्न्यूङ्खवर्ज्जम्, प्रावचनो वा यजुषि"[1] इत्यत्र वेदे प्रयोक्तव्यानां स्वराणावँ व्यवस्थाया अनुशासनस्य प्रसङ्गे निषादादीनां सप्तस्स्वराणामुल्लेखस् तेषामुदात्तादिभिस् सह सम्बन्धन् द्योतयन् प्रतीयते। अन्यथा यजुर्वेदस्स्वराणाम् प्रसङ्गे तेब्भ्योऽत्यन्तमेव विजातीयानां सप्तस्स्वराणामुल्लेखश् शोभनो न स्स्यात्। सोऽयमुल्लेखष् षड्जादिषु उदात्तादिषु चाऽनुगतस्य स्वरत्वस्य एकजातीयतायास् स्फुटम् प्रत्त्यायनङ्ग करोति इति मन्तव्यम्। तैत्तिरीयप्रातिशाख्ये तु "कृष्टप्रथमद्वितीयतृतीयचतुर्थमन्द्रातिस्स्वार्याः, तेषान् दीप्तिजोपलब्धिः, द्वितीयप्रथमकृष्टास् त्रय आह्वरकस्स्वराः, मन्द्रादयो द्वितीयान्ताश् चत्वारस् तैत्तिरीयकाः"[2] इति गान्धर्वस्वराभिन्नानाङ्ग कृष्टादीनाम् मद्ध्ये द्वितीयादिभिश् चतुर्भिस् स्वरैस् सह तैत्तिरीयके प्रयोज्ज्यानाम् उदात्तादीनामैक्यं स्फुटम् प्रतिपादितम्। शैशिरीयशिक्षायान् च— "उच्चौ निषादगान्धारौ नीचावृषभधैवतौ। शेषास् तु स्स्वरिता ज्ज्ञेया षड्जमद्ध्यमपञ्चमाः"[3] इति स्फुटमुदात्तादीनान् निषादादिरूपत्वमुक्तम्। पाणिनीयशिक्षायान् च— "उदात्ते निषादगान्धारावनुदात्त ऋषभधैवतौ। स्वरितप्प्रभवा ह्येते षड्जमद्ध्यमपञ्चमाः"[4] इति रचनाशैल्ल्याऽर्थेनाऽपि दोलायितेनेव वाक्येन उदात्तादिनिषादादिसम्बन्ध उक्तः। याज्ञवल्क्यशिक्षायान् च— "गान्धर्ववेदे ये प्रोक्तास् सप्त षड्जादयस् स्वराः। त एव वेदे विज्ज्ञेयास् त्रय उच्चादयस् स्वराः। उच्चौ निषादगान्धारौ नीचावृषभधैवतौ। शेषास् तु स्स्वरिता ज्ज्ञेया षड्जमद्ध्यमपञ्चमाः"[5] इति उदात्तानीनां षड्जादीनान् च यथायथमैक्यं स्फुटमुक्तम्। नारदीयशिक्षायामपि— "उदात्ते निषादगान्धारानुदात्त ऋषभधैवतौ। स्वरितप्प्रभवा ह्येते षड्जमद्ध्यमपञ्चमाः"[6] इत्येवोक्तम्। तत्र षड्जऋषभगान्धारमद्ध्यमपञ्चमधैवतनिषादानामुत्तरोत्तरमुच्चत्वे सति उपर्य्युद्धृतम् माण्डूक्याश् शिक्षाया वचनन् तु सुखेन सङ्गतम् भवति, शैशिरीयशिक्षादीनावँ वचनानि तु कथं सङ्गतानि स्स्युः, तेषु उच्चे उदात्ते उच्चतमस्स्य निषादस्स्य मद्ध्य-

---

१. १।१२७–१३२। २. २३।१२–१५। ३. श्लो. ८२।
४. श्लो. १२। ५. श्लो. ६–७ (शि. स., पृ. १–२)।
६. १।८।८।

स्स्थस्स्य गान्धारस्स्य चाऽन्तर्भावितत्त्वात्, नीचेऽनुदात्ते नीचतमसमीपस्स्थस्स्य ऋषभस्स्य उच्चतमनिषादसन्निकृष्टस्स्य धैवतस्स्याऽपि अन्तर्भावितत्त्वादिति प्रश्न उत्तिष्ठति। तस्स्य समाधानञ् चाऽभिनवगुप्तस्स्य "तेन परमार्थतस् त्रय एव स्वरास् सरिगाः, पधनयः। मद्ध्यमस् तु ध्रुवकस्स्थानीयो मद्ध्यमत्वादेव। चतुश्श्रुतिरुदात्त उच्चत्वात्, द्विश्श्रुतिरनुदात्तो नीचैस्त्वात्, त्रिश्श्रुतिस् स्वरितो मद्ध्यवर्तितया समाहारत्वात्। तथा हि स्वरित एव कम्पितत्त्वँ व्यवहरन्ति श्रोत्त्रियाः"[1] इति वचनेन सूच्यते। अत्त्रेदन् तु विवेक्तव्यम्— शैशिरीयशिक्षादिवचनेषु द्विश्श्रुतिकौ निषादगान्धारौ उच्चौ उक्तौ, त्रिश्श्रुतिकौ ऋषभधैवतौ नीचावुक्तौ, चतुश्श्रुतिकाव् षड्जमद्ध्यमपञ्चमास् स्वरिता उक्ताः; अतोऽभिनवगुप्तवचनयँ यथाश्रुतन् नोपपद्द्यते; अतोऽत्त्रैवं स्वीकर्तव्यम्— द्विश्श्रुतिकस् स्वर उदात्तस् तीक्ष्णत्वात्, त्रिश्श्रुतिकस् स्वरोऽनुदात्तोऽतीक्ष्णत्वात्, चतुश्श्रुतिकस् स्वरस् स्वरितस् तीक्ष्णातीक्ष्णाऽऽमिश्श्रत्वादिति। तत्त्राभिनवगुप्तस्स्योक्त्या सरिगेषु पधनिषु च उभयेषु स्वस्स्वसमूहापेक्षया उच्चतमौ गनी उदात्तौ, तदपेक्षया नीचौ रिधौ अनुदात्तौ शिष्टौ सपौ मश् च स्वरिता इति अपि सूच्यत एव। तत्त्र यद्द्यपि सपौ अनुदात्तौ, गनी उदात्तौ, रिधौ मश् च स्वरिता इति उच्चत्वनीचत्वसामान्यदृष्ट्या युक्ततरन् दृश्यते; श्रुत्यनुसारमेव व्यवस्थायाङ् कर्तव्यायां सत्त्यान् तु अभिनवगुप्तोक्ता व्यवस्थाऽथवा द्विश्श्रुतिक उदात्तश् चतुश्श्रुतिकोऽनुदात्तस् त्रिश्श्रुतिकस् स्वरित इति व्यवस्था युक्ततरा भवेत् तथापि शैशिरीयशिक्षादिवचनोपपादनायोक्तवँ व्याख्यानमाश्श्रयणीयम् भवति। एवमपि उक्ते व्याख्याने किञ् चिदसामञ्जस्स्यन् तु परिशिष्यत एव। माण्डूक्याश् शिक्षाया वचने तु उच्चत्वनीचत्वकृता व्यवस्था सूपपन्ना; अतोऽस्माभिस् सैवाऽऽश्श्रितेति स्वाऽभिमतरूपेण सैव व्यवस्था स्वकीयाभिः कारिकाभिर् निबद्धा। नारदीयशिक्षायामपि— "दीप्तामुदात्ते जानीयाद् दीप्ताञ् च स्स्वरिते विदुः। अनुदात्ते मृदुर् ज्ञेया गान्धर्वाश् श्रुतिसम्पदः"[2] इति उदात्तादौ गान्धर्वस्स्वरावयवश्श्रुतिविशेषसमायोजनस्स्य प्रदर्शितत्वात् सर्वोच्चेन निषादेनैव उदात्तस्स्यैक्यं सर्वनीचेन षड्जेनैवाऽनुदात्तस्स्यैक्यं सूच्यत इति विज्ञायते। पारिशिक्षायाङ्— "गान्धारको मद्ध्यम

---

१. ना. शा. अ. भा., भा. ४, पृ. १४। २. ना. शि. १।७।१८।

उच्चजातष् षड्जर्षभौ द्वौ निहतोद्भवौ स्तः। सपञ्चमो धैवतको निषादस् त्रयस् स्वरास् च स्स्वरितात् तु जाताः"[1] इति प्रतिपादिता व्यवस्था तु षड्जऋषभगान्धारमद्ध्यमपञ्चमधैवतनिषादेषु नीचयोष् षड्जऋषभयोरनुदात्तेन तत उच्चयोर् गान्धारमद्ध्यमयोरुदात्तेन ततोऽप्युच्चानाम् पञ्चमधैवतनिषादानां स्वरितेन तत्सम्बद्धशाखायामुदात्ततरेण भागेन युक्तेन सह सम्वन्धमभिप्रेत्य कृतेति स्फुटम् ज्ञायते। तत्र उच्चतमानाङ् गान्धर्वस्स्वराणां स्वरितेन सह सम्वन्धोऽपि "समाहारस् स्वरितः, तस्स्याऽऽदिरुच्चैस्तरामुदात्तादनन्तरे यावदर्धं ह्रस्स्वस्स्य"[2] इति तैत्तिरीयप्रातिशाक्ख्यवचनेनाऽन्वाक्ख्यातं स्वरिताद्द्व्यभागस्योदात्तादपि उच्चतरत्वमुपजीव्यैव प्रदर्शित इत्यवगन्तुमपि सुखेनैव शक्यते। नारदीयशिक्षायान् तु— "कठकालापवृत्तेषु तैत्तिरीयाह्वरकेषु च। ऋग्वेदे सामवेदे च वक्तव्यꣳ प्रथमस् स्वरः। ऋग्वेदस् तु द्वितीयेन तृतीयेन च वर्तते। उच्चमद्ध्यमसञ्ज्ञातस्स्वरो भवति पार्थिवः। तृतीयप्रथमक्रुष्टान् कुर्वन्त्याह्वरकास् स्वरान्। द्वितीयाद्द्व्यांस्तु मन्द्रान्ताँस् तैत्तिरीयाश् चतुरस् स्वरान्। प्रथमश् च द्वितीयश् च तृतीयोऽथ चतुर्थकः। मन्द्रꣳ क्रुष्टो ह्यतिस्स्वार एतान् कुर्वन्ति सामगाः। द्वितीयप्रथमावेतौ ताण्डिभाल्लविनां स्वरौ। तथा शातपथावेतौ स्वरौ वाजसनेयिनाम्"[3] इति तेषामेव क्रुष्टादीनां स्वराणाꣳ यथायथम् ऋग्वेदादिषु प्रयोगꣳ प्रतिपादित इति उदात्तादीनां षड्जादीनाञ् च यथायथमैक्यं स्फुटम् प्रतिपादितमिति मन्तव्यम् ॥४२–४५॥

१३. गान्धर्वस्वरसामस्वरविवेचनम्

गान्धर्वे षड्ज ऋषभो गान्धारो मद्ध्यमस् तथा।
पञ्चमो धैवतश् चापि निषादश् च स्स्वरास् स्मृताः ॥४६॥
साम्नाञ् च क्रुष्टꣳ प्रथमो द्वितीयश् च तृतीयकः।
चतुर्थश् च तथा मन्द्रोऽतिस्स्वार्यश् च स्स्वराश् श्रुताः॥४७॥
क्रुष्टादिषु यथापूर्वं षड्जादिषु यथापरम्।
उच्चोच्चास् स्युस् स्वरास् तुल्याश् चोभये ते यथायथम् ॥४८॥

गान्धर्वस्स्वरा "यत् तु तन्त्रीकृतम् प्रोक्तन् नानाऽऽतोद्द्व्यसमाश्रयम्। गान्धर्वमिति तज् ज्ञेयं स्वरताललयात्मकम्। अत्यर्थमिष्टन् देवानान् तथा प्रीतिकरम् पुनः। गन्धर्वाणाञ् च यस्माद् धि

---

१. सू. ८३। २. १।४०, ४१। ३. १।१।९–१३।

तस्माद् गान्धर्वमुच्यते । अस्य योनिर् भवेद् गानवँ वीणा वंशस् तथैव च । एतेषाम् चैव वक्ष्यामि विधिं स्वरसमुत्थितम् । गान्धर्वन् त्रिविधम् प्रोक्तं स्वरतालपदात्मकम् । त्रिविधस्यास्यापि वक्ष्यामि लक्षणञ्च कर्म चैव हि"[1] इत्युपक्रम्य "षड्जश् च ऋषभश् चैव गान्धारो मद्ध्यमस् तथा । पञ्चमो धैवतश् चैव सप्तमोऽथ निषादवान्"[2] इत्यादिना मुनिना भरतेन निरूपितास् सग्रामम्रूर्छनातानरागकाः, अन्यैश् च तण्डु-कोहल-दत्तिल-विशाखिल-नखकुट्टा-ऽश्मकुट्ट-मतङ्ग-नारद-शार्ङ्ग-देव-सिंहभूपाल— कल्लीनाथ—दामोदरमिश्रर—लोचनपण्डिता-ऽहोबल-व्यङ्कटमुखि-विष्णुनारायणादिभिः प्रोक्ताः।मुनिना पिङ्गलेनाऽपि षड्जादय उल्लिखिताः[3] । तत्तर स्वर-ग्राम-मूर्छना-तान-रागादीनावँ विषयाणां स्पष्टीकरणाय अपेक्षिताश् श्रुतिस्वरादिस्वरूपप्रतिपादिका ग्रन्थान्तरेब्भ्यस् सङ्कलिताः क्वचित् कियताऽप्यंशेन प्रतिसंस्कृताः काश् चन तु पूर्वाचार्योक्तीरुपजीव्य आत्मनैव रचिताश् च कारिका अत्तरोपस्थापयन्ते— "प्रथमश्श्रवणाच् शब्दश् श्रूयते ह्रस्स्वमात्तरकः । सा श्रुतिस् सम्परिज्ञेया स्वरावयवलक्षणा ।। श्रुतस् स्वरूपमात्तरेण हीनोऽनुरणनेन तु । नादश् श्रुतिस् स्यादस्स्याश् च भेदा द्वाविंशतिस् स्मृताः ।। यथा दधनि सर्पिर् वा काष्ठस्स्थो वा यथाऽनलः । प्रयत्नेनोपलब्ध्येत तद्वत् स्वरगता श्रुतिः ।। दीप्ताऽऽयता मृदुर् मद्ध्या करुणेति च पञ्चधा । जातितस् ताः पुनर् व्यक्तिनाम्ना तीव्रादयो मताः ।। चतसृभिस् स्युश् श्रुतिभिष् षड्जमद्ध्यमपञ्चमाः । द्वाब्भ्यान् निषादगान्धारौ तिसृभिर् धैवतर्षभौ ।। षड्जग्रामे स्वरा एवम् मद्ध्यमग्रामके पुनः । हीनस् स्यात् पञ्चमश् श्रुत्त्यैकया वृद्धस् तु धैवतः ।। श्रुत्त्यनन्तरभावी यस् स्निग्धोऽनुरणनात्मकः । स्वनो रञ्जयति श्श्रोतुश् चित्तं स स्स्वर उच्च्यते ।। श्रुतिजास् स्युस् स्वराष् षड्जर्षभगान्धारमद्ध्यमाः । पञ्चमो धैवतश् चाऽपि निषादश् चेति सप्त ते ।। आपेक्षिकाः कम्पवृद्धेरुच्चोच्चाश् च यथोत्तरम् ।। सङ्क्षेपात् ते प ऋ गा म प धै नीति च कीर्तिताः ।। ऋषभाद्द्वाश् चलाः प्रोक्ता अचलौ षड्जपञ्चमौ । चलाश् शुद्धाश् च विकृता अचलावविकारिणौ ।। शुद्धास् तु तीव्रा विकृता कोमला अपि कीर्तिताः।तारा मुदारा उदारा इति सप्त तत्रिधा पुनः।। विशिष्टसन्निवेशास् तु रक्तिम् चाऽब्भ्युदयन् तथा । जनयत्तो जातयस्

---

१. ना. शा. २८।८–११ । २. तत्तरैव २८।२१ ।
३. पि. छ. सू. ३।६४ ।

स्युस् स्वराश् शुद्धाश् च सङ्करा: ।। ग्रहांशतारमन्द्रत्वन्न्यासोपन्न्यास-
कैस् तथा । आल्प्यबाहुल्यादिभिश् च भिन्ना अष्टादशैव ता: ।। ग्रामास्
स्वरसमूहास् स्युर् मूर्छनादेस् समाश्श्रया: । आद्द्यन्तस्स्वरनाम्ना ते
षड्जगान्धारमद्ध्यमा: ।। तत्तर स्वर्गे हि गान्धारग्रामो नाऽन्न्यत्तर
गीयते । इति प्प्रोक्तन् नारदीयशिक्क्षायाम् मुनिना स्स्फुटम् ।। स्वरस्
सम्मूछितो यत्तर रागताम् प्रतिपद्द्यते।मूर्छनामिति तामाहुः कवयो ग्राम-
सम्भवाम्।।क्रमात् स्वराणां सप्तानामारोहश्चाऽवरोहणम् ।मूर्छनेत्त्युच्च्यते
ग्रामेग्रामे तास् सप्तसप्त च ।। विस्तार्यन्ते प्प्रयोगा यैश् शैथिल्याद्
वाऽपि पीडनात् । स्वराणाङ्क्रमशस् साम्म्यं समेनैवोत्तरेण वा ।। कृत्वा
स्वरेण ते ताना ऊनपञ्चाशदीरिता: । षाडवा औडवाः पञ्चत्रिंशत् ते
मूर्छनाश्श्रिता: ।। असम्पूर्णाश् च सम्पूर्णा व्युत्क्रमोच्चारितास्
स्वरा: । मूर्छनासु विभिन्नासु कूटताना अनन्तका: ।। दीप्तायतादिश्-
श्रुतिजविशिष्टस्स्वररागत: । सिद्धा ग्रामविशेषा हि ग्रामरागाः प्रकीर्-
तिता: ।। शुद्धा ग्रामास् त्रयस् ते हि रागाः प्राप्ता विशेषताम् । जात्-
त्या त्रिधा ते सम्पूर्णाष् षाडवा औडुवा इति ।। भैरवः कौशिकश् चैव
हिन्दोलो दीपकस् तथा । श्रीरागो मेघरागश् च रागाष् षडिति कीर्तिता: ।।
मालवश् चाऽथ मल्लारश् श्रीरागश् च वसन्तक: । हिन्दोलश् चाऽथ
कार्णाट इति रागाः क्वचित् तु षट् ।। तत्तर तत्ववान्तरा रागा रागि-
णय्य इति कीर्तिता: । भैरवादीन् मूलरागानाश्श्रितास् ता अनेकधा ।। वादी
प्रधानस् सर्वं वादी मद्ध्यमोऽथानुवादिन: । रागेऽनुगामिनस् स्वाना विवादी
तु वहिष्कृत: ।। मेलस् स्वरसमूहस् स्याद् रागव्यञ्जनशक्तिमान् ।
श्लिप्टोच्चारणमेवाऽत्तर समूहः परिकीर्तित: ।। ताला अनेके मात्त्रा-
णान् त्रिकाब्भ्यान् दर्दुरो मत: । द्विकैष् षड्भिस् त्वेकतालश् चतुस्-
तालोऽपि तद्विध: ।। चतुर्भिश् च चतुष्कैस् तु त्रिताल इति कीर्त्यते ।
त्रैवृतस् सप्तमात्त्राको झम्पको दशमात्रक: ।।" इति ।

सामस्स्वरेषु तु क्रुष्टप्रथमद्वितीयतृतीयचतुर्थपञ्चमान्त्यास् साम-
विधानब्राह्मणे श्रुता:[1] । तत्त्रैव स्थलान्तरे क्रुष्टप्रथमद्वितीयतृतीय-
चतुर्थमन्द्रातिस्स्वार्या अपि श्रूयन्ते[2] । ऋग्वेदप्रातिशाख्ये तु "सप्त
स्स्वरा ये यमास् ते, पृथग् वा"[3] इति सामान्न्यतया सप्त स्स्वरा उल्-
लिखिता:, ते च गान्धर्वस्स्वरा वा सामस्स्वरा वेति विशिष्य किमपि न
ज्ज्ञायते । बृहद्देवतायान् तु क्रुष्टादयस् सप्त स्स्वरास् तदुत्पत्ति-

१. १।१।३ । २. १।१।५ । ३. १३।४४, ४५ ।

स्स्थानदेवतादिनिर्देशपूर्वकमुल्लिखिताः[1]। तत्तर अष्टौ स्वरा उक्ता इति केचिन् मन्यन्ते[2]; किन् तु गान्धर्वे पञ्चमत्वेन प्रतिपादितात् स्वरात् साम्ना षड्ठस्स्य स्वरस्स्य मन्द्रस्स्य सामविधानब्राह्मणे पञ्चमत्वेनोल्लिखितस्स्य[3] देवताभेदेनापि भेदम् प्रदर्शयितुमेव तत्तर मन्द्रेण सह पञ्चमस्स्योल्लेखः कृतो न तु पञ्चममन्द्रयोः पृथग् गणनेनाष्टौ स्वरान् प्रतिपादयितुमिति विज्ज्ञायते। शुक्लयजुर्वेदप्रातिशाख्येऽपि सप्त सामस्स्वरा उल्लिखिताः[4]। भाषिकसूत्तरे च— "सप्त साम्नाम्, षड्ज ऋषभगान्धारमद्ध्यमपञ्चमधैवतनिषादाः"[5] इत्यादिना सामस्स्वराः प्रतिपादिताः। तैत्तिरीयप्रातिशाख्येऽपि कृष्टादयस् सप्त स्वराः प्रोक्ताः[6]। सामवेदीयसंहितोपनिषद्ब्राह्मणादौ पुष्प-(फुल्ल-) सूत्तरे, सामतन्त्रादौ च क्रुष्टादीनां स्वराणाँ विनियोगा बहुशः प्रदर्शिताः, तथापि क्रुष्टादिस्स्वरूपतदुत्पत्तिप्रक्रियादयो विषयास् तु पुष्पसूत्तरादिषु सामवेदप्रातिशाख्येषु प्रतिपादिता न दृश्यन्ते[7]। नारदीयशिक्षायान् तु— "प्रथमश् च द्द्वितीयश् च तृतीयोऽथ चतुर्थकः। मन्द्रः क्रुष्टो ह्यतिस्स्वार एतान् कुर्वन्ति सामगाः"[8] इत्येकत्तरोक्तम्। पुनरन्यत्तर तु "सामवेदे तु वक्ष्यामि स्वराणान् चरितयँ यथा। अल्पग्रन्थम् प्रभूतार्थं शरव्यवँ वेदाङ्गमुत्तमम्"[9] इति प्रतिज्ज्ञाय "सप्त स्स्वरास् त्रयो ग्रामा मूर्छनास् त्वेकविंशतिः। ताना एकोनपञ्चाशदित्येतत् स्वरमण्डलम्"[10] इत्युद्दिश्य "षड्जश् च ऋषभश् चैव गान्धारो मद्ध्यमस् तथा। पञ्चमो धैवतश् चैव निषादस् सप्तमस् स्वरः"[11] इति सप्त स्स्वरान् प्रदर्श्य तेषान् देवादिप्रीणनसाधनत्वम्, रूपाणि, वर्णाः (जातयः), उत्पत्तिस्स्थानानि चेत्यादयो विषयास् सप्प्रपञ्चम् प्रदर्शिताः[12]। माण्डूक्ष्यां शिक्षायान् च "सप्त स्स्वरास् तु गीयन्ते सामभिस् सामगैर् बुधैः। चत्वार एव च्छन्दोब्भ्यस् त्रयस् तत्तर विवर्जिताः। षड्जऋषभगान्धारा मद्ध्यमः पञ्चमस् तथा। धैवतश् च निषादश् च स्वरात् सप्तेह सामसु"[13] इत्यादिना सामस्स्वरा वर्णिताः।

---

१. ८।११२–१२१। २. सामतन्त्रभूमिकायाम् पृ. ९। ३. १।१।३, १।१।५। ४. १।१२७। ५. ३।१६, १७। ६. २३।१२ ७. सामसूक्ते प्रतिपादिता एते इति केचित् (सङ्. वि. वि., पृ. १९)। ८. १।१।१२। ९. १।२।१। १०. १।२।४। ११. १।२।५। १२. १।२।६–१।५।१८। १३. श्लो. ७–८ (शि. स., पृ. ४६३)।

क्रुष्टादीनायँ यथापूर्वमुच्चोच्चत्वं षड्जादीनायँ यथोत्तरमुच्चोच्चत्वञ्च प्रागेव प्रतिपादितम्[1]। तत् तत एवाऽवगन्तव्यम्। एवञ्च क्रुष्टादीनां षड्जादिभिस् सह साम्यञ्च क्रुष्टः=निषादः, प्रथमः=धैवतः, द्वितीयः=पञ्चमः, तृतीयः=मध्यमः, चतुर्थः=गान्धारः, मन्द्रः=ऋषभः, अतिस्वार्यः परिस्वारो वा=षड्ज इति प्रतीयते। नारदीयशिक्षाया माण्डूक्याश् शिक्षायाश् च अङ्गुलिस्वरविधानस्य विचारे तु तत्र कश् चन विपर्यासः प्रतीयते। यद्यपि नारदीयशिक्षायाम् "आर्चिकञ्च गाथिकञ्च चैव सामिकञ्च स्वरान्तरम्। कृतान्ते स्वरशास्त्राणाम् प्रयोक्तव्यवँ विशेषतः। एकान्तरस् स्वरो ह्यृक्षु गाथासु द्व्यन्तरस् स्वरः। सामसु त्र्यन्तरवँ विद्द्यादेतावत् स्वरतोऽन्तरम्"[2] इति गाथिकाद् गान्धर्वाद् वा स्वरात् सामस्वरस्य भिन्नतत्त्वमिव प्रतिपादितन् दृश्यते, तथापि तत्र स्वरकर्षणाकर्षणादिकृतो भेद एव ग्रन्थकारेण लिलक्षयिषितो न तु स्वरस्वरूपभेद इति विज्ज्ञायते, सामस्वराणां षड्जादिरूपेणैव भाषिकसूत्रे[3] माण्डूक्यां शिक्षान्[4] चोक्तत्वाद्, नारदीयशिक्षायामेवाऽपि सामस्वराणाङ्क्रुष्टादिभिर् नामभिस् सह षड्जादिभिर् नामभिरपि व्यवहृतत्वाच् च[5]। अङ्गुलिस्वरविन्न्यासप्रतिपादने नारदीयायां शिक्षायाम्— अङ्गुष्ठस्योत्तमे क्रुष्टोऽङ्गुष्ठे तु प्रथमस् स्वरः। प्रदेशिन्न्यान् तु गान्धार ऋषभस् तदनन्तरम्। अनामिकायां षड्जस् तु कनिष्ठायाञ्च धैवतः। तस्याधस्ताच् च योन्न्यास् तु निषादन् तत्र विन्न्यसेत्। अपर्वत्वादसञ्ज्ञत्वादव्ययत्वाच् च नित्यशः। मन्द्रो हि न हि भूतस् तु परिस्वार इति स्मृतः"[6] इति, माण्डूक्यां शिक्षायाञ्च— "बाह्ययाङ्गुष्ठन् तु क्रुष्टं स्यादङ्गुष्ठे मध्यमस् स्वरः। प्रादेशिन्न्यान् तु गान्धारो मध्यमायान् तु पञ्चमः। अनामिकायां षड्जस् तु कनिष्ठायान् तु धैवतः। तस्याऽधस्तात् तु योऽन्न्यस् स्यान् निषाद इति तवँ विदुः"[7] इति च क्रुष्टप्रथमयोः परिस्वारस्य च गान्धारादिभिस् सह परस्परपूरकत्वेनोल्लेखोऽपि क्रुष्टादीनां षड्जादीनाञ्च चोभयेषायँ यथायथमैक्यमिति स्फुटतरीकरोति। उव्वटेनाऽपि षड्जादीनाङ्क्रुष्टादीनाञ्च यथायथमैक्यं स्फुटं सूचितम्[8]।

---

१. पृ. ३७०–३७१। २. १।१।२, ३। ३. ३।१६, १७।
४. श्लो. ७, ८। ५. १।२।१–५। ६. १।७।३–५।
७. श्लो. १५–१६ (शि.स., पृ.४६४)। ८. ऋ.प्रा.उ.भा. १३।४४।

यत् तु नारदीयशिक्क्षायायँ "यस् सामगानाम् प्रथमस् स वेणोर् मद्ध्यमस् स्वरः। यो द्वितीयस् स गान्धारस् तृतीयस् त्वृषभस् स्मृतः। चतुर्थ्य् षड्ज इत्त्याहुः पञ्चमो धैवतो भवेत्। षष्ठे निषादो विज्ज्ञेयस् सप्तमः पञ्चमस् स्मृतः"[1] इति, तद् वेणौ खदिरे रौप्ये-ऽन्न्यस्मिन् वाऽपि सुषिरवाद्द्ये स्वरविशेषाभिव्व्यञ्जनाय कृतेषु सप्तसु छिद्द्रेषु मद्ध्ये कतमेन च्छिद्द्रेण कतमस् स्वरोऽभिव्व्यज्ज्यते इति प्प्रदर्शनायैवोक्तम्; एवञ् च 'स वेणोर् मद्ध्यमस् स्वरः' इत्त्यत्तर स्वरशब्दस् सुषिरवाद्द्यस्स्थस्वराभिव्व्यञ्जकच्छिद्द्रपरो न मुक्ख्य-स्स्वरपरः। एतच् च प्रकारान्तरेणाऽपि प्रतिपादितन् दृश्श्यते— षड्-जस् त्वनामिकाङ्गुल्ल्यामृषभो मद्ध्यमाङ्गुलौ। तिरङ्गुल्ल्याञ् च गान्-धारो मद्ध्यमः कम्पितो यथा। वामहस्ते त्रयो ह्येते चत्त्वारो दक्-क्षिणे पुनः। पञ्चमोऽनामिकायान् तु धैवतो मद्ध्यमाङ्गुलौ। प्रदेशि-न्न्यान् निषादस् तु मद्ध्यमः कम्पितो यथा"[2] इति। एतत् च नाट्ट्य-शास्त्रसुषिरातोद्द्याद्ध्यायतदभिनवभारत्त्यादिपरिशीलने स्पष्टम् भवति। नारदीयशिक्क्षाया उक्तेनोल्लेखेन सामगाने न केवलवँ वैणिक एव किन् तु वंशवादादयोऽन्न्येऽपि कुतपवटका भवन्ति स्स्मेति प्प्रतीयते। एवञ् च सति उक्तान् नारदीयशिक्क्षोक्तिमुपजीव्व्य यत् कैश् चित् खलु 'म गा ऋ ष धै नि प' इति सामस्स्वराणाङ् क्रमः कल्पितः[3], तदनुसारञ् च क्रुष्टादीनां षड्जादिभिस् सह सर्वँ वादने क्रुष्टः=मद्ध्यमः, प्रथमः= गान्धारः, द्वितीयः=ऋषभः, तृतीयः=षड्जः, चतुर्थः = धैवतः, मन्द्रः=निषादः, अतिस्स्वार्य्यः=पञ्चम इत्त्यभिप्प्रायोऽभिव्व्यक्तीकृतस्[4] सोऽसङ्गत एव दृश्श्यते; भाषिकसूत्त्रे[5] माण्डूक्क्यां शिक्क्षायाम्[6], नारदीयशिक्क्षायामेवाऽपि[7] सामस्स्वराणां षड्जऋषभादिक्क्रमेणैव प्प्रतिपादितत्त्वाच् च ॥४६-४८॥

१४. गान-पाठभेदप्प्रतिपादनम्

ग्रामोत्थमूर्च्छनातानरागयोगविशेषतः।
गानम् पाठात् पृथक् तुल्ल्या उभयोर् यद्द्यपि स्स्वराः ॥४९॥

---

१. १।५।१-२। २ ना. शा. अभि. भा. ३०।२; तुलना कार्य्या ना. शि. १।७।३-४। ३. सामतन्त्रभूमिकायाम्, पृ. ८। ४. पा. शि. शि. स. स., पृ. १०७। ५. ३।१६, १७। ६. श्लो. ७, ८। ७. १।२।१-५।

ननु गाथिकस्स्वराणां षड्जादीनावँ वैदिकस्स्वराणामुदात्तादीनाञ्च तुल्यत्वे तद्वतोर् गाथागान–वेदपाठयोस् सजातीयत्वेन श्रवणम् प्रसक्तं स्यात्, अनुभूयते तु महदन्तरञ्च गाथागान–वेदपाठयोरिति चेदत्रोच्यते–ग्रामोत्थेत्यादि। गाथागाने स्वराणाञ्ग्रामीकरण–मूर्छन–तननादिभिश्च खलु रागवत्त्वस्य सम्पादनाद्, वेदपाठे च शुद्धानां स्वराणामेव प्रयोगाद् मूलभूतानां स्वराणान् तुल्यत्वेऽपि गानपाठयोर् भेदो नाऽनुपपन्न इत्यर्थः। गानपाठभेदोऽभिनवगुप्तेनाऽपि एवमेवाऽभिनवभारत्यावँ[1] व्युत्पादित इत्यप्यत्र स्मरणीयम् ॥४९॥

१५. प्राकृतध्वनिगततया स्वरविशेषाणान् निदर्शनम्

मयूरश्च कवते षड्जमृषभञ्च गौर् हि रम्भते।
कल्लतेऽजा तु गान्धारञ्क्रौञ्चश्च कायति मद्ध्यमम् ॥५०॥
कोकिला पञ्चमञ्च कौति हेषतेऽश्वो हि धैवतम्।
निषादम् बृंहति गज एतत् स्वरनिदर्शनम् ॥५१॥

षड्जादीनां स्वराणां स्वरूपाणि उपदेष्टुम् प्राचीनैश्च कतिपयैश् शिक्षाकारैस् तानि प्राकृतैर् ध्वनिभिर् निदर्शितानि। तदेव निदर्शनमत्र प्रतिसंस्कृताब्भ्याञ्च कारिकाब्भ्यामस्माभिर् निबद्धम्। एतस्मान् निदर्शनाद् व्यावहारिको वैदिकगाथिकस्वरोच्चारणसौष्ठवसम्पादनरूपो लाभो यद्द्यपि दुर्लभस् तथापि प्राचीनशिक्षाग्रन्थेषु स्थितोऽयवँ विषयस् सर्वथा त्यक्तुमयोग्य इत्यत्र सङ्कलितो बोद्ध्यः। यद्द्यपि याज्ञवल्क्यशिक्षायामन्यत्र च एतस्मिन् विषये कियताऽप्यंशेन भेदो दृश्यते तथापि बहुतरग्रन्थसम्मतिमाधारीकृत्य विषयोऽयमत्र प्रतिपादितः। तत्र षड्जादीनां स्वराणायँ यथोत्तर मुच्चोच्चत्वाद् उच्चत्वनीचत्वयोश् च आपेक्षिकत्वात् कथम् मयूरस्य केकाया गोर् हम्बाया अन्येषावँ वा रुतानाम् पृथक्पृथग् एकलरूपेण श्रूयमाणानां षड्जत्वादिव्यवस्था स्यादिति प्रश्नोऽत्र उत्तिष्ठति। तस्य समाधानाय च गवादयष् षड्जमपि कायन्ति तदंशापेक्षया तेषामृषभादीनान् निश्चयो भवतीति केन चनोक्तम्[2]। किन् तु तन् नाऽस्माकम् मनो हरति। अस्माकवँ विचारे तु मयूरादीनां सप्तानां सप्तानां रुतानाम् परस्परापेक्षया उच्चत्वनीचत्वव्यवस्थायाश्च प्रतिपादयितुं शक्यत्वाद्, मयूरस्य केकायाष् षड्जत्वे गोर् हम्बाया ऋषभत्वम्, तयोष् षड्जत्वऋषभत्वयोरजायाश्च कल्लनस्य गान्धारत्वमित्येव-

---

१. ना.शा. १८।१०९। २. पा.शि.शि.स.स., पृ. १०६।

मेव व्याक्ख्येयमिति प्रतिभाति। एकस्यैव मनुष्यस्य स्वरस्य मयूर-केकासदृशत्वे षड्जत्वङ्ग गोहम्बासदृशत्वे ऋषभत्वम् अजाकल्लन-सदृशत्वे गान्धारत्वमित्येवमादेः प्रतिपादने एव उक्तनिदर्शनस्य तात्पर्यम् प्रतीयते। केकादीनां षड्जत्वादेः प्रतिपादनञ् च याज्ञ्य-वल्क्यशिक्क्षायाम्— "षड्जो वेदे शिखण्ड्यास्ये ऋषभस् त्वादजा-मुखे। गावो रम्भन्ति गान्धारङ्ग क्रौञ्चाश् चैव तु मद्ध्यमम्। कोकिलः पञ्चमम् ब्रूते निषादन् तु वदेद् गजः। आश्श्वश् च धैवतो ज्ञेयस् स्वरास् सप्तेति गीयते"[1] इति, नारदीयशिक्क्षायाम्— "षड्जवँ् वदति मयूरो गावो रम्भन्ति चर्षभम्। अजाविके तु गान्धारङ्ग क्रौञ्चो वदति मद्ध्य-मम्। पुष्पसाधारणे काले कोकिला वक्ति पञ्चमम्। अश्श्वस् तु धैवतवँ् वक्ति निषादवँ् वक्ति कुञ्जरः"[2] इति, माण्डूक्क्यां शिक्क्षायाञ् च— "षड्जे वदति मयूरो गावो रम्भन्ति चर्षभे। अजा वदति गान्धारे क्रौञ्चनादस् तु मद्ध्यमे। पुष्पसाधारणे काले कोकिलः पञ्चमे स्स्वरे। अश्श्वस् तु धैवते प्राह कुञ्जरस् तु निषादवान्"[3] इति प्राप्प्यते। वाचस्पत्त्ये स्वरशब्दार्थे तु "षड्जं रौति मयूरो हि वृषो नर्दति चर्-षभम्। अजा विरौति गान्धारङ्ग क्रौञ्चो नर्दति मद्ध्यमम्। पुष्प-साधारणे काले कोकिलो रौति पञ्चमम्। अश्श्वश् च धैवतं रौति निषादं रौति कुञ्जरः" इति नारदवचनमुद्धृतम्, "अश्श्वस् तु धैवतं सोऽपि मत्तः पञ्चमसञ्ज्ञकम्। निषादन् तु गजो गर्जत्युन्मदोऽसौ सपञ्च-मम्" इति, "षड्जञ् च पञ्चमञ् चेति मयूरो वदति द्द्विधा। अश्श्वा-द्द्या धैवतादींश्च प्राहुर् मत्ताश् च पञ्चमम्" इति च भरतादिवचने उद्धृते ॥५०-५१॥

१६. व्यञ्जनस्वरविवेचनम्

स्वस्स्मात् पूर्वतत्र स्स्थितस्स्य परतत्रापि स्स्थितस्स्य वा।
यस्स्य स्स्वरस्स्य स्स्यादङ्गवँ् व्यञ्जनन् तत्स्वरम् भजेत् ॥५२॥

व्यञ्जनस्स्य कीदृश्यां स्थितौ स्वपूर्ववर्तिस्वराङ्गतत्वङ्ग कीदृश्-यां स्थितौ च स्वपरवर्तिस्वराङ्गतत्वमिति स्वरव्यञ्जनायोगवाहस्वभाव-निरूपणप्रसङ्गेऽक्क्षरनिरूपणेन प्प्रदर्शितम्। एवञ् च यद् व्यञ्जनम् उदात्ततत्वधर्मयुक्ताऽकारादिस्वरस्स्याऽङ्गन् तदुदात्तम्, अनुदात्ततत्व-धर्मयुक्ताऽकारादिस्वरस्स्याऽङ्गन् तदनुदात्तमित्यादिका व्यवस्स्था

---

१. या. शि. शि. व. वि., पृ. ५-६। २. १।५।३, ४।
३. श्लो. ९-१० (शि. स., पृ. ४६३-४६४)।

बोद्ध्या। तथा च ऋग्वेदप्रातिशाख्ये "(उदात्तादयस् स्वराः) अक्षराश्रयाः (उच्चार्यन्ते)"[1] इत्युक्त्वाऽयवँ विषयस् सूचितः। यद्द्यपि तद्व्याख्याने "स्वराणामक्षरैर् धर्मधर्मिसम्बन्धो न तु व्यञ्जनैः" इति भ्रमजनकवँ वाक्यमुव्वटेन प्रयुक्तन् तथापि सव्व्यञ्जना निर्व्यञ्जना वा ऽपि अकारादय उदात्ततत्वाद्द्याश्रया इति "सव्व्यञ्जनस् सानुस्स्वारश् शुद्धो वाऽपि स्वरोऽक्षरम्"[2] इति प्रातिशाख्यकारवचनेनैव सुखेन निश्चेतुं शक्यते। एवञ् च 'न तु व्यञ्जनैः' इति उव्वटवचनमनादरणीयम्, अथवा 'व्यञ्जनेषु अपि उदात्ततत्वादीना सत्त्वेऽपि न स्वतन्त्रेषु व्यञ्जनेषु स्वतन्त्रा उदात्ततत्वादयो धर्मा भवन्ति, किन् तु तत्तद्व्यञ्जनाङ्गकाऽकारादिस्स्वरेषु ये उदात्ततत्वादयो भवन्ति ते एव तेषुतेषु व्यञ्जनेष्वपि भवन्ति' इत्येव तस्याऽर्थस् स्वीकर्तव्यः। शुक्लयजुर्वेदप्रातिशाख्येऽपि "स्वरोऽक्षरम्, सहाऽऽद्द्यैर् व्व्यञ्जनैः, उत्तरैश्चाऽवसितैः, सयँ योगादिः पूर्व्वस्य यमश्च च, क्रमजश्व च, तस्मम्माच् चोत्तरं स्पर्शे, अवसितञ् च"[3] इति व्यञ्जनानाम् पूर्वाङ्गतायाऽपराङ्गतायाश्च व्यवस्थाम् प्रतिपाद्द्य प्रोक्तम् "व्यञ्जनं स्वरेण सस्स्वरम्"[4] इति। तैत्तिरीयप्रातिशाख्येऽपि "सव्व्यञ्जनोऽपि"[5] इति सूत्त्रेणायवँ विषयऽ प्रतिपादितः। ऋक्तन्त्रेऽपि "अक्षरम्"[6] इति प्रकृते एव "उदात्तमुत्"[7] इत्यादिकमुदात्तादिविवरणन् दत्तमिति तत्त्राऽपि एष एवाऽर्थस् स्वीकृतो बोद्ध्यः। "समानयमेऽक्षरमुच्चैरुदात्तन् नीचैरनुदात्तमाक्षिप्तं स्वरितम्"[8] इति वदताऽथर्ववेदप्रातिशाख्यकारेणाऽपि अयमेवार्थस् स्वीकृतो विज्ज्ञायते। पतञ्जलिमुनिरपि "बाढमर्थो यद्द्यते (उदात्ततत्वादयः) व्यञ्जनस्स्यापि गुणा लक्ष्यन्ते। ननु च प्रत्यक्षमुपलब्ध्यन्ते इषे त्वोर्ज्जेत्वा"[9] इति वदन् व्यञ्जनेष्वपि उदात्ततत्वादिधर्मयोगस्य प्रत्यक्षतयोपलब्ध्यत्वम् प्रतिपादयति। याज्ञवल्क्यशिक्षायान् च "स्वर उच्चस् स्वरो नीचस् स्वरस् स्वरित एव च। स्वरप्प्रधानन् त्रैस्स्वर्यवँ व्यञ्जनन् तेन सस्स्वरम्॥ मणिवद् व्यञ्जनान्न्याहुस् सूत्त्रवत् स्वर इष्यते। व्यञ्जनान्न्यनुवर्तन्ते यत्त्र तिष्ठति स स्स्वरः॥ उदात्तन् नाऽनुवर्त्तेत

---

१. ३।१, २। २. ऋ. प्रा. १८।३२। ३. १।९९–१०६। ४. १।१०७। ५. १।४३। ६. २।५।६ (४६)। ७. २।६।१ (५१)। ८. शौ. च. १।१४–१६। ९. पा. व्या. भा. १।२।२९–३०।

नीचन् न स्स्वरितन् तथा। विस्स्वरन् तवँ विजानीयाद् दीर्घह्रस्स्व-विवर्जितम्''[1] इति। वर्णरत्नप्रदीपिकायामपि याज्ञवल्क्यशिक्षाया अनुपदमुद्धृतेषु त्रिषु श्लोकेषु द्वौ पूर्वौ श्लोकौ समाविष्टौ दृश्येते[2]। सयँयुक्तव्यञ्जनस्वरविषये च याज्ञवल्क्यशिक्षायाम्— ''नैतत् स्वरन्ति पूर्वाङ्गे नाऽपराङ्गे कथञ्च न। न स्स्वरे न च मात्त्रायाङ्ग कथं स्वारो विधीयते ॥ पराङ्गस्स्य तु यत् पूर्वम् पूर्वाङ्गस्स्य तु यत् परम्। उभयोरर्धसयँयोगे स्वारङ्ग कुर्याद् विचक्षणः। सयँयोगे तु परं स्वार्यम् परं सयँयोगनायकम्। सयँयुक्तस्स्य तु वर्णस्स्य न स्स्वार्यम् पूर्वमक्षरम्। अवग्रहे पदच्छेद उदात्तो दृश्यते यदि। स्वरान्तं स्वरितम् प्राहुस् सन्धौ तु स्स्वार्यते परम्। स्वरसन्धिविधानेन नीचोच्चत्वँ विधीयते। व्यञ्जनाद् वा स्वराद् वाऽपि तत्सन्धौ स्वर उच्च्यते। ..... दुर्बलस्स्य यथा राष्ट्रं हरते बलवान् नृपः। एवँ व्यञ्जनमासाद्द्य अकारो हरति स्स्वरम्''[3] इति विचारः प्राप्यते। वर्णरत्नप्रदीपिकायाञ्च— ''यद् व्यञ्जनञ् च यस्स्याङ्गन् तत् तेन सस्स्वरम् भवेत्। एतदर्थमिदम् प्रोक्तं स्वारसन्देहभेदकम् ॥ अनुस्स्वारो विसर्गश् च नासिक्योऽथ यमास् तथा। जिह्वामूलमुपद्ध्मा च नवैते स्स्युः पराश्रयाः ॥ सयँयोगवाहा एवैते निजस्स्वरविवर्जिताः। पूर्वस्स्याङ्गम् भवन्त्येते स्वर एतेषु पूर्ववत्''[4] इति। नारदीयशिक्षायाञ्च— ''स्वर उच्चस् स्वरो नीचस् स्वरस् स्वरित एव च। व्यञ्जनान्न्यनुवर्तन्ते यत्तर तिष्ठति स स्स्वरः। स्वरप्प्रधानन् त्रैस्स्वर्यमाचार्याः प्रतिजानते। मणिवद् व्यञ्जनवँ विद्द्यात् सूत्तरवच् च स्स्वरवँ विदुः''[5] इति उपलब्ध्यते, किन् तु एतस्स्य शोभाकरेणाऽव्याख्यातत्त्वात् प्रकरणासङ्गतेश् च प्रक्षिप्तमिवैतद् भाति। माण्डूक्या शिक्षायामपि— ''स्वर उच्चस् स्वरो नीचस् स्वरस् स्वरित उच्च्यते। व्यञ्जनान्न्यनुवर्तन्ते यत्तराऽसौ तिष्ठति स्स्वरः। स्वर उच्चस् स्वरो नीचस् स्वरस् स्वरित एव तु। स्वरप्प्रधानन् त्रैस्स्वर्यमाहुरक्षरचिन्तकाः ॥ ..... दुर्बलस्स्य यथा राष्ट्रं हरते बलवान् नृपः। स्वरो व्यञ्जनमासाद्द्य हरते नाऽत्तर संशयः''[6] इति पट्ठ्यते। सयँयुक्तवर्णस्वरविषये

---

१. श्लो. ११८–११९ (शि. स., पृ. १९)। २. श्लो. ८६–८७ (शि. स., पृ. १२४)। ३. श्लो. १०५–१११ (शि. स., पृ. १७–१८)। ४. श्लो. ४९–५१ (शि. स., पृ. १२१)। ५. २।५।२–४। ६. श्लो. ६१–६४ (शि. स., पृ. ४६८)।

च— "सयँ योगस्य परं स्वार्यम् परं सयँ योगनायकम् । सयँ युक्तस्य तु वर्णस्य न स्स्वरम् पूर्वमिष्यते ।। स्वरणम् पतनञ् चैव वोत्थानेषु समेषु च । एकमेव पदे दृष्टन् न पूर्वाङ्गे क्वचिद् भवेत्"[1] इति च प्राप्यते ।।५२।।

नादानुस्स्वारयोऽ पूर्वस्स्वरहारित्त्वमिष्यते ।
तैत्तिरीयैऽ क्वचिद् विद्ध्यभावे न चरणान्तरे ।।५३।।

तथा हि व्यासशिक्क्षायाम्— "नादानुस्स्वारयोऽ पूर्वस् स्वरभागुच्चवत् स्थितः । स्वर्येतेऽस्मात् (अस्मात् ?) परावेव नादानुस्स्वारकावपि" इति 'अश्मन् । ऊर्ज्जम् ।' 'वायव्य७ं श्वेतम्' इत्यादौ नादाद् अनुस्स्वाराद् वा पूर्वत्तर स्स्थितस्य स्वरितस्य स्वरस्य अकारादेर् उदात्तीभावो नादस्याऽनुस्स्वारस्य च स्वरितीभावऽ प्रतिपादितः[2] । सर्वसम्मतशिक्क्षायाञ् च "नादानुस्स्वारयोऽ पूर्वस् स्वरस् स्वरितभाक् स्थितः । न ह्यय्याक्क्षेपस् स्वरे तत्तर नादेऽनुस्स्वार एव सः"[3] इति । चरणान्तरे तु एतादृशस्य विधेरभावेऽयवँ विशेषस् तत्तर नेष्यते । अतो नादानुस्स्वारयोरपि पूर्वस्स्वरस्वरभाक्त्वमेवान्न्यत्तर बोद्ध्यम् । एवञ् च शुक्लयजुर्वेदादौ प्रयोज्ज्यस्य ह्रस्स्वस्स्य दीर्घस्य वाऽप्यनुस्स्वारस्य पूर्वस्स्वरस्वरभाक्त्वमेवाऽवसीयते । तथा चोक्तवँ वर्णरत्नप्रदीपिकायाम्— "अनुस्स्वारो विसर्गश् च नासिक्क्योऽथ यमास् तथा । जिह्वामूलमुपद्ध्मा च नवैते स्स्युऽ पराश्शयाः ।। सयँ योगवाहा एवैते निजस्स्वरविवर्जिताः । पूर्वस्स्याऽङ्गम् भवन्त्येते स्वर एतेषु पूर्ववत्"[4] इति । ऋग्वेदसम्बद्धायाञ् जयन्तस्स्वामिप्रोक्तायां स्वराङ्कुशशिक्क्षायान् तु स्वरितात् परस्य नादस्य पृथक् स्वरो विहितो यथा— "स्व(ा)रात् परवँ व्यञ्जनयँ यत् पञ्चमेनाऽन्न्वितयँ यदि । पूर्वस्य स्वरतो नादो न पूर्वं स्वरते स्स्वरः । यत्तर स्स्व(ा)रात् परो नादऽ पूर्वस्स्वरितभाक् परः । तत्तराक्क्षेपो न कर्तव्यो नादे जङ्घे(ऽजङ्गे?)ऽपि तत्परे"[5] इति । यद्द्यपि "व्यञ्जनं स्वरितात् पूर्वम् पञ्चमेनाऽन्न्वितयँ यदि । स्वरितादुत्तरन् तस्मात् स्वार्यो नादस् त्वनन्तरः"[6] इति वचनङ् कात्त्यायनशिक्क्षायामपि प्राप्यते तथाऽपि तट्टीकाकारेण जयन्तस्स्वामिना एतत् परशाखापरत्त्वेन नीतम् प्रतीयते ।।५३।।

---

१. श्लो.११९–१२० (शि.स.,पृ. ४७३) । २. सू. ३१६–३१७। ३. श्लो. ५५ । ४. श्लो. ५०, ५१ (शि. स., पृ. १२१) । ५. श्लो. १८, १९ (शि. स., पृ. १६२) । ६. श्लो. ९(शि. स., पृ. ५०) ।

स्वारात् परवँ् व्यञ्जनञ् चेत् तदङ्गं सविरामकम् ।
अविरामोऽपि रेफस् तु ऋपरो धृतवत् क्वचित् ॥५४॥

तैत्तिरीयके स्वरितात् परन् तस्स्यैव स्वरितस्स्याऽङ्गत्वम् प्राप्तम् परवर्तिना विरामेण युक्तयँ् यत् किञ्चिदपि व्यञ्जनम् प्रचितवद् भवति; स्वरितात् परस् तस्स्यैव स्वरितस्स्याङ्गत्वम् प्राप्तꣳ परवर्तिना विरामेण युक्तस् तादृशेन विरामेण रहितोऽपि ऋकारपरकस् तु रेफꣳ प्रचितवद् भवतीत्यर्थः । तदुक्तवँ् व्यासशिक्षायाम्— "भक्तिस् स्वारात् तदङ्गानञ् धृतवदृपरे च रः"[1] इति ॥५४॥

स्वारात् परस्स्यास् तु स्वरभक्तेरपि स्वरꣳ पृथक् ।
धृतोऽथवोच्चो वा नीचस् स्वारो वा तैत्तिरीयके ॥५५॥

तथा हि व्यासशिक्षायाम् — "भक्तिस् स्वारात् तदङ्गानञ् धृतवदृपरे च रः । आयपूर्वोऽथ चोच्चस् स्याद् भक्तेर् नीचो ऽधू अधः । स्वारश् चारण्यके भक्तेरत्तर शीर्षं स्रपूर्वके । स्वर्यते चादितो ह्रस्स्वो दीर्घमद्ध्यन् तथैव च । सयँ्युतोर्ध्वे तु दीर्घश् चेदन्त्यस्स्वारो भवेत् तदा । ऋकारोत्तररेफोर्ध्वेऽवसाने दीर्घ एव च"[2] इति । अन्न्यत्तर तु स्वरभक्तेꣳ पूर्वाङ्गत्वे पूर्वस्स्वरस्स्वरेणैव सस्स्वरत्त्वम् पराङ्गत्वे परस्स्वरेणैव सस्स्वरत्त्वम् बोद्ध्यम् । स्वरभक्तेꣳ पूर्वाङ्गत्वपराङ्गत्वव्यवस्था च "स्वरभक्तिꣳ पूर्वभागक्षराङ्गम्"[3] इति ऋग्वेदप्रातिशाख्ये, "अनुस्स्वारस्स्वरभक्तिश् च (पूर्वस्स्याऽङ्गम्)"[4] इति तैत्तिरीयप्रातिशाख्ये, "पूर्वस्स्वरस्स्य सम्भाव्या स्वरभक्तिꣳ प्रकीर्त्यते"[5] इति शैशिरीयशिक्षायाम्, "स्वरभक्तिरसौ ज्ञेया पूर्वमाक्षरम्म्य पट्ठ्यते"[6] इति याज्ञवल्क्यशिक्षायाम्, "स्वरभक्तिश् च पूर्वाङ्गन् देवम् बर्हिरुदाहृतिः"[7] इति वरगरत्नप्रदीपिकायाम् । स्वरभक्तिस्स्वरोऽत्तर प्रसङ्गादुक्तो बोद्ध्यः । स्वरभक्तेꣳ पूर्वाङ्गत्वपराङ्गत्वयोर् विचारोऽप्यवशिष्टꣳ प्रसङ्गादत्तर प्प्रदर्शितो बोद्ध्यः ॥५५॥

१७. उदात्तादिस्स्वर-रूप-गुण-वर्ण-गोत्तर-च्छन्दो-देवतानिरूपणम्

स्वररूपादयो लोकबुद्ध्याऽग्राह्यया अपीह च ।
धर्माय प्प्रतिपाद्द्यन्ते शिष्टाचार्योपदेशतः ॥५६॥

---

१. सू. ३१८ । २. सू. ३१८–३२३ । ३. १।३२ ।
४. २१।६ । ५. श्लो. ५२ । ६. श्लो. १०२ (शि. स., पृ. १७) ।
७. श्लो. ५२ (शि. स., पृ. १२१) ।

वैदिकेषु शिक्षाग्रन्थेषु प्रतिपादितानां सर्वेषाँ लक्षणानाम् ज्ञानन् धर्मार्थमावश्यकमिति प्रतिपादितं हि व्यासशिक्षायाम्— "लक्षणेन विनाऽद्ध्याययँ यꣳ पठेदपि सर्वदा। नैव तत्फलमाप्नोति स विप्रस् सुजनोऽपि हि"[1] इति। "शास्त्रपूर्वके प्रयोगेऽभ्युदयस् तत् तुल्यवँ वेदशब्देन"[2] इति वदता पाणिनीयव्याकरणवार्तिककारेण, "यथा वेदशब्दा नियमपूर्वमधीताꣳ फलवन्तो भवन्ति, एवयँ यश् शास्त्रपूर्वकं शब्दान् प्रयुङ्क्ते सोऽभ्युदयेन युज्यते"[3] इति उक्तस्य वार्तिककार-वचनस्य व्याख्यात्तराऽपि षडङ्गलक्षणज्ञानस्याऽभ्युदयफलकत्वं सूचितम् प्रतिभाति ॥५६॥

(क) स्वररूपनिरूपणम्

अस्त्युदात्तस् स्वरश् शुक्लोऽनुदात्तो लोहितस् तथा।
स्वरितश् श्याम इत्याहुस् स्वररूपज्ञशिक्षकाः ॥५७॥

तथाहि शैशिरीयशिक्षायाम्— "शुक्लमुच्चवँ विजानीयान् नीचलँ लोहितमुच्यते। श्यामन् तु स्स्वरितवँ विद्द्याद्"[4] इति। एवमेव याज्ञ्य-वल्क्यशिक्षायामपि[5] ॥५७॥

पद्मपत्तरप्रभष् षड्ज ऋषभश् शुकपिञ्जरः।
कनकाभस् तु गान्धारो मद्ध्यमꣳ कुन्दसप्रभः ॥५८॥
पञ्चमस् तु भवेत् कृष्णः पीतवर्णस् तु धैवतः।
निषादस् सर्ववर्णाभ इत्येते स्स्वरवर्णकाः ॥५९॥

एतौ श्लोकौ माण्डूक्याश् शिक्षाया उद्धृतौ[6]। एवमेव नारदीय-शिक्षायामपि[7] ॥५८–५९॥

(ख) स्वरगुणनिरूपणम्

उदात्तस् सात्त्विकꣳ प्रोक्तस् स्वरितो राजसस् स्मृतः।
बुधैरुक्तौ तामसौ तु निहतप्रचितावुभौ ॥६०॥

तथा हि व्यासशिक्षायाम्— "उदात्तस् सात्त्विकꣳ प्रोक्तस् स्वरितो राजसस् स्मृतः। निहतप्रचितावेतौ तामसौ तु विदुर् बुधाः"[8] इति; पारिशिक्षायाम् च— "स्वारोचकौ राजससात्त्विकौ स्तो धृता-ऽनुदात्तावपि तामसौ (स्तः)"[9] इति ॥६०॥

---

१. सू. ५१५–५१६। २. पा. व्या. भा. (पस्पशाह्निके)।
३. तत्रैव। ४. श्लो. ६३। ५. श्लो. २ (शि.स., पृ. १)।
६. श्लो. १३–१४ (शि. स., पृ. ३६४)। ७. १।४।१, २।
८. सू. ४९३–४९४। ९. सू. ७२।

(ग) स्वरवर्णनिरूपणम्

उदात्तो ब्रह्मवर्णश् च क्षत्रवर्णोऽनुदात्तकः ।
स्वरितो वैश्यवर्णश् च प्रचितश् शूद्रवर्णकः ॥६१॥

तथा हि शैशिरीयशिक्षायाम्— "उदात्तम् ब्राह्मणवर्णं विद्याद् नीचञ्च क्षत्रियमुच्यते । वैश्यन् तु स्वरितवर्णं विद्यात्"[1] इति । एवमेव याज्ञवल्क्यशिक्षायामपि[2] । व्यासशिक्षायाञ् च— "ब्रह्मजातिर् भवेदुच्चः क्षत्रजातिस् तु नीचकः । वैश्यजातिर् भवेत् स्वारश् शूद्रस् तु प्रचयस् स्मृतः"[3] इति । पारिशिक्षायाञ् च— "नीचो विराड् ब्राह्मणजातिरुच्चस् स्वारस् तु वैश्यः प्रचयश् च शूद्रः"[4] इति ॥६१॥

उक्ताष् षड्जो मध्यमश् च पञ्चमो ब्राह्मणास् त्रयः ।
ऋषभो धैवतश् चाऽपि क्षत्रियौ कथितावुभौ ॥६२॥
गान्धारश् च निषादश् च अर्धवैश्यार्धशूद्रकौ ।
अर्धेन पतितत्वाद् धि निश्चित्योक्तौ मनीषिभिः ॥६३॥

तथाहि नारदीयशिक्षायाम्— "पञ्चमो मध्यमष् षड्ज इत्येते ब्राह्मणास् स्मृताः । ऋषभो धैवतश् चापीत्येतौ हि क्षत्रियावुभौ । गान्धारश् च निषादश् च वैश्यावर्धेन वै स्मृतौ । शूद्रत्वं विद्धि चाऽर्धेन पतितत्वान् न संशयः"[5] इति । "पञ्चमस्योत्कर्षाद् मध्यमषड्जयोश् च ग्रामत्वाद् ब्राह्मणत्वमुत्कर्षसामान्यात् । ऋषभधैवतयोश् च बलयोगात् क्षत्रियत्वम्, गान्धारस्य मध्यमादेवा(व)रोहाद् वैश्यता, निषादस्याऽवरोहाद् वैश्यत्वं शूद्रत्वञ् च प्रतिपाद्यते"[6] इति तद्व्याख्याने शोभाकरः प्राह ॥६२–६३॥

(घ) स्वरगोत्तरनिरूपणम्

उदात्त उक्तो गोत्तरेण भारद्वाजो मनीषिभिः ।
अनुदात्तो गौतमश् च स्वरितो गार्ग्य इत्यपि ॥६४॥

तथाहि शैशिरीयशिक्षायाम्— "उदात्तन् तु भरद्वसुः । नीचञ्च गौतममित्याहुर् गार्ग्यन् तु स्वरितवं विदुः"[7] इति । याज्ञवल्क्यशिक्षायामपि "भारद्वाजमुदात्तकम् । नीचञ्च गौतममित्याहुर् गार्ग्यञ् च स्वरितवं विदुः"[8] इति ॥६४॥

---

१. श्लो. ६४, ६५ । २. श्लो. ३, ४ (शि. स., पृ. १) ।
३. सू. ४९१, ४९२ । ४. सू. ७१ । ५. १।४।३, ४ ।
६. ना.शि.शो.व्या.१।४।३,४ । ७. श्लो.६५। ८. श्लो.४(शि.स.,पृ.१)।

(ङ) स्वरच्छन्दोनिरूपणम्

उदात्तस्य तु गायत्त्रम् त्रैष्टुभम् निहतस्य तु ।
जागतं स्वरितस्याऽस्ति च्छन्द इत्त्युदितम् बुधैः ॥६५॥

तथा हि शैशिरीयशिक्षायाम्— "विद्द्यादुदात्तङ गायत्त्रम् नीचम् त्रैष्टुभमुच्यते । जागतं स्वरितवँ विद्द्यादेतदेव नियोगतः"[1] इति । एवमेव याज्ज्ञवल्क्यशिक्षायामपि[2] ॥६५॥

गायत्त्र्युष्णिगनुष्टुप् च बृहती पङ्क्तिरेव च ।
त्रिष्टुप् च जगती षड्जादीनाञ् छन्दांस्यनुक्रमात् ॥६६॥[3]

एतच् च गायत्त्र्यादीनां षड्जादिभिस् स्वरैस् सह सम्बन्धम् प्रदर्शयता[4] पिङ्गलनागेनाऽपि सूचितमेव ॥६६॥

(च) स्वरदेवतानिरूपणम्

उक्तोऽग्निर् देवतोच्चस्य स्वरदैवतवेदिभिः ।
नीचस्य देवता सोमस् सविता स्वरितस्य तु ॥६७॥

तथा हि शैशिरीयशिक्षायाम्— "अग्निरुच्चस्य देवता । नीचे सोमवँ विजानीयात् स्वरिते सविता तथा"[5] इति । एवमेव याज्ज्ञवल्क्यशिक्षायामपि[6] । सर्वलक्षणमञ्जरीकारस् तु "उच्चस्य देवता भूमिर् नीचस्याऽग्निस् तु देवता। स्वारस्य देवता चन्द्रो धृतस्याऽर्कस् तु देवता"[7] इति कस्याश् चन शिक्षाया वचनम् प्रदर्शितवानस्ति । पारिशिक्षायामपि—"उच्चस्य भूमिर् निहतस्य चाऽग्निस् स्वारस्य चन्द्रः प्रचयस्य चाऽर्कः"[8] इति पठ्यते । एतानि वचनानि च शाखाभेदेन व्यवस्थाप्यानि प्रतीयन्ते। मुनिना शौनकेन तु "त्रयाणामितरेषान् तु लोकाधिपतयस् त्रयः"[9] इत्त्युक्तम् ॥६७॥

प्राजापत्त्यो वैश्वदेवो ब्राह्म्मो वा क्रुष्ट उच्च्यते ।
आदित्त्यः प्रथमः प्रोक्तो द्वितीयस् साद्ध्य एव च ॥६८॥
आग्नेयो वाऽऽश्विनो वाऽपि तृतीयोऽथ चतुर्थकः ।
वायव्यः पञ्चमस् सौरो मन्द्रस् सौम्यः प्रकीर्तितः ॥६९॥

---

१. श्लो. ६६ । २. श्लो. ५ (शि. स., पृ. १) ।
३. प्राचावँ वचनम् । ४. पि. छ. सू. ३।६४ । ५. श्लो. ६३,६४ ।
६. श्लो. २, ३ (शि. स., पृ. १) । ७. व्या. शि., पृ. १८३ ।
८. सू. ७१ । ९. बृ. दे. ८।१२१ ।

विकर्षेण तु मन्द्रस्स्य युक्तोऽतिस्स्वार्य उच्च्यते ।
स मैत्त्रावरुणो ज्ज्ञेयो मन्द्रस्स्थानसमाहितः ।।७०।।

तथाहि सामविधानब्राह्म्मणे— "क्रुष्टꣳ प्राजापत्त्यो ब्राह्म्मो वा वैश्श्वदेवो वाऽऽदित्त्यानाम् प्रथमस् साद्ध्यानान् द्वितीयोऽग्नेस् तृतीयो वायोश् चतुर्थस् सौमो मन्द्रो मित्त्रावरुणयोरतिस्स्वार्यः"[1] इति; बृहद्देवतायाञ् च— "वैश्श्वदेवस् स्वरꣳ क्रुष्टो नित्त्यय्ँ यो मूर्द्ध्नि तिष्ठति । तालव्यꣳ प्रथमस् साम्नां स्वर आदित्त्यदैवतः ।। स्वरो द्वितीयस् साद्ध्यानाम् भ्रुवोर् देशं समाश्श्रितः । चतुर्थस् त्वत्त्र वायव्यो नासिक्यस् स्वर उच्च्यते ।। पञ्चमस् तु स्स्वरꣳ प्रोक्तश् चाक्ष्णुषस् सूर्यदैवतः । यस् तु सामस्स्वरष् षष्ठस् स सौम्यो मन्द्र उच्च्यते ।। विकर्षेण तु मन्द्रस्स्य युक्तोऽतिस्स्वार्य उच्च्यते । स मैत्त्रावरुणो ज्ज्ञेयो मन्द्रस्स्थानसमाहितः"[2] इति ।।६८–७०।।

१८. त्ररैस्स्वर्यादिप्रयोग–तानप्प्रयोगविषयविवेचनम्

सद्द्रव्यत्त्यागयज्ज्ञान्तर–गते मन्त्रप्प्रयोगके ।
साम न्यूङ्खाञ् जपाँस्त् त्यक्त्वाऽन्न्यत्त्र तानो विधीयते ।।७१।
याजमानेषु मन्त्रेषु त्त्ररैस्स्वर्यं हीब्ष्यते बुधैः ।
उच्चैस्तरावँ वा वौषट् स्यादिति पाणिनिराह हि ।।७२।।
सुब्ब्रह्म्मण्याक्ख्यनिगदे न तानस् स्वरितस्स्य तु ।
उदात्तत्त्वम् भवेद् देव–ब्ब्रह्म्मणोस् त्वनुदात्तता ।।७३।।

द्रव्यत्यागरहिते ब्रह्म्मयज्ज्ञे तानꣳ प्रयोज्ज्य इति न विधिः । यथोक्तप्प्रकारके यज्ज्ञे प्रयुज्ज्यमानेषु अपि सामसु नैव तानः । न्यूङ्खा ऐतरेयब्राह्म्मणा[3]–ऽऽश्श्वलायनश्रौतसूत्त्रादिषु[4] विहिता अर्धर्च-द्द्वितीयस्वरस्स्थाने प्रयुक्ताष् षोडशाऽधिका वा ओकाराः, तेषु अपि नैव तानः । जपतीत्त्यादिशब्देन विहिते[5] 'धूरसि'[6] 'इन्द्रस्स्य बाहुरसि'[7] 'मयीदम्'[8] इत्त्यादीनाम् मन्त्राणाञ् जपे न तानः । एतद्भिन्नेषु उक्त-विधे द्रव्यत्त्यागयुक्ते यज्ज्ञे प्रयुज्ज्यमानेषु मन्त्रेषु तानो विधीयते । विष्णुक्क्रमणादिके याजमाने कर्मणि प्रयुज्ज्यमानेषु 'दिवि विष्णुः'[9] इत्-

---

१. १।१।५ । २. ८।११६–१२० । ३. २१।३ ।
४. ७।११।१–४ । ५. का.श्रौ.सू.२।३।२९, २।६।१३, ३।४।२१ इ. ।
६. मा. वा. शु. य. ब्र. य. म. सं. १।८ । ७. तत्त्रैव १२४ ।
८. तत्त्रैव २।१० । ९. तत्त्रैव २।२५ ।

त्यादिकेषु मन्त्रेषु, यजमानेन प्रयुज्यमानेषु वा मन्त्रेषु[1] तु प्रावचन एव स्वर इष्यते। वौषट् इत्यत्र तु तानो वा स्यादुच्चैस्तरत्ववँ वा। "सुब्रह्मण्यो३ सुब्रह्मण्यो३ सुब्रह्मण्यो३मिन्द्राऽऽगच्छ हरिव आगच्छ मेधातिथेर्मेष वृषणश्वस्य मेने। गौरावस्कन्दिन्नहल्यायै जार कौशिकब्राह्मण गौतमब्रुवाण पूषदत्तशर्मा कौण्डिन्न्यायनो यजते (माधवशर्मा कौण्डिन्न्यायनो यजते, शिवराजशर्मा कौण्डिन्न्यायनो यजते) ङमनाथशर्मणः कौण्डिन्न्यस्य पुत्रो यजते, गङ्गादेविदाया भारद्वाज्या पुत्रो यजते, लोकनाथशर्मणः कौण्डिन्न्यस्य पौत्रो यजते, यशोदादेविदाया घृतकौशिक्याः पौत्रो यजते, देवदत्तशर्मणः कौण्डिन्न्यस्य नप्ता यजते, पद्मादेविदायाः काश्यप्या नप्ता यजते, आमोदवर्धनशर्मणः कौण्डिन्न्यायनस्य पिता यजते, प्रियवँवदाम्बादेविदायाः कौण्डिन्न्यायन्याः पिता यजते, जनिष्यमाणानाम् पिता पितामहः प्रपितामहो यजते श्वस् सुत्यामागच्छ मघवन् देवा ब्रह्मण आगच्छताऽऽगच्छताऽऽगच्छत"[2] इत्यादिरूपे सुब्रह्मण्यानिगदे तानो न भवति; तत्र ओकार उदात्तो भवति, स्वरितस्य स्थानेऽपि उदात्तो भवति, आकार आख्याते परादिश् चोदात्तो भवति, वाक्यादौ च द्वेद्वे अक्षरे उदात्ते भवतो मघवन्वर्जम्, सुत्यापराणामन्त उदात्तो भवति; देवब्रह्मणोश् शब्दयोस् स्वरितस्य तु उदात्तो न भवति, अनुदात्तता भवतीत्येके। तत्र 'पूषदत्तशर्मा कौण्डिन्न्यायनो यजते' इत्यादौ प्रथमान्तस्य 'ङमनाथशर्मणः पुत्रो यजते' इत्यादौ षष्ठ्यन्तस्य चान्त एवोदात्तो भवति, 'ङमनाथशर्मणः कौण्डिन्न्यस्य' इत्यादौ स्यान्तस्य षष्ठ्यन्तस्य तु उपोत्तमम् चोदात्तम् भवति, 'यज्ञदत्तस्य पिता यजते' 'यज्ञदत्तदेवस्य पिता यजते' 'वसुगुप्तस्य पिता यजते' इत्यादौ प्रयोगे स्यान्तस्य नामधेयस्य तु उपोत्तमवँ विकल्पेनैव उदात्तम् भवति। एतद्विषये वचनानि च— "यज्ञकर्मण्यजपन्यूङ्खसामसु (एकश्श्रुति)"[3] इति, "उच्चैस्तरावँ वा वषट्कारः"[4] इति, "न सुब्रह्मण्यायां स्वरितस्य तूदात्तः, देवब्रह्मणोरनुदात्तः"[5] इति च

---

१. पाणिनिना जपेऽन्तर्भाविता एते इति प्रतीयते। २. मा. वा. श. ब्रा. ३।३।४।१८; का. श्रौ. सू. ७।९।१७; पा. व्या. भा. १।२।३७, वा. १-९; ला. श्रौ. सू. १।३।१-१०। ३. १।२।३४। ४. १।२।३५। ५. १।२।३७-३८।

अष्टाद्ध्याय्याम्; "सुब्ब्रह्मण्यायामोकार उदात्तः, आकार आक्ख्याते परादिश् च, वाक्क्यादौ च द्द्वेद्द्वे मघवन्वर्जम्, सुत्त्यापराणामन्तः, असावित्त्यन्तः, अमुष्ष्येत्त्यन्तः, स्यान्तस्स्योपोत्तमञ् च, वा नामधेयस्स्य"[1] इति पाणिनीयव्याकरणवार्तिके, "ता एकश्श्रुतिसन्ततमनुब्ब्रूयात्, उदात्तानुदात्तस्स्वरितानाम् परस् सन्निकर्ष ऐकश्श्रुत्त्यम्, ... एतेन शस्त्रयाज्ज्यानिगदानुवचनाभिष्टवनस्तवनानि (व्याक्ख्यातानि)"[2] इति आश्श्वलायनश्रौतसूत्रे; "मन्त्रे स्स्वरक्क्रिया यथाम्नातमविशेषात्, भाषिकस्स्वरो वोपपन्नमन्त्रोपदेशात्, तानो वा नित्त्यत्त्वात्,एकश्श्रुति दूरात्त्सम्बुद्धौ यज्ज्ञकर्म्मणि सुब्ब्रह्म्मण्या-साम–जप–न्यूङ्ख–याजमानवर्ज्जम्"[3] इति कात्त्यायनश्रौतसूत्रे । "वषट्कारोऽन्त्यस् सर्वत्त्रोच्चैस्तराम् बलीयान् याज्ज्यायाः"[4] इति च आश्श्वलायनश्रौतसूत्रे ॥७१-७३॥

ब्राह्म्मणोत्पन्नमन्त्रेषु प्रयोगे भाषिकस् स्वरः ।
अन्न्यमन्त्रेषु त्रैस्स्वर्यञ् चाऽत्त्र कैश् चिन् नियम्स्यते ॥७४॥

तथाहि जैमिनिः "भाषास्स्वरोपदेशादैरवत् प्रावचनप्रतिषेधस् स्यात्, मन्त्रोपदेशो वा न भाषिकस्स्य प्रायापत्तेर् भाषिकश्श्रुतिः, ... तन्न्यायत्त्वाददृष्टेऽप्ष्येवम्, तदुत्पत्तेर् वा प्रवचनलक्क्षणत्त्वाद्"[5] इति । तद्भाष्ष्ये शबरश् च— "भाषिकस्स्वरेण के चिन् मन्त्रा ब्राह्म्मणे उपदिष्टाः, मन्त्रसमाम्नाये त्रैस्स्वर्येण पठिताः, यथा इमामगृब्भ्णन्नित्त्यश्श्वमेधे । ... ... तेषु मन्त्रेषु प्रावचनस्स्य स्वरस्स्य प्रतिषेधस् स्यात् ... ... स्वरान्तरोपदेशाद्, यथा इरापदस्स्योपदेशात् कर्मकाले गिरापदस्स्य निवृत्तिः; (ब्राह्म्मणे) मन्त्रोपदेशोऽयन् न स्स्वरोपदेशः ... ... भाषास्वरो ब्राह्म्मणे प्रवृत्तः, तन्मद्ध्ये यदि प्रावचनेन पट्ठ्यते भाषिकस्स्वरसन्तानो विच्छिद्द्येत, तत्परिहारार्थम् भाषिकेणोपदेशः, तस्मान् न भाषिकस्स्वरोपदेशः; ... ... यो मन्त्रो मन्त्रसमाम्नाये त्रैस्स्वर्येण दृष्टस् तस्स्य तथैव प्रयोगः, यस् तु तत्त्र न दृष्टो ब्राह्म्मणेन च भाषिकेणोपदिष्टः, यथा 'तवँ वै प्रोहेद्द्वानस्प्पत्त्योऽसि' इति, तत्र का प्रतिपत्तिः, उच्च्यते तन्न्यायत्त्वाद् ... ... अदृष्टोऽपि मन्त्रोपदेश एव न भाषिकोपदेशः, तस्मात् तस्स्याऽपि प्रावचनेनैव स्स्वरेण प्रयोगः । ... ... ब्राह्म्मणोत्पत्तेर् मन्त्रस्स्य भाषिकेण प्रयोगस्

---

१. पा. व्या. भा. १।२।३७, वा. १–९ । २. १।२ ।
३. १।८।१६–१९ । ४. १।५ । ५. ध.मी.सू. १२।३।२०–२४ ।

स्यात्, प्रवचनलक्क्षणत्त्वात्, प्रवचनम् मन्त्राणाल्ँ लक्क्षणम्, यथा प्रोच्च्यन्ते तथाविधा विज्ज्ञायन्ते। ते च भाषिके एव उत्पन्नाः, तेषाम् अन्न्यथाविधत्त्वे प्रमाणन् नाऽस्ति, तस्मात् यथोत्पन्नास् तथाविधा एव प्प्रयोक्तव्याः" इति; तत्र "ये तावन् मन्त्रा लिङ्गेन विनियुज्ज्यन्ते, ते यादृशा एव निर्ज्ज्ञातास् तादृशा एव प्प्रयोक्तव्याः" इति वदता टुप्टीकाकारेण भाष्ष्यविपरीतार्थमप्प्रतिपादयता कुमारिलभट्टेनाऽपि मन्त्रसमाम्नाये त्रैस्स्वर्य्येण पठितानाम् मन्त्राणान् त्रैस्स्वर्य्येणैव प्प्रयोगस् समर्थित एव। किन् तु नवमेऽद्ध्याये द्वितीये पादेऽष्टमेऽधिकरणे तृतीये वर्णके "तस्मात् तानेन प्प्रयोगꣳ कर्तव्यः। अथ त्रैस्स्वर्यादीनाङ् किमर्थं समाम्नानमिति। उच्च्यते। अर्थावबोधार्थम् भविष्ष्यति" इति निर्णयम् प्रदर्शयताऽपि शबरेण "यो मन्त्रो मन्त्रसमाम्नाये त्रैस्स्वर्य्येण दृष्टस् तस्स्य तथैव प्प्रयोगः"[1] इति कथमुक्तमिति धर्ममीमांसकैर् भृशन् चिन्तनीयम्। भट्टकुमारिलेन तु "तेनाऽदृष्टार्थ एवाऽयं स्वरपाठोऽवगम्म्यते। सर्वदा ब्रह्म्मयज्ज्ञाङ्गद्द्रव्ययज्ज्ञजपेषु च"[2] इति च वदता शबरस्स्य वदतोव्याघाते मौनमवलम्बमानेनाऽपि द्रव्व्ययज्ज्ञेऽपि मन्त्रेषु त्रैस्स्वर्य्यप्प्रयोगस् समर्थित एव प्प्रतीयते। एवमेव "कर्मस्स्वेकश्श्रुतिर् मन्त्रे" इति "त्रैस्स्वर्याद्द्यविकल्पस् स्याद्" इति वा नवमस्य द्वितीये पादेऽष्टमेऽधिकरणे तृतीयवँ वर्णकं स्वीकृत्त्याऽपि "स्यादेवायम् ब्राह्म्मणोत्पन्नमन्त्रे"[3] इति भाषिकस्स्वरप्प्रयोगं स्वीकुर्वाणस्स्य मण्डनमिश्श्रस्स्यापि सन्दर्भशुद्धिमन्दत्त्वमेव प्प्रतीयते। एवमेव पार्थसारथि–सायणादीनामपि। अस्मन्मते तु नवमस्स्य द्वितीये पादेऽष्टमेऽधिकरणे शबरप्प्रदर्शितन् तृतीयवँ वर्णकं हेयं सूत्त्रार्थाननुगुणत्त्वात्, "यो ह्यु त्सूत्त्रङ् कथयेन् नादो गृह्य्येत" इति न्न्यायात्, प्रकरणासङ्गतेश् चेति दिक्। 'प्रहीणस् स्वरवर्णाब्भ्यायँ यो विमन्त्रꣳ प्रयुज्ज्यते। यज्ज्ञेषु यजमानस्स्य रुषत्त्यायुꣳ प्रजाम् पशून्'[4] इति सार्ववैदिकस्वरप्रकरणस्स्थन् नारदवचनमपि अनेकश्श्रुतिपक्क्षस्स्यैवानुकूलम्। त्वष्टुरुपाक्ख्यानमपि[5] एतस्स्यैव पक्क्षस्स्य समर्थकम् ॥७४॥

---

१. ध. मी. सू. भा. १२।३।२३। २. त. वा. व्याकरणाधिकरणे, पृ. २०२। ३. मी. अनु. १२।३।२४, २५। ४. ना. शि. १।१।६। ५. तै. सं. २।५।२; मा. वा. श. ब्रा. १।६।३।८।

प्रयोगेऽप्यत्र तानेन ऋङ्मन्त्राणाय् यजुष्षु तु ।
स्वरꣳ प्रावचनꣳ कैश् चिद् विकल्पेनाऽनुमन्यते ॥७५॥

तथा हि शुक्लयजुर्वेदप्रातिशाख्ये— "प्रावचनो वा यजुषि"[1] इति । तद्भाष्ये च— "प्रवचनशब्देनार्षपाठ उच्यते । तत्र भवस् स्वरꣳ प्रावचनः, स च यजुषि भवति । स च त्रैस्स्वर्यलक्षण एव । वा तान इति विकल्पः"[2] इति । एतत् सूत्रम् भाष्यञ् च "एकम्, सामजपन्यूङ्खवर्जम्"[3] इति पूर्वसूत्रतद्भाष्यस्स्वरसाद् यज्ञकर्मविषयमेवेत्यवसातुं सुशकम् । केचित् तु पाणिनीयसूत्रेऽपि जपशब्देन उपांशुप्रयोगस्य वाच्यतया यजुषाञ् चोपांशुप्रयोज्यतया पाणिनीयसूत्रेणाऽपि यजुषायँ यज्ञेऽपि त्रैस्स्वर्यं साधयन्ति[4] । यजुषि त्रैस्स्वर्यस्य पक्षः पूर्वोक्तात् त्वष्टृपाख्यानादपि समर्थयितुं शक्यः ॥७५॥

पुराणप्रोक्तयज्ञेऽपि मन्त्रास् तु यदि वैदिकाः ।
प्रयुज्यन्ते तदा तेषु तानो न्याय्यꣳ प्रतीयते ॥७६॥

एकत्र यश् शास्त्रार्थो निर्णीतस् स एवाऽन्यत्राऽपि तत्तुल्यस्स्थले इति शिष्टानां सिद्धान्तादयमर्थोऽस्माभिरेवम् प्रतिपादितो बोद्धव्यः । अन्ये तु "यजतिचोदनाचोदितानामेव यज्ञशब्देन ग्रहणम्" मत्वा "स्मार्तस्स्थालीपाकोपाकर्मादिप्रयोगेष्वपि नैकश्श्रुत्यम्" इति मन्यन्ते[5] ॥७६॥

ब्रह्ममयज्ञादौ च वेदे तानो वेति च के चन ।
व्यवस्थितो विकल्पोऽयमित्याहुरपरे बुधाः ॥७७॥

तथा हि "विभाषाच्छन्दसि"[6] इति पाणिनिसूत्रम् । तद्वृत्तिश्च "छन्दसि विषये विभाषा एकश्श्रुतिर् भवति, पक्षान्तरे त्रैस्स्वर्यमेव भवति । वेति प्रकृते विभाषाग्रहणयँ यज्ञकर्मणि इत्यस्य निवृत्त्यर्थम् । तेनाऽयं स्वाध्यायकालेऽपि पाक्षिक एकश्श्रुत्यविधिर् भवति । इषेत्त्वोर्ज्जे त्वा, इषेत्त्वोर्ज्जे त्वा । अग्गँन आयाहि वीतये, अग्गँन आयाहि वीतये । अग्गँनिमीडे पुरोहितम्, अग्गँनिमीडे पुरोहितम् । शन्नो देवीरभिष्टये, शन्नो देवीरभिष्टये । व्यवस्थितविकल्पोऽयमिति केचित् । व्यवस्था च वेदे मन्त्रदले नित्यन् त्रैस्स्वर्यम्,

---

१. १।१३२ । २. शु. य. वे. प्रा. उ. भा. १।१३२ ।
३. शु. य. वे. प्रा. १।१३०, १३१ । ४. स्वरप्रक्रियाटीकायाम्, पृ. १७६ । ५. ल. श. शे. १।२।३४ । ६. अष्टा. १।२।३६ ।

ब्राह्मणदले नित्यमेकश्रुत्यमिति''[1] इति । भट्टोजिदीक्षितोऽपि उक्तसूत्रव्याख्याने ''व्यवस्थितविभाषेयम्''[2] इत्येव वदति । नागोजिभट्टस् तु ''व्यवस्थितविभाषात्वमस्य च्छन्दसि स्वीकृतञ्च कैश् चित्, तन् न युक्तम्, शाच्छोरिति सूत्रे भाष्ये परिगणितव्यवस्थितविभाषाष्वपाठात् । तत्र हि 'देवत्रातो गलो ग्राह इति योगे च सद्विधिः । मिथस् ते न विभाष्यन्ते गवाक्क्षस् संशितव्रतः' इत्युक्तम् । अत एव केषु चिद् देशेषु स्वाध्यायकाले सर्ववेदानामेकश्रुत्येन पाठो दृश्यते । न चैवञ् छन्दोग्रहणवैयर्थ्यम्, छन्दसि त्रैस्स्वर्ये धर्माऽधिक्यम्, लोके तु समतेत्येतदर्थन् तत्सत्त्वात् । त्वयाऽपि च्छन्दोग्रहणसामर्थ्याद् भाषापेक्षया वैलक्षण्यञ्च कल्प्यवं व्यवस्थितविभाषात्वेन, मया त्वेवमिति विशेषाऽभावात् । न हि च्छन्दसीत्यनेन त्वदुक्तोऽर्थोऽपि वाच्यवृत्त्या लभ्यते । 'एकश्रुतिस् स्वरसर्वनाम' इति भाष्येणाऽपि एवम्बोधनाच् च । यथा सर्वनामशब्दास् तदादयस् सर्वपदस्थाने प्रयुज्यन्ते, एवं सर्वस्वरस्थाने एकश्रुतिः प्रयोक्तव्येति तदर्थः । अनेन स्पष्टमेव त्रैस्स्वर्यैकश्रुत्योरैच्छिकविकल्पविषयतोक्ता। वृत्तिकारोऽपि च्छन्दसि ऐच्छिकमेवैकश्रुत्यमाह । इदानीञ्च केषाञ् चिद् धर्माऽधिक्याय त्रैस्स्वर्येण पाठः, परम्परासम्प्रदायेनाऽन्न्येषामेकश्रुत्येनेति सम्प्रदायश्रद्धाजाड्ड्येन तु ते नाऽन्न्यथा पठन्ति । नैतावता विकल्पस्यैच्छिकत्वभङ्गः''[3] इति मन्न्यते स्म । वयन् तु ''कठकालापवृत्तेषु तैत्तिरीयाह्वरकेषु च । ऋग्वेदे सामवेदे च वक्तव्यः प्रथमस् स्वरः।।ऋग्वेदस् तु द्द्वितीयेन तृतीयेन च वर्तते । उच्चमद्ध्यमसञ्घातस्स्वरो भवति पार्थिवः ।। तृतीय-प्रथम-क्करुष्टान् कुर्वन्त्याह्वरकास् स्वरान् । द्वितीयाद्द्वांस्तु मन्द्रान्ता स्तैत्तिरीयाश् चतुरस् स्वरान् ।। प्रथमश् च द्द्वितीयश् च तृतीयोऽथ चतुर्थकः । मन्द्रः क्करुष्टो ह्यतिस्स्वार एतान् कुर्वन्ति सामगाः ।। द्वितीय-प्रथमावेतौ ताण्डिभाल्लविनां स्वरौ । तथा शातपथावेतौ स्वरौ वाजसनेयिनाम् ।। एते विशेषतः प्रोक्तास् स्वरा वै सार्ववैदिकाः । इत्येतच् चरितं सर्वं स्वराणां सार्ववैदिकम्''[4] इति नारदीयशिक्षावचनानि; ''शतपथवत् ताण्डिभाल्लविनाम् ब्राह्मणस्स्वरः । सप्त साम्नाम् ।

---

१. काशिकायाम् १।२।३६। २. वै. सि. कौ. साधारणस्स्वरप्रकरणे । ३. ल. श.शे. वै. सि.कौ.सा.स्व.प्र. हया, १।२।३६ । ४. १।१।९-१४ ।

... ... मन्त्रस्स्वरवद्द्ब्राह्मणस्स्वरश्च चरकाणाम्; तेषाञ्च खाण्डिकेयौखेयानाञ् चातुस्स्वर्य्यमपि क्वचित्, तानोऽन्येषाम् ब्राह्मणस्स्वरः''[1] इति भाषिकसूत्रवचनानि, ''छन्दोगा बह्वृचाश् चैव तथा वाजसनेयिनः। उच्चनीचस्स्वरम् प्राहुस् स वै भाषिक उच्च्यते''[2] इति शबरवचनञ् च परिशीलयमानाश् छन्दसि प्रवचने, ब्रह्ममयज्ञे, ग्रहणधारणाद्ध्ययने च एकश्श्रुत्यस्स्य व्यवस्थितमेव विकल्पं रोचयामहे। यदि पाणिनीये व्याकरणे इयवँ व्यवस्था 'विभाषाच्छन्दसि' इति सूत्रेण न सिद्ध्यति तर्हि ''व्यत्ययो बहुलम्''[3] इति सूत्रेण साधनीया ॥७७॥

ऊहमन्त्रेषु तानं हि यज्ज्ञकर्मणि के चन।
मन्न्यन्ते योज्ज्यमपरे त्रैस्स्वर्यं हि नियोगतः ॥७८॥

तथा हि ''विभाषाच्छन्दसि''[4] इति सूत्रस्स्यवृत्तेर् व्याकुर्वाणे हरदत्तः ''ननु यद्द्ययँ योगो यज्ज्ञकर्मणि स्स्यात् पूर्वो योगो निर्विषयस् स्यात्। न च जपन्यूङखसामानि अस्स्य विषयः, जपादिव्यतिरिक्तस् तु पूर्वस्स्य विषय इति व्यवस्था, तथा हि सति अत्त्रैव जपादिग्रहणञ्च कर्तव्यं स्यात्, किञ् छन्दोग्रहणेन ? छन्दोग्रहणात् तु छन्दोमात्त्रेऽयवँ विकल्प इति गम्यते, ततश् च यज्ज्ञकर्मणीत्यस्स्याऽनुवृत्तौ पूर्वो नित्यो विधिर् निर्विषयस् स्यात्; एवम् मन्न्यते–ऊहमन्त्राणामच्छन्दस्त्वात् ते पूर्वयोगस्स्य विषया इति च्छन्दोरूपेषु मन्त्रेष्वयमेव विकल्पस् स्यादिति। यद्द्यूहमन्त्रेषु सावकाशः पूर्वो योगस् तदा यज्ज्ञकर्मणीत्यस्स्य विभाषाग्रहणेन निवृत्तावपि छन्दोरूपेष्वनूहितेषु मन्त्रेषु परत्वादयमेव विकल्पः प्राप्नोति; नैष दोषः, यज्ज्ञकर्मणीत्यत्र कर्मग्रहणयँ यज्ज्ञानुष्ठानमात्त्रे सर्वत्र नित्यो विधिर् यथा स्यादित्येवमर्थम्। यद्द्यप्यूह्यमाना मन्त्रा न भवन्ति तथाप्यमन्त्राणामेव तेषायँ यज्ज्ञकर्मणि प्रयुज्यमानानाम् पूर्वयोगस्स्य विषयत्वम् भवत्येव''[5] इत्युक्त्वा ऊहमन्त्रेषु तानम् प्रयोज्ज्यमाह। नागोजिभट्टस् तु ''जपादिपर्युदासान् मन्त्रेष्वेवैषा एकश्श्रुतिर् नोहादिषु, तेषाममन्त्रत्वात्। तत्त्र सम्पूर्णो य ऊहितस् तस्स्यैवाऽतत्त्वम्, यत् किञ्चिदूहितपदघटिते तु मन्त्रत्वमेव, तन्मद्ध्य-

---

१. ३।१५–२८।
२. ध. मी. सू. भा. १२।३।२०।
३. अष्टा. ३।१।८५।
४. काशिकायाम् १।२।३६।
५. पदमञ्जर्याम् १।२।३६।

पतितन्न्यायाद्''[1] इति, 'अत एव इन्द्रशत्रुर् वर्धस्स्वेत्यत्र समासान्तोदात्तत्वे कर्तव्ये पूर्वपदप्रकृतिस्स्वरत्वम् प्रयुक्तमिति शतपथब्राह्मणतद्भाष्याद्द्द्युक्तं सङ्गच्छते। एवं हि तद् ब्राह्मणम्— 'अथ यदब्रवीदिन्द्रशत्रुर्वर्द्धस्स्वेति तस्मादु हैनमिन्द्र एव जघानाथ यद्ध शश्वदवक्ष्यदिन्द्रस्य शत्रुर्वर्द्धस्स्वेति शश्वदु ह स एवेन्द्रमहनिष्यत्'[2] इति। आद्द्यऽनुकरणम् पूर्वपदप्रकृतिस्स्वरविशिष्टस्य, अन्त्ये त्वेतदर्थकमन्तोदात्तम् (?)। यद्द्यवक्ष्यदिति तद्भाष्यम्। अत एव महाभाष्ये 'मन्त्रो हीनः' इति (नारदीयशिक्षादौ) पठितोऽपि श्लोको 'दुष्टश् शब्दः' इति पठितः। एवञ् च 'इषेत्त्वा' इत्यादियजुर्मन्त्रेषु शाखाच्छेदनादिकरणेषु एकश्रुतिरेव भवति। एतेन 'पर्युदासेऽपि यज्ञाङ्गशब्दत्वेन सादृश्यम्, एवञ्चोहविषये चरितार्थस्स्याऽस्स्य मन्त्रेषु परत्वाद् विभाषाच्छन्दसि इत्यनेन बाधः, सा च व्यवस्थितविभाषा, अतो नाऽतिप्रसङ्गः, अत एव बह्वृचानां संहितायान् त्रैस्स्वर्यम्, ब्राह्मणे एकश्रुत्यम्, तैत्तिरीयाणामुभयत्रापि त्रैस्स्वर्यमिति व्यवस्था सङ्गच्छते, एवञ् च हौत्रमन्त्रेष्वेकश्रुतिरेव, इषेत्त्वेत्यादौ यजुषि त्रैस्स्वर्यमेव; अत एव सकलदेशीयशिष्टाऽऽचारविरोधोऽपि न' इति परास्तम्। ऊहेषु चरितार्थस्स्याऽस्स्य मन्त्रेषु बाध उत मन्त्रेषु चरितार्थस्स्याऽच्छन्दसि विभाषेत्यनेन ऊहेषु बाध इत्यत्र विनिगमनाविरहेणाऽस्स्य विभाषाच्छन्दसीत्येतदपवादकताया एव युक्तत्वाच् च। अत एव कात्त्यायनेन ''मन्त्रे स्स्वरक्रिया यथाम्नातमविशेषाद्'' इति पूर्वपक्षे ''तानो वा नित्त्यत्वात्, स्मर्यते चैवम्— एकश्रुति दूरात्सम्बुद्धौ, यज्ञकर्मणि सुब्रह्मण्या-साम-जप-न्यूङ्ख-याजमानवर्जम्'' इत्युक्तम्। अत्र वा-शब्दः पक्षव्यावृत्तौ, तान एवेत्यर्थः। तान एकश्रुतिरिति तद्भाष्यकृतः। यत् तु सूत्रस्थवँ वाशब्दवँ विकल्पार्थमाहुस् तेषान् नित्त्यत्वादिति-वाक्यशेषविरोधः। तस्माद् यजुष्यप्येकश्रुतिरेव। अत्र सूत्रे जपादिग्रहणयँ याजमानमन्त्राणामप्युपलक्षणङ् कात्त्यायनसूत्रस्स्वरसात्। वस्तुतः कात्त्यायनप्रातिशाख्ये ''तानलक्षणमेकं स्वरमाहुर् यज्ञकर्मणि सामजपन्यूङ्खवर्जम् प्रावचनो वा यजुषि'' इत्युक्तेर् यजुषि त्रैस्स्वर्यमपि; तत्र प्रवचन-

---

१. लं.श.शे., वै.सि.कौ.व्या. साधारणस्वरप्रकरणे सू. १।२।३४।

२. मा. वा. श. ब्रा. १।६।३।१०।

शब्देन पाठ उच्च्यते, तत्र भवो वा स्स्वरो यजुषि यज्ञकर्मणि त्रैस्स्वर्यलक्षण इति तद्भाष्यकृतः; यद्द्यपि तत् समाख्याबलात् तच्छाखीयानामेव, तथापि अविरुद्धत्वात् सर्वशाखाम् प्रत्येकञ्च कर्मेति न्यायाच् च अन्येषामपि त्रैस्स्वर्यम्; परन् तु प्रागुक्तकल्पसूत्र-पाणिनिसूत्र-तद्भाष्यादिपर्यालोचनया एकश्श्रुतौ धर्माऽधिक्यम् बोद्धव्यम्''[1] इति च ऊहभिन्ने मन्त्रे एकश्श्रुतेऽ प्रयोगस्य यज्ञे साधीयस्त्वस्य समर्थनाय प्रयतमान ऊहे त्रैस्स्वर्यमेव प्रयोज्यमिति प्रतिपादयति। वयन् तु ऊहस्याऽपि मन्त्रप्रतिनिधित्वान् मन्त्रस्थानीयत्वाद् वा, कात्यायनश्रौतसूत्रादिषु ऊहस्य विषये पृथग् व्यवस्थाया अदृश्यमानत्वात् पाणिनीयसूत्रेऽपि यज्ञकर्मणीति कर्मग्रहणेन यज्ञानुष्ठानमात्रस्य विवक्षितताया प्रतीतेश् च छन्दोमन्त्राणाँ या गतिस् सैवोहस्याऽपीति व्यवस्थायाँ युक्ततराम् मन्यामहे ॥७८॥

वेदाङ्गोपाङ्गकानान् तु तान एव स्स्वरो भवेत् ।
इति भाषिकसूत्रे च मुनिऽ कात्यायनोऽब्रवीत् ॥७९॥

तथाहि ''तान एवाङ्गोपाङ्गानामिति''[2] इति। तत्र च 'शिक्षा कल्पो व्याकरणन् निरुक्तञ् च ततऽ परम्। छन्दश्शास्त्रञ् ज्योतिषञ् च वेदाङ्गानि विदुर् बुधाः'[3]। तत्र **शिक्षा** नाम वर्ण-स्वर-मात्रा-बल-साम-सन्तानादिप्रतिपादकं शास्त्रम्। **कल्पो** नाम चरणान्तरस्थोपसंहरणीयगुणोपसंहारपूर्वकवँ वैदिकानुष्ठानक्रमविशेषादिकस्य ब्राह्मणविधिवाक्यानुसरणेन कल्पकं शास्त्रम्। स्मार्त-धर्मकल्पशास्त्रमपि तच्छेषभूतमेव। **व्याकरणन्** नाम वाक्यतदर्थसम्बन्धज्ञानस्य स्फुटप्रकृतिप्रत्ययादिकल्पनपूर्वकैऽ पदतदर्थसम्बन्धज्ञापनाऽऽदिभिरुपकारकं शास्त्रम्। **निरुक्तन्** नाम व्याकरणेन व्याकर्तुमशक्यस्य पदतदर्थसम्बन्धस्य निरूपणाय सिद्धान्तनियमानाम् प्रतिपादकन् तेषाम् प्रयोगाणाम् प्रदर्शकन् देवताविशेषपदपदार्थसम्बन्धस्य निरूपकन् देवविद्द्यारूपञ् च शास्त्रम्। **छन्दश्शास्त्रञ्** छन्दो वा नाम पाट्ठ्यवस्तुगतस्वरपरिमाणावच्छेदविशेषनियमबोधकं शास्त्रम्। **ज्योतिषन्** नाम सूर्यादीनाञ् ज्योतिषाञ् गतेर् विज्ञानेन कालानुपूर्वयज्ञानुविधानज्ञानस्य साधनं शास्त्रम्। वेदस्योपाङ्गानि च— ''प्रतिपद-

---

१. ल.श.शे.वै.सि.कौ.व्या.साधारणस्वरप्रकरणे १।२।३४। २. भा.सू.३।२९।
३. द्र.-मु.उ.१।१।५; प्रा.ध.सू.२।४।१।११; चरणव्यूहे २।१।

मनुपदम् छन्दोभाषा धर्मो मीमांसान्यायस् तर्क इत्त्युपाङ्गानि"[1] इति चरणव्यूहे प्रोक्तानि। तानि एव "प्रतिपदम् चाऽनुपदम् छन्दोभाषासमन्वितम्। मीमांसान्न्यायतर्कांश्च उपाङ्गानि विदुर् बुधाः"[2] इति सोमयार्येण श्लोकेनोक्तानि। उक्तचरणव्यूहवाक्यविवरणे महीदासेन यत् "प्रतिपदमनुपदम् प्रतिपदे अनुपदम् अल्पपदङ्ग कर्तव्यमित्त्यर्थः। छन्दश् छन्दोरत्नाकरादि। भाषा शब्दपरिभाषा। धर्मो धर्मशास्त्रम् मिताक्षरादि। मीमांसा प्रसिद्धा। न्यायस् तर्को न्यायशब्देन काणादसूत्त्रम्, तर्कशब्देन गौतमसूत्त्रम् इति षडुपाङ्गानि"[3] इति उक्तन् तत् प्रायेण मूलोक्तपदार्थाऽप्प्रमापकमेव दृश्यते। गोत्त्रचरणपृच्छाप्रतिज्ञासूत्त्रे एकत्रिंश्याङ्ग कण्डिकायामपि "प्रतिपदमनुपदम् छन्दोभाषा धर्मो मीमांसान्यायस् तर्क इत्त्युपाङ्गानि भवन्ति" इति पट्ठ्यते। तद्विवरणम् च शुक्लयजुर्विधानसूत्त्रे पारायणबन्धसम्ज्ञके चतुर्थे परिच्छेदे[4] अण्णाशास्त्रिमहाशयेन "प्रतिपदङ्ग कात्त्यायनप्प्रणीतम् औद्गातृसूत्त्रम्, अनुपदङ्ग कात्त्यायनप्रणीतम् औद्गातृसूत्त्रम् (हौत्त्रसूत्त्रम् ?)" इत्त्यादिना यत् कृतन् तदपि महीदासविवरणतुल्यसारम् प्रतीयते। तेनैव स्वतन्त्रकातीयसूत्त्रतया उल्लिखितेषु पञ्चदशसु सूत्त्रेषु अष्टमे नवमे च स्स्थाने उल्लिखितयोः[5] प्रतिपदसूत्त्राऽनुपदसूत्त्रयोः[5] प्रकृतौ सम्म्यग् ज्ञातायामुक्तेषु उपाङ्गेषु प्रथमयोर् द्वयोस् स्वरूपे स्फुटे स्याताम्। वयन् तु **प्रतिपदम्** इति पदपाठसम्बद्धं सामवेदसप्तलक्षणादिकम्, **अनुपदम्** इति क्रमपाठसम्बद्धमुपलेखसूत्त्रादिकम्, **छन्दोभाषा** इति वेदवाक्यप्रातिस्स्विकव्याक्ख्यारूपवँ वेदभाषाभाष्यम्, **धर्म** इति दृष्टादृष्टार्थपरस्मृतिशास्त्रम्, **मीमांसान्न्याय** इति वेदवाक्यतात्पर्यनिर्णयन्यायप्प्रदर्शकन् धर्ममीमांसा-ब्रह्ममीमांसाशास्त्रम्, **तर्क** इति च पदार्थविशेषसम्भावनाऽसम्भावनाप्प्रदर्शनपरं साङ्ख्य-योग-वैशेषिक-न्याय-लोकायतशास्त्ररूपवँ विचारशास्त्रं स्वीकर्तुं शक्क्यत इति सम्भावयामः[6]। अन्न्यत्त्र तु "अथ चत्त्वार्य्युपाङ्गानि वेदानां सम्प्रचक्क्षते। धर्मशास्त्रम् पुराणम् च मीमांसा न्यायविस्तरः"[7] इति चत्त्वारि एवोपाङ्गानि गणितानि दृश्यन्ते। "पुराण-न्न्याय-मीमांसा-धर्मशास्त्रा-ऽङ्गमिश्रिताः। वेदास् स्थानानि

---

१. २।१ (पृ. ३२)। २. तै. प्रा. त्रिभा. र. २४।६।
३. २।१ (पृ. ३९)। ४. पृ. ६३०। ५. पृ. ६३२।
६. सीतोपनिषदि(६)दशोपाङ्गान्न्युक्तानि। ७. निबन्धादर्शे, पृ. ११९।

विद्द्यानान् धर्मस्य च चतुर्दश"[1] इति वचनेऽपि चत्वार्य्येव वेदोपाङ्गानि स्वीकृतानि प्रतीयन्ते। अष्टादशविद्द्यापक्षेऽष्टाऽपि उपाङ्गानि स्युः। अष्टादश विद्द्याश् च "अङ्गानि वेदाश् चत्वारो मीमांसा न्यायविस्तरः। धर्मशास्त्रम् पुराणञ् च विद्द्या ह्येताश् चतुर्दश। आयुर्वेदो धनुर्वेदो गान्धर्वश् चेति ते त्रयः। अर्थशास्त्रञ् चतुर्थन् तु विद्द्या ह्यष्टादशैव ताः"[2] इति। आयुर्वेदादय ऋग्वेदाद्द्युपवेदाश् शौनकीयचरणव्यूहसूत्रेऽपि प्रतिपादितास् सन्ति[3]। गोत्रचरणपृच्छाप्रतिज्ञासूत्रे तु तेऽन्न्यथैव विस्तरेण प्रोक्ताः[4]। कौशिकचरणव्यूहे तु ऋग्वेदस्याऽर्थशास्त्रम्, ब्रह्म–(अथर्व–)वेदस्य आयुर्वेदोऽभिचारकार्थशास्त्रञ् चोपवेद इत्युक्तम्[5]। चरकसंहितायामपि आयुर्वेदोऽथर्ववेदोपवेदतयैव स्वीकृतः प्रतीयते[6]। एतेषां सर्वेषाव् वेदोपाङ्गानान् तान एव स्स्वरो वेदितव्यः। वेदाङ्गोपाङ्गशास्त्राणान् तानस् स्वर इति प्रतिज्ञासूत्रेऽपि "तानस्स्वराणि च्छन्दोवत्सूत्राणि"[7] इति सूत्रेण प्रतिपादितमेव ॥७९॥

लौकिके संस्कृते चाऽपि त्रैस्स्वर्यं स्याद् विकल्पतः।
इत्याहुः काव्यमार्गे तु श्लेषादौ तन् न गण्यते ॥८०॥

यद्द्यपि बह्वृचानाम् ब्राह्मणेऽपि भाषिकस्स्वरप्रयोश् शबरेणोल्लिखितस्[8] तथापि भाषिकसूत्रे[9] नारदीयशिक्षायाञ्[10] चाऽनुल्लेखाच् चिन्त्य एव स विषयः। वाजसनेयि–ताण्डि–भाल्लवि–चरक–खाण्डिकेयौ–ऽखेयानाम् ब्राह्मणानि विहाय अन्न्येषाम् ब्राह्मणेषु त्रैस्स्वर्याभावस्य भाषिकसूत्रे[11] प्रतिपादितत्वाद्, वेदाङ्गोपाङ्गेष्वपि त्रैस्स्वर्याभावस्य भाषिकसूत्रे[12] प्रतिज्ञासूत्रे[13] च प्रोक्तत्वात्, तन्त्रवार्तिकेऽपि— "न च लोके प्रयुक्तानाम् पदानान् दृश्यते स्स्वरः"[14] इत्युक्तत्वात्, "काव्यमार्गे स्स्वरो न गण्यते"[15] इति सिद्धान्तितत्वात्, पतञ्जलिनाऽपि "श्वेतो धावति, अलम्बुसानायै याता"[16] इति

---

१. या. स्मृ. १।३। २. वीरमित्त्रोदये, परिभाषाप्रकाशे, पृ. ११। ३. ४।१ (पृ. ४७)। ४. द्वात्रिंश्याञ्च कण्डिकायाम्। ५. अ.प.४९।१।३। ६. १।३०।१८; द्र.-सुश्रुत.१।१।६। ७. १।९। ८. ध.मी सू.भा. १२।३।२०। ९. ३।१५–२८। १०. १।१।९–१४। ११. ३।१५–२८। १२. ३।२९। १३. १।९। १४. १।३।२४ (पृ. २०१)। १५. काव्यप्रकाशे, २।१८, ९।८३ (वृत्तिग्रन्थे)। १६. पा. व्या. भा. प्रथमाह्निकान्ते।

द्विष्ठवाक्ययोरुदाहृतत्वाच् च लौकिकसंस्कृतभाषायान् त्रैस्स्वर्याभावस्
सम्भावनाकोटिमधिरोहति; तथापि पाणिनीयव्याकरणे स्वरप्रकरणेषु छन्दो-
धिकारस्यादर्शनात्, लौकिकसंस्कृतभाषायामपि त्रैस्स्वर्यस्य कदाचित्
सत्ता न प्रत्यक्ष्यातुं शक्यते। तत्र "विभाषाच्छन्दसि"[1] इति
सूत्रे काशिकायामपि "इच्छासंहितयोरार्षे छन्दो वेदे च च्छन्दसि"
इति नानार्थकोशाच् छन्दसि वर्णसंहितायामिति भट्टाचार्यचरणा इति
भाषायामप्येकश्श्रुतिर् विभाषा भवतीति सिद्धम्" इति सम्प्रति पाठो
दृश्यत इति लौकिकसंस्कृतेऽपि त्रैस्स्वर्यम् एकश्श्रुतिश् च विकल्-
पेन भवत इति विज्ञायते। तत्र भाषायान् त्रैस्स्वर्यस्य सत्तायाम्
पाणिनीयस्वरसूत्रेषु च्छन्दोऽधिकाराभाव एव प्रबलम् प्रमाणम्।
एकश्श्रुतेस् सत्तायान् तु उक्तभाषिकसूत्रादीनि प्रमापकाणि; पाणिनी-
यमिदम् च सूत्रम्। तत्र यद्द्यपि काशिकाया उक्तX पाठX प्रक्षिप्-
तोऽवभाति, व्याक्ख्येयस्यास्यापि तस्या शस्य न्यासे पदमञ्जर्याञ्चाऽव्या-
क्ख्यातत्वात्; तथापि शेखरादिषु इदं सूत्रम् भाषागतपाक्षिकैकश्श्रुति-
प्रतिपादकतयाऽपि व्याक्ख्यातमिति एतस्य सूत्रस्यापि भाषागतैकश्-
श्रुतिप्रतिपादकत्वं स्वीकर्तुं शक्यम्। तथा हि लघुशब्देन्दुशेखरे—
"विभाषाच्छन्दसि। ननु विभाषाग्रहणवैयर्थम्, वाग्रहणानुवृत्त्यैव
सिद्धेः, न च यज्ञ्जकर्मणीत्यस्य निवृत्त्यर्थम्, इष्टानुरोधेन व्याक्-
ख्यानत एव तन्निवृत्तेस् सम्भवादिति चेदुच्यते— आवृत्त्या विभाषा
अच्छन्दसीति पदच्छेदार्थम्; तेन भाषायामपि पाक्षिकैकश्श्रुतिः।
अत एव 'श्वेतो धावति' 'अलम्बुसानायै याता' इति द्व्यर्थवाक्-
यमिति पस्पशान्ते भाष्ये सङ्गच्छते। अत्र श्वेत्यन्तोदात्तः, इत
इति ऊडिदम्[2] इत्यनेन, श्वेत इति धातादित्वाद्[3] अन्तोदात्तम्, अल-
मिति निपातत्वादाद्द्युदात्तम्[4], बुसशब्दोऽन्तोदात्तः, एवमलम्बुस-
शब्दोऽपि। एकश्श्रुत्यभावे स्वरभेदे कथमेकवाक्यन् द्व्यर्थ
स्यादिति बोद्ध्यम्। अत एव दाण्डिनायनेतिसूत्रे[5] भाष्ये उक्तम्—
'एकश्श्रुतिस् स्वरसर्वनाम' इति। अत एवाभियुक्तानावैविरुद्धस्स्वरक-
तत्पुरुषबहुव्रीह्याश्रयणेन श्लिष्टकाव्यादिनिर्माणं सङ्गच्छते।
अत एव काव्यप्रकाशकृता 'वेद इव लोके स्स्वरो न विशेषाऽवसायहेतुः'[6]

---

१. अष्टा. १।२।३६। २. अष्टा. ६।१।१७१।
३. फिट्सूत्रे, सू. २१। ४. तत्रैव, सू. ८०। ५. अष्टा.
६।४।१७४। ६. २।१८ (वृत्तिग्रन्थे)।

इत्त्युक्तम् । एकश्श्रुत्त्या व्यवहारादिति तदाशयः । किमर्थन् तर्हि 'झल्ल्युपोत्तमम्'[1] इति प्रक्क्रम्म्य 'विभाषा भाषायाम्'[2] इति सूत्त्रमिति चेत् त्रैस्स्वर्येण प्रक्क्रमे पाक्क्षिकानुदात्तत्त्वलाभायेति गृहाण । एतेन भाषायां स्वरो नास्त्येवेति भ्राम्म्यन्तः परास्ताः, स्वरविधौ छन्दोधिकाराभावाच् चेति दिक्''[3] इति ॥८०॥

१९. हस्तस्स्वरनिरूपणम्

हस्तेनाऽपि च सङ्केतस् स्वरादेः किरयते श्श्रुतौ ।
तन्माहात्म्यञ् च शिक्क्षासु शिक्क्षकैर् बहु वर्णितम् ॥८१॥

मुखेन स्वराणामुच्चारणे हस्तक्क्रियाऽपि सहायिका भवतु इति वा, मुखकृतस्वरादिभेदस्य सौक्क्ष्म्यात् कथञ् चिदयथार्थतया प्रयोगे जायमानेऽपि स्स्थूले हस्तसङ्केते यथार्थता रक्क्षितुं सुशकेति वा वेदस्स्वरानुपूर्वीसंरक्क्षणाय तज्जन्न्यादृष्टप्प्रदानाय च हस्तस्स्वरक्क्रिया प्रवृत्ता विज्ज्ञायते । इयं हस्तस्स्वरक्क्रिया ''अनिर्भुजा (संहिता)''[4] इति संहितोपनिषद्ब्राह्म्मणेन बीजरूपेणोक्ता तत एव च नारदादिभिः प्ररोहिता पल्लविता चेति द्द्विजराजभट्टो मेने किल[5]। वयन् तु ''अथैतास् तिस्स्रस् संहिता भवन्ति शुद्धादुस्स्पृष्टानिर्भुजेति'' इति संहितोपनिषद्वाक्क्ये शुद्धा+दुस्स्पृष्टा+निर्भुजेति पदच्छेदः, शुद्धादयश् च क्रमेण पदपाठ-क्रमपाठ-संहितापाठपरा इति मन्न्यामहे; ''यद्धि सन्धिवँ विवर्त्तयति तन् निर्ब्भुजस्स्य रूपमथ यच् छुद्धे अक्क्षरे अभिव्व्याहरति तत् प्रतृण्णस्स्याऽग्गर उ एवोभयमन्तरेणोभयवँ व्याप्तम् भवति । अन्नाद्द्यकामो निर्ब्भुजम् ब्रूयात् स्वर्ग्गकामः प्रतृण्णमुभयकाम उभयमन्तरेण''[6] इति ब्राह्म्मणान्तरात्, तद्व्याक्ख्यानादिब्भ्यश् च[7] । तथापि शुक्लयजुर्व्वेदप्रातिशाक्ख्य-प्रतिज्ज्ञासूत्त्रादिषु प्राचीनतरेषु ग्रन्थेष्वपि हस्तस्स्वरप्प्रक्क्रिया प्रतिपादिता। एतच् च तत्तच्छिक्क्षाग्रन्थादिवचनेब्भ्योऽनुपदमुद्धरिष्ष्यमाणेब्भ्योऽपि स्स्फुटम् भविष्ष्यति।

हस्तस्स्वरप्रक्क्रियाया माहात्म्यञ् च शिक्क्षादिषु प्रतिपादितयँ यथा शैशिरीयशिक्क्षायाम्— ''सममुच्चारयेद् वर्णान् हस्तेन च मुखेन च । स्वरश् चैव च हस्तश् च द्द्वयन् तु युगपद् भवेत् । हस्ताद् भ्रष्टस्

---

१. अष्टा. ६।१।१८० । २. तत्त्रैव ६।१।१८१ ।
३. वै. सि. कौ. साधारणस्स्वरप्प्रकरणे सू. १।२।३६ । ४. १।१७।
५. तत्त्रैव व्याक्ख्यायाम् । ६. ऐ. आ. ३।१।३ । ७. तत्त्रैव सा. भा., ऋ. प्रा. वर्गद्द्वये च ।

स्वराद् भ्रष्टो न वेदफलमश्नुते"[1] इति, "हस्तहीनन् तु योऽधीते स्वरवर्णविवर्जितम्। ऋग्यजुस्सामभिर् दग्धो वियोनिमधिगच्छति ॥ हस्तेनाऽधीयमानश् च स्वरवर्णान् प्रयोजयेत्। ऋग्यजुस्सामभिऽ पूतो ब्रह्म्मलोकं समश्नुते"[2] इति च। पाणिनीयशिक्क्षायाम् चैतौ द्वौ श्लोकौ पठ्यते[3]। याज्ञवल्क्यशिक्क्षायाम् च–"सममुच्चारयेद् वर्णान् हस्तेन च मुखेन च। स्वरश् चैव तु हस्तश् च द्वावेतौ युगपत् स्थितौ। हस्तब्भ्रष्टस् स्वरब्भ्रष्टो न वेदफलमश्नुते"[4] इति, "हस्तहीनन् तु योऽधीते मन्त्रवद् वेदविदो विदुः। न साधयेद् याजुषाणि भुक्तमव्यञ्जनयद् यथा। ऋचो यजूंषि सामानि हस्तहीनानि यऽ पठेत्। अनृचो ब्राह्म्मणस् तावद् यावत् स्वारन् न विन्दति॥हस्तहीनन् तु योऽधीते स्वरवर्णविवर्जितम्। ऋग्–यजुस्–सामभिर् दग्धो वियोनिमधिगच्छति"[5] इति, "स्वरवर्णान् प्रयुञ्जानो हस्तेनाऽधीतमाचरन्। ऋग्–यजुस्–सामभिः पूतो ब्रह्म्मलोकमवाप्नुयात्"[6] इति च; पाराशर्या शिक्क्षायाम् च– "हस्तहीनन् तु योऽधीते वेदवद् वेदविदो विदुः। तल्लक्क्षणविहीनन् तु भुक्तमव्यञ्जनयद् यथा"[7] इति। व्यासशिक्क्षायाम् च— "सुहस्तस्स्वरविन्न्यासान् निर्मलाद्ध्ययनम् भवेत्। तत्पूतो ब्राह्म्मणो यस् तु ब्ब्रह्म्मणा सह मोदते"[8] इति। कौहलीयशिक्क्षायाम् च— "स्वरान् हस्तेन विन्न्यस्स्येद् विपश्चिद् दक्क्षिणेन तु। श्रेयो विपुलमन्विच्छन् न सव्येन कदा चन॥ तेन चेन् निष्फलन् तस्स्य ब्ब्रुवते ते विपश्चितः। अविदोषस् तथा कार्यस् तत एतद् विजानता॥ कनिष्ठिकाऽनामिका च मद्ध्यमा च प्रदेशिनी। नीचस्स्वारधृतोदात्तानङ्गुष्ठाग्रेण निर्दिशेत्॥ विन्न्यस्स्य द्विस्स्वरं सौम्यम् मद्ध्यमे पर्वणि स्स्पृशेत्। इह कीर्तिमवाप्नोति प्रेत्य स्वर्गे महीयते॥ अतोऽन्न्यथा तु यो मर्त्यो निर्दिशेन् मतिमोहितः। स गच्छेन् नरकङ्ग घोरम् पापयोनिषु जायते॥ स्वरविन्न्यासशीलस् तु हस्तेन वेदवित्तमः। यस् तस्स्य गुणदोषौ यौ तत्तरौ फलदौ स्फुटम्॥ ईजानस्स्य यथा तेन दाक्क्षायणसवो मुखः। तस्मात् तत्तराऽवधातव्यं श्रेयो विपुलमिच्छता"[9] इति। आत्तरेयशिक्क्षायाम् च— "यथा हस्त-

---

१. श्लो. ७४। २. श्लो. ७९–८०। ३. श्लो. ५४–५५। ४. श्लो. २३–२४ (शि. स., पृ. ४)। ५. श्लो. ४०–४२ (शि. स., पृ. ५–६); या. शि. शि. व. वृ., पृ. ३०। ६. श्लो. ४४ (शि. स., पृ. ६); या. शि. शि. व. वृ., पृ. ३२। ७. श्लो. ७२ (शि. स., पृ. ५९)। ८. सू. ३३५, ३३६। ९. श्लो. ३६–४२।

स्स्वरन्न्यासम् मनसाऽपि न लङ्घयेत् । तस्मात् समस्तवेदेषु अद्ध्येताऽत्तर स्स्वरन् न्यसेत्''[1] इति । शम्भुशिक्क्षाया वचनमिति— ''हस्तेन वेदयँ योऽधीते स्वरवर्णार्थसयँयुतम् । ऋग्यजुस्सामभिः पूतो ब्रह्मलोके महीयते''इति श्लोको वेदतैजसे उद्धृतस्[2] स तु साम्प्रतिके शम्भुशिक्क्षा-हस्तलेखे न प्राप्यते । सर्वसम्मतशिक्क्षायाम् च— ''हस्ताद् भ्रष्टस् स्वराद् भ्रष्टो वर्णात् कालात् तथाऽर्थतः । प्रयोगाच् च परिभ्रष्टो न वेदफलमश्नुते ।। हस्तहीनन् तु योऽधीते स्वरवर्णार्थवर्जितम् । ऋग्-यजुस्-सामभिर् दग्धो वियोनिमधिगच्छति''[3] इति । पारिशिक्क्षायाम् च— ''हस्तेन वेदयँ य इमन् त्वधीते वर्णस्स्वरार्थाननुचिन्तयन् सन् । स ऋग्-यजुस्-सामभिरेव पूतस् तद् ब्रह्मलोके सततम् महीयते''[4] इति । नारदीयशिक्क्षायाम् च— ''सममुच्चारयेद् वाक्क्यं हस्तेन च मुखेन च । यथैवोच्चारयेद् वर्णाँस्त् तथैवैनान् समापयेद्''[5] इति, ''गृहीतग्रन्थ एवन् तु ग्रन्थोच्चारणशिक्क्षकान् । हस्तेनाऽद्ध्यापयेच् छिष्ष्यान् शैक्क्षेण विधिना द्विजः''[6] इति च । माण्डूक्क्या शिक्क्षायाम् च— ''यथा वाणी तथा पाणी रिक्तन् तु परिवर्जयेत् । यत्तरैव तु स्स्थिता वाणी पाणिस् तत्तरैव धार्यते ।। स्वरश् चैव तु हस्तश् च द्द्वावेतौ युगपद् भवेत् । हस्ताद् भ्रष्टस् स्वराद् भ्रष्टो न वेदफलमश्नुते ।। हस्तहीनन् तु योऽधीते स्वरवर्णविवर्जितम् । ऋग्-यजुस्-सामभिर् दग्धो वियोनिमनुगच्छति ।। ऋग्यजुस्सामगादीनि (-सामगानानि ?) हस्तहीनानि यः पठेत् । अनृचो ब्राह्मणस् तावद् यावत् स्वारन् न विन्दति ।। हस्तेनाऽधीयमानो यस् स्वरवर्णान् प्रयोजयेत् । ऋग्-यजुस्-सामभिः पूतो ब्रह्मलोकं स गच्छति''[7] इति ।।८१।।

(क) ऋग्वेदहस्तस्स्वरप्रक्क्रियाविवरणम्

कराङ्गुलिस्वरन्न्यासो मुनिना शैशिरेण हि ।
ऋग्वेदेऽपि स्स्फुटम् प्रोक्तस् सङ्क्षेपात् सोऽत्तर वर्ण्यते ।।८२।।
तर्जन्न्याद्द्व्यङ्गुलीनां हि मूलेष्वङ्गुष्ठशीर्षकम् ।
उदात्तप्रचितस्स्वाराऽनुदात्तेषु क्क्रमान् नयेत् ।।८३।।

---

१. श्लो. ३५ । २. व्या. शि. व्या., सू. ३३५-३३६ । ३. श्लो. १२८-१२९ (३।११५-११६) । ४. सू. ८० । ५. १।६।१४ । ६. १।६।२२ । ७. श्लो. २९-३४ (शि. स., पृ. ४६५-४६६) ।

दक्क्षमुक्तविधं हस्तन् नीचे तु हृदयन् नयेत् ।
मूर्धानमुच्चे स्वरिते कर्णमूलन् धृते मुखम् ॥८४॥

तथा हि शैशिरीयशिक्क्षायाम्— "उदात्तमाक्ख्याति वृषोऽङ्गुलीनाम् प्रदेशिनीमूलनिविष्टमूर्धा।अन्त्ये च मद्ध्ये स्वरितन् धृतञ् च कनिष्ठिकायामनुदात्तमेव"[1] इति, "अनुदात्तो हृदि ज्ज्ञेयो मूर्द्धन्युदात्त उच्च्यते। स्वरितꣳ कर्णमूलीयस् सर्वस्मिन् प्रचयस् तथा"[2] इति च। शौनकशिक्क्षायामपि— "अनुदात्तो हृदि ज्ज्ञेयो मूर्द्धन्युदात्त उदाहृतः। स्वरितꣳ कर्णमूलीयस् सर्वस्मिन् प्रचयस् स्मृतः"[3] इति। पाणिनीयशिक्क्षायाञ्— च "उदात्तमाक्ख्याति वृषोऽङ्गुलीनाम् प्रदेशिनीमूलनिविष्टमूर्धा। उपान्तमद्ध्ये स्वरितन् धृतञ् च कनिष्ठिकायामनुदात्तमेव। उदात्तम् प्रदेशिनीवँ विद्द्यात् प्रचयम् मद्ध्यतोऽङ्गुलिम्। निहितन् तु कनिष्ठिक्क्यां स्वरितोपकनिष्ठिकाम्"[4] इति; "अनुदात्तो हृदि ज्ज्ञेयो मूर्द्धन्युदात्त उदाहृतः। स्वरितꣳ कर्णमूलीयस् सर्वास्स्ये प्रचयस् स्मृतः"[5] इति च।

यद्द्यपि हृदयसमीपे हस्तं संस्थाप्य कनिष्ठिकामूलेऽङ्गुष्ठमूर्धानन् नीत्वाऽनुदात्तस् स्वरꣳ प्रदर्शनीय इत्यादिकोऽर्थश् शैशिरीयशिक्क्षायाम् पाणिनीय-शिक्क्षायावँ वाऽपि नोक्तः; शैशिरीयशिक्क्षायाञ् च मुखस्स्वरप्प्रकरणे एव "अनुदात्तो हृदि ज्ज्ञेयः" इत्यादिश् श्लोकꣳ पठ्ठ्यते न हस्तस्स्वरप्प्रकरणे, तथापि पाणिनीयशिक्क्षायामस्य श्श्लोकस्स्य हस्तस्स्वरप्प्रकरणे पठ्ठ्यमानत्त्वात्, याज्ज्ञवल्क्यशिक्क्षायामपि— "उदात्तन् तु वृषुवः प्रान्ते प्रचयन् नासिकाग्रतः। हृत्प्रदेशेऽनुदात्तन् तु तिर्यग् जात्यादिकान् स्वरान्"[6] इत्युक्तत्त्वात्, "हृद्द्यनुदात्तः, मूर्द्धन्युदात्तः, श्रुतिमूले स्स्वरितः"[7] इति प्रतिज्ज्ञासूत्त्रवाक्क्यानावँ व्याक्ख्याने तेषां हस्तस्स्वरपरतयैव व्याक्ख्यातृभिर् व्याक्ख्यातत्त्वात्, केशवीयकारिकावल्ल्यामपि— "अनुदात्तादुदात्तश् चेत् त्स्वरितोत्तर एव च। हृच्छिरꣳकर्णमूलेषु न्यसेद् धस्तमसंशयम्"[8] इत्युक्तत्त्वात्, स्वराष्टकशिक्क्षायामनन्तेनाऽपि— "अथ हस्तप्रक्क्षेपलक्क्षणम्— अनुदात्तो हृदि ज्ज्ञेयो मूर्द्धन्युदात्त उदाहृतः। स्वरितꣳ कर्णमूले स्स्यान् नासाग्रे प्रचयस् स्मृतः"[9] इति अस्स्य श्श्लोकस्स्य

---

१. श्लो. ८३। २. श्लो. ६१। ३. श्लो. ५५।
४. श्लो. ४३–४४। ५. श्लो. ४८। ६. श्लो. ५१(शि. स., पृ.७)।
७. १।४,५,६। ८. श्लो.१(शि.स.,पृ.१५०)। ९. शि.स., पृ.३६५।

हस्तस्स्वरन्न्यासपरतयैवोपात्तत्वाच् चाऽस्माभिः "उदात्तमाख्याति" इत्यादेः "अनुदात्तो हृदि ज्ञेयः" इत्यादेश् चेति वाक्यद्वयस्य समन्वयाय प्ररकल्पितो बोद्ध्यः ॥८२-८४॥

अयं हस्तस्स्वरन्न्यासश् शंशिराऽऽचार्यवर्णितः ।
अनूदितः पाणिनीयैर् नाऽधुना तु प्रयुज्यते ॥८५॥
उदात्तस्स्वरवर्णादिविशेषस्स्थितिसूचिकाः ।
क्रियन्ते केरलब्रह्मभैर् हस्तमुद्रास् तु बह्वृचैः ॥८६॥

यद्द्यपि कैश् चन शाङ्खायनीयैश् शाकलैराश्वलायनीयैश् चाऽऽर्यावर्तनिवासिभिर् बह्वृचैर् वैदिकैः "अनुदात्तो हृदि ज्ञेयः" इत्यादेरनुकूला इव दृश्यमाना हस्तस्स्वरन्न्यासक्रिया क्रियते, तथापि सा न व्यवस्थिता दृश्यते; "उदात्तमाख्याति वृषोऽङ्गुलीनाम्" इत्यादेरनुकूलाः क्रियास् तु तैर् न क्रियन्त एव । ऋग्वेदिभिः केरलदेशवासिभिर् ब्राह्मणैस् तु अधुनाऽपि ऋग्वेदाध्ययने १. ह्रस्स्वमुद्द्रा, २. उदात्तमुद्द्रा, ३. आकारमुद्द्रा, ४. मूर्धन्न्यमुद्द्रा, ५. घोषमुद्द्रा, ६. दीर्घविसर्गमुद्द्रा, ७. ति-मुद्द्रा, ८. सि-मुद्द्रा, ९. तालव्यदीर्घमुद्द्रा, १०. उकारमुद्द्रा, ११. ओष्ठ्यदीर्घमुद्द्रा, १२. ह्रस्स्वविसर्गमुद्द्रा, १३. प्रथमान्तमुद्द्रा, १४. स्वरपूर्वकतकारमुद्द्रा, १५. नकारमुद्द्रा, १६. ङकारमुद्द्रा, १७. अनुस्स्वारमुद्द्रा, १८. ऊँमुद्द्रा इत्यष्टादश हस्तमुद्द्राः क्रियन्ते इति त्रिशूरब्रह्मस्वमठविद्द्वार्थिसङ्घस्वर्णजयन्त्यवसरे १९६७ खरैस्ताब्दे प्रकाशितायास् स्मारिकायाः[1] प्रदर्शनङ्ग कृत्वा गणपतिशास्त्रिहेब्बारमहाशयेन (२०३४।९।२४ इति सङ्केत्ये दिने) प्रोक्तम् । तदनुसारमेवेदमत्राऽस्माभिरुक्तम् । अस्मदीयकेरलयात्रावसरे शुकपुरस्थबह्वृचसमुदाये तु एतादृशी प्रथा नोपलब्धाऽस्माभिः ॥८५-८६॥

(ख) शुक्लयजुर्वेदहस्तस्स्वरप्रक्रियाविवरणम्

अस्ति शुक्लयजुर्वेदे या हस्तस्स्वरप्रक्रिया ।
सोक्ता तत्प्रातिशाख्यादौ सैवाऽत्राऽपि प्रदर्श्यते ॥८७॥

शुक्लयजुर्वेदसम्बद्धा हस्तस्स्वरन्न्यासप्रक्रिया शुक्लयजुर्वेदप्रातिशाख्ये, प्रतिज्ञासूत्रे, याज्ञवल्क्यशिक्षायाम्, अमोघानन्दिन्यां शिक्षायाम्, पाराशर्यां शिक्षायाम्, लघुमाध्यन्दिनीयशिक्षायाम्, केशवीयकारिकावल्ल्याम्, प्रातिशाख्यप्रदीपशिक्षायाम्,

---

१. एतासाम् मुद्द्राणाम् चित्त्राणि अपि अस्स्यां स्मारिकायां सन्ति ।

स्वराष्टकशिक्क्षायाम्, सम्प्रदायप्रबोधिन्न्यां शिक्क्षायाञ् च वर्णिता दृश्यते। मल्लशर्मशिक्क्षायास् तु हस्तस्स्वरप्रक्क्रिया एव प्रतिपाद्द्यो विषयः। अतस् तेब्भ्य एव ग्रन्थेब्भ्यस् सारं समाहृत्य आवश्यके स्स्थले विवेचनञ् च कृत्वाऽत्तर शुक्लयजुर्वेदहस्तस्स्वरन्न्यासप्रक्क्रिया प्रदर्श्यते ॥८७॥

स्वस्तिकाकृतियुक्तेन बुधऽ पद्मासनेन हि।
अद्ध्यासीनस् समं शुद्धं सुखञ् च लघु चाऽऽसनम् ॥८८॥
हस्तौ सुसंयतौ कुर्याज् जानुनोरुपरि स्स्थितौ।
ऊरुभागे तृतीये तु वामे वामस्स्य कूर्परम् ॥८९॥[1]
न्यस्स्य तस्स्यैव मुष्टिन् तु स्स्थापयेद् दक्क्षिणस्स्य हि।
ऊरोस् तृतीये भागे चोपजानु तदुपर्य्यथ ॥९०॥
न्यस्स्येद् दक्क्षिणहस्तस्स्य विधियुक्तस्स्य कूर्परम्।
सुप्रसन्नमना भूत्वा किञ्चिन् नम्रस् त्वधोमुखः ॥९१॥[2]
निवेश्य दृष्टिं हस्ताग्रे शास्त्रार्थमनुचिन्तयन्।[3]
स्वराद्द्यनुगतां हस्तक्क्रियाङ कुर्याद् यथाविधि ॥९२॥
उत्तानं सोन्नतङ किञ् चित् सुव्यक्ताङ्गुलिरञ्जितम्।
स्वरविच् च करङ कुर्यात् प्रादेशोद्देशगामिनम् ॥९३॥[4]
अङ्गुष्ठस्स्योत्तरम् पर्व तर्जन्न्युपरि यद् भवेत्।
प्रादेशस्स्य स उद्देशस् तन्मात्तरञ् चालयेत् करम् ॥९४॥[5]
मनुष्यतीर्थोच्चङ कृत्वा पितृतीर्थोदकवँ व्रजेत्।
नामितङ करपृष्ठन् तु सुव्यक्ताङ्गुलिमोक्क्षणम् ॥९५॥[6]
समम् प्रयुञ्जीत वर्णान् हस्तेन च मुखेन च।
स्वरश् चैव च हस्तश् च द्द्वावेतौ युगपन् मतौ ॥९६॥[7]
यथा वाणी तथा पाणी रिक्तन् तु परिवर्जयेत्।
यत्तरयत्तर स्स्थिता वाणी पाणिस् तत्तरैव तिष्ठति ॥९७॥[8]

---

१. या. शि. श्लो. १८–१९ (शि. स., पृ. ३)। २. तत्तरैव, श्लो. २० (शि. स., पृ. ३)। ३. तत्तरैव, श्लो. २२ (शि.स.,पृ.३)। ४ तत्तरैव,श्लो. ४८ (शि.स., पृ.६); मा.शि. २३–२४; चा.शि.पृ.२४। ५. तत्तरैव, श्लो. ५० (शि. स., पृ. ६–७)। ६. तत्तरैव, श्लो. ४९ (शि. स., पृ. ६)। ७. तत्तरैव, श्लो. २३ (शि. स., पृ. ४)। ८. तत्तरैव, श्लो. ४६ (शि. स., पृ. ६), मा. शि. श्लो. २९–३० (शि. स., पृ. ४६५)।

आदौ हस्तन् न्यसेन् मद्ध्ये स्थितिरेषा सनातनी ।
ततस् स्वरानुकूल्येन गतिस् तस्य न संशयः ।।९८।।[1]
यथा धनुष्ष्यावितते शरे क्षिप्ते पुनर् गुणः ।
स्वस्स्थानम् प्रतिपद्द्येत तद्वद् धस्तगतस् स्वरः ।।९९।।[2]
आस्स्ये न च शयङ्कुर्यात् पठन् नाऽनन्यमतिर् भवेत् ।
न मुष्टिबन्धी स्स्यात् कुर्यान् न चाऽत्त्युत्तानकङ्करम्।।१००।।[3]
चुलुर् नौका स्स्फुटो दण्डी स्वस्तिको मुष्टिकाकृतिः ।
एते वै हस्तदोषास् स्युः परशुश् चैव सप्तमः ।।१०१।।[4]

एतावता प्रायेण प्राचीनानामेवाऽऽचार्याणाङ्कियताऽप्यंशेन क्वचित्-क्वचित् प्रतिसंस्कृतैः पद्द्यैर् हस्तस्वरन्यासे साधारणी प्रक्रिया प्रतिपादिता भवति । तत्तर प्रादेशोद्देशलक्षणश्लोकस्स्यार्थस् तु 'प्रसारिततर्जनीप्रमाणस्योपरि उत्तरपर्वपर्यन्तस्याऽङ्गुष्ठस्य प्प्रमाणे योजिते सति यत् प्रमाणं स्यात् स प्प्रादेशस्य उद्देशः(प्रमाणम्)' इति स्वीकर्तव्यः । एवञ् च सति "प्रादेशतालगोकर्णास् तर्जन्न्यादियुते ततो। अङ्गुष्ठे सकनिष्ठे स्स्याद् वितस्तिर् द्वादशाङ्गुलः"[5] इत्यत्तर यत् प्रादेशप्रमाणमुक्तन् तदेवाऽत्तर प्रादेशोद्देशशब्देन प्प्रतिपादितवँ वेद्द्यम् । अयमेवाऽर्थ आधुनिकैर् बहुभिर् वैदिकैर् गृहीतो दृश्यते[6]। अथवा प्रादेशशब्देनैवोक्तेऽर्थे प्रतिपादयितुं शक्क्येऽपि प्रादेशोद्देशशब्दम् प्रयुञ्जानस्य प्रायेण प्रादेशतुल्यस्य प्रादेशात् किञ्चिन् न्यूनस्य प्रमाणस्य प्रादेशोद्देशशब्देन विवक्षितत्वङ्कल्प्यम् । एतच्च प्रादेशप्प्रमाणेऽङ्गुष्ठोत्तरपर्वप्रमाणहरसनस्य विवक्षितताया प्रदर्शनाय तदनुकूलेन व्याख्यानेन समर्थनीयम् । एवं हि एतस्य प्रमाणस्य "उत्थाने तु नवाङ्गुल्यम्"[7] इति प्प्रोक्तेन सर्वाधिकेन हस्तगतिप्प्रमाणेन समन्वयस् स्यात् । अन्यथा तस्मिन्नेव ग्रन्थे प्रतिपादितस्य सर्वाधिकस्य हस्तगतिप्प्रमाणस्य नवाङ्गुलमात्तरत्वे 'प्प्रादेशोद्देशमात्तरङ्करम् चालयेत्' इति वचनस्य चरितार्थता कुत्तर स्स्यात्,प्रादेशोद्देशशब्दस्य प्रादेशार्थकत्वे तस्य अधिकतरप्रमाणतया

---

१. मल्ल. शि. श्लो. ७ (शि. स., पृ. १५४) । २. या.शि. श्लो. ४७ (शि.स.,पृ. ६) । ३. तत्तरैव, श्लो. ३९(शि.स.,पृ.५)। ४. तत्तरैव, श्लो. ३८–३९, मा.शि.श्लो. २५–२६ । ५. अमरकोशे २।६।८३–८४ । ६. सम्.प्र.शि. श्लो. ३६, ३८; या. शि.शि. व. वि.पृ. ३५–३६ । ७. या. शि. श्लो. ५२ (शि. स., पृ. ७) ।

नवाङ्गुलमात्तरत्वस्य अभावात्। मल्लशर्मशिक्षायान् तु हस्तगतिप्रमाणमधिकम् प्रदर्शितमस्ति, यथा— "अथ हस्तस्वरगतिप्रमाणम्— षडङ्गुलिप्रमाणानि दक्षिणे च तथोत्तरे। ऊर्ध्वे नवाङ्गुलिर् ज्ञेया गतिः पाणेरधस् तथा। वामे च दक्षिणाद् याति चोर्ध्वेऽधस्तात् तथैव च। अष्टादशाङ्गुलिर् ज्ञेया गतिर् हस्तस्य सुस्थिरा"[1] इति। एवं सति च "प्रादेशोद्देशगामिनम्" इति वचनस्य मल्लशर्मवचनेन सह कथं समन्वय इति सुधीभिर् विचारणीयम्। याज्ञवल्क्यशिक्षायाम् पठ्यमाने उक्ते श्लोके "अङ्गुष्ठस्योत्तरे पर्वे यवस्योपरि यद् भवेत्। प्रादेशस्य तु यो देशस् तन्मात्तरञ् चालयेत् करम्"[2] इति पाठान्तरम् प्राप्यते, प्रातिशाख्यप्रदीपशिक्षायामपि अयमेव पाठो धृतो दृश्यते[3], प्रायेण एवमेव चाऽयं श्लोको माण्डूक्या शिक्षायामपि पठ्यते[4]; एतस्मिन् पाठे तत्त्वर्थो दुर्बोधः। एतस्मिन् विषये सामस्वरसङ्केतविवरणप्रसङ्गेऽथर्ववेदस्वरसङ्केतप्रतिपादनप्रसङ्गे चाऽधिकवँ विचारयिष्यते। हस्तदोषेषु चुलुर् नाम आचमनमुद्द्रायुतो हस्तः, नौका नाम नौकारूपप्रसृतिको हस्तः, स्फुटो नाम पृष्ठकुब्जताञ् जिगमिषुणा हस्तकुलिना युत उत्तानो हस्तः, दण्डो नाम सूब्जहस्तकुलिकश् छेदनेऽधो गच्छता खड्गफलकेन तुल्यो हस्तः, स्वस्तिको नाम सूब्जहस्तकुलिकोऽधो गमने न्युब्जताङ् गतो हस्तः; मुष्टिको नाम बद्धमुष्टिको हस्तः, परशुर् नाम दण्डिसदृशः किन् तु हस्ततलेन सह समकोणमिव वनयन्तीभिरङ्गुलिभिर् युतो हस्तः। चारायणीयशिक्षायाञ् च— "पुटिर् दण्डस् स्फुटिर् वीणा मुष्टिको धनुराकृतिः। षडेते हस्तदोषास् स्युः परशुश् चेति सप्तमः"[5] इति पाठः। तर्जन्न्या अङ्गुल्या स्वरं निर्दिशन्त्या पृथग्भूतया युक्तो न्यक्नाऽन्न्याङ्गुलिको हस्तस् तर्जनो नाम दुष्ट इति च केचित्[6] ॥८८–१०१॥

उच्चे नीचपरे हस्तवँ वामब्भ्रूनिकटन् नयेत्।
निरन्तरेष्वनेकेषूच्चेषु नीचपरेषु च ॥१०२॥

करन् नवाङ्गुलं ह्युच्चे तूत्विषपेत् स्वरितोदये।
निरन्तरेष्वनेकेषूच्चेषु स्स्वारपरेषु च ॥१०३॥

---

१. श्लो. १९–२० (शि. स., पृ. १५५)। २. शि. स., पृ. ६, टि. ४; या.शि.शि.व.वि. पृ. ३६, टि.१,२,३,४। ३. शि.स., पृ. २११, श्लो. १०। ४. श्लो. २४–२५ (शि. स., पृ. ४६५)। ५. पृ. २४। ६. सम्.प्र.शि.श्लो.३४,तत्परिशिष्टे च, पृ.१६।

अनुदात्तपरके उदात्ते अनुदात्तपरकेषु अनेकेषु निरन्तरेषु चोदात्तेषु दक्षं हस्तवँ वामब्भ्रूनिकटन् नयेत् । तथा हि याज्ञवल्क्यशिक्षाम्– "उदात्तादनुदात्ते तु वामाया ब्भ्रुव आरभेत्"[1] इति । केशवीयकारिकावल्ल्यामपि "अनुदात्तादुदात्तश् चेदनुदात्तपरस् तथा । अनुदात्तं हृदि न्यस्स्योदात्तवँ वामब्भ्रुवि न्यसेत् । पुनर् हृदि नयेन् नीचमिति शास्त्रव्यवस्स्थितिः"[2] इति । मल्लशर्मशिक्षायामपि— "आदौ हस्तन् न्यसेन् मद्ध्ये स्थितिरेषा सनातनी । ततस् स्वरानुकूल्येन गतिस् तस्स्य न संशयः । अधस्तात् प्रव्व्रजन् पूर्वमूर्ध्वाद् मद्ध्ये च तिष्ठति । मद्ध्यतो दक्षिणङ्ग गच्छेद् दक्षिणाद् याति चोत्तरे । दृष्ट्वा जात्यस्स्वरं शीघ्रम् मद्ध्यतो याति चोत्तरम् । उत्तराद् यात्यधो हस्तं स्वरं दृष्ट्वा च दक्षिणे"[3] इति वामत ऊर्ध्वन् नयनन् दक्षिणतोऽधो नयनन् च प्प्रतिपादितम् । उदाहरणानि यथा— सा विश्श्वायुः सा[4], ते हि पुत्त्रासः[5], कदा चन स्तत्तरीः[6] इति । आधुनिका माद्ध्यन्दिनीया वाजसनेयिनस् तु यत्त्र उदात्तानुदात्तोदात्तानुदात्ता४ क्रमेण आयान्ति तत्त्र हस्तवँ वामतो दक्षिणतश् च सामानोन्नतिकतया नयन्ति, न तूर्ध्वाधरस्स्थितिकतया वामतो दक्षिणतश् च । तेषामयम् प्रकारश् शास्त्राऽनुकूलो न दृश्श्यते । स्वरितपरके उदात्ते, स्वरितपरकेषु अनेकेषु निरन्तरेषु उदात्तेषु च करम् मद्ध्यात् करस्स्थानान् नवाङ्गुलमूर्ध्वङ्ग क्षिपेदित्त्यर्थः । तथा हि याज्ञवल्क्यशिक्षायाम्–"उदात्तन् तु भ्रुव४ प्रान्ते प्रचयन् नासिकाग्रतः । हृत्प्रदेशेऽनुदात्तन् तु तिर्यग् जात्त्यादिरीरितः"[7] इति, "स्वरिते तर्चङ्गुलवँ विद्द्यान् निपाते तु षडङ्गुलम् । उत्थाने तु नवाङ्गुलत्त्यमेतत् स्वारस्स्य लक्षणम्"[8] इति च; प्रतिज्ञासूत्त्रे च– "मूर्द्ध्न्युदात्तः"[9] इति; केशवीयकारिकावल्ल्यामपि— "अनुदात्तादुदात्तश् चेत् स्वरितोत्तर एव च । हृच्–छिर४–कर्णमूलेषु न्यसेद्

---

१. या. शि. शि. व. वि., पृ. ४४ । २. श्लो. २ (शि. स., पृ. १५०)। ३. श्लो. ७–९(शि. स., पृ.१५४)। ४. मा. वा. शु. य. म. ब्र. य. सं. १।४ । ५. तत्त्रैव ३।३३ । ६. तत्त्रैव ३।३४ । (मुद्द्रणालये स्वरचिह्नानामभावादनुदात्ताक्षराणि स्थूललिप्प्या मुद्द्रितानि, उदात्तानि स्वरितानि प्रचितानि च तत्स्थित्त्या विज्ञैरूह्यानि) । ७. श्लो. ५१ (शि. स., पृ. ७) । ८. तत्त्रैव, श्लो. ५२ (शि. स., पृ. ७) । ९. १।५ ।

हस्तमसंशयम्''[1] इति। यद्द्यपि याज्ञवल्क्यशिक्षाव्याख्यानेऽमरनाथेन उदात्तेऽनुदात्तस्थानान् नवाङ्गुलङ्करमुत्क्षिपेद् इत्युक्तम्[2], तथापि मल्लशर्मशिक्षायाम् ''ऊर्ध्वे नवाङ्गुलिर् ज्ञेया गतिꣳ पाणेरधस् तथा''[3] इत्युक्तम्, तच् च मध्यस्थानादेवेति प्रतीयते इति अस्माभिरप्यत्तर मध्यस्थानादेव नवाङ्गुलमुदात्ते उत्क्षिपेदित्युक्तम्। उदाहरणानि यथा— वसोः पवित्तरमसि[4], समिन्द्रो विश्वदेवेभिः[5], सर्वं वर्चसा पयसा[6], इन्द्राग्नी तमप[7], आयङ्गौः पृश्निः[8], परं तद्विष्णुः[9] इति ॥१०२-१०३॥

धृतनीचान्न्यतरकोदयस्स्वारोदयोच्चके।
परे नीचे नयेद् हस्तमधो मध्यात् षडङ्गुलम् ॥१०४॥
परे तूक्तविधोदात्ते द्वित्तरेषु नीचकेषु तु।
पूर्वेषु मध्ये संस्थाप्य करमन्त्ये त्त्वधो नयेत् ॥१०५॥
उच्चे तु नीचपरके परे सत्त्यनुदात्तके।
नयेत् करन् तु स्वस्थानाद् दक्क्षिणेऽधष् षडङ्गुलम् ॥१०६॥
निरन्तरेष्वनेकेषूच्चेषु नीचोदयेषु च।
परेष्वप्यनुदात्तेऽधꣳ करन् दक्क्षिणतो नयेत् ॥१०७॥
परे तूक्तविधोदात्ते द्वित्तरेषु नीचकेषु तु।
पूर्वेषु मध्ये कृत्त्वाऽन्त्येऽधꣳ कुर्याद् दक्क्षिणे करम् ॥१०८॥

प्रचितो वाऽनुदात्तो वा परो यस्मात् स चाऽसौ स्वरितꣳ परो यस्मात् सः, तस्मिन् उदात्ते परे सति अनुदात्ते करं स्वस्थानात् षडङ्गुलमधो नयेत्। मल्लशर्मशिक्षायाः ''ऊर्ध्वे नवाऽङ्गुलिर् ज्ञेया गतिꣳ पाणेरधस् तथा''[10] इति वचनात् तु अनुदात्तेऽपि मध्यात् स्वस्थानात् करन् नवाङ्गुलमधो नयेदिति प्रतीयते। यथा ''देवस्य त्त्वा सवितुः''[11] ''भूताय त्त्वा नारातये''[12] इति। उक्तप्रकारके उदात्ते परे सति द्वित्तरेषु अनुदात्तेषु सत्सु तु पूर्वेषु अनुदात्तेषु करम् मध्ये संस्थाप्य अन्त्येऽनुदात्ते करमधो नयेत्। एतच् च ''उच्चादुच्चतरन् नास्ति नीचान्

---

१. श्लो. १ (शि. स., पृ. १५०)। २. या. शि. शि. व. वि., पृ. ३७। ३. श्लो. १९ (शि. स., पृ. ११५)। ४. मा. वा. शु. य. म. ब्र. य. सं. १।२। ५. तत्तरैव २।२२। ६. तत्तरैव २।२४। ७. तत्तरैव २।१५। ८. तत्तरैव ३।६। ९. तत्तरैव ५।२०। १०. श्लो. १९ (शि. स., पृ. १५५)। ११. मा. वा. शु. य.म.ब्र.य.सं. १।१०। ११. तत्तरैव. १।११।

नीचतरन् तथा। अक्षरात् तुल्ययोगाच् च नीचे नीचगतानि च" इति याज्ञवल्क्यवचनाल् लभ्यते इति तद्व्याख्यातारः[१]। "अनुदात्तसमूहो यान् वर्णानाश्रित्य तिष्ठति। ते युक्तास् तम् परित्यक्तुमशक्ता निजबन्धुवत्। स्वरितेऽप्येवमेव स्याद् दक्षिणांशे विशेषतः"[२] इति मल्लशर्मशिक्षावचनेनाऽपि एतत् प्रतिपाद्यते। सम्प्रदायप्रबोधिन्यां शिक्षायामपि— "अनुदात्ता यदैकत्र ह्यनेके लक्ष्यमतो यदि। तत्राऽन्त्ये तु करम् नीचैर् मध्ये पूर्वेषु दर्शयेत्"[३] इति। उदाहरणानि यथा— "गन्धर्वस्त्वा"[४], वर्द्धिषीमहि"[५], "नवदशभिः"[६] "बलविज्जेज्ञाय स्त्थविरः"[७], "हिरण्यगर्भः समवर्त्तताग्रे"[८] इति। अनुदात्तऽ परो यस्मात् सः, तस्मिन् उदात्ते परे सति अनुदात्ते करं स्वस्स्थानात् षडङ्गुलन् दक्षिणतोऽधो नयेत्; यथा "इषे त्वोर्ज्जेत्वा"[९] "इडेरन्ते हव्ये काम्ये"[१०] इत्यादौ। अनुदात्तऽ परो येभ्यस् तेषु अनेकेषु उदात्तेषु परेष्वपि अनुदात्ते हस्तं स्वस्स्थानात् षडङ्गुलन् दक्षिणतोऽधो नयेत्; यथा "भागं सोमेनातेनच्चँमि"[११], "उमा हि हस्तता"[१२] इति। उक्तविधे उदात्ते परे सति द्वित्रेषु अनुदात्तेषु सत्सु तु पूर्वेषु अनुदात्तेषु हस्तम् मध्ये स्वस्स्थाने एव सँस्थाप्य अन्त्येऽनुदात्ते दक्षिणतोऽधष् षडङ्गुलन् नयेत्; यथा— "तरचायुषन् जमदग्गँने"[१३] आनन्दनन्दावाग्डौ मे"[१४] "चोदयित्री सूनृतानाम्"[१५] "पुरुषमृगश्चन्द्रमसः"[१६] "हिरण्यगर्भ इत्त्येषः"[१७] इति ॥१०४–१०८॥

जात्त्येऽभिनिहिते क्वर्षेप्परे परश्लिष्टे ऽनुच्चकोदये।
परे तु नीचे बभ्रमयेन् न्युब्जन् नाबभ्युन्मुखङ करम् ॥१०९॥
के चित् त्वत्तर करन् न्युब्जमकृत्त्वा तयँ यथास्थितम्।
कृत्त्वा तिरश्चीनमन्तर् नमयन्ति हृदुन्मुखम् ॥११०॥

---

१. या. शि. शि. व. वि., पृ. ४५–४६। २. श्लो. १२–१३ (शि. स., पृ. १५४)। ३. श्लो. ४६, पृ. १२। ४. मा. वा. शु. य. म. ब्र. य. सं. २।३। ५. तत्त्रैव २।१४। ६. तत्त्रैव १४।३०। ७. तत्त्रैव १७।३७। ८. तत्त्रैव १३।४, २३।१, २५।१०। ९. तत्त्रैव १।१। १०. तत्त्रैव ८।४३। ११. तत्त्रैव १।४। १२. तत्त्रैव ५।१९। १३. तत्त्रैव ३।६२। १४. तत्त्रैव २०।९। १५. तत्त्रैव २०।८५। १६. तत्त्रैव २४।३५। १७. तत्त्रैव ३२।३।

स्वारोदयोदात्तपरे जात्त्यादौ तु परे सति ।
अनुदात्ते करङ्ग कुर्यादधस्तात् पितृदानवत् ।।१११।।
अनुदात्तपरोदात्तपरे जात्त्यादिके परे ।
अनुदात्तेऽधꣳ करस् स्याद् दक्क्षिणे पितृदानवत् ।।११२।।
जात्त्यादिके तूक्तविधे परेऽनेकेऽनुदात्तकाः ।
चेत् स्युराद्द्चेष्ष्वत्तर करो मद्ध्येऽन्त्ये स्स्याद् यथोदितम्।।११३।।

अनुदात्तꣳ परो यस्मात् सः, तस्मिन् जात्त्ये वाऽभिनिहिते वा क्षैप्प्रे वा प्रश्श्लिष्टे वा स्वरिते परे सति अनुदात्ते हस्तन् न्युब्जङ्ग कृत्त्वा नाब्भ्युन्मुखम् भ्रमयेत् । भ्रमणं स्वरिते उच्चारिते एव पूर्णम् भविष्यतीति अनुदात्तेऽर्धब्भ्रमणमेव कर्तव्यमित्त्यर्थादुक्तम् भवति । केचित् तु अत्तर मूलस्स्थाने स्स्थितस्स्य हस्तस्स्य पितृतीर्थानुगं सार्धाङ्गुलनमनमेव प्प्रतिपादयन्ति, न तु मनुष्यतीर्थानुगन् न्युब्जीकरणम्, न वाऽन्तर्मुखमर्धब्भ्रमणम् । एतद्विषयेऽधिकं स्वरितस्स्वरहस्तगतिप्प्रतिपादने वक्क्ष्यते । उदाहरणयँ यथा— **पृथिव्व्यसि**[1], **घर्म्मोसि**[2], **वैष्ण्णव्यौ सवितुः**[3], **धान्न्यमसि**[4] । स्वरितꣳ परो यस्मात् स चाऽसौ उदात्तꣳ परो यस्मात् स तस्मिन् जात्त्ये वाऽभिनिहिते वा क्षैप्प्रे वा प्रश्श्लिष्टे वा स्वरिते परे सति अनुदात्ते हस्तमधो नीत्त्वा पितृदाने इव पितृतीर्थन् नमयेत् । यथा **सुप्प्वा** कामधुक्क्षः[5]; **उर्व्वन्तरिक्क्षमन्न्वेति**[6], **प्रसवेश्श्विनोर्ब्बाहुब्भ्याम्**[7] । अनुदात्तꣳ परो यस्मात् स चासौ उदात्तꣳ परो यस्मात् स तादृशे जात्त्ये वाऽभिनिहिते वा क्षैप्प्रे वा प्रश्श्लिष्टे वा स्वरिते परे सति अनुदात्ते हस्तं स्वस्थानाद् दक्क्षिणतोऽधो नीत्त्वा पितृदाने इव पितृतीर्थन् नमयेत् । यथा 'शतेन पाशैर्य्योस्म्मान् द्वेष्ट्टि यञ् च वयन् द्विष्म्मः''[8], ''**गोष्ट्ठेस्म्मिलँ लोके**''[9], ''**रत्थ्यो न रश्म्मीन्**''[10] इति । अनुदात्तपरके जात्त्यादिके परे सति यदि निरन्तरा अनेकेऽनुदात्ता भवन्ति तदा पूर्वेष्ष्वनुदात्तेषु करम् मद्ध्ये स्थापयेद्, अन्त्येऽनुदात्ते करन् न्युब्जङ्ग कृत्त्वा नाब्भ्युन्मुखम् भ्रमयेत् । यथा **कुक्कुटोसि**[11], **वायव्व्यैर्व्वायव्व्यानि**[12], **ब्रराट्म्मणोस्स्य**[13], **ब्रराट्म्मराजन्-**

---

१. मा. वा. शु. य. म. ब्र. य. सं. १।२ । २. तत्त्रैव ।
३. तत्त्रैव १।१२ । ४. तत्त्रैव १।२०। ५. तत्त्रैव १।३।
६. तत्त्रैव १।७ । ७. तत्त्रैव १।१० । ८. तत्त्रैव १।२६।
९. तत्त्रैव ३।२१ । १०. तत्त्रैव३४।४९। ११. तत्त्रैव१।१६।
१२. तत्त्रैव १९।२७ । १३. तत्त्रैव ३१।११ ।

न्याब्भ्याम्[1] इति। स्वरितपरक उदात्तX परो यस्मात् स तस्मिन् जात्त्यादिके परे सति यदि निरन्तरा अनेकेऽनुदात्ता भवन्ति तदा पूर्वेष्वनुदात्तेषु करम् मद्ध्ये स्थापयेद् अन्त्येऽनुदात्ते करमधो नीत्वा पितृदाने इव पितृतीर्थन् नमयेत्; यथा "युयोद्ध्यस्म्मज् जुहुरागम्"[2], "परमेष्ठ्यभिधीतः"[3] इति। अनुदात्तपरक उदात्तX परो यस्मात् तस्मिन् जात्त्यादिके स्वरिते परे सति यदि निरन्तरा अनेकेऽनुदात्ता भवन्ति तदा पूर्वत्तर करम् मद्ध्ये एव स्स्थापयेत्, अन्त्ये मद्ध्याद् दक्क्षिणतष्षडङ्गुलमधो नीत्वा पितृदाने इव पितृतीर्थन् नमयेत्; यथा "असुर्य्या नाम ते लोकाः"[4] इति। तदेतत् स्वरितविशेषपूर्ववर्तिनि अनुदात्ते हस्तस्स्य पितृदानवत् करणयँ यद्द्यपि जयन्तस्स्वामिकेशवदैवज्ञमल्लशर्माऽनन्तयाज्ञिकैर् नोक्तम्; तैस् तु जात्त्यादिषु स्वरितेष्वेव हस्तस्स्य पितृदानवन् मनुष्यदानवद् वा करणम् प्रोक्तम्, तथापि सम्प्रदायप्प्रबोधिनीकारवचनम् आधुनिकमाद्ध्यन्दिनीयवाजसनेयिनां हस्तगतिप्प्रथाञ् चोपजीव्य प्रतिपादितवँ वेदितव्यम्; तथाहि सम्प्रदायप्प्रबोधिन्न्याम्— "न्युब्जविहन्नेऽव्व्यवहिते ऽनुदात्ते पिण्डदानवत्। कर एवम् पञ्चधा स्यादनुदात्तप्प्रदर्शनम्"[5] इति ॥१०९-११३॥

स्वपूर्ववर्त्युदात्तस्स्य प्प्रभावेण समुद्गते।
स्वरिते तु करम् मूर्द्ध्नX पातयेत् तर्त्यङ्गुलम् बुधः ॥११४॥
प्रचयो यत्तर दृश्श्येत तत्तर हन्न्यात् स्वरम् बुधः।
स्वरितX केवलो यत्तर मृदुन् तत्तर निपातयेत् ॥११५॥
स्वारे जात्त्यादिके नीचाऽनुच्चमद्ध्यस्स्थिते करम्।
पूर्वारब्धाम् भ्रमिम् पूर्णाङ् कृत्त्वोत्तानम् बहिर् नयेत्॥११६॥
पक्क्षान्तरे तिरश्चीनमन्तर् नीतं हृदुन्मुखम्।
करम् मण्डलमार्गेणोन्नमय्य बहिरानयेत् ॥११७॥
स्वारोदयोदात्तपरे जात्त्यादौ नीचतX परे।
कुर्यात् करम् पूर्णन्युब्जमधो नीचप्प्रदेशके ॥११८॥
नीचोदयोदात्तपरे जात्त्यादौ नीचपूर्वके।
अर्धन्युब्जङ् करङ् कुर्यान् नीचदेशे हि दक्क्षिणे ॥११९॥
उच्चपूर्वेऽपूर्वके वा जात्त्यादौ निहतोदये।
मूर्द्ध्नि नीतम् पूर्वमेव पातयेत् तर्त्यङ्गुलङ् करम् ॥१२०॥

---

१. मा.वा.शु.य.म.ब्र.य.सं. २६।२। २. तत्तरैव ७।४३।
३. तत्तरैव ८।५४। ४. तत्तरैव ४०।३। ५. श्लो.५०, पृ.१२।

"उदात्ताच् चानुदात्तं स्वरितम्"[१] इत्यनन्वाख्याते स्वरिते तत्पूर्ववर्तिन उदात्तस्योच्चारणे मूर्द्धिन प्राप्तङ्करम् मूर्द्धनस् तर्यङ्गुलम् पातयेत्। यथा "देवस्य त्वा"[२] "भूताय त्वा"[३] इति। अनुदात्तस्वरमध्ये उदात्तभिन्नस्वरमध्ये वा स्थिते जात्यादिके स्वरिते तु तत्पूर्ववर्त्यनुदात्तोच्चारणे हस्तन् न्युब्जीकृत्य प्रारब्धां हस्तस्य भ्रमिम् पूर्णाङ्कृत्वोत्तानीभूतं हस्तं हृदयदेशाद् बहिस् स्वस्थाने नयेत्। येषां सम्प्रदाये तु नीचानुच्चमध्यस्थाज् जात्यादिकात् स्वरात् पूर्वस्याऽनुदात्तस्योच्चारणे हस्तन् न्युब्जमकृत्वा तं स्वस्थाने प्रकृत्या स्थितन् तिरश्चीनङ्कृत्वा हृदयोन्मुखमन्तर् नमयन्ति तेषां सम्प्रदाये तु एतादृशे जात्यादिके उक्तप्रकारेण हृदयोन्मुखमन्तर् नीतन् तिरश्चीनङ्करम् मण्डलांशरूपेण मार्गेणोन्नमय्य बहिस् स्वस्थाने नयेत्। यथा "पृथिव्यसि"[४] "घर्मोसि"[५] "धान्यमसि"[६] इति। स्वरितः परो यस्मात् स चासौ उदात्तः परो यस्मात् सः, तस्मिन् अनुदात्तात् परे जात्यादौ स्वरितेऽधोऽनुदात्तप्रदेशे करम् पूर्णतया न्युब्जङ्कुर्यात्। यथा "सुप्त्वा कामधुक्षः"[७] "उर्वन्तरिक्षमन्वेमि"[८] इति। अनुदात्तः परो यस्मात् तादृश उदात्तः परो यस्मात् तस्मिन् नीचः पूर्वो यस्मात् तादृशे जात्यादिके स्वरे तु अधो दक्षिणेऽनुदात्तदेशे करमर्धन्युब्जङ्कुर्यात्। यथा "गोष्ठेस्मिँल्लोके"[९], "रत्थो न रश्मीन्"[१०] इति। अस्मिन् विषये शुक्लयजुर्वेदप्रातिशाख्ये— "चत्वारस्तृतिर्य्यक्स्वरिताः, अनुदात्तन् चेत् पूर्वन् तिर्य्यङ्निहत्य काण्वस्य, ऋजुन् निहत्य प्रणिहन्न्यत उदात्ते"[११] इति सूत्राणि पठ्यन्ते। एतेषामर्थश्च— जात्यादिकात् स्वरितात् पूर्वमनुदात्तो भवति परत्र चानुदात्तः प्रचितो वा भवति चेत् तत्र काण्वाचार्यस्य मतेन हस्तन् तिरश्चीनङ्कृत्वा जात्यादिस् स्वर्यते; जात्यादिकात् स्वरितात् पूर्वत्राऽनुदात्तः परत्र चोदात्तश् चेत् तत्र जात्यादिके हस्तम् अनुदात्ते इव ऋजुन् निपात्य प्रकर्षेण नीचीक्रियते इति। अयन् चाऽर्थः पूर्वङ्कृतेन विवरणेन सह न सम्यक्

---

१. शु. य. प्रा. ४।१३७। २. मा. वा. शु. य. म. ब्र. य. सं. १।१०। ३. तत्तरैव १।११। ४. तत्तरैव १।२। ५. तत्तरैव। ६. तत्तरैव १।२०। ७. तत्तरैव १।३। ८. तत्तरैव १।७। ९. तत्तरैव ३।२१। १०. तत्तरैव ३४।४९। ११. १।१२२–१२४।

सर्वं वदति; एतद्विषयके "तिर्यग् जात्त्यादिरीरितः"[1] इति, "षडङ्गुलन् तु जात्त्यस्स्य हस्तस्स्याऽनुपथस्स्य च। तच्चतुर्भागमात्तरन् तु हस्तन् तेनैव वर्तयेत्"[2] इति च याज्ञवल्क्यशिक्षावचने चाऽस्फुटे इति पूर्वङ्कृतस्स्य विवरणस्स्य समर्थनाय ते अपि प्रस्तोतुन् न शक्येते। तथापि "पितृशश्र(स्स्र?)वणन् तद् भवेत्"[3] इति कात्त्यायनशिक्षावचनात्, "जात्त्याभिनिहितक्वैप्प्रप्रशिलष्टस्स्य पितृदानवद् हस्तङ्कृत्वा स्वरयितव्यमित्त्यर्थः"[4] इति तस्स्य जयन्तस्स्वामिकृताद् व्याख्यानात्, "तत्तर जात्त्यादिसन्ज्ञानान् चतुर्णान् दर्शने करम्। तिर्यन्चङ्गमयेद् धीमान् पितृदानवदेव हि। मनुष्यदानमिव चेदुदात्तऽ प्रत्त्ययस् स्वरः"[5] इति केशवीयकारिकावलिवचनात्, "अर्धन्युब्जे ततऽ पाणिरधस्ताद् याति दक्षिणे। सम्पूर्णे सत्त्यधो गच्छेदधस्ताच् च न संशयः"[6] इति मल्लशर्मशिक्षावचनात्, "अनुदात्तपूर्वजात्त्यादयश् चत्त्वारऽ पितृदानवद् हस्तम्"[7] इति, "अनुदात्तपूर्वजात्त्यादयश् चत्त्वारो मनुष्यदानवदुदात्ते"[8] इति, "अनुदात्तपूर्वजात्त्यादयश् चत्त्वारऽ कर्णमूले उदात्तस्वरितपरत्त्वाभावे"[9] इति च स्वराष्टकशिक्षावचनात्, शिक्षावल्लीकार[10]–सम्प्रदायप्प्रबोधिनीकारा[11]–ऽऽदिवचनेद्भ्यः, सम्प्रदायज्ञमाद्ध्यन्दिनीयवाजसनेयिवैदिकहस्तस्स्वरन्न्यामदर्शनाच् च पूर्वङ्कृतम् माद्ध्यन्दिनीयानान् जात्त्यादिस्स्वरितहस्तगतेर् विवरणं समर्थयितुं शक्यते। उदात्तपूर्वकेऽपूर्वके वा जात्त्यादौ स्वरिते तु पूर्वमेव मूर्द्धिननीतं हस्तन् तर्यङ्गुलम् पातयेत्। एतच् च "अनुदात्तन् चेत् पूर्वम्"[12] इति वचनात् "श्रुतिमूले स्स्वरितः"[13] इति वचनाच् च लब्भ्यते। मल्लशर्मणा तु "कोदादिति प्प्रतीके च कोसौ च तत्तर्यम्बकेऽपि च। एषूदात्तवं विजानीयात् तदन्न्यत्तर च मद्ध्यगम्"[14] इति प्प्रोक्तम्।

---

१. या. शि. शि. व. वि., पृ. ३८ (श्लो. ५६)। २. तत्तरैव, पृ. ३९ (श्लो. ५६–५७)। ३. शि. स., पृ. ५१। ४. तत्तरैव। ५. श्लो. ५–६ (शि. स., पृ. १५०)। ६. श्लो. १० (शि. स., पृ. १५४)। ७. सू. ११ (शि. स., पृ. ३६४)। ८. सू. १२ (शि. स., पृ. ३६४)। ९. सू. १४ (शि. स., पृ. ३६४)। १०. या. शि. शि. व. वि., पृ. ३९। ११. श्लो. ५१–५८ (पृ. १२–१३)। १२. शु. य. प्रा. १।१२३। १३. प्र. सू. १।६। १४. श्लो. ३४ (शि. स., पृ. १५७)।

उदाहरणानि यथा "पञ्चदशो व्योमा"[१], कतिधा व्व्यकल्प्पयन्"[२] "तर्च्चम्बकम्"[३], "कोदात्"[४], "कोसि"[५], "द्र्वन्नः"[६] इति। स्वरिताक्क्षरे यदि अनेकानि व्यञ्जनानि भवन्ति तर्हि तत्तर कस्मिन् व्यञ्जने उच्चार्यमाणे स्वरितहस्तऽ कार्य इत्त्यत्तर याज्ज्ञवल्क्यशिक्क्षोक्ता व्यवस्था यथा— 'नैतत् स्वरितपूर्वाङ्गे नापराङ्गे कथञ्न चन। न स्स्वरे न च मात्तरायाङ्ग कथं स्वारो विधीयते॥ पराङ्गस्स्य तु यत् पूर्वम् पूर्वाङ्गस्स्य तु यत् परम्। उभयोरर्द्धसयँ्योगे स्वारङ्ग कुर्याद् विचक्क्षणः॥ सयँ्योगे तु परं स्वार्यम् परं सयँ्योगनायकम्। सयँ्युक्तस्स्य तु वर्णस्स्य न स्स्वार्यम् पूर्वमक्क्षरम्॥ अवग्ग्रहे पदच्छेद उदात्तो दृश्श्यते यदि। स्वरानृतं स्वरितम् प्राहुस् सन्धौ तु स्स्वार्यते परम्॥ स्वरसन्धिविधानेन नीचोच्चत्त्ववँ् विधीयते। व्यञ्जनाद् वा स्स्वराद् वाऽपि तत्सन्धौ स्वर उच्च्यते"[७] इति॥११४–१२०॥

यस्मात् कस्मादपि स्स्वारात् परे हि प्प्रचिते स्स्वरे।
एकस्मिन् वाऽप्प्यनेकस्मिन् कुर्यान् नासाग्ग्रतऽ करम्॥१२१॥

तथाहि याज्ज्ञवल्क्यशिक्क्षायाम्— "उदात्तन् तु भ्रुवऽ प्रान्ते प्रचयन् नासिकाग्ग्रतः। हृत्प्रदेशेऽनुदात्तस् स्यात् तिर्य्यग् जात्त्यादिरीरितः"[८] इति; केशवीयकारिकावल्ल्याम् च— "प्रचितोच्चारणे न्न्यासो हस्तस्स्य नासिकाग्ग्रतः"[९] इति; स्वराष्टकशिक्क्षायाम् च— "अनुदात्तो हृदि ज्ज्ञेयो मूर्द्धन्युदात्त उदाहृतः। स्वरितऽ कर्णमूले स्स्यान् नासाग्ग्रे प्रचयस् स्मृतः"[१०] इति; प्रातिशाक्ख्यप्रदीपशिक्क्षायाम् च— "अयमेव प्रचयऽ प्रचितऽ प्रचो निचित उदात्तमय इति वैदिकैर् व्यवहिरयते। हस्तन् तु नासिकाग्ग्रसम्मितङ्ग कृत्त्वा (प्रचयः) प्रदर्शनीयः, 'प्रचयन् नासिकाग्ग्रतः' इति याज्ज्ञवल्क्यशिक्षावाक्क्यात्"[११] इति। यद्द्यपि "माद्ध्यन्दिनीयशाखायां संहितायान् त्रयस् स्वराः। उदात्तनीचस्स्वरिताऽ प्रचयो नैव गण्ण्यते"[१२] इत्त्यपि सम्प्रदायप्प्रबोधिन्न्यामुक्तम्, तथापि "स्वरितात् परतोऽचिह्न्नो वर्णऽ प्रचयसञ्ज्ञकः। मद्ध्ये प्प्र-

---

१. मा. वा. शु. य. म. व्र. य. सं. १४।२३। १. तत्तरैव ३१।१०। ३. तत्तरैव ३।६०। ४. तत्तरैव ७।४८। ५. तत्तरैव ७।२९; २०।४। ६. तत्तरैव ११।७०। ७. या. शि. शि. व. वि., पृ. ९२–९५। ८. तत्तरैव, पृ. ३८। ९. श्लो. ३, (शि. स., पृ. १५०)। १०. शि. स., पृ. ३६५। ११. सू. १८ (शि. स., पृ. २१६)। १२. श्लो. ४४ (पृ. ११)।

दर्शनन् तस्स्य स्वरितस्स्थानतो भवेत्"[1] इत्यपि तत्तराऽप्युक्तम् ॥१२१॥

तर्जनीन् नमयेदन्तऽ के ङे टे णे विरामगे ।
पे त्वङ्गुलीनाम् पञ्चानाङ्ग कुर्याद् मूर्द्ध्ना हि मेलनम्॥१२२॥
तेऽङ्गुष्ठतर्जनीमूर्धयोगात् कुर्यात् तु कुण्डलम् ।
मे तु कुर्वीत मुष्टिं हि ने त्वङ्गुष्ठनखम् बुधः ॥१२३॥
तर्जनीमूर्धपार्श्वेन स्पृशेद् वा तर्जनीनखम् ।
अङ्गुष्ठमूर्धपार्श्वेन सम्प्रदायव्यवस्थया ॥१२४॥

तथाहि याज्ञवल्क्यशिक्षायाम् — "ककारान्ते टकारान्ते ङणे तर्जनिकान् नमेत् । पञ्चाङ्गुल्यम् पकारे च तकारे कुण्डलाकृतिः"[2] इति, "मुष्ट्याकृतिर् मकारे स्यान् नकारे तु नखग्रहः"[3] इति च । मल्लशर्मशिक्षायाम् च— "अथ तकारादिमान्तेषु तर्जन्यङ्गुष्ठयोगादिमुष्ट्यन्ता× क्रिया× कत्थ्यन्ते—तर्जन्यङ्गुष्ठयोर् योगो नखयोगश् च यस् तयोः । अङ्गुष्ठमद्ध्ये यस् तस्स्या योगो भवति निश्चितम् । अत्तरैवोक्त× क्रमेणैव नैतदेकेऽवसानगे । विस्स्वरे च मकारान्ते मुष्टिका च तथैव च"[4] इति । प्रातिशाख्यप्रदीपशिक्षायाम् च याज्ञवल्क्यशिक्षावचनानि उद्धृत्य "अस्स्याऽर्थः— मकारे मुष्टिः, नकारे अङ्गुष्ठेन तर्जनीनखग्रहणम्, ककारे टकारे ङकारे णकारे पदपाठे वृषण्वस्स्वित्त्यादौ तर्जनीमधो नामयेत्, पकारे पञ्चाङ्गुलिमेलनम्, तकारे कुण्डलाकारः, एते प्रकारा× पदान्तीयेषु सर्वत्तर"[5] इत्युक्तम् ॥१२२-१२४॥

उच्चस्स्वरविसर्गे हि कुर्यात् तर्जनिकाम् पृथक् ।
प्रचनीचान्यतरकविसर्गे तु कनिष्ठिकाम् ॥१२५॥
विसर्गे ह्रस्स्वस्स्वारस्स्य वकारेण युतस्स्य तु ।
दीर्घस्स्वारस्स्याऽपि मुञ्चेत् तर्जनीं सकनिष्ठिकाम् ॥१२६॥
दीर्घस्स्याऽप्यवकारस्स्याऽपि जात्यस्स्य विसर्गके ।
विषपेत् कनिष्ठातर्जन्यौ गौडाचार्यमतानुगः ॥१२७॥
जात्यस्स्याऽप्यवकारस्स्य दीर्घस्स्य तु विसर्गके ।
विषपेत् कनिष्ठिकामेव दाक्षिणात्यमते स्स्थितः ॥१२८॥

---

१. श्लो. ५३-५४ (पृ.१३) । २. श्लो. ५७ (शि.स., पृ.७)।
३. श्लो.५६ (शि.स., पृ.७) । ४. श्लो. ३२-३३ (शि.स., पृ.१५६)।
५. शि. स., पृ. २२३-२२४ ।

स्वरितस्स्य त्त्वजात्त्यस्स्य वकाररहितस्स्य च ।
दीर्घकस्स्य विसर्गे तु क्षिपेदेकाङ्क निष्ठिकाम् ॥१२९॥
तर्जन्न्यादिपृथक्कारे स्वल्पन् न्यचनमिष्ष्यते ।
शिष्टानामङ्गुलीनाञ् च मुष्टीभावस् तु नेष्ष्यते ॥१३०॥

उदाहरणानि यथा— "सवितुः प्प्रसवे"[१] "कामधुक्क्षः"[२] "सा विश्श्वायुः"[३] "रक्क्षः"[४] "रश्म्मिभि÷"[५] "देवेब्भ्य÷"[६] "ज्योति÷"[७] "आशिष÷"[८] "सत्त्या न÷"[९] "सुशेवा÷"[१०] "विश्श्वा÷"[११] "सर्व्वा÷"[१२] "वायव्व्या÷"[१३] "सदस्स्यै÷"[१४] "ओण्ण्योः"[१५], "वसोः पवित्त्रम्"[१६] "पोषैः"[१७] "सुमनाः"[१८] "विष्ण्णोः"[१९] "पत्तँ नीः"[२०] "देवयानैः"[२१] इति । उक्तं हि याज्ज्ञवल्क्यशिक्क्षायाम्— "ऊर्ध्वक्क्षेपाच् च योष्मा स्यादधऽ क्षेपाच् च या भवेत् । एकैकामुत्सृजेद् धीरस् स्वरिते तूभयङ्क क्षिपेत् ॥ स्वरितयँ यद् भवेत् किञ् चित् सवकारोष्मकन् ततः । ह्रस्स्ववँ वा यदि वा दीर्घन् निक्क्षेप उभयोरपि ॥ स्वरिते यत्त्र निक्क्षिप्ते सयँ योगो वाऽपि दृश्श्यते । द्विमात्त्रिके क्षिपेदेकाम् मात्त्रिके तूभयङ्क क्षिपेत् ॥ जात्त्ये च स्स्वरिते चैव वकारो यत्त्र दृश्श्यते । कर्त्तव्यस् तूभयोऽ क्षेपो वायव्व्या÷ इति दर्शनम् ॥ त्रिविधा तु भवेदूष्मा प्रचिता बलका तरा । स्वरिते प्रचितावँ विद्द्यान् निपाते बलकावँ विदुः । उत्थाने तु तथा तारामेताभिस् त्रिभिरूष्मभिः । मात्त्रामादौ विदित्त्वा तु ततऽ क्षेपम् प्रयोजयेत्"[२२] इति; "जात्त्ये च स्स्वरिते चैव यकारो यत्त्र दृश्श्यते । कर्त्तव्य उभयोऽ क्षेपस् सदस्स्यैरिति दर्शनम्"[२३] इति च । लघुमाद्ध्यन्दिनीयशिक्क्षायाञ् च— "कनिष्ठिकामोचनन् तु नीचे च प्प्रचये सति । नमः कूप्प्याय प्रथमो द्वितीयो जाग्ग्रतस् तथा । तर्जनीमोचनङ्क कुर्यादुदात्ते तु विसर्गके । देवो

---

१. मा.वा.शु.य.म. ब्र. य. सं. १।१० । २. तत्त्रैव १।३ ।
३. तत्त्रैव १।४ । ४. तत्त्रैव १।७ । ५. तत्त्रैव १।१२ ।
६. तत्त्रैव २।७ । ७. तत्त्रैव २।९ । ८. तत्त्रैव २।१० ।
९. तत्त्रैव । १०. तत्त्रैव ४।१२ । ११. तत्त्रैव १२।५६।
१२. तत्त्रैव १२।८८, ९४ । १३. तत्त्रैव २४।१९ ।
१४. तत्त्रैव ७।४५। १५. तत्त्रैव४।२५। १६. तत्त्रैव१।२।
१७. तत्त्रैव३।३७,८।५३। १८. तत्त्रैव३।४१। १९.तत्त्रैव ६।३, ४, ५ । २०. तत्त्रैव ६।२४ । २१. तत्त्रैव ९।१८ ।
२२. या. शि. शि. व. वि., पृ. ४९–५६ । २३. तत्त्रैव, पृ. ५४।

घर्म्मस् तथा ह्रस्स्वे स्वरिते तूभयङ्क क्षिपेत् । अश्श्वो मर्त्यो भवेल् लक्ष्यं स्वारे दीर्घे कनिष्ठिकाम् । उभयोरपि ह्रस्स्वे च वकारे स्वरिते सति । दीर्घेऽपि चोभयोऽ क्षेप इति शास्त्रव्यवस्थितिः"[1] इति; मल्लशर्मशिक्षायाञ् च— "ह्रस्स्वे स्स्वरितसयँ युक्ते वर्णे च सविसर्गके । कनिष्ठा तर्जनी चैव निष्काश्श्या हि स्स्वयूथतः । दीर्घे स्स्वरितसम्प्राप्ते ह्येकामेव कनिष्ठिकाम् । जात्त्ये युग्मवँ विशेषेण त्यक्तव्यमिति निश्चितम् । स्वरितेब्भ्यऽ क्रमेणैव दक्षिणोत्तरगामिनी । कनिष्ठा तर्जनी चैव त्याज्ज्या तूर्ध्वे हि देशिनी ॥ अनुदात्तयुते ह्रस्स्वे सस्स्वराच् च परेऽपि वै । सुज्ज्जैऽ कनिष्ठिका त्याज्ज्या सविसर्गे द्विजोत्तमैः"[2] इति; प्रातिशाख्यप्रदीपशिक्षायामपि— "उदात्तात् परे विसर्गे तर्जन्न्याऽ प्रसारणम्, अनुदात्तात् प्रचयाच् च परे कनिष्ठिकायाऽ प्रसारणम्, ह्रस्स्वात् स्वरितात् परे चोभयोस् तर्जनीकनिष्ठिकयोऽ प्रसारणम्; दीर्घात् स्वरितात् परे विसर्गे कनिष्ठिकायाऽ क्षेपः । वकारयुक्ताद् दीर्घादपि परे चोभयोः । यकारयुक्ताज् जात्त्यस्वरिताद् दीर्घादप्युभयोः"[3] इति। एतेषु च वचनेषु वकाररहितस्स्यापि दीर्घस्स्यापि जात्त्यस्स्व स्वरितस्स्य विसर्गे कनिष्ठातर्जन्न्योऽ क्षेपस्स्य विधायकवँ वचनयँ याज्ज्ञवल्क्यशिक्षायाऽ क्वाचित्के पाठे प्राप्प्ये श्लोके[4], मल्लशर्मशिक्षायाम्, प्रातिशाख्यप्रदीपशिक्षायाञ् च स्स्फुटम् प्राप्प्यते । याज्ज्ञवल्क्यशिक्षायास् सर्वेष्वपि पाठेषु प्राप्प्यमाणोऽन्न्यथासिद्धतया पठितो जात्त्यस्वरितविसर्गाङ्गुलिक्षेपविषयकश् श्लोकोऽपि[5] तत्तराऽनन्न्यथासिद्धतयाऽपि जात्त्यस्वरितविसर्गाङ्गुलिक्षेपविषयकवँ वचनमपि सर्वेष्वेव पाठेषु स्थितं स्यात्, तत् तु सम्प्रदायशैथिल्ल्यात् पतितम् भ्रष्टवँ वा स्यादिति सम्भावनामुपोद्बलयत्त्येव । तथापि लघुमाद्ध्यन्दिनीयशिक्षायावँ वकाररहितस्स्यापि दीर्घस्स्य जात्त्यस्स्य विसर्गे कनिष्ठातर्जन्न्योऽ क्षेपस्स्याऽनुल्लेखस् तु वकाररहिते दीर्घे सविसर्गे जात्त्ये कनिष्ठिकाया एव मोचनस्स्य पक्षम् प्रदर्शयत्त्येव । अतोऽत्तर विषये द्विविध एव सम्प्रदायो विज्ज्ञा-

---

१. श्लो. २३–२६ (शि.स., पृ. ११६) । २. श्लो. २२–२५ (शि. स., पृ. १५५–१५६) । ३. शि. स., पृ. २२४ । ४. शि. स , पृ. २४, श्लो. १६० । ५. श्लो. ६७, शि. स., पृ. ८–९; श्लो. १५९, शि. स., पृ. २३–२४; या. शि. शि. व. वि., पृ. ५३, श्लो. ६८ ।

यते। उक्तं हि सम्प्रदायप्प्रबोधिन्न्यां शिक्क्षायाम्— "यवौ दीर्घस्स्वरैर् युक्तौ स्वरितौ सविसर्गकौ। स्यातान् तदाऽङ्गुली क्षेप्प्ये इति गौडा वदन्ति नः। कनिष्ठिकैव क्क्षेप्प्येति दाक्क्षिणात्त्यास् तु मन्न्वते। (यथा) सदस्स्यैः, अतिविश्श्वाः"[1] इति। अत्तर प्प्रकरणे तर्जन्न्यादीनाङ्ग क्षेपो यत्तर्यत्तर प्प्रतिपादितम् तत्तरतत्तर अवशिष्टानामङ्गुलीनां स्वल्पन् न्यवनन् नान्तरीयकतया परिहर्तुन् दुश्शकत्त्वादनुमन्न्यते आचार्यैः, परिशिष्टानामङ्गुलीनाम् पूर्णतया न्यचनेन मुष्टीभावे प्राप्तिस् तु नाऽनुमन्न्यते ॥१२५–१३०॥

अनुस्स्वारे दीर्घभिन्नेऽङ्गुष्ठं हस्तकुलिम् प्रति।
आकुञ्चयेदत्तर दीर्घे तर्जनीं हि प्प्रसारयेत् ॥१३१॥
अनुस्स्वारे दीर्घभिन्ने तर्जनीपृष्ठकम् प्रति।
नयेदङ्गुष्ठशीर्षवँ वा सम्प्रदायाऽनुरोधतः ॥१३२॥
तर्जनीमूलपार्श्वेनाऽङ्गुष्ठमूर्द्ध्नो हि पार्श्वकम्।
श्लेषयन्त्यत्तर केचित् तु सम्प्रदायव्व्यवस्थया ॥१३३॥

उदाहरणानि यथा— "पृथिव्व्याँ शतेन पाशैः"[2] "मादयद्ध्वँ स्वाहा"[3], "माघशꣳशः"[4] "देवानाꣳ हृदयेब्भ्यः"[5] इति। उक्तं हि याज्ज्ञवल्क्यशिक्क्षायाम्— "अङ्गुठाकुञ्चनलँ लघावनुस्स्वारे त्वपाँ रसम्[6]। दीर्घे रङ्गे च तर्जन्न्याः प्रसारꣳ परिकीर्तितः"[7] इति। मल्लशर्मशिक्क्षायाञ्च— "अथ ꣳकारसञ्ज्ञा। ह्रस्स्वादग्रे भवेद् दीर्घो दीर्घादग्रे भवेल् लघु। देवानां हृदयन् त्यक्त्वाꣳ स्यादेव द्द्विलके परे। दीर्घे तु देशिनी त्याज्ज्या क्षिप्प्रं स्याद् द्द्विलके (गुरौ) लघौ। मन्तरे त्रिधा विधिर् ज्ज्ञेयो ब्राह्म्मणे तु द्द्विधा स्स्मृतः। अथ क्षिप्प्रविचारः। तर्जन्न्याꣳ पृष्ठसंश्लिष्टमङ्गुष्ठञ् चाऽग्रनामितम्। तवँ वँ क्षिप्प्रवँ विजानीयात् स्वरविद्भिरुदीरितम्"[8] इति। प्रातिशाक्ख्यप्रदीपशिक्क्षायामपि उक्तमल्लशर्मशिक्क्षावचनमुद्धृत्य "अयम् भावः— लघौ अनुस्स्वारे गुरौ अनुस्स्वारे च तर्जन्न्याꣳ पृष्ठमङ्गुष्ठाग्रेण नामितङ्ग कार्यम्। इदमप्प्यनुस्स्वारेऽङ्गुलिक्क्षेप

---

१. वर्धनीये पाठे, पृ. १७। २. मा. वा. शु. य. म. ब्र. य. सं. १।२५। ३. तत्तरैव २।१८। ४. तत्तरैव १।१। ५. तत्तरैव १६।४६। ६. मा. वा. शु. य. म. ब्र. य. सं. ९।३। ७. श्लो. ६२ (शि. स., पृ. ८)। ८. श्लो. २६–२८ (शि. स., पृ. १५६)।

इति सामान्येनोक्त्वा 'अङ्गुष्ठाकुञ्चनलँ लघावनुस्वारे तत्वपा७ रसम्। दीर्घे रङ्गे च तर्जन्याऽ प्रसारऽ परिकीर्तितः' इत्यनया दीर्घेऽनुस्वारे रङ्गे च तर्जन्याऽ प्रसारणम्, तदन्ये ह्रस्वे गुरौ चाऽनुस्वारेऽङ्गुष्ठाकुञ्चनमिति भगवता याज्ञवल्क्येन प्रतिपादितेन शास्त्रेणाऽप्यविरुद्धम् भाति। तर्जन्याकुञ्चनन् तु वाद्ध्याभावाद् विशेषविहितत्वाच् च भवति। अत एव विद्वांसोऽपि दीर्घेऽनुस्वारे तर्जन्याऽ प्रसारणलँ लघौ गुरौ चाऽनुस्वारे तर्जनीपृष्ठेऽङ्गुष्ठन् नामयन्ति"[1] इत्युक्तम्। सम्प्रदायप्रबोधिन्यां शिक्षायान् तु– "अनुस्वारो यत्तर दृश्यो धनुश्चिह्नने सुबिन्दुधृक्। लघुम् स मात्तिरको हस्ते तर्जन्यङ्गुष्ठयोगदः। सयँ योगे परतो ह्येव गुरुत्वं शास्तरतो भजेत्। षष्ठाङ्को रेफयुक् ठो वा पार्श्वे वोर्ध्वन् तु बिन्दुमान्। अनुस्वारन् द्विमात्तरन् तु बोधयेद् दीर्घसञ्ज्ञकम्। तर्जनीप्रसृतिश् तत्तर हस्तेनैवम् प्रदर्शनम्"[2] इत्युक्तम्। एवञ् च दीर्घभिन्नानुस्वारहस्तसङ्केतविषये दाक्षिणात्त्यानां सम्प्रदायो दाक्षिणात्त्यस्य बालकृष्णगोडशेर् वचनात् प्रातिशाख्यप्रदीपशिक्षायान्तर्गताद् विज्ज्ञायते, तस्य एतद्विषयकव्याख्यानाद् अस्मिन् विषये तत्समयेऽपि मतभेद आसीदिति च विज्ज्ञायते। एतद्विषये गौडानां सम्प्रदायश् च सम्प्रदायप्रबोधिन्या वचनाद् विज्ज्ञायते। अस्माभिरुक्तो दीर्घभिन्नानुस्वारहस्तसङ्केतविषयकऽ प्रथमऽ पक्षस् तु नैपालानाम् माद्ध्यन्दिनीयानाम् प्रथामनुसृत्त्य उपस्थापितो बोद्ध्यः। तत्तर च याज्ज्ञवल्क्यशिक्षायान प्प्रतिकूलता तत्तराङ्गुष्ठाकुञ्चनमात्तरस्य विहितत्वात् तर्जनीपृष्ठस्याऽनुल्लिखितत्वात्, प्रत्युत अनुकूलतैव एतत्पक्षानुकूलेनाङ्गुष्ठाकुञ्चनेनैव तस्याश् चरितार्थत्वस्य सम्भवात्। मल्लशर्मकृतक्षिप्प्रलक्षणे च यद्द्यपि "तर्जन्याऽ पृष्ठसंश्लिष्टम्" इति पाठः, स चैतस्य पक्षस्य प्रतिकूलो भाति, तथापि तत्तराऽसमर्थसमासत्वाऽऽपत्त्या 'तर्जन्या पृष्ठसंश्लिष्टम्' इति विसर्गरहितऽ पाठः 'तर्जनीपृष्ठसंश्लिष्टम्' इति समस्तैकपदात्मकऽ पाठो वा तत्तराऽऽवश्यको भाति; एवञ् च सति 'तर्जन्या सह स्वपृष्ठेन संश्लिष्टम् अग्ररनामितमङ्गुष्ठङ् क्षिप्प्रवँ विजानीयात्' इति क्षिप्प्रलक्षणवाक्यार्थो भवति; स चोक्तस्य प्रथमस्य पक्षस्याऽनुकूलो भवति। तत्तरेदमपि विचारणीययँ यदस्मिन् विषये याज्ज्ञवल्क्यशिक्षायायँ

---

१. शि. स., पृ. २२६। २. श्लो. ७५–७८ (पृ. १६–१७)।

युगलकिशोरपाठकसम्पादिते पाठे "अङ्गुष्ठाकुञ्चनलँ लघावनुस्स्वारे त्त्वपा७ रसम्[1]। दीर्घे रङ्गे च तर्जन्न्या४ प्रसार४ परिकीर्तितः ॥ ह्रस्स्वादग्रे भवेद् दीर्घो दीर्घादग्रे भवेल् लघुः। सयँयोगे च परे ह्रस्स्वस् सि७ ह्यसीति[2] निदर्शनम् ॥ तर्जन्न्यङ्गुष्ठयोस् स्पर्श उदात्तम् प्रति चक्क्षते। नीचन् तु मद्ध्यमे कुर्याच् छेषन् नीचतरङ्ग करमात् ॥ अनुस्स्वारो द्विमात्तरस् स्यादृवर्णव्यञ्जनोदये। ह्रस्स्वो वा यदि वा दीर्घो देवाना७ हृदये[3] तथा"[4] इति श्लोकानुपूर्वी दृश्यते; याज्ञवल्क्यशिक्क्षायास् सर्वेष्वेव पाठेषु अस्मिन्नेवाऽनुस्स्वारहस्तसङ्केतप्रकरणे "तर्जन्न्यङ्गुष्ठयोस् स्पर्श उदात्तम् प्रति चक्क्षते। नीचन् तु मद्ध्यमे कुर्याच् शेषन् नीचतरङ्ग करमात्"[5] इति श्लोक४ पट्ठ्यते; अयञ् च श्लोकश् शिक्क्षावल्लीकारेण हठात् सामस्स्वरहस्तसङ्केतप्रतिपादनपरतया नीतः[6]; वयन् तु दीर्घभिन्नस्स्याऽनुस्स्वारस्स्यैव उदात्तत्त्वे स्वरितत्त्वेऽनुदात्ततत्त्वे वा आकुञ्चितस्स्य अङ्गुष्ठस्स्य मूर्द्धन४ पार्श्वेन करमात् प्रदेशिनीमूले मद्ध्यमामूलेऽनामिकामूले च स्पर्शनवँ विदधात्त्यय श्लोकः; स तु विशेषस् सम्प्रदायशैथिल्यान् न सम्म्यगनुस्स्रियते; नैपालैर् माद्ध्यन्दिनीयैस् तु सर्वेष्वेव दीर्घभिन्नानुस्स्वारेषु आकुञ्चितस्स्य अङ्गुष्ठस्स्य मूर्द्धन४ पार्श्वेनाऽनामिकामूले स्पर्शनङ्ग क्रियते इति मन्न्यामहे ॥१३१-१३३॥

प्रसारयेत् तर्जनीं हि रङ्गे तु द्विविधेऽपि च।
दीर्घे यथासम्प्रदायन् तर्जनीवँ वा समद्ध्यमाम् ॥१३४॥

उदाहरणयँ यथा— "जहि शत्तरू१ँ।रप"[7] इति, "रथोस्म्मा२।ँऽ अश्न्नोतु"[8] इति। उक्तञ् च याज्ज्ञवल्क्यशिक्क्षायाम्— "अङ्गुष्ठाकुञ्चनलँ लघावनुस्स्वारे त्त्वपा७ रसम्। दीर्घे रङ्गे च तर्जन्न्या४ प्रसार४ परिकीर्तितः"[9] इति; सम्प्रदायप्रबोधिन्न्यां शिक्क्षायान् तु— "रङ्गे सर्वत्तर तर्जन्न्या४ प्रसार४ परिकीर्तितः। केचिन् मद्ध्यमया सार्धङ्क्षेपणङ्ग कुर्वतेऽमतम् ॥ केचन द्विमात्त्रिके रङ्गे तर्जन्न्या

---

१. मा. वा. शु. य. म. ब्र. य. सं. ९।३। २. तत्तरैव ५।१०।
३. तत्तरैव १६।४६। ४. श्लो. ६२-६५ (शि. स., पृ. ८)।
५. श्लो. ६४ (शि. स., पृ. ८), या. शि. शि व. वि., पृ. ५१।
६. या. शि. शि. व. वि., पृ. ५१। ७. मा. वा. शु. य. म. ब्र. य. सं. ७।३७। ८. तत्तरैव ३१।१३।
९. श्लो. ६२(शि. स., पृ. ८)।

सह मद्ध्यमामपि प्प्रदर्शयन्ति, तत् प्रदर्शनन् न सद्भिरनुमन्यते''[1] इत्युक्तम् । तथापि येषाम् नैपाल-माद्ध्यन्दिनीय-वाजसनेयि-प्प्रभृतीनां सम्प्रदायतो दीर्घे रङ्गे महारङ्गेऽतिरङ्गे वा समद्ध्यमायास् तर्जन्न्या४ प्रसार४ प्राप्तस् ते तन् त्यक्तुन् न शक्नुयुरिति ते यथासम्प्रदायन् तथाऽपि कुर्युरेवेति च स्स्वीकर्तव्यम् प्रतीयते ॥१३४॥

(ग) माद्ध्यन्दिनीयशतपथब्राह्मणहस्तस्स्वरविवरणम्

माद्ध्यन्दिनीये तु शत-पथे प्रोच्चीकृतेषु हि ।
अक्क्षरेषु करो मद्ध्ये स्वस्स्थाने स्स्यान् न संशयः ॥१३५॥
नीचीकृतेऽक्क्षरे हस्तोऽधो गच्छेद् वेगतस् तथा ।
निरन्तरेषु तेष्वेव वामतोऽधोऽथ दक्क्षिणे ॥१३६॥
अधोऽथो वामतोऽधस् चेत्त्येवं हस्तो व्व्रजेदिति ।
वदन्ति[2] केचिदन्न्ये तु वर्णयन्त्यन्न्यथाऽपि च ॥१३७॥
निरन्तरेषु नीचेषु कम्पन्तेऽन्त्यवं विनेतरे ।
आद्द्चेष्वल्पाल्पमाक्क्षिप्प्याऽन्त्येऽधो हस्तन् नयेदिति[3]॥१३८॥
उच्चीभूते तु जात्त्ये स्स्यान् मद्ध्य एव करस् तथा ।
न्युब्जके तादृशे हस्त ऊर्ध्वं स्यादिति चाऽपरे ॥१३९॥

एतद्विषये मल्लशर्मशिक्क्षावचनयँ यथा— ''वामस्स्था चोपरिष्ठा या मन्तरे वर्णस्स्य संस्थितिः । ब्राह्मणे सा तु मद्ध्यस्स्था ज्ज्ञेया मद्ध्यस्स्थिताऽपि वा ॥ यदुत्तरमधो याति मन्तरे याति च दक्क्षिणे । तदेव ब्राह्मणाक्ख्ये तु विपरीतगतिर् भवेत् ॥ जात्त्यम् मद्ध्ये स्स्थितन् नित्त्यमूर्ध्वे न्युब्जं समाश्श्रितम् । इति सङ्क्षेपनियमो ब्राह्मणेष्वेव निश्चितः''[4] इति । केचन तु— 'ब्राह्मणे तु बुधो न्युब्जीकृत्त्य मद्ध्ये धृतङ्ग करम् । उदात्तेऽधो नयेद् वेगान् नीचे तम् मद्ध्यमानयेत् ॥ द्वित्त्रा उदात्ता एकत्तर चेद् भवन्ति निरन्तराः । प्रथमेऽधोगतं हस्तन् नीचम् प्राप्प्योर्ध्वमानयेत्' इति वदन्ति; एतस्स्याम् भणितौ उदात्तपदेन वस्तुतो नीचीभूतस्स्योदात्तस्स्य, नीचपदेन च उदात्तीभूतानाम् नीचादीनाङ्ग्रहणमभिप्प्रेतम् मन्तव्व्यम् । शतपथब्राह्मणाद्ध्ययनधर्मविषयेऽभियुक्तानावँ वचनान्तरन् च यथा— ''अस्मिन् ब्राह्मणे उदात्तानुदात्तौ द्वावेव स्स्वरौ, न स्वरान्तरम् । यकारस्स्य जकारोच्चारणम्, षकारस्स्य

---

१. वर्धनीये पाठे, पृ.१७ । २. नैपाल-वैदिक-पण्डित-गुरुवर-बुद्धिसागरादयः । ३. नैपालवैदिकपण्डितसोमनाथदामोदरादयः । ४. श्लो. ४०-४२ (शि. स., पृ. १५७) ।

खकारोच्चारणम्, अनुस्स्वारस्स्य७ंकारोच्चारणम्, पदादिस्स्थवकारस्स्य द्वित्त्व-(सुस्स्पृष्ट-?)वकारोच्चारणम्, रेफस्स्योष्म-ऋकारैस् सयँ-युक्तस्स्य रे-(सै-?)कारोच्चारणम्, लकारस्स्योष्मसयँ युक्तस्स्य ले-(सै-?)कारोच्चारणम् माद्ध्यन्दिन-(ीय-?)संहितावद् भवति। विसर्गेष्वङ्गुलिप्प्रक्क्षेपणन् तु न क्क्रियते। यत्तर द्वयोरक्क्षरयोस् त्तरयाणावँ वाऽनुदात्तता तत्तर सर्वाण्यक्क्षराणि हस्तेन कण्ठेन च अनुदात्तानि उच्चारणीयानि"[1] इति ॥१३५-१३९॥

(घ) कृष्णयजुर्वेदतैत्तिरीयाऽऽत्तरेयशाखाहस्तस्स्वरप्रक्क्रिया

गोकर्णाकृतिके हस्ते निर्दिशेद् दक्क्षिणे स्स्वरान्।
अङ्गुलीषु च सर्वासु नयेदङ्गुष्ठमेव च ॥१४०॥
पुरुषो हि व्वरजेन् नारीन् न नारी पुरुषवँ व्वरजेत्।
तथाङ्गुलीषु सर्वासु व्वरजेदङ्गुष्ठ एव च ॥१४१॥
निवेश्श्य दृष्टिं हस्ताग्रे शास्त्रार्थमनुचिन्तयन्।
शिरऽकम्पवँ विहायैव स्वरन्न्यासं समाचरेत् ॥१४२॥
कनिष्ठानामिकामद्ध्यातर्जनीष्वङ्गुलीषु च।
आद्द्यान्त्यमद्ध्य-मद्ध्यासु रेखासु हि क्रमात् स्वरान् ॥१४३॥
नीचस्स्वारधृतोदात्तानङ्गुष्ठाग्रेण निर्दिशेत्।
स्फुटाङ्गुलिस्स्वरन्न्यासङ् करन् नीचे नयेद् हृदि ॥१४४॥
उदात्ते मूर्द्धिन स्स्वरिते कर्णमूले धृते मुखे।
एवं हस्तस्स्वरन्न्यासेऽद्ध्ययनन् निर्मलम् भवेत् ॥१४५॥

उक्तं हि व्यासशिक्क्षायाम्— "कनिष्ठानामिकामद्ध्यातर्जनीषूत्तमे करे। नीचस्स्वारधृतोदात्तानङ्गुष्ठाग्रेण निर्दिशेत्। आद्द्यन्तमद्ध्यामद्ध्यासु तद्रेखासु च तान् क्रमात्"[2] इति, हस्तस्स्वरविन्न्यासप्प्रकरणे, स्वरधर्मस्स्वरूपप्प्रकरणे च— "स्वारश् शीर्षे मुखेऽप्प्युच्चप्प्रचयौ निहतो हृदि"[3] इति। शम्भुशिक्क्षायान् च— "कनिष्ठिकाऽनामिका च मद्ध्यमा च प्प्रदेशिनी। नीचस्स्वारधृतोदात्तानङ्गुष्ठाग्रेण निर्दिशेत्॥ अनुदात्तऽ कनिष्ठादौ नाम्म्यन्ते स्स्वरितस् स्मृतः। प्रचयो मद्ध्यमामद्ध्ये तर्जन्न्यादावुदात्तकः॥ अनुदात्तो हृदि ज्ज्ञेयो मूर्द्धन्युदात्त उदाहृतः। स्वरितऽ कर्णमूलीयस् सर्वास्स्ये प्रचयस् स्मृतः"[4] इति। कौहलीयशिक्क्षायान् च— "स्वरान् हस्तेन

---

१. शतपथब्राह्मणभूमिकायाम्, पृ. ६ (द्वितीये भागे)।
२. सू. ३२६-३२८। ३. सू. २९२। ४. श्लो. ३४-३६।

विन्यस्स्येद् विपश्चिद् दक्षिणेन तु । श्रेयो विपुलमन्विच्छन् न सव्येन कदा चन ।। तेन चेन् निष्फलन् तस्स्य ब्रुवते ते विपश्चितः । अविदोषस् तथा कार्यस् तत एतद् विजानता ।। कनिष्ठिकाऽनामिका च मद्ध्यमा च प्रदेशिनी । नीचस्स्वारधृतोदात्तानङ्गुष्ठाग्रेण निर्दिशेत् ।। विन्यस्स्य द्विस्स्वरं सौम्यम् मद्ध्यमे पर्वणि स्स्पृशेत् । इह कीर्तिमवाप्नोति प्रेत्य स्वर्गे महीयते"[1] इति । सर्वसम्मतशिक्षायाम् च— "गोकर्णाऽऽकृतिहस्ते हि निर्दिशेद् दक्षिणे स्स्वरम् । निवेश्श्य दृष्टिं हस्ताऽग्रे शास्त्रार्थमनुचिन्तयन् ।। अङ्गुलीषु च सर्वासु नयेदङ्गुष्ठमेव तु ।। शिरःकम्पवँ विहायैव स्वरन्न्यासो विधीयते । कनिष्ठाऽनामिकामद्ध्यातर्जनीमद्ध्यपर्वसु । नीचस्स्वारधृतोदात्तान् क्रमेणैव विनिर्दिशेत्"[2] इति । पारिशिक्षायाम् च— "विनिर्दिशेत् तर्जनिमद्ध्यपर्वण्युच्चम् च नीचन् तु कनिष्ठिकादौ । अनामिकान्त्ये स्वरितम् च निर्दिशेत् तम् मद्ध्यमायाम् प्रचयम् च मद्ध्यमे"[3] इति, "गोधेनुकर्णाऽऽकृतिदक्षहस्ते ह्यङ्गुष्ठकाग्रेण विदर्शयेज् ज्ञः । स्वरेषु हस्ते च मनश् च दृष्टिङ् क्रमान् निवेश्श्याऽत्तर नियोजयेत् तत्"[4] इति, "ज्ञेयोऽनुदात्तो हृदि मूर्द्धन्युदात्तस् स्यात् कर्णमूले स्वरितन् तु विद्द्यात् । सर्वप्रतीके प्रचयस् स्मृतस् स्यात् स्थानं स्वराणामिदमेव नाऽन्न्यत्"[5] इति च । सर्वलक्षणमञ्जर्याम् च—"तर्जन्न्यादौ कनिष्ठाऽऽदौ तथैवाऽनामिकान्तिके । मद्ध्यमाङ्गुलिमद्ध्ये च स्स्वरन्न्यासो विधीयते ।। पुरुषो हि वर्जेन् नारीन् न नारी पुरुषवँ वर्जेत् । तथाङ्गुलीषु सर्वासु नयेदङ्गुष्ठमेव च"[6] इति । अत्तरापि यद्द्यपि अनुदात्तादौ अङ्गुलिस्स्वरसङ्केतयुतो हस्तो हृदयसमीपे स्थापनीय इत्त्यादिकोऽर्थस् स्फुटतया न कस्स्यामपि शिक्षायामुक्तस् तथापि शम्भुशिक्षावचनम् पारिशिक्षावचनम् च विचार्य "अनुदात्तो हृदि ज्ज्ञेयः"[7] इत्त्यादेर् "ज्ञेयोऽनुदात्तो हृदि"[8] इत्त्यादेश् च वचनस्स्य समन्वयायाऽस्माभिस् सोऽर्थः प्रकल्पितो वेदितव्यः॥१४०–१४५॥

---

१. श्लो. ३६–३९ । २. श्लो. १२०–१२२ (३।१०७–१०९)। ३. सू. ७३ । ४. सू. ७९ । ५. सू. ९८ । ६. व्या. शि. सू. ३३३, पृ. १२९ । ७. श. शि. श्लो. ३६ । ८. पारिशि. सू ९८ ।

भक्तेस् स्वरꣳ पृथक् चेत् तम् पृथगेव विनिर्दिशेत् ।
उक्तेषु नीचस्स्वारादिस्स्थानेषु हि यथाक्रमम् ।।१४६।।

तथा हि "ऋतस्स्य धूर्षदम्"[1] इत्त्यत्तर स्वरभक्तिरनुदात्ता, ताङ् कनिष्ठिकाया आद्द्चायां रेखायान् निर्दिशेत्, "सहस्स्रशीर्षन् देवम्"[2] इत्त्यत्तर स्वरभक्तिस् स्वरिता, ताम् अनामिकाया अन्त्यायां रेखायान् निर्दिशेत्; "मैत्त्रावरुणायर्षभम्"[3] इत्त्यत्तर स्वरभक्तिꣳ प्रचिता, ताम् मद्ध्यमाया मद्ध्यमायां रेखायान् निर्दिशेत्, "इन्द्रियायर्षिब्भ्यः"[4] इत्त्यत्तर स्स्वरभक्तिरुदात्ता, तान् तर्जन्न्या मद्ध्यमायां रेखायान् निर्दिशेत् । तथा हि व्यासशिक्क्षायाम्— "पृथक् तदङ्गुलिस्स्थानम् भक्तेर् यस् स्वर उच्च्यते"[5] इति; पारिशिक्क्षायाम् च—"भक्तेर् भवेत् यत् स्वर उच्च्यते पृथक् तदङ्गुलिस्स्थानमुदात्तकादिः"[6] इति ।।१४६।।

स्वारमुच्चनिभम् चाऽनुस्स्वारन् तस्मात् परङ् क्रमात् ।
अनामिकाया मद्ध्यान्त्यरेखयोर् हि विनिर्दिशेत् ।।१४७।।

तथा हि "गोमा७ं अग्ने"[7] इत्त्यत्तर उदात्ततुल्यतया स्थिते स्वरिते आकारे अङ्गुष्ठाग्रम् अनामिकाया मद्ध्यायां रेखायान् नयेत्, तदुत्तरवर्तिनि अनुस्स्वारे त्वङ्गुष्ठाग्रम् अनामिकाया अन्त्यायां रेखायां नयेत् । एवमेव "योऽ७ंशुम्"[8] इत्त्यत्तराऽपि । उक्तं हि व्यासशिक्क्षायामपि— "स्वारमुच्चमिवोर्ध्वम् च ह्यनामिकान्तराद्द्चयोः"[9] इति।पारिशिक्क्षायाम् च—"स्वारयँ यदि ह्युच्चमिवोर्ध्वक्रम् च ह्यनामिकामद्ध्यमकान्त्ययोश् च"[10] इति ।।१४७।।

स्वारकम्पे तस्स्य प्रोच्चनीचभागौ क्रमाद् बुधः ।
अनामिकाया अन्त्याद्द्चरेखयोर् हि विनिर्दिशेत् ।।१४८।।

स्वरितोदये कम्पे कम्पस्स्वरितस्स्य आद्द्चमुच्चम् भागम् अनामिकाया अन्त्यायां रेखायाम् अन्त्यन् नीचम् भागम् अनामिकाया आद्द्चायां रेखायावँ विनिर्दिशेत् । यथा "सो३ऽपो३ऽब्भ्यम्रियत"[11] इत्त्यत्तर । उक्तं हि व्यासशिक्क्षायाम्—"स्वारकम्पे स्वरावेतावनामिको-

---

१. तै. ब्रा. १।२।१।१२ । २. तै. आ. १०।११।१ ।
३. तै. ब्रा. १।८।२।४ । ४. तै. आ. १०।६।१ (आन्ध्रपाठे १०।८)
५. सू. ३२९ । ६. सू. ७४ । ७. तै. सं. १।६।६।४ ।
८. तत्त्रैव ३।३।४।३ । ९. सू. ३३० । १०. सू. ७५ ।
११. तै. सं. ६।१।१।७ ।

त्तमाद्द्वयोः''[1] इति; पारिशिक्क्षायाम् च—''तौ स्वारकम्पे स्वरिताऽनुदात्तावनामिकान्त्याऽऽदिमरेखयोश् च''[2] इति ॥१४८॥

उच्चकम्पे तस्स्य प्रोच्चनीचभागौ यथाक्रमम् ।
प्रदेशिन्न्या मद्ध्यमाऽऽद्द्वरेखयोर् हि विनिर्दिशेत् ॥१४९॥

उदात्तपरके कम्पे तु तस्स्य आद्द्वमुदात्तभागम् प्रदेशिन्न्या मद्ध्यमायां रेखायाम्, अनुत्तमनुदात्तभागम् च प्रदेशिन्न्या आद्द्वायां रेखायान् निर्दिशेत् । उक्तं हि व्यासशिक्क्षायाम्— ''निर्दिशेदुच्चकम्पे च तर्जनीमद्ध्यमाऽऽद्द्वयोः''[3] इति । पारिशिक्क्षायाम् च— ''उदात्तनीचौ क्रमशः प्रदेशिनीमद्ध्याद्द्वयोर् निर्दिशेदुच्चकम्पे''[4] इति । अत्तरोदाहरणम् च ''तेऽ१स्मद्''[5] इति, ''तेन योऽ१स्मत्''[6] इति, ''तेनान्योऽ१स्मत्''[7] इति च ॥१४९॥

स्वतन्तरस्स्वरकस्स्याऽपि विरामे व्यञ्जनस्स्य तु ।
स्यात् तत्पूर्वस्स्वरस्स्थाने निर्देशो न पृथग् भवेत् ॥१५०॥

स्वतन्तरस्वरयुक्तस्स्याऽपि व्यञ्जनस्स्य विरामे तत्पूर्ववर्तिस्वराङ्गुलिरेखायामेव निर्देशो भवति, पृथग् निर्देशो नैव भवति । यथा— अवाङ्, वृषण्वानिति वृषण्- वान्, जनान् (यातयति), अश्नन्, ऊर्ज्जम्, वषट्, तस्मात् इत्यादौ । उक्तं हि व्यासशिक्क्षायाम्— ''विरामे व्यञ्जनस्स्यैव पृथक् स्थानन् न विद्द्यते''[8] इति; शम्भुशिक्क्षायाम् च ''अङ्गुलीस्स्वरनिर्देशे व्यङ्गमङ्गो (व्यञ्जनाङ्गन् ?) न निर्दिशेत् । अङ्गेतत्वन्न्यांशन् नादाऽनुस्स्वारजं स्वरितन् न्यसेत्''[9] इति; पारिशिक्क्षायाम् च— ''तद् व्यञ्जनस्स्यैव विरामकाले न स्स्यात् पृथक् स्थानमुपैति पूर्वम्''[10] इति ॥१५०॥

(ङ) चारायणीयशाखाहस्तस्वरप्रक्क्रिया

हस्तस्स्वरक्क्रमश् चारायणीयानाम् प्रतीयते ।
माद्ध्यन्दिनीयवत् तस्स्योत्सन्नतत्वान् न स तन्न्यते ॥१५१॥

तथा हि चारायणीयशिक्क्षायाम्— ''स्वरात् स्वरं सङ्क्रमयेत् स्वरे सन्धिमनुल्बणम् । अविच्छिन्नं समङ्क कुर्यात् सूक्क्ष्माच् छायोतपोरसम् ॥ समं स्वरम् पठेन् नित्त्यम् मार्गहस्ते प्रदर्शयेत् । यद् वाणी गच्छति स्स्थानन् तद् धस्तेन प्प्रदर्शयेत् ॥ यथा वाणी तथा पाणिर्

---

१. सू. ३३१ । २. सू. ७६ । ३. सू. ३३२ ।
४. सू. ७७ । ५. तै. आ. २।४।१ । ६. तत्तरैव ।
७. तत्तरैव । ८. सू. ३३३ । ९. श्लो. २९ । १०. सू.७८।

विस्स्वरम् परिवर्जयेत् । यत्तरैवाऽवस्स्थिता वाणी पाणिस् तत्तरैव गच्छति ।। स्वरस्स्याऽनुगतं हस्तन् नृणामिव शुभाशुभम् । हस्तस्स्याऽनुगता दृष्टिश् छायेवाऽनुविधावति ।। हस्तवँ वागनुगङ्ग कृत्वा वाचङ्ग कृत्वा मनोनुगाम् । दृष्टिं हस्तगताङ्ग कृत्वा तरैस्स्वर्यस्स्येति लक्षणम् ।। स्वरतश् च (स्वर उच्चस्?) स्वरो नीचस् स्वरस् स्वरित उच्च्यते । स्वरम् प्रधानन् तरैस्स्वर्ये प्राहुरक्षरचिन्तकाः ।। सुखोपविष्टश् शुचिरेकचित्तो विवर्जितत्तरासमदाश्रयस् तु । यथर्तु युक्ताशनपानभोजी वेदम् पठेद् वर्जितवर्णदोषम् ।। दक्षिणाक्षिनिपातेन दृष्टिं हन्न्यात् कनीयसीम् । नासागण्डब्भ्रुवोस् सन्धिमुदात्तविधये विदुः ।। पुटिर् दण्डस् स्फुटिर् वीणा मुष्टिर्को धनुराकृतिः । षडेते हस्तदोषास् तु परशुश् चेति सप्तमः ।। उत्तानं सोन्नतङ्ग किञ् चित् सुव्यक्ताङ्गुलिरञ्जितम् । स्वरवँ विद्धङ्ग (स्वरवित् तु ?) करङ्ग कुर्यात् प्रादेशोद्देशगामिनम्"[1] इति ।।१५१।।

(च) सामवेदहस्तस्स्वरप्रक्रियाविवरणम्

शारीरी दारवी चेति द्वे वीणे गानजातिषु ।
सामिकी गात्तरवीगा हि तस्स्याश् शृणुत लक्षणम् ।।१५२।।
शारीरी खलु सा वीणा यस्स्याङ्ग गायन्ति सामगाः ।
स्वरव्यञ्जनसयँ युक्ता अङ्गुल्यन्तररञ्जिता ।।१५३।।
हस्तौ सुसयँ यतौ धार्यौ जानुब्भ्यामुपरि स्स्थितौ ।
गोकर्णवद् दक्षिणस् स्याद् वाम उत्तानको भवेत् ।।१५४।।
नासिकायास् तु पूर्वेण हस्तङ्ग गोकर्णवद् धरेत् ।
गुरोरनुमतिङ्ग कुर्याद् यथा ज्ज्ञानमतिर् भवेत् ।।१५५।।
प्रसार्य चाङ्गुलीस् सर्वा रोपयेत् स्वरमण्डलम् ।
न चाऽङ्गुलीभिरङ्गुष्ठमङ्गुष्ठेनाङ्गुलीस् स्पृशेत् ।।१५६।।
विरला नाऽङ्गुलीः कुर्यान् मूले चैना न संस्पृशेत् ।
अङ्गुष्ठाग्रेण ता नित्यम् मद्ध्यमे पर्वणि स्स्पृशेत् ।।१५७।।
मात्तरद्द्विमात्तरवृद्धानावँ विभागार्थवँ विभागवित् ।
अङ्गुलीभिर् द्विमात्तरन् तु पाणेस् सव्यस्स्य दर्शयेत् ।।१५८।।
यवान्तरं सामसु तु ऋक्षु कुर्यात् तिलान्तरम् ।
अङ्गुष्ठस्स्याङ्गुलीभिस् तु सम्बन्धे मद्ध्यपर्वसु ।।१५९।।

---

१. पृ. २३–२४ ।

अणुमेकमङ्गुष्ठे तु प्रदेशिन्न्यान् तथैव च ।
तृतीये चैव तु कर्तव्ये (तुर्ये च ?) प्रणतैव प्रयुज्यते ॥१६०॥
द्वे अणण्वनन्तरेऽङ्गुष्ठस्य प्रदेशिन्न्यान् तु षट् स्मृताः ।
अर्धमात्तरतृतीयस्य प्रणतैव प्रयुज्यते ॥१६१॥
न चाऽतत्र कम्पयेत् कञ्चित् शरीराऽवयवम् बुधः ।
निवेशस्य दृष्टिं हस्तागरे शास्तरार्थञ् चानुचिन्तयेत् ॥१६२॥
समुच्चारयेद् वाक्यं हस्तेन च मुखेन च ।
यथैवोच्चारयेद् वर्णांस् तथैवैतान् समापयेत् ॥१६३॥
करुष्टस्य मूर्धनि स्स्थानलं ललाटे प्रथमस्य तु ।
भ्रुवोर् मद्ध्ये द्वितीयस्य तृतीयस्य तु कर्णयो ॥१६४॥
कण्ठस्स्थानन् तु तुर्यस्य मन्द्रस्स्योरसि तूच्यते ।
अतिस्स्वारस्य नीचस्य हृदि स्स्थानवं विधीयते ॥१६५॥
अङ्गुष्ठस्योत्तमे करुष्टोऽङ्गुष्ठे तु प्रथमस् स्वरः ।
प्रदेशिन्न्यान् तु गान्धार ऋषभस् तदनन्तरम् ॥१६६॥
अनामिकायां षड्जस् तु कनिष्ठायाञ् च धैवतः ।
तदधो यन् मूलपर्व निषादन् तत्र विन्यसेत् ॥१६७॥
अपर्वतत्वादसञ्ज्ञतत्वादव्ययत्वाच् च नित्यशः ।
मन्द्रो हि न हि भूतस् तु परिस्स्वार इति स्स्मृतः ॥१६८॥

अत्तरोपस्थापितेषु नारदीयशिक्षा[1]— लोमशीयशिक्षा[2]—वचनेषु मद्ध्ये अङ्गुष्ठस्य अङ्गुलीनाम् पर्वभिस् सह सम्बन्धे पूर्णस् स्वरशो वा समीपस्थितिरेव वा कियत्समीपस्थितिरिति वेति विषयस्य प्रतिपादका इति प्रतीयमानाश् श्लोका 'यवान्तरं सामसु तु' इत्यादयो दुर्बोधार्थाः । तत्र आधुनिकानां सुसम्प्रदायज्ञानामभियुक्तानां सामगानां हस्तस्स्वरप्रक्रियां सम्यक् परीक्ष्याऽर्थस्य निर्णये प्रयतितव्यम् । 'करुष्टस्य मूर्धनि स्स्थानम्' इत्यादिभिश् श्लोकैस् तु हस्तस्स्वरप्रक्रियाप्रकरणे पठ्यमानैस् तत्तदङ्गुलीस्वरनिर्देशसहितस्य हस्तस्य मूर्धसमीपादौ धारणम् प्रतिपाद्यते इति स्स्वीकर्तव्यन् तेषाम् 'अङ्गुष्ठस्योत्तमे करुष्टः' इत्यादिभिश् श्लोकैस् सह समन्वयाय । उक्तानामेव श्श्लोकानामर्थमनुसृत्य सामगानेऽङ्गुलिस्स्वरनिवेशोऽन्यैरप्यभियुक्तैर् वर्णितः । तथा हि— "अथ स्वरावन्यासः । तर्जन्न्या उपरि द्वियवान्तरोऽङ्गुष्ठ* करुष्टस्य बोधकः, एकयवान्तरोऽङ्गुष्ठ* प्रथमस्य, तर्जनीमद्ध्यरेखा द्वितीयस्य, मद्ध्यमा-

१. १।६।१–१।७।५ । २. ५।७, ८ ।

मद्ध्यरेखा तृतीयस्य, अनामिकामद्ध्यरेखा चतुर्थस्य, कनिष्ठिका मद्ध्यरेखा मन्द्रस्य, तन्मूलरेखाऽतिस्वार्यस्य । अङ्गुष्ठेन द्वितीयादिस्वरोच्चारणे तास्ता रेखास् स्पर्शयेत्"[1] इति सामतन्त्रभूमिकायां रामनाथदीक्षितमहाशयः प्राह । शतपथब्राह्मण-द्वितीयखण्ड-प्राक्कथने विद्द्याधरशर्ममहाशयस् तु "सामवेदे गाने मद्ध्यम-गान्धार-ऋषभ-षड्ज-धैवत-निषाद-पञ्चमेतिक्रमेण सप्त स्स्वराः क्रियन्ते । तत्र मद्ध्यमे हस्तो रिक्त एव स्स्थाप्यते । गान्धारे अङ्गुष्ठेन तर्जन्या मद्ध्यमम् पर्व स्स्पृश्यते । ऋषभेऽङ्गुष्ठेन मद्ध्यमाङ्गुलिमद्ध्यपर्व, षड्जेऽनामिकामद्ध्यपर्व, धैवते कनिष्ठामद्ध्यपर्व, निषादे कनिष्ठामूलम्, पञ्चमे तर्जन्यग्रं स्पृश्यते । यस्य वर्णस्योपरि ^ एतच् चिह्नन्नन् तस्य दीर्घमुच्चारणन् तर्जनीमद्ध्यस्स्पर्शो हस्तस्य तिर्यक्करणञ् च भवति । यत्र — एतद् दण्डसदृशञ् चिह्नन्नन् तत्र तर्जनीमारब्ध्य कनिष्ठिकापर्यन्तं स्पृशेत् । यत्र उ/२ एतच् चिह्नन्नम् भवेत् तत्र पूर्ववत् तर्जनीमारब्ध्य कनिष्ठिकान्तङ् कनिष्ठामारब्ध्य तर्जनीयँ यावत् स्पृष्ट्वा मद्ध्यमामन्तः क्षिपेत्, ब्रह्ममतीर्थस्संस्पृष्टाङ् कुर्यादिति । यत्र क/३ एतच् चिह्नन्नम् भवेत् तत्र मद्ध्यमाग्रमारब्ध्य मूलयँ यावत् स्पृशेत् । यत्र वर्णस्योपरि ∽ (इति) लिखितं स्यात् तत्र तर्जनीमूलमारब्ध्य अग्रयँ यावत् स्पृशेत् । विरामे विसर्गं सानुनासिकमुच्चरेत् । अनुनासिकस्य चोच्चारणम् भवति (?) । दीर्घमृकारं रे इत्युच्चरेत् । ऋकारस्य च रे इत्युच्चारणं षकारहकारयोर् योगे विधेयम् । सामसंहितायाम् मद्ध्यम-गान्धार-ऋषभास् त्रय एव स्स्वराः क्रमेण स्वरितोदात्तानुदात्ता भवन्ति"[2] इति प्राह स्स्म । तत्र रामनाथदीक्षितमहाशयस्य कथनन् तु नारदीयशिक्षामेवाऽनुसरद् दृश्यते । विद्द्याधरशर्मणः कथनन् तु वस्तुतः कङ्ग्रन्थमनुसरतीति न ज्ञायते । तत्र नारदीयशिक्षादिषु सर्वत्र सामगानसम्बद्धा हस्तस्स्वरप्रक्रिया एव वर्णिता; सामवेदार्चिकसंहितायां अध्ययने कथं हस्तस्स्वरविन्न्यासः कार्य इत्यस्य विषयस्य तु विशेषतः प्रतिपादनन् न कुत्राऽप्युपलब्ध्यते प्राचीनेषु ग्रन्थेषु । तत्रोत्सर्गाद् ऋग्वेदहस्तस्स्वरप्रक्रिया एवाऽवलम्बनीया प्रतीयते ॥१५२-१६८॥

---

१. पृ. ४६ । २. पृ. ६-७ ।

(छ) अथर्ववेदहस्तस्स्वरप्रक्क्रियानिरूपणम्

स्वरे ज्ञात्वा यथास्स्थानं हस्तस्य स्स्यन्दनं स्मृतम् ।
निष्कृष्य हस्तवं विन्न्यस्तम् पाणौ दृष्टिन् निवेशयेत् ।।१६९।।
किञ्चिद्गो नभसस् स्वासाद् बाहौ दृष्टिन् निपातयेत् ।
प्रसार्य चाऽङ्गुलीस् सर्वाश् चालयेत् करमण्डलम् ।।१७०।।
न चाऽङ्गुलीभिरङ्गुष्ठमुपेयाद् दोषवित् ततः ।
ऊर्ध्वमायुस्तमाकुञ्चमङ्गुष्ठं स्थापयेद् बुधः ।।१७१।।
नाऽधश्शिरा नावनता नाऽङ्गुल्यऽ प्रतरास् स्मृताः ।
उत्तानं सोन्नतङ्ग किञ् चित् सुव्यक्ताङ्गुलिरञ्जितम् ।।१७२।।
स्वरविद्धङ्ग करङ्ग कुर्यात् प्रादेशोद्देशगामिनम् ।
अङ्गुष्ठसस्योत्तरे पर्वे यवस्स्योपरि यद् भवेत् ।।१७३।।
प्रादेशस्स्य तु तद्देशस् तन्मात्तरञ् चालयेत् करम् ।
कूर्मोऽङ्गानीव संहृत्य चेष्टा दृष्टिन् दृढम् मनः ।।१७४।।
न कम्पयेच् छिरऽपादौ मुखदोषाँश् च वर्जयेत् ।
नासिकायास् तु पूर्वेण हस्तं सञ्चालयेद् बुधः ।।१७५।।
श्रुतिवं वाचोऽनुगाङ्ग कृत्वा वाचङ्ग कृत्वा मनोऽनुगाम् ।
दृष्टिं हस्तानुगाङ्ग कृत्वा ततऽ पदविदारभेत् ।।१७६।।
यथा वाणी तथा पाणी रिक्तन् तु परिवर्जयेत् ।
यत्तरैव तु स्स्थिता वाणी पाणिस् तत्तरैव धार्यते ।।१७७।।
चुलुर् नावा स्स्फुटो दण्डी स्वस्तिको मुष्टिरेव च ।
एते वै हस्तदोषास् स्युऽ पर्शुच्छेदस् तु सप्तमः ।।१७८।।

उपर्युद्धृतेषु माण्डूक्क्याश् शिक्क्षाया[1] वचनेषु 'किञ्चिद्गो नभसः' इति पाठो दुर्बोधार्थोऽस्ति, स च भ्रष्टऽ प्रतीयते; तत्तर 'किञ्चित्तनम्भ्रासकः' इति पाठस् सम्भाव्यते। 'ऊर्ध्वमायुस्तमाकुञ्चम्' इति पाठोऽपि दुर्बोधार्थ एवाऽस्ति, सोऽपि भ्रष्टऽ प्रतीयते; तत्तर 'ऊर्ध्वास्स्वासु समाकुञ्चम्' इति पाठस् सम्भाव्यते । प्रादेशोद्देश-विवरणश्श्लोकस्स्य विषये याज्ञवल्क्यशिक्क्षोक्तशुक्लयजुर्वेदहस्त-स्स्वरविन्न्यासप्रकरणे पूर्वमेवोक्तम्[2] ।।१६९–१७८।।

अनामिकाया मद्ध्याया रेखायान् निहते स्स्वरे ।
कनिष्ठायास् तु मद्ध्याया रेखायाम् प्रचिते तथा ।।१७९।।

---

१. श्लो. २०-३० (शि.स., पृ. ४६४–४६५)। २. पृ. ४०७-४०८।

तस्स्या मूले स्स्थितायाञ् च रेखायामुच्चके बुधः ।
नयेदङ्गुष्ठमूर्धानं स्वरिते तु स्स्वरे नयेत् ॥१८०॥
अङ्गुष्ठाग्रसमीपस्स्थरेखायान् तर्जनीशिरः ।
इतीव सूचयन् भाति मण्डूकोऽथर्वशिक्क्षकः ॥१८१॥

माण्डूक्क्या शिक्क्षाया सामस्स्वराणामङ्गुलीषु विन्न्यासः "बाह्य्याङ्गुष्ठन् तु क्रुष्टं स्यादङ्गुष्ठे मद्ध्यमस् स्वरः । प्रादेशिन्न्यान् तु गान्धारो मद्ध्यमायान् तु पञ्चमः । अनामिकायां षड्जस् तु कनिष्ठायान् तु धैवतः । तस्स्याऽधस्तात् तु योऽन्न्यस् स्यान् निषाद इति तवँ विदुः"[1] इति प्प्रतिपादितः; अथर्ववेदहस्तस्स्वरविन्न्यासविषये तु व्यक्तञ्च किमपि नोक्तम्, केवलम् "प्रथमावन्तिमौ चैव वर्तन्ने छन्दसि स्स्वराः । त्रयो मद्ध्या निवर्तन्ते मण्डूकस्स्य मतयँ यथा ॥ द्वितीयं स्वरितम् प्राहुष् षष्ठꣳ प्रचित उच्च्यते । उच्चचवँ विद्द्यान् निषादन् तु नीचं षड्जमुदाहृतम्"[2] इत्त्युक्त्वा "स्वरे जज्ञात्वा यथास्स्थानं हस्तस्स्य स्स्यन्दनं स्मृतम्"[3] इत्त्येवोक्तम् । अतोऽस्माभिर् मण्डूकवचनानुसारीणि षड्ज-षष्ठ(धैवत)-निषाद-द्वितीय(ऋषभ)-स्स्थानानि एव निहतप्प्रचितोदात्तस्स्वरितस्स्थानत्त्वेन प्प्रदर्शितानि । तत्त्र सामस्स्वरविन्न्यासप्प्रतिपादके मण्डूकवचने "बाह्य्याङ्गुष्ठम्" इति पदेन किञ्चिद्बाह्य्यमिति निर्णेतुन् दुश्शक्यमेव, क्रुष्टपदेन ऋषभस्स्य ग्रहणमपि दुर्व्याक्ख्यानमेव, 'न चाऽङ्गुलीभिरङ्गुष्ठमुपेयाद् दोषवित् ततः'[4] इति वचने जागरति सति "अङ्गुष्ठे मद्ध्यमस् स्वरः" इत्त्यस्स्याऽर्थोऽपि दुर्ग्रह एव; तथापि यथाकथञ्चित् समन्न्वयम् परिकल्प्य अस्माभिस् स्वकीयासु कारिकासु प्प्रतिपादितोऽर्थो मण्डूकमुनिसूचिततत्त्वेन प्प्रतिपादितो बोद्ध्यः । "प्रादेशस्स्य तु तद् देशस् तन्मात्त्रन् चालयेत् करम्"[5] इति मण्डूकस्स्य वचनम्, अनुपदमेवोपस्स्थापयिष्ध्यमाणम् मुष्ट्याकृत्त्यङ्गुलिक्क्षेपादिप्प्रतिपादनञ् च अथर्ववेदस्स्य हस्तस्स्वरन्न्यासो माद्ध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदमन्त्रस्स हिताहस्तस्स्वरन्न्याससदृश आसीदिति सूचयत् प्रतीयते । देवा अत्त्र सततत्त्वन् ज्ञातुमर्हन्ति ॥१७९-१८१॥

---

१. श्लो. १५-१६ (शि. स., पृ. ४६४) । २. श्लो. १७-१८ (शि. स., पृ. ४६४) । ३. श्लो. २० (शि. स., पृ. ४६४) । ४. माण्. शि. श्लो. २२ (शि. स., पृ. ४६५) । ५. श्लो. २५ (शि. स., पृ. ४६५) ।

कटान्तयोत् तु कर्तव्यमङ्गुल्यग्रप्रकुञ्चनम् ।
ङणनान्ते तथैव स्स्यात् पान्ते त्वङ्गुलिपीडनम् ।।१८२।।
नखस्स्य दक्क्षिणे पार्श्वे नकारान्तन् निवेदयेत् ।
मान्ते मुष्ट्याकृतिङ् कुर्यात् तकारान्ते विश्श्लेषयेत् ।।१८३।।
ह्रस्स्वानुस्स्वारकरणे त्वङ्गुष्ठाग्रप्रकुञ्चनम् ।
दीर्घे तु सूरयः प्राहुः प्रदेशिन्न्याः प्रसारणम् ।।१८४।।
ऊर्ध्वक्क्षेपाऽपि या मात्त्रा अधःक्षेपाऽपि या भवेत् ।
एकैकामुत्सृजेद् धीरः प्रचिते तूभयङ् क्षिपेत् ।।१८५।।

माण्डूक्क्याश् शिक्क्षाया एतानि वचनानि[1] अथर्ववेदस्स्य हस्तस्स्वरप्रक्क्रिया माद्ध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदमन्त्रसंहिताहस्तस्स्वरप्रक्क्रियासदृशी अभूदिति सूचयन्ति । तत्त्र 'अङ्गुल्यग्रप्रकुञ्चनम्' इत्त्यत्त्र 'अङ्गुलिपीडनम्' इत्त्यत्त्र च अङ्गुलिपदेन किङ् ग्राह्य्यमिति स्स्फुटन् नास्ति, 'नखस्स्य दक्क्षिणे पार्श्वे' इत्त्यत्त्र नखपदेन च कतमो नखो ग्राह्य्य इति न विज्ज्ञायते; 'एकैकामुत्सृजेद् धीरः' इत्त्यत्त्र 'प्रचिते तूभयङ् क्षिपेत्' इत्त्यत्त्र च कयोरङ्गुल्योर् ग्रहणमिति दुर्ज्ज्ञानमेव ग्रन्थादस्मात्; "ऊर्ध्वक्क्षेपाऽपि या मात्त्रा अधःक्षेपाऽपि या भवेत्" इत्त्यत्त्र 'ऊर्ध्वक्क्षेपा मात्त्रा', 'अधःक्षेपा मात्त्रा' इत्त्यनयोरर्थोऽप्यस्स्फुट एव । एतेषाँ वचनानान् तुल्यैर् याज्ज्ञवल्क्यशिक्क्षादिवचनैस् सहैतेषाँ विचारे कृते तु एतेषामर्थोनिर्णेतुं शक्क्यो विभाव्यते । अङ्गुलिस्स्वरविन्न्यासेन सह तु एतस्स्याः प्रक्क्रियायास् समन्न्वयो दुष्कर एव, यतो हि अन्त्यानाङ् ककारादीनामपि तत्पूर्वस्स्वरघटिताक्क्षरघटकतया स्वघटिताक्क्षरस्वरनिर्देशस्स्याने एव निर्देश्श्यतायाः प्राप्तिरुत्सर्गत एव भवति । अन्न्येष्वपि वेदेषु यत्त्र अङ्गुलिपर्वरेखासु स्वरनिवेशनवँ विहितन् तत्त्रैतादृशी व्यवस्स्था दृष्टचरी नाऽस्ति । अतोऽनया शिक्क्षया सम्बद्धस्स्याऽथर्ववेदस्स्य हस्तस्स्वरप्रक्क्रिया माद्ध्यन्दिनीयमन्त्रसंहिताहस्तस्स्वरप्रक्क्रियासदृशी एवेति सम्भाव्यते ।।१८२–१८५।।

२०. अथ स्वराङ्कनरीतिविवरणम्

शिक्क्षाशास्त्रमिदन् नेदलँ लिपिशास्त्रन् तथापि च ।
कण्ठस्स्वरेऽधुना मोहाच् श्रोत्त्रियाणां सतामपि ।।१८६।।

---

१. श्लो. ४६–४९ (शि. स; पृ. ४६७) ।

शिक्क्षार्थज्ज्ञानसाहाय्यकरी स्स्वरलिपिर् भृशम् ।
अतोऽत्तर सा स्वराद्ध्यायखिलग्रन्थेन वर्ण्यते ॥१८७॥
उदात्तादीन् प्रयोज्ज्यान् हि मुखेन च करेण च ।
वेदलेखेऽपि निर्देष्टुम् प्रयुज्ज्यन्ने च रेखिकाः ॥१८८॥
ब्राह्मी खरोष्ठिका गुप्ता कुटिला रञ्जना तथा ।
नागरी च ततो नन्दिनागरी देवनागरी ॥१८९॥
इत्त्येवलँ लिपयो भिन्नाऽ कालेकाले यथाऽथ वा ।
शारदा नागरी चैव मैथिली वङ्गजा तथा ॥१९०॥
गौर्जरी च द्राविडी च ग्रन्थार्था चाऽथ नैवरी ।
इत्त्येवलँ लिपयो भिन्ना देशेदेशे यथा तथा ॥१९१॥
देशेदेशे तथा कालेकाले लेखेषु रेखिकाः ।
वेदेवेदे च विविधा दृश्यन्ते स्स्वरसूचिकाः ॥१९२॥
दृष्टा लेखेषु हि स्वराङ्कनपद्धतयोऽखिलाः ।
ग्रन्थविस्तरभीत्त्याऽत्तर शक्क्या वरणयितुन् न हि ॥१९३॥
तदद्द्यत्त्वे मुद्द्रितेषु वेदलेखेषु वैदिकैः ।
प्रयुक्ता पद्धतिर् मुक्ख्या सङ्क्षेपेणाऽत्तर वर्ण्यते ॥१९४

अस्मिन् प्रसङ्गे नारदस्स्मृतिवाक्क्यत्त्वेन प्रसिद्धन् "नाऽकरिष्ष्यद् यदि ब्रह्मा लिखितम् चक्क्षुरुत्तमम् । तत्त्रेयमस्स्य लोकस्स्य नाऽभविष्ष्यच् छुभा गतिः" इति वचनमपि स्स्मर्तव्व्यम् । तथा च वेदलेखनपातकमपि कूपखानकन्न्यायेन सहनीयमेवेति मन्तव्व्यम् । वेदलेखने पातकं हि संस्कारगणपतौ सप्तमे पृष्ठे महाभारतवचनत्त्वेन उल्लिखितेन "वेदविक्क्रयिणश् चैव वेदानाम् चैव लेखकाः । वेदानाम् दूषकाश् चैव ते वै निरयगामिनः" इति वचनेन बोद्ध्यते । वृद्धगौतमस्स्मृतौ च "वेद-विक्क्रयिणश् चैव वेदानाम् चैव दूषकाः । वेदानालँ लेखिनश् चैव ते वै निरयगामिनः" इति वचनमुपलब्ध्यते[1] ॥१८६–१९४॥

रेखाऽभाव उदात्तस्स्य प्प्रचितस्स्याऽपि सूचकः ।
तथाऽप्प्यपूर्वं स्वरितात् पूर्वन् नीचात् परम् च यत् ॥१९४॥
नीचमद्ध्यगतङ् कम्पान् न्युब्जाद् वाऽप्प्यक्क्षरम् परम् ।
उदात्तं स्यात् ततो भिन्नम् प्रचितं स्वरितात् परम् ॥१९६॥
क्वचिदक्क्षरमूर्ध्वस्स्थोर्ध्वरेखोदात्तसूचनी ।
प्रचितस्स्य तु सर्वत्तर रेखाऽभावो हि सूचकः ॥१९७॥

१, १०।९०–९१ (स्मृतिसन्दर्भे, पृ. २०१६) ।

शाकलऋग्वेदमन्त्रसंहितायाम्, माद्ध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदमन्त्रसंहितायाम्, काण्ववाजसनेयिशुक्लयजुर्वेदमन्त्रसंहितायाम्, आत्त्रेयतैत्तिरीयकृष्णयजुर्वेदसंहितायाम्, शौनकीयथर्ववेदमन्त्रसंहितायाम्, माद्ध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेद-शतपथब्राह्मणे, काण्ववाजसनेयिशुक्लयजुर्वेद-शतपथब्राह्मणे, आत्त्रेयतैत्तिरीयकृष्णयजुर्वेदब्राह्मणे, आत्त्रेयतैत्तिरीयकृष्णयजुर्वेदाऽऽरण्यके, आत्त्रेयतैत्तिरीयकृष्णयजुर्वेदोपनिषदि, मैत्त्रायणीयकृष्णयजुर्वेदाऽऽरण्यके च रेखाऽभाव एव उदात्ततत्त्वस्य सूचकः; यथा 'अग्निमीडे'[1] इत्त्यत्त्र नि इत्त्यक्षरे, अपूर्वे उदात्ते रेखाऽभावो यथा 'अग्ने यये यज्ञम्'[2] इत्त्यत्त्र, स्वरितात् पूर्वे उदात्ते रेखाऽभावो यथा 'अग्निमीडे'[3] इत्त्यत्त्र; नीचात् परे उदात्ते रेखाऽभावो यथा— 'नूतनैरुत'[4] इत्त्यत्त्र, नीचमद्ध्यगते उदात्ते रेखाऽभावो यथा 'ऋषिभिरीड्यो नूतनैः'[5] इत्त्यत्त्र, कम्पोत्तरे उदात्ते रेखाऽभावो यथा 'मक्ष्वित्था धिया'[6] इत्त्यत्त्र, न्युब्जात् स्वरितात् परे उदात्ते रेखाऽभावो यथा 'योस्मान् द्वेष्टि'[7] इत्त्यत्त्र। कश्मीरदेशे लिखितायां शाकलऋग्वेदमन्त्रसंहितायाम्, कठकृष्णयजुर्वेदसंहितायाम्, पैप्पलादाऽथर्वमन्त्रसंहितायाञ्च अक्षरस्य मूर्द्धनि स्थिता ऊर्ध्वा रेखा उदात्तस्य सूचिका भवति, यथा "समक्षिष्योर्ध्वमहस आदित्येन सहीयसा"[8] इत्त्यत्त्र; चन्द्रवस्स्वगभूमिभिर् मिते वैक्रमवत्सरे मल्लशर्मणा तु वाजसनेयकेऽपि "ऊर्ध्वरेखा तु वर्णस्य मूर्द्धनि तिष्ठति या स्थिरा। तामुदात्तावँ विजानीयाद् द्विस्स्वरे स्वरितान् तु ताम्"[9] इत्त्युक्तम्। स्वरितात् परेषु प्परचितेषु रेखाऽभावो यथा— "अग्निमीडे"[10] इत्त्यत्त्र 'डे' इत्त्यत्त्र, "वायवस्त्थ"[11] इत्त्यत्त्र 'थ' इत्त्यत्त्र, 'स इद् देवेषु गच्छति"[12] इत्त्यत्त्र 'गच् छति' इत्त्यत्त्र ॥१९५–१९७॥

तिरश्चीनाऽक्षरस्याऽधो रेखा नीचस्य सूचनी।
इयं शतपथेऽप्येवमेव नैवोच्चसूचिका ॥१९८॥

---

१. शा. ऋ. म. सं. १।१।१। २. तत्त्रैव १।१।४।
३. तत्त्रैव १।१।१। ४. तत्त्रैव १।१।२। ५. तत्त्रैव।
६. तत्त्रैव १।२।६। ७. मा. वा. शु. य. म. ब्र. य. सं. १।२५।
८. ऋ. खि. १।१।१। ९. श्लो. २९ (शि. स., पृ. १५६)।
१०. शा. ऋ. म. सं. १।१।१। ११. मा. वा. शु. य. म. ब्र. य. सं. १।१। १२. शा. ऋ. म. सं. १।१।४।

अस्ति यत्तरोदात्ततरेखा न रेखा तत्तर नीचके ।
ऊर्ध्वा रेखाऽक्षरस्याऽधः क्वचिन् नीचस्य सूचनी ॥१९९॥

शाकलऋग्वेदमन्तरसंहितादिषु यत्तर उदात्ते रेखाया अभावस् तत्तराऽक्षरस्याऽधस् स्थिता तिरश्चीना रेखा अनुदात्ततत्वस्य सूचनी भवति । माध्यन्दिनीयानाञ्च काण्वानाम् च शतपथेऽपि अक्षरस्याऽधस् स्थिता तिरश्चीना रेखा एवमेवाऽनुदात्ततत्वस्यैव सूचनी, न तूदात्ततत्वस्य । उदाहरणयं यथा "अग्निमीळे"[1] इत्यादौ 'अग्' इत्यादौ अधोरेखा । शतपथेऽपि "व्रतमुपैष्यन्"[2] इत्यादौ त इत्यादीनि अनुदात्तान्येव । यत्तर कश्मीरदेशे लिखितायां शाकलऋग्वेदमन्तरसंहितायामुदात्ते मूर्द्धनि ऊर्ध्वा रेखा भवति तत्तराऽनुदात्ते रेखाऽभावो भवति । पैप्पलादाऽथर्ववेदमन्तरसंहितायान् तु उदात्ते मूर्द्धनि ऊर्ध्वायां रेखायां सत्यामपि अनुदात्तेऽक्षरस्याऽध ऊर्ध्वा रेखाऽनुदात्ततत्वस्य सूचिका प्रयुज्यते, यथा "कामो दाता"[3] इत्यत्तर 'दा' इत्यत्तर ॥१९८-१९९॥

सूचिका स्वरितस्योर्ध्वा रेखाऽक्षरशिरोगता ।
क्वचिन् मण्डलिका बिन्दुर् वाऽक्षराऽधोऽस्य सूचिका ॥२००॥
वामे प्रान्ते ह्यूर्ध्वया च रेखयाऽपि समन्विता ।
तिरश्चीनाऽक्षरस्याऽधो रेखा माध्यन्दिनीयके ॥२०१॥
जात्त्याभिनिहितक्वर्षप्परप्परश्शिलष्टानन्यतमस्य हि ।
नीचपूर्वाऽनुच्चपरस्स्वरितस्याऽस्ति सूचिका ॥२०२॥
अस्याऽर्धचन्द्राभा रेखाऽक्षराधस् सूचिका क्वचित् ।
अर्धवृत्तद्वयाभा तु रेखाऽक्षरतलस्थिता ॥२०३॥
नीचपूर्वोदात्तपरजात्त्यादीनां हि सूचिका ।
मन्तरे माध्यन्दिनीयानां सैव मैत्तरायणीयके ॥२०४॥
उच्चपूर्वाऽनुच्चपरस्स्वरितानां हि सूचिका ।
ऊर्ध्वरेखायुता रेखा तिरश्चीनाऽपि चाऽत्तर तु ॥२०५॥
तैरोव्यञ्जनकादीनावं विशिष्टानां हि सूचिका ।
तर्चऽकोऽक्षराग्रे वैकाऽको युक्तो मूर्द्धन्यूर्ध्वरेखया॥२०६॥
अधस् तिरश्चीनया च रेखया कम्पसूचकः ।
दीर्घे कम्पेऽक्षरस्याधो रेखाऽप्यस्य सहायिका ॥२०७॥

---

१. शा. ऋ. म. सं. १।१।१ । २. १।१।१।१ ।
३. १।३०।६ ।

शाकलऋग्वेदमन्त्रसंहितादिषु स्वरितस्य सूचिका अक्षरशिरोगता ऊर्ध्वा रेखा यथा "अग्निमीडे"[1] इत्यत्तर 'मी' इत्यत्तर। शाकल-ऋग्वेदमन्त्रसंहितायामनुदात्तोदयानाम् जात्यादीनामपीयमेव सूचिका; यथा "मर्यायेव कन्या शश्वचै ते"[2] इत्यत्तर 'या' इत्यत्तर। कश्मीरे लिखितायां शाकलऋग्वेदमन्त्रसंहितायान् तु जात्यादीनां सूचिकाऽक्षर-शिरसि स्थिता रेखा वक्रा भवति; यथा "हवन्तम् मेघान् वृक्ये"[3] इत्यत्तर 'ये' इत्यत्तर। क्वचिद् अक्षरस्याऽधस् स्थितङ्क क्षुद्-द्रम् मण्डलमपि स्वरितत्वस्य सूचकम् भवति; तदुक्तम् मल्ल-शर्मणा "वर्णस्य वर्तुलाकारम् पादे तिष्ठति केवलम्। स्वरितन् तु विजानीयात् स्वरविद्भिरुदीरितम्"[4] इति। काठके पैप्पलादके च तैरो-व्यञ्जनादीनां स्वरितानाम् अक्षरस्याऽधस् स्थिता बिन्दुस् सूचिका भवति; यथा "इषेत्त्वोर्ज्जेत्त्वा"[5] इत्यत्तर, "कामो दाता"[6] इत्-यत्तर च। माध्यन्दिनीयके अनुदात्तपूर्वकस्य अनुच्चपरकस्य जात्यादीनामन्यतमस्य सूचिकाऽक्षरस्याऽधस् स्थिता वामे परान्ते ऊर्ध्वया रेखया युक्ता तिरश्चीना रेखा यथा— "धान्यमसि"[7] इत्यादौ "घर्ममोसि"[8] इत्यादौ च। काण्वके तु एतादृशस्य जात्यादेरपि अक्षरमूर्ध्वस्था ऊर्ध्वा रेखा एव सूचिका भवति, यथा "घर्ममोसि"[9] इत्यादौ। काठके मैत्रायणीयके च एतादृशस्य जात्यादेस् सूचिका अक्षरस्याऽधस् स्थिता अर्धचन्द्राभा रेखा भवति, यथा "निष्टर्क्-क्यम् बध्नाति"[10] इत्यत्तर, वीर्य्याणि प्रवोचम्"[11] इत्यत्तर च। आत्तरेयतैत्तिरीयवेदे तु अक्षरस्य मूर्द्धनि स्थिता ऊर्ध्वा रेखैव जात्यादीनां सूचिका भवति, यथा "दर्पमोऽग्नये"[12] इत्यत्तर। शौनकि-नामथर्ववेदमन्त्रसंहितायामनुच्चपरकस्याऽनुदात्तपूर्वकस्य जात्यादे-रक्षरादग्रे स्थिता दीर्घा ऊर्ध्वा ऊर्ध्ववँ वृत्तखण्डनिभतान् नीताऽधश् च सकोणताम् प्रापिता रेखा सूचिका भवति, यथा— "तन्वो

---

१. शा. ऋ. म. सं. १।१।१। २. तत्तरैव ३।३३।१०। ३. ऋ. खि. १।१२।७। ४. श्लो. ३१ (शि. स., पृ. १५६)। ५. का. वा. शु. य. वे. म. ब्र. य. सं. १।१। ६. पै. म. सं. १।३०।६। ७. मा. वा. शु. य. म. ब्र. य. सं. १।२०। ८. तत्तरैव १।२। ९. का. वा. शु. य. वे. म. ब्र. य. सं. १।२।१। १०. का. कृ. य. सं. २४।५। ११. मै. कृ. य. सं. १।२।९। १२. आ. तै. कृ. य. सं. १।१।३।१।

अद्द्य"[1] इत्त्यत्तर। पैप्पलादके तु सर्वेषामेव जात्त्यादीनाम् अक्-क्षराणामधस् स्थिता वामे प्रान्ते ऊर्ध्वया रेखया युता तिरश्चीना रेखा सूचिका भवति, यथा "तन्त्वा शन्तमया"[2] इत्त्यत्तर। माद्ध्यन्-दिनीयानाम् मन्त्रे अक्क्षरतलस्स्थिता अर्धवृत्तयुग्मकनिभा रेखा अनु-दात्तपूर्वकस्स्योदात्तपरकस्स्य जात्त्यादीनामन्न्यतमस्स्य सूचिका भवति, यथा "सुप्त्वा कामधुक्क्षः"[3] इत्त्यत्तर। काठकेऽपि एवमेव। एतादृशे स्वरे माद्ध्यन्दिनीया हस्तन् न्युब्जङ कुर्वत इति न्युब्जस्वरत्त्वेनाऽपि एतादृशस्स्वरस्स्य व्यवहारो भवति। काण्वके तु एतादृशानाम् जात्-त्यादीनां सूचिका अक्क्षराधस्स्था तिरश्चीनाऽनुदात्तचिह्नन्नतुल्या रेखा भवति, यथा "उर्व्वन्तरिक्क्षन्"[4] इत्त्यत्तर। मैत्त्रायणीयके तु अर्धवृत्तयुग्मकनिभा रेखा उदात्तपूर्वकस्स्याऽनुदात्तपरकस्स्य स्वरित-स्स्य सूचिका भवति, यथा— "इषे त्त्वा सुभूताय वायव स्थ"[5] इत्त्यत्तर; अक्क्षरस्स्याधस् स्थिता वामे प्रान्ते ऊर्ध्वया रेखाया श्लिष्टा तिरश्चीना रेखा उदात्तात् परस्स्य अपरकस्स्य एकस्स्य एक-श्रुतिपरकस्स्य वा तैरोव्यञ्जनादेस् स्वरितस्स्य सूचिका भवति, यथा—"य एवँ विद्द्वानग्निहोत्त्रम् जुहोति"[6] इत्त्यत्तर। अक्क्षरस्स्याग्रे स्थितो मूर्द्धिन ऊर्ध्वया रेखया युक्तोऽधश् च तिरश्चीनया रेखया युक्तस् त्रयाणावँ वस्तूनां सूचकोऽङ्कश् शाकलऋग्वेदमन्त्रसंहितादौ दीर्घस्स्य कम्पस्स्य (उदात्तोदयस्स्य स्वरितोदयस्स्य वा जात्त्यादीना-मन्न्यतमस्स्य) सूचको भवति, तत्त्र कम्पस्स्वरकाक्क्षरस्स्याऽप्यधस् तिरश्चीना रेखा भवति, यथा "रथ्यो३ वयस्वतः"[7] इत्त्यत्तर। कश्-मीरेषु लिखितायाम् तु ऋग्वेदमन्त्रसंहितायामयन् त्र्यङ्कोऽक्क्षराधो-रेखासाहाय्यरहितो भवति। मैत्त्रायणीयकेऽक्क्षरात् पूर्वं स्थित× कम्-पाक्क्षरस्स्याऽधस्स्थितया तिरश्चीनया रेखया युतश् शुद्धस् त्र्यङ्क×कम्-पस्स्य सूचको भवति; यथा "स्रुक् कार्३यानेन वा"[8] इत्त्यत्तर। सामवेदे तु अक्क्षरात् परत्त्र स्स्थितश् शुद्धस् त्र्यङ्क× कम्पस्स्य सूचको विज्-ज्ञायते, यथा "पाह्य्युत्त"[9], "दूत्त्य३म् चरन्"[10], "वृधे३स्मा

---

१. १।१।१। २. १४।२।८। ३. १।३।
४. १।३।३। ५. १।१।१। ६. १।८।६। ७. २।२४।१५।
८. १।८।१। ९. पू. १।४।२ (३६)। १०. पू. १।७।२(६४)।

श्रवन्तु"[1] इत्यादिषु, "त्वं ह्य३ङ्ग"[2] "ऊर्ज्जे व्य३व्व्ययम्"[3] "विद्धी त्वा३स्स्य नो वसो"[4] इत्यादिषु च। कपिष्ठलकठानामाम्नाये तु उदात्तपरौ ह्रस्स्वौ जात्यक्क्षैप्प्रौ दीर्घीभवतो न तु कम्पेते इति प्प्रतीयते, तद् यथा "उर्व्वान्तरिक्क्षम्"[5] इति "अप्स्वान्तः"[6] इति च। तत्तर च जात्यक्क्षैप्प्रयोस् सूचिका रेखाऽपि अक्क्षरस्स्याऽधस् तिरश्चीना एव प्रयुज्ज्यते। कौथुमसामवेदे तु उदात्तपरा जात्यादयः प्लुता भवन्तीति केचित् प्रतिपद्द्यन्ते[7]। अक्क्षरस्स्याग्रे स्स्थितो मूर्द्धन्यूर्ध्वया रेखया युतोऽधश् च तिरश्चीनया रेखया सहित एकस्स्य वस्तुनस् सूचकोऽङ्कश् शाकलऋग्वेदमन्तरसंहितादौ ह्रस्स्वस्स्य कम्पस्स्य (उदात्तोदयस्स्य स्वरितोदयस्स्य वा जात्यादीनामन्यतमस्स्य) सूचको भवति, यथा "उक्थ्यवँ १ वचः"[8] इत्यत्तर, "सद्धर्च्चङ१ नाम"[9] इत्यादिषु च। कश्मीरलिखितायाम् ऋग्वेदमन्तरसंहितायान् तु ह्रस्स्वस्स्य कम्पस्स्याऽपि अधोरेखया युक्तस् तर्च्चङ्क एव सूचको भवति, यथा "यो जाम्म्याः३ प्रत्त्यमदत्"[10] इत्यत्तर। मैत्तरायणीयके ह्रस्स्वकम्पस्स्याऽपि अक्क्षरात् पूर्व स्थितः कम्पाक्क्षरस्स्याऽधस्स्थितया तिरश्चीनया रेखया युतश् शुद्धस् तर्च्चङ्क एव सूचकः, यथा "नैकमेवम् पितृदेवत्३त्यन् तद्"[11] इत्यत्तर। तैत्तिरीयके तु दीर्घस्स्य ह्रस्स्वस्स्य वाऽपि कम्पस्स्य तदग्रे स्थितोऽधस् तिरश्चीनया रेखया युत एकाङ्क एव सूचकः, यथा "ते१न्न्योन्न्यम्"[12] इत्यत्तर; "वीर्यवँ १ व्यभजन्त"[13] इत्यत्तर च ॥२००-२०७॥

सामाधिकरणीभूतऋक्सङ्घातस्स्वरूपके।
सामवेदे त्त्वक्क्षराणामुपर्य्यारोपितो हि यः ॥२०८॥
एकाङ्कश् च तथा द्व्यङ्कस् तर्च्चङ्कश् च स हि सूचकः।
भवेदुदात्तस्स्वरितानुदात्तानाँ यथाक्क्रमम् ॥२०९॥
एकाङ्को हि र-युक् स्वारपूर्वाऽनेकोच्चसूचकः।
तर्च्चङ्कात् परोऽन्त्ये प्राक् चादौ द्व्यङ्क उच्चस्स्य सूचकः॥२१०॥

---

१. पू. ३।५।७ (२३९)। २. पू. ६।९।६ (५८३)।
३. उ. ६(३)।१।४(१४३८)। ४. पू. २।४।८ (१३२)।
५. १।२। ६. ४८।४। ७. वै. स्व. मी, पृ. १५९।
८. शा. ऋ. म. सं. १।८३।३। ९. शा. ऋ. म. सं. १।१०८।३।
१०. ऋ. खि. ५।१२।२। ११. १।४।१०। १२. ६।१।५।१।
१३. ६।६।८।१।

अनुत्येष्वनेकेषूच्चेषु नीचपूर्वेषु चादिमे ।
उच्चे द्व्यङ्कोऽनुदात्तेषु चाद्द्ये त्र्यङ्को भवेत् सदा ॥२११॥
मद्ध्येऽपि त्र्यङ्कयोर् द्व्यङ्कस् स्यादुच्चस्य हि सूचकः ।
स उ-लिप्या युतो नीचपूर्वानेकोच्चसूचकः ॥२१२॥
र-युग् द्व्यङ्कस् त्वनेकोच्चपूर्वकस्स्वारसूचकः ।
स नीचपरकस्स्याऽनुत्यस्स्यैकश्श्रुतिपरस्य वा॥२१३॥
जात्त्याद्द्यनन्यतमस्स्याऽप्युच्चाऽपूर्वस्य तु सूचकः।
जात्त्यादीनाङ् कम्पितानान् त्र्यङ्कोऽग्रे कम्पसूचकः ॥२१४॥
क-युक् त्र्यङ्कस् तु जात्त्यादिप्राक्स्थनीचस्य सूचकः ।
स्वारात् परेऽङ्कराहित्यम् प्रचितत्वस्य सूचकम् ॥२१५॥

एकाङ्कादय उदात्तादीनां सूचका यथा— "त्वमग्ने य(ज्ञानाम्)"[१] इत्यत्र । र-लिपियुक्त एकाङ्कस् स्वरितपूर्ववर्त्यनेकोदात्तसूचको यथा— "पा हि विश्वस्या अरातेः"[२], "ब्रह्मा कस् तं सपर्यति"[३] इत्यादिषु । त्र्यङ्कात् परोऽनुत्ये द्व्यङ्क उच्चस्य सूचको यथा— "विश्वेषां हितः"[४] इत्यत्र । त्र्यङ्कात् प्राग् आदौ स्थितो द्व्यङ्क उदात्तस्य सूचको यथा "अग्न आयाहि"[५] इत्यत्र । त्र्यङ्कात् परो द्व्यङ्को बहूनामुदात्तानां सूचको यथा "महाँ हि षः"[६] इत्यत्र । अनुदात्तेषु आद्द्ये एव त्र्यङ्को यथा "दूरेदृशम्"[७] इत्यत्र । त्र्यङ्कयोर् मद्ध्ये द्व्यङ्क उच्चस्य सूचको यथा "यज्ञानाम्"[८] इत्यत्र । उ-लिप्या युक्तो द्व्यङ्को नीचपूर्ववर्त्यनेकोदात्तसूचको यथा "आदित् प्रत्नस्य"[९] इत्यत्र । र-लिपियुक्तो द्व्यङ्कोऽनेकोदात्तोत्तरवर्तिस्स्वरितसूचको यथा "नि हो ता सत्सि"[१०] इत्यत्र । र-लिपियुक्तो द्व्यङ्को नीचपरकस्स्य वाऽनुत्यस्स्य वा एकश्श्रुतिपरकस्स्य वा अनुच्चपूर्वकस्स्य जात्त्यादीनामन्यतमस्स्य सूचको यथा— "तन्वा गिरा"[११] इत्यत्र । कम्पसूचकस् त्र्यङ्को यथा "पाह्यु ३ ते"[१२] इत्यत्र । क-लिपियुक्तस् त्र्यङ्को जात्त्यादिपूर्वस्स्थस्स्या-

---

१. पू. १।१।२(२) । २. पू. १।१।६ (६) ।
३. पू. २।५।८ (१४२) । ४. पू. १।१।२ (२) ।
५. पू. १।१।१ (१) । ६. पू. ४।१०।१ (३८१) ।
७. पू. १।७।१० (७२) । ८. पू. १।१।२ (२) ।
९. पू. १।२।१० (२०) । १०. पू. १।१।१ (१) ।
११. पू. १।५।८ (५२) । १२. पू. १।४।२ (३६) ।

ऽनुदात्तस्स्य सूचको यथा— "तन्वा गिरा"[1] इत्यत्तर । स्वारात् परे ऽक्क्षरेऽङ्करराहित्यम् प्रचितत्वस्स्य सूचकयँ यथा— "आ या हि वीतये गृणानः"[2] इत्यत्तर ॥२०८–२१५॥

सामगाने द्द्विगुणित एकाङ्कऽ क्रुष्टसूचकः ।
अङ्का एकाङ्कादिकास् तु प्रथमादिकसूचकाः ॥२१६॥
रो दीर्घतासूचकस् स्यान् न स्स्यान् नमनसूचकः ।
परत्तराक्क्षरतोऽङ्कास् स्युस् स्वरकर्षणसूचकाः ॥२१७॥
स्वारे तु तेषु चाकेङ्षूपर्य्येकाङ्कास् स्थितास् सदा ।
इति सङ्क्षेपतऽ प्रोक्तरूषिस्स्वराङ्कनपद्धतिः ॥२१८॥

सामगानस्स्वराङ्कनपद्धतिस् सुसम्प्रदायज्ज्ञसामगेब्भ्य एव सम्भ्यक् शिक्क्षणीया। तत्सामान्यपरिचयाय च सामतन्तरभूमिका[3]–मात्तरालक्क्षण-व्याक्ख्यादिका ग्रन्था अपि पठनीयाः ॥२१६–२१८॥

॥ इति स्वराद्ध्यायस् तृतीयः ॥

---

१. पू. १।५।८ (५२)। २. पू. १।१।१ (१)।
३. पृ. १२–४२।

अथ चतुर्थोऽध्यायः

मात्त्रानिरूपणम्

१. मात्त्रालक्षणम्

रूपम् अ-इ-उ-ऋ-लृ नाम् पूर्णलँ लघुतमञ् च यत् ।
सा मात्त्रा तन्मितः कालो भक्त्या मात्त्रे ति कीर्त्यते ॥१॥

अवर्णस्य इवर्णस्य उवर्णस्य ऋवर्णस्य लृवर्णस्य वा पूर्णलँ लघुतमञ् च यत् स्वरूपं सा मात्त्रा ज्ञेया । तेनाऽवर्णादिस्वरूपेण परिमितः कालोऽपि लक्षणया मात्त्रेत्युच्यते इत्यर्थः । ननु कालविशेषो मात्त्रा, तथाहि "उकालोऽज्ह्रस्स्वदीर्घप्लुतः"[1] इत्यत्र, "स्वरतः कालतस् स्थानाद्"[2] इत्यादौ च मात्त्रा कालरूपेणैवोल्लिखिता दृश्यते इति चेत्, अत्रोच्यते—शुक्लयजुर्वेदप्रातिशाख्ये मात्त्राविषये "अमात्त्रस्स्वरो ह्रस्स्वः, मात्त्रा च, द्विस्तावान् दीर्घः, प्लुतस्त्रिः"[3] इत्युक्तम्; तैत्तिरीयप्रातिशाख्येऽपि "ऋकारलृकारौ ह्रस्स्वौ, अकारश् च, तेन च समानकालस् स्वरः"[4] इत्यभिहितम्; ऋक्तन्त्रेऽपि—"अकालो ह्रस्स्वः, अर्धमणु, मात्त्रा, द्वे दीर्घम्, तिस्रो वृद्धम्, वैस्स्वर्ये स्वरस् त्रिमात्त्रः"[5] इति प्रतिपादितम्; अतो मात्त्रानिरूपणस्य मूलम् अकारादेस् स्वरूपमेवेति । आचार्यपाणिनेस् सूत्त्रेऽपि उकारस्स्वरूपमेव मात्त्रानिरूपणाधारभूतमिति अतिरोहितम् । तस्मान् मूलरूपेण अकारादिस्वरूपमेव मात्त्रा इत्युच्यते; तदनु लक्षणया अकारादिपरिमितः कालोऽपि मात्त्रेतिव्यवह्रियते इत्येव विज्ञायते । ऋग्वेदप्रातिशाख्ये च "मात्त्रा ह्रस्स्वः"[6] इति पठ्यते । तत्त्र मात्त्रापदेन स्वरविशेष उच्यते इति तदपि मात्त्राया यथोक्ताकारादिस्वरूपरूपत्त्वे उपोद्बलकमेव । ननु

---

१. अष्टा. १।२।२७ । २. पा. शि. श्लो. १० । ३. १।५५, ५६,५७,५८ । ४. १।३१-३३। ५. २।४।१०(४९)=१।५।५(४५)। ६. १।२७ ।

तत्तर "ह्रस्स्वस्स्वरो मात्त्राकालो वेदितव्य:" इति उव्वटेन व्याक्ख्यातमिति चेत्, अत्त्रोच्च्यते–"मात्त्रा ह्रस्स्व:" इत्त्येव सूत्त्रमस्ति न तु 'मात्त्रिको ह्रस्स्व:' इति 'मात्त्राकालो ह्रस्स्व:' इति वा; अतो मात्त्रापदेन अकारादिमूलस्स्वरस्स्वरूपस्स्य शुक्लयजुर्वेदप्रातिशाक्ख्यादिसम्मतस्स्य उपादानेनैव लक्क्षणावँ त्रिनैव सूत्त्रार्थस् सम्म्यगुपपद्द्यते, तथा च लक्क्षणावँ विनैव सम्म्यगुपपद्द्यमाने सूत्त्रार्थे निमित्तशून्न्यालँ लक्क्षणामाश्शिरत्त्य सूत्त्रार्थवर्णनस्स्य उव्वटकृतस्स्याऽनून्याय्यत्त्वात् तदनादरणीयमेवेति । स्वरस्स्वरूपविशेषपरतया मात्त्राशब्दप्प्रयोगश् च परमप्प्रमाणभूतेषु "मात्त्रास सर्गादवरेऽपृथक्श्रुती"[1], "ऐकारौकारयो× कण्ठ्या पूर्व्वा मात्त्रा ताल्ल्वोष्ट्ठयोरुत्तरा"[2], "भूयसी मात्त्रेवर्णोवर्णयोरल्पीयस्स्यवर्णस्स्य"[3], "इमावैचौ समाहारवर्णौ मात्त्राऽवर्णस्स्य मात्त्रेवर्णोवर्णयोरिति तयो× प्लुत उच्च्यमान उभयविवृद्धि× प्राप्नोति"[4] इत्त्यादिषु वाक्क्येषु प्राप्प्यते । तस्मादेतस्स्याङ्कारिकायामुक्तोऽर्थस् सम्म्यगुपपन्न एव बोद्ध्य: ।।१।।

२ मात्त्रादिपरिमाणस्स्याऽऽपेक्षिकत्त्वम्

ह्रस्स्वमात्त्रादिका मात्त्राऽऽपेक्षिकी तत्तर वृत्तिषु ।
भिन्नासु स्स्यान् मानभेदोऽवधेयन् तत्तर शिक्क्षकै: ।।२।।

ह्रस्स्व–दीर्घ–प्लुता अनुपदवँ वक्क्ष्यन्ते । तेषाम् मात्त्रा न सर्व्वदा एकरूपा भवति, किन् तु कदा चिद् वर्ध्धतेऽपचीयते च; तथापि तत्तन्मात्त्रासमव्व्याहृतमात्त्रान्तरापेक्क्षया ह्रस्स्वत्त्वन् दीर्घत्त्वम् प्लुतत्त्ववँ वा व्यवह्रियते । एवञ् च द्रुतमद्ध्यमविलम्बितासु वृत्तिषु ह्रस्स्वादिका मात्त्राऽपचितरूपा विवृद्धरूपा वाऽपि भवति । तदुक्तम् ऋग्वेदप्रातिशाक्ख्ये—"मात्त्राविशेष× प्रतिवृत्त्युपैति"[5] इति; ऋक्तन्त्रेऽपि—"द्रुतायाम् मात्त्रा (त्रिकला भवति), चतुष्कला मद्ध्यमायाम्, पञ्चकला विलम्बितायाम्"[6] इति । मुनिना पतञ्जलिनाऽपि—"ये हि द्रुतायावँ वृत्तौ वर्णास् त्रिभागाधिकास् ते मद्ध्यमायाम्, ये [च] मद्ध्यमायावँ वर्णास् त्रिभागाधिका विलम्बितायाम्"[7] इति प्प्रोक्तम् । एवञ् च यदि द्रुतायावँ वृत्तौ ह्रस्स्वस्स्य मानम् १ इति भवति

---

१. ऋ. प्रा. १३।४० । २. शु. य. प्रा. १।७३ ।
३. पा. व्या. भा. १।१।४८ वा. ४। ४. तत्त्रैव, ८।२।१०६,वा.१।
५. १३।४८ । ६. २।४।१–३ । ७. पा. व्या. भा. १।१।७०,वा. ४ ।

तर्हि मध्यमायावँ वृत्तौ $(1+\frac{1}{3}=)\,1\frac{1}{3}$ इति भवति, विलम्बितायावँ वृत्तौ च $\left(1\frac{1}{3}+\frac{1\frac{1}{3}}{3}=\right)\,1\frac{7}{9}$ इति भवति। एवम् च द्रुतायावँ वृत्तौ ह्रस्वस्य यन् मानम् भवति विलम्बितायावँ वृत्तौ ह्रस्वस्य तद्द्विगुणकल्पम् मानम् भवति इति विज्ञायते। उव्वटेन ऋग्वेद-प्रातिशाख्यव्याख्याने तु 'द्रुतायावँ वृत्तौ ये वर्णास् ते मध्यमायाम् चतुर्भागाधिका भवन्ति तथा मध्यमायावँ ये वर्णास् ते विलम्बितायाम् चतुर्भागाधिका भवन्ति इत्येके' इत्यपि उल्लिखितम्[1]। शिक्षा-शास्त्रे श्रोत्तरग्राह्यस्थूलशब्दमात्रविचारपरे एतावतैव एतद्-विषयकश् शास्त्रार्थः परिसमाप्यते। वैयाकरणास् तु स्फोटात्मकानावँ वर्णानान् निश्चितपरिमाणकत्वमेव तदभिव्यञ्जकानान् ध्वनीनामेव वृत्तिभेदाद् भेद इति वदन्ति। तथाहि पाणिनीयव्याकरणभाष्यकारः— "ध्वनिस् स्फोटश् च शब्दानान् ध्वनिस् तु खलु लक्ष्यते। अल्पो महांश्च केषाम् चिदुभयन् तत् स्वभावतः"[2] इति। भर्तृहरिरपि—"स्फोटस्याऽभिन्नकालस्य ध्वनिकालानुपातिनः। ग्रहणोपाधिभेदेन वृत्तिभेदम् प्रचक्षते"[3] इति, "शब्दस्योर्ध्वमभिव्यक्तेर् वृत्तिभेदन् तु वैकृताः। ध्वनयस् समुपोहन्ते स्फोटात्मा तैर् न भिद्यते"[4] इति चाऽऽह। एतस्मिन् अर्थे भर्तृहरिणा "शब्दस्य (स्फोटस्य) ग्रहणे हेतुः प्राकृतो ध्वनि-रिष्यते। स्थिति-(वृत्ति-) भेदे निमित्तत्वम् वैकृतः प्रतिपद्यते"[5] इति सङ्ग्रहकारवचनमपि प्रमाणतयोपस्थापितम् ॥२॥

३. मात्राभेदाः

मात्राऽर्धमात्रा मात्राऽणुर्मात्रा च परमाणुका।
दीर्घा मात्रा प्लुता मात्रा चेति मात्राभिदास् स्मृताः ॥३॥

मात्राया भेदाश् च मात्रा, अर्धमात्रा, अणुमात्रा, परमाणु-मात्रा, दीर्घमात्रा, प्लुतमात्रा चेति शिक्षाकारैस् स्मृतास् सन्ति। तत्र मात्रास्वरूपन् तस्याऽऽपेक्षिकत्वम् चोक्तमेव। मात्राया अर्धम् अर्धमात्रोच्यते। मात्रायाश् चतुर्थो भागोऽणुमात्रोच्यते। मात्राया अष्टमो भागः परमाणुमात्रोच्यते। एकवर्णस्था द्विगुणिता मात्रा दीर्घमात्रोच्यते। एकवर्णस्था त्रिगुणिता चतुर्गुणिताऽ-धिका वा मात्रा प्लुतमात्रोच्यते। एतद्विषयेऽधिकन् तत्तन्मात्रापरि-

---

१. १३।४८। २. १।१।७०., वा. ५। ३. वा. प. १।७५।
४. तत्रैव १।७७। ५. तत्रैव वृत्तौ १।७६।

मितवर्णविचारे तत्तरतत्तर वक्ष्यते ।।३।।

४. मात्तराकालप्रमाणविचारः

निमेषकाला मात्तरा स्याद् विद्द्युत्कालेति चापरे ।
ऋस्वरा तुल्ययोगा वा मतिस् स्यात् सोमशर्मणः ।।४।।
सूर्यरश्मिप्रतीकाशा कणिका यत्तर दृश्यते ।
अणुत्वस्य तु सा मात्तरा मात्तरा तु चतुरागवा ।।५।।
हृदयस्थमणुवँ विद्द्यात् कण्ठे विद्द्याद् द्विराणवम् ।
त्रिराणवन् तु जिह्वाग्रे निस्सृतम् मात्त्रिकवँ विदुः ।।६।।

नेत्तरच्छदस्य शश्मीलने यावान् कालो लगति स मात्तराकाल इत्त्येके; विद्द्युतस् स्फुरणे यावान् कालो लगति स मात्तराकाल इत्त्यपरे; ऋकार-स्स्वरस्य लघुतमस्य उच्चारणे यावान् कालो लगति स कालः, कचट-तप–गजडदबानाञ्च कुक्कुटोऽसीत्यादाविव तुल्यैरभिन्नैस् तैरेव योगे कचट-तपादीनां सद्धरुवाणामुच्चारणे यावान् कालो लगति स कालो वा मात्तरा-काल इति आचार्यस्य सोमशर्मणो मतं स्यादित्त्यर्थश् चतुर्थस्य श्लोकस्य । यद्द्यपि मुद्द्रितायान् नारदीयशिक्षायाम् 'ऋक्स्वरा'[२] इति पाठस् तथापि सोऽप्यङ्गतश् शोभाकरेणाऽपरिगृहीतश् च; ऋकारस्य मात्तरामानत्त्वन् तैत्तिरीयप्रातिशाख्ये प्रसिद्धम्; पाणिनीयव्याकरण-भाष्यकारेणाऽपि "(य एते वर्णेषु वर्णैकदेशा वर्णान्तरसमानाकृतयस् तेषावँ वर्णग्रहणेन अग्रहणे) तुल्यरूपे सयँयोगे द्विव्यञ्जना-श्रयो विधिर् न सिद्ध्यति—कुक्कुटः पिप्पलः पित्तमिति । यस्य पुनर् गृह्यन्ते तस्य द्वौ ककारौ द्वौ पकारौ द्वौ तकारौ । यस्याऽपि न गृह्यन्ते तस्याऽपि द्वौ ककारौ द्वौ पकारौ द्वौ तकारौ । कथम् ? मात्तराकालोऽत्तर गम्यते, न च मात्त्रिकवँ व्यञ्जनमस्ति"[३] इति वदता सोमशर्ममतानुकूलोऽर्थः प्रतिपादितो दृश्यते । सूर्यरश्मिप्रतीका-शेत्त्यादिका अणुपरिभाषा कालसम्बन्धे कथञ्च घटते इति न विज्ञायते । 'सूर्यरश्मिप्रतीकाशा कणिका' इत्त्यनेन गवाक्षप्रविष्टसूर्यकिरण-सम्पर्कपरिदृश्यसूक्ष्मतमरजःकणिकास्यन्दनकालो लक्ष्यते इति के चिद् वदन्ति। शरव्यस्य वर्णस्य मात्तराया विचारश् शिक्षाशास्त्रे कर्तव्य इति हृदयस्थमणुमित्त्यादिकश् श्लोकोऽत्तराऽनुपयुक्तो विज्ञायते, तथापि याज्ञवल्क्यशिक्षाद्द्यनुरोधात् पठितो वेदितव्यः । अत्तराऽर्थे शिक्षान्तरवचनानि च "कालोऽतिसूक्ष्मकोऽणुस् स्यान्

१. द्र.–या.शि.श्लो. ८–१० (शि.स., पृ. २)। २. २।३।८ ।
३. पा.व्या.भा., एओङ्।ऐऔच् इत्त्यत्र वा. १३।

मात्त्रार्धवँ व्यक्तमात्त्रिकम् । अङ्गुलिस्स्फोटने यावाँस् तावान् कालस् तु मात्त्रिकः''[1] इति व्यासशिक्क्षायाम्, ''इन्द्रियाविषयो योऽसावणुरित्त्युच्यते बुधैः । चतुर्भिरणुभिर् मात्त्रापरिमाणमिति स्स्मृतम्''[2] इति शम्भुशिक्क्षायाम्, ''अक्क्ष्णोर् निमेषमात्त्रेण यो वर्णस् समुदीर्यते । स एकमात्त्रो द्विस् तावान् दीर्घस् त्रिऽ प्लुत उच्च्यते''[3] इति माण्डूक्क्यां शिक्क्षायाम् । चारायणीयशिक्क्षायाञ् च— ''अक्क्ष्णोर् निमेषमात्त्रेण या वर्णाष्टस्वधीयते (यो वर्णस् तु स्वधीयते ?) । स एकमात्त्रा द्विर्भावाद् दीर्घस् त्रिऽ प्लुत उच्च्यते ।। हृदयस्स्थम् मण्डलवँ विद्द्यात् कण्ठे विद्द्याद् द्विराणवम् । त्रिराणवन् तु जिह्व्वाग्रे विसृतम् मातृ(त्रि)कम् भवेत्''[4] इति ।।४–६।।

५. मात्त्राभेदनिदर्शनानि

चाषस् तु प्प्रवदेन् मात्त्रान् द्विमात्त्रावँ वायसो गिरम् ।
शिखी त्रिमात्त्राम् प्रवदेन् नकुलस् त्वर्धमात्त्रिकाम् ।।७।।

चाषऽ पक्क्षिविशेषो ग्राम्यारण्यको नीलपक्क्षपुटो नीलाभाण्डक ऊर्ध्वाधोगत्त्या उड्डयनशीलः, 'ठेउ्आ' इति नैपालीयभाषायाम् प्रसिद्धः । यद्द्यपि एतन् मात्त्रानिदर्शनन् नाऽस्मादृशानाङ् कृते मात्त्रोच्चारणशिक्क्षणे साहाय्यङ् कर्तुं शक्नोति सम्म्यक्, तथापि ग्रामवासिनामरण्यवासिनावँ वा प्राचीनानाम् पटुतरेन्द्रियाणान् द्विजानाङ् कृते तु इदन् निदर्शनम् उपयोगि आसीदिति सम्भाव्यते । एतद्विषयकाणि वचनानि च प्राचीनासु अर्वाचीनासु च बहुषु शिक्क्षासु प्राप्प्यन्ते । तथा हि ऋग्वेदप्रातिशाक्ख्येऽपि— ''चाषस् तु वदते मात्त्रान् द्विमात्त्रावँ वायसोऽब्ब्रवीत् । शिखी त्रिमात्त्रो विज्ज्ञेय एष मात्त्रापरिग्ग्रहः''[5] इति दृश्श्यते । उव्वटेनाऽव्याक्ख्याततत्त्वात् प्रक्क्षिप्तो वा उव्वटेनैव स्वभाष्ये उद्धृतो या शिक्क्षान्तराद् इति प्प्रतीयतेऽयं श्लोकः । पाणिनीयशिक्क्षायाञ् च— ''चाषस् तु वदते मात्त्रान् द्विमात्त्रञ् चैव वायसः । शिखी रौति त्रिमात्त्रन् तु नकुलस् त्वर्धमात्त्रकम्''[6] इति । याज्ज्ञवल्क्यशिक्क्षायाञ् च— ''चाषस् तु वदते मात्त्रान् द्विमात्त्रावँ वायसोऽब्ब्रवीत् । मयूरस् तु त्रिमात्त्रावँ वै मात्त्राणामिति सँस्स्थितिः''[7] इति । चारायणीयशिक्क्षायाञ् च— ''चाषस् तु

---

१. सू. ४४३–४४४ । २. श्लो. ४६ । ३. श्लो. १३६ (शि. स., पृ. ४७५) । ४. पृ. २७ । ५. १३।५० ।
६. श्लो. ४९ । ७. श्लो. १५–१६ (शि. स., पृ. ३) ।

वदते मात्रान् द्विमात्रावँ वायसो ब्रवेत् (ऽब्रवीत् ?, वदेत् ? ब्रुवेत् ?)। शिखी त्रिमात्रावँ (-त्रो ?) विज्ञेया (-यः ?) एष मात्रापरिग्रहः"[1] इति। व्यासशिक्षायाम् च— "चाषोक्त एकमात्रस् स्याद् वायसेन द्विमात्रिकः। मयूरेण त्रिमात्रश् च जानीयात् काललक्षणम्"[2] इति। कौहलीयशिक्षायाम् च— "एकद्वित्रिक्रमेणैव मात्राकालम् मनीषिणः। शब्दैर् निदर्शयन्त्यत्र चाषकाककलापिनाम्"[3] इति। सर्वसम्मतशिक्षायाम् च— "चाषो रौत्येकमात्रं हि द्विमात्रत्वन् तु वायसः। त्रिमात्रन् तु शिखी रौति ह्येतन् मात्रादिलक्षणम्"[4] इति। पारिशिक्षायाम् च "ह्रस्स्वश् च यावद् विपिने स्स्वभावात् किकीदिवी रौति स एकमात्रः। काकोऽब्रवीत् तद्द्विगुणन् तु कालन् द्विमात्रकस् स्यात् तु स एव दीर्घः॥ शिखी त्रिमात्रवँ वदति प्लुतस् स्याद् ह्रस्स्वार्धकालन् नकुलोऽर्धमात्रम्"[5] इति। लोमशश्या शिक्षायामपि— "चाषस् तु वदते मात्रान् द्विमात्रावँ वायसोऽब्रवीत्। शिखी त्रिमात्रो विज्ञेय एष मात्रापरिग्रहः"[6] इति। माण्डूकक्या शिक्षायामपि— "चाषस् तु वदते मात्रन् द्विमात्रवँ वायसोऽब्रवीत्। शिखी त्रिमात्रवँ विज्ञेय एष मात्रापरिग्रहः"[7] इत्त्येव पठ्यते॥७॥

६. मात्रामूला वर्णविभागाः

मात्रा ह्रस्स्वो द्विस् तु तावान् दीर्घ एकीभवन् स्वरः।
त्रिस् तथाऽतोऽधिको वाऽपि यस् तु स स्स्यात् प्लुतस् स्वरः॥८॥
परमाणुरणुश् चाऽर्धमात्रिकश् च लघुर् गुरुः।
क्षिप्रश् च दीर्घवद्भूतो वर्णो मात्राविभेदतः॥९॥

मात्रात्मकस् स्वरो ह्रस्स्व उच्यते। मात्रात्मकस्स्वरपरिमाणतुल्यपरिमाणस् स्वरोऽपृथक्प्रयत्नोच्चार्यतया एकीभवन् द्विरिव यत्राऽऽगच्छति स दीर्घः; तत्परिमाणतुल्यपरिमणोऽन्योऽपि स्स्वरो दीर्घो वेदितव्यः। मात्रात्मकस्स्वरपरिमाणतुल्यपरिमाणस् स्वरोऽपृथक्प्रयत्नोच्चार्यतया एकीभवन् त्रिरिव यत्रोच्चार्यते स स्वरः प्लुतः, तत्परिमाणतुल्यपरिमाणोऽन्योऽपि स्स्वरः प्लुतो वेदितव्यः। ह्रस्स्व-दीर्घ-प्लुतरूपा मात्राकृता वर्णभेदाः प्रसिद्धाः। व्यञ्जनानामपि

---

१. पृ. २७। २. सू. ४४१-४४२। ३. श्लो. ६९। ४. श्लो. १०७(३।९६)। ५. सू. ६९-७०। ६. ८।९ (शि.स., पृ. ४६२)। ७. श्लो. १३८ (शि. स., पृ. ४७५)।

केषाम् चिन् मते एकमात्तरत्वे सत्यपि न तत्तर ह्रस्स्वशब्देन व्यवहारः प्रसिद्धः । अत एव ऋग्वेदप्रातिशाख्यादावपि स्स्वराणामेव ह्रस्स्व-दीर्घ-प्लुतव्यवहारः प्रदर्शितः । पाणिनीयशिक्षायामपि "ह्रस्स्वो दीर्घः प्लुत इति कालतो नियमा अचि"[1] इति प्रोक्तम्। प्लुतस्य त्रिमात्तरत्वमेव बहुषु ग्रन्थेषु प्रतिपादितम्; किन्तु मुनिना पतञ्जलिना "ननु चोक्तम् तत्तरायथेष्टप्रसङ्ग (चतुर्मात्तरः प्लुतः प्राप्नोति) इति, तत्तर सौर्यभगवतोक्तम्— अनिष्टिज्ज्ञो वाडवः (तत्तरायथेष्टप्रसङ्ग इति वार्तिकम्) पठति, इष्यते चतुर्मात्तरः प्लुत इति"[2] इत्युक्त्वा चतुर्मात्तरस्य प्लुतस्य सत्ता स्फुटम् प्रतिपादितेति "त्रिस् तथाऽतोऽधिको वापि" इत्युक्तम् । ननु "त्रिस् तथा वा चतुर् वाऽपि" इत्येव उच्च्यताम्, किन् नु "त्रिस् तथाऽतोऽधिको वाऽपि" इत्यस्स्फुटमुच्च्यते ? इति चेदत्तरोच्च्यते— "दूराऽऽह्वाने गाने रोदने च प्लुतास् ते लोकतस् सिद्धाः"[3] इति दुर्गसिंहेन प्रोक्तमिति दूराह्वानादौ च प्लुतानान् न नियतमात्तराकत्वमिति च तेषामपि प्लुतानां सङ्ग्रहाय "त्रिस् तथाऽतोऽधिको वाऽपि" इत्युक्तमिति । एवम् च वेदे त्रिमात्तरस्स्यैव चतुर्मात्तरस्स्यैव वा यथाविधानवँ् वा प्लुतत्वम्, लोके तु ततोऽधिकानामपीति विषयविवेकः कार्यः । एवम् च दीर्घादधिकानां स्वराणाम् प्लुत इति व्यवहारो बोद्धव्यः । शिक्षाशास्त्रे तु य एकमात्तरस् स्वरस् त्रिमात्तरत्वम् प्राप्नोति स प्लुतः, यो द्विमात्तरस् स्वरस् त्रिमात्तरत्वम् प्राप्नोति स वृद्ध इत्यपि व्यवहारो दृश्यते[4] । लोमशिक्षायां शिक्षायाम् तु प्लुतादधिकस्स्य स्वरस्स्य अभिगीतत्वमुक्तवँ् विज्ज्ञायते[5] । मात्तराष्टमभागपरिमाणो वर्णः परमाणुः । मात्तराचतुर्थभागपरिमाणो वर्णोऽणुः । मात्तरार्धपरिमाणको वर्णोऽर्धमात्त्रिकः । असयँ् योगपरको ह्रस्स्वो लघुः । सयँ् योगपरको वर्णः परव्यञ्जनकालेन वृद्ध इव भूतो ह्रस्स्वो गुरुः । गुरोर् गुरुत्वं हि एववँ् विवृतम् प्राचीनैः — "गुर्वक्षरे द्विमात्तरत्वं सर्वशास्त्रेषु सुस्स्फुटम् । ह्रस्स्वे गुरौ तत्सम्पत्तिः परव्व्यञ्जनकालतः"[6] इति । दीर्घस्स्य अन्न्येब्भ्यो दीर्घेब्भ्यो लघुतरस्स्य क्षिप्रत्वम् पाराशर्यां

---

१. श्लो. ११ । २. पा. व्या. भा. ८।२।१०६, वा. ३ ।
३. कातन्त्रवृत्तौ १।३।४ । ४. मात्तरालक्षणे १।४ ।
५. १।२ । ६. तै. प्रा. वै. टी. २२।१५ (पृ. ५०५) ।

शिक्षायामुक्तम्[1]। ह्रस्स्वस्स्यैव सतो यस्स्य कियताऽपि कालविलम्बेनोच्चारणन् तस्स्य दीर्घवद्भूतत्वम् प्रतिज्ञासूत्रादिषु प्रतिपादितम्[2]। अथ ह्रस्स्वतादिप्प्रतिपादकानि वचनानि प्प्रदर्श्यन्ते। तत्तर ऋग्वेदप्रातिशाख्ये— "मात्तरा ह्रस्स्वः, द्वे दीर्घः, तिस्सरऽ प्लुत उच्च्यते स्वरः"[3] इति। शुक्लयजुर्वेदप्रातिशाख्ये च—"अमात्तरस्स्वरो ह्रस्स्वः, मात्तरा च, द्विस् तावान् दीर्घः, प्लुतस्तत्तिरः, व्यञ्जनमर्द्धमात्तरा, तदर्द्धमणु, परमाण्वर्द्धाणुमात्तरा"[4] इति। तैत्तिरीयप्रातिशाख्येऽपि—"ऋकारल्कारौ ह्रस्स्वौ, अकारश् च, तेन च समानकालस् स्वरः, अनुस्स्वारश् च, द्विस् तावान् दीर्घः, तिरऽ प्लुतः, ह्रस्स्वार्धकालवँ व्यञ्जनम्"[5] इति। ऋक्तन्तरेऽपि—"अकालो ह्रस्स्वः, अर्धमणु, मात्तरा, द्वे दीर्घम्, तिस्सरो वृद्धम्"[6] इति। शौनकीयचतुरद्ध्यायिकायाम् च— "एकमात्तरो ह्रस्स्वः, व्यञ्जनानि, द्विमात्तरो दीर्घः, तिरमात्तरऽ प्लुतः"[7] इति। शैशिरीयशिक्षायाम् च— "ह्रस्स्वो दीर्घऽ प्लुत इति स्स्वराऽ कालेन सञ्ज्ञिताः। सन्ध्यक्षराणाङ्ग कालश् च दीर्घऽ प्लुतो न मात्तिरकः"[8] इति। एवमेव शौनकशिक्षायाम् च[9]। पाणिनीयशिक्षायामपि—"ह्रस्स्वो दीर्घऽ प्लुत इति कालतो नियमा अचि"[10] इति। याज्ञवल्क्यशिक्षायाम् च— "एकमात्तरो भवेद् ध्रस्स्वो द्विमात्तरो दीर्घ उच्च्यते। तिरमात्तरस् तु प्प्लुतो ज्ञेयो व्यञ्जनञ् चार्धमात्तिरकम्"[11] इति। व्यासशिक्षायाम् च—"ह्रस्स्वस् स्यादेकमात्तरस्स्य द्विमात्तरस्स्य तु दीर्घता। तिरमात्तरस्स्य प्प्लुतोऽचां हि पादो मात्तराचतुर्थकः"[12] इति। चारायणीयशिक्षायाम् च— "एकमात्तरस् स्वरो ह्रस्स्वो द्विमात्तरो दीर्घ उच्च्यते। प्लुतस् तिरमात्तरो विज्ञेयो व्यञ्जनन् त्वर्धमात्तरकम्॥ ह्रस्स्वन् द्विमात्तरसयँ युक्तम् प्लुतमाहुर् मनीषिणः। वृद्धस् तिरमात्तरमेवाऽपि व्यञ्जने त्त्वर्धमात्तरकम्"[13] इति। लोमशश्यां शिक्षायामपि— "ह्रस्स्वन् दीर्घन् तथा वृद्धमभिगीतन् तु सामगाः।

---

१. श्लो. २५–२७ (शि, स., पृ. ५५)। २. प्र. सू. ३।३; शु. य. प्रा. ४।१०९; व. र. प्र. शि. श्लो. १९०–१९१। ३. १।२७–३०। ४. १।५५–६१। ५. १।३१–३७। ६. २।४।१०–२।५।४। ७. १।५९–६२। ८. श्लो. १५। ९. श्लो. १०। १०. श्लो. ११। ११. श्लो. १३ (शि. स., पृ. २)। १२. सू. ४७३–४७४। १३. पृ. १२।

मुहुर् मृदङ्गवत् कुर्युस् सम्पातोत्थानसञ्ज्ञवत्"[1] इति ह्रस्स्वादय उल्लिखिताः, "एकमात्त्रो भवेद् ह्रस्स्वो द्विमात्त्रो दीर्घ उच्च्यते। त्रिमात्त्रस् तु प्लुतो ज्ञेयो व्यञ्जनञ् चार्धमात्त्रिकम्"[2] इति ह्रस्स्वादिपरिचयश् च दत्तः। मात्त्रालक्षणे च— "ह्रस्स्वम् मात्त्रा, दीर्घन् द्वे, प्लुतवँ् वृद्धञ् चेति त्रिमात्त्रमभिधीयते। ह्रस्स्वन् द्विमात्त्रसयँ्युक्तम् प्लुतमाहुर् मनीषिणः। दीर्घन् तु मात्त्रासयँ्योगाद् वृद्धमित्त्यभिधीयते"[3] इति। पाणिनीयम् "उकालोऽज् ह्रस्स्वदीर्घप्लुतः"[4] इति सूत्त्रन् तु सञ्ज्ञामात्त्रपरमिति र ह्रस्स्वादि-स्स्वरूपस्पष्टीकरणाय विशेषेणोपयुज्ज्यते ॥८–९॥

७. वर्णविशेषपरिमाणगता विशेषाः

परिमाणविशेषाद् धि वर्णेवर्णे भवन्ति ये।
विशेषास् तेऽत्त्र वक्ष्यन्तेऽकारादौ हि यथाक्षरम् ॥१०॥

(क) अकारगतो विशेषः

अकारस् त्रिविधो ह्रस्स्वो दीर्घश्च प्लुत इति क्षरमात्।
मात्त्राविभेदतस् तत्त्राऽऽकृतिभेदस् तु नेष्ष्यते ॥११॥

दीर्घाकारे प्लुताकारे च ह्रस्स्वाकाराकृतिभिन्नाकृतिकत्त्वन् नेष्ष्यत इति वर्णाद्ध्याय एव विस्तरेण निरूपितन् तत् तत एवाऽवगन्तव्यम्॥११॥

(ख) ह्रस्स्व–स्वर–सामान्यगता विशेषाः

ह्रस्स्वास् सयँ्योगपरका व्यञ्जनान्ता विरामगाः।
द्विमात्त्रतुल्त्या गुरव इति कात्त्यायनानुगाः ॥१२॥

तथाहि शुक्लयजुर्वेदप्रातिशाख्ये– "सयँ्योगपूर्वव्व्यञ्जनान्ताऽवसानगतास् स्वरा द्द्विमात्त्राः"[5] इति। तद्व्याख्याने उव्वटश् च— "एते स्स्वरा द्विमात्त्राकाला भवन्ति न तु दीर्घाः। गुरव एते भवन्ति"[6] इति। वर्णरत्नप्प्रदीपिकाकारश् च— "स्वरास् सयँ्योग-पूर्व्वा ये व्यञ्जनान्तास् तथाऽन्तगाः। एषाङ्कालो द्विमात्त्रस् स्यान् न तु दीर्घा हि ते स्स्मृताः॥ यथाग्गँ्निर्द्धूर् यथा विष्णुः प्रत्त्यङ्ङ दद्ध्यङ्ङ ऋषिस्तुतम्। याहि पाहि रक्ष मधु विद्द्यादेवन् निदर्शनम्"[7]

---

१. १।२ (शि. स., पृ. ४४९)। २. ८।१० (शि.स.,पृ.४६२)। ३. १।३, ४। ४. अष्टा. १।२।२७। ५. ४।१०९। ६. शु. य. प्रा. भा. ४।१०९। ७. श्लो. १९०–१९१ (शि. स., पृ. १३४)।

इति । प्रातिशाक्ख्यप्प्रदीपशिक्क्षायाम् चोक्तस्य सूत्रस्य तात्पर्यस्य प्प्रतिपादने "द्विमात्त्रा इति ह्रस्स्वापेक्क्षया किञ्चित्कालाऽऽधिक्क्यस्योपलक्क्षणन् न तु दीर्घत्त्वस्य"[1] इत्त्युक्तम् । तत्त्र सयँयोगात् पूर्वस्य व्यञ्जनामृतस्य च कालाधिक्क्यम् परव्यञ्जनकालेन कृतवँ वेद्द्यम्; तदुक्तम्— "गुर्वक्क्षरे द्विमात्त्रत्त्वं सर्वशास्त्रेषु सुस्स्फुटम् । ह्रस्स्वे गुरौ तत्समप्तत्तिः परव्यञ्जनकालतः"[2] इति । अवसानगतानां स्वराणां ह्रस्स्वानामपि गुरुत्त्वञ्च कालाधिक्क्यवँ वा तु स्वरस्स्वरूपवर्धनजवँ विरामकालयोगजवँ वा वेद्द्यम् ॥१२॥

सव्व्यञ्जनः पदादिस्स्थोऽकारो माद्ध्यन्दिनीयके ।
मन्त्र ईषद्दीर्घ इति प्प्रतिज्ञ्ञासूत्त्रकृन् मुनिः ॥१३॥

तथा हि प्रतिज्ञ्ञासूत्त्रे "पदाद्द्यस्य सयँयुक्क्ताकारस्स्येषद्दीर्घता च भवतीषद्दीर्घता च भवति"[3] इति ॥१३॥

आकारस् सव्व्यञ्जनो वाऽव्व्यञ्जनोऽन्न्योऽपि वा स्स्वरः ।
सव्व्यञ्जनविसर्गश् च गुर्व्ववव्व्यवहितः परः ॥१४॥
न चेल् लघुस्स्वरास् सर्वे मन्त्रे वाजसनेयिनाम् ।
ईषद्दीर्घा भवन्तीति केचिन् माद्ध्यन्दिनीयकाः ॥१५॥

व्यञ्जनेन व्यवहितोऽव्व्यवहितो वाऽपि दीर्घोऽवर्णोऽथवा व्यञ्जनेन व्यवहितो विसर्गान्वितोऽन्न्योऽपि वा स्स्वरो गुर्वक्क्षराव्व्यवहितः परत्त्र न वर्त्तते चेत् सर्वेऽपि लघवस् स्वरा माद्ध्यन्दिनीयवाजसनेयिमन्त्रसंहितायाम् ईषद्दीर्घा (सार्धैकमात्त्राः) भवन्ति इति केचिद् भणन्ति, प्रायस् तथैव चाऽधीयते । तथाहि केशवीयनवाङ्कसूत्त्रशिक्क्षायाम्— 'ह्रस्स्वञ्च किञ्चिद् दीर्घं हल्युताकारे हल्विसर्गयुग्वर्णे च न संहितायाम्'[4] इति । तद्व्याक्ख्यानञ् च—"पदान्ते मद्ध्ये च ह्रस्स्वस्स्य किञ्चिद्दीर्घोचारस् स्याद्, हल्युतायुते आकारे परे हल्विसर्गयुग्वर्णे च परे न स्स्याद् वाजसनेयिसंहितायाम्" इति । उदाहरणानि च "इषे त्त्वोर्ज्जेत्त्वा वायवस्त्थ देवो वः"[5] इत्त्यत्त्र इकारयकारस्स्थकारस्स्वराः । 'सविता'[6] इत्त्यत्त्र व्यञ्जनयुत आकारः परत्त्र वर्त्तते इति सकार-विकारस्स्वरौ नेषद्दीर्घौ । "कर्म्मणऽआप्प्यायद्-

---

१. शि. स., पृ. २५५-२५६ । २. तै. प्रा. वै. टी. २२।१५ (पृ. ५०५) । ३. ३।३ । ४. सू. ९ ।
५. मा. वा. शु.य म. ब्र. य. सं. १।१ । ६. तत्त्रैव ।

ध्वम्"[1] इत्यत्तर व्यञ्जनायुत आकारः परत्तराऽस्ति, अतो मकारणकारस्स्वरौ नेषद्दीर्घौ। "निष्टप्ताऽअरातयः"[2] इत्यत्तर व्यञ्जनव्यवहितस् सविसर्गस् स्वरः परत्तराऽस्तीति तकारस्स्वरो नेषद्दीर्घः"। एवमेव "देवस्य त्वा सवितुः प्रसवे"[3] इत्यत्तर सकारविकारस्स्वरौ नेषद्दीर्घौ। वर्णोच्चारणप्रकारपरिशिष्टशिक्षायामपि— "ह्रस्स्वन् दीर्घम् भवेत् किञ् चित् संहिताविषये स्स्वके। हल्विसर्गयुते वर्णे हल्युतायुतके च न॥ सपत्तँ नान्न्यद्ध्वमगघँ न्येति किञ्चिद्दीर्घो भवेदिह। भागम् प्रजावतीत्यादौ ह्रस्स्वता न तु दीर्घता॥ हल्युताऽऽकारसयँ योगादिति ज्ञेयवँ विचक्षणैः"[4] इति। अयवँ विषयो माध्यन्दिनीयवाजसनेयिमन्त्रसंहितासम्बद्धासु अन्न्यासु शिक्षासु न दृश्यते। केशवेनाऽपि अस्मिन् विषये प्रतिज्ञासूत्रस्य "ईषद्दीर्घता च भवति"[5] इति वचनमेव प्रमाणीकृतम्[6]; वस्तुतस् तु तद् वचनम् पदादिस्स्थस्स्याकारस्स्यैवेषद्दीर्घताम् बोधयतीति केशववचनञ् चिन्त्यम् भाति। यदपि "आर्ष्यां संहितायान् दीर्घपाठेऽमुकोऽध्याय इति लिखितमाचार्यैः"[7] इत्युक्तञ्च केशवेन तदपि पदादिस्स्थह्रस्स्वाकारोच्चारणविशेषमुपादायैवाऽपि दीर्घपाठव्यवहार उपपद्यत इति चिन्त्यमेव। यदपि सम्प्रदायप्रबोधिनीकारेण "प्रतिज्ञापरिशिष्टे यद् दीर्घत्वम् प्रतिपादितम्। तदनुस्स्मृत्य सर्वत्तर मात्तराकालस्य दीर्घता"[8] इत्युक्तन् तदपि निर्मूलमेव, प्रतिज्ञासूत्रे पदादिस्स्थस्स्य ह्रस्स्वाकारस्स्यैव ईषद्दीर्घतायाः प्रतिपादितत्वात्। यदि पदादिस्स्थस्स्य ह्रस्स्वाकारस्स्यैव केशवोक्तविधानामन्न्येषामपि ह्रस्स्वस्स्वराणामीषद्दीर्घता सम्प्रदायप्राप्ता अभविष्यद्, यदि वा सम्प्रदायप्रबोधिनीकारप्रोक्ता मात्तराकालस्स्य सार्वत्तिकी दीर्घता सम्प्रदायप्राप्ताऽभविष्यत् तर्हि पदादिस्स्थस्स्य ह्रस्स्वाकारस्स्येषद्दीर्घताम् ब्रुवाणः प्रतिज्ञासूत्तरकारः केशवोक्तविधं सम्प्रदायप्रबोधिनीकारोक्तविधवँ वाऽर्थञ्च कथन् नाऽवक्क्ष्यत्, कथवँ वाऽन्न्ये शिक्षाकारास् तमर्थन् नाऽवक्क्ष्यन्। एतद्विषये प्रतिज्ञासूत्तरमुल्लिखन्[9] प्रातिशाख्यप्रदीपशिक्षाकारोऽपि नवाङ्कसूत्तरा-

---

१. मा.वा.शु.य.वे.म.ब्र.य.सं. १।१। २. तत्तरैव १।७।
३. तत्तरैव १।१०। ४. श्लो. २७–२९ (शि. स., पृ. १७४)।
५. प्र. सू. ३।३। ६. शि. स., पृ. १४९। ७. तत्तरैव।
८. श्लो. १०८(पृ.२३)। ९. शि. स., पृ. ३००।

ऽऽदिकन् नोदलेखीदिति वर्णोच्चारणप्रकारपरिशिष्टवचनप्रामाण्यमपि विवेचनीयमेवाऽऽभातीति च अस्मिन् विषये माद्ध्यन्दिनीयवाजसनेयिभिर् भृशवँ विचारणीयम् प्रतिभाति ॥१४-१५॥

(ग) दीर्घप्लुतेवर्णोवर्णस्स्वरूपस्स्पष्टीकरणम्

दीर्घभावे प्लुतत्वे च इवर्णोवर्णयोरपि ।
आकृत्यैक्यं सँस्कृतेऽपब्भ्रंशेष्वपि न संशयः ॥१६॥

अयमर्थो वर्णाद्ध्याये दीर्घावर्णस्वरूपविवेकप्रसङ्गे उक्त एवाऽत्तर प्रसङ्गात् पुनः प्रोक्तो वेदितव्यः ॥१६॥

(घ) दीर्घप्लुतऋकारलृकारस्वरूपगतो विशेषः

दीर्घप्लुतऋकारलृकारयोर् मात्तरानिवेशने ।
द्वितीया च तृतीया च मात्तराऽकारनिभैव हि ॥१७॥

ऋकारलृकारयोस् स्वरूपवँ वर्णाद्ध्याये निरूपितम् । समानाक्षराणान् दीर्घत्वे प्लुतत्वे च तस्यतस्य स्वरस्य ह्रस्स्वरूपस्य एकवर्णवद्भावेन द्विरिव त्तिरिवोच्चारणम् भवतीति चाऽनुपदमेवोक्तम्। तथा च ऋकारलृकारयोरपि दीर्घभावे प्लुतत्वे च तथैवोच्चारणं स्यादिति बुद्धिः प्राप्ता । एवञ् च दीर्घऋकारे प्रथमायाम् मात्तरायाम् मद्ध्ये एको रेफो द्वितीयायाम् मात्तरायाञ् च मद्ध्ये एको रेफ इति दीर्घऋकारस्वरूपे स्वरभागः+रेफः+**स्वरभागः+स्वरभागः**+रेफः+स्वरभाग इति भागक्करमस् स्यादिति प्राप्तम्; एवमेव प्लुतऋकारस्स्वरूपे च स्वरभागः+रेफः+**स्वरभागः+स्वरभागः+**रेफः+**स्वरभागः+स्वरभागः**+रेफः+स्वरभाग इति भागक्करमस् स्यादिति च प्राप्तम् । एवमेव लृकारस्स्य दीर्घत्वे प्लुतत्वे च प्राप्तिः । अत उच्यते—**दीर्घप्लुतऋकारलृकारयोरित्त्यादि** । दीर्घस्स्य प्लुतस्स्य ऋकारस्स्य लृकारस्स्य च मात्तरयोर् मात्तराणाञ् च निवेशे प्रथमायाम् मात्तरायामेव स्वरभागयोर् मद्ध्ये यथायथं रेफो लकारो वा भवति, द्वितीयायान् तृतीयायाञ् च मात्तरायान् तु मद्ध्ये रेफो लकारो वा न भवति, दीर्घप्लुताकारयोरिव केवलम् अकारनिभस् स्वरभाग एव भवतीत्त्यर्थः । अत एव शौनकीयचतुरद्ध्यायिकाक्ख्ये अथर्ववेदप्रातिशाक्ख्ये "सँस्पृष्टरेफमृवर्णम्"[1] इत्त्युक्त्वा "दीर्घप्लुतयोः पूर्वा मात्तरा"[2] इत्त्युक्तम् । तदर्थश् च ऋवर्णं रेफगर्भकम् भवति, दीर्घस्स्य प्लुतस्स्य च ऋवर्णस्स्य प्रथमा मात्तरैव

---

१. १।३७ । २. १।३८ ।

रेफगर्भिका भवतीति बोद्ध्यः। एवम् च दीर्घस्य ऋकारस्य द्वितीयाया मात्तरायाः प्लुतस्य ऋकारस्य द्वितीयायास् तृतीयायाश् च मात्तराया रेफगर्भकत्वाभावे विज्ञाते सति ऋकारगतस्वरभागनिरूपणादेव दीर्घप्लुतऋकारगतद्वितीयतृतीयमात्तराणाम् अकारनिभत्वं सुखेन विज्ञातुं शक्यते। एवम् ऋकारस्य दीर्घप्लुतयोस् स्वरूपयोर् विज्ञातयोस् सतोः लृकारस्य च दीर्घप्लुते स्वरूपे तदनुरूपे एवेति सुखेनावसातुं शक्यम् ॥१७॥

लृकारस्य तु दीर्घत्वन् नास्ति वाजसनेयिनाम्[1]।
लोकेऽनुकरणादौ स्यादन्यवेदेषु तत् क्वचित् ॥१८॥

लृकाररूपस् स्वरः प्रयोगे विरलतया प्राप्यते क्लृप्त इत्यादौ। तत्तराऽपि पाणिनीयव्याकरणप्रक्रियायान् तु क्लृपेर् लत्वस्याऽसिद्धत्वाद् ऋकारस्यैव अच्कार्याणि भविष्यन्तीति "ऋलृक्" इति पाणिनीयवर्णसमाम्नायसूत्तरे लृकारोपदेशोऽनर्थक इत्याशङ्क्य "लृकारोपदेशो यदृच्छाऽशक्तिजानुकरणप्लुत्याद्द्यर्थः"[2] इत्युक्तवँ वार्तिककारेण। तथाऽपि वेदे लौकिकसंस्कृतभाषायाम् च पाणिनीयव्याकरणप्रक्रियागतस्य सिद्धत्वस्याऽसिद्धत्वस्य वाऽप्यकिञ्चित्करत्वाद्, लृकारस्य विरलत्वेऽपि वेदे लौकिकसंस्कृतभाषायाम् च तस्य सत्वात् तस्य वर्णसमाम्नाये उपादानमावश्यकम्। अत एव ऋग्वेदप्रातिशाख्यवर्गद्द्वयादिषु लृकारो वर्णसमाम्नाये उपात्तः। तत्तर ऋग्वेदप्रातिशाख्यवर्गद्द्वये "आकारादीन् दीर्घरूपान् द्वितीयान् ह्रस्वेषु पञ्चस्वपि तानि सन्ति"[3] इत्युक्त्वा लृकारस्यापि दीर्घं रूपं स्वीकृतन् दृश्यते। किन् तु "चाक्लृप्रे तेन ऋषयो मनुष्याः"[4] इत्यादौ ह्रस्वस्य लृकारस्य दशतय्यामुपलम्भेऽपि तत्तर दीर्घ लृकारो न प्राप्यते इति उव्वटेनोक्तम्[5]। शुक्लयजुर्वेदप्रातिशाख्येऽपि अष्टमेऽद्ध्याये वर्णसमाम्नाये लृ इति लृ इति लृ ३ इति ह्रस्वदीर्घप्लुता लृकारा उपदिष्टा दृश्यन्ते[6]। तत्तर 'माद्ध्यन्दिनीयानाम् लृकारो दीर्घो नास्ति'[7] इति चोक्तम्। तैत्तिरीयप्रातिशाख्ये तु वर्णसमाम्नाये दीर्घ लृकारो नैवोपात्तः[8]। ऋक्तन्त्रे तु यद्द्यपि प्लुतास्

---

१. या. शि.; शि. व. वि; पृ. ९१। २. पा. व्या. भा., ऋलृक् इति सूत्तरे, वा. १। ३. श्लो. ९ (२।३, ४)। ४. शा. ऋ. म. सं. १०।१३०।६। ५. ऋ. प्रा. भा १।४१। ६. ८।३। ७. ८।३९। ८. १।२-३

स्वरा वर्णसमाम्नाये नैवोपदिष्टास् तथापि दीर्घ लृ॒कारस् तूपदिष्ट एव[1] । शौनकीयचतुरद्ध्यायिकायाम् च तद्व्याक्ख्यानुसारन् दीर्घ लृकार उपात्तत्र प्रतीयते[2] । वर्णपटले तु "लृवर्णे नास्ति दीर्घता"[3] इत्युक्तम् । आपिशलिशिक्क्षासूत्तरेऽपि "लृवर्णस्य दीर्घा न सन्ति, तन् द्वादशभेदमाचक्क्षते, यदृच्छाऽशक्तिजानुकरणा वा यदा दीर्घास् स्युस् तदा तमप्यष्टादशप्प्रभेदम् ब्रुवते"[4] इत्युक्तम् । अत लृकारस्स्य दीर्घप्प्लुते रूपे सम्भवित्वाभिप्प्रायेणैवोल्लिखिते आचार्यैर् नाऽऽम्नायप्प्रयोगमनुसर्तुमिति विवेक्तव्यम् । एवमेव ऋकारस्स्य प्लुतरूपविषयेऽपि विचारणीयम् । यत् तु भट्टोजिप्प्रभृतिभिरनुकरणशब्दस्स्य "गम्लृ" इत्यादेर् गमृ॒न् गमृ॒णाम् इत्यादिकम् उदाहृतम्[5], यच् च वामनेन काशिकायाम् औत्सर्गिकतया लृकारस्स्य दीर्घताया अभावं स्वीकृत्य 'होतृ लृकारः होतृ॒कारः'[6] इत्युक्तन् तच् चिन्त्यमेव, वेदशाखायाङ् कस्स्यान् चिद् लृकारस्स्य दीर्घताया अभावेऽपि वेदे लौकिकसंस्कृतभाषायान् च सर्वथा दीर्घलृकारस्स्याऽभावस्स्याऽसिद्धेः ॥१८॥

(ङ) सन्ध्यक्क्षरमात्तराविशेषनिरूपणम्

सन्ध्यक्क्षराणां सर्वेषावँ वैशिष्ट्यस्स्य निरूपणे ।
तदंशमात्तराऽ प्राक् प्रोक्ता उच्चयन्तेऽत्तर च सङ्ग्रहात् ॥१९॥

वर्णाद्ध्याये एकारस्स्य ओकारस्स्य च स्वरूपयोर् निरूपणे एकारस्स्य ऐकाराद् ओकारस्स्य औकारात् पार्थक्क्यस्स्य प्प्रतिपादने च सन्ध्यक्क्षराणाम् मात्तरानिवेशवैशिष्ट्यवँ व्याक्ख्याभागे प्रसङ्गादुल्लिखितम् । अत्तर च प्रकरणप्राप्ततत्वात् सोऽर्थऽ कारिकाभिरपि सङ्क्षेपेण प्प्रतिपाद्द्यते ॥१९॥

एकारे तद्वदोकारेऽंशयोर् मात्तरे समे मते ।
ते आमिश्शरीभूततया ह्यसलँ लक्क्ष्ये पृथक्तया ॥२०॥
इत्येकारौकारद्विस्स्थानकत्वप्प्रतिपादकाः ।
तयोरेकस्स्थानकत्वे नाऽंशमात्तराविचारणा ॥२१॥

एकारे ओकारे च पूर्वोत्तरयोरंशयोर् मात्तरे समे इति ऋग्वेदप्रातिशाक्ख्यस्स्य "मात्तरासंसर्गादवरे पृथक्श्रुती"[7] इति वचनेन सूचितम्, उव्वटेन तद्व्याक्ख्याने प्रतिपादितञ् च । पाणिनीयशिक्क्षायामपि

---

१. १।२ । २. १।३९ । ३. ३।३ (अथर्वपरि. ४७।३।३) । ४. वृत्तिकारप्प्रकरणे सू. ४–६ । ५. अजन्तपुलँलिङ्गप्प्रकरणे लृदन्तेषु । ६. ६।१।१०१ । ७. १३।४० ।

"अर्धमात्त्रा तु कण्ठ्यस्य एकारौकारयोर् भवेत् । एकारौकारयोर् मात्त्रा तयोर् विवृतसर्वं वृतम्"[1] इत्युक्त्वा एकारे ओकारे च अकारभागस्य मात्त्रिकताया उक्तत्वादुत्तरभागयोरपि मात्त्रिकत्वमर्थादुक्तम् भवतीति समो मात्त्राविभागः प्रतिपादितो विज्ज्ञायते । याज्ञवल्क्यशिक्षायामपि— "आद्द्या मात्त्रा तु कण्ठ्यस्य एकारौकारयोर् भवेत् । तालव्यस्य तथौष्ठ्यस्य द्वितीया च यथाक्रमम्"[2] इत्युक्त्वा सम एव मात्त्राविभाग एकारौकारयोः प्रतिपादितोऽवसीयते । कालनिर्णयशिक्षायामपि— "एकारौकारयोरादावकारोऽप्येकमात्त्रकः । इवर्णोवर्णयोश् शेषौ भवेतामथ मात्त्रिकौ"[3] इत्युक्त्वाऽयमेव पक्षः प्रतिपादितः । तयोर् मात्त्रयोरामिश्रीभूतत्वमपि उपर्युद्धृतऋग्वेदप्रातिशाख्यवचनेनैव स्फुटमुक्तवं वेद्द्यम् । एकारस्य ओकारस्य च एकस्थानकतायाः पक्षे पाणिनीयव्याकरणवार्तिककारभाष्यकारप्रोक्ते तु एकारे ओकारे चेयम् मात्त्राविभागविचारणा नैव भवति ।।२०–२१।।

एकारन् तद्वदोकारङ् क्वचिद् ह्रस्स्वमधीयते ।
राणायनीयचरणशाखिनस् सात्त्यमुग्गिरणः ।।२२।।

यद्द्यपि आपिशलिशिक्षासूत्त्रे "सन्ध्यक्षराणां ह्रस्स्वा न सन्ति, तान्न्यपि द्वादशप्प्रभेदानि, छन्दोगानां सात्त्यमुग्गिरराणायनीया ह्रस्स्वानि पठन्ति, तेषामप्यष्टादशप्प्रभेदानि"[4] इति पठ्यते इति एकारौकारयोरपि ह्रस्स्वत्वं सात्त्यमुग्गिरसम्मतम् प्रतीयते, तथापि पाणिनीयव्याकरणभाष्ये "ननु चैङस् सस्थानतरावर्ध एकारोऽर्ध ओकारश् च । न तौ स्तः । यदि हि तौ स्यातान् तावेवायमुपदिशेत् । ननु च भोश् छन्दोगानां सात्त्यमुग्गिरराणायनीया अर्धमेकारमर्धमोकारञ् चाऽधीयते । सुजातेँ एँश्श्वसूनृते, अद्ध्वर्य्योँ ओँद्द्रिभिस् सुतम्, शुक्करन् तेँ एँन्न्यद्, यजतन् तेँ एँन्न्यद् इति । पार्षदकृतिरेषा तत्त्र भवताम्, नैव हि लोके नाऽन्न्यस्मिन् वेदेऽर्ध एकारोऽर्ध ओकारो वाऽस्ति"[5] इत्युक्तमिति एकारस्य ओकारस्य चैव हि ह्रस्स्वत्वं सात्त्यमुग्गिरभिरधीयमानत्वम् प्रतीयते । यदि एकारस्य औकारस्य च ह्रस्स्वत्वन् तैरधीयमानमभविष्यत् तर्हि दीर्घस्य एकारस्य औकारस्य च ह्रस्स्वतायाः प्रसङ्गे तयोस् सस्थानतरौ ह्रस्स्वौ एकारौकारौ स्याताम्

---

१. श्लो. १९ । २. या. शि. शि. व. वि., पृ. ९० ।
३. श्लो. १२ । ४. वृत्तिकारप्रकरणे सू. ७–१० ।
५. १।१।४८, वा. ३; ए ओङ, ऐ औच् इत्यत्त्र च वा. ४ ।

इति शङ्काऽपि पाणिनीयव्याकरणभाष्ये उत्थापिताऽभविष्यत्। न चोत्थापिता; अत एकारस्य ओकारस्य चैव हि ह्रस्वता सात्त्यमुग्गिरणामाम्नाये वर्तमाना प्रतीयते। एकारस्य ओकारस्य चैव हि एकस्थानकत्वस्यापि प्रतिपादितत्वात्[1] तयोर् ह्रस्वत्वयं युक्तियुक्तम् न तु ऐकारस्य औकारस्य च। तैत्तिरीयप्रातिशाख्येऽपि– "स पूर्वस्यार्धसदृशमेकेषाम्"[2] इति एकारस्य ओकारस्य चैव हि ह्रस्वता सूच्यते। तद्व्याख्याने वैदिकाभरणकारश् च— "योऽयमकार एकारौकारपूर्वो न लुप्यते स खलु स्वस्मात् पूर्वस्य वर्णस्यार्धेन सदृशं रूपमुपगच्छति इत्येकेषामाचार्याणाम् मतम्। यथा "ते एँग्ग्रे अश्श्वमायुन्जन्"[3]इत्येकारस्यार्धेन,"यो रुद्द्रो ओँग्ग्नौ यो ओँफ्सु"[4]इत्योकारस्य।सोऽयम् छन्दोगावान्तरचरणानां सात्त्यमुग्गिरराणायनीयानाम् पक्षः। अस्मच्छाखादौ तु न विद्द्यते। अत एवाऽनयोर् वर्णयोर् वर्णसमाम्नाये न पाठः"[5] इत्येवाऽऽह। न्यूङ्खेऽपि अर्धानाम् ओकाराणाम् प्रसिद्धिरस्ति। तथा चाऽऽश्वलायनः — "तस्यतस्य चोपरिष्टादपरिमितान् पञ्च वाऽर्धौकाराननुदात्तान्"[6] इति। एतत् सर्ववँ विचार्याऽस्माभिरपि एकारस्य ओकारस्य चैव हि ह्रस्वत्वञ्च कारिकायामुल्लिखितम् ॥२२॥

सन्ध्यक्षरत्वादपि च द्विस्थानकतयाऽपि च।
एकारौकारयोर् दैर्घ्यवँ वेदितव्यं स्वभावजम् ॥२३॥
तयोरेकस्थानकत्वे जाते सत्त्यप्यकारवत्।
द्विगुणीभावतो दैर्घ्यं स्यात् तथाऽधीयतेऽपि च ॥२४॥

सन्ध्यक्षरस्य विजातीयस्वरद्द्वयसंश्लेषजत्वात् स्थानद्द्वयजन्यविजातीयस्वरभागयोरुच्चारणेऽधिकतरस्य कालस्याऽऽवश्यकत्वाद् एकारस्य ओकारस्य च वस्तुतस् सन्ध्यक्षररूपस्य दीर्घता स्वभावजा वेदितव्या। यदा तु एकारस्य ओकारस्य च शाकटायनसम्मता द्विस्थानकता उच्चारणे विलुप्ता, भूतपूर्वगतत्यैव तयोस् सन्ध्यक्षरत्वञ्च व्यवहृतम् तदा तयोर् ह्रस्वताऽपि स्वरूपानुकूलाऽभूत्, तथाऽपि तयोर् दैर्घ्यस्य सँस्कारस्य परम्परया अ–इ–उ–वर्णानायँ यथा दीर्घभावस् तथैव द्विगुणितीकरणेन दीर्घभावं सम्पाद्द्योच्चारणादेव

---

१. पा.व्या.भा. १।१।४८। २. ११।१९। ३. तै.सं. १।७।७।
४. तत्रैव ५।५।९। ५. तै. प्रा. वै. टी. ११।१९ (पृ.३३१)।
६. आ. श्रौ. सू. ७।११।३।

तयोर् दीर्घता व्यवहृता बोद्ध्या। यद्द्यपि लौकिकगद्द्योच्चारणे जना एकारमोकारञ् च प्रायेण ह्रस्वमेव पठन्ति तथापि पद्द्योच्चारणे लौकिका वेदोच्चारणे वैदिकाश् च एकारमोकारञ् च द्विगुणितीकृत्य दीर्घमेवोच्चारयन्तीति सम्यगवधाने दत्ते बोद्धुं शक्यम् ॥२३-२४॥

प्लुतिरेकारस्य तथौकारस्य च भवेत् क्वचित्।
अंशयोरविभागेन विभागेन क्वचित् पुनः ॥२५॥
अदूराह्वानविषये ह्यनयोरप्रगृह्ययोः।
अकार आद्द्योऽर्धोऽस्यैव प्लुतिस् स्यादिति पाणिनिः ॥२६॥
प्रश्नान्ते प्रत्यभीवादे याज्ज्यान्ते चाऽभिपूजिते।
विचार्यमाणे चैव स्यात् तथा वार्तिककृन्मते ॥२७॥

एकारस्य ओकारस्य च प्लुतौ क्वचिद् अंशयोरविभागेनैव प्लुतिर् भवेत्। इदञ् च एकारस्य ओकारस्य च एकस्थानकत्वे सुखेन सम्भवति, द्विस्थानकत्वेऽपि उभयांशविवृद्ध्या कथञ् चित् सम्भवेदेव। तथाहि गोपथब्राह्मणे द्विस्थानकस्य ओङ्कारस्यौकारस्य प्लुतिः प्रतिपादिताऽस्ति अंशविशेषप्लुतत्युल्लेखवँ विनैव "(ओङ्कारः) कतिमात्तर इत्यादेस् तिस्रो मात्तरा अब्भ्यादाने हि प्लवते मकारश् चतुर्थीम्, किं स्थानमित्युभावोष्ठौ स्थानन् नादानुप्रदानकरणौ च द्द्वयस्थानं सन्ध्यक्षरमवर्णलेशऽ कण्ठ्यो यथोक्तशेषऽ पूर्वो विवृतकरण स्थितश् च द्वितीय स्पृष्टकरण स्थितश् च"[1] इति। क्वचित् तु एकारस्य ओकारस्य च प्लुतौ अंशयोर् विभागेन एकस्यैवांशस्य प्लुतिर् भवति। तथाहि पाणिनिः— "एचोऽप्रगृह्ययस्याऽदूराद् धूते पूर्वस्यार्धस्याऽदुत्तरस्येदुतौ"[2] इति। अत्तर च 'पूर्वार्धस्य+आत् इति च्छेदः' इति लघुशब्देन्दुशेखरे[3] बृहच्छब्देन्दुशेखरे[4] च मुद्रितपाठः, स एव युक्तः[5] इति च केचन यथालिखितपाठका विवेकशिथिलाऽ पण्डितम्मन्न्याः; किन् तु प्लुतविधानस्य प्रकरणप्राप्ततत्वाद् अवर्णस्य यावती विवृद्धिरेकारस्यौकारस्य च प्लुतत्वसम्पत्तये ऽलम्, तावती विवृद्धिरपि पूर्वस्यार्धस्य+अत् इति च्छेदेऽपि सुलभैवेति उक्तपाठश् चिन्त्य एव। तकारस्य मुखसुखार्थत्वमपि सुव्याख्यानमेव। अत एव वामनोऽपि "एचोऽप्रगृह्ययस्याऽदूराद् धूते प्लुतविषयस्याऽर्धस्याकार आदेशो

---

१. १।१।२७। २. अष्टा. ८।२।१०७। ३. वै. सि. कौ., वै. प्र., चतुर्थे भागे, पृ. ३९३। ४. (वै. सि. कौ., वै. प्र.) तृतीये भागे, पृ. २१९८। ५. भैरवी टीकाऽपि द्रष्टव्या।

भवति स च प्लुतः, उत्तरस्येकारोकारावादेशौ भवतः"[1] इति । भाष्यकारप्रदर्शितोदाहरणस्वरसात्, "प्लुतावेच इदुतौ"[2] इत्युक्तत्वाच् च उक्ते सूत्रे एङोऽप्रगृह्यस्येति पाठस् सुकरो विज्ञायते; किन् तु वार्तिककारादिभिरत्र मौनमेवाऽवलम्बितम्, किन् नु तैर् मौनमवलम्बितमिति सुधीभिर् विचारणीयम् । वार्तिककारस् तु उक्तसूत्रे "एचः प्लुतविकारे पदान्तग्रहणवर्जं विषयपरिगणनञ् च (कर्तव्यम्)"[3] इत्याऽऽह । विषयपरिगणनञ् च भाष्यकारेण "प्रश्नानृताभिपूजितविचार्यमाणप्रत्यभिवादयाज्ञ्यानृतेष्विति वक्तव्यम्"[4] इत्युक्त्वा प्रदर्शितम् । तदुदाहरणानि च "अगम३ः पूर्वा३न् ग्रामा३न् अग्निभूत३इ पट३उ; सिद्धोऽसि माणवकाग्निभूत३इ पट३उ; होतव्यन् दीक्षितस्य गृह३इ; आयुष्मानेद्ध्यग्निभूत३इ; उक्क्षान्नाय वशान्नाय सोमपृष्ठाय वेधसे । स्तोमैर् विधेमाग्नय३इ"[5] इति प्रदर्शितानि । एतदतिरिक्तेषु विषयेषु एकारस्य ओकारस्य च प्लुतत्वे प्रसक्ते अंशाऽविभागेनैव प्लुतत्वम् भवतीति पाणिनि-कात्यायन-पतञ्जलि-मुनीनान् निर्णयस् सुज्ञानः ॥२५-२७॥

(च) ओङ्कारमात्त्राविवेचनम्

ओङ्कारोऽध्ययनारम्भे त्रिमात्त्रस् स्यादथापि वा ।
चतुर्मात्त्रोऽथ षण्मात्त्रो वेति शौनकसम्मतम् ॥२८॥

तदुक्तम् ऋग्वेदप्रातिशाख्ये "स ओमिति प्रस्स्वरति त्रिमात्त्रः प्रस्स्वारस्स्थाने स भवत्युदात्तः । चतुर्मात्त्रो वाऽर्धपूर्वाऽनुदात्तष् षण्मात्त्रो वा भवति द्विस्स्वरस् सन्"[6] इति । शौनकशिक्षायाञ् च— "चतुर्मात्त्रश् च षण्मात्त्रः प्रणवः कीर्त्यते बुधैः । पूर्वस्स्वरः परो नादस् सममात्त्रः प्रकीर्तितः॥ अनुदात्तस् स्वरो ज्ञेय उदात्तो नाद उच्यते । लक्षणम् प्रणवस्येदम् प्रणवो ब्रह्मम कीर्त्यते ॥ तैलधारामिवाऽच्छिन्नन् दीर्घघण्टानिनादवत् । अवाग्जम् प्रणवस्याग्र्यं यस् तवं वेद स वेदवित् । त्रिस्स्थानञ् च त्रिमात्त्रञ् च त्रिरब्रह्मम्मञ् च त्रियक्षरम् । त्रिमात्त्रादर्धमात्त्रन् तु यस् तवं वेद स वेदवित्"[7] इति । एते श्लोकाश् शैशिरीयशिक्षायामपि पठ्यन्ते[8] ॥२८॥

---

१. काशिकायाम् ८।२।१०७ । २. अष्टा. ८।२।१०६ ।
३. पा. व्या. भा. ८।२।१०७; वा. १,२ । ४. तत्त्रैव वा. २ ।
५. तत्रैव। ६. १५।५। ७. श्लो. ६१-६४। ८. श्लो.१६०-१६३।

ओङ्कारन् तु त्रिमात्रं हि प्रायो माध्यन्दिनीयकाः ।
प्रयुञ्जते हि वेदाऽऽदौ द्विमात्रमपि केचन ॥२९॥

अत्रोक्तं सम्प्रदायप्रबोधिनीकारेण "शाखान्तरे वेदाध्ययनारम्भे चतुर्मात्रस् त्रिमात्रो वा प्रणवः क्रियते । माध्यन्दिनीयैस् तु कैश् चिदेव त्रिमात्रः प्रयुज्यते । बहुभिस् तु स्वरूपस्थितो द्विमात्र एव"[1] इति । ये द्विमात्रमेव ओङ्कारम् प्रयुञ्जते ते याज्ञवल्क्यशिक्षायाः "अष्टमन् नैव विद्द्यते"[2] इति अष्टमप्लुतनिषेधकवँ् वाक्यम् प्रमाणतयोपस्थापयन्ति; तथैव "प्लुताश्चोक्तवर्ज्जम्"[3] इति स्वप्रातिशाख्यसूत्रमपि प्रमाणयितुं शक्नुवन्ति । 'ये तु त्रिमात्रमोङ्कारमुच्चारयन्ति, समर्थयन्ते[4] च तत्, तेषान् तु कथञ् चिदुक्तनिषेधस्य परिहारेऽपि प्रातिशाख्ये याज्ञवल्क्यशिक्षादिषु च विधेरभावात् परम्परामात्रं शरणम्, "ओङ्कारस् स्वाध्यायादौ"[5] इत्यादौ, ऋग्वेदप्रातिशाख्यादाविव[6] मात्रायाविशेषेणाऽविधीयमानतत्वाद्' इत्यपि द्विमात्रोङ्कारप्रयोक्तारो ब्रूयुः । यद्द्यपि याज्ञवल्क्यशिक्षायाः कोशेषु "प्रणवन् तु प्लुतञ् कुर्याद् व्याहृतीर् मात्रिका विदुः"[7] इति पाठोऽपि दृश्यते तथापि तस्याऽप्राकरणिकत्वाद् "व्याहृतीर् मात्रिका विदुः" इत्यंशस्य विसंस्थुलत्वाच् च स पाठो न प्रामाणिक इति च ते मन्येरन् । वयन् तु "प्रणवश्च् च"[8] इति प्रातिशाख्यसूत्रेण वेदस्थप्रणवानाम् प्लुतताया अनन्वाख्यातत्वात् स्वाध्यायादौ प्रयोज्यस्य प्रणवस्याऽपि प्लुतत्वन् न्याय्यमेवेति मन्यामहे । अपि च "ओ३मिति परमाक्षरस्य योगिनामालम्बभूतस्य परस्य ब्रह्मणः प्रणवाख्यस्याऽस्थूलादिगुणयुक्तस्य ब्रह्मम ऋषिश्च् छन्दो गायत्रम् परमात्मा देवता ब्रह्मारम्भे विरामे च यागहोमादिषु शान्तिपुष्टिकर्म्मसु चान्येष्वपि काम्यनैमित्तिकादिषु सर्व्वेषु विनियोगोऽस्य"[9] इति माध्यन्दिनीयवाजसनेयिसर्वानुक्रमसूत्रवचनादपि स्स्वाध्यायादौ

---

१. पृ. ७, टि. २४ । २. या. शि. शि. व. वि., पृ. ९१ ।
३. शु. य. प्रा. ८।३९ । ४. या. शि. शि. व. वि., पृ. १८;
स. प्र. शि; श्लो. २८, पृ. ८ । ५. शु. य. प्रा. १।१६;
या. शि. शि. व. वि., पृ. १७; श्लो. २२ । ६. ऋ. प्रा. १५।५ ।
७. श्लो. १५ (शि. स., पृ. ३), या. शि. शि. व. वि., पृ. १३ ।
८. शु. य. प्रा. २।५१ । ९. ४।९ ।

प्रयोज्ज्यस्य प्रणवस्य त्रिमात्तरत्वं सिद्ध्यति । एवञ् च सति याज्ञवल्क्यशिक्षाया उक्तस्य श्लोकार्धस्याऽपि प्रामाणिकत्वम् स्थातुं शक्यमेव । पाराशर्या शिक्षायामपि "प्रणवन् तु प्रवक्ष्यामि तिस्रो मात्तरास् त्रिदैवतम् । त्रिरूपञ् च त्रिवर्णञ् च त्रिरस्थानन् त्रिगुणन् तथा"[1] इति दृश्यते ॥२९॥

तत्त्रिरीयास् तु प्रणवमात्तराया हि व्यवस्थितिम् ।
विषयेषु विभिन्नेषु विभिन्नानावँ वर्णयन्ति च ॥३०॥
स्वाद्ध्यायादौ चतुर्मात्तर ओवँ वेदस्थो द्विमात्तरकः ।
अद्ध्यायाऽनुत्योऽनुवाकानुत्यꣳ कर्माद्द्यश् च त्रिमात्तरकः ॥३१॥
ऋगन्ते च चतुर्मात्तरस् सन्धाने स त्रिमात्तरकः ।
तस्तरीकरणादौ च द्ध्याने चाऽपि त्रिमात्तरकः ॥३२॥
स्वरो ध्यानान्तप्रणवे द्विमात्तरो मोऽर्धमात्तरकः ।
अन्यत्तराऽपि व्यवस्था स्याद् वचनाच् शिष्टपाठतः ॥३३॥
मात्तरा वाऽप्यर्धमात्तरा वाऽणुमात्तरा स्याद् व्यवस्थया ।
प्रणवस्थ-मकारस्य तत्स्थानव्यञ्जनस्य च ॥३४॥

उक्तं हि व्यासशिक्षायाम्— "केवलप्रणवे तु स्यात् स्वरस्सार्धद्द्विमात्त्रिकः"[2] इति । कौहलीयशिक्षायाञ् च— "वेदस्थꣳ प्रणवस् तु स्यात् समकारो द्विमात्तरकः । स्वरमात्तरन् द्विमात्तरवँ वा व्यञ्जनन् त्वणुमात्तरकम्"[3] इति । सर्वसम्मतशिक्षायाञ् च— "प्रारम्भकश् चतुर्मात्तरो वेदस्थस् स्यात् तदर्धकः । अद्ध्यायानुत्योऽनुवाकानुत्यꣳ कर्माद्द्यश् च त्रिमात्त्रिकः ॥ प्रारम्भाद्द्यꣳ कर्मानादौ मात्तराणुद्द्व्यणुमात्त्रिकाः । वेदस्थप्रणवे तु स्यात् समकारे द्विमात्तरता । अस्स्वरवँ व्यञ्जनन् नित्यमणुमात्तरम् प्रयुज्यते । संसर्गाच् चेति बाहुल्यान् मात्तरा वृद्धꣳ प्रकीर्तिताः"[4] इति । कालनिर्णयशिक्षायाञ् च— "स्वाद्ध्यायाऽऽरम्भशेषस्य प्रणवस्य स्वरस्य च । अद्ध्यायस्याऽनुवाकस्याऽनृते स्यादर्धतृतीयता ॥ ऋगन्तस्य च सन्धानेऽवसाने मात्त्रिकोऽधिकः (मात्तरयाऽधिकः ?) । समकारस्य वेदस्थप्रणवस्य द्द्विमात्तरता ॥ स्वरमात्तरन् द्विमात्तरवँ वा व्यञ्जनन् त्वणुमात्तरकम् ॥ तस्तरीकरणादौ तु स्वरमात्तरस्य दीर्घता ।

---

१. श्लो. २-३ (शि. स., पृ. ५२) । २. सू. ४६५ ।
३. श्लो. ७४ । ४. श्लो. १०४-१०६ (३।९२-९५) ।

ध्यानार्थस्स्याऽवसाने तु भवेन् नादोऽर्धमात्त्रिकः"[1] इति । तैत्तिरीय-प्रातिशाख्येऽपि— "ओकारन् तु प्प्रणव एकेऽर्धतृतीयमात्त्रम् ब्रुवते"[2] इति । स्वाद्ध्यायारम्भे चतुर्मात्त्रꣳ प्रणवो यथा– ओ३म्१ इषे त्त्वा, ओ३म्१ ब्रह्हँम सन्धत्तम् इत्त्यादौ । अत्त्र ओकारस् त्रिमात्त्रो मकार एकमात्त्र इति चतुर्मात्त्रꣳ प्रणवः । अद्ध्यायान्ते त्रिमात्त्रꣳ प्रणवो यथा– ऋतुभिꣳ कल्पयाति ओ२ँ३म्ँ३ इति । अनुवाका-ऽन्त्यस् त्रिमात्त्रꣳ प्रणवो यथा— भूर्ब् भुवस् सुवरग्न ओ२ँ३म्ँ३ इति । कर्माद्द्यस् त्रिमात्त्रꣳ प्रणवो यथा— ओ२ँ३म्ँ३ऽ तथ्सवितुर् इति । एतेषु स्स्थलेषु ओकारास् सार्धद्द्विमात्त्राः, मकारा अर्ध-मात्त्रा इति प्प्रणवास् त्रिमात्त्राः । वेदस्स्थप्प्रणवे "ओमिति ब्रह्हँम" "ओमापो ज्योती रसोऽमृतम्" इत्त्यादौ ओकारोऽद्ध्यर्थमात्त्रकः,मकारो-ऽर्धमात्त्र इति वेदस्स्थꣳ प्रणव आहत्त्य द्द्विमात्त्रः । "ओन् तद् ब्रह्हँम", "ओन् जनः", "ओन् तपः" इत्त्यादौ वेदस्स्थप्प्रणवे ओकारो द्विमात्त्रो मकारस्स्थानका नकारादयꣳ पादमात्त्रका इति सपाद्द्द्विमात्त्रꣳ प्रणवो वेदितव्यः । इदञ्च कालनिर्णयशिक्क्षा-कारमतेन । सर्वसम्मतशिक्क्षाकारमते तु वेदस्स्थप्प्रणवे ओकारस्स्य पादोनद्द्विमात्त्रकत्त्वम्, मकारस्स्य तत्स्थानकस्स्य व्यञ्जनस्स्य चाणु-मात्त्रकत्त्वमिति आहत्त्य प्रणवस्स्य द्विमात्त्रकत्त्वम् बोद्ध्यम् । तस्तरीकरणन् नाम स्वाद्ध्यायाद्ध्ययनमद्ध्ये लौकिकभाषणम्; तत्त्र लौकिकभाषणस्स्यादौ अन्ते च प्प्रयोज्ज्यो यꣳ प्रणवस् तत्त्र, जपहोमादौ प्रयोज्ज्ये प्रणवे च ओकारस्स्य द्विमात्त्रत्त्वम्, मकारस्स्यैकमात्त्र-त्त्वमिति आहत्त्य प्रणवस्स्य त्रिमात्त्रत्त्वम् । मुमुक्क्षुणा ध्यानादौ प्रयोज्ज्यस्स्य प्रणवस्स्याऽपि तथैव त्रिमात्त्रत्त्वम् बोद्ध्यम् । मुमुक्-क्षुणा ध्यानावसाने प्रयोज्ज्ये प्रणवे तु ओकारस्स्य द्विमात्त्रत्त्वम् मकारभागस्स्य अर्धमात्त्रत्त्वमिति आहत्त्य अद्ध्यर्धद्द्विमात्त्रत्त्वम् बोद्ध्यम् । "देवाञ् जिगाति सुम्म्नयो२ँ३मग्न आयाहि" इत्त्यादौ ऋगन्तस्स्य प्रणवस्स्य ऋगन्तरेण सन्धाने ओकारस् सार्धद्विमात्त्रो मकारोऽर्धमात्त्र इति आहत्त्य प्रणवस्स्य त्रिमात्त्रत्त्वम् बोद्ध्यम् । "अपां रेतांसि जिन्न्वतो३ँ३म्ँ३" इत्त्यादौ ऋगन्तस्स्यावसानगतस्स्य प्रणवस्स्य तु ओकारस्स्य सार्धत्त्रिमात्त्रत्त्वम्, मकारस्स्यार्धमात्त्र-कत्त्वमित्त्याहत्त्य चतुर्मात्त्रत्त्वम् बोद्ध्यम् । अयञ् च प्प्रणवमात्त्रा-

---

१. सू. १९–२२ । २. १८।१ (२।६।१) ।

विचारश् श्रीराजाघनपाठिना सर्वलक्षणमञ्जर्यामार्याभिस् सङ्गृहीतो यथा— "अद्ध्यायादौ प्रणवे स्वरस् त्रिमात्तरो म एकमात्तरस् स्यात् ।। अनुवाकाद्ध्यायान्ते कर्मादौ च त्रिमात्त्रिके प्रणवे । सार्धद्द्विमात्तर ओत् स्यात् तस्यान्त्यो मोऽर्धमात्त्रिको ज्ञेयः ।। वेदस्थे तु प्रणवे समकारेऽद्ध्यर्धमात्तर ओकारः । मश् चाऽर्धमात्त्रिकस् स्यादाहत्त्याऽयन् द्विमात्त्रिकꣳ प्रणवः ।। तस्मिन्नेव प्रणवे पादन्यूनद्द्विमात्तर ओकारः । मस् सर्वयुक्ताद्द्व्यश् चाऽणुमात्त्रिकस् सर्वसम्मतेनोक्तम् ।। प्रणवे वेदस्थे मश् चाऽऽदेशवशादिहान्यथा भूतः । अणुमात्त्रिकस् स ओच् च द्द्विमात्तर ओमद्ध्यणुद्द्विमात्तरस् स्यात् ।। स्वाद्ध्यायपाठमद्ध्ये लोकोक्तेर् भाषणस्य चाऽऽद्द्यन्ते । प्रणवो विहितस् तत्तर द्द्विमात्तर ओत् स्यान् म एकमात्तरस् स्यात् ।। एवं वेदस्थस्य प्रणवस्येह त्रिरधा विभेदस् स्यात् । वेदविषयोऽयमेवम् प्रणवष् षोढा विभिद्द्यते निखिलः ।। यज्ञ्ज्ञर्गनतप्रणवस्य च सन्धानेऽनुवाकवत् कालः । अस्यैव तत्ववसाने सार्धतुरीयस् स्वरोऽर्धमात्तरो मः ।। ध्यानादौ तु प्रणवे स्स्वरो द्द्विमात्तरो म एकमात्तरस् स्यात् । ध्यानान्तप्रणवे तु स्स्वरो द्विमात्तरोऽर्धमात्त्रिको मश् च ।। प्रणवस्स्वरूपमेवम् बुद्ध्वोपदिशेद् य एष आचार्यः । इह चाऽमुत्तर च लोके भूसुरसुरपूजितश् चिदालम्बः ।।"[1] इति ।।३०-३४।।

(छ) ऐकारौकारमात्तरागतविशेषनिरूपणम्

ऐकारौकारयोरादावकारोऽप्यर्धमात्तरकः ।
इवर्णोवर्णयोश् शेषौ स्यातामद्ध्यर्धमात्तरकौ ।।३५।।
तयोरादावकारोऽपि मात्तरात्मैव क्वचित् स्मृतः ।
इवर्णोवर्णयोर् भागावपि मात्तरात्मकौ तदा ।।३६।।

उक्तं हि पाणिनीयशिक्षायाम्— "अर्धमात्तरा तु कण्ठ्यस्य ह्यैकारौकारयोर् भवेत् । एकारौकारयोर् मात्तरा तयोर् विवृतसंवृतम्"[2] इति । तैत्तिरीयप्रातिशाख्येऽपि—"अकारार्धमैकारौकारयोरादिः, संवृतकरणतरमेकेषाम्, इकारोऽद्ध्यर्धꣳ पूर्वस्य शेषः, उकारस् तूत्तरस्य"[3] इति । कालनिर्णयशिक्षायाञ् च—"ऐकारौकारयोरादावकारोऽप्यर्धमात्रकः । इवर्णोवर्णयोश् शेषौ स्यातामद्ध्यर्धमात्तरकौ"[4] इति । ऋग्वेदप्रातिशाख्ये तु— "सन्ध्यानि सन्ध्यक्षराण्याहुरेके

---

१. व्या. शि., पृ. १७४ । २. श्लो. १९ । ३. २।२६-२९ । ४. श्लो. ६ ।

द्विस्स्थानतैतेषु तथोभयेषु। सन्ध्येष्वकारोऽर्धमिकार उत्तरयँ युजो-रुवार इति शाकटायनः॥ मात्रासंसर्गादवरे पृथक्श्रुती ह्रस्स्वानुस्स्वारव्यतिषङ्गवत् परे"[1] इति। यद्द्यपि एतद्व्याख्याने उव्वटेन एकारे ओकारे च समत्वम् पूर्वोत्तरभागयोः, एकारे औकारे च विषमत्वन् तयोऽ प्रतिपादितन् तथापि मूले "सन्ध्येष्वकारोऽर्धम्" इत्येव उक्तमिति एकारे औकारे च सम एव मात्राविभागऽ प्रतीयते तत्र। शुक्लयजुर्वेदप्रातिशाख्येऽपि—"एकारौकारयोः कण्ठ्या पूर्वा मात्रा ताल्वोष्ठ्योरुत्तरा"[2] इति। तद्व्याख्याने उव्वटेनाऽपि सम एव पूर्वोत्तरमात्राप्रविभागऽ प्रतिपादितः, परमतत्त्वेनैव विषममात्राप्रविभागपक्ष उल्लिखितः। पाणिनीयव्याकरणभाष्ये तु कुत्र चिद् "इमावेचौ समाहारवर्णौ मात्राऽवर्णस्य मात्रेवर्णोवर्णयोः, तयोर् ह्रस्स्वादेशशासनेषु कदा चिदवर्णस् स्यात् कदा चिदिवर्णोवर्णौ, मा कदा चिदवर्णम् भूदिति (एच इग् ह्रस्स्वाऽऽदेशे इति वक्तव्यम्)। प्रत्याख्यायत एनद् एचोश् चोत्तरभूयस्त्वादिति"[3] इति उक्त्वा विषमविभागपक्ष आश्श्रितः; कुत्र चित् तु "प्लुतावेच इदुतौ। किमर्थमिदमुच्यते? एचोरुभयविवृद्धिप्रसङ्गादिदुतोऽ प्लुतवचनम्। ·· इमावेचौ समाहारवर्णौ मात्राऽवर्णस्य मात्रेवर्णोवर्णयोरिति तयोऽ प्लुत उच्यमान उभयविवृद्धिऽ प्राप्नोति। तद् यथा— अभिवर्धमानो गर्भस् सर्वाङ्गपरिपूर्णो वर्धते। अस्तिप्रयोजनमेतत्? किन् तर्हीति। तत्राऽयथेष्टप्रसङ्गः। तत्राऽयथेष्टम् प्रसज्येत। चतुर्मात्रऽ प्लुतऽ प्राप्नोति। सिद्धन् त्विदुतोर् दीर्घवचनात्। सिद्धमेतत्। कथम्? इदुतोर् दीर्घो भवतीति वक्तव्यम्। तदेतत् कथङ्कृत्वा सिद्धम् भवति। यदि समऽ प्रविभागो मात्राऽवर्णस्य मात्रेवर्णोवर्णयोः। अथ ह्यर्धमात्राऽवर्णस्य अर्द्धर्धमात्रेवर्णोवर्णयोरर्धतृतीयमात्रऽ प्राप्नोति, सूत्रन् च भिद्द्यते। यथान्यासमेवास्तु। ननु चोक्तन् तत्रायथेष्टप्रसङ्ग इति। तत्र सौर्यभगवतोक्तम्— अनिष्टिज्ज्ञो वाडवऽ पठति, इष्ट्यत एव चतुर्मात्रऽ प्लुतः"[4] इति उक्त्वा समप्रविभागपक्ष आश्श्रितः। 'एच इग् ह्रस्स्वाऽऽदेशे"[5] इति सूत्रङ्ग कुर्वतऽ पाणिनेराचार्यस्य तु एकारस्य

---

१. १३।३८–४१। २. १।७३। ३. एओङ एओच् इत्यत्र, वा. ४; १।१।४८, वा. १। ४. ८।२।१०६। ५. अष्टा. १।१।४६।

ओकारस्य च द्द्विस्थानकत्त्वम् ऐकारस्य औकारस्य च समपूर्वोत्तरवर्णभागकत्त्वमभिप्प्रेतवँ विज्ज्ञायते ।।३५–३६।।

ऐकारस्य प्प्लुतत्त्वं स्यादौकारस्याऽपि वा यदा ।
इ–उ–स्स्वरूपऽ पश्चार्ध एव स्स्यात् प्लुतकस् तदा ।।३७।।

तदुक्तमाचार्य्यपाणिनिना– "प्लुतावँच इदुतौ"[1] इति । तद्व्याख्यानञ् च "दूराद् धूतादिषु प्प्लुतो विहितः, तत्त्र ऐचऽ प्लुतप्प्रसङ्गे तदवयवभूतौ इदुतौ प्लुतौ (भवतः) । अइ३तिकायन, अउ३गव"[2] इति ।।३७।।

(ज) अथ व्यञ्जनमात्त्रानिरूपणम्

सर्वेषावँ व्यञ्जनानां हि मात्त्रिकत्त्वम् प्रकीर्तितम् ।
कैश् चित् कैश् चित् तु केषाञ् चिदेव तत्त्वमुदीरितम् ।।३८।।

सर्वेषावँ व्यञ्जनानाम् मात्त्रिकत्त्वयँ तथा शौनकीयचतुरद्ध्यायिकायाम्— "एकमात्त्रो ह्रस्स्वः, व्यञ्जनानि च"[3] इति । ऋक्तन्त्रेऽपि "मात्त्राऽर्धमात्त्रा वा (भवति व्यञ्जनम्)"[4] इति प्प्रोक्तम् । केषाञ् चिदेव व्यञ्जनानाम् मात्त्रिकत्त्वयँ यैऽ प्रतिपादितन् तेषाम् मतानि उत्तरकारिकाणावँ व्याख्यानेषु स्स्फुटीभविष्यन्ति ।।३८।।

वेदे तथैव लोकेऽपि चाऽर्धमात्त्रं हि व्यञ्जनम् ।
इत्त्येव बहवऽ प्राहुश् शिक्क्षाशास्त्रविशारदाः ।।३९।।

तथाहि ऋग्वेदप्रातिशाख्ये— "द्राघीयसी साऽर्धमात्त्रा, इतरे (व्यञ्जनवर्णाश्)च"[5] इत्त्युक्त्वा व्यञ्जनानां सामान्यतयाऽर्धमात्त्रात्मकत्त्वमुक्तम् । शुक्लयजुर्वेदप्रातिशाख्येऽपि— "व्यञ्जनमर्द्धमात्त्रा"[6] इत्त्युक्तम् । तैत्तिरीयप्रातिशाख्ये च—"ह्रस्स्वार्धकालवँ व्यञ्जनम्"[7] इति प्प्रोक्तम् । शैशिरीयशिक्क्षायाञ् च— "व्यञ्जनन् त्वर्धमात्त्रं स्यात् स्वरभक्तिस् तथैव च"[8] इति । शौनकशिक्क्षायाञ् च— "व्यञ्जनानान् त्वर्धमात्त्रा स्वरभक्तेस् तथैव च"[9] इति । याज्ज्ञवल्क्यशिक्क्षायाञ् च— "एकमात्त्रो भवेद् ह्रस्स्वो द्विमात्त्रो दीर्घ उच्च्यते । त्रिमात्त्रस् तु प्प्लुतो ज्ज्ञेयो व्यञ्जनञ् चाऽर्धमात्त्रिकम्"[10] इति । एवमेव वर्णरत्नप्प्रदीपिकायामपि[11] । लोमशीय-

---

१. अष्टा. ८।२।१०६ । २. काशिकायाम् ८।२।१०६ ।
३. १।५९–६० । ४. २।३।८ (२८) । ५. १।३३–३४ ।
६. १।५९ । ७. १।३७ । ८. श्लो. १६ । ९. श्लो. ११ ।
१०. श्लो. १३ (शि. स., पृ. २)। ११. श्लो. २२(शि. स., पृ.११९)।

शिक्क्षायामप्येवमेव[1]। चारायणीयशिक्क्षायामपि—"एकमात्तरस् स्वरो ह्रस्स्वो द्विमात्तरो दीर्घ उच्च्यते। प्लुतस् त्रिमात्तरो विज्ञेयो व्यञ्जनन् त्वर्धमात्तरकम्"[2] इति। व्यासशिक्क्षायाम् च— "हलो भक्तिर् विसर्गोऽन्तो ह्रस्स्वान् नो यवहोत्तरः। स्पर्शोर्ध्वो वोऽर्धमात्तरास् तेऽवसाने लस् त्रिपादता"[3] इति व्यञ्जनानां सामान्यतया ऽर्धमात्तरात्मकत्वमुक्तम् ॥३९॥

वर्गेषु प्रथमानाञ् च तृतीयानां स्ववर्गजैः।
अपञ्चमैस् तु सयँ योगे मात्तरात्मत्वमिहेष्यते ॥४०॥
ध्रुवकालस्य योगाद् धि दैर्घ्यमेतत् प्रतीयते।
न स्वतोऽपञ्चमस्स्पर्शदीर्घत्वं सम्भवेत् क्वचित् ॥४१॥

कुक्कुटः, व्याक्ख्या, वाग्ग्मी, श्लाग्घ्यः, उच्चः, इच्छा, उज्ज्वलः, उज्झति, अट्टम् इत्यादौ ककारगकारचकारादीनां स्ववर्गीये वर्णे परे दीर्घीभूतानामिवोच्चारणं स्वाभाविकमस्ति। अतस् तन् न निषिद्ध्यते, तदिष्यत एव। किन् तु तत्तर वस्तुतो न ककारादीनान् दीर्घभावः, अपि तु ककारादीनान् तदुत्तरवर्तिनान् तद्वर्गीयाणावँ वर्णानाञ् च मद्ध्ये वर्तमानानावँ विरामाणान् ध्रुवसञ्ज्ञकानाम् पूर्वन् निरूपितानाञ्च कालस्स्याऽपि ककारादिकालताया भ्रमेण स दीर्घीभावꣳ प्रतीयते इति बोद्ध्यम्। अपञ्चमानावँ वास्तविकानां स्पर्शानान् दीर्घभावश् च नैव सम्भवति, स्पर्शतत्वहान्न्यैव दीर्घभावस् सम्भवेत् तेषामिति च विवेक्तव्यम्। यद्द्यप्ययमर्थोऽनुभवप्रमाणकस् तथापि ध्रुवनिरूपणम् पूर्वञ्च कृतं सन्तानाद्ध्याये करिष्यमाणञ् चाऽत्तर प्रमाणतयाऽनुसन्धेयम् ॥४०–४१॥

तदन्न्याभिनिधानानायँ यमानाञ् चाऽपि दीर्घता।
ध्रुवकालस्य योगेन प्रतीयेत न चाऽन्न्यथा ॥४२॥

स्ववर्गीयवर्णपरकाऽभिनिधानभिन्नानाम् अभिनिधानानावँ वर्णानायँ यमानाञ् च दीर्घीभावꣳ प्रतीयमानोऽपि ध्रुवकालयोगमाहात्म्येनैव न तत्वन्न्यथेति बोद्ध्यम् ॥४२॥

पदान्ते पञ्चमास् स्पर्शा लकारश् च पदान्तगः।
पदपाठे विवृद्धास् स्युरित्त्याहुस् तैत्तिरीयकाः ॥४३॥

तदुक्तवँ वैदिकाभरणे "ङ–ञ–ण–न–मानान् त्ववसानवर्तिनाञ्च कालाधिक्क्यं शिक्क्षायां स्मर्यते— 'ह्रस्स्वात् परन् तु नासिक्क्यन्

---

१. ८।१०। २. पृ. १२। ३. सू. ४४७,४४८।

द्विमात्त्रयँ यत् तदुच्च्यते । दीर्घात् प्लुताच् च तन् मात्त्रमेकमात्त्रमिति श्श्रुतिः' इति; तत्त्राऽतिप्प्रसङ्गपरिहाराय श्लोकान्तरञ्च कृतम्— 'अवसाने विशेषोऽयमन्न्येषाञ् च न विद्द्यते । संहितायान् तु तन्मात्त्रꣳ पदकालेऽधिको भवेत्' इति । ··· अत्त्रोदाहरणानि—ईदृङ् । च ।। अन्न्यादृङ् । च ।। एतादृङ् । च ।। वृषण्वसू इति वृषण् । वसू ।। ब्रह्हँ मन् । विशम् । इति द्द्विमात्त्राणि । विषूचीनान् । व्यस्स्यताम् । सुमङ्गलाँ४ । सत्त्यराजा३न् । लाजी३न् इति मात्त्रिकाणि । ·· तथाऽवसानस्स्थलकारस्स्य पादोनमात्त्रत्त्वमुक्तं शिक्क्षायाम् 'अवसाने लकारस्स्य त्रिपादत्त्वं सदा भवेत्' इति । अस्तु वाल् इति"[1] इति । श्लोकात्मकाऽऽपिशलिशिक्क्षायामपि "ह्रस्स्वात् परोऽवसानस्स्थꣳ पदाद्ध्यायेऽनुनासिकः । द्विमात्त्रो मात्त्रिकस् त्वन्न्यस् संहितायान् तथाऽखिलः"[2] इति । कालनिर्णयशिक्क्षायाञ् च— "अनुस्स्वारो द्विरुक्तोऽन्त्यपञ्चमश् च द्द्विमात्त्रिकः । ह्रस्स्वात् परꣳ प्लुताद् दीर्घात् केवलात् त्वेकमात्त्रिकः"[3] इति । सर्व्वसम्मतशिक्क्षायाञ् च—'त्रिपादवान् लकारस् स्यात् पञ्चमानान् तु केवलात् । दीर्घात् प्लुताच् च कालो हि मात्त्रिकꣳ परिकीर्त्तितः । पञ्चमानान् द्विमात्त्रत्त्वं ह्रस्स्वस्स्योपरि तिष्ठताम्"[4] इति । व्यासशिक्क्षायाञ् च—"ऽवसाने लस् त्रिपादता"[5] इति ।।४३।।

अपदान्तेऽपि वर्गेषूत्तमानाङ् क्वचिद्दिष्ष्यते ।
मात्त्रात्मत्त्वन् द्विमात्त्रत्त्वङ् गुरुत्त्ववँ वाऽपि वैदिकैः ।।४४।।

तदुक्तं शैशिरीयशिक्क्षायाम्— "प्रथमोत्तमवर्गीये वर्गान्त्यैस् सह सङ्गते । नासिक्क्यङ् गुरुमुच्चार्य यमस्स्थानगतवँ वदेत् ।। नादस् तु श्श्रूयते घोषाद् विरामाद् द्वित्त्वतस् तथा । अनासिक्क्योऽथ नासिक्क्यो जायते वर्णरूपतः । दद्ध्यङ् ह परमे व्योमन् वीर्य्यञ् चेति निदर्शनम्"[6] इति । अमोघानन्दिन्न्यां शिक्क्षायाञ् च— "नादसञ्ज्ञा भवन्तीमे ङञणनमाश् चाऽनुनासिकाः । भवन्ति प्प्रत्त्यये येषामन्तस्स्थासयँयुतास् स्वराः। हकारञ् चैव वर्गाणान् तृतीयञ् च चतुर्थकम् । अथ दीर्घा विसर्गान्ता अष्टौ ते नादसञ्ज्ञकाः । ·····नमौ गुरू नादसञ्ज्ञौ लघू चैवाऽनुनासिकौ । सयँयुक्तौ च विसर्गौ च (चाऽवसान-

---

१. तै. प्रा. १।३७ । २. श्लो. १४ । ३. श्लो. ८ ।
४. श्लो. ८८–९० (३।६८–७०) । ५. सू. ४४८ ।
६. श्लो. १०१–१०२ ।

स्स्थौ ?) नादावेतौ प्रकीर्तितौ ॥ पञ्चमा यत्तर दृश्श्यन्ते पञ्चमे परतस् स्थिते । नासिकन् तत्तर कुर्वीत मात्त्रिकत्त्वे न संशयः"[1] इति । एवमेव पाराशर्यां शिक्क्षायामपि[2] । व्यासशिक्क्षायाम् च— "अवसानेऽन्त्यवर्णाश् च नादा इति बुधैस् स्मृताः"[3] इति, "ह्रस्स्वान् नादो द्विमात्तरस् स्यादन्न्यत्तराऽप्येकमात्त्रिकः"[4] इति, "स्यातां सोर्ध्वे खथोर्ध्वे च ङनौ ह्रस्स्वाद् द्विमात्त्रिकौ"[5] इति, "असयँ-युतश् च नो दीर्घान् मात्त्रिको यवहोत्तरे"[6] इति च । लोमशीयशिक्क्षायाम् च— "नमौ गुरू नादसञ्ज्ञौ लघू चैवाऽनुनासिकौ । सयँयोगौ (सयँयुक्तौ) सविसर्गौ च (च विरामस्स्थौ ?) नादावेव प्रकीर्तितौ ।। विवृत्तौ च विरामे च सवर्णे परत्त्यये परे । अनुनासिकास् तु विज्ञेयाश् शेषा (शिष्टैर् ?) नादाऽ प्रकीर्तिताः । मात्त्रिका नासिका ज्ञेया द्विमात्त्रा नादसञ्ज्ञकाः"[7] इति । श्लोकात्मकापिशलिशिक्क्षायाम् च— "द्विमात्तर उत्तमो ह्रस्स्वाददध्यर्धो व्यञ्जनान्तरः । दीर्घादनन्तरस् तद्वन् मात्त्रिको व्यञ्जनान्तरः"[8] इति ॥४४॥

द्विमात्त्रा यवला ह्रस्स्वाददध्यर्धा व्यञ्जनान्तराः ।
दीर्घपूर्वात् परो रेफो मात्त्रिका इति निर्णयः ॥४५॥

एष श्श्लोकश् श्लोकात्मकापिशलिशिक्क्षाया उद्धृतोऽविकल एव[9] । एतेनाऽन्तस्स्थानामपि सम्भवि-विवृद्धिकत्त्वं स्फुटं सूच्यत इति अत्तराऽवधानन् देयवँ विद्द्वद्भिः ॥४५॥

ऊष्माणो दीर्घतुल्यास् स्युरिति केचित् प्रचक्क्षते ।
अतस् तेषां ह्रासवृद्धी सम्भविन्न्याविति स्स्फुटम् ॥४६॥

तदुक्तम् पाराशर्यां शिक्क्षायाम्— "यथा सङ्ख्या तु दीर्घस्स्य तथा चोष्मा प्रकीर्तिता । ऊष्मा दीर्घं समत्त्वञ् च क्क्षिप्प्रङ्ग कुर्यात् तदर्धकम्"[10] इति । ॥४६॥

मात्त्रात्मत्त्ववँ विसर्गस्स्य यत् तु कैश् चित् प्रकीर्तितम् ।
विरामकालयोगोऽत्तर हेतुत्त्वेन विभाव्यते ॥४७॥

विसर्गस्स्याऽपि ऊष्मत्त्वादेव ह्रासवृद्धी सम्भविन्न्याविति तस्स्य मात्त्रात्मकत्त्वमधिकत्त्ववँ वा-पि सम्भवत्त्येव । अर्धमात्त्रत्त्वेऽपि

---

१. श्लो. ३०–३५ (शि. स., पृ. ९५–९६) । २. श्लो. ३९-५४ (शि. स., पृ. ५६–५७) । ३. सू. १६ । ४. सू. ४६४ । ५. सू. ४६१ । ६. सू. ४६३ । ७. ५।२–४ । ८. श्लो. १६ । ९. श्लो. १७ । १०. श्लो. २७ (शि.स., पृ.५५)।

विरामस्थस्य विसर्गस्य विरामकालयोगेन मात्रात्मकत्वमपि प्रतीतिपथमागन्तुं शक्नोतीति बोद्ध्यम् ॥४७॥

द्वित्राणावँ व्यञ्जनानान् तु यत्राऽभिन्नस्स्वराङ्गता ।
अणुत्वम् परमाणुत्ववँ वा तत्रैषायँ यथायथम् ॥४८॥

तदुक्तवँ व्यासशिक्षायाम्— "हल्युक्तं हलुत्तरन् त-दणुमात्रम् प्रकीर्तितम्"[1] इति । तद्व्याख्यानञ् च— "व्यञ्जनपरवँ व्यञ्जनयुक्तवँ व्यञ्जनम् पादमात्रम् प्रयुज्यते । यथा— विश्श्वप्स्निया । हल्युतमिति किम् ? यत् तत् न"[2] इति । वैदिकाभरणेऽपि— "दीर्घप्लुताब्भ्याम् परस्य व्यञ्जनस्य स्वरपरस्य पादमात्रत्वमुक्तम् 'अचऽ परे विशेषोऽस्ति पादमात्रवँ विधीयते । पूर्वकालो द्विमात्रश् चेदेकवँ व्यञ्जनमेव यत्' इति । तथा द्विप्प्रभृतिव्यञ्जनसयँयोगे मद्ध्यमानाम् पादमात्रत्वमुक्तम्— 'अस्स्वरवँ व्यञ्जनन् नित्यमणुमात्रम् प्रयुज्यते'इति। चतुरादिसयँयोगे त्वनुत्वस्स्याऽप्यणुमात्रत्वमुक्तम् बहुशः 'सयँयोगश् चतुरादीनावँ व्यञ्जनानायँ यदा भवेत्।तदानुत्वव्यञ्जनस्स्यापि अणुमात्रत्वमिष्यते' इति"[3]इति।"मात्रार्द्धमात्राणुमात्रा वर्णापत्तीनाम्"[4] इति वदता कात्यायनमुनिनाऽपि व्यञ्जनविशेषस्स्याऽणुमात्रत्वम् प्रतिपादितम् । गौतमोक्तषट्सप्तव्यञ्जनसयँयोगेषु[5] व्यञ्जनानाम् परमाणुमात्रत्वमपि कल्पनीयं स्यात्, तत्र सर्वेषावँ व्यञ्जनानाम् पादमात्रत्वेऽक्षरस्स्याऽधिकतरमात्रात्मकत्वापत्तेः ॥४८॥

(झ) अनुस्स्वारमात्रानिरूपणम्

अनुस्स्वारो व्यञ्जनत्वाल् लोके स्स्यादर्धमात्रकः ।
वेदेषु स द्द्विमात्रो वा मात्रिको वाऽन्न्यथाऽपि वा ॥४९॥

यद्द्यपि ऋग्वेदप्रातिशाख्ये "अनुस्स्वारो व्यञ्जनवँ वा स्स्वरो वा"[6] इत्युक्तम्, पाणिनीयव्याकरणप्रक्क्रियायाञ् चाऽनुस्स्वारस्स्याऽच्त्वमप्याशश्रित्य तदुत्तरस्य सयँयोगादेर् व्यञ्जनस्य द्वित्त्ववँ व्याख्यायते[7], तथापि शुक्लयजुर्वेदप्रातिशाख्ये "व्यञ्जनञ् कादि"[8] इति, "अथव्यञ्जनानि"[9] इति च; तैत्तिरीयप्रातिशाख्ये च "षोडशाऽऽदितस्

---

१. सू. ४४५ । २. तत्रैव वेदतैजसे । ३. तै. प्रा. वै. टी. १।३७ (पृ. ४०) । ४. शु. य. प्रा. ४।१४९ । ५. गौ. शि. २।७ । ६. १।५ । ७. वै. सि. कौ. हल्सन्धिप्प्रकरणे सँस्स्कर्तेत्यत्र । ८. १।४७ । ९. ८।७ ।

स्वराः, शेषो व्यञ्जनानि"[1] इति, ऋक्तन्त्रे च "अथ व्यञ्जनानि"[2] इति अनुस्स्वारस्य व्यञ्जनत्वमेव प्रतिपादितम्। शैशिरीयशिक्षायामपि "द्विविधं वर्णजातं हि स्वरो व्यञ्जनमेव च। अकारादिस् स्वरो ज्ञेयः कादि व्यञ्जनमुच्यते"[3] इति। एवमेवान्यासु शिक्षासु[4] चाऽनुस्स्वारस्य व्यञ्जनत्वमेवाशिरितम्। एवञ् च सति लोकेऽनुस्स्वारो "व्यञ्जनञ् चार्धमात्रिकम्"[5] इति वचनादर्धमात्र एव भवति। वेदेषु तु तत्तच्छाखासम्बद्धप्रातिशाख्यशिक्षाद्यनुसारवं व्यवस्था। तत्र च ऋग्वेदप्रातिशाख्येऽनुस्स्वारस्य मात्रा स्फुटन् न प्रतिपादिता; तत्रानुस्स्वारस्य स्वरत्वेऽवरतोऽपि मात्रात्मत्वन् तस्याऽऽवश्यकम्, व्यञ्जनत्वे त्वर्धमात्रात्मत्वम्। ह्रस्स्वात् परोऽनुस्स्वारश् चेत् स ह्रस्स्वो मात्रापादेनाऽपचीयतेऽनुस्स्वारश् च तावतैवोपचीयते इति, अनुस्स्वारो दीर्घात् परश् चेत् स दीर्घो मात्रापादेनाऽधिको भवति अनुस्स्वारश् च तावतैव न्यूनो भवतीति चैव तत्रोक्तम्[6]। ऋग्वेदसम्बद्धायां शैशिरीयशिक्षायाञ् च— "ह्रस्स्वात् परस् त्वनुस्स्वारस् त्रिपादः परिकीर्तितः। स च ह्रस्स्वस् त्रिपादस् स्याद् द्वावेतौ सममात्रिकौ॥ दीर्घात् परस् त्वनुस्स्वारः पादमात्रः परिकीर्तितः। स च दीर्घस् सपादस् स्याद् वर्णकालो निगद्यते"[7] इति प्रोक्तम्, शौनकशिक्षायामपि एवमेवोक्तम्[8] इति चाऽनुस्स्वारस्य ऋग्वेदेऽर्धमात्रात्मकत्वमेव मौलिकत्वेन स्वीकृतवं विज्ज्ञायते। अतः केषाञ् चिद् ऋग्वेदेऽनुस्स्वारस्य ह्रस्स्वात् परस्य सपादमात्रात्मकत्वम् ($1\frac{1}{4}$), दीर्घात् परस्य तु पादोनमात्रात्मकत्वम् ($\frac{3}{4}$) इति व्याख्यानन्[9] निराधारमेवाऽवसीयते। शुक्लयजुर्वेदप्रातिशाख्ये तु "अनुस्स्वारो ह्रस्स्वपूर्वोऽद्ध्यर्द्धमात्रा पूर्वा चार्द्धमात्रा, दीर्घादर्द्धमात्रा पूर्वा चाद्ध्यर्द्धा"[10] इत्युक्त्वा ह्रस्स्वात् परस्याऽनुस्स्वारस्य सार्धमात्रात्मकत्वम् ($1\frac{1}{2}$), तस्य ह्रस्स्व-

---

१. १।५, ६। २. १।२। ३. श्लो. ८।
४. शौ. शि. श्लो. ३; व. र. प्र. शि. श्लो. ११, १३–१५; चा. शि., पृ. ११; व्या. शि. सू. ५–८। ५. या. शि. श्लो. १३ (शि. स., पृ. २); लो. शि. ८।१० (शि. स., पृ. ४६२)। ६. ऋ. प्रा. १३।३२–३३। ७. श्लो. १७–१८। ८. श्लो. १२–१३।
९. ऋ. प्रा. प., पृ. ५३; प्रा. प्र. पा. श. आ. अ., पृ. ४३।
१०. ४।१५०–१५१।

स्स्य चाऽर्धमात्तरात्मकत्वम् (½), दीर्घात् परस्स्य तु अनुस्स्वारस्स्याऽर्धमात्तरात्मकत्वम् (½) तस्स्य दीर्घस्स्य च सार्धमात्तरात्मकत्वम् (१½) प्रतिपादितम् । माद्ध्यन्दिनीयशाखामात्तरविषयके प्रतिज्ञासूत्तरे तु "अथानुस्स्वारस्स्यꣳ इत्त्यादेशः शषसहरेफेषु, तस्स्य त्तरैविद्ध्यमाक्ख्यातं ह्रस्स्वदीर्घगुरुभेदैः, दीर्घात्तपरो ह्रस्स्वो ह्रस्स्वात्तपरो दीर्घो गुरौ परे गुरुः"[1] इति अनुस्स्वारस्स्य दीर्घात् परस्स्य मात्तरात्मकत्वम्, ह्रस्स्वात् परस्स्य द्विमात्तरात्मकत्वञ् च प्प्रतिपादितम् प्रतीयते । ह्रस्स्वदीर्घपदयोरपारिभाषिकत्त्वे तु अस्स्य प्रतिज्ञासूत्तरवचनस्स्य उक्तप्रातिशाक्ख्यसूत्तराऽनुकूलोऽर्थोऽपि भवितुं शक्नोति। किन् तु याज्ञवल्क्यशिक्क्षायाम्—"वर्णे तु मात्तिरके पूर्वे ह्यनुस्स्वारो द्द्विमात्तिरकः । द्विमात्तिरके मात्तिरकस् स्यात् संयोगाद्द्यश् च यो भवेत् । अनुस्स्वारस्स्योपरिष्टात् सयँयोगो यत्तर दृश्यते । ह्रस्स्वन् तन् तु विजानीयात् सꣳस्थामिति निदर्शनम्।। अनुस्स्वारो द्विमात्तरस् स्याद्वर्णव्व्यञ्जनादिगः । ह्रस्स्वाद् वा यदि वा दीर्घाद् देवानाꣳ हृदये यथा"[2] इति, "अनुस्स्वारस् तु यो दीर्घादक्क्षराच् च भवेत् परः । स तु ह्रस्स्व इति ज्ञेयो मन्तरेष्वेव विभाषया ('अनुस्स्वारस्स्योपरिष्टात् सवँवृतयँ यत्तर दृश्यते । दीर्घन् तन् तु विजानीयाच् छ्रोता ग्ग्रावाणकयँ यथा)'[3] इति च प्प्रोक्तमिति; पाराशरशिक्क्षादिषु अन्न्यास्स्वपि माद्ध्यन्दिनीयशाखासम्बद्धासु शिक्क्षासु एवमेवोक्तम्[4] इति च माद्ध्यन्दिनीयकानुस्स्वारस्स्य अन्न्यवाजसनेयिशाखानुस्स्वारतो भिन्नत्त्ववँ विज्ज्ञायते । माद्ध्यन्दिनीयके यत्तरानुस्स्वारस्स्य परसवर्णो भवति तत्तर "परसवर्णण ईषत्तप्रकृत्त्या चान्न्यत्तर"[5] इति वचनान्न्वाक्ख्याते प्रकृतिभावविकारयोर् मिश्श्रणे "परसवर्णेऽनुस्स्वारस्स्येषत्प्रकृतिरुच्च्यते । अणुमात्तरमनुस्स्वारो ह्युत्तमञ् चाऽणुमात्तरकम्"[6] इति केशवीयकारिकानुसारम् मात्तराविभागोऽवसेयः । तैत्तिरीयप्रातिशाक्ख्ये च—"ऋकारल्कारौ ह्रस्स्वौ, अकारश् च, तेन च समानकालस् स्वरः, अनुस्स्वारश् च"[7] इति अनुस्स्वारस्स्य मात्तरात्मकत्त्वम् प्रतिपादितम् ।

---

१. ३।१ । २. या. शि. श्लो. १३८–१४२ (शि. स., पृ.२१–२२),शि.व.वि.,पृ.१०६–१०९। ३. शिक्क्षासङ्ग्रहे श्लो.१४०, (शि. स., पृ. २१–२२) । ४. पारा. शि. श्लो. २८–३३, लघ्वमो. शि. श्लो. १५–१६; व. र. प्र. शि. श्लो. १४४–१४५ । ५. प्र. सू. ३।१ । ६. श्लो. १७–१८ । ७. १।३१–३४ ।

तत्तर वैदिकाभरणकारेण तु— "शिक्क्षायान् तु— मात्तराद् द्विमात्तरो-ऽनुस्स्वारो द्विमात्तरान् मात्तर एव तु" इत्युक्त्वा द्विविधस्स्याऽप्यनुस्स्वारस्य सयँयोगपरत्त्वे द्वित्त्वम् मात्तिरकत्त्वम् चोक्तम्—'मात्तिरकादपि सयँयोगे मात्तिरकस् तु द्द्विरूपवत्' इति, 'अनुस्स्वारश् च यो मात्तरस् संहिताकाल एव तु। पदमद्ध्ये द्विमात्तरं स्यादेकमात्तरन् द्विरूपवत्' इति"[1] इति उक्तम्। व्यासशिक्क्षायाम् च— "स्वरोदये त्त्वनुस्स्वारो भवेदद्ध्यणुमात्तिरकः"[2] इति, "अनुस्स्वारो द्विमात्तरस् स्याद् रेफोष्मसु परेषु च। सयँयुतोत्तर इत्येष एकमात्तरꣳ परकीर्तितः"[3] इति चोक्तम्। शम्भुशिक्क्षायामपि— "स्वरोदये त्त्वनुस्स्वारो भवेदद्ध्यणुमात्तिरकः"[4] इत्युक्तम्। सर्वसम्मतशिक्क्षायाम् च— "अनुस्स्वारस्य मात्तरत्त्वं सयँयोगे परतस् स्थिते। अनन्यत्तराऽद्ध्येतृभिस् सर्वैर् द्विमात्तरꣳ परिकीर्तितः॥ अनुस्स्वारो द्द्विमात्तरस् स्याद् रेफोष्मसु परेषु च। सयँयोगे परभूते स्यान् मात्तिरकस् तु द्द्विरूपवत्"[5] इति। कालनिर्णयशिक्क्षायाम् च— "अनुस्स्वारो द्द्विरुक्तोऽनृत्यपञ्चमश् च द्द्विमात्तिरकः। ह्रस्स्वात् परꣳ प्लुताद् दीर्घात् केवलात् त्वेकमात्तिरकः"[6] इत्युक्तम्। चारायणीयशिक्क्षायामपि— "ह्रस्स्वपूर्वस् त्वनुस्स्वारो विज्ज्ञेयो द्व्यर्धमात्तरकः। अर्धमात्तरस् तु पूर्वस् स्याद् विपरीतो(ते ?) विपर्ययः"[7] इति। ऋक्तन्त्रेऽपि— "अथाऽनुस्स्वारौ। अं आं इत्यनुस्स्वारौ। ह्रस्स्वाद् दीर्घो दीर्घाद् ह्रस्स्वः"[8] इति। लोमशीयशिक्क्षायाम् च— "शषसहरा दृश्यन्ते तेषु चोदयवर्तिषु। दीर्घानुस्स्वारम् जानीयात् सयँयोगे ह्रस्स्व एव वा॥ असयँयोगादनुस्स्वाराल् लघूनामुपयास्स्यति। सयँयोगात् तु परन् नित्यं संशयो विनिवर्तते॥ सयँयोगꣳ परतो यत्तर अनुस्स्वारस् तु पूर्वतः। ह्रस्स्वन् तन् तु विजानीयात् संस्थे इति निदर्शनम्॥ अनुस्स्वारस्स्योपरिष्टात् सवँवृतो यदि दृश्यते। स दीर्घ इति विज्ज्ञेय उभयं शृणवच् च नः॥ मात्तराद् द्विमात्तरोऽनुस्स्वारो द्विमात्तरान् मात्तर एव च। मात्तिरकादपि सयँयोगे मात्तिरकस् तु द्द्विरूपवत्"[9] इति। शौनकीयचतुरद्ध्यायिकायाम् च— "एकमात्तरो ह्रस्स्वः, व्यञ्जनानि

---

१. तै. प्रा. वै. टी. १।३४ (पृ. ३६)। २. सू. ४५३। ३. सू. ४५९–४६०। ४. श्लो. ३०। ५. श्लो. ९५–९६ (३।७८–७९)। ६. श्लो. ८। ७. पृ. १६। ८. १।२–३। ९. ७।१०–१४ (शि. स., पृ. ४६१)।

च"[1] इत्युक्तमिति अनुस्स्वारस्स्यापि ह्रस्स्वत्त्वम् मात्त्रात्मकत्त्ववें वा तत्त्र स्स्वीकृतवें विज्ज्ञायते। माण्डूक्क्यां शिक्क्षायाम् च— "अनुस्स्वाराश् च कर्त्तव्या ह्रस्स्वदीर्घप्प्लुतास् त्रयः। अयं राजा पशोर् मांसङ्क्षत्त्रियाणान् धनूंषि च"[2] इति ॥४९॥

(ञ) रङ्गमात्त्राविवरणम्

अनुस्स्वारनिभत्त्वाच् च श्रुतौ रङ्गोऽप्प्यनेकधा।
मात्त्रिको वा द्द्विमात्त्रो वाऽन्न्यथा वाऽपि यथायथम् ॥५०॥

उक्तं हि शैशिरीयशिक्क्षायाम्— "हृदयादुत्थितं रङ्गङ्कांस्येन समसुस्स्वरम्। मात्त्रिकम् च द्द्विमात्त्रम् च जघन्न्वाँ इति दर्शनम्"[3] इति, "स्वाराऽकम्पाश् च रङ्गाश् च ये यत्कालास् स्वभावतः। वर्धन्ते प्रोच्च्यमानास् ते क्षिप्प्रयत्नेऽपि वक्तरि"[4] इति च। पाणिनीयशिक्क्षायामपि—"रङ्गवर्णम् प्रयुञ्जानो नो ग्रसेत् पूर्वमक्क्षरम्। दीर्घस्स्वरम् प्रयुञ्जीयात् पश्चान् नासिक्क्यमाचरेत् ॥ हृदये चैकमात्त्रस् तु अर्धमात्त्रस् तु मूर्धनि। नासिकायान् तथाऽर्धम् च रङ्गस्स्यैवन् द्विमात्त्रता। हृदयादुत्करे तिष्ठन् कांस्येन समनुस्स्वरन्। मार्दवम् च द्द्विमात्त्रम् च जघन्न्वाँ इति दर्शनम्"[5] इति। याज्ज्ञवल्क्यशिक्क्षायामपि— "द्विमात्त्रो मात्त्रिको वाऽपि नासामूलं समाश्श्रितः। अन्ते प्रयुज्ज्यते रङ्गऽ पञ्चमैस् सर्वनासिकः"[6] इति। अमोघानन्दिन्न्यां शिक्क्षायाम् च— "जहि शत्त्रून् करतून् वनस्प्पतीन् परिधीन् क्षिणन्ति। शत्त्रूँरनपव्व्ययन्तोऽनुरङ्गाऽ पञ्चैकार्धमात्त्रिका भवन्ति"[7] इति। मल्लशर्मशिक्क्षायाम् च— "ह्रस्स्वात् तु द्द्विगुणो दीर्घो दीर्घादेकगुणऽ प्लुतः। प्लुतादेकगुणो रङ्गो रङ्गादेकगुणाऽधिकः। महाशब्देन सयँयुक्तो व्यञ्जनम् चार्धमात्त्रिकम् ॥ अतिरङ्गो महारङ्गाद् वृद्धो ह्येकगुणाऽधिकः। एतत् तु किल वेदे वै ज्ञेयम् पूर्णेऽपि सुस्स्थिरम्"[8] इति। चारायणीयशिक्क्षायाम् च— "हृदयाज् जायते रङ्गऽ कांस्यवच् चैव निस्स्वनः। लघुश् चैव द्द्विमात्त्रश् च ददत्त्वेति निदर्शनम् ॥ (दधन्न्वार्यो नर्यः)। ··· तस्स्य मात्त्रा तु हृदये अणुमात्त्रा तु मूर्धनि। नासाग्रे

---

१. १।५९-६०। २. श्लो. ९१ (शि. स., पृ. ४७१)
३. श्लो. १०६। ४. श्लो. ९४। ५. श्लो. २७-२९।
६. श्लो. १९१ (शि. स., पृ. २८) ७. श्लो. ४१ (शि. स., पृ. ८७)।
८. श्लो. ४५-४७ (शि. स., पृ. १५८)।

त्त्वणूनाम् मात्त्रा रङ्गस् स परिकीर्तितः"[1] इति । व्यासशिक्षायाम् च— "श्लोकाँ गलाँ ममाँ हूताँ यद्घराँ एवेति च प्लुताः । दीर्घा देवाँ उ ताँ इमि मृवाँ अ स्वाँ अहङ् कठे"[2] इति । शम्भुशिक्षायाम् च— "चतुर्भिरणुभिर् मात्त्रापरिमाणमिति स्स्मृतम् । रङ्गप्प्लुतश् चतुर्मात्त्रश् शुद्धप्प्लुतस् त्रिमात्त्रकः"[3] इति । तत्त्र रङ्गप्प्लुते मात्त्राव्यवस्स्था च "रङ्गे स्स्वरे च मात्त्रैका प्रत्त्येकं रङ्गदीर्घयोः । रङ्गे स्स्वरे च द्द्वे मात्त्रे तथा तत्प्लुतरङ्गयोः । रङ्गप्प्लुतश् चतुर्मात्त्र इत्त्युक्तो याजुषे मते"[4] इति आरण्यशिक्षायाम् । सर्वसम्मतशिक्षायाम् च— "प्लुतो वर्णX पदान्तस्स्थो नासिक्यो रङ्गसञ्ज्ञकः । चत्त्वारX काठके रङ्गा दीर्घा ह्यारण्यके विदुः । पञ्च रङ्गाX प्लुता दीर्घाश् चत्त्वारस् तैत्तिरीयके । श्लोकाँ सुमङ्गलाँ यद्घराँ उपहूताँ ममाँ प्लुताः । दीर्घास् ताँ इमि देवाँ उ स्वाँ अहम् ममृवाँ अवा"[5] इति । पारिशिक्षायाम् च— "रङ्गे मुखे व्याग्घररुतोपमं स्याद् मात्त्राद्द्वयं हृज्जनितन् त्वनास्स्यम् । एते द्द्विमात्त्राश् च सपादमात्त्रनासिक्ययुक्ताश् च विवृत्तिपूर्वाः ॥ सपादमात्त्रत्त्रितये हृदि स्स्यादेकस् ततो मूर्धनि चाऽर्धमात्त्राः । भवेद् विशेषो मुखनासिके च युक्तेश् च तस्मादपि साऽणुमात्त्रः"[6] इति; पारिशिक्षाटीकायाम् च— "सौराष्ट्रिका गोपवधूस् सुकण्ठस्स्वरेण तक्करा"[7] इति भाषते यथा । तथा समुच्चार्य वदेत् स्वकालाद् रङ्गश् च कम्पX खलु वर्धते सः"[7] इति । कालनिर्णयशिक्षायाम् च— "दीर्घप्प्लुता यदा रङ्गास् स्युस् तदैतेष्वयवँ विधिः । एकार्धमात्त्रशेषास् स्युर् हृदये मूर्द्धिन नासिके"[8] इति । नारदीयशिक्षायाम् च— "नकारान्ते पदे पूर्वे व्यञ्जनैश् च यवोहिषु । अर्धमात्त्रा तु पूर्वस्स्य रज्ज्यते त्त्वणुमात्त्रया ॥ नकारस्स्वरसयँयुक्तश् चतुर्युक्तो विधीयते । रेफो रङ्गश् च लोपश् चाऽनुस्स्वारोऽपि(च)वा क्वचित् ॥ हृदयाद्(हृदः?) उत्तिष्ठते रङ्गX कांस्येन समनिस्स्वनः । मृदुश् चैव द्द्विमात्त्रश् च दधन्न्वाँ इति दर्शनम्"[9] इति । लोमशीय-शिक्षायाम् च—"रङ्गस् तु द्द्विविधो ज्ज्ञेयस् स्वरपरो व्यञ्जनपरः । पारावतसवर्णाभो

---

१. पृ. ३० । २. सू. ४१७–४१८ । ३. श्लो. ४७ ।
४. श्लो. १०२–१०४ । ५. श्लो. ७६–७८ (३।४९–५२) ।
६. सू. १५३–१५५ । ७. सू. १५५ । ८. सू. २२ ।
९. २।४।६–८ ।

विहितोऽक्क्षरचिन्तकैः ।। तस्स्य मात्त्रा तु हृदये अणुमात्त्रा तु मूर्ध्नि। नासाग्रे त्त्वणूनाम् मात्त्रा रङ्गस्स्य परिकीर्तिता ।। रङ्गे चैव समुत्पन्ने न ग्रसेत् पूर्वमक्क्षरम् । स्वरन् दीर्घम् प्रयुञ्जीत तस्स्य नासिक्क्यमुच्चरेत् । द्विमात्त्रो मात्त्रिको वाऽपि नसि मूलं समाश्श्रितः । अन्ते प्रयुज्यते रङ्गऽ पञ्चमैस् सर्वनासिकः''[1] इति । माण्डूक्क्यां शिक्क्षायामपि— ''नासादुत्पद्द्यते रङ्गऽ कंसेन समनिस्स्वनः । मृदुश् चैव द्द्विमात्त्रं स्याद् वृष्टिमाँ इति निदर्शनम् ।। सयँ युक्तस्स्य तु यत् पूर्वन् तद् ह्रस्स्वलँ लघुवँ विजानीयात् । तत् सयँ योगोत्तरवँ विद्द्याद् गुर्वन्न्यत्तर नियोगतः''[2] इति । एवञ् च तत्तच्शाखाशिक्क्षानुसारन् तत्तच्शाखारङ्गमात्त्रा व्यवस्स्थिता बोद्ध्या । व्यञ्जनोदयो ह्रस्स्वो रङ्गस् तु 'उपधानिका' इत्त्यपि उच्च्यते[3] ।।५०।।

(ट) स्वरभक्तिमात्त्रानिरूपणम्

स्वरभक्तिरसयँ योगपरा स्स्यादर्धमात्त्रिका ।
सा सयँ योगपरा ज्ञेया ह्यणुमात्त्रेति बह्वृचाः ।।५१।।
एवमेवान्न्यवेदेषु स्वरभक्तेर् यथायथम् ।
मात्त्राव्यवस्स्था विज्ञेया प्रातिशाक्ख्यादिकोक्तितः ।।५२।।

तथाहि बह्वृचप्रातिशाक्ख्ये— ''स्वरभक्तिऽ पूर्वभागक्क्षराङ्गम्, द्राघीयसी साऽर्धमात्त्रा, (इतरे च), अर्धोनाऽन्न्या''[4] इति दीर्घायास् स्वरभक्तेरर्धमात्त्रात्मकत्त्वं ह्रस्स्वायाश् च अर्धमात्त्रार्धमात्त्रत्त्वम् प्रतिपादितम् । ऊष्मपरायास् स्वरभक्तेर् दीर्घत्त्वमन्न्यस्स्याश् च ह्रस्स्वत्त्वमपि तत्त्र ''द्रासीयसी तूष्मपरा, इतरा क्क्रमे''[5] इति प्प्रतिपादितम् । शौनकीयचतुरद्ध्यायिकायाञ् च—''रेफादूष्मणि स्स्वरपरे स्वरभक्तिरकारस्स्याऽर्धञ् चतुर्थमेके, अनन्न्यस्मिन् व्यञ्जने चतुर्थमष्टमवँ वा''[6] इति स्वरभक्तेरर्धमात्त्रात्मकत्त्वम् मात्त्रापादात्मकत्त्वम् मात्त्रापादार्धात्मकत्त्वञ् च स्स्थानविशेषेषूक्तम्। शैशिरीयशिक्क्षायाञ् च—''व्यञ्जनान्तेषु युक्तेषु सैव स्स्यात् पादमात्त्रिका । शीर्ष्णश् शीर्ष्णऽ प्रसर्स्राण तर्ह्येवैतन् निदर्शनम्''[7] इति । माद्ध्यन्दिनीयके तु स्वरभक्तेस् सैकाररूपत्त्वाद्[8] अवरतो मात्त्रात्मकत्त्वम् प्रतीयते । चारायणीयशिक्क्षायान् तु—''अणुमात्त्रञ् च रेफस्

---

१. १।६–९ (शि. स., पृ. ४५६) । २. श्लो. ११३–११४ (शि.स., पृ. ४७३)। ३. या.शि.श्लो. १९२–१९३। ४. १।३३–३५। ५. ६।४८, ४९ । ६. १।१०१–१०२ । ७. श्लो. ५४ । ८. प्र. सू. २।३; द्र.– शु. य. प्रा. ४।१७ ।

स्याद् व्यञ्जनस्य तथैव च। स्वरस्य मार्धमात्तरञ् च स्वरभक्तिर्विनिर्दिशेत्"[1] इति। व्यासशिक्षायाम् च— "हलो भक्तिर् विसर्गोऽनतो ह्रस्वान् नो यवहोत्तरः। स्पर्शोर्ध्वो वोऽर्धमात्तरास् तेऽवसाने लस् त्रिपादता"[2] इति। शम्भुशिक्षायाम् च स्वरभक्तिप्रकरणे— "पिपीलिकेति विज्ञेया सवर्णत्वयं यदा भवेत्। दीर्घात् पिपीलिका दीर्घा मध्यमा च सवर्णयोः"[3] इति पठ्यते। सर्वसम्मतशिक्षायाम् च— "स्वरपादान्वितौ भागौ स्वरभक्तिरितीरितौ। हकारे पूर्वभागस् स्यादुत्तरश् शषसेषु च"[4] इत्युक्त्वा स्वरभक्तेरर्धमात्तरात्मकत्वं सूचितम्, "अर्धमात्तरा भवेद् भक्तिः"[5] इति स्फुटम् चोक्तम्। पारिशिक्षायाम् च— "स्वरोत्तरोष्मणण्यपि पूर्वरेफलकारयोश् च स्स्वरभक्तिसञ्ज्ञा। स्यादर्धमात्तरा रलयोस् तदादावन्ते स्वरांशावणुमात्तरयुक्तौ॥ रलौ तु यस्मात् स्वरपादयुक्तौ तस्मात् तयोश् च स्स्वरभक्तिसञ्ज्ञा। पूर्वांशपादद्वययुग् घलन्ता स्यात् सवृतावृताख्या हपरे तु भक्तिः। परांशयुक्ता शषसेषु भक्तिः परेष्वजन्ता विवृताभिधाना"[6] इति भक्तेः पादोनमात्तरात्मकत्वम् प्रतिपादितं रेफलकारयोरर्धमात्तरकत्वात् स्वरभागस्य च मात्तरापादात्मकत्वात्। त्रिभाष्यरत्ने तु— "मात्त्रिकस्य ऋकारस्य आदिरणुमात्तरा स्वरभागो मध्ये रेफोऽर्धमात्तरा शेषोऽप्यणुमात्तरा स्वरभागः, एतद् ऋकारस्स्वरूपम्। अत्तर रेफेऽर्धमात्तरे भज्यमाने सति तौ भागौ पूर्वोत्तरावणुसहितौ प्रत्येकं स्वरभक्तिनामधेयम् भजेते। सा च स्वरभक्तिरर्धमात्तरा"[7] इति। कालनिर्णयशिक्षायामपि—"व्यञ्जनस्स्वरभक्तीनाङ्ग कालस् स्यादर्धमात्त्रिकः"[8] इति। माण्डूक्यशिक्षायाम् च — "ऊष्मस्स्थौ यत्तर दृश्येते स्वरवर्णौ(रलवर्णौ?) स्वरोदयौ। ऋलृवर्णौ तथा ज्ञेयौ स्वरभक्तीति सँस्थितौ। तां ह्रस्वाम् प्रतिजानीयात् तथा मात्तरा भवेद् यदि"[9] इति स्वरभक्तिमात्तरा उक्ता॥५१-५२॥

॥ इति मात्तराद्ध्यायश् चतुर्थः॥

---

१. पृ. ३०। २. सू. ४५७-४४८। ३. श्लो. १७।
४. श्लो. २८(२।२६, २७)। ५. श्लो. ९८(३।८२)।
६. सू. १२०-१२३। ७. तै. प्रा. त्रिभा. र. २१।१५।
८. श्लो. ५। ९. श्लो. ९९-१०० (शि. स., पृ. ४७१-४७२)।

अथ पञ्चमोऽध्यायः

बलनिरूपणम्

१. बलपरिभाषा

यत्नो यो वर्णजनने फुस्फुसे स्वरयन्त्रके ।
स्थाने करणयोगे च जनिता तद् बलं स्मृतम् ।।१।।

वर्णोच्चारणे कर्तव्ये सति फुस्फुसयोः, स्वरयन्त्रे, स्थानविशेषे करणविशेषस्य सयँ योजने, उपसंहारे वाऽपि च जनिता यो यत्नस् तद् बलमित्याचार्यैस् स्मृतमित्यर्थः। तथा हि "अथ शीक्षावँ व्याख्यास्यामः। वर्णस् स्वरः। मात्रा बलम्। साम सन्तानः। इत्युक्तश् शीक्षाद्ध्यायः"[1] इति तैत्तिरीयोपनिषद्वचनस्य व्याख्याने शङ्करभगवत्पादः "बलम् प्रयत्नविशेषः"[2] इति। सायणोऽपि "स्पृष्टत्वमीषत्स्पृष्टत्वमित्यादिकं प्रयत्नो बलम्"[3] इति। अस्माभिस् तु श्रुतिवचने शिक्षाशास्त्रविषयाणावँ वर्ण-स्वर-मात्रा-साम-सन्तानानाम् पृथगुपादानात् स्थानकरणप्रयत्नानाम् परिशिष्टत्वाच् शङ्करभगवत्पादवचनस्य "प्रयत्नविशेषः" इत्यस्य व्यापकतममर्थमादाय श्रौतो बलशब्दः प्रयत्नतत्सम्बद्धस्थानकरणादिपरतया परिगृहीतो वेदितव्यः। सायणेनाऽपि ऋग्वेदभाष्यस्य भूमिकायान् तु "बलं स्थानप्रयत्नौ"[4] इति व्याख्यातमस्तीति चाऽत्र स्मरणीयम्। स्थाने उपात्ते करणन् तु नान्तरीयकतयैवोपात्तम् भवतीति च वेदितव्यम् ।।१।।

२. अथ स्स्थानाधिकारः

(क) स्थानपरिभाषा

फुस्फुसान् निर्गतो वायुर् यान् देशान् प्रतिहत्य च ।
वर्णीभवति तान्न्याहुस् स्थानानि खलु शिक्षकाः ।।२।।

तथाहि तैत्तिरीयप्रातिशाख्ये— "स्वराणायँ यत्तरोपसंहारस् तत् स्थानम्, अन्न्येषान् तु यत्तर स्स्पर्शनन् तत् स्थानम्"[5] इति स्स्थान-

---

१. १।२। २. तै.उ.व्या. १।२। ३. तै.आ.व्या. ७।२।
४. पुण्यपत्तनसँस्करणे प्रथमभागे, पृ. २५। ५. २।३१, ३३।

परिभाषा प्रतिपादिता। स्वराणामुच्चारणे यत्तर मुखभागविशेषे वायुव्वाघातविशेषाय करणस्स्य तद्भागसमीपे नयनन् तत् स्वराणां स्थानम्, व्यञ्जनानान् तूच्चारणे यत्तर मुखभागविशेषे वायुव्वाघातविशेषाय करणेन स्स्पर्शनन् तद् व्यञ्जनानां स्थानमिति चोक्तपरिभाषार्थः। आपिशलिशिक्क्षासूत्तरे तु "इह यत्तर स्स्थाने वर्णा उपलब्ध्यन्ते तत् स्थानम्"[1] इत्युक्तम्; एवमेव पाणिनीयशिक्क्षासूत्तरेऽपि; किन् तु वर्णोपलब्धिराकाशे भवतीति तद् वचनवँ् व्याक्ख्यासापेक्क्षमिति बोद्ध्यम्। "अधिकरणवँ् वर्णानां स्थानशब्देनोच्च्यते"[2] इत्युव्वटः। "अस्मिन् तिष्ठन्तीति स्स्थानानि"[3] इति माहिषेयस्स्य "यस्मिन् तिष्ठति तत् स्थानम्"[4] इति सोमयार्यस्स्य च वचनन् तु नैतत्प्रकरणोपयोगि। "यदुपक्क्रम्यते तत् स्थानम्"[5] इति शौनकीयचतुरद्ध्यायिकाभाष्यकारः ॥२॥

(ख) वर्णविशेषस्स्थानविशेषसम्बन्धः

यत्तर वायोऽप्रतीघाताद् यो वर्णस् समुदीर्यते।
तस्स्य वर्णस्स्य तत् स्थानमित्त्याहुश् शिक्क्षका बुधाः ॥३॥

एवञ् च वर्णानां स्थानानि यथायथम् पृथक्पृथगपि निरूपणीयानि। तानि च क्क्रमेणोपरिष्टात् प्रतिपादयिष्ष्यन्ते ॥३॥

(ग) वर्णानां स्थानानां सङ्ख्या

अष्टौ स्थानानि वर्णानामिति केचिद् दशेत्त्यपि।
केचिदाहुश् शिक्क्षकैर् हि निर्दिष्टान्न्यधिकान्न्यपि ॥४॥

तथाहि शैशिरीयशिक्क्षायाम् पाणिनीयशिक्क्षायाञ् च— "अष्टौ स्थानानि वर्णानामुरऽ कण्ठश् शिरस् तथा। जिह्वामूलञ् च दन्ताश् च नासिकोष्ठौ च तालु च"[6] इति। एवमेव माण्डूक्क्यां शिक्क्षायामपि[7]। चारायणीयशिक्क्षायान् तु— "दश स्स्थानानि वर्णानाङ् कीर्तयन्ति मनीषिणः। यतऽ प्रवृत्तिर् वर्णानान् तानि मे गदतश् शृणु॥ उरऽ कण्ठश् शिरस् तालु दन्ता ओष्ठौ तु नासिका। जिह्वामूलन् तु सृक्क्वश् च दन्तमूलस् तथैव च"[8] इति। वर्त्तसम् बर्स्ववँ् वाऽपि स्थानमपि ऋग्वेदप्रातिशाक्ख्यादिषु निर्दिष्टन् दृश्यते[9]। हनुश् च ऋक्तन्त्रे

---

१. प्रक्क्रमप्रकरणे सू. ३। २. ऋ. प्रा. भा. १।४९।
३. तै. प्रा. भा. २३।४। ४. तै. प्रा. त्रिभा. र. २३।४।
५. शौ. च. भा. १।१८। ६. शै. शि. श्लो. १९; पा. शि. श्लो. १३।
७. श्लो. ६८। ८. पृ. ११। ९. ऋ. प्रा. १।४६।

उल्लिखिता[1]। हनुमूलञ् च क्वचित्[2]। जम्भ्याश् च तैत्तिरीयप्रातिशाख्ये[3] स्थानतत्त्वेनेवोल्लिखिताः ।।४।।

(घ) वर्णविशेषस्स्थानविशेषनिरूपणम्

अकारस्स्य हकारस्स्य स्स्थानङ्ः कण्ठ इति स्स्मृतम् ।
उरऽ पञ्चमयुक्तस्स्य हस्स्याऽनूतस्स्थायुतस्स्य च ।।५।।

तथाहि ऋग्वेदप्रातिशाख्ये– "कण्ठ्योऽकारः, प्रथमपञ्चमौ च द्द्वा ऊष्मणाम्, केचिदेता उरस्स्थौ"[4] इति; शुक्लयजुर्वेदप्रातिशाख्येऽपि— "अहविसर्ज्जनीयाः कण्ठे"[5] इति । तैत्तिरीयप्रातिशाख्येऽपि— "कण्ठस्स्थानौ हकारविसर्जनीयौ, उदयस्स्वरादिसस्स्थानो हकार एकेषाम्"[6] इति । ऋक्तन्त्रे च— "हाः कण्ठे, उरसि विसर्जनीयो वा"[7] इति । आपिशलिशिक्षासूत्रे च— "अकुहविसर्जनीयाऽ कण्ठ्याः, हविसर्जनीयावुरस्स्थावेकेषाम्, जिह्वामूलीयो जिह्वव्यः, कवर्गावर्णाऽनुस्स्वारजिह्वामूलीया जिह्वव्या एकेषाम्, सर्वमुखस्स्थानमवर्णमेके"[8] इति । एवमेव प्प्रायेण पाणिनीयशिक्षासूत्रेऽपि । तैत्तिरीयप्रातिशाख्येऽपि अवर्णस्स्य सर्वमुखस्स्थानता स्वीकृत्येव तस्स्य विशेषेण स्स्थानन् नोक्तम्; "अवर्णे नात्त्युपसंहृतमोष्ठहनु नातिव्व्यस्तम्"[9] इत्त्येवोक्तम् । पाणिनीयव्याकरणभाष्येऽपि– "सर्वमुखस्स्थानमवर्णमेक इच्छन्ति"[10] इत्त्युक्तम् । चारायणीयशिक्षायामपि— "सर्वस्स्थानमवर्णस्स्य केचिदिच्छन्ति सूरयः"[11] इति । भरतनाट्यशास्त्रे च— "अकुहविसर्जनीयाऽ कण्ठ्याः"[12] इति, "सर्वमुखस्स्थानमवर्णमित्त्यपरे"[13] इति, "अहौ च कण्ठस्थौ"[14] इति च । शैशिरीयशिक्षायाञ् च— "अकुहाऽ कण्ठजाऽ प्रोक्ताः"[15] इति, शौनकशिक्षायामप्प्येवमेव[16] । पाणिनीयशिक्षायाञ् च— "कण्ठ्यावहौ"[17] इति । याज्ञवल्क्यशिक्षायाञ् च— "त्रयः कण्ठ्या अवर्णहकारविसर्जनीया इति"[18] इति; व्यासशिक्षायाञ् च–"अव्व्यञ्जनस्स्वराणाञ् च आदौ कण्ठ इतीरितः"[19]

---

१. ऋ. त. २।१।१० । २. तै. प्रा. २।३५; अथर्वप. ४७।२।५।
३. तै. प्रा. २।१७ । ४. १।३८–४० । ५. १।७१ ।
६. २।४६, ४७ । ७. २।१।२, ३ । ८. स्थानप्रकरणे सू. २–६ ।
९. २।१२ । १०. १।१।९ । ११. पृ. १३, १४ ।
१२. चतुर्दशेऽद्ध्याये (पृ. २३०) । १३. तत्तत्रैव ।
१४. तत्तत्रैव, श्लो. १३ । १५. श्लो. २० । १६. श्लो. १४।
१७. श्लो. १७ । १८. शि. स., पृ. ३३ । १९. सू. ३९८ ।

इति, "हकारश् च विसर्गश् च कण्ठस्स्थानावितीरितौ"[१] इति च। पारिशिक्क्षायाञ् च— "कण्ठं स्थानं स एवात्तर करणं हविसर्गयोः"[२] इति। वर्णपटले च– "अतस् स्थानानि वर्णानाङ कण्ठोऽवर्णहकारयोः"[३] इति। षोडशश्श्लोक्क्यां शिक्क्षायाञ् च— "हकुविसर्जनीयानां स्यात् कण्ठ्यम् (कण्ठः ?)"[४] इति।

हकारस्स्य पञ्चमैर् युक्तस्स्य उरस्स्यत्त्वञ् च शिक्क्षासु प्प्रतिपादितम्। तथा हि शैशिरीयशिक्क्षायाम्— "हकारम् पञ्चमैर् युक्तमन्तस्स्थाभिश् च सयँ्युतम्। उच्चारणीयमौरस्स्यमेवमीप्सन्ति बह्व्वृचाः"[५] इति; शौनकशिक्क्षायाञ् च— "हकारम् पञ्चमैर् युक्तमन्तस्स्थाभिश् च सयँ्युतम्। उरस्स्यन् तवँ् विजानीयात् परञ् चेत् पृथगुच्चरेत्"[६] इति। पाणिनीयशिक्क्षायाञ् च— "हकारम् पञ्चमैर् युक्तमन्तस्स्थाभिश् च सयँ्युतम्। उरस्स्यन् तवँ् विजानीयात् कण्ठ्यमाहुरसयँ्युतम्"[७] इति। एवमेव याज्ञ्ज्ञवल्क्यशिक्क्षायामपि[८]। व्यासशिक्क्षायान् तु– "हकारन् तत्तर नासिक्क्यमुत्तमोत्तरमेव च। अन्तस्थापरमित्त्यत्तर उरस्स्यञ् च विदुर् बुधाः"[९] इत्त्युक्तम्। सर्वसम्मतशिक्क्षायान् तु पुनः— "हकारमौरसवँ् विद्द्यादन्तस्थासु परासु च। उत्तमेषु परेष्ष्वेवन् नासिक्क्यत्त्वमिहाधिकम्॥ नासाबभ्यान् नोत्सृजेद् वायुमत्त्यन्तं हमसङ्गमे। न वदेदुरसाऽत्त्यन्तमन्तस्थाभिश् च सङ्गमे"[१०] इति। पारिशिक्क्षायाञ् च— "उरस्स्यत्त्वं हकारे तूत्तमान्तस्स्थापरे सति"[११] इति। चारायणीयशिक्क्षायामपि एष विषय एवमेव प्प्रायेण प्प्रतिपादितः[१२]। लोमशीयशिक्क्षायाञ् च— "हकारम् पञ्चमैर् युक्तमन्तस्थाभिश् च सयँ्युतम्। औरसन् तवँ् विजानीयात् कण्ठ्यमाहुरसयँ्युतम्। हकारं रेफसयँ्युक्तङ कदाचिद् वलसयँ्युतम्। उच्चारणीयङ कण्ठस्स्थमेवमीप्सन्ति पण्डिताः॥ हकारो यत्तर पूर्वस्स्थो ह्यन्तस्स्थाद्द्यो भवेत् परः। पदकाले वियुज्ज्येत संहितायान् न सौरसः"[१३] इति॥५॥

---

१. सू. ४०६। २. सू. ५२।
३. अथर्वप. ४७।१।१८। ४. श्लो. ११ (शि. स., पृ. १६५)।
५. श्लो. १५६। ६. श्लो. ४४। ७. श्लो. १६।
८. श्लो. १७७ (शि. स., पृ. २६)। ९. सू. ४११–४१२।
१०. श्लो. ७४–७५। ११. सू. ५३; द्र.–सू. १७५। १२. पृ. १३–१४।
१३. ५।९–११।

इकारस्स्य चवर्गीयवर्णानायँ यस्स्य शस्स्य च ।
स्थानन् तालु हि सर्वेषां शिक्क्षकाणाम् मते स्मृतम् ॥६॥

तथाहि ऋग्वेदप्रातिशाक्ख्ये– "तालव्यावेकारचकारवर्गाविकारैकारौ यकारश् शकारः"[१] इति । शुक्लयजुर्वेदप्रातिशाक्ख्ये च— "इचशेयास्त् तालौ"[२] इति । तैत्तिरीयप्रातिशाक्ख्येऽपि–"तालौ जिह्वामद्ध्यमिवर्णे"[३] इति, "तालौ जिह्वामद्ध्येन चवर्गे"[४] इति, "तालौ जिह्वामद्ध्याऽन्ताभ्यायँ यकारे"[५]इति, "स्पर्शस्स्थानेषूष्माण आनुपूर्व्येण"[६] इति च । ऋक्तन्त्रे च– "तालुनि श्च्ये"[७]इति । आपिशलिशिक्क्षासूत्रेऽपि— "इचुयशास् तालव्याः"[८] इति । एवमेव पाणिनीयशिक्क्षासूत्रे च । भरतनाट्यशास्त्रे च– "इचुयशास् तालव्याः"[९] इति, "तालव्या इचुयशास् स्युः"[१०] इति च । शैशिरीयशिक्क्षायामेतद्विषयकवँ वचनन् त्रुटितम् प्रतीयते । शौनकशिक्क्षायाञ् च– "तालाविचुयशा जाताः"[११]इति । पाणिनीयशिक्क्षायाञ् च— "इचुयशास् तालव्याः"[१२] इति । याज्ञवल्क्यशिक्क्षायाञ् च— "नव तालव्या इवर्णचवर्गशकारैकारयकाराः"[१३] इति । वर्णरत्नप्रदीपिकायाञ् च— "इवर्णोऽथ चवर्गश् च एऐकारौ यशैस् सह । तालुस्स्थाना भवन्त्येषाञ् जिह्वामद्ध्यञ् च कारणम्"[१४] इति । व्यासशिक्क्षायान् तु— "अव्व्यञ्जनस्स्वराणाञ् च आदौ कण्ठ इतीरितः । ओष्ठताल्ववर्णेवर्णे व्यस्तसवँ वृतमैत्त्यपि"[१५] इत्युक्तम् । पारिशिक्क्षायान् तु– "एकारे पूर्ववत् तालौ जिह्वामद्ध्यमिवर्णवत्"[१६]इत्यादि।चारायणीयशिक्क्षायाञ् च–"तालुनीचुयशास् स्मृताः" इति, "इवर्णश् च चवर्गश् च यशकारौ तथैव च । एते वर्णाऽ परा ज्ञेया दश तालुसमुद्भवाः"[१७] इति च । वर्णपटले च— "ताल्वे-य-श-चवर्गाणाम् इवर्णस्स्य च भाष्यते"[१८] इति । षोडशश्लोक्क्यायाञ् च— "यिश्चु तालुकम्"[१९] इति । चान्द्रवर्णसूत्रे तु— "कण्ठतालुकम् इदेदैताम्"[२०] इत्युक्त्वा पुनस् "ताल्विचुयशाम्"[२१] इत्युक्तम् । अतस्

---

१. १।४२ । २. १।६६ । ३. २।२२ । ४. २।३६ । ५. २।४० । ६. २।४४ । ७. २।१।५ । ८. स्थानप्प्रकरणे सू. ७ । ९. चतुर्दशेऽद्ध्याये, पृ. २३० । १०. तत्तरैव, श्लो. १३। ११. श्लो. १४ । १२. श्लो. १७ । १३. शि. स., पृ. ३३ । १४. श्लो. २८ (शि. स., पृ. ११९) । १५. सू. ३९८–३९९ । १६. सू. ३५,४४,४८,५०। १७. पृ. १३ । १८. अथर्वप. ४७।२।१ । १९. श्लो. ११ (शि. स., पृ. १६५) । २०. सू. ४ । २१. सू. १०।

तन्मते इकारस्य कण्ठतालुजत्वन् तालुजत्वमेव वेति न निश्चेतुं शक्यम् । तत्सूत्रसम्पादकैरप्येतस्मिन् विषये किमप्यवधानन् न दत्तम् ।।६।।

उकारस्य पवर्गीयवर्णानाञ् चाऽपि वस्य च ।
उपद्ध्मानीयस्य चोष्ठस् स्थानं शिक्षासु कीर्तितम् ।।७।।

तथाहि ऋग्वेदप्रातिशाख्ये– "शेष ओष्ठ्योऽपवाद्द्य नासिक्यान्"[१] इति; शुक्लयजुर्वेदप्रातिशाख्ये च— "उवोपोपद्ध्मा (उवो×प्पा) ओष्ट्ठे"[२] इति; तैत्तिरीयप्प्रातिशाख्ये च– "ओष्ठोपसंहार उवर्णे"[३] इति, "ओष्ठाव्भ्याम् पवर्गे"[४] इति, "ओष्ठानुताव्भ्यान् दन्तैर् वकारे"[५] इति, "स्पर्शस्स्थानेषूष्माण आनुपूर्व्येण"[६] इति च । ऋक्तन्त्रे च— "ओष्ठे वो४पू"[७] इति । आपिशलिशिक्षासूत्त्रे च– "वकारो दन्तोष्ठ्यः, सृक्क्वस्स्थानमेके, उपूपद्ध्मानीया ओष्ठ्याः"[८] इति । एवमेव पाणिनीयशिक्षासूत्त्रेऽपि प्प्रायेण । भरतनाट्ट्यशास्त्रे च– "उपूपद्ध्मानीया ओष्ठ्याः"[९] इति; "वकारो दन्तोष्ठ्यः"[१०] इति, "पफबभमास् त्वोष्ठ्यास् स्युः"[११] इति, "कण्ठ्यो विसर्जनीयो जिह्वामूलोद्भवौ कखयोः । पफयोरोष्ठस्स्थानो भवेद्"[१२] इति च । शैशिरीयशिक्षायाञ् च— "उपद्ध्मानीय ओष्ठजः । उपू ओष्ठ्यौ विजानीयाद् वो दन्त्योष्ठ्यस् तथैव च"[१३] इति । शौनकशिक्षायाञ् चाऽप्प्येवमेव[१४] । पाणिनीयशिक्षायाञ् च— "ओष्ठजावुपू"[१५] इति, "दन्तोष्ठ्यौ वस् स्मृतो बुधैः"[१६] इति च । एतेषु वचनेषु वकारस्य दन्तोष्ठ्यतत्त्वं स्थानकरणयोरेव लाघवार्थवँ विवेकविशेषार्थमेव वा स्थानत्त्वेनेवोल्लेखनस्य प्प्रसङ्गादागतम् बोद्ध्यमिति पूर्वमेव वर्णाद्ध्याये वकारविवेकप्प्रसङ्गे प्रोक्तमेव।याज्ञवल्क्यशिक्षायाञ् च– "अष्टावोष्ठ्या उवर्णवकारोपद्ध्मानीयपवर्गा इति"[१७] इति । वर्णरत्नप्प्रदीपिकायाञ् च— "उवर्णोऽथ पवर्गश् च ओ औकारौ तथा च वः । ओष्ठ्या एते स्स्मृता वर्णा उपद्ध्मानीय एव च"[१८]

---

१. १।४७ । २. १।७० । ३. २।२४ । ४. २।३९ । ५. २।४३ । ६. २।४४ । ७. २।१।९ । ८. स्थान. सू. ११–१३ । ९. चतुर्दशेऽद्ध्याये । १०. तत्त्रैव । ११. तत्त्रैव, श्लो. १३ । १२. तत्त्रैव, श्लो. १४–१५ । १३. श्लो. २० । १४. श्लो. १५ । १५. श्लो. १७ । १६. श्लो. १८ । १७. शि. स., पृ. ३३ । १८. श्लो. ३१ (शि. स., प. ११९–१२०) ।

इति । चारायणीयशिक्क्षायाम् च—"उपूपद्ध्मानीया ओष्ठ्याः"[1] इति, "उवर्णश् च पवर्गश् च वकारोऽष्टम एव च । उपद्ध्मानीयसहिता ओष्ठ्या वर्णा दश स्स्मृताः"[2] इति च । व्यासशिक्क्षायाम्[3] पारिशिक्क्षायाम्[4] च तैत्तरीयप्रातिशाक्ख्योक्त एव ओष्ठस्स्थानकवर्णविषयको विचारश् श्लोकैरुपस्स्थापितः । वर्णपटले च— "उवर्णस् त्वोष्ठ्य उच्च्यते । उपद्ध्मानीय ओकारो वऽ पवर्गस् तथा मताः"[5] इति । षोडशश्श्लोकक्या शिक्क्षायाम् च—"पूपद्ध्मानीयमोष्ठजम् । वो दन्तोष्ठम्"[6] इति । चान्द्रवर्णसूत्रे तु— "कण्ठोष्ठम् उदोदौताम्"[7] इत्युक्त्वा पुनः "ओष्ठावुपूपद्ध्मानीयानाम्"[8] इति चोक्तन् दृश्श्यते । अतस् तन्मते उकारस्स्य कण्ठोष्ठजत्वम् ओष्ठजत्ववँ वेति न निश्चेतुं शक्क्यम् ॥७॥

ऋकारस्स्य स्स्थानमाहुर् जिह्वामूलं हि केचन ।
केचिद् बर्स्वम् पुनश् चान्न्ये मूर्धानन् दृष्टिभेदतः ॥८॥
लृकारस्स्याप्येवमेव जिह्वामूलं हि केचन ।
बर्स्वङ केचिच् चाऽपरे तु दन्तान् स्थानमवर्णयन् ॥९॥

तथाहि ऋग्वेदप्रातिशाक्ख्ये—"ऋकारल्कारावथ षष्ठ ऊष्मा जिह्वामूलीयाः"[9] इति । शुक्लयजुर्वेदप्रातिशाक्ख्येऽपि—"ऋऽकौ जिह्वामूले"[10] इति । ऋक्तन्त्रे च—"जिह्वामूले कृ"[11] इति । वर्णपटले च—"जिह्वामूलमृवर्णस्स्य कवर्गस्य च भाष्यते । यश् चैव जिह्वामूलीय लृवर्णश् चेति च स्स्मृतः"[12] इति । याज्ञवल्क्यशिक्क्षाम् च—"पञ्च(सप्त ?) जिह्वामूलीया ऋऽकौ कवर्ग इति"[13] इति । वर्णरत्नप्रदीपिकायाम् च—"ऋवर्णोऽथ कवर्गश् च जिह्वामूलीय एव च । जिह्वामूले भवन्त्येषाम् जिह्वामूलम् च कारणम्"[14] इति । एतानि ऋकारस्स्य लृकारस्स्य चाऽपि जिह्वामूलस्स्थानकतायाऽ प्रतिपादकानावँ वचनानि । ऋकारस्स्य लृकारस्स्य च बर्स्वस्स्थानकत्वन् तु "उपसंहृततरे च (हनू)जिह्वाग्रमृकारर्कारल्कारेषु बर्स्वेषूपसंहरति"[15] इति कृष्णयजुर्वेदप्रातिशाक्ख्ये सूचितम् बोद्ध्यम् । पारिशिक्क्षायामपि—"बर्स्वेष्वादौ

---

१. पृ. १३ । २. तत्त्रैव । ३. सू. ४००, ३९७, ४०५, ४०१ । ४. सू. ४७, ३२, ४९–५० । ५. अथर्वप. ४७ । ६. श्लो. ११–१२ (शि. स., पृ. १६५)। ७. सू. ५ । ८. सू. ११ । ९. १।४१ । १०. १।६५ । ११. २।१।४ । १२. अथर्वप. ४७।१।२० । १३. शि. स., पृ. ३३ । १४. श्लो. २७ (शि. स., पृ. ११९) । १५. तै. प्रा. २।१८ ।

तु जिह्वाग्रमुपसंहरति त्रिके (ऋ ॠ ऌ)। हनूपसंहृततरे स्यातामोष्ठावकारवत्"[1] इति। ऋकारस्य मूर्धस्थानकतायाः प्रतिपादकानि वचनानि च बहूनि प्राप्यन्ते। तथाहि आपिशलिशिक्षायाम्—"ऋटुरषा मूर्धन्याः"[2] इति, एवमेव पाणिनीयशिक्षासूत्रेऽपि। भरतनाट्यशास्त्रे च— "ऋटुरषा मूर्धन्याः"[3] इति, "ऋटुरषा मूर्द्ध्नि स्थिता ज्ञेयाः"[4] इति। पाणिनीयशिक्षायाञ् च—"स्युर् मूर्धन्या ऋटुरषाः"[5] इति। चारायणीयशिक्षायाञ् च— "मूर्धन्यृटुरषा ज्ञेयाः"[6] इति। षोडशश्लोक्यां शिक्षायाञ् च— "ऋटुर् कम्"[7] इति। चान्द्रवर्णसूत्रेऽपि— "मूर्धा ऋटुरषाणाम्"[8] इति। तत्र यैर् ऋकारस्य जिह्वामूलं स्थानमुक्तन् तैर् ऋकारघटकस्स्वरभागस्य प्राधान्यं स्वीकृत्य ऋकारस्स्थानमुल्लिखितम्; यैस् तु वर्स्वो मूर्धा वा ऋकारस्य स्थानमुक्तन् तैर् ऋकारघटकरेफभागस्य प्राधान्यमङ्गीकृत्य ऋकारस्य स्स्थानमुल्लिखितम् बोद्ध्यम्। एवञ् च ऋकारस्य जिह्वामूलम् मूर्धा चेति वा जिह्वामूलम् बर्स्वश् चेति वा द्वितयमेव वस्तुतस् स्थानम् बोद्ध्यम्। अत्र च ऋकारघटकस्वरस्य अकारात्मकत्वस्य निरूपितत्वाद् ऋकारस्य स्थानञ् कण्ठो बर्स्वश् चेति वा कण्ठो मूर्धा चेति वेत्त्येतद् द्वितयमपि भवितुमर्हति। किन् तु "कवर्गावर्णानुस्स्वारजिह्वामूलीया जिह्व्या एकेषाम्"[9] इति आपिशलिवचनाद् अकारस्स्याऽपि जिह्वामूलीयत्वमिति रेफभागोच्चारणाय जिह्वाग्रे व्यापृते जिह्वामूलमपि कियताऽप्यंशेन व्याप्रियते इति, एवञ् च जिह्वामूलेनापि ऋकारप्रकृतिभूतो वायुः प्रतिहन्यते इति च ऋकारस्य अकारघटितत्वेऽपि जिह्वामूलस्थानकत्वमप्युपपद्द्यत एवेति विवेक्तव्यम्। बर्स्वमूर्द्ध्नोर् मद्ध्ये च ऋकारस्य मूर्धैव स्स्थानम् प्राचीनतमार्याणाम् उच्चारणे इति विज्ज्ञायते; यतो हि ऋकारस्य मूर्धन्यतायाः परभावस् तदुत्तरवर्तिनि सकारे नकारे च दृश्यते[10]। यद्द्यपि इ–उ–ए–ओ–ऐ–औ–वर्णानामपि सुपस् सकारस्य मूर्धन्यतापत्तौ निमित्तत्वन् दृश्यते[11] इति मूर्धन्यत्वम्

---

१. सू ३३। २. स्थानप्रकरणे, सू. ८। ३. चतुर्दशेऽद्ध्याये पृ. २३०। ४. तत्रैव, श्लो. १३। ५. श्लो. १७। ६. पृ. १३। ७. श्लो. ११ (शि. स., पृ. १६५)। ८. सू. ६। ९. स्थानप्रकरणे, सू. ५। १०. अष्टा. ८।४।१; ८।३।८४। ११. तत्रैव ८।३।५७।

मूर्धन्न्यतापत्तिनिमित्ततायामनैकान्तिकन् तथापि अत्तर ऋकारस्स्य मूर्धन्न्यताया अपि प्राचीनैरुक्तत्वमपि अवष्टम्भकवँ् वर्तते।

लृकारस्स्य जिह्वामूलस्स्थानकताया वर्स्वस्स्थानकताया वा प्रतिपादकानावँ् वचनानि अत्तरैवाऽनुपदम् प्रदर्शितान्न्येव। लृकारस्स्य दन्तस्स्थानकताया× प्रतिपादकानावँ् वचनानि अपि बहून्न्येवोपलब्ध्यन्ते। तथाहि "लृलसिता दन्ते"[1] इति शुक्लयजुर्वेदप्रातिशाक्ख्ये, "लृतुलसा दन्त्याः"[2] इत्त्यापिशलिशिक्क्षासूत्तरे, एवमेव पाणिनीयशिक्क्षासूत्तरेऽपि। भरतनाट्ट्यशास्त्तरेऽपि "लृतुलसा दन्त्याः"[3] इति "दन्त्या लृलसाः"[4] इति "लृलृ दन्त्यौ"[5] इति च। पाणिनीयशिक्क्षायाञ् च "दन्त्या लृतुलसास् स्मृताः"[6] इति। चारायणीयशिक्क्षायाञ् च— "दन्त्या लृतुलसास् स्मृताः" इति, "लृवर्णश् च तवर्गश् च लसकारौ तथैव च। अष्टौ दन्त्या× परिज्ज्ञेया दन्तमूलसमुद्भवाः"[7] इति च। शौनकशिक्क्षायामपि—"दन्त्या लृतुलसा× प्रोक्ताः"[8] इति। चान्द्रवर्णसूत्तरेऽपि—"दन्ता लृतुलसानाम्"[9] इति। षोडशश्श्लोक्क्याशिक्क्षायाञ् च "स्लृतुला दन्तम्"[10] इति। अत्तरेदमपि विचार्यम्— येन खलु शुक्लयजुर्वेदप्रातिशाक्ख्यकारेण ऋकारे स्वरभागस्स्य प्राधान्न्यं स्वीकृत्त्य ऋकारस्स्य जिह्वामूलं स्थानमुक्तम्, तेनैव लृकारे लकारभागस्स्य प्राधान्न्यं स्वीकृत्त्य लृकारस्स्य दन्तास् स्थानमुक्तमिति लृकारे ऋकारापेक्क्षया व्यञ्जनभागस्स्योत्कटतरत्त्वं स्वीकर्तव्यम् प्रतीयते। उच्चारणेऽपि ऋकारस्स्य अस्स्पृष्टतयैवोच्चारणङ् कर्तुं शक्क्यते, लृकारस्स्य तु न तथेति लृकारस्स्येमवँ् विशेषवँ् विचार्यैव कात्त्यायनमुनिना ऋकारल्कारयोस् स्थाननिरूपणे दृष्टिभेदस् स्वीकृतस् स्यात्॥८–९॥

एकारस्स्य स्स्थानमाहु× केचित् कण्ठञ् च तालु च।
केचित् ताल्वेवेति तत्तर कार्यवँ् विज्ज्ञैर् विवेचनम्॥१०॥

तथाहि ऋग्वेदप्रातिशाक्ख्ये— "सन्ध्यानि सन्ध्यक्क्षराण्याहुरेके द्विस्स्थानतैतेषु तथोभयेषु। सन्ध्येष्ष्वकारोऽर्धमिकार उत्तरयँ् युजो-

---

१. १।६९। २. स्थानप्रकरणे, सू. १२। ३. चतुर्दशेऽद्ध्याये, पृ. २३०। ४. तत्तरैव, श्लो. १३। ५. तत्तरैव, पृ. २३०। ६. श्लो. १७। ७. पृ. १३। ८. श्लो. १५। ९. सू. ७। १०. श्लो. ११(शि.स., पृ. १६५)।

रुकार इति शाकटायनः"[1] इति एकारस्याऽपि द्विस्थानकत्त्व शाकटायनादिसम्मततया सूचितम्। आपिशलिशिक्षासूत्रेऽपि "एदैतौ कण्ठतालव्यौ"[2] इति। एवमेव पाणिनीयशिक्षासूत्रेऽपि। "एच इग् ह्रस्वादेशे"[3] इति सूत्रङ्कुर्वतः पाणिनेरपि एकारस्यापि द्विस्थानकत्त्वं सम्मतवँ विज्ञायते। भरतनाट्यशास्त्रेऽपि—"एऐ कण्ठतालव्यौ"[4] इति, "एऐकारौ च कण्ठतालव्यौ"[5] इति च। चान्द्रवर्णसूत्रे तु इकारस्याऽपि कण्ठतालुकं स्थानमुक्तमिति तद्वचनञ् चिन्त्यमेव, तथापि तत्राऽपि "कण्ठतालुकमिदेदैताम्"[6] इत्युक्तमस्ति। शैशिरीयशिक्षायाञ् च— "एऐ तु कण्ठतालव्यौ"[7] इति। एवमेव पाणिनीयशिक्षायामपि[8]। तथैव शौनकशिक्षायाञ् च[9]। चारायणीयशिक्षायाञ् च— "कण्ठ्यतालव्यकण्ठ्योष्ठ्यास् सन्धिवर्णाः प्रकीर्तिताः"[10] इति। षोडशश्लोक्यां शिक्षायामपि— "एदैतोः कण्ठतालुकम्"[11] इति। एतानि खलु एकारस्य कण्ठतालुस्थानकतायाः प्रतिपादकानावँ वचनानि। एकारस्य तालुस्थानकतायाः प्रतिपादकानि वचनानि अपि बहूनि उपलभ्यन्ते। तथाहि "तालव्यावेकारचकारवर्गाविकारैकारौ यकारश् शकारः"[12] इति ऋग्वेदप्रातिशाख्ये, "इचशेयास् तालौ"[13] इति शुक्लयजुर्वेदप्रातिशाख्ये; "तालौ जिह्वामध्यमिवर्णे, एकारे च"[14] इति कृष्णयजुर्वेदप्रातिशाख्ये; "तालुनि श्च्ये"[15] इति ऋक्तन्त्रे। शौनकीयचतुरध्यायिकायामपि "सन्ध्यक्षराणि सँस्पृष्टवर्णान्न्येकवर्णवद् वृत्तिः, नैकारौकारयोस् स्थानविधौ"[16] इत्युक्त्वा एकारस्य ओकारस्य च एकस्थानकत्त्वं सूचितन् दृश्यते। "नव तालव्या इवर्णचवर्गशकारैकारयकाराः"[17] इति याज्ञवल्क्यशिक्षायाम्। पाणिनीयव्याकरणवार्त्तिकेऽपि "सिद्धमेऽस् सस्थानत्वाद्"[18] इति; तद्भाष्ये च "सिद्धमेतत्। कथम्।

---

१. १३।३८, ३९। २. स्थानप्रकरणे, सू. १७।
३. अष्टा. १।१४८। ४. चतुर्दशेऽध्याये, पृ. २३०।
५. तत्रैव, श्लो. १४। ६. सू. ४। ७. श्लो. २०।
८. श्लो. १८। ९. श्लो. १६। १०. पृ. १३।
११. श्लो. १२ (शि. स., पृ. १६५)। १२. १।४२।
१३. १।६६। १४. तै. प्रा. २।२२, २३। १५. २।१।५।
१६. १।४०, ४१। १७. शि. स., पृ. ३३।
१८. पा. व्या. भा. १।१।४८, वा. ३।

एङस् सस्स्थानत्वादिकारोकारौ भविष्यतः"[1] इति । वर्णपटलेऽपि— "ताल्वे-य-श-चवर्गाणामिकारस्स्य च भाष्यते"[2] इति । अत्तरेदवँ विचार्यम्— यद्द्यपि ऋग्वेदप्रातिशाख्ये एकारादेर् द्विस्स्थानकतायाः परकीयमतत्वेनोल्लेखः कृतः, स्वमते च न केवलम् एकारस्स्य ओकारस्स्य चैव किन् तु ऐकारस्स्य औकारस्स्य च एकस्स्थानकत्वमेव प्रतिपादितम्; तथापि ऐकारस्स्य औकारस्स्य च द्विस्स्थानकतायास् तत्प्रातिशाख्यकारवँ विहायाऽन्येषां सर्वेषां सम्मतत्वाद् ऐकारतुल्यतया एकारस्स्य एकस्स्थानकतायाः प्रतिपादकम् ऋग्वेदप्रातिशाख्यवचनञ् चिन्त्यमेव प्रतिभाति । अस्माकम् मनसि तु ऋग्वेदप्रातिशाख्यकारेण यथा ऋकारस्स्य वस्तुतो द्विस्स्थानकस्स्याऽपि तदीयोत्कटतरांशमेवोपादाय एकस्स्थानकतया प्रतिपादनङ् कृतम्, यथा वा ऐकारस्स्य वस्तुतो द्विस्स्थानकस्स्यापि तस्स्योत्तरभूयस्त्वादिकारांशस्स्योत्कटतया तमेवांशमादाय एकस्स्थानकत्वम् प्रतिपादितन् तथैव एकारस्स्यापि वस्तुतो द्विस्स्थानकस्स्याऽपि सत एकस्स्थानकत्वम् प्रतिपादितं स्यादिति । अस्स्य प्रातिशाख्यस्स्य मुख्यतया शैशिरीयशाखाविषयकत्वाच्[3] शैशिरीयशिक्षाया "एऐ तु कण्ठतालव्यौ"[4] इति वचनमपि आस्माकीनस्स्योक्तस्स्य विचारस्स्य उपोद्बलकमस्ति । शौनकशिक्षायामपि— "एऐ तु कण्ठतालव्यौ"[5] इत्त्येव पठ्यते इत्त्यप्यत्तर न विस्स्मरणीयम् । एवमेव शुक्लयजुर्वेदप्रातिशाख्यकारेण कृष्णयजुर्वेदप्रातिशाख्यकारेण सामवेदप्रातिशाख्यकारेण च ऋकारस्स्य द्विस्स्थानकस्स्याऽपि प्रधानांशमेवादायैकस्स्थानकतायाः प्रतिपादितत्वाद् एकारस्स्य औकारस्स्याऽपि तथैवैकस्स्थानकत्वमुक्तं स्यादित्त्यपि वक्तुं शक्यते । यद्द्यपि याज्ञवल्क्यशिक्षायामपि एकारस्स्य तालुस्स्थानकत्वमेवोक्तम्, तथापि तत्तर "आद्द्या मात्तरा तु कण्ठ्यस्स्य एकारौकारयोर् भवेत् । तालव्यस्स्य तथौष्ठ्यस्स्य द्वितीया च यथाक्रमात्"[6] इति चोक्तम्; वर्णरत्नप्रदीपिकायाञ् च— "पूर्वा मात्तरा तु कण्ठ्यस्स्य एकारौकारयोर् भवेत् । तालव्यस्स्य तथौष्ठ्यस्स्य परा प्रोक्ता यथाक्रमम् ॥ ऐकारौकारयोश् चैवन् तत्त्वञ् ज्ञेयवँ विचक्षणैः । एऐतु कण्ठ्यतालव्यौ ओऔ कण्ठोष्ठजौ

---

१. पा.व्या.भा. १।१।४८, वा. ३ । २. अथर्वप. ४७।२।१ ।
३. ऋ. प्रा. वर्गद्द्वये श्लो. ७ । ४. श्लो. २० ।
५. श्लो. १६ । ६. श्लो. २१५ (शि. स., पृ. ३३) ।

स्मृतौ"[१] इत्युक्तम्। एतदपि अस्मदीयस्य व्याख्यानस्य परिपोषकमेव। तथैव व्यासशिक्षायामपि— "अव्यञ्जनस्वराणाञ्च आदौ कण्ठ इतीरितः। ओष्ठताल्ववर्णेवर्णे व्यस्तसंवृतमित्यपि। औतिचोष्ठौ स्त ओत्यल्पाधिकावेत्योष्ठतालु च"[२] इत्युक्तम्। तद्व्याख्यायां वेदतैजसकारेण च "ओतीति। ओकारे कार्ये ओष्ठौ अल्पाधिकौ संवृतविवृतौ स्तः। एतीति। एकारे कार्ये ओष्ठताल्वल्पाधिकं स्यात्। सान्निध्यादोष्ठस्य संवृतताया उक्ततत्वादनयोरेकारौकारयोरादावकारः पादमात्र इत्युच्यते। तच्छेषयोरिकारोकारयोर्विवृततत्वमित्युच्यते उच्चारणवशात्"[३] इत्युक्तम्। कालनिर्णयशिक्षायाञ्च—"एकारौकारयोरादावकारोऽप्येकमात्रिकः। इवर्णोवर्णयोश्शेषौ भवेतामथ मात्रिकौ"[४] इत्युक्तम्। एतदपि कृष्णयजुर्वेदतैत्तिरीयशाखायामपि एकारस्याऽपि द्विस्थानकतायास् सम्प्रदायप्राप्ततत्वस्योपोद्बलकमेव। एवञ्च मूलरूपे एकारस्यापि द्विस्थानकत्वमेव; भ्रंशयति तु युगे कथञ्चन तस्यैकस्थानकत्वम् प्राप्तम्; तदेव च पाणिनीयव्याकरणवार्तिककारभाष्यकाराभ्याम् प्रोक्तमिति प्रतीयते। पाणिनिनाऽपि "एचोऽप्रगृह्यस्यादूराद्धूते पूर्वस्यार्धस्याऽदुत्तरस्येदुतौ"[५] इति सूत्रञ्च कुर्वता एकारौकारयोः प्लुतत्वे कुत्र चिदेव द्विस्वरताऽनूवाख्याताऽनूनयत्रैकस्वरतैवाऽनुमतेति चाऽत्र स्मर्तव्यम् ॥१०॥

एकारस्य तु कण्ठश्च तालु चेति स्फुटन् द्वयम्।
स्थानवं वदन्ति सर्वेऽपि एकमत्येन शिक्षकाः ॥११॥

यद्यपि पूर्वोद्धृते ऋग्वेदप्रातिशाख्यवचने एकारस्यापि तालुस्थानकत्वमुक्तम्, तथापि तत् सर्वथैवानुपपद्यमानत्वादनूनयथा नेयमेवेति तावं विमतिमवधीर्य्येदम् प्रोक्तम् बोद्धव्यम्। एकारस्य कण्ठतालुस्थानकतायाः प्रतिपादकानि वचनानि च यथा—"सन्ध्यानि सन्ध्यक्षराण्याहुरेके द्विस्थानतैतेषु तथोभयेषु। सन्ध्येष्वकारोऽर्धमिकार उत्तरयं युजोरुकार इति शाकटायनः"[६] इति ऋग्वेदप्रातिशाख्ये। "एकारौकारयोः कण्ठ्या पूर्वा मात्रा तालव्योष्ठ्योरुत्तरा"[३] इति शुक्लयजुर्वेदप्रातिशाख्ये; "अकारार्धमैकारौकारयोरादिः,

---

१. श्लो. ३५-३६ (शि. स., पृ. १२०)। २. सू. ३९८-४००। ३. पृ. १५५ (सू. ४००)। ४. श्लो. १२। ५. अष्टा. ८।२।१०७। ६. १३।३८, ३९। ७. १।७३।

सर्वं वृतकरणतरमेकेषाम्, इकारोऽद्ध्यर्धX पूर्वस्य शेष उकारस् तूत्तरस्य"[1] इत्युक्त्वा ऐकारस्य कण्ठतालुस्थानकत्वञ्च कृष्णयजुर्वेदप्रातिशाख्येऽपि सूचितमेव । शौनकीयचतुरद्ध्यायिकायामपि—"सन्ध्यक्षराणि सँस्पृष्टवर्णान्न्येकवर्णवद्वृत्तिः, नैकारौकारयोस् स्थानविधौ"[2] इत्युक्त्वा ऐकारस्य औकारस्य च द्विस्थानकत्वम् पारिशेष्यन्यायेन बोधितम् । आपिशलिशिक्षासूत्रेऽपि— "एदैतौ कण्ठतालव्यौ"[3] इति । एवमेव पाणिनीयशिक्षासूत्रेऽपि । भरतनाट्यशास्त्रे च—"एऐ कण्ठतालव्यौ"[4] इति "एऐकारौ च कण्ठतालव्यौ"[5] इति च । शैशिरीयशिक्षायामपि—"एऐ तु कण्ठतालव्यौ"[6] इति; एवमेव शौनकशिक्षायामपि[7] । पाणिनीयशिक्षायामप्येवमेव[8] । याज्ञवल्क्यशिक्षायामपि—"आद्द्वा मात्रा तु कण्ठ्यस्य ऐकारौकारयोर् भवेत् । तालव्यस्य तथौष्ठ्यस्य द्वितीया च यथाक्रमम्"[9] इति पाठस् सम्भाव्यते । वर्णरत्नप्रदीपिकायान् तु—"पूर्वा मात्रा तु कण्ठ्यस्य एकारौकारयोर् भवेत् । तालव्यस्य तथौष्ठ्यस्य परा प्रोक्ता यथाक्रमम् ॥ ऐकारौकारयोश् चैवन् तत्वन् ज्ञेयवँ विचक्षणैः । एऐ तु कण्ठ्यतालव्यौ ओऔ कण्ठोष्ठजौ स्मृतौ"[10] इति स्स्फुटमेवोक्तम् । चारायणीयशिक्षायाञ् च— 'कण्ठ्यतालव्यकण्ठ्योष्ठ्यास् सन्धिवर्णाX प्रकीर्तिताः"[11] इति । कालनिर्णयशिक्षायाञ् च—"ऐकारौकारयोरादावकारोऽप्यर्धमात्रिकः । इवर्णोवर्णयोश् शेषौ स्यातामद्ध्यर्धमात्रकौ"[12] इति । वर्णपटले च— "अतस् स्थानानि वर्णानाञ्च कण्ठोऽवर्णहकारयोः । विसर्जनीय ऐ औ च स्वाद्द्वयोर् मात्रयोस् स्मृतः । शेषस् ताल्वोष्ठयोर् बोद्ध्यस् स यथासङ्ख्यमिष्यते"[13] इति ॥११॥

ओकारस्स्य स्स्थानमाहुः कण्ठमोष्ठौ च केचन ।
ओष्ठावेवेति केचित् तु विचार्यमिह शिक्षकैः ॥१२॥

ओकारस्स्य कण्ठोष्ठस्स्थानकतायाX प्रतिपादकानि वचनानि यथा—

---

१. तै. प्रा. २।२६–२९ । १. १।४०, ४१ ।
३. स्थानप्रकरणे सू. १७ । ४. चतुर्दशेऽद्ध्याये, पृ. २३० ।
५. तत्रैव, श्लो. १४ । ६. श्लो. २० । ७. श्लो. १६ ।
८. श्लो. १८ । ९. या. शि. शि. व. वि., पृ. ९० ।
१०. श्लो. ३५–३६ (पृ. १२०) ११. पृ. १३ । १२. श्लो. १२ ।
१३. अथर्वपरि. ४७।१।१८–१९ ।

"सन्ध्यानि सन्ध्यक्षराण्याहुरेके द्विस्थानतैतेषु तथोभयेषु । सन्ध्येष्वकारोऽर्धमिकार उत्तरयँ युजोरुकार इति शाकटायनः"[१] इति ऋग्वेदप्रातिशाख्ये । आपिशलिशिक्षासूत्रेऽपि— "ओदौतौ कण्ठोष्ठ्यौ"[२] इति। एवमेव पाणिनीयशिक्षासूत्रेऽपि । "एच इग्घ्रस्स्वाऽऽदेशे"[३] इति सूत्रङ्ग कृतवतऽ पाणिनेरपि ओकारस्स्यापि द्विस्थानकत्वं सम्मतवँ विज्ज्ञायते । भरतनाट्यशास्त्रेऽपि— "ओऔ कण्ठ्यौष्ठ्यौ"[४] इति उक्तमस्ति । चान्द्रवर्णसूत्रे तु उकारस्स्याऽपि द्विस्थानकत्वमुक्तमिति तद्वचनन् चिन्त्यमेव; यथैव व्यासशिक्षायाम्—"अव्व्यञ्जनस्स्वराणाञ् च आदौ कण्ठ इतीरितः"[५] इति सामान्यतया सर्वेषामेव स्स्वराणां शुद्धानाङ्ग केनाऽपि रूपेण कियताऽप्यंशेन कण्ठ्यत्वमपीति प्रोक्तन् तथैव चान्द्रवर्णसूत्रस्स्याऽपि तात्पर्यङ्ग कल्प्यन् चेत् तदा चान्द्रवर्णसूत्रेण ऐकारौकारयोर् द्विस्स्वरकता सन्ध्यस्स्वरता वा न सम्म्यक् प्रतिपादिता स्स्यात्; तथापि तत्रापि "कण्ठोष्ठमुदोदौताम्"[६] इत्युक्तमस्ति । शैशिरीयशिक्षायामपि— "ओऔ कण्ठोष्ठजौ स्मृतौ"[७] इति । एवमेव शौनकशिक्षायाम्[८] पाणिनीयशिक्षायाञ्[९] च । षोडशश्लोक्यां शिक्षायामपि "ओदौतोरपि कण्ठोष्ठम्"[१०] इति । ओकारस्स्य ओष्ठस्स्थानकतायाऽ प्रतिपादकानि वचनानि च यथा—"शेष ओष्ठ्योऽपवाद्द्च नासिक्यान्"[११] इति ऋग्वेदप्रातिशाख्ये, "उवोपोपद्ध्मा (उवोऽपपा) ओष्ट्ठे"[१२] इति शुक्लयजुर्वेदप्रातिशाख्ये । "अवर्णे नात्त्युपसंहृतमोष्ठहनु नातिव्व्यस्तम्, ओकारे च, ओष्ठौ तूपसंहृततरौ"[१३] इत्युक्त्वा तैत्तिरीयप्रातिशाख्येऽपि ओकारस्स्य ओष्ठ्यत्वं सूचितवँ विज्ज्ञायते । "ओष्ठे वोऽ पू"[१४] इति ऋक्तन्त्रेऽपि । शौनकीयचतुरद्ध्यायिकायामपि— "सन्ध्यक्षराणि सँस्स्पृष्टवर्णान्न्येकवर्णवद् वृत्तिः, नैकारौकारयोस्स्थानविधौ"[१५] इत्युक्त्वा एकारस्स्य ओकारस्स्य चैकस्स्थानकत्वं सूचितमवगम्म्यते । "नव ओष्ठ्या उ ऊ ऊ३ इत्युवर्णः प-फ-ब-भ-म-

---

१. १३।३८, ३९ । २. स्थानप्प्र. सू. १८ ।
३. अष्टा. १।१।४८ । ४. चतुर्दशेऽद्ध्याये, पृ. २३० ।
५. सू. ३९८ । ६. सू. ५ । ७. श्लो. २० । ८. श्लो. १६।
९. श्लो. १८ । १०. श्लो. १२ (शि. स., पृ. १६५) ।
११. १।४७ । १२. १।७० । १३. २।१२–१४ ।
१४. २।१।९ । १५. १।४०, ४१ ।

वकारोपद्ध्मानीया ओकारश् चेति" इति पाठो याज्ञ्ज्ञवल्क्यशिक्षा-कोशेषु क्वचित् प्राप्यते[1] । पाणिनीयव्याकरणवार्तिकेऽपि "सिद्धमेङस्सस्स्थानत्वात्"[2] इति, तद्भाष्ये च—"सिद्धमेतत् । कथम् । एङस्सस्स्थानत्वादिकारोकारौ भविष्यतः"[3] इति । वर्णपटले च—"उवर्णस्त्वोष्ठ्य उच्च्यते । उपद्ध्मानीय ओकारो वऽ प–वर्गस् तथा मताः"[4] इति । अत्तर च ऋग्वेदप्रातिशाक्ख्यादीनामपि वचनैर् यथा ओकारस्स्यापि द्द्विस्स्थानकताया अविरुद्धत्वम् प्रतिपादयितुं शक्यते तथा व्याक्ख्यानङ्ग कृतमेव एकारस्स्यैकस्स्थानकताया विवेचने इति तत् सर्वन् तत एव वेदितव्यम् ।।१२।।

औकारस्स्य तु कण्ठश् च ओष्ठौ चेत्त्युभयं स्फुटम् ।
स्थानवँ् वै सर्वसम्मत्त्या शिक्क्षकैऽ प्रतिपादितम् ।।१३।।

यद्द्यपि "शेष ओष्ठ्योऽग्वाद्द्य नासिक्क्यान्"[5] इति ऋग्वेदप्रातिशाक्ख्यवचनेन औकारस्स्यापि ओष्ठस्स्थानकत्त्वम् प्रतीयते, तथापि तत् सर्वथाऽनुपपद्द्यमानत्त्वादन्यथा नेयमेवेति तावँ् विमतिमवधीर्येदमुक्तम् । औकारस्स्य कण्ठोष्ठस्स्थानकतायाऽ प्रतिपादकानि वचनानि प्प्रायेण ऐकारस्स्य द्द्विस्स्थानकतायाऽ प्रतिपादकानावँ् वचनानाम् प्रदर्शने एव प्प्रदर्शितानि । तत्तराऽप्प्रदर्शितानि वचनानि च एकारस्स्य द्द्विस्स्थानकतायाऽ प्रतिपादकानावँ् वचनानाम् प्रदर्शने एव प्प्रदर्शितानि ।।१३।।

जिह्वामूलङ्ग कवर्गीयवर्णानां स्थानमुच्च्यते ।
कैश् चित् कैश् चित् तु कण्ठो हि तेषाञ् च स्स्थानमुच्च्यते ।।१४।।

कवर्गीयवर्णानाञ् जिह्वामूलस्स्थानकतायाऽ प्रतिपादकानि वचनानि यथा— "ऋकारल्कारावथ षष्ठ ऊष्मा जिह्वामूलीयाऽ प्रथमश् च वर्गः"[6] इति ऋग्वेदप्रातिशाक्ख्ये । 'ऋऽकौ जिह्वामूले"[7] इति शुक्लयजुर्वेदप्रातिशाक्ख्ये । "हनुमूले जिह्वामूलेन कवर्गे स्स्पर्शयति"[8] इति तैत्तिरीयप्रातिशाक्ख्ये । अत्तर यद्द्यपि जिह्वामूलस्स्य करणत्त्वं हनुमूलस्स्य च स्स्थानत्त्वमुक्तन् तथापि अर्थतो नाऽस्ति कोऽपि विशेषः । "जिह्वामूले कृ"[9] इति ऋक्तन्त्रेऽपि । "कवर्गावर्णानुस्स्वारजिह्वामूलीया जिह्व्या एकेषाम्"[10] इति आपिशलिशिक्क्षासूत्त्रेऽपि । एवमेव

---

१. या. शि. शि. व. वि., पृ. १५३ । २. पा. व्या. भा. १।१।४८, वा. ३ । ३. तत्त्रैव भाष्ये । ४. अथर्वपरि. ४७।२।२ । ५. १।४७ । ६. १।४१ । ७ १।६५। ८. २।३५ । ९. २।१।४ । १०. स्थानप्प्र. सू. ५ ।

पाणिनीयशिक्षासूत्रे च। पाणिनीयशिक्षायाम् च— "जिह्वामूले तु कुऽ प्रोक्तः"[1] इति। याज्ञवल्क्यशिक्षायाम् च— "सप्त जिह्वामूलीया ऋ ॠ ऌ ३ इति ऋवर्णः ऽक कखगघङा इति"[2] इति। वर्णरत्नप्रदीपिकायामपि— "ऋवर्णोऽथ कवर्गश् च जिह्वामूलीय एव च। जिह्वामूले भवन्त्येषाम् जिह्वामूलम् च कारणम्"[3] इति। व्यासशिक्षायाम् च– "कवर्गादिषु जिह्वादिमद्ध्यान्तोष्ठेन चोपरि"[4] इति। पारिशिक्षायाम् च– "हनुमूले कवर्गे तु जिह्वामूलेन वै तथा"[5] इति। एते च वचने तैत्तिरीयप्रातिशाख्यवचनव्याख्यानेनैव व्याख्याते भवतः। वर्णपटले च– "जिह्वामूलमृवर्णस्य कवर्गस्य च भाष्यते। यश् चैव जिह्वामूलीय लृवर्णश् चेति च स्स्मृतः"[6] इति। चारायणीयशिक्षायाम् च— "अवर्णश् च कवर्गश् च जिह्वामूलीय इत्यपि। नवैते कीर्तिता वर्णा जिह्वामूलसमुद्भवाः"[7] इति। एतेषु वचनेषु जिह्वामूलत्वेन प्प्रायेण जिह्वामूलसन्निकृष्टऽ कोमलतालुभागो लक्षणयोपात्तऽ प्रतीयते। तैत्तिरीयप्रातिशाख्यादिषु तु हनुमूलत्वेन स भाग उपात्तो विज्ज्ञायते। कवर्गीयवर्णानाङ कण्ठस्स्थानकतायाऽ प्रतिपादकानि वचनानि च यथा— "अकुहविसर्जनीयाऽ कण्ठ्याः"[8] इति आपिशलिशिक्षासूत्रे। एवमेव पाणिनीयशिक्षासूत्रेऽपि। भरतनाट्यशास्त्रे च— "अकुहविसर्जनीयाऽ कण्ठ्याः"[9] इति, "कखगघङाऽ कण्ठस्स्थाः"[10] इति च। चान्द्रवर्णसूत्रे च— "कण्ठोऽकुहविसर्जनीयानाम्"[11] इति। शैशिरीयशिक्षायाम् च– "अकुहाऽ कण्ठजाऽ प्रोक्ताः"[12] इति। एवमेव शौनकशिक्षायामपि[13]। षोडशश्लोक्या शिक्षायाम् च— "हकुविसर्जनीयानां स्यात् कण्ठम् (कण्ठः?)"[14] इति। कण्ठजिह्वामूलयोऽ परस्स्परसमीपवर्तित्वात् सामान्यविशेषरूपत्वाद् वा एकमेव स्स्थानमपि केचित् कण्ठत्वेन केचिच् च जिह्वामूलत्वेन हनुमूलत्वेनैव वाऽपि व्यवहरन्तीति नानयोऽ पक्षयोर् विरोधः। एवमेवाऽभिसन्धाय शब्देन्दुशेखरेऽपि सन्ज्ञाप्रकरणे "अकुहविसर्जनीयानाङ कण्ठः" इत्यत्तर "कण्ठ-

---

१. श्लो. १८। २. या. शि. शि. व. वि., पृ. १५४।
३. श्लो. २७ (शि. स., पृ. ११९)। ४. सू. ४०१। ५. सू. ४२।
६. अथर्वपरि. ४७।१।२०। ७ पृ. १३। ८. स्थानप्प्र. सू. २।
९. चतुर्दशेऽध्याये, पृ. २३०। १०. तत्रैव, श्लो. १२।
११. सू. ३। १२. श्लो. २०। १३. श्लो. १४।
१४. श्लो. ११ (शि. स., पृ. १६५)।

पदङ्ग कण्ठस्स्थान–तत्समीपजिह्वामूलस्स्थानोभयपरम्'' इत्युक्तम् । किन् तु अकारहकारविसर्जनीयानां स्थाने कवर्गीयवर्णानां स्थाने च पार्थक्यं स्फुटमिति तयोर् विवेकेन पृथक्पृथगेव प्रतिपादनयँ युक्ततरमिति चाऽस्माभिस् तथैव कृतवँ वेद्द्यम् ।।१४।।

टवर्गभववर्णानां षकारस्स्याऽपि शिक्षकैः ।
मूर्धा हि सर्वसम्मत्या स्थानं शिक्षासु कीर्तितम् ।।१५।।

चवर्गीयवर्णानां स्थानमिकारस्स्थाननिरूपणप्रसङ्गे एव प्रोक्तमिति अतत्र चवर्गीयवर्णान् परित्यज्य टवर्गीयवर्णानां स्थानम् प्रतिपादितम् बोद्ध्यम् । टवर्गीयवर्णानां षकारस्स्य च स्स्थानस्स्य प्रतिपादकानि वचनानि च यथा— ''मूर्धन्यौ षकारटकारवर्गौ''[१] इति ऋग्वेदप्रातिशाख्ये । ''षटौ मूर्द्धनि''[२] इति शुक्लयजुर्वेदप्रातिशाख्ये । ''जिह्वाग्रेण प्रतिवेष्ट्य मूर्धनि टवर्गे''[३] इति, ''स्पर्शस्स्थानेषूष्माण आनुपूर्व्येण''[४] इति च तैत्तिरीयप्रातिशाख्ये । ''मूर्धनि षटौ''[५] इति ऋक्तन्त्रे । ''ऋटुरषा मूर्धन्याः''[६] इति आपिशलिशिक्षासूत्रे । एवमेव पाणिनीयशिक्षासूत्रेऽपि । भरतनाट्यशास्त्रे च— ''ऋटुरषा मूर्धन्याः''[७] इति, ''टठडढणा मूर्धन्याः''[८] इति, ''ऋटुरषा मूर्द्धनि स्थिता ज्ञेयाः''[९] इति च । ''मूर्धा ऋटुरषाणाम्''[१०] इति चान्द्रवर्णसूत्रेऽपि । पाणिनीयशिक्षायाञ् च— ''स्युर् मूर्धन्या ऋटुरषाः''[११] इति । शैशिरीयशिक्षाया एतद्विषयकवँ वचनलँ लेखकप्रमादादिना यद्द्यपि विलुप्तन् तथापि शौनकशिक्षायाम्— ''मूर्धन्यृटुरषास् स्मृताः''[१२] इति पट्ठ्यत एव । याज्ञवल्क्यशिक्षायाञ् च— ''षण् मूर्धन्याः षकारो टवर्गश् चेति''[१३] इति । वर्णरत्नप्रदीपिकायाञ् च— ''षकारोऽथ टवर्गश् च मूर्धन्याऽ परिकीर्तिताः''[१४] इति । चारायणीयशिक्षायामपि–''मूर्धन्यृटुरषा ज्ञेयाः''[१५] इति । व्यासशिक्षायाञ् च– ''टवर्गे वक्त्रमद्ध्ये ङे जिह्वाग्रेणोपरि स्स्पृशेत्''[१६] इति, ''स्पर्शस्स्थाना य ऊष्मकाः''[१७] इति च । पारिशिक्-

---

१. १।४३ । २. १।६७ । ३. २।३७ । ४. २।४४ ।
५. २।१।६ । ६. स्थानप्र. सू. ८ । ७. चतुर्दशेऽद्ध्याये पृ. २३० । ८. तत्त्रैव, श्लो. १२ । ९. तत्त्रैव, श्लो. १३ ।
१०. सू. ६ । ११. श्लो. १७ । १२. श्लो. १४ ।
१३. शि. स., पृ. ३३ । १४. श्लो. २९ (शि. स., पृ. ११९) ।
१५. पृ. १३ । १६. सू. ४०२ । १७. सू. ४०५ ।

क्षायाञ् च— "प्रतिवेष्ट्य टवर्गे तु जिह्वाग्रेणैव मूर्धनि"[1] इति, "ऊष्माण आनुपूर्व्येण स्पर्शस्थानेषु पञ्च च"[2] इति च। वर्णपटले च— "मूर्धा स्थानं षकारस्य टवर्गस्य तथा मतम्"[3] इति। षोडशश्लोक्यां शिक्क्षायाञ् च— "ऋष्टुर् कम्"[4] इति ॥१५॥

दन्तास् स्थानन् तवर्गीयवर्णानालँ लस्य सस्य च।
कैश् चिदुक्तम् बुधैरन्यैर् दन्तमूलान्न्युदीरितम् ॥१६॥

तथा हि शुक्लयजुर्वेदप्रातिशाख्ये— "लृलसिता दन्ते"[5] इति। ऋक्तन्त्रे च– "दन्ते त्स्लाः"[6] इति। आपिशलिक्क्षासूत्रे च– "लृतुलसा दन्त्याः"[7] इति। एवमेव पाणिनीयशिक्क्षासूत्रेऽपि। भरतनाट्यशास्त्रेऽपि– "लृतुलसा दन्त्याः"[8] इति, "तथदधनाश् चैव दन्तस्थाः"[9] इति, "दन्त्या लृलसाः"[10] इति च। चान्द्रवर्णसूत्रेऽपि— "दन्ता लृतुलसानाम्"[11] इति। शैशिरीयशिक्क्षायामेतद्विषयके ग्रन्थांशे त्रुटितेऽपि शौनकशिक्क्षायान् तु– "दन्त्या लृतुलसाः प्रोक्ताः"[12] इति पठ्यते एव। पाणिनीयशिक्क्षायाञ् च– "दन्त्या लृतुलसास् स्मृताः"[13] इति। याज्ञवल्क्यशिक्क्षायामपि— "अष्टौ दन्त्या लृवर्णलकारसकारतवर्गाः"[14] इति। वर्णरत्नप्रदीपिकायामपि— "लृलसितास् स्मृता दन्त्या जिह्वाग्रकरणा हि ते"[15] इति। वर्णपटले च— "दन्ता लसतवर्गाणाम्"[16] इति। षोडशश्लोक्यां शिक्क्षायाञ् च स्लृतुला दन्तम्"[17] इति। एतानि खलु तवर्गीयवर्णादीनान् दन्तस्थानकतायाः प्रतिपादकानि वचनानि। अथ तेषान् दन्तमूलस्थानकतायाः प्रतिपादकानि वचनानि। "दन्तमूलीयस् तु तकारवर्गः, सकाररेफलकाराश् च"[18] इति ऋग्वेदप्रातिशाख्ये। "जिह्वाग्रेण तवर्गे दन्तमूलेषु"[19] इति, "दन्मूलेषु च लकारे"[20] इति, "स्पर्शस्थानेषूष्माण आनुपूर्व्येण"[21] इति च तैत्तिरीयप्रातिशाख्ये। "दन्तमूलस् तु तवर्गः"[22] इति च पाणिनीयशिक्क्षासू-

---

१ सू. ४५। २. सू. ५०। ३. अथर्ववपरि. ४७।२।१।
४. श्लो ११ (शि. स., पृ. १६५)। ५. १।६९। ६. २।१।७।
७. स्थानप्र. सू. १०। ८. चतुर्दशेऽद्ध्याये पृ. २३०।
९. तत्रैव, श्लो. १२। १०. तत्रैव, श्लो. १३। ११. सू. ७।
१२. श्लो. १५। १३. श्लो. १७। १४. शि. स., पृ. ३३।
१५. श्लो. ३० (शि. स., पृ. ११९)। १६. अथर्ववपरि. ४७।२।२।
१७. श्लो. ११ (शि. स., पृ. १६५)। १८. १।४४, ४५।
१९. २।३८। २०. २।४२। २१. २।४४। २२. स्थानप्र. सू. ११।

त्तरेऽपि । दन्त-दन्तमूलस्स्थानयोस् सामान्यविशेषभावेण समन्वयस् सुकरः। अत एव हि चारायणीयशिक्षायान् दन्तमूलभवत्वे स्वीकृतेऽपि एतेषान् दन्त्यत्वं व्यवहृतम् । तथा हि— "दन्त्या लृतुलसास् स्मृताः" इति, "लृवर्णश् च तवर्गश् च लसकारौ तथैव च । अष्टौ दन्त्याऽ परिज्ञेया दन्तमूलसमुद्भवाः"[1] इति च ॥१६॥

रेफस्स्य दन्तमूलानि स्स्थानङ्ः कैश् चिदुदीरितम् ।
कैश् चिद् बर्स्वम् पुनऽ कैश् चिन् मूर्धा स्स्थानम् मनीषिभिः॥१७॥

रेफस्स्य दन्तमूलस्स्थानकतायाऽ प्रतिपादकानि वचनानि यथा— "दन्तमूलीयस् तु तकारवर्गः, सकार-रेफ-लकाराश् च"[2] इति ऋग्वेद-प्रातिशाख्ये । "रो दन्तमूले"[3] इति शुक्लयजुर्वेदप्रातिशाख्ये । "रो दन्तमूलस्स्थानमेकेषाम्"[4] इति आपिशलिशिक्षासूत्रे । पाणिनीयशिक्षासूत्रेऽपि "रेफो दन्तमूलीय एकेषाम्"[5] इति । "एको दन्तमूलीयो रेफः"[6] इति याज्ञवल्क्यशिक्षायाम् ।"रेफश् च दन्तमूलोत्थो जिह्वाग्रेण विधीयते"[7] इति वर्णरत्नप्रदीपिकायाम् । वर्णपटलेऽपि— "रेफस्स्य दन्तमूलानि"[8] इति । रेफस्स्य बर्स्वस्स्थानकतायाऽ प्रतिपादकानि वचनानि च— "रेफम् बर्स्व्यमेके"[9] इति ऋग्वेदप्रातिशाख्ये; "रेफे जिह्वाग्रमद्ध्येन प्रत्त्यग् दन्तमूलेब्भ्यः"[10] इति तैत्तिरीयप्रातिशाख्ये; "रेफस्स्य दन्तमूलानि प्रत्त्यग् वा तेब्भ्य इष्यते"[11] इति वर्णपटलेऽपि । रेफस्स्य मूर्धस्स्थानकतायाऽ प्रतिपादकानि वचनानि यथा— "ऋटुरषा मूर्धन्न्याः"[12] इति आपिशलिशिक्षासूत्रे; एवमेव पाणिनीयशिक्षासूत्रेऽपि । "ऋटुरषा मूर्धन्न्याः"[13] इति, "ऋटुरषा मूर्द्ध्नि स्स्थिता ज्ञेयाः"[14] इति च भरतनाट्यशास्त्रे । चान्द्रवर्णसूत्रेऽपि" "मूर्धा ऋटुरषाणाम्"[15] इति । शैशिरीयशिक्षायामेतद्विषयकस्स्य ग्रन्थांशस्स्य त्त्रुटितत्वेऽपि शौनकशिक्षायाम्-"मूर्धन्न्यूटुरषास् स्मृताः"[16] इति पठ्यत एव । पाणिनीयशिक्षायाञ् च— "स्युर्

---

१. पृ. १३ । २. १।४४, ४५ । ३. १।६८ ।
४. स्थानप्प्र. सू. ९ । ५. स्थानप्प्र. सू. १० । ६. शि. स., पृ. ३३ । ७. श्लो. ३० (शि. स., पृ. ११९) ।
८. अथर्वपरि. ४७।२।४ । ९. १।४६ । १०. २।४१ ।
११. अथर्वपरि. ४७।२।४ । १२. स्थानप्प्र. सू. ८ ।
१३. चतुर्दशेऽद्ध्याये, पृ. २३० । १४. तत्तरैव, श्लो. १३ ।
१५. सू. ६ । १६. श्लो. १४ ।

मूर्धन्न्या ऋटुरषाः"[1] इति । चारायणीयशिक्क्षायामपि— "मूर्धन्न्यृटुरषा ज्ञेयाः"[2] इति । वर्णपटले च— "अपर आह– हनुमूले तु रेफस्स्याद् दन्तमूलेषु वा पुनः । प्रत्यग् वा दन्तमूलेभ्यो मूर्धन्न्य इति चापरे"[3] इति । एतेषु वचनेषु ऋग्वेदप्रातिशाख्यवचन–शौनकशिक्क्षावचनयोर् विसर्वादश् चिन्त्यः । एतच् चाऽत्तर विचारणीयम् यद् उक्तेषु स्स्थानेषु मद्ध्ये च रेफस्स्य मूर्धैव स्स्थानम् प्राचीनतमानामार्याणामुच्चारणे इति विज्ञायते । यतो हि रेफस्स्य मूर्धन्न्यतायाः प्रभावो नकारे दृश्यते[4] । यद्द्यपि इ–उ–ए–ओ–ऐ–औ–वर्णानामपि सुपस् सकारस्स्य अन्न्येषाञ् च केषाञ् चन सकाराणाम् मूर्धन्न्यत्वापत्तौ निमित्ततत्वन् दृश्यते[5] इति मूर्धन्न्यत्वम् मूर्धन्न्यत्वापत्तिनिमित्ततायामनैकान्तिकन् तथापि अत्तर रेफस्स्य मूर्धन्न्यताया अपि प्राचीनैराचार्यैः प्रतिपादितत्वमप्यवष्टम्भकम् बोद्ध्यम् ॥१७॥

स्थानं रक्तस्स्वराणाञ् च पञ्चमानान् तथैव च ।
य–ल–वानाञ् च रक्तानान् नासिका च प्प्रकीर्तिता ॥१८॥

अनुनासिकानां स्वराणां स्थानन् नासिका चेति यद्द्यपि प्राचीनेषु ग्रन्थेषु स्फुटन् नोक्तन् तथापि निर्विवादमेवैतद् भवितुमर्हति न्यायसिद्धत्वात् । यत् तु "अननुनासिकानां स्वराणामपि सत्त्वेन, अननुनासिकानाम् यलवानामपि सत्त्वेन च स्वराणामनुनासिकानामपि यलवानाञ् चाऽनुनासिकानामपि च न नासिका स्थानम्"[6] इति केन चिदुक्तम्, तन् न विचारसहम्, यथाऽन्न्येषामनुनासिकानाम् वर्णानान् नासिकाऽपि स्स्थानन् तथाऽनुनासिकानां स्वराणामपि, अनुनासिकानाम् यलवानामपि च नासिकाऽपि स्स्थानमिति स्स्वीकरणे बाधकस्स्याऽभावात् । तुल्ये च नासिकाव्यापारे कुत्तर चिन् नासिकायास् स्थानत्वङ् कुत्तर चित् तु न स्स्थानत्वमिति व्यवस्स्थाया अनुचितत्वाच् च । पाणिनीयव्याकरणप्प्रक्क्रियानिर्वाहाय पाणिनीयव्याकरणे क्वचित् तथा स्वीकर्तुम् यदि आवश्यकम् भवेत् तथापि शिक्क्षाशास्त्रेऽस्स्य पक्क्षस्स्याऽनादरणीयत्वात् । वर्गेषु पञ्चमानाम् वर्णानान् नासिका च स्स्थानमिति तु प्प्राचीनेषु ग्रन्थेषु स्स्फुटमुक्तम् । तथा हि "वर्गेवर्गे च (प्रथमावघोषौ युग्मौ सोष्माणौ) अनुनासिकोऽन्त्यः"[7] इति ऋग्वेदप्रातिशाख्ये

---

१. श्लो. १७ । २. पृ. १३ । ३. अथर्वपरि. ४७।२।५। ४. अष्टा. ८।४।१ । ५. अष्टा. ८।३।५७ । ६. पा. शि. शि. स. स., पृ. १३३ । ७. १।१२–१४ ।

एतत् प्रतिपादितम् । "अनुस्स्वारोत्तमा अनुनासिकाः"[1] इति, "नासिकाविवरणादानुनासिक्यम्"[2] इति च तैत्तिरीयप्रातिशाख्येऽपीदं सूचितम् । ऋक्तन्त्रेऽपि—"स्पर्शे(व)र्गस्य ··· अन्त्योऽनुनासिकः"[3] इति उक्त्वैतत् सूचितम् । आपिशलिशिक्षासूत्रे च—"ञमङणनास् स्वस्स्थाना नासिकास्स्थानाश् च"[4] इति । पाणिनीयशिक्षासूत्रे च— "ङञणनमास् स्वस्स्थाननासिकास्स्थानाः"[5] इति । भरतनाट्यशास्त्रेऽपि—"ङञणनमा अनुनासिकाः"[6] इति, "ङञणनमा नासिकोद्भवा ज्ञेयाः"[7] इति च । पाणिनीयव्याकरणभाष्ये च—"यथा तृतीयास् तथा पञ्चमा आनुनासिक्यवर्जम्, आनुनासिक्यन् तेषामधिको गुणः"[8] इति एष विषय उल्लिखितः । यलवानामनुनासिकत्वमपि— "अन्तस्थासु रेफवर्जम् परासु तान्ताम् पदादिष्वनुनासिकान् तु"[9] इति ऋग्वेदप्रातिशाख्ये । "अन्तस्त्थामन्तस्त्थास्स्वनुनासिकाम् परसस्त्थानाम्"[10] इति शुक्लयजुर्वेदप्रातिशाख्ये । "अन्तस्थापरश् च सवर्णमनुनासिकम्"[11] इति तैत्तिरीयप्रातिशाख्ये । "श्लोः"[12] इति, "रणमपि स्स्थायाम्"[13] इति च ऋक्तन्त्रे । "उभयोर् लकारे लकारोऽनुनासिकः"[14] इति शौनकीयचतुरद्ध्यायिकायाम् । पाणिनीयव्याकरणभाष्ये च—"स्थानी प्रकल्पयेदेतावनुस्स्वारो यथा यणम् । सवँ्वृतस् स्थानी सवँ्वृतौ दीर्घप्लुतौ प्रकल्पयेत् । अनुस्स्वारो यथा यणम् । तद् यथा— सयँ्यन्ता, सवँ्वत्सरः, यलँ्लोकम्, तलँ्लोकम् इति अनुस्स्वारस् स्थानी यणमनुनासिकम् प्रकल्पयति"[15] इति यलवानामनुनासिकत्वम् प्रतिपादितम् । एतेन च तेषां स्थानन् नासिका चेति सुखेन बोद्धुं शक्यते । शैशिरीयशिक्षायाम् च— "चतस्स्रो यादयोऽन्तस्स्था नासिक्या अप्यरेफिकाः"[16] इति । एवमेव शौनकशिक्षायामपि[17] । अनुनासिकवर्णगणना च व्यासशिक्षायाङ्कृता यथा—"विज्ञेया नित्यनासिक्या यमानुस्स्वारपञ्चमाः । अजन्तस्था हकारश् च निमित्तेन तु कीर्तिताः"[18] इति । सर्वसम्मत-

---

१. २।३०। २. २।५२। ३. २।२।३–७।
४. स्थानप्र. सू. १९। ५. स्थानप्र. सू. २१।
६. चतुर्दशेऽद्ध्याये, पृ. २३०। ७. तत्तैव, श्लो. १५।
८. पा. व्या. भा. १।१।९। ९. ४।७। १०. ४।१०।
११. ५।२८। १२. ४।४।९। १३. ४।४।११।
१४. २।३५। १५. अ इ उण् इत्यत्तर, वा. ३।
१६. श्लो. १३। १७. श्लो. ८। १८. सू. ४१३–४१४।

शिक्क्षायामपि— "नित्त्या भवन्ति नासिक्क्या अनुस्स्वारोत्तमा यमाः। अन्तस्थाश् च हकारश् च स्वराश् चैव निमित्ततः"[1] इति ॥१८॥

वर्णस्योच्चारणे वायुर् नासिकाविवरे अपि।
कुरुते विवृते चेत् स्यात् तदा वर्णोऽनुनासिकः ॥१९॥

रक्तस्स्वरादीनां स्थानत्त्वेन या नासिकोक्ता सा न प्रसिद्धा नासिका किन् त्वन्न्यैवेति पक्क्षः "अन्न्ये मन्न्यन्ते— न चेयन् नासिका। किन् तर्हि? अन्तरास्स्येऽस्ति चर्मपुटकमिति पणवचर्मवत् विततमिति। तत्सम्बद्धा च रेखा नासिका, सा वायुनाऽभिहन्न्यमाना श्रुतिविशेषे निमित्तम् भवतीति"[2] इति भर्तृहरिणा भाष्ष्यटीकायाम् प्रदर्शितः, स एव न्यासकारादिभिरनूदितश् च। किन् तु "नासिकाविवरणादानुनासिक्क्यम्"[3] इति तैत्तिरीयप्रातिशाक्ख्यवचनात्, तद्व्याक्ख्यानेब्भ्यः, नासिकाया आस्स्याद् बाह्य्यत्त्वेन "तुल्ल्यास्स्यप्रयत्नं सवर्णम्"[4] इति सूत्त्रेण वर्गस्स्थानामाद्द्यानाञ् चतुर्णावँ वर्णानां स्वस्स्ववर्गपञ्चमेन वर्णेन सह सवर्णसञ्ज्ञाया विहितत्त्वेन भाष्ष्यकारेण व्याक्ख्यातत्त्वाच्[5] च लौकिकी नासिका एव नासिकाशब्देन ग्राह्य्येति विज्ञ्ज्ञायते। "अन्न्ये मन्न्यन्ते" इत्त्युक्त्वा हि भर्तृहरिणा पूर्वोक्तः[4] पक्क्ष उपस्स्थापित इति भर्तृहरेरपि तत्त्राऽरुचिस् स्फुटा। तत्त्राऽनुनासिकवर्णोच्चारणे अननुनासिकवर्णोच्चारणे च नासिकाविवरयोरङ्गुष्ठतर्जनीप्रान्ताब्भ्याम् पिधाने कृते सति अनुनासिकवर्णोच्चारणे नासिकामार्गेण निर्गच्छता वायुना विहितस्स्य नासिकापुटयोः कम्पस्स्य विशेषतयाऽनुभवोऽपि सुकर एवेति च लौकिकी नासिका एवाऽत्त्र नासिकाशब्देन गाह्य्येत्त्येव निर्णयः ॥१९॥

स्थानवँ विसर्गस्स्य कण्ठमाहुः केचिदुरोऽपि वा।
स्वपूर्वस्स्थस्स्वरस्स्थानञ् चाऽस्स्य स्स्थानङ् क्वचित् तस्मृतम्॥२०॥

तथाहि ऋग्वेदप्रातिशाक्ख्ये—"कण्ठ्योऽकारः, प्रथमपञ्चमौ च द्द्वा ऊष्मणाम्, केचिदेता उरस्स्यौ"[6] इति। शुक्लयजुर्वेदप्रातिशाक्ख्येऽपि— "अहविसर्ज्जनीयाः कण्ठे"[7] इति। तैत्तिरीयप्रातिशाक्ख्येऽपि—"कण्ठस्स्थानौ हकारविसर्ज्जनीयौ"[8] इति, "पूर्वान्तसस्स्थानो

---

१. सू. ३।५४–५५ (श्लो. ७९)। २. पा. व्या. भा. दी. १।१।८ (पृ. १६५)। ३. २।५२। ४. अष्टा. १।१।९। ५. पा. व्या. भा. १।१।९। ६. १।३८–४०। ७. १।७१। ८. २।४६।

विसर्जनीय (एकेषाम्)"[1] इति च। ऋक्तन्त्रे च—"हाःकण्ठे"[2] इति, "उरसि विसर्जनीयो वा"[3] इति च। आपिशलिशिक्षासूत्रे च—"अकुहविसर्जनीयाः कण्ठ्याः, हविसर्जनीयावुरस्स्यावेकेषाम्"[4] इति। एवमेव पाणिनीयशिक्षासूत्रेऽपि। भरतनाट्यशास्त्रे च—"अकुहविसर्जनीयाः कण्ठ्याः"[5] इति, "विसर्जनीय औरस्स्य इत्येके"[6] इति, "कण्ठ्यो विसर्जनीयो जिह्वामूलोद्भवः कखयोः। पफयोरोष्ठस्स्थानो भवेद्"[7] इति च। चान्द्रवर्णसूत्रेऽपि--"कण्ठोऽकुहविसर्जनीयानाम्"[8] इति। शैशिरीयशिक्षायामेतद्विषयस्स्य वचनस्स्य लेखकप्रमादादिना विलुप्तत्वेऽपि, शौनकशिक्षायान् तु—"विसर्गश्चाऽपि कण्ठजः"[9] इति पठ्यत एव। याज्ञवल्क्यशिक्षायाञ्च—"त्रयः कण्ठ्या अवर्णहकारविसर्जनीयाः"[10] इति। व्यासशिक्षायाञ्च—"हकारश्च विसर्गश्च कण्ठस्स्थानावितीरितौ"[11] इति। पारिशिक्षायाञ्च—"कण्ठस् स्थानं स एवाऽत्र करणं हविसर्गयोः"[12] इति। वर्णपटले च—"अतस् स्थानानि वर्णानाञ्च कण्ठोऽवर्णहकारयोः। विसर्जनीय ऐऔ च स्वाद्द्वयोर् मात्रयोस् स्मृतः"[13] इति। षोडशश्लोक्यां शिक्षायाञ्च—"हकुविसर्जनीयानां स्यात् कण्ठ्यम् (कण्ठः)"[14] इति। पाणिनीयशिक्षायान् तु—"अयोगवाहा विज्ञेया आश्रयस्स्थानभागिनः"[15] इति। लघुमाध्यन्दिनीयशिक्षायाञ्च—"अवर्णाच् च ऋकाराच् च विसर्गः कण्ठ्य एव सः। इवर्णाच् च तथोवर्णात् (?) तथा चैकारपूर्वकः। औकारपूर्वकश् (?) चैव तालव्यो भवति ध्रुवम्। एकाराच् च कण्ठतालुर् विसर्गो भवति ध्रुवम्। कण्ठोष्ठ्यस् तु तथौकाराद् विसर्गो भवति ध्रुवम्। देवो वः सविता चाऽत्र हकारसदृशो भवेत्। देवीस् तिस्स्रो विसर्गस् तु हिकारसदृशो भवेत्। आखुस् ते पशुरित्यादौ हुकारसदृशो भवेत्। विसर्गश् चाग्गँ नेरित्यादौ हेकारसदृशो भवेत्। विसर्गो बाह्वोरित्यादौ होकारसदृशो भवेत्। अथ स्स्वैरद्दक्क्वैरित्यादौ हिकारसदृशो

---

१. २।४८। २. २।१।२। ३. २।१।३।
४. स्थानप्र. सू. २, ३। ५. चतुर्दशेऽध्याये, पृ. २३०।
६. तत्रैव। ७. तत्रैव, श्लो. १४–१५। ८. सू. ३।
९. श्लो. १४। १०. शि. स., पृ. ३३। ११. सू. ४०६।
१२. सू. ४३। १३. अथर्वपरि. ४७।१।१८।
१४. श्लो. ११ (शि. स., पृ. १६५)। १५. श्लो. २२।

भवेत् । विसर्गो द्योष्पपितेत्यादौ हुकारसदृशो भवेत् । हकारो नैव मन्तव्य इति शास्त्रव्यवस्थितिः । फणिनिश्श्वाससदृशो विसर्गो भवति दृष्टुवम्"[1] इति, "यथा स्स्फटिकदण्डादिरुपाधिवशतो भवेत् । तद्वदूष्मा प्रयोक्तव्यो हिहुहेहो निदर्शनम् । वसोः पवित्त्रवँ वै तत्त्र ह्युदाहरणमुच्यते"[2] इति च ॥२०॥

विसर्जनीयस्य जिह्वामूलीयत्वङ्गतस्य तु ।
जिह्वामूलं स्थानमिति सर्वे शिक्षाविपश्चितः ॥२१॥

एतद्विषयकाणि वचनानि ऋकारस्स्थाननिरूपणप्रसङ्गे एव प्रदर्शितानि । यद्द्यपि अत्त्र "विसर्जनीयस्य कखोत्तरकत्वङ्गतस्य तु" इति पाठस् सुकरस् तथा च "जिह्वामूलीयस्य जिह्वामूलं स्थानम्" इत्युक्तेर् विसँस्थुलतायाः परिहारोऽपि भवितुं शक्नोति; तथापि माध्यन्दिनीयशाखायाङ्कखोत्तरकस्य विसर्जनीयस्याऽपि जिह्वामूलं स्थानन् न भवतीति रूढिमुपजीव्य इयङ्कारिका विरचितेति बोद्ध्यम् । विसर्जनीयस्योपध्मानीयताम् प्राप्तस्य तु ओष्ठस्स्थानकत्वम् पूर्वमेवोक्तम् ॥२१॥

अनुस्स्वारस्य तु स्स्थानन् नासिकेति प्रकीर्तितम् ।
कण्ठनासा कैश्चिदुक्ता कैश्चित् तु मुखनासिका ॥२२॥
दन्तमूलङ्क्वचिज् जिह्वामूलमुक्तङ्क्वचित् पुनः ।
अनुस्स्वारस्स्थानमतस् सम्यक् चिन्त्यवँ विचक्षणैः ॥२३॥

तथाहि प्राचावँ वचनानि— "शेष ओष्ठ्योऽपवाद्द्य नासिक्यान्, नासिक्ययमानुस्स्वारान्"[3] इति, "अनन्तस्स्थन् तमनुस्स्वारमाहुः, व्याडिर् नासिक्यमनुनासिकवँ वा"[4] इति च ऋग्वेदप्रातिशाख्ये । "यमानुस्स्वारनासिक्यानान् नासिके"[5] इति शुक्लयजुर्वेदप्रातिशाख्ये । "अनुस्स्वारोत्तमा अनुनासिकाः"[6] इति तैत्तिरीयप्रातिशाख्ये । "नासिकायावँ यमानुस्स्वारनासिक्याः"[7] इति ऋक्तन्त्रे । "अनुस्स्वारयमा नासिक्याः, कण्ठनासिक्यमनुस्स्वारमेके"[8] इति, "कवर्गावर्णानुस्स्वारजिह्वामूलीया जिह्व्या एकेषाम्"[9] इति च आपिशलिशिक्षासूत्त्रे । एवमेव पाणिनीयशिक्षासूत्त्रेऽपि । "नासिकाऽनुस्स्वारस्य"[10]

---

१. श्लो. १६–२२ (शि. स., पृ. ११५–११६) । २. श्लो. २६–२७ (शि. स., पृ. ११६) । ३. १।४७, ४८ । ४. १३।३६, ३७ । ५. १।७४ । ६. २।३० । ७. २।२।२ । ८. स्थानप्र. सू. १४, १५ । ९. तत्त्रैव, सू. ५ । १०. सू. ८।

इति चानुद्रवर्णसूत्रे। पाणिनीयशिक्षायाञ्च— "अनुस्स्वारयमानाञ्च नासिका स्थानमुच्यते। अयोगवाहा विज्ञेया आश्रयस्स्थानभागिनः॥ अलावुत्रीणानिर्घोषो दन्तमूल्यस् स्वरानुगः। अनुस्स्वारस् तु कर्तव्यो नित्यं हरोश् शषसेषु च"[1] इति। चारायणीयशिक्षायाञ्च— "यमानुस्स्वारनासिक्या नासामूलसमुद्भवाः"[2] इति। व्यासशिक्षायाञ्च— "विज्ञेया नित्यनासिक्या यमानुस्स्वारपञ्चमाः"[3] इति। सर्वसम्मतशिक्षायाञ्च— "नित्या भवन्ति नासिक्या अनुस्स्वारोत्तमा यमाः"[4] इति। पारिशिक्षायाञ्च— "नासिक्या नासिकास्थाना मुखनासिक्यकाश् च वा"[5] इति। वर्णपटले च—"नासिक्ये नासिका स्स्थानन् तथाऽनुस्स्वार इष्यते"[6] इति। अत्र च कैश् चित् करणस्स्याऽपि स्थानत्वेनैव सङ्ग्रहात्, कैश् चित् 'प्रधानतो व्यपदेशा भवन्ति' इति न्यायेनाऽप्प्रधानस्स्याऽनुल्लेखात्, कैश् चित् तस्स्यैवाऽर्थस्स्य शब्दान्तरेण प्प्रतिपादनाच् च मतभेद इव प्प्रतीयते। एक एवाऽर्थो दन्तमूलशब्देन पाणिनीयशिक्षायामुक्तः, नासामूलशब्देन चारायणीयशिक्षायामुक्तः, जिह्वा(मूल)-शब्देन आपिशलिशिक्षासूत्रे प्रोक्त इति अस्माकम् प्रतिभाति। अनुस्स्वारस्स्य जिह्वव्यत्त्वन् नासामूलीयत्त्वन् दन्तमूल्यत्त्ववँ वाऽपि करणस्स्याऽपि स्थानत्त्वेनोपादानादेवोक्तम् प्रतीयते। इदमेव चाऽनुस्स्वारकरणं शुक्लयजुर्वेदप्रातिशाख्ये "जिह्वामूलीयानुस्स्वारा हनुमूलेन"[7] इति वचनेन प्प्रतिपादितमस्तीति चाऽत्त्र स्स्मरणीयम्॥२२-२३॥

रङ्गवर्णस्स्य च स्स्थानन् नासिकेति प्प्रकीर्तितम्।
नासामूलवँ वाऽपि कैश् चित् कैश् चिदन्यदपि स्स्मृतम्॥२४॥

तथाहि "रङ्गवर्णम् प्रयुञ्जानो नो रसेत् पूर्वमक्षरम्। दीर्घस्स्वरम् प्रयुञ्जीयात् पश्चान् नासिक्यमाचरेत्"[8] इति पाणिनीयशिक्षायां रङ्गस्स्य नासिकास्स्थानत्त्वं सूचितम्। "हृदयादुत्थितं रङ्गङ्गं कांस्येन समसुस्स्वरम्"[9] इत्युक्त्वा शैशिरीयशिक्षायां रङ्गस्स्य उरस्स्यत्त्वमिवोक्तम्। शौनकशिक्षायान् तु "पूर्वस्स्वरश् च नासिक्यस् स च रङ्गश् प्रकीर्तितः"[10] इति रङ्गस्स्य मुखनासिका-

---

१. श्लो. २२, २३। २. पृ. १४। ३. सू. ४१३। ४. श्लो. ७९ (३।५३)। ५. सू. ५४। ६. अथर्वपरि. ४७।२।३। ७. १।८३। ८. श्लो. २७। ९. श्लो. १०६। १०. श्लो. २४।

स्स्थानकत्त्वमास्स्थितम् प्रतीयते। याज्ञवल्क्यशिक्षायाञ् च—"रङ्गे चैव समुत्पन्ने नो ग्रसेत् पूर्वमक्षरम्। स्वरन् दीर्घम् प्रयुञ्जीत पश्चान् नासिक्यमुच्चरेत्"[1] इति, "नस्त उत्पद्द्यते रङ्गः कांस्येन समनिस्स्वनः"[2] इति, "यादृशी रत्नवर्णाभा जपायाऽ कुसुमेऽथवा। तादृशं रञ्जयेद् वर्णम् प्रान्ते नासिक्यमाचरेत्"[3] इति च रङ्गस्स्य नासिकास्स्थानकत्त्वं सूचितम्; "द्विमात्तरो मात्तिरको वाऽपि नासामूलं समाश्रितः। अन्ते प्रयुज्यते रङ्गऽ पञ्चमैस् सर्वनासिकः"[4] इति तु रङ्गस्स्य नासामूलस्स्थानकत्त्वं सूचितम्। अनयोस् च द्वयोस् स्थानयोस् सामान्यविशेषभावात् समन्वयस् सुकरः। अमोघानन्दिन्या शिक्षायाञ् च— "द्विमात्तरो मात्तिरको वापि" इत्यादिकं श्लोकम् पठित्वा[5] नासामूलस्स्थानकत्त्वं रङ्गस्स्य प्रतिपादितम्। चारायणीय-शिक्षायाञ् च— "तस्स्य मात्तरा तु हृदये अणुमात्तरा तु मूर्धनि। नासाग्रे त्वणूनाम् मात्तरा रङ्गस् स परिकीर्तितः"[6] इति रङ्गस्स्थानं सूचितम् प्रतीयते। पारिशिक्षायामपि—"रङ्गे मुखे व्याघ्ररुतोपमं स्याद् मात्तराद्द्वयं हृज्जनितन् त्वनास्स्यम्। एते द्द्विमात्तराश् च सपादमात्तरनासिक्ययुक्ताश् च विवृत्तिपूर्वाः। सपादमात्तरत्तिरतये हृदि स्स्यादेकस् ततो मूर्धनि चार्धमात्तरः। भवेद् विशेषो मुख-नासिके च युक्तेश् च तस्मादपि साऽणुमात्तरः"[7] इति रङ्गस्स्थानं सूचितम्। सर्वलक्षणमञ्जर्याञ् च—"रङ्गप्प्लुते व्याघ्रशब्दऽ पूर्वभागे विधीयते। मात्तराद्द्वयन् तु तत्तरैव तथा निरनुनासिकम्। मूर्धस्स्थाने तृतीयांशऽ कांस्यद्ध्वनिसमस् तथा। कम्पश् श्लिष्टस् तथा चैव मात्तिरकासहितस् तथा। चरमांशस् तु नासिक्ये तथैव च बिलद्द्वये"[8] इति सरङ्गस्स्वरस्स्थानानि प्रतिपादितानि। नारदीय-शिक्षायामपि—"नकारान्ते पदे पूर्वे स्वरे च परतस् स्थिते। अकारं रक्तमित्याहुर् नकारेण तु रज्यते"[9] इत्यादिना रङ्गस्स्योच्चारण-विधिऽ प्रोक्तः; ततश् चाऽर्थाद् रङ्गस्स्य नासिकास्स्थानत्त्वं सिद्ध्यति। "हृदयाद् (हृदः ?) उत्तिष्ठते रङ्गः"[10] इत्यपि तत्तरोक्तम्।

---

१. श्लो. १८९ (शि. स., पृ. २७)। २. श्लो. १९४ (शि. स., पृ. २८)। ३. श्लो. २१६ (शि. स., पृ. ३३)। ४. श्लो. १९१ (शि. स., पृ. २८)। ५. श्लो. ४४ (शि. स., पृ. ९७)। ६. पृ. ३०–३१। ७. सू. १५३–१५७। ८. व्या. शि., पृ. १५९। ९. २।४।५–९। १०. २।४।८।

लोमशीयशिक्षायाम् च— "रङ्गस् तु द्द्विविधो ज्ज्ञेयस् स्वरपरो व्यञ्जनपरः। पारावतसवर्णाभो विहितोऽक्षरचिन्तकैः। तस्य मात्त्रा तु हृदये अणुमात्त्रा तु मूर्धनि। नासाग्रे त्त्वणूनाम् मात्त्रा रङ्गस्य परिकीर्तिता। रङ्गे चैव समुत्पन्ने नो ग्रसेत् पूर्वमक्षरम्। स्वरन् दीर्घम् प्रयुञ्जीत तस्य नासिक्यमुच्चरेत्। द्विमात्त्रो मात्त्रिको वापि नसि मूलं समाश्रितः। अन्ते प्रयुज्यते रङ्गऽ पञ्चमैस् सर्वनासिकः"[1] इत्त्युक्त्वा सरङ्गस्स्वरस्स्य स्स्थानानि सूचितानि। माण्डूक्यां शिक्षायान् तु— "नासादुत्पद्द्यते रङ्गऽ कंसेन समनिस्स्वनः"[2] इति रङ्गस्स्य नासिकास्स्थानकत्त्वम् प्रतिपादितम् ॥२४॥

स्थानन् त्वभिनिधानानाम् प्रकृतिस्स्थानकैस् समम्।
एवमेव द्ध्रुवस्स्यापि स्स्थानमूह्य्यम् मनीषिभिः ॥२५॥

अभिनिधानानां स्थानानि यद्द्यपि प्राचीनैस् स्फुटन् नोक्तानि तथापि तेषां स्वप्प्रकृतिस्स्थानजत्त्वं स्फुटम्। अभिनिधानभावमनुल्लिक्ख्य तत्तद्वर्णद्वित्त्वमेवोल्लिखन्[3] पाणिनिरपि अभिनिधानानान् तत्प्रकृतिसमानस्स्थानकरणकत्त्वम् मन्न्यते इति प्प्रतीयते। अभिनिधानात् परस्स्य ध्रुवस्स्याऽपि स्वाभिनिधानस्स्थानजत्त्वम् बोद्ध्यम्। उक्तं हि ऋग्वेदप्रातिशाक्ख्ये– "नादऽ परोऽभिनिधानाद् ध्रुवन् तत् तत्कालस्स्थानम्"[4] इति; शैशिरीयशिक्षायान् च— "नादस् तु श्श्रूयते घोषाद् विरामाद् द्वित्त्वतस् तथा। अनासिक्योऽथ नासिक्यो जायते वर्णरूपतः"[5] इति ॥२५॥

यमानां नासिका स्स्थानं शिक्षकैऽ प्रतिपादितम्।
प्रकृतिस्स्थानकत्त्वञ् च तेषाङ् कैश् चिदुदीरितम् ॥२६॥

तथा हि ऋग्वेदप्रातिशाक्ख्ये– "शेष ओष्ठ्योऽपवाद्द्य नासिक्यान्, नासिक्ययमानुस्स्वारान्"[6] इति, "यमऽ प्रकृत्त्यैव सदृक्"[7] इति, "अनन्न्यस् तु प्प्रकृतेऽ प्रत्त्ययार्थे"[8] इति च। शुक्लयजुर्वेदप्रातिशाक्ख्ये च— "यमानुस्स्वारनासिक्यानान् नासिके"[9] इति। तैत्तिरीयप्रातिशाक्ख्ये च— "नासिक्या नासिकास्स्थानाः, मुखनासिक्या वा, वर्गवच् चैषु"[10] इति। ऋक्तन्त्रे च— "नासिकायायँ यमाऽनुस्स्वार-

---

१. १।६–९ (शि. स., पृ. ४५६)। २. श्लो. ११३ (शि. स., पृ. ४७३)। ३. अष्टा. ८।४।४६, ४७। ४. ६।३९। ५. श्लो. १०१। ६. १।४७, ४८। ७. ६।३२। ८. ६।३४। ९. १।७४। १०. २।४९–५१।

नासिक्क्याः"[1] इति, "अननत्यानत्यसयँ योगे मद्ध्ये यमऽ पूर्वगुणः"[2] इति च। आपिशलिशिक्क्षासूत्रे च— "अनुस्स्वारयमा नासिक्क्याः"[3] इति, "यमाश् च नासिक्क्यजिह्वामूलीया एकेषाम्"[4] इति च। एवमेव पाणिनीयशिक्क्षासूत्रेऽपि। शैशिरीयशिक्क्षायाम् च— "चत्वारस् तु यमाऽ प्रोक्ता अव्यक्तास् सानुनासिकाः"[5] इति। एवमेव शौनकशिक्क्षायामपि[6]। पाणिनीयशिक्क्षायान् तु— "अनुस्स्वारयमानाम् च नासिकास्स्थानमुच्यते। अयोगवाहा विज्ञेया आश्रयस्स्थानभागिनः"[7] इति। तत्र यमानाम् च स्वाश्रयस्वरसस्स्थानकत्वयँ यत् कैश् चिद् व्याख्यातन् तदनुपपन्नम्, यमानावँ व्यञ्जनवर्णमद्ध्यगतानाम् पूर्वस्स्वराङ्गतत्वे परस्स्वराङ्गतत्वेऽपि व्यहितस्स्वरसस्स्थानकत्वस्याऽपम्भवात्। स्ववर्गीयवर्णाश्रितत्वाद् यमानान् तेषां स्ववर्गीयवर्णसस्स्थानकत्वमेवोचितम्। वर्णरत्नप्रदीपिकायाम् च— "यमानुस्स्वारनासिक्क्या नासामूलभवा दशा(तथा ?)"[8] इति। चारायणीयशिक्क्षायान् तु— "नासामूर्धनि सँस्स्थानऽ प्रथमश् च यमस् स्मृतः। द्वितीयन् तालुजिह्वायान् नासायान् तु विनिर्दिशेत्। तृतीयऽ कर्णदन्तन् च कर्णौ नासाम् च सँस्स्पृशेत्। चतुर्थो हृदयन् नासां **सर्वे कण्ठ्या यमास् स्मृताः**"[9] इति। व्यासशिक्क्षायाम् च— "विज्ञेया नित्त्यनासिक्क्या यमाऽनुस्स्वारपञ्चमाः"[10] इति। शम्भुशिक्क्षायाम् च— "अननत्यम् च भवेत् पूर्वमनत्यम् च परतो यदि। तयोर् मद्ध्ये यमस् तिष्ठन् नासिकास्स्थानमुच्यते"[11] इति। सर्वसम्मतशिक्क्षायाम् च— "नित्त्या भवन्ति नासिक्क्या अनुस्स्वारोत्तमा यमाः"[12] इति। पारिशिक्क्षायाम् च— "नासिक्क्या नासिकास्स्थाना मुखनासिक्क्यकाश् च वा। स्थानयोगे भवत्त्यत्तर वर्गवच् चेति तेषु तु"[13] इति। नारदीयशिक्क्षायान् तु— "अननत्यश् च भवेत् पूर्वो अनत्यश् च परतो यदि। तत्तर मद्ध्ये यमस् तिष्ठेत् सवर्णऽ पूर्ववर्णयोः"[14] इत्युक्त्वा यमानां स्ववर्गीयवर्णतुल्यस्स्थानकरणकत्वं सूचितम्। वर्णपटले च— "नासिक्क्ये नासिका स्थानन् तथाऽनुस्स्वार उच्यते। यमा वर्गोत्तमाश् चाऽपि यथोक्तन् चैव ते मताः"[15]

---

१. २।२।२। २. १।२। ३. स्थानप्र. सू. १६।
४. तत्तरैव सू. १८। ५. श्लो. १२। ६. श्लो. ७।
७. श्लो. २२। ८. श्लो. ३४। ९. पृ. १३। १०. सू. ४१३।
११. श्लो. ४९। १२. श्लो. ७९ (३।५३)। १३. सू. ५४।
१४. २।२।८। १५. अथर्वपरि. ४७।२।३।

इति यमानामपि वर्गोत्तमानामिव स्ववर्गीयवर्णसस्स्थानकत्त्वन् नासिकास्स्थानकत्त्वन् चेति प्प्रतिपादितम् ।।२६।।

स्थानन् नासिक्क्यस्स्य चोक्तन् नासिकेति हि शिक्क्षकैः ।
हकारजत्त्वादस्स्य स्स्याद् हकारस्स्थानताऽपि च ।।२७।।

नासिक्क्यस्स्य नासिकास्स्थानतायाऽ प्रतिपादकानि वचनानि यथा— "शेष ओष्ठ्योऽपवाद्द्च नासिक्क्यान्, नासिक्क्ययमानुस्स्वारान्"[१] इति ऋग्वेदप्रातिशाक्ख्ये । "यमानुस्स्वारनासिक्क्यानान् नासिके"[२] इति शुक्लयजुर्वेदप्रातिशाक्ख्ये । तैत्तिरीयप्रातिशाक्ख्ये च– "नासिक्क्या नासिकास्स्थानाः"[३]इति। ऋक्तन्त्रे च– "नासिकायायँ यमानुस्स्वारनासिक्क्याः"[४] इति । व्यासशिक्क्षायान् च— "विज्ज्ञेया नित्त्यनासिक्क्या यमानुस्स्वारपञ्चमाः । अजन्तस्स्था हकारश् च निमित्तेन तु कीर्तिताः"[५] इति । सर्वसम्मतशिक्क्षायान् च— "नित्त्या भवन्ति नासिक्क्या अनुस्स्वारोत्तमा यमाः । अन्तस्स्थाश् च हकारश् च स्वराश् चैव निमित्ततः"[६] इति, "हकारमौरसवँ विद्द्चादन्तस्स्थासु परासु च । उत्तमेषु परेष्वेवन् नासिक्क्यत्त्वमिहाऽधिकम् ।। नासाब्भ्यान् नोत्सृजेद् वायुमत्त्यन्तं हमसङ्गमे । न वदेदुरसाऽत्त्यन्तमन्तस्स्थाभिश् च सङ्गमे"[७] इति च । शम्भुशिक्क्षायान् तु— "नासिक्क्यत्त्वमुरस्स्यत्त्वम् पञ्चमैर् हस्स्य योगतः । अन्तस्स्थाभिरुरस्स्यत्त्वङ्ग कण्ठ्यत्त्वङ्ग केवलस्स्य तु"[८] इति नासिक्क्यस्य नासिक्क्यत्त्वमुरस्स्यत्त्वन् चोभयमुक्तम् । पारिशिक्क्षायान् च— "हकारान् नणमा यत्तर दृश्श्यन्ते परतस् तदा । नासिक्क्यत्त्वमुरस्स्यत्त्वं हस्स्य तत्तर द्द्विरुच्यते"[९] इति । नासिक्क्यस्स्य रक्तीभूतहकाररूपत्त्वात् तस्स्य हकारस्स्थानकत्त्वमपि न्यायसिद्धमेवेति प्प्रतीयते । अनुपदमुद्धृतैर् व्यासशिक्क्षादिवचनैरपि एतत् प्रतिपादितमेव ।।२७।।

स्वरभक्तेर् ऋकारांशरूपत्त्वस्स्य विनिश्चयात् ।
ऋकारतुल्त्यस्स्थानत्त्वं समुन्नेयवँ विपश्चिता ।।२८।।
लृकारभागरूपायास् स्वरभक्तेस् तथैव च ।
लृकारतुल्त्यस्स्थानत्त्ववँ वेदितव्यं हि शिक्क्षकैः ।।२९।।

स्वरभक्तेरूष्मपराया ऋकारांशरूपत्त्वम् प्रागेव निर्णीतवँ वर्णा-

---

१. १।४७, ४८ । २. १।७४ । ३. २।४९ ।
४. २।२।२ । ५. सू. ४१३–४१४ । ६. श्लो. ७९ (३।५३–५४) ।
७. श्लो. ७४–७६ (३।४५–४८) । ८. श्लो. ५० । ९. सू. १७५ ।

द्ध्याये । ऋकारस्स्थानमप्यस्मिन्नेवाऽद्ध्याये निरूपितम् । एवमेव लृकारभागरूपस्स्वरभक्तेस् सम्बन्धेऽपि वेदितव्यम् ।।२८–२९।।

स्थानन् तु ड़ढ़योर् जिह्वामूलतालुद्द्वयं स्मृतम् ।

आचार्यवेदमित्तरेणेत्याह ऋक्पारषदे मुनिः ।।३०।।

तथा हि "जिह्वामूलन् तालु चाऽऽचार्य आह स्स्थानण् ड़कारस्स्य तु वेदमित्तरः । द्वयोश् चाऽस्स्य स्स्वरयोर् मद्ध्यमेत्त्य सम्पद्द्यते स ड़कारो ड़कारः ।। ढ़कारतामेति स एव चाऽस्स्य ढकारस् सन्नूष्मणा सम्प्रयुक्तः । इड़ा साढ़ा चाऽत्तर निदर्शनानि वीड्वङ्गमित्त्येतदवग्ग्रहेण"[1] इति ऋग्वेदप्रातिशाख्ये शौनकमुनिः ।।३०।।

३. अथ करणाधिकारः

(क) करणपरिभाषा

स्थानेषु वायोराघाते यत् साधकतमम् भवेत् ।

जिह्वामूलादिकन् तद् धि करणम् प्रोच्यते बुधैः ।।३१।।

तैत्तिरीयप्रातिशाख्येऽपि करणपरिभाषाऽस्त्यत एवमेव कृताऽस्ति । तथा हि "स्वराणाय् यत्तरोपसंहारस् तत् त्स्थानम्, यदुपसंहरति तत् करणम्, अन्न्येषान् तु यत्तर स्स्पर्शनन् तत् स्थानम्, येन स्स्पर्शयति तत् करणम्"[2] इति । "इह यत्तर स्स्थाने वर्णा उपलब्ध्यन्ते तत् त्स्थानम्, येन निर्वर्त्यन्ते तत् करणम्"[3] इत्त्यापिशलिशिक्षासूत्तरे । शौनकीयचतुरद्ध्यायिकाया भाष्ये "येनोपक्करम्म्यते तत् करणम्"[4] इति । यद्द्यपि गोपथब्राह्मणे करणपरिभाषा नोक्ता तथापि करणशब्द उक्तेऽर्थे एव तत्तर प्रयुक्तो दृश्यते "नादानुप्रदानकरणौ च द्द्वयस्स्थानं सन्ध्यक्षरमवर्णलेशX कण्ठ्यो यथोक्तशेषः, पूर्वो विवृतकरण स्स्थितश् च द्द्वितीय स्स्पृष्टकरण स्स्थितश् च"[5] इत्त्यत्तर । यद्द्यपि अत्तर करणशब्द आब्भ्यन्तरप्रयत्नार्थक इति केचिन् मन्न्यन्ते, तथापि उक्ते पारिभाषिकेऽर्थे एव करणशब्दोऽत्तर प्रयुक्त इति विवेचकैर् मन्तव्यम् । विवृतकरण इत्त्यस्स्य विवृतं स्थानाद् अपसृतङ्ग करणम् उक्तपरिभाषानुरूपङ्ग कण्ठाधरभागजिह्वामूलादिरूपयँ यस्स्य स इत्त्यर्थः। एवमेवाऽन्न्यत्तराऽपि बोद्ध्यम् । करणशब्दस्स्य आब्भ्यन्तरप्रयत्ने प्रयोगो भाक्त एवेति बृहच्छब्देन्दुशेखरे नागोजिभट्टोऽप्याऽऽह[6] । "तद्-

---

१. १।५१–५२ । २. २।३१–३४ । ३. प्रक्करमम्प्रकरणे सू. ३, ४ । ४. १।१९, २५ । ५. १।१।१७ ।
६. प्रथमभागे, पृ. ४१, ४२ ।

विशेषꣳ करणम्''[1] इति ऋग्वेदप्रातिशाख्यवचनमपि उक्तपारिभाषिक-करणस्यैव प्रतिपादकवेदवचम्। यद्यपि एतत्सूत्रात् पूर्वस्य ''तेषां स्थानम् प्रतिनादात् तदुक्तम्''[2] इति सूत्रस्य एतस्य सूत्रस्य च उव्वटेनाऽन्यथा व्याख्यानङ्कृतम्, तथापि तद्व्याख्यानं सर्वथाऽसङ्गतन् दृश्यते। उक्तयोस् सूत्रयोर् यथार्थवं व्याख्यानन् तु क्रमेण 'तेषां श्वासस्य नादस्य उभयस्य च, प्रतिनादात् अभिघातजध्वनेꣳ कारणात् स्थानम् प्रदेशविशेषस्य स्थानत्वेन व्यवहरणम् भवति, तच्च स्थानम् प्रथमे पटले एव उक्तम् प्रतिपादितम्' इति, 'तस्य स्थानस्य विशेषो विशेषकꣳ पदार्थो जिह्वामूलमध्योपाग्राऽग्रादिꣳ करणम् इत्युच्यते' इति चेति बोद्धव्यम्। एवञ्चाऽत्राऽपि करणशब्द उक्ते पारिभाषिकेऽर्थे एव प्रयुक्त इति वेदितव्यम्। तस्यैव करणस्य विशेषणं स्पृष्टत्वादिकमाबभ्यन्तरप्रयत्नत्वेन व्यवहियते इति नास्त्येव उत्तरग्रन्थेन ग्रन्थान्तरेण वाऽप्येतस्मिन्नर्थे विरोध इति बोद्धव्यम्। ''स्पृष्टङ्करणं स्पर्शानाम्, दुस्स्पृष्टमन्तस्थानाम्, विवृतं स्वरोष्मणाम्, विवृततरम(मा ?)कारैकारौकाराणाम्''[3] इति ऋक्तन्त्रवचनेऽपि पूर्वोक्तमेव व्याख्यानयं योजनीयम्। ''पुराकल्प एतदासीत्— सँस्कारोत्तरकालम् ब्राह्मणा व्याकरणं स्माऽधीयते, तेभ्यस् तत्तत्स्थानकरणनादानुप्रदानज्ञेभ्यो वैदिका शब्दा उपदिश्यन्ते''[4] इति पतञ्जलिमुनिवचनेऽपि करणशब्द उक्तपारिभाषिककरणार्थकतयैव नेतुं सुखेन शक्यते, तत्र नागोजिभट्टादिव्याख्यानस्याऽकिञ्चित्करत्वात्। तत्र करणशब्द उक्तपारिभाषिककरणार्थक एव सन्नपि आस्यप्रयत्नमुपलक्षयितुमपि सुखेन शक्नोति करणस्थितिविशेषस्यैवाऽऽस्यप्रयत्नत्वेन व्यवहियमाणत्वात्। ''किम् पुनरास्ये भवम्। स्थानङ्करणञ्च''[5] इति पतञ्जलिमुनिवचनेऽपि करणशब्द उक्तपारिभाषिककरणार्थक एव, न तर्हि ''प्रयत्नोऽविशेषितो भवति''[6] इति शङ्कैव नोदियात्। ''यदि तर्हि सति भेदे किञ्चित् समानमिति कृत्वा सवर्णसञ्ज्ञा भविष्यति शकारछकारयोर् षकारठकारयोस् सकारथकारयोस् सवर्णसञ्ज्ञा प्राप्नोति, एतेषां हि सर्वमन्यत् समानङ्करणवर्जम्''[7] इत्यत्र तु करणस्य स्पृष्टत्वेषत्स्पृष्टत्वादिरूपस्य

---

१. १३।८। २. १३।७। ३. १।३।
४. पा. व्या. भा. (पस्पशाह्निके)। ५. पा. व्या. भा. १।१।९, वा. २। ६. तत्रैव। ७. तत्रैव।

स्स्थितिविशेषस्स्य बोधनाय स्पृष्टतत्वेषत्स्पृष्टतत्वादिविशिष्टस्स्य जिह्वाग्रादेर् बोधनायैव वा करणशब्दः प्रयुक्त इति बोद्ध्यम् ॥३१॥

(ख) वर्णविशेषकरणविशेषसम्बन्धनिरूपणम्

यद्वर्णोच्चारणे यस्स्य स्स्थाने वाय्वभिघातने ।
यत् साधकतमन् तस्स्य वर्णस्स्य करणं हि तत् ॥३२॥

यस्स्य अकारादेर् वर्णस्स्योच्चारणे यस्स्य अकारादेर् वर्णस्स्य स्स्थाने वायोरभिघातस्स्य सम्पादने यद् अधरकण्ठादिकं साधकतमम् भवति तस्स्य वर्णस्स्य तद् अधरकण्ठादिकङ करणम् बोद्ध्यम् इत्यर्थः ॥३२॥

(ग) वर्णविशेषकरणविशेषनिरूपणम्

कण्ठ्यानाङ करणङ कण्ठोऽथवा स्स्याद् हनुमद्ध्यकम् ।
अस्स्य सर्वास्स्यजत्वे तु सर्वास्स्यङ करणम् भवेत् ॥३३॥

तथाहि "कण्ठ्यानामधरकण्ठः"[1] इति शौनकीयचतुरद्ध्यायिकायाम् । तत्र कण्ठस्स्योर्ध्वभागस्स्य स्स्थानत्वमधरभागस्स्य करणत्वमिति बौद्धस् स्थानकरणविभागः कृतो विज्ज्ञायते । "शेषास् स्वस्स्थानकरणाः"[2] इत्यापिशलिशिक्षासूत्रादिवचनेऽपि एवँ विधोऽप्यर्थः प्रतीयते । शुक्लयजुर्वेदप्रातिशाख्ये तु– "कण्ठ्या मद्ध्येन"[3] इत्युक्त्वा कण्ठ्यानावँ वर्णानाङ करणम् अधोहनुमूलमद्ध्यम् प्रतिपादितवँ विज्ज्ञायते । आपिशलिशिक्षादिप्रोक्ते अकारस्स्य सर्वमुखस्स्थानकतायाः पक्षे च "शेषास् स्वस्स्थानकरणाः"[4] इत्यापिशलिशिक्षासूत्रादिवचनाद् अकारस्स्य करणमपि सर्वमेव मुखं स्यात् ॥३३॥

उरस्स्यवर्णकरणञ् चोर एव यतोऽत्र हि ।
फुस्फुसाब्भ्यावँ वायुरनवरुद्धो निस्सरत्ययम् ॥३४॥

उरस्स्यवर्णोच्चारणे तत्प्रकृतिभूतोऽयवँ वायुः उरसः फुस्फुसाब्भ्याङ कुत्राऽप्यनवरुद्ध एव निस्सरतीति यथा तस्स्य न विशिष्टं स्थानम् प्रतिपाद्द्यते तथैव न विशिष्टङ करणमपीति उर एव तस्स्य करणम् बोद्ध्यम् । एतच् च "शेषास् स्वस्स्थानकरणाः"[5] इत्यापिशलिशिक्षासूत्रादिवचनादवसेयम् ॥३४॥

प्रोक्तञ् जिह्वव्यानाञ् च जिह्वामूलीयानाञ् च कैश् चन ।
जिह्वामूलं हि करणं हनुमूलन् तु कैश् चन ॥३५॥

---

१. १।१९ । २. करणप्प्र. सू. ९ । ३. १।८४ ।
४. करणप्प्र. सू. ९ । ५. तत्रैव ।

"कवर्गावर्णानुस्स्वारजिह्वामूलीया जिह्व्या एकेषाम्"[1] इति प्रोक्ते मते जिह्व्यानावँ वर्णानामन्येषाम् मते जिह्वामूलीयत्वेनोक्तानाञ् च तेषावँ वर्णानाङ करणञ् जिह्वामूलम् बोद्ध्यम् । उक्तं हि— "हनुमूले जिह्वामूलेन कवर्गे स्पर्शयति"[2] इति, "करणमद्ध्यन् तु विवृतम्"[3] इति च तैत्तिरीयप्रातिशाक्ख्ये । "जिह्वामूलेन जिह्व्यानाम्"[4] इति आपिशलिशिक्क्षासूत्तरे च । शुक्लयजुर्वेदप्रातिशाक्ख्ये तु— "जिह्वामूलीयानुस्स्वारा हनुमूलेन"[5] इति । शौनकीयचतुरद्ध्यायिकायाञ् च— "जिह्वामूलीयानां हनुमूलम्"[6] इति । एतेषु वचनेषु च तैत्तिरीयप्रातिशाक्ख्यवचने ऊर्ध्वहनुमूलं स्थानत्वेन जिह्वामूलञ् च करणत्वेनोक्तम्; आपिशलिशिक्क्षासूत्तरवचने स्थानत्वेन करणत्वेन च जिह्वामूलमेवोपात्तम् प्रतीयते; शुक्लयजुर्वेदप्रातिशाक्ख्ये शौनकीयचतुरद्ध्यायिकायाञ् च तैत्तिरीयप्रातिशाक्ख्योक्तं स्थानङ करणत्वेन करणञ् च स्स्थानत्वेनोपात्तन् दृश्यते । एवञ् च नाम्नि विमतौ प्रतीयमानायामपि अर्थे नाऽस्ति विमतिरिति बोद्ध्यम् ॥३५॥

तालव्यानान् तु करणञ् जिह्वामद्ध्यं हि कीर्तितम् ।
एकारस्स्य च यस्स्याऽपि जिह्वामद्ध्यस्स्य प्रान्तकौ ॥३६॥

तथा हि शुक्लयजुर्वेदप्रातिशाक्ख्ये– "तालुस्त्थाना मद्ध्येन"[7] इति । तैत्तिरीयप्रातिशाक्ख्ये च— "तालौ जिह्वामद्ध्येन चवर्गे"[8] इति, "करणमद्ध्यन् तु विवृतम्"[9] इति च । शौनकीयचतुरद्ध्यायिकायाञ् च— "तालव्यानाम् मद्ध्यजिह्वम्"[10] इति । आपिशलिशिक्क्षासूत्तरेऽपि— "जिह्वामद्ध्येन तालव्यानाम्"[11] इति । तैत्तिरीयप्रातिशाक्ख्ये एकारस्स्योच्चारणे "जिह्वामद्ध्यान्ताब्भ्याञ् चोत्तराञ् जम्भ्यान्त् स्पर्शयति"[12] इति, यकारोच्चारणे च "तालौ जिह्वामद्ध्यान्ताब्भ्यायँ यकारे"[13] इति विशेषः प्रतिपादितः ॥३६॥

मूर्धन्यानान् तु तज् जिह्वोपाग्रं स्यात् प्रतिवेष्टितम् ।
प्रतिवेष्टितजिह्वाग्राधोभागो वा क्वचित् स्मृतः ॥३७॥

मूर्धन्यानावँ वर्णानाङ करणन् तु प्रत्त्यावर्त्य ऊर्ध्वाग्रङ

---

१. आ. शि. सू. स्थानप्प्र. सू. ५ । २. २।३५ ।
३. २।४५ । ४. करणप्प्र. सू. ४ । ५. १।८३ ।
६. १।२० । ७. १।७९ । ८. २।३६ । ९. २।४५ ।
१०. १।२१ । ११. करणप्प्र. सू. ५ । १२. २।१७ ।
१३. २।४० ।

कृत्वा वक्रीकृतम् जिह्वाग्रवं वेदद्यम् । तथाहि शुक्लयजुर्वेद-प्रातिशाख्ये—"मूर्द्धन्न्याः प्रतिवेष्टयाग्रम्"[१] इति । तैत्तिरीय-प्रातिशाख्ये च—"जिह्वाग्रेण प्रतिवेष्टय मूर्द्धनि टवर्गे"[२] इति, "करणमद्ध्यन् तु विवृतम्"[३] इति च । शौनकीयचतुरद्ध्यायिकायाम् च—"मूर्धन्न्यानाम् जिह्वाग्रम् प्रतिवेष्टितम्"[४] इति । आपिशलि-शिक्षासूत्रे च—"जिह्वाग्रेण मूर्धन्न्यानाम्, जिह्वाग्राधः-करणवं वा"[५] इति ॥३७॥

मूर्धन्न्यस्य षकारस्य द्रोणिकेति क्वचित् स्मृतम् ।
द्रोणिकाऽऽकारताम् प्राप्ता जिह्वाऽत्र द्रोणिका मता ॥३८॥

तथाहि शौनकीयचतुरद्ध्यायिकायाम्— "षकारस्य द्रोणिका"[६] इति ॥३८॥

प्रोक्तन् दन्त्यानाम् च दन्तमूलीयानाम् च कश् चन ।
जिह्वाग्रङ करणम् जिह्वाग्रम् प्रस्तीर्णन् तु कश् चन॥३९॥

तथाहि शुक्लयजुर्वेदप्रातिशाख्ये—"दन्त्या जिह्वाग्रकरणाः"[७] इति । तैत्तिरीयप्रातिशाख्ये च—"जिह्वाग्रेण तवर्गे दन्तमूलेषु"[८] इति, "करणमद्ध्यन् तु विवृतम्"[९] इति च । आपिशलिशिक्षासूत्रे च—"जिह्वाग्रेण दन्त्यानाम्"[१०] इति । शौनकीयचतुरद्ध्यायिकायान् तु— "दन्त्यानाम् जिह्वाग्रम् प्रस्तीर्णम्"[११] इति ॥३९॥

बर्स्स्व्यानाम् चाऽपि वर्णानाम् जिह्वाग्रङ करणं स्मृतम् ।
रेफस्य दन्तमूलानि करणङ कश् चिदुच्यते ॥४०॥

तथाहि तैत्तिरीयप्रातिशाख्ये—"उपसंहृततरे च(हनू) जिह्वाग्र-मृकारक्रारल्कारेषु बर्स्वेषूपसंहरति"[१२] इति, "रेफे जिह्वाग्रमद्ध्येन प्रत्यग् दन्तमूलेभ्यः"[१३] इति च । शुक्लयजुर्वेदप्रातिशाख्ये च—"दन्त्या जिह्वाग्रकरणाः, रश्च् च"[१४] इति । शौनकीयचतुरद्ध्या-यिकायान् तु—"रेफस्यदन्तमूलानि"[१५] इति । तत्र आपिशलिशिक्षा-नुसारं रेफस्य मूर्धन्न्यत्वे जिह्वोपाग्रम् जिह्वाग्राधो वा करणम्, दन्तमूलस्थानत्वे च जिह्वाग्रङ करणं स्यादिति प्रतीयते ।

---

१. १।७८ । २. २।३७ । ३. २।४५ ४. १।२२ ।
५. करणप्र. सू. ६, ७ । ६. १।२३ । ७. १।७६ ।
८. २।३८ । ९. २।४५ । १०. करणप्र. सू. ८ ।
११. १।२४ । १२. २।१८ । १३. २।४१ ।
१४. १।७६, ७७ । १५. १।२८ ।

"रो दन्तमूले"[1] इति शुक्लयजुर्वेदप्रातिशाख्ये यद् रेफस्य स्थानमुक्तन् तदेव शौनकीयचतुरद्ध्यायिकायाङ्ग करणत्वेनोक्तमिति तयोर् नाममात्रे विमतिरर्थे तु ऐकमत्यमेवेति च प्रतीयते ।।४०।।

ओष्ठ्यानाङ्ग करणञ् चौष्ठ उत्तरो वाऽधरोऽपि वा ।
अविशेषेण वा बोद्ध्यं स्युर् दन्ताग्राणि वस्य तु ।।४१।।

तत्र "समानस्थानकरणा नासिक्यौष्ठ्याः"[2] इत्यविशेषेणोक्तं शुक्लयजुर्वेदप्रातिशाख्ये । "ओष्ठाब्भ्याम् पवर्गे"[3] इति, "करणमद्ध्यन् तु विवृतम्"[4] इति चाऽविशेषेणैव तैत्तिरीयप्रातिशाख्येऽपि। किन् तु त्रिभाष्यरत्नकारस् तु उत्तरमोष्ठं स्थानमधरमोष्ठञ् च करणम् मन्यते । व्यासशिक्षायामपि—"कवर्गादिषु जिह्वादिमद्ध्यान्तोष्ठेन चोपरि"[5] इत्युक्तमिति त्रिभाष्यरत्नकारस्येदमेव मूलम् प्रतीयते । पारिशिक्षायामपि—"उत्तरोष्ठेऽधरोष्ठेन पवर्गे स्पर्शयत्यथ"[6]इति। शौनकीयचतुरद्ध्यायिकायामपि—"ओष्ठ्यानामधरौष्ठम्"[7] इति । आपिशलिशिक्षासूत्रे तु—"शेषास् स्वस्थानकरणाः"[8] इत्यविशेषेणैवोक्तम् । यथा वकारस्योच्चारणे उत्तरदन्ताग्राणाङ्ग करणत्वम् अधरोष्ठस्य च स्थानत्वम् प्रतिपाद्द्यते कैश् चित् तथैव पवर्गीयवर्णाद्द्योष्ठ्यवर्णानामुच्चारणेऽपि उत्तरौष्ठस्य करणत्वमधरौष्ठस्य च स्थानत्वमपि वक्तुं सुशकम् । उकारे तत्प्रकृतिकेऽन्यस्मिन् वाऽपि स्वरे तु उभयोरोष्ठयोर् विशेषस्य कथमपि कल्पयितुमनर्हत्वादविशेषेणैव स्थानत्वङ्ग करणत्वञ् च वक्तव्यमेव । अन्तस्स्थाया वकारस्य करणन् तु "वो दन्ताग्रैः"[9] इति शुक्लयजुर्वेदप्रातिशाख्ये, "वकार ओष्ठसम्भूतो दन्ताग्रकरणस् स्मृतः"[10] इति वर्णरत्नप्रदीपिकायाञ् च । "ओष्ठान्ताब्भ्यान् दन्तैर् वकारे"[11] इति तैत्तिरीयप्रातिशाख्ये, "वे चौष्ठान्तेन दन्तेषु"[12] इति व्यासशिक्षायाम् । "ओष्ठान्ताब्भ्यावँ वकारे तूत्तरदन्ताग्रकेषु च"[13] इति पारिशिक्षायाम् । उक्ततैत्तिरीयप्रातिशाख्यसूत्रव्याख्याने "दन्तैरिति स्थाननिर्देशः, ओष्ठान्ताब्भ्यामिति करणनिर्देशः"[14] इति त्रिभाष्य-

---

१. १।६८। २. १।८०। ३. २।३९। ४. २।४५।
५. सू. ४०१ । ६. सू. ४७ । ७. १।२५ ।
८. करणप्र. सू. ९ । ९. १।८१। १०. श्लो. ३२ (शि. स., पृ. १२०) । ११. २।४३ । १२. सू. ४०५ ।
१३. सू. ४९ । १४. तै. प्रा. त्रिभा. र. २।४३ ।

रत्नकारः; "ओष्ठशब्देनाऽत्तराधरोष्ठ उच्च्यते तदन्ताब्भ्याम् । ओष्ठस्य बाह्यन्याब्भ्यन्तरभागभिन्नतया द्विवचनम् प्रयुज्यते । दन्तैरिति सप्तम्यर्थे तृतीया । उत्तरदन्तेष्विति त्यर्थः । वकारोत्पत्तौ स्वभावतोऽधरोष्ठस्य आब्भ्यन्तरोऽन्तः करणम् भवति । यत्तर त्वसौ ओष्ठोपसंहारयोरोष्ठ्यस्स्वरयोर् मद्ध्यवर्ती तत्तर सामर्थ्याद् बाह्यो-ऽन्तः करणम् । यथा 'धरुवोऽसि' 'तया देवास् सुतमाबभूवुः' इति"[1] इति वैदिकाभरणकारः। आपिशलिशिक्षासूत्तरे तु दन्तोष्ठ्यत्वेनोक्तस्य वकारस्य 'शेषास् स्वस्थानकरणाः"[2] इति दन्तोष्ठकरणत्वमेवोक्तवँ विज्ज्ञायते । सृक्क्वस्थानकत्वे तु सृक्क्वकरणकत्वमस्याऽवसेयम् । तैत्तिरीयप्रातिशाख्यतद्व्याख्यानानाम् पर्यालोचने तु अत्तरत्वेन सृक्क्वशब्देन अधरोष्ठस्य आब्भ्यन्तरो बाह्यो वाऽन्तो ग्राह्यः, करणत्वेन चोत्तरदन्ताग्राणि स्वीकर्तव्यानि । शुक्लयजुर्वेदप्रातिशाख्यानुरोधात् तैत्तिरीयप्रातिशाख्यस्य व्याख्याने तु ओष्ठान्ताब्भ्यामिति तृतीयैव सप्तम्यर्थकतया स्वीकार्या । दन्तैरिति तृतीयायास् सप्तम्यर्थकतायास् स्वीकारेऽपि नाममात्तरे विमतिर् वकारोच्चारणे दन्तोष्ठस्य स्स्थितौ व्यापारे वाऽपि त्वभेद एव उक्तयोः प्रातिशाख्यकारयोर् मते इति बोद्ध्यम् ॥४१॥

नासिक्यानान् नासिका स्स्याद् यमानान् नक्करमूलकम् ।
अनुस्स्वारस्य तु हनुमूलङ्ः कैश् चिदुदीरितम् ॥४२॥
बर्स्स्यत्वेऽस्य तु जिह्वाग्रङ्ः करणङ्ः कैश् चिदास्स्थितम् ।
अनुनासिकवर्णानाङ्ः करणन् नासिकाऽपि च ॥४३॥

तथाहि शुक्लयजुर्वेदप्रातिशाख्ये—"समानस्त्थानकरणा नासिक्यौष्ठ्याः"[3] इति । शौनकीयचतुरद्ध्यायिकायाम् च— "नासिक्यानान् नासिका"[4] इति । आपिशलिशिक्षासूत्तरेऽपि—"शेषास् स्वस्थानकरणाः"[5] इति । यमकरणम् च "नासिकामूलेन यमाः"[6] इति शुक्लयजुर्वेदप्रातिशाख्ये । तैत्तिरीयप्रातिशाख्ये च—"वर्गवच् चैषु"[7] इति । अनुस्स्वारस्य करणयँ यथा—"जिह्वामूलीयानुस्स्वारा हनुमूलेन"[8] इति शुक्लयजुर्वेदप्रातिशाख्ये,"उपसंहृततरे च(हनू)जिह्वाग्रमृकारर्कारल्कारेषु बर्स्वेषूपसंहरति, एकेषामनुस्स्वारस्स्वरभक्त्योश् च"[9] इति तैत्तिरीय-

---

१. तै. प्रा. वै. टी. २।४३ । २. करणप्र. सू. ९ ।
३. १।८० । ४. १।२६ । ५. करणप्र. सू. ९ ।
६. १।८२ । ७. २।५१ । ८. १।८३ । ९. २।१८, १९ ।

प्रातिशाख्ये । अनुनासिकानावँ वर्णानाञ्च करणञ्च "मुखनासिका-करणोऽनुनासिकः"[1] इति शुक्लयजुर्वेदप्रातिशाख्ये । "अनुनासिकानाम् मुखनासिकम्"[2] इति शौनकीयचतुरद्ध्यायिकायाम् ।।४२-४३।।

द्विस्थानकानाञ्च करणन् द्वयम् बोद्ध्यय्यँ यथायथम् ।
इत्त्युक्तान्न्यत्तर वर्णानाञ्च करणानि यथागमम् ।।४४।।

ऋ-लृ-ए-ऐ-ओ-औ इत्त्यादीनान् द्विस्थानकानावँ वर्णानाञ्च करणमपि यथायथञ्च जिह्वामूलञ्च जिह्वाग्रञ्च चेति, अधरकण्ठो जिह्वामद्ध्यञ्च चेति, अधरकण्ठोऽधरोष्ठश्च चेत्त्यादिकन् द्वितयम् बोद्ध्यम् । गोपथब्राह्मणेऽपि अब्भ्यादाने प्लुतत्त्वञ्च गच्छत ओङ्कारस्य "पूर्वो विवृतकरण स्स्थितश्च द्वितीय स्पृष्टकरण स्स्थितश्च"[3] इति द्वितयकरणकत्त्वम् प्रतिपादितमस्तीत्त्यत्तर स्स्मर्त्तव्यम् ।।४४।।

(घ) अथ करणोपसंहारविशेषविवरणम्

परसङ्गेऽस्मिन्नोष्ठहनूपसंहारादिषु स्स्थितम् ।
वैशिष्ट्यमुक्तयँ यत् कैश्चित् तद् वेद्द्यमत उच्च्यते ।।४५।।
ह्रस्स्वेऽवर्णे त्त्वोष्ठहनु भवेन् नात्त्युपसंहृतम् ।
दीर्घे प्प्लुते नातिव्यस्तमित्त्याहुस् तैत्तिरीयकाः ।।४६।।
ऋकारल्कारयोश् चाप्प्युपसंहृततरे हनू ।
भवेतामिति ते प्प्राहुरनुस्स्वारेऽपि के चन ।।४७।।
हनू ओकार उच्चार्ये नातिव्यस्ते परस्परम् ।
अकारापेक्ष्यया ओष्ठौ तूपसंहृततरौ स्मृतौ ।।४८।।
ओष्ठावेकार उच्चार्ये प्रकृष्टावीषदेव हि ।
अकारस्स्यापेक्ष्यया तूपसंहृततरे हनू ।।४९।।
यदि वर्णविशेषस्स्योच्चारणे नैव गच्छति ।
जिह्वा करणभावञ्च चेत् प्रण्ण्यस्ता तत्तर सा भवेत् ।।५०।।
करणत्त्वन् न चेदोष्ठौ गच्छतो यत्तर कुत्तर चित् ।
अकारोच्चारण इव भवेतान् तत्तर तौ ध्रुवम् ।।५१।।
"पृथगोष्ठोपसंहारो नाऽधमात्तरानुतरे भवेत् ।
एकमात्तरानुतरत्त्वस्स्य स्यात् तु सर्वत्तर सम्भवे" ।।५२।।[4]

उक्तं हि तैत्तिरीयप्रातिशाख्ये—"अवर्णे नात्त्युपसंहृतमोष्ठहनु

---

१. १।७५ । २. १।२७। ३. १।१।१७ ।
४. तै. प्रा. वै. टी. २।२५ (पृ. ८१) ।

नातिव्व्यस्तम्, ओकारे च, ओष्ठौ तूपसंहृततरौ, ईषत्प्रकृष्टावेकारे, उपसंहृततरे हनू, जिह्वामद्ध्यान्ताब्भ्याम् चोत्तराम् जम्भ्यान् त्स्पर्शयति, उपसंहृततरे च (हनू) जिह्वाग्रमृकारर्कारल्कारेषु बर्स्वेषूपसंहरति, एकेषामनुस्स्वारस्वरभक्त्योश् च, अनादेशे प्रणण्यस्ता जिह्वा, अकारत्रदोष्ठौ"[1] इति। उपसंहृतं संश्लिष्टताम् जिगमिषु, सर्वं वृतमिति यावत्। व्यस्तवं विवृतम्। तद्व्याक्ख्याने सोमयार्यश् च "अकारे नात्त्युपसंहृतम् आकारे च प्प्लुते च नातिव्व्यस्तम्"[2] इति। "प्रकृष्टता = सन्निकृष्टता"[3] इत्त्यपि स एवाऽऽह। प्रकृष्टता = विवृततायै प्रकर्षेण कृष्टतेति वयम् मन्न्यामहे। प्रणण्यस्ता = प्रकर्षेण न्यस्ता, तूष्णीम् भूता, स्वस्थामनि शयितेति यावत्। "उत्पूतशुष्मन्"[4] इत्त्यादौ द्वयोरुकारयोरुच्चारणे पृथक्पृथगोष्ठोपसंहारो भवति, 'पुरु' इत्त्यादौ तु न भवतीति "पृथगोष्ठोपसंहारः" इत्त्याद्द्चायाः कारिकाया अर्थः। लोमशीयशिक्क्षायाम् च— "बहूनामप्प्युकाराणामेकङ्ग करणमिष्यते। ह्रस्स्वे दीर्घे च वृद्धे च नानाद्द्चङ्ग करणम् भवेत्॥ बहूनामप्प्युकाराणाम् मद्ध्यदीर्घम् भवेद् यदि। आदावन्ते च करणम् मद्ध्यमः पृथगेव तु॥ बहूनामप्प्युकाराणामन्ते दीर्घम् भवेद् यदि। आदावन्ते च करणम् मद्ध्यगः पृथगाश्श्रितः॥ आदौ द्विः करणयं यत्तर पश्चादुवर्णमेव च। आदिमद्ध्यान्तस् स विज्ज्ञेयो वायो श्लोयो(?) निदर्शनम्॥ आदौ सकृत्करणयं यत्तर पश्चादुवर्णमेव च। आदावन्तस् स विज्ज्ञेयो वायो शुक्करो निदर्शनम्॥ असयं युक्तः पूर्ववर्णस् स्याद् युक्तस् तु परतो यदि। उकारेण तु सयं युज्ज्यते करणाब्भ्यासस् तथा भवेत्॥ व्यञ्जनान्न्यनुवर्णानि यान्न्युवर्णान्त्यान् हि तानि च। विद्द्चाद् द्विः करणमेतेषामथौकारउकारयोः। ओष्ठ्यस्स्वरावनन्तरौ यत्तरयत्तर सयं योगसयं युतौ। तत्तर सकृत् करणं स्याद् द्विः करणमतोऽन्न्यथा॥ ओष्ठ्यौ वर्णौ यदि स्स्यातामसयं योगपरावपि। द्विरोष्ठ्यतामेतैः कुर्यादोजिष्ठम् पुपुदर्शनम्"[5] इति ओष्ठ्यस्स्वरकरणोपसंहारभेदाभेदौ निरूपितौ। शैशिरीयशिक्क्षायाम् च—"अनुस्स्वारे विवृत्त्यन्ते विरामे चाक्क्षरद्द्वये। ओवर्णे च उवर्णे च पवर्गे च पृथक्पृथक्॥ ओओ उवर्ण इत्त्येषामनुस्स्वारपवर्गयोः। विरामे च विवृत्तौ च मद्ध्ये च व्व्यञ्जनद्द्वये। द्विरोष्ठौ तु विगृह्णन्-

---

१. २।१२-२१। २. तै. प्रा. शिक्षा. र. २।१२।
३. तत्त्रैव २।१५। ४. तै. सं. १।६।१।१। ५. ४।१-९।

णीयाद् वकारे त्वधरन् तथा ।। सु ऊतया भ्रातुः पुत्त्रान् धेनुं सोमः परसुष्टुतिः । यन्मयोभु उदीरय पुपुष्वान् मोष्ठवो असमाः । बभूवुः श्वो वोचेमहीत्त्येतादृशम् निदर्शनम् ।। ओश्रौ उवर्ण इत्त्येषावँ व्यञ्जनस्य च सङ्गतौ । सकृदोष्ठौ विगृह्णीयान् नान्न्यश् चेन् मद्ध्यगस् स्वरः ।। द्विषो युयोतु युयुविर् इत्त्येतत् तन्निदर्शनम् ।। कतवा (पा?) यत्तर दृश्यन्ते सन्धिस्थानेषु नित्त्यशः । स्ववर्गेण नियुक्ताश् च वीरन् तत्तरैव कारयेत् ।। हिङ्कृण्वती तत् ते भद्द्रङ्ग गामभजन्त निदर्शनम्''[1] इति । शौनकशिक्षायाञ् च— 'ओश्रौ उवर्ण इत्त्येषामनेकस्य च सङ्गमे । सकृदोष्ठ्यौ विजानीयान् नान्न्यश् चेन् मद्ध्यगस् स्वरः ।। उषो न ओषूणो अग्ने द्विषो युयोतु यूयुविः । विरामे च विवृत्तौ च मद्ध्ये चेद् व्यञ्जनद्द्वयम् । द्विरोष्ठौ तु विगृह्णीयाद् वकारे त्त्वधरन् तथा । यन् मयोभु उदीरय ताभिरूषु ऊतिभिः । भ्रातुꣳ पुत्त्रान् धेनुं सोमस् सुष्टुतिर् मोषु वो अस्मत् ।। कुतुपुष्वो यत्तर दृश्यन्ते सन्धिस्थानेषु नित्त्यशः । स्ववर्गेण नियुक्ताश् चेद् वीरन् तत्तरैव कारयेत् । ज्योक्करुत्तराहमुत्तर इमम् म इति च''[2] इति करणोपसंहारभेदाभेदौ परतिपादितौ । ''वीरन् नाम अङ्गानाम् (करणानाम् ?) पुनꣳपुनर् व्यापार इत्त्युपदेशः''[3] इति शौनकशिक्षाटीकाकारः । याज्ञवल्क्यशिक्षायाः ''वडवा च हयन् दृष्ट्वा योनिवँ विकुरुते यथा । एववँ वर्णाः परयोक्तव्यास् 'स दुन्दुभे' निदर्शनम्''[4] इति श्श्लोकोऽपि एववँविधमेवार्थम् परतिपादयन् परतीयते । पाणिनीयशिक्षायामपि— ''अनुस्स्वारे विवृत्त्यान् तु विरामे चाक्षरद्द्वये । द्विरोष्ठ्यौ तु विगृह्णीयाद् यत्तरौकारवकारयोः''[5] इति द्विरोष्ठव्यापारस्स्थलानि परतिपादितानि दृश्यन्ते । चारायणीयशिक्षायाञ् च— ''तत्तर यस् स्यात् स्वरपरः कृत्त्रिमोऽकृत्त्रिमोऽपि वा । तस्य पूर्वाक्षरन् द्विस् स्याद् यथाश्श्वोश्श्वोश्श्वमित्त्यपि । व्यञ्जनात्तम् पदम् पूर्वे तद्वर्णञ् चाऽपरम् भवेत् । द्विर्भावन् तवँ विजानीयात् सन्धिकाले तु नित्त्यशः । तेषु स्स्वरावनन्तरौ यत्तर सयँयोगसञ्ज्ञिकौ । तत्तर द्विष्करणं स्यात् सकृत् करणमतोऽन्न्यथा ।। ओष्ठ्यौ वर्णौ यदि स्स्यातामसयँयोगपरौ यदि । द्विरोष्ठितामतैः कार्या जिह्वा पुपूष

---

१. श्लो. २३–२८ । २. श्लो. १८–२२ । ३. शौ. शि. टी. श्लो. २२ । ४. श्लो. १८६ (शि. स., पृ. २७) । ५. श्लो. २४ ।

दर्शनम्"[1] इति एतद्विषयकम् प्रतिपादनम् प्राप्यते ॥४५-५२॥

४. अथ प्रयत्नाधिकारः

(क) प्रयत्नपरिभाषा

वर्णव्यक्त्यै प्राणवायोऽ प्रेरणेऽस्स्य यथेप्सितम् ।
श्वासताया नादताया उभयत्त्वस्स्य वा कृतौ ॥५३॥
स्थानेषु वायुव्याघातानां सिद्ध्यै करणधारणे ।
प्रतियत्नो हि जीवस्स्य प्रयत्नोऽत्तर बुधैस् स्मृतः ॥५४॥

वर्णाभिव्यक्त्यर्थम् प्राणवायोऽ प्रेरणे, वर्णोपादानभूतस्स्य प्राणवायोर् यथेच्छं श्वासताया नादताया उभयत्त्वस्स्य वा करणे, यथेच्छं स्थानविशेषेषु वायुव्याघातविशेषाणां साधने, यथेच्छं स्थानस्स्य समीपे दूरे सम्पर्के वा करणस्स्य धारणे व्यापारणे च जीवस्स्य यऽ प्रतियत्नस् स हि अत्तर शिक्क्षाशास्त्रे बुधैऽ प्रयत्न इति परिभाषितो बोद्ध्यः ॥५३-५४॥

जीवात्मप्रतियत्नस्स्याऽस्स्य च या प्रक्निरया बुधैः ।
उक्ता सा वर्णिता प्राग् हि वर्णाद्ध्यायेऽत्तर नोच्यते ॥५५॥

(ख) प्रयत्नभेदाः

प्रयत्नस् स बुधैऽ प्राणमानजस् स्वरयन्त्तरजः ।
करणस्स्थानसम्बन्धजातश् चेति त्त्रिधा स्स्मृतः ॥५६॥

(ग) प्राणमानजप्रयत्नभेदौ

अल्पप्प्राणो महाप्प्राण इत्त्याद्द्द्वो यत्नको द्द्विधा ।
अल्पऽ प्राणो यत्तर सोऽयर्ं यत्नोऽल्पप्प्राण उच्च्यते ॥५७॥
महाप्प्राणोऽप्प्येवमेवाऽनयोर् योगात् प्रयत्नयोः ।
वर्णा अप्प्यल्पप्राणाश् च महाप्प्राणाश् च कीर्तिताः ॥५८॥

तथा चाऽऽपिशलिशिक्क्षासूत्त्रे "महति वायौ महाप्प्राणः, अल्पे वायावल्पप्प्राणः, साऽल्पप्प्राणमहाप्प्राणता"[2] इति ॥५७-५८॥

(घ) स्वरयन्त्तरजप्रयत्नस् तद्भेदाश् च

स्वरयन्त्तरभवो यत्नो यतो ह्यास्स्याद् बहिर् भवः ।
तस्मादयम् बुधैर् बाह्यय-प्रयत्न इति कीर्त्यते ॥५९॥

---

१. पृ. १७ । २. नाभितलप्प्रकरणे, सू. १६-१८ ।

वायुम् फुस्फुसदत्तं हि यत्नोऽयन् नादतादिना ।
सयँ योज्याऽनुप्प्रदत्तेऽतोऽनुप्प्रदानञ् च कीर्त्यते ॥६०॥
वर्णोपादानवायोर् हि यतस् स्यान् नादतादिकम् ।
तस्मादयं हि नादानुप्प्रदानञ् च क्वचित् स्मृतः ॥६१॥

अनुप्प्रदानशब्दार्थम् माहिषेयस् तु "अनुप्प्रदीयतेऽनेन वर्ण इति अनुप्प्रदानम् मूलकारणम् । अनुप्प्रदीयते उपादीयते जन्यते इत्यर्थः"[1] इति प्प्रत्यपीपदत् । उव्वटश् च "वायुमनुप्प्रदीयते इत्यनुप्प्रदानम्"[2] इत्याह । नादानुप्प्रदानशब्दश् च गोपथब्राह्मणेऽपि "नादानुप्प्रदानकरणौ च"[3] इति प्प्रयुक्तश् श्रूयते । पाणिनीयव्याकरणभाष्येऽपि "स्थान-करण-नादानुप्प्रदानज्ञेभ्यो वैदिकाश् शब्दा उपदिश्यन्ते"[4] इति वाक्ये नादानुप्प्रदानशब्दः प्रयुक्तो दृश्यते । यद्द्यपि तत्र क्वचिद् "अनुप्प्रदानज्ञेभ्यः" इत्येव पाठो दृश्यते तथापि क्वचित् तु "नादानुप्प्रदानज्ञेभ्यः" इति पाठोऽपि प्राप्यत एव । तत्र "अनुप्प्रदानन् नादादिबाह्यप्रयत्नः" इति नागेशेन नादादिपदस्योपादानाद् वैद्द्यनाथेन च च्छायायान् नागेशवाक्यविवरणे "उद्द्योते नादादीति भाष्यस्थनादपदमुपलक्षणवँ विवारादीनामिति भावः" इत्युक्ततत्वादयमपि पाठः परम्पराप्राप्त एव विज्ञायते । अतो नादानुप्प्रदानशब्दोऽपि स्वरयन्त्रभवप्रयत्नवाचक एव बोद्ध्यः ॥५९-६१॥

भेदास् सर्वँ वारादियोगात् सर्वँ वारादद्द्या भवन्ति च ।
सर्वँ वारश् चापि नादश् च घोषवत्तेति च त्रिकम् ॥६२॥
विवारश् चापि श्वासश् चाऽघोषतेत्यपि च त्रिकम् ।
नान्तरीयकसम्बन्धसम्बद्धैर् यत्नकैः कृतम् ॥६३॥
सर्वँ वारस् स्वरयन्त्रोर्ध्वमुखसङ्कोचकोऽत्र हि ।
श्वासस्य गुञ्जितन् नादस् सनादो घोषवान् ध्वनिः ॥६४॥
विवारस् स्वरयन्त्रोर्ध्वमुखविस्तार उच्यते ।
श्वासो वायुः प्राकृतस् स्यादघोषोऽनादको द्ध्वनिः ॥६५॥
सर्वँ वारञ् च विवारञ् चाऽन्तरा चैवोभयात्मिका ।
अवस्था चैव यत्नश् चोभयात्मा कैश् चिदिष्यते ॥६६॥
तथा नादश्श्वासयोश् चाऽघोषताघोषवत्तयोः ।
स्याताम् प्रयत्नौ मद्ध्यस्स्थौ तन्मते तान्तरीयकौ ॥६७॥

---

१. तै. प्रा. क्र. स. १।१७ । २. ऋ. प्रा. उ. भा. १३।१ ।
३. १।१।१७ । ४. पस्पशाह्निके ।

तथाहि ऋग्वेदप्रातिशाख्ये —"वायुꣳ प्राणꣳ कोष्ठ्यमनुप्प्रदानङ्ग कण्ठस्स्य खे विवृते सवँ्वृते वा । आपद्द्यते श्श्वासतान् नादतावँ्वा वक्त्रीहायामुभयवँ् वाऽनृतरोभौ ।। ता वर्णानाम् प्रकृतयो भवन्ति"[1] इति । कृष्णयजुर्वेदप्रातिशाख्येऽपि—"सवँ्वृते कण्ठे नादꣳ क्रियते, विवृते श्वासः, मद्ध्ये हकारः, ता वर्णप्प्रकृतयः"[2] इति । शुक्लयजुर्वेदप्रातिशाख्ये तु सवँ्वारविवारौ कारिकोक्तत्तिरकद्द्वयमूलभूतौ द्वावेव "द्वे करणे"[3] इति करणतयोपात्तौ इति तैत्तिरीयप्रातिशाख्यस्स्थसम्बद्धप्प्रकरणेन[4] सह एतत्प्रकरणस्स्य[5] तुलनया विज्ज्ञायते । ऋक्तन्त्रेऽपि—"सवँ्वृतो घोषवान्, विवृतोऽघोषः"[6] इति । आपिशलिशिक्षासूत्रे च— "स इदानीम् प्राणो नाम वायुरूर्ध्वमाक्क्रामन् मूर्द्ध्नि प्प्रतिहतो निवृत्तो यदा कोष्ठमभिहन्ति तदा कोष्ठेऽभिहन्न्यमाने गलबिलस्स्य विवृतत्वाद् विवारस् सवँ्वृतत्वात् सवँ्वारो जायते । तौ सवँ्वारविवारौ । यदा कण्ठबिलं सवँ्वृतम् भवति तदा नादो जायते । विवृते कण्ठबिले श्वासो जायते । तौ श्वासनादावनुप्प्रदानमित्त्याचक्क्षते । अन्न्ये तु ब्रुवते अनुप्प्रदानमनुस्स्वानो घण्टानिर्ह्रादवत् । तत्र यदा स्थानाभिघातजे ध्वनौ नादोऽनुप्प्रदीयते तदा नादद्ध्वनिस संसर्गाद् घोषो जायते । यदा श्वासोऽनुप्प्रदीयते तदा श्वासद्ध्वनिस संसर्गादघोषः । सा घोषवदघोषता"[7] इति । एवमेव पाणिनीयशिक्षासूत्रेऽपि । पाणिनीयव्याकरणभाष्ये च—"सन्ति ह्यास्स्याद् बाह्य्याꣳ प्रयत्नाः । ..... के पुनस् ते ? विवारसवँ्वारौ श्वासनादौ घोषवदघोषता, अल्पप्प्राणता महाप्प्राणतेति"[8] इति । पारिशिक्षायाञ् च—"नादस् स्यात् सवँ्वृते कण्ठे श्वासस् तु विवृते सति । हकारꣳ क्रियते मद्ध्ये वर्णप्प्रकृतयश् च ताः"[9] इति ।

यद्द्यपि अल्पप्प्राणतामहाप्प्राणतयोर् बाह्य्यप्प्रयत्नेष्वेवाऽनृतर्भावꣳ प्राचीनैꣳ कृतस् तथापि एतयोꣳ प्रकृतेर् वैलक्क्षण्यादस्माभिꣳ प्राणमानजप्रयत्नत्वेन पृथक् प्रतिपादनङ्ग कृतमिति विचिन्तनीयमत्र चिन्तनशीलैस् सुधीभिः ।।६२–६७।।

---

१. १३।१, २ । २. तै. प्रा. २।४–७ । ३. १।११ ।
४. २।१–७ । ५. शु. य. प्रा. १।६–१४ । ६. १।३ ।
७. नाभितलप्प्रकरणे सू. ७-१५ । ८. १।१।९ वा. २ ।
९. सू. २९ ।

(ङ) आब्भ्यन्तरप्प्रयत्नस् तद्भेदाश् च

करणस्स्थानसम्बन्धे यत्नो ह्यास्स्यान्तरुद्भवेत् ।
यतोऽतोऽन्तऽप्रयत्नो वाऽऽस्स्यप्प्रयत्नोऽयमुच्यते ॥६८॥
विवृतत्त्वं सवँवृतत्त्वमीषद्विवृतताऽपि च ।
ततोऽस्स्थितस्स्पृष्टता चेषत्स्पृष्टत्त्वञ् च तद्भिदाः ॥६९॥
स्थिताऽस्स्पृष्टत्त्ववँविवृततरत्त्वञ् च ततऽ परम् ।
अष्टमञ् चाऽपि विवृततमत्त्वङ्ः कैश् चिदीरितम् ॥७०॥
यदा वर्णोच्चारणे स्स्यात् करणं स्थानदूरगम् ।
विवृतत्त्वन् तदा ज्ज्ञेयं स्याच् चेत् स्थानसमीपगम् ॥७१॥
सवँवृतत्त्वन् तदा वेद्द्यङ्ः करणं स्थानतऽ पुनः ।
ईषद् दूरयँ यदा गच्छेदीषद्विवृतता तदा ॥७२॥
स्थानं स्पृष्ट्वा तु करणयँ यदि द्द्राग् विनिवर्त्तते ।
तदाऽस्स्थितस्स्पृष्टतेषत्स्पृष्टता स्स्पर्शनेऽल्पके ॥७३॥
वर्णस्स्योच्चारणे स्स्थानाद् दूरे चेत् करणं स्थितम् ।
स्थिरीभूतञ् चाऽपि तदा स्स्थिताऽस्स्पृष्टत्त्वमुच्यते ॥७४॥
विवृतत्त्वे तारतम्याद्वशिष्टौ तु यत्नकौ ।
भवेतामिति नाम्नैव तयोस् सुस्स्पष्टमस्ति हि ॥७५॥

तथा हि ऋग्वेदप्रातिशाख्ये– "तद्विशेषऽ करणम्, स्पृष्टमस्स्थितम्"[1] इत्यादि। शुक्लयजुर्वेदप्रातिशाख्ये तु– "समानस्त्थानकरणास्स्यप्प्रयत्तँनः सवर्णणः"[2] इति आब्भ्यन्तरप्रयत्नऽ केवलमुल्लिखितो न तु विशेषेण निरूपितः। शौनकीयचतुरद्ध्यायिकादिषु एतद्विषये यदुक्तन् तद् वर्णविशेषाणामाब्भ्यन्तरप्रयत्नानाम् प्रतिपादनस्स्य प्प्रसङ्गे एव प्प्रदर्शयिष्यते । आपिशलिशिक्षासूत्त्रे च— "तत्त्र द्ध्वनावुत्पद्द्यमाने यदा स्थानकरणप्रयत्नाः (स्थानकरणे ?) परस्स्परं स्पृशन्ति(स्पृशतः ?) सा स्पृष्टता, यदेषत् स्पृशन्ति तदेषत्स्पृष्टता, दूरेण यदा स्पृशन्ति (तिष्ठतः ?) सा विवृतता, सामीप्येन यदा स्पृशन्ति (तिष्ठतः ?) सा सवँवृतता, इत्त्येषोऽन्तऽप्रयत्नः"[3] इति । एवमेव पाणिनीयशिक्षासूत्त्रे च प्प्रायेण । "यत्त्र वर्णस्स्थानमाश्श्रित्त्य मद्ध्ये जिह्वा न सन्तिष्ठते तदस्स्थितमित्त्युच्च्यते"[4] इति, "यत्त्र वर्णस्स्थानमाश्श्रित्त्य जिह्वा तिष्ठते तत् स्थितम्"[5] इति च ऋग्वेदप्रातिशाख्य-

---

१. १३।८, ९ । २. १।४३ । ३. नाभितलप्प्र. सू. २–६ ।
४. ऋ. प्रा. उ. भा. १३।९ । ५. तत्त्रैव १३।११ ।

व्याख्याने उव्वटः प्राऽऽह ॥६८-७५॥

(च) वर्णविशेषाणाम् प्राणमानज-यत्नस्य निरूपणम्

स्वरा वर्गेषु च तथा यमेषु प्रथमा अपि ।
वर्णास् तृतीयाश् च तथा वर्गेष्वेव तु पञ्चमाः ॥७६॥
चतस्र एवाऽन्तस्थाश् चाऽप्यनुस्वारश् च रङ्गकः ।
एतद्विशेषरूपाश् च वर्णा अल्पासवस् स्मृताः ॥७७॥
वर्णास् सर्वेऽवशिष्टास् तु महाप्राणाः प्रकीर्तिताः ।
अल्पप्राणो महाप्राणो द्वयानायं यत्नको क्रमात् ॥७८॥

यद्द्यपि आपिशलिशिक्षासूत्रादिषु सर्वेषु प्राचीनेषु ग्रन्थेषु अल्पप्राणतामहाप्राणतयोर् व्यञ्जनविषये एव विचारः कृतस् तथापि स्वराणामपि अल्पप्राणत्वमर्वाचीनैर् विद्वद्भिरास्थितम्[1]। युक्तञ् चैतदनुभवसवँवादादित्यस्माभिरपि तदनुमोदितमत्र। सुपां सुलुगित्यादेस् सूत्रस्य[2] व्याख्याने इकारस्य "आन्तर्यतो धकारः प्रसज्ज्येत"[3] इति वदता मुनिना पतञ्जलिनाऽपि स्वराणामल्पप्राणत्वं सूचितम्; स्वराणाम् महाप्राणत्वे हि धकार इकारस्याऽन्तरतमस् स्वीकार्यस् स्यात्। व्यञ्जनविषये तु "वर्गयमानाम् प्रथमेऽल्पप्राणा इतरे सर्वे महाप्राणाः," वर्गयमानान् तृतीया अन्तस्थाश् चाल्पप्राणा इतरे सर्वे महाप्राणाः, यथा तृतीयास् तथा पञ्चमाः"[4] इति आपिशलिशिक्षासूत्रे पाणिनीयशिक्षासूत्रे च। पाणिनीयशिक्षायामपि "श्वासिनस् तु खफादयः। ईषच्छ्वासाँश् चरो विद्द्यात्"[5] इत्त्ययवँ विषयो लेशेनोक्तः। पाणिनीयव्याकरणभाष्येऽपि- "तत्र वर्गाणाम् प्रथमद्द्वितीया विवृतकण्ठाश् श्वासानुप्प्रदाना अघोषाः। एकेऽल्पप्प्राणा अपरे महाप्प्राणाः। तृतीयचतुर्थास् सवँवृतकण्ठा नादानुप्प्रदाना घोषवन्तः। एकेऽल्पप्प्राणा अपरे महाप्प्राणाः। यथा तृतीयास् तथा पञ्चमा आनुनासिक्यवर्जम्। आनुनासिक्यन् तेषामधिको गुणः"[6] इति। ऋग्वेदप्रातिशाख्ये तु स्पर्शव्यञ्जनविषये महाप्प्राणास् सोष्मत्वेनोल्लिखिताः "वर्गेवर्गे च..... युग्मौ सोष्माणौ"[7] इति। एवमेव शुक्लयजुर्वेद-प्रातिशाख्येऽपि[8]। वर्गप्रथमद्द्वितीयवर्णयोर् विषयेऽयवँ विभागस् तैत्तिरीय-

---

१. शब्देन्दुशेखरसञ्ज्ञाप्प्रकरणादिषु। २. अष्टा. ७।१।३९। ३. पा. व्या. भा. ७।१।३९। ४. बाह्य्यप्रयत्नप्र. सू. ३, ५,६। ५. श्लो. ३९, ४०। ६. १।१।९ वा. २। ७. १।१२, १३। ८. १।५४।

प्रातिशाख्येऽपि— "अघोषेषु शश्वासः, भूयान् प्रथमेभ्योऽन्येषु"[1] इति सूचितः। पारिशिक्षायाम् च– "प्रथमान्येष्वघोषेषु महाप्राणा उदाहृताः। अल्पप्राणास् तु प्रथमवर्णेष्वेव प्रकीर्तिताः"[2] इति। ऋक्तन्तरेऽपि– "श्वासोऽघोषाणाम्, तनीयान् प्रथमानाम्"[3] इत्युक्त्वा अल्पप्राणमहाप्राणविभागस् सूचितो विज्ञायते। लघुऋक्तन्तरसङ्ग्रहे च— "अयुग्मा वर्गयमगा यणश् चाल्पासवस् स्मृताः"[4] इति दृश्यते ॥७६–७८॥

(छ) वर्णविशेषाणां स्वरयन्तरजयत्नस्य निरूपणम्

स्वराणाञ्च खलु सर्वेषाव् वर्गेषु च यमेषु च।
तृतीयानाञ् चतुर्थानाव् वर्णानामपि सर्वथा ॥७९॥
वर्गेषु पञ्चमानाञ् चाऽप्यन्तस्स्थानान् तथैव च।
हस्स्याऽनुस्स्वारस्य चाऽथ रङ्गवर्णस्य चैव हि ॥८०॥
उक्तवर्णविशेषात्मवर्णानामपि सर्वदा।
अनुप्रदानव् विज्ञेयं सर्व् वारादित्रिकम् बुधैः ॥८१॥

स्वराणाञ्च घोषवत्त्वञ् छान्दोग्योपनिषदि "सर्वे स्वरा घोषवन्तो बलवन्तो वक्तव्या इन्द्रे बलन् ददानीति"[5] इति उल्लेखादपि विज्ञायते। गोपथब्राह्मणेऽपि ओङ्कारस्य नादानुप्रदानकत्त्वम् उक्तम्[6]; ततोऽपि स्वराणां सर्वं वारनादघोषवत्त्वमवसातुं शक्यम्। ऋग्वेदप्रातिशाख्ये तु– "अन्त्या सप्त तेषामघोषाः, वर्गेवर्गे च प्रथमावघोषौ"[7] इति, "श्वासोऽघोषाणामितरेषान् तु नादः"[8] इति च व्यञ्जनसम्बन्धे एव नादघोषवत्त्वादिविचारः कृतो दृश्यते। शुक्लयजुर्वेदप्रातिशाख्ये तु पुनः–"द्वौद्द्वौ प्रथमौ जित्, ऊष्मम्माणश्च् च हवर्ज्जम्" इति, "धि शेषः"[10] इति चोक्त्वा व्यञ्जनानामेव अघोषाणाञ्च घोषवताञ् च विभागोऽर्थादेव कृतो दृश्यते। यद्द्यपि तैत्तिरीयप्रातिशाख्येऽपि– "ऊष्मविसर्जनीयप्रथमद्वितीया अघोषाः, न हकारः, व्यञ्जनशेषो घोषवान्"[11] इति व्यञ्जनेष्वेव अघोषघोषवद्विभागः परदर्शितस् तथाऽपि "नादोऽनुप्रदानं स्वरघोषवत्सु"[12] इत्यपि तत्तरोक्तमिति तत्तर स्वराणामपि घोषवत्त्वं सूचितम् बोद्ध्यम्। ऋक्तन्तरेऽपि– "नादानुप्र-

---

१. २।१०, ११। २. सू. ३१। ३. १।३।
४. प्रयत्नप्रकरणे। ५. २।२२।५। ६. १।१।१७।
७. १।११, १२। ८. १३।४, ५। ९. १।५०, ५१।
१०. १।५३। ११. १।१२–१४। १२. २।८।

दानास् स्वरघोषवन्तः"[१] इति। शौनकीयचतुरद्ध्यायिकायाम् च– "नादो घोषवत्–स्वरेषु"[२] इति। आपिशलिशिक्क्षायाम् तु पुनः– "वर्गाणाम् तृतीयचतुर्था अन्तस्स्था हकारानुस्स्वारौ यमौ च तृतीयचतुर्थौ सवँ-वृतकण्ठा नादानुप्प्रदाना घोषवन्तः"[३] इति, "यथा तृतीयास् तथा पञ्चमाः आनुनासिक्क्यमेषामधिको गुणः"[४] इति चोक्त्वा व्यञ्जनेष्वेव घोषवदघोषविभागꣳ प्रदर्शितः। एवमेव पाणिनीयशिक्क्षासूत्तरेऽपि। यद्द्यपि पाणिनीयव्याकरणभाष्यकारेणाऽपि– "तत्तर वर्गाणाम् प्रथम-द्वितीया विवृतकण्ठाश् श्वासानुप्प्रदाना अघोषाः। एकेऽल्पप्प्राणा अपरे महाप्प्राणाः। तृतीयचतुर्थास् सवँवृतकण्ठा नादानुप्प्रदाना घोषवन्तः। एकेऽल्पप्प्राणा अपरे महाप्प्राणाः। यथा तृतीयास् तथा पञ्चमा आनु-नासिक्क्यवर्जम्। आनुनासिक्क्यन् तेषामधिको गुणः"[५] इति व्यञ्जने-ष्वेव घोषवदघोषविभागꣳ प्रोक्तस् तथापि "सुपां सुलुग्"[६] इत्त्यादेस् सूत्तरस्स्य व्याक्ख्याने इकारस्स्य स्स्थाने "आन्तर्यतो दकारꣳ प्रसज्-ज्येत"[७] इति वदता तेन स्वराणामपि नादानुप्प्रदानकत्त्वं सूचितमेव। भरतनाट्ट्यशास्त्रे च– "द्वौद्वौ वर्णौ तु वर्गाद्द्यौ शषसाश् च तृत्तयो-ऽपरे। अघोषा घोषवन्तस् तु ततोऽन्न्ये परिकीर्तिताः"[८] इति। शैशिरीय-शिक्क्षायाम् च– "वर्गाणाम् प्रथमा वर्णा द्वितीया ऊष्मसञ्ज्ञिताः। हकारवर्ज्याश् चाऽघोषाश् शिष्टङ घोषवदुच्यते"[९] इति। एवमेव शौनक-शिक्क्षायामपि[१०]। पाणिनीयशिक्क्षायाम् च– "अमोऽनुनासिका न हरौ नादिनो हञ्झषस् स्मृताः। ईषन्नादा यण्जशश् च श्वासिनस् तु खफादयः"[११] इति। याज्ञ्ज्ञवल्क्यशिक्क्षायाम् च— "सवँवृता घोषा विवृता अघोषाः। विंशतिर् घोषास् ते गजडदवा घझढधभा ङञणनमा यरलवा हकारश् चेति। वर्गाणाम् प्रथमा द्वितीयाश् शषसहाश् चाऽघोषा घोषास् त्वन्न्ये"[१२] इति। पाराशर्या शिक्क्षायाम् च— "विंशतिर् घोषास् ते गजडदबा घझढधभा ङञणनमा यरलवहाश् चेति"[१३] इति। व्यासशिक्क्षायाम् च— "अघोषास् स्युर् विसर्गोष्मद्वितीयप्प्रथमा न हः। गजडाद्द्या दबा-

---

१. १।३। २. १।१३। ३. बाह्य्यप्प्रयत्नप्प्रकरणे सू. ४।
४. तत्तरैव सू. ६, ७। ५. १।१।९, वा. २।
६. अष्टा. ७।१।३९। ७. पा. व्या. भा. ७।१।३९।
८. १४।११। ९. श्लो. ११। १०. श्लो. ६। ११. श्लो. ३९।
१२. या. शि. शि. व. वि., पृ. १५१; (शि. स., पृ. ३२)।
१३. श्लो. ५६, पृ. ५७–५८।

द्द्चाश् च घोषवन्तश्च परे हलः"[1] इति "नादश् श्वासो हकाराऽर्को कण्ठे ऽल्पे विवृतेऽधिके। अज्घोषा नादतो जाता हचतुर्था हकारजाः। प्रथमाश् श्वासतो ऽन्येऽर्कादघोषाश् च ततो यमाः"[2] इति च। चारायणीयशिक्षायाञ् च— "वर्गप्प्रथमद्वितीयाश् शषसाश् च त्त्रयोदश। ज्ञेया अघोषा इत्त्येवं सञ्ज्ञयाऽक्षरचिन्तकैः। अघोषाणान् तु करणं श्वासवत् समुदाहृतम्। नादवच् चैव सर्वेषां···करस्तेति (करणञ् चेति ? अन्न्येषामिति?) निश्चयः"[3] इति। उपर्य्युद्धृतेषु वचनेषु यत्त्र सर्वं वार-नादघोषवत्त्वानामेकतमस्स्यैवोल्लेखो दृश्यते तत्त्राऽपि अन्न्यतमयोरन्न्ययोरपि तत्त्र स्स्वीकृतत्त्वमास्स्येयम्; सर्वं वारादीनाम् परस्परन् नान्तरीयकत्त्वात् ॥७९–८१॥

वर्णानामवशिष्टानावँ विवारादित्त्रिकं स्मृतम्।
अनुप्प्रदानङ्के चिच् चाऽनुस्स्वारस्स्याऽपि तद् विदुः ॥८२॥

तथा हि ऋग्वेदप्रातिशाक्ख्ये— "अन्त्यास् सप्त तेषामघोषाः, वर्गे-वर्गे च प्प्रथमावघोषौ"[4] इति, "श्वासोऽघोषाणाम्"[5] इति च। शुक्लयजुर्वेदप्रातिशाक्ख्ये तु— "द्वौद्द्वौ प्प्रथमौ जित्, ऊष्म्माणश्च् च हवर्ज्जम्, मुच् च"[6] इति अघोषाः "धि शेषः"[7] इत्त्युक्तेब्भ्यो घोषवद्भ्यश्च पृथक् कृताः। तैत्तिरीयप्रातिशाक्ख्ये च— ऊष्मविसर्जनीयप्रथमद्वितीया अघोषाः, न हकारः"[8] इति "अघोषेषु श्श्वासः"[9] इति च। ऋक्तन्त्रे च— "विवृतोऽघोषः"[10] इति, "श्वासोऽघोषाणाम्, तनीयान् प्रथमानाम्"[11] इति च। शौनकीयचतुरद्ध्यायिकायाञ् च— "श्वासोऽघोषेष्ष्वनुप्प्रदानः"[12] इति। आपिशलिशिक्षासूत्त्रे च— "वर्गाणाम् प्रथमद्द्वितीयाश् शषसविसर्जनीयजिह्वामूलीयोपद्ध्मानीया यमौ च प्प्रथमद्द्वितीयौ विवृतकण्ठाश् श्वासानुप्प्रदाना अघोषाः"[13] इति। एवमेव पाणिनीयशिक्षासूत्त्रेऽपि। पाणिनीयव्याकरणभाष्ये च— "तत्त्र वर्गाणाम् प्रथमद्द्वितीया विवृतकण्ठाश् श्वासानुप्प्रदाना अघोषाः"[14] इति। भरतनाट्यशास्त्रादिवचनानि अपि एतद्विषयकाणि सर्वं वारादित्त्रिकप्रयत्नवद्–वर्णनिरूपणप्प्रसङ्ग एवाऽनुपदम् प्रदर्शितानि तत

---

१. सू. ११, १२। २. सू. ३९२–३९४। ३. पृ. ११–१२। ४. १।११, १२। ५. १३।४। ६. १।५०–५२। ७. १।५३। ८. १।१२, १३। ९. २।१०। १०. १।३। ११. तत्त्रैव। १२. १।१२। १३. बाह्य्यप्रयत्नप्र. सू. २। १४. १।१।९ वा. २।

एवाऽवगन्तव्यानि । लघुऋक्तन्त्रसङ्ग्रहेऽपि प्रयत्नप्रकरणे "खयायँ यमाः खयः ऽकऽ पौ विसर्गश् शर एव च । एते शश्वासानुप्प्रदाना अघोषाश् च विवृण्वते । कण्ठमन्न्ये तु घोषास् स्युस् सर्वँवृता नादभागिनः । (अयुग्मा वर्गयमगा यणश् चाल्पासवस् स्मृताः ।)" इति प्प्राप्प्यते ।

तत्तर याज्ञवल्क्यशिक्क्षाया "वर्गाणाम् प्रथमा द्वितीयाश् शषसहाश् चाऽघोषाः"[1] इति वचने हकारस्स्याऽपि अघोषत्त्वम् प्रतिपादितन् दृश्यते; अन्न्यत्तर तु हकारस्स्य घोषवत्त्वमेव प्प्रोक्तम् । अत्तर वस्तुत हकारो द्विविध एव भवति घोषवानघोषश् चेति, अत एव पाणिनीये वर्णसमाम्नाये हकारो द्विरुपात्त इति च के चिन् मन्न्यन्ते । किन् तु याज्ञवल्क्यशिक्क्षाकोशान्तरेषु[2] "तरयोदशाऽघोषास् ते कचटतपाः खछठथफाः शषसाश् चेति" इत्त्यस्स्यैव पाठस्स्योपलब्ध्यमानत्त्वाद् याज्ञवल्क्यशिक्क्षानुगामिन्न्याम् पाराशर्या शिक्क्षायाम् च तथैवोपलब्ध्यमानत्त्वाद्[3] हकारस्स्याऽघोषतायाऽ प्रतिपादको याज्ञवल्क्यशिक्क्षापाठो भ्रष्ट एवाऽनुमीयते ।

अनुस्स्वारस्स्य तैत्तिरीयप्रातिशाक्ख्ये सर्वँवारनादघोषप्रयत्नकत्त्वं स्वीकृतन् दृश्यते[4] । आपिशलिशिक्क्षासूत्रे तत् स्फुटमेवोक्तम्[5] । एवमेव पाणिनीयशिक्क्षासूत्तरेऽपि । पाणिनीयशिक्क्षायाम् च– "अलाबुवीणानिर्घोषः"[6] अनुस्स्वारऽ प्रतिपादित इति तत्तराऽप्प्यनुस्स्वारस्स्य सर्वँवारादिप्रयत्नकत्त्वं स्वीकृतम् प्रतीयते । ऋग्वेदप्रातिशाक्ख्येऽपि केषाम् चिन् मते अनुनासिकानावँ व्यञ्जनानाङ्ग ङञणनमानाङ्ग घोषवत्तायाङ्ग कारणन् तेषु निलीनोऽनुस्स्वारो भवतीति मतमपि[7] प्प्रदर्शितमिति एतन्मते योऽनुस्स्वारोऽन्न्येषामपि घोषवत्तायाङ्ग कारणम् भवति स नूनं स्वयमपि घोषवानेवेति ऋग्वेदप्रातिशाक्ख्यकारेणापि परिज्ञातमेव, तथापि "अन्न्त्यास् सप्त तेषामघोषाः"[8] इति वदता तेन शषसविसर्जनीयजिह्वामूलीयोपद्ध्मानीयैस् सहाऽनुस्स्वारस्स्याऽपि अघोषत्त्वं "श्वासोऽघोषाणाम्"[9] इति वदता च शश्वासयत्नकत्त्वम् च प्प्रतिपादितवँ विज्ञायते । किन् तु "अनुस्स्वारो व्यञ्जनवँ वा स्स्वरो वा"[10] इति वदता

---

१. शि. स., पृ. ३२ । २. या. शि. शि. व. वि., पृ. १५१, वा. मा. शु. य. सं., परि., पृ. ६ । ३. शि. स., पृ. ५७–५८ (श्लो. ५६) । ४. १।१४, २।८ । ५. बाह्य्यप्रयत्नप्प्र. सू. ४ । ६. श्लो. २३ । ७. १३।१५ । ८. १।११ । ९. १३।४ । १०. १।५ ।

तेनाऽनुस्स्वारस्स्य स्वरत्त्वमपि स्स्वीकृतमिति अन्न्येषां स्वराणामिवाऽनुस्स्वारस्स्यापि सघोषत्त्वमावश्यकम् प्रतिभाति। ऋग्वेदप्रातिशाख्ये-ऽनुस्स्वारस्स्योष्मत्त्वमपि प्प्रतिपादितम्[1]। एतदपि विचारणीयमेव। यद्द्यपि ऊष्मत्त्वन् न घोषवत्त्वविरोधि हकारे तयोस् सहभावस्स्य दृष्टत्त्वात्, तथाप्यन्न्यत्तरादृष्टत्त्वाद् विचिन्तनीयमेवाऽत्तर प्राज्ज्ञैः। आपिशलिशिक्क्षादिवचनेषु केके वर्णा ऊष्माणस् स्वीकृता इति निर्णयो दुष्कर एव। "महाप्प्राणत्त्वादूष्मत्त्वम्"[2] इत्त्यपि आपिशलिशिक्क्षासूत्त्रे पट्ठ्यते, अनुस्स्वारोऽपि महाप्प्राण[3] इत्त्यूष्मताऽस्स्य सम्भवति तन्मतेऽपि। यत् तु शैशिरीयशिक्क्षायां[4] शौनकशिक्क्षायाञ्[5] च—"ऊष्माणश् शादयश् चैव चत्त्वारश् चेति कीर्तिताः" इति उक्तम् तदनुसारि चान्न्यदपि वचनम् पाणिनीयवैयाकरणसिद्धान्तकौमुद्द्यादिषु स्स्थितन् तत् खलु व्याकरणप्रक्क्रियानिर्वाहायोपयोगि सदपि शिक्क्षाशास्त्रदृष्ट्या विचारणेऽपर्याप्तमेव स्स्पष्टतयोष्मरूपाणावँ विसर्जनीयजिह्वामूलीयोपद्धमानीयानामपि तत्त्राऽसङ्ग्रहात्, विसर्गस्स्योष्मतायाश् च "गतिरष्टविधोष्मणः"[6] इत्त्यादिवचनैरपि स्स्पष्टम् प्रतिपादितत्त्वात्। अन्न्यत्त्राऽनुस्स्वारस्स्य घोषवत्त्वमेव स्स्वीकृतम् ऋग्वेदप्रातिशाख्ये तु तस्स्य अघोषत्त्वम् प्रतिपादितमिति ऋग्वेदीयानुस्स्वारस्स्य किञ् चिद् वैलक्क्षण्यमगत्त्या स्वीकर्त्तव्यम् भवति ॥८२॥

वर्गस्स्थानाञ् चतुर्थानां हकारस्स्यापि के चन।
सर्वँ वारादिविवारादिमद्ध्यस्स्थत्त्ववँ वदन्ति च ॥८३॥

तथाहि ऋग्वेदप्रातिशाख्ये—"सोष्मोष्मणाङ घोषिणां श्वासनादौ"[7] इति। तैत्तिरीयप्रातिशाख्ये च—"मद्ध्ये हकारः"[8] इति, "हकारो हचतुर्थेषु"[9] इति च। ऋक्तन्त्रेऽपि—"उभौ हचतुर्थानाम्"[10] इति॥८३॥

ईषन्नादास् तथैवेषच्छ्वासाऽ के चन कैश् चन।
हकारजा अर्कजाश् च वर्णाऽ के चित् प्रकीर्तिताः ॥८४॥

तथाहि पाणिनीयशिक्क्षायान् तदनुसारिणि अग्निपुराणे च—"नादिनो हझषस् स्मृताः। ईषन्नादा यणजशश् च श्वासिनश् च खफादयः। ईषच्छ्वासाँश् चरो विद्द्यात्"[11] इति। पारिशिक्क्षायाञ् च—"नादश्

---

१. १।१०। २. नाभितलप्प्र. सू. १९। ३. बाह्ययप्रयत्नप्र. सू. ५। ४. श्लो. १३। ५. श्लो. ८। ६. पा. शि. श्लो. १४। ७. १३।६। ८. २।६। ९. २।९। १०. १।३। ११. पा. शि. श्लो. ३९–४०; अ. पु. ३३६।२८–२९।

च सर्वं वृते कण्ठे श्वासस् तु विवृते सति । हकारऽ क्रियते मद्ध्ये वर्ण-प्प्रकृतयश् च ताः ।। हकारो हचतुर्थेषु श्वासोऽघोषेषु चैव हि । स भूयान् प्रथमान्न्येषु ह्येतानेव विदुर् ध्वनीन्"[1] इति श्वासेषच्छ्वास-विभागस् तैत्तिरीयप्रातिशाक्ख्यानुसारमेव[2] कृतो दृश्यते । व्यास-शिक्क्षायान् तु— "नादश् श्वासो हकाराऽर्को कण्ठेऽल्पे विवृतेऽधिके"[3] इत्युक्तम् । तदर्थश् च—'अल्पे कण्ठे (कण्ठखे) यश् शब्दस् स नादः, कण्ठे विवृते यश् शब्दस् स श्श्वासः, उक्ताद् अल्पात् कण्ठखाद् अधिके किन् तु उक्ताद् विवृतात् कण्ठखादल्पे कण्ठखे यश् शब्दस् स हकारः, उक्ताद् विवृतादपि अधिके कण्ठे (कण्ठखे) यश् शब्दस् सोऽर्कः'[4] इति तद्व्याक्ख्याकारैरुक्तः । ततऽ परन् तत्तैव "अजघोषा नादतो जाता हचतुर्था हकारजाः । प्रथमाश् श्वासतोऽन्न्येऽर्कादघोषाश् च ततो यमाः"[5] इत्युक्त्वा वर्णविशेषाणान् नादादयऽ प्रयत्ना उक्ताः ।।८४।।

उदात्तत्वादीनि स्वर-यन्त्र-यत्नभवानि हि ।
तथापि तानि प्प्रोक्तानि स्वराद्ध्याये श्रुतेर् बलात् ।।८५।।

उदात्तत्वादीनाम् बाह्य्यप्रयत्नत्वम् आपिशलिशिक्क्षासूत्तरादौ अपि स्वीकृतम्[6], अनुभवप्प्रमाणकञ् चाऽकारादिस्स्वरविषये; तथापि श्रुतौ "अथ शीक्क्षावं व्याक्ख्यास्स्यामः । वर्णस् स्वरः । मात्तरा बलम् । साम सन्तानः । इत्युक्तश् शीक्क्षाद्ध्यायः"[7] इति स्वरप्प्रकरण-स्स्य पृथगुल्लिखितत्वाद्, अन्न्यत्तराऽपि स्वरस्स्य प्प्राधान्न्येनोल्लि-खितत्वाद्[8] महाविषयत्वाद् व्यञ्जनविषये तेषामाब्भ्यन्तरप्रयत्नत्व-स्स्याऽपि स्वीकार्यताया आपत्तेश् च तन्निरूपणायाऽत्तराऽपि पृथगेवा-ऽद्ध्यायऽ कृत इति तानि पूर्वमेव स्वराद्ध्याये निरूपितानि ।।८५।।

कालस्स्य बाह्य्ययत्नत्वयं यद्द्यप्प्यास्स्थितमस्ति हि ।
कैश् चित् तथाप्प्यत्तर मात्तरा प्रागुक्ता श्रुत्त्यपाश्श्रयात् ।।८६।।

यद्द्यपि आपिशलिशिक्क्षादौ— "कालो विवारसर्वं वारौ श्वास-नादावघोषता । घोषोऽल्पप्प्राणता चैव महाप्प्राणस् स्वरास् त्रयः । बाह्य्यङ करणमाहुस् तान् वर्णानावं वर्णवेदिनः"[9] इत्यादिना,

---

१. सू. २९–३० । २. तै. प्रा. २।११ । ३. सू. ३९२ ।
४. वेदतैजसे, व्या. शि. सू. ३९२ । ५. व्या. शि. सू. ३९३, ३९४ ।
६. नाभितलप्प्रकरणे सू. २६–२७ । ७. तै. उ. १।२ ।
८. पा. शि. श्लो. १० । ९. नाभितलप्प्रकरणे सू. २६, २७ ।

पाणिनीयव्याकरणभाष्ये च— "बाह्यश् च पुनरास्स्यात् कालः"[१] इति कालस्स्याऽपि बाह्यप्रयत्नतत्त्वमास्स्थितमुपलब्ध्यते, तथाऽपि— "वर्णस् स्वरः। मात्रा बलम्। साम सन्तानः"[२] इति श्शुरुतौ शिक्षाद्ध्यायस्स्य पृथक्प्रकरणस्स्य विषयत्त्वेन मात्रायाः प्रतिपादितत्त्वात् तस्स्या एव श्शुरुतेरपाश्शयान् मात्राद्ध्यायोऽप्यत्तर ग्रन्थे पृथगेव प्रतिपादितः। अनुभवेनाऽपि कालस्स्य विशेषेण बाह्यप्रयत्नतत्त्वन् नाऽऽवेदितमिति आपिशल्यादिवचनमस्माभिरवधीरितम् बोद्ध्यम् ॥८६॥

(ज) वर्णविशेषाणाम् आब्भ्यन्तरप्रयत्नस्स्य (=अन्तःप्रयत्नस्स्य=आस्स्यप्रयत्नस्स्य) निरूपणम्

स्वराणावँ विवृतत्त्ववँ वा स्थितास्स्पृष्टतत्त्वमिष्यते।
स्पृष्टतेषत्स्पृष्टता वा मतभेदेन शिक्षकैः ॥८७॥

स्वराणावँ विवृतत्त्वस्स्य प्रतिपादकानि वचनानि यथा—"विवृतं स्वरोष्मणाम्"[३] इति ऋक्तन्त्रे, "स्वराणाञ् च (विवृतम्)"[४] इति शौनकीयचतुरद्ध्यायिकायाम्, "विवृतकरणास् स्वराः"[५] इति आपिशलिशिक्षासूत्रे। एवमेव पाणिनीयशिक्षासूत्रेऽपि। "तथा स्वरो विवृतः"[६] इति भरतनाट्यशास्त्रेऽपि। शैशिरीयशिक्षायाञ् च— "स्वराणामूष्मणाञ् चैव विवृतङ् करणं स्मृतम्"[७] इति; एवमेव शौनकशिक्षायाम्[८] पाणिनीयशिक्षायाञ्[९] च। याज्ञवल्क्यशिक्षायामपि— "अकारस् सवँवृतो ज्ञेय इतरे विवृतास् स्वराः"[१०] इति। वर्णरत्नप्रदीपिकायाञ् च—"सवँवृतवँ विवृतन् तद्वदस्स्पृष्टं स्पृष्टमेव च। ईषत्स्पृष्टञ् चार्धस्पृष्टमास्स्ययत्नस् तु षड्विधः"[११] इत्युक्त्वा "अकारस् सवँवृतो ज्ञेयो विवृताश् चेतरे स्स्वराः। अस्स्पृष्टास्स्यप्रयत्नाश् च स्स्वरास् सर्वे भवन्ति हि"[१२] इत्युक्तम्॥ माण्डूक्यां शिक्षायाञ् च— "विवृतञ् च स्स्वरोष्मणाम्"[१३] इति।

स्वराणाम् अस्स्पृष्टतायास् स्थितास्स्पृष्टताया वा प्रतिपादनयँ

---

१. अइउण् इत्यत्तर, वा. १। २. तै. उ. १।२। ३. १।३। ४. १।३२। ५. अन्तःप्रयन्तप्रकरणे सू. ७। ६. १४।१०। ७. श्लो. २१। ८. श्लो. १७। ९. श्लो. २१। १०. श्लो. २०९ (शि. स., पृ. ३२)। ११. श्लो ३९ (शि. स., पृ. १२०)। १२. श्लो. ४०। १३. श्लो. ७० (शि. स., पृ. ४६९)।

यथा— "स्वराऽनुस्स्वारोष्मणामस्स्पृष्टं स्थितम्"[१] इति ऋग्वेदप्रातिशाख्ये। "अचोऽस्स्पृष्टाः"[२] इति पाणिनीयशिक्षायाम्।

स्वराणां स्पृष्टत्वमपि केषाञ्चिन् मतेऽस्ति। तथाहि— "(स्वराणाञ्च) एके स्स्पृष्टम्"[३] इति शौनकीयचतुरध्यायिकायाम्।

स्वराणामीषत्स्पृष्टत्वमपि केषाञ्चिन् मते। तथाहि व्यासशिक्षायाम्— "प्रयत्नश्चोष्मणावं व्यस्त इणोऽन्येषामचाम् भवेत्। केवलानाञ्च सर्वेषाम् (अचाम्) अत्यल्पस्स्पृष्टता स्स्मृता"[४] इति ॥८७॥

अवर्णे खलु ह्रस्स्वे तु सवँवृतत्वं स्मृतं समैः।
इवर्णे चाऽप्युवर्णे च ऋकारे चाऽपि कैश्चन ॥८८॥

ह्रस्स्वस्स्याऽवर्णस्य सवँवृततायाः प्रतिपादकानि वचनानि यथा— "सवँवृतोऽकारः"[५] इति शौनकीयचतुरध्यायिकायाम्। एवमेव आपिशलिशिक्षासूत्रे[६] पाणिनीयशिक्षासूत्रे च। प्रक्रियादशायां ह्रस्स्वमवर्णवँ विवृतं स्वीकृत्य शास्त्रान्ते—"अ अ"[७] इति विवृतमनूद्य सवँवृतवँ विदधता पाणिनिनाऽपि ह्रस्स्वस्स्याऽवर्णस्य प्रयोगे सवँवृतत्वं स्वीकृतमिति स्स्फुटम्। तदेव स्स्फुटीकृतवँ वार्तिककारभाष्यकारादिभिरपि[८]। शैशिरीयशिक्षायामपि—"सवँवृतञ्चेत्यकारस्य"[९] इति। एवमेव शौनकशिक्षायामपि[१०]। याज्ञवल्क्यशिक्षायाञ्च— "अकारस् सवँवृतो ज्ञेयः"[११] इति। एवमेव वर्णरत्नप्रदीपिकायामपि[१२]। सर्वसम्मतशिक्षायाञ्च— "सवँवृतत्वमकारस्य विशेषोऽयवँ विधीयते"[१३] इति। एतेषु च वचनेषु अकारो ह्रस्स्वाकारो मन्तव्यः पाणिनीयव्याकरणभाष्यकारवचना[१४]-ऽनुरोधात्। यद्यपि यत्तर ऋक्तन्त्रादौ स्वराणावँ विवृतता प्रोक्ता तत्तर अकारस्य सवँवृतत्वन् न प्रतिपादितमिति ऋक्तन्त्रकारादिमते ह्रस्स्वाकारस्स्याऽपि विवृतत्वमेवेत्यपि प्रतीयते तथापि—"अवर्णे

---

१. १३।११। २. श्लो. ३८। ३. १।३३।
४. सू. ४०८। ५. १।३६। ६. अनृतप्रयत्नप्रकरणे सू. ११।
७. अष्टा. ८।४।६८। ८. अइउण् इत्यत्तर। ९. श्लो. २२।
१०. श्लो. १७। ११. श्लो. २०९ (शि. स., पृ. ३२)।
१२. श्लो. ४० (शि. स., पृ. १२०)। १३. श्लो. ८० (३।५७)।
१४. अइउण् इत्यत्तर, वा. ३।

नात्त्युपसंहृतमोष्ठहनु नातिव्यस्तम्"[१] इति प्रभृतिकात्[२] तैत्तिरीयप्रातिशाख्यादिवचनात्, "सवर्णवच् च"[३] इति शुक्लयजुर्वेदप्रातिशाख्यादिवचनाच् च सर्वत्र ह्रस्वाकारस्य सर्वावृततैव स्वीकृताऽनुमीयत इति "सर्वावृतत्वं स्मृतं समैः" इत्युक्तम् बोद्ध्यम् ।

इवर्णादीनां सर्वावृतताया: प्रतिपादकानि वचनानि यथा—"य्वृतस् सर्वावृता अनन्यत्तराऽऽर्भवसाम्नः"[४] इति छन्दोगविशेषैरुक्तमिति शब्दकौस्तुभे । ह्रस्वाकारस्य दीर्घप्लुतयोः प्रसङ्गे "कुतो··· न पुनस् तुल्यप्रयत्नौ स्थानभिन्नौ स्यातामिकार उकारो वा"[५] इति वदता पाणिनीयव्याकरणभाष्यकारेणाऽपि इकारोकारयोस् सर्वावृतत्वमास्थितम् । "प्रयत्नश् चोष्मणावव्यस्त इणोऽन्न्येषामचाम् भवेत्"[६] इति, "ओष्ठताल्वर्णेवर्णे व्यस्तसर्वावृतमैत्त्यपि"[७] इति च वदता व्यासशिक्षाकारेणाऽपि इवर्णोवर्णयोस् सर्वावृतत्वं स्वीकृतन् दृश्यते । "उपसंहृततरे च(हनू)जिह्वाग्रमृकारकारल्कारेषु वर्स्वेषूपसंहरति"[८] इति वदता तैत्तिरीयप्रातिशाख्यकारेण ऋकारल्कारयोस् सर्वावृतत्वं सूचितमेव ।

ऐऔ इत्त्यत्तर स्थितस्य अकारस्य सर्वावृततरत्वन् तैत्तिरीयप्रातिशाख्ये—"अकारार्धमैकारौकारयोरादिः, सर्वावृतकरणतरमेकेषाम्"[९] इति उल्लिखितम् । पाणिनीयव्याकरणभाष्ये तु "सन्ध्यक्षरेषु विवृतत्वात्"[१०] इति वार्तिकस्य व्याख्याने "यदत्तराऽवर्णवविवृततरन् तदनन्यस्मादवर्णाद् ये अपीवर्णोवर्णे विवृततरे ते अनन्याब्भ्यामिवर्णोवर्णाब्भ्याम्"[११] इत्युक्तम् । अनन्यत्तर तु "सर्वावृताऽवर्णस्य सर्वावृताऽवर्णो विवृताऽवर्णस्य विवृताऽवर्णः"[१२] इति वदता तद्भाष्यकारेण एकारे ओकारे च सन्ध्यक्षरे स्थितस्याऽवर्णस्य तु सर्वावृतत्वमपि आस्थितम् ॥८८॥

स्पृष्टता वर्णिता कैश् चिच् शिक्षकैर् ऋलृवर्णयोः ।
एकारस्याऽप्यांशिकी सा तैत्तिरीयैः प्रकीर्तिता ॥८९॥

तथाहि याज्ञवल्क्यशिक्षायाम्—"ऋलोर् मद्ध्ये भवत्त्यर्ध-

---

१. तै. प्रा. २।१२ । २. २।२७ । ३. १।७२ ।
४. अ.१, पा.१, आ.२ (पृ. ४२)। ५. अइउण् इत्त्यत्तर वा. ३ ।
६. सू. ४०७ । ७. ३९९ । ८. २।१८ । ९. २।२६–२७ ।
१०. ऐऔच् इत्त्यत्तर वा. १० । ११. तत्तरैव भाष्यम् ।
१२. १।३।१०, वा. ७ ।

मात्तरा रेफलकारयोः । तस्मादस्स्पृष्टता न स्स्यादृलृकारनिरूपणे"[1] इति । एवमेव वर्णरत्नप्रदीपिकायाम् च[2]। पाणिनीयव्याकरणवार्तिककारेण "ऋति सवर्णे -ऋवा" "लृति सवर्णे ल्लृ वा"[3] इति प्रतिपादितयोर् -ऋकारल्लृकारयोरनचत्वम् पाणिनीयव्याकरणभाष्यकारेणाऽऽशङ्कितम्[4], तच् च भर्तृहरि[5]-कयटप्रभृतयस् तयोर् -ऋकारल्लृकारयोरीषत्स्पृष्टप्रयत्नकत्वेन सर्वं वृततरत्वेन वोपपिपादयिषन्ति इति तयोर् -ऋकारल्लृकारयोरपि साधारणस्स्वरतो वैलक्षण्यं स्फुटम् भवति ।

एकारस्स्योच्चारणे जिह्वामध्यप्रान्ताभ्याम् जम्भ्यानान्दन्तानां स्पर्शस् तैत्तिरीयप्रातिशाख्ये प्रतिपादितः, तथाहि— "(एकारे) उपसंहृततरे हनू, जिह्वामध्यान्ताभ्याम् जम्भ्यान्तत्स्पर्शयति"[7] इति ।।८९।।

अन्न्येभ्य एओ विवृततरौ कैश् चित् प्रकीर्तितौ ।
ताभ्यामैओ च विवृततरौ हि प्रतिपादितौ ।।९०।।
सर्वेभ्य उक्तो विवृततमो दीर्घ× प्लुतोऽपि च ।
अवर्णश् शिक्षकैस् तत्तराऽवधातव्यवं विचक्षणैः ।।९१।।

एतद्विषये ऋक्तन्त्रे—"विवृतं स्वरोष्मणाम्, विवृततरमकारैकारौकाराणाम्"[8] इति वचनम् प्राप्यते । अत्तराऽकारग्रहणन् दीर्घप्लुताकारपरतया नेयम्, पाणिनीयवर्णसमाम्नाये उपदिष्टं ह्रस्स्वमवर्णमादाय प्रवृत्तस्य "नैव लोके न च वेदेऽकारो विवृतोऽस्ति । कस् तर्हि । सर्वं वृतः"[9] इत्यस्य, "नैव लोके न च वेदे दीर्घप्लुतौ सर्वं वृतौ स्तः । कौ तर्हि । विवृतौ"[10] इत्यस्य च पतञ्जलिमुनिवचनस्स्याऽनुरोधात् । शौनकीयचतुरध्यायिकायाम् च—"एकारौकारयोर् विवृततमम्, ततोऽप्याकारस्य"[11] इति । आपिशलिशिक्षासूत्तरे च— "विवृतकरणास् स्वराः, तेभ्य एओ विवृततरौ, ताभ्यामैओ, [ताभ्यामप्याकारः]"[12] इति । एवमेव प्रायेण पाणिनीयशिक्षासूत्तरेऽपि ।

---

१. श्लो. २११ (शि. स., पृ.३२)। २. श्लो. ४२(शि. स., पृ. १२०)। ३. पा. व्या. भा. ६।१।१०१। ४. १।१।९ वा. ५। ५. महाभाष्यदीपिकायाम् १।१।९ (पृ. १७१)। ६. महाभाष्यप्रदीपे १।१।९, ६।१।१०१। ७. २।१५-१७। ८. १।३। ९. अइउण् इत्यत्तर वा. १। १०. लृत्तरैव वा. ३। ११. १।३४,३५। १२. अनुतरकरणानुनासिक, सू. ७-१०।

चान्द्रवर्णसूत्तरविषयसर्वं वादर्शनाद्[1], न्यास[2]–पदमञ्जरी[3]–शब्दकौस्तुभादिषु[4] शिक्षावचनत्वेनाऽस्योद्धरणस्य प्राप्यमाणत्वाच् चाऽऽपिशलिशिक्षावचनमिदम् प्रमाणभूतमेवेत्यवसीयते। पाणिनीयशिक्षायाम् च—"स्वराणामूष्मणाञ् चैव विवृतञ्च करणं स्मृतम्। तेभ्योऽपि विवृतावेङौ ताभ्यामैचौ तथैव च"[5] इति। गोपथब्राह्मणे तु—"किं स्थानमित्युभावोष्ठौ स्थानम्" इति 'ओ३म्' इत्यत्तर मकारभागस्य स्स्थानं निरूप्य "द्वयस्स्थानं सन्ध्यक्षरम्, अवर्णलेशश्च कण्ठ्यो यथोक्तश् शेषः, पूर्वो विवृतकरण स्स्थितश् च द्वितीय स्पृष्टकरण स्स्थितश् च"[6] इति उकारभागस्य उभोष्ठस्स्थानकत्वं स्थितस्स्पृष्टकरणत्वञ् च प्रतिपादितवं विज्ज्ञायते। तैत्तिरीयप्रातिशाख्ये च एकारस्स्य सर्वं वृतत्वमंशेन स्स्पृष्टत्वञ् च[7] प्रोक्तमिति पूर्वमेवोक्तम्, ऐऔ इत्यत्तराऽकारांशस् सर्वं वृतकरणतर इति मतमपि तत्तरैवोल्लिखितन्[8] दृश्यते। "अवर्णे नाऽत्त्युपसंहृतमोष्ठहनु नाऽतिव्व्यस्तम्"[9] इति प्रतिपादयता तैत्तिरीयप्रातिशाख्यकारेण दीर्घस्स्य प्लुतस्स्याऽप्यवर्णस्स्याऽतिविवृतत्वन् न स्स्वीकृतमिति च विज्ज्ञायते ॥९०–९१॥

वर्णानाङ् कादिमान्तानावं वर्ग्याणाम् पञ्चविंशतेः।
करणं ह्यस्स्थितं स्पृष्टम् भवति स्स्पृष्टमेव वा ॥९२॥

तथाहि ऋग्वेदप्रातिशाख्ये—"स्पृष्टमस्स्थितम् (प्राग् यकारात् पञ्चविंशतेः)"[10] इति। अन्तस्स्थाव्भ्यश्च पूर्वेषावं व्यञ्जनानाम् "इति स्प्पर्शाः"[11] इति निर्देशेनैव शुक्लयजुर्वेदप्रातिशाख्ये तेषां स्पृष्टकरणकत्वं सूचितम्। तैत्तिरीयप्रातिशाख्येऽपि—"हनुमूले जिह्वामूलेन कवर्गे स्पर्शयति"[12] इत्यादिना यकारात् पूर्वेषावं व्यञ्जनानाम् अविशिष्टकरणस्स्पर्शजन्यत्वम् प्रोक्तमिति तत्तराऽपि कादिमान्तवर्णानां स्पृष्टकरणकत्वम् प्रतिपादितमेव। ऋक्तन्त्रेऽपि—"स्पृष्टञ् करणं स्पर्शानाम्"[13] इति प्रोक्तम्, स्पर्शाश् च कादयो मान्ताश्च पञ्चविंशतिस् स्फुटञ् गणिताः। शौनकीयचतुरद्ध्यायिकायाञ् च—"स्पृष्टं

---

१. सू. २४–२७। २. अइउण् इत्यत्तर (पृ. २२)। ३. तत्तरैव। ४. तत्तरैव (पृ. ४२)। ५. श्लो. २१। ६. १।१।१७। ७. २।१५–१७। ८. २।२७। ९. २।१२। १०. १३।९। ११. ८।१३। १२. २।३५–३९। १३. १।३।

स्पर्शनाङ्करणम्"[१] इत्युक्तम्। आपिशलिशिक्क्षासूत्रे च— "स्पृष्टकरणास् स्पर्शाः"[२] इति। पाणिनीयशिक्क्षासूत्रे तु— "कादयो माऽवसानास् स्पर्शाः"[३] इति च। पाणिनीयव्याकरणभाष्येऽपि— "स्पृष्टं स्पर्शानाङ्करणम्"[४] इति शौनकीयचतुरद्ध्यायिकावचनमुद्धृतन् दृश्यते। भरतनाट्यशास्त्रे च— "स्पृष्टाऽ काद्द्या मान्ताः"[५] इति। शैशिरीयशिक्क्षायाम् च— "स्पर्शानाङ्करणं स्पृष्टम्"[६] इति। एवमेव शौनकशिक्क्षायामपि[७]। पाणिनीयशिक्क्षायाम् च— "(अचोऽस्स्पृष्टा यणस्त्वीषन् नेमस्स्पृष्टा शलस् स्मृताः।) शेषास् स्पृष्टा हलऽ प्रोक्ताः"[८] इति। याज्ञवल्क्यशिक्क्षायाम् च— "स्पर्शास् स्पृष्टा भवन्ति हि"[९] इति। वर्णरत्नप्रदीपिकायाम् च—"स्पृष्टास् स्पर्शास् तु विज्ञेयाः"[१०]इति। चारायणीयशिक्क्षायाम् च— "कादयो मावसानाश् च स्पर्शास् स्युऽ पञ्चविंशतिः"[११] इति, "स्पर्शानाङ्करणं स्पृष्टम्"[१२] इति च। व्यासशिक्क्षायाम् च— "स्पृष्टत्वं स्पर्शसञ्ज्ञानाम्"[१३] इति। सर्वसम्मतशिक्क्षायाम् च— "स्पर्शानां स्पृष्टतावँ विद्द्यात्"[१४] इति। पारिशिक्क्षायाम् च— "(स्युस्) स्पृष्टजन्न्याऽ (खलु) कादिमान्ताः"[१५] इति। तत्तरकश् चन महत्त्वपूर्णोऽनुभवसाक्क्षिको विशेषोऽपि व्यासशिक्क्षायाम्— "अतिस्स्पृष्टो द्वितीयेषु चतुर्थेषु च तत्समः"[१६] इति; सर्वसम्मतशिक्क्षायाम् च— "नेमिवत् त्स्पृष्टता ज्ञेया चतुर्थेषु विचक्क्षणैः"[१७] इति; पारिशिक्क्षायाम् च— "वर्गे द्द्वितीयश् च तुरीयवर्णोऽतिस्स्पृष्टजः (पञ्चविधऽ प्रयत्नः)"[१८] इति प्प्रोक्तः। माण्डूक्क्यां शिक्क्षायाम् च— "स्पर्शानाङ्करणं स्पृष्टम्"[१९] इत्त्येवोक्तम्। अस्माभिऽ कारिकायाम् 'अस्स्थितं स्पृष्टम्' इति ऋग् वेदप्रातिशाख्यानुरोधाद् वस्तुस्स्थितिवर्णनस्य पूर्णतरत्वाय चोपात्तम्। स्पृष्टत्वेऽस्स्थितत्वञ्च किमिति प्प्रागेव निरूपितम्। अन्न्यग्रन्थानुरोधेन

---

१. १।२९। २. अन्तऽप्रयत्नप्प्र. सू. ४। ३. वाह्य्यप्रयत्नप्प्र. सू. ८। ४. १।१।१०, वा. ३। ५. १४।१०। ६. श्लो. २१। ७. श्लो. १६। ८. श्लो. ३८। ९. श्लो. २०९ (शि. स., पृ. ३२)। १०. श्लो. ४१ (शि. स., पृ. १२०)। ११. पृ. ११। १२. तत्तरैव। १३. सू. ४०९। १४. श्लो. ८१ (३।५८)। १५. सू. ५५। १६. सू. ४१०। १७. श्लो. ८१ (३।५९)। १८. सू. ५५। १९. श्लो. ७० (शि. स., पृ. ४६९)।

'स्पृष्टम्' इति वैकल्पिकमुपात्तम् । एवकारेण च उक्तयोरस्स्थित-स्स्पृष्टत्त्व–स्पृष्टत्त्वयोश् शब्दे एव भेदो दिदर्शयिषितो वस्तुनि तु अभेद एव सूचित इति बोद्ध्यम् ॥९२॥

यमानाञ् चाऽपि वर्ग्याभिनिहितानान् तथा भवेत् ।
स्थितं स्पृष्टं हि करणं सवँ्वृतन् तत् क्व चित् स्मृतम् ॥९३॥

यद्द्यपि यमानान् नासिक्यत्त्वं सर्वसम्मतमेवेति न तेषाम् मुखे करणस्य विशेषो वक्तव्य इत्त्याशङ्का उदेति, तथापि यमवर्गप्प्रकृति-वर्णोच्चारणकरणम् मुखेऽपि व्याप्प्रियत एव, किन् तु करणस्य तत्त्र यमवर्णोच्चारणकाले स्थाने यमनम् (धारणम्) भवतीति यमानान् तत्-प्रकृतिवर्णानामिव करणम् अस्स्थितं स्पृष्टन् न भवति किन् तु स्स्थितं स्पृष्टमिति स्स्वानुभवसाक्षिकतयाऽस्माभिरुक्तं सुधीभिस् सम्म्यगा-कलनीयमिदम् । एवयँ् यमानाङ करणे व्याख्यातेऽभिनिहितानामपि करणवँ् व्याख्यातम् भवति । यमानां सवँ्वृतकरणकत्त्वम् माण्डूक्यां शिक्षा-यामुक्तम् । तथा हि— "यमानां सवँ्वृतम् प्राहुः"[1] इति । एवमेव चारा-यणीयशिक्षायामपि[2] ॥९३॥

अस्स्थितेषत्त्स्पृष्टताऽनतस्स्थास्स्वीषत्त्स्पृष्टताऽपि वा ।
तासामभिनिधाने तु स्स्थितेषत्त्स्पृष्टता मता ॥९४॥

तथा हि ऋग्वेदप्रातिशाख्ये– "दुस्स्पृष्टन् तु प्प्राग् घकाराच् चतुर्-णाम्"[3] इति । दुस्पृष्टमितीषत्स्पृष्टमिति च नार्थान्तरम् । स्थितेषत्-त्स्पृष्टतेषत्त्स्पृष्टतयोरपि विशेषो द्विनवतितमश्श्लोकव्याख्यानेनैव व्याख्यातो वेदितव्यः । तैत्तिरीयप्रातिशाख्ये च— "तालौ जिह्वा-मद्ध्यान्ताब्भ्यायँ् यकारे, रेफे जिह्वाग्रमद्ध्येन प्रत्त्यग् दन्तमूलेब्भ्यः, दन्तमूलेषु च लकारे, ओष्ठान्ताब्भ्यान् दन्तैर् वकारे"[4] इति अन्त-स्स्थानाङ करणानां स्थानेषु भागिकस्स्पर्शस्स्यैव प्प्रतिपादितत्त्वात् तन्मतेऽपि अन्तस्स्थानामीषत्त्स्पृष्टत्त्वमेव सम्भाव्यते । ऋक्तन्त्रेऽपि– "दुस्स्पृष्टमन्तस्स्थानाम्"[5] इति । शौनकीयचतुरद्ध्यायिकायाञ् च— "ईषत्त्स्पृष्टमन्तस्स्थानाम्"[6] इति । आपिशलिशिक्षासूत्त्रे च— "ईष-त्त्स्पृष्टकरणा अन्तस्स्थाः"[7] इति; एवमेव पाणिनीयशिक्षासूत्त्रेऽपि । पाणिनीयव्याकरणभाष्ये च–"ईषत्त्स्पृष्टमन्तस्स्थानाम्"[8] इति शौनकीय-

---

१. श्लो. ७०, (शि. स., पृ. ४६९) । २. पृ. ११ ।
३. १३।१० । ४. २।४०–४३ । ५. १।३ । ६. १।३० ।
७. अन्तःप्रयत्नप्प्रकरणे सू. ५ । ८. १।१।१० ।

चतुरद्ध्यायिकासूत्तरमेव धृतन् दृश्यते । भरतनाट्ट्यशास्त्रे तु— "अनृतस्स्थास् सर्वृतजाः"[1] इति उक्तम् । शैशिरीयशिक्क्षायाञ् च— "स्पर्शानाङ करणं स्पृष्टमनृतस्स्थास्स्वीषदुच्यते"[2] इति । शौनकशिक्क्षायामप्येवमेव[3] । पाणिनीयशिक्क्षायाञ् च— "अचोऽस्स्पृष्टायणस् त्वीषद्"[4] इति । याज्ञ्ज्ञवल्क्यशिक्क्षायाञ् च— "ईषत्त्स्पृष्टास् तथाऽनृतस्त्थाः"[5] इति । वर्णरत्नप्प्रदीपिकायाञ् च— "अनृतस्था ईषदुत्त्स्पृशः"[6] इति । चारायणीयशिक्क्षायान् तु— "स्पर्शानाङ करणं स्पृष्टमनृतस्स्थानामतोऽन्न्यथा"[7] इति । व्यासशिक्क्षायान् तु पुनः— "स्पृष्टत्त्वं स्पर्शसञ्ज्ञानाम् परेषाङ किञ् चिदुच्च्यते"[8] इत्त्येव । सर्वसम्मतशिक्क्षायाञ् च— "स्पर्शानां स्पृष्टतावँ विद्द्यादनृतस्स्थास्स्वीषदीरिता"[9] इति । माण्डूक्क्यां शिक्क्षायान् तु चारायणीयशिक्क्षायामिवैव "स्पर्शानाङ करणं स्पृष्टमनृतस्स्थानामतोऽन्न्यथा"[10] इत्त्येवोक्तम् ।

अनृतस्स्थानां रेफातिरिक्तानायँ यदाऽभिनिधानम् भवति तदा तासामपि करणयँ यमानामिवैव स्स्थितं स्यान् न त्त्वस्स्थितमिति विवेक्तव्व्यं सुधीभिः ॥९४॥

शषसानां हकारस्स्य विसर्गाणान् तथैव च ।
करणं स्थितमस्स्पृष्टङ कैश् चिदुक्तम् मनीषिभिः ॥९५॥

तथा हि ऋग्वेदप्रातिशाक्ख्ये— "स्वरानुस्स्वारोष्मणामस्स्पृष्टं स्थितम्"[11] इति । हकारस्स्य विसर्गाणाञ् चेदङ करणं स्वीकर्त्तुमुचितम् भाति अनुभवसर्वावादात् ॥९५॥

सहानां शषसानान् तु करणवँ विवृतङ क्व चित् ।
समाश्शिरतङ कैश् चिदीषद्विवृतं हि निरूपितम् ॥९६॥

शषसहानाङ करणवँ विवृतमिति स्वीकृत्त्य आचार्येण पाणिनिना "नाज्झलौ"[12] इति सूत्त्रम् प्रणीतम् । तत्त्र च "सर्व्व ऊष्माणोऽरस्ता अनिरस्ता विवृताः"[13] इति छान्दोग्ग्योपनिषद्वचनम्, "स्वरानु-

---

१. १४।१० । २. श्लो. २१ । ३. श्लो. १६ ।
४. श्लो. ३८ । ५. श्लो. २१० (शि. स., पृ. ३२) ।
६. श्लो. ४१ (शि. स., पृ. १२०) । ७. पृ. ११ । ८. सू. ४०९।
९. श्लो. ८१ (३।५८) । १०. श्लो. ७० (शि. स., पृ. ४६९) ।
११. १३।११ । १२. अष्टा. १।१।१० । १३. २।२२।५ ।

स्स्वारोष्मणामस्स्पृष्टं स्थितम्"[१] इति ऋग्वेदप्रातिशाख्यवचनम्, "विवृतं स्वरोष्मणाम्"[२] इति ऋक्तन्त्रवचनञ् चाऽनुकूलम्। "ऊष्मणावँ विवृतञ् च"[३] इति शौनकीयचतुरद्ध्यायिकावचनमपि तदनुकूलतयाऽपि नेतुं शक्क्यमिव प्प्रतिभाति, पाणिनीयव्याकरणभाष्ये "विवृतमूष्मणाम्" इति चकाररहितस्स्यैव पाठस्स्य धृतत्वात्[४]। "ईषद्विवृतकरणा ऊष्माणो विवृकरणा वा"[५] इति पाणिनीयशिक्क्षासूत्त्रवाक्क्यमपि तत्त्रानुकूलमेव। शैशिरीयशिक्क्षायामपि—"स्वराणामूष्मणाञ् चैव विवृतङ करणं स्मृतम्"[६] इत्त्युक्तम्। एवमेव शौनकशिक्क्षायामपि[७]। माण्डूक्क्यां शिक्क्षायाञ् च— "विवृतञ् च स्स्वरोष्मणाम्"[८] इति। चारायणीयशिक्क्षायामप्प्येमेव[९]। भरतनाट्ट्यशास्त्रेऽपि— "शषसहकारास् तथा विवृताः"[१०] इति। सर्वसम्मतशिक्क्षायाञ् च— "स्वराणामूष्मणाञ् चैव प्प्रयत्नो विवृतस् स्मृतः"[११] इति। पारिशिक्क्षायाञ् च— "स्वरोष्मणां स्याद् विवृतऽ प्रयत्नः"[१२] इति। चान्द्रवर्णसूत्त्रेऽपि — "विवृतत्त्वं स्वराणामूष्मणाञ् च"[१३] इति सूत्त्रमुपलब्भ्यते। शषसहानाम् ईषद्विवृतकरणकत्त्वमपि बहुभिरेव स्स्फुटम् प्रतिपादितमस्ति। तथाहि— "ईषद्विवृतकरणा ऊष्माणः"[१४] इति आपिशलिशिक्क्षासूत्त्रे। पाणिनीयव्याकरणभाष्येऽपि— "स्पृष्टङ करणं स्पर्शानाम्, ईषत्त्स्पृष्टमन्तस्स्थानाम्, विवृतमूष्मणाम्, ईषदित्त्येवाऽनुवर्त्तते; स्वराणावँ विवृतम्,ईषदिति निवृत्तम्"[१५] इति वदता मुनिना पतञ्जलिना ऊष्मणां सर्वेषामेवेषद्विवृतकरणकत्त्वमास्स्थितन् दृश्श्यते। तैत्तिरीयप्रातिशाख्येऽपि— "करणमद्ध्यन् तु विवृतम्"[१६] इति उक्तत्त्वात् करणमद्ध्यमात्त्रस्स्य विवृतत्त्वं स्वीकृतमिति तत्त्रोष्मणाम् ईषद्विवृतत्त्वमेव स्स्वीकृतम् प्रतीयते। पाणिनीयशिक्क्षायान् तु — "नेमस्स्पृष्टाश् शलस् स्मृताः"[१७] इत्त्युक्तम्। याज्ञ्ज्ञवल्क्यशिक्क्षायाञ् च — "ऊष्माणोऽर्धस्स्पृशः"[१८] इति। वर्णरत्नप्प्रदीपिकायाञ् च— "अर्धस्स्पृष्टाश् च विज्ञ्ज्ञेया

---

१. १३।११। २. १।३। ३. १।३१। ४. १।१।१०।
५. अनृतऽप्रयत्नप्प्रकरणे सू. ६, ७। ६. श्लो. २१।
७. श्लो. १७। ८. श्लो. ७० (शि. स, पृ. ४६९)। ९. पृ. ११।
१०. १४।१०। ११. श्लो. ८० (३।५६)। १२. सू. ५५।
१३. सू. २४। १४. अनृतऽप्रयत्नप्प्रकरणे सू. ६।
१५. १।१।१०। १६. २।४५। १७. श्लो. [illegible]।
१८. श्लो. ३१० (शि. स., पृ. ३२)।

ऊष्माणो वर्णवेदिभिः"[1] इति । व्यासशिक्षायाञ् च— "स्पृष्टत्वं स्पर्शसञ्ज्ञानाम् परेषाङ किञ् चिदुच्यते"[2] इति, "स्पर्शेभ्यश परेषाम् अन्तस्स्थानां हकारान्न्योष्मणाञ् च ईषत्स्पृष्टता स्स्यात्"[3] इति च वेदतैजसे ।

एतादृशश्याञ् च विप्रतिपत्तौ केचिदाचार्याश कण्ठ्यस्य ऊष्मण एव स्स्थितमस्स्पृष्टम् (विवृतम्) करणम्, तालव्यमूर्धन्यदन्त्यानान् तूष्मणामस्स्थितमस्स्पृष्टङ करणम् इति विवेकेन प्रतिपादयन्ति स्स्म । तदुक्तम् ऋग्वेदप्रातिशाख्ये— "नैकेऽकण्ठ्यस्य स्स्थितमाहुरूष्मणः"[4] इति ॥९६॥

ऊष्मसु स्स्थितमस्स्पृष्टङ करणं हविसर्गयोः ।
विवृतवँ वाऽथ शषसामीषद्विवृतमेव च ॥९७॥
जिह्वामूलीयस्य तथोपद्ध्मानीयस्य तूष्मणः ।
ईषत्स्पृष्टं हि करणमित्यस्माकम् मतिस् स्थिता ॥९८॥

ऊष्मसु मद्ध्ये हकारस्य विसर्गस्य च करणं स्थितमस्स्पृष्टम् बोद्ध्यम् । एतस्य च करणस्य विवृतत्वम् बहुभिरास्स्थितम्, तथाप्यस्य स्थितास्स्पृष्टत्वेनैवोल्लेखोऽनुवर्थतरो विवृतत्वस्य सर्वँवृतत्वपूर्वकत्वात् प्राकृतसर्वँवृतत्ववत्तिस्थितिपूर्वकत्वाद् वा । शषसाङ करणस्य तु ईषद्विवृतत्वेनैवोल्लेखो ज्यायान् न तु अर्धस्स्पृष्टत्वेन ईषत्स्पृष्टत्वेन वा, शषसामुच्चारणे स्थानसन्निकृष्टस्य करणस्य स्थानादीषद्दूरमपसरणात् । जिह्वामूलीयस्य उपद्ध्मानीयस्य च करणमीषत्स्पृष्टत्वेनैवोल्लेखनीयन् तयोरुच्चारणे तदुत्तरवर्तिनोश कुप्वोस् सान्निद्ध्याऽतिशयाज् जिह्वामूलेन ओष्ठेन च क्करमेण कोमलतालुपश्चाद्भागेऽधरे चेषत्स्पर्शनात् ॥९७–९८॥

अनुस्स्वारस्य करणं स्थितमस्स्पृष्टमास्स्थितम् ।
कैश् चित् कैश् चित् तूक्तमीषत्स्पृष्टं शिक्षाविचक्षणैः॥९९॥

तथाहि ऋग्वेदप्रातिशाख्ये— "स्वरानुस्स्वारोष्मणामस्स्पृष्टं स्थितम्"[5] इति । तत्रैव एके आचार्या अकण्ठ्यस्स्योष्मणस् स्थितङ करणन् नेत्याहुरित्यपि "नैकेऽकण्ठ्यस्य स्स्थितमाहुरूष्मणः"[6] इति सूत्रेणोक्तमिति एकेषाम् मतेऽकण्ठ्यस्स्योष्मणोऽनुस्स्वारस्य अस्स्थितम्

---

१. श्लो. ४१ (शि. स., पृ. १२०) । २. सू. ४०९ ।
३. व्या. शि. वे. तै. सू ४०९ । ४. १३।१२ । ५. १३।११ ।
६. १३।१२ ।

अस्स्पृष्टम् (ईषद्विवृतम्) करणमिति विज्ज्ञायते । तैत्तिरीयप्रातिशाख्ये च— "उपसंहृततरे च (हनू) जिह्वामूलकारकारल्कारेषु बर्स्वेषूपसंहरति, एकेषामनुस्स्वारस्स्वरभक्त्योश् च"[1] इत्युक्तम् । अतश् चाऽनुस्स्वारस्स्येषत्स्पृष्टत्वमीषद्विवृतत्वञ् वा प्रतीयते । उव्वटोऽपि—"अर्धस्स्पृष्टास्स्यप्रयत्ना ऊष्माणोऽनुस्स्वारश् च"[2] इति शुक्लयजुर्वेदप्रातिशाख्यभाष्ये प्राऽऽह ॥९९॥

करणं हविशेषत्वान् नासिक्यस्स्य हवच् च हि ।
इत्याब्भ्यन्तरयत्नोऽयवँ वर्णितोऽत्तर यथागमम् ॥१००॥

नासिक्यस्स्य हकारविशेषत्वाद् हकारस्स्येव करणम् बोद्ध्यम् । इदञ् च केवलङ कण्ठविवरविषयम् । चकारेण नासिक्यस्स्य विशिष्टङ करणमपि सङ्गृहीतम् । तच् च जिह्वामूलङ कोमलतालुनि सलँ लग्नं स्थिरीभूतञ् च बोद्ध्यम् । अत इदङ करणं स्थितं स्पृष्टमिति वक्तुं शक्यम् । नासिक्योच्चारणे हि जिह्वामूलेन कोमलतालुनि सलँ लग्नेन मुखमार्गेण निस्सरणान् निरुद्धो वायुर् नासिकामार्गेण निस्सरन् अनुनासिकहकाररूपताम् प्राप्तश् श्रूयते ।

आगमानुपलब्धौ स्वबुद्ध्याऽर्थतत्त्वमनुप्रविश्श्याऽपि यद्द्यपि केषाञ् चिद् वर्णानामाब्भ्यन्तरꣳ प्रयत्नोऽत्तर वर्णितस् तथापि आगमं सर्वथोल्लङ्घ्य तु न किमपि वर्णितमत्तरेति सूचितयँ 'यथागमम्' इति ॥१००॥

५. अथ वर्णस्वरूपसम्पत्त्यधिकारः

प्राणञ् चाऽनुप्प्रदानञ् च स्स्थानञ् च करणन् तथा ।
आस्स्यप्रयत्नमोष्ठौ च हनू कालन् तथा स्स्वरम् ॥१०१॥
यथाशास्तरम् प्रयुज्ज्याऽथ दोषाँश्च् च परिहृत्य ये ।
वर्णाꣳ प्रयुक्तास् स्वरूपसम्पन्नास् ते भवन्ति हि ॥१०२॥

यद्द्यपि— "स्थानकरणनादानुप्प्रदानज्ज्ञेयः"[3] इत्येतादृशीम् प्रसिद्धिमनुसृत्याऽस्मिन्नद्ध्याये विषयक्रमꣳ प्रायेणाऽऽश्श्रितस् तथापि अत्तर वर्णोच्चारणप्रक्रियानुरोधात् प्राणादीनाङ क्रमेणोल्लेखꣳ कृतो वेदितव्यः । वर्णोच्चारणदोषास् तु अनुपदमेव वक्ष्यन्ते ॥१०१-१०२॥

अकारकरणावस्स्थातुल्यावस्थेन चेत् स्वराः ।
करणेन प्रयुज्यन्ते सम्पन्नास् ते तदा स्मृताः ॥१०३॥

---

१. २।१८, १९ । २. १।७२ । ३. पा. व्या. भा. (पस्पशाह्निके); गोपथब्रा, १।१।२४, २७ ।

तथाहि ऋग्वेदप्रातिशाख्ये— "अकारस्य करणावस्थयाऽन्यान् स्वरान् ब्रूयात् तद् धि सम्पन्नमाहुः"[1] इति। एतेन सर्वेषां स्वराणामस्पृष्टास्थितकरणकतयोच्चारणीयत्वम् विहितम् प्रतीयते; किन्त्वन्यैश् शिक्षकैः केषञ् चित् स्वराणाङ् केन चिदंशेन स्पृष्टत्वमीषत्स्पृष्टत्वञ् च प्रतिपादितमिति स्वरादर्शस्स्वरूपप्रतिमानमिदं शौनकमुनेरेव प्रायेण सम्मतमिति प्रतीयते ॥१०३॥

व्यञ्जनानाय् यत्तर नाऽभिनिधानं शास्तरसम्मतम् ।
तत्तर स्स्वरेषु चाऽन्न्येषु व्यञ्जनेषु परेषु च ॥१०४॥
अकारोदयकानीवोच्चार्यन्ते व्यञ्जनानि चेत् ।
तदा स्स्वरूपसम्पत्तियुक्तानि स्स्युर् हि तान्न्यपि ॥१०५॥

तथाहि ऋग्वेदप्रातिशाख्ये—"परानकारोदयवद् विवक्षेत् सर्वत्तर वर्णानिति सम्पदेषा"[2] इति। यद्द्यप्यत्तर मुनिवचनेऽभिनिहितव्यञ्जनापवादो नास्ति, तथापि अभिनिहितीभावे व्यञ्जनानाम् अकारोदयकत्वावस्थायामिवोच्चारणङ् कथमपि न भवति, तदा करणस्य सन्धारणाच् श्रुतेश् च सर्वं वरणादित्यस्माभिरभिनिहितव्यञ्जनापवादः प्रतिपादितः। अकारोदयकानीवोच्चार्यन्ते व्यञ्जनानि चेदित्यस्य अकारे परे सति तस्य व्यञ्जनस्य यादृशी श्रुतिर् भवति तादृशश्येव श्श्रुतिः क्रियते चेदित्यर्थो न तु अन्न्येषु वर्णेषु परेष्वपि लेशेनाकारपरकत्वङ् कृत्वोच्चारणङ् क्रियते चेदिति ॥१०४–१०५॥

६. अथ वर्णोच्चारणदोषविवेकाधिकारः

उच्चारणेषु वर्णानाय् ये दोषास् सम्भवन्ति हि ।
ते समाहृत्य सङ्क्षेपादत्तरोच्च्यन्ते यथागमम् ॥१०६॥

(अ) वर्णदोषवर्गीकरणम्

अशास्त्रीयस्स्य धर्मस्स्य वर्णेषूपजनस् तथा ।
शास्त्रीयस्स्य विलोपश् चाऽन्न्यथाकरणमेव च ॥१०७॥
इमे त्रयो हि दोषास् स्युस् समासाद् व्यासतः पुनः ।
अनन्तास् तेऽत उच्च्यन्ते निदर्शनतयाऽल्पशः ॥१०८॥

तथा हि ऋग्वेदप्रातिशाख्ये— "समुद्दिष्टा वर्णगुणाः पुरस्तान् निर्दिष्टानां सांहितो यश् च धर्मः। तदायापायव्यथनानि दोषास् तान् वक्ष्यामोऽत्तर निदर्शनाय"[3] इति, "न दोषाणां स्वरसयं योगजानामन्तो गम्यस् सङ्ख्ययाऽथेतरेषाम्"[4] इति च ॥१०७–१०८॥

---

१. १४।६५, ६६। २. १४।६७। ३. १४।१। ४. १४।६९।

(१) आयदोषनिरूपणम्

अशास्त्रीयस्य धर्मस्य वर्णेषूपजनो हि यः ।

स आय इति ऋग्वेदप्रातिशाख्ये प्रकीर्तितः ॥१०९॥

तथाहि— "समुद्दिष्टा वर्गुणाः पुरस्तान् निर्दिष्टानां सांहितो यश् च धर्मः । तदायापायव्यथनानि दोषाः"[1] इति ऋग्वेदप्रातिशाख्येऽपि नामभिरेवान्वर्थैरायादयो दोषा निरूपिताः ॥१०९॥

(२) अपायदोषनिरूपणम्

शास्त्रीयवर्णधर्मस्य विलोपोऽपाय उच्यते ।

मुनिना शौनकेनैव ग्रन्थे बाह्वृचपारिषदे ॥११०॥

मुनिवचनम् पूर्वश्लोकविवरण एव प्रदर्शितम् ॥११०॥

(३) व्यथनदोषनिरूपणम्

वर्णधर्मस्य शास्त्रेण विहितस्याऽन्यथाकृतिः ।

या तद् धि व्यथनम् प्रोक्तम् मुनिना शौनकेन हि ॥१११॥

अत्रापेक्षितम् मुनिवचनमपि पूर्वतरश्लोकविवरण एव प्रदर्शितन् द्रष्टव्यम् ॥१११॥

(आ) दोषविशेषविषयवर्गीकरणम्

तेषाँ विशेषेषु के चित् स्वरव्यञ्जनगास् तथा ।

के चित् तु स्स्वरगा दोषाः के चिद् व्यञ्जनमात्रगाः ॥११२॥

(इ) अथ स्वरव्यञ्जनोभयगदोषोद्देशः

निरस्तम् पीडनञ् चैवाऽम्बूकृतं शूनमित्यपि ।

ग्रस्तवँ वाऽप्यथवा ग्ग्रासश् चानुनासिकमेव च ॥११३॥

अनन्यवर्णतत्त्वकरणं स्वरे वा व्यञ्जनेऽपि वा ।

सम्भवन्त इमे दोषाश् शौनकेन प्रकीर्तिताः ॥११४॥

(१) निरस्तनिरूपणम्

निरस्तवँ वा निरासो वा स्थानस्य करणस्य च ।

अपकर्षे भवेद् दोषोऽथवाऽपि त्वरितोदिते ॥११५॥

स्वरेषु सर्वेष्वपि च चवर्गे च टवर्गके ।

रेफे हभिन्नोष्मसु च दोषोऽयं सम्भवी स्स्मृतः ॥११६॥

तथाहि ऋग्वेदप्रातिशाख्ये— "निरस्तं स्थानकरणापकर्षे"[2] इति । नामलिङ्गानुशासने तु— "निरस्तन् त्वरितोदितम्"[3] इत्युक्तम् । त्वरिते

---

१. १४।१ । २. १४।२ । ३. १।६।१९ ।

उच्चारणे उच्चारणीयस्य वर्णस्याऽप्यनुच्चारणेन निरासो भवतीति त्वरितोदितन् निरस्तमुच्यते इति व्याख्या च सम्भवति। मुनिना शौनकेन निरस्तस्य "सन्दंशो व्यासः पीडनन् निरासः"[1] इति वचनेन स्वरेषु सम्भवित्वम्, "सरेफयोर् मध्यमयोर् निरासः"[2] इति वचनेन रेफे चवर्गीयवर्णेषु टवर्गीयवर्णेषु च सम्भवित्वम्, "निरासोऽन्त्येषूष्मसु पीडनवँ वा"[3] इति वचनेन च हभिन्नेषूष्मसु च सम्भवित्वम् प्रतिपादितम्। "सर्व ऊष्माणोऽग्ररस्ता अनिरस्ता विवृताः"[4] इति च्छान्दोग्योपनिषद्वचनात् तु निरस्तदोषस् सर्वेष्वेवोष्मसु सम्भवी विज्ज्ञायते ॥११५-११६॥

(२) पीडननिरूपणम्

पीडनं स्थानकरणसङ्कोचस् स्यात् स्वरेषु च।
द्विर्भाव इव तत् प्रोक्तवँ व्यञ्जनेषु समेषु च ॥११७॥

तथाहि ऋग्वेदप्रातिशाख्ये— "विहार-संहारयोर् व्यास-पीडने"[5] इति। तद्भाष्ये उव्वटश् च "पीडनन् द्विर्भावः" इति। पीडनस्य स्वरेषु सम्भवित्वञ् च— "सन्दंशो व्यासः पीडनन् निरासः"[6] इति वचनेन, व्यञ्जनेषु सम्भवित्वञ् च— "लेशेन वा वचनम् पीडनवँ वा"[7] इति वचनेन ऋग्वेदप्रातिशाख्ये प्रतिपादितम् ॥११७॥

(३) अम्बूकृतनिरूपणम्

अम्बूकृतं सनिष्ठीवम् बद्धोष्ठोच्चारणं स्मृतम्।
तत् क्व चित् त्वविशिष्योक्तङ् क्व चिदुक्तं स्वरस्थितम् ॥११८॥

तथाहि ऋग्वेदप्रातिशाख्ये— "ओष्ठाब्भ्याम्बूकृतमाह नद्धन् दुष्टम्"[8] इति। "अम्बूकृतं सनिष्ठीवम्"[9] इति नामलिङ्गानुशासने च। अस्य दोषस्य मुनिना शौनकेन विषयो न विशेषेण निर्दिष्ट इति सर्वेष्वेव वर्णेषु सम्भवव्ययन् दोष इति तन्मतवँ विज्ज्ञायते। पाणिनीयव्याकरणभाष्ये पतञ्जलिमुनिना तु— "ग्रस्तन् निरस्तमवलम्बितन् निर्हतमम्बूकृतन् ध्मातमथो विकम्पितम्। सन्दष्टमेणीकृतमर्धकन् द्रुतवँ विकीर्णमेताम् स्वरदोषभावनाः"[10] इति अम्बूकृतं स्वरदोषेषु गणितम् ॥११८॥

---

१. १४।११। २. १४।२४। ३. १४।२९।
४. २।२२।५। ५. १४।३। ६. १४।११। ७. १४।१७।
८. १४।४। ९. १।६।२०। १०. पस्पशाह्निके।

(४) शूननिरूपणम्

शुषिरीकृतवक्त्रेणोच्चारितं शूनमुच्यते ।
तच् चाऽपि मुनिना वर्णविशेषे नैव योजितम् ॥११९॥

तथाहि ऋग्वेदप्रातिशाख्ये—"मुखेन सुषिरेण शूनम्"[१] इति । मुनिना शौनकेनाऽयमपि दोषो वर्णविशेषविषयकतया नोक्त इत्यस्य स्वरव्यञ्जनायोगवाहसाधारणवर्णमात्रविषयकत्वन् निश्चीयते ॥११९॥

(५) ग्रस्तनिरूपणम्

जिह्वामूलं सन्निगृह्ययोच्चारणङ्ग ग्रस्तमुच्यते ।
कण्ठ्ये स्वरे कवर्गे च दोषोऽयं सम्भवी स्मृतः ॥१२०॥

तथाहि ऋग्वेदप्रातिशाख्ये— "जिह्वामूलनिग्ग्रहे ग्रस्तमेतत्"[२] इति । अस्य दोषस्य कण्ठ्ये स्वरे सम्भवित्वञ्च "ग्रासः कण्ठ्ययोः"[३] इति वचनेन; कवर्गीयेषु वर्णेषु सम्भवित्वञ्च "ग्रासो मुक्ख्ये"[४] इति वचनेन ऋग्वेदपार्षदे प्रतिपादितम् । "सर्व ऊष्माणोऽग्रस्ता अनिरस्ताः"[५] इति च्छान्दोग्योपनिषद्वचनात् तूष्मस्स्वप्ययन् दोषस् सम्भवी विज्ज्ञायते । पाणिनीयव्याकरणभाष्येऽग्रसम्मतत्वेन धृते—"ग्रस्तन् निरस्तमविलम्बितन् निर्हतमम्बूकृतन् ध्मातमथो विकम्पितम् । सन्दष्टमेणीकृतमर्धकन् द्रुतवँ विकीर्णमेतास् स्वरदोषभावनाः"[६] इति श्लोके तु ग्रस्तदोषस् स्वरविषयकतया निर्दिष्टः । जिह्वामूलनिग्ग्रहजोऽयन् दोषो जिह्वामूलीये ऋकारे लृकारे च सम्भवेदिति अस्माकम् प्रतिभाति ॥१२०॥

(६) अनुनासिकनिरूपणम्

नासिके अनुयोज्ज्योक्तयँ यत् तत् स्यादनुनासिकम् ।
शुद्धे स्वरे विसर्गे च दोषोऽयम् मुनिनोदितः ॥१२१॥

तथाहि ऋग्वेदप्रातिशाख्ये— "नासिकयोस् त्वनुषङ्गेऽनुनासिकम्"[७] इति । एतस्य दोषस्य अनुनासिकव्यञ्जनयुतेषु स्वरेषु सम्भवित्वं "रक्तं रागस् समवाये स्वराणान् न नूनन् नृम्णन् मृमणा नृभिर् नृन्"[८] इति वचनेन; विसर्जनीये सम्भवित्वञ्च "रक्तात् तु नासिक्यमपीतरस्मात्"[९] इति वचनेन मुनिना शौनकेन प्रतिपादितम् ॥१२१॥

---

१. १४।५ । २. १४।८ । ३. १४।१२ । ४. १४।२२।
५. २।२२।५ । ६. पस्पशाह्नन्निके । ७. १४।९ ।
८. १४।५६ । ९. १४।३२ ।

(७) अनन्यवर्णतत्वकरणनिरूपणम्

तत्सदृक्क्षानन्यवर्णतत्वकरणेऽनन्यप्परभावतः ।
अनन्यवर्णतत्वकरणं स्यात् स्वरे व्यञ्जनेऽपि वा ।।१२२।।

यद्द्यपि ऋग्वेदप्रातिशाक्ख्येऽपि अनन्यवर्णतत्वकरणन् नाम दोषो नाम्ना नोपात्तस् तथाऽपि तत्तरोदाहरणंस् त्वयन् दोषो विस्तरेण प्परदर्शितः। तथाहि—"स्वरौ कुर्वन्त्योष्ठ्यनिभौ सरेफौ तिस्स्रो मातॄस् त्रीन् पितॄन् यन् नृभिर् नॄन् ।। दन्त्यान् सकारोपनिभानघोषान् रत्थ्यx पृथ्वी पृथिवी त्वा पृथीति"[1] इति; "ऐयेरित्त्यैकारमकारमाहुर् वयश्श्वेति क्क्रमयन्तो यकारम्" "तदेवान्न्येषु विपरीतमाहुस् ते रय्या वय्यञ् च हृदय्ययेति च" "अकारस्स्य स्स्थान ऐकारमाहुर् लुम्पन्ति च सयमीकारमुत्तरम्। वह्वक्क्षरन् द्व्यक्क्षरतान् नयन्ति यथोनयीर् ध्वनयीत् कोशयीरिति" "तदेव चान्न्यत्तर विपर्ययेण कार्य ऐत्त्वे सयकारमाहुः। धातोर् बिभेतेर् जयतेर् नियश् चाऽभैष्म चाऽजैष्म नैष्टेति चैषु" "इकारस्स्य स्स्थान ऋकारमाहुर् लृकारवँ् वा चन्द्रनिर्णिक् सुशिल्पे ।" "अनन्तरे तद्विपरीतमाहुस् तालव्ये शृङ्गे बिभृयाद् विचृत्ताः"[2] इति, "रक्तात् तु सोष्मा क्रियते हकारो 'दद्ध्यङ् ह्' 'देवान् हवते' 'महान् हि' "[3] इति च ।।१२२।।

(ई) अथ स्वरगतदोषोद्देशः

अयथामात्तरवचनन् दीर्घीकरणमेव च ।
द्रुतत्वमर्धकञ् चाऽभिव्यादानञ् च विकीर्णता ।।१२३।।
सर्वं वृतत्वङ् कलत्वञ् च द्ध्मातञ् चैणीकृतन् तथा ।
प्रगीतमुपगीतञ् च निर्हतञ् च विकम्पितम् ।।१२४।।
अवलम्बितता चौष्ठ्यामता विषमरागता ।
व्यासस् सन्दष्ट-विक्क्लिष्टे दोषास् सम्भविनस् स्वरे ।।१२५।।

(१) अयथामात्तरवचननिरूपणम्

मात्तरया त्त्वधिकं हीनवँ् वा कृत्वोच्चारणं हि यत् ।
अयथामात्तरवचनन् नाम दोषस् स उच्च्यते ।।१२६।।

तथाहि ऋग्वेदप्रातिशाक्ख्ये— "अयथामात्तरवँ् वचनं स्वराणाम्"[4] इति ।।१२६।।

---

१. १४।३८, ३९ । २. १४।४१-४६ । ३. १४।५७ ।
४. १४।१० ।

(२) दीर्घीकरणनिरूपणम्

प्रपञ्चरूपास् तस्यैव दीर्घीकरणकादयः ।

अदीर्घदीर्घकरणन् दीर्घीकरणमुच्यते ॥१२७॥

तस्यैवाऽयथामात्त्रवचनदोषस्य प्रपञ्चरूपा दीर्घीकरणादयो दोषा वेदितव्याः । दीर्घीकरणदोषस्योल्लेखश् च— "रक्तं ह्रस्वन् द्राघयन्त्युग्रं श्रोकः"[1] इति ऋग्वेदप्रातिशाख्ये एव प्प्राप्प्यते ॥१२७॥

(३) द्रुतनिरूपणम्

द्रुतवृत्तेर् द्रुततरमुक्तन् दुष्टन् द्रुतम् मतम् ।

अयन् दोषः पाणिनीयव्याकरणभाष्ये[2] स्वरदोषतयोल्लिखितोऽस्ति ॥

(४) अर्धकनिरूपणम्

स्वरं हि अर्धवत् कृत्वा वचनं ह्यर्धकम् मतम् ॥१२८॥

अयमपि दोषः पाणिनीयव्याकरणभाष्ये[3] स्वरदोषतयोल्लिखितो दृश्यते ॥१२८॥

(५) विकीर्णत्वाऽभिव्यादानयोरैक्ययेन निरूपणम्

स्वरं स्वरान्तरे कृत्वा प्रसृतयं यद् धि भाष्यते ।

विकीर्णत्वन् नाम दोषस् सोऽभिव्यादानमेव वा ॥१२९॥

विकीर्णन् नाम दोषो हि पाणिनीयव्याकरणभाष्ये पस्पशाह्निकान्ते 'ग्रस्तन् निरस्तम्' इत्यादिके श्लोके उल्लिखितोऽस्ति । अभिव्यादानञ् च दोषो हि ऋग्वेदप्रातिशाख्ये "अभिव्यादानञ् च विवृत्तिपूर्वे"[4] इति प्प्रतिपादितोऽस्ति । तयोस् सलक्ष्णतया व्याख्यातृभिर् व्याख्यातत्वादस्माभिरैक्यं सम्भाव्याऽत्त्रैकत्वेन तयोः प्रतिपादनञ् कृतवं वेद्द्यम् ॥१२९॥

(६) सर्वं वृतत्त्वनिरूपणम्

सर्वं वृतं स्थानकरणातिसान्निद्ध्येन भाषितम् ।

अयन् दोषो 'ग्रस्तन् निरस्तम्' इत्यादिके श्लोके पाणिनीयव्याकरणभाष्ये पस्पशान्ते प्रतिपादितोऽस्ति ॥

(७) कलत्त्वनिरूपणम्

मधुराऽस्स्फुटता स्थानान्तरकोच्चारणादिजा ॥१३०॥

या स्वरे तत् कलत्त्ववं वा स्यात् काकलिकताऽपि वा ।

एषोऽपि दोषः पाणिनीयव्याकरणभाष्ये प्रतिपादितः पस्पशान्ते ॥

---

१. १४।५१ । २. पस्पशान्ते । ३. तत्स्वरैव । ४. १४।५२ ।

(८) ध्मातनिरूपणम्

स्वरस्य श्वासभूयिष्ठोच्चारणन् ध्मातमुच्यते ॥१३१॥

अयमपि दोषो ग्रस्तन् निरस्तमित्यादिके श्लोके पाणिनीयव्याकरण-भाष्ये उल्लिखितः ॥१३१॥

(९) एणीकृतनिरूपणम्

एणीकृतं स्यादव्यक्तं स्वरदद्वापरकारणम् ।

अयमपि दोषः पाणिनीयव्याकरणभाष्ये[1] उल्लिखितोऽस्ति । "एणीकृतः मुखाद् विप्रुषोऽनिर्गमयन् एणीकृतम्" इति लाट्ट्यायन-श्रौतसूत्रे उक्तमिति केचित्[2] । "एणीकृतोऽव्यक्तः" इति भाष्यदीपिकायाम् भर्तृहरिः ॥

(१०) प्रगीतनिरूपणम्

प्रगीतं सामवद् गीत्वा कृतमुच्चारणम् मतम् ॥१३२॥

अयमपि दोषः पाणिनीयव्याकरणभाष्ये पस्पशान्ते उल्लिखितः ॥१३२॥

(११) उपगीतनिरूपणम्

उपगीतन् तु लेशेन गीत्वोच्चारणमुच्यते ।

अयमपि दोषः पाणिनीयव्याकरणभाष्ये पस्पशान्ते उल्लिखितोऽस्ति ॥

(१२) निर्हतनिरूपणम्

निर्हतं रूक्षताङ्ग कृत्वा स्वरस्योच्चारणं स्मृतम् ॥१३३॥

अयमपि दोषः पाणिनीयव्याकरणभाष्ये पस्पशान्ते उल्लिखितः ॥१३३॥

(१३) विकम्पितनिरूपणम्

स्वरस्योच्चारणे स्स्थाने करणस्य विकम्पनात् ।

द्विरिवोच्चारितयँ यत् स्यात् तद् धि वेद्द्यवँ विकम्पितम् ॥१३४॥

अयमपि दोषः पाणिनीयव्याकरणभाष्ये पस्पशान्त एवोल्लिखितः ॥१३४॥

(१४) व्यासनिरूपणम्

व्यासो हि स्स्थानकरणविस्तारो दोष उच्यते ।

स च स्स्वरेषु सर्वेषु सम्भवन् परिकीर्तितः ॥१३५॥

तथाहि ऋग्वेदप्रातिशाख्ये— "विहार-संहारयोर् व्यास-पीडने"[3] इति । तद्व्याख्याने उव्वटश् च—"विहारो विहरणवँ विस्तारः, संहारस् संहरणम् अन्न्यथाकरणं सङ्कोचनवँ वा । कस्य ? स्थानकरणयोः"[4]

---

१. पस्पशान्ते । २. पा. व्या. भा. टि. (हरियाणासँस्करणे)।
३. १४।३ । ४. ऋ. प्रा. उ. भा. १४।३ ।

इति, "व्यासोऽविवेकः"[1] इति च। "(अयथामात्त्रवँ वचन) स्वराणां सन्दंशो व्यासः पीडनन् निरासः"[2] इति वचनेन च मुनिना शौनकेन व्यासदोषस्य सर्वेषु स्स्वरेषु सम्भवित्त्वम् प्रदर्शितम् ॥१३५॥

(१५) सन्दष्टनिरूपणम्

हन्वोस् संश्लेषणेनोच्चारणं सन्दष्टमुच्यते।
स्वरे शुद्धे च रक्ते च दोषोऽयं सम्भवी स्मृतः ॥१३६॥

तथाहि ऋग्वेदप्रातिशाख्ये— "सन्दष्टन् तु व्रीडन आह हन्वोः"[3] इति। पाणिनीयव्याकरणभाष्ये च 'रसतन् निरस्तम्' इत्यादिके परकीयत्त्वेन धृते श्लोके[4] चाऽयन् दोष उल्लिखितः। अस्य मुनिना शौनकेन "(अयथामात्त्रवँ वचन) स्वराणां सन्दंशो व्यासः पीडनन् निरासः"[5] इति वचनेन सर्वेषु स्स्वरेषु सम्भवित्त्वम्, "अनुनासिकानां सन्दष्टता विषमरागता वा"[6] इति वचनेन अनुनासिकेषु रक्तापरपर्यायेषु स्स्वरेषु सम्भवित्त्वमुक्तम् ॥१३६॥

(१६) विषमरागतानिरूपणम्

रक्तस्स्वरा शेष्वसमानुनासिकव्यवँ विधाय यत्।
उच्चारणं स्यात् सा विज्ञैरुक्ता विषमरागता ॥१३७॥

तथा हि ऋग्वेदप्रातिशाख्ये— "अनुनासिकानां सन्दष्टता विषमरागता वा"[7] इति। अनुनासिकत्त्वेनोच्चार्यस्य दीर्घस्य प्लुतस्य ह्रस्वस्यैव वाऽपि स्वरस्य आदाननते वाऽधिकन् न्यूनवँ वा रागङ्ग कृत्वा रागाभावमेव वाऽपि कृत्वोच्चारणे हि विषमरागता वक्तव्या न तु सर्वथैवाऽरक्तत्त्वेन रक्ताऽरक्तस्स्वरव्यत्त्यासेन वोच्चारणे इति विवेक्तव्यं सुधीभिस् सदसद् वा व्याख्यानम् ॥१३७॥

(१७) अवलम्बितनिरूपणम्

स्वरान्तरे स्वरस्याऽवलम्बने त्त्ववलम्बितम्।

अयन् दोषः पाणिनीयव्याकरणभाष्ये पस्पशान्ते उल्लिखितोऽस्ति ॥

(१८) ओष्ठ्याभतानिरूपणम्

ऋकारस्स्वरभागस्योष्ठ्याभतोकारतुल्यता ॥१३८॥

तथा हि ऋग्वेदप्रातिशाख्ये—"स्वरौ कुरुवन्त्योष्ठ्यनिभौ सरेफौ तिस्स्रो मातॄस् त्रीन् पितॄन् यन् नृभिर् न नॄन्"[8] इति। ह्रस्वदीर्घयोर् ऋकार-

---

१. ऋ. प्रा. उ. भा. १४।३। २. १४।१०, ११।
३. १४।६। ४. पस्पशान्ते। ५. १४।१०, ११।
६. १४।१३। ७. पूर्वा टिप्पणी द्रष्टव्या। ८. १४।३८।

योर् हि रु इति रू इति चोच्चारणम् उत्कलजानामन्न्येषाञ् च दाक्षिणात्त्यानान् द्रामिडानाञ् केषाञ् चिल् लौकिकसँस्कृतविषये वेदविषये च श्श्रूयते ॥१३८॥

(उ) अथ व्यञ्जनगदोषोद्देशः

दोषा व्यञ्जनगास् त्वन्न्योन्न्यविरागस् तथैव च ।
स्याल् लेशवचनञ् चापि सर्वव्यञ्जनगानि हि ॥१३९॥
जिह्वाप्प्रथनमेवाऽथो विक्लेशप्रतिहारकः ।
सकारनिभता बर्बरताऽतिस्स्पर्श एव च ॥१४०॥
जिह्वान्तवचनञ् चैव लोमशश्यङ् कण्वेडनन् तथा ।
श्वासश् चाऽघोषनिभताऽनुनादश् चाऽप्प्यनादकः ॥१४१॥
धारणञ् च तथा रक्तधारणञ् चेति कीर्तिताः ।
सम्भवन्तश् शौनकेन स्वके बह्वृचपार्षदे ॥१४२॥

(१) अनन्न्योन्न्यविरागनिरूपणम्

व्यञ्जनेषु यदाऽनन्न्योन्न्यधर्मसङ्करमणम् भवेत् ।
सान्निद्ध्यात् स इहाऽनन्न्योन्न्यविराग इति कत्थ्यते ॥१४२॥

तथाहि ऋग्वेदप्रातिशाक्ख्ये— "अनन्न्योन्न्येन व्व्यञ्जनावँ विरागः"[1] इति ॥१४३॥

(२) लेशवचननिरूपणम्

तल् लेशवचनयँ यत्न-मानुद्ध्येनोच्चारणं हि यत् ।
वर्णम् पूर्णमनुच्चार्य तल्लवोच्चारणं हि वा ॥१४४॥

तथाहि ऋग्वेदप्रातिशाक्ख्ये— "लेशेन वा वचनम् पीडनवँ वा"[2] इति ॥१४४॥

(३) जिह्वाप्प्रथननिरूपणम्

जिह्वायास् तु परीणाहवँ वर्धयित्त्वा विधीयते ।
उच्चारणयँ यत् तज् जिह्वाप्प्रथनन् दोष उच्च्यते ॥१४५॥

तथाहि ऋग्वेदप्रातिशाक्ख्ये— "वर्गेषु जिह्वाप्प्रथनञ् चतुर्षु"[3] इति ॥१४५॥

(४) विक्क्लिष्टनिरूपणम्

परस्परन् दूरतरं हनू नीत्त्वा क्क्रियेत चेत् ।
उच्चारणन् तद् धि विज्ज्ञैर् विक्क्लिष्टमिति कत्थ्यते ॥१४६॥

---

१. १४।१६। २. १४।१७। ३. १४।२१।

तथा हि ऋग्वेदप्रातिशाख्ये— "प्रकर्षणे तदु विक्लिष्टमाहुः"[1] इति ।।१४६।।

अवैशद्द्यम् भवेत् तस्थानकरणादिषु चेत् तदा ।
सकलस्स्थानविक्लेशो दोषस् स्यादिति च क्व चित् ।।१४७।।

तथा हि ऋग्वेदप्रातिशाख्ये— विक्लेशस् स्थाने सकले चतुर्थे (वर्गे)"[2] इति । "तेषु करणादिषु स्स्थाने च विक्लेशो नाम दोषो भवति । विक्लेशोऽवैशद्द्यमित्येकोऽर्थः" इति च तद्व्याख्यायामुव्वटः ।।१४७।।

(५) प्रतिहारनिरूपणम्

स्थाने यत्नातिरेकेण करणस्स्य हि योजने ।
प्रतिहारो नाम दोषस् तवर्गीयेषु सम्भवेत् ।।१४८।।

तथा हि ऋग्वेदप्रातिशाख्ये— "प्रतिहारश् चतुर्थे वर्गे"[3] इति । "अतिप्रयत्नः प्रतिहारः" इति तद्व्याख्यायामुव्वटः ।।१४८।।

(६) सकारनिभतानिरूपणम्

उच्चारणे तु तथयोस् स्थानात् करणविच्च्युतेः ।
तयोस् सकारतुल्यत्वं सकारनिभता मता ।।१४९।।

तथा हि ऋग्वेदप्रातिशाख्ये— "दन्त्यान् सकारोपनिभानघोषान् रत्थ्यः पृत्थ्वी पृथिवी त्वा पृथीति"[4] इति ।।१४९।।

(७) बर्बरतानिरूपणम्

रेफस्स्योच्चारणे शीघ्राज् जिह्वाग्रस्स्य विकम्पनात् ।
गुणितत्वमिव द्द्विस् त्रिर् वाऽपि बर्बरता मता ।।१५०।।

तथा हि ऋग्वेदप्रातिशाख्ये— "अतिस्स्पर्शो बर्बरता च रेफे"[5] इति । "बर्बरताऽप्यसौकुमार्यमेव" इति च तद्व्याख्याने उव्वटः प्राऽऽह ।।१५०।।

(८) अतिस्स्पर्शनिरूपणम्

रेफस्स्योच्चारणे स्थाने स्याद् यदा करणस्स्य हि ।
स्पर्शः पूर्णतरो दोषस् तदाऽतिस्स्पर्शता भवेत् ।।१५१।।

उक्तं हि ऋग्वेदप्रातिशाख्ये— "अतिस्स्पर्शो बर्बरता च रेफे"[6] इति । यद्द्यपि एषोऽतिस्स्पर्शो नाम दोषः प्रायिकतया रेफ एवोक्तो

---

१. १४।७ । २. १४।२५ । ३. १४।२५ । ४. १४।३९ । ५. १४।२६ । ६. पूर्वा टिप्पणी द्रष्टव्या ।

मुनिना तथापि अनन्यास्वप्यन्तस्थासु सम्भवत्येष दोष इति प्रतीयते ॥१५१॥

(९) जिह्वान्तवचननिरूपणम्

जिह्वायाः प्रयत्नाल् लस्योच्चारणे चेत् तयोपरि ।
मध्यान्ताभ्याम् भवेत् स्पर्शो जिह्वान्तवचनन् तदा ॥१५२॥

तथा हि ऋग्वेदप्रातिशाख्ये— "जिह्वान्ताभ्याम् च वचनलँ लकारे"[1] इति ॥१५२॥

(१०) लोमशश्यनिरूपणम्

स्थाने करणयोगस्याऽवैशद्याद् धि समागता ।
श्रुतौ वृद्धिरिवाऽघोषोष्मसु लोमशश्यमुच्यते ॥१५३॥

तथा हि ऋग्वेदप्रातिशाख्ये— "लोमशश्यन् च कृष्वेडनमूष्माणान् तु"[2] इति । "लोमशश्यन् नामासौकुमार्यम्" इति तद्व्याख्यायामुव्वटः । रोमश इत्येको दोषः पाणिनीयव्याकरणभाष्येऽप्युल्लिखितः पस्पशान्ते । तत्र च प्रायेण स्वरदोषाणामेव प्रदर्शितत्वाद् अयमपि स्वरदोषत्वेनैव तत्राऽभिमतः किमु । "रोमशो गम्भीरः" इति च तत्र कय्यटः । वस्तुतस् तु अयन् दोष ऊष्मणामेवेति सम्भाव्यते ॥१५३॥

(११) कृष्वेडननिरूपणम्

अघोषोष्मोच्चारणे हि स्थाने करणयोजने ।
तथा कालेऽपि चाऽऽधिक्यात् कृष्वेडनं श्रुतिवर्धनम् ॥१५४॥

तथा हि ऋग्वेदप्रातिशाख्ये— "लोमशश्यन् च कृष्वेडनमूष्माणान् तु"[3] इति । "कृष्वेडनन् नामाऽधिको वर्णस्य संरूपो दृष्टनिः" इति तद्व्याख्यायामुव्वटः । क्ष्विण्ण इत्येको दोषः पाणिनीयव्याकरणभाष्येऽपि पस्पशान्ते उल्लिखितः । तत्र च प्रायेण स्वरदोषा एवोद्दिष्टा इत्येषोऽपि दोषस् तत्र स्वरदोषत्वेनैवाऽभिमतः प्रतीयते । "क्ष्विण्णः कम्पमान इव" इति च तत्र कय्यटेनोक्तम् । वस्तुतस् तु अयमपि दोष ऊष्मणामेवेति प्रतीयते ॥१५४॥

(१२) श्वासाऽघोषनिभतयोरैक्येन निरूपणम्

श्वासाधिक्यं हकारस्योच्चारणे श्वास उच्यते ।
स एवाऽघोषनिभताऽप्युच्यते वर्णवेदिभिः ॥१५५॥

---

१. १४।२७। २. १४।२०। ३. पूर्वा टिप्पणी द्रष्टव्या ।

तथा हि ऋग्वेदप्रातिशाख्ये— "श्वासोऽघोषनिभता वा हकारे"[1] इति। "श्वासोऽधिकोऽघोषनिभताऽघोषसदृशतत्त्वं वा हकारस्य दोषो लक्ष्येत" इति च तद्व्याख्यायामुव्वटः ॥१५५॥

(१३) अनुनादनिरूपणम्

पदादिसयँयोगादिस्थ-घोषवद्व्यञ्जनस्य यद्।
द्विरिवोच्चारणादादौ गुञ्जितं सोऽनुनादकः ॥१५६॥

तथाहि ऋग्वेदप्रातिशाख्ये— "घोषवतामनुनादः पुरस्तादादिस्थानाङ्क्रियते धारणवँ वा"[2] इति। पदादिसयँयोगादिस्थानां सोष्मणामूष्मणाञ्च चाऽनुनादस्तत्तत्प्रतिपादितः। तथा हि— "सोष्मोष्मणामनुनादः"[3] इति। एतेन दोषविशेषस्य वर्णविशेषविषयतया तत्तत्र कथनम् प्रायिकत्वाभिप्रायेणेति च सूचितम् ॥१५६॥

(१४) धारणनिरूपणम्

तादृशस्य व्यञ्जनस्याऽभिनिधानीकृतिः पुनः।
धारणम् प्रोच्यते लोपो वाऽपि दोषज्ञतल्लजैः ॥१५७॥

तदुक्तम् ऋग्वेदप्रातिशाख्ये— "घोषवतामनुनादः पुरस्तादादिस्थानाङ्क्रियते धारणवँ वा"[4] इति, "सोष्मोष्मणामनुनादोऽप्यनादः"[5] इति च। तद्व्याख्याने उव्वटश्च "धारणन् नाम अनुपलब्धिः" इति, "अपरे धारणन् द्विर्वचनम् मन्यन्ते" इति, "अनादोऽशब्दः" इति च। तत्तत्र द्विर्वचननिभस्योच्चारणस्य सूत्रकारेणाऽनुनादत्वेनोपात्ततत्वस्य विज्ञायमानत्वाद् धारणम् अभिनिधानीकृतिरिति अस्माभिरुक्तम्। अभिनिधानीकृत्यनुपलब्ध्योरर्थे कियताऽप्यंशेन भिन्नेऽपि श्रुत्यभावांशे साम्यम् बोद्ध्यम्। सूत्रकारप्रयुक्तस्य धारणशब्दस्याऽभिनिधानीकृतिरित्येव युक्ततरोऽर्थ इत्यस्माकम् पक्षस् सुधीभिर् विशेषेणाऽऽकलनीयः; "सन्धारणं सवँवरगं श्रुतेश् च"[6] इति अभिनिधानीकरणप्रक्रियाऽपि सूत्रकारोक्ताऽनुसन्धेया। "अनादः" इत्यस्य तु अशब्द इति, अनुच्चारणमिति, लोप इति वाऽप्यर्थो युक्त एव दृश्यते ॥१५७॥

(१५) रक्तधारणनिरूपणम्

सान्तस्थसयँयोगात् पूर्ववँ वर्गान्त्यवँ व्यञ्जनं स्थितम्।
विलम्बेनोच्चार्यते यत् तदुक्तं रक्तधारणम् ॥१५८॥

---

१. १४।२८। २. १४।१८। ३. १४।१९।
४. १४।१८। ५. १४।१९। ६. ६।१७।

तथाहि ऋग्वेदप्रातिशाख्ये— "सान्तस्थादौ धारयन्तꣳ परक्रमं शर्मन् स्यामाऽस्मिन् सु जनाञ् छ्रुधीयतः"[1] इति ।

ऋग्वेदप्रातिशाख्यस्य चतुर्दशे पटले निरूपिता अन्ये उच्चारणदोषाः पदोच्चारणदोषत्वेन वाक्योच्चारणदोषत्वेन वा सामाऽध्याये प्रदर्शयिष्यन्ते ।।१५८।।

इति बलाध्यायꣳ पञ्चमः।।

---

१. १४।५५ ।

अथ षष्ठोऽध्यायः

सामनिरूपणम्

१. सामपरिभाषा

अतिद्द्रुतत्वादिशून्यम् माधुर्यादियुतन् तथा ।
उच्चारणलं लययुतमाहुस् सामेति शिक्षकाः ॥१॥

तथा हि "शीक्षावं व्याख्यास्यामः । वर्णस् स्वरः । मात्रा बलम् । साम सन्तानः । इत्युक्तश् शीक्षाद्ध्यायः"[1] इति तैत्तिरीयोपनिषद्वाक्यस्य व्याख्याने शङ्करभगवत्पादः "साम=वर्णानाम् मद्ध्यमवृत्त्योच्चारणम्, समता" इति । सायणोऽपि "अतिद्द्रुतत्वमतिविलम्बितत्वञ् च परिहृत्य यस्स्य यऽ काल उचितस् तावति काले तदुच्चारणं साम्यन् तदेव सामशब्देनोच्यते"[2] इति तैत्तिरीयारण्यकव्याख्याने; "सामशब्देन साम्यमुक्तम् । अतिद्द्रुतातिविलम्बितगीत्यादिदोषराहित्येन माधुर्यादिगुणयुक्ततत्वेनोच्चारणं साम्यम्"[3] इति च ऋग्वेदभाष्यभूमिकायाम् ॥१॥

२. आदर्शरूपोच्चारणनिरूपणम्

युक्तेन पाठकगुणऽ पुंसा हि विहितञ् च यत् ।
स्पष्टवर्णञ् च मधुरम् प्रारम्भान्तसमन् तथा ॥२॥
पदच्छेदादिसहितवं विवृत्त्योचितयाऽपि च ।
काक्वा चोचितया युक्तवं विरामैरुचितैर् युतम् ॥३॥
रहितम् पदवाक्यादिदोषैश् शास्त्रानुगञ् च यत् ।
उच्चारणन् तदादर्शभूतमुच्चारणं स्मृतम् ॥४॥

तथा हि पाठक-पाठ-गुणादिप्रतिपादकानि प्राचां शिक्षकाणावं वचनानि— "नातिव्यक्तन् न चाऽव्यक्तमेववं वर्णानुदीरयेत् । पयऽपूर्णमिवाऽमत्त्रं हरन् धीरो यथामति"[4] इति, "क्रमविक्रमसम्पन्नामद्द्रुतामविलम्बिताम् । नीचोच्चस्स्वारसम्पन्नावं वदेद् धृतवतीं

---

१. १।२। २. ७।२। ३. शा. ऋ. वे. सं., प्र. भा., पृ. २५। ४. तै. प्रा. १७।८।

समाम्"[१] इति च तैत्तिरीयप्रातिशाख्ये। शैशिरीयशिक्षायाम् च—"स्वस्थ× प्रशान्तो निर्भीतो वर्णानुच्चारयेद् बुधः। नाब्भ्याहन्न्यान् न निर्हन्न्यान् न गायेन् न च कम्पयेत्॥ यथैवोच्चारयेद् वर्णान् तथैवैतान् समापयेत्"[२] इति, "माधुर्यम् च न नाऽव्यक्तम् व्यक्तम् च न च पिण्डयेत्। सनाथस्येव देशस्य न वर्णास् सङ्करङ्ग गताः"[३] इति, "माधुर्यमक्षरव्यक्तम् पदव्यक्तम् तु सुस्वरम्। धैर्यलँ लघु(य?)समायुक्तं षडेते पाठके(=पाठे?)गुणाः"[४] इति च। पाणिनीयशिक्षायाम् च—"एवँ वर्णा× प्रयोक्तव्या नाव्यक्ता न च पीडिताः। सम्यग् वर्णप्रयोगेण ब्रह्मलोके महीयते"[५] इति, "माधुर्यमक्षरव्यक्ति× पदच्छेदस् तु सुस्वरः। धैर्यलँ लयसमर्थम् च षडेते पाठका(गाः?)गुणाः"[६] इति, "सुतीर्थादागतवँ व्यक्तं स्वामुखाम् सुव्यवस्थितम्। सुस्वरेण सुवक्त्रेण प्रयुक्तम् ब्रह्मम राजते"[७] इति च। याज्ञवल्क्यशिक्षायाम् च—"यथादावुच्चरेद् वर्णाँस् तथैवैतान् समापयेद्"[८] इति, "माधुर्यमक्षरव्यक्ति× पदच्छेदस् तु सुस्वरः। धैर्यलँ लयसमर्थत्वम् च षडेते पाठके गुणाः"[९] इति, "आचार्याः समभिच्छन्ति पदच्छेदन् तु पण्डिताः। स्त्रियो मधुरमिच्छन्ति विक्रुष्टमितरे जनाः"[१०] इति, "यथा व्याघ्री हरेत् पुत्रान् दंष्ट्राभिर् न च पीडयेत्। भीता पतन-भेदाभ्यान् तद्वद् वर्णान् प्रयोजयेत्॥ मधुरम् चाऽपि नाऽव्यक्तम् सुव्यक्तम् न च पीडितम्। सनाथस्येव देशस्य न वर्णास् सङ्करङ्ग गताः"[११] इति, "यथा सुमत्तनागेन्द्र× पदात् पादन् निधापयेत्। एवम् पदम् पदाद्दद्यन्तन् दर्शनीयम् पृथक्पृथक्"[१२] इति, "न कुर्वीत पदन् दीर्घन् न चाऽतत्यन्तविलम्बितम्। पदस्य गरुहमोक्षौ च यथा शीघ्रगतिर् हयः"[१३] इति च। कौहडीयशिक्षायाम् च—"क्रमविक्रमसमपन्नामद्द्रुतामविलम्बिताम्। नीचोच्चसस्वारसमपन्नावँ वदेद् धृतवती समाम्"[१४] इति। सर्वसम्मतशिक्षायाम् च—"उक्त× प्रयत्नो यो यस्य समस् सर्वत्तर

---

१. २३।२०। २. श्लो. ७२–७३। ३. श्लो. ९७। ४. श्लो. ९९। ५. श्लो. ३१। ६. श्लो. ३३। ७. श्लो. ५१। ८. श्लो. २२ (शि. स., पृ. ३)। ९. श्लो. १९९ (शि. स., पृ. २८–२९)। १०. श्लो. १२०, (शि. स., पृ. १९)। ११. श्लो. १९५–१९६ (शि. स., पृ. २८)। १२. श्लो. १९७ (शि. स., पृ. २८)। १३. श्लो. ४५ (शि. स., पृ. ६)। १४. श्लो. ६७।

तस्स्य सः । प्रयत्नसाम्म्यमेतद् धि वृत्तिसाम्म्यन् तदुच्च्यते ।। उपक्रमे यया वृत्त्या पठेत् तावत् तथैव हि । यावद् विराममेतद् यद् वृत्तिसाम्म्यन् तदुच्च्यते"[1] इति, "सुव्व्यक्तमक्क्षरयँ यच् च माधुर्ययँ यच् च सयँ युतम् । सुव्व्यक्तश् च पदच्छेदो यच् च धैर्यसमन्वितम् । लये समर्थता या च स्स्वरनिर्मलता च या । षट्सङ्ख्यका गुणा ह्येते विहिता पाठकस्स्य वै"[2] इति, "उच्चारणेषु वर्णानां सामग्र्यं तावतीरिता । अनन्यूनानतिरिक्तस् सन्नुच्चरेद् ब्रह्मम भक्तितः ।। व्याघ्री यथा हरेत् पुत्त्रन् दंष्ट्राब्भ्यान् न च पीडयेत् । भीता पतनभेदाब्भ्यान् तद्वद् वर्णान् प्रयोजयेत् ।। नातिव्व्यक्तन् न चाव्व्यक्तमेववँ वर्णानुदीरयेत् । पयःपूर्णमिवाऽमत्त्रं हरन् धीरो यथामति ।। उच्चरेत् परया भक्त्या सर्वकालमतन्द्रितः । यज्जातिस्स्खलनन् तेषाम् तज्जातिहननयँ यतः"[3] इति, "स्वरवर्णान् स्फुटम् मत्त्वा सम्म्यग् यश् च समुच्चरेत् । अब्भ्युत्कृष्टम् फलन् तस्स्य तत्त्रतत्त्र समीरितम्"[4] इति च । चारायणीयशिक्क्षायाम् च— "समाम् श्लक्क्ष्णानसन्दिग्धान् वर्णानुच्चारयेद् बुधः"[5] इति, "सुतीर्थादागतम् जग्धं स्वाम्नातं सुप्प्रतिष्ठितम् । सुस्स्वरम् च सुवक्त्रम् च प्रयुक्तम् ब्रह्मम राजते ।। यथा व्याघ्री हरेत् पुत्त्रन् दंष्ट्राभिर् न च पीडयेत् । भीता पतनभेदाब्भ्यान् तद्वद् वर्णान् प्रयोजयेत् ।। मधुरम् च न चाऽव्व्यक्तवँ व्यक्तम् च न च निष्ठुरम् । सनाथस्स्येव देशस्स्य न वर्णास् सङ्करङ्ग गताः ।। माधुर्यमक्क्षरव्व्यक्तिः पदच्छेदस् तथा स्स्वरः । धैर्यो गुरुलघुत्त्वम् च षडेते पाठके गुणाः"[6] इति, "समविक्क्रमसम्पन्नामद्द्रुतामविलम्बिताम् । उच्चारयेत कल्ल्याणीवँ वाचमाम्नायसारिणीम्"[7] इति, "पठेत् कैवल्ल्यसोपानं सौम्म्येन परिवेष्टितम् । तुलाकोटिनिभम् पाठं स्वराद्ध्य(ड्ढ्य?)म् मद्ध्यमं स्वरम् ।। स्वरात् स्वरं सङ्क्रमयेत् स्वरे सन्धिमनुल्ल्वणम् । अविच्छिन्नं समङ्ग कुर्यात् सूक्क्ष्माच् छायो(ा ?)त्तपोरसम् । समं स्वरम् पठेन् नित्त्यम् मर्गहस्ते प्प्रदर्शयेत्"[8] इति, "सुखोपविष्टश् शुचिरेकचित्तो विवर्जितत्त्रासमदाशश्रयस् तु । यथर्तु युक्त्याऽशनपानभोजी वेदम् पठेद् वर्जितवर्णदोषम्"[9] इति च । नारदीयशिक्क्षायाम् च—

---

१. श्लो. १०९–११० (३।९७,९८) । २. श्लो. ११५–११६ (३।१०२, १०३) । ३. श्लो. १२४–१२७ (३।१११, ११४) । ४. श्लो. १३१ (३।११८) । ५. पृ. १८ । ६. पृ. २३ । ७. तत्त्रैव । ८. पृ. २३–२४ । ९. पृ. २४ ।

'गानस्य तु दशविधा गुणवृत्तिस् तद् यथा— रक्तम् पूर्णमलङ्कृतम् प्रसन्नवँ् व्यक्तवँ् विक्रुष्टं श्लक्ष्णं समं सुकुमारम् मधुरमिति गुणाः। तत्र रक्तन् नाम वेणुवीणास्वराणामेकीभावे रक्तमित्युच्यते। पूर्णन् नाम स्वरश्रुतिपूर्णाच् छन्दःपादाक्षरसयँ् योगात् पूर्णमित्युच्यते। अलङ्कृतन् नामोरसि शिरसि कण्ठयुक्तमित्यलङ्कृतम्। प्रसन्नन् नामापगतगद्गद-निर्विशङ्कम् प्रसन्नमित्युच्यते। व्यक्तन् नाम पद-पदार्थ-प्रकृति-विकारा-ऽऽगम-लोप-कृत्-तद्धित-समास-धातु-निपातो-ऽपसर्ग-स्वर-लिङ्ग-वृत्ति-वार्तिक-विभक्त्यर्थ-वचनानां सम्यगुपपादने व्यक्तमित्युच्यते। विक्रुष्टन् नामोच्चैरुच्चारितवँ् व्यक्तपदाक्षरमिति विक्रुष्टम्। श्लक्ष्णन् नामाद्भुत-विलम्बितमुच्चनीचप्लुतसमाहारहेलतालोपनयादिभिरुपपादनादिभिश् श्लक्ष्णमित्युच्यते। समन् नामाऽऽवापनिर्वापप्रदेशप्रत्यनन्तरस्थानां समासस् समित्युच्यते। सुकुमारन् नाम मृदु-पद-वर्ण-स्वर-कुहरण-युक्तं सुकुमारमित्युच्यते। मधुरन् नाम स्वभावोपनीतललितपदाक्षर-गुणसमृद्धम् मधुरमित्युच्यते"[1] इति; "आचार्यास् समभिच्छन्ति पद-च्छेदन् तु पण्डिताः। स्त्रियो मधुरमिच्छन्ति विक्रुष्टमितरे जनाः"[2] इति, "सममुच्चारयेद् वाक्यं हस्तेन च मुखेन च। यथैवोच्चारयेद् वर्णांस् तथैवैनान् समापयेत्"[3] इति, "स्वरात् स्वरसङ्क्रमन् तु स्वरसन्धिमनुल्बणम्। अविच्छिन्नं समङ्ग कुर्यात् सूक्ष्मम् छायातपोपमम्"[4] इति, "मन्द्रेणोपक्रमेत् पूर्वं सर्वशाखास्स्वयवँ् विधिः। सप्तमन्त्रानतिक्रम्य यथेष्टावँ् वाचमुत्सृजेत्। न तां समीरयेद् वाचयँ् या प्राणमुपरोधयेत्। प्राणानामुपरोधेन वैस्स्वर्यम् चोपजायते। स्वरव्यञ्जनमाधुर्यलँ् लुप्यते नात्र संशयः"[5] इति, "यथा व्याघ्री हरेत् पुत्त्रान् दंष्ट्राभिर् न च पीडयेत्। भीता पतनभेदाभ्यान् तद्वद् वर्णान् प्रयोजयेत्॥ एववँ् वर्णा8 प्रयोक्तव्या नाव्यक्ता न च पीडिताः। सम्यग् वर्णप्रयोगेण ब्रह्ममलोके महीयते"[6] इति च। माण्डूक्या शिक्षायाम् च यथाव्याघ्रीत्यादिकौ द्वौ श्लोकौ नारदीयशिक्षावत् पठ्यते[7]। अधिकम् च— "यथा नौस् स्रोतसाम् मद्ध्ये समङ्ग गच्छति

---

१. १।३।१-१०। २. १।३।१३। ३. १।६।१४।
४. १।६।१८। ५. २।८।८-१०। ६. २।८।३०-३१।
७. श्लो. ४३, ४४ (शि. स., पृ. ४६६-४६७)।

सयँयुता । तैलधारेव वा वाणी तद्वद् वर्णान् प्रयोजयेत्"[1] इति, "नातिनिष्पीडयेद् वर्णान् न चाव्यक्तानुदाहरेत् । समाञ् श्लक्ष्णानसन्दिग्धान् वर्णानुच्चारयेद् बुधः"[2] इति, "आचार्यास् सममिच्छन्ति पदच्छेदन् तु पण्डिताः । स्त्रियो मधुरमिच्छन्ति विक्करुष्टमितरे जनाः"[3] इति च । काव्यमीमांसायाञ् च— "इत्थङ् कविर् निबद्धनीयादित्थञ् च मतिमान् पठेत् । यथा निबन्धनिगदश् छायाङ् काञ् चिन् निषिञ्चति ॥ करोति काव्यम् प्रायेण सँस्कृतात्मा यथा तथा । पठितुर्वेत्ति स परयँ यस्स्य सिद्धा सरस्स्वती ॥ यथा जन्मान्तराभ्यासात् कण्ठे कस्स्यापि रक्तता । तथैव पाठसौन्दर्यन् नैकजन्मविनिर्मितम् ॥ स संस्कृतमपभ्रंशलँ लालित्त्यालिङ्गितम् पठेत् । प्राकृतम् भूतभाषाञ् च सौष्ठवोत्तरमुद्गिरेत् ॥ प्रसन्ने मन्द्रयेद् वाचन् तारयेत् तद्विरोधिनि । मन्द्रतारौ च रचयेन् निर्वाहिणि यथोत्तरम् ॥ ललितङ् काकुसमन्वितमुज्ज्वलमर्थवशकृतपरिच्छेदम् । श्रुतिसुखविविक्तवर्णङ् कवयः पाठम् प्रशंसन्ति ॥ अतितूर्णमतिविलम्बितमुल्बणनादञ् च नादहीनञ् च । अपदच्छिन्नमनावृतमतिमृदुपरुषञ् च निन्दन्ति ॥ गम्भीरत्वमवैस्स्वर्यन् निर्व्यूढिस् तारमन्द्रयोः । सयँयुक्तवर्णलावण्यमिति पाठगुणास् स्मृताः ॥ यथा व्याघ्री हरेत् पुत्त्रान् दंष्ट्राभिश् च न पीडयेत् । भीता पतनभेदाभ्यान् तद्वद् वर्णान् प्रयोजयेत् ॥ विभक्तयस् स्फुटा यत्तर समासश् चाऽकदर्थितः । अम्म्लानः पदसन्धिश् च तत्तर पाठः प्रतिष्ठितः ॥ न व्यस्तपदयोरैक्यन् न भिदान् तु समस्तयोः । न चाक्लान्तपदम्म्लानिवँ विदधीत सुधीः पठन् ॥ आगोपालकमायोषिदास्तामेतस्स्य लेह्यता । इत्थङ् कविः पठन् काव्यवँ वाग्देव्या अतिवल्लभः ॥ येऽपि शब्दविदो नैव नैव चार्थविचक्षणाः । तेषामपि सताम् पाठस् सुष्ठु कर्णरसायनम्"[4] इति, "पञ्चस्स्थानसमुद्भववर्णेषु यथा स्वरूपनिष्पत्तिः । अर्थवशेन च विरतिस् सर्वस्स्वमिदं हि पाठस्स्य"[5] इति च ॥२–४॥

---

१. श्लो. ५१ (शि. स., पृ. ४६७) । २. श्लो. १३३ (शि. स., पृ. ४७४) । ३. श्लो. १७६ (शि. स., पृ. ४७६) । ४. सप्तमेऽद्ध्याये पाठप्रतिष्ठायाम्, पृ. १०५–१०८ । ५. तत्रैव, पृ. १०९ ।

३. हेयोच्चारणनिरूपणम्

अस्स्पष्टवर्णवँ विहितं सङ्कितेनेव तत् पुनः ।
भीतेनेव कृतवँ वाऽपि क्रुद्धेनेव कृतञ् च यत् ॥५॥
अतितारस्स्वरञ् चैवाऽनुनासिककृतन् तथा ।
वर्णस्स्वरविरामादिदोषयुक्तञ् च रूक्षकम् ॥६॥
लयेन रहितयँ यच् च सदोषँ पुरुषँ कृतम् ।
उच्चारणन् तद् धि विज्ज्ञैर् हेयमुच्चारणं स्मृतम् ॥७॥

तथाहि पाठकपाठदोषादिप्प्रतिपादकानि प्प्राचां शिक्षकाणावँ वचनानि दृश्यन्ते । तत्तर शैशिरीयशिक्षायाम्— "स्वस्स्थँ प्रशान्तो निर्भीतो वर्णानुच्चारयेद् बुधः । नाब्भ्याहन्न्यान् न निर्हन्न्यान् न गायेन् नैव कम्पयेत्"[1] इति, "हस्तहीनन् तु योऽधीते स्वरवर्णविवर्जितम् । ऋग्यजुस्सामभिर् दग्धो वियोनिमधिगच्छति"[2] इति च । पाणिनीयशिक्षायाञ् च— "शङ्कितम् भीतमुद्घृष्टमव्यक्तमनुनासिकम् । काकस्स्वरं शिरसिगन् तथा स्स्थानविवर्जितम् ॥ उपांशु दष्टन् त्वरितन् निरस्तवँ विलम्बितञ् गद्गदितम् प्रगीतम् । निष्पीडितञ् ग्रस्तपदाक्षरञ् च वदेन् न दीनन् न तु सानुनास्स्यम्"[3] इति, "कुतीर्थादागतन् दग्धमपवर्णञ् च भक्षितम् । न तस्स्य पाठे मोक्षोऽस्ति पापाहेरिव किल्बिषात्"[4] इति, "मन्त्रो हीनस् स्वरतो वर्णतो वा मित्थ्याप्रयुक्तो न तमर्थमाह । स वाग्वज्ज्रो यजमानं हिनस्ति यथेन्द्रशत्त्रुस् स्वरतोऽपराधात्"[5] इति, "अनक्षरमनायुष्यवँ विस्स्वरवँ व्याधिपीडितम् । अक्षताऽशस्त्ररूपेण वज्ज्रम् पतति मस्तके"[6] इति, "हस्तहीनन् तु योऽधीते स्वरवर्णविवर्जितम् । ऋग्यजुस्सामभिर् दग्धो वियोनिमधिगच्छति"[7] इति च । याज्ज्ञवल्क्यशिक्षायाञ् च— "स्वस्स्थँ प्रशान्तो निर्भीतो वर्णानुच्चारयेद् बुधः । नाऽब्भ्याहन्न्यान् न निर्हन्न्यान् न गायेन् नैव कम्पयेत्"[8] इति, 'शङ्कितम् भीतमुद्घुष्टमव्यक्तं सानुनासिकम् । काकस्स्वरं शीर्षगतन् तथा स्स्थानविवर्जितम् ॥ विस्स्वरवँ विरसञ् चैव विश्श्लिष्टवँ विषमाहतम् । व्याकुलन् तालुहीनञ् च पाठदोषाश् चतुर्दश"[9] इति, "पठन् मात्त्राऽपपाठात् तु

---

१. श्लो. ७२ । २. श्लो. ७९ । ३. श्लो. ३४, ३५ ।
४. श्लो. ५० । ५. श्लो. ५२ । ६. श्लो. ५३ ।
७. श्लो. ५४ । ८. श्लो. २१ (शि. स., पृ. ३) ।
९. श्लो. २६–२८ (शि. स., पृ. ४) ।

पङ्के गौरिव सीदति"[1] इति, "हस्तहीनन् तु योऽधीते स्वरवर्णविवर्जितम्। ऋग्यजुस्सामभिर् दग्धो वियोनिमुपगच्छति ॥ स्वरहीनन् तु योऽधीते मन्त्रवँ् वेदविदो विदुः। न साधयति यजूंषि भुक्तमव्यञ्जनयँ् यथा॥ ऋचो यजूंषि सामानि हस्तहीनानि यः पठेत्। अनृचो ब्राह्मणस् तावत् यावत् स्वारन् न विन्दति॥ ज्ञातव्यश् च तथैवाऽर्थो वेदानाङ् कर्मसिद्धये। पाठमात्त्राऽवसानस् तु पङ्के गौरिव सीदति"[2] इति, "न कुर्वीत पदन् दीर्घन् न चाऽत्त्यन्तविलम्बितम्। पदस्य ग्रहणम् मोक्षयँ् यथा शीघ्रगतिर् हयः"[3] इति; "उपांशु त्वरितवँ् वाऽपि योऽधीते वित्त्रसन्नपि। अपरूपसहस्राणां सन्देहे स पूरवर्तते"[4] इति च। कौहलीयशिक्षायाम् च— "यदधीतमविज्ज्ञातन् निगदेनैव शब्द्यते। अनग्नाविव शुष्कैधो न तज् ज्वलति कर्हि चित्"[5] इति। चारायणीयशिक्षायायाम् च— "मन्त्रो हीनस् स्वरतो वर्णतो वा मित्थ्याप्रयुक्तो न तमर्थमाह। स वाग्वज्ज्रो यजमानं हिनस्ति यथेन्द्रशत्त्रुस् स्वरतोऽपराधात्॥ कुतीर्थादागतन् जग्धमपवर्णेषु भक्षितम्। न तस्य परिमोक्षोऽस्ति पापाहेरिव दुर्विषाम्"[6] इति। नारदीयशिक्षायाम् च "मन्त्रो हीनः" इत्त्यादिश् श्लोकः[7] पठ्यते[7]। तथा—"शङ्कितम् भीतमुद्घृष्टमव्यक्तमनुनासिकम्। काकस्स्वरं शिरसिगतन् तथा स्स्थानविवर्जितम्। विस्स्वरवँ् विरसन् चैव विश्श्लिष्टवँ् विषमाहतम्। व्याकुलन् तालुहीनन् च गीतिदोषाश् चतुर्दश"[8] इति, "नाऽत्त्याहन्न्यान् न निर्हन्न्यान् न गायेन् न पूरकम्पयेत्। समं सामानि गायेत व्व्योम्नि श्श्येनगतिर् यथा"[9] इति, "अनागतमतिक्रान्तवँ् विच्छिन्नवँ् विषमाहतम्। तन्न्वन्तमस्स्थितान्नन् च वर्जयेत् कर्षणम् बुधः॥ स्वरस् स्थानाच् च्युतो यस् तु स (स्व ?-) स्स्थानमतिवर्तते। विस्स्वरं सामगा ब्रूयुर् विरक्तमिति वीणिनः"[10] इति, "न चाऽत्त्रं कम्पयेत् किन् चिदङ्गस्स्याऽवयवम् बुधः। अधस्तनम् मृदु न्न्यस्स्य हस्तमास्ते यथाक्षरम्"[11] इति, "न हि पार्ष्णिहता वाणी प्रयोगान् वक्तुमर्हति। बधिरस्स्येव तल्पस्स्था

---

१. श्लो. ३७ (शि. स., पृ. ५)। २. श्लो. ४०-४३ (शि. स., पृ. ५-६)। ३. श्लो. ४५ (शि. स., पृ. ६)। ४. श्लो. १६२ (शि. स., पृ. २४)। ५. श्लो. ५८। ६. पृ. २३। ७. १।१।५। ८. १।३।११-१२। ९. १।६।१५। १०. १।६।२०। ११. १।६।१०।

बिदग्धा वामलोचना ।। उपांशु त्वरितञ्च चैव योऽधीते वित्तरसन्नपि । अपि रूपसहस्रेषु सन्देहे त्वेव वर्तते ।। पुस्तकप्रत्ययाधीतन् नाऽधीतङ्ग गुरुसन्निधौ । राजते न सभामध्ये जारगर्भा इव स्त्रियः"[१] इति च । लोमशीयायां शिक्षायाञ् च— "अवक्षेपः प्रगाणञ् च रवो यश् चाऽप्युपद्रवः । यमलस् त्वरितञ् चैव दोषाः पञ्चाऽऽर्चिके स्मृताः"[२] इति. "नासिके-(क्ये-?)ष्वपि वर्णेषु यो यत्तर भजते स्वरः । तन्तमेवोपजीवन्ति नासादोषाँश् च वर्जयेत्"[३] इति च । माण्डूक्यां शिक्षायाञ् च— "न कम्पयेच् छिरः पादौ मुखदोषाँश् च वर्जयेत्"[४] इति, "हस्तहीनन् तु योऽधीते स्वरवर्णविवर्जितम् । ऋग्यजुस्सामभिर् दग्धो वियोनिमधिगच्छति"[५] इति, 'नात्त्युच्चैर् नातिनीचैर् वा घोषणस् सदनस्य खम् । प्रवृद्धान् नातितीक्ष्णेन कण्ठेन मृदुनाऽति वा"[६] इति, "शनैरध्वसु वर्तेत न परयं योजनाद् व्रजेत् । न हि पार्ष्णिहिता वाणी प्रयोगान् वक्तुमर्हति"[७] इति, "सञ्ज्ञाने भूयसो दोषान् प्रवक्ष्यामि निबोधत । स्वरस्य सन्दर्शनञ् च ह्यनुस्स्वारयमावपि"[८] इति च ।।५–७।।

४. पाठकगुणनिरूपणम्

धैर्यञ् चाऽभिविनीतत्वं स्वास्थ्यं शान्तस्स्वभावता ।
निर्भीकता च कल्याणी प्रकृतिर् धृष्टता तथा ।।८।।
स्वरयन्तरस्य वैशद्द्यं युक्तमानकदन्तता ।
युक्तप्रमाणोष्ठता च पत्तलाऽजडजिह्वता ।।९।।
नासारुजारहितताऽशिशुताऽनतिवृद्धता ।
अगद्गदत्वादयश् च स्मृताः पाठकसम्पदः ।।१०।।

एवंविधपाठकगुणप्रतिपादकानि प्राचां शिक्षकाणां वचनानि चाऽत्र प्रदर्श्यन्ते । तत्र "गुरुत्वं लघुना साम्यं ह्रस्स्वदीर्घप्लुतानि च । लोपागमविकाराश् च प्रकृतिर् विक्रमः क्रमः ।। स्वरितोदात्तनीचत्वं श्वासो नादोऽङ्गमेव च । एतत् सर्वन् तु विज्ञेयञ् छन्दोभाषामधीयता ।। पदक्रमविशेषज्ञो वर्णक्रमविचक्षणः । स्वरमात्राविशेषज्ञो गच्छेदाचार्यसम्पदम्"[९] इति तैत्तिरीयप्रातिशाख्ये लक्षणशास्त्रे

---

१. २।८।१७–१९ । २. ३।५। ३. ५।६ । ४. श्लो. २७ (शि. स., पृ. ४६५)। ५. श्लो. ३१–३२(शि. स., पृ. ४६५–४६६)। ६. श्लो.४०–४१(शि.स. पृ. ४६६)। ७. श्लो.४५(शि.स.,पृ. ४६७)। ८. श्लो. १४१ (शि. स., पृ. ४७५) । ९. २४।५, ६ ।

सम्म्यगभिविनीतत्त्वस्य वेदाद्ध्येतृगुणतायाऽ प्रतिपादकवँ वाक्यम् । शैशिरीयशिक्षायाम् च— "स्वस्थऽ प्रणानतो निर्भीतो वर्णानुच्चारयेद् बुधः"[1] इति, "प्रकृतिर् यस्य कल्याणी दन्तोष्ठौ यस्य शोभनौ । प्रगल्भश् च विनीतश् च स वर्णान् वक्तुमर्हति"[2] इति च । याज्ञवल्क्यशिक्षायामपि एवमेवोक्तम्[3] । व्यासशिक्षायाम् च— "सुव्यक्तस् सुस्वरो धीरयन् तच्चित्ततत्त्वम् चतुर्गुणाः । एतद्युक्तऽ पठेद् वेदं स वेदफलमश्नुते"[4] इति । चारायणीयशिक्षायाम् च—"न वैयाकरणैश् शक्यं सम्म्यग् वक्तुमशिक्षकैः"[5] इति पाठकगुणतया शिक्षाशास्त्रवेत्तृतत्त्वमुक्तम् । नारदीयशिक्षायाम् च— "कूर्मोऽङ्गानीव संहृत्य चेष्टान् दृष्टिन् दिशन् मनः । स्वस्थऽ प्रशानतो निर्भीतो वर्णानुच्चारयेद् बुधः"[6] इति, "एकचित्तो निरुद्भ्रान्तस् तानरागविवर्जितः । स तु वर्णान् प्रयुञ्जीत दन्तोष्ठयँ यस्य शोभनम्"[7] इति च । माण्डूक्या शिक्षायाम् च —"स्वरात् स्वरं सङ्क्रमते स्वरसन्धिमनुल्बणम् । अविच्छिन्नं समङ्कुर्यात् सूक्ष्मम् छायातपोपमम् । अक्षरजञ्जो विरामजञ्जऽ प्रत्त्यारम्भी तथैव च । स्वरमात्त्राविभागजञ्जस् स विप्प्रो वक्तुमर्हति"[8] इति, "आम्नायात् प्रपदो भवति प्प्रपदो भवति निर्भयः । निर्भयो मधुरो भवति माधुर्यात् सिद्धिमाप्नुयात् । आम्नायकरणं श्रेष्ठवँ वर्णानाम् चाऽवधारणम् । अप्प्रमत्तश् च स्वार्येत एतदाचार्यशासनम् । आम्नायं शास्त्रसम्पन्नं शास्त्रमाम्नायसारवित् । पयश्शङ्खे यथा तद्वच् शिरश् छन्दसि सारथिः । दन्त्योष्ठ्यकरणं सूक्ष्मम् माधुर्यन् तरुणवँ वचः । स्वभावं शिक्षकस्याहुरन्यद् गुरुकृतम् भवेत् । तरुणं शिक्षकम् प्राहुर् वृद्धमक्षरचिन्तकम् । नैयाय(यि?)कम् परिश्श्रुतम् बहुधा भवन्ति याचकम्"[9] इति; "प्रकृतिर् यस्य कल्याणी दन्तोष्ठौ यस्य शोभनौ । अधीतयँ येन तत्त्वेन स शिक्षाम् पारयिष्यति"[10] इति, "येषान् तीर्थगता विद्द्या नित्यमभ्यासवर्जि(ति–?)ता । ते भवन्ति दुराधर्षास् ससिंहा इव पर्वताः"[11] इति च । "आचार्योपासनाद् योगात् तपसा

---

१. श्लो. ७२ । २. श्लो. ७६ । ३. श्लो. २१(शि.स., पृ. ३), श्लो. २५–२६ (शि. स., पृ. ४) । ४. सू. ५०३, ५०४ । ५. पृ. १८ । ६. १।६।१२ । ७. २।८।१३ । ८. श्लो. ३४–३६ (शि. स., पृ. ४६६)। ९. श्लो, १५१–१५५(शि. स., पृ. ४७६) । १०. श्लो. १५७ (शि. स., पृ. ४७६) । ११. श्लो. १६१ (शि. स., पृ. ४७७) ।

प्राज्ञसेवनात्। विगृह्य कथनात् कालात् षड्भिर् विद्द्या प्रपद्यते''[1] इति मण्डूकवचनेनाऽपि पाठकगुणविशेषा उपलक्षिता भवन्ति।।८-१०।।

५. पाठकदोषनिरूपणम्

ओष्ठानाच्छाद्द्यैर् हि दन्तैर् युक्तता खण्डितोष्ठता ।
अतिस्थूलोष्ठता लम्बोष्ठता च पृथुजिह्वता ।।११।।
जडजिह्वत्वञ् च नासारुजा मिन्मिनता तथा ।
गद्गदत्वण् टुतुकता तथाऽविशदकण्ठता ।।१२।।
अभावो वैपरीत्यवं वा प्रोक्तपाठकसम्पदाम् ।
एते समासतो दोषाः पाठकस्य स्मृता बुधैः ।।१३।।

टुतुकतेत्यस्य टुष्टवर्गस् तुस्तवर्गो यस्य स तस्य भावइत्यर्थः। एवञ् च यष् टवर्गीये प्रथमादिके वर्णे उच्चारयितव्ये तवर्गीयम् प्रथमादिकवं वर्णं स्वभावेनैवोच्चारयति तस्य भाव इत्यर्थः। पाठकदोषप्रतिपादकानि प्राचावं वाक्यानि च यथा— ''न करालो न लम्बोष्ठो नाऽव्यक्तो नाऽनुनासिकः। गद्गदो बद्धजिह्वश् च न वर्णान् वक्तुमर्हति''[2] इति, ''गीती शीघ्री शिरःकम्पी यथालिखितपाठकः। अनर्थज्ञोऽल्पकण्ठश् च षडेते पाठकाधमाः''[3] इति च शैशिरीयशिक्षायाम्। पाणिनीयशिक्षायामपि गीतीशीघ्रीत्यादिकश् श्लोकः पठ्यते[4]। एवमेव सर्वसम्मतशिक्षायामपि[5]। याज्ञवल्क्यशिक्षायान् तु न कराल इत्यादिको गीतीशीघ्रीत्यादिकश् चेति द्वावेव श्लोकौ पठ्येते[6]। माण्डूक्यां शिक्षायान् च न कराल इत्यादिकश् श्लोकः पठ्यते[7]। ''आलस्यान् मूर्खसंसर्गाद् भयाद् रोगनिपीडनात्। अत्यशक्त्या च मानाच् च षड्भिर् विद्द्या विनश्यति''[8] इति च पाठकदोषा माण्डूक्यां शिक्षायामुपलिलक्षयिषिता दृश्यते ।।११-१३।।

६. उच्चारणपारुष्यादिनिराकरणोपायनिरूपणम्

यस्याऽनाजानिका दोषास् तिरफलासंन्धवादिकम् ।
दन्तधावनकाद्द्यञ् च सेवित्वा तान् स वारयेत् ।।१४।।

एतस्मिन् विषये च प्राचावं वचनानि यथा— ''आम्रपालाश-(पौलाश-?) बिल्वानामपामार्गशिरीषयोः। वाग्यतः प्रातरुत्थाय

---

१. श्लो. १७७ (शि. स., पृ. ४७८)। २. श्लो. ७५। ३. श्लो. ९८। ४. श्लो. ३२। ५. श्लो. ११४ (३।१०१)। ६. श्लो. २४, २५, २६ (शि. स., पृ. ४)। ७. श्लो. १५६ (शि. स., पृ. ४७६)। ८. श्लो. १७८ (शि. स., पृ. ४७८)।

भक्क्षयेद् दन्तधावनम् ।। खदिरश् च कदम्बश् च करवीर*–करञ्जकौ । एते(सर्वे)कण्टकिनः पुण्याः क्षीरिणश् च यशस्विनः । तेनास्यकरणं सूक्ष्मम् माधुर्यञ् चोपजायते।त्रिफलालँ् लवणाक्तेन (कृतावँ् वै?) भक्क्षयेच् शिष्य(क्क्ष?)कस् सदा।क्षीणमेधाजनन्न्येषा स्वरवर्णकरी तथा"[1]इति याज्ञवल्क्यशिक्षायाम् । चारायणीयशिक्षायाञ् च– "यथर्तु युक्त्याऽशनपानभोजी वेदम् पठेद् वर्जितवर्णदोषम्"[2] इति यथर्तु पानभोजनादेर् वर्णोच्चारणदोषपरिहारोपायत्वं साभिप्रायेण पाठकविशेषणेन प्रकाशितम् । नारदीयशिक्षायाञ् च— "कौक्क्वेयागृगिं सदा रक्क्षेदशनीयादशनं हितम् । जीर्णाहारः प्रबुद्धस् सन्नुषसि ब्रह्मम चिन्तयेत् ।। शरद्विषुवतोऽतीतादुषस्स्युत्थानमिष्यते । यावद् वासन्तिकी रात्तरी मद्ध्यमा पर्युपस्स्थिता ।। आम्रपालाश(पौलाश–?)बिल्वानामपामार्गशिरीषयोः । वाग्यतः प्रातरुत्थाय भक्क्षयेद् दन्तधावनम् ।। खदिरश् च कदम्बश् च करवीर–करञ्जयोः । सर्वे कण्टकिनः पुण्याः क्षीरिणश् च यशस्विनः ।। तेनाऽस्य करणं सौक्क्ष्म्यम् माधुर्यञ् चोपजायते । वर्णांश् च कुरुते सम्यक् प्राचीनौदव्रजिर् यथा ।। त्रिफलालँ् लवणाक्ख्येन भक्क्षयेच् छिष्यकस् सदा । अग्निमेधाजनन्न्येषा स्वरवर्णकरी तथा ।। कृत्वा चाऽऽवश्यकान् धर्मान् जाठरम् पर्युपास्स्य च । पीत्वा धूमञ् घृतञ् चैव शुचिर् भूत्वा ततो वदेत्"[3] इति । माण्डूक्क्यां शिक्क्षायाञ् च— "आम्रपालाश–(पौलाश–?)बिल्वानामपामार्गशिरीषयोः । खदिरस्स्य करञ्जस्स्य कदम्बस्स्य च क्षीरिणः ।। अर्कस्स्य करवीरस्स्य कुटजस्स्य विशेषतः । वग्यतः प्रातरुत्थाय भक्क्षयेद् दन्तधावनम् ।। तेनास्स्य करणं सूक्क्ष्मम् मधुरञ् चोपजायते । न चाऽस्स्य वदतो दोषान् कश्चिदप्युपलक्क्षयेत्"[4] इति; "शनैरद्ध्वसु वर्तेत न परयँ् योजनाद् व्रजेत् । न हि पार्ष्णिहता वाणी प्रयोगान् वक्तुमर्हति"[5] इति च । शुक्लयजुर्वेदप्रातिशाक्ख्येऽपि— "प्रयतः, शुचौ, इष्टटम्, ऋतुम् प्राप्य, योजनान् न परम्, भोजनम् मधुरं स्निग्धम्, वर्णदोषविवेकार्तथम्"[6] इत्त्ययवँ् विषयस् सूचितः ।।१४।।

७. अथ वृत्तिनिरूपणम्

विलम्बितेन द्द्रुतेन तन्मद्ध्यस्स्थेन वाऽपि वाक् ।
वर्तते वर्तनेनेह येन सा वृत्तिरुच्यते ।।१५।।

---

* करवीर आयुर्वेदे उपविषत्त्वेन वर्णित इति चाऽत्तर स्स्मरणीयम् ।

१. श्लो. ३३–३६ (शि. स., पृ. ५) । २. पृ २४ ।
३. २।८।१–७ । ४. श्लो. ३७–४० (शि. स., पृ. ४६६) ।
५. श्लो. ४५ (शि. स., पृ. ४६७) । ६. १।२०–२६ ।

तथा हि ऋग्वेदप्रातिशाख्ये— "तिस्रो वृत्तीरुपदिशन्ति वाचो विलम्बिताम् मध्यमाम् च द्रुताम् च"[1] इति ॥१५॥

(क) द्रुतवृत्तिनिरूपणम्

वर्णादीनां स्पष्टतायां सत्यान् द्रुततमं हि वाक् ।
प्रयुज्यते यत्र वृत्तिस् सा द्रुतेत्यभिधीयते ॥१६॥

(ख) मध्यमवृत्तिनिरूपणम्

यावान् कालो द्रुतायान् तत्-तृतीयांशाधिकस् ततः ।
कालो यस्यालं लगेद् वृत्तिर् मध्यमा सा प्रकीर्तिता ॥१७॥

तथा हि ऋग्वेदप्रातिशाख्ये— "मात्राविशेषः प्रतिवृत्त्युपैति"[2] इति । ऋक्तन्त्रे च— "द्रुतायाम् मात्रा, चतुष्कला मध्यमायाम्, पञ्चकला विलम्बितायाम्"[3] इति । मात्रालक्षणे तु— "तिस्रो वृत्तयो भवन्ति द्रुता मध्यमा विलम्बितेति । द्रुतायावं वृत्तौ त्रिकला मात्रा भवति, चतुष्कला मध्यमायाम्, पञ्चकला विलम्बितायाम् । द्रुता रोहिणी । श्यामा मध्यमा । श्वेता विलम्बिता । तासान् देवताः । वायव्या द्रुता वृत्तिः । बार्हस्पत्या मध्यमा । सौरी विलम्बिता । तासु मात्राकालस् तिसृष्वेकः"[4] इति । पाणिनीयव्याकरणभाष्ये च— "ये हि द्रुतायावं वृत्तौ वर्णास् त्रिभागाधिकास् ते मध्यमायाम्"[5] इति । ऋग्वेदप्रातिशाख्यस्योक्तस्य वाक्यस्य व्याख्याने "द्रुतायावं वृत्तौ ये वर्णास् ते मध्यमायाम् ·· चतुर्भागाधिका भवन्तीत्येके"[6] इत्यपि उव्वट आह ॥१७॥

(ग) विलम्बितवृत्तिनिरूपणम्

मध्यमाकालतस् तस्य तृतीयांशेन चाऽधिकः ।
कालो यस्यालं लगेत् सा तु वृत्तिः प्रोक्ता विलम्बिता॥१८॥

तथा हि पाणिनीयव्याकरणभाष्ये— "ये च मध्यमायावं वर्णास् त्रिभागाधिकास् ते विलम्बितायाम्"[7] इति । ऋक्तन्त्रादिवाक्यानि तु पूर्वश्लोकविवरणे एव प्रदर्शितानि ॥१८॥

(घ) वृत्तिविशेषविनियोगनिरूपणम्

अभ्यासार्थे द्रुतावं वृत्तिम् प्रयोगार्थे तु मध्यमाम् ।
शिष्याणामुपदेशार्थे कुर्याद् वृत्तिवं विलम्बिताम्[8] ॥१९॥

---

१. १३।४६। २. १३।४८। ३. २।४।१–३। ४. १।११–१३। ५. १।१।७०। ६. ऋ. प्रा. उ. भा. १३।४८। ७. १।१।७०। ८. ऋ. प्रा. १३।४९, या. शि. श्लो. ५४, ना. शि. १।६।२१।

वृत्तिविशेषस्य विनियोगङ्ग ग्राह्यत्वाग्राह्यत्वे चाऽधिकृत्य प्रवृत्तानि प्राचां शिक्षकाणाम् भूयांसि वचनानि यथा–"वृत्त्यन्तरे कर्मविशेषमाहुः"[1] इति ऋग्वेदप्रातिशाख्ये। तद्व्याख्याने उव्वटश्च— "विलम्बितायाम् प्रातस्सवनम् भवति। मद्ध्यमायाम् माद्ध्यन्दिनं सवनम्। द्रुतायान् तृतीयं सवनम् इति। तेषु सवनेष्वेता वृत्तयो भवन्तीत्युक्तम् भवति"[2] इति। "विलम्बिताम् बालानामद्ध्यापनादिषूपदिशन्ति। मद्ध्यमावँ व्यवहारादिषूपदिशन्ति। द्रुतामद्ध्ययनस्य बहुरूपाब्भ्यास उपदिशन्ति"[3] इति च स एव तत्पूर्वसूत्तरव्याख्यायामाह। याज्ञवल्क्यशिक्षायाम् च— "ऐन्द्री तु मद्ध्यमा वृत्तिः प्राजापत्या विलम्बिता। अग्निमारुतयोर् वृत्तिस् सर्वशास्त्रेषु निन्दिता"[4] इति। व्यासशिक्षायाम् च— "शीघ्रवँ विलम्बितम् मद्ध्यन् तिस्रो वाक्यस्य वृत्तयः। कालान्यता च यद् वृत्तौ तदा कर्मान्यता भवेत्"[5] इति। एवमेव सर्वसम्मतशिक्षायाम् च[6]। कौहलीयशिक्षायान् तु— "तिस्रस् तु वृत्तयो वाचो द्रुतमद्ध्यविलम्बिताः। प्रयोज्ज्या नियतवँ वेद एवम् प्राज्ज्ञाः प्रचक्षते॥ अन्यत्त्वयँ यदि वृत्तीनाङ्ग कर्मणामिह भिन्नता। वृत्तिम् प्रति विशेषस् तु मात्त्राया विद्द्यते ध्रुवम्॥ अवभ्यासार्थे द्रुतावँ वृत्तिम् प्रयोगार्थे तु मद्ध्यमाम्। शिष्याणामुपदेशार्थे कुर्याद् वृत्तिवँ विलम्बिताम्॥ वेदकर(का ?)मो द्द्रुतावँ वृत्तिम् बुद्धिकामस् तु मद्ध्यमाम्। कुर्वीत वेदवि(द् ?) वृत्तिं (त्तिं ?) स्वर्गकामो विलम्बिताम्। आसुरादिप्रमाद्द्याँश् चेद् दुर्गतिवँ विपरीतकः। यदन्यन् नियतयँ याति विद्द्यादेव तत्तो द्विजः॥ तत्त्वैवम् मन्वते के वित् सर्वशास्त्रविशारदाः। मद्ध्यमैव प्रयोक्तव्या निपुणन् तदुदीरितम्॥ स्वराक्षरसमानानावँ वृत्तिवे(भे?)दप्रवर्तिनाम्। मात्त्रायाः कथनङ्ग कर्तुङ्ग कैर ··ण्येन(प्येवन् ?) न शक्यते॥ तस्माद् वृत्तिः प्रयोक्तव्या मद्ध्यमा वेदवित्तमैः। एवं सुसंस्कृतं सम्यक् प्रयुक्तम् ब्रह्मम राजते"[7] इति। सर्वसम्मतशिक्षायामपि विशेष उक्तः– "उपक्रमे यया वृत्त्या पठेत् तावत् तथैव हि। यावद् विराममेतद् यद् वृत्तिसाम्यन् तदुच्यते॥ आशिशिरत्य मद्ध्यमावँ वृत्तिङ्ग कालानान् निर्णयः

---

१. १३।४७। २. ऋ. प्रा. उ. भा. १३।४७।
३. तत्त्वैव १३।४६। ४. श्लो. ५५ (शि. स., पृ. ७)।
५. सू. ४७५–४७६। ६. श्लो. १०८ (३।९७)। ७. श्लो. ५९–६६।

कृतः । प्रातिशाक्ख्यादिशास्त्रेषु यस्मात् सैव समाश्श्रिता"[1] इति । व्यासशिक्क्षायामपि कालनिश्चये मद्ध्यमाया वृत्तेरुपयोगस् स्वीकृतः । तथा हि– "मद्ध्यमावँ् वृत्तिमाश्श्रित्त्य चैवङ्ग कालास् सुनिश्चिताः । प्रातिशाक्ख्यादिषु ह्य्यत्त्र वृत्तिस् सैव समाश्श्रिता"[2] इति । कालनिर्णयशिक्क्षायामपि— "स्वरवर्णविरामाणाम् भिन्नवाग्वृत्तिवर्तिनाम् । ऐकरूप्येण कालस्य कथनन् नोपपद्द्यते । मद्ध्यमावँ् वृत्तिमाश्रित्त्य मया चेयङ्ग कृता कृतिः।प्रातिशाक्ख्ये निषिद्ध्याऽन्न्ये (?) यस्मात् सैकैव बोद्ध्यते"[3] इति । तैत्तिरीयप्रातिशाक्ख्ये सामान्न्यतया द्रुता विलम्बिता च वृत्तिर् 'अद्द्रुतामविलम्बिताम्"[4] इति वचनेन निषिद्धा प्रतीयते । माण्डूक्क्यां शिक्क्षायान् च— "तिस्स्रो वृत्तीरनुक्क्रान्ता द्रुतमद्ध्यविम्बिताः । यथानुपूर्वम् प्रथमा द्रुता पृश्निऽ(वृत्तिऽ?) प्रशस्स्यते । मद्ध्यमैकान्तरा वृत्तिर् द्व्यन्तरा हि विलम्बिता । नैनाम् बुधऽ प्रयुन्जीत यदीच्छेद् वर्णसम्पदाम् ।। अब्भ्यासार्थे द्रुता वृत्तिरुपलब्धौ विलम्बिता । मद्ध्यमा तु प्प्रयोगार्थे न तद्वचनमन्न्यथा ।। ऐन्द्री तु मद्ध्यमा वृत्तिऽ प्राजापत्त्या विलम्बिता । अग्निमारुतयोर् वृत्तिस् सर्वशास्त्रेषु निन्दिता ।। दोषाऽ प्रकाशास् तु विलम्बितायावँ् वर्णा द्रुतायान् न च सूपलक्क्ष्याः । तस्माद् द्रुतान् चैव विलम्बितान् च तत्त्यक्त्वा नरो मद्ध्यमया प्प्रयुन्ज्यात् ।। सर्वा एव तु निर्दोषा वृत्तयस् समुदाहृताः । स्वधीतस्स्य सुवक्त्तरस्स्य शिक्क्षकस्स्य विशेषतः"[5] इति । चारायणीयशिक्क्षायान् तु— "प्रचिता वलगा तारा केशिनी धात्तिरेव च । स्वमति–पिपीलका–त्वष्ट्रा–वायव्या नव वृत्तयः ।। तिस्स्रस्तिस्स्रऽ क्रमेणासाम् पूर्वे मद्ध्ये तथोत्तरे । सवनेषु प्प्रशस्स्यन्ते द्रुत–मद्ध्य–विलम्बिताः ।। अब्भ्यासार्थे द्रुतावँ् वृत्तिम् प्रयोगार्थे तु मद्ध्यमाम् । शिष्ष्याणामुपदेशार्थे वृत्तिङ्ग कुर्याद् विलम्बिताम् ।। पदक्क्रमेण सन्धाय यजुर्धर्मेण सँस्थितम् । स्थानपाणिस्वरश्शिलष्टन् द्रुतमाहुर् मनीषिणः ।। लग्ध्वादिगुरुसन्धिन् च सोच्छ्वासन् तम् पदे-पदे । मात्त्राकालं समङ्ग कुर्यान् मद्ध्यमान् ताम् प्रवक्क्षते ।। पदम्-पदम् पृथक्पृथक् प्रक्क्रमम्प्रक्क्मन् तु यत् । प्रागप्प्रमागप्प्रशश्लिष्टान् न्यासे वृत्तिवँ् विलम्बिताम् ।। वाद्द्चन् च ताण्डवादीनाम् मात्त्रार्ध-

---

१. श्लो. ११०–१११ (३।९८–९९) । २. सू. ४७९–४८० । ३. श्लो. ३, ४ । ४. २३।२० । ५. श्लो. १–६ (शि. स., पृ. ४६३) ।

मनुवर्तते । क्रमञ् चैव तिरस्कृत्य शिष्याव्भ्यासनहेतवे"[1] इति ॥१९॥

८. अथ वाचस्स्थानादिनिरूपणम्

(क) वाचस्स्थानभेदाः

वाचस् तारत्वमात्तरायास् तारतम्यस्स्य हेतवः ।
उरःकञ्ठादीनि वाचस्स्थानान्न्युक्तानि शिक्ष्वकैः ॥२०॥
मन्द्रमद्ध्यमताराणि तज्जान्न्युक्तानि कैश् चने ।
उपांशुनिमदद्ध्वानोपब्दिमन्ति च कैश् चन ॥२१॥

तथा हि ऋग्वेदप्रातिशाक्ख्ये— "त्रीणि मन्द्रम् मद्ध्यममुत्तमञ् च स्स्थानान्न्याहुस् सप्तयमानि वाचः । अनन्तरश् चाऽत्तर यमोऽविशेषस् सप्त स्स्वरा ये यमास् ते पृथग् वा"[2] इति । तैत्तिरीयप्रातिशाक्ख्ये तु— "सप्त वाचस्थानानि भवन्ति, उपांशु-ध्वान-निमदो-ऽपब्दिमन्-मन्द्र-मद्ध्यम-ताराणि, करणवदशब्दममनःप्रयोगमुपांशु, अक्क्षरव्यञ्जनाना-मनुपलब्धिर् ध्वानः, उपलब्धिर् निमदः, सशब्दमुपब्दिमत्; उरसि मन्द्रञ्च कण्ठे मद्ध्यमं शिरसि तारम्; मन्द्रादिषु त्त्रिषु स्स्थानेषु सप्त-सप्त यमाः, कृष्टप्रथमदद्वितीयतृतीयचतुर्थमन्द्रातिस्स्वार्याः"[3] इति । शुक्लयजुर्वेदप्रातिशाक्ख्ये च— "त्रीणि स्त्थानानि"[4] इति, "सवनक्-क्रमेणोरःकण्ठब्भ्रूमद्ध्यानि"[5] इति च । पाणिनीयव्याकरणभाष्ये च— "कःपुनःप्रक्क्रमः ? उरःकण्ठश् शिरः"[6] इति । "समानयमेऽक्क्षर-मुच्चैरुदात्तन् नीचैरनुदात्तमाक्क्षिप्तं स्वरितम्"[7] इति वदता चतुर-द्ध्यायिकाकारेणाऽपि इमानि वाचस्स्थानानि सूचितानि । भरतनाट्य-शास्त्रे च— "त्रीणि स्स्थानानि उरः कण्ठश् शिर इति । भवत्त्यपि च-शारीर्यामथ वीणायान् त्रिब्भ्यस् स्थानेब्भ्य एव तु । उरसश् शिरसः कण्ठात् स्वरः काकुः प्रवर्तते ॥ आभाषणञ् च दूरस्स्थे शिरसा सम्-प्रयोजयेत् । नातिदूरे च कण्ठेन ह्युरसा चैव पार्श्वतः"[8] इति ॥२०-२१॥

(ख) मन्द्रादिकाया वाचो विनियोगविशेषस्स्य निरूपणम्

वाक् प्रातस्सवने मन्द्रा मद्ध्या माद्ध्यन्दिने सवे ।
तारा तृतीयसवने प्रयोज्ज्या शंसनादिके ॥२२॥

अयवँ विनियोगविशेषस् "सवनक्क्रमेणोरःकण्ठब्भ्रूमद्ध्यानि"[9]

---

१. पृ. २८ । २. १३।४२, ४५ । ३. २३।४-१२ ।
४. १।१० । ५. १।३० । ६. १।२।३० । ७. १।१४, १५, १६ ।
८. १७।१०६ १०८ । ९. शु. य. प्रा. १।३० ।

इति वचनेन शुक्लयजुर्वेदप्प्रातिशाक्ख्येऽपि सूचितः। कात्त्यायनश्रौतसूत्त्रेऽपि–"प्प्रथमस्त्थानेन प्प्राक्क्स्विष्ट्टकृतः, मद्ध्यमेनेडायाः, शेषमुत्तमेन"[१] इति, "प्प्रथमस्त्थानेन प्प्राग् ग्देवतादेशात्, प्रातःसवने चोच्चैः कर्म्माणि, मद्ध्यमेन माद्ध्यन्दिने, उत्तमेन तृतीयसवने"[२] इति चाऽयवँ विषयꣳ प्रतिपादितः। ऐतरेयब्राह्म्मणे च– "यदा वा एष प्रातरुदेत्त्यथ मन्द्रन् तपति। तस्मान् मन्द्र्या वाचा प्रातस्सवने शंसेत्। अथ यदाऽब्भ्येत्त्यथ बलीयस् तपति तस्माद् बलीयस्स्या वाचा माद्ध्यन्दिने शंसेत्। अथ यदाऽभितरामेत्त्यथ बलिष्ठतमन् तपति तस्माद् बलिष्ठतमया वाचा तृतीयसवने शंसेत्"[३] इति। देवयाज्ञिकेनाऽपि "मन्द्रम् प्रातस्सवने चरन्ति" इत्त्यादिका शाखान्तरश्श्रुतिरुल्लिखिता[४]। पाणिनीयशिक्क्षायाम् च— "मारुतस् तूरसि चरन् मन्द्रम् जनयते स्स्वरम्। प्रातस्सवनयोगन् तम् छन्दो गायत्त्रमाश्श्रितम्। कण्ठे माद्ध्यन्दिनयुगम् मद्ध्यमन् त्रैष्टुभानुगम्। तारन् तार्त्तीयसवनं शीर्षण्यम् जागतानुगम्"[५] इति, "प्रातꣳ पठेन् नित्त्यमुरस्स्थितेन स्स्वरेण शार्दूलरुतोपमेन। मद्ध्यन्दिने कण्ठगतेन चैव चक्क्राह्व्वसङ्कूजितसन्निभेन॥ तारन् तु विद्द्यात् सवनन् तृतीयं शिरोगतम् तच् च सदा प्प्रयोज्ज्यम्। मयूरहंसान्न्यभृतस्स्वराणान् तुल्ल्येन नादेन शिरस्स्थितेन"[६] इति च। चारायणीयशिक्क्षायाम् च— "प्रातर् वदेन् नित्त्यमुरस्स्थितेन स्स्वरेण शार्दूलरुतोपमेन। मद्ध्यन्दिनो(ने ?) कण्ठगतेन चैव चक्क्राह्व्वयाकूजितसन्निभेन॥ तारन् तु विद्द्यात् सवनन् तृतीयं शिरोगतन् तच् च सदा प्प्रयोज्ज्यम्॥ वाचं स्वतन्त्रान् न पठेत् कदा चित् प्राज्ञ्ञोऽन्न्यथा तैर् विहितं (हि ?) वेदम्"[७] इति, "न वासरस्स्य पूर्वाह्णे तारमुच्चारयेत् स्वरम्। उत्साहो नश्श्यते तस्स्य रात्त्रन्ते (?) मैथुने यथा"[८] इति च। माण्डूक्क्यां शिक्क्षायाम् च– "प्रातर् वदेन् नित्त्यमुरस्स्थितेन स्स्वरेण शार्दूलरुतोपमेन। माद्ध्यन्दिने कण्ठगतेन चैव चक्क्राह्व्वयैꣳ कूजितसन्निभेन॥ तारन् तु विद्द्यात् सवनन् तृतीयं शिखण्डिना तच् च सदा प्प्रयोज्ज्यम्। मयूरहंसादिमृदुस्स्वराणान् तुल्ल्येन नादेन शिरस्सुखेन"[९] इति॥२२॥

---

१. ३।१।३–५। २. ९।६।१६–१९। ३. ३।४४ (१४।६)। ४. ९।६।१८ (१७)। ५. श्लो. ७, ८। ६. श्लो. ३६, ३७। ७. पृ. २३। ८. तत्त्रैव। ९. श्लो. ४१, ४२ (शि. स., पृ. ४६६)।

९. अथ काकुनिरूपणम्

विचारप्रश्नोपालम्भशोकभीत्यादिभिस् तथा ।
निषेधरूपविद्ध्यादिविशेषैश् च कृतो हि यः ॥२३॥
पदवाक्यतदंशानन्यतमस्योच्चारणे स्थितः ।
ध्वनेर् विकारो यस् सैव काकुरित्यभिधीयते ॥२४॥

तथा हि नामलिङ्गानुशासने— "काकुस् स्तिरयावँ विकारो यश् शोकभीत्यादिभिर् ध्वनेः"[1] इति । भरतनाट्यशास्त्रे च— "द्विविधा काकुः, साकाङ्क्षा निराकाङ्क्षा चेति वाक्यस्य साकाङ्क्षनिराकाङ्क्षत्वात् । **अनियुक्तार्थकवँ वाक्यं साकाङ्क्षमिति सञ्ज्ञितम् । नियुक्तार्थन् तु यद् वाक्यन् निराकाङ्क्षन् तदुच्यते ।** तत्र साकाङ्क्षन् नाम तारादिमन्द्रान्तमनियुक्तार्थमनिर्यातितवर्णालङ्कारङ्ग कण्ठोरस्स्थानगतम् । निराकाङ्क्षन् नाम नियुक्तार्थन् निर्यातितवर्णालङ्कारं शिरस्स्थानगतम् मन्द्रादितारान्तमिति । अथ षडलङ्कारा नाम— **उच्चो दीप्तश् च मन्द्रश् च नीचो द्द्रुतविलम्बितौ । षट्ठ्चस्स्यैते ह्यलङ्कारा लक्ष्णणञ् च निबोधत । उच्चो** नाम सिरस्स्थानगतस् तारस्स्वरः, स च दूरस्स्थाभाषणविस्स्मयोत्तरोत्तरसञ्जल्पदूराह्वानत्रासनाबाधाद्द्र्चेषु । **दीप्तो** नाम शिरस्स्थानगतस् तारतरः, स चाऽऽक्षेपकलहविवादामर्षक्रुष्टाधर्षणक्रोधशौर्यदर्पतीक्ष्णरूक्षाभिधाननिर्भर्त्सनाक्रन्दितादिषु। **मन्द्रो** नाम उरस्स्थानगतो निर्वेदग्लानिचिन्तौत्सुक्यदैन्यव्याधिक्रीडागाढशस्त्रक्षतमूर्छामदगुह्यार्थवचनादिषु । **नीचो** नाम उरस्स्थानगतो मन्द्रतरः, स च स्वभावाभाषणव्याधिशमश्रमार्ततत्त्रस्तपतितमूर्छितादिषु । **द्रुतो** नाम कण्ठगतः, स च त्वरितः, लल्लन–मन्मन–भय–शीतज्ज्वरत्त्रासायस्तात्त्ययिककार्याऽऽवेदनादिषु। **विलम्बितो** नाम कण्ठस्स्थानगतस् तनुमन्द्रः, स च शृङ्गार–करुण–वितर्कित–विचारा-ऽमर्षाऽसूयिताऽव्यक्तार्थप्रवादलज्जाचिन्तातर्जनविस्मयदोषानुकीर्तनदीर्घरोगनिपीडनादिषु । **अत्त्राऽऽनुवंश्याश् श्लोका भवन्ति**— उत्तरोत्तरसञ्जल्पपरुषाक्षेपणेषु च । तीक्ष्णरूक्षाभिनयने आवेगे क्रन्दिते तथा ॥ परोक्षस्स्य समाह्वाने तर्जने त्रासने तथा । दूरस्स्थाभाषणे चैव तथा निर्भर्त्सनेषु च । भावेष्वेतेषु नित्यं हि नानारससमाश्रया । उच्चा दीप्ता द्रुता चैव काकुः कार्या प्रयोक्तृभिः ॥ व्याधिते च ज्ज्वरार्ते च भयार्ते शीतविप्लुते ।

---

१. १।६।१२ ।

नियमस्थे वितर्के च गाढशस्तरक्षतेषु च। गुह्यार्थवचने चैव चिन्तायान् तपसि स्थिते। मन्द्रा नीचा च कर्तव्या काकुर् नाट्यप्रयोक्तृभिः॥ लल्ले च मन्मने चैव भयार्ते शीतविप्लुते। मन्द्रा द्रुता च कर्तव्या काकुर् नाट्यप्रयोक्तृभिः॥ दृष्टनष्टानुसरणे इष्टानिष्टश्रुते तथा। इष्टार्थक्ष्यापने चैव चिन्ताध्याने तथैव च। उन्मादेऽसूयिते चैव उपालम्भे तथैव हि। अव्यक्तार्थप्रवादे च कथायोगे तथैव च। उत्तरोत्तरसञ्जल्पे कार्येऽतिशयसंयुते। विकृते व्याधिते क्रोधे दुःखे शोके तथैव च॥ विस्मयामर्षयोश् चैव प्रहर्षे परिदेविते। विलम्बिता च दीप्ता च काकुर् मन्द्रा च वै भवेत्॥ लघ्वक्षरप्रायकृते गुरुवक्षरकृते तथा। उच्चा दीप्ता च कर्तव्या काकुस् तत्तत्र प्रयोक्तृभिः॥ यानि सौम्यार्थयुक्तानि सुखभावकृतानि च। मन्द्रा विलम्बिता चैव तत्तत्र काकुर् विधीयते॥ यानि स्युस् तीक्ष्णरूक्षाणि दीप्ता चोच्चा च तेष्वपि। एवन् नानाशयोपेतम् पाठ्यं योज्यम् प्रयोक्तृभिः॥ हास्यशृङ्गारकरुणेष्विष्टा काकुर् विलम्बिता। वीररौद्राद्भुतेषूच्चा दीप्ता वाऽपि प्रशस्यते॥ भयानके सबीभत्से द्रुता नीचा च कीर्तिता॥ एवम् भावरसोपेता काकुः कार्या प्रयोक्तृभिः"[1] इति। काव्यमीमांसायाञ् च— "रीतिरूपवँ वाक्यत्रितयञ्च काकुः पुनरनेकयति। 'काकुर् वक्रोक्तिर् नाम शब्दालङ्कारोऽयम्' इति रुद्रटः। 'अभिप्रायवान् पाठधर्मः काकुः, स कथम् अलङ्कारस् स्याद्' इति यायावरीयः। सा च द्विविधा साकाङ्क्षा निराकाङ्क्षा च। वाक्यान्तराकाङ्क्षिणी साकाङ्क्षा, वाक्योत्तरभाविनी निराकाङ्क्षा। **तदेव वाक्यञ्च काकुविशेषेण साकाङ्क्षम्। तदेव काकुमन्तरेण निराकाङ्क्षम्। आक्षेपगर्भा प्रश्नगर्भा वितर्कगर्भा चेति साकाङ्क्षा। विधिरूपा उत्तररूपा निर्णयरूपा चेति निराकाङ्क्षा।** तत्तराऽऽक्षेपगर्भा— 'यदि मे वल्लभा दूती तदाऽहमपि वल्लभा। यदि तस्याः प्रिया वाचस् तन् ममाऽपि प्रिय प्रियाः'। इयमेव निर्देष्टुर् विधिरूपा। प्रश्नगर्भा— 'गतस् स कालो यत्तराऽऽसीन् मुक्तानाञ् जन्म वल्लिषु। वर्तन्ते साम्प्रतन् तासां हेतवश् शुक्तिसम्पुटाः'। इयमेवोपदेष्टुरुत्तररूपा। वितर्कगर्भा— 'नवजलधरस् सन्नद्धोऽयन् न दृप्तनिशाचरस् सुरधनुरिदन् दूराकृष्टन् न नाम शरासनम्। अयमपि पटुर् धारासारो न बाणपरम्परा कनकनिकषस्निग्धा विद्युत् प्रिया न ममोर्वशी'। इयमेवोपदेष्टुर्

---

१. १७।११५-१२९।

निर्णयरूपा। ता इमास् तिस्रोऽपि नियतनिबन्धाः। तद्विपरीताऽ पुनरनन्ताः। तत्तराब्भ्युपगमानुनयकाकू 'युष्मच्छासनलङ्घनाम्भसि मया मग्नेन नाम स्थितम् प्राप्ता नाम विगर्हणा स्थितिमताम् मद्ध्येऽनुजानामपि। क्रोधोल्लासितशोणितारुणगदस्योच्छिन्दतऽ कौरवानद्दर्चकन् दिवसम् ममाऽसि न गुरुर् नाऽहवँ विधेयस् तव'। अब्भ्यनुज्ञोपहासकाकू 'मथ्नामि कौरवशतं समरे न कोपाद् दुश्शासनस्य रुधिरन् न पिबाम्भ्युरस्तः। सञ्चूर्णयामि गदया न सुयोधनोरू सन्धिङ्ग करोतु भवतान् नृपतिऽ पणेन'। **एवन् तिरचतुरकाकुयोगोऽपि।** तत्तर त्तिरयोगः— 'सेयम् पश्श्यति नो कुरङ्गकवधूस् त्रस्तैवमुद्वीक्षते तस्स्याऽ पाणिरयन् न मारुतवलत्पत्तराङ्गुलिऽ पल्लवः। तारं रोदिति सैव नैष मरुता वेणुस् समापूर्यते सेयम् मामभिभाषते प्रियतमा नो कोकिलऽ कूजति'। चतुर्योगः— 'उच्च्यता स वचनीयमशेषन् नेश्श्वरे परुषता सखि साद्ध्वी। आनयैनमनुनीय कथवँ वा विप्रियाणि जनयन्ननुनेयः'। सक्ख्या वा नायिकाया वा सखीनायिकयोरथ। सखीनाम् भूयसीनावँ वा वाक्क्ये काकुरिह स्थिता॥ पदवाक्क्यविदाम् मार्गो योऽन्न्यथैव व्व्यवस्थितः। स तत्वङ्गाभिनयद्द्योत्त्यस् तङ्ग काकुऽ कुरुतेऽन्न्यथा॥ **अयङ्ग काकुकृतो लोके व्यवहारो न केवलम्। शास्त्रेष्ष्वप्प्यस्स्य साम्म्राज्ज्यङ्ग काव्व्यस्स्याऽप्प्येष जीवितम्॥** कामवँ विवृणुते काकुरर्थान्तरमतन्द्रिता। स्फुटीकरोति तु सताम् भावाभिनयचातुरीम्"[1] इति॥२३–२४॥

१०. अथ विरामनिरूपणम्

विरामो वागुच्चरणयत्नस्स्योपरमोऽत्तर हि।
यति–विश्श्रान्ति–विरतिच्छेदाद्दयाश् चाऽस्स्य वाचकाः॥२५॥

(क) पदस्स्थवर्णमद्ध्यस्स्थ–विराम–निरूपणम्

उच्चारणे पदस्स्थानावँ वर्णानाम् मद्ध्यतोऽपि च।
सूक्क्ष्मो विरामो भवतीत्त्याह कात्त्यायनो मुनिः॥२६॥

तथाहि पाणिनीयव्याकरणवार्तिके— "शब्दाविरामे प्रतिवर्णमवसानम्"[2] इति। तद्व्याक्ख्याने भाष्ष्यकारश् च—"अथवा शब्दाविरामस् संहितेत्त्येतल् लक्क्षणङ्ग करिष्ष्यते। तत्तराह—शब्दाविरामे (प्रतिवर्णमवसानम्।) शब्दाविरामे प्रतिवर्णमवसानसञ्ज्ञा प्राप्नोति। किमिदम् प्रतिवर्णमिति। वर्णवँ वर्णम् प्रति प्रतिवर्णम्। येनैव यत्नेनैको

---

१. सप्तमेऽद्ध्याये, काकुप्प्रकारेषु। २. पा. व्या. भा. १।४।१०९ वा. ६।

वर्ण उच्चार्यते विच्छिन्ने वर्ण उपसंहृत्य तमन्यमुपादाय द्द्वितीयꣳ प्रयुज्यते तथा तृतीयस् तथा चतुर्थः। एवन् तर्ह्यनवकाशा संहितासञ्ज्ञाऽवसानसञ्ज्ञाम् बाधिष्यते। अथवाऽवसानसञ्ज्ञायाम् प्रकर्षगतिर् विज्ञास्यते साधीयो यो विराम इति। कश् च साधीयः। यश् शब्दार्थयोर् विरामः" इति। एकपदस्थानावँ वर्णानाम् मद्ध्ये वर्तमानोऽप्ययवँ विरामो (वर्णेन रिक्तꣳ कालो) ह्रादेन प्रच्छादनाद् अविरामः (वर्णेन सहितः) इव लक्ष्यते यथा बदरपिटके रिक्तको लोहकंसस् तद्गुण उपलब्ध्यते इति च तत्तरैव द्ध्वनितम्। ऋक्तन्तरेऽपि वर्णयोरन्तरम् परमाणुमात्तरम् भवतीति विरामप्रकरणे एव प्रोक्तम्। तथाहि "वर्णान्तरम् परमाणु"[1] इति ॥२६॥

(ख) सयँयुक्तव्यञ्जनमद्ध्यस्स्थविरामविशेषजन्न्यसयँयोगपिण्डविशेषनिरूपणम्

उच्चारणे व्यञ्जनानां सयँयुक्तानां हि मद्ध्यतः।
विरामो योऽस्स्य वैशिष्ट्यात् पृथक् सयँयोगपिण्डकाः ॥२७॥
प्रोक्तास् सङ्क्षेपतो वर्णाद्ध्यायेऽक्षरनिरूपणे।
यद्द्यप्येतेऽत्तर चोच्चयन्ते विरामस्स्य प्रसङ्गतः॥२८॥

सयँयुक्तानावँ व्यञ्जनानाम् मद्ध्ये स्वरमद्ध्यस्स्थानि व्यञ्जनानि कानिचित् स्वपूर्ववर्तिनस् स्वरस्स्य कानिचिच् च स्वोत्तरवर्तिनस् स्वरस्स्याङ्गानि भवन्तीति वर्णाद्ध्याये निरूपितम्। एवञ् च तेषावँ वाक्यमद्ध्यस्स्थानावँ व्यञ्जनानाम् पूर्वाङ्गभावपराङ्गभावाब्भ्यावँ विभागे सति वक्ता येन यत्नेन पूर्वमक्षरमुच्चारयति तयँ यत्नमुपसंहृत्याऽन्न्ययँ यत्नमुपादायोत्तरमक्षरमुच्चारयतीति द्द्वयोरक्षरयोर् मद्ध्ये विरामो भवति कश् चन, पूर्वश्श्लोकविवरणप्रदर्शितपाणिनीयव्याकरणवार्तिकभाष्योक्तन्न्यायात्। वर्णमद्ध्यस्स्थविरामापेक्षयाऽक्षरमद्ध्यस्स्थविरामो विशिष्टतरो भवति येनाऽक्षरविभागोऽनुभूयते। एवमक्षरविभागे कुत्तर चित् पूर्वत्तर व्यञ्जनसयँयोगस् तिष्ठति, यथा "शर्म्–म' इत्त्यत्तर; कुत्तर चित् परत्तर व्यञ्जनसयँयोगस् तिष्ठति यथा 'तत्–त्वम्' इत्त्यत्तर; कुत्तर चिच् चोभयत्तर व्यञ्जनसयँयोगस् तिष्ठति, यथा 'कार्त्–त्स्न्यम्' इत्त्यत्तर। एवम् पूर्वत्तर परत्तर चोभयत्तर वा एकाक्षराङ्गतया स्थितानां सयँयुक्तानावँ व्यञ्जनानाम् परस्परं संश्लेषोऽपि तत्तदक्षरोच्चारणयत्नानावँ वैशिष्ट्यादक्षरविभाजकविच्छेदस्स्य तारतम्याच् च विविधो भवति; तस्स्यैव संश्लेषस्स्य विविधता-

१. २।४।४।

मादाय सयँयोगपिण्डानावँ वैशिष्ट्यम् प्राचीनैरन्वाख्यातम् बोद्धव्यम् । समानेन न्यायेन वाक्क्यादौ वाक्क्यान्ते च सस्थितानान् तत्तद्वर्णविशेषसयँयोगपिण्डानान् तादृशमेव वैशिष्ट्यमूह्यम् ।।२७–२८।।

(ग) सयँयोगपिण्डविशेषोद्देशः

अयस्पिण्डो दारुपिण्ड ऊर्णापिण्डस् तथैव च ।
ज्वालापिण्डश् च मृत्पिण्डो वायुपिण्डस् ततऽ पर: ।।२९।।
वज्रपिण्डश् चेति पिण्डा व्यञ्जनानाम् प्रकीर्तिताः ।
सयँयुक्तानावँ विरामेण च्छेदनस्य विशेषतः ।।३०।।

(१) अयस्पिण्डनिरूपणम्

यमवान् खलु सयँयोगपिण्डोऽयस्पिण्ड उच्यते ।
अग्घँ-न्या यज्जँ-ञपतिश् चैव तनच्चँ-म्यग्गँ-ने निदर्शनम्।।३१।।

अत्तर च गयमयोर् जयमयोश् चयमयोर् गयमयोश् च सयँयोगा अयस्पिण्डस्योदाहरणानि वेदितव्यानि न तु यमपञ्चमसयँयोगाः, तेषाम् भिन्नाक्षराङ्गत्वादेकपिण्डवर्तित्वाभावात् । तैत्तिरीयाणामाम्नाये यमानामुत्तरस्स्वराङ्गत्वे तु यमपञ्चमसयँयोगा अपि उदाहरणानि स्युः । तत्राऽयस्पिण्डत्वञ्च अयस्पिण्डावयवानामिव एतत्सयँयोगपिण्डावयवानावँ व्यञ्जनानामपि परस्परं दृढतया सलँलग्नत्वाद्, अयस्पिण्डतुल्यतया स्थानमभिग्घ्नता वायुना जननीयैस् स्पर्शैर् यमैश् च घटितत्वाद् वा पिण्डस्य; "स्पर्शयमवर्णकरो वायुरयस्पिण्डवत् तस्थानमभिपीडयति"[1] इत्यापिशलिशिक्षावचनात् । अयस्पिण्डप्रतिपादकानि प्राचां शिक्षकाणावँ वचनानि च— "स्पर्शानाम् पञ्चमैर् योगे भवन्तीह यमास् स्मृताः । अयऽपिण्डेन तत् तुल्यङ घनबन्धाऽ प्रकीर्तिताः ।। सः पलिक्नीर् अग्निर् यज्ञ पत्नी विद्म (च) दध्म (च) । आत्मानम् पाप्मा जगृभ्माऽगृभ्णामित्त्येतन् निदर्शनम्"[2] इति शैशिरीयशिक्षायाम् । "स्पर्शानाम् पञ्चमैर् योगे भवन्तो हि यमास् स्मृताः । अयःपिण्डेन तत् तुल्यङ घनबन्धाः प्रकीर्तिताः । पलिक्नीर् यज्ञरत्नानि विद्माऽप्नानं ररभ्म च"[3] इति शौनकशिक्षायाम् । याज्ञवल्क्यशिक्षायाञ् च— "यमान् विद्द्यादयःपिण्डान्"[4] इति । वर्णरत्नप्रदीपिकायाञ् च— "स्पर्शानाम् पञ्चमैर् योगे चत्वारो ये यमास् स्मृताः । अयस्पिण्डेन ते तुल्या घनबन्धाऽ प्रकीर्तिताः"[5]

---

१. स्थानपीडनप्रकरणे सू. १ । २. श्लो. २९, ३० ।
३. श्लो. ३६, ३७ । ४. श्लो. २०२ (शि. स., पृ. २९) ।
५. श्लो. १७६–१७७ (शि. स., पृ. १३२) ।

इति, "द्वितीयाश् च तृतीयाश् च वर्णा सोष्माण एव हि। यदैते पञ्चमैर् युक्ता वायुस् सम्यगृते मुखात् ॥ तन् धारयेत् प्रयत्नेन घनबन्धं समुच्चरेत्। सक्थ्ना दद्ध्मस् तथा दद्ध्ना अग्घ्ना इति निदर्शनम्"[1] इति च। केचित् तु शैशिरीयशिक्षादिवाक्ये यमग्रहणमुपलक्षणम् मन्वाना अपञ्चमस्स्पर्शानाम् परस्परं सयोगेऽपि अयस्पिण्डतावद् वदन्ति। तथाहि— वषट्कृतमित्यादौ "यथायस्पिण्डादीनामाश्लेषस् तथैवैषावद् व्यञ्जनानामिति"[2] इति शुक्लयजुर्वेदप्रातिशाख्यव्याख्याने उव्वटः। वर्णरत्नप्रदीपिकायाम् च— "स्पर्शात् परककारस्य स्स्फोटनन् दोषकृन् न वा। अत्तराचार्याशयाद् द्वित्वं स्फोटनन् द्वित्वनाशनम् ॥ अयस्पिण्डेन तत् तुल्यन् तस्माद्युच्चारणन् तथा। काण्डात्काण्डाद् वषट्कृतयद् यकृत्क्लोमादिकयद् यथा"[3] इति। यद्द्यपि पूर्वस्स्वराङ्गतया स्पर्शानामयस्पिण्डता न सम्भवति तथापि उत्तरस्स्वराङ्गतया सा सम्भवत्येवेति चाऽत्तर स्स्मरणीयवद् विज्ज्ञैः ॥३१॥

(२) दारुपिण्डनिरूपणम्

दारुपिण्डोऽन्तस्थवर्णाऽपञ्चमस्स्पर्शपिण्डकः।

आप्प्यायद्ध्वन् तथेन्द्रायाऽऽप्प्लावव्य सुप्प्वा निदर्शनम् ॥३२॥

अत्तरापि पकारयकारयोर् धकारवकारयोर् दकार-रकारयोः पकारलकारयोः पकारवकारयोश् च सयोगा दारुपिण्डोदाहरणानि। तत्तर दारुपिण्डत्वञ् च पिण्डान्तर्वर्तिनोर् व्यञ्जनयोः परस्परम् अगाढं सलग्नत्वात्। यमस्य तत्पूर्ववर्तिना तदुत्तरवर्तिना वा वर्णेन सह यथाऽविश्लेषस्तया गाढं संश्लेषो न तथाऽत्तर संश्लेषः। अथवा पिण्डस्य दारुपिण्डतुल्यतया स्थानमभिगघ्नता वायुना[4] जननीयाभिरन्तस्थाभिर् युक्तत्वाद् दारुपिण्डत्वम्। एतद्विषये प्राचां शिक्षकाणावद् वचनानि च— "स्पर्शास् त्वपञ्चमाश् चैवमन्तस्थाभिश् च सयुताः। दारुपिण्डेन तत् तुल्यं श्लथबन्धाः प्रकीर्तिताः ॥ शत्रुं सख्यमगर्च्छङ्क कृच्छ्रङ्क्व वज्रयद् यज्वा राष्ट्रर्च्छति। प्लायोगिर् विद्धिर् मेढ्रवद् वाध्र्चश्श्वेति निदर्शनम्"[5] इति, "यथा योक्त्रेण सवद्वेष्ट्य तृणम् बद्ध्नन्ति वाहकाः। एवं सवद्वेष्ट्य यकारेण वैदिकम्

---

१. श्लो. १८८–१८९ (शि. स., पृ. १३३-१३४)। २. शु. य. प्रा. उ. भा. ४।१६३। ३. श्लो. १८५–१८६ (शि. स., पृ. १३३)। ४. आ. शि. सू. स्थानपीडनप्रकरणे, सू. २। ५. श्लो. ३१, ३२।

पिण्डमुच्यते ।। बाधृर्च्यश्श्व, सुपित्र्च वधृर्च्यश्श्वस्स्य सुमित्र्च्या रान्द्र्च्या त्र्च्यम्बकङ्ग कृतान्यृजीषिणस् सधृर्च्यग्घ्यतूंश्च"[1] इति च शैशिरीयशिक्क्षायाम् । शौनकशिक्क्षायाञ् च— "स्पर्शाश् च पञ्चमाश् चैवमन्तस्स्थाभिश् च सयँयुताः । दारुपिण्डेन तत् तुल्ल्यङ्ग घनबन्धाऽ प्रकीर्तिताः ।। शक्क्यं सक्ख्यङ्ग कृच्छ्रवँ वज्ज्रं राष्ट्र्च्यत्येतीड्ड्च्यं सम्म्राट्। मीड्ढ्वान् तत्थ्यवँ वाद्धर्च्यश्श्वोतापम्म्लुक्तवँ विब्भ्वीरुच्च्यते"[2] इति । याज्ज्ञवल्क्यशिक्क्षायामपि— "सान्तस्स्थान् दारुपिण्डकान्"[3] इति । वर्णरत्नप्रदीपिकायाञ् च-- "स्पर्शा अपञ्चमा ये च अन्तस्थाभिश् च सयँयुताः । दारुपिण्डेन ते तुल्ल्याश् श्लथबन्धाऽ प्रकीर्तिताः"[4] इति । "सान्तस्स्थान् दारुपिण्डकान्" इति याज्ज्ञवल्क्यशिक्क्षावचनात् सर्वेषामेव व्यञ्जनानाम् अन्तस्स्थाभिस् सयँयोगो दारुपिण्डरूप एवेति केचिन् मन्न्यन्ते, तन्मते 'हव्-व्यम्' 'धान्-न्यम्' 'अन्-न्वेमि' इत्त्यादौ वकारयकार- नकारयकारादिसयँयोगा अपि दारुपिण्डोदाहरणानि स्स्युः । अन्न्ये पुनः 'अश्-श्वः' 'सूर्य्-यः' 'यजमानस्-स्य' 'मातरिश्-श्वनः' 'सहस्-स्रधारम्' 'बह्व्-वीः' इत्त्यादिकमपि दारुपिण्डोदाहरणतया परिगृह्णन्न्ति । 'ऊर्ज्-जे' 'प्रार्प्-पयतु' 'धूर्व्-व' उल्ब्-बम्' इत्त्यादि तु दारुपिण्डतयोदाहर्तुमुचितमेव भाति । एवमेव 'दधिक्क्राव्ण्-णः' इत्त्याद्द्यपि । उक्तञ् च शैशिरीयशिक्क्षायाम्— "वकारस् तु नकारेण णकारेण च सयँयुतः । श्लथबन्धस् स विज्ज्ञेयो दुस्स्पृष्टश् चाऽत्तर चोच्च्यते ।। भूरिदाव्न एवयाव्नऽ प्रातर्याव्णो दधिक्क्राव्णः"[5] इति । अनेन न्न्यायेन तु 'कर्म्-मणे' 'बिल्म्-मिने' इत्त्यादिकाऽ पञ्चमान्तस्स्थासयँयोगा अपि उदाहरणानि स्स्युः । 'सम्मार्ज्जँ-मि' इत्त्यादौ पिण्डस्स्य यमवत्त्वेऽपि अन्तस्स्थया योगाद् दारुपिण्डतैवेति "अन्तस्स्थयमसयँयोगे विशेषो नोपलब्भ्यते । अशरीरयँ यमवँ विद्द्यादन्तस्स्थम् पिण्डनायकम्"[6] इति श्श्लोकस्स्य व्याक्ख्याने अमरनाथशास्त्रिणा प्रोक्तम् ।।३२।।

(३) ऊर्णापिण्डनिरूपणम्

ऊर्णापिण्डऽ पञ्चमैर् हि शषसानान् तु सङ्गमः ।
रश्म्-मिभिर् विष्ण्-णुरस्म्-मिंश्चेत्त्येवमादि निदर्शनम् ।।३३।।

---

१. श्लो. १५०–१५१ । २. श्लो. ३७–३९ । ३. श्लो. २०२ (शि. स., पृ. २९)। ४. श्लो. १७८–१७९ (शि. स., पृ. १३३) । ५. श्लो. ३३–३४ । ६. या. शि. शि. व. वि., पृ. १४६ ।

अत्तरापि शकारमकारयोप् षकार-णकारयोस् सकारमकारयोस् सयँ्योगा उदाहरणानि । तत्तर ऊर्णापिण्डत्वञ् च पिण्डस्स्य ऊर्णापिण्ड-तुल्यतया स्थानमभिग्घ्नता वायुना जननीयँश्[1] शषसैर् युक्तत्त्वाद् बोद्ध्यम् । अथवा पिण्डान्तर्वर्तिनोर् व्यञ्जनयोरूर्णापिण्डावयवाना-मिव परस्परं श्लथं संश्लिष्टत्त्वादूर्णापिण्डत्वम् बोद्ध्यम् । एतद्-विषये शैशिरीयशिक्क्षायाञ् च— "सयँ्योगे शषसाऽ पूर्वे परञ् चेदनु-नासिकम् । ऊर्णापिण्डेन तत् तुल्यं श्लथबन्धाऽ प्रकीर्तिताः ।। अश्नोतु विष्णुर् घृतस्नू कार्प्मवेति निदर्शनम्"[2] इति । शौनक-शिक्क्षायाञ् च— "ऊष्माणऽ पञ्चमैर् युक्ता अन्तस्स्थाभिश् च सयँ्युताः । ऊर्णापिण्डेन तत् तुल्यं श्लथबन्धाऽ प्रकीर्तिताः ।। अश्नोतु विष्णुर् घृतस्नु अस्मे युप्मे इति स्नुपे । अस्य वामस्या-जुष्रन्नश्वस् सम्मिश्ल इत्त्यपि"[3] इति । याज्ञवल्क्यशिक्क्षायाञ् च—"अन्तस्स्थयमवर्जन् तमूर्णापिण्डवँ् विनिर्दिशेत्"[4] इत्त्यस्स्फुट-मयमेव विषय उक्तः । वर्णरत्नप्रदीपिकायाः "यमास् तदा निवर्तन्ते ऊष्मा मद्ध्ये भवेद् यदि । ऊर्णापिण्डेन ते तुल्या पाशैस्तत्मन्न्या निदर्शनम्"[5] इति वचनन् तु भ्रष्टम् प्रतिभाति, "पाशैस्तत्तँ् मन्न्या" इत्त्यत्तर यमनिवृत्तेर् निष्प्रमाणकत्त्वादिति अमरनाथशास्त्रिणा-ऽप्युक्तम्[6]; तथापि यथा सत्त्यपि यमे 'सम्मार्ज्जँ्-मि' इत्त्यादौ यमस्स्या-ऽशरीरत्त्वाद् अन्तस्स्थस्स्य पिण्डनायवत्त्वाद् अन्तस्स्थप्प्रधानकस्स्य पिण्डस्स्य दारुपिण्डत्त्वाद् दारुपिण्डत्त्वम्, तथैव "पाशैस्तत्तँ्-मन्न्या" इत्त्यादौ सत्त्यपि यमे तस्स्याऽशरीरकत्त्वाच् शषसान्न्यतमप्प्रधानकस्स्य पिण्डस्स्योर्णापिण्डत्त्वादूर्णापिण्डत्त्वन् तु सुवचमेवेत्त्यपि अमरनाथ-शास्त्रिणैवोक्तम्[7] ।।३३।।

(४) ज्वालापिण्डनिरूपणम्

ज्वालापिण्डो हस्स्य योगो नासिक्क्ये पञ्चमेऽपि वा ।
गृह्णणामीति वह्नन्नितमम् ब्रह्म-मेति च निदर्शनम् ।।३४।।

अत्तर हकार-णकारयोर् हकारनकारयोर् हकारमकारयोश् च सयँ्योगा उदाहरणानि । तत्तर ज्वालापिण्डत्त्वञ् च अनुनासिकव्यञ्जनधर्मस्स्या-

---

१. आ. शि. सू., स्थानपीडनप्प्रकरणे, सू. ३ । २. श्लो. ३५ । ३. श्लो. ३९-४० । ४. श्लो. २०२ (शि. स., पृ. २९) । ५. श्लो. १७७-१७८ (शि. स., पृ. १३२-१३३) । ६. या. शि. शि. व. वि., पृ. १४६, टि. १, २ । ७. तत्तरैव ।

ऽनुनासिकत्त्वस्य हकारेऽपि सङ्क्रमणस्य प्रतीतेरित्याहुः । यथा ज्वाला स्वसमीपस्थवँ वस्तु समाश्लिष्यति तथैव पञ्चमवर्ण-धर्मोऽनुनासिकत्त्वमपि हकारं समाश्लिष्यतीत्यत्र पिण्डे ज्वालायास् सादृश्याज् ज्वालापिण्डतेति तेषामभिप्रायः । तैत्तिरीयशाखादिषु हकारस्य द्वित्त्वे द्वितीयस्य हकारस्य नासिक्यता, तत्र हकारनासिक्यसयँयोगो ज्वालापिण्डस् स्यान् नासिक्यीभूतहकारपञ्चमसयँयोगो वा । ज्वालापिण्डस्योल्लेख आपिशलिशिक्षायां शैशिरीयशिक्षायां शौनकशिक्षायावँ वर्णरत्नप्रदीपिकायाञ् च नैवोपलब्ध्यते । याज्ञवल्क्यशिक्षायामपि— "ज्वालापिण्डान् सनासिक्यान्"[1] इत्येवोक्तम्, पूर्णवँ विवरणन् नैव दत्तम् ॥३४॥

(५) मृत्पिण्डनिरूपणम्

सानुस्स्वारस् तु सयँयोगो मृत्पिण्डꣳ परिकीर्तितः ।
संस्थाञ् च संस्कृतं संस्तुप् संस्पृशश् च निदर्शनम् ॥३५॥

अत्तराऽनुस्स्वारसकारयोस् सयँयोगा उदाहरणानि । मृत्पिण्डत्त्वञ् च पिण्डस्याकठोरत्त्वादिना स्फुटनशीलत्त्वेन च व्व्याक्ख्येयम् । येषाम् मतेऽनुस्स्वारात् परस्य व्यञ्जनस्यापि व्यञ्जने परे द्वित्त्वन् तन्मते मृत्पिण्डोऽयमस्स्फुटितो भवति, अनुस्स्वारात् परस्य व्यञ्जनस्य व्यञ्जने परेऽपि द्वित्त्वन् न भवतीति वदताम् मते त्त्वयम् पिण्डस् स्फुटत्त्येव, तन्मतेऽनुस्स्वारस्य पूर्वाक्क्षराङ्गत्त्वाद् अनुस्स्वारोत्तरवर्णस्य च पराक्क्षराङ्गत्त्वात् । तस्मादेष पिण्डꣳ क्वाचित्क एव विज्ज्ञायते । स्फुटितस्याऽपि क्व चित् पिण्डत्त्वेन दृष्टत्त्वात् पिण्डत्त्वेन व्व्यवहारꣳ कृतꣳ प्रतीयते । अन्न्ये तु 'तां सवितुः' 'तिरंशौ' 'यामैरयँश्चन्द्रमसि' 'लोका२।ँ।ऽअकल्प्पयन्' 'शत्तरू२।ँ।रप' इत्त्यादीनि चोदाहरणानि मन्न्यन्ते[2]; किन् तु तत्तर क्व चित् सयँयोगस्य सत्त्वेऽपि सयँयोगिनोस् सर्वेषाम् मतेन भिन्नाक्क्षराङ्गत्त्वाद् एकपिण्डकत्त्वाऽभावः, क्व चिच् च सयँयोगस्यैवाऽभावः, रङ्गसत्त्वेऽपि मुक्ख्याऽनुस्स्वारस्याऽभावश् चेति न तानि उदाहरणानि सम्म्यञ्चि । एतद्विषयेऽप्यन्न्यत्तर वचनन् नैव प्राप्प्यते । याज्ञवल्क्यशिक्षायां हि "सानुस्स्वारांस्तु मृन्मयान्"[3] इत्त्युक्तम् ॥३५॥

---

१. श्लो. २०४(शि. स., पृ. २९)। २. या. शि. शि. व. वि., पृ. १४७। ३. श्लो. २०४ (शि. स., पृ. २९)।

(६) वज्जरपिण्डनिरूपणम्

जिह्वामूलीयसयोगो वज्जरी वा वज्जरपिण्डकः ।
दिवःक-ककुप् स्यात् काण्वादिसम्मतं हि निदर्शनम् ।।३६।।

अत्र जिह्वामूलीयककारयोः सयोगे उदाहरणम् । एतस्य ह्युच्चारणे जिह्वामूले वायोर् दृढन् निरोधात् सयोगिनोर् व्यञ्जनयोः परस्परं सुदृढं समाश्लिष्टत्वमेकीभावनिभम् भवतीत्यस्य वज्जरपिण्डत्वम् बोद्ध्यम् । अन्ये तु 'इष्-कृतिः' 'दिवः ककुप्' इत्यादिकमपि उदाहरणम् मन्यन्ते[1] माध्यन्दिनीयकेऽप्यस्य चारितार्थ्याय । किन् तु प्रथमे उदाहरणे व्यञ्जनयोर् भिन्नाक्षराङ्गत्वेन एकपिण्डकत्वाभावः, द्वितीये उदाहरणे च माध्यन्दिनीयानां सम्प्रदाये विसर्गककारयोर् मध्ये लघोर् विरामस्य क्रियमाणत्वाच् चैकपिण्डकत्वाभाव इति नैवंविधानां सयोगानां वज्जरपिण्डत्वमास्थेयम् । वाजसनेयिनाम् पञ्चदशानां साधारण्यायां याज्ञवल्क्यशिक्षायाम् माध्यन्दिनीयकेऽचरितार्थस्यापि कस्य चिद् विधेस् समाविष्टताया अनुपपत्तेरभावाच् च । याज्ञवल्क्यशिक्षायामेतद्विषये "जिह्वामूले तु वज्जिरणः"[1] इत्युक्तम् ।।३६।।

(७) वायुपिण्डनिरूपणम्

सोपद्ध्मानीयसयोगो वायुपिण्ड उदीरितः ।
याप्-फलिनीति काण्वादिसम्मताऽत्तराऽप्युदाहृतिः ।।३७।।

अत्तरोपद्ध्मानीय-पकारयोस् सयोग उदाहरणम् । उक्तसयोगोच्चारणे वायुनिरोधेन वायोः पिण्डीकरणमिव भवतीति तस्य वायुपिण्डत्वम् बोद्ध्यम् । अन्ये तु द्यौष्प्-पितेत्यादिकमपि उदाहरणम् मन्यन्ते[3] माध्यन्दिनीयकेऽप्यस्य चारितार्थ्याय । वस्तुतस् तु पञ्चदशानां शाखानां साधारण्यायां याज्ञवल्क्यशिक्षायाम् माध्यन्दिनीयकेऽचरितार्थानाम् एकद्वानां विधीनां सत्तायास् सम्भवान् न हि द्यौष्प्-पितेत्यादेरप्युदाहरणत्वङ्ग कल्प्यमिति श्लिष्टतरम् बोद्ध्यम् । एतद्विषये च—"सोपद्ध्मानान् वायुपिण्डान्"[4] इति याज्ञवल्क्यशिक्षायामुक्तम् ।

अत्तर सयोगपिण्डस्वरूपादिविषये वर्णाद्ध्याये कृते विचारे स्थितोऽपि विशेषस् तत एव परीक्षकैराकलनीयः ।।३७।।

---

१. या. शि. शि. व. वि., पृ. १४८ । २. श्लो. २०४ (शि. स., पृ. २९) । ३. या. शि. शि. व. वि., पृ. १४७ । ४. श्लो. २०४ (शि. स., पृ. २९) ।

(घ) सयँ युक्तव्यञ्जनसङ्ख्याविचारः

द्विव्यञ्जनादयस् सप्तव्यञ्जनान्ता उदाहृताः ।
गौतमेन तु सयँ योगा अयस्पिण्डादिकाश्शरयाः[1] ॥३८॥

(ङ) पदमद्ध्यस्स्थविरामनिरूपणम्

वाक्यस्स्थपदमद्ध्ये स्यात् प्रायेणाऽणुर् विरामकः ।
अर्थभेदज्ज्ञानजन्यसँस्कारसहितेन सः ॥३९॥
श्रोत्तरेन्द्रियेण ग्राह्यत्वयोऽतः पदच्छेदोऽनुभूयते ।
अतोऽक्षरैक्येऽपि पदभेदाद् भेदस् स्वरे क्वचित् ॥४०॥

वाक्यस्स्थानाम् पदानाम् मद्ध्ये प्रायेणाऽणुर् विरामो भवति । "बुद्धौ कृत्वा सर्वाश् चेष्टाऽ कर्ता धीरस् तत्त्वोन्नीतिः । शब्देनाऽर्थान् वाच्यान् दृष्ट्वा बुद्धौ कुर्यात् पौर्वापर्यम्"[2] इति न्यायेन वक्ता एतमर्थम् बोधयितुमेतद् वाक्यम् प्रयोक्तव्यम्, एतस्मिँस्तावद् वाक्ये इदन् तावत् पदन् तत इदम् इति बुद्ध्या सङ्कल्प्यैकयँ यत्नमुपादायैकम् पदमुच्चार्य तयँ यत्नमुपसंहृत्यान्ययँ यत्नमुपादाय अन्यत् पदमुच्चारयतीति वाक्यस्स्थेषु पदेषु मद्ध्येमद्ध्ये अणुर् विरामस् स्यादिति भावः । तस्य च ग्राहकम् अर्थभेदबुद्धिसँस्कारसहकृत श्रोत्तरेन्द्रियम् । अत एव च वाक्ये पदच्छेदोऽनुभूयते, पाठसम्पत्तौ पदच्छेदोऽपि गण्यते । 'दश-राम-शराः' इत्युच्चारयितव्ये 'दशरामशराः' इत्युच्चारणन् निन्दन्त्येव लौकिका अपि । वाक्ये पदानाम् पार्थक्येनोच्चारणस्य स्वाभाविकत्वे पदस्य प्रायेणैकोदात्तकत्वमपि प्रमाणम् । पदस्यैकोदात्तकत्वञ् च—"अनुदात्तम् पदमेकवर्जम्"[3] इति पाणिनिनाऽपि प्रतिपादितम् । व्यञ्जनान्त-स्वरादिकपदयोगे यद्द्यपि पूर्वोत्तरपदसम्बन्धिवर्णयोगेनैकमक्षरम् भवतीति सर्वसम्मतन् तत्थ्यम्, कण्ठरवेणैवोक्तञ् च शर्ववर्मणा[4] तथापि तत्त्रापि पूर्वपदाक्षराणाम् उत्तरपदाक्षराणाञ् चोच्चारणे स्वस्स्वसमूहेन विशिष्टस् सम्बन्धस् सन्निकर्षातिशयरूपऽ प्रतीयत एवेति तत्त्राऽपि पदमद्ध्ये विरामस् सुवचः । एतादृशे स्स्थले पूर्वपदान्तस्स्थव्यञ्जनस्याऽपि उत्तरपदादिस्वरस्स्वरग्राहित्वमप्यत्त्रैवाऽनुकूलम् । "एकादेश उदात्तेनोदात्तः"[5] इत्यस्य पदभेदविषये-"स्वरितो वाऽनुदात्ते पदादौ"[6] इति वैकल्पिकमपवादमन्वाख्यान् पाणिनिमुनिरपि वाक्यस्स्थपदानां संहितयो-

---

१. गौ. शि. १।४—२।७ । २. पा. व्या. भा. १।४।१०९ ।
३. अष्टा. ६।१।१५८। ४. कातन्त्रे १।१।२१। ५. अष्टा. ८।२।५।
६. तत्त्रैव ८।२।६ ।

च्चारणे पदमद्ध्यस्स्थवर्णानां संहितयोच्चारणे च किञ्चन पार्थक्यम् भवतीति सूचयन् प्रतिभाति। "यथासौ मत्तनागेन्द्रः पदात् पदवं विधावति। एवम् पदम्पदवं व्यक्तन् दर्शनीयम् पृथक्पृथक् ॥ पदान्ते तु विरामस् स्याद् वलाहक इति स्स्मृतः। अर्धर्चेर् वेद्द्युतो नाम ऋगन्ते तु भुजङ्गमः। पदे विरमते यत् तु स वं विशिख उच्च्यते। योऽन्न्यस्स्मिंश्च् छन्दसि प्रोक्तः परवकन् तवं विदुर् बुधाः"[1] इत्यादिकैश् चारायणीयशिक्क्षादिवचनैरपि पदान्तविरामः प्रतिपाद्द्यत एव ॥३९-४०॥

(च) विवृत्तिरूपविरामनिरूपणम्

पदान्ते वा पदे वेदे यस् स्वरोदयके स्वरे।

विरामस् सा विवृत्तिस् स्यान् मात्त्रिकी चाऽऽर्धमात्त्रिका ॥४१॥

"कर्म्मणऽआप्प्यायद्ध्वम्" "मा वस्तेनऽईशत" "ध्रुवाऽअस्म्मिन्" इत्यादौ पदान्ते विवृत्तिः, "तितऽउः" इत्यादौ पदमद्ध्ये विवृत्तिः। लोके तु विवृत्तिर् नोपलब्ध्यते। पदान्ते प्रायेण मात्त्राप्रमाणा विवृत्तिः पदमद्ध्ये त्वर्धमात्त्राप्रमाणेति तावत्कालो विरामो भवति। विवृत्तिश् च विशेषेण वृत्तिः। पूर्वस्स्वरोच्चारणयत्नं सर्वथा निरुद्ध्य अनन्यर्थं यत्नमुपादायोत्तरस्स्य स्वरस्स्य वर्तनम्, उच्चारणमिति यावत्। "विवेकेन पृथग्भावेन वर्तत इति विवृत्तिः"[2] इति नारदीयशिक्क्षाव्याक्ख्यायाम् भट्टशोभाकरः। "तेन विवेकेन पृथग्भावेन वर्तते इति विवृत्तिरिति निरुक्त्या य इति पदम् ईशे इति पदाद् विच्छिद्द्योच्चार्य मद्ध्ये याऽर्धमात्त्रिका विरतिस् सन्ध्यभावाद् भवति सा विवृत्तिः"[3] इति याज्ञ्यवल्क्यशिक्क्षावल्ल्याम्। विवृत्तिविषये प्राचावं वचनानि च— "स्वरान्तरन् तु विवृत्तिः, सा वा स्वरभक्तिकाला"[4] इति, "पुरएता तितउना प्रउगन् नमउक्तिभिः, अनृतपदवं विवृत्तयः"[5] इति, "यतोदीर्घस् ततोदीर्घा विवृत्तयः, द्विषन्ध्यस् तूभयतस् स्वरस्स्वराः"[6] इति ऋग्वेदप्रातिशाक्ख्ये। तत्तर "वा सा स्वरभक्तिकाला" इत्यस्स्य व्याक्ख्याने उव्वटश् च— "तत्तराऽयवं विवृत्तेर् विभागस् त्रिप्प्रकारः। उभयतोहस्स्वा पादमात्त्रकाला "प्रऋभुब्भ्यः" "प्रत्त्यु अदर्शि"। एकतोदीर्घाऽर्धमात्त्राकाला "नू इत्था ते" "सानो अव्व्ये"। उभयतोदीर्घा पादोनमात्त्राकाला "ता ईवं वर्धन्ति" "इमा गावस् सरमे या

---

१. चा. शि. पृ. २६। २. २।४।१। ३. पृ. ८३।
४. २।३, ४। ५. २।१३। ६. २।७९, ८०।

एच्छः" इति[1]। शुक्लयजुर्वेदप्रातिशाख्येऽपि— "ह्रस्वकण्ठ्योपधवँ विसर्जनीयान्तमरिफितवँ विवृत्त्या, दीर्घकण्ठ्योपधवँ विसर्जनीयान्तमेकारान्तमकारान्तम् प्लुतम् प्रगृह्यञ्च, ओकारान्तञ्च चके"[2] इत्युक्त्वा विवृत्त्या× प्रयोग उल्लिखितः। तैत्तिरीयप्रातिशाख्ये च— "ऋग्विराम४ पदविरामो विवृत्तिविरामस् समानपदविवृत्तिविरामस् त्रिमात्त्रो द्विमात्त्र एकमात्त्रोऽर्धमात्त्र इत्यानुपूर्व्येण"[3] इति। शौनकीयचतुरध्यायिकायाञ् च— "विवृत्तो पादवृत्तः"[4] इति विवृत्तिरुल्लिखिता। शैशिरीयशिक्षायाञ् च— "आकाशस्था यथा विद्द्युत् स्फटिके मणिसूत्त्रवत्। एष च्छेदो विवृत्तीनायँ यथामात्त्रविचक्षणः (?)॥ वत्सानुसृतार्धमात्त्रा तथा वत्सानुसारिणी। पाकवत्त्युभयोर् ह्रस्वा दीर्घमद्ध्या पिपीलिका॥ प्र व एकोर्वाञ्चो अद्द्य रथं हिरण्यप्रउगम्। धृतव्रता आदित्त्याश् चैतत् तत्त्र निदर्शनम्"[5] इति। पाणिनीयशिक्षायाञ् च—"ओभावश् च विवृत्तिश् च शषसा रेफ एव च। जिह्वामूलमुपद्ध्मा च गतिरष्टविधोष्मणः"[6] इति, "अनुस्स्वारे विवृत्त्यान् तु विरामे चाक्षरद्द्वये। द्विरोष्ठ्यौ तु विगृह्णीयाद् यथौकारवकारयोः"[7] इति च विवृत्तिरुल्लिखिता। याज्ञवल्क्यशिक्षायाञ् च— "आकाशस्था यथा विद्द्युत् स्फुटिता मणिसूत्त्रवत्। एष च्छेदो विवृत्तीनायँ यथा वालेषु कर्त्तरी॥ द्वयोस् तु स्स्वरयोर् मद्ध्ये सन्धिर् यत्त्र न दृश्यते। विवृत्तिस् तत्त्र विज्ञेया 'यऽईशे' तु निदर्शनम्॥ पिपीलिका पाकवती तथा वत्सानुसारिणी। वत्सानुसृजिता चैव चतस्रस् ता विवृत्तयः॥ पिपीलिकाऽऽद्द्यन्तदीर्घा नाब्भ्याऽग्रासीन् निदर्शनम्। पाकवत्त्युभयोर् ह्रस्वा वि नऽइन्द्रेति दर्शनम्॥ वत्सानुसारिणी चादौ दीर्घा ताऽग्रस्स्य दर्शनम्। अन्ते वत्सानुसृजिता ता नऽग्रावोढमश्विना"[8] इति। एवमेव प्रयोगेण स्वरभक्तिशिक्षायामपि[9]। चारायणीयशिक्षायाञ् च— "आकाशस्था यथा विद्द्युत् स्फुटिके मणिसूत्त्रवत्। एवञ् छेद्द्यवँ विवृत्तीनायँ यथा व(ा)लेषु कर्त्तनम्। चतसृणावँ विवृत्तीनामन्तरम् मातृ-(त्रि-?)कम् भवेत्। अर्धमात्त्रमनन्येषामनन्येषामनु(णु ?)मात्त्र-

---

१. ऋ. प्रा. उ. भा. २।४। २. ७।६,७,८। ३. २२।१३।
४. ३।६३। ५. श्लो. ८४–८६। ६. श्लो. १४।
७. श्लो. २४। ८. श्लो. ९३–९७ (शि. स., पृ. १६)।
९. श्लो. ३१–३५ (शि. स., पृ. १७४–१७५)।

कम् ।। उभौ यत्तर दीर्घौ स्यातावँ व्यवधानन् तु मातृ-(त्रि-?)कम् । यवा आयवा पूर्वमग्रे तदर्धन् तु ह्रस्स्वयोरर्धमेव च । ह्रस्स्वादि (र् ?) वत्सानुसृता वत्सानुचारिणी चाग्रे । पावकवत्त्युभयोर् ह्रस्स्वा दीर्घमद्ध्या पिपीलिका"[1] इति । व्यासशिक्क्षायाम् च— "विरामे वर्णयोर् मद्ध्ये ह्यणुकालोऽप्यसयँ युते"[2] इति, "पिपीलिका दीर्घसमे च मद्ध्यमा सवर्णता पाकवती पदैक्क्ये । दृष्टाऽचि वत्सानुसृतिस् त्वसाम्म्येऽप्यधोणुमुक्ख्यास् तु विरामकालाः"[3] इति च । शम्भुशिक्क्षायाम् च— "दीर्घात् पूर्वो विसर्गो यो दीर्घान्तो यत्तर दृश्यते । मद्ध्यमेति विजानीयादेकमात्तरम् प्रयुज्यते ।। वैशेषिकाक्ख्या च विदीर्घयोश् चेत् पिपीलिका दीर्घयुगे च मद्ध्यमा ।। दृष्टा च वत्सानुसृतिस् त्वसाम्म्ये मद्ध्येऽणुमुक्ख्यन् तु विरामकालः"[4] इति । सर्वसम्मतशिक्क्षायाम् च— "विवृत्तौ पदयोर् मद्ध्ये एकमात्तरꣳ प्रकीर्तितः । पदमद्ध्येऽर्धमात्तरा स्स्याद् विवृत्ताविति निश्चयः ।। ह्रस्स्वादिर् वत्सानुसृतिरन्ते वत्सानुसारिणी । पाकवत्त्युभयह्रस्स्वोभयदीर्घा पिपीलिका ।। पदमद्ध्ये विवृत्तत्वम् भाष्यकारेण तस्स्य च । सामर्थ्यविहितꣳ कालो मात्तरार्धम् प्रग्रहेषु च"[5] इति । पारिशिक्क्षायाम् च— "अत्तरोभयोश् च स्स्वरयोरसन्धिर् विवृत्तिरित्युच्यत एव तज्ज्ञैः । क्रमेण वत्सानुसृतिश् च वत्सानुसारिणी पाकवती पिपीलिका । वैशेषिका चोभयदीर्घिका च स्यान् मद्ध्यमा चैव सवर्णता च । इत्त्येवमष्टौ हि विवृत्तिसञ्ज्ञास् तासां स्वरूपङ्ग खलु वक्क्ष्यतेऽत्तर ।। या ह्रस्स्वपूर्वोत्तरदीर्घिका स्स्यात् सा तर्हि वत्सानुसृतिस् समात्तरा । ह्रस्स्वोत्तरा यत्तर तु दीर्घपूर्वा वत्सानुसारिण्यपि सैकमात्तरा । यस्स्या विवृत्तेरुभयत्तर ह्रस्स्वꣳ पादोऽनुमात्तरा (पादोनमात्तरा ?) खलु पाकवत्त्याम् ।। क्रमेण पूर्वोत्तरयोश् च दीर्घौ स्त उच्चनीचौ पदकाल एव । विसर्जनीयश् च न यत्तर दृश्यते यस्स्याञ् च सन्धौ स्वरितञ् च लब्ध्यते । सवर्णभूतावपि तौ भवेतां सा पादमात्तरा च पिपीलिका स्स्यात् । स्यातावँ विवृत्तेरपि यत्तर यस्स्या आद्द्यन्तयोश् चाऽप्यसवर्णदीर्घौ । मद्ध्ये विसर्गो यदि वाऽपि मा वा वैशेषिका मात्त्रिककालयुक्ता ।। आद्द्यन्तयोश् चैव सवर्णदीर्घौ स्वरौ न सन्धानपदे विसर्गः । एवङ्ग गुणा यत्तर भवन्ति यस्स्यास् स्यादेक-

---

१. पृ. २७ । २. सू. ४४६ । ३. सू. ४५१-४५२ ।
४. श्लो. ३२-३३ । ५. श्लो. ९०, ९१ (३।७२; ७३) ।

मात्तरोभयदीर्घिका सा । सवर्णदीघावुभयत्तर यस्स्या उदात्तनीचौ भवत४ क्रमेण । यद्द्यस्ति चेत् तत्तर विसर्जनीयस्स्वारोऽपि सन्धौ च समाऽत्तर मद्ध्यमा ।। आदौ तथान्ते च सवर्णदीर्घौ विभज्ज्यमाने सविसर्जनीयः । नात्तर(ापि) जातु स्स्वरितश् च स (स्वरित४ परत्तर?) तस्स्यास् समात्तरा हि सवर्णदीर्घी ।। यद् व्यक्तिमद्ध्ये त्वनुनासिकस् स्यात् तत्तराऽनुनास्स्यस् तु स पादमात्तरः । सा व्यक्तिरप्यत्तर सपाद-मात्तरा पूर्वोक्तमेवाऽत्तर च नाम तस्स्याः ।। उदाहरिष्ध्यत्त्य-(ष्याम्म्य-?)धुना विवृत्तयः (विवृत्तीः ?) वत्सानुसृत्त्यादिसवर्ण-तान्तम् । त आवहन्ति प्परतरान् न आयुस् स आयु वत्सानुसृतिस् त एनम् ।। ते अस्स्य यो वा अयथा च वत्सानुसारिणी वा इयमग्ग्र आसीत् । स इज् जनेन प्परउगन् न इन्द्रायाहोमुचे पाकवती म इन्द्रः ।। वा आदि वा आशिरयमाणरण्चे ते एनमब्भ्यत्तर पिपीलिकास् स्यात् ।। ता एव सो एव तथा च कक्क्षीवां औशि वैशेषिकसञ्ज्ञिकास् स्युः । वा आपते एव तथैव तस्स्या आवृश्चथो चोभयदीर्घिका स्स्यात् ।। भवन्ति वा आग्ग्रयणाग्ग्रवेद्द्या आदेश् च या आविवि मद्ध्यमास् स्युः । वा आशता आस च आप्प्रि दिव्व्या आपस् तु ता आहुरवर्णदीर्घी"[1] इति । नारदीयशिक्क्षायाञ् च— "विवृत्तयश् चतस्स्रो वै विज्ज्ञेया इति मे मतम् । अक्क्षराणान् नियोगेन तासान् नामानि मे शृणु ।। ह्रस्स्वादिर् वत्सानुसृता वत्सानुसारिणी वाऽग्ग्रे । पाकवत्त्युभयोर् ह्रस्स्वा दीर्घवृद्धा पिपीलिका ।। चतसृणावँ विवृत्तीनामन्तरम् मात्त्रिकम् भवेत् । अर्धमात्त्रिकमन्न्येषामणुमात्त्रिकमन्तरम्"[2] इति; "ओभावश् च विवृत्तिश् च शषसा रेफ एव च । जिह्वामूलमुपद्ध्मा च गतिरष्टविधोष्मणः ।। स्वरप्परत्त्यया विवृत्तिस् संहितायान् तु या भवेत् । विसर्गस् तत्तर मन्तव्व्यस् तालव्व्यो वाऽत्तर जायते ।। सन्ध्यक्क्षरोपधे सन्ध्यौ प्राप्तप्प्लुतौ यवौ यदि । व्यञ्जनाक्ख्या विवृत्-तिस् तु स्वराक्ख्या प्रकृतिसंहिता ।। ऊष्मान्तवँ विरते यत्तर सन्धौ वा भवते च यत् । विवृत्तिर् या भवेत् तत्तर स्वराक्ख्यान् तावँ विनिर्दिशेत् ।। यद्द्योभावप्परसन्धानमुकारादि परम् पदम् । स्वरान्तन् तादृशवँ विद्द्याद् यदन्न्यद् व्यक्तमूष्मणः"[3] इति च । लोमशीयायां शिक्क्षायाञ् च— "अस्थ उस्थे (?) च रङ्गे च गतिलोपे तथैव च । एकारौकारलोपे तु विवृत्तिर् व्यञ्जनोदया (?) । अप्परत्त्यया उवर्णा

---

१. सू. १३२–१५२ । २. २।४।१–३ । ३. २।५।५–९ ।

धढतपराऽ पवित्तरवर्जनम् ।। डढणेषु तु सर्वं वृत्ता ज्ञेयास् ते हरीत-वर्जम् । द्वितीये विरता या तु चतुर्थे न प्रवर्तते । दीप्तामधोगमे विद्द्यादुपरिष्टात् तु आयतीम् ।। ऊवा परहूम सा चैव त्सिवा वारा तथा मही । नित्त्यायता प्रयोक्तव्या निर्दिशन्ति मनीषिणः''[1] इति । लोमशश्या शिक्षाया अयम् प्रसङ्गोऽस्फुटोऽपि नवीनार्थप्रतिपादक इव प्रतीयमानो भृशवं विचारणीयऽ प्रतीयते । माण्डूक्या शिक्षायाम् च— ''विवृत्तयस् तु विज्ज्ञेयाश् चतस्रस् त्वनुपूर्वशः । नामभिस् तु पृथग् ज्ञेयास् तासावं वक्ष्यामि लक्षणम् ।। पिपीलिका-पाकवती तथा वत्सानुसारिणी । अनुसृतवत्सा चैव चतस्रो हि विवृत्तयः ।। वत्सानुसृता ह्रस्वा जघने वत्सानुसारिणी चाग्रे । पाकवती चोभयतऽ पिपीलिकमद्ध्याऽप्युभयदीर्घा ।। पूर्वं ह्रस्वम् परन् दीर्घमक्षरयं यत्तर दृश्यते । सा वत्सानुसृता ज्ञेया व्यत्त्यासे त्त्वनुसारिणी ।। उभाभ्यामेव ह्रस्वाभ्यायं यवमद्ध्यावं विनिर्दिशेत् । ताभ्या-मेव तु दीर्घाभ्यावं विज्ज्ञेया सा पिपीलिका ।। अभ्रमद्ध्ये यथा विद्द्युद् दृश्यते मणिसूत्तरवत् । एष च्छेदो विवृत्तीनायं यथा बालेषु कर्तरी''[2] इति । एतासु विवृत्तिषु कालकृतं स्वरूपकृतञ् चोच्चारण-वैशिष्ट्यं स्थितम् प्रतीयते; तद् वर्तमानसमये वैदिकानामुच्चारणेषु दुर्लभमपि यथा शास्त्रमेवोच्चारणेष्वाधेयम् बोद्ध्यम् ।।४१।।

(छ) वाक्यान्त्यादिविरामनिरूपणम्

वाक्यान्ते च ऋचोऽर्धे च पद्द्यार्धे च ऋगन्तके ।
पद्द्यान्ते च विरामास् स्युः प्रायस् तुल्यास् त्रिमात्तरकाः ।।४२।।

एतद्विषये प्राचावं वचनानि यथा— ''ऋग्विरामऽ पदविरामो विवृत्तिविरामस् समानपदविवृत्तिविरामस् त्रिमात्तरो द्विमात्तर एक-मात्तरोऽर्धमात्तर इत्त्यानुपूर्व्येण''[3] इति तैत्तिरीयप्रातिशाख्ये । ऋक्तन्त्रे च— ''विरामे मात्तरा, नित्त्यविरते द्विमात्तरम्, गाथासु, त्रिमात्तरं सामसु''[4] इति । याज्ज्ञवल्क्यशिक्षायाम् च— ''अवग्रहे तु यऽ कालस् सोऽर्धमात्तरो विधीयते । पदयोरन्तरे काल एकमात्तरो विधीयते ।। ऋचोऽर्धे तु द्विमात्तरस् स्यात् त्रिमात्तरस् तु ऋगन्तके''[5] इति । व्यासशिक्षायाम् च—''वर्णाभावो विरामश् चाऽवसानं साऽर्ध-

---

१. ७।१–४। २. श्लो. ९२–९७ (शि.स., पृ. ४७१)।
३. २२।१३। ४. २।४।६–९। ५. श्लो. ११–१२(शि. स., पृ. २)।

मात्त्रिकः''[1] इति; ''स्वरोदये त्त्वनुस्स्वारो भवेदद्ध्यणुमात्त्रिकः । विरामश् च तयोर् मद्ध्ये वैशेषिका विदीर्घयोः ।। प्रणवान्ते पवर्गोर्ध्वेऽवग्रहस्स्यान्त एव च । वाक्क्यान्ते तु विरामश् च सार्धमात्त्रक प्रकीर्तितः । पदप्रणवयोर् नित्त्यवँ विरामस् स्याद् द्विमात्त्रिकः''[2] इति च । कौहलीयशिक्क्षायाञ् च— ''काण्डप्रश्नानुवाकाना समाप्तौ काल इष्ष्यते ।। दशाष्ट पञ्च मात्त्रास् स्युस् तन्त्राणाञ् च त्त्र्यहम् भवेत् । विश्श्रामो न समासस्स्य (मद्ध्ये कार्यक पदस्स्य वा) । मद्ध्ये तु पदवाक्क्ये वा अदृष्टार्थो निषिद्ध्यते''[3] इति । सर्वसम्मतशिक्क्षायाञ् च— ''ओमक पवर्गसयँ योगे प्रयत्नो नेष्ष्यते पृथक् । विरामो मात्त्रिकस् तत्त्र ततोऽन्न्यत्त्र द्द्विमात्त्रिकः''[4] इति । पारिशिक्क्षायाञ् च— ''विवृत्तिमद्ध्ये यत्त्र स्स्याद् विसर्गस् सोऽर्धमात्त्रिकः । विरामश् चैकमात्त्रस् स्यात् तस्स्य सञ्ज्ञा यथाविधि''[5] इति; कालनिर्णयशिक्क्षायाञ् च— ''काण्डप्रश्नानुवाकाना समाप्तौ काल इष्ष्यते । दशाऽष्ट पञ्च मात्त्रास् स्युस् तन्त्राणाञ् च त्त्र्यहम् भवेत् । श्रावण्ण्याम् पौर्णमास्स्यामित्त्यादिखण्डत्त्रयेण च । योऽनद्ध्यायस् समुद्दिष्टस् स तत्त्रैवाऽवधार्यताम् ।। विश्श्रमो न समासस्स्य मद्ध्ये कार्यक पदस्स्य वा । नित्त्यम् प्राक्पदसम्बन्धञ् चादिम् प्राक्पदमन्तरा ।। परेण नित्त्यसम्बन्धञ् चादिम् परपदन् तथा । एकस्स्वराणाञ् चादीनाम् प्रादीनामिति तद् द्वयम् । योयो विरामकालक प्रागृगादौ समुदीरितः । अङ्गीकृतस्स्यार्धमात्त्रन् तु न सोऽधिक इष्ष्यते''[6] इति । माण्डूक्क्या शिक्क्षायाञ् च— ''अवग्रहेऽर्धमात्त्रं स्यात् कालो मात्त्रा पदान्तरे । अर्धर्चे द्द्वे तथा पादे त्रिमात्त्रं स्यादृगन्तरम् ।। चाषस् तु वदते मात्त्रन् द्विमात्त्रवँ वायसोऽब्रवीत् । शिखी त्रिमात्त्रवँ विज्ज्ञेय एष मात्त्रापरिग्रहः ।। क्व चित् पादविभागे च क्व चिदर्धे क्व चित् पदे । क्व चिदर्थे क्व चिच् छब्दे विरामक पञ्चधा स्मृतः ।। छन्दस्स्येते प्रयुज्ज्यन्ते क्रमेण क्क्षेपसञ्ज्ञकाः । सविरामम् प्रयोक्तव्या येन वृत्तिर् न विद्द्यते''[7] इति । तत्त्र वाक्क्यान्ते यो विरामक प्रोक्तस् स यजुर्वेदकण्डिकादौ प्रायेण नैव प्रवर्तते इति बोद्ध्यम् ।।४२।।

पदपाठे क्रमाद्ध्याये तथा क्रमजटादिषु ।
स्याद् विरामव्यवस्थैषा विशेषवचनेऽसति ।।४३।।

---

१. सू. २५ । २. सू. ४५३–४५७ । ३. श्लो. ७५–७६ । ४. श्लो. ८४ (३।६३) । ५. सू. १७६। ६. श्लो. २५–२८। ७. श्लो. १३७–१४० (शि. स., पृ. ४७५) ।

विशेषवचनानि च—"मात्रा ह्रस्वः, तावदवग्रहान्तरम्"[1] इति ऋग्वेदप्रातिशाख्ये। शुक्लयजुर्वेदप्रातिशाख्ये च— "समासेऽवग्रहो ह्रस्वसमकालः"[2] इति। याज्ञवल्क्यशिक्षायान् तु— "अवग्रहे तु यऽ कालस् सोऽर्धमात्रो विधीयते"[3] इत्युक्तमिति अनयोर् वचनयोस् समन्वये यतितव्यम्। पञ्चदशानां शाखानां साधारणयोरपि अनयोर् ग्रन्थयोरिमे वचने शाखाभेदाभिप्रायकतया व्यवस्थापनीये स्याताम्। तैत्तिरीयप्रातिशाख्ये पदपाठे पदविरामो द्विमात्र इत्युक्तम् पूर्वश्लोकविवरणे उद्धृते सूत्रे। अन्यशिक्षावचनान्यपि पूर्वश्लोकव्याख्यायामेवोद्धृतानि तत्रैव द्रष्टव्यानि ॥४३॥

(ज) विसर्गोत्तरवर्तिविरामविचारः

विसर्गान्ते विरामोऽल्पः पदमध्येऽपि सम्मतः।
माध्यन्दिनीयके नित्यङ्क्षे परे तैत्तिरीयके ॥४४॥

उक्तं हि प्रतिज्ञासूत्रे— "विसर्गेषु वीषद्विरामः"[4] इति; केशवीयकारिकावल्ल्याम् च— "शषसे च कखपफे विसर्गास् सन्ति यत्र च। वाचो विरामऽ कर्तव्यस् तत्रेषच्छ्रुतिचोदनात्"[5] इति। तैत्तिरीयाणाम् व्यासशिक्षायाम् च— "विसर्गान्तेऽर्धमात्रस् स्याद् विरामऽ क्षपरेऽपि च"[6] इति ॥४४॥

(झ) स्थानकरणविमोक्षविवरणम्

स्पर्शान्ते विरतौ स्थाने करणे भृशयोजिते।
विश्लिष्टिस् स्थानकरणविमोक्षस् स शश्रुतौ क्व चित् ॥४५॥

उक्तं हि शुक्लयजुर्वेदप्रातिशाख्ये— "स्पर्शान्तस्य (पदस्य) स्तथानकरणविमोक्षः, अवसाने च"[7] इति, "स्फोटनम् च ककारवर्गे वा स्पर्शात्"[8] इति च। ऋग्वेदप्रातिशाख्ये— "स्पर्शोदयानामपि चाऽवसाने"[9] इति, शौनकीयचतुरध्यायिकायाम् च— "पदान्तावग्रहयोश् च"[10] इति, "वर्गविपर्यये स्फोटनऽ पूर्वेण चेद् विरामः, न टवर्गस्य चवर्गे कालविप्रकर्षस् त्वत्र भवति, तमाहुऽ कर्षण इति"[11] इति च विषयोऽयं सूचितस् स्वीकर्तुं शक्यते। विरामेऽपि "द्विरोष्ठौ विगृह्णीयाद्" इति विधानङ्क कुर्वता शैशिरीयशिक्षाकारेण[12] श्लोकपाणिनीयशिक्षाकारेण[13] चाऽयम् विषयो लेशेन सूचितऽ प्रतीयते। याज्ञवल्क्यशिक्षायामयम् विषयो विद्ध्यात्मकतया नाऽऽगतः, किन् तु निषेधात्मकतयाऽऽगतः। तथाहि—"प्रथमा यत्र

---

१. १।२७, २८। २. ५।१। ३. श्लो. ११(शि. स., पृ. २)। ४. ३।४। ५. श्लो. १८(शि. स., पृ. १५१)। ६. सू. ४४९। ७. १।९०, ९१। ८. ४।१६५। ९. ६।१८। १०. १।४५। ११. २।३८, ३९। १२. श्लो. २२–२८। १३. श्लो. २४।

दृश्यन्ते सन्धिस्थानेषु पूर्वतः । स्ववर्गीयेण सयँ युक्ता मोक्षन् तत्तर न कारयेत् ।। तकारान्ते पदे पूर्वे चवर्गे परतस् स्थिते । मोक्षन् तत्तर न कुर्वीत 'यच् च शेपे' निदर्शनम्"[1] इति । वर्णरत्नप्रदीपिकायान् तु– "व्यञ्जनान्तस्य मोक्षस् स्यात् करणस्थानतः पदे । अनन्यदनन्यप्रयत्नेन पदमारब्ध्यते बुधैः ।। अनन्यथा तु पदादौ च द्वित्वमापद्द्यते दध्रुवम्।सयँ यौमि सवँ वपामीति इमम्मेति(च?)निदर्शनम्।। अर्धर्चादेस् समाप्तौ च मोक्षणन् तु विधीयते । पादश् छन्दोनुरोधेन एकद्द्वित्त्रिचतुष्पदः"[2] इति । अवसाने स्पर्शे उच्चारिते स्थानकरणविमोक्षे कृते माद्ध्यन्दिनीयानां स्पष्टतया पुनस् स्पर्शोच्चारणम् भवति । अर्थात् स्थानकरणयोर् योजने एकस् स्पर्शवर्णः, तयोर् वियोजनेऽन्यस् स्पर्शवर्ण इति अवसानगतस् स्पर्शो द्विरुच्चार्यते, स्पष्टं श्रूयते च । अयञ् च विषयो याज्ञवल्क्यशिक्षाविवृतौ ऋगन्तकालनिरूपणे अमरनाथशास्त्रिणा प्रतिपादितः[3] । सम्प्रदायप्रबोधिन्यां शिक्षायाञ् च "अस्स्वरवँ व्यञ्जनलँ लोकेऽवसानेऽस्त्यर्धमात्त्रिकम् । साम्प्रदायिकद्विश्श्रुत्या कालतः करमुद्द्रया । वेदे विशेषतान् धत्ते तद् वेद्द्यम् पाठशुद्धये"[4] इत्त्युक्त्वाऽयवँ विषयस् स्फुटन् निरूपितः । पाणिनीयव्याकरणवार्तिककारेण च— "अवसाने च (यरो द्वे भवत इति वक्तव्यम्)"[5] इति वदताऽयवँ विषयः प्रायेण सर्ववेदसाधारण इति सूचितम्, पाणिनीयव्याकरणस्य सर्ववेदपारिषदत्त्वात्[6] ।।४५।।

(ञ) प्रत्त्यारम्भनिरूपणम्

विरामे स्स्थानकरणविमोक्षं हि विधाय यः ।
यत्नान्तरेण प्रारम्भः प्रत्त्यारम्भस् स उच्च्यते ।।४६।।

प्रत्त्यारम्भोऽयमत्तर विरामप्रसङ्गेनोल्लिखितः । प्रत्त्यारम्भशब्दो हि पाणिनिनाऽपि प्रयुक्तो "न ह प्रत्त्यारम्भे"[7] इत्त्यत्तर । तत्तर प्रत्त्यारम्भः पुनरारम्भ इति जिनेन्द्रबुद्धि–हरदत्तौ । विरामोत्तरस्स्य पुनरारम्भस्स्य प्रत्त्यारम्भत्वलँ लोमशीयायाश् शिक्षायाः,[8] माण्डूक्याश् शिक्षायाश् च प्रयोगाच्[9] चावसातुं शक्यम् ।।४६।।

---

१. या. शि. शि. व. वि., पृ. १००–१०१। (शि. स., पृ. १९) ।
२. श्लो. १९२–१९४ (शि. स., पृ. १३४) । ३. पृ. १०–११ ।
४. श्लो. ८५–८६ । ५. पा. व्या. भा. ८।४।४७ ।
६. तत्तरैव २।१।५७ । ७. अष्टा. ८।१।३१ । ८. ५।१ (शि. स., पृ. ४५८–४५९) । ९. श्लो. ३६ (शि. स., पृ. ४६६) ।

११. पदोच्चारणदोषनिरूपणम्

पदे वर्णस्य व्यत्त्यासो वाऽन्न्यथाभाव आगमः ।
लोपो वा यश् च सोऽपास्यः पदोच्चारणदोषकः ॥४७॥

वर्णस्य व्यत्त्यास ऋग्वेदप्रातिशाख्ये "अदेशे वा वचनवँ व्यञ्जनस्य"[1] इति, "सयँ योगानावँ विपर्ययो वा"[2] इति च प्रतिपादितः । 'अभुत्स्महि' 'उत्स्नाय' इत्यादीनाम् 'अभुस्त्महि' 'उस्त्नाय'[3] इत्यादिरूपेणोच्चारणम्, 'द्रप्सः' 'अजुष्रन्' 'सारञ्जयः' 'अष्ट्राम्' 'नेष्ट्रात्' इत्यादेर् 'द्रस्पः' 'अजुर्ष्षन्' 'साञ्ज्रयः' 'अर्ष्टाम्' 'नेर्ष्टात्'[4] इत्यादिरूपेण चोच्चारणवँ वर्णव्यत्त्यासरूपम् बोद्ध्यम् । लोकेऽपि 'अह्ना' 'याञ्ञा' इत्यादेर् 'अन्हा' 'याञ्चा' इत्यादिरूपेण वर्णव्यत्त्यासञ्च कृत्वोच्चारणञ्च कुर्वन्ति अदोषज्ञाः । पदोच्चारणे दोष एतादृशस् सर्वथा परिहर्तव्यः ।

'आयाहि' इत्यादौ दीर्घावर्णस्य अपभ्रंशप्रभावाद् ह्रस्स्वावर्णविजातीयतयाऽशास्त्रीयेण रूपेणोच्चारणञ्च कुर्वन्ति, ईशः, मूकः, ऊष्मा इत्यादेर् 'इसऽ' 'मुँकऽ' 'उस्माँ' इत्यादिरूपेण सर्ववर्णान्न्यथात्वञ्च कृत्वोच्चारणञ्च कुर्वन्ति; 'ऋक्' 'क्लृप्तम्' इत्यादे 'रिक्' 'क्लिरप्तम्' इत्यादिरूपेणोच्चारणञ्च कुर्वन्ति, 'इषेत्वोर्ज्जेत्वा' इत्यादौ एकारस्य ओकारस्यापि अपभ्रंशप्रभावादिना अशास्त्रीयमेकस्थानकमुच्चारणञ्च कुर्वन्ति; 'ताँस्त् ते अश्श्याम' 'रश्म्मीँरिव' 'पीवो अन्नाँ रयिवृधः' इत्यादौ अनुनासिकस्वरस्थाने सानुस्स्वारं स्वरमुच्चारयन्ति, एतच् च **परिपादन**मुच्यते; एतद्विषये ऋग्वेदप्रातिशाख्ये च— "स्पर्शोष्मसन्धीन् स्पर्शरेफसन्धीनभिप्रायाँश् च परिपादयन्ति"[5] इति उक्तम्; अंशः, मीमांसा इत्यादेर् 'अम्सऽ' 'अङ्सऽ' 'मिमाम्सा' 'मिमाङ्सा' 'मिमान्सा' इत्यादिरूपेणोच्चारणञ्च कुर्वन्ति; 'देवः' 'दुःखम्' 'उरऽपेण' इत्यादेर् 'देवऽ' 'दुक्खम्' 'उरप्पेण' इत्यादिरूपेण वर्णान्न्यथात्वञ् जनयित्वा उच्चारणञ्च कुर्वन्ति, 'मोक्षः' इत्यादेर् 'मोच्छ्चऽ' 'मोक्खऽ' इत्यादिरूपेण, 'याच्ञा' 'आज्ज्ञा' इत्यादेर् 'याँच्याँ' 'आग्ग्याँ' 'आग्गँऽ' 'आद्न्याँ' इत्यादिरूपेणोच्चारणञ्च कुर्वन्ति; 'यथा' 'वस्तु' इत्यादेर् 'जथा' 'ज्यथा' 'बस्तु' 'वस्तु' इत्यादिरूपेण, 'शमः' इत्यादेस् 'सँमऽ' इत्यादिरूपेण 'उषाः' इत्यादेः 'उसाऽ'

---

१. १४।१५ । २. १४।५८ । ३. ऋ. प्रा. उ. भा. १४।१५ ।
४. ऋ. प्रा. उ. भा. १४।५८ । ५. १४।३७ ।

'उखाऽ' इत्यादिरूपेणोच्चारणङ्ग कुर्वन्ति । 'शुनश्शेपः' 'निष्षषी' 'शास्सि' 'निष्षाड्' 'ब्रह्म' 'विष्णुः' 'स्म' 'पृश्निः' इत्येतेषु पदेषु सकारादिस्थाने विसर्जनीयमुच्चारयन्ति; एतद्विषये च ऋग्वेदप्रातिशाख्येऽपि– "शुनश्शेपो निष्षषी शास्सि निष्षाडविक्क्रमा ब्रह्म विष्णुस्स पृश्निः"[1] इत्युक्तम् । 'हृदयम्' 'विह्नम्' 'ब्रह्म' 'वाह्यम्' 'आह्लादः' 'जिह्वा' इत्यादीनाम् पदानाम् 'रिदयम्' 'चिन्नम्' 'ब्रम्म' 'बाय्यम्' 'आल्लादऽ' 'जिउ्हा' इत्यादिरूपेण च वर्णान्न्यथात्वञ्जनयित्वोच्चारणङ्ग कुर्वन्ति । उक्तं हि उव्वटेनाऽपि— "सन्ति हि अतीर्थोषिता अलसा अगुणदोषज्ज्ञास् सर्ववर्णान्न्यथात्वजनयितारः"[2] इति । एतादृशोऽपि पदोच्चारणदोषस् सर्वथा परिहरणीयः ।

स्वरोपधात् सयँ योगादेरूष्मणऽ पूर्वमधिकवँ विसर्जनीयमागमयन्ति 'अभिष्याम' इत्यादेर् 'अभिःष्याम' इत्यादिरूपेणोच्चारणङ्ग कुर्वाणाः, तदुक्तम् ऋग्वेदप्रातिशाख्ये— "सयँ योगादेरूष्मणऽ पूर्वमाहुर् विसर्जनीयमधिकं स्वरोपधात्"[3] इति; अघोषाद् ऊष्मणोऽनुनासिके परे तन्मद्ध्ये यममागमयन्ति 'पृश्निः' 'विष्णुः' 'स्नात्वा' इत्यादौ, तदुक्तन् तत्तरैव "परयँ यमं रक्तपरादघोषाद्"[4] इति; 'अर्यमा' 'आष्ट्र्याम्' इत्यत्तर रेफात् परं ह्रस्स्वं स्वरमागमयन्ति, 'अरियमा' 'आष्ट्रियाम्' इत्युच्चारयन्तः, तदुक्तन् तत्तरैव "ऊष्मान्तस्थाप्रत्त्ययं रेफपूर्वं ह्रस्स्वम् ·· ··· आहुरथाप्यसन्तम्"[5] इति; 'दीर्घायुः' इत्यादौ 'दीरिघायुः' इत्यादिकमुच्चारयन्तो दीर्घात् परात् रेफात् परत्तर च ह्रस्स्वं स्वरमागमयन्ति, तदुक्तम् "व्यस्स्यन्त्यन्तर् महतोऽव्व्यायतन् तन् दीर्घायुस् सूर्यो रुशदीर्त ऊर्जम्"[6] इति; व्यञ्जनात् तालुस्थानके यकाररहिते स्वरे परे मद्ध्ये यकारमागमयन्ति 'शुनश्शेपः' इत्यादेश् 'शुनश्श्येपः' इत्यादिकमुच्चारणङ्ग कुर्वाणाः, तदुक्तम् "तालुस्थानो व्यञ्जनादुत्तरश् चेदयकारस् तत्तर यकारमाहुः । शुनश्शेपश् शास्सि ववर्जुषीणामत्के बिरप्शीति निदर्शनानि"[7] इति; सस्स्थानात् स्वरात् पूर्वत्तर परत्तर वा स्वरात् परे पूर्वे वा यकारे वकारे वा सति मद्ध्ये यकारवँ वकारवँ वा आगमयन्ति, तदुक्तम् "लुम्पन्त्यन्तस्स्थाङ्ग करमयन्ति वैतां स्वरात् सस्स्थानादवराम् परावँ वा । स्वस्तय्येऽधाय्यि

---

१. १४।३६ । २. ऋ. प्रा. उ. भा. १३।२२ ।
३. १४।३३ । ४. तत्तरैव १४।३४ । ५. तत्तरैव १४।४० ।
६. तत्तरैव १४।४९ । ७. तत्तरैव १४।४७ ।

भुव्वनेयमूव्वु:"[१] इति। क्रमयन्तीत्यनेन द्वित्त्वमर्थादसत आगमनमुच्यते। हकारात् सोष्मणस् स्पर्शाद् वा पराद् यकारात् पूर्वत्तर, शषसहेव्भ्यस् सोष्मब्भ्यश् च पराद् वकारात् पूर्वत्तर च 'आपृच्छ्यम्' 'उपह्वये' 'अह्य:' इत्यादौ पूर्ववर्णसमानस्थानमूष्माणमागमयन्ति, तदुक्तम् "हकारोष्मोपहिताद् यकाद् वकाराद् वा सर्वसोष्मोष्मपूर्वात्। तत्सस्स्थानम् पूर्वमूष्माणमाहुस् तुच्छ्यान् दद्ध्या आपृच्छ्यमृब्भ्वा ह्वयेऽह्य:"[२] इति। पवर्गीयवर्णात् पञ्चमे परे मद्ध्येऽन्न्ययँ यममागमयन्ति; तदुक्तम् "पकारवर्गोपहिताच् च रक्तादन्न्ययँ यमन् तृष्णुताऽऽप्नानमौभ्नात्"[३] इति; स्वरोपधाद् अनुनासिकात् सोष्मणि यमे वा परे मद्ध्येऽनुस्स्वारमागमयन्ति अनुनासिकात् पूर्वत्तर वाऽनुस्स्वारमागमयन्ति 'अञ्ज्म:' इत्यादेर् 'अञ्ज्म:' इत्यादिकम् 'अंञ्ज्म:' इत्यादिकवँ वोच्चारणङ कुर्वाणा:, तदुक्तम् "अनुस्स्वारमुपधावँ वान्न्यवर्णा स्वरोपधात् सोष्मयमोदयश् चेत्। तङ्घ्नन्त्यञ्ज्मो जङ्घ्नत ईङ्खयन्तीस् सञ्ज्ञातरूपोऽथ सञ्ज्ञानमिन्द्र:"[४] इति; सयँयुक्तवर्णमद्ध्ये स्वरभक्तिमागमयन्ति 'व्यत' इत्यादेर् 'वियत' इत्यादिकमिवोच्चारणङ कुर्वाणा:; क्व चिद् द्वित्त्वङ कृत्वा वर्णमागमयन्ति 'प्र देवम्' इत्यादेऽ 'प्प्र देवम्' इत्यादिरूपेणोच्चारणङ कुर्वाणा:, तदुक्तम् "सयँयोगानां स्वरभक्त्या व्यवायो विक्रमणङ क्रमणवँ वाऽयथोक्तम्। विपर्ययो वा व्यत तिल्विलेऽज्मन् द्रप्सोऽज्जुब्रन् सार्ञ्जयोऽष्ट्राम् प्र नेष्ट्रात्"[५] इति। एते, एतादृशा अन्न्ये च अतिरिक्तवर्णोपजनयुताऽ पदोच्चारणदोषाऽ परिहरणीया:।

सान्तस्स्थानां सयँयोगानामाद्द्यस्स्य वर्णस्स्य वाऽन्त्यस्स्य वर्णस्स्य लोपङ कृत्वा 'निषद्द्य' 'इन्द्रवाय्वो:' इत्यादेर् 'निषय' 'इन्द्रवायो:' इत्यादिकमुच्चारणङ कुर्वन्ति, तदुक्तम्— "सान्तस्स्थानामादिलोपाऽन्तलोपौ"[६] इति; लोकेऽपि 'वाय्वो: मद्ध्वो:' इत्यादेर् 'वाय्यो: मद्धो:' इत्यादिकम् उच्चारणङ कुर्वन्ति; अन्तस्थात् पूर्वम् ऊष्मणऽ पूर्वञ् च रेफात् परं ह्रस्स्वव्रँ विस्वरवँ विलोप्य 'पुरुषन्तिम्' इत्यादेऽ 'पुर्षन्तिम्' इत्यादिकमुच्चारणङ कुर्वन्ति, उक्तं हि "ऊष्मान्तस्स्थाप्रत्यय रेफपूर्वं ह्रस्स्वलँ लुम्पन्त्याहुस्थाप्यसन्तम्।

---

१. ऋ· प्रा. १४।५०। २. तत्तरैव १४।५२।
३. तत्तरैव १४।५३। ४. तत्तरैव १४।५४। ५. तत्तरैव १४।५८। ६. तत्तरैव १४।१४।

पुरुषन्तिम् पुरुवारार्यमाष्ट्र्चां हरियोजनाय हरियूपीयायाम्"[1] इति; य-व-युक्तानां सयँयोगानायँ यकारवँ वकारञ् च लुम्पन्ति ज्यैष्ठ्याय इत्त्यादेर् जैष्ठाय इत्त्यादिकम् उच्चारणङ कुर्वाणाः, तदुक्तलँ "लुम्पन्ति वा सन्तमेवयँ यकारञ् ज्यैष्ठ्याय सम्वारन्नापृच्छ्यमृभ्वा"[2] इति; क्व चिदसयँयुक्तमपि यकारवँ वकारञ् च सस्थानात् स्वरादवरम्परवँ वाऽपि लुम्पन्ति 'स्वस्तये' इत्त्यादेस् स्थाने 'स्वस्तए' इत्त्यादिकमुच्चारणङ कुर्वाणाः, उक्तं हि "लुम्पन्त्यन्तस्स्थाङ करमयन्ति वैतां स्वरात् सस्थानादवराम् परावँ वा। स्वस्तयेऽधायि भुवनेयमूवुः"[3] इति।

क्व चिद् द्विरुच्चारणीयान् वर्णान् एकस्य लोपङ कृत्वा सकृदेवोच्चारयन्ति 'अज्ज्मन्' इत्त्यादेस् स्थाने 'अज्मन्' इत्त्यादिकम् उच्चारणङ कुर्वाणाः, तदुक्तम् "सयँयोगानाम्..... विक्करमणम् (दोषः)"[4] इति।

एते एतादृशा अन्न्यविधाश् चाऽन्न्येऽपि सम्भवन्तस् सर्वे पदोच्चारणदोषा वर्जनीयाः, पदोच्चारणदोषरहितं हि पठनमादर्शभूतम् पठनम् भवतीति ॥४७॥

१२. वाक्क्योच्चारणदोषविशेषनिरूपणम्

वाक्क्यस्स्थपदसन्धेर् यो दोष उच्चारणे कृतः।
वर्णव्यत्त्यासादिकस् स वाक्क्योच्चारणदोषकः ॥४८॥

पदान्तपदादिसंहितागता उच्चारणदोषा वाक्क्योच्चारणदोषा मन्तव्याः। ते च उक्तलक्क्षणेषु सर्वेषु सन्धिषु सम्भवन्ति। तत्तर ऋग्वेदप्रातिशाक्ख्ये उल्लिखितानेव दोषानत्तरोल्लिखामः। तत्तर समानवर्णासु विवृत्तिषु ह्रस्स्वदीर्घौ पूर्वोत्तरस्स्वरौ विपर्यस्स्यन्ति, उत्तरं स्वरलँ लुम्पन्ति वा "ऊतीऽइन्द्रः" इत्त्यादेर् "ऊति ईन्द्रः" इत्त्यादिकम् "ऊतीन्द्रः" इत्त्यादिकवँ वोच्चारणङ कुर्वाणाः, उक्तं हि "समानवर्णासु विपर्ययो वा यथा ह्यूती इन्द्र क आसतश् च"[5] इति; विवृत्तौ परस्स्य स्वरस्स्य लोपङ कुर्वते "या ऐच्छः" इत्त्यादेर् "या च्छः" इत्त्यादिकमुच्चारणङ कुर्वाणाः, तदाह— "विवृत्तिषु प्प्रत्त्ययादेरदर्शनयँ यथा य ऐच्छश् च य औशिजश् च"[6] इति, अन्तस्स्थावति सयँयोगे परे पदान्तमनुनासिकं स्पर्शवँ विलम्बातिशयेन उच्चार्य तत४

---

१. ऋ. प्रा. १४।४०। २. तत्तरैव १४।४८।
३. तत्तरैव १४।५०। ४. तत्तरैव १४।५८। ५. तत्तरैव १४।६१।
६. तत्तरैव १४।५९।

परवँ वर्णन् द्विरुच्चारयन्ति "शर्मन् स्याम" इत्यादेश् "शर्मन्-ऽऽस्स्याम" इत्यादिकमुच्चारणङ्ग कुर्वाणाः; तदुक्तम्— "सान्तस्स्थादौ धारयन्तऽ परक्करम शर्मन् स्यामास्मिन्सु जनाञ्छ्रुधीयतः"[1] इति; यत्तर सन्धौ अनुस्स्वारागमो नेष्टस् तत्तराप्यनुस्स्वारागमङ्ग कुर्वन्ति, 'ताँस् ते' इत्यादौ उच्चारणीये 'तांस्ते' इत्यादिकमुच्चारयन्तः, एतच्च **परिपादन**मुच्यते, तथाहि— "स्पर्शोष्मसन्धीन् स्पर्शरेफसन्धीनभिप्रायाँश् च परिपादयन्ति"[2] इति; पदान्ते वर्तमानात् पञ्चमाद् वर्णात् परत्तर स्थितं हकारम् पूर्वसवर्णञ् चतुर्थङ्ग कुर्वन्ति, 'दद्ध्यङ्ग ह' इत्यादेर् 'दद्ध्यङ्ग घ' इत्यादिकमुच्चारणङ्ग कुर्वाणाः, तदुक्तम्- "रक्तात् तु सोष्मा क्रियते हकारो दद्ध्यङ्ग ह देवान् हवते महान् हि"[3] इति; अकारपूर्वायाम् इकारपरायामुकारपरायाञ् च विवृत्तौ विरामलोपम् एकवर्णवद्भावञ् च कृत्वा 'सऽइदस्ता' इत्यादेस् "सैदस्ता" इत्यादिकमुच्चारणङ्ग कुर्वन्ति, उक्तं हि— "इ-उ-सन्धौ सन्ध्यवचनञ् च कासु चित् स इदस्ता कस्त उषो यथैते"[4] इति; विवृत्तौ पूर्वे परे च स्स्वरे दीर्घेऽवर्णे सति पादमात्तरावँ विवृत्तिन् दीर्घीकृत्य परस्स्य स्वरस्स्याऽऽद्द्यम् भागन् तयाऽभिव्व्याप्नुवन्ति, ततश् च परस् स्वरो ह्रस्स्व इव भाति, एतच् च **अभिव्व्यादानम्** उच्च्यते; तदुक्तम् "अभिव्व्यादानञ् च विवृत्तिपूर्वे कण्ठ्ये ता आपोऽवसा एति दीर्घे"[5] इति। एते एतादृशा अन्न्यविधाश् चाऽन्न्येऽपि सम्भवन्तो वाक्योच्चारणदोषास् सर्वथा परिवर्जनीया आदर्शभूतम् पठनङ्ग कर्तुकामेन। तदेवं समासेन निरूपितं सामेति शम् ॥४८॥

॥ इति सामाद्ध्यायष् षष्ठः ॥

---

१. ऋ. प्रा. १४।५५। २. तत्तरैव १४।३७।
३. तत्तरैव १४।५७। ४. तत्तरैव १४।६०। ५. तत्तरैव १४।६२।

अथ सप्तमोऽध्यायः

सन्ताननिरूपणम्

१. सन्तान–संहितापदयोः पर्यायवाचिता

सन्तान इति शब्देन संहितोक्ता श्श्रुताविति ।
विद्द्वांस ऐकमत्त्येन प्प्राहुर् हि निखिला अपि ॥१॥

"शीक्क्षावँ् व्याक्ख्यास्स्यामः । वर्ण्णस् स्वरः । मात्त्रा बलम् । साम सन्तानः । इत्त्युक्तश् शीक्क्षाद्ध्यायः"[1] इत्त्यस्स्यां श्रुतौ सन्तान इति शब्देन संहितोक्तेति शङ्करभगवत्पादप्प्रभृतयस् सर्वेऽपि विद्द्वांस ऐकमत्त्येन वदन्ति । पदान्त–पदाद्द्योस् संहितायाश् शिक्क्षाशास्त्रान्तर्गतविषयत्त्वयँ् युक्त्यापि समुचितमेव दृश्श्यत इति अस्माभिः प्रागेव निरूपितम्[2] ॥१॥

२. संहितानिरूपणम्

बुधैरेकप्प्राणयोगो वर्णानां संहितोच्च्यते ।
परमस् सन्निकर्षस् तु तेषां सा कैश् चिदुच्च्यते ॥२॥

यद्द्यपि ऐतरेयारण्यके "पूर्वमक्क्षरम् पूर्वरूपमुत्तरमक्क्षरमुत्तररूपयँ् योऽवकाशः पूर्वोत्तररूपे अन्तरेण सा संहितेति"[3] इति, "अथ वयम् ब्रूमो निर्भुजवक्त्रा इति ह स्माह ह्रस्स्वो माण्डूकेयः पूर्वमेवाक्क्षरम् पूर्वरूपमुत्तरमुत्तररूपयँ् योऽवकाशः पूर्वोत्तररूपे अन्तरेण येन सन्धिवँ् विवर्तयति येन स्वरास्स्वरवँ् विजानाति येन मात्त्रामात्त्रावँ् विभजते सा संहिता"[4] इति, "अथ हाऽस्स्य पुत्त्र आह मद्ध्यमः प्रातीबोधीपुत्त्रोऽक्क्षरे खल्ल्विमे प्रविकर्षन्ननेकीकुर्वन् यथावर्णमाह तद् याऽसौ मात्त्रा पूर्वरूपोत्तररूपे अन्तरेण सन्धिविज्ज्ञपनी साम तद् भवति, सामैवाहं संहिताम् मन्न्य इति"[5] इति च संहितालक्क्षणानि वर्णितानि; तथापि प्रातिशाक्ख्यकारास् सङ्क्षेपेणेत्थं

---

१. तै. उ. १।२, तै. आ. ७।२ । २. उपबन्धे, पृ. ६–७; उपक्क्रमाद्ध्याये पृ. ८९–९१ । ३. ३।१।५ । ४. तत्त्रैव । ५. तत्त्रैव ।

संहितालक्षणानि प्रतिपादयन्ति— "पदान्तान् पदादिभिस् सन्दधदेति यत् सा (संहिता) कालाव्यवायेन"[१] इति ऋग्वेदप्रातिशाख्ये; "वर्णानामेकप्राणयोगः संहिता"[२] इति शुक्लयजुर्वेदप्रातिशाख्ये, "अथ संहितायामेकप्राणभावे"[३] इति तैत्तिरीयप्रातिशाख्ये, "सन्निकर्षस् संहिता"[४] इति ऋक्तन्त्रे । मुनिर् यास्कोऽपि "परस् सन्निकर्षस् संहिता"[५] इति; एवमेव पाणिनिरपि[६] । पाणिनीयव्याकरणस्य वार्तिककारेण मुनिना कात्यायनेन भाष्यकारेण मुनिना पतञ्जलिना च पाणिनीयं संहितालक्षणं स्फुटीकरणेन सम्यग् व्याख्यातमस्ति ।।२।।

३. संहिताभेदनिरूपणम्

संहितानान् तु भेदेषु ह्यादद्चा निर्भुजसंहिता ।
प्रतृण्णसंहिताऽतश् च स्युः क्रमादिकसंहिताः ।।३।।

तत्र निर्भुजलक्षणम् ऐतरेयारण्यके "यद् धि सन्धिवँ विवर्तयति तन् निर्भुजस्य रूपम्"[७] इति; "निर्भुजशब्दस् संहितावाची" इति "निर्दिष्टौ भुजसदृशौ पूर्वोत्तरशब्दौ यस्मिन् संहितारूपे तदुच्चारणन् निर्भुजम्" इति च तद्व्याख्याने सायणः । ऋग्वेदप्रातिशाख्यवर्गद्द्वये च "सन्धेर् विवर्तनन् निर्भुजवँ वदन्ति"[८] इति; "निर्भुजं संहिताद्ध्ययनमुच्यते" इति च तद्वृत्तौ विष्णुमित्रः । प्रतृण्णस्य लक्षणन् च— "अथ यच् छुद्धे अक्षरे अभिव्याहरति तत् प्रतृण्णस्य (रूपम्)"[९] इति ऐतरेयारण्यके; "प्रतृण्णशब्देन विच्छिन्नम् पदमभिधीयते" इति च तद्व्याख्याने सायणः । ऋग्वेदप्रातिशाख्यवर्गद्द्वये च— "शौद्धाक्षरोच्चारणन् च प्रतृण्णम्"[१०] इति; "प्रतृण्णम् पदाद्ध्ययनमुच्यते" इति च तद्वृत्तौ विष्णुमित्रः । यद्द्यपि पदाद्ध्ययने पदानि विच्छिन्नानि अधीयन्ते इति तत्र न प्रायेण संहिता भवति; तथाऽपि सावग्रहस्य प्रगृह्यस्य च पदस्य पाठे वेंटकादिना सह संहिताऽपि भवतीति पदाद्ध्ययनम् प्रतृण्णसंहितात्वेनाऽस्माभिरिह प्रतिपादितम् । क्रमसंहिता, क्रमजटासंहिता, क्रमशिखासंहिता, क्रमदण्डसंहिता, क्रममालासंहिता, क्रमलेखासंहिता, क्रमद्ध्वजसंहिता, क्रमरथसंहिता, क्रमघनसंहिता चेति च संहिताभेदास् स्युः । तैत्तिरीयप्रातिशाख्ये तु प्रकारान्तरेणाऽपि संहिताभेदाः प्रदर्-

---

१. २।१, २। २. १।१५८। ३. ५।१। ४. ३।१।७। ५. १।६।१(निरुक्ते)। ६. अष्टा. १।४।१०९। ७. ३।१।३। ८. १।३। ९. ३।१।३। १०. १।३।

शिताः। तथा हि "अथ चतस्रस् संहिताः, पदसंहिताऽक्षरसंहिता वर्णसंहिताऽङ्गसंहिता चेति, नानापदसन्धानयोगः पदसंहितेत्यभिधीयते, यथास्वमक्षरसंहितादीनामप्येवम्"[1] इति। तद्व्याख्याने सोमयार्येण च—"नानाक्षरसन्धानयोगोऽक्षरसंहिता, नानावर्णसन्धानयोगो वर्णसंहिता, नानाङ्गसन्धानयोगोऽङ्गसंहिता" इत्युक्त्वा "एकपदे केवलस्वरयोस् सयँयोगोऽक्षरसंहिता, एकपदे स्वरव्यञ्जनसयँयोगो वर्णसंहिता, एकपदे केवलव्यञ्जनसयँयोगोऽङ्गसंहिता, अनन्यत्तर पदसंहिता" इत्युक्तम्। "संहिताकरणञ् चेदमथ वक्ष्याम्यतो लघु। व्यञ्जनेन क्व चित् सन्धिस् स्वरेण स्स्यात् क्व चित् तथा"[2] इति चारायणीयशिक्षायाम्। न्याय्याम् पदानुपूर्वीमुल्लङ्घ्य प्रवर्तमाना संहिता अनानुपूर्व्यसंहितेति चैकाऽनानुपूर्व्यसंहिताऽधिका ऋग्वेदप्रातिशाख्य उल्लिखिताऽस्ति[3] ॥३॥

४. संहितायाः परिणामानावँ वर्गीकरणम्

संहितायाञ् च वर्णानावँ विकारस् स्यात् क्व चित् तथा।
क्व चित् प्रकृतिभावश् च लोपो वाऽप्यागमः क्व चित् ॥४॥

तदुक्तयँ याज्ञवल्क्यशिक्षायाम्— "सन्धिश् चतुर्विधो भवति लोपागमविकाराः प्रकृतिभावश् चेति"[4] इति। चारायणीयशिक्षायाञ् च— "लोपसन्धिस् स ते लोकमुश्चन्द्रेत्त्यागमस् स्मृतः। वज्ज्य-(ज्र्य-?) सीति विकारस् तु प्रकृतिः किं स्विदित्त्यपि ॥ वर्णस्स्यादर्शनलँ लोप आगमो वर्णदर्शनम्। वर्णान्यत्त्ववँ विकारस् स्यात् स्वभावः प्रकृतिस् स्मृतः ॥ वर्णागमो वर्णविपर्ययश् च द्वौ चापरौ वर्णविकारनाशौ। (धा)तोस् तथार्थातिशयो नियोगस् तदुच्यते पञ्चविधन् निरुक्तम्"[5] इति ॥४॥

५. शिक्षाशास्त्रविषयभूतसंहितानिरूपणम्

पदान्त्यस्स्य हि वर्णस्स्य पदाद्द्य्ये न हि संहिता।
या सैव मुख्यरूपेण शिक्षाशास्त्रे निरूप्यते ॥५॥

तदुक्तम् ऋग्वेदप्रातिशाख्ये— "पदान्तादिष्वेव विकारशास्त्रम् पदे दृष्टेषु वचनात् प्रतीयात्"[6] इति, "पदान्तान् पदादिभिस् सन्दधदेति यत् सा (संहिता) कालाव्यवायेन"[7] इति च। शुक्लयजुर्वेदप्रातिशाख्येऽपि— "पदान्तपदाद्द्योः सन्धिः"[8] इति ॥५॥

---

१. २४।१-४। २. पृ. २०। ३. २।७८। ४. या. शि. शि.ब.वि., पृः ८१। ५. पृ. २०। ६. २।५। ७. २।२। ८. ३।३।

(क) पदनिरूपणम्

सुबन्तञ्च तिङन्तञ्च पदमेके प्रचक्षते ।
अर्थः पदमिति प्राह स्फुटङ्कात्यायनो मुनिः ॥६॥

तथाहि पाणिनिः — "सुप्तिङन्तम् पदम्"[1] इति । शुक्लयजुर्वेदप्रातिशाख्ये कात्यायनमुनिस्तु—"अर्थः पदम्"[2] इति । तद्व्याख्याने उव्वटश्च— "अर्थाभिधायि पदम्, पद्यते गम्यते ज्ञायतेऽर्थोऽनेनेति पदम्"[3] इति । "अनन्वर्थोऽयम् पदशब्दः, पद्यते गम्यतेऽर्थोऽनेनेति पदमिति"[4] इति जिनेन्द्रबुद्धिः पूर्वतरमेव प्राह । "अक्षरसमुदायः पदम्, अक्षरवँ वा"[5] इत्यपि शुक्लयजुर्वेदप्रातिशाख्ये । "वर्णसमुदायः पदम्"[6] इति पाणिनीयव्याकरणभाष्येऽपि । "पदमर्थे प्रयुज्यते, विभक्त्यन्तञ्च पदम्"[7] इति च । "पूर्वपरयोरर्थोपलब्धौ पदम्"[8] इति च कातन्त्रव्याकरणे । "पदशब्देनार्थ उच्यते"[9] इति कय्यटोऽपि ॥६॥

(ख) पदजातनिरूपणम्

नाम चाऽऽख्यातमपि चोपसर्गश्च निपातकः ।
इति चत्वारि हि पद-जातानि कथितानि च ॥७॥

तथाहि—"नामाख्यातमुपसर्गो निपातश्चत्वार्यर्याहुः पदजातानि शाब्दाः"[10] इति ऋग्वेदप्रातिशाख्ये; "अक्षरसमुदायः पदम्, अक्षरवँ वा, तच्चतुर्द्धा, नामाख्यातोपसर्गनिपाताः"[11] इति शुक्लयजुर्वेदप्रातिशाख्ये; "चतुर्णाम् पदजातानाम् नामाख्यातोपसर्गनिपातानाम्"[12] इति शौनकीयचतुरध्यायिकायाम् । निरुक्ते यास्कमुनिरपि— "चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च"[13] इति । चारायणीयशिक्षायाम् च—"स्वरोऽक्षरमिति प्राहुराचार्याश्शब्दचिन्तकाः । समुदायः पदन् तेषान् तच्चतुर्धा व्यवस्थितम् । नासि(मि)काख्यामि(ति)के चोभे नैपातिकमनन्तरम् । उपसर्गाश्च निष्पत्तिः पदमेवन् चतुर्विधम्"[14] इति ॥७॥

---

१. अष्टा. १।४।१४ । २. ३।२ । ३. शु. य. प्रा. उ. भा. ३।२ । ४. काशिकाव्याख्यायाम् ३।१।९२ । ५. ८।४६, ४७ । ६. १।१।२१, वा. ५ । ७. १।२।६४, वा. १९ । ८. १।१।२० । ९. भा. प्र. १।२।४२, वा. २ । १०. १२।१७ । ११. ८।५०–५३। १२. १।१। १३. १।१।१। १४. मु. २०।

(क) नामादिपरिभाषाः

सत्त्वाभिधायकन् नाम स्यादाख्यातञ्च क्रियार्थकम् ।
उपसर्गोऽनुगस् तस्योच्चावचार्थो निपातकः ॥८॥

तथाहि ऋग्वेदप्रातिशाख्ये— "तन् नाम येनाऽभिदधाति सत्त्वम्, तदाख्यातयँ येन भावं स धातुः"[1] इति, "क्रियावाचकमाख्यातमुपसर्गो विशेषकृत् । सत्त्वाभिधायकन् नाम निपातश्च पादपूरणः ॥ निपातानामर्थवशान् निपातनादनर्थकानामितरे च सार्थकाः । नेयन्त इत्त्यस्ति सङ्ख्येह वाङ्मये मिताक्षरे चाऽप्यमिताक्षरे च ये"[2] इति च । "क्रियावाचकम्" इत्त्यादिकेश् श्लोकेश् शुक्लयजुर्वेदप्रातिशाख्येऽपि पट्ठ्यते[3] । बृहद्देवतायाञ् च— "शब्देनोच्चरितेनेह येन द्द्रव्व्यम् प्रतीयते । तदक्षरविधौ युक्तन् नामेत्त्याहुर् मनीषिणः ॥ अष्टौ यत्तर प्प्रयुज्ज्यन्ते नानार्थेषु विभक्तयः । तन् नाम कवयश्च प्राहुर् भेदे वचनलिङ्गयोः ॥ क्रियासु बह्वीष्वभिसंश्रितो यश्च पूर्वापरीभूत इहैक एव । क्रियाभिनिर्वृत्तिवशोपजातश्च कृदन्तशब्दाभिहितो यदा स्यात् । सङ्ख्याविभक्त्यव्ययलिङ्गयुक्तो भावस् तदा द्रव्व्यमिवोपलक्ष्यः"[4] इति । यास्केश् च—"भावप्प्रधानमाख्यातं सत्त्वप्प्रधानानि नामानि"[5] इति, "(उपसर्गाः) नामाख्यातयोस् तु कर्मोपसर्यँ योगद्द्योतका भवन्ति"[6] इति, "अथ निपाता उच्चावचेषु अर्थेषु निपतन्ति"[7] इति च । "वस्तूपलक्षणयँ यत्तर सर्वनाम प्प्रयुज्ज्यते । द्रव्व्यमित्त्युच्च्यते सोऽर्थो भेदद्द्यत्त्वेन विवक्षितः"[8] इति, "गुणभूतैरवयवैस् समूहश्च क्रमजन्मनाम् । बुद्ध्या प्रकल्पिताभेदश्च क्रियेति व्व्यपदिश्यते"[9] इति च वाक्पदीये । नामादिशब्दनिर्वचनानि च—"नमन्ति आख्यातशब्दे गुणभावेन (इति) नमयन्ति वा स्वमर्थमाख्यातशब्दवाच्ये गुणभावेनेति नामानि"[10] इति आचार्यदुर्गः । "आख्यायन्ते स्त्रीपुन्नपुंसकानि क्रियागुणभावेन वर्तमानानि अनेन, क्रिया च तेषामुपरि प्प्राधान्येन वर्तमाना इत्त्याख्यातम्"[11] इति च स एव । "आख्यात-

---

१. १२।१८, १९ । २. १२।२५, २६ । ३. ८।५५ ।
४. १।४२-४५ । ५. निरुक्ते १।१।१ । ६. तत्तरैव १।१।३ ।
७. तत्तरैव १।२।१ । ८. तृतीये काण्डेभूयोद्रव्व्यसमुद्देशे श्लो. ३ । ९. तृतीये काण्डे क्रियासमुद्देशे, श्लो. ४ ।
१०. निरुक्तवृत्तौ १।१।१ । ११. तत्तरैव ।

मुपगृह्य्यार्थविशेषमिमे तस्यैव सृजन्तीति उपसर्गाः"[१] इत्यपि स एव। "गतितया कर्मप्रवचनीयतया वा पदान्तरैरुपसृज्यन्त इत्युपसर्गाः"[२] इति गार्ग्यगोपालयज्वा। "अर्थवशान् निपातनान् निपाताः"[३] इति शौनकः ॥८॥

(घ) नामादिरङ्गनिरूपणम्

शुक्लवर्णानि नामानि आख्याता रोहिता मताः।
कपिलास् तूपसर्गाश् च कृष्णाश् चैव निपातकाः ॥९॥

अयवँ विषय आर्षदृष्ट्येकदृश्योऽस्माभिस् तु आगमबलादेव वेदितुं शक्यः। प्रतिपादितश् चाऽयवँ विषयो याज्ञवल्क्यशिक्षायामनयैव कारिकया[४]। एवमुपासितानि नामादीनि पदानि अभ्युदयफलानि भवन्तीति विज्ञायते। तदर्थमेव याज्ञवल्क्यशिक्षोक्तोऽयवँ विषयोऽत्राऽपि सङ्गृहीतो बोद्ध्यः ॥९॥

(ङ) नामादिगोत्तरनिरूपणम्

नाम स्याद् भार्गवम् भारद्वाजमाख्यातमुच्यते।
उपसर्गस् तु वासिष्ठो निपातꣳ काश्यपस् तथा ॥१०॥

अयमपि विषय आगमादेव वेदितव्यः। शुक्लयजुर्वेदप्रातिशाख्येऽपि एष विषयꣳ प्रतिपादितः। तथाहि—"भारद्वाजकमाख्यातम् भार्गवन् नाम भाष्यते। वासिष्ठ उपसर्गस् तु निपातः काश्यपः स्मृतः"[५] इति। एवमेव याज्ञवल्क्यशिक्षायामपि प्रायेण[६]। चारायणीयशिक्षायामपि— "भारद्वाजकमाख्यातम् भार्गवन् नाम गोत्तरतः। वासिष्ठा उपसर्गास् तु निपाताꣳ काश्यपास् स्मृताः"[७] इति। एवमुपासितानि नामादीनि अभ्युदयफलानि भवन्तीति विज्ञायते ॥१०॥

(च) नामादिदेवतानिरूपणम्

स्मृतन् नाम तु वायव्यमाख्यातं सौम्यमेव च।
आग्नेयस् तूपसर्गश् च निपातो वारुणस् स्मृतः ॥११॥

अयमपि विषय आगमैकगम्यः। शुक्लयजुर्वेदप्रातिशाख्येऽपि एष विषयꣳ प्रतिपादितः। तथाहि— "सर्ववन् तु सौम्यमाख्यातन् नाम वायव्यमिष्यते। आग्नेयस् तूपसर्गस् स्यान् निपातो वारुणस् स्मृतः"[८]

---

१. या.शि.शि.व.वि., पृ. १।१।३। २. तै. प्रा. व्या. १।१५।
३. ऋ. प्रा. १२।२६। ४. या. शि. शि. व. वि., पृ. ७९।
५. ८।५८। ६. शि. व. वि. पृ. ८०। ७. पृ. २०।
८. ८।६०।

इति । याज्ञवल्क्यशिक्षायामप्येवमेव[1] । चारायणीयशिक्षायाञ्च— "नाम वायव्यमैन्द्रवं वा सौम्यमाख्यातमिष्यते । आग्नेयस्तूपसर्गस् स्यान् निपातो व(ा)रुणस् स्मृतः"[2] इति । एवमप्युपासितानि नामादीनि पदानि अभ्युदयफलानि भवन्तीति विज्ञायते ॥११॥

(छ) नामादिस्स्वरसामान्यनिरूपणम्

एकोदात्तम् पदम् प्रायो नामान्तोदात्तकन् तथा ।
आख्यातन् निहतं शिष्टावाद्द्युदात्तौ प्रकीर्तितौ ॥१२॥

'बृहस्पतिः' इत्यादीनाङ्ग केषाञ् चन पदानान् द्व्युदात्तकत्वेऽपि प्रायेण पदमेकोदात्तम् भवति । तदुक्तं शुक्लयजुर्वेदप्रातिशाख्ये— "स्वरितवर्ज्जमेकोदात्तम् पदम्"[3] इति । ऋक्तन्त्रेऽपि— "पदमेकोच्चम्"[4] इति । पाणिनिमुनिरपि— "अनुदात्तम् पदमेकवर्ज्जम्"[5] इति । नामानि प्रायेणान्तोदात्तानि । तदुक्तम्—"फिषोऽन्त उदात्तः"[6] इति । अपवादास् त्वस्स्य बहवः । पाणिनीयव्याकरणभाष्ये च— "न त्त्विदलं लक्षणमस्ति प्रातिपदिकस्स्याऽऽदिरुदात्तो भवतीति । इदम् पुनरस्ति प्रातिपदिकस्स्याऽन्त उदात्तो भवतीति"[7] इति । वाक्ये आख्यातम् प्रायेण सर्वानुदात्तम् भवति । उक्तं हि शुक्लयजुर्वेदप्रातिशाख्ये— "निहन्यते खल्वाख्यातमुपसर्गाणाञ् चतुष्टये"[8] इति । उपसर्गेषु अभीत्ययमन्तोदात्तो भवति अन्ये आद्द्युदात्ताः । तदुक्तम्— "विंशतेरुपसर्गाणामुच्चाः एकाक्षरा नव । आद्द्युदात्ता दशैतेषामन्तोदात्तस् त्वभीत्ययम्"[9] इति । निपाताः प्रायेणाऽऽद्द्युदात्ता भवन्ति । तदुक्तम् फिट्सूत्रे— "निपाता आद्द्युदात्ताः, उपसर्गाश्चाऽभिवर्ज्जम्"[10] इति । निपातविषये उक्तस्स्य नियमस्स्य— "एवादीनामन्तः, वावादीनामुभावुदात्तौ, चादयोऽनुदात्ताः, यथेति पादान्ते"[11] इति अपवादा अल्पे एव । "तत् कथमनुदात्तप्रकृति नाम स्स्यात्"[12] इति वदन् यास्कमुनिरपि नामपदस्स्य सर्वानुदात्तत्वम् प्रायेण न भवतीति प्रतिपादयति । स्वरसंहिताज्ञानाय पदान्तपदादिगतास् स्वरा विशेषेण ज्ञातव्याः; तेषु च ये उत्सर्गापवादरूपलक्षणेनानुगन्तुमशक्यास् ते प्रतिपदमेव निघण्टावुपदेशेन प्रतिपादनीयाः । तदुक्तम्—

---

१. शि. व. वि., पृ. ८० । २. पृ. २० । ३. २।१ ।
४. ३।१।२(६२)। ५. अष्टा. ६।१।१५८। ६. फिट्सूत्रे १।१।
७. ६।१।१२३ । ८. ८।५६ । ९. ऋ. प्रा. १२।२२–२४ ।
१०. ४।१२–१३ । ११. ४।१४–१७ । १२. १।३।३ ।

"यानि तर्ह्यग्रहणानि प्रातिपदिकानि, एतेषामपि स्वरवर्णानुपूर्वीज्ज्ञानार्थ उपदेशः कर्तव्यः। शशष् पष इति मा भूत्, पलाशः पलाष इति मा भूत्, मञ्चको मञ्जक इति मा भूत्"[1] इति ॥१२॥

(ज) पदशय्यानिरूपणम्

उदात्तमाद्द्व्युदात्तञ् च मद्ध्योदात्तम् पदन् तथा।
अन्तोदात्तन् द्व्युदात्तञ् च त्र्युदात्तं स्वरितन् ततः ॥१३॥
अनुदात्तस्स्वरितकमनुदात्तमिति क्रमात्।
नव प्रकारास् स्वराणाम् पदशय्याः प्रकीर्तिताः ॥१४॥
प्र सोमो हविषामग्निर् बृहस्पतिरतः परम्।
इन्द्राबृहस्पतिस् स्वश् च वीर्यवं वश् च निदर्शनम् ॥१५॥

तथाहि पाणिनीयशिक्क्षायाम्— "अन्तोदात्तमाद्द्व्युदात्तमनुदात्तम् नीचस्स्वरितम्। मद्ध्योदात्तं स्वरितन् द्व्युदात्तन् त्र्युदात्तमिति नव पदशय्याः ॥ अग्निस् सोमः प्र वो वीर्यं हविषां स्वर् बृहस्पतिरिन्द्राबृहस्पती। अग्निरित्त्यन्तोदात्तं सोम इत्त्याद्द्व्युदात्तम्। प्रेत्त्युदात्तवं व इत्त्यनुदात्तवं वीर्यन् नीचस्स्वरितम्। हविषाम् मद्ध्योदात्तं स्वरिति स्स्वरितम्। बृहस्पतिरिति द्द्व्युदात्तमिन्द्राबृहस्पती इति त्र्युदात्तम्"[2] इति। कौहलीयशिक्क्षायाञ् च—"नवप्रकारवं विज्ज्ञेयम् पदानां स्वरलक्क्षणम्। अन्तोदात्तमथोदात्तमाद्द्व्युदात्तमुदात्तकम्। मद्ध्योदात्तं ह्युत्र्यु(?)दात्तञ् च निहतस्स्वरितन् तथा। एकस्स्वरितमित्त्येताः पदशब्द(य्या?) नव स्मृताः"[3] इति। सर्वसम्मतशिक्क्षायाञ् च— "एकोदात्तम् पदञ् ज्ञेयमुदात्तद्द्वितयम् पदम्। त्र्युदात्तवं वा पदवं विद्द्यान् नित्त्यस्स्वारमथापरम्। सर्वाऽनुदात्तमथवा पदानाङ् कुत्त्र चित् पदम्। स समासस् त्र्युदात्तस् स्यादेकोदात्तद्द्व्युदात्तयोः। यदेषूवन्न्यद् धि तवं (विद्द्यान्?) नीचमेव (वम्?) पदस्थितिः। एवं शिष्टैरभिहितं स्वरूपवं वैदिकस्स्य तु"[4] इति। नारदीयशिक्क्षायान् तु— "अष्टप्रकारवं विज्ज्ञेयम् पदानां स्वरलक्क्षणम्। अन्तोदात्तमाद्द्व्युदात्तमुदात्तमनुदात्तन् नीचस्स्वरितम्। मद्ध्योदात्तं स्वरितन् द्विरुदात्तमित्त्येषा अष्टौ पदसञ्ज्ञाः (-शय्याः?)। अग्निस् सोमः प्र वो वीर्यं हविषा स्वर् वनस्पतिः"[5] इति ॥१३-१५॥

---

१. पा.व्या.भा., आ.१। २ श्लो.४५-४७। ३. श्लो.३४-३५।
४. श्लो. ६०-६२ (३।२९-३१)। ५. २।७।४-५।

(झ) पदान्तगामिवर्णनिरूपणम्

दीर्घमृकारलृकारान् द्वितीयांश्च चतुर्थकान् ।
चवर्गीयांस् तथाऽन्तस्था ऊष्मणश्चाऽविसर्गकान् ॥१६॥
तथाऽनुस्वारमिति च वर्णानां सप्तविंशतिम् ।
विहायाऽन्ये मूलवर्णाः पदान्तस्था भवन्ति हि ॥१७॥

उदाहरणानि यथा— वरम्, स्वहा, वरि, देवी, मधु, बाहू, धातृ, अग्ने, करवामहै, वायो, देवौ, वाक्, वाग्, प्राङ्, विट्, विड्, सुगण्, तत्, तद्, देवान्, अनुष्टुप्, अनुष्टुब्, अग्निम्, वायुः इति । ये स्वरा दीर्घा अपि पदान्तस्था भवन्ति ते पदान्तस्था भवन्त्येव प्लुतताङ्गता अपि । तदुक्तमृग्वेदप्रातिशाख्ये— "ऊष्मान्तस्थस्सोष्मचकारस्वर्गा नाऽन्तयं यान्त्यनन्यत्तर विसर्जनीयात्"[1] इति; शुक्लयजुर्वेदप्रातिशाख्ये च— "प्रथमोत्तमाः पदान्तीया अत्र चौ, विसर्जनीयः, स्वराश्च लृकारवर्जम्, णकारर्क्कारावर्वग्रहे"[2] इति; शौनकीयचतुरध्यायिकायाम् च— 'पदान्त्यः पदद्यः, अन्लृकारस् स्वरः पदद्यः, लकारविसर्जनीयौ च, स्पर्शाः प्रथमोत्तमाः, न चवर्गः, प्रथमान्तानि तृतीयान्तानीति शौनकस्य प्रतिज्ञा न वृत्तिः"[3] इति । शंशिरीयशिक्षायाम् च— "वर्गाणाम् प्रथमो वर्णः पञ्चमे सार्ववर्णिके । उदये पञ्चमस्थस् स्यान् न चकारः पदान्तगः"[4] इत्यादिनाऽयं विषयः प्रतिपादितः । नारदीयशिक्षायाम् च— "स्वरा गडदबाश् चैव ङणनमास् सहोष्मभिः । चतुर्णाम् प्रजातीनाम् पदान्ता दश कीर्तिताः"[5] इति । उक्तेषु वचनेषु ऋग्वेदप्रातिशाख्यादिवचनानि तत्तच्छाखाविषयाणि; अत एव ऋग्वेदप्रातिशाख्येऽनुपात्तो लकारश् शौनकीयचतुरध्यायिकायामुपादीयते तत्सम्बद्धशाखायाम्—"बर्हिष्टे अस्तु बालिति"[6] इत्यादौ पदान्ते लकारस्य सत्त्वात् । एष च विषयः पदविभजनसन्धानकल्पनासौकर्याय प्रतिपादितो बोद्धव्यः ॥१६-१७॥

(ञ) पदादिगामिवर्णनिरूपणम्

दीर्घऋकारान् तथलकारं सप्त वर्णांश्च आदिकान् ।
प्रयोगवाहांश् चाऽप्रास्स्याऽन्ये वर्णास् स्युः पदादिगाः ॥१८॥

उदाहरणानि यथा— अथ, आत्, इन्द्रः, ईशः, उत, ऊचुः, ऋषिः, एषः, ओषधिः, ऐत्, औक्षन्, कः, खनमानः, गङ्गे, घृतम्, ङवते,

---

१. १२।१ । २. १।८५-८८ । ३. १।३-८ ।
४. श्लो. १२२ । ५. २।५।१ । ६. शौ. अ. वे. सं १।३।१ ।

चित्तरम्, छाया, जाया, तम्, देवः, धनम्, नमः, पतिः, फलम्, बलम्, भयम्, मनः, यत्, रत्नम्, लक्ष्मीः, वायुः, शतम्, षट्, सप्त, हरिणी इति । यद्द्यपि लोके झञ्झावातः, झटिति, झम्पः, झरः, झीर्यति, लुङ्ग, टङ्कः, टीकते, ठक्कुरः, डमरुः, डयनम्, डिम्भः, ढक्का, णकार इत्त्यादौ झकारादयोऽपि, वर्णाऽ पदादौ आगच्छन्तो दृश्यन्ते, तथापि ऋग्वेदादिकवँ विषयविशेषमादाय झकारादीनाम् पदादावनुपलब्ध्यमानत्त्वमुक्तवँ वेदितव्यम् । उक्तञ्च ऋग्वेदप्रातिशाख्ये—"ऋकारल्कारौ परमर्धमूष्मणान् नाऽऽदिन् तकारादवरे च सप्त"[1] इति ॥१८॥

(ट) समानपदस्स्थानावँ वर्णानाम् परस्परं सयँयोगित्त्वासयँयोगित्त्वयोर् निरूपणम्—

मद्ध्येषु स्स्पर्शवर्गेषु ह्येकवर्गीयवर्णकः ।
अनन्यवर्गीयवर्णेन सयँयुज्ज्येत पदे न हि ॥१९॥

तदुक्तमृग्वेदप्रातिशाख्ये— "नान्न्योन्न्येन मद्ध्यमास् स्पर्शवर्गास् सयँयुज्ज्यन्ते"[2] इति ॥१९॥

ऊष्मभिर् घोषिणोऽननत्त्यस्स्पर्शा नो सोष्मणोष्मवान् ।
परस्स्थेन हकारेण न स्स्पर्शो योगमेति च ॥२०॥

उक्तं हि ऋग्वेदप्रातिशाख्ये— "तथा तेषाङ्ग घोषिणस् सर्वथोष्मभिः"[3] इति, "न स्स्पर्शैरूष्मा प्रथमऽ परस् सन्"[4] इति च ॥२०॥

सोष्मा हकारश् च पूर्वौ न स्स्पर्शेनोत्तमवँ विना ।
घोषिणोऽनुत्तमास् स्पर्शास् स्पर्शैर् नैव ह्यघोषिभिः ॥२१॥

तदुक्तमृग्वेदप्रातिशाख्ये— "नाऽनुत्तमैस् स च सोष्मा च पूर्वौ"[5] इति, "नाऽनुत्तमा घोषिणोऽघोषिभिस् सह स्स्पर्शैस् स्पर्शाः"[6] इति च ॥२१॥

परोष्मभिर् नोत्तमाश् च यवौ चाऽथ य एव तु ।
परैस् स्पर्शैर् लकारेण रेफो रेण च लेन च ॥२२॥

तथाहि ऋग्वेदप्रातिशाख्ये— "नोत्तमा ऊष्मभिऽ परैः"[7] इति, "नाऽनृत्यानृतस्स्था न प्रथमोष्मभिऽ परैः"[8] इति, "लकार–स्स्पर्शैर् न यकार उत्तरैः"[9] इति, "न रेफो रेफेण"[10] इति, "न लकारेण रेफः"[11] इति च ॥२२॥

---

१. १२।२ । २. १२।३ । ३. १२।६ । ४. १२।१० ।
५. १२।११ । ६. १२।१२ । ७. १२।१३ । ८. १२।७ ।
९. १२।१४ । १०. १२।८ । ११. १२।४ ।

वोऽनुत्तमैः× परैस् स्पर्शैर् नाऽनून्योन्येन तथोष्मकाः ।
पदमद्ध्ये हि चैतेषान् नियमानाम् प्रवर्तनम् ॥२३॥

तदुक्तमृग्वेदप्रातिशाख्ये— "स्पर्शैर् वकारो न परैरनुत्तमैः"[१] इति, "ऊष्माणोऽनून्योन्येन च न"[२] इति, "ऋक्पदेष्विदम्"[३] इति च ।

समानपदस्थानावर्ण वर्णानाम् परस्परं सयोगित्वासयोगित्वयोर् निरूपणमिदम् ऋग्वेदप्रातिशाख्यमेवोपजीव्य कृतम्, अत एतन् मुख्यतया ऋग्वेदविषयम् । तथापि प्रायेणैतत् सम्पूर्णस्यैव संस्कृतवाङ्मयस्य व्यञ्जनसयोगानाम् प्रकृतेर् बोधकमप्यस्त्येव । कुत्र चित् के चिदपवादा अपि स्युरेव, यथा ऋग्वेदे एवाऽपि भृशवर्ण विचारणीयोऽपि अखलीकृत्य[४] जझ्झतीः[५] इति सोष्मसयोगः× प्राप्यते एव ॥२३॥

६. अथ संहिताविशेषाधिकारः

(अ) स्वरसन्धिनिरूपणम्

स्यात् पूर्वपरयोरेक आदेश इति चेत्यतः ।
उत्तरेषु कतिषु चिद् वचनेषूपतिष्ठते ॥२४॥

(क) प्रश्लिष्टसन्धिषु दीर्घसन्धेर् निरूपणम्

समानाऽक्षरतस् तस्मिन् सस्थाने दीर्घ इष्यते ।
ऋति -ऋ वा तथ लृति ल्लृ वेति च बुधैस् स्मृतम् ॥२५॥

तदुक्तमृग्वेदप्रातिशाख्ये— "समानाक्षरे सस्थाने दीर्घमेकमुभे स्वरम्"[६] इति । शा.ऋग्वेदसंहितायाम् उदाहरणानि च—त्वाग्नेः[७], दिवीव[८], मधूदकम्[९] इति । शुक्लयजुर्वेदप्रातिशाख्ये च— "सि सवर्णे दीर्घम्"[१०] इति । मा.वा. शुक्लयजुर्वेदसंहितायाम् उदाहरणानि च—प्रार्प्पयतु[११], सोमेनातनच्चँमि[१२], विष्णुसत्त्वाक्रमताम्[१३], सयौनीदम्[१४], अनूज्जेषम्[१५] इति । तैत्तिरीयप्रातिशाख्येऽपि— "अर्थैकमुभे दीर्घं समानाक्षरे सवर्णपरे"[१६] इति । तैत्तिरीयसंहितायामुदाहरणानि च—त्वान्वङ्[१७], रास्नासि[१८], मास्स्थात्[१९], रास्नासीन्द्राण्यै[२०], तनच्चँमीन्-

---

१. १२।५ । २. १२।१५ । ३. १२।१६ । ४. ७।१०३।३, ऋ. प्रा. ७।३३ । ५. ५।५२।६; ऋ. प्रा. उ. भा. १२।३ । ६. २।१५ । ७. १।१।७ । ८. १।२२।२० । ९. ९।६७।३२ । १०. ४।५२ । ११. १।१ । १२. १।४ । १३. १।९ । १४. १।२२ । १५. २।१५ । १६. ५।१,२ । १७. १।१।२ । १८. १।१।२ । १९. १।१।२ । २०. १।१।२ ।

दराय[1], सूपस्स्थाः[2] इति । ऋक्तन्त्रेऽपि—"विकारस् सस्स्थानः (स्व)रौ, (दीर्)घम्"[3] इति । उदाहरणानि च सामवेदार्चिकसंहितायाम्—ईडिष्ष्वावसे[4], अधा हीन्द्रः[5], वाजिनीव[6] आजिषूतिम्[7] इति । शौनकीयचतुरद्ध्यायिकायाम् च— "पूर्वपरयोरेकः, समानाक्षरस्य सवर्णे दीर्घः"[8] इति । शौनकीयथर्ववेदसंहितायाम् उदाहरणानि च—मय्येवास्तु[9], इयमस्मीति[10], भवन्तूत्तमम्[11] इति। पाणिनिरपि— "अकस् सवर्णेदीर्घः"[12] इति। तदुदाहरणानि च— कर्मास्ति, दण्डाग्रम्, वर्त्मावश्यकम्, रन्थादौ, बालिकास्ति, वालिकाशनम्, बालिकागता बालिकागमनम्, दधीदम्, दधीच्छा, दधीक्षते, दधीप्सा, नदीयम्, युवतीङ्गितम्, सपत्नीर्ष्यते, सपत्नीर्ष्या, सुष्ठूक्तम्, जानूत्सेधः, बाहूत्क्षेपम्, साधूहृ× कृतः, ऊर्णायूर्णा, वधूत्तरीयम् वधूर्मिका, होतृशश्यः, पातयितृणम्, पितृणम् गम्लृकारः इति । अत्राऽन्न्ये गम्लृ लृकार इत्यत्र लृकारस्य दीर्घाऽभावाद् दीर्घ ॠकारो भवतीति गम्ॠकार इति भवतीति मन्न्यन्ते[13] । "लृकारस्य तु दीर्घत्वन् नास्ति वाजसनेयिनः"[14] इति वचनात्, शुक्लयजुर्वेदप्रातिशाख्ये दीर्घस्य लॄकारस्याऽपि उपदिष्टत्वाच्[15] चाऽन्न्यत्र दीर्घस्य लॄकारस्यापि सत्वाद् गम्लृ+लृकारः=गम्लॄकार इत्येव न्याय्यमिति वयम् मन्न्यामहे, पूर्वत्र परत्र वाऽपि ॠकारस्याभावे ॠकारोपजनस्य संहितोच्चारणमात्रेण कर्तुमशक्यत्वादस्वाभाविकत्वाच् च ।

यद्द्यपि वस्तुस्स्थित्यनुसारन् तु अत्र ह्रस्स्वयोस् सन्धौ प्रश्श्लेषेणैकवर्णवद्भावः, ह्रस्स्वदीर्घयोस् सन्धौ प्रश्श्लेषोऽशेन लोपश् च, दीर्घयोस् सन्धावनुदात्तस्य लोप इति विविधा भावा भवन्तीति विज्ज्ञायते; उक्तञ् च कातन्त्रलघुवृत्तौ— "अदीर्घो दीर्घतायँ याति न च दीर्घस्य दीर्घता । पूर्वन् दीर्घं स्वरन् दृष्ट्वा परलोपो विधीयते"[16] इति, तथापि शौनकादिभिर् लाघविकैराचार्यैर् दीर्घीभावत्वेनैव ते सर्वेऽपि भावास् सङ्गृहीता इति बोद्ध्यम् ।

पाणिनीयव्याकरणवार्तिककारेण तु— "ॠति -ॠ वा वचनम्"

---

१. १।१।३ । २. १।२।२ । ३. ३।४।१-३ ४. १।४९ । ५. १।४०६ । ६. २।१०९३ । ७. १।४११ । ८. ३।४१-४२ । ९. १।१।२ । १०. १।७।४ । ११. १।९।२ । १२. ६।१।१०१। १३. काशिकाकारादयः । १४. या. शि. शि. व. वि., पृ. ९१ । १५. ८।३ । १६. १।२।१ ।

"लृति ल्लृ वा वचनम्"[1] इत्युक्तम्। तदुदाहरणानि च होतृ+ऋकारः =होत्-ऋकारः, होतॄकारः; होतृ + लृकारः = होत्ल्लृकारः, होतॄकारः, गम्लृ+लृकारः=गम्ल्लृकारः, गम्लॄकार इत्यादीनि बोद्ध्यानि॥२४-२५॥

(ख) दीर्घसन्ध्यपवादनिरूपणम्

लोके शकन्ध्वादिषु तु ह्रस्व एको भवेदिति ।
पररूपविधिवद् व्याकुर्वन् प्राह कात्यायनो मुनिः ॥२६॥

तथाहि—"शकन्ध्वादिषु च (पररूपवद् वक्तव्यम्)"[2] इति। तदुदाहरणेषु च—शकन्धुः, कर्कन्धुः, कुलटा, सीमन्तः, सारङ्ग इत्येते प्रयोगा दीर्घसन्ध्यपवादरूपा द्रष्टव्याः। अन्न्ये ये केचनाऽपवादास् ते यथायथमुत्तरेषु प्रकरणेषु द्रष्टव्याः। "सीमन्ते ह्रस्वः"[3] इति शौनकीयचतुरध्यायिकायामपि पठ्यते। धन+अर्चम्=धनर्चम् इति एवमेव शतर्चसम् इति च दीर्घाऽपवाद शा.ऋग्वेदसंहितायामपि प्राप्यते[4], पठ्यते चाऽयमृग्वेदप्रातिशाख्ये[5]ऽप्यपवादः ॥२६॥

(ग) परश्शिलष्टसन्धिषु सन्ध्यक्षरीभावसन्धेः (गुण-वृद्धिसन्धेः) तदपवादानाञ् च निरूपणम्

एकार आदिवर्णे स्स्यादोकारस् स्यादुवर्णके ।
ऐस् तु स्स्वादीरेरिणोस् स्यादौ प्रादूहादिके परे ॥२७॥
अक्क्षौहिण्याञ् च पाष्ठौह इत्यादिष्वपि चौर् भवेत् ।
एतेऽपवादा भाषायाञ् चाऽन्वद्ध्यायर्यं यथायथम् ॥२८॥

तदुक्तमृग्वेदप्रातिशाख्ये इकारोदय एकारमकारस् सोदयस् तथा। उकारोदय ओकारम्[6] इति। उदाहरणानि च शा.ऋ.संहितायाम् एह[7], तत्रेत्[8], एमसि[9], पितेव[10], धियेषितः[11], अक्क्षितोतिः[12], त्वोतासः[13], इहोप[14], रथीतमोमा[15] इति। एतदपवादश् च परैषयुरिति प्राप्यते[16] तत्तर। शुक्लयजुर्वेदप्रातिशाख्ये च— "कण्ठ्यादिवर्ण एकारम्, उवर्ण ओकारम्"[17] इति। उदाहरणानि च मा.संहितायाम्—एहि[18], सेदम्[19], स्थोर्द्ध्वचित्तः[20], त्वोदानाय[21],

---

१. पा. व्या. भा. ६।१।१०१। २. तत्तत्रैव ६।१।९४। ३. ३।४३। ४. ७।६३।१, ७।१००।३। ५. २।७१। ६. २।१५, १६। ७. १।१।२। ८. १।१।६। ९. १।१।७। १०. १।१।९। ११. १।३।५। १२. १।५।९। १३. १।८।२,३। १४. १।१६।२। १५. १।२२।२। १६. १।१२०।५; ऋ.प्रा. २।७२। १७. ४।५४, ५५। १८. १।१५। १९. २।६। २०. १।१८। २१. १।२०।

प्रोक्क्षामि[१] इति । एतदपवादाश् च तत्त्रैव— "वाहौ च स्स्वभूते"[२] इति प्प्रतिपादिताः । तदुदाहरणे च पष्ठौही[३] तुर्यौही[४] इति । तैत्तिरीय-प्रातिशाक्ख्ये च—"अथावर्णपूर्वे, इवर्णपर एकारम्, उवर्णपर ओकारम्"[५] इति । तैत्तिरीयशाखोदाहरणानि च प्रेयम्[६], प्रेक्क्षे[७], शमिष्ष्वेषम्[८], त्वोर्ज्जे[९], स्थोपायवः[१०], त्वोपस्थे[११], प्रोक्क्षिताः[१२], इति । ऋक्तन्त्रे च— "अस्स्थनामनी सन्ध्यम्"[१३] इति, उदाहरणानि च कौथुमसामवेदाऽऽर्चिकसंहितायाँ यथा एन्द्र[१४],तवेदु[१५], प्रप्प्राथोषाः[१६],एहि[१७], इत्थेतरा[१८], एमसि[१९], सुवीर्य्यस्स्येशे[२०], इन्द्रस्स्येव[२१], अप्प्रोषिवान्[२२], तवोतिभिः[२३], इति । तदपवादाश् च— "भाषायाण् णीपरयोः"[२४] इति, "उपसर्गादूहेष्ष्यौ प्रेष्ष्यार्थे"[२५] इति च प्प्रदर्शिताः । अपवादोदाहरणानि च— "स्वैरिणी, अक्क्षौहिणी, प्रौहः, उपौहः,प्रैष्ष्यः,उपैष्ष्यः" इति ऋक्तन्त्रवृत्तौ उक्तानि। शौनकीयचतुरद्ध्यायिकायाम् च—"अवर्णस्स्येवर्ण एकार उवर्ण ओकारः"[२६]इति । तदुदाहरणानि च शौनकिनासंहितायाँ यथा नेव[२७], एहि[२८], येनेन्द्रः[२९], तेनेमम्[३०], समोप्प्यात्[३१], अपोच्छतु[३२], चोदकस्स्य[३३], तन्न्वोपस्स्पृशत[३४] इति। पाणिनिमुनिरपि "आद् गुणः"[३५] इति। तदुदाहरणानि च कस्स्येदम्, ममेदम्,राजा सर्वस्स्येष्टे ब्राह्म्मणवर्ज्जम्, ममेप्सितम्, तवेप्सितम्, पुत्त्रेप्सितम्, जायेप्सितम्, बालिकेयम्, बालिकेङ्गितम्, बालिकेक्क्षते, तवोत्तरीयम्, तवोरू, त्वयोक्तम्, मयोक्तम्, गङ्गोदकम्, त्वदीयोर्मिका, मदीयोर्मिका, कम्बल्ल्योर्णा इति । तदपवादाश् च—"स्वादीरेरिणोः"[३६] इति पाणिनीयव्याकरणवार्तिककारेण प्प्रोक्ताः । तदुदाहरणानि च स्वैरम्,

---

१. २।१ । २. ४।५९ । ३. मा. वा. शु. य. म. ब्र. य. सं. १८।२७ । ४. तत्त्रैव १८।२६ । ५. १०।३–५ । ६. तै. सं. १।१।२ । ७. तत्त्रैव १।१।४ । ८. तत्त्रैव १।१।५ । ९. तत्त्रैव १।१।१ । १०. तत्त्रैव । ११. तत्त्रैव १।१।४ । १२. तत्त्रैव १।१।५ । १३. ३।४।४ । १४. १।१२९ । १५. २।१०२ । १६. १।३७९ । १७. १।७ । १८. तत्त्रैव । १९. १।१४ । २०. १।६० । २१. १।७८ । २२. १।३९ । २३. १।१०८ । २४. ऋ. त. ३।४।६ । २५. तत्त्रैव ३।४।७ । २६. ३।४४–४५ । २७. १।५।४ । २८. १।६।२ । २९. १।११।१ । ३०. तत्त्रैव । ३१. १।१५।३ । ३२. १।२१।२ । ३३. १।२४।२ । ३४. १।२५।४ । ३५. अष्टा. ६।१।८७ । ३६. पा. व्या. भा. ६।१।८९ वा. ५ ।

स्वैरी, स्वैरिणी इति । "प्रादूहोढोड्ढ्येषैष्येषु"[1] इति च । तदुदाहरणानि च—प्रौहः, प्रौढः, प्रौढिः, प्रैषः, प्रैष्यः, इति। तत्तर ईप उञ्छे, ईप गतिहिंसादर्शनेषु इति धात्वोस् तु प्रेषः, प्रेष्यः इति च तद्व्याख्यातारः। "अक्क्षादूहिन्न्यामुपसङ्ख्यानम्"[2] इति च, अक्क्षौहिणी इति च तदुदाहरणम् । "एत्त्येधत्त्यूठसु"[3] इति पाणिनिः । तत्तर गुणापवादोदाहरणानि च—दात्त्यौहः, पाष्ठौहः, प्रौहः, तुर्यौही, दित्त्यौही, पष्ठौही, पाष्ठौही इति ॥२७–२८॥

हलीषा लाङ्गलीषा च शब्दा येऽन्न्येऽपि चेदृशाः ।
तेष्ववर्णादिकारादौ परे त्वीकार इष्यते ॥२९॥

लाङ्गलेषेत्त्यपि दृश्यते ॥२९॥

(घ) सन्ध्यक्क्षरीभावाभावेऽपि गुणसन्धित्त्वेन प्रसिद्धस्य सन्धिविशेषस्य निरूपणम्

ऋवर्णे त्वर् क्व चित् स्याच् च लृवर्णेऽल् च भवत्त्यपि ।
उपसर्गाकारतस् त्वार् क्व चिद् धातुऋकारके ॥३०॥
ऋते तृतीयासमासे प्रादिब्भ्यश् च ऋणे परे ।
नामधातुऋकारे तु स्यादर् चाऽऽपिशलेर् मते ॥३१॥

पदान्तस्स्थाद् अवर्णाद् ऋवर्णे परे ऋग्वेदसंहितायां शुक्लयजुर्वेदसंहितायाञ् च पूर्वपरयोः अर् न भवति । ऋग्वेदशुक्लयजुर्वेदब्राह्मणेषु तु अर् भवति । अतऽ क्व चिद् अर् स्यादित्त्युक्तम् । पाणिनिना तु लाघविकेन नाऽयवँ विशेषऽ प्रोक्तः, तथाऽपि शाकल्यस्य मते ह्रस्स्वत्त्वम् प्रकृतिभावञ् च प्रतिपादयताऽस्स्फुटतया सूचितः । कात्त्यायन–पतञ्जलिब्भ्यान् तु वार्तिके भाष्ये च विवेकेन प्रतिपादनीयोऽप्ययवँ विषयऽ प्रमादाद् आलस्याद् वाऽपि न तथा प्रतिपादितः। तत्तर ऋग्वेदप्रातिशाख्येऽयमर्विधिर् नास्त्येव, तथैव शुक्लयजुर्वेदप्रातिशाख्येऽपि । तथाऽपि ऐतरेयब्राह्मणे 'अर्धर्चशः'[4] इत्त्यादौ, ऐतरेयारण्यके 'शतर्चिनः'[5] 'अर्धर्चः'[6] इत्त्यादौ, शाङ्खायनब्राह्मणे 'अर्धर्चशः'[7] 'अर्धर्चः'[8] इत्त्यादौ, मा.शतपथब्राह्मणे[9] च 'देवतर्चः' 'यज्जँनेर्गग्भिः', 'पञ्चर्त्तवः', 'षदेवर्त्तवः', 'सप्तर्षीनु हवै पुरर्क्क्षा इत्त्याचक्क्षते', 'हर्तीयमाने', 'नर्त्ते यूपात्', 'योषर्ग्घोता', 'एकयर्च्-

---

१. पा. व्या. भा. ६।१।८९ वा. ४ । २. तत्तरैव, वा. ३ । ३. अष्टा. ६।१।८९ । ४. १३।८ । ५. २।२।१; २।२।२ । ६. २।२।२ । ७. ११।१ । ८. २८।७ । ९. १।७।२।२०, १।९।१।३, २।१।१।१३, २।१।२।४, ३।६।२।३, ३।७।३।२, ४।३।२।३, ५।५।५।१५, ६।६।१।१४, ६।७।३।८ ।

चापि', 'सप्तर्त्तवः सवँ वत्सरः', 'वारुण्यर्च्चा' इत्यादिषु; "यत्किञ्चरत्तुषु"[१] "यत्किञ्चरत्तसत्याब्भ्याम्"[२] "तथर्षीणाम्"[३] "यथर्तुम् प्राप्य"[४] इत्यादिषु च अर्भादष पठ्यते । शतपथस्यायवँ विशेषो भाषिकसूत्रे "कण्ठ्यस्स्वरोऽर् ऋत्सवर्णे"[५] इति प्रतिपादितः । मैत्रायणीयसंहितायान् तु— "अर्धऋचः"[६] इत्येव पठ्यते; काठकसंहितायामपि "अर्धऋचैः"[७] इति पठ्यते । माध्यन्दिनीयसंहितायामप्येवमेव[८] । अर्भावविषये प्राचावँ वचनानि च यथा तैत्तिरीयप्रातिशाख्ये— "अरमृकारपरे"[९] इति, तदुदाहरणानि च अर्धर्चः[१०], आग्नेय्यर्चा[११], त्वर्तुना[१२], चर्तम्[१३] इति तैत्तिरीयशाखायां संहिताभागेऽपि प्राप्यन्ते । ऋक्तन्त्रे च— "विकारः, सस्थानः" इत्यनुवर्तमाने "ह्रस्स्वमृवि ऋमप्येके"[१४] इति । तद्वृत्तौ उदाहरणानि तु 'अष्टर्च्चम्, नवर्च्चम्, दशर्च्चम्, शाकलर्च्चम्, मालर्च्चम्; मन्त्रे[१५] सहर्षभाः' इति समासविषये एव प्रदर्शितानि । कौथुमसामवेदसंहितायाम्— "महन्न ऋतेकर्म्मम् (महन्ना ऋतेकर्म्मम्)"[१६] इत्यपि पठ्यते । ऋक्तन्त्रे— "(स)मासे (दीर्)घमृति"[१७] इत्यपि सूत्रम् । तदुदाहरणानि च वृत्तौ मशकार्त्तः, शीतार्त्तः, भयार्त्तः, दण्डार्त्तः इति । एतत्युदाहरणञ् च मशक इति मशकमामन्त्र्य ऋतम् पश्य मशकर्तम्, मशकऋतम् इति । शौनकीयचतुरद्ध्यायिकायाञ् च— "अरमृवर्णे, उपर्षन्त्यादिषु च"[१८] इति । तदुदाहरणे च यज्ज्वर्तः[१९] इति तस्स्यर्षभस्स्य[२०] इति च वृत्तिकारो निर्दिशति । सप्तर्षयः[२१], ऋतस्स्यर्तेन[२२], इवर्भुः[२३], सर्चाम्[२४], इत्यादीन्यप्युदाहरणानि शौनक्क्यथर्ववेदसंहितायाम् प्राप्यन्ते । 'सप्तऋषयः'[२५] इति 'सपत्नह ऋक्संशितः'[२६] इति च तत्र मुद्रितपाठे प्राप्यते । शौनकीयचतु-

---

१. मा. ११।२।७।२ । २. मा. ११।२।७।६ । ३. मा. १४।४।२।२१ । ४. का. १।१।३।७ । ५. ३।११ । ६. ३।२।८।२ । ७. २१।२।१४ । ८. १९।२५ । ९. १०।८ । १०. १।६।१०।५ । ११. ३।१।६।१ । १२. ७।१।१८ । १३. १।६।१०।५ । १४. ३।५।१, २ । १५. आरण्यक. ४२ । १६. १७८४। १७. ऋक्तन्त्रे ३।५।२१। १८. ३।४६,४७। १९. शौ. अ. सं. ८।१०।४ । २०. तत्रैव ९।४।११ । २१. ४।११।९,५।१७।६ इ. २२. ६।११४।१ । २३. १०।१।८ । २४. १०।८।१० । २५. ४।११।९ । २६. १०।५।३० ।

रद्ध्यायिका च नाऽस्स्य पाठस्स्याऽनुकूला । अतस्तर समाधान शौनकिभिरभिमुक्तत्तमैः कार्यम् । पाणिनिना तु — "आद् गुणः"[1] "ऊरण् रपरः"[2] "ऋत्यकः"[3] इति सूत्रैरयवं विषयस् सङ्क्षेपेण प्रतिपादितः । पदान्तस्स्याद् अवर्णाद् लवर्णे परे पूर्वपरयोरल् भवति । एतस्स्य नियमस्स्योदाहरणानि तु वेदेषु न प्राप्यन्ते । "ऋकारल्कारौ"[4] इति ऋग्वेदप्रातिशाख्ये, "ऋकारल्कारौ ह्रस्स्वौ"[5] इति, "ऋकारल्कारेषु"[6] इति च तैत्तिरीयप्रातिशाख्ये उदाहरणानि प्राप्यन्ते । वेदेषूदाहरणाऽनुपलम्भात् प्रातिशाख्येषु अयन् नियम लृकारविषयको नैव प्रतिपादितः । पाणिनिनाऽप्ययन् नियम उपेक्षितः पूर्वोक्तेनैव हेतुनेति सम्भाव्यते । पाणिनीयव्याकरणभाष्यकारेण तु पूर्वोक्तविधान् प्रयोगान् सम्भाव्य "लृकारस्स्य लपरत्वव् वक्ष्यामि, तच्चाऽवश्यवं वक्तव्यमसत्यां सवर्णसञ्ज्ञायावं विद्ध्यर्थम्, तदेव सत्यां रेफबाधनार्थम् भविष्यति"[7] इत्युक्त्वाऽयवं विषयः प्रोक्तः ।

उपसर्गाकारतो धातुऋकारे परे तैत्तिरीयाणां शौनकिनाञ् च वेदे पूर्वपरयोः आर् भवति; 'आ' इत्युपसर्गाद् ऋकारे परे शुक्लयजुर्वेदेऽपि आर् भवति । ऋग्वेदे तु नास्स्य नियमस्स्याऽवसरः । अतो न ऋग्वेदप्रातिशाख्येऽयन् नियमः प्रतिपादितः । तथाऽपि ऐतरेयब्राह्मणे तु आर्ति-(आ+ऋति-)प्रातिपदिकस्स्य तु प्रयोगाः प्राप्यन्ते[8] । शुक्लयजुर्वेदप्रातिशाख्ये तु— "आरमृकारोऽपृक्तात्"[9] इत्येवोक्तम् । तदुदाहरणञ् च भाष्ये आर्त्त्यै[10] इत्येव प्रदर्शितम् । माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेदमन्त्रसंहितायाम् "अवऋत्यै"[11] इति पठ्यते । मा. वा. शतपथब्राह्मणे तु आर्च्छति[12], आर्च्छन्ति[13], आर्च्छेत्[14] इति प्रयोगाः प्राप्यन्ते । तैत्तिरीयप्रातिशाख्ये तु— "उपसर्गपूर्व आरम्"[15] इति । तदुदाहरणञ् च उपार्च्छति[16] इत्युक्तम् भाष्ये । आर्च्छति[17] इति, आर्च्छन्ति[18] इति, आर्च्छेत्[19] इति,

---

१. अष्टा. ६।१।८७ । २. तत्तैव १।१।५१ ।
३. तत्तैव ६।१।१२८ । ४. १।४१ । ५. १।३१ ६. २।१८ ।
७. १।१।९ । ८. १।३, ९।७ इ. । ९. ४।६० ।
१०. शु. य. प्रा. उ. भा. ४।६० । ११. ३०।१२ ।
१२. ४।५।७।७ । १३. ८।७।२।१८ । १४. १।५।१।२ ।
१५. १०।९। १६. तै.सं. १।५।९।६। १७. तत्तैव १।५।२।५ इ.।
१८. तत्तैव ३।१।३।२ इ. । १९. तत्तैव २।८।८।२ इ. ।

आर्च्छेयुः[1] इति च प्रयोगास् तैत्तिरीयसंहितायामुपलब्ध्यन्ते। एतानि उदाहरणानि मैत्रायणीय-संहितायाङ्[2] काठक-(चरक-) संहितायाङ्[3] कपिष्ठलकठसंहितायाम्[4] च प्रायेण प्राप्यन्ते। तैत्तिरीयब्राह्मणेऽप्येवम्[5]। तैत्तिरीयारण्यके आर्च्छतु[6] इति आर्च्छन्तु[7] इति च प्रयोगौ प्राप्येते। ऋक्तन्त्रे तु— "(स)मासे (दीर्-)घमृति; मक्रियायाम्, उपसर्गस् सामर्थ्ये; वत्सतरादीनामृणि"[8] इति पठ्यते। तदुदाहरणानि च मशकार्तः, मार्नीयमानम्, प्रार्च्च(छ ?)ति, वत्सतरार्णम् इत्यादीनि वृत्तौ दत्तानि। एतान्न्युदाहरणानि अवैदिकानि प्रतीयन्ते। शौनकीयचतुरद्ध्यायिकायाम् च—"उपसर्गस्य धात्वादावारम्"[9] इति पठ्यते। आर्च्छतु इति प्रयोगश् शौनकिनां संहितायाम् प्राप्यते च[10]। किन् तु तद्विरुद्धमुपर्षन्ति[11] इति रूपम् च तत्र प्रयुक्तन् दृश्यतेऽन्न्वाख्यातम् च तच् शौनकीयचतुरद्ध्यायिकायामिति[12] च पूर्वमेवोक्तम्। पैप्पलादसंहितायान् तु उपऋषन्ति[13] इति पठ्यते। तत्रैव प्रार्द्ध्नुवन्ति[14] इत्यपि पठ्यते। पाणिनिनाऽपि—"उपसर्गादृति धातौ"[15] इति सूत्रेणाऽयवँ विषयः प्रतिपादितः। तदुदाहरणानि च वृत्तिकारेण उपार्च्छति प्रार्च्छति उपार्द्ध्नोति इति उपन्न्यस्तानि। पाणिनीयव्याकरणवार्त्तिककारेण च— "एत्येधत्यूठसु"[16] इति सूत्रस्य व्याख्याने "ऋते च तृतीयासमासे"[17] इति "प्रवत्सतरकम्बलवसनानाम् चर्णे"[18] इति, "ऋणदशाब्भ्याम् च"[19] इति च वदताऽस्मिन् विषये ऋक्तन्त्राऽनुगमनमिव कृतम्। किन् तु ऋक्तन्त्रे माशब्दात् क्रियावाचकपदस्याऽऽदौ वर्त्तमाने ऋकारे परे आर् विहितोऽत्र तु नेति वार्त्तिककारवचने न्यूनता प्रतीयते। यद्द्यपि ऋक्तन्त्रम् प्रातिशाख्यमिति प्रसिद्धन् तथापि तत्र "भाषायाम्"[20]

---

१. तै. सं. ३।१।३।२ इ.। २. १।८।३।७, ४।२।१०, १।८।८, ४।८।९। ३. ७।६, २१।६, १२।७, ३०।५। ४. ५।८; ३०।४, ५। ५. ३।७।१।६, १।२।३।२, १।२।३।१। ६. ४।३०।१, ४।३४।१। ७. ४।३४।१। ८. ३।५।३-६। ९. ३।४८। १०. २।१२।५। ११. ९।१३।१४-१६। १२. ३।४७। १३. १६।७५।४-६। १४. २।५७।३। १५. अष्टा. ६।१।९१। १६. अष्टा. ६।१।८९। १७. पा.व्या.भा. ६।१।८९ वा. ६। १८. तत्रैव, वा. ७। १९. तत्रैव, वा. ९। २०. ३।४।६, ४।७।८।

इत्युक्त्वाऽपि विषयाऽप्रतिपादिता इति, उपर्युल्लिखितम् प्रकरणञ्च 'भाषायाम्' इति वचनस्याऽभावेऽपि भाषायामपि प्रवर्तमानम् प्रतीयत एवेति बोद्धव्यम्। नामधातुऋकारे परे आपिशलेर् मते आर्भावोऽर्भावश्च पाणिनिना "वा सुप्यापिशलेः"[1] इति सूत्रेण प्रतिपादितः। तदुदाहरणतया च प्रार्षभीयति, प्रर्षभीयति; उपाल्कारीयति, उपल्कारीयति इति च वृत्तिकारेण प्रोक्तम् ॥२९-३०॥

(ङ) वृद्धिसन्धितदपवादनिरूपणम्

आदेकारैकारयोरैरोकारौकारयोस् तु औः।
उपसर्गाकारतस् तु धात्वेकारे तु एर् भवेत् ॥३१॥
नामधात्वेकारके तु ऐश् चाऽप्यापिशलेर् मते।
धातोरोकारके ओर् हि नामधातोस् तु औरपि ॥३२॥
एत्येधत्योस् तु एकारे नित्यमैकार इष्यते।
अवर्णादोमि चाऽऽङि स्याद् द्वयोस् स्थाने परस् स्वरः ॥३३॥
अनियोगार्थके एवे आदेकारस् सदैव हि।
ओत्वोष्ठयोस् समासे वाऽवर्णादोकार इष्यते ॥३४॥

पदान्तस्थाद् अवर्णाद् एकारे ऐकारे च परे पूर्वपरयोरेक ऐर् भवति, ओकारे च परे एक और् भवति। तथाहि ऋग्वेदप्रातिशाख्ये— "परेष्वैकारमोजयोः, औकारयं युग्मयोः"[2] इति; तदुदाहरणानि च तद्व्याख्यातृप्रदर्शितानि यथा— ऐनम्[3], परैत्[4], यत्तरौषधीः[5], प्रौक्षन्[6] इति। एतस्य नियमस्याऽपवादाश् च दशोणये[7], दशोण्ये[8], यथोहिषे[9], यथोचिषे[10], दशोणिम्[11], रथोढः[12] इति तत्तरोल्लिखिताः। शुक्लयजुर्वेदप्रातिशाख्येऽपि—"सन्ध्यक्षर ऐकारौकारौ"[13] इति। तदुदाहरणानि च— स्वाहैकशताय[14] इन्द्रायैन्द्रम्[15] इन्द्रौजिष्ठः[16] प्रौक्षन्[17] इति। एतदपवादास् समुद्द्रस्स्येमन्[18] त्वेमन्[19] त्वोद्द्मन्[20] इति तत्तर परिगणिताः। तथाहि— "समुद्द्रस्स्येमंस्तत्वेमंस्तत्वोद्द्मन्निति"[21]

---

१. अष्टा. ६।१।९२। २. २।१८, १९। ३. १०।६१।८। ४. १।१३२।१। ५. १०।९७।६। ६. १०।९०।७। ७. ६।२०।४। ८. ८।५२।२। ९. ८।५।३। १०. ८।८२।२। ११. ६।२०।८। १२. १०।१४८।३। १३. ४।५८। १४. २२।३४। १५. १९।१८। १६. ८।३९। १७. ३१।९। १८. १३।१७। १९. १३।५३। २०. तत्तरैव। २१. ४।५५।

इति। एजति इति ओजः इति च परे काण्वानामाम्नाये तु नेजति[1] सहोजः[2] इत्यादिषु नाऽयन् नियमः प्रवर्तते, किन् तु यथायथम् एकार ओकारो वा भवति। सम्पूर्णाननदसंस्कृतविशश्वविद्द्यालयमुद्द्रितपाठस् तु प्रातिशाख्यतद्व्याख्यानाननुकूल एव। माध्यन्दिनीयानामाम्नाये तु यथान्यायमेव भवतीत्यपि "एजत्यओजो(जसोः?)रेकेषाम्"[3] इत्यनेनोक्तम्। यद्द्यपि सामपदकारेण सहः+जाः[4] इति पदच्छेदो दर्शितस् तथापि माध्यन्दिनीयैस् सहौजः[5] इत्येवाधीयते इति नाऽत्तर स प्रवर्तते। तैत्तिरीयप्रातिशाख्येऽपि— "एकारैकारपर ऐकारम्, ओकारौकारपर औकारम्"[6] इति प्रोक्तम्। तदुदाहरणानि च पृच्यस्स्वैकताय[7] सोमैन्द्राः[8] ब्रह्मौदनम्[9] अपौम्भन्[10] इति तद्व्याख्यातृभिरुल्लिखितानि। एतन्नियमाऽपवादाश् च— "एष्टरेतनेमन्नोद्द्मन्नोष्ठेवपरो(ऽकारः पदान्तस्थो) लुप्यते"[11] इति प्रतिपादिताः। तदुदाहरणानि च— अशीयेष्टा रायः[12], उपेतन[13], अपान्त्वेमन्, अपान्त्वोद्द्मन्[14], स्वाहोष्ठाब्भ्याम्[16], अधरेणोष्ठेन[17], अमिमतेवश् चन्द्रः[18] इति व्याख्यातृभिरुल्लिखितानि। ऋक्तन्त्रे च— "सन्ध्यन् द्विवर्णम्"[19] इति। तदुदाहरणानि च— परैतु[20] कृणुतैकम्[21] त्वौऽ३होऽ३[22] परैरयत्[23] अमितौजाः[24] इति तद्वृत्तिकारोक्तानि। तदपवादाश् च— "सन्ध्ये परं सामर्थ्ये"[25] इति प्रोक्ताः। तदुदाहरणानि च— प्रोढीयति, प्रोजयति, प्रेषयति, प्रोषितः इति; प्रत्युदाहरणे च राजौढीयति, औढीयति इति वृत्तिकार उल्लिखति। तथैव "समासे"[26] इत्यप्प्यन्न्येऽपवादाः प्रतिपादिताः। तदुदाहरणानि च कोमित्त्यवोचत्, सोमित्त्यवोचत्, ब्रह्मोमित्त्यवोचत्, समोहम्, विषमोहम्, दुःखोहम्, समोलः, विषमोलः, दुःखोलः, समोष्ठी, विषमोष्ठी, बिम्बोष्ठी,

---

१. ४।१।५। २. ३६।१।१। ३. ४।५।७। ४. २।१२०६। ५. ३६।१। ६. १०।६,७। ७. तै.स. १।१।८। ८. तत्तैव ५।६।१५। ९. तत्तैव ५।७।३।४। १०. तत्तैव २।४।१३।१। ११. १०।१४। १२. तै. सं. १।२।११।१। १३. तत्तैव ३।१।४।३। १४. तत्तैव ४।३।१। १५. तत्तैव। १६. तत्तैव ७।३।१६।१। १७. तत्तैव ५।७।१२। १८. तत्तैव ५।३।५।४। १९. ३।४।५। २०. कौ. सा. सं. १।५६। २१. आरण्यसं. ६। २२. कौ. सामगानसं. १।३२०। २३. कौ. सा. सं. १।३३९। २४. तत्तैव १।३५९। २५. ३।४।८। २६. ३।४।९।

समोकः, विषमोकः, दुःखोकः, जलोकः इति; प्रत्युदाहरणे च अजौतुम् भक्ष्यति, उपौष्ठबद्धनी वडवा इति च वृत्तिकार उल्लिखति। तत्र "न वा"[1] इति चाऽपवादानां 'समासे' इति प्रतिपादितानावँ वैकल्पिकत्वम् प्रोक्तम्। शौनकीयचतुरद्ध्यायिकायाञ् च— "एकारैकारयोरैकारः, ओकारौकारयोरौकारः"[2] इत्युक्तम्; तदुदाहरणानि चास्माभिश् शौनकिनामथर्ववेदमन्त्रसंहितायाम् इहैव[3] चक्क्षुषंक्क्षत[4], राद्ध्यमानस्यौदनस्य[5], पक्तौदनस्य[6], प्रौक्ष्वन्[7], मौदुम्बरः[8] इत्यादीनि; पैप्पलादानामाम्नाये च अवैतु[9], मैनम्[10], कृप्णैका[11], यमयौषधे[12], त्वौजसे[13], अस्यौषधीषु[14], इत्यादीनि दृष्टानि। तदपवादाश् च शकल्येषि[15] उपेतन[16], उपेषतु[17], उपेषन्तम्[18], उपेयिम[19] इत्यादयश् "शकल्येष्प्यादिषु पररूपम्"[20] इति सूत्रेण सूचिताः। पाणिनिमुनिनाऽपि— "वृद्धिरेचि"[21] इति सूत्रेणाऽयवँ विषयः प्रतिपादितः। एतदपवादाश् च— "एङि पररूपम्, वा सुप्प्यापिशलेः"[22] इति, "ओमाङोश् च"[23] इति च प्प्रतिपादिताः। अपवादोदाहरणानि च— प्रेरयति, प्रोषति; उपेडकीयति, उपैडकीयति; उपोदनीयति, उपौदनीयति; कोमित्त्यवोचत्, योमित्त्यवोचत् अद्द्चोढा, कदोढा इत्यादीनि यथायथम् बोद्ध्यानि। तत्प्रतिप्प्रसवश् च— "एत्त्येधत्प्यूठसु"[24] इति तेनैवोक्तः। प्रतिप्प्रसवोदाहरणे च उपैति प्रैधते इति बोद्ध्ये। पाणिनीयव्याकरणवार्तिककारेणाऽपि अन्त्ये वृद्ध्यपवादा "एवे चाऽनियोगे (पररूपवँ वक्तव्यम्)"[25] इति, "ओत्त्वोष्ठयोस् समासे वा"[26] इति, "एमनादिषु च्छन्दसि"[27] इति च प्प्रतिपादिताः ॥३१-३४॥

---

१. ३।४।१०। २. ३।५०, ५१। ३. १।१।३। ४. १३।३।६। ५. ११।३।११। ६. ११।१।७। ७. १९।६।११। ८. १९।३१।७। ९. १।५।४। १०. १।१२।१, ४। ११. १।२१।२। १२. १।३८।४। १३. १।५४।४। १४. १।७०।२। १५. शौ.अ.वे.सं. १।२५।२। १६. तत्त्रैव ३।१४।३। १७. तत्त्रैव ६।६७।३। १८. तत्त्रैव ८।६।१७। १९. तत्त्रैव १०।१।१०। २०. शौ. च. ३।५२। २१. अष्टा. ६।१।८८। २२. तत्त्रैव ६।१।९४, ६।१।९२। २३. तत्त्रैव ६।१।९५। २४. तत्त्रैव ६।१।८९। २५. पा. व्या. भा. ६।१।९४, वा. ३। २६. तत्त्रैव, वा. ५। २७. तत्त्रैव, वा. ६।

त्वेमनाद्द्चा दशोण्ण्याद्द्चाश् शब्दा शुद्धोदनादयः ।
ये तेष्ववर्णादेकारे वौकारे स्स्यात् परस् स्वरः ॥३५॥

त्वेमनादिकेषु शब्देषु यथायथवँ वेदे लोके च एकारभावस्स्य ओकारभावस्स्य चापवाद एकारभाव ओकारभावश् च दृश्यते । स चानेन श्लोकेन सङ्गृहीतः । तत्र वैदिका अपवादाः पूर्वश्लोकव्याख्याने एव सङ्गृहीताः; लौकिकास् तु शुद्धोदन–जलोक–वनोकादयश् शिष्टप्रयोगतोऽनुसर्तव्याः ॥३५॥

दीर्घोऽवर्णस् तु ह्रस्स्वस् स्यादृकारे परतस् स्थिते ।
ऋग्वेदादिष्वेव वेदे लोके वाऽपि समासके ॥३६॥

तदुक्तमृग्वेदप्रातिशाख्ये— "ऋकार उदये कण्ठ्यावकारन् तदुद्ग्राहवत्"[1] इति । तदुदाहरणानि च ऋग्वेदे यथा— पुर ऋतोः[2], यथ ऋतवः[3] मधुन ऋतस्स्य[4] इति । नेष्ट ऋत्विजाम्[5] इति शाङ्खायनब्राह्मणे । शुक्लयजुर्वेदप्रातिशाख्ये च— "कण्ठ्य ऋकारे ह्रस्स्वम्"[6] इति । तदुदाहरणानि च विश्श्वकर्म्म ऋषिः[7] स्वाह ऋषभम्[8], तथ ऋतुः[9] इत्यादीनि बोद्ध्यानि । तैत्तिरीयप्रातिशाख्ये तु नाऽयवँ विधिरुपलब्ध्यते; तत्र तु— "अरमृकारपरे"[10] इत्येव प्राप्यते । तैत्तिरीयसंहितायामपि—"त्वर्तुना"[11] इत्येव दृश्यते । मैत्रायणीयसंहितायान् तथा काठकसंहितायान् तु कृष्णयजुर्वेदेऽपि न तैत्तिरीयप्रातिशाख्योक्तम् प्रवर्तते, अर्धऋचः[12], अर्धऋचैः[13] इत्यादीनामुपलब्ध्यमानत्वात् । ऋक्तन्त्रे च— "ह्रस्स्वमृचि, ऋमप्यके"[14] इति पठ्यते । कौथुमाश् च— 'मह्न ऋतेकर्मम्"[15] इत्यधीयते । शौनकीयचतुरद्ध्यायिकायान् तु नोपलब्ध्यतेऽयवँ विधिः । शौनकिनस् तु 'स्राक्त्येन मणिन ऋषिणेव मनीषिणा'[16] इत्यधीयते । अत्र प्रातिशाख्यस्स्य चरितार्थत्वाचरितार्थत्वे शौनकिभिरन्यैश् च वैदिकैर् भृशवँ विचारणीये । पाणिनिना तु लाघविकेन "ऋत्यकः"[17] इत्युक्त्वा वेदलोकसाधारणतया वैकल्पिकत्वेनाऽयवँ विधिः प्रोक्तः । पाणिनीयव्याकरणवार्तिककारभाष्यकाराब्ध्यामपि प्रमादाद् आलस्स्याद् वाऽपि

---

१. २।३२ । २. २।२८।५ । ३. १०।१८।६ ।
४. १०।६८।४। ५. २८।३। ६. ४।५० । ७. १३।५८।
८. २१।४० । ९. २५।४२ । १०. १०।८ । ११. ७।१।१८।
१२. मै. सं. ३।२।८।२। १३. का. २१।२।१४। १४. ३।५।१–२।
१५. १७८४ । १६. ८।५।८ । १७. अष्टा. ६।१।१२८ ।

यद्द्यपि विषयविभागो न प्रदर्शितस् तथाऽपि वेदे उक्तरीत्या व्यवस्थितो विषयविभागो द्रष्टव्यः । लोके तु इच्छाविकल्पः । उदाहरणानि तु लोके 'पित ऋणङ कुरुते, पितर्णङ कुरुते इत्यसमासे, यथऋतु भोजनङ कार्यम्, यथर्तु भोजनङ कारयम् इति समासे द्रष्टव्यानि । ऋलृवर्णयोस् सावर्ण्याल् लोके लृकारेऽप्ययवँ विधिꣳ प्रवर्तते. उदाहरणञ्च 'स्वस लृतक३ इत्याह' इत्यादिकम् बोद्धव्यम् । ३६॥

(च) वर्षप्रसन्धि-(यण्सन्धि-)निरूपणम्

इकारस्य यकारस् स्यादसवर्णे स्वरे परे ।
उकारस्य वकारश् च ऋकारस्य तु रेफकः ॥३७॥
लृकारस्य लकारस् स्यात् वर्षप्रसन्धिरयं स्मृतः ।
पदान्ते न लृकारोऽस्ति स्याद् वाऽनुकरणे क्व चित् ॥३८॥

तदुक्तमृग्वेदप्रातिशाख्ये— "समानाक्षरमन्तस्था स्वामकण्ठ्य स्वरोदयम्, न समानाक्षरे स्त्रेस्स्वे, ते क्वर्षप्राꣳ प्राकृतोदयाः"[1] इति । तदुदाहरणानि च— दद्ध्याशिरः[2], युञ्जन्त्यस्य[3], मक्षिण्वत्था[4], विशन्त्वाशवः[5] इत्यादीनि शाकलऋग्वेदमन्त्रसंहितायाम् । ऋकारलृकारोदाहरणानि तत्र न प्राप्यन्ते । शुक्लयजुर्वेदप्रातिशाख्येऽपि— "स्वरे भाव्यन्तस्त्थाम्"[6] इति, तदुदाहरणानि च— पृथिव्यसि[7], उर्वन्तरिक्षम्[8], अनन्वेमि[9] इत्यादीनि माध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदमन्त्रब्राह्मयजुस्संहितायाम् । ऋकारलृकारोदाहरणानि तु तत्राऽपि नोपलभ्यन्ते । ऋकारोदाहरणानि माध्यन्दिनीयशतपथब्राह्मणे द्रष्टव्यानि, श्रोत्रमतम्, मन्त्रविज्जातम्, विज्जातत्रेतत्[10] इति प्राप्यन्ते । काण्वबृहदारण्यकोपनिषदि चैतानि उदाहरणानि उपलभ्यन्ते[11] । एतेन हिवट्निना[12] तदनुयायिना सूर्यकान्तेन[13] च 'वेदेषु पदान्तस्थ ऋकारो न कुत्राऽपि प्राप्यते' इति यदुक्तन् तद् वितथमिति स्फुटम् । तैत्तिरीयप्रातिशाख्ये तु "इवर्णोकारौ यवकारौ"[14] इत्येवोक्तम्, ऋलृवर्णयोरुल्लेख एवास्मिन् प्रसङ्गे न कृतः । उदाहरणानि च सम्भराम्यदित्यै[15], पृथिव्यसि[16] उर्व-

---

१. २।२१ । २. १।५।५। ३. १।६।२। ४. १।२।६ । ५. १।५।७ । ६. ४।४७ । ८. १।२ । ८. १।७ । ९. १।७ । १०. १४।६।८।११ । ११. ३।८।११ । १२. शौ. च. टि. ३।३९ । १३. ऋक्तन्त्रटिप्पणीषु, टि. १०९, पृ. ३९ । १४. १०।१५ । १५. १।१।२ । १६. १।१।३।

वन्तरिक्क्षम्[१] अन्न्विहि[२], इत्त्यादीनि तैत्तिरीयसंहितायामुपलब्ध्यन्ते । ऋक्तन्त्रेऽपि— 'रम् ऋस्थमस्स्वे, ह्रस्स्वमेके, अन्तस्स्थाम्''[३] इति । तदुदाहरणानि च वृत्तिकारेण होत्त्रत्त्र, पित्त्रत्त्र, मात्त्रत्त्र, अबोद्ध्यग्निः[४], अक्तुपुष्वायमत[५] इत्त्यादीनि उपन्न्यस्तानि । तत्त्र ऋकारोदाहरणानि तेन कल्पितानि न स्स्वशाखावेदादुद्धृतानीति प्प्रतीयते । शौनकीयचतुरद्ध्यायिकायाञ् च— ''स्वरे नामिनोऽन्तस्स्था''[६] इति । तदुदाहरणानि च यन्त्यद्ध्वभिः[७], हिन्न्वन्त्वद्ध्वरम्[८], विड्ड्विहि[९] इत्त्यादीनि पैप्पलादानाम् मन्त्रसंहितायाम् प्राप्प्यन्ते । वृत्तिकारेण तु स्वकल्पितान्न्येवोदाहरणानि उपन्न्यस्तानि । तत्त्र स मात्त्रर्थम् पित्त्रर्थम् इति ऋकारोदाहरणे आह । यत् तु 'अथर्त्वप्रातिशाक्ख्ये ऋक्तन्त्रे च क्वैप्प्रसञ्ज्जकसन्धेर् न च नामनिर्देशः कृतोऽस्ति न वा नियमोल्लेख एवाऽपि प्राप्प्यते' इति उक्तन्[१०] तद् वितथमिति उपर्य्युद्धृतैर् ऋक्तन्त्रादिसूत्त्रैस् स्फुटम् बोद्धुं शक्क्यम् । पाणिनीयव्याकरणेऽपि— ''इको यणचि''[११] इति । तत्त्रान्न्येषामुदाहरणानि प्राक् प्रदर्शितान्न्येव । लृकारोदाहरणलँ लाकृतिरिति काशिकाकारेणोपन्न्यस्तम् । माणवकोऽमतम् मन्त्लीत्त्याहेत्त्यादावपि लृकारस्स्य पदान्तस्स्थता कल्पयितुं शक्क्या । लृकारे परे क्वैप्प्रसन्धेरुदाहरणानि च 'अस्त्यलृकारोपदेशस्स्य', 'अस्स्य ह्यलृकारस्स्य', 'दद्ध्यलृतकाय देहि' 'मद्ध्ल्लृतकाय देहि' 'ब्राह्म्मण्य्लृतक इत्त्याह', 'कुमार्य्लृतक इत्त्याह' इति पाणिनीयव्याकरणभाष्ये प्राप्प्यन्ते[१२] ॥३७–३८॥

(छ) सन्ध्यक्क्षरविकारसन्धिनिरूपणम् (अयवायावः)–

अय् स्यादेकारस्स्य स्वरे शाकल्त्यस्स्य मतेऽत्त्र तु ।
यो लुप्तोऽथो लघुतरश् शाकटायनसम्मतौ ॥३९॥
आय् त्वैकारस्स्य यस् स्याद् वा लुप्तो लघुतरोऽपि वा ।
अवोकारस्स्य वोऽपि स्स्याल् लुप्तो लघुतरोऽथ वा ॥४०॥
आवौकारस्स्याऽत्त्र विधिर् वस्स्य च स्स्याद् धि पूर्ववत् ।
श्रुतावेते च लोपादिविकल्पास् स्युर् व्यवस्थिताः ॥४१॥

---

१. १।१।२ । २. १।१।२ । ३. ३।५।७–९ (१०७–१०९) । ४. कौ. सा. सं. १।७३ । ५. तत्त्रैव १।१२८ । ६. ३।३९ । ७. १।२।१ । ८. १।२।२ । ९. १।३।२ । १०. प्रा. प्र. पा. श. आ. अ., पृ. १३० । ११. अष्टा. ६।१।७७ । १२. 'ऋलृक्' इत्त्यत्त्र ।

तदुक्तमृग्वेदप्रातिशाख्ये—"उत्तमौ च द्द्वौ स्वरौ"[1] इति, "पूर्वौ चोपोत्तमात् स्वरौ"[2] इति, "ओष्ठ्ययोर्न्योर् भुग्नमनोष्ठ्ये, वकारोऽत्तरान्तरागमः"[3] इति च। तदुदाहरणानि च ऋग्वेदशाकलमन्त्रसंहितायाम् अग्न आगहि[4], यज्ञ उपह्वये[5], तस्मा इन्द्राय[6], वायवायाहि[7] वायविन्द्रश् च[8], वाय उक्थेभिः[9], तावायातम्[10], मित्तरावरुणावृतावृधौ[11], तुविजाता उरुक्क्षया[12] इत्यादीनि बोद्ध्यानि। एवञ् च शाकलऋग्वेदे पदान्तस्स्थस्य यकारस्य स्वरे परे नित्यलं लोपः, वकारस्य तु तादृशस्य ओष्ठ्ये स्वरे परे लोपोऽन्यत्तराऽलोप इति च विज्ञायते। शुक्लयजुर्वेदप्रातिशाख्ये च— "सन्ध्यक्क्षरमयवायावम्, यवयोः पदान्तयोः स्वरमद्ध्ये लोपः, न वकारस्याऽसस्थान एकेषाम्, असौ च शाकटायनः"[13] इति। तदुदाहरणानि च कर्म्मण आप्यायद्ध्वम्[14] अग्नर इमम्[15], मनसस्पत इमम्[16] त उप च[17] वनस्पत ऊर्द्ध्वः[18] इड एहि[19], आहुवद्ध्या उभा[20] विक्करीणावहा इषम्[21], कृशानवेते[22], विष्णवेते[23], विष्णव उरुगाय[24], विष्णव उत[25], विष्णव उरोरन्तरिक्क्षात्[26], दातारविषाम्[27], अग्गँनावग्गँनिः[28], वाजसातावयम्[29], वलगहना उपदधामि[30] इत्यादीनि माद्ध्यन्दिनीय–वाजसनेयि–शुक्लयजुर्वेदमन्त्तरब्रह्मयज्ञसंहितायाम् बोद्ध्यानि। अत्राऽपि पदान्तस्स्थस्य यकारस्य स्वरे परे सर्वत्तर लोपः, वकारस्य तु तादृशस्य सस्थाने स्वरे परे लोपोऽन्यत्तराऽलोपः। तत्तराऽपि काण्वशाखायावँ वकारस्याऽपि असस्थाने स्वरेऽपि परे लोप एवाऽन्येषां शाखिनामाम्नाये त्वलोप इति 'एकेषाम्' इति पदेन सूचितमिति अनन्तभट्टः[31]। तथा च वाय इह[32], वाय आगहि[33], वाय ऋतस्पते[34], आनन्दनन्दा आण्डौ[35] होतारा

---

१. २।२५। २. २।२८। ३. २।३१। ४. १।४।४।
५. १।१३।४। ६. १।४।१०, १।५।४। ७. १।२।१।
८. १।२।५, ६। ९. १।२।२। १०. १।२।५।
११. १।२।८। १२. १।२।९। १३. ४।४८।, ४।१२७–१२९।
१४. १।१। १५. १।१२। १६. २।२१। १७. २।१९।
१८. ४।१०। १९. २।२७। २०. ३।१३। २१. ३।४९।
२२. ४।२७। २३. ५।१६। २४. ८।१। २५. ५।१९।
२६. तत्तरैवा २७. ३।१३। २८. ५।४। २९. ५।३७।
३०. ५।२५। ३१. शु. य. प्रा. अ. भा. ४।१२८।
३२. २९।२८। ३३. २९।२९। ३४. २९।३२।
३५. २१।१०६।

इन्द्रम्[1], दैव्या अद्ध्वर्य्यू[2] इत्यादिषु वकारस्य पदान्तस्थस्याऽसस्थानेऽपि स्वरे परे लोपः काण्वानाम् मन्त्रसंहितायाम् । वायविह[3], वायवागहि[4] वायवृतस्पते[5] आनन्दनन्दावाण्डौ[6], होताराविन्द्रम्[7], दैव्यावद्ध्वर्य्यू[8] इत्यादिषु वकारस्य पदान्तस्थस्याऽसस्थाने स्वरे परे लोपाभावो माध्यन्दिनीयसंहितायाम् । मा. शतपथब्राह्मणे तु "वकारस्य पदान्तस्य स्वरमद्ध्येऽलोपः[9] इति भाषिकसूत्रवत् वकारस्य सर्वत्रालोपमाह । तैत्तिरीयप्रातिशाख्ये च— "एकारोऽयम्, ओकारोऽवम्, नाकारपरौ, ऐकार आयम्, औकार आवम्"[10] इति, "लुप्प्येते त्त्ववर्णपूर्वौ यवकारौ, नोक्ष्यस्य, वकारस् तु साङ्कृत्यस्य, उकारौकारपरौ लुप्प्येते माचाकीयस्य, लेशो वात्सप्रश्यैतयोः"[11] इति च । उदाहरणानि च तैत्तिरीयसंहितायाम् — कर्म्मण आप्प्यायद्ध्वम्[12], स्व आयुषि[13], आदद इन्द्रस्य[14], अग्न उपयाति[15], इम एवास्मै लोकाः[16], त एनम् भिषज्ज्यन्ति[17], वर्चस ओषधे[18], आहुवद्ध्या उभा[19], हन्तवा उ[20], असामहा एव[21], कृशानवेते[22], विष्णवेहीदम्[23], उभा दातारा-विषाम्[24], उस्रावेतम्[25], धूर्षाहावनश्शूर[26] इति । तत्तत्र प्रातिशाख्ये "वकारस् तु साङ्कृत्यस्य" इति सूत्रमेवेष्टन् न तु तत्पूर्वसूत्रद्द्वयन् न वा तदुत्तरसूत्रद्द्वयमिति सोमयार्य्यः प्राह[27] । अत इदानीन् तैत्तिरीयशाखेति प्रसिद्धायामात्त्रेयशाखायाम् यकारस्य पदान्तस्थस्य स्वरे परे सर्वत्र लोप एव; वकारस्य तु तथाविधस्य सर्वत्राऽलोप एवेति विज्ज्ञायते । तथा च पदान्तस्थस्य वकारस्य सस्थाने स्वरेऽपि परे लोपाभावो विष्णवुत[28], शतक्रतवुद्वंशमिव येमिरे[29], विष्णवुरुक्रमैषः[30] इत्यादौ दृश्यते । ऋक्तन्त्रे च "सन्ध्यक्षरमयवा-

---

१. २२।३० । २. ३२।३३, ७३ । ३. २७।३३ ।
४. २७।२९ । ५. २७।३४ । ६. २०।९ । ७. २०।४२ ।
८. ३३।३३, ७३ । ९. ३।१२ । १०. ९।११–१५ ।
११. १०।१९–२३ । १२. १।१।१।१ । १३. १।२।१४।३ ।
१४. १।१।८।१ । १५. १।२।१४।४ । १६. २।४।१०।३ ।
१७. २।३।११।४ । १८. १।२।१।१ । १९. १।१।१४।१ ।
२०. १।२।१४।७ । २१. ७।५।२।१ । २२. १।२।७ ।
२३. २।४।१२।३ । २४. १।१।१४।१ । २५. १।२।८ ।
२६. तत्त्रैव । २७. तै. प्रा. त्रिभा. र. १०।२१ ।
२८. १।२।१३।२ । २९. १।६।१२।३ । ३०. ३।२।१०।१ ।

यावम्''[1] इति, ''यः(लुब्), (स्व)रमद्ध्ये, वमेके, अर्ध्वं वा, वन् नैगिरुस्स्थे, नोतौ''[2] इति च। उदाहरणानि च कौथुमसामवेदार्चिकसंहितायाम्–अग्ग्न आयाहि[3] अग्ग्न इत्थेतरा गिरः[4], तस्मा उ अद्द्च[5], धूष्णवागहि[6], मातरावन्न्वेति[7], यावाहुः[8], योनावृतस्स्य[9], तुविजाता उरुक्क्षया[10] इति। तत्तर ओतौ परे विशिष्टस्स्य निषेधस्स्य दर्शनाद् उकारे ओकारे च परे वकारस्स्य सामान्यतया लोपो नैगिशाखायामिति विज्ज्ञायते। वृत्तिकारेण तु यकारलोपोऽपि नैगिशाखायामेवेति व्याक्ख्यातम्। उदाहरणानि अपि तेन यकारलोपरहितान्न्येव प्रदर्शितानि; अस्माभिस् तु मुद्द्रितकौथुमसामवेदार्चिकसंहितायाँ यकाररहिता एव पाठाः प्राप्प्यन्त इति तदनुसारमेवोदाहरणानि उपन्न्यस्तानि। सूत्तरोक्तो यकारवकारार्धलोपपक्क्षो वैकल्पिक ऋक्तन्तरकारस्स्य शाकटायनाभिन्नतां शाकटायनानुयायितावँ वा प्रमाणयन् ''व्योर् लघुप्रयत्नतरश् शाकटायनस्स्य''[11] इत्युक्त्या सर्वं वदतीति च विवेचकाः। शौनकीयचतुरद्ध्यायिकायाम् च— ''सन्ध्यक्क्षराणामयवायावः''[12] इति, ''स्वराद् यवयोः पदान्तयोः, नाकाराद् वकारस्स्य, गविष्टौ गवेषण इति च, लेशवृत्तिरधिस्स्पर्शं शाकटायनस्स्य''[13] इति च। तदुदाहरणानि च शौनक्क्यथर्ववेदसंहितायाम्– अभिष्टय आपः[14], कुम्भ आभृताः[15], अग्ग्न आवह[16], त आयान्तु[17], अग्ग्न इह[18], विश्श्व इषुम्[19], म इह[20], अन्तरिक्क्ष ओषधीषु[21], मात्तर उत[22], तस्मा अरम्[23], सूतवा उ[24], ऊर्ज्जमस्मा ऊर्ज्जस्स्वती[25], वाय ऊतये[26], वाय उदकेनेहि[27], वाय इह[28], विष्ण उत[29] विष्ण उरोरन्तरिक्क्षात्[30], वस्तावधि[31], मित्तरावरुणावस्मद्[32], असावस्मद्[33], असावस्मब्भ्यम्[34], इत्त्यादीनि। पैप्पलाद-

---

१. ३।६।१। २. ४।२।८–४।३।३। ३. १।१। ४. १।७। ५. १।२७२। ६. १।३४७। ७. १।६४। ८. १।३६१। ९. १।६६५। १०. ८४९। ११. अष्टा. ८।३।८। १२. ३।४०। १३. २।२१–२४। १४. १।६।१। १५. १।६।४। १६. १।७।१। १७. १।७।५। १८. १।९।३। १९. १।१३।४। २०. १।१५।२। २१. १।३०।३। २२. १।३१।४। २३. १।५।३। २४. १।११।१। २५. २।२९।५। २६. ४।२५।६। २७. ६।६८।१। २८. ७।४।१। २९. ७।२८।८। ३०. तत्तरैव। ३१. १।३।६। ३२. १।२०।२। ३३. १।२६।१। ३४. १।२६।२।

संहितायान् तु वायवुदकेन[1], वायविह[2], श्वशुरा उभौ[3] इत्यादीनि रूपाणि दृश्यन्ते । एवञ् च शौनकीयचतुरध्यायिकायामुक्ता नियमा मुख्यतया शौनकिनामाम्नाये एव चरितार्था दृश्यन्ते । तथापि पैप्पलादानावँ वायावुदकेनेत्यादीनि रूपाणि अपि लेशवृत्तिविषयतयाऽपि व्याख्यातुं शक्यानि । शौनकिनामाम्नायेऽपि मित्रावरुणावुशनाम्[4] असुतृपावुदुम्बलौ[5] इत्यादिकमपि दृश्यते । पाणिनीये व्याकरणे च "एचोऽयवायावः"[6] इति, "व्योर् लघुप्रयत्नतरः शाकटायनस्य"[7] इति, "लोपः शाकल्यस्य"[8] इति च । अत्राऽपि वेदशाखाविशेषविषये व्यवस्था वार्तिककारेण भाष्यकारेण वाऽपि न प्रदर्शितेति पाणिनीयव्याकरणस्य सर्ववेदपारिषदतायाः प्रतिकूलैवेयमपि पाणिनीयव्याकरणस्थितिर् मन्तव्या। लोके तु एते विधय इच्छाविकल्पविषया एव।। ३९-४१।।

(ज) पूर्वरूपसन्धिनिरूपणम्

एकाराद् ह्रस्वकेऽवर्णे एरोरोकारकाद् भवेत् ।

दृश्याः प्रकृतिभावस्याऽधिकारेऽस्याऽपवादकाः ।।४२।।

तदुक्तमृग्वेदप्रातिशाख्ये— "अथाभिनिहितस् सन्धिरेतैः प्राकृतवैकृतैः । एकीभवति पादादिरकारस् तेऽत्तर सन्धिजाः ।। अन्तःपादमकाराच् चेत् संहितायालँ लघोर् लघु । यकाराद्द्व्यक्षरम् परवँ वकाराद्द्व्यपि वा भवेत् ।। अन्न्याद्द्व्यपि तथा युक्तमावोऽन्तोपहितात् सतः । अयेऽयोऽवेऽव इत्यन्तैरकारस् सर्था भवन् ।। व इत्येतेन चा न प्र क्व चित्तरस् सवितैव कः । पदैरुपहितेनैतैस् सर्वैरेवोदयाः परे ।। अदादवर्त्तरोऽजनयन्ताव्यत्त्या अभेदयोऽपाष्टिरवन्त्ववीरता । अमुमुक्तममतयेऽनशामहा अव त्वचोऽवीरतेऽवांस्यवोऽरथाः ।। वासो वायोऽभिभुवे कवष्यस् सङ्करन्दनो धीजवनस् स्वधावः । उत्सादत ऋतावस् सगरभ्यो हिरण्यशृङ्ग इति चोपधाभिः ।। येऽरा रायोऽध मेऽधायि नोऽहिरग्नेऽभिदासति । जायमानोऽभवोऽग्नेऽयन् नृतोऽपोऽहाऽतिपिप्रति ।। जम्भयन्तोऽहिम् मरुतोऽनुभर्त्री यवसेऽविष्यन् वयुनेऽजनिष्ट । वृत्रहत्येऽवीस् समरेऽतमाना मरुतोऽमदन्नभितोऽनवन्त ।। ब्रुवतेऽध्वँस् तवसेऽ वाचि मेऽरपद् दधिरेऽग्ना नहुषोऽस्मत् पुरोऽभिनत् । उप तेऽधावँ वहतेऽयँ यमोऽदितिर् जनुषोऽया सुवितोऽनु श्रियोऽधित ।। वपुषेऽनु विशोऽयन्त सन्तोऽ वद्द्व्यानि

---

१. १९।१७।१३ । २. २०।१।१० । ३. १।६०।२ ।
४. ४।२९।६ । ५. १८।२।१३ । ६. अष्टा. ६।१।७८ ।
७. तत्तैव ८।३।१८ । ८. तत्तैव ८।३।१९ ।

खेऽनसः । भरन्तोऽवस्यवोऽवोऽस्तु बुद्ध्न्योऽजो मायिनोऽधमः ।। देवोऽनयत् पुरूवसोऽसुरघ्नो भूतोऽभि श्वेतोऽरुषस् तेन नोऽद्द्य । येऽजामयस् तेऽरदन्नोऽधिवक्ता तेऽवर्धन्त तेऽरुणेभिस् सदोऽधि ।। स्वाद्ध्योऽजनयन् धन्वनोऽभिमातीरग्नेऽप दह मनसोऽधि योऽद्ध्वनः । योऽह्यस् तेऽविन्दंस्तपसोऽधि न योऽधि पादोऽस्य योऽति व्राह्म्मणोऽस्य योऽनयत् । सोऽस्माकयँ यो द्वेषोब्भ्योऽन्यकृतेव्भ्यस् तेब्भ्योऽकरम् पयस्स्वन्तोऽमृताश् च"[1] इति । **शुक्लयजुर्वेदप्रातिशाख्ये च**–"एदोद्द्भ्याम् पूर्व्वमकारः"[2] इति, "गाहमानः शिवो भरन्तो द्द्वेषोब्भ्यो जम्भयन्तो वाजे वाजजितो मदन्तः शोचेऽवसे सुमुवे ज्ज्योते सुपर्ण्णो वीरुधः सुवीरो धातवे सूनवे द्द्रूणान आशवो वहतः सङ्करन्दनो वाहवोऽयुद्ध्योऽद्द्रुहः, वोऽहं सोऽहं सोऽस्माकन् तेऽभिगरो वोऽर्वाची, येऽन्नात्तरयोः, अविद्द्यासम्भूत्योश्च च, उपस्तथेऽन्तस्त् तेब्भ्योऽकरम्, नमोऽस्तत्वसौत्तरामण्ण्वाम्, विश्श्वेऽग्ग्रे विशो रायोऽनग्ग्नौ,सूर्य्योऽग्गँ नेऽभौ, रिषो यवसे पुरुपृ्रियोऽन्नपतेऽर्ण्णवे, व्यपरे च, गवे मे मनसो वाजयन्तः सोम्म्यासः पाशिनो विदानोऽनृते मूजवतो वृष्ण्णे ऽपाको दीदिवस् त्तरयस्तत्रिंशे व्रह्म्मणे यको रथो विश्श्वतः पादो वसन्तः, अवोऽस्तत्वग्गँ ने गृहंगतेऽभि सत्तत्रानोऽहन्नोऽजस्स्रया विमानोऽजस्स्रः सुतेशश्विना, नमोग्गँ नये तेग्ग्रन् तेग्ग्रे वृक्क्षस्य प्प्रथमोऽन्तस्त्तेऽन्न्येन, पणयो जहीमोऽम्बिके, नोनुनो दुग्ग्धा इव प्प्रचेतसोऽश्श्वान् नरोस्म्माकवँ वृषपाणयोऽश्श्वाः प्प्रदिशोऽनूदितेऽनागा अन्धसोर्च्चा पनस्स्यतेऽद्धा यज्जँ ञियेब्भ्योऽमृतत्त्वँ विपश्च्चितोऽभि जनोऽनमीव आयवोऽनु नोऽद्द्य देशेऽभवद् वयुनेजनिष्ट्ट विद्द्मनापसोऽजायन्त पूर्व्व्यासोऽरेणवो नोश्म्मा नोऽदितिरन्नोऽहिः, व्राह्म्मणः, यजुष्षु च, सङ्करमे च सर्व्वत्तर"[3] इति च; **तैत्तिरीयप्रातिशाख्ये च**–"लुप्प्यते त्त्वकार एकारौकारपूर्व्वः"[4] इति, "अथ लोपः, अति, न गर्मः सन्नद्धोयमोभद्द्रऽपूर्वः, यवनहपरस् स्वरपरेषु, जकार–ग्ग्नपर उदात्तः, मो–वचो–दधानस्–स्थेपूर्व्वश् च, अब्भ्यावर्त्तिन्नपूपमपिदधाम्म्यद्द्यान्न्वदितिश् शर्म्मागग्नेर् जिह्वामग्ग्नयऽ पप्प्रयोऽस्माकमस्मे धत्ताश्माश्श्वाश्श्रुतिरश्श्यामामार्य्यमन्नस्मत्पाशानस्मिन्यजँ ञेऽस्ता–व्व्यथमानाभिद्द्रोहमधाय्यदोऽथोऽदुग्ध्वा अरिष्टा अरथा अर्च्चन्त्यन्तरस्स्यामत्तरस्थान्नायाङ्गिरस्स्वदकरम्, गाहमानोजायमानोहेतयोमन्न्यमानोवनस्पतिब्भ्यऽ पतेस्रिधस् तपसस् स्वधावो भामितोऽग्ग्नय आयोऽद्-

---

१. २।३४–४८ । २. ४।६२ । ३. ४।६५–८१ । ४. ११।१।

ध्वर्य्यो करतोपूर्वः"[1] इति। **ऋक्तन्त्रे च** "लुबन्न्यः"[2] इति। **शौनकीयचतुरध्यायिकायाञ्च**— "एकारौकारान्तात् पूर्वव४ पदादेरकारस्स्य"[3] इति, **अथर्ववेदप्रातिशाख्येऽपि**– "अकारादौ प्रकृत्त्या(स्याद् ?) एकादेशोऽपि वा क्व चित्। यस् ते मन्न्योऽविधद् यथा प्रकृत्त्याऽन्न्यत्तर लक्ष्येत्"[4] इति। एतस्य विधेरपवादा ऋग्वेदप्रातिशाख्यादिषु विस्तरेण शौनकीयचतुरध्यायिकायाञ् चाऽतिसङ्क्षेपेण प्रोक्तास् ते प्रकृतिभावप्रकरणे दृश्याः ॥४२॥

(झ) गोशब्दसन्धिनिरूपणम्

समासे गो४ पूर्वरूपम् प्रकृतिश् च गवेति च।
स्वरे परे स्याच् च तथा यथाप्राप्तवँ व्यवस्थया ॥४३॥

तथा हि ऋग्वेदप्रातिशाख्ये पूर्वरूपनियमविशेषव्यवस्था प्रतिपाद्द्यते[5], तेन च ऋग्वेदसंहिताया गोअग्ग्रया[6] गोअग्ग्रा[7] गोअग्ग्रान्[8] गोअग्ग्राम्[9] गोअग्ग्रयाणाम्[10], गोअजनासः[11] गोअर्णसः[12] इत्त्यादौ ह्रस्स्वेऽकारे परे गोशब्दस्य ये प्रकृतिभावास् तेऽन्न्वाख्याता भवन्ति। "गोओपशा गोऋजीकप्रवादौ"[13] इति च ऋग्वेदप्रातिशाख्ये। तथा च संहितायाम् गोओपशा[14] इति, गोऋजीकम्[15] इति च। संहितायामेव गवाशिरः[16] गविषः[17] गविष्टये[18] गवेषणः[19] इत्त्यादौ तु ओकारस्स्य अव् एव। वकारस्स्य चाऽलोप एव। गविष्टये[20] गविष्टौ[21] गोऋजीकम्[22] इति ऐतरेयब्राह्म्मणेऽपि; गविष्टौ[23], गोअश्श्वम्[24], गोआयुषी[25], गोआयुषोः[26] इति शाङ्खायनब्राह्म्मणेऽपि। माद्ध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदमन्त्रब्रह्म्मयज्ञ्जसंहितायान् तु गविष्टौ[27] इत्त्येव दृश्यते; काण्वसंहितायान् तु गइष्टौ[28] इति प्राप्प्यते; माद्ध्यन्दिनीय–वाजसनेयि– शतपथब्राह्म्णे तु गोऽश्श्वस्स्य गोऽश्श्वात्, गोऽश्श्वे गोऽश्श्वेन इत्त्यादि[29]

---

१. १२।१–८। २. ३।३।३ (८३)। ३. ३।५३।
४. १४३। ५. २।३४–४८। ६. १।५३।५। ७. १।९०।५।
८. १।९२।७। ९. २।१।१६। १०. ऋ. ५।७।४।६।
११. ७।३३।६। १२. १।११२।१८। १३. २।७४।
१४. ६।५३।९। १५. ६।२३।७, ७।२१।१। १६. १।१३७।१।
१७. ४।४१।७। १८. ८।६१।७। १९. १।१३२।३।
२०. ७।७। २१. ३।२०। २२. ६।११। २३. १५।३।
२४. ११।२। २५. २६।२। २६. तत्त्रैव। २७. ३३।६३; ३४।२३।
२८. ३२।५।९, ३३।१।१७। २९. १२।८।१।१४; १२।८।३।२२।

गोआयुषी इति, गोआयुर्ब्भ्याम् इति, गोअश्वानाम् इति च दृश्यते[१]। तथाऽपि शुक्लयजुर्वेदप्रातिशाख्ये नाऽयवँ विशेषोऽन्वाख्यातो दृश्यते। तेन प्रातिशाख्यानाम् ब्राह्मणभागनियमप्रदर्शनेऽनादरो विज्ज्ञायते। भाषिकसूत्रेऽपि "शेषं सामान्यशास्त्रात्" [२] इत्येवोक्तम्। तैत्तिरीयप्रातिशाख्ये च गोशब्दाद् ह्रस्वेऽवर्णे परे प्रकृतिभावः प्रतिपादितः[३]। तैत्तिरीयसंहितायाञ् च गोअश्वान्[४], गोअश्वेब्भ्यः[५], गोअर्घम्[६] इत्युदाहरणानि प्राप्यन्ते। गविष्टये इति प्रयोगस् तैत्तिरीयसंहितायान्[७] तैत्तिरीयब्राह्मणे[८] च प्राप्यते। तैत्तिरीयब्राह्मणे गवेषणम्[९] इति च प्राप्यते। मैत्रायणीयसंहितायाङ्[१०] काठकसंहितायाञ्[११] च गइष्टये इत्यादि च प्राप्यते। काठके[१२] मैत्रायणीयके[१३] च गोअग्रया इत्यादि चोपलब्भ्यते। गोअश्वान् इति काठकसंहितायाङ्[१४] कपिष्ठलकठसंहितायाञ्[१५] च प्राप्यते। काठकसंहितायाङ् गोआयुषी[१६] इति गवाशिरः[१७]इति च दृश्यते। ऋक्तन्त्रे च "गो,न वा, अववँ वा"[१८] इति। तदुदाहरणतया च गोअग्रम्, गोअश्वम्, गोअजिनीकम्; गोऽग्रम्, गोऽश्वम्, गोऽजिनम्, गोऽजिनीकम्; गवग्रम्, गवश्वम्, गवजिनम्, गवजिनीकम् इति वृत्तिकारेणोल्लिखितम्। किन् तु पूर्वरूपादेशयुक्तानि रूपाणि वेदमन्त्रेषु न प्राप्यन्ते; गव् इत्यादेशेन युक्तानि अपि वृत्तिकारोक्तानि उदाहरणानि वेदेषु नैव प्राप्यन्ते। तत्र अवादेशेन युक्तानि रूपाण्येव प्राचीनतमानि स्युरिति के वित्[१९], किन् तु तेषावँ वेदेषु अनुपलब्भ्यमानत्वादश्रद्धेयन् तत्। अव् वा इत्यनुक्त्वा अववँ वा इति वदत ऋक्तन्त्रकारस्स्याऽपि अव(ङ) इत्यादेश एवाऽभिप्रेतस् स्यात्। जैमिनीयसंहितायाङ् गवाशिरः[२०] इति, गविषः[२१] इति, गविष्टये[२२] इति, गविष्टिषु[२३] इति, गविषे[२४] इति च रूपाणि प्राप्यन्ते, गविष्टये[२५] इति गविष्टिषु[२६] इति च कौथुमसंहितायामपि दृश्यते; गोऋजीकम् इति च कौथुम-

---

१. १२।२।३।२; ११; १२।२।४।१६; १४।९।१।१०। २. ३।१३।
३. ११।१६। ४. ५।२।९।४। ५. तत्रैव। ६. ६।१।१०।१[२]।
७. २।६।११।३। ८. २।४।५।३। ९. २।४।१।३।
१०. ४।११।६। ११. ७।१७। १२. १०।१२। १३. २।२।६।
१४. २०।८। १५. ३१।१०। १६. ३३।८। १७. ४०।८।
१८. ३।२।९–३।३।१। १९. ऋक्तन्त्रटिप्पणीषु; पृ. ३३, टि.८१।
२०. ४।१६।४। २१. ४।१७।८। २२. १।२५।८, ३।३०।५।
२३. ३।४७।५। २४. ४।१७।८। २५. १।२४०। २६. २।५७९।

संहितायाञ्[1] जैमिनीयसंहितायाञ्[2] च प्राप्प्यते। जैमिनीयब्राह्म्मणे च गवाशिरः[3] गविष्टये[4] गोअश्श्वम्[5] गोआयुर्भ्याम्[6] गोआयुषी[7] गोआयुषोः[8] इति च प्राप्प्यते। ताण्ड्यमहाब्राह्म्मणे च गवाशिरः[9], गवाशीः[10], गोआयुषी[11] इत्त्युपलब्भ्यते। आर्ज्जेयब्राह्म्मणे च गोअश्श्वीयम्[12] इति दृश्श्यते। शौनकीयचतुरद्ध्यायिकायान् तु— "क्व वित् प्रकृत्त्या"[13] इत्त्येवाऽत्त्र प्रकृतिभावस् सङ्गृहीतः। तथा च शौनकिनामथर्व्ववेद-संहितायाङ्ग गोअग्ग्रया[14] गोअजम्[15] गवाशिरम्[16] गविषे[17] गविष्टौ[18] गवेषणः[19] इत्त्यादि प्राप्प्यते। पैप्पलादके च गवाशिरः[20] गविष्टौ[21] इति दृश्श्यते। गोपथब्राह्म्मणे च गवायुर्भ्याम्[22], गवायुषी[23] गवीडायाम्[24] इति प्राप्प्यते। पाणिनिना च सौवग्रन्थस्स्य सर्व्ववेदपारिषदत्त्वङ्ग काम-यमानेनाऽपि लाघविकेन अव्व्यवस्स्थिततया "सर्व्वत्त्र विभाषा गोः, अवङ्ग स्फोटायनस्स्य, इन्द्रे च"[25] इत्त्येवोक्त्तम्। तदुदाहरणानि च गोऽग्ग्रम्, गोअग्ग्रम्, 'अपशवो वा अन्न्ये गोअश्श्वेब्भ्यः पशवो गोऽश्श्वाः', गवा-ग्ग्रम्, गोऽग्ग्रम्, गवाजिनम्, गोऽजिनम्, गवौदनम्, गवोदनम्, गवोष्ट्रम्, गवुष्ट्रम्, गवेन्द्रः इति काशिकायाम्; 'व्यस्थितविभाषेयन् तेन गवा-क्क्ष इत्त्यत्त्र नित्त्यमवङ्ग भवति'[26] इत्त्यपि तत्त्रोक्त्तम्। "देवत्त्रातो गलो ग्ग्राह इति योगे च सद्विधिः। मिथस् ते न विभाष्ष्यन्ते गवा-क्क्षस् संशितव्व्रतः"[27] इति श्श्लोकेन भाष्ष्येऽपि गवाक्क्ष इत्त्यत्त्र व्यवस्थितविभाषात्त्वम् प्रतिपादितम्। यद्द्यपि लघुशब्देन्दुशेखरे बृहच्-छब्देन्दुशेखरे च 'तेन प्राण्ण्यवयवे न (भवत्त्येव) इति शाच्छोरन्न्यतर-स्स्याम्[28] इति सूत्त्रे भाष्ष्ये स्स्पष्टम्' इत्त्युक्त्तन् तथापि तत्त्र भाष्ष्ये

---

१. १।३१३। २. १।२३।१। ३. १।९३, ३।३५।
४. ३।११९, २२६, २५४। ५. १।१४, २।२७८। ६. २।२७८।
७. २।३०, ४२५। ८. २।५०। ९. ६।१।२५। १०. १२।१।२।
११. २४।१४।५, २५।१।१२। १२. १।१५४। १३. ३।५४।
१४. २०।२१।५। १५. १९।५०।२। १६. २०।२४।१.७।
१७. २०।६५।२। १८. ४।२४।५, २०।१४३।९। १९. ५।२०।११।
२०. ६।१६।८। २१. ४।३९।५। २२. १।४।१४, १५।
२३. १।४।९, १०, १२, १४, १५, २२, २३; १।५।२, ३, ४।
२४. १।३।११, १२। २५. अष्टा. ६।१।१२२–१२४।
२६. काशिकायाम् ६।१।१२३। २७. पा. व्या. भा. ७।४।४१।
२८. अष्टा. ७।४।४१।

नेदम् प्राप्यते, तत्र कय्यटेन 'प्राण्यङ्गे तु गोरक्षिप गोऽक्षिप इति भवत्यनन्यत्र तु विकल्पेन' इत्युक्तम्, नागोजिना च 'अनन्यत्र गवाङ्गम्, गोङ्गम्'' इति तत् स्पष्टीकृतम्; तथापि ''अवङ् स्फोटायनस्य''[1] इति सूत्रे एव भाष्ये ''गवास्थि गवाक्षिप'' इति पाठ४प्राप्यते।''गवेन्द्रयज्ञे वीहि'' इत्यपि भाष्ये उदाहृतम्। काशिकायामुदाहृतम् ''अपशवो वा अनन्ये गोअश्वेब्भ्य४ पशवो गोऽश्वाः'' इति वाक्यङ् कस्माच्चिल् लुप्ताद् ब्राह्मणादुद्धृतम् प्रतीयते। ''गवेन्द्रयज्ञे वीहि'' इति भाष्योदाहृतवँ वाक्यमपि उपलब्ध्यमानेषु ब्राह्मणेषु वेदेष्वनन्यत्र वा नोपलब्ध्यते। गोश्वोष्ट्रगजापहारी, गवेन्द्रः इति प्रयोगौ तु वेदाङ्गेषु प्राप्येते। अत्राऽपि वेदे तत्तच्छाखासु व्यवस्थिता एव प्रयोगा वेदितव्याः। लोके त्विच्छाविकल्पः। ह्रस्वाकारभिन्ने स्वरे परे अववङौ पर्यायेण भवतः। गवाक्षगवेन्द्रेत्यादिषु तु लोकेऽपि व्यवस्थितोऽवङङेव बोद्ध्यः ॥४३॥

(ञ) प्रकृतिभावसन्धिनिरूपणम्

प्लुतास् स्वरास् स्वरे स्वस्था वाऽप्प्लुतवदुपस्थिते।
ई चाक्वरवर्मणमतेऽनन्यस् स्वरोऽपि तथा क्व चित् ॥४४॥

अयम् प्लुतस्य प्रकृतिभाव ऋग्वेदप्रातिशाख्ये नोल्लिखितः। तत्र ऋग्वेदसंहितायान् ''न त्वा भीरिव विन्दतीँ३''[2] इत्यत्र पदपाठेऽपि इतिकरणन् न क्रियते इति स्वरे परे प्लुतस्य प्रकृतिभावो हि ऋग्वेदे न दृश्यते। अत४ प्लुतप्रकृतिभावविधेर् ऋग्वेदप्रातिशाख्येऽनुल्लेख उचित एव। शुक्लयजुर्वेदेऽपि आर्षे स्वरे परे प्लुतस्य प्रकृतिभावो नोपलब्ध्यते; अत एव संहिताध्याये प्लुतप्रकृतिभावविधिस् तत्प्रातिशाख्ये नोल्लिखितः। परिग्रहाध्याये तु''कण्ठ्यस्स्वरमेकारेण परिगृह्णीयात् त्प्लुतवर्ज्जम्''[3] इति ''विवेशाँ३ इति विवेशाँ''[4] इत्यत्र इतौ परे प्लुतस्य संहिताविकाराभाव४ प्रतिपादितः। तैत्तिरीयप्रातिशाख्ये तु— ''न प्लुतपरग्रहो''[5] इति प्लुतस्य आर्ष्यां संहितायामपि प्रकृतिभावस् स्फुटम् प्रतिपादितः। उदाहरणञ् च 'अस्तु ही३ इत्यब्रूताम्'[6] इति। ऋक्तन्त्रे च— ''न वृद्धं रे''[7] इति वृद्धापरपर्याय४ प्लुतस् स्वरे परे संहिताविकारन् न हि प्राप्नोतीत्युक्तम्। तदुदाहरणानि

---

१. पा. व्या. भा. ६।१।१२३। २. १०।१४६।१। ३. ७।२।
४. मा. वा. शु. य. वे. म. ब्र. य. सं. २३।४९। ५. १०।२४।
६. तै. सं. ७।१।६।१। ७. ३।१।८ (६८)।

च वृत्तिकारेण ऊर्म्मिणा अव्व्यवँ वारम्[१], भरा इन्द्रज्ज्यायः[२], सोम धारया आपो[३], धृष्णो३ आग३ हि[४], सोमासो३ अश्श्वया[५] इति प्रदर्शितानि। तत्राऽनृतिममुदाहरणवँ विहायाऽन्यानि सर्वाण्येवोदाहरणानि कौ.संहितायावँ विकारवन्त्येव पठ्यन्ते न प्रकृतिस्थानीति तानि चिन्त्यान्येवेति विवेचकाः। तत्र लेखे यथालिखितपाठे च तेषावँ विकारवत्तया पाठेऽपि सुसम्प्रदायागते पाठे तेषु अविकार एव पठ्यमानोऽभूदिति वयम् ऋक्तन्त्रप्रामाण्यादवस्स्यामः। ऋक्तन्त्रस्य कौथुमशाखाविषयत्वाभावेन वाऽत्र समाधानं स्यात्। यत् तु पुनः कौथुमसामवेदार्चिकसंहितायाम् अब्भ्या३दिश[६], क्वा३स्य[७] त्वा३स्य[८] वृधे३स्माँ[९] त्वा३द्द्य[१०] अप्स्वा३न्तरा[११], अब्भ्यू३तस्य[१२], अब्भ्यू३च्छन्ती[१३], हितो३भि[१४] त्वं ह्या३ङ्ग[१५], अब्भ्य३र्षानपच्च्युत[१६] तान् ह्यू३श्मस्स्यग्ने[१७] देवाव्व्य३मदमभि[१८] गृणानो३भि[१९], शग्ध्यू३षु[२०] गृहे३मृतम्[२१] शर्द्ध्यू३ग्ग्रधन्वा[२२] अयुद्ध्यो३स्माकम्[२३] इत्येतेषु स्थलेषु प्लुतानामपि स्स्वराणां संहिताविकारो दृश्यते कौथुमसामवेदसंहितायामिति उक्तऋक्तन्त्रसूत्रस्स्यार्थान्तरम् मृग्ग्यम् इति केचिन् मन्न्यन्ते[२४] तन् न विचारसहम् प्रतिभाति; उक्तेषु स्स्थलेषु प्लुतत्वस्स्याऽभावात्, कम्पत्वसूचनायैव तर्ह्यऽकस्स्य लेखनादिति विज्ज्ञायते। शौनकीयचतुरद्ध्यायिकायाम् च क्रमाद्ध्ययनप्रतिपादनप्रकरणे "प्लुतश् चाप्प्लुतवद्"[२५] इत्युक्तम्। तत्र वृत्तिकारेण च "आबभूवाँ३[२६] इति बभूवेति वक्तव्यम् इति प्रतिपादितम्। पाणिनिना तु "प्लुतप्रगृह्या अचि नित्यम्"[२७] इति प्लुतानां स्वराणां स्वरे परे प्रकृतिभावः परोक्तः; अनार्षे इतौ परे तु प्लुतानामप्रकृतिभावः खलु "अप्प्लुतवदुपस्थिते"[२८] इति प्रतिपादितः; स्वरे परे ई३ इत्यस्स्य प्लुतस्स्य चाक्रवर्मणस्स्याऽऽचार्यस्स्य मतेऽप्लुतवद्भावेन

---

१. कौ. सा. सं. ५७२। २. तत्रैव ३०९। ३. तत्रैव ५११। ४. तत्रैव ३४७। ५. तत्रैव ४८२। ६. १२८। ७. १४२। ८. १६५। ९. २३९। १०. २९५। ११. ५१२। १२. ५५६। १३. ७५१। १४. ९२१। १५. ९३८, १५११। १६. १०५४। १७. १०६६। १८. ११५८। १९. १४२६। २०. १५७९। २१. १८४२। २२. १८५१। २३. १८५५। २४. सूर्यकान्तकृता ऋक्तन्त्रटिप्पणी (पृ. ३०) द्रष्टव्या। २५. ४।१२०। २६. शौ. अ. वे. सं १०।२।२८। २७. अष्टा.६।१।१२५। २८. तत्रैव ६।१।१२९।

विकारित्वमन्येषाम् मते तु तदभावेनाविकारित्वञ् च प्रोक्तम् "ईश्चाक्रवर्मणस्य"[1] इति। तद्भाष्यकारेण तु "इकारग्रहणेन नार्थः, अविशेषेण चाक्रवर्मणस्याऽऽचार्यस्याऽप्लुतवद् भवतीत्येव। इदमपि सिद्धम् भवति। वशा३ इयम्, वशेयम्" इत्युक्तम्। तत्र "अप्लुतवदुपस्थिते"[2] इति पाणिनिना अनार्षे इतौ परे यन् नित्यमप्लुतवत्त्वमुक्तन् तच् शुक्लयजुर्वेदकृष्णयजुर्वेदादिपदपाठनियमसङ्ग्रहाय नाऽलमिति नैतदपि पाणिनीयव्याकरणस्य सर्ववेदपारिषदताया अनुकूलम् प्रतीयते। न च "ईश्चाक्रवर्मणस्य" इत्यस्य भाष्यकारेण विहिताद् व्याख्यानात् तत्सङ्ग्रहः, एतस्य सूत्रस्य अनुपस्थितार्थताया वार्तिककारेण भाष्यकारेण चोक्ततत्त्वात्। यदि तु पूर्वोदाहृतसामवेदोदाहरणेषु अन्यत्र वाऽपि क्व चित् प्लुतानां स्वराणां स्वरे परे संहिताया विकारादिकन् दृश्यते तदा तत् तु एतस्य सूत्रस्य भाष्यकारकृतेन व्याख्यानेन सङ्गृहीतम् भवतीति बोद्धव्यम्॥४५॥

अ–इ–उ–ऋ–लृ–वर्णास् स्यु४ प्रकृत्या ऋलृवर्णयोः।
ह्रस्वा वा च समासे चाऽसमासे च ह्यय्यवँ विधिः॥४६॥
इ उ ऋ लृ इतीमे तु असवर्णे स्वरे परे।
प्रकृत्या स्युश् च ह्रस्वाश् च समासे न ह्यय्यवँ विधिः॥४७॥
अकारोऽपि प्रकृत्या वा सवर्णेऽचाऽसवर्णके।
स्वरे परे श्रुतौ नैव ह्रस्वस् त्वनृस्वरे परे॥४८॥

तदुक्तमृग्वेदप्रातिशाख्ये— "ऋकार उदये कण्ठ्यावकारन् तदुद्ग्राहवत्"[3] इति। तदुदाहरणे च "पर ऋभुब्भ्यो दूतमिव"[4] "मधुन ऋतस्य"[5] इति च भाष्यकारेण प्रदर्शिते। अत्र अकारस्यैव प्रकृतिस्थता ह्रस्वता चोक्ता। "विब्भ्वा[6] विधर्ता[7] विपन्न्या[8] कदा[9] वा[10] माते[11]त्यृकारेऽप्यपदादिभाजि"[12] इति तु ह्रस्वताऽपवादः प्रकृतिभाव उक्तः। शाकलऋग्वेदमन्त्रसंहितायान् न्यृञ्जते[13]न्यृञ्जसे[14],न्यृषन्ति[15],

---

१. अष्टा. ६।१।१३०। २. तत्रैव ६।१।१२९।
३. २।३२। ४. शा ऋ.म.सं. ४।३३।१। ५. तत्रैव १०।६८।४।
६. तत्रैव ४।३३।४। ७. तत्रैव २।२८।४। ८. तत्रैव ४।१।१२।
९. तत्रैव ५।३।९। १०. तत्रैव५।३०।१४। ११. तत्रैव५।४५।६।
१२. ऋ. प्रा. २।६४। १३. १।५४।२। १४. ८।९०।४।
१५. १।५२।७।

न्यृष्टः[१], न्यृष्टम्[२], अस्स्यृजीषी[३], अद्ध्येत्यृषिभिः[४], मृजन्त्यृषिषाण[५] यात्त्यृक्क्वभिः[६] इत्त्यादिषु तु नैव प्रकृतिभावः। शुक्लयजुर्वेदप्रातिशाख्येऽपि 'कण्ठ्य ऋकारे ह्रस्स्वम्''[७] इति कण्ठ्यस्स्यैव ह्रस्स्वता प्रकृतिभावश् चोक्तः। सदोस्स्यृतस्स्य[८] प्रदिश्श्यृतस्स्य[९] इत्त्यादिषु माद्ध्यन्दिनीयसंहितायाम् प्रकृतिभावो नैव भवति। तैत्तिरीयप्रातिशाख्ये तु ऋकारे परे न च पूर्वस्स्याकारादेर् ह्रस्स्वता न वा प्रकृतिभावः प्रतिपादितः। तथा च नयर्त्तस्स्य[१०], अपसर्त्तस्स्य[११] अभिजयत्त्यृतस्स्य[१२] उदेह्यृतस्स्य[१३] व्यृद्धम्[१४] इत्त्यादीनि रूपाणि तैत्तिरीयसंहितायाम् प्राप्प्यन्ते। ऋक्तन्त्रे तु– ''ऋति (परे संहिता न भवति)''[१५] इत्त्युक्तम् ''ऋमप्प्येके''[१६] इति चोक्तम्; तथापि मह्न्न ऋतेकर्मम्[१७] इत्त्यादिषु अवर्णस्स्यैव ह्रस्स्वता प्रकृतिभावश् च कौथुमसंहितायाम् प्राप्प्यते। तत्त्र अभी ऋतस्स्य[१८] इत्त्यत्त्र तु ह्रस्स्वस्स्याऽपि दीर्घतापत्तिर् दृश्श्यते; मृजन्त्यृषिषाण[१९] अध्येत्यृषिभिः[२०] अस्यृजीषी[२१] यास्यृक्क्वभिः[२२] इत्त्यादिषु तु नैव प्रकृतिभावो दृश्श्यते। शौनकीयचतुरद्ध्यायिकायाम् च ऋकारे परे पूर्वस्स्याऽकारादेर् न ह्रस्स्वता न वा प्रकृतिभावः प्रतिपादितः। तथापि सप्तऋषयः[२३] सप्तऋतवः[२४] यमस्स्य ऋषीणाम्[२५] उतऋषीन्[२६] एकऋषिः[२७] एकऋतुः[२८] आपश् च ऋतस्स्य[२९] ब्रह्म्मण ऋग्भिः[३०], पयस ऋषीणाण्[३१] मणिन ऋषिणेव[३२] इत्त्यादयः प्रयोगाश् शौनकिनामथर्ववेदे दृश्श्यन्ते। नमः परमऋषिब्भ्य इति च प्रश्नोपनिषदन्ते। अष्टर्चेब्भ्यस् स्वाहा[३३] तृचेब्भ्यस् स्वाहा[३४] उपर्षन्ति[३५] प्रशि-

---

१. १०।१०८।७। २. ४।१८।५। ३. ८।९०।५।
४. ९।६७।३१, ३२। ५. ९।८६।४। ६. ९।१११।१।
७. ४।५०। ८. ५।३३। ९. २९।३६। १०. १।४।४३।२।
११. ७।१।१८।१। १२. ३।३।५।४[३], ५। १३. ३।५।६।२।
१४. ५।१।२।१। १५. ३।३।५(८५)। १६. ३।५।२(१०२)।
१७. १७८४। १८. ७०२। १९. ८८६। २०. १२९८।
२१. १४११। २२. १५९०। २३. ११।१।१। २४. ८।९।१८।
२५. ८।९।२३। २६. ८।९।२४। २७. ८।९।२५, २६।
२८. तत्त्रैव। २९. ९।३।२२। ३०. १०।१।१२।
३१. तत्त्रैव। ३२. ८।५।८। ३३. १९।२३।३।
३४. १९।२३।१९। ३५. ९।१३।१४, १५, २३।

पृष्यृतस्य[1] बन्धवृच्छतु[2] ऋतस्यर्तेन[3] इति च प्रयोगाश् शौनकिनाम् अथर्ववेदमन्तरसंहितायान् दृश्यन्ते । तत्र प्रकृतिभावोदाहरणानाव् व्याख्यानन् तु शौनकीयचतुरध्यायिकाया "एना-एहा-आदयश् च"[4] इति सूत्रेण कथञ् चित् कर्तुं शक्यम्, ह्रस्वभावव्याख्यानाय तु तत्र न प्राप्यते सूत्रम् । पाणिनिना तु "ऋत्यकः"[5] इति अव्ययस्थितत्या प्रोक्तम् । तत्र अकारस्य प्रकृतिभावे ह्रस्वभावे चोदाहरणानि वेदेषु प्राप्यन्ते । इकारादीनान् तु प्रकृतिभावस्योदाहरणानि दुर्लभानि; सामवेदे अभी ऋतस्य[6] इत्येकम् उदाहरणम् प्राप्यते । यद्द्यपि केन चिद् ऋत्यक इति सूत्रोदाहरणतयेव "स्वायान् तनू ऋत्व्ये नाधमानाम्"[7] इति ऋग्वेदवाक्यमुद्धृतम्[8] तथापि तत्र सप्तम्यर्थकस्य दीर्घोकारस्य परगृह्यतया प्रकृतिभावो द्रष्टव्यो न ऋकारपरकतयेति न ऋत्यक इत्यस्य तत्र चरितार्थता । तस्मात् पाणिनेरिदं सूत्रमिकारादिविषये मुख्यतया लौकिकान् प्रयोगाननुवाख्यात् प्रतीयते । तद्व्याख्याने यद्द्यपि मुनिना पतञ्जलिनाऽपि ह्रस्वभाव-दीर्घैकादेशान्तस्थादेशादिकयोरेव समावेशः प्रतिपादितस् तथैव चोदाहरणानि काशिकाकारेणाऽपि प्रदर्शितानि; पतञ्जलिना "इकोऽसवर्णे शाकल्यस्य ह्रस्वश् च"[9] इत्यस्य सूत्रस्य चकारोऽपि प्रत्याख्यातः, वार्तिककारेण च "**ईषाअक्वादिषु च्छन्दसि प्रकृतिभावमात्रम् (द्रष्टव्यम्)**"[10] इति वचनमारब्धम्; **तथापि पाणिनिना शाकलविधिना त्रैरूप्यं सिषाधयिषितमित्यस्माकम् प्रतिभाति** । तथा च 'इकोऽसवर्णे शाकल्यस्य प्रकृत्या' इत्येकवँ वाक्यम्, तस्य च 'कुमारी अत्र' इत्यादिकमुदाहरणम्; 'इकोऽसवर्णे शाकल्यस्य ह्रस्वः' इत्यन्यद् वाक्यम्, तस्योदाहरणञ् च 'कुमारि अत्र' इत्यादिकम् बोद्धव्यम् । चकारश् च यणादिभिः प्रकृतिस्थदीर्घेण च ह्रस्वस्य समुच्चयम् प्रतिपादयति; तथा च कुमार्यत्र इति च भवति । एवञ् च त्रैरूप्यं सिद्ध्यति । तथा च तत्र वार्तिकमपि "ईषाअक्वादिषु अकारस्यापि सवर्णेऽपि च्छन्दसि" इत्येव पठितुमुचितम् । एवमेव ऋत्यक इत्यत्रापि त्रैरूप्यमेव सिषाधयिषितमिति 'ऋति अकश् शाकल्यस्य

---

१. ५।१२।११ । २. १०।१।३ । ३. ६।११४।१, २ ।
४. ३।३४ । ५. अष्टा. ६।१।१२८। ६. कौ.सा.आ.सं.७०२ ।
७. १०।१८३।२ । ८. व्याकरणचन्द्रोदये, पञ्चमखण्डे, पृ. ४३९।
९. अष्टा. ६।१।१२७ । १०. पा. व्या. भा ६।१।१२७, वा. २ ।

प्रकृत्या' इत्येकवँ वाक्यम्, तदुदाहरणानि च विधर्ताँ ऋतम्[1] इत्यादिकानि बोद्ध्यानि। 'ऋति अकश् शाकल्यस्य ह्रस्वाः' इत्यन्न्यद् वाक्यम्, तदुदाहरणानि च ब्रह्मम्मग ऋग्भिः[2] इत्यादिकानि बोद्ध्यानि। चकारश् च यणादिभिः प्रकृतिस्थदीर्घेण च ह्रस्वस्य समुच्चयम् प्रतिपादयति। तथा च ऋतस्यर्तेन[3] इत्यादिकञ् चान्न्वाख्यातम् भवति। ह्रस्वतायाः वैकल्पिकत्वम् मुनिना पतञ्जलिनाऽपि ऋत्यक इति सूत्रस्य वार्तिकानावँ व्याख्याने प्रोक्तम्। वैकल्पिकश् च ह्रस्वो यथा यणादिना समाविष्टो भवति तथैव प्रकृतिभावेनाऽपि इति अत्तरतरैरूप्यमेव स्वीकरणीयम् प्रतिभाति, न तु काशिकाकारादि-गतानुगतिकतया द्वैरूप्यमेव। लृकारस्यापि ऋकारसवर्णतया लृकारेऽप्ययवँ विधिः प्रवर्तते लोके। तथा च पाणिनीयव्याकरणभाष्ये प्रत्याहाराह्निके प्रयोगाः— किवँ विशेषेण लृकारोपदेशश् चोद्द्यते, प्लुत्याद्द्यर्थञ् च लृकारोपदेशः, न लृतकः, सूत्रभेदेन लृकारोपदेशः इति। ऋग्वेदप्रातिशाख्यवर्गद्द्वयेऽपि— "न लृकारः" इति। शुक्लयजुर्वेदप्रातिशाख्ये च— "स्वराश्च च लृकारवर्ज्जम्"[4] इति, ऋलृवर्णाबाभ्याम्"[5] इति "ऋलृवर्णे"[6] इति च। एष विधिरसमासे समासे च प्रवर्तते। तथैव चोदाहरणानि समासेऽपि प्रदर्शितानि। लोकेऽपि सप्तऋषयः, पित ऋगङ्ग करोति, वारि ऋच्छति, किशोरि ऋतुमती, मधु ऋद्ध्यति, तनुऋद्धिः, पितृऋगम्, गमनृऋच्छती समानार्थौ इत्यादीनि उदाहरणानि समासेऽसमासे वाऽपि यथायथन् द्रष्टव्यानि।

प्रायेणाऽसवर्णे स्वरे परे अ इ उ ऋ लृ इत्येतेषाम्, अकारस्य तु सवर्णेऽपि स्वरे परे प्रकृतिभावस्योदाहरणानि तु ऋतस्यँ एकम्[7], उग्रँ ओकः[8], भरँ ओजः[9], अमितन्तँ एवैः[10], ईशा अक्षराः[11], एवाँ अग्निम्[12] पथाँ अनेहसः[13], पूषा अविष्टु[14], प्रशा असि[15], भीषाँ अद्द्रिवः[16], मनीषा अग्निः[17], स्वधा अवस्तात्[18], अया ईशानः[19], ज्या इयम्[20], शरद्धा इत्[21],

---

१. शा.ऋ.म.सं. २।२८।४। २. शौ.अ.वे.म.सं. १०।१।१२।
३. तत्तरैव ६।११४।१, २। ४. १।८७। ५. ४।१७।
६. ४।१४८। ७. ८।१००।५। ८. ७।२५।४। ९. ९।९८।१०।
१०. १।७९।२। ११. ८।५।२९। १२. ५।६।१०।
१३. १।१२९।९। १४. १०।२६।९। १५. १०।४।१।
१६. १।१३३।६। १७. १७०।१। १८. १०।१२९।५।
१९. १।८७।४। २०. ६।७५।३। २१. ७।३२।४।

निद्द्रा ईशत[1], सचाँ इन्द्रः[2], उती अनूती[3], पृथिवी अन्तरिक्षम्[4], पृथुज्ज्रयी असुर्येव[5], साम्म्राज्ज्ञी अधिदेवृषु[6], सुशमी अभूवन्[7], उ पु ऊतिभिः[8] **इत्यादीनि शाकलऋग्वेदमन्त्रसंहितायाम्;** का ईम्[9], धरुवा असदन्[10], सदना अकरम्म[11], होतारा ऊर्द्ध्वम्[12], ज्या इयम्[13], स्वधा अवस्तात्[14], प्रतिमा अस्तति[15], ऊती अशश्याम[16], पृथिवी उत द्द्यौः[17] (विस्प्पती इवेति विस्प्पती इव[18]) इत्युदाहरणानि **माध्यन्दिनीयानाम् मन्त्रसंहितायाम्** । स्वधा अस्स्युर्वी[19], परमा असि[20], परपा असि[21] परबुद्धिनया ईरते[22], ज्या इयम्[23], आ पूषा एत्त्वावसु[24], अमिनन्त एवैः[25], इत्यादीनि उदाहरणानि **तैत्तिरीयसंहितायाम्** । शौनकिनामथर्ववेदमन्त्रसंहितायाञ् च एना एहाः[26], पृथिवी उत द्द्यौः[27], अधिष्ट्ठाता अन्तिकात्[28] इत्यादीनि उदाहरणानि प्राप्प्यन्ते । एवञ् च अकारस्स्याऽपि सवर्णे स्वरे परेऽपि प्रकृतिभावोऽप्युदाहृतो भवति। लोकेऽपि अकारस्स्याऽपि असवर्णे सवर्णे च स्वरे परेऽपि संहिताया अविवक्षामाश्श्रित्यापि प्रकृतिभाव उपपादयितुं शक्क्यः; ह्रस्स्वता तु वचनाभावात् सँस्कृतभाषाजीवितप्प्रवाहस्स्याऽवरुद्धत्त्वाच् च नैव प्प्रतिपादयितुं शक्क्या । एवञ् च कर्म अस्ति, पिता अस्ति, कर्म इदम्, पिता एति, वारि अस्ति, नारी आह, नारि आह, नार्याह, मधु अस्ति, धातृ इदम्, कुमारी धात्तृ इत्याहेत्यादीनि लौकिकानि उदाहरणानि द्रष्टव्यानि । एतद्विषयेऽपि विकल्पा वेदेषु व्यवस्स्थिता एव, लोके तु इच्छाविकल्पा बोद्ध्याः । पाणिनीयव्याकरणे तु सूत्त्रकार-वार्त्तिककार-भाष्ष्यकाराणाम् मद्ध्ये केनाऽपि वेदविषयेऽपि विषयविभागो न कृत इति तस्स्य व्याकरणस्स्य सर्ववेदपारिषदताया इदमप्प्यननुकूलमेव विभाव्यते ॥४६-४८॥

---

१. ८।४८।१४ । २. १।५१।११ । ३. ६।२९।६ ।
४. ३।८।८ । ५. १।१६८।७ । ६. १०।८५।४६ ।
७. १०।२८।१२। ८. १।११२।१। ९. २३।५५। १०. २।६।
११. ८।१८। १२. २७।१८। १३. २९।४०। १४. ३३।७४।
१५. ३२।३ । १६. १८।७४ । १७. ३३।४२ ।
१८. ३३।४४ (पदपाठे)। १९. १।१।९।३। २०. ४।४।११।३ ।
२१. २।५।१२।४ । २२. ४।३।१३।६ । २३. ४।६।६।१-२ ।
२४. २।४।५।१ । २४. ३।१।११।५ । २५. १२।३।३३ ।
२६. १८।१।५ । २७. ४।१६।१ ।

ईकारोऽनृत्यो द्विवचने ऊकारोऽनृत्यस् तथैव च ।

एकारोऽनृत्यश् चाऽपि सदा प्रकृत्या स्यात् स्वरे परे ॥४९॥

तथा हि ऋग्वेदप्रातिशाख्ये— "षष्ठादयश् च द्द्विवचोऽनृतभाजस् त्रयो दीर्घाः (प्रगृह्याः)"[1] इति, "प्रकृत्येतिकरणादौ प्रगृह्याः, स्वरेषु चार्ष्याम्"[2] इति च । तदुदाहरणानि च शाकलऋग्वेदमन्त्रसंहितायाम् हरी इह[3], रोदसी उभे[4], पिप्रती ऋतम्[5], इन्द्रवायू इमे[6], ते इद्[7], उभे ऋघायमाणः[8], दधाते अपसम्[9], सचेते अनवह्वरम्[10] इत्यादीनि । शुक्लयजुर्वेदप्रातिशाख्ये च— "प्रगृह्यम्, एकारेकारोकारा द्द्विवचनानृताः"[11] इति, "प्रगृह्यं स्वरे"[12] इति च । तदुदाहरणानि च माध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदमन्त्ररत्नमयज्ञसंहितायाम्— द्यावापृथिवी अव[13], द्यावापृथिवी इमे[14], इन्द्राग्नी आहुवद्ध्यै[15], ऋतू अग्नेः[16], ऋतू अभिकल्पमाना[17], स्वर्त्थे अन्न्यान्न्या[18], ते अस्स्य[19], सुशिल्पे ऋतस्स्य[20] इत्यादीनि बोद्ध्यानि । काण्वानामाम्नाये च— द्वे सृती अशृणवम्[21], द्यावापृथिवी आततन्थ[22], रोदसी उभे[23], देवी ऊर्ज्जाहुती[24], ऊरू अरत्तँनी[25] इत्यादीनि । तैत्तिरीयप्रातिशाख्येऽपि "अथ प्रग्रहाः"[26] इत्यादिना प्रगृह्याः प्रतिपादिताः, "न प्लुतप्रग्रहौ"[27] इति तेषाम् प्रकृतिभावश् च प्रोक्तः । तत्तर एतत्कारिकासम्बद्धानि उदाहरणानि च तैत्तिरीयसंहितायाम्— इन्द्राग्नी आहुवद्ध्यै[28], कार्ष्णी उपानहावुपमुञ्चते[29], कल्पयन्नी ऊर्द्ध्वयँ यज्ञम्[30], पृषती अभूताम्[31], बाहू उपस्स्तुतम्[32], अद्ध्वर्य्यू आस्ताम्[33], सदने ऋतस्स्य[34], अच्छिद्द्रे बहुले उभे[35], सुशिल्पे ऋत-

---

१. १।७१ । २. २।५१–५२ । ३. १।१६।२ ।
४. १।१०।८ । ५. ४।५६।७। ६. १।२।४। ७. ६।७०।४।
८. १।१०।८। ९. १।२।९। १०. २।४१।६। ११. १।९२,९३।
१२. ४।८८ । १३. २।९ । १४. १३।२५ । १५. ३।१३ ।
१६. १३।२५। १७. तत्तरैव। १८. ३३।५। १९. २७।१७।
२०. १४।६, १५, १६, २७; १५।५७ । २१. २५।५१ ।
२२. २५।५६ । २३. २२।४८। २४. २३।५५। २५. २१।१०५।
२६. ४।१। २७. १०।२४। २८. १।१।१४। २९. ५।४।४।४।
३०. १।२।१३।२ । ३१. ४।६।९।४ । ३२. ४।२।८।१ ।
३३. २।६।४।१ । ३४. ४।१।११।४ । ३५. ४।१।३।२ ।

स्स्य[1], मेद्ध्ये एवैने करोति[2] इत्यादीनि बोद्ध्यानि। ऋक्तन्त्रे च "द्व्यर्थे(न सन्निकर्षः)"[3] इत्युक्तम्। तत्र कौथुमानां सामवेदार्चिकसंहितायाम्— इन्द्राग्नी अपात्[4] इन्द्राग्नी इष आवृणे[5], रोदसी आपप्प्राथ[6], पिप्प्रती ऋतम्[7], जनुषी उभे[8], उभे अनु[9] इत्यादीनि उदाहरणानि प्राप्प्यन्ते। शौनकीयचतुरध्यायिकायाञ्च— "(इकारोकारौ) द्विवचनान्तौ (प्रगृह्यौ), एकारश्च"[10] इति, "प्रगृह्याश्च प्प्रकृत्या"[11] इति च। तत्र शौनकिनामथर्ववेदमन्त्रसंहितायाञ्च— पार्ष्णी आभृते[12], इन्द्राग्नी आभरताम्[13], इन्द्रवायू उभौ[14], अत्त्रा दधेते अमृतानि[15], सत्यानृते अवपश्यन्[16], यौ पत्येते अप्प्रतीतौ[17] इत्यादीनि उदाहरणानि प्राप्प्यन्ते। पाणिनीयव्याकरणेऽपि "ईदूदेद् द्विवचनम् प्रगृह्यम्"[18] इति, "प्लुतप्रगृह्या अचि नित्यम्"[19] इति च। तदुदाहरणानि च पूर्वोक्तान्येव ॥४८॥

दम्पतीप्रभृतीनां हि तत्र्यक्क्षराणामिवादिके।
नैव स्स्यात् प्रकृतिस्स्थत्वमित्याहुश्शौनकादयः ॥४९॥

तथाहि ऋग्वेदप्रातिशाख्ये— "तर्यक्क्षरान्तास् तु नेवे"[20] इति, "रोदसीमे, प्रधीव, बृहती इवेति च यथागृहीतम्"[21] इति च। तदुदाहरणानि च— उपधीव[22], चर्मणीव[23], दम्पतीव[24], नृपतीव[25], विदुषीव[26], विश्पतीव[27], रोदसीमे[28], प्रधीव[29], बृहती इव[30] इति शाकलऋग्वेदमन्त्रसंहितायाम्। शुक्लयजुर्वेदप्रातिशाख्ये च— "न रोदसीमे"[31] इति, "विश्प्पतीवोपस्तृथिते"[32] इति च। तदुदाहरणञ्च— "राये नु यज् जज्जँ नतू रोदसीमे"[33] इति, "आपप्प्रिवान्रोदसी अन्तरिक्षम्"[34]

---

१. ५।१।११।३। २. ६।२।९।१। ३. ३।२।४ (७४)। ४. २८१। ५. १७०३। ६. ३७९। ७. १५९८। ८. १४२५। ९. तत्रैव। १०. १।७५, ७६। ११. ३।३३। १२. १०।२।१। १३. ५।७।६। १४. ३।२०।६। १५. ५।१।३। १६. १।३३।२। १७. ७।२६।१। १८. अष्टा. १।१।११। १९. अष्टा. ६।१।१२५। २०. २।५५। २१. २।७२, ७४। २२. २।३९।४। २३. ६।८।३। २४. २।३९।२। २५. ७।१०४।६; १०।१०६।४। २६. ५।४१।७। २७. ७।३९।२। २८. ७।८७।२, ७।९०।३। २९. २।३९।४। ३०. १।५९।४। ३१. ४।८९। ३२. ४।९०। ३३. मा. वा. शु. य. म. ब्र. य. सं. २७।२४। ३४. तत्रैव १७।५९।

इति प्रत्त्युदाहरणम् । "आविश्प्पतीव बीरिटे"[1] इति द्वितीयसूत्तर-प्रत्त्युदाहरणम् । तैत्तिरीयप्रातिशाक्ख्ये तु प्रगृह्य्यपदानि न लक्क्षण-मात्त्रेण प्प्रतिपादितानि, किन् तु परिगणितान्न्येवेति[2] अपरिगणनेनैव तद-पवादा अर्थात् प्रतिपादिताः । तत्त्र 'वाससी इव'[3] इत्त्यत्त्रापि प्रकृ-तिभाव एव दृश्य्यते । ऋक्तन्त्रे तु "ई न वपरे"[4] इति सामान्न्येनो-क्तम् । तदुदाहरणानि च वृत्तिकारेण— उपधीव, प्रधीव, चर्मणीव, दम्पतीव, वाससीव इत्त्युक्तानि । तत्त्राऽन्तिमम् परित्त्यज्ज्याऽन्न्यानि ऋग्वेदे प्राप्प्यन्ते न तु कौथुमसामवेत्संहितायाम् । शौनकीयचतुरद्ध्या-यिकायान् तु न प्प्रकृतिभावापवादा उक्ताः । तथा चाऽन्न्येषु वेदेषु नृपतीव इत्त्यत्त्र दृश्य्यमानमपि प्रकृतिभावापवादत्त्वन् नाऽत्त्र दृश्य्यते नृपती इव[5] इत्त्येव पाठात् । केषु चित् पुराणेषु अथर्ववेदसंहिताकोषेषु तु नृपती-वेत्त्यपि लेखो दृश्य्यत इति तत्परीक्क्षकाः । पाणिनिमुनिनाऽपि नैते प्रकृतिभावापवादा उल्लिखिताः । नापि वार्तिककारेण न वा भाष्य्यकारेण। काशिकायान् तु "ईदादीनाम् प्रगृह्य्यत्त्वे मणीवादीनाम् प्रतिषेधो वक्तव्य्यः"[6] इति पट्ठ्यते । तदुदाहरणानि च तत्त्र "मणीवोष्ट्रस्स्य लम्बेते प्रियौ वत्सतरौ मम"[7] इति, "दम्पतीव जम्पतीव रोदसीव" इति च पठितानि । तस्स्यैतस्स्य काशिकाकारधृतवार्तिकरूपवचनस्स्य वार्तिककारभाष्य्यकाराव्भ्यामपठितत्त्वादप्प्रमाणत्त्वमुक्तञ्च कय्यटेन तदनुयायिभिर् भट्टोजिप्प्रभृतिभिश् च । पदमञ्जरीकारोऽपि मणीवादी-नावँ् वाशब्दस्स्योपमानार्थतया निर्वाहꣳ कर्तव्य्यः, रोदसीवादीनान् तु च्छान्दसत्त्वेनेति भणति । जिनेन्द्रबुद्धिस् तु "सम्बुद्धौ शाकल्य-स्स्येतावनार्षे"[8] इत्त्यत्त्र करिष्य्यमाणस्स्य शाकल्यग्रहणस्स्य सिंहाव-लोकितन्न्यायेन "ईदूदेद् द्विवचनम् प्रगृह्य्यम्[9]" इत्त्यत्त्रोपस्स्थानादस्स्य विधेर् व्यवस्स्थितवँ् वैकल्पिकत्त्वम् प्रतिपाद्द्य मणीवेत्त्यादिकान् प्रयोगान् उपपादयति । युक्तञ् चैतत् । तत्त्र पाणिनीयव्याकरणस्स्य सर्ववेदपारिषदताया वावदूकेन पतञ्जलिनाऽपि मन्न्यामहे अथर्वणिकत्त्वाच् शौनकीयचतुरद्ध्यायिकाक्ख्ये अथर्ववेदप्रातिशाक्ख्येऽस्स्य विधेरनुपलब्ध्य-मानत्त्वादेवाऽयम् प्रकृतिभावाऽपवादो नोल्लिखितः । तथाऽपि अस्स्य विधेर्

---

१. मा. वा. शु. य. म. व्र. य. सं. ३३।४४ । २. ४।१–५४।
३. तै. सं. १।५।१०।१ । ४. ३।२।५ (७५) । ५. ८।४।६ ।
६. १।१।११ । ७. महाभारते चित्त्रशालासं. १२।१७७।१२ ।
८. अष्टा. १।१।१६ । ९. अष्टा. १।१।११ ।

ऋग्वेदप्रातिशाख्यादिषु उल्लिखितत्वात् पाणिनीयव्याकरणस्य सर्ववेदपारिषदत्वञ्च कामयमानैरयम् प्रकृतिभावापवादोऽपि तत्तत् पूरणीय एव। तत्तत् वैदिकानि अपि उदाहरणानि प्रदर्श्य प्रकृतिभावापवादमेतम् बौद्धः प्रतिपादयति; ब्राह्मणास् तु वेदविमुखा युक्तियुक्तमपि वाक्यञ्च खण्डयित्वाऽऽत्मनावँ वेदविमुखत्वम् प्रख्यापयन्तीति कियदुपालभामहे वेदविमुखान् ब्रह्मवन्धून् ॥५०॥

आधारार्थकदीर्घेकारोकारानुतावमी सदा।
अस्मे युष्मे त्वे च मे चाऽनुतोदात्ततत्वेऽविकारिणः ॥५१॥

तथाहि ऋग्वेदप्रातिशाख्ये— "साप्तमिकौ च पूर्वौ"[1] इति। तदुदाहरणे च 'सोमो गौरी अधिश्रितः'[2] इति, "स्वायान् तनू ऋतत्वे"[3] इति च। वेद्द्यस्स्याम्[4] इति ऊत्परवाक्[5] इति च तदपवादौ ऋग्वेदप्रातिशाख्ये परिगणितौ[6]। "अस्मे युष्मे त्वे अमी च प्रगृह्यया:"[7] इति च ऋग्वेदप्रातिशाख्ये। तदुदाहरणानि च शाकलऋग्वेदसंहितायाम्— अस्मे आवहतं रयिम्[8], युष्मे इद्[9], युष्मे इत्था[10], त्वे इद् धूयते हविः[11] इति; 'अमी इति'[12] इति च पदपाठे। शुक्लयजुर्वेदप्रातिशाख्ये च— "चमू, अस्मे, त्वे"[13] इति, "मे उदात्तम्"[14] इति, "अमी च पदम्"[15] इति च। तदुदाहरणानि च माध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदमन्त्रार्षसंहितायाम्— 'चमू इति चमू'[16] इति पदपाठे; अस्मे आरात्[16] त्वे इषः[18] त्वे अग्गँ ने[19] इति; 'मे इति'[20] इति तु पदपाठे; 'अमी अनन्यो अनन्यम्'[21] इति। तैत्तिरीयप्रातिशाख्ये च— "अस्मे"[22] इति, "त्वे इत्यनिङ्ग्यानुतः"[23] इति, "अमी"[24] इत्यादि च। तदुदाहरणानि च तैत्तिरीयसंहितायाम्— अस्मे आरात्[25], त्वे इषः[26], अमी अनूयाजाः[27] इत्यादीनि। ऋक्तन्त्रे च— "त्वे (न सन्निकृष्यते)"[28] इति। त्वे

---

१. १।७२। २. शा. ऋ म. सं. ९।१२।३। ३. तत्तरैव १०।१८३।२। ४. तत्तरैव २।३।४। ५. तत्तरैव १०।१५।४। ६. २।७०। ७. २।७३। ८. ८।५।१५। ९. ८।१८।१९। १०. ६।१८।५। ११. १।२६।६। १२. १।२४।६। १३. १।९६। १४. १।९७। १५. १।९८। १६. ८।३९। १७. २०।५२। १८. १२।१०८। १९. ३३।१४। २०. ४।२२। २१. १७।४७। २२. ४।९। २३. ४।१०। २४. ४।१२। २५. १।७।१३।५। २६. ४।२।७।३। २७. ६।१।५।४। २८. ३।३।२ (८२)।

अग्ने स्वाहुत[१] इति सामवेदे । शौनकीयचतुरद्ध्यायिकायाञ् च "दीर्घꣳ प्रगृह्यश् च, इकारोकारौ च सप्तम्म्यर्थे, द्विवचनान्तौ, एकारश् च, अस्मे युष्मे त्वे मे इति चोदात्ताः, अमी बहुवचनम्"[२] इति, "प्रगृह्याश् च प्प्रकृत्या"[३] इति च । तदुदाहरणानि च शौनकिनामथर्ववेदसंहितायाꣳ पदपाठे 'आष्ट्री इति'[४] 'तनू इति'[५] 'त्वे इति'[६] 'अस्मे इति'[७] । अन्तोदात्ते युष्मे, मे इति पदे शौनकिनामथर्ववेदसंहितायान् नैव प्राप्प्येते । पाणिनीये व्याकरणे च "(प्रगृह्यम्) अदसो मात्, शे"[८] इति; "ईदूतौ च सप्तम्म्यर्थे"[९] इति, "प्लुतप्रगृह्या अचि नित्यम्"[१०] इति च । तदुदाहरणानि च यद्द्यपि काशिकाकारेणाऽपि एकद्द्वानि विहायाऽन्न्यानि पदपाठादेवोद्धृतानि, तथाप्प्यस्माभिर् यथोपलब्धि प्रायस् संहितापाठेब्भ्य एवोद्धृत्त्योपस्स्थापितानि तत्तत्प्रातिशाक्ख्यसूत्रोदाहरणेषु इति तानि तत एवाऽवगन्तव्यानि ॥५१॥

ईषदाद्द्यर्थकाकारवँ वर्जयित्वा निपातकाः ।
अव्व्यञ्जनैकस्स्वरकाः प्रकृत्त्या स्युस् स्वरे परे ॥५२॥

तदुक्तमृग्वेदप्रातिशाक्ख्ये— "पदञ् चाऽन्न्यः (ओकारः)"[११] इति । तदुदाहरणञ् च 'ओ इति'[१२] इति शाकलऋग्वेदमन्त्रसंहितापदपाठे । शुक्लयजुर्वेदप्रातिशाक्ख्ये च— "उकारोऽपृक्तः"[१३] इति, तदुदाहरणे च माद्ध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदमन्त्रसंहितायाम्—"एतवा उ अञ्ज्यञ्जाना"[१४] इति, 'न वा उ एतन् म्रियसे"[१५] इति च । ऋक्तन्त्रे च— "(प)दमु, ओभूतञ् च"[१६] इति । तदुदाहरणानि च कौथुमसामवेदार्चिकसंहितायाम्— "तमु अभिप्प्रगायत"[१७], "इत्थमु आद्वन् यथा"[१८], "तस्मा उ अद्द्य"[१९] इति; "दोषो आगात्"[२०] "एषो उषा"[२१] "प्रो अयासीत्"[२२] इति च । "आ णि (पादादौ)"[२३] इति च ऋक्तन्त्रे । तदुदाहरणानि च कौथुमसामवेदार्चिकसंहितायामेव— "क इमन् नाहुधीष्ष्वा

---

१. कौ.सा.आ.सं.३८। २. १।७३–७८। ३. ३।३३। ४. ६।२७।३। ५. ४।२५।५। ६. ५।२।३;८।९।९[२]। ७. ४।२१।१;८।१।३,४२। ८. अष्टा. १।१।११–१३ । ९. तत्तरैव १।१।१९ । १०. तत्तरैव ६।१।१२५ । ११. १।६९ । १२. १०।११७।५ । १३. १।९५ । १४. १७।९७ । १५. २३।१६ । १६. ३।१।९,१०। १७. ३८२ । १८. ३०५। १९. २७२। २०. १७७ । २१. १७८ । २२. ५५७ । २३. ३।२।१ ।

इन्द्रं सोमस्य तर्पयात्"[1], "कदा वसो स्तोत्तरं हर्यत आ अव श्नसा रुधद् वाः"[2] इति, "यदिन्द्र नाहुषीष्वा ओजो नृम्णञ् च कृष्टिषु"[3] इति च। शौनकीयचतुरद्ध्यायिकायाञ् च— "निपातोऽपृक्तो-ऽनाकारः"[4] इति। तदुदाहरणानि च— 'ओ इति'[5] इति पदपाठे; ताँ उ अर्वाच आहुः[6], स उ एव महायमः[7] इति च शौनकिनामथर्ववेदसंहिता-याम्। पाणिनीयव्याकरणे च— "निपात एकाजनाङ्"[8] इति, "प्लुत-प्रगृह्यया अचि नित्यम्"[9] इति च। तदुदाहरणानि च पूर्वोक्तान्येवाऽपि भवितुमर्हन्ति। भाष्यकारेण 'आ एवन् नु मन्यसे, आ एवङ् किल तत्' इत्युदाहरणे उक्ते। अब्भ्र आँ अपः[10], गभीर आँ उग्रपुत्रे[11] इत्यादिषु सप्तम्यर्थक आ इत्यपि प्रकृत्या स्थितो दृश्यते। 'इ इति'[12] 'ई इति'[13] पदपाठे प्राप्येते। अ अपेहि, इ इयमेतावदपि न जानीते, ई इहागच्छ, उ उत्तरन् देहि, ऊ उत्तिष्ठ, ए एहि, ऐ आयाहि, ओ ओदनम् पच, औ अपेहि इत्यादीनि अदूरसम्बोधनाद्द्व्यर्थकनिपात-युतानि लौकिकानि उदाहरणानि उन्नेयानि ॥५२॥

उ इत्यस्य यभिन्नेन व्यञ्जनेन युतस्य वः।
स्वरे परे विकल्पे स्यान् मोऽनुस्वारादिरत्तर न ॥५३॥

तदुक्तम् पाणिनीयव्याकरणे— "मय उञो वो वा"[14] इति। ऋग्वेद-प्रातिशाख्ये तु— "आर्ष्यामेव सन्ध्ययकारपूर्वो विवृत्तेश् च प्परत्त्य-यस् सन्नुकारः"[15] इति। तथा च तादृशस्य उकारस्यैव प्रकृतिभाव इति "अभूर्वौक्क्षीः"[16] इत्यादिषु प्रकृतिभावो न भवति, वकार एव भवति ऋग्वेदे। सन्ध्ययकारपूर्वस्य उ इत्यस्य तु प्रकृतिभाव एव भवति। तथा च "परत्त्यु अदर्शि"[17] "व्यु आयुरानट्"[18] इत्यादिषु प्रकृतिभाव एव। एतादृशे स्थले "मय उञो वो वा" इति पाणिनीयसूत्तरस्य प्राप्तिर् नास्तीति एष प्रकृतिभावोऽपि पाणिनिसङ्गृहीत एव। शाकल-ऋग्वेदसंहितायाँ व्यञ्जनेन सर्वथाऽपृक्तस्य उ इत्यस्य प्रकृतिभाव-

---

१. १९०। २. २२८। ३. २६२। ४. १।७९। ५. १८।१।१। ६. ९।१४।१९। ७. १३।४।५। ८. अष्टा. १।१।१४। ९. तत्तरैव ६।१।१४। १०. शा. ऋ. म. सं. ५।४८।१। ११. तत्तरैव ८।६७।११। १२. कौ. सा. आ. सं. २।१९०। १३. शा. ऋ. म. सं. १।१०३।१। १४. अष्टा. ८।३।३३। १५. २।५६। १६. १०।२७।७। १७. ७।८१।१। १८. १०।२७।७।

स्स्योदाहरणानि अपि बहूनि प्राप्यन्ते । तथाहि अमूदुभा उ अंशवे[1] अर्थमिद् वा उ अर्थिनः[2], न वा उ एतन् म्रियसे[3], ताँ उ अर्वाच आहुः[4], यत उ आयन्[5] एतवा उ अन्ज्यन्ज्ञाना[6] इत्यादीनि तदुदाहरणानि बोद्ध्यानि । पूर्वपदान्तस्थयकारभिन्न- व्यञ्जनपृक्तस्य उ इत्यस्य तु विकारो भवति । तथाहि शाकलऋग्वेदसंहितायाम्— अवेद्विन्द्र जल्गुलः[7], तिरर्वशश्विना[8], घृतम्वस्स्य धाम[9], प्रेद्वग्निः[10], वेषीद्वस्य[11] इत्यादीनि उदाहरणानि प्राप्यन्ते । **तत्र यद्द्यपि पाणिनिना मयः' परस्यैव उकारस्य वकारादेश उक्तस् तद्वार्तिककारभाष्यकाराभ्यामपि स एवानुमतस् तथाऽपि तिरर्वशश्विना[12] इत्यादिषु अमयX परस्यापि उकारस्य वकारभावो दृश्यते ।** शुक्लयजुर्वेदप्रातिशाख्येऽपि— "उकारोऽपृक्तः"[13] इति, सर्वथा व्यञ्जनसम्पर्करहितस्यैव उकारस्य प्रगृह्यतायाX प्रतिपादितत्वात्, "उकारोऽपृक्तोऽस्पर्शात्"[14] इति च स्वपूर्ववर्स्तिस्पर्शसम्पर्करहितस्यैव उकारस्य प्रकृतिभावस्य प्रतिपादितत्वाच् च शुक्लयजुर्वेदे पूर्वपदान्तस्स्पर्शपृक्तस्य उकारस्य वकारभावो भवति; तथाहि— सम्म्वेतद्द्धानि[15], घृतम्म्वस्स्य[16], किम्म्वावपनम् महत्[17], शम्म्वस्तु[18], तद्द्वन्तिके[19] इति । तैत्तिरीयप्रातिशाख्ये तु उ इत्यस्य प्रगृह्यत्वन् नोक्तम्, न च वस्तुतX प्रकृतिभावो वाऽप्युक्तः । तैत्तिरीयसंहितायाञ् च व्यञ्जनापृक्तस्य अस्पर्शव्यञ्जनपृक्तस्य च उ इत्यस्य स्स्थाने 'उव्' इत्यादेशो धेक्ष्यते[20], स्पर्शपृक्तस्य स्स्थाने च वकारादेश एव धेक्ष्यते[21]; तथाहि 'अदन्त्युवेवास्य'[22], स उवेक-[23], "न वा उवेतन् म्रियसे"[24] इति 'तस्मादवाश्यम्'[25] 'तद्वाहुः'[26] इति च । अत्तराऽपि पूर्वेषामुदाहरणानाम् पाणिनीयेन व्याकरणेन न सम्म्यगन्वाख्यानङ् क्रियते इति तस्य न्यूनता स्फुटा । ऋक्तन्त्रे तु— "(प)दमु"[27] इति सामान्यतयैव 'उ' इत्यस्याऽसन्निकर्षX प्रतिपाद्द्यते ।

---

१. १।४६।१० । २ १।१०५।२ । ३. १।१६२।२१ ।
४. १।१६४।१९ । ५. २।२४।६ । ६. ४।५८।९ ।
७. १।२८।१–४। ८. १।३४।२। ९. २।३।११। १०. ३।५।२।
११. ४।९।६ । १२. शा. ऋ. म. सं. १।३४।२ । १३. १।९५।
१४. ४।९१। १५. ८।६१। १६. १७।८८। १७. २३।९,४५।
१८. २३।४४ । १९. ४०।५ । २०. द्र. तै. प्रा. ९।१६ ।
२१. द्र. तत्तत्रैव ९।१७। २२. २।३।७।४। २३. ४।३।३।२। २४. ४।६।९।४।
२५. ६।१।११।७ । २६. ७।५।७।१। २७. ३।१।९ (६९) ।

कौथुमसामवेदार्चिकसंहितायाञ् च "तमु अभि प्प्रगायत"[1] "इत्थमु आद्वन् यथा"[2] इत्यादिषु पूर्वपदान्तस्स्पर्शपृक्तस्स्याऽपि उ इत्यस्स्याऽविकार एव दृश्यते। सोऽयमविकारस् तु पाणिनिनाऽपि सङ्गृहीत एव मयऽ परस्स्य उञो विकल्पेनैव वकारादेशम् प्रतिपादयता। शौनकीयचतुरद्ध्यायिकायान् तु सामान्यतया व्यञ्जनाऽपृक्तस्स्य 'उ' इत्यस्स्यैव परगृह्यत्वमुक्तमिति पूर्वपदान्तव्यञ्जनपृक्ततत्वेऽपि उ इत्यस्स्य विकारो भवत्येव स्वरे परेऽथर्ववेदे इति गम्यते[3]। तथा च 'सम्म्वास्स्ना'[4] इति शौनकिनामथर्ववेदमन्तरसंहितायां श्रूयते। तत्तर 'तद्वस्स्य'[5] इत्यादिकन् च प्राप्यते। यथा वकारादेशस्स्याऽसिद्धत्वाद् "मोऽनुस्स्वारः" इत्यादिकन् न प्प्रवर्तते किम्वुक्तम् इत्यादिषु पाणिनीयव्याकरणे, तथैव "आनुपूर्व्येण सन्धीन्"[6] "न परकालऽ पूर्वकाले पुनः"[7] "तत्तर पूर्व्वम्पूर्व्वम् प्रथमम्"[8] इत्यादिवचनेभ्यऽ प्रातिशाख्यप्रक्क्रिययापि अस्मिन् वकारे परे पदान्तस्स्य मकारस्स्याऽनुस्स्वारपरसवर्णापत्तौ न भवत इति बोद्ध्यम् ॥५३॥

उ इत्यस्स्य तु शाकल्यमते हीतावनार्षके।
भवेत् प्रकृतिभावो वा ऊँ वाऽन्येषाम् मते तु वः ॥५४॥

एतद्विषये ऋग्वेदप्रातिशाख्यवचनयँ यथा— "उकारश् चेतिकरणेन युक्तो रक्तोऽपृक्तो द्राघितश् शाकलेन"[9] इति। शाकल्यकृते ऋग्वेदपदपाठे च 'सूर्य्याय पन्थामन्वेतवा उ'[10] इत्यादौ "सूर्य्याय। पन्थाम्। अनुऽएतवै। ऊँ इति" इत्यादिर्वेग पट्ठ्यते। शुक्लयजुर्वेदप्रातिशाख्ये च— "(इतौ परे) उकारोऽपृक्तो दीर्घमनुनासिकम्"[11] इति। तदुदाहरणञ् च "तामु धीरासोऽअनुदिश्य यजन्ते"[12] इत्यादिषु "ताम्। ऊँऽ इत्यँ। धीरासः। अनुदिश्येत्यनु दिश्य। यजन्ते" इत्यादिकम् बोद्ध्यम्। यद्द्यपि उव्वटेन ऋग्वेदप्रातिशाख्यभाष्येऽपि "इतिकरणेन युक्त इति युक्तवचनमितिकरणात् परस्स्यापि उकारस्स्य दीर्घत्वं रक्ततत्वञ् च करोति— ऊँ इत्यँ"[13] इत्युक्तन् तथापि ऋग्वेदपदपाठे "ऊँ इति" इत्येव पट्ठ्यते। क्रमपाठे तु "ऊँ इत्यँ" इत्येव पठनीयम् प्रतीयते[14]। **वस्तुतस् तु शुक्लयजुर्वेदेऽपि पदपाठे "ऊँ इति"**

---

१. ३८२(ऋ.९।१५।१)। २. ३०५। ३. शौ.च.३।३६। ४. ६।५६।३। ५. ९।४।४। ६. ऋ. प्रा. २।७। ७. शु. य. वे. प्रा. ३।४। ८. तै. प्रा. ५।३। ९. १।७५। १०. १।२४।८। ११. ४।९४। १२. १।२८। १३. १।७५। १४. ऋ. प्रा. १०।७।

इत्त्येव पठनीयम् इति[1] पदचर्चायामेव "ऊँ इत्त्यँ" इति पठनीयम् इति विज्ज्ञायते[2]। अत एव पदपाठे सर्वत्तर "ऊँ इत्त्यँ" इति पठनञ् चिन्त्यम् भाति। तैत्तिरीयप्रातिशाक्ख्ये तु नायवँ विधिर् दृश्यते। तत्तर तैत्तिरीयसंहितायाम् पदपाठेऽपि "उ"[3] इत्त्येव पट्ठ्यते। इतिना व्यवधानन् नैव क्क्रियते। कौनकीय-चतुरद्ध्यायिकायाञ् च— "उकारस्स्येतावपृक्तस्स्य, दीर्घ× प्रगृह्य्यश् च"[4] इति; "उकार× परिहार्य एव"[5] इति, "द्वाब्भ्यामुकारः, अनुनासिकदीर्घत्त्वम् प्रयोजनम्"[6] इति च। एवञ् च अथर्ववेदे 'उ' इत्त्यस्स्य पदपाठे 'ऊँ इत्त्यँ इति' इति पाठ× करणीय× प्रतीयते। किन् तु शौनकिनामथर्ववेदसंहितापदपाठे "शमु सन्त्वनूप्याः"[7] इत्त्यादिषु "शम्। ऊँ इति। सन्तु। अनूप्याः" इत्त्यादिकमेव पट्ठ्यते। ऋक्तन्तरे तु "(प)दमु"[8] इति 'उ' इत्त्यस्स्य स्वरे परे सन्निकर्षो न भवतीति सामान्न्यतया प्रतिपादितम्, इतौ परे तस्स्य दैर्घ्यरक्तत्त्वादिकन् नाऽन्न्वाक्ख्यातमिति सामपदपाठे 'उ इति' पाठस्स्यादिति प्प्रतीयते। पाणिनीयव्व्याकरणे तु "सम्बुद्धौ शाकल्ल्यस्स्येतावनार्षे"[9] इत्त्यतश् 'शाकल्ल्यस्स्येतावनार्षे' इत्त्यस्स्याऽनुवृत्तौ "उञ ऊँ"[10] इति उक्तम्। तत्तर च योगविभागेन 'अनार्षे इतौ परे उञश् शाकल्ल्यस्स्य मतेन प्रगृह्य्यसञ्ज्ञा भवति' इति, 'अनार्षे इतौ परे शाकल्ल्यस्स्य मतेन उञ ऊँ भवति, प्रगृह्य्यसञ्ज्ञश् च सः' इति, 'अन्न्येषाम् मतेन तु अनार्षे इतौ परे उञो न प्रगृह्य्यसञ्ज्ञा न च 'ऊँ' इत्त्यादेशः' इति च पतञ्जलिमुनिना व्याक्ख्यानङ् कृतम्। तथा च 'उ इति' 'ऊँ इति' 'विति' इति त्ररूपप्यन् तेनाऽन्न्वाक्ख्यातम् भवति। किन् तु 'उ इति' इति 'विति' इति वा कस्स्याश् शाखाया× पदपाठे भवतीति तत्तर केनाऽपि न सूचितम्। अस्माभिस् तु 'उ इति' इति सामवेदपदपाठेषु, 'विति' इति मैत्तरायणीय-चरक-कपिष्ठलकठशाखादिपदपाठेषु स्स्यादिति तैत्तिरीयप्रातिशाक्ख्यऋक्तन्तरादिस्स्थितिविचारात् तर्क्यते॥५४॥

ओकारान्ता निपातास् स्यु× प्रकृतिस्स्थास् स्वरे परे।
प्रायेण भाषायामेव सर्वेषामेव सम्मतौ॥५५॥

---

१. शु. य. प्रा. ४।९४। २. तत्तरैव ४।९५।
३. १। १। ४। २; १। १। १४। २, ४; १। २। ८। २; १। २। १४। ७।
४. १।७२, ७३। ५. ४।११६। ६. ४।११८–११९।
७. १।६।४। ८. ३।१।९। ९. अष्टा. १।१।१६।
१०. तत्तरैव १।१।१७, १८।

ऋग्वेदप्रातिशाख्ये "पदञ् चान्त्यः"[1] इति पठ्यते। तदर्थश्च यद्द्यपि "ओकारः पदं सन् प्रगृह्यो भवति" इति उव्वटेनोक्तस् तथापि 'ओकारान्तन् निपातरूपम् पदम् प्रगृह्यम् भवति' इत्यपि तस्यार्थो भवितुमर्हति। तथा च अथो इन्द्राय[2], अथो अद्येदम्[3], अथो अवघ्नती[4], अथो अर्वावतः[5] इत्यादीनि चोदाहरणानि शाकलऋग्वेदसंहितायाम्। 'कथो इति' इति च पदपाठः प्राप्यते[6]। शुक्लयजुर्वेदप्रातिशाख्ये ऋक्तन्त्रे च एतद्विषयकाणि वचनानि नैव प्राप्यन्ते। तैत्तिरीयप्रातिशाख्ये— "स म ह द थ पित्-पूर्व्वश् च"[7] इति सूत्रमस्ति। किन् तु तेन सो मो हो इन्दो अथो तथो पितो इति पदानि गृहीतानि इति तदपि सूत्रं सर्वथा तद्विषयकमिति वक्तुमशक्यम्। शौनकीयचतुरध्यायिकायान् तु— "ओकारान्तश् च"[8] इति उक्तम्। तदुदाहरणानि च अथो अहः[9], अथो इट इव[10], नो अस्मिन् रमसे पतौ[11], मो आसाम्[12] इत्यादीनि शौनकिनामथर्ववेदसंहितायाम् बोद्ध्यानि। तत्र ऋग्वेदप्रातिशाख्यादिषु एतादृशस्य वचनस्याऽनुपलम्भादुदाहरणानान् त्वेतादृशानामृग्वेदादिषु दृश्यमानत्वाद् 'अथ उ इन्द्राय' इत्यादिकः पदच्छेदश् शौनकमुनिप्रभृतीनामभिप्रेतो विज्ज्ञायते। एवञ् च सति एते प्रयोगाः "अपूर्वपदान्तगश् च"[13] "उकारोऽपृक्तः"[14], "उकारोऽपृक्तोऽस्पर्शात्"[15] "ओमूतञ् च"[16] इत्यादिभिर् वचनैरन्वाख्यातत्वेनाऽवगन्तुं शक्याः। अतोऽस्माभिरपि लोक एव एतेषामोकारान्तनिपातत्वं स्वीकृत्यैषा कारिका प्रणीता। पाणिनीये व्याकरणे तु— "ओत्"[17] इति। तदुदाहरणे च वामनेन 'आहो इति' 'उताहो इति' इति वैदिकपदपाठादुद्धृते प्रतीयेते। अहो एवमपि कुर्वन्ति जनाः, इदं सत्यमाहो इदम्, इत्थञ्च करणीयमुताहो इत्थम्, नाऽऽयाति नो अपयाति, अथ रात्तिरायात्यथो उषः इत्यादिका लौकिकाः प्रयोगा उन्नेयाः। तत्र ऋग्वेदादिपदकारा अपि "अथो इति"[18] "नो इति" इत्यादिकमेव पठन्तीति ओकारान्तनिपातत्वेन अथोप्रभृतीनां स्वरे परे प्रकृतिभावम्

---

१. १।६९। २. १।२८।६। ३. १।११३।१३। ४. १।१९१।२। ५. ९।३९।५। ६. ५।२९।१३। ७. ४।७। ८. १।८०। ९. १।२२।२। १०. ६।१४।३। ११. ३।१८।३। १२. २०।१२६।१३। १३. ऋ.प्रा.१।७०। १४. शु.य.प्रा.१।९०। १५. तत्तैरेव १।९१। १६. ऋ. त. ३।१।१०। (७०)। १७. अष्टा. १।१।१५। १८. १।२८।६; १।१७०।१।

प्रतिपादयन् पाणिनिमुनिरपि पदपाठानुयायि एव विज्ज्ञायते। यद्द्यपि पतञ्जलिमुनिना "न लक्षणेन पदकारा अनुवर्त्याः, पदकारेण तु लक्षणकारा अनुवर्त्याः, यथालक्षणम् पदञ्च कर्तव्यम्"[1] इत्युक्तम्, तथा च स्वशाखाप्रातिशाख्यादिलक्षणानुसारमेव पदञ्च कर्तव्यमासीत् पदकारैः, तथाऽपि सर्वेऽपि पदकाराः 'अथो' इत्यादिकान् शब्दान् ओकारान्तनिपातानेव मन्यमानाः प्रतीयन्ते। माध्यन्दिनीयवाजसनेयिसंहितापदपाठेऽपि "अथो इत्यथो"[2] इति, तैत्तिरीयसंहितापदपाठे च "अथो इति"[3] इति प्रत्यापद्यते ॥५५॥

ओकारान्तानि सम्बुद्धिपदानीतानार्षके।
शाकल्योक्त्या प्रकृत्या स्युः पदपाठादिके क्व चित् ॥५६॥

तदुक्तमृग्वेदप्रातिशाख्ये— "ओकार आमन्त्रितजः प्रगृह्यः"[4] इति, "प्रकृत्येतिकरणादौ प्रगृह्याः"[5] इति च। तदुदाहरणानि च इन्द्रो इति[6], वायो इति[7], विष्णो इति[8] इत्यादीनि शाकलऋग्वेदसंहितापदपाठे। शुक्लयजुर्वेदप्रातिशाख्ये च—"आकारश्च च पदान्तेऽनवग्रहः"[9] इति, "उकारश्च च (इतौ)"[10] इति च। तदुदाहरणानि च कृशानो इति[11] इन्द्रो इति[12] वितरभानो इति"[13] इत्यादीनि माध्यन्दिनीयसंहितापदपाठे। तैत्तिरीयप्रातिशाख्ये च— "ओकारोऽसंहितोऽकारव्यञ्जनपरः" इति, "स म ह द थ पित्-पूर्वश्च"[14] इति च। तदुदाहरणानि चैतद्विषयसम्बद्धानि— वद्मा हि सूनो असि[15], विष्णो हव्यं रक्षस्व[16], इन्द्रो इन्द्रियावतः[17], पितो आविशस्व[18] इत्यादीनि तैत्तिरीयसंहितायाम्। तत्प्रत्त्युदाहरणञ्च विष्णवेहि[19] इति। पदपाठेऽपि संहितापाठे यत्तर विकारो भवति धृष्णवागहि[20] इत्यादिषु तत्तर इतिना व्यवधानञ्च न क्रियते; यत्तर तु संहितापाठे विकारो न भवति विष्णो हव्यं रक्षस्व इत्यादिषु तत्तर इतिना व्यवधानञ्च कृत्वा विष्णो इति, इन्द्रो इति, पितो इति, सूनो इति इत्यादिरूपेण पठ्यते। एवञ्च सति 'तैत्तिरीयशाखायां सम्बुद्धि-

---

१. पा.व्या.भा. ६।१।२०७; ८।२।१६, वा. ५। २. ३।४३।
३. १।५।१।४। ४. १।६८। ५. २।५१। ६. १।४३।८।
७. १।१३४।२। ८. १।९०।५। ९. १।९४। १०. ४।९३।
११. ४।२७। १२. १९।५२,५४। १३. २०।८७।
१४. ४।६,७। १५. १।३।१४।७। १६. १।१।३।
१७. १।४।२७।१। १८. ५।७।२।४–५। १९. २।४।१२।३।
२०. १।४।३९।

निमित्तकौकारान्तानि निखिलान्यपि पदानि अवर्णे परे सति आर्ष्यां संहितायामपि प्रकृत्या भवन्ति, इन्दो पितो इति पदे तु अन्येष्वपि स्वरेषु परेषु आर्ष्यां संहितायामपि प्रकृत्या भवतः' इति विशेषो वेदितव्यः। ऋक्तन्त्रे तु एतद्विषयकवँ वचनन् नोपलब्ध्यते। गोमन् न इन्दो अश्वावत् सुतः[1] इत्यत्र सन्ध्यभावः, इन्दवागहि[2], वषट् ते विष्णवास आ कृणोमि[3], इन्द्रश् च वायवेषाम्[4], वायविन्द्रश् च[5] इत्यादिषु संहिताविकारश् च कौथुमानां सामवेदार्चिकसंहितायान् दृश्यते। एवन् चात्रराऽपि तैत्तिरीयसंहितायामिवैव व्यवस्था प्रतीयते। एषा च व्यवस्था "अयवावे न्यूने"[6] इति ऋक्तन्त्रसूत्रेण सूचिता सङ्गृहीता वा प्रतीयते। शौनकीयचतुरध्यायिकायान् तु प्रकृतो विषयः "आमन्त्रितन् चेतावनार्षे"[7] इति स्फुटम् प्रतिपादितः। तदुदाहरणानि च चित्तरभानो इति[8], वायो इति[9], मन्न्यो इति[10] इत्यादीनि शौनकिनामथर्ववेदसंहितायाम् पदपाठे। आर्ष्यां संहितायान् तु यस् ते मन्योऽविधद्[11] इत्येकमुदाहरणम् परिहायाऽन्यत्तर त्वं हि मन्न्यो अभिभूत्योजाः[12] तन् त्वा मन्न्यो अक्करतुः[13] इत्यादिषु सम्बुद्धिनिमित्तक ओकारोऽविकृत एवाऽधीयमानो विज्ज्ञायते। वाय ऊतये[14], वाय उदकेन[15] वाय इह[16] इत्यादिषु तु विकारो दृश्यत एव। पाणिनीयव्याकरणेऽपि एतद्विषये— "सम्बुद्धौ शाकल्यस्येतावनार्षे"[17] इत्युक्तम्। तदुदाहरणानि च पूर्वोक्तान्येव। किन् तु शाकल्यभिन्नानाम् आचार्याणाम् मतेन यदपरगृह्यत्वमाश्रित्य "वायविति" इति वामनादिभिरुदाहृतन् तत् कस्यां शाखायाम् प्रवर्तत इति न विज्ज्ञायते। उपलब्ध्यमाने शाकलऋग्वेदपदपाठे शाकल्यकृते, शुक्लयजुर्वेदपदपाठेऽज्ज्ञातमुनिकृते, तैत्तिरीयसंहितापदपाठे चाऽऽत्रेयकृते, कौथुमसामवेदसंहितापदपाठे गार्ग्यकृते शौनक्यथर्ववेदपदपाठे चाऽज्ज्ञातमुनिकृते "वायो इति" इत्येवमेव दृश्यते ॥५६॥

एकार ओकारश् चाऽपि ह्रस्वेऽकारेऽयवोदये।
परे ऋक्पादमध्ये तु स्स्यातां हि प्रकृतिस्स्थकौ ॥५७॥

---

१. ५७४। २. ७८६। ३. १६२७। ४. १६२९।
५. १६३०। ६. ३।२।६ (७६)। ७. १।८१।
८. ४।२५।३। ९. तत्तरैव। १०. ४।३२।६। ११. ४।३२।१।
१२. ४।३२।४। १३. ४।३२।५। १४. ४।२५।६।
१५. ६।६८।१। १६. ७।४।१। १७. अष्टा. १।१।१६।

अव्व्यादित्त्यादिषु यवोदयेऽकारे परेऽपि च ।
तौ प्रकृत्त्यैव स्यातां हि ऋक्पादान्तरिति स्थितिः ॥५८॥
गावोऽभितोऽनवन्तेत्त्यादिके न प्प्रकृतिस्स्थता ।
ऋक्पादान्तेऽपि कुह चिदिष्यते प्प्रकृतिस्स्थता ॥५९॥
उरःप्रभृतिकानां हि एकारौकारयोस् सदा ।
ह्रस्स्वेऽकारे परे चैवाऽविकारो यजुषि स्स्मृतः ॥६०॥
अङ्गशब्देऽङ्गशब्दस्स्यैकारश् च यजुषि स्स्थितः ।
ओस् तथाऽवपथाश्शब्देऽनुदात्तेऽविकृतो भवेत् ॥६१॥
नीचे कवर्गीयपरे धकारोदयकेऽपि तौ ।
ह्रस्स्वेऽकारे परे स्यातायं यजुषि प्प्रकृतिस्स्थकौ ॥६२॥

एताः कारिका अस्माभिर् भूम्ना पाणिनीयव्याकरणमेवोपजीव्य रचिता लाघवार्थम् । प्रातिशाख्येषु तु एतद्विषये विस्तरेण प्प्रतिपादनङ्कृतन् दृश्यते । तथा हि ऋग्वेदप्रातिशाख्ये— "अथाभिनिहितस् सन्धिरेतैः प्राकृतवैकृतैः । एकीभवति पादादिरकारस् तेऽत्तर सन्धिजाः ॥ अन्तःपादमकाराच् चेत् संहितायाल् लघोर् लघु । यकारादद्यक्क्षरम् परवं् वकारादद्यपि वा भवेत्"[1] इत्त्युक्तमिति उत्तरपदादिस्थे अकारे गुरौ सति, तस्मादकारात् परे यकारादौ वकारादौ वाऽक्क्षरे वा गुरुणि सति, तस्मादकारात् परेऽक्क्षरे यकारादौ वकारादौ वाऽप्प्यसति तु पूर्वरूपसन्धिर् न भवति, प्रकृतिभावो भवति इत्त्यर्थादायाति । तत्तर शाकलऋग्वेदसंहितायाम् उत्तरपदादिस्थे अकारे गुरौ सति प्रकृतिभावस्स्योदाहरणम्— "व्रतैस् सीक्क्षन्तो अव्व्रतम्"[2] इति; उत्तरपदादिस्थादकारात् परस्स्याक्क्षरस्स्य गुरुत्त्वे सति प्रकृतिभावस्स्योदाहरणम्— "मित्त्रमहो अवद्द्यात्"[3] इति; उत्तरपदादिस्थादकारात् परेऽक्क्षरे यकारादौ वकारादौ वाऽप्प्यसति प्रकृतिभावस्स्योदाहरणानि च— "देवासो अमृतासो अस्थुः"[4], "वज्ज्रेण धृष्णो अप ता नुदस्स्व"[5], "यथा शार्याते अपिबः"[6] इति । अन्न्यानि ऋग्वेदप्रातिशाख्यवचनानि पाणिनीयसूत्तर-पर्यालोचनप्प्रसङ्गे प्रदर्शयिष्यामः । शुक्लयजुर्वेदप्रातिशाख्ये च— "प्रकृतिभाव ऋक्क्षु"[7] इति सूत्तरेण ऋग्विषयकः प्रकृतिभावः प्रतिपादितः, तदपवादरूपम् पूर्वरूपञ् च "गाहमानः शिवः"[8]

---

१. २।३४–३५ । २. ६।१४।३ । ३. ४।४।१५ ।
४. १।१२३।१ । ५. ६।२१।७ । ६. ३।५१।७ ।
७. ४।८२ । ८. ४।६५ ।

इत्यादिना प्रोक्तम्; यजुर्विषयकम् पूर्वरूपञ् च "यजुष्षु च"[1] इत्यादिना प्रतिपाद्द्य तदपवादरूपꣳ प्रकृतिभावो "जुषाणश्च् चानद्ध्वनि"[2] इत्यादिना प्रतिपादितः। इदमपि विस्तरेण पाणिनीयसूत्रसमालोचनप्प्रसङ्ग एव प्प्रदर्शयिष्ष्यामः। तैत्तिरीयप्रातिशाख्येऽपि— "लुप्प्यते त्त्वकार एकारौकारपूर्व्वः"[3] इत्युक्त्वा तदपवादतया "अथाऽलोपः"[4] इत्यादिनाऽलोपꣳ प्रकृतिभावरूपꣳ प्रतिपादितः। अलोपापवादाश् च "अथ लोपः"[5] इत्यादिना प्रतिपादिताः। इदमपि पाणिनीयसूत्रवार्तिकभाष्ष्यादिसमालोचन एव विस्तरेण प्प्रदर्शयिष्ष्यामः। ऋक्तन्त्रे च— "ओभूतञ् च"[6] "अयवावे न्यूने"[7] (एकारोकारौ अकारप्रत्त्ययेन्यूने पादे न सन्निकृष्ष्येते) इत्यादिना प्रकृतिभावस् तदपवादाश् च प्प्रोक्ताः। एतेषामपि विचार उक्ते प्रसङ्गे एव करिष्ष्यते। शौनकीयचतुरद्ध्यायिकायान् तु– "क्व चित् प्रकृत्या"[8] इत्येवोक्तम्। **पाणिनीयव्याकरणे च**— "प्रकृत्यान्तꣳपादमव्व्यपरे, अव्व्यादवद्द्यादवक्क्रमुरव्व्रतायमवन्त्त्रवस्स्युषु च"[9] इत्येवोक्त्वा ऋक्पादान्तर्गता एकारौकारप्प्रकृतिभावाꣳ प्रतिपादिताः। **तत्तर महती खलु अतिव्व्यापकताऽव्व्यापकता च दृश्यते। तथापि "नान्तꣳपादमव्व्यपरे" इति सूत्तरं स्वीकृत्य तद्विषये वार्तिककारभाष्ष्यकाराब्भ्याङ किञ् चिञ् जल्पितम्; न तु सूत्तरे विद्द्यमानामतिव्व्यापकतामव्व्यापकताञ् च निराकर्तुम् प्रयत्नꣳ कृतः। मन्न्यामहे पाणिनीयव्याकरणस्य सर्ववेदपारिषदत्त्वव् वावदित्तरा भाष्ष्यकारेणाऽपि "सुप्तिङुपग्ग्रहलिङ्गनराणाङ कालहलच्स्वरकर्त्तृयङाञ् च। व्यत्त्ययमिच्छति शास्त्रकृदेषां सोऽपि च सिद्ध्यति बाहुलकेन"[10] इत्यत्तरापि आत्मनाऽपि स्पष्टमनुपात्तमपि संहिताव्यत्त्ययमाश्रित्त्येयमतिव्व्यापकताऽव्व्यापकता चोपेक्क्षिता। न चेयमतिव्व्यापकताऽव्व्यापकता च पाणिनीयव्याकरणस्य वेदाङ्गताया अनुरूपा। अतोऽत्तर प्रातिशाख्यादिवचनानि समाहृत्त्य तामतिव्व्यापकतामव्व्यापकताञ् च स्फुटतया प्रदर्श्य तन्निराकरणस्याऽऽवश्यकताम् प्रतिपादयामः।**

तत्तर प्रथमं शाकलऋग्वेदमन्त्तरसंहितायामुपलब्भ्यमानेषु प्प्रयोगेषु विचारꣳ क्रियते। "प्रकृत्याऽन्तꣳपादमव्व्यपरे"[11] इति सूत्तरस्य "गावो-

---

१. ४।८०। २. ४।८३। ३. ११।१। ४. ११।२।
५. १२।१। ६. ३।१।१० (७०)। ७. ३।२।६ (७६)।
८. ३।५४। ९. अष्टा. ६।१।११५–११६। १०. पा.व्या.भा.३।१।८५।
११. अष्टा. ६।१।११५।

ऽभितोऽनवन्त''[१] इत्यत्तत्राऽपि प्राप्तिरस्ति । न च तत्र प्रकृतिभावेनाऽधीयते । तत्र प्रकृतिभावाभावश्च ''अनन्याद्द्यपि तथायुक्तमावोऽनृतोपहितात् सतः''[२] इति ऋग्वेदप्रातिशाक्ख्यवचनेनाऽनुन्वाक्ख्यातः । ''अजीतयेऽहतये पवस्व[३] ता अन्जयोऽरुणयो न सस्रुः[४] युवं श्वेतम् पेदवेऽश्विनाश्श्वम्[५] पुरूरवोऽनु ते केतमायन्[६]'' इत्यादिषु चोक्तपाणिनीयसूत्तरस्य प्राप्तिरस्ति । न चैतेषु प्प्रकृतिभाव इष्ष्यते । एतादृशेषु च स्स्थलेषु प्प्रकृतिभावाभावो हि ''अयेऽयोऽवेऽव इत्यन्तैरकारस् सर्व्वथा भवन्''[७] इति ऋग्वेदप्रातिशाक्ख्यवचनेनाऽनुन्वाक्ख्यायते । ''आवोऽहं समितिम्[८], न वोऽश्श्वाः[९], प्रवोऽच्छा[१०], क्व वोऽश्श्वाः[११], चित्तरो वोऽस्तु[१२], सविता वोऽमृतत्वम्[१३], अत्तरैव वोऽपिवहय्यामि[१४], को वोऽन्तर् मरुतः[१५]'' इत्येतादृशेषु स्स्थलेषु च उक्तपाणिनीयसूत्तरस्य प्प्राप्तिरस्ति । नैव ह्येतादृशेषु स्स्थलेषु प्प्रकृतिभाव इष्ष्यते । एतादृशेषु स्स्थलेषु च प्प्रकृतिभावाभाव ऋग्वेदप्रातिशाक्ख्यस्य ''व इत्त्येतेन चाऽऽन प्प्र क्व चित्तरस् सवितैव कः । पदैरुपहितेनैतैः''[१६] इति वचनेनाऽनुन्वाक्ख्यायते । ''नोऽदात्[१७], देवासोऽजनयन्त[१८], पुरोऽभेत्[१९], तमसोऽमुमुक्तम्[२०], अग्नेऽमतये[२१], वस्योऽनशामहै[२२], पवयोऽरथाः[२३]'' इत्यादिषु च प्प्रोक्तपाणिनीयसूत्तरस्य प्प्राप्तिरस्ति, न च प्प्रकृतिभाव इष्ष्यते । एतादृशेषु स्स्थलेषु प्प्रकृतिभावाभावश्च ''सर्व्वैरेवोदयाऽ परे; अद्रादवर्त्तरोऽजनयन्तावव्यत्त्या अभेदयोपाष्टिरवन्त्ववीरता । अमुमुक्तममतयेऽनशामहा अवत्वचोऽवीरतेऽवास्यवोरथाः''[२४] इति ऋग्वेदप्रातिशाक्ख्यवचनेनानुन्वाक्ख्यायते । ''अभिभुवेऽभिभङ्माय[२५], सङ्कस्त्रन्दनोऽनिमिषः[२६], धीजवनोऽसि सोम[२७], स्वधावोऽस्ति हि[२८], ऋतावोऽनु मा[२९]'' इत्यादिषु च

---

१. शा. ऋ. सं. ५।३०।१० । २. २।३६ । ३. ९।९६।४ ।
४. १०।९५।६ । ५. १०।३९।१० । ६. १०।९५।५ ।
७. २।३७ । ८. १०।१६६।४ । ९. ५।५४।१० ।
१०. १०।३२।५ । ११. ५।६१।२ । १२. १।१७२।१ ।
१३. १।११०।३ । १४. १०।१६६।३ । १५. १।१६८।५ ।
१६. २।३८ । १७. १।३०।१६ । १८. १०।८८।९ ।
१९. १।३३।१२ । २०. ६।५०।१० । २१. ३।१६।५ ।
२२. ८।२७।२२ । २३. ८।३१।५ । २४. २।३९, ४० ।
२५. २।२१।२ । २६. १०।१०३।१ । २७. ९।८८।३ ।
२८. १।३३।१२ । २९. २।२८।६ ।

उक्तस्य पाणिनीयसूत्रस्य प्राप्तिरस्ति। न च प्रकृतिभाव इष्यते। एतादृशेषु स्थलेषु प्रकृतिभावाभावो हि "वासो वायोऽभिभुवे कवष्यस् सङ्कस्रन्दनो धीजवनस् स्वधावः। उत्सादत ऋतावस् संगर्भ्यो हिरण्यशृङ्ग इति चोपधाभिः"[1] इति ऋग्वेदप्रातिशाख्यवचनेनाऽन्वाख्यायते। "येऽराः[2], रायोऽध[3], मेऽधायि[4], नोऽहिः[5], अग्नेऽभिदासति[6], जायमानोऽभवः[7], नृतोऽप[8], अंहोऽतिपिप्रति[9]" इत्येतेषु स्थलेषु चोक्तपाणिनीयसूत्रस्य प्राप्तिरस्ति; न चैतेषु प्रकृतिभाव इष्यते। तदुक्तममृग्वेदप्रातिशाख्ये— "येऽरा रायो ऽध मेऽधायि नोऽहिरग्नेऽभिदासति। जायमानोऽभवोऽग्नेऽयन् नृतो पोऽहोऽतिपिप्रति"[10] इति। तथैव "जम्भयन्तोऽहिम्[11] मरुतोऽनुभर्त्री[12] (यवसेऽविष्यन्)[13] वयुनेऽजनिष्ट[14]; (वृत्रहत्येऽवीस्)[15] समरेऽतमाना[16] मरुतोऽमदन्[17] नभितोऽनवन्त[18]; ब्रुवतेऽद्ध्वँस्[19] तवसेऽवाचि[20] मेऽरपद्[21] दधिरेऽग्ना[22] नहुषोऽस्मन्[23] तुरोऽभिनत्[24]; उप तेऽधावँ[25] (वहतेऽयँ)[26] यमोऽद्रितिर्[27] (जनुषोऽया)[28] सुवितोऽनु[29] शशिरयोऽधित[30]; वपुषेऽनु[31] (विशोऽयन्त)[32] (सन्तोऽवद्द्यानि)[33], खेऽनसः[34], (भरन्तोऽवस्स्यवो)[35] वोऽस्तु[36] बुद्ध्न्योऽजो[37] मायिनोऽधमः[38], देवोऽनयत्[39] पुरुवसोऽसुरघ्नो[40], भूतोऽभि[41], श्वेतोऽरुषस्[42] तेन नोऽद्द्य[43]; येऽजामयस्[44] तेऽरदन्[45] नोऽधिवक्ता[46]

---

१. २।४१।	२. १०।७८।४।	३. ६।३६।१।
४. १।१६२।७।	५. ६।५।१४।	६. १।७९।११।
७. ९।५९।४।	८. २।२२।४।	९. ७।६६।५।
१०. २।४२।	११. ७।३८।७।	१२. १।८८।६।
१३. ७।३।२।	१४. ३।२९।३।	१५. ६।२५।१।
१६. ६।९।२।	१७. १।५२।९।	१८. ५।३०।१०।
१९. १।३७।३।	२०. १।५१।१५।	२१. ५।६१।९।
२२. १।५९।३।	२३. १०।९९।७।	२४. तत्तत्रैव।
२५. १०।१४५।६।	२६. ५।३०।३।	२७. १०।९२।११।
२८. ६।६६।४।	२९. १०।५६।३।	३०. १०।१२७।१।
३१. ६।६३।६।	३२. ६।२६।१।	३३. ६।६६।४।
३४. ८।९१।७।	३५. ८।२१।१।	३६. १०।१८५।१।
३७. २।३१।६।	३८. १।५१।५।	३९. ३।३३।६।
४०. ६।२२।४।	४१. ८।२।४०।	४२. १०।२०।९।
४३. ख़ि. ३।१५।३२।	४४. ६।२५।३।	४५. १०।७५।२।
४६. ८।९६।२०।		

(तेऽवर्धन्त)[१] तेऽरुणेभिस्[२] सदोऽधि[३]; स्वाद्ध्योऽजनयन्[४] धन्न्वनोऽभिमाती[५] रग्नेऽपदह्[६] मनसोऽधि[७] योऽद्ध्वनः[८]; योऽह्य्यस्[९] तेऽविन्दँस्[१०] तपसोऽधि[११] न योऽधि[१२]; पादोऽस्स्य[१३] योऽति[१४] ब्राह्म्मणोऽस्स्य[१५] योऽनयत्[१६]; सोऽस्माकयँ[१७] यो द्वेषोब्भ्योऽन्न्यकृतेब्भ्यस्[१८] तेब्भ्योऽकरम्[१९] (पयस्स्वन्तोऽमृताश्[२०] च"[२१] **इत्त्येतेषु स्स्थलेषु च यकारवकारोदयस्स्थलानि कोष्ठके स्थापितानि च विहायाऽन्न्येषु स्स्थलेषु उक्तपाणिनीयसूत्तरस्स्य प्प्राप्तिरस्ति; न च प्प्रकृतिभाव इष्ष्यते।** एते च प्प्रकृतिभावापवादा ऋग्वेदप्रातिशाक्ख्यस्स्य उपर्य्युद्धृतेन वचनेनैवाऽन्न्वाक्ख्याताः। **पुत्तरो अन्न्यः[२२] पराके अर्वाके[२३] परावतो अथो[२४] इत्त्यत्तर च उत्तरपदानाम् पादादौ वर्तमानत्त्वेन प्रोक्तपाणिनीयसूत्तरस्स्य प्राप्तिर् नाऽस्ति; प्प्रकृतिभावस् तु इष्ष्यते।** तदुक्तमृग्वेदप्रातिशाक्ख्ये "अन्न्योऽर्वाकेऽथो इति नोदयेषु पुत्तरX पराके च परावतश् च"[२५] इति। **एवञ् चोक्तपाणिनीयसूत्तरस्स्य लक्क्ष्याऽव्व्यापकताऽपि स्स्फुटा।**

माद्ध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदमन्त्तरसंहितायामपि– "गाहमानोऽदयः[२६], शिवोऽतीहि[२७] भरन्तोऽश्श्वायेव[२८] द्वेषोब्भ्योऽन्न्यकृतेब्भ्यः[२९], जम्भयन्तोऽहिम्[३०], (वाजेवाजेऽवत[३१]) वाजजितोऽद्ध्वनः[३२] मदन्तोऽग्गँ्ने[३३] भद्द्रशोचेऽपूपम्[३४] अवसेऽग्गँ्निम्[३५] सुषुवेऽग्ग्रे[३६] ज्योतेऽदिते[३७] सुपर्ण्णोऽसि[३८], वीरुधोऽस्स्यै[३९] (सुवीरोऽवीरहा)[४०] धातवेऽकः[४१], सूनवेऽग्गँ्ने[४२], द्रूणानोऽस्त्तासि[४३] आशवोऽस्त्तम्[४४] वहतोऽप्प्रतिधृष्ट्टशव-

---

१. १।८५।७। २. १।८८।२। ३. १०।४३।२।
४. १०।६१।७। ५. १०।११६।६। ६. ७।१।७। ७. ७।३३।११।
८. १।७१।९। ९. १०।१४४।४। १०. १०।१८१।३।
११. १०।१९०।१। १२. १।१४०।६। १३. १०।९०।३।
१४. ८।२।३४। १५. १०।९०।१२। १६. ७।१८।७।
१७. १०।९७।२३। १८. ८।७९।३। १९. १०।८५।१७।
२०. तै. ब्रा. २।६।११।१०। २१. ऋ. प्रा. २।४३–४८।
२२. ७।१०३।३। २३. ८।९।१५। २४. ९।३९।५।
२५. २।४९। २६. १७।३९। २७. ३।६१। २८. ११।७५।
२९. ५।३५। ३०. ९।१६। ३१. ९।१८। ३२. ९।१३।
३३. ११।७५। ३४. १२।२६। ३५. ९।२६। ३६. ९।२३।
३७. ८।४३। ३८. १२।४। ३९. १२।९४। ४०. ४।३७।
४१. ३८।५। ४२. ३।२४। ४३. १३।९। ४४. १५।४१।

सम्[१], सङ्क्रन्दनोऽनिमिषः[२], बाहवोऽनाधृष्याः[३], अयुद्ध्योऽस्मामाकम्[४], अद्द्रुहोऽनमीवाः[५], वोऽहम्[६], सोऽहम्[७], सोऽस्मामाकम्[८], तेऽभिगरः[९], वोऽर्व्वाची[१०], येऽन्नेषु[११], येऽत्तर[१२], (येऽविद्द्याम्)[१३] येऽसम्भूतिम्[१४] उपस्त्थेऽन्तः[१५] तेब्भ्योऽकरम्[१६] नमोऽस्त्तु[१७] विश्श्वेऽसुङ्ग घर्म्मम्[१८] अग्ग्रेऽश्श्वम्[१९] विशोऽसपत्तँ्ना[२०] रायोऽनु[२१] सूर्य्योऽभि[२२] अग्गँ्नेऽब्भ्यावर्त्तिन्[२३], मा सु रिषोऽम्ब[२४], (यवसेऽविष्ष्यन्)[२५] पुरुप्प्रियोऽग्गँ्ने[२६] अन्नपतेऽन्नस्स्य[२७] अर्ण्णवेऽन्तरिक्क्षे[२८] गवेऽश्श्वाय[२९] मेऽङ्गानि[३०] मनसोऽसि[३१] वाजयन्तोऽश्श्याम[३२], सोम्म्यासोऽग्गँ्निष्ष्वात्ताः[३३], पाशिनोऽतिधन्न्वेव[३४] सर्व्विदानोऽनु[३५] अनृतेऽदधात्[३६] मूजवतोऽतीहि[३७] वृष्ण्णेऽपाकः[३८] अपाकोऽचिष्ट्टुः[३९] दीदिवोऽग्गँ्ने[४०] त्रयस्त्त्रिंशेऽमृताः[४१], ब्रह्म्मणेऽस्म्मै[४२] यकोऽसकौ[४३] रथोऽस्म्मान्[४४] विश्श्वतोऽदब्ब्धासः[४५] पादोऽस्स्य[४६] वसन्तोऽस्स्याऽऽसीत्[४७] अवोऽस्त्तु[४८] गृहपतेऽभिद्द्युम्म्नम्[४९] सत्त्वानोऽहम्[५०] नोऽजस्स्रया[५१], विमानोऽजस्स्रः[५२] सूतेऽश्श्विना[५३] नमोऽग्गँ्नये[५४] तेऽग्ग्रम्[५५] तेऽग्ग्रे[५६] प्रथमोऽन्तः[५७] तेऽन्न्येन[५८] पणयोऽसुम्म्नाः[५९] जहीमोऽशिवाः[६०] अम्बिकेऽम्बाले[६१] नोनुमोऽदुग्ग्धाः[६२], प्रचेतसोऽश्श्वान्[६३] नोऽस्म्मा-

---

१. ८।३५। २. १७।३३। ३. १७।४६। ४. १७।३९।
५. १२।५०। ६. ९।४। ७. १८।३५। ८. १२।१०१।
९. ८।४७। १०. ८।४। ११. १६।६२। १२. १२।४५।
१३. ४०।१२। १४. ४०।९। १५. १२।३९। १६. १६।८।
१७. १३।६। १८. ८।१९। १९. ४।७१। २०. ७।२५।
२१. ८।१४। २२. १३।३०। २३. १२।७। २४. ११।६८।
२५. १५।६२। २६. ११।७२। २७. ११।८३। २८. १६।५५।
२९. ३।५९। ३०. २०।८। ३१. २०।३४। ३२. १८।७४।
३३. १९।५८। ३४. २०।५३। ३५. १९।५४। ३६. १९।७७।
३७. ३।६१। ३८. २०।४४। ३९. तत्त्रैव। ४०. १७।९।
४१. २१।२८। ४२. ७।२१। ४३. २३।२३। ४४. ३।३६।
४५. २५।१४। ४६. ३१।३। ४७. ३१।१४। ४८. ३।३१।
४९. ३।३९। ५०. १६।८। ५१. १७।७६। ५२. १८।६६।
५३. २०।५६। ५४. २३।१३। ५५. २३।२४। ५६. २३।२५।
५७. २३।६३। ५८. २३।१५। ५९. ३५।१। ६०. ३५।१०।
६१. २३।१८। ६२. २७।३५। ६३. २९।५०।

कम्[१] वृषपाणयोऽश्वाः[२] प्रदिशोऽनु[३] उदितेऽनागाः[४] अन्धसोऽर्च्चा[५] पनस्यतेऽद्धा[६] यज्जँ त्रियेब्भ्योऽमृतम्[७] विपश्चितोऽभि[८] जनोऽनमीवः[९] आयवोऽनु[१०] नोऽद्द्य[११] देशेऽभवत्[१२] वयुनेऽजनिष्ट्ट[१३] विद्द्मनापसोऽनायन्त[१४] पूर्व्व्यासोऽरेणवः[१५] नोऽश्म्मा[१६] नोऽदितिः[१७] नोऽहिः[१८] ब्राह्म्मणोऽस्स्य[१९]'' इत्त्यादिषु स्स्थलेषु **पाणिनीयस्स्योक्तस्स्य प्प्रकृतिभावसूत्तरस्स्य प्राप्तिरस्ति कोष्ठके स्थापितानि उदाहरणानि विहायाऽन्न्यत्तर; न तु प्प्रकृतिभाव इष्ष्यते।** तेषु स्स्थलेषु प्रकृतिभावाभावश् च शुक्लयजुर्वेदप्रातिशाक्ख्ये प्रतिपादितः[२०]।

पदादिस्स्थे ह्रस्स्वेऽकारे परे एकारस्स्य ओकारस्स्य च **यजुषि प्रकृतिभावस्स्य प्प्रतिपादकानि** पाणिनीयानि सूत्त्राणि चेमानि— "यजुष्ष्युरः, आपो–जुषाणो-वृष्णो-वर्षिष्ठेऽम्बे-ऽम्बालेऽम्बिके–पूर्वे, अङ्ग इत्त्यादौ च, अनुदात्ते च कुधपरे, अवपथासि च"[२१] इति। **एतेषाञ् च सूत्त्राणान्** "धीरासोऽअनुदिश्श्य[२२] वैश्श्वानरोऽअदब्ध्धः[२३] वचोऽअपावधीत्[२४] अन्धोऽअच्छेतः[२५] अरिष्ट्टोऽअर्ज्जुनः[२६] घासेऽअज्ज्राणाम्[२७] तेब्भ्यो नमोऽअस्त्तु[२८] अब्ब्दोऽअयवेभिः[२९] (ऋचि) रथिब्भ्योऽअरथेब्भ्यः[३०] महद्भ्योऽअर्ब्भकेब्भ्यः[३१] संसदोऽअष्ट्टमी[३२] प्रतिमाच्छन्दोऽअस्स्रीवयश्च्छन्दः[३३]'' **इत्त्येतेषु माद्ध्यन्दिनीयसंहितास्स्थलेषु ऋचीति निर्दिष्टं स्थलवँ विहायाऽन्न्यत्तर यजुषि प्प्राप्तिर् नास्ति; इष्ष्यते च प्प्रकृतिभावः**; एतेषु प्प्रकृतिभावश् शुक्लयजुर्वेदप्रातिशाक्ख्ये प्रतिपादितः[३४]।

तैत्तिरीयसंहितायामपि— "अग्ग्नेऽदब्धायोऽशीततनो[३५] पवयोऽरथाः[३६] वज्ज्रोऽसि[३७] नोऽग्ग्नेयः[३८] जम्भयन्त्तोऽहिम्[३९] आवोऽर्व्वाची[४०]

---

१. २९।५७। २. २९।४४। ३. ३२।४। ४. ३३।२०।
५. ३३।२३। ६. ३३।३९। ७. ३३।५४। ८. ३३।८१।
९. ३३।८६। १०. ३३।९७। ११. ३४।९। १२. ३४।११।
१३. ३४।१४। १४. ३४।१२। १५. ३४।२७। १६. २९।४९।
१७. तत्त्रैव। १८. ३४।५३। १९. ३१।११।
२०. ४।६५–७३, ७५–७९। २१. अष्टा. ६।१।११७–१२१।
२२. १।२८। २३. ४।१५। २४. ५।८। २५. ८।५४।
२६. १०।२१। २७. २१।४४। २८. १५।१५। २९. १२।७४।
३०. १६।२६। ३१. तत्त्रैव। ३२. २६।१। ३३. १४।१८।
३४. ४।८३–८६। ३५. १।१।१३।३। ३६. १।६।१२।६।
३७. १।७।७।१। ३८. १।७।७।२। ३९. १।७।८।२। ४०. २।१।११।४।

तेऽर्य्यमन्[1] स्वधावोऽमृतस्य[2] यानग्नयोऽन्वतप्यन्त[3] नोऽद्द्य[4] पुरीष्योऽसि[5] अग्नेऽपिदधाम्यास्य[6] अग्नेऽभ्यावर्तिन्[7], अन्नपतेऽन्नस्य[8], येऽत्तरस्स्थ[9] येऽदो रोचने दिवः[10] तपसोऽधिजातः[11] ऋतावोऽनु[12] तेऽस्मत्पाशान्[13], गृणन्तोऽग्ने[14] तेभ्योऽकरन् नमः[15] सङ्करन्दनोऽनिमिषः[16] सखायोऽनुसंरभद्ध्वम्[17] गावोऽनु[18] सुमन्मेऽधायि[19] सोऽहम्[20] अष्टौ कृत्वोऽग्नेरे[21], अद्भ्वर्य्योऽवेरपाः[22] सुवीरासो अदाभ्यम्[23] स्तवानो अन्न्यम् (पादादौ)[24] नमो अश्वेभ्यः[25] वचो अपावधीम्[26] यवसे अविष्ण्यन्[27]" इत्यादिषु **पाणिनीयानामुक्तानामृग्यजुषविषयाणां सूत्तराणां यथायथमतिव्याप्त्यव्याप्ती दृश्येते।**

कौथुमसामवेदसंहितायामपि— "अधिसानो अव्व्ये[28] चित्तरो अग्निः (पादादौ)[29], मृतोऽप[30], अभवोऽङ्गिरस्तमः[31] पाढोऽस्स्य[32]" इत्यादीनि उदाहरणानि प्राप्यन्ते यत्तरोक्तपाणिनीयसूत्तरस्स्याव्याप्त्यतिव्याप्ती यथायथम् भवतः।

शौनकिनामथर्ववेदसंहितायामपि— "ददेऽहम्[33] नोऽसः[34] योऽसपत्नः[35] आरेऽसौ[36] शत्तरुहोऽसानि[37] वृषायमाणो अवृणीत[38] स्राक्त्योऽसि[39] प्रतिसरोऽसि[40] प्रत्त्यभिचरणोऽसि[41] नोऽसि[42] शुक्रोऽसि[43] भ्राजोऽसि[44] उरुगायोऽद्भुतः[45] ओजोऽसि[46] सहोऽसि[47] योऽस्मान्[48] तेऽर्चिचः[49] जनि-

---

१. ३।३।१४।४। २. ३।१।११।६। ३. ३।२।८।३।
४. ३।३।११।३। ५. ४।१।३।२। ६. ४।१।१०।२।
७. ४।२।१।२। ८. ४।२।३।१। ९. ४।२।४।१।
१०. ४।२।८।३। ११. ४।२।१०।४। १२. ४।३।११।४।
१३. ४।३।१३।४। १४. ४।४।४।७। १५. ४।५।१।३।
१६. ४।६।४।१। १७. ४।६।४।२। १८. ४।६।७।३।
१९. ४।६।८।३। २०. ४।७।१२।३। २१. ६।४।५।१।
२२. ६।४।३।४। २३. १।५।५।४। २४. ४।५।१०।४।
२५. ४।५।३।२। २६. १।२।११।२। २७. ४।४।३।३।
२८. ५३२। २९. ४५०। ३०. ४६६। ३१. ५१९।
३२. आरण्यस. ३४, ३५। ३३. १।९।४। ३४. १।१६।४।
३५. १।१९।४। ३६. १।२९।१। ३७. १।२९।५।
३८. २।५।७। ३९. २।११।२। ४०. तत्तरैव। ४१. तत्तरैव।
४२. २।११।४। ४३. २।११।५। ४४. तत्तरैव। ४५. २।१२।१।
४६. २।१७।१। ४७. २।१७।२। ४८. २।१९।१-५। ४९. २।२०।३ इ.।

कामोऽहमागमम्[१] इमे अग्निः (पादादौ)[२] उत्तरोऽसानि[३] पर्ण्णोऽसि[४] कृणुषेऽधरान्[५] तेऽधराञ्चः[६] इद्धोऽप्प्रतिब्ब्रुवद्भिः[७] देवोऽप्प्यतिष्ठत्[८] तेऽधाम्[९] तीक्क्ष्णेषवोऽबलधन्न्वनः[१०] वीरोऽत्तर[११] येऽस्स्याम्[१२] नोऽधि[१३] नमोऽधिपतिब्भ्यः[१४] इन्द्रोऽधिपतिः[१५] वरुणोऽधिपतिः[१६] सोमोऽधिपतिः[१७] लोकेऽक्क्षितम्[१८] वोऽन्नभागः[१९] सम्म्यञ्चोऽग्निम्[२०] जनुषोऽब्भ्यग्ग्रम्[२१] योऽथर्वाणम्[२२] योऽस्स्य[२३] पसो अधि (पादादौ)[२४] ये अवासृजन्[२५] एकोऽसि[२६] सोऽदृंहयत[२७] सोऽधारयत[२८] अपामार्गोऽपमार्ष्टु[२९] वज्ज्रोऽब्भ्यायत[३०] हुवेऽहम्[३१], सोऽन्नम्[३२] तपसोऽधि[३३] ब्रह्म्मणेऽपचत्[३४] भूतकृतोऽति[३५] मेऽप ते भवन्तु[३६] प्रतिक्क्रोशेऽमावास्स्ये[३७] मनोऽस्तु[३८] मेऽग्निना[३९] दिशोऽभिदासति[४०] येऽधस्तात्[४१] येऽन्तरिक्क्षात्[४२] जातोऽसि[४३] येऽस्मान्[४४] योऽस्मान्[४५] गृहोऽसि[४६] मेऽस्ति[४७] परोऽपेहि[४८] कृण्ण्वेऽहम्[४९] मेऽसि[५०] द्विवृषोऽसि[५१] सृजारसोऽसि[५२] सोऽपोदकः[५३] येऽस्स्याः[५४] वरुणोऽब्ब्रवीत्[५५] दुन्दुभेऽधि[५६] मरीचयोऽनु[५७] शीतोऽथो[५८] अतोऽर्वाङ्[५९] वरुणोऽपामधिपतिः[६०] तेऽकरम्[६१] जातवेदो अंशुः

---

१. २।३०।५। २. ३।१।२। ३. ३।५।५। ४. ३।५।८।
५. ३।६।६। ६. ३।६।७। ७. ३।८।३। ८. ३।१३।४।
९. ३।१८।६। १०. ३।१९।७। ११. ३।२३।२।
१२. ३।२६।१–६। १३. तत्तरैव। १४. ३।२७।१–६।
१५. ३।२७।२। १६. ३।२७।३। १७. ३।२७।४।
१८. ३।२९।४। १९. ३।३०।६। २०. तत्तरैव। २१. ४।१।५।
२२. ४।१।७। २३. ४।२।१। २४. ४।४।७। २५. ४।६।७।
२६. ४।१०।६। २७. ४।११।७। २८. तत्तरैव। २९. ४।१८।७।
३०. ४।२४।६। ३१. ४।२६।३, ४।२८।३। ३२. ४।३०।४।
३३. ४।३४।१। ३४. ४।३५।१। ३५. ४।३५।२।
३६. ४।३५।७। ३७. ४।३६।३। ३८. ४।३८।५।
३९. ४।३९।२। ४०. ४।४०।१–८। ४१. ४।४०।५।
४२. ४।४०।६। ४३. ५।४।७। ४४. ५।६।९।
४५. ५।६।१०। ४६. ५।६।११। ४७. ५।६।११–१४।
४८. ५।७।७। ४९. ५।८।८। ५०. ५।१०।१–७।
५१. ५।१६।२। ५२. तत्तरैव। ५३. ५।१६।११।
५४. ५।१७।१७। ५५. ५।१९।१०। ५६. ५।२०।१०।
५७. ५।२१।१०। ५८. ५।२२।१०। ५९. ५।२२।११।
६०. ५।२४।४। ६१. ५।२८।७।

(पादादौ)[१] यो अस्स्य (पादादौ)[२] अपानोऽपिधायि[३] वनस्प्पतिब्भ्योऽग्नये-ऽधिपतये[४], नमोऽस्तु ते[५], सोऽस्माकम्[६] तेऽरुणाय[७] योऽस्स्य[८] वोऽपि[९] वैश्-श्वानरोऽङ्गिरसाम्[१०] नोऽस्तु[११] रोगो अयम्[१२] परोऽपेहि[१३] जीवोऽसि[१४] अमृ-तगर्भोऽसि[१५] पुत्त्रोऽसि[१६] अन्तकोऽसि[१७] श्येनोऽसि[१८] शिरोऽप्ससा[१९] मृगासो अवक्क्षत[२०] नमोऽस्त्वसिताय[२१], नमोऽस्तु[२२] वोऽद्द्च[२३] तिस्स्रोऽतिरो-चनाः[२४] तेऽङ्कुशः[२५] वोऽपोच्छतु[२६] निर्ऋतेऽनेहा[२७] ध्रुवोऽच्च्युतः[२८] शत्त्रू-यतोऽधरान्[२९] योऽचरत्[३०] शर्वोऽस्ता[३१] शत्त्रुहोऽसि[३२] पसो अधि(पादादौ)[३३] येऽत्तर[३४] मनसोऽनु[३५] व्याग्घ्रेऽहन्न्यजनिष्ट[३६] अतोऽधि[३७]उन्मदितोऽसति(सि)[३८] एनस्स्योऽकरम्[३९] नोऽन्नम्[४०] वोऽहम्[४१] अनुमतेऽन्न्विदम्[४२] तपसोऽधिजाता[४३], अधरोऽधरः[४४] अन्न्वद्द्च नोऽनुमतिः[४५] यथा तेऽसानि[४६] देवोऽतिदुरितानि[४७] परियातोऽर्ण्णवम्[४८], दर्शोऽसि दर्शतोऽसि[४९] एधोऽसि[५०] तेजोऽसि[५१] हुवे-ऽहम्[५२] जनुषोऽधिजाताः[५३] तेऽसुः[५४] तेऽकरम्[५५] हुवेऽस्मा अरिष्टतातये[५६]

---

१. ५।२९।१३। २. ५।२९।१५। ३. ५।३०।१५।
४. ६।११।१। ५. ६।१२।३। ६. ६।१४।१। ७. ६।२०।३।
८. ६।२८।३। ९. ६।३१।२। १०. ६।३५।३।
११. ६।४०।१। १२. ६।४४।१। १३. ६।४५।१।
१४. ६।४६।१। १५. तत्त्रैव। १६. ६।४६।२।
१७. तत्त्रैव। १८. ६।४८।१। १९. ६।४९।२।
२०. ६।५२।२। २१. ६।५६।३। २२. ६।६३।२।
२३. ६।६६।२। २४. ६।७५।१। २५. ६।८२।३।
२६. ६।८३।१। २७. ६।८४।३। २८. ६।८८।३।
२९. तत्त्रैव। ३०. ६।९२।२। ३१. ६।९३।१।
३२. ६।९८।३। ३३. ६।१०१।३। ३४. ६।१०४।२।
३५. ६।१०५।१। ३६. ६।११०।३। ३७. ६।१११।१।
३८. ६।१११।१–४। ३९. ६।११५।२। ४०. ६।११६।१।
४१. ६।१२२।५। ४२. ६।१३१।२। ४३. ६।१३३।४।
४४. ६।१३४।२। ४५. ७।२०।१। ४६. ७।३८।२।
४७. ७।६३।१। ४८. ७।८१।१। ४९. ७।८१।४।
५०. ७।८९।४। ५१. तत्त्रैव। ५२. ७।११०।२।
५३. ७।११५।३। ५४. ८।१।३। ५५. ८।२।४।
५६. ८।२।६।

संस्पर्शेऽद्दरूक्ष्णम्[१] सोऽरिष्टः[२], अमृतोऽतिजीवः[३] दिवोऽश्मानम्[४] दिप्सवोऽदाब्भ्यम्[५] संश्रेणिणेऽजग्रत्[६] मावसूपोऽन्तरा[७] भंससोऽपहन्मसि[८] हृदयेऽधि[९] त्रायमाणोऽभिशस्तिपाः[१०] मृत्यवेऽमून्[११] दिशश् चतस्रोऽश्वतर्य्यः[१२], ऋतवोऽभीशवः[१३] अभीशवोऽन्तर्देशाः[१४] कुतोऽधि[१५] ऋतवोऽनु पञ्च[१६] वनस्पतयोऽग्घ्नत[१७] वृश्चतेऽस्स्य[१८] पितरोऽग्घ्नत[१९] देवेब्भ्योऽर्धमासे[२०] आर्त्व्योऽधोक्[२१] मार्त्यवोऽधोक्[२२], आङ्गिरसोऽधोक्[२३] सौर्य्यवर्च्चसोऽधोक्[२४], काबेरकोऽधोक्[२५] ऐरावतोऽधोक्[२६] विदुषेऽलाबुना[२७] प्रातस्सवने अश्विनोः (पादादौ)[२८] दण्डोऽन्तरिक्षम्[२९] प्रजापतेऽनु मा[३०] तेऽधराञ्चः[३१] निमिषतोऽसि[३२] तेऽन्तः[३३] नमोऽग्नये[३४] कृण्वेऽहम्[३५] कुलायेऽधिकुलायम्[३६] एषोऽपां रसः[३७] चत्तोऽति[३८] ब्रह्मणेऽजन् ददाति[३९] शित्रोऽस्मब्भ्यम्[४०] अजोऽस्स्यज[४१] स्वर्ग्गोऽसि[४२] योऽजम्[४३] विन्दतेऽपरम्[४४] निरुप्यन्तेऽशव एव[४५] द्विषतोऽन्नम्[४६] एषोऽजग्धपाप्मा[४७] योऽतिथीनाम्[४८] पूर्वोऽतिथेः[४९] उपहूतोऽन्तरिक्षे[५०] क्रोडोऽन्तरिक्षम्[५१] उत्थितोऽश्विना[५२] वष्कयेऽधि[५३]" इत्यादिकमधीयते। **एतेषु चोदाहरणेषु पूर्वोक्तपाणिनीयसूत्रस्य यथायथमव्याप्त्यतिव्याप्ती भवत एवेति**

---

१. ८।२।१६। २. ८।२।२४। ३. ८।२।२६।
४. ८।४।१९। ५. ८।४।२०। ६. ८।५।१४। ७. ८।६।३।
८. ८।६।५। ९. ८।६।२४। १०. ८।७।१४। ११. ८।८।१०।
१२. ८।८।२२। १३. तत्तरैव। १४. तत्तरैव।
१५. ८।९।४। १६. ८।९।१५। १७. ८।१०(३)।१।
१८. ८।१०(३)।२। १९. ८।१०(३)।३। २०. ८।१०(३)।६।
२१. ८।१०(४)।३। २२. तत्तरैव। २३. ८।१०(४)।१५।
२४. ८।१०(५)।७। २५. ८।१०(५)।९। २६. ८।१०(५)।१५।
२७. ८।१०(६)।१। २८. ९।१।११। २९. ९।१।२१।
३०. ९।१।२४। ३१. ९।२।१२। ३२. ९।२।२३।
३३. ९।३।६। ३४. ९।३।१२। ३५. ९।३।१५।
३६. ९।३।२०। ३७. ९।४।५। ३८. ९।५।९।
३९. ९।५।११। ४०. ९।५।१२। ४१. ९।५।१६।
४२. तत्तरैव। ४३. ९।५।२२, २४। ४४. ९।५।२७।
४५. ९।६।१४। ४६. ९।६(२)।७। ४७. ९।६(२)।९।
४८. ९।६(२)।१३। ४९. ९।६(३)।१। ५०. ९।६(६)।८।
५१. ९।७।५। ५२. ९।७।१९। ५३. ९।९।६।

बोद्ध्यम्। न चैतद्दोषनिराकरणाय प्रयतितव्यं वार्तिककारेण भाष्यकारेण वाऽपीति सुष्ठु साधितन् ताभ्याम् पाणिनीयव्याकरणस्य सर्ववेदपारिषदत्वम्। अतोऽत्र वैदिकैर् वैयाकरणैरवधानन् देयम्। वयञ्च पाणिनीयाष्टाध्याय्या वेदपरावं व्याख्याङ्ग कर्तुकामास् तत्रैतादृशानावं विषयाणामपि सविवेचनम् प्रतिपादनङ्ग कर्तुमीहामहे ॥५७-६२॥

(ट) एकारौकारप्प्रकृतिभावे विशेषः

ह्रस्स्वेऽकारे पदान्तस्स्थ एकारोऽविकृतो यदि।
परोऽकारो व्रजेद्दर्धैकारत्वं हि क्व चिच् छ्रुतौ ॥६३॥
तथैव ह्योकाराच् चाऽविकृतात् तु परतस् स्थितः।
ह्रस्स्वोऽकारो व्रजेद्दर्धौकारत्वन् चाऽपि कुत्र चित् ॥६४॥

तदुक्तमृग्वेदप्रातिशाख्ये— "प्राच्च्यपञ्चाला उपधानिभोदयाश् शाकल्ल्यस्स्य स्स्थविरस्स्य"[1] इति। तैत्तिरीयप्रातिशाख्ये च— "स पूर्वस्स्यार्धसदृशमेकेषामर्धसदृशमेकेषाम्"[2] इति। तद्व्याख्याने वैदिकाऽऽभरणकारश् च— "योऽयमकार एकारौकारपूर्वो न लुप्यते स खलु स्वस्मात् पूर्वस्स्य वर्णस्स्याऽर्धेन सदृशं रूपमुपगच्छति इत्येकेषामाचार्याणाम् मतम्। यथा 'ते एँ-अग्रे एँ-अश्श्वमायुञ्जन्'[3] इत्येकारस्स्यार्धेन। 'यो रुद्रो ओँ-अग्नौ यो ओँ-अप्सु'[4] इत्योकारस्स्य। सोऽयञ् छन्दोगावान्तरचरणानां सात्त्यमुग्गिराणायनीयानाम् पक्षः। अस्मच्छाखादौ तु न विद्द्यते। अत एकाऽनयोर् वर्णयोर् वर्णसमाम्नाये न पाठः" इति। पाणिनीयव्याकरणभाष्येऽपि— "ननु च भोश् छन्दोगानां सात्त्यमुग्गिराणायनीया अर्धमेकारमर्धमोकारञ् चाऽधीयते। सुजाते एँश्श्वसूनृते, अद्ध्वर्य्यो ओँद्द्रिभिस् सुतम्, शुक्करन् ते एँन्न्यद्, यजतन् ते एँन्न्यदिति। पार्षदकृतिरेषा तत्रभवताम्, नैव हि लोके नाऽन्न्यस्मिन् वेदेऽर्ध एकारोऽर्ध ओकारो वाऽस्ति"[5] इति। आपिशलशिक्षासूत्रेऽपि एतावर्धैकारोकारौ उल्लिखितौ स्तः[6]। अत्र पाणिनीयव्याकरणभाष्यलेखेषु प्राप्यं "सुजाते एश्श्वसूनृते" इत्यादिकं रूपं परस्स्य अकारस्स्य अर्धेन पूर्ववर्णसदृशत्वमर्धेन प्प्रकृतिस्थाकाररूपत्वं सूचयत् प्रतीयते। तैत्तिरीयप्रातिशाख्यवचनमपि तदनुकूलतया व्याख्यातुं शक्यन् दृश्यते। अत्र विद्द्वद्भिरवधानन् देयम् ॥६३-६४॥

---

१. २।८१। २. ११।१९। ३. तै. सं. १।७।७।
४. तत्रैव ५।५।९। ५. ऐओङ ऐऔजित्यत्र।
६. वृत्तिकारप्प्रकरणे सू. ९।

(ठ) पदान्तस्स्थस्स्वरविशेषस्स्य स्वरे परेऽनुनानिकत्वम्

क्व चित् त्व-इ-उ-वर्णा हि पदान्तस्स्थास् स्वरे परे ।
विरामे चाऽप्रगृह्ययाश् चेद् भवेयुश् चाऽनुनासिकाः ।।६५।।

तथा हि ऋग्वेदप्रातिशाख्ये— "अष्टावाद्द्यानवसानेऽप्प्रगृह्ययानाचार्य्या आहुरनुनासिकान् स्वरान् । तत् त्रिमात्रे शाकला दर्शयन्त्याऽऽचार्यशास्त्रापरिलोपहेतवः"[1] इति, "सचादयो या विहिता विवृत्तयऽप्लुतोपधान्ता अनुनासिकोपधाः"[2] इति च । तैत्तिरीयप्रातिशाख्ये च— "अप्प्रगृह्यरहास् समानाक्षराण्यनुनासिकान्न्येकेषाम्, पदञ् च प्प्लुतं शाङ्खायनकाण्डमायनयोः, अकारस् तु संहितायामपि"[3] इति । पाणिनीयव्याकरणे च— "अणोऽप्प्रगृह्यस्याऽनुनासिकः"[4] इति । तत्रोदाहरणानि "न त्वा भीरिव विन्दती३[5], सूर्यस् सचाँ उद्द्यत्[6], जोषमाँ इन्द्रः[7], चर्षणीराँ अर्यः[8], चर्षणिभ्य आँ आविः[9], गभीर आँ उग्ग्रपुत्रे[10], ऋतस्यँ एकम्[11], इन्द्रा भरँ ओजः[12], विभ्वाँ ऋभुरिन्द्रः[13], पथाँ अनेहसा[14], एवाँ अग्निवँ् वसूयवः[15]" इति शाकलऋग्वेदमन्त्रसंहितायाम् ।।६५।।

(आ) उदात्तादिस्वरसंहितानियमनिरूपणम्

सोदात्त एकीभावे स्स्यादुदात्तं सन्ध्यमक्षरम् ।
तस्मिन् स्वरितयुक्ते तु स्स्वरितन् तद् भवेत् पुनः ।।६६।।

तदुक्तमृग्वेदप्रातिशाख्ये— "उदात्तवत्त्येकीभाव उदात्तं सन्ध्यमक्षरम्। अनुदात्तोदये पुनस् स्वरितं स्वरितोपधे"[16] इति। तदुदाहरणानि च शाकलऋग्वेदमन्त्रसंहितायाम्— "तानि नरा जुजुषाणोपयातम्[17] इन्द्रेहि[18] शतयँ् यथेमं शरदो नयातीन्द्रः[19]; मधूदकम्[20]" इति । शुक्लयजुर्वेदप्रातिशाख्ये च— "स्वरितवान्त्स्वरितः, उदात्तवानुदात्तः"[21] इति । तदुदाहरणानि च माध्यन्दिनीयसंहितायाम्— "पत्थ्येव[22], चम्म्वीव[23], ब्रह्ममासृज्ज्यत[24], मृत्त्यवेसितः[25]; येन्नेषु[26], द्रूणानोस्त्तासि[27],

---

१. १।६३-६४ । २. २।६७ । ३. १५।६-८ ।
४. अष्टा. ८।४।५७ । ५. १०।१४६।१ । ६. ७।८१।२ ।
७. ८।९४।६। ८. ३।४३।२। ९. ६।४८।१५। १०. ८।६७।११।
११. ८।१००।५ । १२. ८।९८।१० । १३. ४।३३।३ ।
१४. १।१२९।९ । १५. ५।२५।९ । १६. ३।११, १२ ।
१७. २।३९।८ । १८. १।९।१ । १९. १०।१६१।३ ।
२०. ९।६७।३२। २१. ४।१३३,१३४। २२. ११।५। २३. २०।७९।
२४. १४।२८। २५. २४।३७ । २६. १६।६२ । २७. १३।९ ।

प्रार्प्पयतु[1], एदम्[2], त्वाशाब्भ्यः[3], मेङ्गानि[4], अद्द्च्यूत्येवसे[5], सुप्प्वेति[6], इन्द्रौजिष्ट्ठः[7]'' इति । तैत्तिरीयप्रातिशाख्ये च ''उदात्तमुदात्तवति''[8] इति, ''स्वरितानुदात्तसन्निपाते स्वरितम्''[9] इति च । तदुदाहरणानि च तैत्तिरीयसंहितायाम्— ''यज्ज्ञमेत्रावरुन्धे[10], प्रेयमगात्[11], वसन्तमेवर्तूनाम्[12], अनूज्जेषम्[13], अवार्छति[14]'' इति; ''कन्न्येव तुन्ना[15], छवीन्न् छव्व्योपाकृताय स्स्वाहा[16], याज्ज्यैषा वै सप्तपदा शाक्क्वरी[17], अथ क्वास्स्याहवनीया इति[18]'' इत्यादीनि बोद्ध्यानि । ऋक्तन्त्रेऽपि— ''वान्त्सन्धिः''[19] इति । तदुदाहरणानि च कौथुमसामवेदार्चिकसंहितायाम्— ''एन्द्र सानसिम्[20], एतो न्विन्द्रम्[21], अत्त्राह गोरमन्वत[22]'' इत्यादीनि बोद्ध्यानि । शौनकीयचतुरद्ध्यायिकायामपि– ''एकादेश उदात्तेनोदात्तः''[23] इति । तदुदाहरणानि च शौनकिनामथर्ववेदसंहितायाम्— ''धियेहि[24], जुषस्स्वेन्द्र[25], स्तनयित्नुनेहि[26]'' इत्यादीनि वृत्तिकारप्रदर्शितानि बोद्ध्यानि । पाणिनीयव्याकरणेऽपि— ''एकादेश उदात्तेनोदात्तः''[27] इति ।।६६।।

उदात्तस्स्याऽनुतस्स्थतायामनुदात्तम् परयँ् यदि ।
अक्क्षरं स्वरितन् तत् स्यादित्त्याहुश् शौनकादयः ।।६७।।

तदुक्तमृग्वेदप्रातिशाख्ये— ''इकारयोश् च प्प्रश्श्लेषे क्षैप्प्राभिनिहितेषु च । उदात्तपूर्वरूपेषु शाकल्यस्स्यैवमाचरेत्''[28] इति । अत्त्र कारिकासम्बद्धमुदाहरणन् च ''योजा न्विन्द्र ते हरी''[29] इति शाकलऋग्वेदमन्त्रसंहितायाम् । शुक्लयजुर्वेदप्रातिशाख्ये च— ''उदात्तस्स्यानुतस्त्थीभावे स्स्वरितम् परमनुदात्तम्''[30] इति । तदुदाहरणानि च माद्ध्यन्दिनीयसंहितायाँ् यथा— ''त्र्यम्बकम्[31], देव्व्येतु सूनृता[32],

---

१. १।१। २. ४।१। ३. १।१८। ४. २०।८।
५. ३४।२९। ६. १।३ (पदपाठे)। ७. ८।३९। ८. १०।१०।
९. १०।१२। १०. २।६।१। ११. १।१।२। १२. २।६।१।
१३. १।६।४। १४. २।६।३। १५. ३।१।११।८।
१६. ५।७।२०। १७. २।६।२।६। १८. ५।७।४।२।
१९. २।६।२(५३)। २०. १२९। २१. ३८७। २२. १४७।
२३. ३।६६। २४. २।५।४। २५. तत्त्रैव। २६. ४।१५।११।
२७. अष्टा. ८।२।५। २८. ३।१३। २९. १।८२।१।
३०. ४।४९। ३१. ३।६०। ३२. ३३।८९।

द्र्वनन:[1], योजा न्विन्द्र[2]'' इति । तैत्तिरीयप्रातिशाख्ये च– ''इवर्णोकारौ यवकारौ, उदात्तयोश् च परो ऽनुदात्तस् स्वरितम्''[3] इति । तदुदाहरणानि च तैत्तिरीयसंहितायाम्— ''व्येवैनेन परिधत्ते[4], अप्स्वग्ने[5], नीचा तन् धक्ष्यतसम्[6], मद्ध्वग्नौ जुहोति[7]'', इति; ''तद् यदृच्च्यद्ध्यक्क्षराणि[8] स त्वै यजेत[9] इन् न्वा उपस्तीर्णमिच्छन्ति[10]'' इत्यादीनि च तत्तत्रैव प्रत्यत्युदाहरणानि बोद्ध्यानि । ऋक्तन्त्रे च– ''सयं योगात्''[11] इति । तदुदाहरणानि च— ''शृष्ट्यग्ने[12], अब्भ्येति[13], अब्भ्यर्च्चाम:[14] योजा न्विन्द्र[15], पाह्यूयूश्ते द्वितीयया[16], मा न इन्द्राब्भ्यादिश:[17], विद्धी त्वास्स्य नो वसो[18], पिबा त्वास्य गिर्वण:[19], शग्ध्यू ष शचीपते[20]'' इत्यादीनि कौथुमसामवेदार्चिकसंहितायाम् । शौनकीयचतुरद्ध्यायिकायाम् च— ''अन्तस्स्थापत्तावुदात्तस्स्यानुदात्ते क्षैप्र:''[21] इति । तदुदाहरणे च शौनकिनामथर्ववेदसंहितायास् तद्वृत्तिकारेणोद्धृते यथा— ''अब्भ्यर्च्चत[22], वीड्वङ्ग:[23]'' इति । पाणिनीयव्याकरणेऽपि— ''उदात्तस्वरितयोर् यणस् स्वरितोऽनुदात्तस्य''[24] इति ।।६७।।

उदात्तादनुदात्ते तु पदादिस्स्थे परे सति ।
प्रायशस् स्वरितं सन्ध्यङ्क क्व चिच् चोदात्तमिष्यते ।।६८।।

तथाहि ऋग्वेदप्रातिशाख्ये— ''इकारयोश् च प्रश्लेषे क्षैप्राभिनिहितेषु च । उदात्तपूर्वरूपेषु शाकल्यस्यैवमाचरेत् ।। माण्डूकेयस्य सर्वेषु प्रश्लिष्टेषु तथा स्मरेत्''[25] इति । तदुदाहरणानि च शाकलऋग्वेदसंहितायाम्— ''स्रुचीव घृतम्[26], तेऽवर्धन्त[27]'' इत्यादीनि बोद्ध्यानि । माण्डूकेयमतन् तु शाकलऋग्वेदसंहितायान् न प्रवर्तते । शुक्लयजुर्वेदप्रातिशाख्ये च— ''एदोद्द्भ्याम् पूर्वमकार:, तौ चेदुदात्तावनुदात्ते स्स्वरितौ, न देशेऽ भवति''[28] इति, ''इवर्णमुभयतोहृस्स्व-

---

१. ११।७० । २. ३।५२ । ३. १०।१५, १६ ।
४. ५।३।११।३ । ५. ४।२।११।३ । ६. १।२।१४।२ ।
७. २।३।२।९ । ८. २।४।११।१ । ९. २।६।६।३ ।
१०. १।६।७।३ । ११. २।६।६ (५६) । १२. १०६ ।
१३. ५२४ । १४. ५३५ । १५. ४१५ । १६. ३६ ।
१७. १२८ । १८. १३२ । १९. १३९३ । २०. २५३ ।
२१. ३।५८ । २२. ७।८२।१ । २३. ६।१२५।१ ।
२४. अष्टा. ८।२।४ । २५. ३।१३,१४ । २६. १०।९१।१५ ।
२७. १।८५।७ । २८. ४।६२, ६३, ६४ ।

मुदात्तपूर्व्वमनुदात्तपरं स्वरितम्, वीक्क्षितायेति च"[१] इति च। तदुदाहरणानि "वेदोऽसि[२], स्तुपोऽसि[३], तेऽप्सरसाम्[४]" इति माद्ध्यन्दिनीयसंहितायाम्। एष स्स्वरितीभावः "एदोद्द्भ्यामकारो लुगभिनिहितः (स्वरितः)"[५] इति सूत्तरेणाऽपि शुक्लयजुर्वेदप्रातिशाक्ख्येऽनून्वाक्ख्यात एव। तदपवादश्च "सो देशेऽभवत् सरित्"[६] इत्यत्तर बोद्ध्यः। "इवर्ण्ण उभयतोहस्स्वः प्प्रश्श्लिष्ट्टः"[७] इति सूत्तरेण चाऽनून्वाक्ख्यातानाम् प्रश्श्लिष्टानामुदाहरणानि च माद्ध्यन्दिनीयसंहितायाम्— "अभीन्धताम्[८], स्रुचीव[९]" इत्यादीनि बोद्ध्यानि। "वीक्क्षिताय"[१०] इत्यत्तर तु परस्स्य दीर्घत्वेऽपि स्वरितीभावः। तैत्तिरीयप्रातिशाक्ख्ये च— "ऊभावे च"[११] इति, "तस्मिन्ननुदात्ते पूर्व उदात्तस् स्वरितम्"[१२] इति, "स्वरितश् च सर्वत्तर"[१३] इति च। तदुदाहरणानि च तैत्तिरीयसंहितायाम्— "सून्नीयमिव[१४], सूद्गाता[१५], मासूत्तिष्ठन्[१६], दिक्षूपदधाति[१७], सूपसदनः[१८]" इति। इकारयोऽ प्रश्श्लेषे तु तैत्तिरीयशाखायाम् प्रश्श्लिष्टाक्ख्यया[१९]ऽपि न व्यवहियते, स्वरितीभावोऽपि न भवति इति बोद्ध्यम्। इकारयोऽ प्रश्श्लेषे उदात्ततया उदाहरणानि च तैत्तिरीयसंहितायामागतानि— "दिवीव[२०], विषमा इव हीमे लोकाः[२१], भिन्धीदम्[२२], अभीमा[२३], अभीन्धताम्[२४], अभीन्धे[२५], नीव हि[२६], प्रतिकूलमिव हीतः सुवर्गो लोकः[२७]" इत्यादीनि तैत्तिरीयप्रातिशाक्ख्यटिप्पणीषु ह्विट्निना निर्दिष्टानि। अभिनिहिताक्ख्यस्स्य[२८] स्वरितस्स्योदाहरणानि च तत्तर— "तेऽब्ब्रुवन्[२९], सोऽब्ब्रवीत्"[३०] इत्यादीनि बोद्ध्यानि। ऋक्तन्त्रे च— "क्वेयहीन्द्रनीवेति, तोर्ध्वे स्तेम्, नैगिनोभयथा, न्यायेनौद-

---

१. ४।१३५, १३६। २. २।२१। ३. २।२।
४. २४।३७। ५. शु. य. प्रा. १।११४। ६. मा. वा. शु. य. वे. म. सं. ३४।११। ७. शु. य. प्रा. १।११६। ८. ११।६१।
९. २०।७९। १०. २२।८। ११. १०।१७। १२. १२।९।
१३. १२।११। १४. ६।२।४।१। १५. ७।१।८।१।
१६. ७।५।२।२। १७. ५।५।५।४। १८. ७।५।२०।
१९. तै. प्रा. २०।५। २०. १।३।६।२। २१. २।१।३।१।
२२. ३।५।५।२। २३. ४।१।६।२। २४. तत्तरैव।
२५. ५।१।६।२। २६. ६।१।१।६। २७. ७।५।७।४।
२८. तै. प्रा. २०।४। २९. २।५।१।३। ३०. २।१।२।१।

व्रजिः"[१] इति । तत्र स्वरितीभावोदाहरणानि च— "क्वेयथ[२], अधाहीन्द्रः[३], नीव शीर्षाणि मृड्ढ्वम्[४], यत्सतोऽरुणप्सुः[५], वृधेऽस्मान्[६], तेऽमन्न्वत[७]" इत्यादीनि कौथुमसामवेदार्चिकसंहितायान् द्रष्टव्यानि । शौनकीयचतुरध्यायिकायाञ् च— "एकारोकारौ पदान्तौ (उदात्तौ) परतोऽकारम् (अनुदात्तम्) सोऽभिनिहितः, इकारयोऽ प्राश्श्लिष्टः"[८] इति । तदुदाहरणानि च शौनकिनामथर्ववेदसंहितायाम् प्रायेण— "तेऽवदन्[९], तेऽक्करवन्[१०], (तेऽकृण्वन् ?) सोऽब्रवीत्[११], योऽस्स्य[१२] सोऽरज्ज्यत[१३] इत्यादीनि; दिवीव[१४] दिवीव ज्ज्योतिः[१५] अभीहि मन्न्यो[१६], भिन्धीदम्[१७], दिशीतः[१८]" इत्यादीनि च यथायथम् बोद्ध्यानि । पाणिनीयव्याकरणे तु— "स्वरितो वाऽनुदात्ते पदादौ"[१९] इति सामान्न्यतयोक्तम्; न विषयविभागो विकल्पस्स्य सूचितः । वार्तिककारभाष्यकाराब्भ्यामपि विकल्पव्यवस्थाप्रदर्शने औदासीन्न्यमेवावलम्बितम् । तथापि पूर्वोदाहृतप्रातिशाख्यवचनानुसारवँ विकल्पोऽयवँ व्यवस्स्थिततया प्रतिपादनीयः । तथा च शाकलऋग्वेदसंहितायाम् पदान्तस्थादुदात्तात् पदादावनुदात्ते परे ह्रस्स्वेकारयोऽ प्रश्श्लेषे अभिनिहितसन्धौ च एकादेशे सन्ध्यस् स्वरस् स्वरित एव भवति; ह्रस्स्वदीर्घेकारप्प्रश्श्लेषे तु "विहीमिद्धः"[२०] इत्यादिषु सन्ध्यस् स्वर उदात्त एव भवति; माद्ध्यदिनीयादिवाजसनेयिशुक्लयजुर्वेदसंहितासु च पूर्वरूपे खलूदात्तपूर्वेऽनुदात्तोत्तरे सन्ध्यमक्षरं स्वरितमेव भवति सर्वत्र; "देशेऽभवत्"[२१] इत्यत्र तूदात्तमेव भवति; ह्रस्स्वयोरिवर्णयोऽ प्रश्श्लेषे चोदात्तपूर्वेऽनुदात्तोत्तरे सन्ध्यमक्षरं स्वरितमेव भवति; "वीक्क्षिताय"[२२] इत्यत्र तु दीर्घोत्तरत्वेऽपि स्वरितमेव भवति; अन्न्यत्र तु दीर्घोत्तरत्वे "विहीमिद्धः"[२३] इत्यादिषु उदात्तमेव भवति; उकारयोस् तु उदात्तानुदात्तयोस् सन्धावपि सन्ध्यमुदात्तमेव भवति । तैत्तिरीयके तु उकारयोरुदात्तानुदात्तयोऽ

---

१. २।६।७–१० । २. २७१। ३. ४०६ । ४. १६५६।
५. २१९ । ६. २३९ । ७. आ.सं. २२। ८. ३।५५,५६।
९. ५।१७।१ । १०. शौ. च. अ. वृ. ३।५३ । ११. १५।३।२ ।
१२. १५।१८।३ । १३. १५।८।१ । १४. ७।२६।७ ।
१५. ६।९२।३ । १६. ४।३२।३ । १७. ७।१८।१ ।
१८. ११।२।१२ । १९. अष्टा. ८।२।६ । २०. १०।४५।४ ।
२१. मा. वा. शु. य. वे. सं. ३४।११ । २२. तत्तरैव २२।८ ।
२३. तत्तरैव १२।६ ।

प्रश्लेषे सन्ध्यमक्षरं स्वरितम् भवति, इकारयोस् तु तादृशे प्रश्लेषेऽपि सन्ध्यमक्षरमुदात्तमेव भवति। सामवेदे तु कौथुमशाखायान् तादृशमक्षरं स्वरितमेव भवति; नैगेयशाखायान् तु स्वरितमुदात्तञ् चोभयथा भवतीति प्रतीयते[1]; औदवरज्ज्यन्वाख्यातायां शाखायान् तु उदात्तमेव भवति स्मेति[2] चाऽनुमीयते। **एवञ् च 'पदान्तादुदात्तात् पदादावनुदात्ते परे तयोरेकीभावे स्वरितीभाव एव बाहुल्येन भवति, क्व चित् क्व चिदेवोदात्तभावः' इति वस्तुस्थितिं सूचयितुं सूक्ष्मेक्षिकावता आचार्यपाणिनिना "स्वरितो वाऽनुदात्ते पदादौ"[3] इत्यत्र स्वरितग्रहणङ् कृतम्, आचार्यस्यैतां प्रशंसनीयां सूक्ष्मेक्षिकामाकलयितुमशक्नुवता पतञ्जलिना तु स्वरितग्रहणम् प्रत्याख्यातमिति च विवेकस् सुधीभिः कार्यः ॥६८॥**

स्यादुच्चपूर्वन् निहतवँ विवृत्त्या व्यञ्जनेन वा।
अनन्तरहितञ् च स्स्वरितञ् चेन् नोच्चस्स्वरितोदयम् ॥६९॥

उक्तं हि ऋग्वेदप्रातिशाख्ये— "उदात्तपूर्वन् नियतवँ विवृत्त्या व्यञ्जनेन वा। स्वर्यतेऽनन्तरहितन् न चेदुदात्तस्स्वरितोदयम्"[4] इति। तत्तरोदाहरणानि च शाकलऋग्वेदसंहितायाम्— "य इन्द्र सोमपातमः[5], अग्निमीडे पुरोहितम्[6]" इत्यादीनि; प्रत्युदाहरणानि च— "ज्या इयं समने पारयन्ती[7], इन्द्र सोम सोमपते पिबेमम्[8], क्व१वोऽश्वाः क्वा३भीशवः[9]" इति। शुक्लयजुर्वेदप्रातिशाख्ये च— "उदात्ताच् चाऽनुदात्तं स्वरितम्, निहितमुदात्तस्स्वरितपरम्, अनवग्रहे, स्वरितस्स्य चोत्तरो देशः प्रणिहन्यते"[10] इति। तत्तर अनवग्रहइत्यादिके द्वे सूत्रे काण्वमाध्यन्दिनीयभिन्नशाखापरे इति तद्भाष्यकाराः। तैत्तिरीयप्रातिशाख्ये च— "उदात्तात् परोऽनुदात्तस् स्वरितम्, व्यञ्जनान्तरहितोऽपि, नोदात्तस्वरितपरः, नाग्निवेश्यायनस्स्य, सर्वो नेत्त्येके"[11] इति। ऋक्तन्त्रे च— "नीचमुच्चात्"[12] इति। शौनकीयचतुरद्ध्यायिकायाञ् च— "उदात्तादनुदात्तं स्वर्यते, व्यासेऽपि समानपदे, अवग्रहे च, नोदात्तस्वरितपरम्"[13] इति। पाणिनीयव्याकरणे च— "उदात्तादनु-

---

१. ऋक्तन्त्रे २।६।९। २. तत्तरैव २।६।१०।
३. अष्टा. ८।२।६। ४. ३।१७। ५. ८।१२।१।
६. १।१।१। ७. ६।७५।३। ८. ३।३२।१। ९. ५।६१।२।
१०. ४।१३७–१४०। ११. १४।२९–३३। १२. २।६।५।
१३. ३।६७–७०।

दात्तस्य स्वरितः, नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम्"[१] इति ॥६९॥

स्वरितादनुदात्तस्य परस्य प्रचयस् स्वरः ।
एकस्य वा द्वयोर् वाऽपि बहूनामपि वा भवेत् ॥७०॥

तदुक्तमृग्वेदप्रातिशाख्ये— "स्वरितादनुदात्तानाम् परेषाम् प्रचयस् स्वरः । उदात्तश्श्रुतितायँ यान्ति एकन् द्वे वा बहूनि वा"[२] इति । उदाहरणानि च शाकलऋग्वेदसंहितायाम्— "अग्निमीडे पुरोहितम्[३], नासत्याब्भ्याम् बर्हिरिव[४], इमम् मे गङ्गे यमुने सरस्वति[५], वाजेवाजेऽवत वाजिनो नः[६]" इति । शुक्लयजुर्वेदप्रातिशाख्ये च "स्वरितात्परमनुदात्तमुदात्तमयम्, अनेकमपि, नोदात्तस्स्वरितोदयम्"[७] इति । तैत्तिरीयप्रातिशाख्ये च— "स्वरितात् संहितायामनुदात्तानाम् प्रचय उदात्तश्श्रुतिः, नोदात्तस्वरितपरः"[८] इति । ऋक्तन्त्रे च— "तस्मादुच्चश्श्रुतीनि"[९] इति । शौनकीयचतुरद्ध्यायिकायाम् च— "स्वरितादनुदात्त उदात्तश्श्रुतिः, व्यासेऽपि समानपदे, अवग्रहे च, स्वरितोदात्तेऽनन्तरमनुदात्तम्"[१०] इति । पाणिनीयव्याकरणे च— "स्वरितात् संहितायामनुदात्तानाम्, उदात्तस्वरितपरस्य सन्नतरः"[११] इति ॥७०॥

उदात्ते वा स्वरितके परत्तराऽसति चाऽन्ततः ।
के चित् त्वेकमनेकवँ वा निग्घ्नन्त्यन्त्यवँ विहाय वा ॥७१॥

तदुक्तमृग्वेदप्रातिशाख्ये— "के चित् त्वेकमनेकवँ वा नियच्छन्त्यन्ततोऽक्षरम् । आ वा शेषात्"[१२] इति । "आ वा शेषाद्" इत्यस्य स्वरिताद् उत्तरत्तर स्स्थितानाम् उत्तरत्तर स्स्थितेन उदात्तेन स्स्वरितेन च रहितानाम् प्रचयानाम् मद्ध्येऽन्तिमम् प्रचयं हित्वाऽन्यान् प्रचयाननुदात्तान् कुर्वन्तीत्यर्थः ॥७१॥

उदात्ते स्वरिते वाऽपि परत्तर सति तु द्ध्रुवम् ।
तत्पूर्वम् प्रचितं सर्वे नियच्छन्त्येव वैदिकाः ॥७२॥

उक्तं हि ऋग्वेदप्रातिशाख्ये— "नियुक्तन् तूदात्तस्वरितोदयम्; नियमङ्ग कारणादेके प्रचयस्स्वरधर्मवत् । प्रचयस्स्वर आचारश् शाकल्या-

---

१. अष्टा. ८।४।६६, ६७ । २. ३।१९ । ३. १।१।१ ।
४. १।११६।१ । ५. १०।७५।५। ६. ७।३८।८ ।
७ ४।१४१, १४२, १४३ । ८. २१।१०, ११ ।
९. ३।१।१(६१) । १०. ३।७१–७४ । ११. अष्टा. १।२।३९,४० ।
१२. ३।२० ।

न्यतरेययोः; परिग्रहे त्वनार्षान्तात् तेन वैकाक्षरीकृतात् । परेषान्न्यासमाचारवँ् व्याडिस् तौ चेत् स्वरौ परौ"[1] इति । एतत्कारिकासम्बद्धानि अपि शुक्लयजुर्वेदप्रातिशाक्ख्यादिवचनानि पूर्वतरश्लोकव्याख्यान एव प्रसङ्गादुल्लिखितानि; तानि तत एव वेद्द्यानि ॥७२॥

स्वरयोऽ पूर्वपरयोस् स्याद् यत्तरैकतरोऽपि चेत् ।
स्वरोऽनुनासिकस् तत्तर स्यात् सन्ध्योऽप्यनुनासिकः ॥७३॥

तदुक्तं शुक्लयजुर्वेदप्रातिशाक्ख्ये— "अनुनासिकवत्त्यनुनासिकम्"[2] इति । तैत्तिरीयप्रातिशाक्ख्ये च– "अनुनासिकेऽनुनासिकम्"[3] इति ॥७३॥

(इ) स्वरव्यञ्जनसंहितानिरूपणम्–

(क) प्रकृतिभावः

सर्वे स्वराऽ प्रकृत्त्या स्युर् व्यञ्जनेषु परेषु तु ।
मौनमालम्ब्यैव चात्तराऽनूर्न्यैरिदम् प्रतिपादितम् ॥७४॥

(ख) दीर्घीभावः

श्रुतौ क्व चित् पदान्तस्स्थस्स्वराणावँ् व्यञ्जने परे ।
छन्दोऽनुरोधात् केषाञ् चिद् दीर्घीभावोऽपि दृश्यते ॥७५॥

अच्छाऽभिमक्ष्विवत्त्यादिस्स्था अकाराद्द्व्याऽ पदान्तगाः ।
सुश्श्रव्व्यतार्थम् पादस्स्य दीर्घास् स्युर् व्यञ्जने परे ॥७६॥

एतद्विषये ऋग्वेदप्रातिशाक्ख्ये— "दीर्घं ह्रस्स्वो व्यञ्जनेऽनन्यस्त्वृकाराद् यथादिष्टं सामवशस् स सन्धिः"[4] इत्युक्त्वा विशेषनियमास् ततऽ परैस् सूत्तरैऽ प्रतिपादिताः । तत्तर "सुता याहीत्त्यतोऽनन्येषु पदेष्वच्छेति विग्रहे"[5] इति, "नहि जह्य्यभि वीर्येण कृधीति कृणुथेति च । एतानन्येकाक्क्षरे पदे क्वैप्रीभावव्ये"[6] इति, मक्क्ष्विवत्त्युकारऽ प्लवते सर्वत्तराऽप्यपदान्तभाक्"[7] इति सूत्तराणि विशेषतोऽत्तर विचारणीयानि । शुक्लयजुर्वेदप्रातिशाक्ख्ये च— "दीर्घम्"[8] इति, "एवाऽच्छचक्रमाथ"[9] इतिप्रभृतीनि च सूत्तराणि द्रष्टव्यानि । तैत्तिरीयप्रातिशाक्ख्येऽपि— "सू तू नू मिथू मक्क्षू ऊ"[10] इति । तत्तर तैत्तिरीयप्रातिशाक्ख्ये संहितायान् दीर्घाणाम् पदपाठे ह्रस्स्वत्वम् भवतीत्त्युक्तम्[11] इति वेदितव्यम् । ऋक्तन्त्रेऽपि— "युग्मङ्घु"[12] इत्यादिभिस्

---

१. ३।२१–२३ । २. ४।५३ । ३. १०।११ ।
४. ७।१ । ५. ७।६ । ६. ७।१० । ७. ७।५ ।
८. ३।९६ । ९. ३।१२४ । १०. ३।१४ । ११. ७।१ ।
१२. ५।३।१(२३६) ।

सूत्त्रैरयवँ विषयꣳ प्रतिपादितः । शौनकीयचतुरद्ध्यायिकायाञ् च— "विद्मादीनां शरादिषु"[1] इति । पाणिनीयव्याकरणे च "ऋचि तुनुघमक्क्षुतङ्कुत्त्रोरुष्याणाम्, इकस् सुञि, द्व्यचोऽतस् तिङः, निपातस्स्य च; अन्न्येषामपि दृश्यते"[2] इति । उदाहरणानि च— "अच्छा वद तवसम्[3], अभी ष्वर्यꣳ पौंस्यैर् भवेम[4] मक्क्षू देववतो रथः[5], मक्क्षूमक्क्षू कृणुहि गोजितो नः[6]" इत्यादीनि बोद्ध्यानि । **अत्त्राऽपि पाणिनिना सामान्न्यतया प्रोक्तोऽपि दीर्घीभावश् शाखाविशेषे स्थलविशेषे च विशेषतया व्यवस्स्थित एव भवतीति तद्विशेषोऽपि तत्तच्छाखासम्बद्धप्रातिशाक्ख्येब्भ्योऽवसेयः ।।७६।।**

अपादान्ते स्स्थितेष्वेवाऽद्द्यादिकेषु तथैव च ।
शोचा यविष्ठ्य त्यादौ च ऋचि दैर्घ्यम् प्रकीर्तितम् ।।७७।।

तदुक्तमृग्वेदप्रातिशाक्ख्ये— "अपादान्तः, अद्द्य ति करणादिषु, करणञ् च चित् करते वृणीमहे भवतङ् कृणोतु भवत स्वस्तये; पुर्विति चित् पुरुहूतो नृषूतस् सहस्स्राणि पुरुभुजा धियायते; वहेति त्वन् दुहितर् दैव्यमुत्तरम्; द्युम्नं रुद्द्रन् नव्यमेतेषु वर्धय, चिन् महित्वङ् गीर्गृणानस् सतेपरन् न्वित्त्यन्ते चेन् मर्त्तशब्दाद्द्रिवꣳपरे; तूतुजानो मतिभिर् भोजनानि नो दर्द्धि स्तोमम् भूरि योनिन् त्वमेषु । भरेत्त्येतत्, न नु चिद् यः; भवेति स्तोतृभ्यो द्युम्नी शत मे परेषु; शोचा यविष्ठ्य वा यथा कर्ता यत् सादया सप्त । अर्चा मरुद्भ्यस् तिष्ठा न सना स्वः पारया नव्यः; बोधा स्तोत्त्रे चकृमा ब्रह्म्मवाहः शंसा गोषूच्छा दुहितर् वदातना । अधा नष्टञ् जम्भया ता अधा महो गन्ता मा युक्क्ष्वा हि सृजा वनस्पते; अग्ने रक्क्षा णस् तिष्ठा हिरण्यं सोता वरेण्यं शोचा मरुद्वृधः, शिक्क्षा स्तोतृब्भ्यो भूमा त्रिबन्धुरꣳ पिबा मधूनां सोता परीति च"[7] इति । तदुदाहरणानि च शाकलऋग्वेदसंहितायाम्— "प्र तत् ते अद्द्या करणम्[8], हवमद्द्या च मृडय[9], तदद्द्या चित् त उक्थिनः[10], को वामद्द्या करते[11], सूक्तैरद्द्या वृणीमहे[12]; तिरꣳ पुरू चिदर्णवञ् जगन्न्वान्[13] इन्द्रꣳ पुरू

---

१. ३।१६ । २. अष्टा. ६।३।१३३–१३७ ।
३. शा. ऋ. सं. ५।८३।१ । ४. तत्त्रैव १०।५९।३ ।
५. तत्त्रैव ८।३१।१५ । ६. तत्त्रैव ३।३१।२० । ७. ७।२०–३२ ।
८. ६।१८।१३ । ९. १।२५।१९ । १०. ८।१५।६ ।
११. ४।४४।३ । १२. ५।८२।७ । १३. १०।१०।१ ।

पुरुहूतः[1], आ दाशुषे जातवेदो वहा त्वम्[2] आ वहा दुहितर् दिवः[3] आ वहा दैव्यञ् जनम्[4]; आर्यं सहो वर्धया द्युम्नमिन्द्र[5] रुद्द्रन् दिवा-वर्धया रुद्द्रम्[6], अद्द्या चिन् नू चित्[7], प्र नू महित्त्ववँ् वृषभस्य[8] इन्द्रवँ् वेपी वक्वरी यस्य नू गीः[9] नू ष्टुत इन्द्र नू गृणानः[10], अस्मा इदु प्प्र भरा तूतुजानः[11] भृतिन् न भरा मतिभिः[12] शत्तरूयतामा भरा भोज-नानि[13] (उतो नु चिद् य ओजसा[14]), भवा स्तोतृभ्यो अन्तमस् स्वस्तये[15] भवा द्युम्नी वाद्धर्चश्श्व[16], बृहच् छोचा यविष्ठ्य[17], न किरेवा यथा त्वम्[18] बोधा स्तोत्तरे वयो दधत्[19] अग्ने रक्क्षा णो अंहसः[20]" इत्त्या-दीनि बोद्ध्यानि ॥७७॥

सक्क्ष्वेत्त्यादिषु पादादिस्स्थितेष्ष्वेव हि दीर्घता ।
रास्स्वा-पितऽप्रभृतिषु चाऽप्प्युक्ता शौनकादिभिः ॥७८॥

तदुक्तमृग्वेदप्रातिशाख्ये— "**सक्क्ष्व** मिमिक्क्ष्व दधिष्ष्व वसिष्ष्व श्रोत सुनोत हिनोत पुनात, विद्म जगृम्भ ररम्भ ववन्म क्षाम सुपप्तनि मन्थत मत्स्व; सर रद रण जिन्न्व धारयाऽर्ष क्षर यज यच्छ दशस्य साध सेध, तप रुज मृड वर्ध यावयात्तर श्रवय नमस्स्य विदाष्ट कृष्ष्व जोष; शृणुधि शृणुत यन्त यच्छत स्तव सिम गूहत कुत्तर मोपथ, दिधृत पचत वृश्च विद्ध्यताथ मदथात्त यदीत पाथन; उपागत्त्याख्खलीकृत्त्य वव्राजाविष्टनोरुष्ष्य, इष्कर्तेडिष्ष्व मर्मृज्म बिभयेयर्त तच् छतम्; सार्ध्वमद्द्यादिभिऽ प्लुतैऽ **पादादौ व्यञ्जनोदयम्**, न्वेववर्जन् न संयोगे शेषे चाऽपठिते सति[21] इति; "**रास्स्वा पितस्** शतेना नो वर्धस्स्वा सु श्रुधी हवम् । मन्दस्स्वा सु वहस्स्वा सु वनेमा ते न ही नु वः"[22] इत्त्यादिकञ् च । तत्तरोदाहरणानि च शाकलऋग्वेदसंहितायाम्— सक्क्ष्वा देव प्र णस्पुरः[23], मिमिक्क्ष्वा समिड़ाभिरा[24], दधिष्ष्वा जठरे सुतम्[25], वसिष्ष्वा

---

१. ८।२।३२ ।	२. १।४४।१ ।	३. ५।७९।८ ।
४. १।३१।१७ ।	५. १।१०३।३ ।	६. ६।४९।१० ।
७. ६।३०।३ ।	८. १।५९।६ ।	९. ६।२२।५ ।
१०. ४।१६।२१ ।	११. १।६१।१२ ।	१२. ९।१०३।१ ।
१३. ५।४।५ ।	१४. ८।४०।१० ।	१५. ३।१०।८ ।
१६. १०।६९।५ ।	१७. ६।१६।११ ।	१८. ४।३०।१ ।
१९. १०।१५६।५ ।	२०. ७।१५।१३ ।	२१. ७।३३ ।
२२. ७।५२–५६ ।	२३. १।४२।१ ।	२४. १।४८।१६ ।
२५. ३।४०।५ ।		

हि मियेद्ध्य[1], श्रोता हवम् जरितुरेवयामरुत[2], सुनोता सोमपाव्ने[3]; रास्स्वा पितर् मरुताम्[4], शतेना नो अभिष्टिभिः[5] वर्धस्स्वा सु पुरुष्टुत[6] इत्त्यादीनि बोद्ध्यानि ॥७८॥

उ-सु-धन्वेत्त्यादिकानाम् पादान्तर्वर्तिनाम् भवेत् ।
पृच्छाविपश्चितमितिप्रभृतीनाञ् च दीर्घता ॥७९॥

तदुक्तमृग्वेदप्रातिशाख्ये— "अनतऽपादवँ विग्रह एष्वपृक्त उकारो व्रजस्स्य सु धा नमोभिः । शुचिम् पवित्त्रन् तु महीर् नु चाप्प्लुतं सुतस्स्येति यद्द्युदयोदया न । सोमसुतिम् चर्किराम स्स्तवाम स्स्तवाना गृभाय रथं श्रुधीति; ते अस्ति ते महिमनऽ प्र वोचत प्र वोचन् नस् सुमना द्वैपदाश् च"[7] इति, "महे दधिद्ध्वन् तिर मुञ्ज नो मृधश् चर नमद्ध्वन् नम ते नयन्त, स्वित्त्येतेषु, एकाक्षरयोऽ पराणि चेदुपेन्द्राग्नेऽत्तराऽद्ध्वमायुरेत्त्विति"[8] इति; "धन्वेत्त्येतत् सोम राट् पूयमानः"[9] इत्त्यादिकम्, "पृच्छा विपश्चितमवा पुरन्ध्या घा त्वद्रिग्वीरान् वनुयामा त्वोताः, जनया दैव्व्यम् भुजेमा तनूभिर् हा वहतो वासया मन्मना च"[10] इत्त्यादिकञ् च । तत्त्रोदाहरणानि च शाकलऋग्वेदसंहितायाम्— "व्यू व्रजस्स्य तमसः[11], अस्या ऊ षु ण उप सातये[12] शंसात्त्युक्थयँ यजते व्यू धाः[13]; प्र सू महे सुशरणाय[14], नि षू दधिद्ध्वमखनन्त उत्सम्[15], प्र सू तिरा शचीभिर् ये त उक्थिनः[16] वि षू मुञ्चा सुषुवुषः[17]; प्र धन्वा सोम जागृविः[18] ऋणो न तायुरतिधन्वा राट्[19] अभि स्स्वर धन्वा पूयमानः[20]; इन्द्रम् पृच्छा विपश्चितम्[21] रथमवा पुरन्ध्या[22]" इत्त्यादीनि बोद्ध्यानि ॥७९॥

एकादशाक्षरे पादे द्वादशाक्षरकेऽपि च ।
लघौ परेऽष्टमन् दीर्घं स्यान् नश्शब्दे गुरावपि ॥८०॥
दशमञ् चैतयोरेवं षष्ठञ् चाऽष्टाक्षरेऽक्षरम् ।
पादसुश्श्रवतासिद्ध्यै दीर्घं स्यादिति कीर्तितम् ॥८१॥

---

१. १।२६।१ । २. ५।८७।८ । ३. ७।३२।८ ।
४. १।११४।९ । ५. ४।४६।२ । ६. ८।१३।२५ ।
७. ८।१–३ । ८. ८।४–५ । ९. ८।७। १०. ८।२८–३५।
११. ४।५१।२ । १२. १।१३८।४ । १३. ४।६।११ ।
१४. ५।४२।१३ । १५. १०।१०१।११ । १६. ८।५३।६ ।
१७. १०।९४।१४ । १८. ९।१०६।४ । १९. ६।१२।५ ।
२०. ९।९७।३ । २१. १।४।४ । २२. ५।३५।८ ।

तदुक्तमृग्वेदप्रातिशाख्ये— "एकादशिद्द्वादशिरोर् लघावष्टमम्क्षरम् । उदये संहिताकाले, नऽकारे च गुरावपि ।। दशमञ् चैतयोरेवं षष्ठञ् चाष्टाक्षरेऽक्षरम्"[1] इति । यदि एकादशाक्षरकादिषु पादेषु अक्षरन्यूनता भवेत् तदा "व्यूहैस् सम्पत् समीक्ष्योने क्षैप्प्रवर्णैकभाविनाम्"[2] इति वचनान्न्वाख्यातवँ् व्यूहङ कृत्वा पादपूर्तिवँ् विधाय अष्टमाक्षरादिनिर्णयः कार्यः । षष्ठाष्टमदशमाक्षराणान् दीर्घीभावेऽपवादा अपि ऋग्वेदप्रातिशाख्ये एव— "न वावृधन्त वातस्स्यावद्द्यानि जिघांससि । सासह्य्याम ववृत्त्याम दीहिह्य्यष्टममूर्णुहि"[3] इत्त्यादिना प्रतिपादिता द्रष्टव्याः । तत्र तावद् दीर्घीभावस्य उदाहरणानि शाकलऋग्वेदसंहितायाम्— "तादीत्ना शत्त्रुन् न किला विवित्से[4], अग्ने सख्ये मा रिषामा वयन् तव[5], द्य्युभिर् हितो जरिमा सूनो अस्तु[6]; अहा विश्वा सुमना दीदिही नः[7], अव रुद्रा अशसो हन्तना वधः[8], ईशानो यवया वधम्[9]" इति । व्यूहोदाहरणानि— "उद्वत्स्व(सुव)स्मा अकृणोतना तृगम्[10], गोर् न पर्व (परुव) वि रदा तिरश्चा[11], प्रे (प्र इ) ता जयता नरः[12]" इति । तत्र व्यूहे "क्षैप्प्रवर्णाँश् च संयोगान् व्यवेयात् सदृशैस् स्वरैः"[13] इति "व्यूहेदेकाक्षरीभावान् पादेषूनेषु सम्पदे"[14] इति च नियमौ बोद्ध्यौ । दीर्घीभावापवादोदाहरणानि च शाकलऋग्वेदसंहितायाम्– "द्य्युतद्यामानवँ् वावृधन्त नृणाम्[15], युजानो अश्श्वा वातस्स्य धुनी[16], अनृतः सन्तोऽवद्द्यानि पुनानाः[17], यत् स्तोतारञ् जिघांससि सखायम्[18]" इत्त्यादीनि बोद्ध्यानि ।।८०–८१।।

पादान्तस्स्थाव्व्यादिकानामृग्वेदे दीर्घता स्मृता ।
व्यवस्थयैवं स्यादन्न्यवेदेष्वपि च दीर्घता ।।८२।।

एतद्विषये च ऋग्वेदप्रातिशाख्ये— "आव्यभूमेति पादान्तौ व्यञ्जनेषु, श्रुधी हवम् । सद्मा होता स्मा सनेमि धर्मा सम् भूषता रथः"[19] इत्त्युक्तम् । तदुदाहरणानि च शाकलऋग्वेदसंहितायाम्— "अया धिया

---

१. ८।३६–३९ । २. ऋ. प्रा. ८।४०। ३. ८।४१–४७।
४. १।३२।४ । ५. १।९४।१ । ६. १०।५९।४ ।
७. ३।५४।२२ । ८. २।३४।९ । ९. १।५।१० ।
१०. १।१६१।११ । ११. १।६१।१२। १२. १०।१०३।१३।
१३. ऋ. प्रा. १७।२३ । १४. तत्त्रैव १७।२२। १५. १०।९३।१२ ।
१६. १०।२२।४ । १७. ६।६६।४ । १८. ७।८६।४ ।
१९. ८।४८–५० ।

मनवे श्रुष्टिमाव्व्या, (साकम्)[1]; सवँ् वि व्व्य इन्द्रो वृजनन् न भूमा, (भर्ति)[2]; इमम् मे वरुण श्रुधी, हवम्[3]; स दूतो विश्वेदभि वष्टि सद्मा, होता[4]; कृतञ् चिद् धि स्मा, सनेमि[5]" इत्त्यादीनि बोद्ध्यानि ।

यथा ऋग्वेदे एववँ्विधया व्यवस्थया पदान्तस्थानां स्वराणावँ् व्यञ्जने परे दीर्घीभावो भवति; तथैवाऽन्न्येषु वेदेष्वपि स्थलविशेषादि-स्स्थितिविशेषादिव्व्यवस्थयैव दीर्घीभावो भवति; न तु पाणिनिप्प्रोक्तनिभया सामान्न्यतयेति बोद्ध्यम् ॥८२॥

वसौ मघे चाऽपि परे समासे प्राक्पदस्स्य च ।
अन्त्यस् स्वरो भवेद् दीर्घो विश्श्वादेश् च सहादिके ॥८३॥

एतद्विषये च ऋग्वेदप्रातिशाक्ख्ये— "सर्वत्तर पूर्वपदान्ताऽप्लवन्ते वसुमघयोऽ परयोः"[6] इत्त्यादीनि वचनानि सन्ति; शुक्लयजुर्वेद-प्रातिशाक्ख्येऽपि— "दीर्ग्घम्"[7] इत्त्यादिभिस् सूत्त्रैऽ पूर्वपदान्त-दीर्घीभावा अपि पदान्तदीर्घीभावैस् सह प्प्रतिपादिताः; तैत्तिरीय-प्रातिशाक्ख्ये च संहितायान् दीर्घीभूतानाम् पदान्तस्थानां स्वराणावँ् विभागे ह्रस्स्वता यथा प्रतिपादिता[8] तथैव समस्तपदेषु संहितायान् दीर्घीभूतानाम् पूर्वपदान्तस्थानां स्वराणाञ् च विभागे ह्रस्स्वताऽपि प्प्रतिपादिता[9] । ऋक्तन्त्रेऽपि— "समासे गिरौ पेषुण गोप-वत्सक-यवाऽञ्जन-भञ्जनानाम्,करणस्स्य शृङ्गे, वृषस्स्य कपिमोदनीदर्भरवेषु"[10] इत्त्यादिभिस् सूत्त्रैर् लौकिकवैदिकसमासपूर्वपदान्तस्स्थस्वरदीर्घीभावऽ प्रतिपादितः । शौनकीयचतुरद्ध्यायिकायाञ् च— "विद्मादीनां शरादिषु, बहुलम् मतौ, इच्छायाञ् च यकारादौ, तृतीयान्तस्स्य, रलोपे, नारकादीनाम् प्रथमस्स्य, दीदायादीनान् द्वितीयस्स्य, सात्त्रासाहादीनामुत्तरपदाद्द्य-स्स्य, ऋत वृधवरीवानेषु अध त्यन्धीऽपरवर्जम्"[11] इति प्रकरणेऽयवँ् विषय उक्तः । एतद्विषयकाणि दिक्प्रदर्शनार्थानि उदाहरणानि च शाकलऋग्वेदसंहितायाम्— "विश्श्वावसुं सोम गन्धर्वमापः[12] तुविदेष्णन् तुवीमघम्[13] विश्वासाहमवसे[14] युक्ष्वा हि त्वं रथासहा[15] शत्रूसाहः

---

१. १।१६६।१३ । २. १।१७३।६ । ३. १।२५।१९ ।
४. ४।१।८ । ५. ४।१०।७ । ६. ९।१-५२ ।
७. ३।९६-१२९ । ८. ३।१-१५ । ९. ३।२,३,४,५,६,७ ।
१०. ४।७।१०-५।२।१० । ११. ३।१६-२५ । १२. १०।१३९।४ ।
१३. ८।८१।२ । १४. ३।४७।५ । १५. ८।२६।२० ।

स्वग्नयः[1]'' इत्यादीनि; माद्ध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदमन्त्रसंहितायाञ् च— ''अश्श्वावतीं सोमावतीम्[2], इमा उ त्वा पुरूवसो[3], विश्श्वासाहमवसे नूतनाय[4], अर्च्चा विश्श्वानराय विश्श्वाभुवे[5], विश्श्वापुषं रयिम्[6]'' इत्यादीनि; तैत्तिरीयसंहितायाञ् च— ''देवावते यजमानाय शर्म्म[7], वयुनाविदेक इत्[8], हृदयाविधश् चित्[9], उक्थामदानान् धेनुः[10], इन्द्रावतीमपचितिमिहावह[11]'' इत्यादीनि; कौथुमसामवेदार्चिकसंहितायाञ् च— ''तेषाम् मत्स्व प्रभूवसो[12], रथीतममतूर्तन् तुग्रियावृधम्[13], न शताय शतामघ[14], वीराय सदनासदे[15]'' इत्यादीनि; शौनकिनामथर्ववेदसंहितायाञ् च— ''सत्त्यसन्धानृतावृधः[16], ऋतावरी यज्ज्ञिये[17], ऋतावानवँ विश्श्वानरम्[18]'' इत्यादीनि बोद्ध्यानि। पाणिनीयव्याकरणेऽपि एष दीर्घीभावो ''दीर्घोऽणः''[19] इति वर्तमाने ''संहितायाम्''[20] इत्यधिकारे लोकवेदसाधारणतया क्व चिद् वेदमन्त्रविषयतया[21] च प्प्रतिपादितः ॥८३॥

(ई) व्यञ्जन-स्वरसंहितानिरूपणम्

(क) प्रथम–तृतीयभाव–तृतीय–प्रकृतिभावादिकम्

वर्गेषु प्प्रथमा वर्णाः४ पदान्तस्स्थास् स्वरे परे।
तृतीयास् स्युस् सदा वेदे लोके चाऽप्प्यविशेषतः ॥८४॥
पदान्तस्स्थास् तृतीयास् तु प्प्रकृत्त्या स्युस् स्वरे परे।
व्यञ्जनयँ यत् पदान्तस्स्थन् तद् गच्छेद् धि परं स्वरम् ॥८५॥

एतद्विषये प्रातिशाक्ख्यादिवचनानि च ''तत्त्र प्रथमास् तृतीयभावम् प्प्रतिलोमेषु नियन्ति''[22] इति ऋग्वेदप्रातिशाक्ख्ये। शुक्लयजुर्वेदप्रातिशाक्ख्ये च— ''स्पर्शोऽपञ्चमः स्वर–धौ तृतीयम्''[23] इति। कृष्णयजुर्वेदप्रातिशाक्ख्ये च— ''तृतीयं स्वरघोषवत्परः''[24] इति। ऋक्तन्त्रे तु पदान्तस्थानान् तृतीयत्त्वमास्थाय तद्विकारा वर्णिताः[25]। शौनकीय-

---

१. ८।६०।६। २. १२।८१। ३. ३३।८१।
४. ७।३६। ५. ३३।२३। ६. ३५।४५। ७. ३।५।५।३।
८. १।२।१३।१। ९. १।४।४५।१। १०. २।४।११।६।
११. ५।७।४।३। १२. २१२। १३. २८३। १४. २९१।
१५. १३३१। १६. ११।६।१९। १७. ६।६२।१।
१८. ६।३६।१। १९. अष्टा. ६।३।१११। २०. तत्त्रैव ६।३।११४।
२१. तत्त्रैव ६।३।१३१। २२. २।१०। २३. ४।१२०।
२४. ८।३। २५. ४।४।२–३।

चतुरद्ध्यायिकायाम् च— "पदान्तानामनुत्तमानान् तृतीया घोषवत्-स्वरेषु"[१] इति। पाणिनीयव्याकरणे च— "झलाम् जशोऽन्ते"[२] इति। तत्तर वैदिकानि उदाहरणानि च शाकलऋग्वेदसंहितायाम्- "अर्वागावर्तया हरी[३], हव्यवाडग्निरजरः पितानः[४], यदङ्ग दाशुषे त्वम्[५] इन्द्रस्य त्रिष्टुबिह भागः[६]" इति। माद्ध्यन्दिनीयसंहितायाम्— "अदित्यास्तत्त्वगसि[७], स्वाहा वाडग्गँ नये[८] बडादित्य[९] हविष्कृदेहि[१०]" इति। एवमन्यत्तरापप्युदाहरणानि द्रष्टव्यानि। लौकिकान्न्युदाहरणान्न्यपि "कीदृगस्ति, सम्म्राडस्ति, तदस्ति, ककुबियम्" इत्यादीनि बोद्ध्यानि। पदान्तस्थानान् तृतीयत्त्वमेव न प्रथमत्त्वमिति मते तृतीयानां स्वरे परे प्रकृतिभावे चैतान्न्येवोदाहरणानि। पदान्तस्स्थस्स्य व्यञ्जनस्स्य संहितायामुत्तरस्स्य पदस्स्याऽऽदौ स्थितेन व्यञ्जनेन सहैकाक्षरघटकत्वेनोच्चारणम् चाऽनादिपरम्परागतं शर्ववर्मणा प्रोक्तम्— "व्यञ्जनमस्स्वरम् परवँ वर्णन् नयेत्"[११] इति। पाणिनीया अपि 'अज्झीनो वर्णः परन् धावति" इति बालान् बोधयन्ति ॥८४-८५॥

(ख) ङनणद्वित्त्वम्

ङनौ पदान्तगौ ह्रस्स्वपूर्वकौ तु स्वरे परे।
नित्त्यङ्क्रमेते भाषायाङ्क्रमते णोऽपि तादृशः ॥८६॥

तदुक्तम् ऋग्वेदप्रातिशाख्ये— "पदान्तीयो ह्रस्स्वपूर्वो ङकारो नकारश् च क्रामत उत्तरे स्स्वरे"[१२] इति। तदुदाहरणम् च शाकलऋग्वेदसंहितायाम् "कीदृङ्ङिन्द्रः[१३], अहन्नहिम्[१४]" इत्यादिकन् द्रष्टव्यम्। शुक्लयजुर्वेदप्रातिशाख्ये च— "ङनौ चेद् ह्रस्स्वपूर्वौ स्स्वरे पदान्तौ"[१५] इति, तदुदाहरणानि च माद्ध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदमन्त्रार्षसंहितायाम्— "युङ्ङसि[१६], दद्ध्यङ्ङृषिः[१७], अक्षन्नमीमदन्त[१८], अश्मन्नूर्ज्जम्[१९]" इत्यादीनि। तैत्तिरीयप्रातिशाख्येऽपि— "ह्रस्स्वपूर्वो ङकारो द्विवर्णम्, नकारश् च"[२०] इति; तदुदाहरणानि

---

१. २।२। २. अष्टा. ८।२।३९। ३. ४।३२।१५। ४. ५।४।२। ५. १।१।६। ६. १०।१३०।५। ७. १।१४। ८. २।२०। ९. ३३।१९। १०. १।१५। ११. कातन्त्रे १।१।२१। १२. ६।१५। १३. १०।१०८।३। १४. ३।३२।११। १५. ४।१०८। १६. १०।२५। १७. ११।३३। १८. ३।५१। १९. १७।१। २०. ९।१८, १९।

च तैत्तिरीयसंहितायाम्— "न्यङ्ङग्निः[1], दद्ध्यङ्ङृषिः[2], अवपन्निन्द्राय[3], अब्ब्रुवन्नृद्ध्नवंत्[4]" इत्यादीनि। ऋक्तन्त्रे च— "रेऽनृत्योऽप्रतिषेधे"[5] इति; तदुदाहरणानि च तद्वृत्तिकारप्रदर्शितानि 'प्रत्त्यङ्ङुदेषि[6], गण्णत्त्र, हसन्नत्त्र, अजगन्नपः[7]' इति। तत्त्र णकारोदाहरणन् तु लौकिकम् प्रतीयते। तत्त्र हुम् इत्यस् स्तोमस्य तु मकारस्याऽपि द्वित्त्वमुक्तम्[8]। शौनकीयचतुरध्यायिकायाम् च— "ङणना ह्रस्स्वोपधास् स्वरे"[9] इत्युक्तम्। किन् तु तद्वृत्तिकृता ङकारनकारयोरुदाहरणानि अथर्ववेदादुद्धृतानि 'प्रत्त्यङ्ङुदेषि[10], उद्द्यन्नादित्त्यः[11]' इत्यादीनि, णकारोदाहरणन् त्वत्त्राऽपि लौकिकमेव प्रतीयते। पाणिनीयव्याकरणेऽपि— "ङमो ह्रस्स्वादचि ङमुण् नित्त्यम्"[12] इति। तद्व्याक्ख्याने च यद्द्यपि वार्तिककारेण "ङमुटि पदादिग्ग्रहणम्" इत्युक्तम्, भाष्ष्यकारेण च तत् समर्थितम्, काशिकायाम् च "ह्रस्स्वात् परो यो ङम् तदन्तात् पदात्" इति जयादित्त्येन, "ह्रस्स्वात् परो यो ङम् पदान्तः" इति रूपावतारे धर्मकीर्तिना च प्रोक्तम्, तथैवान्न्यैरपि व्याक्ख्यातृभिः प्रायेणोक्तन् तथापि भाषावृत्तौ पुरुषोत्तमदेवेन "तिङन्तोणादिसनाद्द्यन्तादयस् तु निपातनात्" इत्युक्तमुपलभमाना "सन्नन्तान् न सनिष्ष्यते"[13] इति भाष्ष्यपाठम् च शुद्धम् मन्न्यमानाः "असमस्तस्य पदस्याऽन्ते वर्तमानानां ह्रस्स्वस्स्वरपूर्वकाणाङ ङणनानाम् असमस्तस्य पदस्यादौ वर्तमाने स्वरे पर एव द्वित्त्वम् भवति नान्न्यथा" इति प्रतिपत्तुमशक्नुवाना भ्राम्म्यन्ति केचन। पुरुषोत्तमदेवोक्तिस् तदुक्तस्स्थलेषु द्वित्त्वप्प्राप्तेरेवाभावाद् भ्रममूला, भाष्ष्यपाठोऽपि "सनन्तान् न सन्निष्ष्यते" इत्त्येव साधुः, वृत्तदुश्श्रवत्त्वमुपेक्क्षणीयं शास्त्रपद्द्येऽन्न्यत्त्राऽपि बहुशश् शास्त्रपद्द्येषु वृत्तदुश्श्रवताया दर्शनात्, "तिङ ङतिङः"[14] इत्त्येव पाठस् साधुः; "इको यणचि"[15] इत्त्यत्त्र तु वेदे णकारान्तपदस्स्थणकारद्द्वित्त्वोदाहरणस्याभावादेतादृशे स्थले णकारद्वित्त्वस्याऽनब्भ्यस्तत्त्वादागतः पाणिनेः प्रमादो मर्ष-

---

१. ५।५।३।२। २. ४।१।३।२। ३. २।४।२।२।
४. १।५।१।२। ५. ५।५।१०। ६. आ. सं. ५२।
७. ५३ (कौ. सा. वे. सं.)। ८. ६।१।१। ९. ३।२७।
१०. १३।२।२० (शौ. अ. वे. सं.)। ११. ३।३२।१।
१२. अष्टा. ८।३।३१। १३. पा. व्या. भा. ३।१।७।
१४. अष्टा. ८।१।२८। १५. तत्त्रैव ६।१।७७।

णीयः[१], एतादृशानाम् प्रामादिकप्प्रयोगाणाम् पाणिनीये व्याकरणे "तिर्यच्च्यपवर्गे"[२] "अनूनवच्च्यानुलोम्ये"[३] इत्यादौ च दृश्यमानत्वादित्यस्माकम् प्रातिशाक्ख्यानि वैदिकान् प्रयोगाँश् च पर्यालोचयतान् निष्कर्षः। एतेन सूत्रे नित्यमिति पदे श्रूयमाणेऽपि "अयञ् च क्व चिन् न इको यणचीति निर्देशात्। एतेन इकोऽचि यण् इत्येव वक्तुयँ युक्तमित्यपास्तमित्याहुः" इति बृहच्छब्देन्दुशेखरवचनमपि सर्वथाऽनादरणीयमेवाऽस्माकम् प्रतिभाति ॥८६॥

(ग) नकारस्य स्वररागताप्राप्त्यादिकम्

आपूर्वको नस् समानपादस्थे हि स्स्वरे परे।
गच्छेदारागताङ् क्वाप्प्यनुस्स्वारत्वञ् च रङ्गताम् ॥८७॥

उदाहरणानि यथा— महाँ इन्द्रः[४], वृष्ट्टिमाँ इव[५], दशा इह[६] इति। एतद्विषये च ऋग्वेदप्रातिशाक्ख्यवचनम्— "नकार आकारोपधऽ पद्द्यान्तोऽपि स्वरोदयो लुप्प्यते"[७] इति, "नकारस्स्य लोपरेकोष्मभावे पूर्वस् तत्स्थानादनुनासिकस् स्वरः"[८] इति च। शुक्लयजुर्वेदप्रातिशाक्ख्ये च— "आकारोपधो यकारम्"[९] इति, "यवयोऽ पदान्तयोस् स्वरमद्ध्ये लोपः"[१०] इति, "अनुनासिकमुपधा प्रागन्तस्थायाः, स्वर औपशविः"[११] इति च। तैत्तिरीयप्रातिशाक्ख्येऽपि— "आकारपूर्वश् च यकारम्, मर्त्यानुदयानमृतान्"[१२] इत्यादिभिस् सूत्रैरयवँ विषयऽ प्रोक्तः। ऋक्तन्त्रेऽपि— "घान् नो ङि विसर्जनीययँ यवोहिषु, घाद् ग्रा, आ रक्तः"[१३] इति। शौनकीयचतुरद्ध्यायिकायान् च— "आकारोपधस्स्य (नकारस्स्य) उपबद्धादीनां स्वरे (विसर्जनीयः), नकारमकारयोर् लोपे पूर्वस्स्याऽनुनासिकः, यरोष्मापत्तौ च"[१४] इति। पाणिनीये व्याकरणे च— "उभयथर्क्षु, दीर्घादटि समानपादे"[१५] इत्युक्तम्। इमन् नकारेण स्वोपधारागताम् प्राप्तेन रक्तम् आकारं शुद्धमुच्चार्य ततऽ परत्तर रङ्गा-

---

१. "एतदेकमाचार्यस्स्य मङ्गलार्थम् मृष्ष्यताम्" (पा. व्या. भा. १।१।१ वा. ७) इत्यादिकञ् चात्तर स्मरणीयम्। २. अष्टा. ३।४।६०। ३. तत्तरैव ३।४।६४। ४. शा. ऋ. म. सं. ६।१९।१। ५. मा.वा.शु.य.वे.मं.ब्र.य.सं. ७।४०। ६. तै. सं. ३।२।११।३। ७. ४।६५। ८. ४।८०। ९. ३।१४२। १०. ४।१२७। ११. ३।१३०–१३१। १२. ९।२०, २१। १३. ३।६।२–४। १४. १।६७–६९, २।२७। १५. अष्टा. ८।३।८–९।

क्ख्यमनुस्स्वारसदृशवँ वर्णमुच्चारयन्ति के चन वैदिकाः । अयञ्च रङ्गो व्याकरणे प्रातिशाक्ख्येषु चाऽप्प्रतिपादितोऽपि शिक्क्षासु प्रतिपादितोऽस्ति । एतद्विवरणं रङ्गनिरूपणे वर्णाद्ध्याय एव विहितन् तत एव वेदितव्यम् । काशिकायान् तु "आतोऽटि नित्यम्"[1] इत्यत्तर "केचिदनुस्स्वारमधीयते स च्छान्दसो व्यत्ययो द्रष्टव्यः" इत्युक्तम् । तद्व्याक्ख्याने हरदत्तेन च "केचिदिति तैत्तिरीयाः" इत्युक्तम् । तैत्तिरीयप्रातिशाक्ख्ये च "ततस् त्वनुस्स्वार"[2] इत्यययवँ विधिः प्रोक्तः । **अतो मन्दवेदादराब्भ्यामिव पाणिनीयव्याकरणवार्तिककारभाष्यकाराब्भ्यामकृतमपीदवँ व्याक्ख्यानम् प्रातिशाक्ख्यसवँवादादादरणीयमेव ।** एतद्विषये नारदीयशिक्क्षायाः "नकारस् स्वरसयँयुक्तश् चतुर्युक्तो विधीयते । रेफो रङ्गश् च लोपश् च अनुस्स्वारोऽपि वा क्व चित्"[3] इति वचनमपि स्स्मरणीयम् ॥८७॥

क्व चित् पादान्तरगते स्वरेऽपि स्स्यादयवँ विधिः ।
तानि स्स्थलानि वेद्द्यानि अज्ज्रानित्त्यादिकानि च ॥८८॥

तदुक्तमृग्वेदप्रातिशाक्ख्ये— "(लुप्प्यते)ऽज्ज्रान्[4] जग्ग्रसानान्[5] जघन्न्वान्[6] देवहूतमान्[7] । बद्बधानाँ[8] इन्द्र सोमाँस्[9] तृषाणान्[10] नो देवदेवान्[11] । हन्त देवाँ[12] इति च"[13] इति । एष च विषयः पाणिनीये व्याकरणे नैव स्फुटतयोक्तः ॥८८॥

अस्मानुपेत्त्यादिकेषु नेयादाकाररागताम् ।
स्वरे समानासमानपादस्स्थे नस् सद ऋचि ॥८९॥

तदुक्तमृग्वेदप्रातिशाक्ख्ये— "नास्मानुपैता[14]वान्[15] स्फुरान्[16] गच्छान्[17] देवानयाड्[18] वहान्[19] । हिरण्यचक्क्रान्[20] मायावान्[21] घोषाँस्[22]-

---

१. ८।३।३ । २. १५।३ । ३. २।४।७ ।
४. शा. ऋ. म. सं. ४।१।१७ । ५. तत्तरैव १०।१११।९ ।
६. तत्तरैव ३।३२।६ । ७. तत्तरैव ८।७५।१। ८. तत्तरैव ५।३२।२।
९. तत्तरैव ३।३६।३। १०. तत्तरैव४।१९।७। ११. तत्तरैव८।७५।२।
१२. तत्तरैव १०।५३।२ । १३. ४।६६ । १४. शा. ऋ. म. सं. ८।१००।११ । १५. तत्तरैव १०।९०।३ ।
१६. तत्तरैव ६।६७।११। १७. तत्तरैव ८।७९।५। १८. प्रै.पृ.१४५।
१९. शा. ऋ. म. सं. १।८४।१८ । २०. तत्तरैव १।८८।५ ।
२१. तत्तरैव ४।१६।९ । २२. तत्तरैव ३।३३।८ ।

तानश्विना[1]ऽविद्द्वान्[2]। पयस्स्वान्[3] पुत्त्राना[4]धेह्य्यायजीयान्[5]पतीनुरो:[6]" इति[7]। शुक्लयजुर्वेदप्रातिशाक्ख्येऽपि "गृहानैमि"[8] इत्त्यादयो बहवोऽपवादा उक्ता:। तैत्तिरीयप्रातिशाक्ख्येऽपि— "न रश्मीन् छ्रपयान् यमान् पतङ्गान् समानानर्चान् यजीयान्, उदथापरश् च"[9] इति अपवादा उक्ता:। ऋक्तन्त्रेऽपि— "घाद् ग्रा"[10] इति सूत्त्रे वृत्तिकारेण नकारस्य उपधारागताया 'विकल्पा४ प्रदर्शिता:। शौनकीयचतुरद्ध्यायिकायान् तु "न समैरयन्तादीनाम्"[11] इति अपवादसूत्त्रमस्ति, तच् च सूत्त्रवर्णतोऽस्य विषयस्याप्रतिपादकमिव प्रतीयमानमपि सूत्त्रस्स्थानमाहात्म्यादस्य विषयस्याऽपि प्रतिपादकमिव प्रतीयते। तथाऽपि तत् सूत्त्रवँ विषयपरिच्छेदेऽसमर्थमेव। पाणिनीये व्याकरणेऽपि— "उभयथर्क्षु"[12] इत्त्यस्य "दीर्घादटि समानपादे"[13] इत्त्यत्त्रानुवृत्तेर् यद्द्यपि एतेऽपवादा अपि सङ्गृहीता इति वक्तुं शक्क्यते, तथापि औत्सर्गिकाणाम् प्रयोगाणाम् अपवादरूपाणावँ वा प्रयोगाणाञ् चाऽगणीकरणात् तु ते न ततस् स्फुटतया प्रतिपत्तुं शक्क्या:। न च कात्त्यायन-पतञ्जलिब्भ्यामपि ते तथा प्रतिपादिता:, न च व्यवस्स्थितविकल्पत्त्वं स्फुटीकृतमिति च एतद्विषयप्रतिपादनमपि पाणिनीयव्याकरणस्य वेदाङ्गताया असदृशमेव ॥८९॥

(घ) नकारस्य रेफताप्राप्ति:

ईपूर्वकोऽथवोपूर्वो गच्छेन् नो रेफतामृचि।
स्वरे समानपादस्स्थे रक्तौ स्यातां हि यू च तौ ॥९०॥
स्वरेऽपि भिन्नपादस्स्थे दस्यूँ रेक इतीह तु।
नकारो रेफतायँ यायादूकारोऽपि च रक्तताम् ॥९१॥

उदाहरणानि यथा शाकलऋग्वेदसंहितायाम्— "रश्मीँ रिव[14], अभीशूरिव[15], त्वं ह तु त्यददमायो दस्यूँ रेक:[16]" इति। एतद्विषयकानि वचनानि च— "स्वरेषु च"[17] इति ऋग्वेदप्रातिशाक्ख्ये; शुक्लयजुर्वेदप्रातिशाक्ख्येऽपि— "शत्त्रून्[18]न्परिधीन्[19]न्करतून्[20]न्त्रनस्प्पतीन्[21]त्स्वरे

---

१. मा. सं. २१।४२। २. शा. ऋ. म. सं. १।१२०।२। ३. तत्त्रैव १।२३।२३। ४. तत्त्रैव १०।८५।४५। ५. प्रै.पृ. १४५। ६. तत्त्रैव पृ. १४६। ७. ४।७३। ८. ३।१५०,१४६-१४९। ९. १९।२३-२४। १०. ३।६।३। ११. २।३०। १२. अष्टा.८।३।८। १३. तत्त्रैव ८।३।९। १४. ८।३५।२१। १५. ६।५७।६। १६. ६।१८।३। १७. ४।७०। १८. मा. सं. ७।३७। १९. तत्त्रैव १९।५३। २०. मा.सं. १९।४०। २१. तत्त्रैव १३।७।

रेफम्"[1] इति । तैत्तिरीयप्रातिशाख्ये च– "अनितिपरो ग्रहोक्ख्ययाज्ज्या-पृष्ठ्यहिरण्यवर्णीयेष्वीकारोकारपूर्वो रेफम्"[2] इति । ऋक्तन्त्रे च– "घान् नो डि विसर्जनीयं यवोहिषु"[3] इति । शौनकीयचतुरध्यायिकायाम् च— "नाम्म्युपधस्य रेफ ऋतूरुत्सृजते वशीत्येवमादीनाम्"[4] इति । पाणिनीये व्याकरणे च— "दीर्घादटि समानपादे"[5] इति । **यद्यपि तत्र जयादित्येन नोकारोदाहरणम् प्रदर्शितम्, भट्टोजिना तु नैवेकारोदाहरणन् न वोकारोदाहरणम् प्रदर्शितम्, तथापि पाणिनीयं सूत्रन् तु कारिकोक्तान् विषयान् व्याप्नोत्येव; दस्स्यूरेक इति विषयन् तु न व्याप्नोति, तथापि मन्न्यामहेऽल्पविषयत्वाद् वार्तिककारादिभिरप्ययवं विषय उपेक्षितः ।।९०–९१।।**

गच्छेन् नो रेफतान् दीर्घऋकारात् परतस् स्थितः ।
नॄरभीत्यत्तर[6] ऋकारो यायाद् रक्ततत्वमेव च ।।९२।।

एतद्विषयकवं वचनम् ऋग्वेदप्रातिशाख्ये— "दस्स्यूरेको नॄरभि च"[7] इत्यस्ति । शुक्लयजुर्वेदप्रातिशाख्ये तैत्तिरीयप्रातिशाख्ये च स्वचरणे विषयाभावादेतद्विषयकवं वचनन् नोपात्तम् । ऋक्तन्त्रे– "(दीर्)-घाद्"[8] इति, शौनकीयचतुरध्यायिकायाम् च— "नाम्म्युपधस्य"[9] इति, पाणिनीयव्याकरणेऽपि— "दीर्घाद्"[10]इति उक्तमिति तद्वचनैरप्यवं विषयोऽपि व्याप्यत एव । तथाऽपि ए ओ ऐ औ इत्येतेभ्यः परस्य नकारस्य रेफताप्राप्तिस् तद्वचनैः प्रतीयते, न च तादृशमुदाहरणवं वेदेऽस्ति,न च प्रातिशाख्यकारैरन्न्यैरिदमुल्लिखितमिति प्रतिपत्तिगौरवकरमेव ऋक्तन्त्रकारादीनावं वचनम् । तत्र ऋकारस्याऽनुनासिकत्वे रेफात् परो भाग एवाऽनुनासिको भवति । तथा चोक्तं शौनकीयचतुरध्यायिकायाम्— "ऋवर्णस्य रेफात् परयं यद्"[11] इति ।।९२।।

(ङ) मकारस्य प्रकृतिस्थता

पदान्तस्थो मकारस् तु प्रकृत्या स्यात् स्वरे परे ।
अन्न्यैरनुक्तोऽप्युक्तोऽयवं विधिरत्र प्रसङ्गतः ।।९३।।

उदाहरणानि यथा शाकलऋग्वेदमन्त्रसंहितायाम्— "रयिमश्नवत्[12],

---

१. ३।१४१ । २. ९।२०। ३. ३।६।२। ४. २।२९।
५. अष्टा. ८।३।९ । ६. शा.ऋ.म.सं. ५।५४।१५। ७. ४।७१।
८. ३।६।२ । ९. २।२९ । १०. अष्टा. ८।३।९ ।
११. १।७१ । १२. १।१।३ ।

करतुम् बृहन्तमाशाथे[१], अग्निमीड्[२], इन्दवो वामुशन्ति हि[३], गोपामृतस्य[४], पोषमेव[५]'' इति। विकाराप्प्रतिपादनेन स्वरे परे मकारस्य प्रकृतिस्थत्वमन्यैरपि प्प्रतिपादितमेव; तथापि तैरयवँ विधिर् वचनेनाऽनुक्तोऽत्तर तु स्पष्टत्वाय प्रसङ्गत उक्त इति बोद्ध्यम् ॥९३॥

(च) विसर्गस्य स्वरे परे विकारादयः

रेफजस् तु विसर्गस् स्याद् रेफ एव स्स्वरे परे।

शरुतौ क्व चित् तस्य लोपो नित्त्यो वैकल्पिकꣳ क्व चित् ॥९४॥

तदुक्तमृग्वेदप्रातिशाख्ये— ''उष्मा रेफी पञ्चमो नामिपूर्वो महोऽपोवर्जमितरो यथोक्तम्''[६] इत्त्यादि; ''सर्वोपधस् तु स्स्वरघोषवत्परो रेफं रेफी ते पुना रेफसन्धयः''[७] इति च। तदुदाहरणानि च शाकलऋग्वेदसंहितायाम्— ''प्रातरग्निम् प्रातरिन्द्रं हवामहे[८], प्रातरश्विना[९], वारिन् मण्डूक इच्छति[१०]''इत्त्यादीनि। शुक्लयजुर्वेदप्रातिशाख्ये च– ''विसर्ज्जनीयो रिफितः''[११] इत्त्यादि, ''भाव्व्युपधश्च् च रिद्द्विसर्ज्जनीयः, ...रेफं स्वरधौ''[१२]इति च। तदुदाहरणानि च– ''प्रातरग्निम्[१३], जामातरद्द्भुत[१४], अभारुखा[१५]'' इत्त्यादीनि माद्ध्यन्दिनीयानां संहितायाम्। तैत्तिरीयप्रातिशाख्ये च— ''ह्वारभार्वार्हार्''[१६] इत्त्यादि। तदुदाहरणानि च तैत्तिरीयसंहितायाम्– ''स्वे योनावभारुखा[१७],सुवरसि सुवर् मे[१८],पुनरग्न इषायुषा[१९],देव सवितरेतत्ते प्राह[२०]'' इत्त्यादीनि। ऋक्तन्त्रेऽपि– ''रप्प्रकृतिः''[२१] इति। तदुदाहरणानि च— ''अग्ने प्रातर् ऋतः[२२], प्रातरग्निः[२३]'' इत्त्यादीनि कौथुमसामवेदार्चिकसंहितायाम्। शौनकीयचतुरद्ध्यायिकायाञ् च– ''आवꣳ करकश् च विवरबिभरसर्वनाम्नः''[२४] इत्त्यादि। तदुदाहरणानि च— ''अबिभरदितिः''[२५] इत्त्यादीनि शौनकिनामथर्ववेदसंहितायाम्। पाणिनीयायावँ विसर्गविकारादिप्प्रक्क्रियायान् तु ''भोभगोअघो अपूर्व-

---

१. १।२।८। २. १।१।१। ३. १।२।४। ४. १।१।८। ५. १।१।३। ६. १।७६, ७७। ७. ४।२७। ८. ७।४१।१। ९. तत्त्रैव। १०. ९।११२।४। ११. १।१६०–१६८। १२. ४।३५–३७। १३. ३४।३४। १४. २७।३४। १५. १२।६१। १६. ८।७–१५। १७. ४।२।५। १८. ५।७।६। १९. १।५।३। २०. ३।२।७। २१. ३।६।६। २२. ४२। २३. ८५। २४. २।४२–५०। २५. ६।८१।३।

स्स्य योऽशि''[1] इत्यत्तर ''स-सजुषो रुः''[2] इति विहितस्य रेफस्यैव ग्रहणान् मूलत एव स्थितानां रेफाणायँ यत्वलोपौ न भवत इति स्वरे परे तेषामविकारो वचनाभावात् स्वतस् सिद्धः। 'प्रातः' इत्यादिकम् पदम् आधारभूतं स्वीकृत्य पदपाठात् संहितापाठन् निष्पादयितुम् प्रवृत्तानि प्रातिशाख्यानि[3] तु तेषाम् पदानामन्ते स्थितानां विसर्गाणां संहितायां रेफभावम् प्रतिपादयन्ति। संहितैव प्रकृतिः, पदपाठस् तु अर्थज्ञानाय कल्पित इति सिद्धान्तमेव यथास्थितमवलम्ब्य प्रवृत्तः पाणिनिस् तु विसर्गान्तानाम् 'प्रातः' इत्यादीनां पदानां विसर्गाणां स्वरे परे रेफभावं नैवानुशास्ति। पाणिनिमते 'प्रातर्' इत्येव मूलं रूपम्, तत्तर खरि अवसाने वा परे एव[4] रेफस्य विसर्गः, अन्यत्तर तु रेफस् स्वतस्सिद्ध एव। एवमपि वेदपदपाठसंहितापाठयोः परम्परागते रूपे न कोऽपि विप्लवः, पदपाठेऽवसानपरकत्वेन रेफस्य विसर्गभावस्य पाणिनीयप्रक्क्रियायाऽपि सिद्धत्वात्।

रेफस्य स्वरे परे श्रुतौ क्व चिल् लोपो दृश्यते, यथा— ''अक्षा इन्दुः[5],अह एव[6],अम्न एव[7],भुव इति[8]''इति। एतच् च ऋग्वेदप्रातिशाख्यकृतनिपातनादितो[9]ऽप्यवगम्यते। एतादृशेषु स्थलेषु रेफलोपस्य क्व चिदभावश् च ऋक्तन्त्रादिवचनादवसीयते। तथा हि ऋक्तन्त्रे- ''उभयथा भुवोऽम्न ऊधरवः''[10] इति। शौनकीयचतुरद्ध्यायिकायाम् च— ''ऊधोऽम्नो भुवसाम्''[11] इति। पाणिनीयव्याकरणे च— ''अम्नरूधरवरित्युभयथा छन्दसि, भुवश् च महाव्याहृतेः''[12] इति ॥९४॥

विसर्गस्य विकारादि संहितायाम् परीक्ष्य हि।
अरेफजत्वर्वं वा रेफजत्वर्वं वाऽपि विनिर्णयेत् ॥९५॥

विसर्गविशेषा मौलिकरेफान्तानि स्वरे परेऽविकारिणा रेफेण युक्तानि पदानि वा रिफितत्वेन रेफित्वेन वा प्रातिशाख्येषु प्ररोक्तानि। तथाहि ऋग्वेदप्रातिशाख्ये— 'ऊष्मा रेफी पञ्चमो नामिपूर्वो महोऽपोवर्ज-

---

१. अष्टा. ८।३।१७। २. तत्तरैव ८।२।६६।
३. ''पदप्रकृतीनि सर्वचरणानाम् पार्षदानि'' इति यास्कवचनमत्तर स्मर्तव्यम् (निरुक्ते १।६।१)। ४. अष्टा. ८।३।१५।
५. शा. ऋ. म. सं. ९।९८।३। ६. तत्तरैव ६।४८।१७।
७. काठकसं. ७।३। ८. शौ. अ. वे. म. सं. १३।९।१; तै. सं. ५।२।१०।३। ९. ऋ. प्रा. ४।४०। १०. ३।७।४(१२४)।
११. २।५२। १२. अष्टा. ८।२।७०, ७१।

मितरो यथोक्तम् । अनुतोदात्तमनुतरक्षपार् विपर्यये स्पर्शे चोषऽ प्रत्यये पूर्वपदद्यः ।। प्रातर् देवम् भार् वधराद्द्युदात्ङ करनुदात्त-मबिभस् तदादः । स्तऽ प्रगाथमेतशे कर् दिवेकर् अपस्करत्सारविपूर्व-मत्साः ।।" इत्यादि[1] । शुक्लयजुर्वेदप्रातिशाख्ये च— "विसर्ज्जनीयो रिफितः, करनुदात्तम्, अनुतरनाद्द्युदात्तम्, अहरभकारपरम्, आवर्व्-वरिति समानर्च्चि, स्तोतर्व् वस्तुतः सनुतरभार्व्वार्द्द्वाः"[2] इत्यादि। तैत्तिरीयप्रातिशाख्येऽपि रिफितविसर्जनीयस्स्थलानि "ह्वारभार्वार्" इत्यादिभिस् सूत्तरैऽ प्रदर्शितानि[3] । ऋक्तनुत्तरेऽपि– "रप्प्रकृतिः"[4] इत्-त्ययवँ विषय उल्लिखितः । शौनकीयचतुरद्ध्यायिकायाम् च रिद्विसर्ज-नीयस्थलानि "आवऽ करकश् च विवरबिभरसर्वनाम्नः"[5] इत्यादिभिस् सूत्तरैऽ प्रदर्शितानि ।।९५।।

विसर्गोऽरिफितो ह्रस्स्वावर्णपूर्वो ह्यवर्णके ।
ह्रस्स्वे परे पूर्ववर्णञ् चादायौकारतावँ वरजेत् ।।९६।।
विहायावर्णकं ह्रस्स्वमनुन्यस्मिंस् तु स्स्वरे परे ।
अनुन्वद्ध्यायञ् च भाषायाञ् चाऽपि प्रायेण लुप्यते ।।९७।।
अह्रस्स्वावर्णपरगो विसर्गस् तु स्स्वरे परे ।
वेदे लोके चाऽपि प्रायो लुप्तस् सर्वतत्र जायते ।।९८।।
ह्रस्स्वावर्णोत्तरो ह्रस्स्वावर्णभिन्ने स्वरे तथा ।
अह्रस्स्वावर्णपरगो विसर्गश् च स्स्वरे परे ।।९९।।
वैयाकरणमूर्धन्न्यशाकटायनसम्मतौ ।
गच्छेद् धि वै लघुतरयकारत्त्वमिति स्स्थितिः ।।१००।।

उदाहरणानि च शाकलऋग्वेदसंहितायाम्— "पुरोडाशयँ यो अस्मै[6], सोऽयमागात्[7], तम् पृच्छन्तोऽवरासः[8], य इन्द्र सोमपातमः[9]" इत्यादीनि; माद्ध्यन्दिनीयसंहितायाम् च– "देवीरापोऽअग्रेगुवोऽअग्रेपुवः[10], कुक्कुटो-ऽसि[11], वेदोऽसि[12], श्वित्तरऽआदित्यानाम्[13]" इत्यादीनि बोद्ध्यानि । वेदान्तरेषु लोके च सुलभानि उदाहरणानि ।

एतद्विषये च ऋग्वेदप्रातिशाख्ये— "ओ भवत्त्येकमाद्द्यम्"[14]

---

१. १।७६–१०३; ४।२७। २. १।१६०–१६८; ४।३५। ३. ८।८–१५।
४. ३।६।६(११६) । ५. २।४४–५२ । ६. ८।३१।२ ।
७. १०।५३।१। ८. ६।२१।६। ९. ८।१२।१। १०.१।१२।
११. १।१६ । १२. २।२१ । १३. २४।३९। १४. २।३३।

इति, "ह्रस्स्वपूर्वस् तु सोऽकारम्"[१] इति च । शुक्लयजुर्वेदप्रातिशाक्ख्ये च— "अकारे च"[२] इति, "कण्ठ्यपूर्व्वो यकारमरिफितः"[३] इति, "यवयोः पदान्तयोः स्वरमद्ध्ये लोपः"[४] इति च । तैत्तिरीयप्रातिशाक्ख्ये च– "ओकारमस् सर्वोऽकारपरः"[५] इति, "अथ स्वरपरो यकारम्"[६] इति, "लुप्प्येते त्ववर्णपूर्वौ यवकारौ"[७] इति च । ऋक्तन्त्रे च— "(स्व)रे"[८] इति, "अस्स्थाद् यम्"[९] इति, "(स्व)रमद्ध्ये"[१०] इति च । शौनकीयचतुरद्ध्यायिकायाम् च— "अकारोपधस्स्योकारोऽकारे"[११] इति, "स्वरे यकार इति"[१२] "स्वराद् यवयोऽ पदान्तयोः"[१३] इति च । पाणिनीयव्याकरणेऽष्टाद्ध्याय्यामपि— "स-सजुषो रुः"[१४] इति, "अतो रोरप्प्लुतादप्प्लुते"[१५] इति, "आद् गुणः"[१६] इति, "भोभगोअघोअपूर्वस्स्य योऽशि"[१७] इति, "लोपश् शाकल्यस्स्य"[१८] इति, "व्योर् लघुप्रयत्नतरश् शाकटायनस्स्य"[१९] इति च ।

दीर्घावर्णपूर्वकविसर्गलोपादौ उदाहरणानि च शाकलऋग्वेदसंहितायाम्— "या ओषधीः सोमराज्ञीः[२०], इत्यादीनि । माद्ध्यन्दिनीयसंहितायाम् च— "प्रत्त्युष्टा अरातयः[२१] युष्मा इन्द्रः[२२], अदित्त्या उपस्त्थे[२३]" इत्यादीनि । वेदान्तरेषु लोके चोदाहरणानि सुलभानि । शाकटायनसम्मतानि उदाहरणानि तु— 'कयास्ते, मनुष्यायागच्छन्ति; वृक्क्षायिह रोपणीया' इत्यादीनि बोद्ध्यानि । तत्तर 'कयास्ते' इत्यादीनि उदाहरणानि सङ्गरहीतुमेव पूर्वस्मिन् नियमे "प्रायेण लुप्प्यते" इत्युक्तम् ।

एतद्विषये च ऋग्वेदप्रातिशाक्ख्ये– "विसर्जनीयोऽरिफितो दीर्घपूर्वस् स्वरोदय आकारम्"[२४] इति । शुक्लयजुर्वेदप्रातिशाक्ख्ये च— "कण्ठ्यपूर्व्वो यकारमरिफितः"[२५] इति, "यवयोः पदान्तयोः स्वरमद्ध्ये लोपः"[२६] इति च । तैत्तिरीयप्रातिशाक्ख्ये च– "अवर्णपूर्वस् तु लुप्प्यते,

---

१. २।२७ । २. ४।४४ । ३. ४।३८। ४. ४।१२७।
५. ९।७ । ६. ९।१०। ७. १०।१९। ८. ३।६।९(११९)।
९. ३।६।७(११७) । १०. ४।२।९(१५९) । ११. २।५३ ।
१२. २।४१ । १३. २।२१ । १४. ८।२।२६ ।
१५. ६।१।११३ । १६. ६।१।८७ । १७. ८।३।१७ ।
१८. ८।३।१९ । १९. ८।३।१८ । २०. १०।९७।१८ ।
२१. १।७ । २२. १।१३ । २३. १।११।
२४. २।२४ । २५. ४।३८ । २६. ४।१२७ ।

अथ स्वरपरो यकारम्"[1] इति, "लुप्यते त्ववर्णपूर्वौ यवकारौ"[2] इति, "लेशो वात्सप्परस्स्यैतयोः"[3] इति च। ऋक्तन्त्रे च– "अस्स्थाद् यम्"[4] इति, "यः, (स्व)रमद्ध्ये, ···ऋर्ध्वं वा"[5] इति च। शौनकीयचतुरद्ध्यायिकायाम् च— "स्वरे यकारः"[6] इति, "स्वराद् यवयोऽ पदान्तयोः"[7] इति, "लेशवृत्तिरधिस्स्परशं शाकटायनस्स्य"[8] इति च। पाणिनीयव्याकरणे च– "भो–भगो–अघो–अपूर्वस्स्य योऽशि; व्योर् लघुप्रयत्नतरश् शाकटायनस्स्य; लोपश् शाकल्यस्स्य"[9] इति। अत्तर च लघुप्रयत्नतरयकारपक्क्षस् तैत्तिरीयप्रातिशाक्ख्येऽपि उल्लिखित इति सोऽपि कासु चिद् वेदशाखासु स्थित एव प्प्रतीयते; तथापि उपलब्ध्यमानासु शाखासु तु लोपपक्क्ष एव दृश्यते। भाषायान् तु पाणिनीयव्याकरणप्प्रामाण्याल् लघुतरप्रयत्नकपक्क्षोऽपि स्वेच्छयाऽऽश्रयितुं शक्क्यः ॥९६–१००॥

रेफजोऽरेफजो वापीकारादिस्स्वरतऽ परः।
स्वरे विसर्गो रेफस् स्याल् लुप्प्येताऽपि क्व चिच् छ्रुतौ ॥१०१॥

उदाहरणानि यथा— "अग्निरस्मि जन्मना[10], शन् नो देवीरभिष्टये[11], धूरसि[12], पराजग्घँ नुस्दिम्[13], द्यौरसि[14]" इति।

एतद्विषये च ऋग्वेदप्रातिशाक्ख्ये— "ऊप्मा रेफी पञ्चमो नामिपूर्वः"[15] इति, "सर्वोपधस् तु स्स्वरघोषवत्परो रेफं रेफी ते पुना रेफसन्धयः"[16] इति च। शुक्लयजुर्वेदप्रातिशाक्ख्ये च— "भाव्व्युपधश्च् च रिद्द्विसर्ज्जनीयः,···रेफं स्वरधौ"[17] इति; तैत्तिरीयप्रातिशाक्ख्ये च 'अथ विसर्जनीयः, रेफमेतेषु (स्वरघोषवत्सु)"[18] इति। ऋक्तन्त्रे च— "रं विसर्जनीयो घोषे (स्वरे च)"[19] इति। शौनकीयचतुरद्ध्यायिकायाम् च— "नाम्म्युपधस्स्य रेफः (स्वरे)"[20] इति। पाणिनीयव्याकरणे च– "स-सजुषो रुः"[21] इति। तत्तर स–सजुषोरुरिति विधानात् पाणिनीयव्याकरणानुसारम् 'अग्निस्' इत्यादिकानाम् पदानाम् मूलरूपेण सान्नतत्त्वम्, स्वरेषु घोष-

---

१. ९।९–१०। २. १०।१९। ३. १०।२३।
४. ३।६।७।(११७)। ५. ४।२।८,९; ४।३।१। ६. २।४१।
७. २।२१। ८. २।२४। ९. अष्टा. ८।३।१७–१९।
१०. शा. ऋ. म. सं. ३।२६।७। ११. तत्तरैव १०।९।४।
१२. मा. सं. १।८। १३. तत्तरैव १।१३। १४. तत्तरैव १।२।
१५. १।७६। १६. ४।२७। १७. ४।३५,३७। १८. ८।५,६।
१९. ३।६।५। २०. २।४२। २१. अष्टा. ८।२।६६।

वत्सु व्यञ्जनेषु च परेषु रेफान्ततत्वम्[1], अवसाने खरि च परे विसर्जनीयान्ततत्वं सान्ततत्वञ्[2] चेत्यादि बोद्ध्यम्। यत् तु म्याग्डनेलादिभिः पाणिनीयव्याकरणानुसारम् प्रथमवँ विसर्जनीयस्य सकारादेशः[3] ततस् सकारस्य रेफः[4] इत्युक्तमिति सूर्यकान्तादयस्[5] तदनुपपन्नम्; रुत्वम् प्रति सत्वस्याऽसिद्धत्वात्। एवञ् च 'अग्निः। अस्मि' इत्यादेः पदपाठाद् 'अग्निरस्मि' इत्यादौ संहितापाठे नयनम् पाणिनीयव्याकरणेन न सिद्ध्यति। उक्तविधानां संहितापाठानामुक्तविधेषु पदपाठेषु नयनन् तु सिद्ध्यति। एवञ् च यथा पदप्रकृतीनि सर्वचरणानाम् पार्षदानि न तथा पाणिनीयवँ व्याकरणमिति स्वीकर्तव्यमेवैतद्विषय इति अस्माकम् प्रतिभाति।

वेदे स्वधितीवेत्यादौ नामिनः परोऽपि विसर्गः क्व चिल् लुप्यते। तदुक्तमृग्वेदप्रातिशाख्ये "नाक्क्षा इन्दुस् स्वधितीवाह एव भूम्याददे"[6] इत्यादि। शुक्लयजुर्वेदप्रातिशाख्येऽपि— "भूमेश्च चाकारेऽपृक्क्ते"[7] इति ॥१०१॥

स इत्यस्य विसर्गस् तु पादसौष्ठवहेतवे।
आवश्यकतत्वे लुप्तस् स्यात् स्वरे पदद्वयेषु ऋक्क्षु च ॥१०२॥

एतस्मिन् विषये च ऋग्वेदप्रातिशाख्ये– "सेदु सास्मिन् सेमभि साभिवेगः"[8] इत्यादिना वचनेन शाकलऋग्वेदमन्त्रसंहितायामपि[9] प्राप्याणि एतन्नियमोदाहरणस्थलानि परिगणितानि। शुक्लयजुर्वेदप्रातिशाख्ये च— "स ओषधीमयोः"[10] इति। तैत्तिरीयप्रातिशाख्ये च— "इद्दविदग्न–इमान्न–एनौषधीःपरस् सः"[11] इति। पाणिनीयव्याकरणे च— "सोऽचि लोपे चेत् पादपूरणम्"[12] इति ॥१०२॥

अघो–भगो–भो–पूर्वस् तु विसर्गो यो भवेत् स्वरे।
लघुर् यो वाऽपि लुप्तो वा श्रुतौ लुप्तस् तु दृश्यते ॥१०३॥

---

१. अष्टा. ८।२।६६। २. तत्रैव ८।३।१५। ३. तत्रैव ८।३।३४। ४. तत्रैव ८।२।६६। ५. ऋक्तन्त्रटिप्पणीषु, टि. सं. ११५; पृ. ४२। ६. ४।४०। ७. ४।४०। ८. २।६८, ६९। ९. १।३२।१५, १०।४४।५, ९।७४।७, १०।२७।१, ४।३७।६, १।३१।१५, ८।४३।९, २।१७।६, २।२४।१, २।१३।११, २।१२।५, १।१२९।१, २।१३।२, ४।४।७, ७।१।१४, ६।१२।४, ७।४०।३, ९।७४।२, २।९।६, २।२२।१, २।१४।११, २।१५।६, २।२४।१, १०।६८।९, १०।८६।१६। १०. ३।१५। ११. ५।१७। १२. अष्टा. ६।१।१३४।

एतद्विषयको विधिस् तु प्रातिशाख्येषु नोपलब्ध्यते। "अस्मच्छाखादौ तथाविधविषयाभावात्"[1] इत्युक्त्वा वैदिकाभरणकारेणाऽपि प्रातिशाख्येष्वेतद्विषयस्याभावस् सूचितः। "भगो इति हास्मै"[2] इत्यत्तर, "त्रीन् वेदान् ब्रूते भो इति"[3] इत्यत्तर च गोपथब्राह्मणे स्वरे परे विसर्गलोपो दृश्यते। पाणिनीयव्याकरणे त्वयवँ विधिः प्राप्यत एव; तथाहि– "भोभगोअघोअपूर्वस्य योऽशि, व्योर् लघुप्रयत्नतरश् शाकटायनस्य, लोपश् शाकल्यस्य, ओतो गार्ग्यस्य"[4] इति ॥१०३॥

(उ) व्यञ्जनसंहितानिरूपणम्

(क) पूर्वव्यञ्जनविकाराविकारप्रधानव्यञ्जनसन्धिनिरूपणम्

(१) वर्गप्रथमवर्णाभिनिहितीभावादिकम्

वर्गेषु प्रथमा वर्णास् सदाऽभिनिहिता मताः।
प्रथमे वा द्वितीये वा स्ववर्गीये परे सति ॥१०४॥

उदाहरणानि यथा— वाक् कस्य, वाक् ख्याता, तत् तथा, ककुप् पूर्वा इति। एष विषयश् च ऋग्वेदप्रातिशाख्ये— "अनादेशे पटलेऽस्मिन् विधानं सर्वत्तर विद्द्यादपि वैकृतानाम्। अभिनिधानञ्च कृतसंहितानां स्पर्शान्तस्थानामपवाद्द्य रेफम्। सन्धारणं सवँवरणं श्रुतेश् च स्पर्शोदयानामपि चाऽवसाने"[5] इत्यादिना ग्रन्थेन केनाऽपि रूपेण प्रतिपादितः। यद्द्यपि प्रथमानां स्वेषु प्रथमेषु द्वितीयेषु च परेषु अभिनिहितीभावोऽयं स्फुटयोक्त्या न कुत्त्राऽपि प्रतिपादितस् तथापि "सर्वत्तरैके करणस्स्थानभेदे वा शाकलम्"[6] इति ऋग्वेदप्रातिशाख्यवचनेन करणस्स्थानैक्ये शाकलाभिनिधानविधेर् नित्यतायास् सूचितत्वात्, "वर्णैकदेशा वर्णग्रहणेन (न गृह्यन्ते) चेत् ...तुल्यरूपे सयँयोगे द्विव्यञ्जनविधिः (न सिद्ध्यति)"[7] इति वदता पाणिनीयव्याकरणवार्तिककारेण "वर्णैकदेशा वर्णग्रहणेन चेन् ...न गृह्यन्ते ...तुल्यरूपे सयँयोगे द्विव्यञ्जनाश्रयो विधिर् न सिद्ध्यति, कुक्कुटः, पिप्पलः, पित्तमिति। यस्य पुनर् गृह्यन्ते तस्य द्वौ ककारौ द्वौ पकारौ द्वौ तकारौ। यस्याऽपि न गृह्यन्ते तस्यापि द्वौ ककारौ द्वौ पकारौ द्वौ तकारौ। कथम्। मात्त्राकालोऽत्तर गम्यते, न च मात्त्रिकवँ

---

१. तै.प्रा.वै.व्या. ९।९। २. १।२।१८। ३. १।१।३१।
४. अष्टा. ८।३।१७–२१। ५. ६।१६–२८। ६. ६।२७।
७. पा. व्या. भा. एओङ ऐ औच् इत्यत्तर, वा. ६–१३।

व्यञ्जनमस्ति। अनुपदिष्टं सत् कथं शक्यवँ विज्ञातुम्"[1] इति वदता भाष्यकारेण, पुनर् "हरादाविरामे स्पर्शाघोषसयँयोगेऽसन्निधानादसंहितस्"[2] इति वदता वार्तिककारेण "हरादाविरामे स्पर्शानामघोषाणां सयँयोगेऽसन्निधानात् संहितासञ्ज्ञा न प्राप्नोति। कुक्कुटः, पिप्पका, पित्तमिति"[3] इति वदता भाष्यकारेण चोदाहृतेषु स्थलेषु विशेषेणाऽभिनिधानस्य सूचितत्वाच् चाऽयवँ विषय एवंरूपो बोद्धुं शक्यः; संस्कृतोच्चारणप्रक्रियास्वभावानुकूलश् चाऽयवँ विषय इति विज्ञप्रज्ञासाक्षिकश् चेत्त्ययवँ विषयोऽस्माभिरेवन् निबद्धो वेदितव्यः। ऋग्वेदप्रातिशाख्ये तु प्रथमानावँ वर्णानाम् अस्ववर्गीयेषु वर्णेषु परेष्वपि अभिनिहितीभावꣳ प्रतिपादित इति तु न विस्मर्तव्यम्। इमञ् चाऽभिनिहितीभावन् द्वित्वप्रकरणे विस्तरेण प्रतिपादयिष्यामः॥१०४॥

प्रथमाꣳ प्रकृतिस्थास् स्युरघोषेषु परेषु च।

वक्ष्यमाणान् विधीन् हित्वा पूर्वोक्तञ् च विधिन् तथा॥१०५॥

उदाहरणानि यथा— त्वक् चित्तरा, त्वक् छिन्ना, दिक् तादृशी, दिक् पीता, वाक् फलिता, त्वक् शुष्का, त्वक् षष्ठी, दिक् सुविशदा; षट् किशोराः, षट् खदिराः, षट् चयाः, षट् छागाः, षट् तडागाः, षट् पणाः, षट् फणाः, षट् शकुन्ताः, षट् षण्डाः, षट् सविवाः; तत् कृतम्, तत् खादितम्, तत् पतितम्, तत् फलितम्, तत् षष्ठम्, तत् सुदिनम्; ककुप् कृष्णा, ककुप् खिन्ना, ककुप् चित्तरा, त्रिष्टुप् छिन्ना, त्रिष्टुप् तथा, अनुष्टुप् शुभा, अनुष्टुप् षष्ठी, अनुष्टुप् सुखोच्चार्या इति। अन्न्यान्न्यपि लौकिकान्न्युदाहरणानि यथा— तादृक् चतुरः, तादृक् छादनम्, तादृक् टङ्कारो धनुषः, कीदृक् ठणत्कारः, तादृक् पतिस् तस्याः, तादृक् फलम्, वाक् शुष्यति, त्वक् षड्धा भवति, वाक् समीचीना; सम्म्राट् कुत्तर, सम्म्राट् खादति, सम्म्राट् चतुरः, सम्म्राट् छिनत्ति, सम्म्राट् तप्यते, सम्म्राट् थूत्कुरुते, सम्म्राट् पालयति, सम्म्राट् फलम् प्राप्नोति पालनस्य, सम्म्राट् शेते, सम्म्राट् षष्ठः, सम्म्राट् समीचीनः; तत् कुत्तर, तत् खादनीयम्, तत् पतितम्, तत् फलितम्, तत् सत्; ककुप् कृष्णा, ककुप् खिन्नेव भाति, ककुप् चित्तरा, ककुप् छन्ना, ककुप् टङ्कारमुखरा, ककुप् ठणत्कारमुखरा, ककुप् तादृशी, ककुप् थूत्कृता, ककुप् शुब्भ्रा, ककुप् षट्पदझङ्कारमुखरा, ककुप् सुशोभना इति॥१०५॥

---

१. पा. व्या. भा. ए ओङ ऐ औच् इत्यत्तर। २. तत्तरैव १।४।१०९, वा. ७। ३. तत्तरैव।

प्रथमा हि तृतीयास् स्युर् घोषवद्व्यञ्जने परे ।
शषसेषु द्द्वितीया वा व्यवस्थितत्या श्रुतौ क्व चित् ॥१०६॥
पञ्चमेषु परेषु स्स्युः पञ्चमा हि श्श्रुतौ सदा ।
भाषायान् तु विकल्पेन पञ्चमास् स्युरिति स्स्थितिः ॥१०७॥

प्रथमानान् तृतीयभावे लौकिकानि उदाहरणानि यथा— वाग् जयति, न वाग् झीर्यति, कीदृग् डिम्भः, वाग् ढौकते, कीदृग् दृश्यते, कीदृग् धृष्टः, तादृग् बन्धुः, तादृग् भवति; तादृग् याति, तादृग् रोदिति, तादृग् लपति, तादृग् वदति, कीदृग् हसति; सम्म्राड् गच्छति, सम्म्राड् घृतम् पिबति, सम्म्राड् जयति, सम्म्राड् झीर्यति, सम्म्राड् डामरः, सम्म्राड् ढौकनिकां स्वीकुरुते, सम्म्राड् दयते, सम्म्राड् धीरोऽस्ति, सम्म्राड् बद्ध्नाति, सम्म्राड् भवति, सम्म्राड् याति, सम्म्राड् रुष्टः, सम्म्राड् लभते, सम्म्राड् वदति, सम्म्राड् हिण्डते; तद् गच्छति, तद् घृतम्, तद् ददाति, तद् धारयति, तद् ब्रूते, तद् भवति, तद् याति, तद् रूपम्, तद् वदति, तद् हरितम्; त्रिष्टुब् गता, ककुब् घोषति, त्रिष्टुब्-जगती, ककुब् झङ्कृता, ककुब् डमरवती, ककुब् ढक्कानिनादिता, त्रिष्टुब् दृश्यते, त्रिष्टुब् धार्या, त्रिष्टुब् बृहती, ककुब् भासते, सा ककुब् याति रक्तताम्, ककुब् रक्ता, ककुब् लोहिता, ककुब् विभाति, ककुब् हरिता इति । शषसेषु प्रथमानान् द्वितीयत्त्वे उदाहरणानि च— सम्म्यख् स्रवन्ति, तथ् सवितुर् भर्गः, अनुष्टुफ् शारदी; दिख् सुमनोहरा, सञ्छ् शम्भुः, षठ् षट्पदाः, तथ् सम्म्यक्, ककुफ् सुशोभना इति । न चात्तर प्रथमापत्तिर् द्वितीयानामेवेष्यमाणत्वात् । पञ्चमेषु परेषु विकल्पेन स्वस्स्वपञ्चमापत्तावुदाहरणानि यथा— वाङ्ङ मधुरा, वाग् मधुरा; आखुभुङ्ङ ङुङ्ङुवे, आखुभुग् ङुङ्ङुवे त्वङ्ङ मोचनीया; त्वग् मोचनीया; सम्म्राण् नमति, सम्म्राड् नमति; सम्म्राण् मनुते, सम्म्राड् मनुते; तन् ङ्वते, तद् ङ्वते; ककुम् नमस्स्या, ककुब् नमस्स्या; त्रिष्टुम् नास्ति, त्रिष्टुब् नास्ति, त्रिष्टुम् मनोहरा, त्रिष्टुब् मनोहरा इति ।

उक्तेषु विषयेषु प्रतिशाख्यकारादीनावँ वचनानि यथा— "घोष-वत्परा प्रथमास् तृतीयान् स्वान्"[1] इति ऋग्वेदप्रातिशाख्ये; शुक्ल-यजुर्वेदप्रातिशाख्ये च— "स्पर्शोऽपञ्चमः स्वरधौ तृतीयम्"[2] इति, कृष्णयजुर्वेदप्रातिशाख्ये च— "तृतीयं स्वरघोषवत्परः"[3] इति । ऋक्तन्त्रे तु प्रथमानतानान् तृतीयानतत्त्वं स्वीकृत्य "तृतीयः परगुणम्"[4]

---

१. ४।२ । २. ४।१२० । ३. ८।३ । ४. ४।४।२ (१७२) ।

इत्युक्तम् । शौनकीयचतुर्द्ध्यायिकायाञ् च— "पदान्तानामनुत्तमानान् तृतीया घोषवत्स्वरेषु"[१] इति; पाणिनीयव्याकरणे च— "झलाञ् जशोऽन्ते"[२] इति "झलाञ् जश् झषि"[३] इति च ।

प्रथमानां शषसेषु परेषु द्वितीयभावश् शुक्लयजुर्वेदप्रातिशाख्ये प्रोक्तो यथा— "असस्थाने मुदि द्द्वितीयं शौनकस्य"[४] इति; तदुदाहरणे च भाष्यकारप्रदर्शिते यथा 'सम्म्यख् स्रवन्ति[५], अनुष्ट्टुफ् शारदी[६]' इति । माद्ध्यदिनीयादिकानामाम्नाये तु नैतदिष्यते । तैत्तिरीयप्रातिशाख्ये च— "प्रथम ऊष्मपरो द्वितीयम्"[७] इति; तदुदाहरणानि च "विरफ्शिन्[८], तथ् षोडश्श्यभवत्[९], प्रत्त्यङ्ख् सोमः[१०], तथ् सवितुः[११]" इति । तत्तर "बाडभीकारस्स्याऽसस्थानपरः"[१२] इति चोक्तम् । शौनकीयचतुरद्ध्यायिकायाञ् च— "द्वितीयाश् शषसेषु"[१३] इति । पाणिनीयव्याकरणेऽपि "नादिन्न्याक्क्रोशे पुत्त्रस्य"[१४] इति सूत्त्रे स्थिते भाष्ये "चयो द्वितीयाश् शरि पौष्करसादेः" इति वार्तिकम् पट्ठ्यते । ऋग्वेदप्रातिशाख्ये तु— 'ऊष्मोदयम् प्रथमं स्पर्शमेके द्वितीयमाहुरपदान्तभाजम्"[१५] इत्त्युक्तम् । तदुदाहरणानि तु— 'शशः ख्पुरम्[१६], प्रत्त्यङ्ख् स्वमसुम्[१७], शतक्क्रतुः थ्सरत्[१८], विरफ्शी[१९]' इत्त्युव्वटेन प्प्रदर्शितानि । पाणिनीयव्याकरणवार्तिककारस्स्याऽभिप्प्रायो नाऽतिस्फुटः । तदुदाहरणानि वथ्नः, ख्षीरम्, अफ्सराः इत्त्युल्लिखितवत× पतञ्जलिमुनेस् तु ऋग्वेदप्रातिशाख्यकारस्स्येवाऽभिप्प्रायो विज्ज्ञायते । अन्न्येषु प्रातिशाख्येषु तु पदान्तस्स्थानामपि प्रथमानान् द्वितीयतापत्तिं× प्रोक्तैवेति पूर्वोदाहृतैश् शुक्लयजुर्वेदप्रातिशाख्यादिवचनैस् स्पष्टतया बुद्ध्यत एव । एतद्विषये विकल्पव्यवस्था च वेदेषु तत्तत्प्रातिशाख्यशिक्क्षाद्द्यनुसारम् बोद्ध्या । लोके तु इच्छाविकल्प एव । तत्तर प्रातिशाख्यवाक्क्यानि प्रदर्शितानि एव । शिक्क्षास्स्वपि ककारस्स्य खसवर्णता पकारस्स्य फसवर्णता प्रथमानान् द्वितीयतापत्तिर्

---

१. २।२। २. अष्टा. ८।२।३९। ३. तत्तरैव ८।४।५३ ।
४. ४।१२२ । ५. मा. सं. १३।३८ । ६. तत्तरैव १३।५७ ।
७. १४।१२। ८. तै. सं. १।१।९।३। ९. तत्तरैव ६।६।११।१।
१०. तत्तरैव १।८।२१। ११. तत्तरैव १।५।६।४। १२. १४।१३।
१३. २।६ । १४. अष्टा. ८।४।४८ । १५. ६।५४ ।
१६. शा. ऋ. म. सं. १०।२८।९ । १७. तत्तरैव १०।१२।१ ।
१८. तत्तरैव ८।१।११ । १९. तत्तरैव १।८।८ ।

वा प्रतिपादिता दृश्यते । याज्ञवल्क्यशिक्क्षायाम्[१], स्वरभक्तिशिक्क्षायाम्[२], चारायणीयशिक्क्षायाम्[३], व्यासशिक्क्षादिषु[४], शैशिरीयशिक्क्षायाम्[५], शौनकशिक्क्षायाम्[६], नारदीयशिक्क्षायाम्[७], माण्डूक्यां शिक्क्षायाञ्[८] च एतद्विषयाणि वचनानि प्राप्प्यन्ते ।

प्रथमानाम् पञ्चमेषु परेषु स्वस्स्ववर्गीयपञ्चमतायाऽ प्राप्तेर् विषये "भाषायान् तु विकल्पेन" इति पाणिनीयव्याकरणानुरोधादुक्तम् । तथा हि पाणिनिः— "यरोऽनुनासिकेऽनुनासिको वा"[९] इति । अतश् च लोके एतद्विषय इच्छाविकल्पऽ प्रतीयते । वेदेषु तु तत्तच्छाखाविशेषेषु व्यवस्थितोऽयवँ विकल्पोऽवसेयः । तथाऽपि विषयोऽयम् पाणिनीयव्याकरणस्य वार्तिककारेण भाष्यकारेण च सर्ववेदपारिषदत्त्वेनाऽभिमतस्य व्याकरणस्य व्याक्ख्याने सन्नद्धेनाऽप्प्यप्प्रतिपादितः । वयन् तु तत्तच्चरणपारिषदग्रन्थसाहाय्येन वदामहे । तत्तर ऋग्वेदप्रातिशाक्ख्ये निर्विकल्पतया "उत्तमानुत्तमेषु"[१०] इति प्रोक्तम्, तदपवादऽ पदमद्ध्यविषयकऽ "ककुद्मान्"[११] इत्त्येव प्प्रदर्शितः । अत एतत्प्रातिशाक्ख्यविषयभूते चरणे प्रथमानाम् पञ्चमेषु परेषु पञ्चमत्त्वस्य प्राप्तिर् नित्त्येति ज्ज्ञायते । शुक्लयजुर्वेदप्रातिशाक्ख्येऽपि— "पञ्चमे पञ्चमम्"[१२] इत्त्ययन् नियमो निरपवादतयैव निर्विकल्पतया प्रतिपादितः । तैत्तिरीयप्रातिशाक्ख्येऽपि— "उत्तमपर उत्तमं स्ववर्गीयम्"[१३] इति निर्विकल्पतयैवाऽयन् नियमऽ प्रोक्तः । अस्स्यैकोऽपवादऽ "ककुच् च मकारपर"[१४] इति पदमद्ध्यगततयैव प्प्रदर्शितः । ऋक्तन्त्रेऽपि— "अनुत्ये"[१५] इति सूत्त्रम् प्राप्प्यते । तद्वृत्तिकारश् च "अनुत्ये च प्रत्त्यये तृतीयोऽनुत्यमेवापद्द्यते" इति प्रतिपादयति । न चाऽस्स्याऽपवादस् तत्त्रोपलब्भ्यते । शौनकीयचतुरद्ध्यायिकायामपि— "उत्तमा उत्तमेषु"[१६] इत्त्युक्त्वा निर्विकल्पतयैव पञ्चमत्त्वप्राप्तिऽ प्रतिपादिता । एवञ् च पाणिनीयवँ विकल्पवचनवँ वेदविषये लुप्तायां शाखायाङ् कस्स्याञ् चित् पञ्चमत्त्वप्राप्तेरभावम् प्रकल्प्यैव,ककुद्मानित्त्यत्त्रैव वा चारितार्थ्यम् प्रतिपाद्द्य समर्थनीयम्। प्रातिशाक्ख्येषु पक्क्षान्तरस्स्य सर्वथाऽनुल्लेखात् तु पाणिनीयवँ विकल्प-

---

१. श्लो. १२८–१३२ । २. श्लो. ११ । ३. पृ. १९ ।
४. सू. ३५७ । ५. श्लो. ४८ । ६. श्लो. ५१ । ७. २।५।१०, ११।
८. श्लो. १३४ । ९. अष्टा. ८।४।४५ । १०. ४।३ ।
११. ४।२२ । १२. ४।१२३ । १३. ८।४ । १४. ८।४ ।
१५. ४।४।३(१७३) । १६. २।५ ।

वचनलँ लोक एव चरितार्थम् प्रतीयत इति पाणिनीयव्याकरणस्य कात्त्यायनपतञ्जल्यादिवचनानाञ् च लौकिकप्रयोगप्रवणत्वन् न न कल्पनीयम् प्रतिभाति ।।१०६–१०७।।

(२) वर्गतृतीयवर्णविकारादिकम्

तृतीयास् तु स्स्युꣳ प्रथमा अघोषे चाऽवसानके ।
भवेयुस् तेऽभिनिहितास् स्वे तृतीये चतुर्थके ।।१०८।।
प्रकृत्त्या स्युर् घोषवत्सु व्यञ्जनेषु परेषु तु ।
पञ्चमास् स्युꣳ पञ्चमेषु भाषायान् तु विभाषया ।।१०९।।

"वाक्" इत्त्यादौ पदान्ते प्रथमाꣳ प्रकृतिसिद्धा इति केचन मन्न्यन्ते, केचन पुनस् तृतीया एव प्रकृतिसिद्धा इति । तदुक्तम् ऋग्वेदप्रातिशाक्ख्ये— "तस्मादन्न्यमवसाने तृतीयङ् गार्ग्य स्स्पर्शम्, प्रथमं शाकटायनः"[1] इति, शौनकीयचतुरद्ध्यायिकायाञ् च— "प्रथमान्तानि तृतीयान्तानीति शौनकस्स्य प्रतिज्ज्ञानन् न वृत्तिः"[2] इति; पदान्तस्थवर्णगणनेऽपि ऋग्वेदप्रातिशाक्ख्ये प्रथमा तृतीयाश् च वर्णा उपात्ताः[3], तथैव पाणिनिरपि "वाऽवसाने"[4] इति वदन् मन्न्यते । येषाम् मते प्रथमा एव पदान्तगास् तेषाम् मते खलु एते नियमा अनावश्यकाः, यथा ऋग्वेदप्रातिशाक्ख्यादाविमे नियमा अप्प्रतिपादिताः, येषाम् मते तु प्रथमास् तृतीयाश् च पदान्तगा तेषाम् मते "स्वरा गजडदवाश् चैव ङणनमास् सहोष्मभिः । चतुर्णाम् पदजातीनाम् पदान्ता दश कीर्तिताः"[5] इत्त्यादि वदतान् नारदीयशिक्क्षाकारादीनाम् मते चैते नियमा आवश्यका एव । तत्तत् वेदेषु "देवो देवेभिरागमत्"[6] इत्त्यादौ शाकलानामाम्नाये, "मा ते यज्ञँ अपतिर् हवार्षीत्"[7] इत्त्यादौ माद्ध्यन्दिनीयवाजसनेयिनामाम्नाये, "अग्गरभीत्[8], स्यालात्[9]" इत्त्यादौ तैत्तिरीयाणामाम्नाये, "सधस्थात्[10], अक्क्रमीत्[11]" इत्त्यादौ कौथुमानामाम्नाये, "मुञ्ज इत्[12] वहत्[13]" इत्त्यादौ शौनकिनामाम्नाये, "अस्मत्[14], अनीनशत्[15], अवीवृतत्[16]" इत्त्यादौ पैप्पलादानामाम्नाये च अवसाने प्रथमस्स्यैवाऽधीयमानत्वाद् अवसाने प्रथमा एव भवन्ति न तृतीया इति प्प्रतीयते । किन् तु गार्ग्यमते

---

१. १।१५, १६ । २. १।८ । ३. १२।१ ।
४. अष्टा. ८।४।५६ । ५. २।५।१ । ६. १।१।५ ।
७. १।२ । ८. १।१।१३।१ । ९. १।१।१४।१ । १०. ८ ।
११. ३० । १२. १।२।४ । १३. १।८।१ । १४. १।३।४।
१५. १।८।३ । १६. १।११।३ ।

अवसाने तृतीयानामेवाऽस्तित्त्वस्य ऋग्वेदप्रातिशाक्ख्येऽप्युक्तत्त्वाद्[1], ऋक्तन्त्रेऽपि "तृतीयꣳ परगुणम्, अन्त्ये"[2] इत्युक्तत्त्वाद्, नारदीयशिक्क्षायामपि पदान्तस्थवर्णेषु तृतीयानामेवोल्लेखाच्[3] च गार्ग्यकृते सामवेदपदपाठे तन्मूलभूतायां सामवेदसंहितायाञ् चाऽवसाने तृतीयानामेवाऽस्तित्त्वमनुमीयते । अतोऽस्माभिरत्त्र ऋक्तन्त्रवचनन् नारदीयशिक्क्षावचनञ्च गार्ग्यशौनकयोर् मतम् पाणिनीयवँ वचनञ् चाऽनुरुद्ध्य पदान्तस्थानान् तृतीयानामयवँ विकारꣳ प्रतिपादितः । उदाहरणानि तु पूर्वनियमे प्रदर्शितान्न्येवाऽस्मिन् नियमेऽपि प्प्रायेण योजयितुं शक्क्यानि। अभिनिहितीभावोदाहरणानि तु आखुभुग् घूर्णते, सम्म्राड् ढौकते, कस्माद् धावसि, ककुब् भासते इत्यादीनि बोद्ध्यानि ।।१०७–१०९।।

(३) तकारदकारविकाराः

तदयोस् तु चजौ वर्णे चवर्गीये च शे परे ।
स्याताण् टडौ टवर्गीये वर्णे हि परतस् स्थिते ।।११०।।

उदाहरणानि तु सच् चित्, तज् जायते, तच् शुष्कम्, तट् टङ्कनम्, तड् डयनम् इत्यादीनि बोद्ध्यानि । एतद्विषये ऋग्वेदप्रातिशाक्ख्ये— "तकारो जकारलकारयोस् तौ, तालव्येऽघोष उदये चकारम्"[4] इति "तकारवर्गस् तु टकारवर्गम्, अन्तꣳपदस्थोऽपि षकारपूर्व्वः"[5] इति च वचनानि प्राप्प्यन्ते । शुक्लयजुर्वेदप्रातिशाक्ख्ये च— "तकारवर्ग्गश्च् चकारवर्ग्गे चकारवर्ग्गम्, शकारे च"[6] इति "षात् तथौ मूर्द्धन्न्यम्"[7] इति चोक्तम् । तैत्तिरीयप्रातिशाक्ख्ये च— "तकारश् चकारं श-च-छ-परः, जपरो जकारम्"[8] इति "वाधा–ष-पूर्व्वस् तष् टम्, थश् च ठम्, न तकारपरः"[9] इत्यादि चोक्तम् । ऋक्तन्त्रे च— "दन्त्यम् मद्ध्यमवर्ग्गे (परसस्स्थानम्)"[10] इत्युक्तम् । शौनकीयचतुरद्ध्यायिकायाञ् च— "तकारस्स्य शकारलकारयोꣳ परसस्स्थानः, च-ट-वर्ग्गयोश् च, ताब्भ्यां समानपदे तवर्ग्गीयस्स्य पूर्व्वसस्स्थानः, षकारान् नानापदेऽपि"[11] इत्युक्तम् । पाणिनीयव्याकरणे च– "स्तोश् श्चुना श्श्चुः, ष्टुना ष्ष्टुः, न पदान्ताट् टोरनाम्, (अनाम्नवतिनगरीणामिति वक्तव्व्यम्), तोः षि, शात्"[12] इत्युक्तम् । तत्त्र वेदेषु पदान्तस्स्थाब्भ्यान् तदाब्भ्याम्

---

१. १।१५ । २. ४।४।२, ३ । ३. २।५।१ ।
४. ४।१०, ११ । ५. ५।११ । ६. ४।९६, ९७ ।
७. ३।७९ । ८. ५।२२, २३ । ९. ७।१३–१५ ।
१०. ४।४।८ । ११. २।१३–१६। १२. अष्टा. ८।४।४०–४४।

पराणि टवर्गीयवर्णादीनि पदानि दुर्लभानि, अतस् तद्विषयाणि वचनानि प्रायो न प्राप्यन्ते; ऋक्तन्त्रे शौनकीयचतुरद्ध्यायिकायाञ् चेति द्वयोरेवाऽन्न्यप्रातिशाक्ख्यविलक्षणयोः प्रातिशाक्ख्ययोस् तानि वचनानि प्राप्यन्ते। यद्द्यपि पदान्तपदाद्द्योरेव सन्धिर् मुक्ख्यतया शिक्षाशास्त्रविषयः, तथापि समस्तपदमद्ध्येऽपि अवग्रहे निवर्तनीयो विकारः कश् चन भवति तर्हि सोऽपि प्रतिपाद्द्यते। अत एव शुक्लयजुर्वेदप्रातिशाक्ख्य–तैत्तिरीयप्रातिशाक्ख्यादेष् षात् तथौ मूर्द्धन्न्यम्, थश्च् च ठम् इत्त्यादिकवँ् वचनम् प्रवर्तते। पाणिनीयव्याकरणे तु एकपदमद्ध्यगतविषयकान् नियमानपि तदपवादाँश् चाऽपि विचार्य सूत्त्राणि प्रोक्तानि। तत्त्र च "शात्" इति सूत्त्रं तैत्तिरीयके "नवतिञ् च श्नथिष्ट्टम्[1], यत् प्राश्नीयात्[2]" इत्त्यादौ तु नैव प्रवर्तते इति बोद्ध्यम्[3], काठकसन्न्ज्ञेषु पन्न्चसु प्रश्नेषु तु तत्त्राऽपि प्रवर्तत एवेति च बोद्ध्यम्[4]; अश्त्नुते[5] इत्त्यादौ तु पाणिनीयप्रक्क्रियानुसारं श्चुत्त्वम् प्रति तकारस्स्य सिद्धत्त्वेऽपि श्चुत्त्वन् निषिद्ध्यते इति च बोद्ध्यम् ॥१११०॥

तदयोस् तु लकारस् स्याल् लकारादौ पदे परे।
वेदशाखासु सर्वासु भाषायाञ् चाऽपि सर्वदा ॥१११॥

तदुक्तमृग्वेदप्रातिशाक्ख्ये— "तकारो जकारलकारयोस् तौ"[6] इति। शुक्लयजुर्वेदप्रातिशाक्ख्ये च— "तकारो ले लम्"[7] इति; तैत्तिरीयप्रातिशाक्ख्येऽपि— "लपरौ लकारम्"[8] इति। ऋक्तन्त्रे च— "श्लोः"[9] इति। शौनकीयचतुरद्ध्यायिकायाञ् च— "तकारस्स्य शकारलकारयोः परसस्स्थानः"[10] इति। पाणिनीयव्याकरणेऽपि– "तोर् लि"[11] इति। यद्द्यपि प्रथमानेव पदान्तस्स्थान् मन्न्यमानैर् ऋग्वेदप्रातिशाक्ख्यादिकारैरस्मिन् प्रसङ्गे तकारस्स्यैव विकार उल्लिखितस् तथाऽपि तृतीयानपि पदान्तस्थान् मन्न्यमानानाम् मतेन दकारविकारोऽपि उल्लेक्ख्य एव ॥१११॥

(४) नकारविकाराः

नस्स्य ञस् स्याच् चवर्गीये वर्णे शे च परे सति।
प्रायो भाषायां हि णस् स्यात् परे वर्णे टवर्ग्यके ॥११२॥

---

१. तै. सं. ३।३।११।२। २. तत्त्रैव २।६।८।१।
३. व्या.शि.वे.तै., पृ. १३३। ४. तत्त्रैव। ५. तत्त्रैव, पृ. १३४।
६. ४।१०। ७. ४।१३। ८. ५।२५। ९. ४।४।९।
१०. २।१३। ११. अष्टा. ८।४।६०।

उदाहरणानि यथा– पशूञ् च स्स्थातॄञ् चरथञ् च पाहि[1], अस्माञ् जगम्म्याद्[2], वाजाञ् जयतु[3], मघवञ् छग्धि[4], स्वधावाञ् छुक्करः[5], आदित्त्याञ् श्मश्श्रुभिः[6]; सञ् शम्भुः; धन्विण् टङ्कारङ् कुरुष्व धनुषः, राजण् ठणत्कारो वर्तत आयुधानाम्, खड्गिण् डमरे त्वमेव मम शरणम्, राजण् ढौकनिकालँ लाहि,विद्द्वण् णकारबाहुल्यम् प्राकृतेषु तु दृश्यते। तत्तर आदित्त्याञ् श्मश्श्रुभिरित्त्यत्तर नकारस्स्य ञकारो न भवतीति अनन्तेनोक्तम्[7], तत्तर विद्द्वद्भिर् भृशवँ विचारणीयम्।

एतद्विषयकाणि वचनानि च— "ञकारं शकारचकारवर्गयोः"[8] इति ऋग्वेदप्रातिशाख्ये। शुक्लयजुर्वेदप्रातिशाख्ये च— "तकारवर्गगश्च् चकारवर्गगे चकारवर्गगम्"[9] इति, "शकारे च"[10] इति च। तैत्तिरीयप्रातिशाख्ये च— "नकार एतेषु ञकारम्"[11] इति। ऋक्तन्त्रे च— "दन्त्यम् मद्ध्यमवर्गे (परसस्स्थानम्)"[12] इति। शौनकीयचतुरद्ध्यायिकायाञ् च— "नकारस्स्य शकारे ञकारः, चवर्गीये घोषवति, टवर्गीये णकारः"[13] इति। पाणिनीयव्याकरणे च— "स्तोश् श्चुना श्श्चुः, ष्टुना ष्ष्टुः"[14] इति। नकारस्स्य टवर्गीये वर्णे परे णकारत्त्वप्राप्तिर् ऋग्वेदप्रातिशाख्ये, शुक्लयजुर्वेदप्रातिशाख्ये, कृष्णयजुर्वेदप्रातिशाख्ये च नोल्लिखिता। ऋक्तन्त्रे शौनकीयचतुरद्ध्यायिकायाञ् च यद्द्यपि उल्लिखिता, तथापि तदुदाहरणानि तद्वृत्तिकारैर् वेदान् नोद्धृतानीत्त्ययन् नियमो वेदे निर्विषयो विज्ज्ञायते। पाणिनिना तु लोकभाषाप्रवणेनाऽयन् नियम उल्लेखनीय एवेत्त्युल्लिखितो बोद्ध्यः ॥११२॥

नश् चकारे तकारे च स्वरान्तस्थोदये परे।
गच्छेदनुस्स्वारतावँ वोपधारागत्त्वमेव वा ॥११३॥
अनुस्स्वाराद् वाऽपि रक्तोपधाया वा परत्तर च।
शस् सो वाऽप्युपजायेत न चाऽस्मानादिकेष्वृचि ॥११४॥
लोके तथाविधे छे च टे च ठे चाऽपि थे परे।
अयवँ विधिꣳ प्रवर्तेत प्रशानिति विहाय च ॥११५॥

---

१. शा. ऋ. म. सं. १।७२।६। २. तत्तरैव ५।३३।५। ३. मा.वा.शु.य.वे.म.सं. ५।३७। ४. शा. ऋ. म. सं. ८।२४।११। ५. मा. सं. ३३।५। ६. तत्तरैव २५।१। ७. शु. य. प्रा. अ. भा. ४।९८। ८. ४।९। ९. ४।९६। १०. ४।९७। ११. ५।२४। १२. ४।४।८। १३. २।१०–१२। १४. अष्टा. ८।४।४०, ४१।

उदाहरणानि यथा— महाँश् चरति[1], ताँस् त्रायस्स्व[2] आवदँस् त्वं शकुने भद्द्रमावद[3], अहीँश् च्च सर्व्वान्[4] इति। अपवादोदाहरणानि च— अस्मान् च ताँश् च[5], चमसान् चतुरः[6], पशून् च स्स्थातॄन् चरथन् च पाहि[7] इत्यादीनि। लौकिकानि उदाहरणानि च— भवाँश् छादयति खलु गुरुदोषम्, न हि भवाँष् टङ्कमादायैतर्हि पाषाणन् दारयितुयँ याति, अस्माकम् भवाँष् ठक्कुरो हि, न हि प्राप्स्यति भवाँस् थकारम् पदादिस्स्थं सँस्कृते सुखेन इति। लौकिकम् प्रत्युदाहरणन् च— 'न सन् त्सरति कर्हि चित्' इति।

एतद्विषये ऋग्वेदप्रातिशाख्ये— "चरति चक्करे चमसाँश् च चो चिच् चरसि च्यौत्नश् चतुरश् चिकित्वान्। एतेषु सर्वत्तर विसर्जनीयवद् दीर्घोपधः; अस्मान् चमसान् पशून् न; ताँस्ते सर्वाँस् तान् देवाँस् त्वन् ताँस् त्रायस्स्वावदँस् त्वन् च"[8] इति, "नकारस्स्य रेफलोपोष्मभावे पूर्वस् तत्स्थानादनुनासिकस् स्वरः"[9] इति चोक्तम्; शुक्लयजुर्वेदप्रातिशाख्ये च— "नुः, चछयोश् शम्, तथयोस् सम्"[10] इति, "अनुनासिकमुपधा प्प्रागन्तस्त्थायाः, स्वर औपशविः, अनुस्स्वारेण व्व्यञ्जने"[11] इति, "न तमे, निर्ज्जगन्वान् तमसि, धामन् छत्त्रून् चिकित्वान् त्वम् पूषन्नर्व्वन्निति च"[12] इति च। तैत्तिरीयप्रातिशाख्ये च— "नकारश् शकारन् चपरः, नायन्नैरयन्नार्द्दध्नुवन्ननड्वान्घृणीवान्वारुणानेवास्मिन्"[13] इति, "तर्हाँस्तस्मिलँ लोकान्विद्द्वाँस्ताँस्त्रीन्युष्मानूर्द्दध्वानम्बकान्तूनशमन्कृण्वन्पितॄननान्कपालाँस्तिष्ठन्नाद्द्यु दात्ते नेमिर् देवान् त्सवने पशूँस् तकारपरस् सकारम् प्राकृतो नित्त्ये"[14] इति, "नकारस्स्य रेफोष्मयकारभावाल् लुप्ते च मलोपाच् च पूर्व्वस् स्वरोऽनुनासिकः, नैकेषाम्, ततस् त्वनुस्स्वारः"[15] इति च। ऋक्तन्त्रे च— "नो मद्ध्यमवर्गे"[16] इति, "व्यवधानेऽन्त्यविकारे"[17] इति च। शौनकीयचतुरद्ध्यायिकायाम् च— "नकारस्स्य च ट-त-वर्गेषु अघोषेषु अनूष्मपरेषु विसर्जनीयः"[18] इति, "नकारमकारयोर् लोपे

---

१. शा. ऋ. म. सं. ३।५५।९। २. तत्तरैव ७।१६।८। ३. तत्तरैव २।४३।३। ४. मा. सं. १६।५। ५. शा. ऋ. म. सं. २।१।१६। ६. तत्तरैव १।१६१।४। ७. तत्तरैव १।७२।६। ८. ४।७४–७६। ९. ४।८०। १०. ३।१३३–१३५। ११. ४।१३०–१३२। १२. ३।१४३–१४५। १३. ५।२०,२१। १४. ६।१४। १५. १५।१–३। १६. ४।२।३। १७. ४।५।१। १८. २।२६।

पूर्वस्स्याऽनुनासिकः, यरोष्मापत्तौ च"[1] इति च। पाणिनीयव्याकरणे च— "नश् छव्यप्रशान्, उभयथर्क्षु"[2] इति, "अत्तरानुनासिकः पूर्वस्स्य तु वा"[3] इति, "अनुनासिकात् परोऽनुस्स्वारः"[4] इति च। तत्तर वेदे तु चकारे तकारे चेति द्वयोरेव परयोरयवँ विकारो दृश्यते, न छटठथेषु परेषु। तथापि लौकिकान् प्रयोगान् समीक्ष्य पाणिनिना चछटठतथेषु परेष्वयवँ विधिः प्रोक्तः। छे थे च परेऽपि एतवँ विधिम् प्रतिपादयन् शुक्लयजुर्वेदप्रातिशाख्यकारः, "नो मद्ध्यमवर्गे" इति वदन् ऋक्तन्तरकारः, "चटतवर्गेषु" इति वदन् शौनकीयचतुरद्ध्यायिकाकारश्च चिन्त्य एव। यद्द्यपि "उभयथर्क्षु" इति च वदता पाणिनिना ऋग्गता उत्सर्गविषया अपवादविषयाश् च सङ्गृहीता एव; तथापि तद्वचनवँ विषयाणामपरिच्छेदकम् भ्रमजनकन् चैव। अत एव जयादित्त्येन प्रसादकृता च "तस्मिँस् त्वा दधाति, तस्मिन् त्वा दधाति" इति समानप्रयोगविषयको विकल्प उदाहृतः। भट्टोजिना तु सिद्धान्तकौमुद्द्याम् उभयथात्वमेव नोदाहृतम् भ्रमप्रमादादिगोपनाय ॥११३–११५॥

नस्स्याऽनुनासिको लँस् स्याल् लकारादौ पदे परे।
भाषायान् च तथा सर्ववेदशाखासु सर्वदा ॥११६॥

उदाहरणानि यथा— जिगीवालँ लक्षमाददत्[5], अस्मिलँ लोके[6], अमुस्मिलँ लोके[7], ते सुवर्गलँ लोकमायन्[8], सर्वालँ लोकान्[9] इति वेदेषु; भवालँ लुनाति, विद्द्वालँ लिखति, एतस्मिलँ लोके इत्यादीनि च लौकिकसँस्कृतभाषायाम्। एतद्विषये वचनानि च— "तथा नकार उदये लकारे"[10] इति ऋग्वेदप्रातिशाख्ये, शुक्लयजुर्वेदप्रातिशाख्ये च— "नुश्च् चानुनासिकम्"[11] इति; तैत्तिरीयप्रातिशाख्ये च— "नकारो नुनासिकम्"[12] इति; ऋक्तन्त्रे च— "श्लोः"[13] इति; शौनकीयचतुरद्ध्यायिकायान् च— "उभयोर् लकारे लकारोऽनुनासिकः"[14] इति; पाणिनीयव्याकरणे च—"तोर् लि"[15] इति, "स्थानेऽन्तरतमः"[16] इति च। "उत्तमलभावात् पूर्वोऽनुनासिक इत्यात्तरेयः"[17] इति क्व चित्॥११६॥

---

१. १।६७, ६८। २. अष्टा. ८।३।७, ८। ३. तत्तरैव ८।३।२। ४. तत्तरैव ८।३।४। ५. शा. ऋ. म. सं. २।१२।४। ६. मा. सं. ३।२१। ७. तै. सं. १।५।४।४। ८. तत्तरैव १।५।४।५। ९. शौ.अ.वे.म.सं. ४।३८।५। १०. ४।८। ११. ४।१४। १२. ५।२६। १३. ४।४।९। १४. २।३५। १५. अष्टा. ८।४।६०। १६. तत्तरैव १।१।५०। १७. तै.प्रा. ५।३१।

कांस्कानित्त्यत्तर लोके तु द्द्विरुक्ते हि सकारताम् ।
नित्त्यन् नकार× प्राप्नोति रागञ् चाऽस्स्योपधाऽपि च ॥११७॥

अयवँ विषयश् शुक्लयजुर्वेदप्रातिशाख्यम्[1] ऋक्तन्त्रञ्[2] च विहाय अन्येषु प्रातिशाख्येषु नोपलब्ध्यते । तत्त्राऽपि व्याख्याकारैरुदाहरणानि तु लौकिकानि एव प्प्रदर्शितानि, न तु स्वशाखावेदादुद्धृतानि । पाणिनीये व्याकरणे तु वेदलोकसाधारणविषयप्प्रधाने "कानाम्म्रेडिते"[3] इति पट्ठ्यत एव । रागञ् चेति वचनात् पक्क्षान्तरेऽनुस्स्वारागमोऽपि सङ्गृहीतो बोद्ध्यः ॥११७॥

नँ$_{cc}$× पतिब्भ्यो नँ$_{cc}$× प्रणेत्त्रमित्त्यादौ नो विसर्गताम् ।
नित्त्यङ गच्छेदृच्च्युपधा तत्त्र गच्छेच् च रक्तताम् ॥११८॥

उदाहरणानि यथा शाकलऋग्वेदमन्त्रसंहितायाम्— नँ$_{cc}$: पतिब्भ्यो योनिङ कृण्ण्वाने[4] नराशंसन् नृशस्तन् नँ$_{cc}$: प्रणेत्त्रम्[5] कदित्था नँ$_{cc}$: पात्त्रन् देवयताम्[6] भुवस् तस्य स्स्वतवाँः पायुरग्ने[7] इति । तदुक्तम् ऋग्वेदप्रातिशाख्ये— "नँ$_{cc}$: पतिब्भ्यो नँ$_{cc}$: प्रणेत्त्रन् नँ$_{cc}$: पात्त्रं स्वतवाँः पायुः । सन्धिर् विक्क्रान्त एवैषः"[8] इति । शुक्लयजुर्वेदप्रातिशाख्ये च— "न्$_{cc}$न्पकारे विसर्ज्जनीयम्"[9] इत्त्येव । तैत्तिरीयप्रातिशाख्ये, ऋक्तन्त्रे, शौनकीयचतुरद्ध्यायिकायाञ् च स्वचरणे विषयाभावादयवँ विषयो न प्प्रतिपादितः । पाणिनीयव्याकरणे तु "न्$_{cc}$न् पे, स्वतवान् पायौ"[10] इत्त्युक्तम् । किन् तु तत्त्र यथा "न्$_{cc}$न् पे" इत्त्यत× पूर्वन् "दीर्घादटि समानपादे" इति सूत्त्रम् ऋग्विषयकम्, यथा च "न्$_{cc}$न् पे" इत्त्यत× परं "स्वतवान् पायौ" इति सूत्त्रञ् च ऋग्विषयकन् तथैव "न्$_{cc}$न् पे" इति सूत्त्रम् ऋग्विषयकन् न वेति विचारणीयम् । जयादित्त्येन हरदत्तेन च तत्त्र मौनमेवाऽवलम्बितम् । जिनेन्द्रबुद्धिना त्वेतस्स्य लौकिकप्रयोगविषयत्त्वमास्स्थितम् भाति । धर्मकीर्तिना तु इदं सूत्त्रन् न व्याख्यातमिति तस्स्येदं सूत्त्रवँ वेदविषयकमित्त्यभिप्प्राय× प्रतीयते । पुरुषोत्तमदेवेन तु अस्स्य सूत्त्रस्स्य लौकिकप्रयोगविषयत्त्वमास्स्थितम् । तदेवाऽनुसृतम् प्रक्क्रियाकौमुदी–तत्प्रसादै–सिद्धान्तकौमुदी–तद्व्याख्याकारादिभिः। अस्माकन् तु वेदविषयकसूत्त्रमद्ध्ये पठित-

---

१. ४।९ । २. ४।२।५ । ३. अष्टा. ८।३।१२ ।
४. खिलेषु, प्रैषाद्ध्याये ७ [१] (ओ) । ५. तत्त्रैव (इ) ।
६. १।१२१।१ । ७. ४।२।६ । ८. ४।७८ । ९. ३।१४०।
१०. अष्टा. ८।३।१०, ११ ।

स्स्य सूत्तरस्स्य वेदविषयकत्वमेवोचितमिति प्प्रतिभाति । लौकिके प्रयोगे तु अस्स्य सूत्तरस्स्याऽप्रवृत्तेर् 'नृ॒न् पाहि' इत्त्येव प्प्रयोग इत्त्यस्माकम् पक्षः । "उभयथर्क्षु"[1] इति एतस्स्य अपरिच्छेदकस्स्य भ्रमजनकस्स्य च वचनस्स्याऽपाश्रयणेन खलु वार्तिककार-भाष्यकारावपि "नृ॒न् पे" इत्त्यस्स्य विषयस्स्य परिच्छेदे उदासाते । वस्तुतस् तु अननुरूपमेवेदम् पाणिनीयव्याकरणस्स्य वेदाङ्गतायाः । अतस् तद्व्याक्ख्याने प्रातिशाक्ख्याद्द्यनुसारवँ् विषयपरिच्छेदꣳ प्रदर्शनीय एव ॥११७॥

नँ॒ꣳ पाहि शृणुधीत्त्यत्तर[2] नकारो हि विसर्गताम् ।
यायात् स्यादुपधा रक्ता न नृ॒न् पाह्य्यसुरादिके ॥११८॥

तदुक्तमृग्वेदप्रातिशाक्ख्ये— "नँ॒ꣳ: पाहि शृणुधीति च"[3] इति । तत्प्रत्त्युदाहरणन् च— "रक्षा नृ॒न् पाह्य्यसुर त्त्वमस्मान्"[4] इति प्प्रदर्शितम् उव्वटेन । शुक्लयजुर्वेदप्रातिशाक्ख्येऽपि यद्द्यपि "नृ॒न् न्पकारे विसर्ज्जनीयम्"[5] इत्त्येवोक्तम्, तथापि तच्चरणे नास्त्यतिव्व्यापकत्त्वं सूत्तरस्स्य । पाणिनीयन् तु "नृ॒न् पे"[6] इति वचनं सर्ववेदपारिषदत्त्वेनाऽभिमतम्[7] इति तत् समीचीनतरावँ् व्याक्ख्यामपेक्षत एवेति विवेक्तव्व्यं सुधीभिः ॥११८॥

ईपूर्वकोऽथवोपूर्वो हतमित्त्यादिके परे ।
ऋचि नो रेफताङ् गच्छेद् रक्तौ स्यातां हि यू च तौ ॥११९॥

उदाहरणानि यथा शाकलऋग्वेदसंहितायाम्— उत् पणीँ॒र् हतमूर्म्या मदन्ता[8], वि दस्स्यूँ॒र् योनावकृतः[9], पणीँ॒र् वचोभिरभि योधदिन्द्रः[10], सखीँ॒र् याँ इन्द्र चकृषे सु कृत्त्या[11], रुद्द्रस्स्य सूनूँ॒र् युवन्न्यूँ॒रुद्श्याः[12], प्रियाँ अपिधीँ॒र् वनिषीष्ट[13] इति । एतद्विषये वचनानि यथा— "हतयूँ॒ योनौ वचोभिर् यान् युवन्न्यूँ॒र् वनिषीष्टेति । ईकारोकारोपहितो रेफमेषु"[14] इति ऋग्वेदप्रातिशाक्ख्ये । ऋक्तन्त्रे च— "घान् नो डि विसर्ज्जनीययँ् यवोहिषु"[15] इति । पाणिनीये व्याकरणे च— "दीर्घादटि समानपादे"[16] इत्त्यत्तर "अटि" इति स्वराणां हयवराणाञ् च ग्रहणादयवँ् विषय

---

१. अष्टा. ८।३।८ । २. शा. ऋ. म. स. ८।८४।३ ।
३. ४।७९ । ४. शा. ऋ. म. सं. १।१७४।१ । ५. ३।१४० ।
६. अष्टा. ८।३।१० । ७. पा. व्या. भा. २।१।५७ ।
८. १।१८४।२ । ९. १।६३।४ । १०. ६।३९।२ ।
११. ४।३५।७ । १२. ५।४२।१५ । १३. १।१२७।७ ।
१४. ४।६९ । १५. ३।६।२ । १६. अष्टा. ८।३।९ ।

उपात्त एव। तत्तर "उभयथर्क्षु"[1] इत्यस्स्याऽनुवृत्तेर् एतन्नियमाऽपवादा अपि सङ्गृहीता एव भवन्ति। तथाऽपि उत्सर्गविषयाणामपवादविषयाणाञ् चाऽगणीकरणात् पाणिनीयं सूत्तरवँ् विषयपरिच्छेदाय तु अपर्याप्तमेवेति मन्तव्यमेव ॥११९॥

अन्नाँ रयिवृधो दद्वाँ वेत्त्यादिषु ऋचि स्स्थितः।
आपूर्वको नकारस् तूपधारागत्त्वमेति च ॥१२०॥

उक्तं हि ऋग्वेदप्रातिशाक्ख्ये— "विवृत्त्यभिप्प्रायेषु च पीवो अन्नाँ रयिवृधः[2]। दधन्न्वाँ यो[3] जुजुर्वाँ यस्[4] स्ववाँ यातु[5] दद्वाँ वेति[6]" इति[7]। शुक्लयजुर्वेदप्रातिशाक्ख्ये च— "दधन्न्वान्[8] स्ववान्[9] यकारे लोपम्, रयिवृधे[10] च" इति[11]। अत्तर शुक्लयजुर्वेदे नकारस्स्य लोप एव भवति न तूपधाराग इति च बोद्ध्यम्[12]। ऋक्तन्तरे च— "घान् नो डि विसर्जनीयँ् यवोहिषु"[13] इति। शौनकीयचतुरद्ध्यायिकायाञ् च— "वृक्क्षाँ वनानीति वकारे"[14] इति। पाणिनीयव्याकरणे च— "दीर्घादटि समानपादे"[15] इति हकारे यकारे वकारे रकारे च परेऽपि नकारविकारोऽयम् प्रतिपादितः। किन् तु "देवान् विश्श्वान्[16], नियुत्त्वान् वायो[17]" इत्यादिषु नाऽयवँ् विकारो भवतीति, उक्तपाणिनीयसूत्तरस्स्यात्तराऽपि प्राप्तिरस्ति इति च पाणिनीयवँ् व्याकरणवँ् वैदिकप्रयोगान्न्वाक्ख्याने न सर्वथा स्पष्टन् निश्चयात्मकञ् चेति तु मन्तव्यमेव ॥१२०॥

(५) मकारविकाराः

मो व्यञ्जने कवर्गीये ङश् चवर्गीयके तु ञः।
टवर्गीये परे णस् स्यान् नस् तवर्गीयके भवेत् ॥१२१॥
पवर्गीये म एव स्स्याद् वेदशाखासु सर्वदा।
येऽनुनासिकयँ४ प्रायो वेदे लोके विकल्पतः ॥१२२॥
लेऽनुनासिकलँो वाऽपि वेऽनुनासिकवँोऽपि वा।
वेदेष्वपि विकल्पोऽयं शाखाभेदात् प्रतीयते ॥१२३॥

---

१. अष्टा. ८।३।८। २. शा. ऋ. म. मं. ७।९१।३। ३. तत्तरैव ९।१०७।१। ४. तत्तरैव २।४।५। ५. तत्तरैव १।११८।१। ६. तत्तरैव १०।१३२।३। ७. ४।६८। ८. मा. सं. १९।२। ९. तत्तरैव ३४।२६। १०. तत्तरैव २७।२३। ११. ३।१३६–१३७। १२. शु. य. वे. प्रा. उ. भा. ३।१३६। १३. ३।६।२। १४. २।२८। १५. अष्टा. ८।३।९। १६. शा. ऋ. म. सं. ३।५९।८। १७. तत्तरैव २।४१।२।

भाषायां हि भवेत् प्रायो नपरे हे न एव वा ।
मपरे तु मकारो वा यपरे रक्तयोऽपि वा ।।१२४।।
लपरे रक्तलो वाऽपि वपरे रक्तवोऽपि वा ।
भाषायावं् वा त्वनुस्स्वारस् स्पर्शेऽन्तस्थेऽपि व्यञ्जने ।।१२५।।
रेफे च शषसेषु स्स्यादनुस्स्वारो हि सर्वथा ।
हेऽनादिपरके लोके नित्यवं् वेदे तु हे सदा ।।१२६।।
अन्तस्स्थोष्मसु मो गच्छेदुपधारागतान् न ले ।
शौनकिप्प्रभृतीनान् तु वेदेष्विति विभाव्यते ।।१२७।।

उदाहरणानि यथा— यङ कुमार नवं रथम्[१], देवङ गोऋजीकम्[२], अहन् च त्वन् च वृत्तरहन्[३], तन् ते माता परि योषा जनित्तरी[४], अग्निन् दूतम्[५], इदम् पितृब्भ्यो नमः[६], तम् प्रत्तनथा[७], इमम् मे वरुण श्रुधी हवम्[८] इति वेदेषु; यय्यं् युजङ कृणुते[९] इति वेदे, त्वयं् यासि त्वं यासि इति लौकिके प्रयोगे; भद्द्रैषालं् लक्ष्मीः[१०], तलं् लोकम् पुण्यम्[११] इति वेदे, त्वलं् लिखसि, त्वं लिखसि इति लौकिके प्रयोगे; तवं् व इन्द्रन् न सुक्करतुम्[१२] इति वेदे, "सम्वास्ना ह आस्स्यम्"[१३] इति चापवादोदाहरणवं्[१४] वेदे; त्ववं् वद, त्वं वद इति लौकिके प्रयोगे; कथन् ह्नुते भवान्, कथं ह्नुते भवान्; किम् ह्मलयति त्वाम्, किं ह्मलयति त्वाम्, कियं् ह्योऽकरोस् त्वम्, किं ह्योऽकरोस् त्वम्; किलं् ह्लादयति त्त्वाम्, किं ह्लादयति त्त्वाम्, किवं् ह्वलयति त्त्वाम्, किं ह्वलयति त्त्वाम् इति च लौकिके प्प्रयोगे; त्वङ करोषि, त्वं करोषि; त्वन् चतुरोऽसि, त्वं चतुरोऽसि; त्वण् टङ्केन पाषाणान् दारयसि, त्वं टङ्केन पाषाणान् दारयसि; अहन् तुब्भ्यन् ददामि, अहं तुब्भ्यं ददामि; अहम् पश्श्यामि, अहं पश्श्यामि इति च लौकिके प्रयोगे; होतारं रत्नधातमम्[१५] इन्द्रो हन्ति वृषभं शण्डिकानाम्[१६], तं षट्पदम् मकरन्दम् पिबन्तम्, वसुं सूनुं सहसः[१७] इति यथायथवं् वेदे लोके

---

१. शा. ऋ. म. सं. १०।१३५।३ । २. कौ. सा. सं. ३१३ ।
३. शा. ऋ म. सं. ८।६२।११ । ४. तत्तरैव ३।४८।२ ।
५. कौ.सा.सं. ३ । ६. मा. सं. १९।७८ । ७. तै.सं. १।४।९ ।
८. शा. ऋ. म. सं. १।२५।१९ । ९. तत्तरैव २।२५।१ ।
१०. तत्तरैव १०।७१।२ । ११. मा. वा. शु. य. वे. म. सं. २०।२५ ।
१२. शा. ऋ. म. सं. ६।४८।१४ । १३. शौ. अ. वे. म. सं. ६।५६।३।
१४. शौ.च.२।३७। १५.शा.ऋ.म.सं.१।१।१। १६. तत्तरैव२।३०।८।
१७. तत्तरैव १।१२७।१ ।

च। वृक्क्षे यद् गावः[1], पितरं वरुणम्[2], वृजिनं शृणन्तु[3], न्योषतं हतम्[4] सं सु भूत्या[5] भवसि सं समृद्ध्या[6] इति तु शौनकीयचतुरद्ध्यायिकायामन्वाक्ख्यातानि शौनकिनामथर्ववेदमन्तरसंहितायामन्यथा मुद्दर्श्यमाणानि उदाहरणानि।

एतद्विषये च ऋग्वेदप्रातिशाक्ख्ये— "विस्स्थाने स्पर्श उदये मकारस् सर्वेषामेवोदयस्स्योत्मं स्वम्। अन्तस्थासु रेफवर्जम् परासु तान्ताम् पदादिष्वनुनासिकान् तु"[7] इति, "रेफोष्मणोरुदययोर् मकारोऽनुस्स्वारन् तत् परिपन्नमाहुः"[8] इति, "सम्म्राट्शब्दऽ परिपन्नापवादः"[9] इति चोक्तम्। एवञ् च सति स्पर्शेषु परेषु शाकलऋग्वेदमन्तरसंहितायाम् मुद्दरितायामुपलब्ध्यमानोऽनुस्स्वारप्प्रयोगश् चिन्त्य एवेत्यस्माकम् मतम्, कस्मिन्नपि उपलब्ध्यमाने प्रातिशाक्ख्ये स्पर्शे परेऽनुस्स्वारस्स्य स्स्थितेरनन्वाक्ख्यातत्वात्। लकारभिन्नासु अन्तस्स्थासु परासु तु अनुस्स्वारपक्क्षस्स्याऽप्युल्लेखात् तत्तर शाखाभेदेन व्यवस्स्थितो विकल्पस् सम्भाव्यते। शुक्लयजुर्वेदप्रातिशाक्ख्येऽपि— "अनुस्स्वारं रोष्म्मसु मकारः"[10] इति, "लोपञ्च काश्यपशाकटायनौ, प्रकृत्या सम्म्राट्ट्सम्म्राजि"[11] इति, "अन्तस्त्थास्स्वनुनासिकाम् परसस्त्थानाम्"[12] इति, "स्पर्शे परपञ्चमम्"[13] इति च। तैत्तिरीयप्रातिशाक्ख्ये च— "मकार स्पर्शपरस् तस्य सस्स्थानमनुनासिकम्, अन्तस्स्थापरश् च सवर्णमनुनासिकम्, न रेफपरः, यवकारपरश् चैकेषामाचार्याणाम्, उत्तमलभावात् पूर्वोऽनुनासिक इत्त्यात्तरेयः"[14] इति, "अथ मकारलोपः, रेफोष्मपरः, यवकारपरश् चैकेषामाचार्याणाम्, न संसामितिपरः"[15] इति, "नकारस्स्य रेफोष्मयकारभावाल् लुप्ते च मलोपाच् च पूर्वस्स्वरोऽनुनासिकः, नैकेषाम्, ततस् त्वनुस्स्वारः"[16] इति च। ऋक्तन्तरे च— "मो सन्ध्यः, रणमपि स्स्थायाम्, अनुस्स्वारमेके, रेफोष्मसु, हि नमपरे च तत्परम्"[17] इति; शौनकीयचतुरद्ध्यायिकायाञ् च— "मकारस्स्य स्स्पर्शे परसस्स्थानः, अन्तस्स्थोष्मसु लोपः"[18], इति, "उभयोर् लकारे लकारोऽनुनासिकः, न

---

१. १।२।३। २. १।३।३। ३. ८।३।१४। ४. ८।४।१। ५. ३।१४।१। ६. ७।३।२१। ७. ४।६, ७। ८. ४।१५। ९. ४।२३। १०. ४।१। ११. ४।५, ६। १२. ४।१०। १३. ४।१२। १४. ५।२७–३१। १५. १३।१–४। १६. १५।१–३। १७. ४।५।१०–१४। १८. २।३१, ३२।

समो राजतौ, सन्ध्ये च वकारे"[1] इति; "नकारमकारयोर् लोपे पूर्वस्याऽनुनासिकः, यरोष्मापत्तौ च"[2] इति च। नारदीयशिक्क्षायामपि— "आपद्द्यते मकारो रेफोष्मसु प्परत्ययेष्वनुस्स्वारम्। यलवेषु परसवर्णं स्परशेषु चोत्तमापत्तिम्"[3] इति। पाणिनीयव्याकरणे च– "मोऽनुस्स्वारः"[4] इति, "मो राजि समः क्वौ, हे मपरे वा, (यवलपरे यवला वा), नपरे नः"[5] इति, "अनुस्स्वारस्स्य ययि परसवर्णः, वा पदान्तस्स्य"[6] इति च। **अत्तर रेफे शषसेषु हकारे च परे मकारस्स्य स्वोपधारागताप्राप्तिपक्क्षश् शुक्लयजुर्वेदप्रातिशाक्ख्ये तैत्तिरीयप्रातिशाक्ख्ये चोल्लिखितः, शौनकीयवतुरद्ध्यायिकायान् तु निर्विकल्पतया प्रतिपादितोऽपि पाणिनिना नैवोल्लिखितः, वार्तिककारभाष्ष्यकाराब्भ्यामपि उपेक्क्षितः; अननुरूपमेवेदञ् च पाणिनीयव्याकरणस्स्य सर्ववेदपारिषदतायाः।** पाणिनीयव्याकरणे प्रतिपादिताः 'नपरके हकारे परे मकारस्स्य विकल्पेन नकारो भवति' इत्त्यादयो नियमाः खलु ऋग्वेदप्रातिशाक्ख्यादिषु अनुपलब्भ्यमाना एषाम् भाषामात्तरविषयकत्त्वमवगमयन्ति। तत्तर 'नपरके हे मस्स्य नो वा' इति, 'मपरके हे मस्स्य मो वा' इति च विधी ऋक्तन्तरे प्राप्प्यमाणावपि तदुदाहरणानान् तद्वृत्तिकारेण वेङ्कटमाधवेनानुद्धृतत्वाद्,ऋक्तन्तरस्स्याऽन्न्यप्रातिशाक्ख्यविलक्क्षणतया "भाषायाम्"[7] इत्त्यादिभिस् सूत्तरैरेव लौकिकसँस्कृतभाषाविषयकप्रयोगान्न्वाक्ख्यानपरतायाश् च दर्शनात्, तौ वेदे निर्विषयौ विज्ज्ञायेते। 'यवलपरे यवला वा' इति विधिस् तु प्रातिशाक्ख्ये कस्मिन्नपि अनुपलब्भ्यमानः पाणिनिनाऽप्प्युपेक्क्षितो वार्तिककारेण प्प्रोक्तस् सर्वथा लौकिकसँस्कृतभाषामात्तरविषयोऽवसीयते। **तत्तर मकारस्स्थाने विहिता अपि यवला अननुनासिका एवेति महाभाष्ष्यप्रदीपोद्द्योते लघुशब्देन्दुशेखरे च नागोजिभट्टः। उक्तं हि लघुशब्देन्दुशेखरे तेन "एते यवला निरनुनासिका एव, विधीयमानत्त्वेन सवर्णाग्ग्राहकत्त्वात्, जातिग्ग्रहणप्राप्तस्स्येव गुणाभेदकत्त्वप्राप्तस्स्यापि अप्प्रत्त्यय इत्त्यनेन निषेधाच् च। एवम् मय उञ इत्त्यत्तराऽपि। अत एव मतोर् मस्स्य नाऽनुनासिको वकारः। अन्न्यथा तद्वानासामित्त्यादौ नित्त्यानुनासिकापत्त्या तन्निर्देशासङ्गत्त्यापत्तिरित्त्याहुः"** इति। किन् तु "यवलाश् चैते भवन्त आन्तरतम्म्यादनुनासिका भवन्ति" इति जिनेन्द्रबुद्धिर् हरदत्तश्

---

१. २।३५–३७। २. १।६७,।६८। ३. २।४।४।
४. अष्टा. ८।३।२३। ५. तत्तरैव ८।३।२५–२७।
६. तत्तरैव ८।४।५८, ५९। ७. ३।४।६;४।७।८।

च । "सानुनासिका एते स्युः" इति पुरुषोत्तमदेवोऽपि । "यवलाश् चाऽऽन्तरतम्यान् मकारस्य सानुनासिका एव भवन्ति" इति प्रक्रियाकौमुदीप्रसादेऽपि । वयमपि यथा वा तथा वा पाणिनीयव्याकरणप्रक्रियायाम् प्राप्तिर् भवतु, अनुनासिकस्य मकारस्य स्थाने समागच्छतार्यं यवलानामनुनासिकत्वमेव युक्ततरम् मन्यामहे स्थानेऽन्तरतम इति न्यायात् । मतुप्प्रत्ययस्य मकारस्य स्थाने वकारस्य विधानं हि पाणिनीयप्प्रक्रियामात्तरम्, यत्तर पाणिनीयव्याकरणानुसारम् मतुपो मस्य स्थाने वकारो भवति तत्तर यदि कश् चनाऽन्यो वैयाकरणो मतुपोऽपवादत्वेन वतुपर्वं विदद्ध्यात् तथाऽपि न काऽप्यनुपपत्तिस् स्यात् । अत्तर तु मकारो लोकप्प्रयोगसिद्ध उपाधिवशाद् विकारङ्ग गच्छन्नुपाधिधर्मम् प्राप्नुवन्नपि कियताप्यंशेन स्वधर्ममपि न जहातीत्येवमेव श्लिष्यते । भाष्यस्थोऽपि उदाहरणेषु अनुनासिकयँवँलँपाठो नागोजिनैवोल्लिखितो लेखकपाठकपरम्परासिद्धो न नागोजिजल्पितमात्तरेणाऽपोढुं शक्य इति च बोद्ध्यम् ॥१२१–१२७॥

समो मस् तु प्प्रकृत्या स्याद् राट्शब्दे परतस् स्थिते ।
अनुन्वद्ध्यायञ् च भाषायाञ् चाऽपि नित्त्यो ह्यय्यवं विधिः॥१२८॥

उदाहरणानि यथा शाकलऋग्वेदमन्तरसंहितायाम्— विराट् सम्म्राट्[1], सम्म्राजोरव आ वृणे[2], सम्म्राज्ञी श्वशुरे भव[3] इति । सं राजभी रत्नधेयाय देवाः[4] इति प्रत्त्युदाहरणम् च तत्तरैव । एतद्विषये ऋग्वेदप्रातिशाक्ख्ये— "सम्म्राट्शब्दम् परिपन्नापवादः"[5] इत्त्युक्तम् । शुक्लयजुर्वेदप्रातिशाक्ख्ये च— "प्रकृत्त्या सम्म्राट्ट्सम्म्राजि"[6] इति । तैत्तिरीयप्रातिशाक्ख्ये च— "नसंसामिति रापरः"[7] इति । शौनकीयचतुरद्ध्यायिकायाम् च— "न समो राजतौ"[8] इति । पाणिनीयव्याकरणे च— "मो राजि समः क्वौ"[9] इति ॥१२८॥

ईमित्त्यस्य मकारस्य गर्भमित्त्यादिके परे ।
लोपस् स्यान् नित्त्यमित्त्याह मुनिर् बाह्वृचच्यपार्षदे ॥१२९॥

तथा हि— "ईमित्त्यन्तलोप एषूदयेषु गर्भङ्[10] गावो[11] वत्सम्[12]

---

१. १।१८८।५ । २. १।१७।१ । ३. १०।८५।४६ । ४. ४।३४।११ । ५. ४।२३ । ६. ४।६ । ७. १३।४ । ८. २।३६ । ९. अष्टा. ८।३।२५ । १०. शा.ऋ.म.सं. ९।१०२।६ । ११. तत्तरैव ९।७२।६ । १२. तत्तरैव ९।१०४।२ ।

मृजन्ति[1] पृच्च्यते[2]। सखायो[3] विव्याच[4] पुना[5] रिणन्ति[6] रथ[7]-मित्त्यन्वक्क्षरसन्धिरेव सः"[8] इति ॥१२९॥

स्वरोदयेषु च तथाऽनुतस्स्थवर्णोदयेषु च ।
प्रथमेषु द्द्वितीयेषु परेष्वक्ख्यास्स्थितेषु च ॥१३०॥
पुमो मोऽनुस्स्वारतावँ वोपधारागतत्वमेति हि ।
तदुत्तरे सकारोऽपि समागच्छेच्च सर्वदा ॥१३१॥

उदाहरणानि च— पुंस्कामा, पँुस्कामा; पुंस्कोकिलः, पँुस्कोकिलः; पुंस्क्रिया, पँुस्क्रिया; पुंस्क्लमः, पँुस्क्लमः; पुंस्क्वाथः, पँुस्क्वाथः; पुंस्खरः, पँुस्खरः; पुङ्ख्यानमिति तु प्रत्त्युदाहरणम्; पुंश्चली, पँुश्चली; पुंश्छाया, पँुश्छाया; पुंष्टङ्गा, पँुष्टङ्गा, पुंष्ठक्कुरः, पँुष्ठक्कुरः; पुंस्तुल्ल्या, पँुस्तुल्ल्या; पुंस्त्यक्ता, पँुस्त्यक्ता; पुंस्त्राता, पँुस्त्राता; पुंस्त्वङ्गनम्, पँुस्त्वङ्गनस्; पुंस्थूत्कारः, पँुस्थूत्कारः; पुंस्पूर्वा, पँुस्पूर्वा; पुंस्प्यायिता, पँुस्प्यायिता; पुंस्प्रिया, पँुस्प्रिया; पुंस्प्लवः, पँुस्प्लवः; पुंस्फला, पँुस्फला इति ।

अयवँ विधिर् ऋग्वेदप्रातिशाक्ख्ये नास्ति । शुक्लयजुर्वेदप्रातिशाक्ख्ये तु— "शञ् चे पकारादुकारोदयात्, समन्तःपदे कखपफेष्ष्वनूष्मम-परेषु"[9] इत्त्युक्तः । तैत्तिरीयप्रातिशाक्ख्येऽपि नास्त्ययवँ विधिः । ऋक्तन्त्रे तु— "पुं स्पर्शे (नोष्मपरे)"[10] इत्त्युक्तम् । शौनकीयचतुरद्ध्यायिकायाञ् च— "पुमो मकारस्स्य स्स्पर्शेऽघोषेऽनूष्मपरे विसर्जनीयोऽपुंश्चादिषु (ऽपुङ्ख्यादिषु ?)"[11] इति प्प्रोक्तम् । पाणिनीये व्याकरणे च— "पुमꣳ खय्यम्परे (सम्पुङ्कानां सो वक्तव्यः)"[12] इति प्प्रोक्तम् । तत्त्र च "चक्क्षिङꣳ ख्याञ्"[13] इति सूत्त्रस्स्य व्याक्ख्याने 'चक्क्षिङꣳ ख्याञादेशेऽपि यकारादेशस्स्याऽसिद्धवत्त्वमास्स्थेयमित्त्युक्त्वा तथा स्वीकरणे प्रयोजनानि प्प्रदर्शितानि वार्तिककारेण । तत्त्र च "रुविधिꣳ पुङ्ख्याने" इति षष्ठवँ वार्तिकम् । "पुङ्ख्यानमिति च रुविधिर् न भवति" इति च तद्व्याक्ख्यानम् भाष्यम् ।

---

१. शा. ऋ. म. सं. ९।६३।१७ । २. तत्त्रैव १।१०३।१ । ३. तत्त्रैव ९।४५।५। ४. तत्त्रैव ३।३६।८। ५. तत्त्रैव १।१४०।२। ६. तत्त्रैव ९।७१।६ । ७. तत्त्रैव ९।७१।५ । ८. ४।८३ । ९. ४।७-८ । १०. ४।२।२ । ११. २।२५ । १२. अष्टा. ८।३।६ । १३. तत्त्रैव २।४।५४ ।

तत्तर ऋग्वेदमन्तरसंहितायां शाकलशाखायान् तु अस्स्य नियमस्स्य विषया नैव सन्ति। यजुर्वेदेषु च 'पँुश्चलो' इति माध्यन्दिनीयसंहितायाम्[1], काण्वसंहितायाम्[2], काठकसंहितायाम्[3] च प्राप्यते; 'पँुश्चलूम्' इति च माध्यन्दिनीयसंहितायाम्[4] काण्वसंहितायाम्[5] चैव दृश्यतेऽस्स्य नियमस्स्य विषयः।सामवेदमन्तरसंहितयोरपि नास्त्यस्स्य विषयः। शौनकिनामथर्ववेदमन्तरसंहितायान् तु पँुश्चलीति अस्स्य नियमस्स्य विषयः प्राप्यते[6]।

अस्स्य विधेः पदान्तपदादिसन्धित्वस्स्याऽभावेऽपि अवग्रहनिनिवर्त्यविकारवत्त्वादस्स्याऽन्तरोल्लेखः कृतो वेद्द्यः। परसङ्गसङ्गत्या च लौकिकानि उदाहरणानि प्रदर्शितानि वेदितव्यानि ॥१३०-१३१॥

समो म उपजाते से स्यादनुस्स्वारकोऽपि वा।

स्वपूर्वस्स्वररागो वाऽतः परस् सागमोऽपि वा ॥१३२॥

एतद्विषयको नियमोऽपि ऋग्वेदप्रातिशाख्ये न दृश्यते, न च शाकलऋग्वेदमन्तरसंहितायामस्स्य नियमस्स्य विषयः प्राप्यते। शुक्लयजुर्वेदप्रातिशाख्ये तु— "समन्तःपदे कखपफेष्वनूष्मपरेषु"[7] इत्युक्तमस्ति। तथापि "सा प्रथमा सँस्कृतिर् विश्ववारा"[8] इत्यादिषु ककारे पर एव उदाहरणानि माध्यन्दिनीयादिसंहितागतानि प्राप्यन्ते, न तु खपफेषु परेषु। तैत्तिरीयप्रातिशाख्येऽपि नास्त्ययवँ विषयः। तत्तर च संस्कृत्य[9] इत्यस्स्य संस्कृतम्[10] इत्यस्स्य चैकपदत्वमेवाऽऽस्स्थितम्[11],तत्तर संस्कुरुते[12] इत्यत्तर सकारागमः प्रतिपादितः[13],तथापि नाऽयन् नियमः प्रोक्तः, सकारागमेऽपि मकारस्स्याऽनुस्स्वारताया विधानेनैवेष्टरूपान्वाख्यानस्स्य सिद्धेः। ऋक्तन्तरे तु— "स सं करोतौ"[14] इत्युक्तम्; सकारे परे मकारस्स्याऽनुस्स्वारभावस्स्याऽन्वाख्यानेनैवेष्टरूपप्रतिपादनसिद्धिः कृता। शौनकीयचतुरद्ध्याय्यिकायामपि "सम्परिभ्यां सकारादौ करोतौ"[15] इति संस्कृतत्तरम्[16] इत्यादौ पदविभागाऽभावः प्रतिपादितः; सकारे परे मकारस्स्य स्वपूर्वस्स्वररागताप्राप्ति-

---

१. २०।३०। २. ३४।४।४। ३. ३४।५।
४. ३०।५,२०। ५. ३४।१।५,३४।४।२। ६. १५।२।५,१३,१९,२५।
७. ४।८। ८. ७।१४। ९. तै. सं. ५।६।६।३,४।
१०. तत्तरैव १।४।४३।२। ११. १६।२६। १२. तै. सं. ५।६।६।४।
१३. ५।६। १४. ४।५।५। १५. ४।५८।
१६. शौ. अ. वे. म. सं. ४।२१।४।

प्प्रतिपादनेनैव चेष्टरूपान्वाख्यानञ्च कृतम् । पाणिनीये व्याकरणे तु "समस् सुटि"[१] "(समुद्धकानां सो वक्तव्यः)" "समो वा लोपमेके" इति प्प्रोक्तम् । तत्र यद्द्यपि अनुस्स्वारपक्षे तु इष्टं रूपमन्वाख्यातुञ्च खलु "समस् सुटि" इति सूत्रमनुस्स्वारस्याऽप्यच्त्वे स्वीकृते नैवाऽऽवश्यकम्; तथापि अनुनासिकपक्षे रूपाण्यन्वाख्यातुमस्मिन् प्रकरणेऽस्य सूत्रस्याऽस्य वार्तिकस्यैतस्या इष्टेश् च पाठ आवश्यक एव । एतद्विषये च शुक्लयजुर्वेदेऽनुनासिकपक्षः[२], तैत्तिरीयकेऽनुस्स्वारपक्षः[३], सामवेदेऽपि अनुस्स्वारपक्षः[४], अथर्ववेदेऽनुनासिकपक्षः[५] उपलब्ध्यमानो दृश्यते । ऋग्वेदेऽपि अनुस्स्वारपक्ष एव उपलब्ध्यमानो मन्तव्यः । **एष विषयविभागश् च पाणिनीयव्याकरणवार्तिकभाष्यादिषु प्प्रतिपादयितुं शक्योऽपि वार्तिककारादिभिरुपेक्षितः पूरणीयोऽतः परन् तद्व्याख्यातृभिः ।** लोके तु एतद्विषये इच्छाविकल्प एवेति पाणिनीयव्याकरणादेवाऽवसातुं शक्यम् ।।१३२।।

(६) पदान्तस्थसकारविकारचर्चा

व्यापन्नस्य सकारस्य विकारस् ते परे सति ।
षत्वप्प्रकरणे दृश्यो नाऽत्त्रोल्लेख्यो मतो हि सः ।।१३३।।

पूर्वपदान्तगो व्यापन्नत्वेन व्यवह्रियमाणस् सकारष् षकारो भवति तकारादिषु पदविशेषेषु परेषु । सोऽयवँ विशेषस् षत्वप्प्रकरणे प्रतिपादितो द्रष्टव्यः ।।१३३।।

(७) रेफजविसर्गविकाराः

रेफजस् तु विसर्गस् स्याद् घोषवत्सु परेषु च ।
व्यञ्जनेषु रेफ एव रेफे लुप्तो भवेच् च सः ।।१३४।।
स्याल् लुप्तेऽस्स्योपधा दीर्घा स्वोरोहावादिके तथा ।
अहोरात्त्रादिकेऽलुप्त ओस् स्यादुपधया सह ।।१३५।।

तदुक्तमृग्वेदप्रातिशाख्ये— "सर्वोपधस् तु स्स्वरघोषवत्परो रेफं रेफी ते पुना रेफसन्धयः । रेफोदयो लुप्प्यते द्राधितोपधा ह्रस्स्वस्स्य"[६] इति । तदुदाहरणानि च— प्रातर् मित्त्रावरुणा[७], प्राता रत्नम् प्रातरित्त्वा[८] इत्यादीनि शाकलऋग्वेदमन्त्रसंहितायाम् प्राप्प्यन्ते । शुक्लयजुर्वेदप्रातिशाख्ये च— "भाव्व्युपधश्च् च रिद्द्विसर्ज्जनीयः,

---

१. अष्टा. ८।३।५ । २. शु. य. वे. प्रा. ३।१३० ।
३. तै. प्रा. १५।३ । ४. ऋ. त. ४।४।१३ । ५. शौ. च. १।६७,६८।
६. ४।२७-२९ । ७. ७।४१।१ । ८. १।१२५।१ ।

रेफे लुप्यते दीर्घञ् चोपधा, रेफं स्वरधौ"[1] इति; तदुदाहरणानि च "सवितर्व्वामम्"[2] इत्यादीनि माध्यन्दिनीयसंहितायाम् । तैत्तिरीयप्रातिशाख्ये च— "अथ विसर्जनीयः, रेफमेतेषु, न रेफपरः, अनवर्णपरस् तु रेफपरो लुप्यते, दीर्घञ् च पूर्वः, एष्टश् च"[3] इति, "ह्वारभार्वार्हार्"[4] इत्यादि च । तदुदाहरणानि च– "मा ह्वार् मित्त्रस्स्य[5], एष्टा रायः[6]" इत्यादीनि तैत्तिरीयसंहितायाम् । ऋक्तन्त्रेऽपि– "रप्प्रकृतिः"[7] इति, "रः"[8] इति च । तदुदाहरणानि च— "प्रातर् जुषस्स्व"[9] इत्यादीनि कौथुमसामवेदार्चिकसंहितायाम् । शौनकीयचतुरद्ध्यायिकायाञ् च— "नाम्म्युपधस्स्य रेफः (स्वरे), घोषवति च, आवऽकरकश् च विवरबिभरसर्वनाम्नः"[10] इत्यादि, "रेफस्स्य रेफे" इति, "रलोपे" इति च[11] । तदुदाहरणानि च– "वार् नाम[12],अन्तर्दावे जुहुत[13] पुनर् मैत्त्विन्द्रियम्[14], प्रातर् भगम्[15]" इत्यादीनि शौनकिनामथर्ववेदसंहितायाम् । पाणिनीयायामपि विसर्गयत्त्वलोपप्रक्क्रियायाम् "भो-भगो-अघो-अपूर्वस्स्य योऽशि"[16] इत्यत्तर "स-सजुषो रुः"[17] इति विहितस्स्य रेफस्स्यैव ग्रहणान् मूलत एव स्स्थितानां रेफाणायँ यत्त्वलँ लोपश् च न भवतः । रेफलोपे तु "रो रि"[18] इत्यत्तर रेफसामान्यस्स्य ग्रहणाद् "प्राता राजक्क्रयः" इत्यादिषु रेफलोपो "द्रलोपे पूर्वस्स्य दीर्घोऽणः"[19] इति दीर्घश् च भवतः ।

अहोरात्त्राणि[20] अहोभिः[21] इत्यत्तर रिफितस्स्यापि विसर्गस्स्य सोपधस्स्य ओत्त्वम् ऋग्वेदप्रातिशाख्ये निपातितम्[22] । शुक्लयजुर्वेदप्रातिशाख्येऽपि "स्वो रुहावहश्च् च रात्त्र्याम्"[23] इति विशेषसूत्त्रेण स्वो रुहाणाः[24] स्वो रोहाव[25] अहोरात्त्रे[26] इत्यादिषु ओत्त्वमन्वाख्यातम् । तैत्तिरीयारण्यकेऽपि— "भूर्ब्भुवस् सुवो भूर्ब्भुवस् सुवो

---

१. ४।३५–३७ । २. ८।६ । ३. ८।५–७, १६–१८ । ४. ८।७–१५ । ५. १।१।४ । ६. १।२।११ । ७. ३।६।६(११६) । ८. ४।३।१० । ९. २१० । १०. २।४२–५०। ११. २।१९, ३।२० । १२. ३।१३।३ । १३. ६।३२।१ । १४. ६।६७।१ । १५. ६।१६।१ । १६. अष्टा. ८।३।७। १७. तत्त्रैव ८।२।६६ । १८. तत्त्रैव ८।३।१४ । १९. तत्त्रैव ६।३।१११ । २०. शा. ऋ. म. सं. १०।१९०।२ । २१. तत्त्रैव १०।१४।९ । २२. ४।४० । २३. ४।४६ । २४. मा.सं. ११।२२। २५. का.सं. १०।४।३। २६. मा.सं.३१।२२।

भूर्ब्भुवस् सुवः"[१] इति स्वस्स्थानीयस्य सुवरित्त्यस्य ओत्त्वम् पट्ठ्यते। तैत्तिरीयप्रातिशाख्ये तु नेदवँ विशेषेण प्रतिपादितन् दृश्यते[२]। ऋक्तन्त्रेऽपि— "हो रा स्वो रु"[३] इति। तदुदाहरणानि तूपलब्ध्यमानसामवेदसंहितासु नोपलब्ध्यन्ते। पाणिनीयव्याकरणेऽपि "अह्नो रुविधौ रूपरात्तिररथन्तरेषूपसङ्ख्यानङ् कर्तव्यम्" इति केचित्, 'सामान्येन रेफादौ रुत्त्वम् भवति" इति चाऽपरे[४] ॥१३४–१३५॥

श्रुतौ क्व चिद् रेफलोपो नित्त्यो वैकल्पिकꣳ क्व चित्।
अनुगम्यꣳ प्रतिपदं रेफ ओभाव एव वा ॥१३६॥

प्रचेता राजन्[५] इत्त्यादौ शाकलऋग्वेदसंहितादिषु नित्त्यो रेफलोपः, शाखान्तरेऽलोपोऽपि क्व चिदित्त्यस्य लोपस्य वैकल्पिकत्त्वमिव; आवर् तमः[६] इत्त्यत्तर ऊधर् न गोनाम्[७] इत्त्यादौ च रेफ एव; अर्धर्चान्ते पृश्निरूधः[८] यदूधः[९] इत्त्यत्तर, समूधो रोमशं हतः[१०] रिहन्त्यूधो अरुषासो अस्स्य[११] शुच्च्यूधो अतृणन् न गवाम्[१२] पृश्निर् यदूधो मही जभार[१३] इत्त्यत्तर, यो अस्स्या ऊधो न वेद[१४] इत्त्यत्तर च विसर्गो वा ओकारो वा यथायथम्; ये अम्नो जाजानान् मारयन्ति[१५] इत्त्यत्तर ओकारः, अपाऽवरद्दरिवो बलम्[१६], व्यावर् देव्व्या मतिम्[१७], आवर् जुष्टम्[१८] इत्त्यादौ रेफः, इति विकल्पाः, भुवो विवस्स्वानन्न्वाततान[१९] इत्त्यादौ ओत्त्वम्, भुवर्लोकः[२०] इत्त्यादौ रेफ एवेत्त्यादिरूपेण व्यवस्थ्या बोद्ध्या।

तत्तर आवर् तमः इति प्रयोग ऋग्वेदप्रातिशाख्ये निपातनेनाऽन्न्वाख्यातः[२१]। अन्न्यविषयेऽपि तत्तर— "अवर् महः, अनर्धर्चान्ते स्वरघोषवत्परमूधः, न रेफेऽरुषासोऽतृणन् मही; वरवरावरिति चैकपादे व्यपपूर्वाण्ण्यसमासाङ्गयोगे"[२२] इत्त्युक्तम्। ऋक्तन्त्रे च— "उभयथा

---

१. ४।४०।१। २. ८।१३ द्र.। ३. ३।७।२(१२२)।
४. पा. व्या. भा. ८।२।६८। ५. शा. ऋ. म. सं. १।२४।१४।
६. तत्त्रैव १।९२।४। ७. तत्त्रैव १।६९।२। ८. तत्त्रैव ६।६६।१।
९. तत्त्रैव १०।७३।९। १०. तत्त्रैव ८।३१।९।
११. तत्त्रैव १।१४६।२। १२. तत्त्रैव ४।१।१९।
१३. तत्त्रैव ७।५६।४। १४. शौ. अ. वे. म. सं. १२।४।१८।
१५. तत्त्रैव ८।६।१९। १६. शा. ऋ. म. सं. १।११।५।
१७. तत्त्रैव ८।९।१६। १८. तत्त्रैव ७।७५।१।
१९. शौ.अ.वे.म.सं. १८।२।३२। २०. शाण्डिल्त्योपनिषदि १।७।५२।
२१. ४।४०। २२. १।९६–९९।

भुवोऽम्नऊधरवः"[1] इति । शौनकीयचतुरद्ध्यायिकायाम् च— "ऊधोऽम्नो भुवसाम्"[2] इति । पाणिनीयव्याकरणे च— "अम्नरूधरवरित्युभयथा छन्दसि"[3] इति । तद्वार्तिके च "छन्दसि भाषायाम् च विभाषा प्रत्येतसो राजन्न्युपसङ्ख्यानम्" इति । "भुवश् च महाव्याहृतेः"[4] इति च सूत्तरमेव ॥१३६॥

(८) रेफजारेफजविसर्गविकाराः

रेफजोऽरेफजो वाऽपि निखिलस्स्वरतः परः ।
विसर्गः के खे परे वा जिह्वामूलीयतावँ व्रजेत् ॥१३७॥
उपद्ध्मानीयताम् पे च फे वा शे वा शकारताम् ।
षे वा षत्वं से च सत्वँ व्यवस्थितत्या श्रुतौ त्विदम् ॥१३८॥
के खे पे फे तथा शे षे सेऽभिनिष्टानवर्णकः ।
प्रकृत्या स्यादिति प्राहुरेके सर्वेऽवसानके ॥१३९॥

उदाहरणानि यथा— पयः कीलालम्[5], दिवः ककुत्[6], ततः खनेम[7], वसोः पवित्तरम्[8], याः फलिनीः[9]; यः कृन्तदिद् वियोन्न्यम्[10], अगस्त्यः खनमानः खनित्त्रैः[11], यः पञ्च चर्षणीरभि[12], याः फलिनीः[13]; उलूकश् शशः[14], षोडशिनष् षोडशित्त्वम्[15], नस् सर्वम्[16]; आशुः शिशानः[17] अदितिः षोडशाक्षरेण[18] देवो वः सविता[19] इत्यादीनि ।

एतद्विषये च ऋग्वेदप्रातिशाख्ये— "अघोषे रेप्फ्यरेफी चोष्माणं स्पर्श उत्तरे, तत्सस्स्थानमनूष्मपरे, तमेवोष्माणमूष्मणि, प्रथमोत्तमवर्गीये स्पर्शे वोष्मणि चाऽऽनते"[20] इति, "अव्व्यापत्तिः कखपफेषु वृत्तिः"[21] इति च । शुक्लयजुर्वेदप्रातिशाख्ये च— "प्रत्त्ययसवर्णम् मुदि शाकटायनः, अविकारं शाकल्यः शषसेषु, प्रकृत्या कखयोः, पफयोश्च् च, जिह्वामूलीयोपद्ध्मानीयौ शाकटायनः"[22] इति । तैत्तिरीयप्रातिशाख्ये च— "अघोषपरस् तस्य सस्स्थानमूष्माणम्, न क्षपरः,

---

१. ३।७।४(१२४)। २. २।५२। ३. अष्टा. ८।२।७०।
४. तत्त्रैव ८।२।७१। ५. मा. सं. २।३४। ६. तत्त्रैव ३।१२।
७. तत्त्रैव ११।२२। ८. तत्त्रैव १।२। ९. तत्त्रैव १२।८९।
१०. शा. ऋ. म. सं. ८।४५।३०। ११. तद्त्रैव १।१७९।६।
१२. तत्त्रैव ७।१५।२। १३. तत्त्रैव १०।९७।१५।
१४. तै.सं. ५।५।१८। १५. तत्त्रैव ६।६।११। १६. तत्त्रैव ४।५।१।
१७. मा. सं. १७।३३। १८. तत्त्रैव ९।३४। १९. तत्त्रैव १।१।
२०. ४।३१–३४। २१. ४।३८। २२. ३।९–१२।

कपवर्गपरश् चाऽग्निवेश्श्यवाल्मीक्क्योः, ऊष्मपर एवैकेषामाचार्याणाम्, न प्लाक्क्षिप्लाक्क्षायणयोः''[१] इति । ऋक्तन्त्रे च— ''ऊष्मा स्थानम्''[२] इति । शौनकीयचतुरध्यायिकायाम् च— ''विसर्जनीयस्स्य परसस्स्थानोऽघोषे''[३] इति । पाणिनीयव्याकरणे च– ''वा शरि, कुप्वोऽकऽपौ च''[४] इति । **तत्र ऋग्वेदे शौनककृतऋग्वेदप्रातिशाख्यसम्बद्धायां शाखायाङ्ग कखपफेषु परेषु विसर्गस्स्याऽविकार एव, शषसेषु परेषु शषसभाव एव भवति । शुक्लयजुर्वेदेऽपि** माध्यन्दिनीयशाखायाङ्ग कखपफेषु शषसेषु चाऽविकार एव; **काण्वशाखायान् तु** कखयोऽ पफयोश् च जिह्वामूलीयोपध्मानीयावेव, शषसेषु त्वविकार एव; **तैत्तिरीय**चरणान्तर्गतायामात्रेयशाखायान् तु कखयोऽ क्पभिन्नयोऽ परयोर् जिह्वामूलीय एव, पफयोरुपध्मानीय एव, शषसेषु च शषसभाव एव; **सामवेदेऽथर्ववेदे च** प्राय आत्रेयतैत्तिरीयशाखावदेव व्यवस्थेति **श्श्रुतिषु एतद्विषये व्यवस्था नियतशाखाविषयतया व्यवस्थितत्या वेदितव्या । एताश् च व्यवस्थास् सर्ववेदपारिषदत्वेनाऽभिमतस्य पाणिनीयव्याकरणस्य व्याख्याने प्रवृत्तैऽ प्रदर्शनीया अपि सर्वैरुपेक्षिता इति वयन् तद्व्याख्यानेऽपि एता व्यवस्थाऽ प्रदर्शयिष्यामः । लोके तु इच्छाविकल्पा एवैते वेदितव्याः ।।१३७–१३९।।**

निष्कृत्यादौ विसर्गष् षो वाचस्पत्यादिके तु सः ।
स्यादघोषेष्ववविकृतश् श–ष–सोत्तरकेषु तु ।।१४०।।

तदुक्तमृग्वेदप्रातिशाख्ये— ''यथादिष्टन् नामिपूर्वष् षकारं सकारमन्न्योऽरिफितः ककारे । पकारे च प्प्रत्त्ययेऽन्तऽपदन् तु सर्वत्तरैवोपाचरितस् स सन्धिः । अन्तऽपादवँ् विग्ग्रहेऽकारपूर्वऽ पतिशब्दे द्व्यक्क्षरे पुंस्प्रवादे''[५] इत्यादि । शुक्लयजुर्वेदप्रातिशाख्येऽपि— ''ककारपकारयोः सकारम्, भाव्युपधः षकारम्, आविर्न्निरिड इडाया वसतिर्व्वरिवः, दिवोऽककुत्पृथिव्योः''[६] इत्यादि । तैत्तिरीयप्रातिशाख्येऽपि— ''कखपकारपरष् षमकारपूर्वस् समवग्ग्रहः, आविर्निरिडश्शश्श्वतोपसोदेवरिषोऽंहसोऽतिदिवोविश्श्वतोऽश्मनस्तमसः''[७] इत्यादि । ऋक्तन्त्रेऽपि— ''सप्रकृतिर् मासे सङ्ग कृकमोः, यश् चातिशये, अङ्गे च कम्प्यादौ''[८] इत्यादि । शौनकीयचतुरध्यायिकायाम् च— ''समासे सकारऽ

---

१. ९।२–६ । २. ४।४।७ (१७७) । ३. २।४० ।
४. अष्टा. ८।३।३६, ३७ । ५. ४।४१–६४ । ६. ३।२१–३६ ।
७. ८ २३–३१ । ८. ३।७।५–४।१।१० ।

कपयोरनन्तस् सद्द्यश्श्रेयश्छन्दसाम्, निर्दुराविर्हविरसमासेऽपि"[1] इत्यादि। पाणिनीयव्याकरणेऽपि— "सोऽपदादौ, इणष् षः, इदुदुपधस्य चाऽप्रत्ययस्य" इत्यादि[2]।

श-ष-सोत्तरकेषु अघोषेष्वविकृतेर् विषये च वचनानि यथा— "अघोषे रेप्फ्यरेफी चोष्माणं स्पर्श उत्तरे; तत्सस्स्थानमनूष्मपरे"[3] इति ऋग्वेदप्रातिशाख्ये। तैत्तिरीयप्रातिशाख्ये च— "न क्षपरः"[4] इति। ऋक्तन्त्रे च— "नोष्मपरे"[5] इति। पाणिनीयव्याकरणे च— "शर्परे विसर्जनीयः"[6] इति। एतद्विषये उदाहरणानि च— अद्ध्यापकः क्शाति, घनाघनः क्षोभणः[7], शतक्क्रतुः त्सरद्गन्धर्वम्[8], व्यञ्जनैः प्साति इत्यादीनि बोद्ध्यानि ॥१४०॥

तिरस्करोत्यादिकेषु द्विष्करोत्यादिकेषु च।
धनुष्करोत्यादिकेषु सष् षो वा स्याद् विसर्गकः ॥१४१॥

एतद्विषये च— "करङ्क कृतङ्क कृधि करत् करित्यपि परेषु"[9] इत्यादि ऋग्वेदप्रातिशाख्ये; शुक्लयजुर्वेदप्रातिशाख्ये च— "अद्ध्वनस् क्कुर्व्विति च"[10] इत्यादि; शौनकीयचतुरद्ध्यायिकायाञ् च— "निर्दुराविर्हविरसमासेऽपि, तिरः, कुरु-करङ्क-करत्-कृणोतु-कृति-कृधिष्ष्वकर्णयोः"[11] इत्यादि। पाणिनीयव्याकरणेऽपि "तिरसोऽन्यतरस्याम्, द्विस्त्रिश्चतुरिति कृत्वोऽर्थे"[12] इत्यादि ॥१४१॥

अहरादेर् विसर्गस्य पत्त्यादिषु परेषु च।
विकल्पेन हि रेफस् स्याद् वेदेषु तु व्यवस्थया ॥१४२॥

एतद्विषये च वचनानि यथा— "रेफं स्वर्धूऽपूरघोषेष्ष्वविग्ग्रहे"[13] इत्यादि ऋग्वेदप्रातिशाख्ये; शुक्लयजुर्वेदप्रातिशाख्ये च— "अहः पतौ रेफम्, परश्च् च मूर्द्धन्न्यम्, स्वर्द्धूः सांसहयोः"[14] इति; पाणिनीयव्याकरणे च— "अहरादीनाम् पत्त्यादिषूपसङ्ख्यानङ् कर्तव्यम्"[15] इति भाष्ये पट्ठ्यते ॥१४२॥

---

१. २।६२–८१। २. अष्टा. ८।३।३८–५४। ३. ४।३१। ४. ९।३। ५. ४।२।१। ६. अष्टा. ८।३।३५। ७. तै. सं. ४।६।४।१। ८. शा. ऋ. म. सं. ८।१।११। ९. ४।४३। १०. ३।२९। ११. २।६३–८०। १२. अष्टा. ८।३।४०–५४। १३. ४।३९। १४. ३।३९–४१। १५. ८।२।७०।

विसर्गश् शषसेषु स्स्याल् लुप्तोऽघोषपरेषु वा ।
सयँ युक्तमात्तरेष्ष्वपि वा तेष्ष्वेवं स्यात् क्व चित् पुनः ।।१४३।।

एतद्विषये च वचनानि यथा— "उष्मणण्यघोषोदये लुप्यते परे नतेऽपि"[१] इति ऋग्वेदप्रातिशाक्ख्ये; शुक्लयजुर्वेदप्रातिशाक्ख्ये च— "लुङ ङमुदि जित्परे"[२] इति; तैत्तिरीयप्रातिशाक्ख्ये च— "ऊष्मपरोऽघोषपरे लुप्यते काण्डमायनस्स्य"[३] इति; पाणिनीयव्याकरणे च— "वा शर्प्परकरणे खर्परे लोपो वक्तव्यः"[४] इति वार्तिकम् पठ्यते । तत्तर तैत्तिरीयप्रातिशाक्ख्यवचनव्याक्ख्याने त्रिभाष्यरत्नकारऽ काण्डमायनमते अघोषपरकेष्ष्वेव लोपोऽन्न्येषाम् मते तु अघोषपरकेषु घोषवत्परकेषु च शषसेषु लोप इति प्प्रतिपादितवान् । किन् तु वैदिकाभरणकार इदवँ व्याक्ख्यानम् अस्स्वीकुर्वाणऽ खलु "अद्भ्य स्वाहा"[५] "शुक्क्ला स्युः"[६] इत्त्यादिकम् पाठन् नाऽनुमन्न्यते । ऋग्वेदप्रातिशाक्ख्ये[७] शुक्लयजुर्वेदप्रातिशाक्ख्ये[८] पाणिनीयव्याकरणवार्तिके[९] च अघोषपरकेष्ष्वेव शषसेषु लोपस्स्योल्लिखितत्त्वाद् वैदिकाभरणकारस्स्य भणितिर् युक्ततरा प्रतीयते । तथापि तैत्तिरीयैऽ परमप्प्रमाणतया स्वीकृतायावँ व्यासशिक्क्षायामपि "लुप्यते सयँ युतोष्मोर्ध्वः"[१०] इत्त्युक्तम्; तद्व्याक्ख्याने वेदतैजसकारेणाऽपि "सयँ युतश् चासावूष्मा च सयँ युतोष्मा, स ऊर्ध्वो यस्मात् स विसर्गो लुप्यते । यथा 'तिस्स्र श्यामाः' 'ये शुक्ला स्युः' 'ऊर्ज्जस्वती स्वधाविनीः' 'हरी स्थ हर्योर् धानाः' 'चतुस्तनाङ करोति' 'आयुष्टोमन् तृतीयम्' 'अग्नेस्तोमम् मनामहे' ।" इत्त्युक्तम्; तत्तर न च सर्वलक्क्षणमञ्जरीकारेण न वाऽन्न्यैस् सम्पादकैऽ किञ् चिदुक्तमिति उपलब्भ्यमानात्तरेयतैत्तिरीयशाखापाठे घोषवत्परकेष्ष्वपि शषसेषु परेषु विसर्गस्स्य लोप एव भवतीत्त्यनुमीयते । **एवञ् च सति यथाऽन्न्येषान् तत्तच्छाखानियतानावँ विकल्पानाम् पाणिनीयेन व्याकरणेन लोकेऽपि प्प्रयोगोऽनुमन्न्यते, स्वस्स्वशाखावेदप्प्रयोगवासनावासितानृतऽकरणानां शिष्टानां स्वस्स्ववेदानुकूलप्प्रयोगाणान् निवारयितुमशक्क्यत्त्वादनुचितत्त्वाच् च; तथैव एतस्स्य विकल्पस्स्याऽपि लोकेऽप्प्यनुमन्तव्व्यत्त्वमेव, तुल्ल्यन्न्यायत्त्वादिति प्प्रतिभाति । एवञ् च सति ब्राह्मणा स्नान्ति, विभान्ति मेघा स्नुषु**

---

१. ४।३६ । २. ३।१३ । ३. ९।१ ।
४. पा. व्या. भा. ८।३।३६ । ५. तै. सं. १।८।१३ ।
६. तत्तरैव २।३।१ । ७. ४।३६ । ८. ३।१३ ।
९. पा. व्या. भा. ८।३।३६ । १०. सू. २१५ ।

पर्वतानाम्, बालका स्मयन्ते, शवा श्मशाने शेरते, निपाता स्युऽ पदेपदे, बालक श्यामवर्णोऽयम्, सर्वा स्रस्तास् ततो मालाः, विषया वर्णिता श्रुतौ, बन्ध श्लथो नैव कार्यः, स्तम्भा श्लिष्टा परस्परम्, सर्वेऽपि बालका स्वस्थाः, सर्वे स्युऽ षष्ठका श्वेताः, दुष्वप्ननाशिनी धन्न्या इत्त्यादयोऽपि प्प्रयोगास् स्युः । एतदर्थञ् च पाणिनीयव्याकरणेऽपि वचनान्तरमारम्भणीयम् प्रतिभाति ।।१४३।।

रेफजोऽरेफजो वाऽपि विसर्गश् चछयोस् तु शः ।
नित्त्यं स्यात् षस् तु टठयोस् तथयोऽ खलु सस् तथा ।।१४४।।

तदुक्तमृग्वेदप्रातिशाख्ये— "अघोषे रेप्फ्यरेफी चोष्माणं स्पर्श उत्तरे । तत्सस्स्थानमनूष्मपरे"[1] इति; शुक्लयजुर्वेदप्रातिशाख्ये च— "विसर्ज्जनीयः, चछयोः शम्, तथयोः सम्"[2] इति; तैत्तिरीयप्रातिशाख्ये च— "अघोषपरस् तस्स्य सस्स्थानमूष्माणम्"[3] इति; शौनकीयचतुरद्ध्यायिकायाम् च— "विसर्जनीयस्स्य परसस्स्थानोऽघोषे"[4] इति; ऋक्तन्त्रे च— "ऊष्मा स्थानम्"[5] इति; पाणिनीयव्याकरणे च— "विसर्जनीयस्स्य सः"[6] इति ।।१४४।।

विसर्गस् त्वाऽऽकारपूर्वो घोषवद्व्यञ्जने परे ।
सर्वत्तर लुप्प्यते वेदे लोके चाऽप्प्यविशेषतः ।।१४५।।

उदाहरणानि यथा– पुनाना यन्त्यनिविशमानाः[7], अयक्ष्मा मा[8], शततेजा वायुः[9] इत्त्यादीनि । उक्तञ् च ऋग्वेदप्रातिशाख्ये— "विसर्जनीय आकारमरेफी घोषवत्परः"[10] इति । शुक्लयजुर्वेदप्रातिशाख्ये च– 'लोपन् धौ"[11] इति । तैत्तिरीयप्रातिशाख्ये च— "अवर्णपूर्वस् तु लुप्प्यते"[12] इति । ऋक्तन्त्रे च— "अस्थाद् यम्"[13] इति; "यः (व्यञ्जने)"[14] इति च । शौनकीयचतुरद्ध्यायिकायाम् च— "(घोषवति) आकारोपधस्स्य लोपः"[15] इति । पाणिनीयव्याकरणे च— "भो-भगो-अघो-अपूर्वस्स्य योऽशि, व्योर् लघुप्रयत्नतरश् शाकटायनस्स्य, लोपश् शाकल्यस्स्य, ओतो गार्ग्यस्स्य, (अशि) हलि सर्वेषाम्"[16] इति ।।१४५।।

---

१. ४।३१ । २. ३।७, ८ । ३. ९।२ । ४. २।४०। ५. ४।४।७ । ६. अष्टा. ८।३।३४ । ७. शा. ऋ. म. सं. ७।४९।१ । ८. मा. वा. शु. य. वे. म. सं. १।१ । ९. तत्तरैव १।२४ । १०. ४।२४ । ११. ४।२९ । १२. ९।९ । १३. ३।६।७(११७)। १४. ४।२।८(१५८) । १५. २।५५ । १६. अष्टा. ८।३।१७–२१।

रेफजोऽरेफजो वापीकारादिस्स्वरतः परः ।
विसर्गस् तु भवेद् रेफो घोषवद्व्यञ्जने परे ॥१४६॥
रेफे परे त्त्वयं रेफो लुप्तस् स्यादिति निश्चितम् ।
तदा तस्स्योपधाऽदीर्घा दीर्घत्त्वञ् च प्रपद्द्यते ॥१४७॥

उदाहरणानि यथा– यज्ञँ अपतिर् ह्वार्षीत्[1], अदितिर्व्वेत्तु[2], बह्व्वीर् य्यजमानस्स्य[3], सवितुर् व्वः[4], "मयोभूर् व्वातः"[5] "मा भेर् म्मा सवँ विक्क्थाः"[6], "घृतैर् ब्बोधयताऽतिथिम्"[7] "अश्श्विनोर् ब्बाहुब्भ्याम्"[8] "द्यौर् ब्बधान"[9], "अग्नी रक्क्षांसि सेधति"[10], "मतिभी रिहन्ति"[11], "रेवती रमद्ध्वम्"[12], "रुरू रौद्द्रः"[13], अग्ने रूपम्, असुरै रुद्धम्, "युवो रजांसि सुयमासो अश्वा रथः"[14], गौ रम्भते इत्त्यादीनि ।

एतद्विषये वचनानि च ऋग्वेदप्रातिशाख्ये– "ऊष्मा रेफी पञ्चमो नामिपूर्वः"[15] इति, "सर्वोपधस् तु स्स्वरघोषवत्परो रेफं रेफी ते पुना रेफसन्धयः"[16] इति च । शुक्लयजुर्वेदप्रातिशाख्ये च– "विसर्ज्जनीयो रिफितः"[17] इत्त्यादि; "भाव्भ्युपधश्च् च रिद्द्विसर्ज्जनीयः, रेफे लुप्प्यते दीर्घ्घञ् चोपधा, रेफं स्वरधौ"[18] इति । तैत्तिरीयप्रातिशाख्ये च– "अथ विसर्ज्जनीयः, रेफमेतेषु (स्वरघोषवत्सु)"[19] इति, "अनवर्णपूर्वस् तु रेफपरो लुप्प्यते दीर्घञ् च पूर्वः"[20] इति च । ऋक्तन्त्रे च— "रं विसर्जनीयो घोषे"[21] इति, "रः"[22] इति च । अत्त्र दीर्घविधिस् तु सूत्त्रे नोक्तो वृत्तिकारेणैव प्रतिपादितः । शौनकीयचतुरद्ध्यायिकायाञ् च— "नाम्भ्युपधस्स्य रेफः (स्वरे), घोषवति च"[23] इति, "रेफस्स्य रेफे"[24] इति, "रलोपे"[25] इति च । पाणिनीयव्याकरणे च– "स-सजुषो रुः"[26]

---

१. मा. वा. शु. य. वे. म. सं. १।२ । २. तत्त्रैव १।१४ ।
३. तत्त्रैव १।१ । ४. तत्त्रैव १।१२ । ५. तै. स. ७।४।१७।
६. मा. वा. शु. य. वे. म. सं. १।२३ । ७. तत्त्रैव ३।१ ।
८. तत्त्रैव १।१० । ९. तत्त्रैव १।२६ ।
१०. शा.ऋ.म.सं. ७।१५।१० । ११. मा.वा.शु.य.वे.म.सं. ७।१६ ।
१२. तत्त्रैव ३।२१ । १३. तत्त्रैव २४।३९ । १४. शा. ऋ. म. सं. १।१८०।१ । १५. १।७६ । १६. ४।२७ ।
१७. १।१६०–१६८ । १८. ४।३५–३७ । १९. ८।५, ६ ।
२०. ८।१६, १७ । २१. ३।६।५ । २२. ४।३।१० ।
२३. २।४२, ४३ । २४. २।१९ । २५. ३।२० ।
२६. अष्टा. ८।२।६६ ।

इति, "रो रि"[1] इति, "ढ्रलोपे पूर्वस्य दीर्घोऽणः"[2] इति च प्प्रोक्तम् ॥१४६-१४७॥

एष स स्स्य इतीह स्स्याद् विसर्गो व्यञ्जने परे ।

अघोषे घोषवति वा विलुप्तो वेदलोकयोः ॥१४८॥

तदुक्तमृग्वेदप्रातिशाख्ये— "अथेतरेषु, ऊष्मा परिलुप्यते त्रयाणां स्वरवर्जम्"[3] इति । शुक्लयजुर्वेदप्रातिशाख्ये च— "स ओषधीमयोः, व्यञ्जने च, स्य एष च"[4] इति । तैत्तिरीयप्रातिशाख्ये च— "एष स स्स्य इति च, नाऽसः"[5] इति । ऋक्तन्त्रे च— "(लु)बुदेष स स्स्य व्यञ्जने, नाऽन्पूर्वः"[6] इति । शौनकीयचतुरद्ध्यायिकायाम् च— "एष स व्यञ्जने, न सस् पदीष्ट"[7] इति । पाणिनीयव्याकरणे च— "एतत्तदोस् सुलोपोऽकोरनञ्समासे हलि, स्यश् छन्दसि बहुलम्"[8] इति ॥१४८॥

एषआदिविसर्गस्स्याऽन्न्ये विकारा अपि श्श्रुतौ ।

क्वचित्क्वचिद् धि श्श्रूयन्तेऽनुगम्स्यास् ते यथागमम् ॥१४९॥

तथाहि ऋग्वेदप्रातिशाख्ये— "सस् पदीष्ट"[9] इति, "सो चिन्न्वगस्त्ये दशमे च मण्डले, सा न्वीयते, सः पलिक्नीः, हि षस् तव"[10] इति च । शुक्लयजुर्वेदप्रातिशाख्ये च-- "एषो ह च"[11] इति । शौनकीयचतुरद्ध्यायिकायाम् च— "न सस् पदीष्ट"[12] इति ॥१४९॥

अघो-भगो-भो-पूर्वस् तु विसर्गो लुप्यते सदा ।

घोषवत्सु व्व्यञ्जनेषु अघोषेष्वपि च क्क्व चित् ॥१५०॥

एतद्विषयस् तु विधिर् विशेषेण प्रातिशाख्येषु नोल्लिखितः । "अस्मच्छाखादौ तथाविधविषयाभावात्"[13] इत्युक्त्वा वैदिकाभरणकारेणाऽपि प्रातिशाख्येष्वेतद्विधिविचारस्स्याऽभावस् सूचितः । गोपथब्राह्मणे— "अधीहि भोः कः सविता"[14] "अधीहि भोः सावित्त्रीम्"[15] इत्यत्तर भोपूर्वस्य विसर्गस्स्याऽघोषे व्यञ्जने परेऽलोपेऽपि "एवमेवैतद् भो भगवन्"[16] "एवमेवैतद् भो यथा भवानाह"[17] इत्यत्तर घोषवति व्यञ्जने परे लोपो दृश्यते । माध्यन्दिनीयवाजसनेयिशतपथब्राह्मणेऽपि "सह-

---

१. अष्टा. ८।३।३४ । २. तत्तरैव ६।३।१११ ।
३. २।११ । ४. ३।१५-१७ । ५. ५।१५, १६ ।
६. ४।२।६,७। ७. २।५७,५८। ८. अष्टा. ६।१।१३२, १३३ ।
९. ४।५८। १०. ४।९४-९७। ११. ४।४५। १२. २।५८।
१३. तै. प्रा. ९।९ । १४. १।१।३२ । १५. १।१।३१ ।
१६. १।३।१४ । १७. १।३।१३ ।

स्स्रम् भो याज्ञ्ञ्वल्क्क्य दद्दँ म:''[1] इत्त्यत्त्र घोषवति व्यञ्जने परे लोप:, ''भीष्म्मम् बत भो: पुरुषान् न्वा एतत् त्पुरुषा:''[2] इत्त्यत्त्राऽघोषे व्यञ्जने परेऽलोपो दृश्श्यते। तत्त्र भगोपूर्वस्स्य विसर्गस्स्याऽपि ''यन् नु म इयम् भगो: सर्व्वा पृथिवी''[3] इत्त्यत्त्राऽघोषे व्यञ्जने परेऽलोपो दृश्श्यते। ''भो सर्प भद्द्र भद्द्रन् ते दूरङ्ग गच्छ महायशा:। जनमेजयस्स्य यज्ज्ञान्ते आस्तीकवचनं स्मर''[4] इति ऋग्वेदखिलेषु केषु चित् पुस्तकेषु प्राप्प्यमाणे श्लोके तु अघोषे व्यञ्जने परेऽपि विसर्गलोपो दृश्श्यते। अत्त्र विद्द्वद्भिर् भृशवँ विचारणीयम् भाति। एतद्विधिविषये पाणिनीयव्याकरणेऽपि ''भो-भगो-अघो-अपूर्वस्स्य योऽशि, व्योर् लघुप्रयत्नतरश् शाकटायनस्स्य, लोपश् शाकल्ल्यस्स्य, ओतो गार्ग्यस्स्य, उञि च पदे, हञि सर्वेषाम्''[5] इति प्प्रोक्तम् ॥१५०॥

(ख) व्यञ्जनोपजनप्प्रधानव्यञ्जनसंहितानिरूपणम्

शषसेषु ङात् परेषु मद्ध्ये क उपजायते।
प्रायस् सर्वेषु वेदेषु भाषायान् तु विभाषया ॥१५१॥

लोके खलु इच्छाविकल्पेन ककारागमः खकारागमो वा भवति, नैव वा ककारागमः खकारागमो वा। वेदेषु तु कस्स्याञ् चिच् छाखायान् नित्त्यङ्ग ककारागमः, कस्स्याञ् चिन् नित्त्यङ्ग खकारागमः, कस्स्याञ् चित् तु नैवाऽऽगमस् स्यात्। तत्त्र ऋग्वेदप्रातिशाक्ख्ये— ''ङकारेऽघोषोष्मपरेऽन्तरैके ककारम्''[6] इत्त्युक्तम्; तदुदाहरणतया च— 'अर्वाङ्ग क्छश्श्वत्तमम्[7], प्रत्त्यङ्ग क्स विश्श्वा भुवना[8]' इत्त्यादि प्प्रदर्शितवँ व्याक्ख्यात्त्रा। शुक्लयजुर्वेदप्रातिशाक्ख्ये तु— ''ङनौ क्क्ताब्भ्यां सकारे, न दाल्ब्भ्यस्स्य''[9] इत्त्युक्तम्। तदुदाहरणे च 'प्राङ्ग क्सोम:'[10] इत्त्यादि प्प्रदर्शितवँ व्याक्ख्यात्त्रा। तैत्तिरीयप्रातिशाक्ख्येऽपि— ''ङपूर्वक ककारस् सषकारपर:''[11] इत्त्युक्तम्, तदुदाहरणानि च 'प्रत्त्यङ्ग क्सोम:[12], सदृङ्ग क्समानै:[13], प्रत्त्यङ्ग क्षडह:[14]' इत्त्यादीनि प्प्रदर्शितानि टीकाकारैः। अर्वाङ्ग सुवर् न ज्योति:[15] इत्त्यत्त्र तु ङकारसकारयोर् मद्ध्ये कण्डिकाया

---

१. ११।४।३।२०। २. ११।६।१।३–६। ३. १४।५।४।२; १४।७।३।३। ४. २।१।५। ५. अष्टा. ८।३।१७–२२। ६. ४।१६। ७. शा.ऋ.म.सं. ३।३५।६। ८. तत्त्रैव ९।८०।३। ९. ४।१५, १६। १०. मा. सं. १९।३। ११. ५।३२। १२. तै. सं. १।८।२१। १३. तत्त्रैव २।२।८।६। १४. तत्त्रैव ७।४।२।५। १५. तत्त्रैव ४।४।४।७, ८।

विभजनान् न संहितेति प्रतीयते। ऋक्तन्त्रे च— "अनत्यात् प्रथमोऽघोषे"[1] इति। तत्र वृत्तिकारेण तु लौकिकान्न्येवोदाहरणानि प्रदर्शितानि प्रतीयन्ते। शौनकीयचतुरद्ध्यायिकायाञ् च— "ङणनेब्भ्यः कटतैश् शषसेषु"[2] इति। किन् तु "प्रत्त्यङ समाहितः[3], प्रत्त्यङ सोमः[4], प्रत्त्यङ सूर्यम्[5], प्रत्त्यङ स्वधया[6], अर्वाङ सुवर्णैः[7]" इत्यादिषु शौनकिनामथर्ववेदसंहितायाङ ककारागमो नोपलब्ध्यते मुद्द्रितग्रन्थेषु। सम्पादकानान् दोषो वाऽयवँ वस्तुस्स्थितिरेव तादृशीति शौनकिभिरभियुक्तैर् विमृश्यम्। पाणिनीयव्याकरणेऽपि वेत्यनुवृत्तौ "ङणोः कुक् टुक् शरि"[8] इत्युक्तम्। एवञ् च ऋग्वेदे शुक्लयजुर्वेदे कृष्णयजुर्वेदे अथर्ववेदे च प्रातिशाख्यवचनेब्भ्यः ककारोपजनोऽयन् नित्त्यः प्रतीयते। ऋग्वेदप्रातिशाख्यवचनाच् शुक्लयजुर्वेदप्रातिशाख्यवचनाच् च कासु चिद् वेदशाखासु नाऽयङ ककारोपजन इति प्रतीयते। अतः 'प्रायस् सर्वेषु वेदेषु' इत्युक्तम्। भाषायावँ विकल्पेन ककारोपजनो भवतीति तु पाणिनीयव्याकरणादवसेयम् ॥१५१॥

नञ् चकारोऽनुगच्छेद् वा शकारे तालुजे परे।
दन्त्ये से तश् श्रुतौ नित्त्यम् भाषायान् तु विभाषया ॥१५२॥

उदाहरणानि यथा— घनेव वज्ज्रिञ्च् छ्नथिहि[9], अस्माञ्च् छत्त्रूयतीमभि[10], त्वन् तान् त्सञ् च प्रति चासि मन्मना[11], त्रीन् त्समुद्द्रान्[12], विद्द्वान् त्सोमेन यजते[13], महान् त्समुद्द्रः[14], हरिवान् त्सुतानाम्[15], तान् त्सत्त्यौजाः[16] इति वेदेषु उदाहरणानि। लौकिके प्रयोगे तु भवाञ् च्शेते, भवाञ् शेते; भवान् त्सायाह्न्ने विहरति, भवान् सायाह्न्ने विहरति इत्यादीनि उदाहरणानि बोद्ध्यानि। एतद्विषये वचनानि च— "अकारे शकारपरे चकारम्"[17] इति, "टकारनकारयोस् तु आहुस् सकारोदययोस् तकारम्"[18] इति च ऋग्वेदप्रातिशाख्ये। शुक्लयजुर्वेद-

---

१. ४।५।२। २. २।९। ३. ४।११।८।
४. ६।५१।१। ५. १३।१।५६। ६. १३।२।३।
७. १३।३।१६। ८. अष्टा. ८।३।२८। ९. शा.ऋ.म.सं. १।६३।५।
१०. शौ. अ. वे. म. सं. ३।१।३। ११. शा. ऋ. म. सं. २।१।१५।
१२. मा. सं. १३।३१। १३. तै. सं. ३।२।२।३।
१४. कौ. सा. आ. सं. ४२९। १५. तत्त्रैव २२६।
१६. शौ.अ.वे.म.सं. ४।३६।१। १७. ४।१८। १८. ४।१७।

प्रातिशाख्ये तु चकारागमो न प्रतिपादितः, "ङनौ क्ताभ्यां सकारे"[१] इत्येवोक्तम्। तैत्तिरीयप्रातिशाख्येऽपि चकारागमोऽयन् नैव प्रतिपादितः, तकारागमस् तु "टनकारपूर्वश् च तकारः"[२] इति प्रतिपादितः। ऋक्तन्त्रे च— "अनत्यात् प्रथमोऽघोषे, नात् सि"[३] इति उक्तम्। शौनकीयचतुरध्यायिकायाम् च— "ङणनेभ्यः कटतैश् शषसेषु"[४] इति कटताऽऽगमाः प्रतिपादिताः, शकारे परे तकारस्य चकारताप्राप्तिर् भवतीति चकारागमोऽपि तत्र प्रतिपादितो मन्तव्यः। पाणिनीयव्याकरणे च— "शि तुक्"[५] इति, "नश् च"[६] इति च। तत्र चकाराऽऽगमश् शुक्लयजुर्वेदप्रातिशाख्ये तैत्तिरीयप्रातिशाख्ये च न प्रतिपादित इति तस्य ऋग्वेदादौ नित्यं सत्ता शुक्लयजुर्वेदादौ च नित्यमभाव इति वेदे तस्य व्यवस्थितो विकल्पोऽवसेयः; तकारागमस् तु सर्ववेदशाखासु नित्यो विज्ञायते; पाणिनीयव्याकरणप्रामाण्यात् तु तस्य लौकिके प्रयोगे इच्छाविकल्पविषयत्वमवसीयते। यद्द्यपि शौनकीयचतुरध्यायिकाया "ङणनेभ्यः कटतैश् शषसेषु"[७] इति वचनात् पदान्तस्थान् नकारान् मूर्धन्न्ये षकारे परेऽपि तकारागमो भवतीति प्रतीयते; "षडाहुश् शीतान् षडु मास उष्णान्"[८] इत्यादिषु शौनकिनामथर्ववेदमन्त्रसंहितायान् तत्सम्भावनास्थलानि अपि प्रापप्यन्ते; तथाऽपि अन्न्येषु प्रातिशाख्येषु एतादृशविधेरनुपलब्ध्यमानत्वात्, पाणिनिनाऽपि "ङणोः कुक् टुक् शरि, डः सि धुट्, नश् च, शि तुक्"[९] इत्यत्रैतस्य विधेरनुल्लिखितत्वाद्, वार्तिककार-भाष्यकारादिभिरप्यत्रोक्तस्य विधेरपूरणान् नाऽयवँ विधिरास्थेय इति प्रतीयते। अत्र च शौनकिभिराथर्वणिकैरभियुक्ततमैर् निर्णयः कार्यः ॥१५२॥

पदान्तगाट् टकारात् तु सकारादौ पदे परे।
तयोर् मध्ये विकल्पेन तकार उपजायते ॥१५३॥

तदुक्तमृग्वेदप्रातिशाख्ये— "टकारनकारयोस् तु आहुस् सकारोदययोस् तकारम्"[१०] इति। तदुदाहरणम् 'अप्राट् त्स प्रैति'[११] इत्युक्तमुव्वटेन। शाकलऋग्वेदसंहितायान् तु तत्र तकारागमो मुद्रितपुस्तकेषु न दृश्यते। शुक्लयजुर्वेदप्रातिशाख्ये नाऽयमागमोऽन्न्वाख्यायते।

---

१. ४।१५। २. ५।३३। ३. ४।५।२,३। ४. २।९।
५. अष्टा. ८।३।३१। ६. तत्रैव ८।३।३०। ७. २।९।
८. ८।९।१७, १३।१।४, १३।३।६। ९. अष्टा. ८।३।२८–३१।
१०. ४।१७। ११. शा. ऋ. म. सं. १०।३२।७।

तैत्तिरीयप्रातिशाख्ये च— "ट-न-पूर्वश् च तकारः"[1] इत्युक्तम्। तदुदाहरणञ् च— "वषट् त्स्वाहा"[2] इति। ऋक्तन्त्रे च— "टान्तमेके (प्रकृत्या नैगिः)"[3] इति प्रोक्तम्। तदुदाहरणानि च 'षट् त्सा भोजयति, षट्त्स्वितम्, षट्त्स्वितिकायनः' इति तद्वृत्तिकारेण प्रदर्शितानि। शौनकीयचतुरद्ध्यायिकायाञ् च— "टकारात् सकारे तकारेण"[4] इति। तदुदाहरणानि च— "विराट् त्स्वराजम्[5], पृतना षाट् त्सुवीरः[6], त्रिंशताष् षट् त्सहस्राः[7]" इति तद्वृत्तिकारेणोक्तानि। पाणिनीयव्याकरणेऽपि— "डस् सि धुट्"[8] इति प्रोक्तम्। तदुदाहरणे च भाष्ये श्वलिट् त्साये, मधुलिट् त्साये इत्येवोल्लिखिते। जयादित्येन पुरुषोत्तमदेवेन च ते एवोल्लिखिते। "श्वलिट् ष्ठीव्यति मधुलिट् ष्वष्कते, ष्टुत्वस्याऽसिद्धत्वाद् डस् सि धुड् इति धुट् प्रसज्ज्येत"[9] इत्यपि पाणिनीयव्याकरणभाष्ये प्रोक्तम्। अतोऽयन् तकारोपजनो नैकपदमद्ध्ये भवतीति विज्ज्ञायते। न च प्रक्क्रियाकौमुद्द्यादिषु "लिट्त्सु" इत्यादिकानि रूपाणि व्युत्पादितानि। **अतो लिट्सु इत्यादिषु एकपदमद्ध्ये तकारागमम् प्रदर्शयन् भट्टोजिस् तत् समर्थयमाना नागोजिप्रभृतयश् चाऽवधीरणीया एव।** ते खलु ऋक्तन्त्रवृत्तेर् भ्रष्टेन पाठेन व्यामोहिताः प्रतीयन्ते ॥१५३॥

पदान्तस्स्थाण् णकारात् तु शषसेषु परेषु हि।
वेदे कस्मिंश् चिद् धि लोकेऽपि वा ट उपजायते॥१५४॥

अयवँ विधिर् ऋग्वेदप्रातिशाख्ये नोल्लिखितः, शुक्लयजुर्वेदप्रातिशाख्येऽपि नैवोल्लिखितः, तैत्तिरीयप्रातिशाख्येऽपि नैव प्रतिपादितः। ऋक्तन्त्रे तु— "अन्त्यात् प्रथमोऽघोषे"[10] इत्ययवँ विधिः प्रोक्तः। वृत्तिपाठब्भ्रंशात् तदुदाहरणानि त्त्वस्स्फुटानि। शौनकीयचतुरद्ध्यायिकायाञ् च— "ङणनेब्भ्यः कटतैश् शषसेषु"[11] इति प्रोक्तम्। तत्त्रोदाहरणानि तु वृत्तिकृता गण् ट्शेते, गण् ट्षण्डे, गण् ट्साये इति लौकिकान्न्येव प्रदर्शितानि, नाऽथर्ववेदादुद्धृतानि। पाणिनीये व्याकरणे च— "ङणोः कुक् टुक् शरि"[12] इति वेत्त्यनुवर्तमाने प्रोक्तम्। तदु-

---

१. ५।३३। २. तै. सं. ७।३।१२।९। ३. ४।५।४।
४. २।८। ५. शौ.अ.वे.म.सं. ८।९।९। ६. तत्त्रैव ११।१।२।
७. तत्त्रैव ११।५।२। ८. अष्टा. ८।३।२९।
९. ६।१।६४। १०. ४।५।२। ११. २।९।
१२. अष्टा. ८।३।२८।

दाहरणानि च जयादित्त्येन वण् ट्शेते, वण् शेते, वण् ट्साये, वण् साये इति; पुरुषोत्तमदेवेन च वण् ट्शेते, वण् शेते, वण् ट्षण्डे, वण् षण्डे इत्त्युक्तानि । भट्टोजिना तु 'सुगण् ठ्षष्ठः, सुगण् ट्षष्ठः, सुगण् षष्ठः' इत्त्येवोक्तम् । प्रातिशाख्येषु मध्ये खलु ऋक्तन्त्रे शौनकीयचतुरध्यायिकायाम् चेति द्वयोरेव केवलभाषाविषयान् नियमानपि प्रतिपादयतोरन्न्यप्रातिशाख्यविलक्षणयोः प्रातिशाख्ययोरेवाऽस्य नियमस्योल्लेखात्, तद्वृत्तिकारैरपि वैदिकस्योदाहरणस्याऽप्रदर्शितत्वाद् वेदे प्रविरल एवाऽस्य नियमस्य विषय इत्त्यवसीयते । कस्याञ् चिल्लुप्तायां शाखायामस्य नियमस्य विषयस् स्थितस् स्यात् । लोकेऽपि सुदुर्लभ एवाऽस्य नियमस्य विषयः । **पाणिनिरपि वेदविषयकान् स्थूलान् विषयानपि क्विद्दद्यति, प्रायेण लोकमात्त्रविषयान्, तत्त्राऽपि लोकेऽपि प्रविरलविषयान् एतादृशान् नियमानपि प्रतिपादयतीति** तत्प्रवृत्तिरपि चिन्तनीयैव ॥१५४॥

अघोषादूष्मणस् परशे परे तन्मद्ध्य आगमः ।

परस्थस्स्परशवर्गीयप्रथमस्य भवेत् क्व चित् ॥१५५॥

तदुक्तन् तैत्तिरीयप्रातिशाख्ये— "अघोषादूष्मणः परः प्रथमोऽभिनिधानस् स्परशपरात् तस्य सस्थानः"[१] इति । तदुदाहरणानि च तैत्तिरीयसंहितायाम् प्रायेण— यः क्कामयेत[२], उरुक्क्षयाय नः क्कृधि[३] यः प्पाप्मना[४], शुनन् नः प्फालाः[५] एवश्च् छन्दः[६] कामश्च् च मे[७] मारुतम् पृश्त्निम्[८] काममश्त्नुते[९] अश्प्मन्नूर्ज्जम्[१०] निष्ट्टपामि[११] कृष्ट्णोऽसि[१२] ग्रीष्प्मो हेमन्तः[१३] वायवस्त्थ[१४] अति दिवस्प् पाहि[१५] अयस्प्मयम्[१६] इति । एतच् च व्यासशिक्षायामपि प्रतिपादितम्[१७] । एष विधिः केनाऽप्यंशेन विलक्षणो दृश्यते । एतच् चोक्ततैत्तिरीयप्रातिशाख्यसूत्त्रव्याख्याने "अभिनिधीयत इति अभिनिधानः, आरोपणीय इत्त्यर्थः । वेदान्तरे तस्याऽभावादत्त्राऽऽरोपणीयत्त्वम्" इति मतिम् प्रदर्शयता तिरभाष्यरत्नकारेण, "स खल्वभिनिधान इत्त्युच्यते । अभिनिधीयते

---

१. १४।९। २. २।१।२। ३. १।३।४। ४. २।३।१३।
५. ४।२।५। ६. २।१।६। ७. ४।७।३।१। ८. २।१।६।२।
९. व्या.शि.वे.तै., सू. ३५१–३५२ (पृ. १३४)। १०. ४।६।१।१।
११. १।१।१०।१। १२. १।१।११।१। १३. ५।७।२।४।
१४. १।१।१।१। १५. १।८।१४।२। १६. ४।२।५।३।
१७. सू. ३५१–३५२।

प्रक्षिप्यत इत्यभिनिधानः । प्रक्षिप्यमाणतुल्यꣳ कार्यान्तर-विधावविद्द्यमानवद् भवतीति यावत्'' इति जल्पता वैदिकाभरणकारेण च कथमपि सूचितम् । 'पृशत्निम्' 'अशत्नुते' 'कृष्टणः' 'गरीष्पमः' 'अयस्पमयम्' इत्येतादृशाꣳ प्रयोगाꣳ पाणिनीयेन व्याकरणेनाऽनन्वाख्याताꣳ प्रातिशाख्यान्तरेष्वपि अव्याख्याता भृशवँ विचारणीया दृश्यन्ते । एष विधिर् व्यञ्जनद्वित्त्वप्रकरणे प्रतिपादयितुमपि उक्तेनैव वैलक्षण्येन न शक्य इति चाऽत्र प्रतिपादितो बोद्ध्यः ॥१५५॥

नान्तात् पदाच् चकारे वा तकारे वा परे सति ।
नस्स्याऽनुस्स्वारभावे वा रागतत्त्वे वाऽपि सम्मते ॥१५६॥
शस्स्य वा सस्स्य वा तत्तरोपजनस् स्वीकृतो भवेत् ।
नस्स्य शत्त्वेऽथवा सत्त्वे मतेऽनुस्स्वारकस्स्य वा ॥१५७॥
पुमस् समस् च मस्स्याऽपि विकारे सम्भवेदपि ।
वर्णस्स्योपजनोऽत्तरैतेऽप्राधान्यात् त्ववधीरिताः ॥१५८॥

एते वर्णोपजनयुक्ता अपि व्यञ्जनसंहिताविशेषाꣳ खलु एतेषु वर्ण-विशेषविकारस्स्यैव प्राधान्याद् वर्णोपजनस्स्याऽऽनुषङ्गिकत्वाच् चाऽत्तर प्रकरणे नोपात्ताः, पूर्वमेव यथास्स्थानमुपात्ता वेदितव्याः ।

शैत्यायनादिसम्मतो[1] वर्गतृतीयहकारयोर् मद्ध्ये वर्गचतुर्थस्स्योपजनश् चाऽत्तरोपेक्षितः, तैत्तिरीयकेऽपि तस्स्याऽनिष्ष्यमाणत्वादनन्यत्तराऽपि तस्स्याऽप्रसिद्धेश् च ।

स्वराच् छकारे परे चकारस्स्याऽऽगमोऽपि स्वरव्यञ्जनसंहिताप्रकरणे प्रतिपादयितुं शक्योऽपि ऋग्वेदप्रातिशाख्याद्द्यनुरोधाद्[2] अस्माभिरपि व्यञ्जनद्वित्त्वप्रकरणे एवं प्रोक्तो बोद्ध्यः ॥१५६–१५८॥

(ग) परव्यञ्जनविकारिव्यञ्जनसन्धिनिरूपणम्

(१) तकारस्स्य टकारभावः

विसर्जनीयान् मूर्धन्यषकारत्वङ्गतात् परः ।
तकारꣳ खलु वेदेषु टकारो भवति ध्रुवम् ॥१५९॥
यस्मात् कस्मादपि च षात् परथोस् तथयोरपि ।
टठौ भवेतावँ वेदे च लोके चाऽपि हि सर्वदा ॥१६०॥

तदुक्तमृग्वेदप्रातिशाख्ये— ''तकारवर्गस् तु टकारवर्गमन्तꣳपदस्स्थोऽपि षकारपूर्वः''[3] इति, शुक्लयजुर्वेदप्रातिशाख्ये च— ''षात्

---

१. तै. प्रा. ५।४०; द्र.तै.प्रा.त्रिभा.र. ५।४१, वै.आ. ५।४१ ।
२. ऋ.प्रा.६।३,१२,१३; तै.प्रा.१४।८; ऋक्तन्त्रे ५।६।२,३। ३. ५।११।

तथौ मूर्द्धन्न्यम्''[१] इति। तैत्तिरीयप्रातिशाख्येऽपि— ''वाघाषपूर्वस् तष् टम्, थश् च ठम्''[२] इति। ऋक्तन्त्रे च— ''षाद् दन्त्यः''[३] इति। शौनकीयचतुरध्यायिकायाम् च— ''षकारान् नानापदेऽपि''[४] इति; पाणिनीयव्याकरणेऽपि— ''ष्टुना ष्टुः''[५] इति ॥१५५–१५६॥

(२) नकारस्य णकारभावस् तदपवादाश् च

पदान्तस्थटवर्गीयवर्णसस्योत्तरतस् स्थितः।
नगर्याश् च नवत्त्याश् च नकारो णो भवेत् सदा ॥१६१॥

तथा हि पाणिनीयव्याकरणे भाष्यम्— ''अत्त्यल्पमिदमुच्यते-ऽनामिति। अनाम्नवतिनगरीणाम् चेति वक्तव्यम्''[६] इति ॥१६१॥

ऋरषैस् सहितात् पूर्वपदादुत्तरकस्य तु।
समास उत्तरपदस्थस्य स्यान् नस्य णश् श्रुतौ ॥१६२॥

एतद्विषये च वचनानि यथा— ''ऋकाररेफषकारा नकारं समानपदेऽवगृह्ण्ये नमन्ति। अन्तःपदस्थमककारपूर्वा अपि सन्ध्याः॥ सन्ध्य ऊष्माऽप्यनिङ्ग्ये''[७] इत्यादीनि ऋग्वेदप्रातिशाख्ये; शुक्लयजुर्वेदप्रातिशाख्ये च– ''ऋषरेफेभ्यो नकारो णकारं समानपदे''[८] इत्यादीनि; तैत्तिरीयप्रातिशाख्येऽपि– ''अथ नकारो णकारम्, षुषूकृधिसुवस्समिन्द्रास्थूर्युरुवाषष्टिरग्रामनिष्पूर्वः''[९] इत्यादीनि; ऋक्तन्त्रे च— ''दे नो मूर्धन्न्यम्''[१०] इत्यादीनि; शौनकीयचतुरध्यायिकायाम् च— ''ऋवर्णरेफषकारेभ्यस् समानपदे नो णः, पूर्वपदाद् द्रुघणादीनाम्''[११] इत्यादीनि। पाणिनीयव्याकरणे च— ''रषाभ्यान् नो णस् समानपदे, अट्कुप्वाङ्नुम्व्यवायेऽपि, पूर्वपदात् सञ्ज्ञायामगः''[१२] इत्यादीनि॥१६२॥

वर्णैश् चटतवर्गीयैर् व्यवेतलँ लशसैरपि।
ऋरषा नमयन्त्येते नकारन् नैव कर्हृयपि ॥१६३॥

तदुक्तमृग्वेदप्रातिशाख्ये— ''न मद्ध्यमैस् स्पर्शवर्गैर् व्यवेतम्''[१३] इति, ''तथा शकार–सकारव्यवेतं सर्वादिषु''[१४] इति च। शुक्लयजुर्वेदप्रातिशाख्येऽपि— ''शिलिसिवर्ग्गमद्ध्यमव्यवहितोऽपि''[१५] इति, तैत्तिरीयप्रातिशाख्ये च— ''न षुम्नोऽग्निर् युष्मानानीतोऽन्तोऽलोपात्

---

१. ३।७९। २. ७।१३, १४। ३. ५।७।११।
४. २।१६। ५. अष्टा. ८।४।४१। ६. ८।४।४२।
७. ५।४०–। ८. ३।८५–। ९. ७।१–। १०. ५।६।७–।
११. ३।७५–। १२. अष्टा. ८।४।१–। १३. ५।४२।
१४. ५।४३। १५. ३।९५।

त्स्पर्शपरे व्यवायेषु शसचटतवर्गीयेषु''[1] इति । ऋक्तन्त्रेऽपि— ''न मद्ध्यमवर्गीयैर् व्यवेतलँ लशसैश् च''[2] इति । शौनकीयचतुरद्ध्यायिकायाम् च— ''व्यवाये शसलैः, चटतवर्गैश् च''[3] इति । पाणिनीयव्याकरणभाष्येऽपि— ''चुटुतुलशर्व्यवाये नेति वक्ष्यामि । अपर आह- तिरभिश् च मद्ध्यमवर्गैर् लशसैश् च व्यवाये नेति''[4] इति ।।१६३।।

ककारपूर्वकाश् चैते न नण् णमृचि कुर्वते ।
अकपूर्वा अपि स्स्पर्शयुतञ् च ययुतन् तथा ।।१६४।।
उस्सरयाम्म्णेऽनुस्सरयाम्म्णे सुषाम्म्णे वृषमण्यवः ।
प्रण्यश् चाऽधिषवण्या चेत्यत्तर नो णो भवेद् धि च ।।१६५।।

एतच् च ''अककारपूर्वाः''[5] इति वचनेन, ''यकारस्स्पर्शसंहितम्''[6] इति वचनेन,''उस्सरयाम्म्णेऽनुस्सरयाम्म्णे सुषाम्म्णे वृषमण्यवोऽधिषवण्या प्रण्यः''[7] इति वचनेन च ऋग्वेदप्रातिशाख्ये प्रोक्तम् ।।१६४–१६५।।

परिप्परेन्द्रऋषिब्भ्यस् तु परत्त्वे प्रायशश् श्रुतौ ।
पवर्गीयव्यवायेऽपि नकारो णो भवेन् न हि ।।१६६।।

तदुक्तमृग्वेदप्रातिशाख्ये— ''परिप्रऋषीन्द्रादिषु चोत्तमेन''[8] इति । तदुदाहरणानि च— ''परिपानमनृति''[9] इत्यादीनि शाकलऋग्वेदमन्त्रसंहितायाम् ।।१६६।।

नाभिनिर्णिक्शब्दयोश् चाऽऽदिस्थो नो णो भवेन् न हि ।
कर्मनिष्ठान् दीर्घनीथे इत्यत्तरापि तथैव च ।।१६७।।

तदुक्तमृग्वेदप्रातिशाख्ये— ''नाभिनिर्णिक्प्रवादादी''[10] इति; ''कर्मनिष्ठान् दीर्घनीथे''[11] इति च ।।१६७।।

शुब्भ्र-युष्मा-तिरपूर्वश् च ह्रस्स्वदीर्घोदयस् तथा ।
पुरु-त्त्वेष-परश् च स्स्यान् न णो ह्रस्स्वोदयो हि नः ।।१६८।।

तदुक्तमृग्वेदप्रातिशाख्ये— ''ह्रस्स्वोदयन् त्वेषपुर्वेवमादिषु; तिरशुब्भ्रयुष्मादिषु चोभयोदयम्''[12] इति ।।१६८।।

भानुशब्दे हिनोमीति पदेऽपि स्स्यान् न नस्स्य णः ।
प्रहिणोतीत्यादिके तु स्स्याद् धि सर्वत्तर नस्स्य णः ।।१६९।।

एतद्विषयेऽपि ''भानुशब्दे, हिनोमीति च''[13] इति ऋग्वेदप्रातिशाख्य-

---

१. १३।१५ । २. ५।६।१४(२७५) । ३. ३।९३,९४ । ४. १।१।९, वा. ५ । ५. ५।४० । ६. ५।४७ । ७. ५।५४ । ८. ५।४३ । ९. शा. ऋ. म. सं. ५।४४।११ । १०. ५।४६ । ११. ५।४८ । १२. ५।५१, ५२ । १३. ५।४९, ५० ।

वचनम् । हिनोमीत्त्यत्त्र निषेधात् प्रहिणोतीत्त्यादिषु णत्त्वमुत्सर्ग-प्राप्तम् भवत्त्येवेति बोद्ध्यम् । शुक्लयजुर्वेदे तु— "प्रहिणोमि"[१] इत्त्यत्त्रापि णत्त्वम् भवति; तदुक्तन् तत्प्रातिशाक्ख्ये— "प्र नेति-नुदाति-हिनोमीनाम्"[२] इति । परिपूर्वस्स्य हिनोतेर् णत्त्वन् न भवतीति "परेर् हिनोतेः"[३] इति शौनकीयचतुरद्ध्यायिकायामुक्तम् । पाणिनिना तु— "हिनु मिना"[४] इत्त्युक्त्वा प्रहिणोमीत्त्यत्त्राऽपि औत्सर्गिकण् णत्त्वम् प्रतिपादितम् ॥१६९॥

नस् समासे ह-रहिते त्र्यधिकाक्क्षरकेऽपि च ।
पुर×-पुनश्-चतुर्-ज्योतिर्-दु×-पूर्वपदके न णः ॥१७०॥

उक्तं हि ऋग्वेदप्रातिशाक्ख्ये— "अहकारेष्वधिकत्त्र्यक्क्षरेषु च पुर×पुनर्दुश्चतुर्ज्योतिरादिषु"[५] इति ॥१७०॥

प्रपीनम् बब्भ्रुनीकाशास् तथा वार्ध्रीनसोऽपि च ।
ब्रह्मभवनि क्क्षत्त्रवनीन्द्रागग्नी च षुम्न इत्त्यपि ॥१७१॥
पुरोनुवाक्क्याश् च पुरोनुवाक्क्याभिस् तथैव च ।
युष्मभानीतश् च चर्मम्नमेषु णत्त्वन् न हीष्ष्यते ॥१७२॥
श्रीमणा इति शाखासु कासु चिण् णत्त्वमिष्ष्यते ।
वार्ध्रीणसेऽपि लोके तु दृश्श्यते णत्त्वमेव च ॥१७३॥

एतद्विषये च शुक्लयजुर्वेदप्रातिशाक्ख्ये— "नि-वनि-नसः प्रपीनम्, श्रीमना इत्त्येके, इन्द्रागग्नी चित्त्रभानो वार्त्रग्घ्नन् दुःष्वप्न्-न्यन् ध्रुवयोनिः पुरोनुवाक्क्याभिः पुरोऽनुवाक्क्याश्च् चर्मम्नम्"[६] इति; "नृश्रीपूर्वो मनाः"[७] इति तैत्तिरीयप्रातिशाक्ख्ये ॥१७१–१७३॥

दीर्घानुताक्ख्यातषाच् चोरुशब्दाच् चाऽथ सुशब्दकात् ।
परस्स्थस्स्य न इत्त्यस्स्य नस्स्य णो भवति श्श्रुतौ ॥१७४॥
न इत्त्यस्योपसर्गस्स्थरेफाच् चाऽपि परस्स्य च ।
नस्स्य णस् स्याच् श्रुतौ प्रायो लोके नासार्थकस्स्य तु ॥१७५॥
पुरुप्रिया नेषि ब्रह्मभा षु ष्म परषि सुतेषु च ।
सवनेष्वर्यमेन्द्रेति चंतेब्भ्यश् चाऽपि नो हि णः ॥१७६॥

तदुक्तमृग्वेदप्रातिशाक्ख्ये— "पुरुप्रिया ब्रह्मम सुतेषु नेषि प्लुता-कारान्तं सपकारमिन्द्र । न ते सु स्मेति सवनेषु परषि स्वर्यमा प्रोरु

---

१. मा. सं. ३५।१९ । २. ३।८८ । ३. ३।८८ ।
४. अष्टा. ८।४।१५ । ५. ५।५३ । ६. ३।९०–९२ ।
७. ७।९ ।

परीति तैर् नः"[1] इति; ऋक्तन्त्रे च— "नो व"[2] इति। पाणिनीय-व्याकरणे च— "नश् च धातुस्थोरुषुब्भ्यः, उपसर्गादनोत्परः"[3] इति प्रोक्तम् ॥१७४–१७६॥

मित्त्राय मुञ्चतं हेडो राया पूषाऽविषद् गधि ।
वाजान् कृणोत नव्व्येभिस् त्मने चेति च्छकारवत् ॥१७७॥
पदञ् चेति परेष्वेषु नय प्रतरमेतयोः ।
युग्मयोऽ परयोश् चापि न भवेन् नस् तु णश् श्रुतौ ॥१७८॥

तदुक्तमृग्वेदप्रातिशाख्ये— "हेडो मुञ्चतम् मित्त्राय राया पूषा गद्ध्यविषच् छकारवत् । नव्व्येभिस् त्मने वाजान् कृणोत द्द्वे नय प्रतरम् परेषु न"[4] इति ॥१७७–१७८॥

समिन्द्र णस् स्वर् ण चेत्त्यादिकेष्वपि च नस्स्य णः ।
अस्त्थूरि णाविति भवेन् नावित्त्यस्स्य च नस्स्य णः ॥१७९॥

एतद्विषये शुक्लयजुर्वेदप्रातिशाख्यस्स्य "निषण्णाय रथवाहण-मिन्द्र एणम् परिणीयते समिन्द्र ण उरुष्या णो रक्क्षा णः षू णः षु णः षु णासत्त्या स्वर् णाऽस्त्थूरि णौ प्र ण आयूंषि; परि ण इति शाकटायनः"[5] इति सूत्त्रे प्रमाणभूते ज्ञेये ॥१७९॥

गोरोहेण निर्गमाणीन्द्र एणाश् चाऽथ वार् ण च ।
अग्नेरवेणेन्द्र एणं शक्क्र एणन् तथैव च ॥१८०॥
प्रहिणोमि षु णासत्त्या प्रणुदा रथवाहणम् ।
परा णुदस्स्व चेत्त्येषु नकारो णो भवेच् छ्रुतौ ॥१८१॥

एतद्विषये च ऋग्वेदप्रातिशाख्ये— "गोरोहेण निर्गमाणीन्द्र एणा इन्द्र एणं स्वर् ण परा णुदस्स्व । अग्नेरवेण वार् ण शक्क्र एणम्"[6] इति; शुक्लयजुर्वेदप्रातिशाख्ये च— "निषण्णाय रथवाहणमिन्द्र एणम् परिणीयते समिन्द्र ण उरुष्या णो रक्क्षा ण षू णः षु णः षु णासत्त्या स्वर् णाऽस्त्थूरि णौ प्र ण आयूंषि, परि ण इति शाकटायनः, प्र नेति-नुदाति-हिनोमीनाम्"[7] इति प्रोक्तम् ॥१८०–१८१॥

प्रपरिब्भ्याम् परत्त्वे तु नयत्त्यर्थेषु नोनुमः ।
आनीन् नु त्त्यन् नोनुवुश् चेत्त्येषु णत्त्वं श्रुतौ स्स्मृतम् ॥१८२॥

---

१. ५।५८ । २. ५।६।१३ । ३. अष्टा. ८।४।२७,२८ ।
४. ५।५९ । ५. ३।८६, ८७ । ६. ५।६० ।
७. ३।८६–८८ ।

तदुक्तमृग्वेदप्रातिशाक्ख्ये— "आनीन् नु त्त्यन् नोनुवुर् नोनुमश् च नयत्त्यर्थन् च प्प्रपरीतिपूर्वौ"[1] इति ॥१८२॥

दूणाशे दूडभे दूड्ढ्चे दुर् दूभूतन् निमित्तकम् ।
न-द-धानाम् बुधैर् ज्ञेयन् नमयित्तृ श्श्रुतौ सदा ॥१८३॥

उक्तं हि ऋग्वेदप्रातिशाक्ख्ये— "दूड्ढ्चदूणाशदूडभप्प्रवादा दुर् दूभूतमक्क्षरन् तेषु नन्तृ"[2] इति । अत्त्र दूणाशग्ग्रहणेन दूणशस्स्यापि[3] ग्ग्रहणमिष्ष्यते । एतद्विषये शुक्लयजुर्वेदप्रातिशाक्ख्ये— "उकारन् दुर्द् दे, नाशे च, पुरो दाशे, अनसो वाहौ सकारो डकारम्, ओकारमितः सिञ्चतौ सोपधः,षड् दशदन्तयोः सङ्ख्यावयोर्त्थयोश्च् च"[4] इत्त्यादिकवँ् वचनन् द्रष्टव्व्यम् । शौनकीयचतुरद्ध्यायिकायाञ् च—"दुर उकारो दाशे, परस्स्य मूर्धन्न्यः"[5]इति । अत्त्र दूणाशप्प्रसङ्गादन्न्यदप्प्युक्तम्॥१८३॥

संहिताजष् षकारोऽपि समाने चाऽनवग्ग्रहे ।
पदे स्स्थितन् नकारन् तु नमयेदृक्षु सर्वथा ॥१८४॥

तदुक्तमृग्वेदप्रातिशाक्ख्ये— "सन्ध्य ऊष्माऽप्प्यनिङ्ग्ये"[6] इति । तदुदाहरणञ् च शाकलऋग्वेदमन्त्त्रसंहितायाँ यथा— "यदि क्क्लोशमनुष्ष्वणि"[7] इति ॥१८४॥

सङ्क्षिप्तोऽयण् णत्त्व-विधिः पदपाठोपकारकः ।
प्प्रदर्शितो विस्तरोऽस्स्य प्प्रातिशाक्ख्येषु दृश्श्यताम् ॥१८५॥

पदपाठोपकारक इति कथनात् क्रमादिपाठोपकारकत्त्वमप्प्येतद्विधिज्ज्ञानस्स्य प्प्रदर्शितम् भवति; तेषामपि पदज्ज्ञानमूलकत्त्वात् । वैदिकलौकिकतत्साधारणणत्त्वविधिज्ज्ञानाय पाणिनीयव्याकरणमप्प्युपकारकमेव । तच् च समीचीनतरावँ् व्याक्ख्यामपेक्क्षते । ताञ् च करिष्ष्यामो यथावसरम् ॥१८५॥

(३) शकारस्स्य छकारभावः

नित्त्यं श्रुतौ शस्स्य वर्गप्प्रथमेबभ्यः परस्स्य च ।
स्वरान्तस्थोदयस्स्य स्स्याच् छो भाषायावँ् विकल्पतः ॥१८६॥
शैशिरीयकवेदादौ भाषायाञ् च ञकारतः ।
परस्स्योक्तप्प्रकारस्स्य शस्स्याऽपि स्यादयवँ् विधिः ॥१८७॥
शैशिरीयकवेदादौ लोकेऽपि स्स्पर्शपूर्वगे ।
शेऽप्प्येवं स्यान् नैव वाजसनेयिचरणादिषु ॥१८८॥

---

१. ५।५७ । २. ५।५५ । ३. शा.ऋ.म.सं. ३।५६।८ ।
४. ३।४२–४७ । ५. २।६० । ६. ५।४१ । ७. ६।४६।१४ ।

उदाहरणानि यथा— अर्वाक्छफाविव[1], विपाट्छुतुद्द्री पयसा जवेते[2], तच्छयँ योरावृणीमहे[3]; वज्जिरञ् छ्नथिहि[4] इति शाकलऋग्वेदसंहितायाम्; तच्छकेयम्[5], मघवाञ् छुक्करः[6], पिशङ्गाञ्छिशिराय[7] इति माद्ध्यन्दिनीयसंहितायाम्; शरच् छ्रौत्तरी[8], अनुष्टुप्छारदी[9] तेनैवैनाञ् छमयन्ति[10] इति तैत्तिरीयसंहितायाम्, चित्तर इच्छिशोः[11] दिविसञ् छुक्करः[12] मघवञ् छग्धि[13] इति कौथुमसामवेदार्चिकसंहितायाम्; देवाञ् छ्लोकः[14] इति शौनकिनामथर्ववेदसंहितायाम् ।

एतद्विषये वचनानि च— "सर्वैः प्रथमैरुपधीयमानश् शकारश् शाकल्यपितृश् छकारम्"[15] इति; "छकारन् तयोरुदयश् शकारः"[16] इति च ऋग्वेदप्रातिशाख्ये; शुक्लयजुर्वेदप्रातिशाख्ये च— "परश्च् चाऽस्पर्शपरश्च् छम्"[17] इति । तैत्तिरीयप्रातिशाख्ये च— "स्पर्शपूर्वश् शकारश् छकारम्, न मकारपूर्वः, पकारपूर्वश् च वाल्मीकेः; व्यञ्जनपरꣳ पौष्करसादेर् न, अकारश् च पूर्वम्"[18] इति । ऋक्तन्त्रे च— "दन्त्याच् छश् छम्"[19] इति "चलमोदयमेके"[20] इति च । शौनकीयचतुरद्ध्यायिकायाञ् च— "तवर्गीयाच् छकारश् शकारस्य"[21] इति । पाणिनीये व्याकरणे च — "शश् छोऽटि"[22] इति सूत्तरम्, 'छत्त्वमनि तच्छ्लोकेन तच्छ्मश्श्रुणेति प्रयोजनम्" इति तत्तर वार्तिकम् । तत्तर 'वज्जिरञ्छ्नथिहि' इत्यादेरपि प्रयोजने सङ्ग्रहस् समुचितः । यद्द्यपि वज्जिरञ् छ्नथिहि इत्यादौ अकारात् परस्य शकारस्य पाणिनीयव्याकरणे छत्त्वप्राप्तिर् नास्ति, तथापि "शि तुक्"[23] इति तुकि श्चुत्त्वे[24] छत्त्वे "झरो झरि सवर्णे"[25] इति चकारलोपे चेष्टरुपान्वाक्ख्यानम् भवितुं शक्नोति । पाणिनीयव्याकरणस्थानां सर्वेषामेव विकल्पानावँ वेदेषु व्यवस्थितविभाषात्त्वन् तु व्याक्ख्येयमेव । पाणिनीयच्छत्त्वविधिव्याक्ख्याने प्रदर्शितप्रातिशाख्यवचनतदुदाहरणाद्द्यनुकूलो विषयविभागोऽपि दर्शयितुमुचितः ।

---

१. २।३९।३ । २. ३।३३।१ । ३. ऋ. ५।१।५; ५।३।७। ४. १।६३।५ । ५. १।५ । ६. ३३।५ । ७. २४।११ । ८. ४।३।२।२ । ९. ४।३।२।२ । १०. ३।४।८।४ । ११. ६४ । १२. ८३ । १३. २७४ । १४. १८।१।३३ । १५. ५।४ । १६. ५।१२ । १७. ४।९८ । १८. ५।२२–२४। १९. ४।४।४ । २०. ४।४।५ । २१. २।१७ । २२. अष्टा. ८।४।६३। २३. तत्तरैव ८।३।३१। २४. तत्तरैव ८।४।४७ । २५. तत्तरैव ८।४।६५ ।

यद्द्यपि ऋग्वेदप्रातिशाख्ये शकारोपाधिः कोऽपि नोक्त इति 'वज्जिरञ् छ्नथिहि' इत्यादेस् सङ्ग्रहायात्तराऽपि शकारोपाधिर् न वक्तव्यस् तथापि "आदित्याञ् श्मश्रुभिः"[1] इत्यादेर् माद्ध्यन्दिनीयसंहितादिप्प्रयोगस्स्यान्वाख्यानाय शकारोपाधिरावश्यक इति पाणिनिमनुसरद्भिरस्माभिरपि स कारिकायान् निवेशितउत्सर्गतया; विशेषाश् च कारिकान्तरयोः प्रदर्शिताः ॥१८६–१८८॥

(४) स्थास्स्तम्भोस् स्कम्भस्स्य च
सकारस्स्य लोपस् तकारभावो वा–

उदः परस्स्य स्स्थाधातोस् स्तम्भधातोश् च सस्स्य तु ।
लोपो वाऽपि तकारो वा भवेदेव न संशयः ॥१८९॥
स्कन्दधातोरपि विधिरेष वेदे भवेदिति ।
कात्त्यायनो वार्तिककृद् रोगे चेति च भाष्यकृत् ॥१९०॥
चितः परस्स्य तु स्कम्भधातोस् सस्स्य ह्ययवँ विधिः ।
वर्णितश् शौनकेनाऽस्ति स्स्वके बाह्वृचच्यपार्षदे ॥१९१॥

एतद्विषये च स्थास्तम्भधात्त्वोर् विषये ऋग्वेदप्रातिशाख्ये वचनन् न प्राप्प्यते । शाकलऋग्वेदमन्तरसंहितायाम् 'उत्थितम्'[2] इत्यादौ पदपाठे पदविभागोऽपि न क्रियते । शुक्लयजुर्वेदप्रातिशाख्ये तु— "उदस् त्तभाने लोपम्; अशश्वात् तस्थे तकारं सञ्ज्ञायाम्"[3] इति प्प्रोक्तम् । तत्तर 'अशश्वत्थे'[4] इत्यत्तर पदविभागो न क्रियत इति द्वितीयसूत्तरमप्प्रयोजनमेव मुनिना प्रसङ्गात् प्रोक्तमिति मन्तव्यवँ वा सूत्तरस्स्वरसात् पदविभागोऽपि कार्य इति विवेचनीयमभियुक्तैः । ऋक्तन्त्रे च— "उद् स्थास्तम्भोः"[5] इति । किन् तु तत्तर तद्वृत्तिकृतोदाहरणानि लौकिकान्न्येव प्प्रदर्शितानि । तैत्तिरीयप्रातिशाख्ये तु— "उत्पूर्वस् सकारो व्यञ्जनपरः"[6] इत्येवोक्तम् । तथापि तदुदाहरणानि च– प्रत्त्युत्तब्भ्यै सयत्त्वाय[7], अनूत्थाय[8], उपोत्थाय[9] इत्यादीनि एव तैत्तिरीयसंहितात उद्धृतानि व्याख्याकारैः । तदतिव्याप्तिपरिहारार्थञ् च वैदिकाभरणकारेण "न ह्ययत्तर मूलशास्त्रसिद्धम्

---

१. २५।१ । २. १०।१४९।२; १०।८५।१ ।
३. ४।९९, १०० । ४. १२।७९ (मा. सं.) । ५. ४।३।७ ।
६. ५।१४ । ७. ६।६।४।६ । ८. ३।४।१०।३ ।
९. ७।१।६।८; ७।५।१५।१,२ ।

पदपरिमाणमिष्यते। अपि तु समाम्नानप्रसिद्धमेव। तेन पुनरुत्स्यूतमित्यत्तर उच्छब्दस्य पदैकदेशत्वान् न प्रसङ्गः। नाऽपि शृत उत्स्नातीत्यत्तर प्रसङ्गः, **संहितागरन्थमात्तरविषयत्वादस्य शास्तरस्य**" इत्युक्तम्। शौनकीयचतुरद्ध्यायिकायाम् च— "लोप उदस्स्थास्तम्भोस् सकारस्य"[1] इति। तदुदाहरणानि च— मा घोषा उत्थुः[2] ततस् त्वोत्थापयामसि[3], उत्थापय सीदतः[4], उत्तभिता[5] इति शौनकिनामथर्ववेदसंहितायाम्। किन् तु उत्थातुः[6], उत्थितः[7] उत्तभिता इत्यत्तर तु पदपाठे पदविभागो न क्रियते; अनुमोदितश् चायमर्थश् शौनकीयचतुरद्ध्यायिकया[8]। पाणिनीयव्याकरणे तु— "उदस् स्थास्तम्भोऽ पूर्वस्य"[9] इति सूत्तरम्, "उदऽ पूर्वत्वे स्कन्देश् छन्दस्युपसङ्ख्यानम्"[10] इति वार्तिकम्, "रोगे चेति वक्तव्यम्"[11] इति भाष्येष्टिः। **भट्टोजिना तु "परोक्षे च लोकविज्ज्ञाते प्रयोक्तुर् दर्शनविषये लङ् वक्तव्यः"[12] इत्यादिकानाम् महत्त्वपूर्णानामपि वार्तिकानाय्ँ यथा परित्यागऽ कृतस् तथैवैतयोरपि वार्तिकेष्ट्योः**। तथापि वैदिकैऽ प्रातिशाख्येष्वपि अप्राप्ताया वैदिकप्रयोगविशेषसूचनायाऽ कात्त्यायनप्रदत्ताया महत्त्वं स्वीकर्तव्यमेव ॥१८९–१९१॥

(५) सकारस्य षकारभावस् तदपवादाश् च

अकारैकारभिन्नेब्भ्यस् स्वरेब्भ्यऽ पर एव हि।
सविसर्गेब्भ्योऽपि चाऽनृतऽपादं सष् षो भवेदृचि ॥१९२॥

सामान्योऽयन् नियमः। तदुक्तमृग्वेदप्रातिशाख्ये— "अनृतऽपादन् नाम्म्युपधस् सकारष् षकारमप्यूष्मपरैर् यथोक्तम्। अनन्यैरेकारात्"[13] इति। अस्य च नियमस्य वक्ष्यमाणैर् नियमैस् सहैकवाक्यतयोपसंहारेणैव प्रवृत्तिरिति बोद्ध्यम्। विसर्गव्यवधाने प्रथमन् नतिर् भवति, ततो विसर्गव्यापत्तिरिति च बोद्ध्यम्। उक्तं हि "नतिरत्तर पूर्वा ततो व्यापत्तिर् भवतीति विद्द्यात्"[14] इति ॥१९२॥

स्वैरूती नकिरुरु त्तरी नि वि हि च नहि स्स्वभि।
इत्त्येतेब्भ्यऽ परे सेति पदे सष् षो भवेच् छ्रुतौ ॥१९३॥

---

१. २।१८। २. ७।५२।२। ३. १०।१।२९।
४. १२।३।३०। ५. १४।१।१। ६. ९।४।१४।
७. ६।४३।२। ८. ४।६२। ९. अष्टा. ८।४।६१।
१०. पा. व्या. भा. ८।४।६१। ११. तत्तरैव।
१२. तत्तरैव ३।२।१११, वा. २। १३. ५।१। १४. ऋ.प्रा. ५।२।

उदाहरणानि यथा— स्वैष् ष एवै रिरिषीष्ट युर् जनः[१] उती ष बृहतो दिवः[२], नकिष् षो अस्त्यरणो जहुर् हि तम्[३], उरु ष सरथं सारथये कः[४], त्री ष पवित्त्रा हृद्द्यन्तरा दधे[५], नि ष हीयतान् तन्वा तना च[६], ओभे अप्प्रा रोदसी वि ष आवः[७], यूपादमुञ् चो अशमिष्ट हि षः[८], नहि षस् तव नो मम[९], प्र सु ष विब्भ्यो मरुतः[१०], अभि ष द्युम्नैरुत[११] इति शाकलऋग्वेदसंहितायाम्। एतद्विषये चोक्तं हि ऋग्वेदप्रातिशाख्ये— "सूती नकिस् स्वैर् व्युरु नह्यभि त्त्री नि हीति सः"[१२] इति ॥१९३॥

सत् स्थ इत्त्यनयोस् सस् तु पदाद् द्व्यक्षरकात् परः।
एकाक्षराच् च स्वित्त्यस्स्य सष् षकारो भवेदृचि ॥१९४॥

उदाहरणानि प्रत्त्युदाहरणानि च यथा शाकलऋग्वेदमन्त्रसंहितायाम्— दिवि षद् भूम्याददे[१३], यदिन्द्राग्नी दिवि ष्ठो यत् पृथिव्याम्[१४], युवं हि स्थ स्वर्पती[१५]; मो ष्वद्द्य दुर्हणावान्[१६], अभी ष्वर्य पौंस्यैर् भवेम[१७], सुदीतिभिस् सु दीदिहि[१८] इति। एतद्विषये च वचनमृग्वेदप्रातिशाख्ये यथा— "द्व्यक्षरेणैव सत्स्थः, स्ववह्वक्षरेण"[१९] इति ॥१९४॥

पदादबह्वक्षरकात् परश् च कनयोत्तरः।
पदादिस् सष् षस् तथैव मोदयोऽरेफके पदे ॥१९५॥

उदाहरणानि प्रत्त्युदाहरणानि च यथा शाकलऋग्वेदसंहितायाम्— यजु ष्कन्नम् प्रथमन् देवयानम्[२०], अधि ष्णुना धन्न्व सानो अव्ये[२१], गोभिष् ष्याम सधमादः[२२], तव प्प्रियासस् सूरिषु स्याम[२३] उप द्द्यां स्कम्भथु स्कम्भनेन[२४], न हि ष्मा ते शतन् चन[२५], प्रति स्मरेथान् तुजयद्भिरेवैः[२६], वहामि स्म पूषणमन्तरेण[२७] इति। उक्तं हि ऋग्वेदप्रातिशाख्ये— "पदादयश् च स्यिति स्किति स्निति, अरेफस्स्य च स्मिति"[२८] इति ॥१९५॥

---

१. ८।१८।१३। २. ६।२।४। ३. २।२४।७।
४. ६।२०।५। ५. ९।७३।८। ६. ७।१०४।१०।
७. ९।९७।३८। ८. ५।२।७। ९. ८।३३।१६।
१०. ४।२६।४। ११. ८।२०।१६। १२. ५।३।
१३. ९।६१।१०। १४. १।१०८।११। १५. ९।१९।२।
१६. ८।२।२०। १७. १०।५९।३। १८. ६।४८।३।
१९. ५।४, ५। २०. १०।१८१।३। २१. ९।९७।१६।
२२. ५।२०।४। २३. ७।१९।७। २४. ६।७२।२।
२५. ४।३१।९। २६. ७।१०४।७। २७. १०।३३।१।
२८. ५।६, ७।

योदयस् सऽ पदादिस्थो दीर्घादुत्तरतस् स्थितः ।
अस्स्पर्शपूर्वोकाराद् वा न षकारो भवेच् छ्रुतौ ॥१९६॥

उदाहरणानि प्रत्युदाहरणानि च यथा शाकलऋग्वेदमन्त्रसंहितायाम्— वीरैस् स्याम सधमादः[1], एष उ स्य पुरुव्रतः[2]; गोभिष् ष्याम सधमादः[3] उदु ष्य शरणे दिवः[4] इति । उक्तञ् च ऋग्वेदप्रातिशाख्ये— "दीर्घो न स्थिति, उ च नाऽस्स्पर्शपूर्वम्"[5] इति ॥१९६॥

सितां सधस्स्थादित्यादेरबहुव्वक्क्षरकात् पदात् ।
बहुव्वक्क्षराच् चाऽपि परः पदादिस् सो भवेद् धि षः ॥१९७॥

उदाहरणानि यथा शाकलऋग्वेदसंहितायाम्— पदि षिताममुञ्चता यजत्त्राः[6], निष् षीमद्भ्यो धमथो निष् षधस्थात्[7], नि ष्टनिहि दुरिता बाधमानः[8], तमु ष्टवाम यज्ञ गिरः[9], विश्श्वा यद् वामनु ष्टवे[10], अनु ष्टुवन्ति पूर्वथा[11] इत्यादीनि । उक्तञ् च ऋग्वेदप्रातिशाख्ये— 'सितां सधस्स्थात् त्स्तनिहि स्तवाम स्स्तवे स्तुवन्ति स्स्तुहि सीं स्तुत स्स्थ । साहि स्स्त स्स्तुप् सत्सि सत्सत् स्वनीति स्तोभेत्यादिश् चापि बहुव्वक्क्षरान्त्यैः"[12] इति ॥१९७॥

परोऽबहुव्वक्क्षरादेकारान्तादपि पदात् तु सः ।
स्वित्त्यस्स्य षो भवेद् वेदे न इत्त्यस्त्युत्तरत्तर चेत् ॥१९८॥

उदाहरणयँ यथा शाकलऋग्वेदसंहितायाम्— ते षु णो मरुतो मृडयन्तु[13] इति; प्रत्त्युदाहरणञ् च तत्तरैव— त्वे सु पुत्तर शवसः[14] इति । उक्तञ् च ऋग्वेदप्रातिशाख्ये— "एकारेणाऽपि स्विति नऽ परञ् चेत्"[15] इति ॥१९८॥

रजस्सु षीदन् तू षिञ्चेत्यादौ स्यात् सस्स्य षऽ पुनः ।
वाजीस्तुतऽ-प्रभृतिषु सस्स्य षस् तु भवेन् न हि ॥१९९॥

उदाहरणानि यथा शाकलऋग्वेदसंहितायाम्— बुध्ने नदीनां रजस्सु षीदन्[16], आ तू षिञ्च हरिमीन् द्रोरुपस्स्थे[17], अद्ध्वर्यवा तु हि षिञ्च[18]

---

१. ५।२०।४ । २. ९।३।१० । ३. ५।२०।४ ।
४. ८।२५।१९ । ५. ५।९, १० । ६. ४।१२।६ ।
७. ५।३१।९ । ८. ६।४७।३० । ९. ८।९५।६ ।
१०. ५।७३।४ । ११. ८।३।८ । १२. ५।१२ ।
१३. १।१६९।५ । १४. ८।९२।१४ । १५. ५।८ ।
१६. ७।३४।१६ । १७. १०।१०१।१० । १८. ८।३२।२४ ।

इत्त्यादीनि; वाजी स्तुतो विदथे दाति वाजम्[१], वहन्ति सीमरुणासो रुशन्तः[२], अस्स्य पतिस् स्यां सुगवस् सुवीरः[३] इत्त्यादीनि च। उक्तं हि ऋग्वेदप्रातिशाक्ख्ये— "हि षिञ्च तू षिञ्च रजस्सु षीदन्निनितो षिञ्चताऽभि षतऽ किमु ष्वित्"[४] इत्त्यादि; "वाजी स्स्तुतो वहन्ति सीम् पतिस् स्यान् दित्ससि स्स्तुतः। अपो सु म्म्यक्क्ष श्श्रुधि सु त्त्रिस् स्म स्स्तुहिस्स्तुहीति न"[५] इति च ॥१९९॥

चवर्गोदय-सि-स्स्वेत्त्यक्क्षरस्स्थस् सो हि षो भवेत्।
नि-परिब्भ्याम् परस् से-स-सीत्त्येषान् दे स्वरोदये ॥२००॥

उदाहरणानि यथा शाकलऋग्वेदसंहितायाम्— महान्तङ्ग कोषमुदचा नि षिञ्च[६], सहस्स्रधारऽ परिषिच्च्यते हरिः[७], परि ष्ष्वजन्ते जनयो यथा पतिम्[८], परि यज्ज्ञन् नि षेदथुः[९], नि षदा पीतये मधु[१०], नि षीद होत्त्रमृतुथा यजस्स्व[११] इति। प्रत्त्युदाहरणानि च तत्त्रैव— व्युच्छन्ती परि स्वसुः[१२], इमयँ यम प्प्रस्तरमा हि सीद[१३], दिवश् चरन्ति परि सद्द्या अनूतान्[१४] इति। उक्तञ् च ऋग्वेदप्रातिशाक्ख्ये — "निपरीति स्व-सीत्त्यादी चकार-वर्गीयोदयौ, दकारे चोत्तरे परान् से-स-सीति स्स्वरोदये[१५] इति ॥२००॥

ससाद सस्स्वजे सस्स्वजाते स्स्वापय सेध च।
इत्त्येषान् निपरिब्भ्यां हि परत्त्वे सस्स्य षो भवेत् ॥२०१॥

उदाहरणानि यथा शाकलऋग्वेदसंहितायाम्— नि षसाद धृतव्व्रतः[१६] तमिन्दुऽ परि षस्स्वजे[१७], समानवँ वृक्क्षम् परि षस्स्वजाते[१८], नि ष्वापया मिथूदृशा[१९], वाचस्पते निषेधेमान्[२०] इति। उक्तं हि ऋग्वेदप्रातिशाक्ख्ये— "सेध स्स्वापय सस्स्वजे सस्स्वजाते ससाद च"[२१] इति ॥२०१॥

सन्तं सन्तस् सन्ति पूर्वीस् स्थुस् स्थास् स्थादेषु सम् परम्।
पदादिस्स्थम् परीत्त्यस्स्य नामी हि नमयेत् स्वरः ॥२०२॥

उदाहरणानि यथा शाकलऋग्वेदसंहितायाम्— अस्मे वत्सम् परि

---

१. ६।२४।२। २. ६।६४।३। ३. १।११६।२५।
४. ५।१७, १८। ५. ५।१९। ६. ५।८३।८।
७. ९।८६।३३। ८. १०।४३।१। ९. ४।५६।७।
१०. ८।९७।८। ११. १०।९८।४। १२. ४।५२।१।
१३. १०।१४।४। १४. ५।४७।४। १५. ५।१३,१४।
१६. १।२५।१०। १७. ९।१२।५। १८. १।१६४।२०।
१९. १।२९।३। २०. १०।१६६।३। २१. ५।१५।

षन्तन् न विन्दन्[1], नाद्द्रयऽ परि षन्तो वरन्तः[2], ता ईवँ विश्श्वतऽ परि षन्ति पूर्वीः[3], अर्णो न द्द्वेषो धृषता परि ष्ठुः[4], परि ष्ठा इन्द्र मायया[5], मा नो मर्तस्य दुर्मतिऽ परि ष्ठात्[6] इति। धक्क्षोर् न वाताऽ परि सन्त्यच्च्युताः[7] इति च प्रत्त्युदाहरणन् तत्त्रैव। उक्त हि ऋग्वेद-प्रातिशाक्ख्ये— "सन्तं सन्तस् सन्ति पूर्वी स्थु स्था स्थादिति चोत्तरः"[8] इति ॥२०२॥

तवर्गीयैश् च र-व-सैर् युक्तान् नामिस्स्वरात् परः।
अन्तऽपदस्स्थात् सकारोऽन्तऽपदं षो भवेच् छ्रुतौ ॥२०३॥

उदाहरणानि यथा शाकलऋग्वेदसंहितायाम्— दुष्टरन्नराती:[9], त्रैष्टुभा द्द्वा त्रैष्टुभन् निरतक्क्षत[10], विषितस्स्तुका रोदसी नृमणाः[11], सुषाव सोममद्द्रिभिः[12], सुषुवुषो मनीषाम्[13] इति; प्रत्त्युदाहरणानि च तत्त्रैव— इयं शुष्मेभिर् बिसखा इवारुजत्[14], सना ज्योतिस् सना स्वः[15], पुरुहूत पुरुवसोऽसुरग्घ्नः[16], इति। उक्तं हि ऋग्वेदप्रातिशाक्ख्ये— "युग्मान्-तस्स्थादन्तमूलीयपूर्वैरन्तऽपदन् नम्म्यतेऽन्तऽपदस्स्थैः"[17] इति ॥२०३॥

तवर्गीयैश् च र-व-सैरन्यैर् युक्ताच् च नामिनः।
परस् स उत्तरपदादिस्स्थो षस् स्यादृचि द्ध्रुवम् ॥२०४॥

उदाहरणानि यथा शाकलऋग्वेदसंहितायाम्— वेदिषदे प्रियधामाय[18], इन्द्रस्स्य त्रिष्टुबिह भागो अह्नन्नः[19], स संस्तिरो विष्टिरस् सङ्ग गृभायति[20], चमूषच् छ्येनश् शकुनः[21], ये त्वा मृजन्त्यृषिषाण वेधसः[22] इति। उक्तं हि ऋग्वेदप्रातिशाक्ख्ये— "अनन्यपूर्वैरपि पद्द्यादिभाक् सन्"[23] इति ॥२०४॥

एकारात् पृतनाशब्दाद् रेफाच् च परतस् स्थितः।
स उत्तरपदादिस्स्थष् षकारस् स्यादृचि द्ध्रुवम् ॥२०५॥

उदाहरणानि यथा शाकलऋग्वेदसंहितायाम्— धियो रथेष्ठामजरन्

---

१. १।७२।२।	२. ३।३२।१६।	३. ९।८९।५।
४. १।१६७।९।	५. ४।३०।१२।	६. ३।१५।६।
७. १०।११५।४।	८. ५।१६।	९. ३।२४।१।
१०. १।१६४।२३।	११. १।१६७।५।	१२. ९।१०७।१।
१३. १०।९४।१४।	१४. ६।६१।२।	१५. ९।४।२।
१६. ६।२२।४।	१७. ५।२०।	१८. १।१४०।१।
१९. १०।१३०।५।	२०. १।१४०।७।	२१. ९।९६।१९।
२२. ९।८६।४।	२३. ५।२१।	

नवीयः[१], स्वर्षामप्सावँ वृजनस्स्य[२], पृतनाषाट्य्याय च[३] इति। उक्तं हि ऋग्वेदप्रातिशाक्ख्ये— "एकार-रेफ-पृतनोपधश् च"[४] इति ॥२०५॥

रेफर्कारपरस् सश् च सं स्पृक् सर् स्वर् स्विरतीह च।
निमित्ते सत्त्यपि न हि सकारष् षत्त्वमृच्छति ॥२०६॥

उदाहरणानि यथा शाकलऋग्वेदसंहितायाम्— पुनाति ते परिस्स्रुतम्[५], इन्द्रस्स्य यन्तु प्प्रसवे विसृष्टाः[६], तिसृणां सप्ततीनाम्[७]; सुसमिद्धो न आ वह[८], दिविस्पृग् यात्त्यरुणानि[९], ते देवाऽ परिस्वृतेष्वेषु लोकेषु[१०], विसर्माणङ्क कृणुहि[११], मेषवँ विप्प्रा अभिस्स्वरा[१२] इति। उक्तं हि ऋग्वेदप्रातिशाक्ख्ये— "रेफर्कारर्कारपरऽ प्रकृत्त्या, सं-स्पृक्-स्वृ-सर्-स्वरिति चाऽक्क्षराणाम्"[१३] इति ॥२०६॥

अनुस्स्वारे च रक्तादिसयँ योगे च परे सति।
सेत्त्यक्क्षरे हि षत्त्वन् नो निमित्ते पुष्कलेऽपि हि ॥२०७॥

उदाहरणानि यथा शाकलऋग्वेदसंहितायाम्— सुसंसन् मित्रो अतिथिश् शिवो नः[१४], सुसन्दृशं सुप्प्रतीकम्[१५], सुसङ्काशा मातृमृष्टेव[१६] इति; प्रत्त्युदाहरणानि च तत्त्रैव-नि षदा पीतये मधु[१७], अभिस्स्वरा निषदा गाः[१८], यच् च गोषु दुष्ष्वप्न्यम्[१९] इति। उक्तं हि ऋग्वेदप्रातिशाक्ख्ये- "सेति चाऽस्स्य परिपन्नोपधा चेत्, सयँ योगस्स्य चाऽप्प्यनुनासिकादेः"[२०] इति ॥२०७॥

सहस्स्रं सनितेत्त्यादेस् स उत्तरपदादिगः।
पुष्कलेऽपि निमित्ते स्स्यान् न षकारऽ कथञ् चन ॥२०८॥

उदाहरणानि यथा शाकलऋग्वेदसंहितायाम्— चतुस्सहस्स्रङ्ग गव्व्यस्स्य[२१], सनेम तन् सुसनिता सनित्त्वभिः[२२], भूरि स्स्थात्तराम् भूर्य्यावेशयन्तीम्[२३] इत्त्यादीनि। उक्तं हि ऋग्वेदप्रातिशाक्ख्ये— "सहस्स्रं सनिता स्थात्तरां सावित्तरं सूवरी स्तुषे। समुद्द्रं सदृशा सारे सायकस्

---

१. ६।२१।१। २. १।९१।२१। ३. ३।३७।१।
४. ५।२२। ५. ९।१।६। ६. ८।१००।१२।
७. ८।१९।३७। ८. १।१३।१। ९. १०।१६८।१।
१०. शा. ब्रा. ८।८। ११. ५।४२।९। १२. ८।९७।१२।
१३. ५।२३,२४। १४. ७।९।३। १५. ७।१०।३।
१६. १।१२३।११। १७. ८।९७।८। १८. २।२१।५।
१९. ८।४७।१४। २०. ५।२५,२६। २१. ५।३०।१५।
२२. १०।३६।९। २३. १०।१२५।३।

साधनी सह ।। सनित स्पष्टस् सदृशस् सखायं सप्तैरेते सानुशब्दश् च पद्द्यः''[1] इति ।।२०८।।

सुते सोमे वक्क्षणे चर्षणण्यप्प्रामि स्वभिष्टि च ।
न ह्यय्युत्तरपदादिस्स्थं सकारन् नमयन्त्यमी ।।२०९।।

उदाहरणानि यथा शाकलऋग्वेदमन्तरसंहितायाम्— सुतेसुते न्योकसे[2], यत् सोमेसोम आ भवः[3], सुसंशिता वक्क्ष्यो वक्क्षणेस्स्थाः[4], अप्प्रामिसत्त्य मघवन्[5], हर्यश्श्वं सत्पतिम् चर्षणीसहम्[6], तूतुजिमिन्द्रस् स्वभिष्टिसुम्नः[7] इति । उक्तं हि ऋग्वेदप्रातिशाक्ख्ये— ''सुते सोमे वक्क्षणेऽप्प्रामि चर्षणि स्वभिष्टीत्त्येवमुपधाश् च सर्वे''[8] इति ।।२०९।।

अभिसत्त्वादिके षत्त्वन् न स्स्याद् गोष्ठादिवादिके ।
भवेदेवेति च प्प्राह मुनिर् बाह्वव्वृच्च्यपार्षदे ।।२१०।।

उदाहरणानि यथा शाकलऋग्वेदसंहितायाम्— अभिवीरो अभिसत्त्वा सहोजाः[9], रयिस्स्थानो रयिमस्मासु धेहि[10], देवस्स्य हेडो अवयासिसीष्ठाः[11] इत्त्यादीनि षत्त्वाभावे; गावो गोष्ठादिवेरते[12], दिवि ष्याम पार्ये गोषतमा[13], शिक्क्षा शचीवस् तव ता उपष्टुत्[14] इत्त्यादीनि च षत्त्वे । तदुक्तमृग्वेदप्रातिशाक्ख्ये– ''अभिसत्त्वा रयिस्स्थानो यासिसीष्ठास् सिसक्क्षि च । तिस्तिरे तिस्तिराणा च सिसिचे सिसिचुश् च न ।। गोष्ठादिव गोषतमा उपष्टुत् सप्प्रवादो नार्षदऽ पर्यषस्स्वजत् । स्वादुषंसदः पुरुषन्तिशब्दस् सुषंसदं सुषमिधा–ऽनुसेषिधत्''[15] इति ।।२१०।।

(६) पूर्वपदान्तगसकारस्स्य षकारभावस् तदपवादाश् च

रेफाऽयुक्ततकारादौ सत्त्युत्तरपदे तु सः ।
व्यापन्नो नामिपूर्वश् च षस् स्यात् पूर्वपदान्तगः ।।२११।।

उदाहरणे यथा शाकलऋग्वेदसंहितायाम्— प्र पाकं शास्सि प्र दिशो विदुष्टरः[16], आविष्टचो वर्धते चारुरासु[17]; प्रत्त्युदाहरणानि च तत्तरैव यथा— सक्क्षन्त इन्द्र निस्सृजः[18], त्वमग्ने प्रमतिस् त्वम्

---

१. ५।२७ । २. १।९।१० । ३. ८।९३।१७ ।
४. ५।१९।५ । ५. ८।६१।४ । ६. ८।२१।१० ।
७. ६।२०।८ । ८. ५।२८ । ९. १०।१०३।५ ।
१०. ६।४७।६ । ११. ४।१।४ । १२. १०।९७।८ ।
१३. ६।३३।५ । १४. ९।८७।९ । १५. ५।२९,३० ।
१६. १।३१।१४ । १७. १।९५।५ । १८. १।१३१।३ ।

पिताऽसि नः[1], चतुस्त्रिंशद् वाजिनो देवबन्धोः[2] इति । उक्तं हि ऋग्वेद-प्रातिशाख्ये-- "तकारे पूर्वपदद्द्यान्तो व्यापन्नोऽरेफसंहिते । नामि-पूर्वः"[3] इति।अत्तरषत्त्वतदपवादप्रकरणस्यैकप्प्रघट्टकेन प्प्रतिपादनस्य परम्परावँ् विचार्य पूर्वपदान्तगसकारविकारवानपि सन्धिरत्तर प्प्रति-पादितो वेदितव्यः । एवञ् च च्छत्तिरन्न्यायेनाऽस्य प्प्रकरणस्य परव्यञ्जनविकारिव्यञ्जनसंहिताप्रकरणत्त्वम् बोद्ध्यम् ॥२११॥

असमासे पदान्तस्स्थस् त्वा ते इत्त्यनुदात्तयोः ।
व्यापन्नस् सो नामिपूर्वष् षकारत्त्ववँ् व्रजेदिह ॥२१२॥

उदाहरणे यथा शाकलऋग्वेदसंहितायाम्— हविष् ट्वा सन्तं हविषा यजाम[4], आभिष् टे अद्द्य गीर्भिर् गृणन्तः[5] इति; प्रत्त्युदाहरणञ् च– यं इत् तद् विदुस् ते अमृतत्त्वम्[6] इति । उक्तं हि ऋग्वेदप्रातिशाख्ये— "विग्ग्रहे तु त्त्वा त इत्त्यनुदात्तयोः"[7] इति ॥२१२॥

वन्दारुष् षष्टिराहुस् त्तिर् बाह्व्वोर् निष्षिद्ध्वरीऽ प्रभोः ।
आविरेषां स्यान् न सष् षस् त्वा त इत्त्यनुदात्तयोः ॥२१३॥

उदाहरणानि यथा शाकलऋग्वेदसंहितायाम्— वन्दारुस् ते तन्न्ववँ् वन्दे अग्ग्ने[8], तिरष् षष्टिस् त्वा मरुतो वावृधानाः[9], आहुस् ते त्रीणि दिवि बन्धनानि[10], त्तिरस् ते अन्नङ् कृणवत् सस्मिन्नहन्[11], बाह्व्वोस् ते बलं हितम्[12], निष्षिद्ध्वरीस् त ओषधीः[13], प्रभोस् ते सतऽ परियन्ति केतवः[14], आविस् ते शुष्मो भवतु[15] इति । उक्तं हि ऋग्वेदप्रातिशाख्ये– "नाऽऽहुर् निष्षिद्ध्वरीऽ प्रभोः । वन्दारुष् षष्टिराविस् त्तिर् बाह्व्वोरित्त्यनुदात्तयोः"[16] इति ॥२१३॥

अग्निरित्त्यस्स्य सष् षस् स्यात् तादावेकाक्क्षरे पदे ।
नकिरित्त्यस्स्याऽपि तथा स्यात् परे च तनूष्विति ॥२१४॥

उदाहरणानि यथा शाकलऋग्वेदसंहितायाम्— अग्निष् टम् ब्रह्मणा सह[17], नकिष् टङ् करमगा नशत्[18], नकिष् टनूषु येतिरे[19] इति । प्रत्त्यु-

---

१. १।३१।१० । २. १।१६२।१८ । ३. ५।३१ ।
४. १०।१२४।६ । ५. ४।१०।४ । ६. १।१६४।२३ ।
७. ५।३२ । ८. १।१४७।२ । ९. ८।९६।८ ।
१०. १।१६३।३ । ११. ४।१२।१ । १२. १।८०।८ ।
१३. ३।५५।२२ । १४. ९।८६।५ । १५. ९।७९।५ ।
१६. ५।३९ । १७. १०।१६२।२ । १८. ८।३१।१७ ।
१९. ८।२०।१२ ।

दाहरणञ् च— अग्निस् तुविश्श्रवस्तमम्[1] इति । उक्तं हि ऋग्वेदप्रातिशाक्ख्ये— "अग्निरेकाक्क्षरस्स्यादौ, नकिश् च, अथो तनूष्विति"[2] इति ॥२१४॥

तत् ततन्न्युस् ततक्क्षुस् तन् तौग्र्र्चमित्त्युत्तरेषु तु ।
निरित्त्यस्स्य सकारस्स्याऽथ त्त्वमित्त्युत्तरे सति ॥२१५॥
पायुभिऽ पर्तृभिस् त्तिरभिर् ददिर् वेरस्मयुश् शुचिः ।
इत्त्येतेषां सकारो हि षकारस् स्यादृचि द्ध्रुवम् ॥२१६॥

उदाहरणानि यथा शाकलऋग्वेदसंहितायाम्— निष् टज् जभार चमसन् न वृक्क्षात्[3], मिहन् न सूरो अति निष् टतन्न्युः[4], वेनादेकं स्वधया निष् टतक्क्षुः[5], निष् टमूहथुस् सुयुजा रथेन[6], निष् टौग्र्र्चम् पारयथस् समुद्द्रात्[7]; अदब्धेभिस् सवितऽ पायुभिष् ट्वम्[8], पर्षि तोकन् तनयम् पर्तृभिष् ट्वम्[9], त्तिरभिष् ट्वन् देव सवितः[10], ददिष् ट्वमिन्द्राऽपांसि वाजान्[11], सन्ति कामासो हरिवो ददिष् ट्वम्[12], पावकशोचे वेष् ट्वम्[13], एतं शंसमिन्द्रास्मयुष् ट्वम्[14], शुचिष् ट्वमसि प्प्रियो न मित्त्रः[15] इति । उक्तं हि ऋग्वेदप्रातिशाक्ख्ये— "तत् ततन्न्युस् ततक्क्षुस् तन् तौग्र्र्चमित्त्युत्तरेषु निः; पायुभिऽ पर्तृभिस् त्तिरभिर् ददिर् वेरस्मयुश् शुचिः, उत्तरे त्वमिति"[16] इति । पाणिनिनाऽपि "युष्मत्–तत्–ततक्क्षुष्ष्वन्तऽपादम्"[17] इति विशेषेणोल्लिखितम् ॥२१५–२१६॥

ईयुष् टे वावृधुष् टे च क्रतुष् टञ् च सधिष् टव ।
गोभिष् टरेमेत्त्येतेषु सस् तु षम् स्यात् पदान्तगः ॥२१७॥

उदाहरणानि यथा शाकलऋग्वेदसंहितायाम्— ईयुष् टे ये पूर्वतरामपश्श्यन्[18], पुरु शंसेन वावृधुष् ट इन्द्रम्[19], इन्द्र क्रतुष् टमाभर[20], अप्स्वग्ने सधिष् टव[21], गोभिष् टरेमामतिन् दुरेवाम्[22] इति । उक्तं हि ऋग्वेदप्रातिशाक्ख्ये— "ईयुष् टे वावृधुष् टे सधिष् टव । गोभिष् टरेम क्रतुष् टम्"[23] इति ॥२१७॥

---

१. ५।२५।५ । २. ५।३३–३५ । ३. १०।६८।८ ।
४. १।१४१।१३ । ५. ४।५८।४ । ६. १।११७।१५ ।
७. १।११८।६। ८. ६।७१।३। ९. ६।४८।१०। १०. ९।६७।२६।
११. २।१७।८। १२. ८।२१।६। १३. ६।१५।१४। १४. १०।९३।२१।
१५. १।९१।३ । १६. ५।३६,३७ । १७. अष्टा. ८।३।१०३ ।
१८. १।११३।११ । १९. १०।७३।२ । २०. ५।३५।१ ।
२१. ८।४३।९ । २२. १०।४२।१० । २३. ५।३८ ।

ऋग्वेदप्रातिशाक्ख्योक्तम् पदाद्द्यन्तस्स्थितस्स्य हि ।
प्रायष् षत्त्वं सस्स्य प्रोक्तमिहैतद् दिक्प्रदर्शनम् ।।२१८।।
सर्वेषाम् प्रातिशाक्ख्यानां समाहृत्य विधीन् वयम् ।
वक्ष्यामोऽष्टाद्ध्यायिकाया व्याक्ख्याने विस्तरादिदम् ।।२१९।।

वेदलोकसाधारणं हि षत्त्वविधानम् पाणिनीये व्याकरणे विस्तरेणाऽनुविहितम्; वेदमात्त्रविषयन् तु षत्त्वम् प्रयेण ऋग्वेदविषयकमेवोक्तमिति ऋग्वेदविषयकमेव षत्त्वमत्त्राऽस्माभिरपि दिक्प्रदर्शनरूपेण प्रतिपादितम् बोद्ध्यम् ।।२१८–२१९।।

(७) हकारस्स्य वर्गचतुर्थभावः

भाषायावँ वा हस्स्य वर्गतृतीयेब्भ्यः परस्स्य तु ।
पूर्वसस्स्थानको वर्गचतुर्थस् स्याच् छ्रुतावपि ।।२२०।।
मते शैत्त्यायनादीनान् तृतीयस्स्य च हस्स्य च ।
मद्ध्ये तृतीयसस्स्थानचतुर्थोपजनो भवेत् ।।२२१।।

उदाहरणानि यथा— वाग् घुतः[१], अवाड् ढव्व्यानि सुरभीणि कृत्त्वी[२], उद् धर्षय मघवन्[३]; पूर्वा ककुब् भेमवर्णा, अर्वाग्घ्ट्येनम्[४] इत्त्यादीनि बोद्ध्यानि । एतद्विषये वचनानि च— "पदान्तैरेव तृतीयभूतैस् तेषाम् चतुर्थानुदयो हकारः"[५] इति ऋग्वेदप्रातिशाक्ख्ये; शुक्लयजुर्वेदप्रातिशाक्ख्ये च— "हश् च तस्म्मात् त्पूर्व्वचतुर्त्थम्"[६] इति; तैत्तिरीयप्रातिशाक्ख्ये च— "प्रथमपूर्वो हकारश् चतुर्थन् तस्स्य सस्स्थानम् प्लाक्क्षिकौण्डिन्न्यगौतमपौष्करसादीनाम्, अविकृत एकेषाम्, चतुर्थोऽन्तरे शैत्त्यायनादीनाम्"[७] इति; ऋक्तन्त्रे च— तृतीयाद् धश् चतुर्थम्[८] इति; पाणिनीयव्याकरणे च— "झयो होऽन्न्यतरस्स्याम्"[९] इति । अत्त्र च यद्द्यपि वेदविषयेऽपि तैत्तिरीयप्रातिशाक्ख्ये विकल्प उक्त इति कस्स्याम् चिल् लुप्तायां शाखायान् तस्स्य विकल्पस्स्य चरितार्थताऽनुमीयते तथापि उपलब्भ्यमानासु शाखासु तु नित्त्य एवाऽयवँ विकारो दृश्श्यते । लोके तु इच्छाविकल्प एव ।।२२०–२२१।।

(ऊ) अथ व्यञ्जनद्वित्त्वनिरूपणम्

पदान्ते पदमद्ध्ये वा पदादावपि च स्स्थितम् ।
स्वरात् परवँ व्यञ्जनं स्याद् द्विरुक्तवँ व्यञ्जने परे ।।२२२।।

---

१. मा.सं. ३९।५। २. तत्त्रैव १९।६६। ३. तत्त्रैव १७।४२। ४. तै.सं. ६।३।३; तै.प्रा. ५।४०। ५. ४।५। ६. ४।१२४। ७. ५।३८–४०। ८. ४।४।६(१७६)। ९. अष्टा. ८।४।६२।

उदाहरणानि यथा माद्ध्यन्दिनीयसंहितायाम्— अस्मिन्नोपतौ[1], आप्प्यायद्ध्वम्[2], माऽघशंसो द्ध्रुवाः[3] इति। एतद्विषये वचनानि च— "स्वरानुस्स्वारोपहितो द्विरुच्यते सयँयोगादिस् स क्करमोऽविक्करमे सन्"[4] इति ऋग्वेदप्रातिशाख्ये; शुक्लयजुर्वेदप्रातिशाख्ये च– "स्वरात् त्सयँयोगादिर् द्द्विरुच्यते सर्व्वत्तर"[5] इति; तैत्तिरीयप्रातिशाख्ये च— "स्वरपूर्व्वँ व्यञ्जनन् द्विवर्णवँ व्यञ्जनपरम्"[6] इति; ऋक्तन्त्रे च– "रात् सण्"[7] इति; शौनकीयचतुरद्ध्यायिकायाञ् च– "सयँयोगादिस्स्वरात्"[8] इति; पाणिनीयव्याकरणे च— "अनचि च"[9] इति। शैशिरीयशिक्षायाम्, शौनकशिक्षायाम्; याज्ञवल्क्यशिक्षायाम्, वर्णरत्नप्रदीपिकायाम्, प्रातिशाख्यप्रदीपशिक्षायाम्, माद्ध्यन्दिनीयशिक्षायाम्, केशवीयशिक्षायाम्, वर्णोच्चारणप्रकार–सन्धि–विवृत्ति–स्वरभक्ति–लक्षणपरिशिष्टशिक्षायाम्; चारायणीयशिक्षायाम्, व्यासशिक्षायाम्, शम्भुशिक्षायाम्, वासिष्ठशिक्षायाम्, आत्तरेयशिक्षायाम्, कौण्डिन्न्यशिक्षायाम्, सर्वसम्मतशिक्षायाम्, पारिशिक्षायाम्, नवशिक्षायाम्, शिक्षासमुच्चये; नारदीयशिक्षायाम्, लोमशीयशिक्षायाम्, गौतमीयशिक्षायाम्; माण्डूक्यां शिक्षायाञ् चैतादृशस्य द्वित्त्वस्य विषये वचनानि प्राप्प्यन्ते। तत्तर माण्डूक्याश् शिक्षायाः "वर्णा विंशतिरेकश् च येषान् द्विर्भाव इष्ष्यते। प्रथमा मद्ध्यमाश् चाऽन्त्या यलवाश् शषसास् तथा"[10] इत्त्यादि वचनं विशेषतस् स्मरणीयम् ॥२२२॥

द्वितीयानाञ् चतुर्थानान् द्वित्त्वे जाते तयोर् द्वयोः।
पूर्वस्स्य तु स्स्यात् प्रथमस् तृतीयश् च यथायथम् ॥२२३॥

उदाहरणानि यथा माद्ध्यन्दिनीयसंहितायाम्— विक्ख्याय[11], आजिग्घर[12], मीड्ढ्वः[13], रात्थ्यः[14], अद्ध्वनः[15] इत्त्यादीनि। उक्तं हि ऋग्वेदप्रातिशाख्ये— "सोष्मा तु पूर्वेण सहोच्यते सकृत् स्वेन"[16] इति; शुक्लयजुर्वेदप्रातिशाख्ये च— "प्रथमैर्द् द्वितीयास्स्तृतीयैश् च् चतुर्त्थाः"[17] इति; तैत्तिरीयप्रातिशाख्ये च— "द्वितीयचतुर्थयोस्

---

१. मा. सं. १।१। २. तत्तरैव। ३. तत्तरैव। ४. ६।१। ५. ४।१०१। ६. १४।१। ७. ५।६।४(२६९)। ८. ३।२८। ९. अष्टा. ८।४।४७। १०. श्लो. १२२–१२४(शि.स.,पृ.४७३–४७४)। ११. ११।२०। १२. ८।४२। १३. १६।५०। १४. २३।१३। १५. ४।१९। १६. ६।२। १७. ४।११०।

तु व्यञ्जनोत्तरयोः पूर्वः"[1] इति; "रेफपूर्वयोश् च नित्त्यम्, लकारपूर्वे च"[2] इति च ॥२२३॥

अनुस्स्वारादपि परवँ् व्यञ्जनवँ् व्यञ्जने परे ।
उच्च्यते द्द्विरिति प्प्राह मुनिर् बाह्ववृच्च्यपार्षदे ॥२२४॥

उदाहरणयँ् यथा शाकलऋग्वेदसंहितायाम्— सोमानं स्स्वरणम्[3] इति । उक्तं हि ऋग्वेदप्रातिशाक्ख्ये— "स्वरानुस्स्वारोपहितो द्द्विरुच्च्यते सयँ्योगादिस् स क्क्रमोऽविक्क्रमे सन्"[4] इति ॥२२४॥

आक्खिदते प्रक्खिदते इत्त्यत्तर तु स्वरेऽपि च ।
खकारो द्द्वित्त्वमाप्नोति आम्नाये तैत्तरीयके ॥२२५॥

तथा हि तैत्तिरीयसंहितायाम्— "नम आक्खिदते च प्रक्खिदते च"[5] इति अधीयते । उक्तं हि तैत्तिरीयप्रातिशाक्ख्ये— "उपसर्गपाथएषोऽत्यातिधामपरमभूतेपूर्वेषु छखिभुजेषु च"[6] इति ॥२२५॥

ह्रस्स्वात् स्वरात् परस्स्य स्स्याच् छस्स्य द्द्वित्त्वं स्वरेऽपि च ।
प्रायस् सर्वत्तर दीर्घात् तु विकल्पेन हि तद् भवेत् ॥२२६॥

उदाहरणानि यथा— उप च्छायामिव घृणेः[7], तुच्छ्येनाव्भ्रपिहितं यदासीत्[8], प्रच्छच्छन्दः[9], एष च्छागः[10], धामच्छदिव[11] इत्त्यादीनि । एतद्विषये च— "असयँ्योगादिरपि च्छकारः"[12] इति, "सहातिहाय पवमान यस्स्य द्वे तने चेत्त्युपहितः । छकारः, दीर्घेण च मेतिवर्जम्"[13] इति च ऋग्वेदप्रातिशाक्ख्ये । शुक्लयजुर्वेदप्रातिशाक्ख्ये च— "स्वरश्च् छकारे चकारेण सर्व्वत्तर, यस्स्यातिहाय सहेति न"[14] इति । तैत्तिरीयप्रातिशाक्ख्ये च— "उपसर्गपाथएषोऽत्यातिधामपरमभूतेपूर्वेषु छखिभुजेषु च"[15] इति । ऋक्तन्त्रे च— "छः, माव्भ्याम्"[16] इति । शौनकीयचतुरद्ध्यायिकायान् तु व्यञ्जनद्वित्त्वप्रकरणस्स्य त्त्रुटितत्त्वादेतद्विषयको नियमोऽनुपलब्भ्यमानोऽस्ति । पाणिनीये व्याकरणे च— "छे च, आङमाङोश् च, दीर्घात्, पदान्ताद् वा"[17] इति । तत्तर "दीर्घात् पदान्ताद् वा विश्श्वजनादीनाञ् छन्दसि (उपसङ्ख्यानङ् कर्त्तव्यम्)"[18] इति च

---

१. १४।५ । २. १४।६,७ । ३. १।१८।१ । ४. ६।१ ।
५. ४।५।९ । ६. १४।८ । ७. शा. ऋ. म. सं. ६।१६।३८ ।
८. तत्त्रैव १०।१२९।३। ९. मा.सं. १५।५। १०. तै.सं. ४।६।८ ।
११. तत्त्रैव २।४।१० । १२. ६।३ । १३. ६।१२,१३ ।
१४. ४।२५,२६ । १५. १४।८ । १६. ५।६।२,३ ।
१७. अष्टा. ६।१।७३–७६ । १८. पा. व्या. भा. ६।१।७६ ।

वार्तिकम् । एतस्य समीचीनतरवँ् व्याक्ख्यानमुदाहरणानि च युक्ततराणि चाऽष्टाद्ध्यायीव्याक्ख्याने विस्तरेण प्रदर्शयिष्यामः ।।२२६।।

परिब्भुजेत्यत्तर भश् च स्वरेऽपि हि परे सति ।

आत्तरेयशाखायान् द्वित्त्वन् नित्त्यमाप्नोति निश्चितम् ।।२२७।।

तथा हि "तयाऽस्प्मान् विश्श्वतस्त्वमयक्क्षमया परिब्भुज"[1] इति तैत्तिरीयसंहितायामधीयते । तैत्तिरीयप्रातिशाक्ख्ये चाऽयवँ् विषय उल्लिखितोऽस्ति[2] ।।२२७।।

रेफात् परवँ् व्यञ्जनं हि व्यञ्जने च स्स्वरेऽपि च ।

परे सति द्द्विरुक्तं स्यान् नैव रेफो द्द्विरुच्यते ।।२२८।।

उदाहरणानि यथा— अर्द्धवँ् वीरस्स्य[3], ऊर्ज्जे[4], सूर्य्यः[5], वर्ष्ष्याय[6] इत्त्यादीनि । उक्तं हि ऋग्वेदप्रातिशाक्ख्ये— "परं रेफात्"[7] इति, "न रेफः"[8] इति च । शुक्लयजुर्वेदप्रातिशाक्ख्येऽपि— परन् तु रेफहकाराब्भ्याम्"[9] इति । तैत्तिरीयप्रातिशाक्ख्ये च— "रेफात् परञ् च"[10] इति, "अवसाने रविसर्जनीयजिह्वामूलीयोपद्ध्मानीयाः"[11] इति च । ऋक्तन्त्रेऽपि— "(प)रं ह्रात्"[12] इति । शौनकीयचतुरद्ध्यायिकायाम् च— "[न] रेफहकारौ परन् ताब्भ्याम्"[13] इति । पाणिनीयव्याकरणे च— "अचो रहाब्भ्यान् द्वे"[14] इति; "नेमौ रहौ कार्यिणौ द्विर्वचनस्स्य । किन् तर्हि । निमित्तमिमौ रहौ द्विर्वचनस्स्य । तद् यथा । ब्राह्म्मणा भोज्ज्यन्ताम् माठरकौण्डिन्न्यौ परिवेविष्टामिति नेदानीन् तौ भुञ्जाते"[15] इति च भाष्ष्ये ।।२२८।।

स्पर्शस् स्वरे व्यञ्जनेऽपि परे द्द्विस् स्याद् धि लात् परः ।

अस्पर्शे व्यञ्जने लो हि द्द्विरुच्येत न संशयः ।।२२९।।

वशहेषु न लो द्विस् स्यादिति केचन मन्न्वते ।

स्वरभक्त्या व्यवायाद् धि न लो द्विश् शहयोर् भवेत् ।।२३०।।

उदाहरणानि यथा— महत् तदुल्ब्बं स्थविरम्[16], कल्प्पान् जुहोति[17], शल्क्कैः[18], विशल्ल्यो बाणवान्[19] इत्त्यादीनि । उक्तं हि ऋग्वेदप्राति-

---

१. ४।५।१।४ । २. १४।८ । ३. शा.ऋ.म.सं. ७।१८।१६ । ४. मा. सं. १।१ । ५. तत्त्रैव ३१।१२ । ६. तत्त्रैव १६।४८ । ७. ६।४। ८. ६।८। ९. ४।१०२। १०. १४।४। ११. १४।१५। १२. ५।६।५(२७०)। १३. ३।३१ । १४. अष्टा. ८।४।४६ । १५. पा.व्या.भा. हयवरट् इत्त्यत्तर,वा.५। १६. शा.ऋ.म.सं. १०।५१।१। १७. तै.सं. ५।४।८। १८. तत्त्रैव ५।४।२। १९. तत्त्रैव ४।५।१।

शाक्ख्ये— "स्पर्श एवलँ लकारात्"[१] इति; शुक्लयजुर्वेदप्रातिशाक्ख्ये च— "ऊष्मानस्तथाब्भ्यश्च च स्पर्शः"[२] इति। तैत्तिरीयप्रातिशाक्ख्ये च—"लकारपूर्वे च"[३] इति। ऋक्तन्त्रे विशेषविधानस्याभावात् सयँयोगादेर् लकारस्यैव सामवेदेषु द्वित्त्वम् भवतीति प्रतीयते। शौनकीयचतुरध्यायिकायान् तु द्वित्त्वप्रकरणस्य त्रुटितत्वादथर्ववेदे कीदृशी व्यवस्थाऽत्रेति न ततोऽवसातुं शक्यते। पाणिनीयव्याकरणे तु— "अनचि च"[४] इति सूत्रात् सयँयोगादेर् लकारस्य द्वित्त्वम् प्रतीयते; "द्विर्वचने यणो मयः" इति वार्तिकात् तु लकारात् परस्य स्पर्शस्यैव द्वित्त्वम् प्रतीयते। उक्तस्य वार्तिकस्य व्याक्ख्याने "द्विर्वचने यणो मय इति वक्तव्यम्। किमुदाहरणम्? यदि यण इति पञ्चमी मय इति षष्ठी उल्क्का वल्मीकमित्युदाहरणम्; अथ मय इति पञ्चमी यण इति षष्ठी दध्यत्र मध्वत्रेत्युदाहरणम्"[५] इति उक्तत्वात् तु अव्यवस्थैव प्रतीयते यदिशब्दप्रयोगात्। तत्र च यद्द्यपि दध्यत्रेत्यादिकमप्युच्चरितम् भवितुं शक्नोति तथाऽपि अयम् पक्क्ष उपलब्भ्यमानेषु प्रातिशाक्ख्येषु अनुपलब्भ्यमानश्चेति चिन्त्यः प्रतीयते ॥२२९–२३०॥

ऊष्मब्भ्यस् तु परे स्पर्शे स्पर्शो वाजसनेयके।
नित्यन् द्विरुच्यतेऽन्यत्र विकल्पेन द्द्विरुच्यते ॥२३१॥
स्यात् तैत्तिरीयके स्पर्शेऽघोषकादूष्मणः परे।
तयोर् मध्ये खलु पर–सस्थानप्रथमागमः ॥२३२॥
प्लाक्क्षेर् मते परे स्पर्शेऽघोष एव ह्यययँ विधिः।
प्लाक्क्षायणस्य तु मते पञ्चमे पर एव च ॥२३३॥

उदाहरणानि यथा— वायवस्त्थ[६], श्रेष्ट्ठतमाय[७], वस्त्तेन[८], अस्म्मिन्न्गोपतौ[९], विष्ण्णो हव्व्यं रक्क्ष[१०], वह्न्नितमं सस्न्नितमम्[११], जुष्ट्टतमम्[१२]; प्रास्त्तौदृष्व्वौजा ऋष्व्वेभिः[१३], प्र वस्प्पड्क्करन् सुविताय[१४], अस्स्मे[१५], व्रह्म्म, ब्रह्ह्म, अह्न्ना, अह्ह्ना[१६]; यक्काम-

---

१. ६।५। २. ४।१०३। ३. १४।७।
४. अष्टा. ८।४।४७। ५. पा.व्या.भा. ८।४।४७। ६. मा.सं. १।१।
७. तत्त्रैव। ८. तत्त्रैव। ९. तत्त्रैव। १०. तत्त्रैव १।४।
११. तत्त्रैव १।८। १२. तत्त्रैव। १३. शा.ऋ.म.सं १०।१०५।६।
१४. तत्त्रैव ५।५९।१। १५. ऋ. प्रा. उ. भा. ६।६।
१६. शा. ऋ. म. सं. ४।१६।३।

येत[1], यऽ प्पाप्मना[2], नवतिञ् च श्च्ञथिष्ट्टम्[3], यत् प्राश्च्नीयात्[4], अश्त्नाति[5], यदख्ष्ट्णया[6], कृष्ट्णोसि[7], अश्त्नुते[8], पृश्त्निमालभेत[9], अफ्सुस्त्नाति[10], तीर्त्थे स्त्नाति[11], अश्प्मन्नूर्ज्जम्[12], ग्रीष्प्मे मद्ध्यन्दिने[13], अयस्प्मयम्[14]; प्रेष्ष्ठवँ वो अतिथिम्[15], त्वामग्ने पुष्ष्करादधि[16], अग्ग्ने विवस्स्वदाभरास्स्मब्भ्यमूतये महे[17]; नमस्स्ते अग्ग्न ओजसे[18] इत्त्यादीनि। उक्तं हि ऋग्वेदप्रातिशाख्ये— "ऊष्मणो वा"[19] इति। तद्व्याख्याने उव्वटस् तु "ऊष्मणऽ परेषाम् प्रथमद्वितीयानामेव स्पर्शानान् द्विर्वचनमिष्यते, न सर्वेषाम्। तस्माद् 'अस्स्मे' इत्त्यूष्मण एव द्विर्वचनम् भवति न परस्स्य" इति, "हकारात् सर्वेषावँ विभाषा द्विर्वचनमिष्यते" इति च। शुक्लयजुर्वेदप्रातिशाख्ये तु— "ऊष्म्मानृतस्त्थाब्भ्यश्च् च स्प्पर्शः"[20] इति। तैत्तिरीयप्रातिशाख्ये तु— "अघोषादूष्मणऽ परऽ प्रथमोऽभिनिधानस् स्पर्शपरात् तस्स्य सस्त्थानः"[21] इति, "अघोषे प्लाक्क्षेः, उत्तमपरात् तु प्लाक्क्षायणस्स्य"[22] इति च। शौनकीयचतुरद्ध्यायिकायान् तु द्वित्त्वप्रकरणे कश्चनोंऽशस् त्रुटित इति पूर्वमेवावेदितम्। पाणिनीयव्याकरणे च— "शरऽ खयः"[23] इति वार्तिकम्; "शरऽ खय इति वक्तव्व्यम्। किमुदाहरणम्। यदि शर इति पञ्चमी खय इति षष्ठी स्त्थाली स्त्थातेत्त्युदाहरणम्। अथ खय इति पञ्चमी शर इति षष्ठी वत्स्सः, क्ष्षीरम्, अप्स्सरा इत्त्युदाहरणम्"[24] इति भाष्यम्। तत्तर स्थालीत्त्यादिको हि पाठश् चर्त्वस्स्य निवारयितुमशक्क्यत्त्वादशुद्ध इत्त्यस्माभिस् स्त्थालीत्त्यादिरूपेण पठितः। स्त्थाली, स्त्थाता, क्ष्षीरम् इत्त्युदाहरणानि "अचः"[25] इत्त्यधिकारे वार्तिकानाम् पाठादसुसङ्गतानीव भान्ति। "वोष्मा सयँ युक्तोऽनुपधः"[26] इति ऋग्वेदप्रातिशाख्यवचनात् स्स्थाली इत्त्यादिकन् तु

---

१. तै.सं. २।१।२। २. तत्तरैव २।३।१३। ३. तत्तरैव ३।२।११।३।
४. तत्तरैव ३।६।८।१। ५. तत्तरैव १।६।७। ६. तत्तरैव ५।२।७।
७. तत्तरैव १।१।११। ८. तत्तरैव ५।१।३।४। ९. तत्तरैव २।१।६।
१०. तत्तरैव ६।१।१। ११. तत्तरैव ६।१।२। १२. तत्तरैव ४।६।१।
१३. तत्तरैव २।१।२। १४. तत्तरैव ४।२।५। १५. कौ.सा.आ.सं. ५।
१६. तत्तरैव ९। १७. तत्तरैव १०। १८. तत्तरैव ११।
१९. ६।६। २०. ४।१०३। २१. १४।९।
२२. १४।१०,११। २३. पा.व्या.भा. ८।४।४७, वा. २।
२४. तत्तरैव। २५. अष्टा. ८।४।४६। २६. ६।९।

युक्तम्, किन् तु न तत् सम्बद्धवार्तिकेनाऽनूवाक्ख्यायते । क्ष्षीरम् इत्त्यत्तर तु सयँ युक्तस्स्याऽनुपधस्स्य स्पर्शस्स्य द्विर्वचननिमित्तत्वस्स्याऽनूवाक्ख्यायकम् प्रातिशाक्ख्यादिवचनन् नैवोपलब्भ्यते।तथापि वार्तिकभाष्योक्तप्प्रकारेणापि पदानामुच्चारायितुं शक्क्यत्वात् स्युरेतानि वचनानि लौकिकप्प्रयोगानूवाक्ख्यानपराणीति सम्भाव्यते ।।२३२–२३४।।

ऊष्मोत्तरस्स्य स्स्पर्शस्स्याऽसति द्द्वित्त्वे खलूष्मणः ।
द्वित्त्वम् भवेदेव हस्स्य द्द्वित्त्वन् नेच्छन्ति के चन ।।२३५।।

उदाहरणानि यथा— अह्ह्ना[1], ऽरह्ह्म[2], अपराह्ह्णे[3] इति । तथा हि ऋग्वेदप्रातिशाक्ख्ये उत्सर्गप्राप्तस्स्य[4] हकारद्वित्त्वस्स्याऽनिषिद्धत्वात् तत्सम्बद्धायां शाखायामूष्मोत्तरस्स्य स्स्पर्शस्स्य द्द्वित्त्वस्स्य वैकल्पिकत्त्वात् तदभावपक्क्षे हकारस्स्यापि उत्सर्गप्राप्तन् द्वित्त्वम् भवेदेव । तैत्तिरीयप्रातिशाक्ख्येऽपि सामान्यतया हकारद्वित्त्वस्स्याऽनिषिद्धत्वात् तत्सम्बद्धायां शाखायाऽ चोत्सर्गप्राप्तं हकारद्वित्त्वं स्यादेव । उक्तं हि वैदिकाभरणकारेण— "स्वरपूर्ववँ व्यञ्जनम्[5] इत्त्यविशेषेण विधानाद्, रविसर्जनीयादिभिस् सह[6] हकारस्स्याऽपाठाच् च, तथा 'रेफपरश्च् च हकारः'[7] इति परमते विशेषेण निषेधोऽप्प्यनन्यत्तर द्वित्त्वम् प्राप्तमेव दर्शयति । अतोऽस्मच्छाखायां हकारस्स्य प्राप्तौ सत्त्यामप्प्रतिषिद्धन् द्वित्त्वमिष्ष्यते । शिक्क्षाव्याकरणे तु शाखान्तरे सावकाशे इत्त्यविरोधः"[8] इति । दृश्श्यते च आत्तरेयतैत्तिरीयसंहितायां रेफपरकहकारस्स्य द्वित्त्वं सम्प्रति । एतच् चाऽनुपदम् प्रदर्शयिष्ष्यामः । "परन् तु रेफहकाराब्भ्याम्"[9] इति वदता शुक्लयजुर्वेदप्रातिशाक्ख्यकारेण तु हकारद्द्वित्त्वमपोढम् । तथैव "(प)रं ह्रात्"[10] इति वदत ऋक्तन्त्रकारेणाऽपि कृतम् । शौनकीयचतुरद्ध्यायिकाकारोऽपि "[न] रेफहकारौ, परन् ताब्भ्याम्"[11] इति वदति । यद्द्यपि पाणिनीयस्स्य "अचो रहाब्भ्यान् द्वे"[12] इति सूत्त्रस्स्य वैकल्पिकत्त्वात् परद्वित्त्वाभावे "अनचि च"[13] इति रेफस्स्य तु द्वित्त्वम् प्राप्नोति, तथापि हकारस्स्य तु यरत्वाभावान् न कदाऽपि द्वित्त्वम् पाणिनीयव्या-

---

१. शा. ऋ. म. सं. ४।१६।३ । २. तै. सं. १।१।७।१ ।
३. तत्त्रैव २।१।२।५ । ४. ऋ.प्रा. ६।१। ५. तै.प्रा. १४।१।
६. तत्त्रैव १४।१५ । ७. तत्त्रैव १४।१९ । ८. १४।१५ ।
९. ४।१०२ । १०. ५।६।५ । ११. ३।३१ ।
१२. अष्टा. ८।४।४६ । १३. तत्त्रैव ८।४।४७ ।

करणेन सम्भाव्यते। "नैमौ रहौ कार्यिणौ द्विर्वचनस्य। किन्तर्हि। निमित्तमिमौ रहौ द्विर्वचनस्य। तद् यथा ब्राह्मणा भोज्यन्ताम् माठरकौण्डिन्न्यौ परिवेविष्टामिति, नेदानीन् तौ भुञ्जाते"[1] इति वदता भाष्यकारेण तु रहयोर् द्वयोरेव सर्वथा द्वित्त्वाभावः प्रतिपादित इव प्रतीयते। अथवा यथा परिवेषणे व्याप्रियमाणौ माठरकौण्डिन्न्यौ नेदानीम् भुञ्जाते, परिवेषणव्यापारनिवृत्तौ तु भोक्ष्येते, तथैव रेफहकारावपि यदा निमित्ततत्वेनाऽनन्यन् द्विर् भावयतस् तदा तौ न द्विर् भवतः,यदा तु पक्षान्तरे नाऽनन्यन् द्विर् भावयतस् तदा द्विरुक्तौ भविष्यत एवेत्यर्थो यदि क्रियते तदाऽपि हकारस्य द्वित्त्वं सूत्रेणैव नैव प्राप्तमिति हकारस्य द्वित्त्वन् न कदापि सम्भाव्यते, रेफस्य तु सम्भाव्यत एव इत्येवाऽऽयाति। **तदिदञ् च पाणिनीयव्याकरणस्य सर्ववेदपारिषदतायाः प्रतिकूलमेव; यतो हि हकारस्य द्वित्त्वं वेदशाखाविशेषे दृश्यते; रेफस्य सर्वं योगादिस्थस्य द्विर्भावस् तु न कुत्राऽपीति। एतच् च न विचारितवं वार्तिककारभाष्यकारादिभिरिति कैव कथा भट्टोजिनागोजिप्रभृतीनाम्।** अत्र "रहाब्भ्यान् तु परन् नित्यङ्करमयन्ति विचक्षणाः। रहौ तु यत्र दृश्येते न क्करमस् तु तयोर् भवेत्॥ रयोर् यदि हकारस् तु दृश्यते मद्ध्यगः क्व चित्। द्विर्भावन् तत्र जानीयात् प्रेङ्खा स्तर्हृत्ये निदर्शनम्"[2] इति, "रेफपूर्वो हकारस् तु रेफात् परमथाऽपि वा। अनुस्स्वारात् परो यत्र हकारः क्रमति त्रिषु"[3] इति च लोमशीयशिक्षावचनम्, "न रेफे वा हकारे वा द्विर्भावो जायते क्व चित्" इति नारदीयशिक्षायाः[4] माण्डूक्याश् शिक्षायाश्[5] च वचनमपि स्मरणीयम्॥२३५॥

हात् परवं व्यञ्जनन् द्विस् स्याद् वेदे वाजसनेयिनाम्।
न हकारो द्विरुक्तस् स्यादिति के चन मन्वते॥२३६॥

उदाहरणानि यथा— गृह्णणामि[6], वह्नन्नितमम्[7], ब्रह्मवनि[8], गुह्यमानः[9], बह्वीः[10] इति। प्रत्युदाहरणानि च अह्रुतमसि[11], यज्ञं ञ-

---

१. हयवरट् इत्यत्र। २. २।५,६। (शि. स., पृ. ४५७)।
३. ८।५ (शि. स., पृ. ४६२)। ४. २।२।६ (शि.स., पृ. ४२८)।
५. श्लो. १२३ (शि.स., पृ. ४७३)। ६. मा.स. १।१५।
७. तत्रैव १।८। ८. तत्रैव १।१७। ९. तत्रैव २।१७।
१०. तत्रैव १।१। ११. तत्रैव १।९।

पतिर् ह्वार्षीत्[1], बर्हिषे[2] इति । यत्तर हकारात् परत्तर स्पर्शो वाऽन्तस्था वा तत्तर तु कारिकोक्तोऽर्थस् स्फुटमायाति "परन् तु रेफहकाराब्भ्याम्"[3] इति शुक्लयजुर्वेदप्रातिशाक्ख्यवचनात् । **यत्तर तु रेफहकारयोस्सयँ योगस्स्वरादुत्तरस् तत्तर तु उक्तसूत्तरस्स्वरसात् सयँ योगादे रेफस्य हकारस्य वा द्वित्त्वेऽसत्यपि तदुत्तरस्य रेफस्य हकारस्य च द्वित्त्वमनेन सूत्तरेण कथन् नाऽनुमतं स्यात् ?** रेफाद् हकारे परे स्वरभक्त्या व्यवायाद् हकारस्य द्वित्त्वेऽसम्भवति अपि, 'यज्जँ अपतिर् ह्वार्षीत्' इत्यादिषु स्वरभक्त्यभावस्स्थलेषु हकारस्य, **हकारात् रेफे परे रेफस्य च द्वित्त्वन् तु स्यादेवेति** भृशवँ विचिन्तनीयमत्तर वाजसनेयिभिः।'यज्जँ अपतिर् ह्वार्षीत्' इत्यादिषु रेफहकारयुग्मकात् परस्य वकारादेर् द्वित्त्वम् 'परन् तु रेफहकाराब्भ्याम्' इत्यादिनोक्तं स्यान् न वेति च चिन्तनीयम् । यच् च "परं रेफहकाराब्भ्यावँ व्यञ्जनन् तूष्मवर्जितम् । द्वित्त्वमापद्द्यते रेफहकारौ तु न कुत्तर चित्"[4] इति अमरेशेन वर्णरत्नप्रदीपिकायामुक्तम्, तद्गतानुगतिकतया ज्योत्स्नाकारेण च भाषितम्[5] तदपि सूत्तरानुकूलन् न वेति विज्ज्ञैर् विभावनीयम् ॥२३६॥

रेफे परे तु द्द्विर्भावो हकारस्य कदापि हि ।
न भवेदिति हारीतो मेनेऽन्न्ये न हि मन्न्वते ॥२३७॥

तदुक्तन् तैत्तिरीयप्रातिशाक्ख्ये निषेधाधिकारे हारीतस्स्येत्त्यनुवर्तमाने "रेफपरश् च हकारः"[6] इति । अतोऽन्न्येषाम् मते तैत्तिरीयकेऽरेफपरकस्य हकारस्य च प्राप्तन् द्वित्त्वम् भवत्त्येवेति विज्ज्ञायते[7] ॥२३६॥

सयँ योगादौ च रपरो हो द्विर् नेति हि के चन ।
तत्तरापि द्वित्त्वमात्तरेयसंहितायान् तु दृश्यते ॥२३८॥

तथा हि तैत्तिरीयप्रातिशाक्ख्ये— "अथ न"[8] इत्त्यधिकारे "रेफपरश्च् च हकारः"[9] इति । आत्तरेय–तैत्तिरीयसंहितायान् तु दुदुह्ह्रे अह्ह्रयः[10], अह्ह्रुतमसि[11] इत्त्येव पट्ठ्यते । तथा च व्यासशिक्क्षायामुत्सर्गद्वित्त्वसूत्तरे वेदतैजसे[12] "अह्ह्रुतमसि" इत्त्युदाहृतमपि प्राप्प्यते । "अतोऽस्मच्छाखायां हकारस्य प्राप्तौ सत्त्यामप्प्रतिषिद्धन् द्वित्त्वमिष्ष्यते । शिक्क्षाव्याकरणे तु शाखान्तरे सावकाशे इत्त्यविरोधः"

---

१. मा.सं.१।२,९। २. तत्तरैव२।१। ३. ४।१०२। ४. श्लो. १५०–१५१ (शि.स.,पृ.१३०)। ५. सू. ३४६,पृ. १२०–१२१ । ६. १४।१९ । ७. द्र.तै.सं. ५।१।५; तै.प्रा.त्रिभा.र. १४।१६,१९। ८. १४।१४ । ९. १४।१९। १०. १।५।५। ११. १।१।४। १२. सू. ३३७।

इति, "स्वरपूर्ववँ व्यञ्जनम्[1] इत्यविशेषेण विधानाद्, रविसर्जनीयादिभिस्[2] सह हकारस्स्याऽपाठाच् च, तथा 'रेफपरश् च हकारः'[3] इति परमते विशेषेण निषेधोऽप्यन्यत्तर द्वित्त्वम् प्राप्तमेव दर्शयति"[4] इति च वैदिकाभरणकारोऽप्याह स्म ॥२३८॥

उपद्ध्मानीयाच् च जिह्वामूलीयाच् च परं सदा ।
व्यञ्जनन् द्विर् भवेत् काण्वशाखादिष्ष्विति निश्चितम् ॥२३९॥

तदुक्तं शुक्लयजुर्वेदप्रातिशाख्ये— "जिह्वामूलीयोपद्ध्मानीयाब्भ्याञ् च"[5] इति । एतच् च "उष्मानतस्त्थाबभ्यश्च् च स्पर्शः"[6] इति सूत्रेणैव गतार्थमपि प्रपञ्चार्थमुक्तम् प्रातिशाख्यकारेणेति अस्माभिरपि तथैव कृतम् । ऋग्वेदप्रातिशाख्ये "ऊष्मणो वा"[7] इति सूत्रेणैव, तैत्तिरीयप्रातिशाख्ये च— "अघोषादूष्मणः परः प्रथमोऽभिनिधानस् स्पर्शपरात् तस्स्यं सस्थानः"[8] इति सूत्रेणैव चाऽयमर्थः प्रतिपादितः । पाणिनीयव्याकरणेऽपि अयोगवाहानामट्सु च शर्षु चाल्षु च ग्रहणात्[9] "शरःखयः"[10] इत्येव एष विधिरुक्तः।नारदेन चोक्तः[11]॥२३९॥

विसर्जनीयात् परश् च व्व्यञ्जनोत्तरकश् च यः ।
स्पर्शस् स द्द्वित्त्वमाप्नोति नित्त्यवँ वाजसनेयके ॥२४०॥

उदाहरणानि यथा— विष्णोः क्क्रमः[12], नीलङ्गोः क्क्रिमिः[13], देव सवितः प्प्रसुव[14], युञ्जानः प्प्रथमम्[15] इति । तदुक्तं शुक्लयजुर्वेदप्रातिशाख्ये "विसर्ज्जनीयाद् द्व्यञ्जनपरः"[16] इति । एतेन च सूत्रेण "ऊष्मानतस्त्थाबभ्यश्च् च स्पर्शः"[17] इति सूत्रेणैव सिद्धेऽनन्वाख्याने आरब्धेन वस्तुतो न्यङ्कुः कक्कटः[18], वसोः पवित्तरम्[19], याः फलिनीः[20] इत्यादौ माद्ध्यन्दिनीयके द्वित्त्वाभावोऽनन्वाख्यायते । अनन्यत्तर तु यथायथन् द्वित्त्वं स्यादेव वा नैव वा ॥२४०॥

अविद्द्यमानपूर्वस् तु सयँयुक्तोष्मा विकल्पतः ।
द्विरुक्तस् स्यादिति प्प्राह मुनिर् बाह्ववृच्च्यपार्षदे ॥२४१॥

---

१. तै.प्रा. १४।१। २. तत्तरैव १४।१५। ३. तत्तरैव १४।१९। ४. तै. प्रा. वै. आ. १४।१५। ५. ४।१०४। ६. ४।१०३। ७. ६।६। ८. १४।९। ९. पा. व्या. भा., हयवरट् इत्यत्तर वा. ६–८। १०. पा.व्या.भा. ८।४।४७। ११. द्र.ना.शि. २।२।११। १२. मा.सं. १२।५। १३. तत्तरैव २४।३०। १४. तत्तरैव ९।१। १५. तत्तरैव ११।१। १६. ४।१०७। १७. ४।१०३। १८. मा.सं.२४।३२। १९. तत्तरैव १।२। २०. तत्तरैव १२।८९।

उदाहरणानि यथा शाकलऋग्वेदसंहितायाम्— ह्वयाम्यग्निम्[१], श्चोतन्ति कोशाः[२], स्यन्दन्ताङ्कुल्याः[३] इति। विद्द्यमानपूर्वस्तु मुहुरा ह्वरादुनीवृतः[४] इत्यादौ नित्यमेव द्विरुच्यते। तदुक्तम् ऋग्वेदप्रातिशाख्ये— "वोष्मा सयँयुक्तोऽनुपधः"[५] इति ॥२४१॥

दीर्घात् परवँ व्यञ्जनन् तु सयँयोगाद्द्यञ् च द्विर् न हि।
भवेदित्याहुराचार्याः पाणिन्न्युल्लिखिताः खलु ॥२४२॥

तत्तर ऋग्वेदप्रातिशाख्ये— "सयँयुक्तन् तु व्यञ्जनं शाकलेन"[६] इति पठ्यते। तत्तर दीर्घेणेति पदादिरिति चाऽनुवर्तत इति उव्वटेनोक्तम्। तथापि पाणिनीये व्याकरणे तु— "दीर्घादाचार्याणाम्"[७] इत्येवोक्तम्। तत्तर पदादिरित्यनुवृत्तिर् न दृश्यते। तत्तर शाकल्यस्य मतन् तु पृथगेवोल्लिखितम्। अत एवाऽस्माभिः पाणिनीयवँ वचनमेवाऽनुसृत्यैषा कारिका प्रणीता ॥२४२॥

शाकल्यस्य मते नैव व्यञ्जनन् द्विर् भवेदिति।
आचार्यः पाणिनिः प्राह विमृश्यम् पण्डितैरिदम् ॥२४३॥

तथा हि अष्टाद्ध्याय्याम्— "सर्वत्तर शाकल्यस्य"[८] इति। आचार्यस्य पाणिनेरस्य वचनस्य दर्शनात् तु पूर्वोक्ते "सयँयुक्तन् तु व्यञ्जनं शाकलेन"[९] इति ऋग्वेदप्रातिशाख्यवचने पदादिरित्यस्य दीर्घेणेत्यस्य चाऽनुवृत्तिर् न भवतीति प्रतीयते। यदि तु अत्तर तदनुवृत्तिर् भवत्येवेत्युच्यते तदा पाणिनीयवचनस्य "**तस्मादकृतकं शास्त्रं स्मृतिञ् च सनिबन्धनाम्। आश्रितत्यारब्भ्यते शिष्टैश् शब्दानामनुशासनम्**"[१०] इत्यादिना प्रतिपादितं सनिबन्धनपूर्वतरस्स्मृत्याश्रितत्वन् न सुव्याख्यानं स्यादित्यत्तर भृशवँ विचारणीयङ्ग खलु पण्डितैः। अस्माकन् तूव्वटव्याख्यानं हेयम् प्रतिभाति ॥२४३॥

सयँयुक्तेषु तत्रचादिकेषु द्द्वित्वन् न व्यञ्जनेष्विति।
वैयाकरण-मूर्धन्न्य-शाकटायन-सम्मतम् ॥२४४॥

तदिदमप्युक्तमाचार्यपाणिनिना- "त्रिप्प्रभृतिषु शाकटायनस्य"[११] इति ॥२४४॥

---

१. १।३५।१। २. १।८७।२। ३. ५।८३।८।
४. ५।५४।३। ५. ६।९। ६. ६।१४।
७. अष्टा. ८।४।५२। ८. ८।४।५१। ९. ६।१४।
१०. वा. प. १।४३। ११. अष्टा. ८।४।५०।

अवसाने व्यञ्जनस्य प्रातिशाख्येषु सर्वथा ।
द्वित्त्वन् निषिद्धमः केचित् तु द्वित्त्वन् तत्रेति मन्वते।।२४५।।

तदुक्तमृग्वेदप्रातिशाख्ये— "नाऽवसितम्"[1] इति । शुक्लयजुर्वेदप्रातिशाख्ये च— "अवसितञ् च"[2] इति । तैत्तिरीयप्रातिशाख्येऽपि— "अवसाने.."[3]इति। माण्डूक्या शिक्षायामपि विरामे द्वित्त्वन् निषिद्धमस्ति[4] । पाणिनीयव्याकरणे तु— "अवसाने च"[5] इति वार्तिकम् । "अवसाने च द्द्वे भवत इति वक्तव्यम् । वाक्क्, वाक्; त्वक्क्, त्वक्; स्रुक्क्, स्रुक् । तत् तर्हि वक्तव्यम् । न वक्तव्यम् । नाऽयम् प्रसज्ज्यप्रतिषेधोऽचि नेति । पर्युदासोऽयँ यदन्यदच इति" इति च तद्भाष्यम् । तत्तर प्रातिशाख्येषूपलभ्यमानोऽवसानगतव्यञ्जनद्वित्त्वनिषेधो यद्द्यपि वर्क्क्[6], दर्त्त्[7], ऊर्क्क्[8] इत्त्यादिविषयक एव, तथाऽपि "वाक्" इत्त्यादिषु पदपाठादौ संहितावसाने वा द्वित्त्वस्य प्रातिशाख्येषु सर्वथाऽनुल्लिखितत्त्वादस्माभिः कारिकायाम् 'अवसाने व्यञ्जनस्य प्रातिशाख्येषु सर्वथा । द्वित्त्वन् निषिद्धम्' इत्त्युक्तम् । तथापि प्रातिशाख्यादिषु अवसाने स्पर्शे उच्चारिते स्थानकरणविमोक्षस्योक्तत्त्वात्[9] स्थानकरणविमोक्षे च स्थानकरणसयँयोगेनैकस् स्पर्शस् स्थानकरणविमोक्षेण द्द्वितीयस् स्पर्शोऽपरिहार्यतयोच्चरितो भवतीति तत्तर स्स्थानकरणविमोक्षवचनमेव द्वित्त्ववचनस्थानापन्नतया स्वीकर्तुं शक्क्यमिति च के चन मन्न्यन्ते[10] । एवञ् च सति शुक्लयजुर्वेदप्रातिशाख्यस्य "अवसितञ् च"[11] इति वचनस्य सार्थकत्त्वञ् चिन्त्यम् भवति । तत्तर पदपाठादौ क्व चित् स्थानकरणविमोक्षस्याऽभावे सति तु तच् चरितार्थं स्यात् ।।२४५।।

ऋवर्णे च लृवर्णे च सवर्णे च परे सति ।
उत्सर्गप्राप्तन् द्वित्त्वन् तु नेति कात्त्यायनोऽब्रवीत् ।।४४६।।

तदुक्तं शुक्लयजुर्वेदप्रातिशाख्ये— "सवर्णे, ऋवर्णे, लृवर्णे"[12] इति । तदुदाहरणानि च— 'सयँयौमि'[13], 'सवँवपामि'[14], 'अनि-

---

१. ६।७। २. ४।११८। ३. १४।१५। ४. श्लो. १२९ ।
५. पा.व्या.भा. ८।४।४७ वा. ३ । ६. शा.ऋ. म. सं. १।१७४।२ ।
७. तत्तरैव १०।८।९ । ८. मा. सं. १८।९ ।
९. शु. य. प्रा. १।९०, ९१ । १०. या.शि.शि.व.वि.,पृ. १०, ११ ।
११. ४।११८ । १२. ४।११२–११४ । १३. मा. सं. १।२२ ।
१४. तत्तरैव १।२१ ।

ष्कृतः'[१], 'ऋद्धिꣳ क्लृप्तम्'[२] इति भाष्यकारेण प्रदर्शितानि । तत्र "सा विश्श्वायुः"[३] इत्यादिष्वपि तृतीयशकारप्राप्तिशङ्का "सवर्णे" इति सूत्रेण निराकृता । "ऋवर्णे" इति निषेध "ऊष्मान्तस्त्थाब्भ्यश्च् च स्पर्शः"[४] इति प्राप्तस्येति भाष्यकारः । किन् तु तत्र मानम् मृग्यम् । तथा सति असदन्नृतस्य[५], दद्ध्यङ्ऋषिः[६] इत्यत्राऽनिषेध आस्थेयः । तुल्यन्न्यायेन अनिष्कृत इत्यादौ षकारादेर् द्वित्त्वं स्यात् । तैत्तिरीयशाखादिषु तु आच्छृणत्तीत्यादिषु ऋवर्णेऽपि द्वित्त्वन् दृश्यते । शुक्लयजुर्वेदप्रातिशाख्ये तु एतादृशस्थले चकारागमꣳ प्रतिपादितः[७] । सवर्णे परे माण्डूक्क्यां शिक्क्षायामपि द्वित्त्वं निषिद्धन् दृश्यते । उक्तं हि "न क्करमते स्स्वरयमयोर् न वर्गसवर्णयोर् न च विरामे । न च रेफानुस्स्वारे विसर्जनीये तु सर्वत्र"[८] इति । "तुल्यस्स्थानकरणपरे क्रमप्रतिषेधः'[९] इति च गौतमीयशिक्क्षायामप्युक्तम् ॥२४६॥

उत्तमे तु स्स्ववर्गीये सवर्णेऽपि परे सति ।
द्वित्त्वम् भवेदिति प्राह स्स्फुटङ् कात्त्यायनो मुनिः ॥२४७॥

तथाहि शुक्लयजुर्वेदप्रातिशाख्ये– "स्ववर्गीये चाऽनुत्तमे"[१०] इति । अत्र यद्द्यपि उत्तमभिन्ने स्ववर्गीये वर्णे परे अन्तरिक्क्षम् पुरीतता[११] इत्यादौ मकारादेर् द्वित्त्वस्य निषेधꣳ प्राधान्न्येन प्रोक्तस् तथाऽपि उत्तमे तु स्ववर्गीयेऽपि परे याच्चँ्ञा[१२],यज्जँ्ञे[१३],अट्टँ्णारः[१४],ब्रद्धँ्नः[१५] पाप्पँ्मा[१६] इत्यादौ द्वित्त्वमुत्सर्गप्राप्तमनिवारितमित्यप्युक्तमेव । तत्र 'तन् नः' इत्यादौ स्ववर्गीये उत्तमे परे नकारस्य द्विरुक्तिर् भवत्येव इति भाष्यकारावुव्वटाऽनन्तौ । किन् तु एवं सति दद्ध्यङ्ऋषिः[१७], तन्नः[१८],इमम्मे[१९] इत्यादिषु यथा तृतीयङ्कारादीनामनिषेधस् तथैव चतुर्थपञ्चमादीनामपि अनिषेधस् स्यादिति विचार्यं सुधीभिः । अस्माकम् मते तु यान् वर्णानपेक्क्ष्योत्तमत्त्वन् तेषामेव वर्णानामुत्तमे परे द्वित्त्वा-

---

१. मा.सं. २७।४ । २. तत्तरैव १८।११ । ३. तत्तरैव १।४ । ४. शु.य.प्रा. ४।१०३ । ५. मा.सं. २।६ । ६. तत्तरैव ११।३३ । ७. ४।२५ । ८. श्लो. १२९ । ९. १।६ (शि.स., पृ. ४५२) । १०. ४।११७ । ११. मा. सं. २५।८ । १२. तै. सं. १।५।७। १३. तत्तरैव ३।१।११। १४. तत्तरैव ५।६।५। १५.तत्तरैव १।७।१।६। १६. शौ. अ. वे. म. सं. ५।२२।१२ । १७. मा.सं. ११।३३ । १८. तत्तरैव ३३।४२ । १९. तत्तरैव २१।१ ।

नुमतिरिति उत्तमस्योत्तमे परे "सवर्णे"[1] इति द्वित्त्वनिषेध एवेति दद्ध्यङ्ङृषिरित्यादौ न तृतीयङकारादिश्रुतिप्रसक्तिरिति बोद्ध्यम्। अनन्वाख्यातश् च शाखान्तरस्थ एषोऽर्थो "नाऽनुत्तम उत्तमपरः"[2] इति तैत्तिरीयप्रातिशाख्ये ॥२४७॥

उपोत्तथितप्रभृतिषु सवर्णेऽनुत्तमेऽपि च।
द्वित्त्वम् भवेदिति खलु पार्षदेऽसूसुचन् मुनिः ॥२४८॥

तथाहि शुक्लयजुर्वेदप्रातिशाख्ये— "उपोत्तथित[3]उत्तम्भन[4]-मुत्तभानो[5]त्तथायो[6]त्तथितायेति[7]त्तरीणि" इति,बर्हिरङ्क्ताम्[8]भद्रेण पृङ्क्तम्[9] पङ्क्तिः[10] समङ्क्धि[11] परिवृङ्क्धि[12] पाङ्क्तरानिति[13] द्वावनुनासिकौ पूर्वावारपन्तीवर्ज्जमिति च(?)"[14]इति च।तत्तर यथा"द्विस्पर्शम्, वेत्तु वित्त्वाऽसमद्दर्चक् पात्तरमभित्त्वम् मृत्तिका दध्वन् दात्तरं समाववर्त्त्यृद्धिर् वृद्धिरराद्ध्या अर्द्धशुद्धबुद्धनक्क्तन् (नक्तन्?) निषण्णस्स्विन्नान्नसन्नाश्च् च"[15] इति वचनं "स्ववर्ग्गीये चाऽनुत्तमे"[16] इति,"सवर्णे"[17] इति च गतार्थम्,तथैव समङ्क्धीत्यादि च "स्वरात् त्सयँ योगादिर् द्दविरुच्यते सर्वत्तर"[18] इत्यनेनैव गतार्थन् दृश्यते। उपोत्तथितइत्यादिकवँ वचनन् तु नैव गतार्थम्; विशेषविधायकमेव। एतादृशस् त्रिव्यञ्जनसयँ योगप्रपाणिनीयव्याकरणभाष्येऽपि 'प्रत्तम्' 'अवत्तम्' इत्यादिकेषु स्स्थलेषु स्स्वीकृतो दृश्यते[19]। किन् तु उपोत्तथित इत्यादिषु त्तरयाणां सस्स्थानानां स्पर्शानाङ कथमुच्चारणङ कर्तव्यमिति तु विचिन्तनीयम्। तत्तर प्रथमद्द्वितीययोर् द्वयोरेव क्क्रमजत्वात् पूर्वाङ्गता, द्वयोरेवाऽभिनिहितीभाव एकवर्णवद्भावश् च, कालविलम्बात् तु द्वित्त्वेन गणनेत्त्यस्माकम् प्रतिभाति। सूचयति हि कालविलम्बाद् व्यञ्जनानान् द्वित्त्वेन गणनम् पाणिनीयव्याकरणभाष्यकारोऽपि "(वर्णैकदेशा वर्णग्रहणेन

---

१. शु. य. प्रा. ४।११२। २. १४।२४। ३. मा.सं. ८।५५।
४. तत्तरैव ४।३६। ५. तत्तरैव १७।७२। ६. तत्तरैव ११।६४।
७. तत्तरैव २२।८। ८. तत्तरैव २।२२। ९. तत्तरैव ९।४।
१०. तत्तरैव १४।१८। ११. तत्तरैव १३।४१। १२. तत्तरैव।
१३. तत्तरैव २४।२६। १४. शु. य. प्रा. ६।२९, ३०।
१५. तत्तरैव ६।२५, २६। १६. तत्तरैव ४।११७।
१७. तत्तरैव ४।११२। १८. तत्तरैव ४।१०१।
१९. हयवरट् इत्यत्तर वा. १५।

न गृह्यन्ते चेत्) तुल्यरूपे सयोगे द्विव्यञ्जनाश्रयो विधिर् न सिद्ध्यति; कुक्कुटः, पिप्पलः, पित्तमिति । यस्य पुनर् गृह्यन्ते तस्य द्वौ ककारौ द्वौ पकारौ द्वौ तकारौ । **यस्याऽपि न गृह्यन्ते तस्याऽपि द्वौ ककारौ द्वौ पकारौ द्वौ तकारौ । कथम् । मात्रकालोऽत्र गम्यते, न च मात्रिकवद् व्यञ्जनमस्ति**"[1] इति, "किञ्च स्याद् यद्द्यत्र उगिल्लक्षणोऽपि स्यात्। द्वयोर् नकारयोश् श्रवणम् प्रसज्येत। **न व्यञ्जनपरस्य एकस्य वाऽनेकस्य वा श्रवणम् प्रति विशेषोऽस्ति**"[2] इति च वदन् ।।२४८।।

ऊष्माणोऽस्स्वरपूर्वाश् चाऽन्तस्थाश् चाऽपि स्स्वतः परम् ।
व्यञ्जनन् द्विर् भावयन्ति नेति कात्यायनोऽब्रवीत् ।।२४९।।

तथा हि शुक्लयजुर्वेदप्रातिशाख्ये— नाऽस्स्वरपूर्वा ऊष्मानस्तथाः"[3] इति । उदाहरणञ् च स्थालीभिः स्थालीः[4], दिवः स्कम्भनीः[5] इत्यादिकवद् वेद्द्यम् । **पाणिनीयव्याकरणभाष्यकारेण तु अपूर्वकस्योष्मणोऽपि स्पर्शद्विर्भावजनकत्वमास्थितम् प्रतीयते "स्थाली, स्थाता"[6] इत्युदाहरणात्, किन् तु "अचः"[7] इत्यनुवर्तमाने पठितस्य वार्तिकस्य तथोदाहरणं सुसङ्गतन् न दृश्यते ।** एतदभियुक्तैस् सम्यग् विमृश्यम् ।।२४९।।

अन्तस्थोष्मभ्यः परस्य स्पर्शस्य व्यञ्जनस्य वा ।
द्वित्वे जाते तु पूर्वस्य न द्वित्वं स्यात् कथञ् चन ।।२५०।।
लवोत्तरस्य स्स्पर्शस्य द्वित्वेऽपि लवयोरपि ।
द्वित्वम् पौष्करसादेस् तु मते स्यादिति के चन ।।२५१।।

तदुक्तमृग्वेदप्रातिशाख्ये– "न परक्करमोपधा"[8] इति । तदुदाहरणे च शाकलऋग्वेदसंहितायाम् महत् तदुल्बम्[9], प्रास्तौदृष्वौजाः[10] इति । लव–द्वित्वविषयकमेतन् मतलं "लवकारपूर्व स्स्पर्शश् च पौष्करसादेः"[11] इति तैत्तिरीयप्रातिशाख्यसूत्रस्य व्याख्याने "स्वरपूर्वत्वन् द्वित्वञ् चाऽन्न्वादिशति चकारः"इति, "स्पर्श एवैकेषामाचार्याणाम्"[12] इति सूत्रस्य व्याख्याने च "अनेनैवाऽवधारणेन सूत्रान्तरारम्भेण च

---

१. पा. व्या. भा. ऐ औच् इत्यत्र वा. १३ ।
२. तत्रैव ७।१।७२ । ३. ४।१०६ । ४. मा. सं. १९।२७ ।
५. तत्रैव १।१९ । ६. ८।४।४७, वा. २ । ७. अष्टा. ८।४।४६ ।
८. ६।११ । ९. १०।५१।१ । १०. १०।१०५।६ ।
११. १४।२ । १२. १४।३ ।

पौष्करसादिमते लवकारयोश् च द्वित्त्वमस्तीति गम्यते" इति च वदता सोमयार्येण त्रिभाष्यरत्ने प्रतिपादितम्। वैदिकाभरणकारेण तु नैतन् मतमुल्लिखितम्। पाणिनीयैरपि तवल्लृकारादौ लस्स्याऽपि द्वित्त्ववँ वर्ण्यते ॥२५०–२५१॥

नैव द्वित्त्वम् भवेद् द्वित्त्वनिमित्तिपरके परे।
द्विर्भावस्स्य निमित्ते तु सयँयोगादेऽ कथञ्च चन ॥२५२॥

द्वित्त्वनिमित्ती स्पर्शऽ परो यस्मात् तस्मिन् स्पर्शद्विर्भाव-निमित्ते ऊष्मणि परे सयँयोगादौ स्थितस्स्याऽपि स्पर्शस्स्य उत्सर्ग-प्राप्तमपि द्वित्त्वन् न भवतीत्यर्थः। एतद् वचनवँ वाजसनेयिचरण-विषयकम् बोद्ध्यम्। तदुक्तं शुक्लयजुर्वेदप्रातिशाख्ये— "यैस्त् तु परन् तैर्न् न पूर्व्वम्"[1] इति। **ऊष्मणि स्स्पर्शपरके सयँयोगादौ स्थित-स्स्य च। स्वरात् परस्स्याऽपि नैव द्वित्त्वं स्पर्शस्स्य जायते** इति वाऽयवँ विधिस् स्फुटतया पठनीयः। यत् तु अनन्तेन शुक्लयजुर्वेदप्राति-शाख्यव्याख्याने "तत्तर प्रथमस्स्य स्स्पर्शस्स्य द्विर्भावो निषिद्ध्यते, उत्तरस्स्यैब स्स्थाप्प्यत इति सूत्तरार्थः। यथा— पक्ष्म्माणि, सुक्ष्म्-मा, अयक्ष्म्माः। अत्तर ककारषकारौ द्वौ मकारौ। एवञ् चत्त्वारस् सयँयोगः। अत्तर ककारस्स्य स्वरात् सयँयोगादिरिति प्राप्तन् द्विर्भाववँ वर्जयित्त्वा यैस् तु परमिति मकारस्स्यैव द्विर्भावस् स्थाप्प्यत इति निर्गलितोऽर्थः। उक्तं हि 'यत्तर चोभयतस् स्पर्शैस् सयँयुक्ताश् शषसास् सह। तत्तर नाऽऽद्द्चऽ क्रमो ज्ञेयो न परो **बाधितो** बुधैः' इति। क्रमो-ऽत्तर द्विर्भाव इत्यर्थः"[2] इति उक्तन् तदनुपपन्नम्, प्रोक्तेषूदाहरणेषु अस्स्वरपूर्वकस्स्योष्मणस् स्वोत्तरवर्तिस्स्पर्शद्विर्भावनिमित्तताया अभावाद् वाजसनेयके। उक्तं हि शुक्लयजुर्वेदप्रातिशाख्ये— "नाऽस्-स्वरपूर्व्वा ऊष्म्मान्तस्त्थाः"[3] इति। उक्तेऽनन्तेन प्प्रमाणतयोद्धृते श्लोके चतुर्थचरणे "न परो **बाधितो** बुधैः" इति पाठेऽपि "नाऽस्स्वर-पूर्व्वा ऊष्म्मान्तस्त्थाः" इति शुक्लयजुर्वेदप्रातिशाख्येन सह विरो-धात् तन् न वाजसनेयके प्रवर्तत इति बोद्ध्यम्। स हि श्लोकश् चारायणीय-शिक्षायाम् पट्ठ्यते[4] इति चारायणीयकादौ तस्य चरितार्थता कल्प्या। किन् तूपलब्ध्यमाने चारायणीयशिक्षापाठे "यत्तर चोभयतस् स्पर्शास् सयँयुक्ताश् शषसैस् सह। **आद्द्चस् तत्तर क्क्रमो ज्ञेयो** नाऽपरो **बोधितो** बुधैः" इत्येव पाठऽ प्राप्प्यते. इति च स्स्मरणीयम्।

---

१. ४।१०५। २. ४।१०५। ३. ४।१०६। ४. पृ. १८।

अथर्ववेदीयायाम् माण्डूक्क्यां शिक्क्षायामपि एतादृश एव पाठो दृश्यते[1] एतस्य पाठस्याऽपि शुक्लयजुर्वेदप्रातिशाख्यस्य "यैस्तु तु परन् तैरन् न पूर्वम्" इति सूत्रेण विरुद्धोंऽशो वाजसनेयके नैव प्रवर्तते इति तु विवेक्तव्यमेव ॥२५२॥

टवर्गीयास् तवर्गीयपरकास् तैत्तिरीयके ।
न द्द्विर् भवन्तीत्यपि च हारीतस्य मुनेर् मतम् ॥२५३॥

उक्तं हि तैत्तिरीयप्रातिशाख्ये— "टवर्गश् च तवर्गपरः"[2] इति । उदाहरणप्रत्युदाहरणानि च तैत्तिरीयसंहितायाम्— वषट् ते[3] विड् द्रविणम्[4], षट्टकपालम्[5], विड्ड्वै मरुतः[6] इति । किन् तु हारीतस्य मतानि तैत्तिरीयचरणान्तर्गतायाम् उपलब्ध्यमानायान् तैत्तिरीयसंहितेति प्रसिद्धायाम् आत्तरेयशाखासंहितायान् तु न प्रवर्तन्ते इति तत्रिभाष्यरत्नकारादयः प्राहुः[7] ॥२५३॥

क्षत्र-चित्र-श्श्वित्र-तत्र-वृत्र-सत्रेतिशब्दिते ।
यत्रेत्यत्तर च द्विर् न स्स्यात् तस् तु वाजसनेयके ॥२५४॥
वीध्र्चायेत्यत्तर चोद्रे च तथा वार्ध्रीनसेऽपि च ।
चरार्थवाचकत्वे स्स्यान् न स्स्पर्शो द्विः कथञ्चन ॥२५५॥

तदुक्तं शुक्लयजुर्वेदप्रातिशाख्ये— "न क्क्षवृचिश्श्विसतयेब्भ्यस्तत्रैकम्, ईध्र्चायवार्ध्रीनसोद्राश्च चराश्च चेत्"[8] इति । उदाहरणानि यथा माद्ध्यन्दिनीय-वाजसनेयि- शुक्लयजुर्वेदमन्त्राऽऽर्षसंहितायाम्— क्षत्रवनि[9], चित्रन् देवानाम्[10], श्वित्र आदित्यानाम्[11], तत्र गच्छ[12], वृत्रवं वधेत्[13], या आववृत्रन्[14], सत्रस्य ऋद्धिः[15], यत्रयत्र[16], नमो वीध्र्चाय च[17], वार्ध्रीनसस्त ते[18], अपामुद्रः[19], इति । अत्तर क्षत्त्रिय-[20] नक्क्षत्त्रिये[21]त्यादिष्वप्ययन् द्वित्त्वनिषेधः प्रवर्तते न वेति सुधीभिरभियुक्तैर् विवेक्तव्यम् ॥२५४-२५५॥

---

१. श्लो. १२६ (शि.सं., पृ. ४७४)। २. १४।२०। ३. २।२।१२। ४. १।८।१३। ५. १।८।५। ६. ६।६।५। ७. तै. प्रा. तिरभा. र. ४।२२। ८. ६।२७, २८। ९. १।१७। १०. ७।४२। ११. २४।३९। १२. १३।३१। १३. १०।८। १४. १०।१९। १५. ८।५२। १६. २९।४३। १७. १६।३८। १८. २४।३९। १९. २४।३७। २०. मा. सं. १०।४। २१. तत्तरैव २२।२८।

लकारश् च तवर्गीयवर्णाश् चैव यवोत्तराः ।
हारीतस्य मते न स्युर् द्विरुक्तास् तैत्तिरीयके ॥२५६॥

तदुक्तन् तैत्तिरीयप्रातिशाख्ये— "लतवर्गौ यवकारपरौ"[1] इति । उदाहरणानि यथा तैत्तिरीयसंहितायाम्— कल्याणी[2], बैल्वो यूपः[3] कन्येव[4], इषे त्वा[5], स्वाद्वीन् त्वा[6], मध्वा यज्ञम्[7], अन्वह मासाः[8], खल्वाश्च् च मे[9] इति । हारीतमतमुपलब्ध्यमानायामात्त्रेयतैत्तिरीयसंहितायान् न प्रवर्त्तत इति त्रिभाष्यरत्नकारादिभणितिस् त्वावेदितैव ॥२५६॥

स्पर्शश् च स्स्पर्शपरको द्विर् न स्स्यादिति के चन ।
अस्ति चैतल् लौकिके तु संस्कृतोच्चारणेऽधुना ॥२५७॥

उक्तं हि तैत्तिरीयप्रातिशाख्ये— 'अथैकेषामाचार्याणाम्'[10] इत्युपक्रम्य 'स्पर्श स्पर्शपरः'[11] इति । उदाहरणे यथा आत्त्रेयतैत्तिरीयसंहितायाम् "त्वक्चर्म्म"[12] "विष्वङ् प्रजया"[13] इति ॥२५७॥

व्यञ्जनेऽनुतस्स्थादिके तु परे स्पर्शX पदान्तगः ।
प्राकृतो न भजेद् द्वित्त्वमिति के चिन् मनीषिणः ॥२५८॥

तदुक्तन् तैत्तिरीयप्रातिशाख्ये— "पदान्तश् च व्यञ्जनपरX प्राकृतः"[14] इति । तैत्तिरीयप्रातिशाख्यस्स्थमिदवँ वचनङ् केवलन् नकारविषयमिति तद्व्याख्याकाराः। वयन् तु नैवं रोचयामहेऽनुवृत्तिविशेषास्स्याऽदर्शनात् ॥२५८॥

स्वरे रेफात् परोऽप्यूष्मा न कदापि द्द्विरुच्यते ।
सयँ योगादिस्स्थोऽपि चोष्मा नैवोष्मणि द्विरुच्यते ॥२५९॥
प्रथमेषु ष्वपि न प्लाक्क्षेर् मते प्लाक्क्षायणस्य च ।
हारीतस्य मते तूष्माऽघोषो नैव द्द्विरुच्यते ॥२६०॥

तदुक्तमृग्वेदप्रातिशाख्ये— "न तूष्मा स्वरोष्मपरः"[15] इति । उदाहरणानि यथा शाकलऋग्वेदसंहितायाम्— अदर्शि[16], पर्षि[17], यः सोम[18] इति । तैत्तिरीयप्रातिशाख्ये च— "ऊष्मा स्वरपरः, प्रथमपरश् च प्लाक्क्षिप्लाक्क्षायणयोः, ऊष्माऽघोषो हारीतस्य"[19] इति । प्रथमेषु परेषु द्वित्त्वाभावस्स्योदाहरणानि आत्त्रेयतैत्तिरीयसंहितायायँ यथा—

---

१. १४।२१ । २. ७।१।६ । ३. २।१।८ । ४. ३।१।११ ।
५. १।१।१ । ६. १।८।११ । ७. ४।१।८ । ८. १।७।१३।
९. ४।७।४ । १०. १४।२५ । ११. १४।२७ । १२. ६।२।११ ।
१३. १।५।९ । १४. १४।२८ । १५. ६।१० । १६. ७।८१।१।
१७. ८।६७।११ । १८. १।९१।१४ । १९. १४।१६–१८ ।

सुश्चन्द्र[१], विश्पतिना[२], अष्टौकृत्वः[३], आयुष्पा अग्ने[४], दिवस्कम्भनिः[५], मा वस्तेनः[६], बृहस्पतिसुतस्स्य[७] इति। हारीतमतोदाहरणानि च तत्त्रैव वैश्यो मनुष्याणाम्[८], नास्यापरूपम्[९], महृत्यमिमान्[१०] इति। प्लाक्क्षिप्लाक्क्षायण-हारीत-मतानि आत्तरेयतैत्तिरीयसंहितायान् तु न प्प्रवर्तन्ते इत्त्यभियुक्ताः[११]। ऋक्तन्त्रेऽपि "ऊष्मा व्यञ्जने"[१२] इत्त्युक्तमिति स्वरे परे ऊष्मणो द्विर्भावाऽभावस् तत्त्राऽन्न्वाक्ख्यात एवाऽर्थात्। शौनकीयचतुरद्ध्यायिकायाञ् च— "शषसास् स्वरे"[१३] इति। पाणिनीयव्याकरणे च— "शरोऽचि"[१४] इति। शुक्लयजुर्वेदप्रातिशाक्ख्ये तु "रलावृलृवर्ण्णाब्भ्यामूष्मणि स्स्वरोदये सर्व्वत्तर"[१५] इत्त्युक्तत्त्वाद् स्वरभागव्व्यवधानादेव द्वित्त्वप्राप्तेरभावान् न निषेध आवश्यकस् स्वरे परे ऊष्मणान् द्वित्त्वस्स्य ॥२५९-२६०॥

द्विरुच्च्यते न दन्त्यस् सो वेदे वाजसनेयके।
परास्स्वन्तस्थास्स्वपीति वदन्ति खलु के चन ॥२६१॥
द्विरुच्च्यते न यवयोर् दन्त्यस् सो रे द्विरुच्च्यते।
इत्त्याह पण्डितम्मन्न्यः कश् चिद् दैवज्ज्ञवैदिकः ॥२६२॥
अनार्षे जल्पिते एते आर्षसूत्तरविरोधिनी।
सर्वपाठविरुद्धे च न ह्यनुज्ज्ञातुमीश्महे ॥२६३॥

सकारद्वित्त्वविषये वर्णरत्नप्प्रदीपिकायाममरेशस्स्य वचनयँ यथा— "सकारस्स्य द्द्विरुक्तिर् या सा द्वयोरेव नाऽन्न्यतः। आ च शास्स्वा च रास्स्वे यत् सकारोऽत्तर द्द्विरुक्तितः"[१६] इति। प्रातिशाक्ख्यप्रदीपशिक्क्षायाञ् च— "द्विसकारं रास्स्व शास्स्वेति। इमे द्वे द्विसकारे। स्वरात् त्सयँ योगादिरिति द्वित्त्वे प्राप्ते द्विसकारत्त्वविधानञ् ज्ञापकं समान्न्यतोऽन्तस्थासु सकारस्स्य द्वित्त्वन् न। उक्तञ् च शिक्क्षायाम्। सकारस्स्य द्द्विरुक्तिर् या सा द्वयोरेव नाऽन्न्यतः। आ च शास्स्वा च रास्स्वेति सकारोऽत्तर द्द्विरुक्तिजः॥ अत एव केशवेनापि न सो व्योश् चेति सूत्तरमकारि"[१७] इति। एवञ् च प्रातिशाक्ख्यप्रदीपकारोऽपि अम-

---

१. ४।४।४। २. २।३।१। ३. ६।४।५। ४. १।१।१३। ५. १।१।६। ६. १।१।१। ७. १।४।२७। ८. ७।१।१। ९. ३।५।७। १०. ३।१।९। ११. तै.प्रा.तिरभा.र. १४।२२। १२. ५।६।६ (२७१)। १३. ३।३२। १४. अष्टा. ८।४।४९। १५. ४।१७। १६. श्लो. १६१-१६२ (शि.स., पृ. १३१)। १७. शि. स., पृ. २५४।

रेशवचनेन प्रतारित एव प्रतीयते। रेफे परे सकारद्वित्त्वमनुजानन्ता केशवेन अमरेशस्य वचनम् अंशतस् तु खण्डितमेवेति च बालकृष्णो गोडशेर् नैव बोद्धुं शशाक किल।

केशवदैवज्ञस् तु "न सो व्योश् च। पदान्तमध्ये वकारयकारयोऽ परयोस् सकारस्य द्वित्त्वन् न स्याच् छन्दसि माध्यन्दिनीये"[1] इति वदन् रेफे परे तूत्सर्गप्राप्तं सकारद्वित्त्वम् भवतीति चाऽर्थात् प्रतिपादयति। एतन्मतमेव केचनाऽनुसरन्ति च।

शुक्लयजुर्वेदप्रातिशाख्यज्योत्स्नाकारो रामशर्माऽपि अमरेशकेशववचनाऽवष्टम्भेनैव 'द्विसकारं शास्स्वरास्स्वेति' इति सूत्रं 'सामान्यतोऽन्तस्स्थासु सकारस्य द्वित्त्वन् न' इत्यर्थस्य ज्ञापकमिति प्रतिपादयति[2]। किन् तु तेनाऽन्यत्र "यत्र तु हल्परत्वन् तत्र विधानाऽभावाद् **द्वित्त्वम् भवत्येव। वर्स्स्वैः**। वर्ष्याय। अत एव पाणिनिना शरोऽचि इति द्वित्त्वनिषेधऽ कृतः"[3] इत्यप्युक्तम्। अतोऽनार्षे जल्पिते अनुसरन् सोऽपि विवेके शिथिल एव प्रतीयते।

एते मते "द्विसकारं शास्स्व रास्स्वेति[4] इति शुक्लयजुर्वेदप्रातिशाख्यसूत्रस्य भरष्टेऽशुद्धे व्याख्याने आश्रिते इत्यशुद्धमूले दृश्येते। तथा हि उक्तसूत्रस्योव्वटकृते भाष्ये "तृतीयऽ क्रमजऽ प्राप्नोति सोऽन्यत्र निषिद्ध्यतेऽनेन सूत्रारम्भसामर्थ्येन इति" इति साम्प्रतिकेषु मुद्रितपाठेषु सर्वेष्वेव दृश्यते। किन् तु "द्विसकारं शास्स्व रास्स्वेति" इति सूत्रे प्राकृतद्द्विसकारकयोऽ पदयोरेव गणनमित्युव्वटभाष्येऽपि स्पष्टम्। एवञ् च न तत्र द्वित्त्वविधिजसकारद्द्वयुतपदगणना। अतऽ कथमिदमन्यत्राऽपि द्वित्त्वस्य नियामकं स्यात्। न च तृतीयसकारनिवृत्त्यन्वाख्यानायेदं सूत्रमावश्यकन् तस्य "सवर्णे"[5] इति सूत्रेणैव सिद्धत्वात्। यदि चेदमन्यत्रापि सर्वत्र द्वित्त्वस्य नियामकं स्यात् तर्हि समानेनैव न्यायेन "द्वियकारम्, आप्याय्यमानो यमो रय्यै धाय्यारूपम्"[6] इत्यादि चाऽन्यत्राऽपि सर्वत्र यकारद्वित्त्वस्य नियामकं स्यात्, तथा च बह्व्वनिष्टमापद्द्येत। तस्मादुक्तस्य सूत्रस्योव्वटकृतमनन्तादिकृतञ्च व्याख्यानमसङ्गतमेव। कात्त्यायनेन तु प्रसङ्गात् प्राकृतसकारद्द्वयेन प्राकृतयकारद्द्वयेन च

---

१. शि. स., पृ. १४६। २. सू. ३६३ (पृ. १२८)।
३. सू. ३४६ (पृ. १२१)। ४. ४।१४७। ५. शु.य.प्रा. ४।११२।
६. तत्रैव ४।१५२, १५३।

युक्तानि पदानि एव गणितानि, न तु द्वित्त्वनियमाय ते सूत्त्रे कृते इति विज्ज्ञायते। दृश्यते चाऽथर्ववेदप्रातिशाक्ख्यादावपि द्वियकारकद्द्विजकारकद्द्विलकारकादिपदगणना। "स्वरात् त्सयँ योगादिर् द्द्विरुच्च्यते सर्व्वत्त्र"[1] इत्त्यार्षसूत्त्रस्य विरोधिनी एवैते खलु अनार्षे जल्पिते। यत्त्र खलु द्वित्त्वप्राप्तिर् भवति तत्त्राऽसति द्वित्त्वनिषेधके आर्षे वचने द्वित्त्वम् भवत्त्येवेति च हि सुस्थितिः। उक्तं हि पाराशरशिक्क्षायाम्— "द्वित्त्वन् चैव यमन् चैव भवत्त्येव न संशयः"[2] इति। एतस्स्य वचनस्स्य स्पर्शमात्त्रद्वित्त्वविषयकत्त्वेऽपि न्यायादेवाप्युक्तोऽर्थोऽवसातुं शक्क्य एव।

यद्द्यपि वाजसनेयके लेखे सकारद्वित्त्वन् दुर्लभम्, मुद्द्रितेष्वपि पुस्तकेषु गङ्गेश्श्वरसँस्करणसमेतेषु अनृतस्स्थासु परास्स्वपि सकारद्वित्त्वन् न प्राप्यते; तथापि प्राचीनेषु लेखेषु सकारस्स्य द्वित्त्वं स्थितमनुमीयते। तथा हि नेपालराष्ट्रियाभिलेखालयस्स्थस्स्य A६०२/१ इत्त्यङ्कितच्छायाचित्त्रदकस्स्य वाजसनेयिसंहितापुस्तकस्स्य मल्लशर्मवर्णितस्वरसङ्केतचिह्नन्नवति एकस्मिन् पत्त्रे "मखस्स्य त्त्वा शीर्ष्ण्णे॥ मखाय त्त्वा मखस्स्य त्त्वा शीर्ष्ण्णे॥ मखाय त्त्वा मखस्स्य त्त्वा शीर्ष्ण्णे॥ मखस्स्य शिरः॥ मखस्स्य शिरोसि॥ मखाय त्त्वा मखस्स्य त्त्वा शीर्ष्ण्णे॥ मखस्स्य शिरोऽसि॥ ···यमायत्त्वा॥ यमाय त्त्वा मखायत्त्वा सूर्य्यस्स्य त्त्वा तपसे॥ ···अनाधृष्टा पुरस्त्तादग्गँ नेराधिपत्त्य आयुर्म्मे दाः॥ पुत्त्रवती दक्क्षिणत इन्द्रस्स्याधिपत्त्येप्प्रजाम् मे दाः। सुषदा पश्च्चाद् देवस्स्य सवितुराधिपत्त्ये चक्क्षुर्म् मे दाः॥ ···स्वाहा मरुद्भिः॥ स्वाहा मरुद्भिः परिश्श्रीयस्स्व दिवः सꣳ स्पृशस् प्पाहि। मधु मधु मधु"[3] इति यकारे वकारेऽपि परे सकारस्स्य द्वित्त्वेन युतो लेख४ प्राप्यते। अनन्यत्त्राऽपि प्प्राचीनेषु लेखेषु प्प्राप्यते।

परम्पराऽऽगते उच्चारणेऽपि अनृतस्स्थासु परासु सकारस्स्य द्वित्त्वं सर्व्वत्त्रोपलब्ध्यते। येऽनृतस्स्थासु परास्स्वपि वाजसनेयके सकारस्स्य द्वित्त्वन् न भवतीति मन्न्यन्ते तेषामपि माद्ध्यन्दिनीय–वाजसनेयिनामुच्चारणे सकारस्स्य द्वित्त्वमेव नियमेनोपलब्ध्यते। यदि सकारो द्विर् नोच्चार्येत तदा "सयँ योगादि४ पूर्व्वस्स्य"[4] इति शुक्लयजुर्वेदप्राति-

---

१. शु. य. प्रा. ४।१०१। २. श्लो. १०८ (शि. स., पृ. ६४)।
३. मा.वा.शु.य.वे.म.सं. ३७।७–१३। ४. १।१०२।

शाक्ख्यसूत्तरप्प्रामाण्याद् "अस्म्मिन् न्गोपतौस्-यात बह्व्वीर्य्यजमानस्-य"[1] इति यकारवतोऽक्क्षरस्य सकाररहितमुच्चारणमावश्यकम् भवति, किन् तु तादृशमुच्चारणन् दाक्क्षिणात्त्यगौडोदीच्च्यसम्प्रदायेषु कुत्त्रापि नोपलब्भ्यते, "अस्म्मिन्न्गोपतौस्स्यात बह्व्वीर्य्यजमानस्स्य" इत्त्येवोच्चारणमुपलब्भ्यते।

तस्माद् वाजसनेयकेऽनूतस्स्थासु परासु सकारस्स्योत्सर्गप्राप्तन् द्वित्त्वम् भवत्त्यवेति उक्ते अनार्ष जल्पिते निर्मूले एवेति सर्वथाऽनादरणीये ते नाऽस्माभिरनुज्ज्ञायेते। सोऽयमस्माकन् निर्णयस् सुधीभिस् सम्म्यक् परिशील्ल्याऽऽकलनीयः ॥२६१-२६३॥

अनुस्स्वारो विसर्गश् च नैव वाजसनेयके।
द्विरुच्च्यते इति प्प्राह प्प्रातिशाक्ख्ये मुनिस् स्फुटम् ॥२६४॥

तथा हि शुक्लयजुर्वेदप्रातिशाक्ख्ये- "नानुस्स्वारः"[2] इति, "विसर्ज्जनीयः"[3] इति चाअनुस्स्वारात् परस्स्य सयँ योगादेर् व्यञ्जनस्स्य द्द्वित्त्वम् प्प्रतिपादयता[4] अनुस्स्वारद्वित्त्वमनुल्लिखता ऋग्वेदप्रातिशाक्ख्यकारेणाऽपि अनुस्स्वारद्वित्त्वमनास्स्थितमेवाऽवसीयते। तैत्तिरीयप्प्रातिशाक्ख्ये तु अनुस्स्वारद्वित्त्वस्स्याऽनिषिद्धत्त्वात् तैत्तिरीयकेऽनुस्स्वारस्स्योत्सर्गतो द्वित्त्वम् भवतीति प्प्रतीयते। किन् तु "**ह्रस्स्वाद् द्वित्त्वमनुस्स्वारप्प्राप्नुयात् सयँ युते परे। तदनुस्स्वारपूर्वश् च सयँ योगादिर् द्विरुच्च्यते**"[5] इति व्यासशिक्क्षावचनाद् ह्रस्स्वपूर्वकस्स्य सयँ योगपरकस्स्यैवाऽनुस्स्वारस्स्य द्वित्त्वन् नाऽनन्यस्स्येति बोद्ध्यम्। ऋक्तन्त्रेऽपि अनुस्स्वारद्वित्त्वस्स्याऽनिषिद्धत्त्वादुत्सर्गप्राप्तन्[6] द्वित्त्वं सामवेदेऽपि भवतीति प्प्रतीयते। शौनकीयचतुरद्ध्यायिकायान् तु द्वित्त्वप्प्रकरणस्स्य खण्डितत्त्वात् तद्विषये निश्चित्त्य किमपि वक्तुन् न शक्क्यते। तथापि तत्त्राऽपि सवर्णे[7] परे द्वित्त्वस्स्य निषेधाद् विसर्जनीयद्वित्त्वस्स्य च निषेधाद्[8] दृश्श्यमानाच् छुक्लयजुर्वेदप्रातिशाक्ख्यवत् तत्त्राऽप्प्यनुस्स्वारद्वित्त्वन् निषिद्धं सम्भाव्यते। पाणिनीयव्याकरणे तु "**अयोगवाहानामट्सु णत्त्वम्, शर्षु जश्भावषत्त्वे, अविशेषेण सयँ योगोपधासञ्ज्ञाऽलोन्त्यद्विर्वचनस्स्थानिवद्भावप्प्रतिषेधाः**"[9] इति वार्त्तिककार-

---

१. मा. वा. शु. य. वे. म. सं. १।१। २. ४।१११।
३. ४।११६। ४. ऋ. प्रा. ६।१। ५. सू. ३४१-३४२।
६. ऋ. त. ५।६।४। ७. ३।३०। ८. ३।२९।
९. पा. व्या. भा. हयवरट् इत्त्यत्तर वा. ६, ७, ८।

वचनाद् विसर्जनीयानुस्स्वारयोर् द्वित्त्वं स्वीकृतम् प्रतीयते । उदाहृतञ्च 'उरः:कः' 'उरः:पः' इति विसर्गद्वित्त्वम् पतञ्जलिनाऽपि[1] । वरदराजेन तु 'रामः:' इति विसर्गद्वित्त्वमवसानेऽप्युदाहृतम्[2] । अनुस्स्वारद्वित्त्वञ् च संस्कर्तेत्त्यत्र सिद्धान्तकौमुद्द्यावँ वर्णितम्[3] । तत्र विसर्जनीयद्वित्त्वन् "न तूष्मा स्वरोष्मपरः"[4] इति ऋग्वेदप्रातिशाख्ये विषयविशेषे निषिद्धमपि कखपफेष्वनिषिद्धम् प्रतीयते । शुक्लयजुर्वेदप्रातिशाख्ये "विसर्ज्जनीयः"[5] इति, तैत्तिरीयप्रातिशाख्येऽपि "अवसाने रविसर्ज्जनीयजिह्वामूलीयोपध्मानीयाः"[6] इति, शौनकीयचतुरध्यायिकायाञ् च "(न) विसर्जनीयः"[7] इति विसर्जनीयद्वित्त्वं सर्वथा निषिद्धमस्ति । **सर्ववेदपारिषदत्त्वेनाऽभिमतस्य पाणिनीयव्याकरणस्य व्याख्यानेऽयवँ विषयविभागो दर्शनीयोऽपि आलस्यादिनोपेक्षितोऽनूत्यैरिति बोद्ध्यम्** । तत्राऽपि विसर्जनीयानुस्स्वारयोर् द्वित्त्वस्य पक्षेऽपि अधिकतरकालव्याप्त्यैव द्वित्त्वव्यवहारो वा पृथग्वर्णव्यक्तिद्द्वयश्श्रवणादेव द्वित्त्वव्यवहार इति, व्यक्तिद्द्वयश्श्रवणपक्षे आश्श्रिते तयोः पृथगक्षराङ्गतायाः प्रसङ्गादुच्चारणङ्ग कथङ्ग कर्तव्यमिति च सुधीभिस् सूक्ष्मेक्षिकया निरूपणीयमिति च बोद्ध्यम् ॥२६४॥

द्वित्त्वप्रवृत्तिरेषा च लौकिके संस्कृतेऽपि हि ।
दृश्यते वेदवत् प्रायोऽवधेयमिह पण्डितैः ॥२६५॥

इदानीन्तने लेखे मुद्द्रणे च एतस्या द्वित्त्वप्रवृत्तेरदर्शनान् मन्दाः पाणिनीयव्याकरणेन वैकल्पिकतया प्रतिपादिता खल्वेषा द्वित्त्वप्रवृत्तिरिदानीन् नोपलब्ध्यते संस्कृतभाषायामिति मन्न्यन्ते । किन्तूच्चारणे प्रायेणैषा द्वित्त्वप्रवृत्तिः प्राप्यत एव लौकिके संस्कृतेऽपीदानीमपि । तथापि उच्चार्यमाणभाषावस्तुस्स्थितिदर्शनशक्तिमान्द्यात् पण्डितम्मन्न्या अपि भ्राम्म्यन्ति खल्वेतद्विषये साम्प्रतिका जनाः । प्राचीनेषु शिलालेखेषु अपि प्रायेणाऽनुपलब्ध्यमानाऽप्येषा द्वित्त्वप्रवृत्तिः क्वचित्क्वचित् तूपलब्ध्यते । सप्तदशे गुप्ताऽभिलेखे यस्स्येति पदे पञ्चसु स्थलेषु सकारो द्वित्त्ववत्तयोट्टङ्कित उपलब्ध्यते इत्याहुः[8] ॥२६५॥

---

१. पा. व्या. भा. हयवरट् इत्त्यत्र वा. ८ । २. म. कौ. अजनूतपुर्लिङ्गप्रकरणे । ३. हल्सन्धिप्रकरणे । ४. ६।१०। ५. ४।११६। ६. १४।१५। ७. ३।२९। ८. CSPOIG, p. 114.

७. पदपाठ-(पदसंहिता-)निरूपणाधिकारः

पदान्तस्स्थ-पदादिस्स्थ-वर्णानान् निश्चयाय च ।
पदस्स्वरानुपूर्वीणावं विज्ज्ञानाय पृथक्पृथक् ॥२६६॥
आर्षोपदेशविज्ज्ञातमन्त्रवाक्क्यार्थगुप्तये ।
शाकल्ल्यात्त्रेयगार्ग्याद्द्र्चं पदपाठं प्रवर्तितः ॥२६७॥

एतद्विषये शौनकीयचतुरद्ध्यायिकायाम् "पदाद्ध्ययनमन्त्रादिशब्दस्स्वरार्थज्ज्ञानार्थम्"[1] इति प्प्रोक्तम् । वेदमन्त्रा हि साक्क्षात्कृतधर्मभिर् ऋषिभिरवरेब्भ्योऽसाक्क्षात्कृतधर्मब्भ्यो मनुष्येब्भ्यो दत्ताः खलूपदेशरूपेण; ते च मन्त्रतदर्थज्ज्ञानरक्क्षायै मन्त्राणाङ्क्रमविशेषेण घटिता मन्त्रसंहिताश् शिक्क्षाकल्पादीनि अङ्गानि चाऽकार्षुरिति यास्कोऽपि प्प्रतिपादयति । तदुक्तन् निरुक्ते— "साक्क्षात्कृतधर्माण ऋषयो बभूवुः, तेऽवरेब्भ्योऽसाक्क्षात्कृतधर्मब्भ्य उपदेशेन मन्त्रान्त्सम्प्रादुः, उपदेशाय ग्ग्लायन्तोऽवरे बिल्मग्ग्रहणायेमङ्ग्रन्थं समाम्म्नासिषुः, वेदञ् च वेदाङ्गानि च"[2] इति । तत्त्रार्षोपदेशविज्ज्ञातमन्त्रवाक्क्यार्थकैर् मुनिभिर् यथा मन्त्रसंहिताविशेषः कृतस् तथैव पदपाठोऽपि कृत इति विज्ज्ञायते । तत्त्र ऋग्वेदशाकलशाखापदपाठश् शाकल्ल्येन कृत इति निरुक्तवचनाज् ज्ज्ञायते[3] । वायुपुराणेऽपि[4] वेदमित्त्रश् शाकल्ल्यः पदवित्तमत्त्वेनोल्लिखितो दृश्श्यते । एवमेव शुक्लयजुर्वेदमाद्ध्यन्दिनीयशाखापदपाठः, अथर्ववेदशौनकिशाखापदपाठश् च शाकल्ल्येनैव कृत इति केचन भणन्ति । आत्त्रेयतैत्तिरीयशाखापदपाठस् तु आत्रेयेणैव कृत इति भट्टभास्करलेखात्[5] स्पष्टम् भवति । कौथुमसामवेदसंहितापदपाठो गार्ग्येण कृत इति स्स्कन्दस्स्वामिवचनाद् दुर्गवचनाच्[6] चाऽवसीयते । **"पुनरुक्तानि लुप्प्यन्ते पदानीत्त्याह शाकलः । अलोप इति गार्ग्यस्स्य काण्ण्वस्स्याऽर्थवशादिति"**[7] इति श्श्लोकन् दृष्ट्वा काण्ण्वसंहितापदपाठः काण्ण्वेन कृत इत्त्येके सम्भावयन्ति । अन्न्येऽपि पदपाठाः प्रधानभूतम् आर्षोपदेशविज्ज्ञात-मन्त्रवाक्क्यार्थज्ज्ञान-संरक्क्षणरूपम् प्रयोजनं साधयितुयं् यथायथमन्न्यैर् मुनिभिः कृता वेदितव्याः । शाकल्ल्यात्त्रेयादयो गार्ग्यादयश् च पदकारा निरुक्तटीकायां[8] स्कन्द-

---

१. ४।१०७ । २. १।६।४ । ३. ६।५।६ (६।२८) । ४. ६०।६३ । ५. तै. सं. व्याक्ख्योपक्क्रमे । ६. निरुक्तव्याक्ख्याने ४।१।३-४ । ७. शु. य. वे. प्रा. उ. भा. ४।१७६ । ८. २।४।१ (२।१३) ।

स्स्वामिनाऽप्युल्लिखिताः।पदकारैः पदपाठो यथालक्षणमेव कर्तव्य इति पाणिनीयव्याकरणभाष्ये[1] पतञ्जलिना उद्घोषितम्; तथापि तत्र वैदिकैर् नैवाऽऽदरः क्रियते, पदपाठानाम् मुनिप्रणीतत्वाद् व्याकरणपूर्ववृत्तत्वाच् च ॥२६६-२६७॥

माध्यान्दिनीयाम्नायस्य प्रातिशाख्ये प्रदर्शिताः ।
पदपाठस्य नियमा उच्च्यन्तेऽत्र प्रधानतः ॥२६८॥

"पदप्रकृतीनि सर्वचरणानाम् पार्षदानि"[2] इति वस्तुस्स्थितेः पदपाठान् सिद्धानिव कृत्वा प्रवृत्तेषु खलु ऋग्वेदप्रातिशाख्यादिषु पदपाठसम्बन्धिनो नियमा न हि प्राधान्येन निरूपिताः; शुक्लयजुर्वेदप्रातिशाख्ये तु ते विशेषेण निरूपिता इति तदनुसारमेवाऽत्र प्राधान्येन पदपाठनियमा उच्च्यन्ते । शौनकीयचतुरध्यायिकायामप्येते नियमा विस्तरेण प्रोक्ताः[3],तथापि शुक्लयजुर्वेदप्रातिशाख्यमेव प्रधानीकृत्याऽत्र ते नियमा उच्च्यन्ते ॥२६८॥

पदान्ताद्द्वोस् संहितायाल् लोपागमविकारजाः ।
ये विशेषास् तान् निवर्त्य पदच्छेदो भवेदिह ॥२६९॥

प्रातिशाख्यानि हि प्रायेण पदपाठान् सिद्धानिव कृत्वा प्रवृत्तानि इति प्रातिशाख्येषु विहिता ये पदान्तपदादिसंहिताजाता लोपागमविकारास् तान् निवर्त्य पदपाठे पदच्छेदो भवतीति बोद्धव्यम् । उक्तं हि शुक्लयजुर्वेदप्रातिशाख्ये "पदविच्छेदोऽसंहितः"[4] इति । तैत्तिरीयप्रातिशाख्यन् तु "अथादावुत्तरे विभागे ह्रस्स्ववँ व्यञ्जनपरः"[5] इति प्रतिपादयत् संहितापाठमेवाऽऽधारीकृत्य प्रवृत्तमिति तदुक्तमनुसृत्य तत्र पदविभागस् स्यादन्न्यत्र तु तद्विहितन् निवर्त्येति विवेक्तव्यम् । पाणिनीयव्याकरणानुसारमपि संहिताम् प्रकृतिं स्वीकृत्य संहिताऽभावे 'निमित्तापाये नैमित्तिकस्स्याऽप्यपायः' इति न्न्यायात् पाणिनन्न्युक्तसंहिताविकारान् निवर्त्य, अवसाने विहितान् विधींश्चाऽनुसृत्य पदच्छेदः कर्तव्यः ॥२६९॥

समासे पूर्वपरयोः पदयोस् स्यादवग्रहः ।
समासेऽपि निषेधार्थेऽवग्रहो न भवेदिह ॥२७०॥
स्वरान्तपूर्वपदके द्वन्द्वे द्विवचनान्तके ।
द्वापूर्वके समासे च तथा सर्वं वत्सरादिके ॥२७१॥

---

१. ३।१।१०९, वा. २; ६।१।२०७; ८।२।१६, वा. ५ ।
२. निरुक्ते १।६।१ । ३. ४।१-७७ । ४. १।१५६ । ५. ३।१ ।

पाङ्क्तरानित्त्यादिके संशयितभागे समासके ।
विशौजा-आदिकेऽन्न्याय्यविकारेऽवग्ग्रहो न हि ॥२७२॥

तदुक्तं शुक्लयजुर्वेदप्रातिशाख्ये— "समासेऽवग्ग्रहो ह्रस्स्वसमकालः"[1] इति । "प्रतिषेधे नावग्ग्रहः"[2] इत्त्यादि च । शौनकीयचतुरद्ध्यायिकायाम् च— "समासे च"[3] इत्त्यादि, "न दीर्घात्"[4] इत्त्यादि च । अवग्ग्रहे च शाकलऋग्वेदमन्त्रसंहितापदपाठे शौनकिनामथर्ववेदमन्त्रसंहितायाX पदपाठे च अवगृह्य्यस्स्य पदस्स्य 'पुरःऽहितम्' 'त्रिऽसप्ताः' 'परिऽयन्ति' इत्त्यादिरूपेण सकृत् साऽवग्ग्रहX पाठX क्रियते; कौथुमसामवेदार्चिकसंहितापदपाठे 'हव्व्यदातये हव्व्यऽदातये' इत्त्यादिरूपेण इतिकाररहितस् सावृत्तिकX पाठX क्रियते; माद्ध्यन्दिनीयसंहितादीनान् तु 'श्रेष्ट्ठतमायेति श्रेष्ट्ठऽतमाय' 'उपायव इत्त्युपऽआयवः' इत्त्यादिरूपेण इतिकारसहितस् सावृत्तिकX पदपाठX क्रियते ॥२७०-२७२॥

तरे तमे मति वति त्तरायान् त्रातौ शसि त्त्वमि ।
थायाम् भिसि ब्भ्यसादौ चाऽपदेऽपि स्स्यादवग्ग्रहः ॥२७३॥

तदुक्तं शुक्लयजुर्वेदप्रातिशाख्ये— "तरतमयोश्च्चातिशयेऽदक्क्षिणप्प्रत्त्यासङ्गे"[5] इत्त्यादि; शौनकीयचतुरद्ध्यायिकायाम् च- "तद्धिते धा, त्राऽऽकारान्ते, थाऽनेकाक्क्षरेण, तरतमयोः, मतौ, वकारादौ च"[6] इत्त्यादि ॥२७३॥

पदपाठेऽवगृह्य्यस्स्य स्स्थितोपस्स्थितमिष्ष्यते ।
विनतस्स्य प्प्रगृह्य्यस्स्याऽनृतXपदन् द्राघितस्स्य च ॥२७४॥
रेफस् तु संहितापाठे यस्स्य विक्क्रियते क्क्व चित् ।
तत्त्र तस्स्य च रेफानृतपदस्स्याऽपीदमिष्ष्यते ॥२७५॥

तदुक्तं शुक्लयजुर्वेदप्रातिशाख्ये— "प्रगृह्य्यन् चर्च्चायामितिना पदेषु, रिफितन् च संहितायामनिरुक्क्तम्, पदावृत्तौ चानृतरेण, क्रमोक्क्तावृत्तिः पदेषु"[7] इति, "पूर्व्वस्स्योत्तरसंहितस्स्य स्स्थितोपसस्थितमवगृह्य्यस्स्य, ··· अनृतःपददीर्ग्घीभावे, विनामे, प्रगृह्य्ये, रिफितेऽनिरुक्क्ते"[8] इति । शौनकीयचतुरद्ध्यायिकायाम् च— "प्रगृह्य्यावगृह्य्यसमापाद्द्यानृतगतानान् द्विर्व्वचनम् परिहार इतिमद्ध्ये, द्वाब्भ्यामुकारः"[9] इत्त्यादि ॥२७४-२७५॥

---

१. ५।१। २. ५।२४। ३. ४।९। ४. ४।३३।
५. ५।२। ६. ४।१३-१८। ७. ४।१८-२१।
८. ४।१९०-१९५। ९. ४।११७, ११८।

पदं स्थितमिति प्प्रोक्तमित्त्यन्तन् तदुपस्स्थितम् ।
स्थितोपस्थितमित्त्यन्तमुपात्तञ् चेत् पुनः पदम् ॥२७६॥

तदुक्तमृग्वेदप्रातिशाक्ख्ये— "उपस्थितं सेतिकरणम्, केवलन् तु पदं त्स्थितम्, तत् त्स्थितोपस्स्थितन् नाम यत्त्रोभे आह संहिते"[1] इति । शुक्लयजुर्वेदप्रातिशाक्ख्यस्य "संहितं स्थितोपस्त्थितम्"[2] इति सूत्त्रस्य व्याक्ख्याने उव्वटश् च "उपस्थितं सेतिकारञ्च केवलन् तु पदं स्थितम् । तत् त्स्थितोपस्थितन् नाम यत्त्रोभे आह संहिते" इति कस्य चिद् वचनमुद्धृत्य व्याक्ख्यातवान् । पाणिनीये व्याकरणेऽपि "अप्प्लुतवदुपस्थिते"[3] इतीतिकारार्थस्योपस्थितस्योल्लेखः प्राप्प्यते ॥२७६॥

स्थितोपस्स्थितके पूरवं संहितावद् भवेत् पदम् ।
इतेः पूर्वम् परम् चाऽस्स्योपादाने तु सदैव हि ॥२७७॥
षत्त्व-णत्त्व-सकारत्त्व-दीर्घ्य-लोपादिकस्स्य च ।
टवर्गीयत्त्वप्राप्तेश् च समापत्तिर् भवेद् ध्रुवम् ॥२७८॥

तदुक्तं शुक्लयजुर्वेदप्रातिशाक्ख्ये— "अनितावन्तर्व्विकारागमम् प्रागुक्क्त्वा"[4] इति "अनितावद्ध्याये, इति वच् चर्च्चार्याम्"[5] इति च । पुनरुक्तिश् चर्चा । शौनकीयचतुरद्ध्यायिकायाञ् च— "षत्त्वणत्त्वोपचारदीर्घटुत्त्वलोपान्पदानाञ् चर्चापरिहारयोस् समापत्तिः"[6] इति; "प्रकृतिदर्शनं समापत्तिः"[7] इति च । ऋग्वेदप्रातिशाक्ख्योक्तो "नकारस्स्योष्मवद्वृत्तम् प्लुतोपाचरिते नतिः । प्रश्श्लेषश् च प्रगृह्य्यस्स्य प्रकृत्त्या स्स्युः परिग्ग्रहे । शौद्धाक्क्षरागमोऽपैति, न्याययँ यान्त्युत्तरे त्रयः । रिफितान्न्यूष्मणोऽघोषे दूभावस् स्वधितीव च"[8] इति विशेषोऽपि अत्त्र वेदितव्व्यः । तत्त्र शाकलऋग्वेदसंहितायाश्[9] शौनकिनामथर्ववेदसंहितायाश्[10] च पदपाठे 'त्रिरऽस्तुप्' इत्त्यादिकमेव पट्ठ्यते; माद्ध्यन्दिनीयपदपाठे तु 'त्रिरष्ट्टुप् । त्रिरस्तुबिति त्रिरऽस्तुप्'[11] इत्त्येवंरूपादिकम् पट्ठ्यते इति च बोद्ध्यम् ॥२७७–२७८॥

यथा सन्धीयमानानामनेकीभवतां स्वरः ।
उपदिष्टस् तथा विद्द्यादक्क्षराणामवग्ग्रहे ॥२७९॥

---

१. १०।१२–१४ । २. १।१४७। ३. अष्टा. ६।१।१२९। ४. ४।२३ । ५. ३।१९, २० । ६. ४।७४ । ७. ४।७३ । ८. १०।२०–२२ । ९. शा. ऋ. म. सं. १०।१४।१६ । १०. शौ. अ. म. सं. ८।९।२० । ११. मा.वा.शु.य.वे.म.सं. १०।११ ।

एतद् ऋग्वेदप्रातिशाख्यवचनम्[1] निगदव्याख्यातम् । एतद्-विषये शुक्लयजुर्वेदप्रातिशाख्येऽपि "संहितावदवग्रहस् स्वरविधौ परञ् च सर्वत्र चेदनुदात्तम्, इतिपरस्तृतिर्य् यङ्ङनीचोऽनुदात्ते मद्ध्योदात्ते पर्वणि काण्वस्स्य, उदात्तमयोऽनुन्यत्तर नीच एव"[2] इति । शौनकीयचतुरध्यायिकायाम् च— "अवग्रहे च"[3] इत्त्ययवँ विषयस् सूचितः । एष च नियमश् शाकलऋग्वेदसंहितापदपाठे माध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदसंहितापदपाठे शौनकिनामथर्ववेदसंहितायाꣳ पदपाठे च समानः । किन् तु काण्ववाजसनेयिसंहितापदपाठे आत्तरेयतैत्तिरीयसंहितापदपाठे च अवग्रहोत्तरभागस्स्य स्वतन्तरपदस्स्येव स्स्वरो भवति । मैत्तरायणीयके तु एतस्मिन् विषये प्राचीनकोषेषु लेखने विगानन् दृश्यत इति तत्परीक्षकाः ।।२७९।।

पुनरुक्तानि लुप्यन्ते पदानीत्त्याह शाकलः ।

अलोप इति गार्ग्यस्स्य काण्वस्स्याऽर्थवशादिति[4] ।।२८०।।

एतद्विषये व्यवस्स्था च शुक्लयजुर्वेदप्रातिशाख्ये "त्रिपदाद्-द्यावर्त्तमाने सङ्क्रमः, द्विपदैकपदान्यप्यनुवाके, अनन्तरे, अपराङ्गे, अस्स्वरविकारे, अलिङ्गविकारे, असमाने, त्रिरावृत्ते, गूढे, पदसमूहे"[5] इति सूत्त्रैꣳ प्रदर्शिता ।।२८०।।

प्रतिज्ञासूत्त्रविहिताꣳ पाठधर्माꣳ पदस्स्य तु ।

इतेꣳ परमुपादाने न स्स्युरित्त्याह कश् चन ।।२८१।।

एतद्विषयकमार्षवँ वचनन् नोपलब्ध्यते । प्रातिशाख्यप्रदीपशिक्षायाम् "प्रतिज्ञासूत्त्रस्स्था धर्मा न भवन्ति, प्रतिज्ञासूत्त्रशेषभूतायाममोघानन्दिन्याम् "अवग्रहः पदान्तवत्" इति सिद्धेऽपि अवग्रहे पुनर् जकारविधानात्, तेन यहो इति यहो"[6] इति उक्तम् । प्राचीनेषु लेखेषु तु विगानन् दृश्यतेऽस्मिन् विषये इति तत्परीक्षकाः ।।२८१।।

८. क्रमपाठ-(क्रमसंहिता-)निरूपणाधिकारः

पदानां संहितायाश् च दृढार्थं प्रतिपत्तये ।

निश्चित्त्यै संहितायाश् च द्वैपदेषु स्स्वरस्स्य च ।।२८२।।

बृंहणाय च मानाय ऋचाञ् च यजुषान् तथा ।

बाब्भ्रव्व्यपाञ्चालाद्दर्घ्यैर् हि क्रमपाठꣳ प्रवर्त्तितः ।।२८३।।

---

१. ३।२४ । २. १।१४८–१५० । ३. ३।६९ ।
४. शु. य. प्रा. उ. भा. ४।१७६ । ५. ४।१६८–१७७ ।
६. शि. स., पृ. २८२ ।

एष विषय ऋग्वेदप्रातिशाख्येऽपि उक्तः, तथा हि "इति प्प्र बाभ्रव्व्य उवाच च क्रमङ्क्रमप्प्रवक्ता प्रथमं शशंस च ।। क्रमेण नार्थ४ पदसंहिताविद४ पुराप्प्रसिद्धाश्श्रयपूर्वसिद्धिभिः । अकृत्स्नसिद्धश् च न चान्न्यसाधको न चोदयापायकरो न च श्श्रुतः ।। असिद्ध्यतस् सिद्धिविपर्ययो यदि प्प्रसिद्ध्यतोऽसिद्धिविपर्ययस् तथा । सहापवादेषु च सत्सु न क्क्रम४ प्रदेशशास्त्रेषु भवत्त्यनर्थकः ।। विपर्ययाच् छास्त्रसमाधिदर्शनात् पुराप्प्रसिद्धेरुभयोरनाश्श्रयात् । समब्भ्युपेयाद् बहुभिश् च साधुभिश् श्रुतेश् च सन्मानकर४ क्रमोऽर्थवान् । ऋते न च द्द्वैपदसंहितास्स्वरौ प्रसिद्ध्यत४ पारणकर्म चोत्तमम् । क्रमादतोऽप्प्यृग्यजुषाञ् च बृंहणम् पदैस् स्वरैश् चाऽद्ध्ययनन् तथा त्रिभिः"[1]. इति । शुक्लयजुर्वेदप्रातिशाख्ये च— "क्रमः स्मृतिप्प्रयोजनः"[2] इति । शौनकीयचतुरद्ध्यायिकायाञ् च— "क्रमाद्ध्ययनं संहितापददार्ढ्यार्थम्; स्वरोपजनश् चाऽदृष्ट४ पदेषु संहितायाञ् च"[3] इति । ऋग्वेदशैशिरीयशाखाक्रमपाठो बाभ्रव्व्यपाञ्चालेन मुनिना स्वोपज्ञतया प्रकाशित इति उपर्य्युद्धृतेब्भ्य ऋग्वेदप्रातिशाख्यवचनेब्भ्यस् स्फुटञ् ज्ञायते । अन्न्यासावँ वेदशाखानाङ्क्रमपाठानाम् प्रवर्तकानाम् मुनीनान् नामानि तु प्प्रातिस्स्विकतया न ज्ज्ञायन्ते । एतद्विषये विशेषेणान्न्वेषणे तानि अपि ज्ञातुं शक्क्येरन् । "यत् तद् हयशिर४ पार्थ समुदेति वरप्प्रदम् । सोहमेवोत्तरे भागे क्रमाक्क्षरविभागवित् । वामाऽऽदेशितमार्गेण मत्प्रसादान् महात्मना । पाञ्चालेन क्क्रम४ प्राप्तस् तस्माद् भूतात् सनातनात् । बाभ्रव्व्यगोत्तरस् स बभौ प्रथमङ्क्रमपारगः । नारायणाद् वरलँ लब्ध्वा प्राप्प्य योगमनुत्तमम् । क्रमम् प्रणीय शिक्क्षाञ् च प्प्रणयित्त्वा स गालवः"[4] इति महाभारते क्रमविशेषप्रवर्तकोल्लेख४ प्राप्प्यते । हरिवंशेऽपि "सखाऽऽस गालवो यस्स्य योगाचार्यो महायशाः । शिक्क्षामुत्पाद्द्य तपसा क्क्रमो येन प्प्रवर्तितः"[5] इत्त्युल्लेखो दृश्श्यते ।।२८२–२८३।।

प्राक् पदाब्भ्यामभिक्क्रम्म्य प्प्रत्त्यादायोत्तरन् तयोः ।
सन्धायैकेनोत्तरेण पदेन द्द्वे पदे पुनः ।।२८४।।
उच्चारयेदेवमेवाऽवसानम् प्राप्नुयात् ततः ।
अवसानपदङ्क कुर्यात् त्स्थितोपस्स्थिकन् तथा ।।२८५।।

---

१. ११।६५–६१। २. ४।१८२। ३. ४।१०८, १०९।
४. म. भा. १२।३४२।१००–१०४। ५. १।२०।१३।

अवगृह्य्यम् प्रगृह्य्यञ् च पदञ् चाऽनन्यद् यथाऽऽगमम् ।
स्थितोपस्स्थितकङः कुर्यात् क्रमपाठे विचक्क्षणः ।।२८६।।

तदुक्तमृग्वेदप्रातिशाक्ख्ये— "क्रमो द्वाब्भ्यामभिक्क्रम्म्य प्प्रत्त्यादायोत्तरन् तयोः । उत्तरेणोपसन्दद्ध्यात् तथार्धर्चं समापयेत्"[१] इत्त्यादि । शुक्लयजुर्वेदप्रातिशाक्ख्ये च— "द्वेद्द्वे पदे सन्दधात्त्युत्तरेणोत्तरमावसानादपृक्तवर्ज्जम्"[२] इत्त्यादि । शौनकीयचतुरद्ध्यायिकायाञ् च— "द्वे पदे क्क्रमपदम्, तस्स्यान्तेन परस्स्य प्प्रसन्धानम्, नाऽनन्तगतम् परेण"[३] इत्त्यादि । परिग्ग्रहविषये च ऋग्वेदप्रातिशाक्ख्ये उक्तम्— "अर्धर्चान्त्यञ् च"[४] इति, "अवगृह्य्याण्ण्यतिक्क्रम्म्य सहेतिकरणानि च । धक्क्षिधुक्क्षिप्प्रवादौ च विकृतादी प्लुतादि च । अन्तऽपदञ् च येषां स्याद् विकारोऽनन्यकारितः । एतानि परिगृह्णीयाद् बहुमद्ध्यगतानि च"[५] इति च । शुक्लयजुर्वेदप्रातिशाक्ख्ये च— "पूर्व्वस्स्योत्तरसंहितस्स्य स्त्थितोपस्त्थितमवगृह्य्यस्स्य, सुपदे शाकटायनः, अन्तःपददीर्ग्घीभावे, विनामे, प्रगृह्य्ये, रिफितेऽनिरुक्क्ते, अवसामे च"[६] इति । शौनकीयचतुरद्ध्यायिकायाञ् च— "उकारऽ परिहार्य एव, प्रगृह्य्याऽवगृह्य्यसमापाद्द्यान्तगतानान् द्विर्वचनम् परिहार इति मद्ध्ये, द्वाब्भ्यामुकारः, अनुनासिकदीर्घत्त्वम् प्रयोजनम्, प्लुतश् चाऽप्प्लुतवत्, अनुनासिकऽ पूर्वश् च शुद्धः"[७] इति ।।२८४–२८६।।

पूर्वोत्तरकृतं रूपम् प्रत्त्यादानावसानयोः ।
न ब्ब्रूयात् सर्वमेवाऽनन्यद् यथासंहितमाचरेत् ।।२८७।।

ऋग्वेदप्रातिशाक्ख्यवचनमेतन्[८] निगदव्याक्ख्यातम् । शुक्लयजुर्वेदप्रातिशाक्ख्येऽपि "द्वेद्द्वे पदे सन्दधात्त्युत्तरेणोत्तरमावसानाद्"[९] इति क्रमस्स्वरूपप्प्रतिपादनेनैवैतत् प्रतिपादितम् । शौनकीयचतुरद्ध्यायिकायाञ् च "यथाशास्त्रम् प्रसन्धानम्"[१०] इत्त्युक्तम् ।।२८७।।

एकवर्णमनोकारम् पदञ् चाऽनन्यद् यथाऽऽगमम् ।
समतीत्त्यैव चाऽवस्स्येत् क्रमे क्रमपदम् बुधः ।।२८८।।

तदुक्तमृग्वेदप्रातिशाक्ख्ये– "एकवर्णमनोकारन् नते सु स्स्मेति नऽपरे । पदेन च व्व्यवेतयँ् यत् पदन् तच् च व्व्यवायि च । ईलँ् लुप्तान्तम्

---

१. १०।१ । २. ४।१८३ । ३. ४।११०–११२ ।
४. १०।९ । ५. १०।७–८ । ६. ४।१९०–१९६ ।
७. ४।११६–१२१ । ८. १०।५–६ । ९. ४।१८३ ।
१०. ४।१२२ ।

प्लुतादीनि स्स्कम्भनेनेति लुप्तवत् । इतो षिञ्चतावर्तमꣳ पूर्वे द्वैपदयोर् द्वयोः । स्वसारमस्कृतेत्त्युभे परवँ वीरास एतन । अतीत्त्यैतान्न्यवस्स्यन्ति प्प्लुतादिप्प्रभृतीनि च''[1] इति । शुक्लयजुर्वेदप्रातिशाख्ये च— ''अपृक्तमद्ध्यानि त्तरीणि स त्तिरक्क्रमः, पुनराकारेणोत्तरम्, मोषूणाऽभीषुणौ च, चत्त्वार्य्यपृक्तपूर्व्वे नकारपरे सौ, मकारपरे चैके, पुनः सुपदेनोत्तरम्''[2] इति । शौनकीयचतुरद्ध्यायिकायाम् च— ''त्तरीणि पदान्न्यपृक्तमद्ध्यानि, एकादेशस्स्वरसन्धिदीर्घविनामाꣳ प्रयोजनम्, आकारौकारादि पुनः''[3] इति ॥२८८॥

गलत्पदानि त्त्यक्त्वा हि कुर्यात् क्रमपदम् बुधः ।
अर्धर्चे कण्डिकान्ते चाऽलुप्ते स्याच् च परिग्ग्रहः ॥२८९॥

तदुक्तं शुक्लयजुर्वेदप्रातिशाख्ये— ''यथासमाम्न्नातङ्क्रमावसानं सङ्क्रमेषु''[4] इति । तथा च ''विश्श्वधाः परमेण''[5] इति क्क्रमपदम् भवति 'असि' इति गलत्पदम् परित्त्यज्ज्य । ''ह्वार्षीच् छतधारम्''[6] इत्त्यत्तर कण्डिकान्तेऽपि ''वसोः पवित्त्रमसि''[7] इत्त्यस्स्य लुप्तत्त्वादवसानकार्य्यम् परिग्ग्रहरूपन् न भवति । ऋग्वेदे तु समयसन्ज्ञकानि गलत्पदानि न त्त्यजन्ति, तानि अगणयित्त्वेव तदादिपदम् पूर्वक्क्रमपदेन, सर्वञ् च समयमुत्तरक्क्रमपदेन च सयँयोज्ज्य क्रमपाठङ्क कुर्वन्तीति[8] च बोद्ध्यम् ॥२८९॥

सङ्क्रमे न प्प्रकृत्त्या स्स्यादेकारौकारतꣳ परः ।
पदादिस्स्थोऽप्प्यकारो हि नित्त्यमृक्षु यजुष्षु च ॥२९०॥

तदुक्तं शुक्लयजुर्वेदप्रातिशाख्ये— ''सङ्क्रमे च सर्व्वत्तर''[9] इति । एवमेव तत्त्रैवोक्तास् ''सङ्क्रमे च वैष्णवान्''[10] इत्त्यादिका विशेषा अपि अनुगन्तव्याः ॥२९०॥

सङ्क्षेपात् पदपाठश् च क्क्रमपाठश् च वर्णितौ ।
अत्तर तद्विस्तरस् तत्तन्मूलग्ग्रन्थेषु दृश्श्यताम् ॥२९१॥

९, क्रमजटादिविकृतिनिरूपणम्

ऋग्-यजुस्-साम-वेदेषु अथर्वाङ्गिरसेऽपि च ।
संहिता पदपाठश् च क्क्रमपाठश् च विश्श्रुताः[11] ॥२९२॥

---

१. १०।३, ४। २. ४।१८४–१८९। ३. ४।११३–११५। ४. ४।१९७। ५. मा. सं. १।२। ६. तत्त्रैव १।२, ३। ७. तत्त्रैव १।३। ८. ऋ. प्रा. १०।१९। ९. ४।८१। १०. ३।१४९। ११. शै. शि. श्लो. ८२–८३; या. शि. श्लो. २९–३२।

ऋक्ष्वेव प्रायो विकृतिपाठत्वेन प्रकीर्तिताः ।
पाठाः क्रमजटाद्द्यास् स्युरष्टौ क्रमघनान्तकाः ॥२९३॥
तत्र क्क्रमजटापाठो यजुर्वेदादिषु क्क्व चित् ।
विहितोऽस्ति क्क्रमघनपाठोऽपि च क्व चित् पुनः ॥२९४॥
तथापि संहिता-पद-क्क्रम-पाठा हि पूजिताः ।
यजुर्वेदादिषूच्च्यन्ते प्राज्ञैर् निरुदम्भवैदिकैः ॥२९५॥
ये हृय्यशक्ता यथाशास्त्रं श्रुतिवर्णावधारणम् ।
सम्यक् कर्तुन् तेऽपि यजुर्वेदाद्द्यद्ध्यायिनः खलु ॥२९६॥
प्रकल्पयन्ति च घनपाठीत्यात्मानमित्ययम् ।
दम्भप्रकारो हेयो हि सज्जनैश् श्रोत्रियैस् सदा ॥२९७॥
स्वरवर्णानुपूर्व्याश् च रक्क्षायै चाऽर्थवित्तये ।
शक्त्याऽद्ध्येया यथाशास्त्रं संहिता सपदक्क्रमा ॥२९८॥
शिक्क्षासु यस्स्याश् शाखायाः प्रोक्ता विकृतयस् तु याः ।
यावत्त्यस् ताश् च तावत्त्यः पठनीया हि तत्र वा ॥२९९॥

क्रमजटादिविकृतिपाठविधायको हि उपलब्ध्यमानः प्राचीनतमो ग्रन्थो व्याडिकृतित्वेन विश्श्रुता सप्तविंशतिश्लोकात्मिका **विकृतिवल्ली** वर्तते । तस्या एव विकृतिवल्ल्याः क्रमजटानिरूपको विंशतिश्लोकात्मको भागो **'जटापटलम्'** इति प्रसिद्धोऽस्ति । तत्र विकृतिवल्ल्या ऋग्वेदविषयकत्वम् च "नत्वाऽऽदौ शौनकाचार्यङ गुरुवँ वेदमहानिधिम् । मुनीन्द्रं सर्ववेदज्ञम् ब्रह्ममज्ञलँ लोकविश्श्रुतम् ॥ नमामि शाकलाचार्यं शाकल्यं स्थविरन् तथा । ब्रह्ममविद्द्यागुरुं श्रेष्ठम् भारद्द्वाजम् बृहस्पतिम् ॥ **शैशिरीये समाम्नाये व्याडिनैव महर्षिणा । जटाद्द्या विकृतीरष्टौ लक्क्ष्यन्ते नाऽतिविस्तरात्**" इति विकृतिवल्ल्यारम्भस्थश्लोकैरेव स्स्फुटम् प्रतिपाद्द्यते । **मधुसूदनमस्करिकृता** अष्टविकृतिविवृतिश् च ऋग्वेदसम्बद्धैव व्याडिकृत्यनुकृतिरेव चेति तदारम्भणपद्द्यादेव स्स्पष्टम् भवति । **हयग्रीवकृतत्वेन प्रसिद्धञ् जटापटलन्** तु कतमस्स्य वेदस्स्य कतमया शाखया सम्बद्धो ग्रन्थ इति स्स्फुटतया न ज्ज्ञायते । तथापि तत्राऽष्टमे पद्द्ये कम्पस्स्योल्लेखः नवमे पद्द्ये अर्धर्चस्स्य ऋचश् चोल्लेखश् च तस्याऽपि ऋग्वेदसम्बद्धत्वं सूचयन्तौ प्रतीयेते । यजुर्वेद–सामवेदा–ऽथर्ववेद–सम्बद्धेषु प्रातिशाक्ख्यशिक्क्षाग्रन्थेषु तत्परिशिष्टेषु च विकृतिपाठाष्टकस्स्य कोऽप्युल्लेखो नोपलब्ध्यते। यद्द्यपि कातीयचरणव्यूहसूत्रे यजुर्वेदखण्डे

वाजसनेयिचरणविवरणप्रकरणे मुद्रितपुस्तके "मन्तरपदक्रमश् चैव चतुर्थं स्याज् जटा तथा। क्रममाला शिखा रेखा ध्वजो दण्डो रथो घनः। अष्टौ विकृतयः प्रोक्ता क्रमपूर्वा महर्षिभिः"[1] इति दृश्यते, तथापि काशिनिवासिवैदिकवरलक्ष्मीकान्तदीक्षितसविधे स्थितस्य हस्तलिखित-कातीयचरणव्यूहसूत्तरग्रन्थस्य अस्मत्सविधे वर्तमानायाम् प्रतिलिप्यान् तस्य पाठस्याऽभावात्, गोत्तरचरणपृच्छाप्रतिज्ञासूत्तरे च तत्-प्रकरणेऽस्य विषयस्योल्लेखस्याऽदर्शनात्, शौनकीयचरणव्यूहे चाऽस्य विषयस्याऽनुपलब्ध्यमानत्वाच् चोक्तः पाठश् चिन्त्य एव भाति। शौनकीयचरणव्यूहे तु ऋग्वेदखण्डे एव "क्रमजटः क्रमदण्डः" इत्येवोल्-लेखो दृश्यते। **एवञ् च सति क्रमजटापाठादिविकृतिपाठा मुक्ख्यतया ऋग्-वेदविषयका एवेति स्फुटमवगम्यते।**

याज्ञवल्क्यशिक्षादिषु प्राचीनासु शुक्लयजुर्वेदसम्बद्धासु शिक्षासु च क्रमजटादीनाँ विकृतिपाठानाङ्क कोऽप्युल्लेखो न दृश्यते। अर्वाचीनायाम् प्रातिशाख्यप्रदीपशिक्षायामेव अनन्तकृतिप्रभावाज् ज्योत्स्नाकारादिप्रभावाच् च क्रमजटादिविकृतयः प्रतिपादिता दृश्यन्ते। नागदेवसुतेनाऽनन्तेन हि **"याज्ञवल्क्यमुनिन् नत्वा कात्यायनमुनीनपि। नागदेवात्मजश् श्रीमान् अनन्ताचार्यसञ्ज्ञकः॥ आद्यशाखी स्वशाखा-याञ् जटाद्यष्टसुलक्षणम्। ब्रूते विचार्य बहुशो मतवँ व्याडेस् समा-श्रयन्। स्वप्रातीशाख्यग्रन्थस्थाज् जटालक्षणवर्जनात्। पार-क्यमपि तद् ग्राह्ययँ यन् नाऽऽम्नातमिति स्मृतेः"** इति प्रतिज्ञाय जटापटलकारिकाव्याख्यायाः कृतत्वात्, तस्य जटापटलकारिकाग्रन्थ-स्य स्वशाखीयग्रन्थत्वाभावेऽपि काण्वशाखायामपि जटादिपाठस्य कर्तव्यतायाः प्रतिपादितत्वाच् च तद्गतानुगतिकतयैव शुक्लयजुर्वेदप्राति-**शाख्यज्योत्स्नाकृता च रामाग्निहोत्रिणा च स्वव्याख्यान्ते 'जटादिविकृती-नालँलक्षणानि'** लिखितानि विज्ञायन्ते। तानि च न सर्वथा विकृतिवल्लीं हयग्रीवकृतजटापटलवँ वाऽनुसरन्ति दृश्यन्ते। तथाऽपि तयोरेव ग्रन्थ-योस् सारं सङ्गृह्य तानि ज्योत्स्नाकारेणाऽन्येन वा केन चिद् रचितानि विभाव्यन्ते। एतच् च जटादिविकृतिलक्षणान्ते **"जटादिविकृतीनान् तु सम्यग् ज्ञानयँ यथाऽऽप्यते। महर्षिणा व्याडिना यज् जटापटलसञ्-ज्ञकम्॥ तद्भावं समनुज्ञाय हयग्रीवेण भाषितम्। दौर्मित्तिणा गौतमेन रामेणाऽपि सुभाषितम्"** इति वदता युगलकिशोरपाठकेनाऽपि अस्फुटं

---

१. श्रीकिशोरमिश्रकृतेन 'वेदशाखापर्यालोचनम्' इति ग्रन्थेन सह मुद्रिते कात्यायनकृतचरणव्यूहे, पृ. ६६।

सूचितन् दृश्यते । ज्योत्स्नाकारलिखितान्येव जटाद्द्वयष्टविकृतीनालँ लक्ष्णानि युगलकिशोरपाठकमहाशयेनाऽपि स्वकीये शुक्लयजुर्वेदप्रातिशाख्यसँस्करणेऽन्ते योजितानि विलोक्यन्ते । एतादृशीं स्थितिमुपलब्ध्य के चन विवेकशिथिलाश् शुक्लयजुर्वेदपरिशिष्टग्रन्थत्वेन प्राचीनैर्× कुत्राऽपि अनुल्लिखितमपि जटाद्द्वयष्टविकृतिलक्षणं शुक्लयजुर्वेदप्रातिशाख्यपरिशिष्टत्वेनैवाऽप्युररीकुर्वते च । तथाऽपि तन् निष्प्रमाणत्वादविचारितरमणीयन् ज्ञेयम् । "**पारक्यमपि तद् ग्राह्यय्यँ यन् नाऽऽम्नातमिति स्मृतेः**" इत्यनन्तोक्तिरपि विचारणीयैव, "**बह्वव्वल्पवँ वा स्वसूत्रोक्तयँ यस्य कर्म प्रचोदितम् । तस्य तावति शास्त्रार्थे कृते सर्वः कृतम् भवेत्**" इत्यादीनालँ लौगाक्ष्यादिवचनानाञ् च स्मृतिसन्दर्भादिषु दर्शनात् ।

तैत्तिरीयशाखायामपि जटादिविकृतीनाम् प्रातिशाख्याऽविषयत्वँ वैदिकाभरणकारेण स्फुटम् प्रतिपादितम् । तथा हि "अत्रोच्यते— **नाऽसमाम्नातरूपस्य प्रातिशाख्यम् प्रवर्तकम् । जटा ततोऽसमाम्नाता नाऽस्य शास्त्रस्य गोचरः** । त्रिविधो हि समाम्नायस् समाम्नायते संहितासमाम्नाय× पदाम्नाय× क्रमाम्नाय इति । जटा तु न कदाचित् समाम्नायते । किन् त्वभिज्ञैर् जातु चित् प्रयुज्यते । तदुक्तं शीक्षायाम्— 'प्रातिशाख्यादिशास्त्रज्ञस् सर्वशीक्षाविशारदः । बुद्धिशक्तिसमेतो यस् स जटावँ वक्तुमर्हति"[1] इति; "संहिता तत्पदाद्ध्याय×क्रमाद्ध्याय इति त्रिधा।प्रसिद्धोऽस्य समाम्नायो विषयो वक्ष्यते ततः"[2] इति, "अबिभर्× पितः इत्यादीनां रेफादेशस्याऽनन्यथोपपन्नत्वान् नाऽस्य शास्त्रस्य जटायान् तात्पर्यं शक्यते कल्पयितुम्"[3] इति, "तस्माज् जटा नाऽस्य शास्त्रस्य विषय इति सिद्धम्"[4] इत्यादि च । यद्द्वयपि त्रिभाष्यरत्नकारेण जटापाठादपि प्रातिशाख्यसूत्राणामुदाहरणानि प्रदर्शितानि, तथापि तानि वैदिकाभरणकारेण प्रत्याख्यातानि सर्वत्र । शौनकीयचरणव्यूहेऽपि यजुर्वेदखण्डे तैत्तिरीयाणाङ् क्रमान्तमेवाऽद्ध्ययनमुल्लिखितमस्ति ।

तैत्तिरीयशाखाशिक्षासु तु घनस्योल्लेखे उपेक्ष्यमाणायाङ् कौण्डिन्यशिक्षायामेवोपलब्ध्ये सत्यपि जटाया उल्लेखस् तु बहुष्वेव शिक्षासु प्राप्यते । तथा हि **व्यासशिक्षायाम्**— "सकृदादि द्द्वितीयन् द्विर× पठेच् चाऽऽदि पदं सकृत् । सन्धित× क्रमवच् चेति प्रोच्यते

---

१. ५।१४ । २. १।१ । ३. ८।८ । ४. ११।६ ।

सा **जटा** बुधैः। त्रिक्रमस्य **जटा** ज्ज्ञेया ह्युक्त्वा पूर्वङ्क्रमन् तथा। पुनरन्तम् मद्ध्यमादि पुनराद्द्यन्तरम् परम्"[1] इति, "**जटा**च्यतेऽन्न्यशब्देन तत्त्राऽनैक्क्यन् न विद्द्यते"[2] इति, "तदन्न्यत्तर तु न ग्राह्यययँ यज् **जटा**भिमतैरिति"[3] इति, "संहितावत् क्रमो ज्ज्ञेयो **जटा** च विकृतादिषु"[4] इति, "संहिताञ् च पदवँ वापि क्रमञ् चैव **जटाम्** पठन्। लक्क्षणज्ज्ञस् तदाप्नोति ब्रह्मज्ज्ञानं हि शाश्वतम्"[5] इति च। **शम्भुशिक्क्षायाञ् च**— "ग्रहणन् त्वेकमुद्दिश्य पदवँ वै क्रियते यतः। तदन्न्यत्तर तु न ग्राह्यययँ यज् **जटा**भिमतैरिति"[6] इति, "अनुशब्दो ह्युकारश् च वकारे वैकृते स्थिते। **जटायान्** नैव लोपस् स्यादकारस्स्येति निर्णयः॥ काण्डानुक्क्रमतो ह्यादौ **जटायान्** दृश्यते यथा। अलोपलोपकार्याणि त्त्रिपदादौ तथोत्तरम्"[7] इति च। **कौहलेयशिक्क्षायाञ् च**— "य इच्छति **जटावँ** वक्तुं स विप्प्रो वेदवित्तमः। तस्स्य कीर्तिर् विवर्धेत स वेदफलमश्नुते॥ पदद्द्वयमनुक्क्रमम्य व्युत्क्रमम्योत्क्रमम्य सन्धिमत्। यथावत् त्स्वरसयँ युक्तम् प्रयुञ्ज्यात् सा **जटा** मता॥ संहिता प्रकृतिऽ प्रोक्ता पदस्स्यैतत् क्रमस्स्य तु। **जटाया**ऽ प्रकृतिस् त्वेष एवन् नित्त्यन् निबोधत॥ **जटायावँ** वक्क्ष्यमाणायाङ् कम्पसन्धिस्स्वरादयः! अवधाय प्प्रयोक्तव्या निपुणन् तदुदीरितम्। प्रातिशाक्ख्यादिशास्त्रज्ज्ञस् सर्वशिक्क्षाविशारदः। बुद्धिशक्तिसमेतो यस् स **जटावँ** वक्तुमर्हति"[8] इति। **आत्त्रेयशिक्क्षायाञ् च**— "अथ क्क्रमव्व्युत्क्रम (सङ्क्रम ?)ाद् यतो **जटा** भवेदर्षिजसन्धिजस्स्वरात्। विलोक्क्य शिक्क्षादिकमादरात् तत॥ प्रकाश्यते सा विदुषाम् मुदे मया॥ पदद्द्वयनिमित्तं स्यादेकाभावेति तत्तर तु। संहितावत् क्रमे ज्ज्ञेयन् तद्वज् ज्ज्ञेया **जटा** बुधैः॥ स्वरवर्णादभेदस् स्यादनिदन् द्वितयस्स्य च। **जटा**विचक्क्षणैरुक्तङ् क्रमोच्चारणमत्तर तु॥ ...अनन्वित्त्यत्तर ह्यकारस्स्य व्यञ्जने तु निमित्तके। **जटायाञ्** चैव लोपस् स्यादकारस्स्येति निर्णयः" इत्त्यादि। **शिक्क्षासमुच्चयेऽपि जटाप्रकरणं** स्थितवँ विज्ज्ञायते। साम्प्रदायिकैरुल्लिखितासु कृष्णयजुर्वेदसम्बद्धासु नवसु शिक्क्षासु तिसृषूपशिक्क्षासु चाऽपरिगणितायाङ् **कौण्डिन्न्यशिक्क्षायान् तु**— "पदद्द्वयङ् क्रमादुक्त्वा द्वितीयम् प्रथमम् पुनः। पुनश् च

---

१. सू. ३७–४०। २. सू. ९७। ३. सू. ९९।
४. सू. १००। ५. सू. ५२१–५२२। ६. सू. ११।
७. सू. २३, २४। ८. श्लो. ५३–५७।

क्क्रमवद् ब्रूयात् सन्धितस् सा **जटा** स्स्मृता ।। सकृदादिन् द्वितीयन् द्विर् द्विरादिं सकृदुत्तरे । द्विस् तृतीयं सकृन् मद्ध्यन् द्विरादिं सकृदुत्तरे ।। **जटा**मुच्चार्य विधिवत् तृतीयं संहितेव हि । विलोमेनाऽनुलोमेन वदेच् चेत् स **घनस्** स्मृतः ।। द्विपदोऽष्टादशपदꣳ पदैष् षोडशभिर् युतः । त्रयोदशपदश् चेति चतुर्धा **घन** ईरितः'' इत्यादि[1] ।

नारदीयशिक्क्षादिषु सामवेदीयशिक्क्षासु तु क्रमजटादिविकृतिपाठानामुल्लेखो नैव दृश्यते ।

अथर्ववेदीयशिक्क्षायाम् **माण्डूक्क्या** शिक्क्षायाञ् च क्रमजटादिविकृतिपाठानाङ् काऽपि चर्चा नोपलब्ध्यते ।

पदपाठ–क्क्रमपाठयोर् माहात्म्ये पुराणादिषूपलब्ध्यमानेऽपि क्रमजटादीनामष्टानावँ् विकृतीनान् तु सर्वासान् नामान्न्यपि पुराणेषु नैवोल्लिखितानीति तद्विमर्शकाः[2] । मधुसूदनमस्करिकृताष्टविकृतिविवृतिप्प्रकाशे वाराहपुराणवचनत्त्वेनोल्लिखितः ''संहितापाठतꣳ पुण्यन् द्विगुणम् पदपाठतः । त्रिगुणङ् क्रमपाठेन जटापाठेन षड्गुणम्'' इति श्श्लोकस् साम्प्रतिकेषु मुद्द्रितेषु वाराहपुराणपुस्तकेषु नोपलब्ध्यत इति विवेचकाः[3] । तत्त्रैव मत्स्यपुराणवचनत्त्वेनोल्लिखितः ''जटादिविकृतीनायँ् ये पारायणपरायणाः । महात्मानो द्विजश्श्रेष्ठास् ते ज्ज्ञेयाꣳ पङ्क्तिपावनाः'' इति श्श्लोकश् च साम्प्रतिके मत्स्यपुराणपुस्तके नैव दृश्यते । कौण्डिन्न्यशिक्क्षायान् तु एतस्स्य श्श्लोकस्स्य ''पदादिविकृतीनायँ् ये'' इत्यादिकꣳ पाठो दृश्यते[4] । एष एव श्श्लोकꣳ प्रातिशाक्ख्यप्प्रदीपशिक्क्षायाञ् जटाद्द्यष्टविकृतिलक्क्षणटीकायाञ् च आदित्त्यपुराणश्श्लोकत्त्वेनोक्तः । इदमादित्त्यपुराणं सौरपुराणमेवेति विवेचकास् सम्भावयन्ति[5] । सौरपुराणपुस्तके तु साम्प्रतिके आनन्दाश्श्रममुद्द्रणालयीये नाऽयं श्लोक उपलब्धोऽस्माभिः । स्मृतिपुराणादिवचनत्त्वेनोल्लिखितानामपि व्यवह्रियमाणस्स्मृतिपुराणादिपुस्तकेषु अनुपलब्ध्यमानामेतादृशानावँ् वचनानाञ् चाऽनादरणीयत्वङ् कुल्लूकभट्टादिभिरपि[6] सूचितम् । एतेषावँ् वचनानामादरणीयत्त्वेऽपि ऋग्वेदमन्त्रविषयतयैवाऽप्प्येतेषाञ् चरितार्थत्त्वम् । यद्द्यपि स्कन्दपुराणान्तर्गते ब्रह्म्मखण्डे धर्मारण्यमाहात्म्ये षष्ठे-

---

१. श्लो. १३–२६ । २. पुराणगत वेदविषयक सामग्री का समीक्क्षात्मक अद्ध्ययन, पृ. ४०० । ३. तत्त्रैव पृ. ४०१ । ४. श्लो. २१ । ५. पु. वे. सा. स. अ. पृ. ४०० । ६. मन्वर्थमुक्तावल्ल्याम् ५।६६; वेदान्तकल्पतरौ ३।४।२० ।

ऽद्ध्याये **जटा-घनयोर्** घनस्स्योच्चैरपठनीयत्त्वस्स्य चोल्लेखः प्राप्प्यते, तथापि तत्तर "सर्वस्स्याऽऽधारभूता ये (या) वत्स धेनुस् त्रयीमयी। अस्स्याम् प्रतिष्ठितवँ विश्श्ववँ विश्श्वहेतुश् च या मता ।। ऋक्पृष्ठाऽसौ यजुर्मद्ध्या सामकुक्क्षिपयोधरा। इष्टापूर्तविषाणा च साधुसूक्ततनूरुहा ।। शान्तिपुष्टिशकृन्मूत्तरा वर्णपादप्प्रतिष्ठिता। उपजीव्यमाना जगताम् **पदक्क्रमजटाघनैः**" इति वाक्क्ये उल्लिखितयोर् **जटाघनयोर्** ऋग्वेदमन्तरसंहितामात्तरसम्बद्धतायास् स्वीकारेऽपि वचनस्स्य सार्थकता भवतीति जटाघनयोर् यजुर्वेदादिसम्बन्धस्स्य कल्पनाऽत्तराऽनावश्श्यिकैव भाति।

एवञ् च यजुर्वेदाद्द्यद्ध्यायिभिस् स्वशाखीयसंहितापदक्क्रमाऽद्ध्ययने एव विशेषेणाऽऽदरः कर्तव्य इति विज्ज्ञायते। अथवा यजुर्वेदादिषु यस्स्यां शाखायाम् प्रातिशाक्ख्यशिक्क्षाग्रन्थादिषु याश् च यावत्त्यश् च विकृतयस् स्वशाखायाम् पठनीयत्त्वेन प्प्रतिपादितास् ताश् च तावत्त्यश् चैव विकृतयस् तासुतासु शाखासु पठनीया नाऽधिका इति व्यवस्था स्वीकार्या प्रतीयते। दाक्क्षिणात्त्यास् तैत्तिरीया अपि विशेषतः क्रमजटाम् पञ्चसन्धिकघनञ् चैव प्प्रायः पठन्तीति श्श्रूयते ।।२९२-२९९।।

जटा शिखा च दण्डश् च लेखा माला ध्वजो रथः।
घनश् च क्क्रमपूर्वा हि अष्टौ विकृतयस् स्मृताः ।।३००।।

वेदस्स्वरवर्णानुपूर्वीरक्क्षायै पङ्क्तिपावनविप्प्रतत्वलाभाय च कस्स्य चन वेदमन्तरभागस्स्य क्रमजटादिकाः काश् चन विकृतीर् वैदिका ब्राह्म्मणा इदानीमपि पठन्ति। ताश् च विकृतयः क्रमजटादयोऽष्ट सन्ति। यद्द्यपि यथा देवदत्ता दत्तेत्त्यपि व्यवह्रियते तथैव क्रमजटा जटेति च व्व्यवह्रियते, तथापि "**जटा माला शिखा लेखा ध्वजो दण्डो घनो रथः। अष्टौ विकृतयः प्रोक्ताः क्रमपूर्वा मनीषिभिः**" इति व्याडिवचनात् "क्रमजटः क्रमदण्डः" इत्त्यादेः प्रयोगाच् च क्रमजटेत्त्येवमादीन्न्येव मुक्ख्यानि नामनि ज्ज्ञेयानि। तत्तरैतासावँ विकृतीनाम् मद्ध्ये खलु क्रमजटाक्रमदण्डयोः प्राधान्न्यम्, क्रमशिखायाः क्रमजटानुसारित्त्वात्, क्रमलेखा-क्रममाला-क्रमद्ध्वज-क्रमरथानाङ् क्रमदण्डानुसारित्त्वात्; क्रमघनस्स्य च क्रमजटाक्रमदण्डोभयानुसारित्त्वात्। यद्द्यपि व्याडिवचने विकृतीनाङ् क्रमोऽन्न्यस् तथापि विकृतिसम्बन्धविशेषानुरोधादस्माभिस् तासावँ विशिष्टः क्रमस् समाश्श्रितो बोद्ध्यः। मधुसूदनेन तु अष्टविकृतिविवृतौ "**जटामालादण्डरेखारथद्ध्वजशिखाघनाः। क्रममाश्श्रित्त्य निर्वृत्ता विकारा**

अष्ट विश्श्रुताः" इति वदता विकृतीनाम् प्रतिपादने तु व्याड्ड्युक्तमेव क्रममाश्श्रितवता केनाऽभिप्प्रायेण विकृतिक्रमविशेष आश्श्रित इति न विज्ज्ञायते । व्याडिना तु लिङ्गानुरोधाच् श्लोकानुरोधाच् च क्रमविशेष आश्श्रितꣳ प्रतीयते ॥३००॥

(क) क्रमजटानिरूपणम्–

क्रमयँ यथोक्तम् प्रब्ब्रूयाद् व्युत्क्रमेण क्रमेण च ।
सलक्क्षणं सर्वसन्धौ जटा सा प्रोच्च्यते बुधैः ॥३०१॥[1]

एतदर्थश् च– यथालक्क्षणन् द्वित्त्रचादिक्रमरूपङ् क्रमपदमुक्त्वा, तदेव पुनर् व्युत्क्रमेण पठित्त्वा पुनर् यथाक्रमम् पठेत्; क्रमपठितानावँ व्युत्क्रमपठितानाञ् च पदानाम् पदान्तपदादिसन्धिषु सर्वत्त्र यथालक्क्षणलँ लोपागमवर्णविकारप्प्रकृतिभावान् पठेदित्त्येषा क्रमजटा बुधैर् जटेति सङ्क्षेपेणोच्च्यत इति । व्याडिरपि— "पदद्द्वयमनुक्रम्म्य व्युत्क्रम्म्योत्क्रम्म्य सन्धिमत् । स्वरलक्क्षणसयँ युक्ता सा जटेत्त्यभिधीयते" इति । हयग्रीवकृते जटापटलेऽपि— "**क्रमे यथोक्ते पदजातमेव द्द्विरब्भ्यसेदुत्तरमेव पूर्वम् । अब्भ्यस्स्य पूर्वञ् च यथोत्तरे पदेऽवसानमेवं हि जटाऽभिधीयते**" इति । उदाहरणार्थं "सहस्स्रशीर्षा[2] पुरुषः सहस्स्राक्क्षः सहस्स्रपात् । स भूमिꣳ सर्व्वत स्स्पृत्त्वात्त्यतिष्ट्ठद् दशाङ्गुलम्"[3] इत्त्यस्स्या ऋचꣳ **क्रमजटापाठो** यथा— "**सहस्स्रशीर्षा** पुरुषः पुरुषः सहस्स्रशीर्षा **सहस्स्रशीर्षा** पुरुषः । **सहस्स्रशीर्षेति सहस्स्रऽ-शीर्षा** ॥ पुरुषः सहस्स्राक्क्षः सहस्स्राक्क्षः पुरुषः पुरुषः सहस्स्राक्क्षः ॥ **सहस्स्राक्क्षः सहस्स्रपात् त्सहस्स्रपात् त्सहस्स्राक्क्षः** सहस्स्राक्क्षः सहस्स्रपात् । **सहस्स्राक्क्ष** इति सहस्स्रऽ-अक्क्षः । सहस्स्रपादिति सहस्स्रऽ-पात् ॥ स भूमिम् भूमिꣳ. स स भूमिम् ॥ भूमिꣳ. **सर्व्वतः सर्व्वतो भूमिम्** भूमिꣳ. **सर्व्वतः** ॥ **सर्व्वतस्स्पृत्त्वा**स्स्पृत्त्वा **सर्व्वतः सर्व्वतस्स्पृत्त्वा** ॥ **स्पृत्त्वात्त्यतिस्स्पृत्त्वा**स्स्पृत्त्वाति॥अत्त्यतिष्ट्ठदतिष्ट्ठदत्त्यत्त्यतिष्ट्ठत्॥**अतिष्ट्ठद्दशाङ्गु**लन् दशाङ्गुलमतिष्ट्ठदतिष्ट्ठद्दशाङ्गुलम् । **दशाङ्गुलमितिदशऽअङ्गुलम्** ॥" इति ।

---

१. शु. य. वे. प्रा. ज्यो., पृ. २२० । २. मुद्द्रणालये स्वरचिह्नानानामभावाद् उदाहरणेषु अनुदात्तानि अक्क्षराणि स्थूललिप्प्या मुद्द्रितानि उदात्तानि स्वरितानि प्प्रचितानि च अक्क्षराणि तत्तिस्थत्त्या विज्ज्ञैरूह्य्यानि । ३. मा. सं. ३१।१ ।

तत्तर च सु आ इत्येताभ्याम् पदाभ्यायँ युक्ते त्रिक्रमे चतुष्क्रमे वा "सुनः" "आतनच्चँ मि" इत्यादौ सुपूर्वकम् आपूर्वकवँ वा पदद्वयङ्क्रमपाठे द्विक्रमत्वभ्रमवारणाय पुनरुच्चारितं सज् जटापाठे जटापाठधर्मयोगेण न पठ्यते क्रमपाठधर्ममात्तरेण पठ्यत इत्यपि बोद्ध्यम्। तदुक्तम्— "**स्वापूर्वांशम् पदद्वनूद्वं स्वागर्भे त्रिचतुष्क्रमे। पुनरुक्तमसन्देहा-रथञ् जटात्वन् न चाऽर्हति**"[1] इति। तदुदाहरणञ् च— "कर्म्मणऽआप्प्यायद्ध्वम् प्यायद्ध्वमा कर्म्मणे कर्म्मणऽआप्प्यायद्ध्वम्"[2] इति।

यद्द्यपि पूर्वोक्ते क्रमजटालक्षणे अनुक्रमो व्युत्क्रमस् सङ्क्रमश् चेति त्तरय एव क्रमा उपात्तास् तथापि पदान्तपदादिसन्धिविशेषदृष्ट्या जटायाम् पञ्च सन्धयो भवन्ति; तदुक्तम्— "**अनुक्रमश् चोत्क्रमश् च व्युत्क्रमोऽभिक्रमस् तथा। सङ्क्रमश् चेति पञ्चैते जटायाङ्क कथिताः क्रमाः**"[3] इति। तत्तर वायवस्त्थ इत्यनुक्रमः, स्थस्त्थ इत्युत्क्रमः, स्थ वायव इति व्युत्क्रमः, वायवो वायव इत्यभिक्रमः, वायवस्त्थ इति सङ्क्रम इति बोद्ध्यम्। यद्द्यपि अनुक्रमसङ्क्रमयोर् न भेदो वस्तुतस् तथापि जटापाठगतपाठस्स्थानकृतस् तयोर् नाम्नि भेदो बोद्ध्यः।

क्रमजटापाठे क्रमपदयोर् मद्ध्ये यद् व्युत्क्रमपदन् तत्तर विश्प्पतीवेत्त्येकं स्थलवँ विहायाऽन्न्यत्तर स्थितोपस्थिते पुनरुपात्ते पद इव षत्त्वणत्त्वादीनां समापत्तिर् भवति; तदुक्तम्— "**न स्स्थितोपस्थिते ये स्युर् जटायावँ व्युत्क्रमे न ते। वर्जयित्त्वा विश्प्पतीव**"[4] इति। ये षत्त्वणत्त्व-सकारत्त्व-दैर्घ्य-लोपा-ऽऽगमादयो विधयस् स्थितोपस्स्थिते इतेऽ परम् पुनरुपात्ते पदे न भवन्ति ते बिधयो विश्प्पतीवेत्त्येकं स्थलवँ विहायाऽन्न्यत्तर जटायावँ व्युत्क्रमे क्रमपदे उपात्ते पदेऽपि न भवन्तीति तदर्थः। एवञ् च तत्तर षत्त्व-णत्त्वादीनां समापत्तिर् भवतीति फलितोऽर्थः। तदुदाहरणानि च माद्ध्यन्दिनीयसंहितासम्बद्धानि— जास्प्पत्त्यं सुयमं सुयमञ् जाः पत्त्यञ् जास्प्पत्त्यं सुयमम्[5], वसवेऽहर्प्पतयेऽहःपतये वसवे वसवेऽहर्प्पतये[6], इतन् धूर्षाहौ धूः सहावितमितन्धूर्षाहौ[7], दार्वाघाटस्त्ते तेदार्व्वाघातो दार्व्वाघाटस्त्ते[8], वायवो

---

१. शु. य. वे. प्रा. ज्यो., पृ. २२१। २. मा. सं. १।१।
३. शु.य.वे.प्रा.ज्यो., पृ. २२२। ४. तत्तरैव पृ. २२३, २२४।
५. ३३।१२। ६. ९।२०। ७. ४।३३। ८. २४।३५।

वनर्षदो वनसदो वायवो वायवो वनर्षदः[१], ऋतस्प्पते त्वष्ट्टुस्त्वष्ट्टुर् ऋतपत ऋतस्प्पतेत्वष्ट्टुः[२], उभे सुश्चन्द्र सुचन्द्रोभे उभे सुश्चन्द्र[३], बृहतीन् दुदुक्क्षन् दुधुक्क्षन् बृहतीम् बृहतीन् दुदुक्क्षन्[४], श्रेयस्क्कर भूयस्क्कर भूयःकर श्रेयःकर श्श्रेयस्क्कर भूयस्क्कर[५], आयुष्प्पाऽ आयुरायुरायुःपाऽ आयुष्प्पाऽआयुः[६], सिषासन्तो वनामहे वनामहे सिसासन्तः सिषासन्तो वनामहे[७], अग्गँ्नेः पुरीषवाहणः पुरीषवाहनोऽग्गँ्नेरग्गँ्नेः पुरीषवाहणः[८],एनमायुनगयुनगेनमेनमायुनक्[९], मामहन्तामदितिरदितिर्म्ममहन्ताम् मामहन्तामदितिः[१०], देवीऽउषासाऽउषसौ देवी देवीऽउषासौ[११], पर्ज्जन्न्यो वृष्ट्टिमा२।ँ।ऽ इव वृष्ट्टिमानिव पर्ज्जन्न्यः पर्ज्जन्न्यो वृष्ट्टिमा२।ँ।ऽ इव[१२] इति ।

क्रमजटापाठे एकस्मिन् क्रमपदे स्थितेषु पञ्चसु सन्धिषु मद्ध्ये आद्द्यान्त्ययोर् द्वयोस् सन्ध्योर् विषये प्रातिशाक्ख्यमेव प्प्रमाणम् भवति, मद्ध्यानान्तरयाणां सन्धीनावँ् विषये तु सर्ववेदपारिषदव्व्याकरणे विकल्पेन विहितान् स्वप्प्रातिशाक्ख्ये विशेषेण विहितान् विषयान् विहायाऽन्न्यत्तर सर्ववेदपारिषदवँ् व्याकरणम् प्रमाणम् भवति । उदात्तादिस्स्वरविषये तु सर्वथा स्वप्प्रातिशाक्ख्यमेव प्प्रमाणम् भवति । तदुक्तम्– "(वर्जयित्त्वा विश्प्पतीव) विशेषविषयान् विधीन् । वैकल्पिकान् व्याकरणम् प्रमाणम् मद्ध्यगतत्रये । आद्द्यन्तयोऽ प्रातिशाक्ख्यम् मानं सर्वस्स्वरेषु च"[१३] इति । एतद्विषये उदाहरणानि प्प्रदर्श्यन्ते । तत्तर "कामधुक्क्षोऽधुक्क्षः काङ कामधुक्क्षः"[१४], "च पुष्प्पिणीः पुष्प्पिणीश्च च च पुष्प्पिणीः"[१५] इत्त्युदाहरणद्द्वये "कुप्प्वोऽकऽपौ च"[१६] इति विधेर् वैकल्पिकत्त्वात्, शुक्लयजुर्वेदप्रातिशाक्ख्ये "प्प्रकृत्त्या कखयोः पफयोश्च च"[१७] इति विशेषस्स्य विहितत्त्वाच् च माद्ध्यन्दिनीयके विकृतिपाठेऽपि जिह्वामूलीयोपद्ध्मानीयौ न भवतः । "सहस्सरधारन् देवो देवः सहस्सरधारं सहस्सरधारन् देवः"[१८]इत्त्यत्तर "वा शरि"[१९]इत्त्यस्स्य वैकल्पिकत्त्वात्, शुक्लयजुर्वेदप्रातिशाक्ख्ये "अविकारं शाकल्ल्यः शषसेषु"[२०] इति

---

१. ३३।१ । २. २७।३४ । ३. १५।४३ ।
४. ३३।२८ । ५. १५।२९ । ६. २२।१ । ७. २६।१७ ।
८. ११।६२ । ९. २८।१३ । १०. ३३।३८ । ११. २१।५० ।
१२. ७।२९ । १३. ज्यो.पृ. २२४–२२७ । १४. मा सं. १।३।
१५. तत्तरैव १२।८९ । १६. अष्टा. ८।३।३७ । १७. ३।११।
१८. मा. सं. १।३ । १९. अष्टा. ८।३।३६ । २०. ३।१० ।

विशेषस्य विहितत्वाच् च विकल्पेन सकारो न भवति। "स्थ महो मह स्त्थ स्त्थ महः"[१] इत्यत्र "खर्परे शरि विसर्गस्य विसर्गः"[२] इति विधेर् वैकल्पिकत्वात्, शुक्लयजुर्वेदप्रातिशाख्ये "लुङ ङमुदि जित्परे"[३] इत्युक्तत्वाच् च सकारो विसर्गो वाऽपि न भवति। एवमेवान्यत्राऽपि बोद्ध्यम्। काण्वशाखादिषु जिह्वामूलीयादीनां सत्त्वात् तदीयेषु विकृतिपाठेषु कृतेषु तु जिह्वामूलीयादयो यथायथं स्युरेवेति च ज्ञेयम्।

क्रमजटापाठे स्पर्शात् परोऽपृक्त उस् सवर्णे स्वरे परे वकारत्वम् प्राप्नोति, सन्धिनाऽनन्येन स्स्वरेण सहैक्यमापन्नोऽपि उ४ प्रगृह्यस् सन् स्वरे परे विकारन् न प्प्राप्नोति, ओकारान्ता निपाता४ प्रगृह्या भवन्ति, ओङ्कारे परे पूर्वोऽकार ओङ्कारे विलीनो भवति। एते च विषयास् सर्ववेदपारिषदव्याकरणेनैव सिद्धा अपि जटादिविकृतिलक्षणेऽपि स्स्पष्टतायै प्रोक्ताः। तथा हि "**सवर्णेऽपृक्त उस् स्पर्शात् स्वरे याति वतामिह। स एव सन्धिनाऽनन्यैक्यमापन्नोऽपि प्प्रगृह्यकः। ओकारान्तनिपातानावँ व्युत्क्रमेऽस्ति प्प्रगृह्यता। सपूर्वाकार ओङ्कारः प्रयात्त्योम्भावमत्तर हि**"[४] इति। तदुदाहरणानि च "उदुत्त्यन् त्यम्वुदुदुत्त्यम्"[५] इति, "ऊर्द्ध्वऽऊषुणो नः सू ऊर्द्ध्वऽऊर्द्ध्वऽऊ षु णः"[६] इति, "अथो यॆ यॆऽथोऽ अथो यॆ"[७] इति "ओम् प्र प्प्रोमोम् प्र"[८] इति च।

क्रमजटापाठविषये सन्धिविषयका ये नियमा४ प्रोक्तास् ते शिखादिषु अनन्यासु सप्तसु विकृतिष्वपि लगन्ति इति ज्योत्त्स्नाकारादयो वदन्ति। तदुक्तम् "**अयमेव हि शास्त्रार्थस् सर्वासु विकृतिष्वपि**"[९] इति। आचार्यव्याडिना मधुसूदनमस्करिणा चाऽस्मिन् विषये मौनमेवाऽवलम्बितम्। क्रमशिखोदाहरणेषु तु इयमुक्तिस् सर्वथा चरितार्था दृश्यते। क्रमदण्डोदाहरणेऽपि क्रमपदानाम् मद्ध्ये विरामे सत्त्यपि व्युत्क्रमेण पदानामुच्चारणे

---

१. मा. सं. ३।२०। २. पा. व्या. भा. ८।३।३६।
३. ३।१३। ४. शु. य. वे. प्रा. ज्यो., पृ. २२८, २२९।
५. मा. सं. ७।४१। ६. तत्त्रैव ११।४२। ७. तत्त्रैव १६।८।
८. तत्त्रैव २।१३। ९. शु. य. वे. प्रा. ज्यो., पृ. २३० (एष श्लोकार्धो यद्द्यपि काशिनाथवासुदेवाऽब्भ्यङ्करसम्पादिते वेदविकृतिलक्षणसङ्ग्रहसङ्गृहीताष्टविकृतिलक्षणग्रन्थे नोपलब्भ्यते, तथापि तत्त्राऽपि अष्टमश्लोकविवरणान्ते "अयमेव हि शास्त्रार्थो मालादिसप्तविकृतिषु बोद्ध्यः" इति तूल्लेख४ प्राप्प्यते एव)।

इयमुक्तिश् चरितार्था भवति। एवमेव क्क्रमरेखाक्रममालाक्रमद्ध्वजक्रम-रथक्रमघनोदाहरणेष्वपि क्रमपदानाम् मद्ध्ये विरामे सत्त्यपि व्युत्क्रमोच्चारणे इयमुक्तिश् चरितार्था भवत्त्येव ॥३०१॥

(ख) क्रमशिखानिरूपणम्

पदोत्तराज् जटामेव शिखामार्याऽ प्रचक्क्षते ।[1]
जटापदोपरि पदं शिखेवाऽत्तर भवेद् यतः ॥३०२॥

यदि क्क्रमजटापदादुत्तरमेकमग्रिमम् पदमपि पट्ठ्यते तर्हि सैव क्क्रमजटा सङ्क्षेपाच् शिखेत्त्युच्च्यते, यतो हि क्रमजटापदोपरि अग्रिमम् पदमेकमत्तर शिखेव स्थितम् भवेदित्त्यर्थः । उदाहरणार्थम् "अन्तश्च् चरति रोचनास्स्य प्राणादपानती । व्यक्ख्यन्न्महिषो दिवम्"[2] इत्त्यस्स्या ऋचऽ क्रमशिखापाठो यथा— "अन्तश्च्चरति चरत्त्यन्तरन्तश्च् चरति रोचना । अन्तरित्त्यन्तः । चरति रोचना रोचना चरति चरति रोचनाऽस्स्य । रोचनास्स्यास्स्य रोचना रोचनास्स्य प्राणात् । अस्स्य प्राणात् त्प्राणादस्स्यास्स्य प्राणादपानती । प्राणादपानत्त्यपानती प्राणात्त्प्राणादपानती । अपानतीत्त्यप- अनती ॥ व्यक्ख्यदक्ख्यद्द्वि व्व्यक्ख्यन्न्महिषः । अक्ख्यन्न्महिषो महिषोऽक्ख्यदक्ख्यन्न्महिषो दिवम् । महिषो दिवन् दिवम् महिषो महिषो दिवम् । दिवमिति दिवम् ॥" इति ॥३०२॥

(ग) क्रमदण्डनिरूपणम्

एकङ क्रमपदम् प्रोच्च्य विपर्यस्स्याऽपि तत् पठेत् ।
अनुलोमन् तत् पुनश् च प्प्रोच्च्येङ्ग्यञ् चेत् तदिङ्गयेत् ॥३०३॥
ततो द्वितीयन् तत् प्रोच्च्योक्तानि सर्वपदानि च ।
विपर्यस्स्य पठित्त्वा चाऽऽदितो ब्रूयात् पुनऽ क्रमम् ॥३०४॥
ततस् तृतीयञ् च क्रमपदम् प्रोच्च्य विपर्ययात् ।
पदान्न्युक्तानि सर्वाणि पठित्त्वा चाऽऽदितऽ पुनः ॥३०५॥
क्रममुक्त्वा चतुर्थञ् च ब्ब्रूयात् क्रमपदम् बुधः ।
रीत्त्याऽनया समाप्प्यार्धामृचमन्त्यम् पदङ खलु ॥३०६॥
स्थितोपस्थितकङ कृत्त्वा प्रारभेतोत्तरार्धकम् ।
तत्तर चेमाङ क्रियाङ कुर्यात् क्रमदण्डोऽयमुच्च्यते ॥३०७॥

प्रथमङ क्रमपदमेकमनुलोमम् पठेत्, ततस् तदेव क्क्रमपदम् प्रतिलोमम् पठेत्, ततऽ पुनस् तदेव क्क्रमपदम् अनुलोमम् पठेत्, यथायथम् अवग्ग्रहा-

---

१. शु. य. वे. प्रा. ज्यो., पृ. २३१। २. मा. सं. ३।७।

दिकञ् च प्प्रदर्शयेत्, ततो द्वितीयङ क्रमपदम् अनुलोमम् पठेत्, ततो द्वितीयक्क्रमपदपर्यन्तानि सर्वाणि पदानि प्रतिलोमम् पठेत्,ततऽ प्रथमत एव द्वितीयक्रमपदपर्यन्तम् अनुलोमङ क्रमपाठम् पठित्वा तृतीयङ क्रमपदम् पठेत्, ततस् तृतीयक्क्रमपदपर्यन्तानि सर्वाणि पदानि प्प्रतिलोमम् पठेत्; ततऽ पुनऽ प्रथमत एव तृतीयक्क्रमपदपर्यन्तम् अनुलोमङ क्रमपाठम् पठित्वा चतुर्थङ क्रमपदम् पठेदित्येवं रीत्याऽर्धर्चं समाप्प्याऽनुतिमम् पदमुपस्थापयेत् । तत उत्तरमप्प्यर्धर्चमेतयैव सरण्या पठेदित्ययम् पाठप्प्रकारऽ क्रमदण्ड उच्च्यते इत्यर्थः। एष एवार्थो व्याडिनाऽनुन्न्यंशचास्फुटमुक्तो यथा"**क्रममुक्त्वा विपर्यस्य पुनश्च क्क्रममुत्तरम् । आर्धर्चादेवमुक्तोऽयङ क्रमदण्डोऽभिधीयते**"[1] इति । क्रमदण्डोऽयम् बह्वृचेषु केरलब्रह्मेषु रथत्वेन प्प्रथितोऽस्तीति वेदविकृतिविवरणे दामोदरन् नम्पूतिरिप्पाट् ट्प्रतिपादयति । **क्रमदण्डोदाहरणार्थं** "**समिधाग्गँ निन् दुवस्स्यत घृतैर्बोधयतातिथिम् । आस्म्मिन्न्हव्या जुहोतन**"[2] इत्यस्स्या ऋचऽ **क्रमदण्डपाठो** यथा—

"**समिधाग्गँ निम् । अग्गँ निद· समिधा । समिधाग्गँ निम् । समिधेति सम्– इधा ।**

अग्गँ निन् दुवस्स्यत । दुवस्स्यताग्गँ निद· समिधा । समिधाग्गँ निम् । समिधेति सम्–इधा । अग्गँ निन् दुवस्स्यत ।

दुवस्स्यत घृतैः । घृतैर्द्दुवस्स्यताग्गँ निद· समिधा । समिधाग्गँ निम् । समिधेति सम्–इधा । अग्गँ निन् दुवस्स्यत । दुवस्स्यत घृतैः ।

घृतैर्ब्बोधयत । बोधयत घृतैर्द्दुवस्स्यताग्गँ निद. समिधा । समिधाग्गँ निम् । समिधेति सम्–इधा । अग्गँ निन् दुवस्स्यत । दुवस्स्यत घृतैः । घृतैर्ब्बोधयत ।

बोधयतातिथिम् । अतिथिम् बोधयतघृतैर्दुवस्स्यताग्गँ निद· समिधा । समिधाग्गँ निम् । समिधेति सम्–इधा । अग्गँ निन् दुवस्स्यत । दुवस्स्यत घृतैः । घृतैर्बोधयत । बोधयतातिथिम् । अतिथिमित्यतिथिम् ।।

आस्म्मिन् । अस्म्मिन्ना । आस्म्मिन् ।

अस्म्मिन्न्हव्या । हव्यास्म्मिन्ना । आस्म्मिन् । अस्म्मिन्न्हव्या ।

हव्या जुहोतन । जुहोतनहव्यास्म्मिन्ना । आस्म्मिन् । अस्म्मिन्न्हव्या । हव्या जुहोतन । जुहोतनेति जुहोतन ।।"इति।।३०३–३०७।।

---

१. शु. य. वे. प्रा. ज्यो., पृ. २३४ । २. मा. सं. ३।१ ।

(घ) क्रमले (रे) खानिरूपणम्

द्विपदम् प्राक् क्रमपदमुक्त्वा तद् व्युत्क्रमात् पठेत् ।
पुनः क्रमन् तस्य प्रोच्च्योत्तरन् त्रिपदकङ्क्रमम् ।।३०८।।
पठेत् तद् व्युत्क्रमाच् चाऽस्य प्रब्रूयाद् द्वैपदङ्क्रमम् ।
ततः क्रमपदम् ब्रूयादुत्तरन् तु चतुष्पदम् ।।३०९।।
तदप्युक्त्वा व्युत्क्रमेणाऽस्य पठेद् द्वैपदङ्क्रमम् ।
ततः परम् पञ्चपदम् ब्रूयात् क्रमपदम् बुधः ।।३१०।।
व्युत्क्रमेण च तत् प्रोच्च्य क्क्रमन् द्विपदकम् पठेत् ।
रीत्त्याऽनया कण्डिकान्तयँ यायाल् लेखा त्त्वियं स्मृता ।।३११।।

अयमेवार्थो व्याडिना वाक्क्यावैशारद्द्यैन सङ्क्षेपरुचितया वाऽप्यस्फुटतयोक्तो यथा "क्रमाद् द्वित्त्रिचतुःपञ्चपदक्क्रममुदाहरेत् । पृथक्पृथग् विपर्यस्य लेखामाहुः पुनः क्रमात्"[1] इति। "मधु नक्तमुतोषसो मधुमत्त्पार्त्थिवꣳ रजः । मधुद्द्यौरस्त्तु नः पिता"[2] इत्त्यस्या ऋचः क्रमलेखापाठो यथा–

"मधु नक्क्तम् । नक्क्तम् मधु । मधु नक्क्तम् ।
नक्क्तमुतोषसः । उषसऽ उत नक्क्तम् । नक्क्तमुत । उतोषसः ।
उषसो । मधुमत् त्पार्त्थिवꣳ. रजः । रजः पार्त्थिवम् मधुमदुषसः । उषसो मधुमत् । मधुमत् त्पार्त्थिवम् । मधुमदिति मधु–मत् । पार्त्थिवꣳ. रजः । रजऽ इति रजः ।।

मधु द्द्यौरस्त्तु नः पिता । पिता नोऽस्त्तु द्द्यौर्म्मधु । मधुद्द्यौः । द्यौरस्त्तु । अस्त्तु नः । नः पिता । पितेति पिता ।।" इति ।।३०८–३११।।

(ङ) क्रममालानिरूपणम्

अर्धर्चस्स्याऽऽदितो ब्रूयादनुलोमङ्क्रमम् बुधः ।
अनूततः प्रतिलोमन् तु क्क्रममुच्चारयेत् तथा ।।३१२।।
एकैकङ्खलु पर्यायात् तयोः क्रमपदम् पठेत् ।
तौ नयेदनूतमादिञ् च क्क्रममाला भवेदियम् ।।३१३।।
प्रातिलोम्म्यङ्क्रमपदेषु स्स्याच् च पदयोरपि ।
पाठेऽनूततस् स्यात् प्रथमं स्थितोपस्थितक्रम् पदम् ।।३१४।।

अयमेवार्थो व्याडिना सङ्क्षेपरुचितयाऽ स्स्फुटत्त्वेनोक्तो यथा — "ब्रूयात् क्रमविपर्यासावर्धर्चस्स्याऽऽदितोऽनूततः । अनूतञ् चाऽऽदिन् नयेदेवङ्क्रममालेति कीर्तिता" इति । यद्द्यपि व्याडिना क्रममालालक्क्ष-

---

१. विकृतिवल्ली, श्लो. २३–२४ । २. मा. सं. १३।२८ ।

णानन्तरम् "**माला मालेव पुष्पाणाम्**" इत्यादिकश् श्लोकः पठितस् तथाऽपि तस्य श्श्लोकस्य मालाप्रकारान्तरनिरूपणपरत्वन् दुरुपपादन् दृश्यते। तत्र पाठेऽपि विगानम् प्रतीयते। के चन तस्य श्श्लोकस्य चतुर्थम् पादम् "पदमाला प्रकीर्तिता" इति पठन्ति। के चन 'क्रमव्युत्क्रमसङ्क्रमाः' इति पठन्ति। "माला मालेव पुष्पाणाम् पदानाङ् ग्रन्थिनी हि सा। **आवर्तन्ते त्रयस् तस्याङ् क्रमव्युत्क्रमसङ्क्रमाः**" इति हि चरणव्यूहव्याख्याकार-ज्योत्स्नाकार-वेदविकृतिविवरणकार-प्रातिशाख्यप्रदीपशिक्षाकारादिपरिगृहीतः पाठः। एवन् चैष श्श्लोकः पूर्वोक्तक्रममालाया मालात्वस्यैवोपपादनाय पठित इति प्रतीयते। गङ्गाधरोऽपि "अमुमेवार्थङ् कुसुममालादृष्टान्तेनोपपादयति" इति हि "माला मालेव" इत्यादिकं श्लोकमवतारयति। तद्ग्रन्थे 'पदमाला' इति 'पुष्पमाला' इति वा नामाऽपि नैव दृश्यते। मधुसूदनमस्करिणाऽपि पुष्पमाला पदमाला वा नैवोल्लिखिता। या च पुष्पमाला ज्योत्स्नाकार-शौनकीयचरणव्यूहसम्पादक-वेदविकृतिविवरणकार-ऋक्संहितासम्पादकादिभिरुदाहृता साऽपि सर्वथा जटया तुल्या विरामप्रयोगविशेषमात्रेण विशिष्टीकृता उपेक्षणीयैवेत्यस्माभिरुपेक्षिता बोद्ध्या। **क्रममालो**दाहरणार्थन् "**त्रिर६·शद् धाम विराजति वाक्क्षपतङ्गाय धीयते। प्रतिवस्तोरहद्द्युभिः**"[1] इत्यस्याऋचः क्रममालापाठो यथा "**त्रिर६ शद् धाम। धीयतऽ** इति धीयते। धाम वि। **धीयते पतङ्गाय**। वि राजति। **पतङ्गाय** वाक्। **राजति** वाक्। वाग् राजति। वाक् क्षपतङ्गाय। **राजति** वि। **पतङ्गाय** धीयते। वि धाम। **धीयतऽ** इति धीयते। धाम त्रिर६·शत्॥ प्रति वस्तोः। द्युभिरिति-द्द्यु-भिः। वस्तोरह। द्युभिरह। अह द्द्युभिः। अह वस्तोः। द्युभिरिति द्द्यु-भिः। वस्तोः प्रति॥" इति॥३१२-३१४॥

(च) क्रमद्ध्वजनिरूपणम्

क्रमद्ध्वजे क्रमम् ब्रूयादृचो वर्गस्य वाऽऽदितः।
अन्ततोऽप्यविपर्यस्तपदम् ब्रूयात् क्रमम् बुधः॥३१५॥
एकैकङ् खलु पर्यायात् तयोः क्रमपदम् पठेत्।
आदिक्क्रमन् नयेदन्तमादिमन्तक्क्रमन् नयेत्॥३१६॥

तदुक्तवँ व्याडिना वाक्क्यावैशारद्द्येन सङ्क्षेपरुचित्वेनाऽपि वाऽस्स्फुटतया— "**ब्रूयादेव क्रमं सम्यगन्तादुत्तारयेद् यदि। वर्गे वा ऋचि वा यत्र पठनं स द्ध्वजस् स्मृतः**" इति। ऋचः क्रमद्ध्वजस्यो-

---

१. मा. सं. ३।८।

दाहरणाय च "विष्णोः कर्म्माणि पश्यत यतो व्रतानि पस्पशे। इन्द्रस्य युज्यः सखा"[1] इत्यस्या ऋचः क्रमद्ध्वजपाठो यथा—

१. विष्णोः कर्म्माणि। २. सखेति सखा।
३. कर्म्माणि पश्यत। ४. युज्यः सखा।
५. पश्यत यतः। ६. इन्द्रस्य युज्यः।
७. यतो व्रतानि। ८. पस्पशऽ इति पस्पशे।
९. व्रतानि पस्पशे। १०. व्रतानि पस्पशे।
११. पस्पश इति पस्पशे। १२. यतो व्रतानि।
१३. इन्द्रस्य युज्यः। १४. पश्यत यतः।
१५. युज्यः सखा। १६. कर्म्माणि पश्यत।
१७. सखेति सखा। १८. विष्णोः कर्म्माणि॥"

इति। एवमेव वर्गेऽपि ज्ञेयम् ॥३१५-३१६॥

(छ) क्रमरथनिरूपणम्

अर्धर्चयोर् वा पादानां समत्वे यत्तर पट्ठ्यते।
दण्डस् सहाऽऽरब्भ्य चैकैकम् पर्वाऽऽदाय हि क्क्रमात् ॥३१७॥
स प्प्रोच्यते क्क्रमरथो विद्द्वद्भिर् वेदपारगैः।
एष द्द्विचक्क्रस् त्रिचक्क्रश् चतुश्चक्क्रश् च पट्ठ्यते ॥३१८॥

तदुक्तवँ व्याडिना "पादशोऽर्धर्चशो वाऽपि सहोक्त्या दण्डवद् रथः" इति। तत्तर समसङ्ख्याकपदकयोरर्धर्चयोर् द्विचक्क्रो द्विपाद् वा रथो भवति। तथैव समसङ्ख्याकपदयोर् ऋचोरपि सहोक्त्या द्विचक्क्रो रथो भवति। समसङ्ख्यपदकपादायास् त्रिपदाया गायत्तर्चास् त्रिचक्क्रस् त्रिपाद् वा रथो भवति। समसङ्ख्यपदकपादायाश् चतुष्पदाया ऋचश् चतुश्चक्क्रश् चतुष्पाद् वा रथो भवति। एवञ् च कासाञ् चन ऋचामेव क्रमरथपाठो भवितुं शक्नोति। अत एव बह्व्वृचाः केरलब्ब्रह्म्माः क्रमरथपाठे उदासते इति वेदविकृतिविवरणे दामोदरन् नम्पूतिरिप्पाट् ट्प्रतिपादयति।

तत्तराऽर्धर्चशः प्रयुक्तो द्विचक्क्रो द्विपाद् वा "ऋधगित्था स मर्त्त्यः शशमे देवतातये। यो नूनम् मित्तरावरुणावभिष्टट्टयऽ आ चक्क्रे हव्व्यदातये"[2] इत्यस्स्या ऋचः क्रमरथो यथा—

१) ऋधगित्था। इत्थ ऋधक्।
२) यो नूनम्। नूनयँ यः।

---

१. मा.वा.शु.य.वे.म.सं. ६।४; १३।३३। २. तत्तरैव ३३।८७।

१) ऋधगित्था । इत्था सः । स इत्थ ऋधक् ।
२) यो नूनम् । नूनम् मित्त्रावरुणौ । मित्त्रावरुणौ नूनयँ यः ।
१) ऋधगित्था । इत्था सः । स मर्त्त्यः । मर्त्त्यः स इत्थ ऋधक् ।
२) यो नूनम् । नूनम् मित्त्रावरुणौ । मित्त्रावरुणावभिष्ट्टये । अभिष्ट्टये मित्त्रावरुणौ नूनयँ यः ।
१) ऋधगित्था । इत्था सः । स मर्त्त्यः । मर्त्त्यः शशमे । शशमे मर्त्त्यः स इत्थ ऋधक् ।
२) यो नूनम् । नूनम् मित्त्रावरुणौ । मित्त्रावरुणावभिष्ट्टये । अभिष्ट्टय आचक्करे । आचक्करेभिष्ट्टये मित्त्रावरुणौ नूनयँ यः ।
१) ऋधगित्था । इत्था सः । स मर्त्त्यः । मर्त्त्यः शशमे । शशमे देवतातये । देवतातये शशमे मर्त्त्यः स इत्थ ऋधक् ।
२) यो नूनम् । नूनम् मित्त्रावरुणौ । मित्त्रावरुणावभिष्ट्टये । अभिष्ट्टय आचक्करे । आचक्करे हव्व्यदातये । हव्व्यदातय आचक्करेभिष्ट्टये मित्त्रावरुणौ नूनयँ यः ।
१) ऋधगित्था । इत्था सः । स मर्त्त्यः । मर्त्त्यः शशमे । शशमे देवतातये । देवतातय इति देवतातये ।।
२) यो नूनम् । नूनम् मित्त्रावरुणौ । मित्त्रावरुणावभिष्ट्टये । अभिष्ट्टय आचक्करे । आचक्करे हव्व्यदातये । आचक्कर इत्त्या-चक्करे । हव्व्यदातय इति हव्व्य-दातये ।।[1] इति ।

पादशः प्रयुक्तस् त्रिचक्करस् त्रिपाद् वा "विष्णोः कर्म्माणि पश्यत यतो व्रतानि पस्पशे । इन्द्रस्य युज्यः सखा"[2] इत्यस्या ऋचः परमर्थो यथा—

१) विष्णोः कर्म्माणि । कर्म्माणि विष्णोः ।
२) यतो व्रतानि । व्रतानि यतः ।
३) इन्द्रस्य युज्यः । युज्य इन्द्रस्य ।

---

१. एतदुदाहरणयँ युगलकिशोरपाठकसम्पादितशुक्लयजुर्वेदप्रातिशाक्ख्यपरिशिष्टे वेदविकृतिलक्षणसङ्ग्रहे चाऽशुद्धतया मुद्द्रितमस्ति; ज्योत्स्नाया मुद्द्रिते पाठेऽपि काऽपि विरूपता प्रतीयते; वेदविकृतिलक्षणसङ्ग्रहभूमिकायान् तु कयाऽपि विकलतया मुद्द्रितमस्ति । २. मा. वा. शु. य. वे. म. सं. ६।४; १३।३३ ।

१) विष्णोः कर्म्माणि । कर्म्माणि पश्यत । पश्यत कर्म्माणि विष्णोः ।

२) यतो व्रतानि । व्रतानि पस्पशे । पस्पशे व्रतानि यतः ।

३) इन्द्रस्य युज्यः । युज्यः सखा । सखा युज्य इन्द्रस्य ।

१) विष्णोः कर्म्माणि । कर्म्माणि पश्यत । पश्यतेति पश्यत ।।

२) यतो व्रतानि । व्रतानि पस्पशे । पस्पश इति पस्पशे ।।

३) इन्द्रस्य युज्यः । युज्यः सखा । सखेति सखा ।।

पादश× प्रयुक्तश् चतुश्चक्रश् चतुष्पाद् वा "ओषधयः समवदन्त सोमेन सह राज्ञा । यस्मै कृणोति ब्राह्मणस् तं राजन् न्पारयामसि"[1] इत्यस्या ऋचः× क्रमरथो यथा—

१) ओषधयः सम् । समोषधयः ।

२) सोमेन सह । सह सोमेन ।

३) यस्मै कृणोति । कृणोति यस्मै ।

४) तं राजन् । राजंस्तम् ।

१) ओषधयः सम् । समवदन्त । अवदन्त समोषधयः ।

२) सोमेन सह । सह राज्ञा । राज्ञा सह सोमेन ।

३) यस्मै कृणोति । कृणोति ब्राह्मणः । ब्राह्मणः कृणोति यस्मै ।

४) तं राजन् । राजन्पारयामसि । पारयामसि राजंस्तम् ।

१) ओषधयः सम् । समवदन्त । अवदन्तेत्यवदन्त ।।

२) सोमेन सह । सह राज्ञा । राज्ञेति राज्ञा ।।

३) यस्मै कृणोति । कृणोति ब्राह्मणः । ब्राह्मण इति ब्राह्मणः ।।

४) तं राजन् । राजन्पारयामसि । पारयामसीति पारयामसि ।।

ज्योत्स्नाकारादिभिर् वर्णिता उदाहृताश् चान्ये प्रकारा विवेचनपूर्वकन् तेषामेव ग्रन्थेभ्यो वेदितव्याः ।।३१७-३१८।

(ज) क्रमघननिरूपणम्

अर्धर्चस्यान्तात् क्रमम् प्राक् पठित्वा तृयादिमानयेत् ।
आदितश् च नयेदन्तमिति पाठो घनस् स्मृतः ।।३१९।।

---

१. मा. वा. शु. य. वे. म. सं. १२।९६ ।

तदुक्तवँ व्याडिना— "**अनुतक्रमम् पठेत् पूर्वमादिपर्यन्तमानयेत्। आदिक्रमन् नयेदन्तङ घनमाहुर् मनीषिणः**" इति। व्याडिवचने अर्धर्चानुताद् वा ऋगनुताद् वा प्रारम्भ इति स्फुटन् नास्ति। तथापि गङ्गाधरादयोऽर्धर्चानुतात् प्रारम्भ इति स्फुटवँ व्याचक्षते। तथैव प्राचीनास् सर्वे उदाहरन्ति च। दण्डलक्षणेऽर्धर्चग्रहणात् तदनुयायिनि घनलक्षणेऽपि अर्धर्चस्यैव ग्रहणयँ युक्तमिति च विवेक्तव्यम्। एतस्य क्रमघनपाठप्रकारस्योदाहरणार्थं "**समिधाग्गँ निन् दुवस्स्यत घृतैर्ब्बोधयतातिथिम्। आस्म्मिन्न्हव्व्या जुहोतन**"[1] इत्यस्या ऋचः क्रमघनपाठो यथा—

"अतिथिमित्यतिथिम्। **बोधयतातिथिम्। घृतैर्ब्बोधयत। दुवस्स्यत घृतैः। अग्गँ निन्दुवस्स्यत। समिधाग्गँ निम्। समिधेति सम्–इधा।**

(समिधाग्गँ निम्। समिधेति सम्–इधा)। अग्गँ निन् दुवस्स्यत। दुवस्स्यत घृतैः। घृतैर्ब्बोधयत। बोधयतातिथिम्। अतिथिमित्यतिथिम्॥

जुहोतनेति जुहोतन। **हव्व्या** जुहोतन। **अस्म्मिन्न्हव्व्या**। आस्म्मिन्।

(आस्म्मिन्)। **अस्म्मिन्न्हव्व्या**। **हव्व्या** जुहोतन। **जुहोतनेति** जुहोतन" इति।

अत्तर अनुतक्रमानुत्यक्रमपदाऽऽदिक्रमाद्द्यक्रमपदयोः पृथक्पृथगेवोच्चारणवँ वा भवति सकृदेवोभयसाधारणमुच्चारणवँ वेत्यत्तर वचनात् पृथक्पृथगेवोच्चारणमिति प्रतीयते; प्राचीनानामुदाहरणेषु तु सकृदेवोभयसाधारणमुच्चारणमिति पक्षः प्रायेण दृश्यते; अत्तराऽभियुक्ताः प्रमाणम्॥३१९॥

शिखापर्व प्रोच्य तस्य तत्तरीण्यनुतिमपदानि तु।
विपर्यस्य पठित्वाऽथाऽऽनुलोम्येन पठेत् पुनः॥३२०॥
विरामानुते विपर्यासपाठन् न विदधीत च।
विरामानुते वेष्टनं स्यात् पदस्य च यथार्हतः॥३२१॥
शिखापर्व द्द्वितीयञ् चाऽऽदाय तद्वत् पठेत् ततः।
एवमेव तृतीयादि पर्वाऽऽदाय पठन् बुधः॥३२२॥
गच्छेदन्तङ कण्डिकाया लोकेऽयङ घन उच्यते।
शिखाघनश् चोच्यतेऽयँ याजुषैश् च प्रयुज्यते॥३२३॥

अयमेवार्थोऽन्न्यैरस्फुटमुक्तो यथा— "**शिखामुक्त्वा विपर्यस्य**

---

१. मा. वा. शु. य. वे. म. सं. ३।१।

तत्पदानि पुनः पठेत्। अयङ घन इति प्प्रोक्त इत्त्यष्टौ विकृतीः पठेत्"[1] इति। अयङ घनप्प्रकारश् शिखाघन इत्त्यपि व्यवहिरयते। अयम् प्रकारो व्याडिना नैव प्प्रतिपादितः। मधुसूदनमस्करिणा तु व्याड्ड्याचार्यानुमतिना ब्रुवाणेनाऽपि व्याड्ड्युक्तम् परित्त्यज्ज्य "शिखामुक्त्वा विपर्यस्य पुनस् त्रिपदमुच्चरेत्। शिखाजटाघनः प्रोक्त इत्त्यष्टौ विकृतीः पठेत्" इति वदताऽयमेव प्प्रकारः प्रतिपादितः। अद्द्यत्त्वे लोकेऽप्प्ययमेव प्प्रकारो भूम्म्ना प्प्रचलितो दृश्श्यते। केरलब्रह्म्मा अपि इममेव घनप्प्रकारमवलम्बमाना दृश्श्यन्ते। घनवल्लभाक्ख्यो घनप्प्रकारः पञ्चसन्धियुतघनपाठश् चेत्त्येवंविधा अन्न्येऽपि घनभेदा दृश्श्यन्ते। ते च कौण्डिन्न्यशिक्क्षादिमूलकाः प्रतीयन्ते। व्याडिना तु एकविध एव घनः प्रतिपादितोऽस्ति। उदाहरणार्थं "सहस्स्रशीर्षा पुरुषः सहस्स्राक्क्षः सहस्स्रपात्। स भूमिꣳ सर्व्वत स्स्पृत्वात्त्यतिष्ट्ठद् दशाङ्गुलम्"[2] इत्त्यस्स्या ऋचश् शिखाघनपाठो यथा— "सहस्स्रशीर्षा पुरुषः पुरुषः सहस्स्रशीर्षा सहस्स्रशीर्षा पुरुषः सहस्स्राक्क्षः, सहस्स्राक्क्षः पुरुषः सहस्स्रशीर्षा, सहस्स्रशीर्षा पुरुषः सहस्स्राक्क्षः। सहस्स्रशीर्षेति सहस्स्र-शीर्षा। पुरुषः सहस्स्राक्क्षः सहस्स्राक्क्षः पुरुषः पुरुषः सहस्स्राक्क्षः सहस्स्रपात् त्सहस्स्रपात् त्सहस्स्राक्क्षः पुरुषः पुरुषः सहस्स्राक्क्षः सहस्स्रपात्। सहस्स्राक्क्षः सहस्स्रपात् त्सहस्स्रपात् त्सहस्स्राक्क्षः सहस्स्राक्क्षः सहस्स्रपात्। सहस्स्राक्क्षऽ इति सहस्स्रऽअक्क्षः। सहस्स्रपादिति सहस्स्र-पात्॥ स भूमिम् भूमिꣳ स स भूमिꣳ सर्व्वतः, सर्व्वतो भूमिꣳ स सभूमिꣳ सर्व्वतः। भूमिꣳ सर्व्वतः सर्व्वतो भूमिम्भूमिꣳ सर्व्वतस्स्पृत्वास्स्पृत्वा सर्व्वतो भूमिम् भूमिꣳ सर्व्वतस्स्पृत्वा। सर्व्वतस्स्पृत्वास्स्पृत्वा सर्व्वतः सर्व्वतस्स्पृत्वात्त्यतिस्स्पृत्वा सर्व्वतः सर्व्वतस्स्पृत्वाति। स्पृत्वात्त्यतिस्स्पृत्वा स्स्पृत्वात्त्यतिष्ट्ठदतिष्ट्ठदति स्स्पृत्वा स्स्पृत्वात्त्यतिष्ट्ठत्। अत्त्यतिष्ट्ठदतिष्ट्ठदत्त्यत्त्यतिष्ट्ठद् दशाङ्गुलन् दशाङ्गुलमतिष्ट्ठदत्त्यत्त्यतिष्ट्ठद्दशाङ्गुलम्। अतिष्ट्ठद् दशाङ्गुलन् दशाङ्गुलमतिष्ट्ठदतिष्ट्ठद्दशाङ्गुलम्। दशाङ्गुलमिति

---

१. शु. य. वे. प्रा. ज्यो., पृ. २४१; (महिदासकृताया शौनकीयचरणव्यूहान्तर्गतऋग्वेदखण्डव्याक्ख्यायां सङ्गृहीतानि अष्टविकृतिलक्क्षणानि च द्रष्टव्यानि। तत्र 'शिखामुक्त्वा' इत्त्यस्स्य स्स्थाने 'जटामुक्त्वा' इति मुद्द्रितः पाठः)। २. मा. सं. ३१।१।

दश–ऽग्रङ्गुलम् ।।" इति ।

दाक्षिणात्येषु वैदिकेषु प्रसिद्धस्य घनवल्लभाऽपराभिधस्य पञ्चसन्धिकस्य घनपाठस्य अनन्तरामशास्त्रिप्रभृतिभिश्चरण-व्यूहसूत्रटिप्पण्यादिषु प्रदर्शितानामुदाहरणानामनुरूपमुदाहरणम् प्रदर्शयितुम् "पावका नः सरस्वती वाजेभिर्व्वाजिनीवती । यज्ञं नवं वष्ट्टु धियावसुः"[1] इत्यस्या ऋचः पञ्चसन्धिकघनपाठो यथा—

पावका नः । नो नः । नः पावका । पावका पावका । पावका नः । पावका नो नः पावका पावका नः सरस्वती सरस्वती नः पावका पावका नः सरस्वती । पावका नः । नः पावका । पावका नः । नः सरस्वती । सरस्वती सरस्वती । सरस्वती नः । नो नः । नः सरस्वती । नः सरस्वती सरस्वती नो नः सरस्वती वाजेभिर् व्वाजेभिः सरस्वती नो नः सरस्वती वाजेभिः । नः सरस्वती सरस्वती नः । नः सरस्वती । सरस्वती वाजेभिः । वाजेभिर् व्वाजेभिः । वाजेभिः सरस्वती । सरस्वती सरस्वती । सरस्वती वाजेभिः । सरस्वती वाजेभिर् व्वाजेभिः सरस्वती सरस्वती वाजेभिर्व्वाजिनीवती वाजिनीवती वाजेभिः सरस्वती सरस्वती वाजेभिर्व् वाजिनीवती । सरस्वती वाजेभिः । वाजेभिः सरस्वती । सरस्वती वाजेभिः । वाजेभिर् व्वाजिनीवती । वाजिनीवती वाजिनीवती । वाजिनीवती वाजेभिः । वाजेभिर् व्वाजेभिः । वाजेभिर् व्वाजिनीवती । वाजेभिर्व्वाजिनीवती वाजिनीवती वाजेभिर् व्वाजेभिर् व्वाजिनीवती । वाजेभिर् व्वाजिनीवती । वाजिनीवती वाजेभिः । वाजेभिर् व्वाजिनीवती । वाजिनीवतीति वाजिनी–वती ।। यज्ञं नवं वष्ट्टु । वष्ट्टु वष्ट्टु । वष्ट्टु यज्ञं नम् । यज्ञं नयं यज्ञं नम् । यज्ञं नवं वष्ट्टु । यज्ञं नवं वष्ट्टु वष्ट्टु यज्ञं नयं यज्ञं नवं वष्ट्टु धियावसुर् द्धियावसुर्व् वष्ट्टु यज्ञं नयं यज्ञं नवं वष्ट्टु धियावसुः । यज्ञं नवं वष्ट्टु । वष्ट्टु यज्ञं नम् । यज्ञं नवं वष्ट्टु । वष्ट्टु धियावसुः । धियावसुर् द्धियावसुः । धियावसुर् व्वष्ट्टु । वष्ट्टु वष्ट्टु । वष्ट्टु धियावसुः । वष्ट्टु धियावसुर् द्धियावसुर् व्वष्ट्टु वष्ट्टु धियावसुः । वष्ट्टु धियावसुः । धियावसुर् व्वष्ट्टु । वष्ट्टु धियावसुः । धियावसुरिति धिया–वसुः ।।" इति ।।३२०–३२३।।

सन्तानाद्ध्याय इत्येवं साङ्गोपाङ्गः प्रकाशितः ।
वेदभक्तिप्रहृद्वचित्तैरस्माभिस् सुधियाम् मुदे ।।३२४।।

।। इति सन्तानाद्ध्यायस् सप्तमः ।।

---

1. मा. वा. शु. य. वे. म. सं. २०।८४ ।

अथाऽष्टमोऽध्यायः

संस्कृतशिक्षाशास्त्रस्य आधुनिकशिक्षाशास्त्रेण सह तुलना

१. संस्कृतशिक्षाशास्त्राऽऽधुनिकशिक्षाशास्त्र-प्रयोजनयोस् तुलना—

शिक्षाशास्त्रं हि वर्णानां साकल्येनोपवर्णने ।
लग्नम् प्राचीनमार्षवे वाऽऽधुनिकवे वाऽपि सर्वथा ॥१॥
तथाप्याधुनिकं शिक्षाशास्त्रवे वर्णोपवर्णने ।
उपक्षीणमुदास्ते तद् वर्णानामनुपालने ॥२॥
परन्तु संस्कृतं शिक्षाशास्त्रवे वर्णानुपालने ।
प्रवधत्ते यतस् तद् धि प्रधानन् तत्प्रयोजनम् ॥३॥

२. संस्कृतशिक्षाशास्त्राऽऽधुनिकशिक्षाशास्त्र-क्षेत्रयोस् तुलना—

केवलान् वैदिकान् वर्णान् तेषामुच्चारणानि च ।
विचार्य संस्कृतं शिक्षाशास्त्रम् प्रायश प्रवर्तते ॥४॥
शिक्षाशास्त्रन् त्वाऽऽधुनिकम् प्रायेण पृथिवीतले ।
दृष्टानां सर्वभाषाणावे वर्णान् व्याख्यातुमिच्छति ॥५॥

लौकिकसंस्कृतभाषायावे वैदिकसंस्कृतभाषावर्णातिरिक्तवर्णानामभावाद् वैदिकसंस्कृतवर्णविचारेणैव लौकिकसंस्कृतवर्णविचारस्य गतार्थत्वम् बोद्धव्यम् । यद्द्यपि "त्रिषष्टिश् चतुष्षष्टिर् वा वर्णाश् शम्भुमते (सम्भवतो) मताः । संस्कृते प्राकृते चाऽपि स्स्वयम् प्रोक्तास् स्वयम्भुवा"[1] इति प्राकृतभाषावर्णविचारस्यापि संस्कृतशिक्षाशास्त्रे विहितत्वम् प्रतीयते; ह्रस्स्वैकारौकारयोश् च लौकिकसंस्कृते वेदेषु च प्रायेणाऽवर्तमानयोश प्राकृते सत्ताऽस्ति[2], तथापि सात्त्यमुग्रिराणायनीयानामाम्नाये ह्रस्स्व एकार श्रोकारश् च प्राप्येते[3] इति तावपि वैदिकवर्णविचारेणैव गतार्थौ वेदितव्यौ ॥४-५॥

---

१. पा. शि. श्लो. ३, शै. शि. श्लो. ५ । २. प्रा. पै. १।५ ।
३. आ. शि. सू., वृत्तिकारप्र. सू. ९; पा. व्या. भा. १।१।४८ ।

कालान्तरकृतम् प्रायो वर्णानाम् परिवर्तनम् ।
वैदिके संस्कृते शिक्षाशास्त्रे नैव विचिन्त्यते ॥६॥
शिक्षाशास्त्रे त्वाऽऽधुनिके वर्णानाम् परिवर्तनम् ।
कालान्तरकृतञ्च चाऽपि प्रायेण हि विचार्यते ॥७॥

यद्द्यपि भाषाविशेषे कालान्तरकृतवँ वर्णानाम् परिवर्तनन् तद्भाषासम्बद्धे आधुनिके फोनोलजीत्याख्ये शास्त्रे विचार्यते प्रायेण, न तु फोन्याटिक्सित्याख्ये; तथापि उभे शिक्षाशास्त्रकुक्षौ पातयित्वेदमुक्तम् बोद्ध्यम् ॥६-७॥

३. संस्कृतशिक्षाशास्त्राऽऽधुनिकशिक्षाशास्त्र-स्वरव्यञ्जनपरिभाषातुलना—

स्वराणावँ व्यञ्जनानाञ्च परिभाषा च भिद्द्यते ।
शिक्षाशास्त्रे संस्कृते चाऽऽधुनिके रूपभेदतः ॥८॥

स्वाभाविकवैदिक-संस्कृत-भाषायां स्वरव्यञ्जनयोरक्षरानक्षरात्मकत्वादाधुनिकीषु कासु चन भाषासु च तयोस् तथात्वस्स्याभावाद् वैदिके संस्कृतशिक्षाशास्त्रे आधुनिके शिक्षाशास्त्रे च स्वरव्यञ्जनपरिभाषायाम् भेदो दृश्यते । तत्र वैदिके शिक्षाशास्त्रेऽक्षरात्मको वर्णस् स्वरोऽनक्षरात्मको वर्णो व्यञ्जनम् इति स्वरव्यञ्जनपरिभाषे विज्ञायेते[1], आधुनिके शिक्षाशास्त्रे च मुखे सङ्घर्षणविशेषवँ विना निस्सरता श्वासेन जननीयो वर्णस् स्वरो मुखे सङ्घर्षणविशेषञ्च कृत्वा निस्सरता श्वासेन जननीयो वर्णो व्यञ्जनम् इति । तत्र संस्कृतशिक्षाशास्त्रोक्ता स्वरव्यञ्जनपरिभाषा कतिपयाधुनिकभाषासु व्यभिरति, आधुनिकशिक्षाशास्त्रोक्ता स्वरव्यञ्जनपरिभाषा च संस्कृतभाषाविषये व्यभिचरतीति परीक्षकैस् सुखेन बोद्धुं शक्यम् ॥८॥

४. संस्कृतशिक्षाशास्त्राऽऽधुनिकशिक्षाशास्त्र-वर्णवर्गीकरणादितुलना—

वर्णवर्गीकृतिर् वर्णानुक्रमश्च क्व चित् पृथक् ।
शिक्षाशास्त्रे वैदिके चाऽऽधुनिके दृष्टिभेदतः ॥९॥

एकारस्य ओकारस्य च सन्ध्यक्षरवर्गेऽन्तर्भावो वैदिकशिक्षाशास्त्रे, समानस्स्वरवर्गेऽन्तर्भावश् चाऽऽधुनिकशिक्षाशास्त्रे; यवयोस् स्वरधर्मभूयस्त्वस्स्याङ्गीकार आधुनिकशिक्षाशास्त्रे व्यञ्जनधर्मभूयस्त्वस्स्याङ्गीकारो वैदिकसंस्कृतशिक्षाशास्त्रे; कण्ठ्यवर्णादिको

---

१. पा. व्या. भा. १।२।२९ ।

वर्णानुक्रमो वैदिकशिक्षाशास्त्रे ओष्ठ्यवर्णादिकश् चाऽऽधुनिकशिक्षा-शास्त्रे इत्त्येवमादिका दृष्टिभेदमूलका भेदा अपि वैदिकशिक्षाशास्त्रा-ऽऽधुनिकशिक्षाशास्त्रयोर् वेदितव्याः । तत्तर एकारस्य ओकारस्य च प्राचीनाधुनिकस्स्वरूपयोरपि भेदः प्रागुक्तो वर्णाद्ध्यायादेव बोद्ध्यः॥९॥

५. संस्कृतशिक्षाशास्त्राऽऽधुनिकशिक्षाशास्त्र-वस्तुनिर्णयसाधनतुलना—

मुनीनायं योगजा प्रज्ञा तथा चाऽऽत्मनिरीक्षणम् ।
साधनं संस्कृते शिक्षाशास्त्रे तत्त्वनिरूपणे ॥१०॥
अभियुक्तस्य प्रज्ञा च यन्तरम् बाह्ययनिरीक्षणम् ।
शिक्षाशास्त्रे तत्वाधुनिके वस्तुनिर्णयसाधनम् ॥११॥

॥ इति तुलनाद्ध्यायोऽष्टमः ॥

अथ नवमोऽध्यायः

ग्रन्थोपसंहारो वैदिकशिक्षाशास्त्रमहत्त्ववर्णनपूर्वकः

१.वेदस्स्वरूपानुपालने वैदिकशिक्षाशास्त्रस्स्य परमोपकारकत्त्वम्

मुनीनामभियुक्तानाव्ं विदुषाम् प्रज्ज्ञया भृशम् ।
प्रदीप्तव्ं वैदिकं शिक्षाशास्त्रव्ं वेदानुपालने ॥१॥
परमावश्यकन् तस्स्य प्प्रभावादेव वैदिकी ।
अविज्ज्ञातादिकाऽप्प्येषा भारती भात्त्यधूमिला ॥२॥

२. पाश्चात्त्यशिक्षाशास्त्रप्प्रगतौ वैदिकशिक्षा-
शास्त्रस्स्य हेतुत्त्वम्–

अस्स्यैवाऽध्ययनात् प्राप्प्य विवेकप्प्रतिभोदयम् ।
द्वीपान्तरस्स्थाश् चाऽभूवन् शिक्षाशास्त्रे विचक्षणाः[1] ॥३॥
ते हि तत्त्र प्प्रयोगांश् च विविधान् प्रविधाय च ।
शिक्षाशास्त्रं सार्वभौममकार्षुर् नूतनप्प्रभम् ॥४॥

३. वैदिकशिक्षाशास्त्रस्स्याऽनन्यसाधारणा विशेषाः

वर्णवर्गीकृतौ वर्णानुक्क्रमस्स्य च निश्चितौ ।
अक्षराणाव्ं विभजने ह्रस्स्व–दीर्घ–निरूपणे ॥५॥
अघोषघोषवत्त्वादिवर्णात्मगुणदर्शने ।
वर्णैक्क्यपार्थक्क्यादीनाव्ं विषयाणान् निरूपणे ॥६॥
व्यञ्जनानाञ् च भाषासु द्द्वित्त्वाद्वित्त्वस्स्य दर्शने ।
व्यञ्जनाभिनिधानस्स्य विधाने च विशेषतः ॥७॥
वर्णसान्निद्ध्यजानाञ् च विकाराणाव्ं विचारणे ।
ददाति वैदिकं शिक्षाशास्त्रन् तैक्क्ष्ण्यन् निरीक्षणे ॥८॥

---

१. "Phonetics in Ancient India" इत्त्याक्ख्यस्स्य ग्रन्थस्स्य "The Indian Influence on Western Phonetics" इति प्प्रकरणमवलोकनीयम् ।

४. वैदिकशिक्क्षाशास्त्रस्स्योपयोगित्त्वमुपास्स्यत्त्वञ् च

भाषासु सर्वास्स्वप्येतदुपयोज्ज्यवँ विचक्क्षणैः ।
वेदसंस्कृतमूलासु भाषासु तु विशेषतः ॥९॥
अस्स्योपयोगस्स्याभावाद् भारतीयासु सम्प्रति ।
इदानीन्तनभाषासु लेखनन् दुर्गतौ[1] गतम् ॥१०॥
तस्मादुपास्स्यर्यँ यत्नेन शिक्क्षाशास्त्रं हि वैदिकम् ।
भूतले मानवैस् सर्वैस् तत्तराप्प्यार्यैर् विशेषतः ॥११॥

५. ग्रन्थोपसंहारः

दुरुच्चारणदुर्गन्धनिरासनपटीयसीम् ।
शिक्क्षानासाशुद्धिमिमाम् प्राप्प्य वेदः प्रसीदतु ॥१२॥
प्रसन्नस् सन् स कुरुताच् श्रेयो वेदानुयायिनाम् ।
यायुस् तेऽपि सुखेनाऽऽत्मावदानम्[2] परिहृत्य शम् ॥१३॥
वेदो लोके परञ् ज्योतिश् श्रेयोमार्गप्प्रदर्शने ।
तत्स्वाविर्भावने यत्नोऽस्माभिर् ग्रन्थात्मकः कृतः ॥१४॥
आविर्भूतोऽनेन सम्म्यक् श्रेयोमार्गम् प्रदर्शयन् ।
वेदो नृणां स्वोन्मुखानामृद्धिं सर्वविधाङ्क किरयात् ॥१५॥

॥ इत्त्युपसंहाराद्ध्यायो नवमः ॥

॥ सम्पूर्णा चेयङ् कौण्डिन्न्यायनशिक्क्षा ॥

---

१. इदानीन्तनभारतीयभाषासु उच्चारणमन्न्यत् तत्प्रतिनिधित्त्वेन विहितलँ लेखनमन्न्यदिति उच्चारणलेखनविसवँवाद इत्त्यादिका दुर्गतिर् बोद्ध्या। २. "यद् ध वाऽअत्तराग्गँ निहोत्तरन् जुहुव्वद्द्वाद्द्चेन वा कर्म्मणा वा मित्थ्या करोत्त्यात्तँ मनस्तदवद्द्चत्त्यायुषो वा वर्च्चसो वा प्प्रजायै वा" इति मा.वा. शतपथब्राह्मणवाक्क्यम् (२।३।४।१८) अत्तर विचारणीयम् ।

अनुबन्धाः

१. शौनकशिक्षा卐

सर्वज्ञं सर्वकर्तारं सर्वात्मानं शिवङ्ग गुरुम्। प्रणम्यर्क्षु प्रवक्ष्यामि वर्णोच्चारणलक्षणम् ॥१॥ वेदस्य लक्षणं सम्यग् बालानाम् बुद्धिवर्धनम्। यथोक्तम् पूर्वशास्त्रेषु तथा सङ्क्षिप्तमर्थवत् ॥२॥ द्विविधवँ वर्णजातं हि **स्वरो व्यञ्जनमेव** च। अकारादि स्वरो ज्ञेयऽ कादि व्व्यञ्जनमुच्यते ॥३॥ द्विविधश् च स्वरो ज्ञेयोऽनासिक्यस् सानुनासिकः। उदात्तश् चाऽनुदात्तश् च स्वरितऽ प्रचयस् तथा ॥४॥ कादीनाम् पञ्च वर्गाश् च **स्पर्शा** इति हि सञ्ज्ञिताः। **दुस्पृष्टश्** चेति विज्ञेयो डढयोस् स्वरमद्ध्ययोः ॥५॥ वर्गाणाम् प्रथमा वर्णा द्वितीया **ऊष्मसञ्ज्ञिताः**। हकारवर्ज्याश् **चाऽघोषाश्** शिष्टङ्ग **घोषवदुच्यते** ॥६॥ नासिक्याऽ पञ्चमा वर्णा **अनुस्वारस्** तथैव च। चत्वारश् च **यमाऽ** प्रोक्ता अव्व्यक्तास् सानुनासिकाः ॥७॥ चतस्रो यादयोऽ**न्तस्था** नासिक्या अप्प्यरेफिकाः। **ऊष्माणश्** शादयश् चैव चत्वारश् चेति कीर्तिताः ॥८॥ जिह्वामूलीय इत्युक्त उपद्ध्मानीय एव च। कपाशशिरतौ चोष्मजातौ विसर्गस्य च सम्भवौ ॥९॥ **ह्रस्स्वो दीर्घऽ प्लुत** इति स्वराऽ कालेन सञ्ज्ञिताः। सन्ध्यक्षराणाङ्ग कालश् च दीर्घप्लुतौ न मात्रिकः ॥१०॥ व्यञ्जनानान् त्वर्धमात्रा स्वरभक्तेस् तथैव च। सयँयोगे पादमात्रा स्यात् स्वरभक्तिऽ प्रकीर्त्यते ॥११॥ ह्रस्स्वात् परस् त्वनुस्वारस् त्रिपादऽ परिकीर्तितः। स च ह्रस्स्वस् त्रिपादस् स्याद् द्वावेतौ सममात्रकौ ॥१२॥ दीर्घात् परस् त्वनुस्वारऽ पादमात्रऽ प्रकीर्तितः। स च दीर्घस् सपादस् स्याद् **वर्णकालो निगद्यते** ॥१३॥ **अकुहाऽ कण्ठजाऽ प्रोक्ता** विसर्गश् चापि कण्ठजः। तालाविचुयशा जाता मूर्धन्यृटुरषास् स्मृताः ॥१४॥ दन्त्या लृतुलसाऽ प्रोक्ता उपद्ध्मानीय ओष्ठजः। उपू ओष्ठ्यौ

卐 एषा शिक्षा केरलस्थत्रिपुणित्तुरसंस्कृतमहाविद्यालयाध्यापकेन दिवाकरद्विजेन्द्रेण १९६२ तमे वर्षताब्दे सटीका मुद्रापिता।

विजानीयाद् वो दन्तोष्ठ्यस् तथैव च ॥१५॥ एऐ तु कण्ठतालव्यौ ओऔ कण्ठोष्ठजौ स्मृतौ । **स्पर्शानाङ्ग करणं** स्पृष्टमन्तस्स्थास्स्वीषदुच्यते ॥१६॥ स्वराणामूष्मणाञ्च चैव विवृतङ्ग करणं स्मृतम् । सवँ वृतञ् चेत्त्यकारस्स्य सर्ववर्णो निगद्द्यते ॥१७॥ ओऔ उवर्ण इत्येषामनेकस्स्य च सङ्गमे । **सकृदोष्ठ्यौ** विजानीयान् नाऽन्न्यश् चेन् मद्ध्यगस् स्वरः ॥१८॥ उषो न ओषूणो अग्ने द्विषो युयोतु यूयुविः । विरामे च विवृत्तौ च मद्ध्ये चेद् व्यञ्जनद्द्वयम् ॥१९॥ **द्विरोष्ठौ तु विगृह्णीयाद्** वकारे त्वधरन् तथा । यन् मयोभु उदीरय ताभिरू षु ऊतिभिः ॥२०॥ भ्रातुऽपुत्त्रान् धेनुं सोमस् सुष्टुतिर् मोषु वो अस्मत् । कुतुप्वो यत्तर दृश्यन्ते सन्धिस्स्थानेषु नित्त्यशः ॥२१॥ स्ववर्गेण नियुक्ताश् चेद् **वीरन्** तत्तरैव कारयेत् । ज्योक्करुत्तराहमुत्तर इमम् म इति च ॥२२॥ **नकारस्स्य पदान्तस्स्य रेफोऽन्तस्स्थास्वरोष्मसु** । लोपस् त्वाकारपूर्वस्स्य सशौ तु तचयोऽ परे ॥२३॥ पूर्वस्स्वरश् च नासिक्क्यस् स च रङ्गऽ प्रकीर्तितः । पूर्वकालो यथा तस्स्य रज्ज्यमाने स एव च ॥२४॥ दस्स्यूँर् योनौ पणीँर् हतङ्ग कवीँरिच्छाम्भ्यवराँ इन्दो । ताँ स्तरायस्स्वाऽवदँ स्त्वन् च ताँश्च पाहि पुत्त्राँ श्चेति ॥२५॥ नृन् पे च स्स्वतवान् पायौ विसर्गश् च विधीयते । अवर्णस्स्याऽनकारस्स्य स्वरे रङ्गऽ क्व चिद् भवेत् ॥२६॥ नृँः पात्तरं स्वतवाँः पायुस् सवायँ एव स चाँ इन्द्रः । उऽ पदे रज्ज्यते दीर्घऽ पदान्तऽ प्लुत एव च ॥२७॥ पदान्तस्स्य विधिऽ प्रोक्तऽ पदमद्ध्येऽपि दृश्यते । उभूदु पारमुभा उ नूनवँ विन्दतीति ॥२८॥ **माँस्पचन्न्यां माँश्चत्त्वे ह्रस्स्वत्त्वे च मँश्चतोः । मकारस्स्य पदान्तस्स्य रेफोष्मसु परेषु च** ॥२९॥ **अनुस्स्वारो भवत्त्येव पदमद्ध्यगतेष्वपि** । त्वं रथन् तं हिन्न्वन्ति त्वं शुक्करस्स्य तां सुते कीर्तिम् ॥३०॥ समानोदर्कं षष्ठेऽहनि मां समेकऽ पिंशति । स्ववर्गपञ्चमश् चैव स्स्पर्शेषु विषयेषु च ॥३१॥ अन्तस्स्थासु च ता एव मकारस्स्य विधिस् स्मृतः । इदङ्ग कवेस् तङ्ग गीर्भिर् नकिष् टङ्ग घ्नन्ति जङ्घ्नतः ॥३२॥ सञ्चोदय सञ्जानानास् तन् त्वा तन् देवाश् शन् नः । त्वम् पवित्त्रे प्रतरलँ लायन् तयँ यत् सवँ वर्धतेति च ॥३३॥ **परस्परस् तु सयँ योगस् स्पर्शानां सम्भवेद् यदि । तत्पूर्वस्स्य स्श्रुतिर् नास्ति विरामे व्यञ्जनस्स्य च** ॥३४॥ वाक्पूता वाग्देवी विट्कुलाद् विब्भ्राड् बृहत् तत् पुनः। जङ्घ्नन्ति त्रिष्टुब्गायत्त्र्यर्वाग् वि तदनुष्टुप् ॥३५॥ स्पर्शानाम् पञ्चमैर् योगे भवन्तो हि **यमास्** स्मृताः । **अयऽपिण्डेन तत् तुल्यङ्ग** घनबन्धाऽ प्रकीर्तिताः ॥३६॥ पलिक्नीर् यज्ञ रत्नानि

विद्माऽऽप्नानं ररभ्म च। स्पर्शाश् च पञ्चमाश् चैवमन्तस्थाभिश् च सयँयुताः ॥३७॥ **दारुपिण्डेन तत् तुल्यङ्** घनबन्धाऽ प्रकीर्तिताः। शक्यं शरव्यङ्ग कृच्छ्रवँ वज्ज्रं राष्ट्यत्त्येतीड्ड्यं सम्म्राट् ॥३८॥ मीड्ढ्वान् तत्थ्यवँ वाद्धर्यशश्वोतापम्म्लुक्तवँ विब्भ्वीरुच्यते। ऊष्माणऽ पञ्चमैर् युक्ता अन्तस्स्थाभिश् च सयँयुताः ॥३९॥ **ऊर्णापिण्डेन तत् तुल्यं** श्लथबन्धाऽ प्रकीर्तिताः। अश्नोतु विष्णुर् घृतस्नु अस्मे युष्मे इति स्स्नुषे ॥४०॥ अस्स्य वामस्स्याऽजुष्ष्रन्नशश्वस् सम्मिश्ल इत्त्यपि। वकारस् तु नकारेण णकारेण च सयँयुतः ॥४१॥ श्लथबन्धस् स विज्ज्ञेयो दुस्पृष्टश् चात्तर चोच्च्यते। विसर्जनीयस्स्य यदा कपयोऽ परतस् स्थितिः ॥४२॥ न संहितायाम् भवत ऊष्मजातौ परिग्ग्रहे। ऋलृ-स्स्वरौ यत्तर पूर्वावूष्मसञ्ज्ञे परे स्थिते ॥४३॥ पूर्वस्स्वरस्स्य सम्भाक् स्यात् **स्वरभक्तिऽ** प्रकीर्त्यते। हकारम् पञ्चमैर् युक्तमन्त-स्स्थाभिश् च सयँयुतम् ॥४४॥ उरस्स्यन् तवँ विजानीयात् परञ् चेत् पृथगुच्चरेत्। **प्रथमात् तु हकारो यस् तच्चतुर्थमवाप्प्यते** ॥४५॥ **स्वतृतीयमवाप्नोति पूर्ववर्णस् तदा हि सः**। अनुस्स्वारस्स्वराब्भ्यान् तु **सयँयोगादिर् द्विरुच्यते** ॥४६॥ ऊष्मणऽ प्रथमौ ज्ञेयौ लात् स्पर्शो रपरस् तथा। ह्रस्स्वपूर्वौ नङौ द्वित्त्वमापद्द्यते स्वरोदयौ ॥४७॥ प्रथमाच् च नकाराद् वा शकारश् छत्त्वमेव च। ह्रस्स्वात् तु द्द्विछकारोऽ त्तर यो दीर्घादपि दृश्यते ॥४८॥ पवमानसहयस्स्यतनेचाऽतिहायवर्-जिताः। नटाब्भ्यां से परे मद्ध्ये तकारस् सम्प्रजायते ॥४९॥ नतयोर् लचवर्गे च सवर्णस् स्यात् परस्स्य तु। पदान्ताऽ प्रथमा वर्णा घोष-सञ्ज्ञे स्वरे परे ॥५०॥ स्वतृतीयानवाप्प्यन्ते पञ्चमे पञ्चमा स्तथा। **अपदान्ताऽ प्रथमा वर्णा ऊष्मसञ्ज्ञे परे स्थिते** ॥५१॥ **वर्णा द्वितीया विज्ज्ञेया उच्च्यन्ते वर्णवेदिभिः**। यकाररेफावित्त्येतावृकारेण च सयँ-युतौ ॥५२॥ ओष्ठौ तत्तर न कम्प्येत क्विषप्परमेतत् प्रचक्क्षते। नादस् तु श्श्रूयते घोषाद् विरामाद् द्वित्त्वतस् तथा ॥५३॥ अनासिक्क्योऽथ नासिक्क्यो जायते वर्णरूपतः। **नीचस् स्वरोऽनुदात्तस् स्यादुच्चश् चोदात्त उच्च्यते** ॥५४॥ **स्वरितस् तत्समाहारस् तदैक्क्यम् प्रचयस् स्मृतः**। अनु-दात्तो हृदि ज्ज्ञेयो मूर्ध्न्युदात्त उदाहृतः ॥५५॥ स्वरितऽ कर्णमूलीयस् सर्वस्मिन् प्रचयस् स्मृतः। **मद्ध्ये तु कम्पयेत् कम्पमुभौ नीचौ समौ भवेत्** ॥५६॥ द्विगुणवँ वर्णकालाच् च पादऽ कम्पार्थमिष्यते। अनु-दात्तमुपादाय स्स्वरितं ह्यवलम्बयेत् ॥५७॥ पुनर् निहतमागच्छेदेष

कम्पविधिस् स्मृतः । उदात्तऽ पूर्वभागस् तु परभागो निहन्यते ॥५८॥ **उदात्तकम्प** इत्युक्तऽ कुत्तर चिच् चापि दृश्यते । स्थानञ्च कालो विकारश् च सर्वं वृतवं विवृतागमौ ॥५९॥ ईषत्स्पृष्टमघोषत्वं स्वरऽ कम्पस् तथोष्मता । घोषाऽनासिक्क्यनासिक्क्या वर्णधर्मास् त्विमे मताः ॥६०॥ यावन्तो यत्तर ये धर्मास् तावन्तस् तत्तर तान् विदुः । **चतुर्मात्तरश् च षण्मात्तरऽ प्रणवऽ कीर्त्यते बुधैः** ॥६१॥ पूर्वस्स्वरऽ परो नादस् सममात्तरऽ प्रकीर्तितः । अनुदात्तस् स्वरो ज्ञेय उदात्तो नाद उच्च्यते ॥६२॥ लक्क्षणम् प्रणवस्स्येदम् प्रणवो ब्रह्मम कीर्त्यते । तैलधारानिवाच्छिन्नन् दीर्घघण्टानिनादवत् ॥६३॥ अवाग्जम् प्रणवस्स्याऽग्रयं यस् तवं वेद स वेदवित् । त्रिरस्स्थानञ् च त्रिरमात्तरञ् च त्रिरब्रह्मञ् च त्रियक्क्षरम् ॥६४॥ त्रिरमात्तरादर्धमात्तरन् तु यस् तवं वेद स वेदवित् । **वेदो हि वर्णसङ्घातो वेदो ब्रह्मेति कीर्त्यते ॥६५॥ तस्मात् तु वेदवर्णज्ज्ञो ब्रह्ममलोके महीयते** । एतत् पुण्यम् पापहरवं वाङ्मलस्स्य विशोधनम् ॥६६॥ भक्त्या ज्ञात्वा च सङ्गृह्य य ब्रह्ममलोकं स गच्छति । अनेन विधिना वेदयं योऽधीते श्रद्धयाऽन्वितः ॥६७॥ सर्वपापैर् विमुक्तस् सन् ब्रह्ममलोके महीयते ॥६८॥ **इति शौनकशिक्क्षा** ॥

२. शैशिरीयशिक्क्षा ❶

ओम् । गजाननाय शशीशाय सर्वविघ्नप्प्रणाशिने । नमो गणेशरूपाय विष्णवे दशबाहवे ॥१॥ जगत्सम्भूतिसंरक्क्षासंहारैकविनोदिने । नमो भगवते तस्मै चिदानन्दाय विष्णवे ॥२॥ मुद्गलो गालवो गार्ग्यश् शाकल्ल्यश् शैशिरस् तथा । पञ्चैते शौनकाश् शिष्याश् शाखाभेदप्प्रवर्तकाः ॥३॥ शैशिरस्स्य तु शिष्यस्य (शिष्यस् स्यात् ?) शाकटायन एव च ॥४॥ **सर्वज्ज्ञं सर्वकर्तारमाचार्यन् तु प्प्रणम्य च । शैशिरोऽहम् प्रवक्क्ष्यामि शाखाया लक्क्षणवं विधिम्** ॥५॥ त्रिषष्टिश् चतुष्षष्टिर् वा वर्णास् **सम्भवतो** मताः । प्राकृते संस्कृते वापि स्स्वयम् प्रोक्तास् स्वयम्भुवा ॥६॥ स्वरा विंशतिरेकश् च स्स्पर्शानाम्

---

❶ एषा शिक्क्षा तारापदचौधरिणा सम्पाद्द्य (वैदिकाद्ध्ययनानुसन्धानपत्त्रिकायाम् [J.V.S.], १९३५ तमे करैस्ताब्दे) मुद्द्रापिता ।

पञ्चविंशतिः । यादयश् च स्स्मृता ह्यष्टौ चत्त्वारस् तु यमास् स्मृताः ॥७॥ अनुस्स्वारो विसर्गश् च ङकारश् च तथैव च । दुस्स्पृष्टश् चेति विज्ज्ञेयो **नासिक्क्यं रङ्गमुच्यते** ॥८॥ **उच्चारणविशेषेणाऽत्तराक्क्षराश्श्रयमुच्यते** । द्विविधवँ वर्णजातं हि स्स्वरो व्यञ्जनमेव च ॥९॥ अकारादिस् स्वरो ज्ज्ञेयꣳ कादि व्व्यञ्जनमुच्यते । द्विविधश् च स्स्वरो ज्ज्ञेयोऽनासिक्क्यस् सानुनासिकः ॥१०॥ उदात्तश् चाऽनुदात्तश् च स्स्वरितꣳ प्रचयस् तथा । कादीनाम् पञ्च वर्गाश् च स्स्पर्शा इति हि सञ्ज्ञिताः ॥११॥ **दुस्स्पृष्टश् चेति विज्ज्ञेयो ढढयोस् स्वरमद्ध्ययोः** । वर्गाणाम् प्रथमा वर्णा द्वितीया **ऊष्म**सञ्ज्ञिताः ॥१२॥ हकारवर्ज्याश् चाऽघोषाश् शिष्टङ **घोषवदुच्यते** । नासिक्क्याꣳ पञ्चमा वर्णा अनुस्स्वारस् तथैव च ॥१३॥ चत्त्वारस् तु यमाꣳ प्रोक्ता अव्व्यक्तास् सानुनासिकाः । चतस्स्रो यादयोऽन्तस्था नासिक्क्या अप्प्यरेफिकाः ॥१४॥ ऊष्माणश् शादयश् चैव चत्त्वार इति कीर्तिताः । जिह्वामूलीय इत्त्युक्त उपद्ध्मानीय एव च ॥१५॥ कपाश्शिरतोष्मजातौ च विसर्गस्य च सम्भवौ । **ह्रस्स्वो दीर्घꣳ प्लुत इति स्स्वराꣳ कालेन सञ्ज्ञिताः** ॥१६॥ सन्ध्यक्क्षराणाङ्ग कालश् च दीर्घꣳ प्लुतो न मात्त्रिकः । उच्चारणविशेषेणात्त्राक्क्षराश्श्रयमुच्यते ॥१७॥ व्यञ्जनन् त्वर्धमात्त्रं स्यात् स्वरभक्तिस् तथैव च । सयँ योगे पादमात्त्रा स्यात् स्वरभक्तिꣳ प्रकीर्त्यते ॥१८॥ ह्रस्स्वात् परस् त्वनुस्स्वारस् त्रिपादꣳ परिकीर्तितः । स च ह्रस्स्वस् त्रिपादस् स्याद् द्वावेतौ सममात्त्रिकौ ॥१९॥ दीर्घात् परस् त्वनुस्स्वारꣳ पादमात्त्रꣳ प्रकीर्तितः । स च दीर्घस् सपादस् स्याद् वर्णकालो निगद्द्यते ॥२०॥ **अष्टौ स्थानानि वर्णानामुरꣳ** कण्ठश् शिरस् तथा । जिह्वामूलञ् च दन्ताश् च नासिकोष्ठौ च तालु च ॥२१॥ अकुहाꣳ कण्ठजाꣳ प्रोक्ता उपद्ध्मानीय ओष्ठजः । उपू ओष्ठ्यौ विजानीयाद् वो दन्त्योष्ठ्यस् तथैव च ॥२२॥ एऐ तु कण्ठतालव्व्यौ ओऔ कण्ठोष्ठजौ स्मृतौ । **स्पर्शानाङ्ग करणं स्पृष्टमन्तस्थास्स्वीषदुच्यते** ॥२३॥ स्वराणामूष्मणाञ् चैव विवृतङ्ग करणं स्मृतम् । सवँ वृतञ् चेत्त्यकारस्स्य सर्ववर्णो निगद्द्यते ॥२४॥ उच्चारणविशेषेणात्त्राक्क्षराश्श्रयमुच्यते । अनुस्स्वारे विवृत्त्यन्ते विरामे चाऽक्क्षरद्द्वये ॥२५॥ ओवर्णे च उवर्णे च पवर्गे च पृथक्पृथक् । ओऔ उवर्ण इत्त्येषामनुस्स्वारपवर्गयोः ॥२६॥ विरामे च विवृत्तौ च मद्ध्ये च व्व्यञ्जनद्द्वये । **द्विरोष्ठौ तु विगृह्णीयाद् वकारे त्वधरन् तथा** ॥२७॥ सुऊतयो भ्रातुꣳ-

पुत्तरान् धेनुं सोमऽप्रसुष्टुतिः।यन् मयोभु उदीरय पुपुष्वान् मोष्ठवो असमा बभूवुः।।२८।।श्वो वोचेमहीत्त्येतादृशन् निदर्शनम्।ओ औ उवर्ण इत्त्येषावँ व्यञ्जनस्य च सङ्गतौ ।।२९।। **सकृदोष्ठौ विगृहणीयान्** नाऽन्त्यश् चेन् मद्ध्यगस् स्वरः। द्विवो युयोतु युयुविरित्त्येतत् तन्निदर्शनम् ।।३०।। कतवा यत्तर दृश्यन्ते सन्धिस्थानेषु नित्यशः। स्ववर्गेण नियुक्ताश् च **वीरन्** तत्तरैव कारयेत्।।३१।। हिङ्ग कृण्वती तत् ते भद्द्रङ्ग गाम् भजन्त निदर्शनम् । स्पर्शानाम् पञ्चमैर् योगे भवन्तीह यमास् स्मृताः ।।३२।। **अयऽपिण्डेन** तत् तुल्यङ्ग घनबन्धाऽ प्रकीर्तिताः। सः पलिक्नीरग्निर् यज्ज्ञम् पत्नी विद्म दद्धम ।।३३।। आत्मानम् पाप्मा जगृभ्माऽगृभ्णामित्त्येतन् निदर्शनम्। स्पर्शास् त्वपञ्चमाश् चैवमन्तस्थाभिश् च सयँ्युताः ।।३४।। **दारुपिण्डेन** तत् तुल्यं श्लथबन्धाऽ प्रकीर्तिताः। शत्तरुं सक्ख्यमग्ग्रचङ्ग कृच्छ्रङ्ग क्व वज्ज्रयँ् यज्ज्वाराष्ट्रच्चति।।३५।।प्लायोगिर् विद्धिर्(वद्धिर्?)मेड्ढरवँ् वाद्धर्च्चश्श्वेति निदर्शनम्। वकारस् तु नकारेण णकारेण च सयँ्युतः ।।३६।। श्लथबन्धस् स विज्ज्ञेयो दुस्स्पृष्टश् चाऽत्तर चोच्च्यते। भूरिदाव्न एवयाव्नऽ प्रातर्यावाणो दधिक्राव्णः।।३७।। ईडे द्यावापृथिवी मीढे सप्तिरित्त्यत्तर तु निदर्शनम्। सयँ्योगे शषसाऽ पूर्वे परञ् चेदनुनासिकम् ।।३८।। **ऊर्णापिण्डेन** तत् तुल्यं श्लथबन्धाऽ प्रकीर्तिताः। अश्नोतु विष्णुर् घृतस्नू कार्ष्मेवेति निदर्शनम् ।।३९।। **परस्परस् तु सयँ्योगस् स्पर्शानां सम्भवेद् यदि। तत्पूर्वस्स्य श्शरुतिर् नास्ति विरामे व्यञ्जनस्य च** ।।४०।। वाग्देवी विट्कुलाद् विब्भ्राड् बृहदारैक् पन्थायँ् यदग्घ्नन्। त्रिष्टुब् गायत्तरी अस्माद् अनुष्टुबिति निदर्शनम् ।।४१।। **नकारान्तम् पदम् पूर्वयँ् यवकारे परे पदे। असयँ्युतन् तु विज्ज्ञेयमुभयोर् व्यक्तिरिष्यते** ।।४३।। सयँ्युतौ यवकारौ चेदृकारऽ परतो यदि। सयँ्युतन् त्वत्तर विज्ज्ञेयन् नोभयोर् व्यक्तिरिष्यते ।।४३।। **अनुस्स्वारस्वराद्द्यस् तु सयँ्योगादिर् द्विरुच्च्यते।** ऊष्मा चेत् प्रथमौ ज्ज्ञेयौ लात् त्स्पर्शो रपरस् तथा ।।४४।। त्वं श्रद्धाभी रथं स्वस्ति वज्ज्रमग्ग्रमा त्त्वा रथम्। आ द्वाब्भ्यामीद्ध्यस्स्व विभ्वीस् सहस्कृत ।।४५।। कश् छन्दसाम् पश्चात् सुष्टुभस् तिष्ठन्ति। शुष्का कस् तद् अस्ता दिवस्परि ।।४६।। शुल्का य उल्कामिव गल्दया मर्च्चयति। वर्धन्तान् दितम् पुनर्यन्धपूर्वमैर्थश् च तदत्तर तु निदर्शनम् ।।४७।। **यद्द्यूष्मानुपधो युक्तस् स चेदन्तस्थया पुनः। तस्स्यैव क्करमणङ्ग कार्यं श्यावा स्वाहा श्रिये हवये** ।।४८।।

नटाव्भ्यां से परे मद्ध्ये तकारस् सम्प्रजायते। नतयोर् ले चवर्गे च सवर्णस् स्यात् परस्स्य तु।४९।त एवादुकहेमञ् च वृत्तश् चाकारश् श्रूयते।आपऽ क्षिप्-तञ् च यच् छब्दम् प्रथमोच्चारणलक्षणम्।।५०।।ससवान्त्सन् त्स्तूयसे विराट् त्सम्म्राड् यस्मिलँ् लोके। नृ॒ञ् जातैरिति तल्लोकमस्माच् चेति निदर्शनम् ।।५१।।अनन्त्याऽ प्रथमा वर्णा घोषसञ्ज्ञे परे स्थिते। वर्णा द्वितीयानु-च्च्यन्ते उच्च्यन्ते वर्णवेदिभिः।।५२।।द्वयोऽ पादुकहेमञ् च वृत्तश् चाकारश् श्रूयते। आपऽ क्षिप्तञ् च यच् छब्दन् द्वितीयोच्चारणलक्षणम् ।।५३।। **वृख्षेवृख्षे सवँ्वथ्सरन्** त्वान् थ्सारी तमफ्सन्त च। मत्थ्सरो मथ्स्यपायी-त्त्येतत् तु निदर्शनम् ।।५४।। यथासौ मत्तमातङ्गऽ पदात् पदमवक्क्रमी। एवम् पदम् पदस्स्यान्ते दर्शनीयम् पृथक्पृथक् ।।५५।। रलौ स्वराद् यत्तर पूर्वा ऊष्मसञ्ज्ञे परे स्थिते। पूर्वस्स्वरस्स्य सम्भाव्या **स्वरभक्तिऽ** प्रकीर्त्यते ।।५६।। अदर्शि शीर्षा अग्निर्होता सर्सृते च न जल्हवः। शतवल्शोऽर्षाणोऽर्षन्नेतदत्तर निदर्शनम्।।५७।।व्यञ्जनान्तेषु युक्तेषु सैव स्स्यात् पादमात्तिरका। शीर्ष्णश्शीर्ष्णऽ प्रसर्स्राणस् तर्ह्येवैतन् निदर्श-नम् ।।५८।। **स्वरभक्तिम्** प्रयुञ्जानस् त्रीन् दोषान् परिवर्जयेत्। इकारञ् चाऽप्युकारञ् च ग्रस्तदोषन् तथैव च ।।५९।। यकाररेफावित्त्येतावृकारेण च सयँ्युतौ। औष्ठौ न तत्तर कम्प्येते **क्षिप्प्रमेतत्** प्रचक्क्षते ।।६०।। प्रकृतान्न्यृजीषिणो वज्र्यचीषमश् शम्म्यृक्क्वाणः। निर्ऋथन् निर्ऋतेश् चापि निदर्शनमितीदृशम् ।।६१।। विसर्जनीयस्स्य यदा कपयोऽ परतस् स्थितिः। न संहितायाम् भवत ऊष्मजातौ परिग्ग्रहे ।।६२।। ज्योतिष्कृद् यातञ् छर्दिष्पाविममञ्जस्पामुभये। हविष्कृतम् पथस्पथ इत्त्यत्तर तु निदर्शनम् ।।६३।। **नीचैस् स्वरोऽनुदात्तस् स्यादुच्चैश् चोदात्त उच्च्यते। स्वरितन् तत्समाहारस् तदैक्क्यम् प्रचयस् स्मृतः** ।।६४।। अनुदात्तो हृदि ज्ञेयो मूर्ध्न्युदात्त उच्च्यते। स्वरितऽ कर्णमूलीयस् सर्वस्मिन् प्रचयस् तथा ।।६५।। इमम् मे गङ्गे यमुने सरस्स्वति निदर्शनम्। उदात्तश् चानुदात्तश् च स्वरितश् च तथैव च ।।६६।। लक्क्षणवँ् वर्णयिष्ष्यामि **दैवतं** स्थानमेव च। **शुक्लमुच्चवँ्** विजानीयान् नीचलँ् लोहितमुच्च्यते ।।६७।। श्यामन् तु स्स्वरितवँ् विद्द्यादग्निरुच्चस्स्य देवता। नीचे सोमवँ् विजानीयात् स्वरिते सविता तथा ।।६८।। उदात्तम् **ब्राह्मणवँ्** विद्द्यान् नीचञ्च क्षत्त्रियमुच्च्यते। वैश्श्यन् तु स्स्वरितवँ् विद्द्या-दुदात्तन् तु भरद्वसुः ।।६९।। नीचञ्च गौतममित्त्याहुर् गार्ग्यन् तु स्स्वरितवँ् विदुः। विद्द्यादुदात्तञ्च गायत्तरन् नीचन् त्रैष्टुभमुच्च्यते ।।७०।। जागतं स्वरितवँ् विद्द्यादेतदेव नियोगतः। **मद्ध्ये तु कम्पयेत्**

कम्पमुभौ पार्श्वौ समौ भवेत् ।।७१।। द्विगुणवँ वर्णकालाच् च काल४ कम्पार्थ इष्यते । अनुदात्तमुपादाय स्स्वरितं ह्यवलम्बयेत् ।।७२।। पुनर् निहतमागच्छेदेष कम्पविधिस् स्मृतः । क्व१ वोऽश्श्वा युजानो३ऽस्माभिस् त्वं ही३न्द्रेति निदर्शनम् ।।७३।। सरङ्गङ्ग कम्पयेत् कम्पं रथीवेति निदर्शनम् । उदात्त४ पूर्वभागस् तु परभागो निहन्न्यते ।।७४।। **उदात्तकम्प** इत्त्युक्त४ कुत्तर चिच् चापि दृश्यतेाशवी३पतिन् तनू३नपात् स्थानान् न निदर्शनम् ।।७५।। क्रमकाले रथानान् न संहितावन् न कम्पयेत् । नीचस्स्वरितमेवाऽत्तर एष कम्पविधिस् स्मृतः ।।७६।। **स्वस्थ४ प्रशान्तो निर्भीतो वर्णानुच्चारयेद् बुधः । नाऽब्भ्याहन्न्यान् न निर्हन्न्यान् न गायेन् न च कम्पयेत् ।।७७।।** यथैवोच्चारयेद् वर्णां स्तथैवैतान् समापयेत् । निवेश्य दृष्टिं हस्ताग्रे शास्त्रार्थमनुचिन्तयन् ।।७८।। सममुच्चारयेद् वर्णान् **हस्तेन** च मुखेन च । स्वरश् चैव तु हस्तश् च द्द्वयन् तु युगपद् भवेत् ।।७९।। हस्ताद् भ्रष्टस् स्वराद् भ्रष्टो न वेदफलमश्नुते । न करालो न लम्बोष्ठो नाऽव्व्यक्तो नाऽनुनासिकः ।।८०।। गद्गदो बद्धजिह्व्वश् च न वर्णान् वक्तुमर्हति । प्रकृतिर् यस्स्य कल्ल्याणी दन्तोष्ठौ यस्स्य शोभनौ ।।८१।। प्रगल्भश् च विनीतश् च स वर्णान् वक्तुमर्हति । यथा व्याघ्री हरेत् पुत्तरान् दंष्ट्राभिर् न च पीडयेत् ।।८२।। भीता पतनभेदाब्भ्यान् तद्वद् वर्णान् प्रयोजयेत् । **संहिता नयते सूर्यम् पदानि शशिन४ पदम् ।।८३।। क्रमो विनयते सूर्ययँ यत् तत् पदमनामयम् ।** हस्तहीनन् तु योऽधीते स्वरवर्णविवर्जितम् ।।८४।। ऋग्यजुस्सामभिर् दग्धो वियोनिमधिगच्छति । हस्तेनाऽधीयमानश् च स्स्वरवर्णान् प्रयोजयेत् ।।८५।। ऋग्यजुस्सामभि४ पूतो ब्रह्म्मलोकं समश्नुते । यथा वाणी तथा पाणी रिक्तन् तु परिवर्जयेत् ।।८६।। यत्तरयत्तर स्स्थिता वाणी पाणिस् तत्तरैव तिष्ठति । **उच्चौ निषादगान्धारौ नीचावृषभधैवतौ । शेषास् तु स्स्वरिता ज्ञेयाष् षड्जमद्ध्यमपञ्चमाः ।।८७।।** उदात्तमाक्ख्याति वृषोऽङ्गुलीनाम् प्रदेशिनीमूलनिविष्टमूर्धा । अन्त्ये च मद्ध्ये च स्वरितन् धृतञ् च कनिष्ठिकायामनुदात्तमेव ।।८८।। आकाशस्स्था यथा विद्द्युत् स्फटिके मणिसूत्तरवत् । एष च्छेदो **विवृत्तीनायँ** यथामात्तरविचक्क्षणः ।।८९।। वत्सानुसृताऽर्धमात्तरा तथा वत्सानुसारिणी । पाकवत्त्युभयोर् ह्रस्स्वा दीर्घमद्ध्या पिपीलिका ।।९०।। प्र व एकोऽर्वाञ्चो अद्द्य रथं हिरण्यप्प्रउगम् । धृतव्व्रता आदित्त्याश् चैतत् तत्तर निदर्शनम् ।।९१।। **स्वरभक्तिम् प्रयुञ्जानस् त्रीन्**

दोषान् परिवर्जयेत् । इकारन् चाऽप्युकारन् च ग्रस्तदोषन् तथैव च ॥९२॥ न च स्स्वरति पूर्वाङ्गे नाऽपराङ्गे कथन् चन । न स्स्वरे न च मात्त्रायाङ्ग कथं स्वारो विधीयते ॥९३॥ पराङ्गस्स्य तु यत् पूर्वम् पूर्वाङ्गस्स्य तु यत् परम् । उभयार्धार्धसयँ योगे स्वारङ्ग कुर्याद् विचक्षणः ॥९४॥ दुर्बलस्स्य यथा राष्ट्रं हरेत् त(द्) बलवान् नृपः । दुर्बलवँ व्यञ्जनन् तद्वद् धरेत बलवान् स्वरः ॥९५॥ मात्त्रिकवँ वा द्द्विमात्त्रवँ वा स्वर्यते यदिहाक्षरम् । तस्स्याऽन्ततोऽर्धमात्त्रावँ वै मात्त्राधिक्यन् तथैव सा ॥९६॥ **ओभावश् च विवृत्तिश् च शषसा रेफ एव च । जिह्वामूलमुपद्ध्मा च गतिरष्टविधोष्मणः ॥९७॥** यद्द्योभावप्प्रसन्धानमुकारादि परम् पदम् । स्वरान्तन् तादृशवँ विद्द्याद् यदन्न्यद् व्यक्तमूष्मणः ॥९८॥ स्वरा× कम्पाश् च रङ्गाश् च ये यत्कालास् स्वभावतः । वर्धन्ते प्रोच्च्यमानास् ते क्षिप्प्रयत्ने विवक्तरि ॥९९॥ **यकारस् त्रिविध× प्रोक्तो गुरुर् लघुर् लघूतरः । आद्यौ गुरुर् लघुर् मद्ध्ये पदान्ते च लघूतरः ॥१००॥ पादादौ च पदादौ च सयँ योगावग्ग्रहेषु च । नश् शब्द इति विज्ज्ञेयो अन्न्यत्त्र य इति स्स्मृतः ॥१०१॥** एकमक्षरमेतच् च ··· ··· पदान्तवत् । माधुर्यन् च न चाऽव्यक्तवँ व्यक्तन् च न च पिण्डयेत् ॥१०२॥ सनाथस्स्येव देशस्स्य न वर्णास् सङ्करङ्ग गताः । गीती शीग्घ्री शिर×कम्पी तथा लिखितपाठकः ॥१०३॥ अनर्थज्ज्ञोऽल्पकण्ठश् च षडेते **पाठकाधमाः** । माधुर्यमक्षरव्यक्तम् पदव्यक्तन् तु सुस्स्वरम् ॥१०४॥ धैर्यलँ लघु-(य-?) समायुक्तं षडेते **पाठके गुणाः** । राक्षेति (?) प्प्रथमो ज्ज्ञेय× ख्ना (?) इत्त्यपरो भवेत् ॥१०५॥ यमास् तत्त्र निवर्तन्ते श्मशानादिव बान्धवाः । प्रथमोत्तमवर्गीये वर्गान्त्यैस् सह सङ्गते ॥१०६॥ नासिक्यङ्ग गुरुमुच्चार्ययँ यमस्स्थानगतवँ वदेत् । **नादस् तु श्श्रूयते घोषाद् विरामाद् द्वित्त्वतस् तथा ॥१०७॥** अनासिक्योऽथ नासिक्यो जायते वर्णरूपतः । दद्ध्यङ्ग ह परमे व्योमन् वीर्यन् चेति निदर्शनम् ॥१०८॥ **नकारस्स्य पदान्तस्स्य स्स्वरे रेफो विधीयते** । लोपस् त्वाकारपूर्वस्स्य सशौ तु तचयो× परे (?) ॥१०९॥ सखीँर् यानुत् पणीँर् हतम् । तादृशं रन्जयेदङ्गं सर्वन् नासिक्यसङ्गतम् ॥११०॥ लाक्षारक्तयँ यथा तोयन् नकाराङ्गस्स्वरयँ यथा । सर्वसङ्गवँ विजानीयाद् बन्धूँरिति निदर्शनम् ॥१११॥ हृदयादुत्थितं रङ्गङ्ग कास्येन समसुस्स्वरम् । मात्त्रिकन् च द्द्विमात्त्रन् च जघन्न्वाँ इति निदर्शनम् ॥११२॥ यथा सौराष्ट्रिका नारी तक्करा (ँ?)

इत्त्यभिधीयते । एवं रङ्गाऽ प्रयोक्तव्याऽ खे अराँ इव खेदया ॥११३॥ लुप्ते नकारे यत् स्वरं रञ्जन्ति शौनकादयः । आदिरङ्गमितिप्रोक्तन् न तत्वा भीरिव विन्दतीँ ३॥११४॥ सप्त स्स्वरान् प्रवक्ष्यामि तेषामेव तु लक्षणम् । **जात्त्यऽ क्षैप्रोऽभिनिहितस् तैरोव्यञ्जन एव च ॥११५॥** ... ... जात्त्यस् स्वरस् सजात्त्येन श्रुष्टयग्ने क्षैप्र उच्यते । तेऽवरधनताऽभिनिहितस् तैरोव्यञ्जन ऊतये ॥११६॥ **तिरोविरामो विष्कम्भिते प्रश्श्लिष्टो हीनद्र गिरवणः । पादवृत्तऽ क ईवँ वेद स्स्वरास् सप्तैवमादयः ॥११६॥** जात्त्यादिऽ पादवृत्तानतस् स्वरितश् च स्स्वरास् त्रयः । उदात्तऽ पूर्वसन्धे (?)यो नीचैरभिपदे (?) स्थितः ॥११८॥ अनुदात्तऽ परश् शेषश् शाकलाद्दचँऽ प्रचोदितः । तस्स्यैवोदात्तश्श्रवणङ कम्पस्स्थानेऽर्धमात्त्रकम् ॥११९॥ कृत्त्रिमे (?) तु पदानूताद्दचोर् बहुधा ऋक्षु भिद्दचते । **लोपागमविकारादिविशेषेण तत्वृचि क्वरमात् ॥१२०॥ यत्तर त्रिंशत् समाम्नातास् सयँ योग उपयोगिनः । वर्णा ऋग्वेद आचार्यैस् स्पर्शानतस्स्थोष्मभेदतः ॥१२१॥** त्रीणि त्त्रिषु त्त्रिधातूनि यत् किञ्चिदुपरि श्श्रुतम् । अनतरिक्षम् पुरीष्यञ्च एतद् विवृतलक्षणम् ॥१२२॥ बहिश् श्रितऽ पृथग् दृशश् वृकदृषिर् वृषबः (भः ?) । बृहत् त्रिषु वर्षाण्येतत् सवँ वृतलक्षणम् ॥१२३॥ **स्पर्शानान् तु सह स्स्पर्शैस् सयँ योगो यो भवेन् मिथः । पूर्वस्स्य सन्धृतिर् वक्करे न तु तस्स्येष्यते श्श्रुतिः ॥१२४॥** परस्परन् तु सयँ योगस् स्पर्शानां सम्भवेद् यदि । तत्पूर्वस्स्य श्श्रुतिर् नास्ति विरामे व्यञ्जनस्स्य च ॥१२५॥ ककुद्मान् यद्घनन् भिनद्मीत्त्यत्तर दा(व)र्णसस्य **सन्धृतिः । अग्निऽ पलिक्नीश् श्वघ्नीव दध्रियन्ते गकघाक्षराः ॥१२६॥** वाग्देवी वाक्पूता विट्कुलाद् विब्भ्राड् बृहद् आरेक् पन्थाम् । यद्घनन् त्रिष्टुब् गायत्त्रर्चर्वाक् षडस्मादनुष्टुबिति निदर्शनम् ॥१२७॥ **स्पर्शास् त्वपञ्चमाश् चैवं स्पर्शानां सम्भवेद् यदि । स्वतृतीयानवाप्यन्ते पञ्चमे पञ्चमस् तथा ॥१२८॥** वर्गादिर् यत् पदानतस् स्यात् परयोस् त्रिश्चतुर्थयोः । स्वतृतीयत्वमवाप्नोति अनतस्थाभिश् च सयँ युतः ॥१२९॥ वर्गाणाम् प्रथमो वर्णऽ पञ्चमे सार्ववर्णिके । उदये पञ्चमस्थस् स्यान् न चकारऽ पदानतगः ॥१३०॥ अर्वाग्देवा विब्भ्राड्बृहद् बृहद्भिर् वाजैस् त्रिष्टुब्भिः । अर्वाग्रथं सम्भ्राड् विब्भ्वीर् गोमद् यूयमुद्द्रेभञ्च ॥१३१॥ अर्वाङ् नरा विराण् मित्त्रावरुणयोश् श्रमन्नोत । त्रिककुम्निवर्वद् इति चाऽप्यत्त्रर तु निदर्शनम् ॥१३२॥ **पदानतीयाच् च**

वर्गादेर् हकारो यऽ परो भवेत् । पूर्वस्यैव चतुर्थो यो हकारस् तं समाप्नुयात् ।।१३३।। प्रथमन् तु हकारश् च तच् चतुर्थमवाप्यते । स्वतृतीयमवाप्नोति पूर्ववर्णस् तथा हि सः ।।१३४।। ऋधग् घुवेम सम्म्राड् ढन्ता कद् ध नूनन् त्रिष्टुब् भिताः । चकारो न पदान्तोऽस्ति अतोऽसौ नोपदिश्यते ।।१३५।। **मकारस्स्य पदान्तस्स्य रेफोष्मसु परेषु च । अनुस्स्वारो भवत्येव पदमद्ध्यगतेष्वपि ।।१३६।।** त्वं रथन् तं हिन्वन्ति त्वं शुक्करस्स्य तां सु ते कीर्तिम् । समानोदर्कं षष्ठेऽहनि मां समेकऽ पिंशति ।।१३७।। चक्क्षूंषि मंहिष्ठो मत्सदेतदत्तर निदर्शनम् । स्ववर्गपञ्चमश् चैव स्स्पर्शेषु विषयेषु च ।।१३८।। अन्तस्थासु च ता एव मकारस्स्य विधिस् स्मृतः । अन्त्यस्स्थाने मकारोऽयम् पूर्वस् स्पर्शे पदान्तगः ।।१३८।। उदये तत्सवर्णस् स्यात् सर्वस्मिन्ननुनासिकः । इदङ्ग कवेरिमाङ्ग खनामि तङ्ग गीर्भिर् नकिष् टङ्ग घ्नन्ति ।।१४०।। य ईञ् चकार तञ् जानं स्तन् त्वा तान् देवास् तान् धेनुम् । शन् नस् त्वम् पवित्तरे वामम् बृहस्पते चिद् यम् भगम् ।।१४१।। अन्तस्थासु परास्स्वेवमन्तस्स्थां सानुनासिकाम् । रेफवँ् विना समाप्नोति तामेव या परा ततः ।।१४२।। ययँ् युजमिमलँ् लोगन् तवँ् व इति निदर्शनम् । **नकारोऽपि लकारे तलँ् लकारं सानुनासिकम् ।।१४३।।** यो जिगीवालँ् लक्क्षमाददित्त्यत्तर तु निदर्शनम् । तकारस् तु पदान्तीयस् तावेव लजयोर् भवेत् ।।१४४।। अङ्गादङ्गाल् लोम्नोलोम्नो यज्जातवेद इति च । ङ्नौ यौ तौ पदान्तीयौ हषकारे परे पदे ।।१४५।। हषौ शुद्धौ ततो ब्रूयाच् छुद्धार्याकौ ङ्नौ ····· । दद्ध्यङ्ग हाऽर्वाङ्ग हवामहे देवान् हुवेम महान् ह्यस्स्य ।।१४६।। वातान् ह्यश्श्वान् दन् षडक्क्षमित्त्यत्तर तु निदर्शनम् । नकारोपधहकारो यत्तरयत्तर विभाव्यते ।।१४७।। नकारश्श्रवणङ्ग कृत्त्वा हकारं सन्धयेत् पुनः । नकारोपधषकारो यत्तरयत्तर च दृश्यते ।।१४८।। नकारश्श्रवणङ्ग कृत्त्वा षकारं सन्धयेत् पुनः । ङ्कारान्तम् पदम् पूर्वं हकारे परतस् स्थिते ।।१४९।। ङ्कारश्श्रवणङ्ग कृत्त्वा हकारं सन्धयेत् पुनः । कृत्तिरमे (?) तु पदान्ताद्द्योर् बहुधा ऋक्षु भिद्द्यते ।।१५०।। **लोपागमविकारादिविशेषेण त्त्वृचि क्वरमात् । यत्तर त्रिंशत् समाम्नातास् सर्वं योग उपजीविनः ।।१५१।। वर्णा ऋग्वेद आचार्यैस् स्पर्शान्तस्थोष्मभेदतः ।** टकारान्तान् नकारान्तात् सकारादि परम् पदम् ।।१५२।। तत्तरान्तरे तथौ स्यातावँ् विराट्त्सम्म्राट् ससवान्त्सन् । चत्रजेषु नकारस्स्य ञकारऽ प्रतिजायते ।।१५३।। मित्त्रेरूञ् चोदप्प्रवृद्धो जहि शूर शत्त्रुञ् जामिम् । ङ्कारान्तम्

पदम् पूर्वं सकाराद्द्च्युत्तरयँ यदि ॥१५४॥ पतेत् तत्तर ककारोऽन्तऽ प्रत्यङ (क्) स विश्श्वेति यथा । ङशयोस् तु पदान्ताद्द्चोऽ ककारस् त्वन्तरे भवेत् ॥१५५॥ अर्वाङ्कशश्श्वत्तमन् न च्छत्त्वम् पृथग्भावमिवोच्चरेत् । पदाद् वर्गप्प्रथमान्ताद् यदि शादि परम् पदम् ॥१५६॥ शकारश् छत्त्वमाप्नोति अर्वाक्छफाविव तच् छयँयोः । विपाट्छुतुद्द्री तिष्टुप्छेष इत्यत्तर तु निदर्शनम् ॥१५७॥ नकारान्तम् पदम् पूर्वं शकाराद्द्च्युत्तरयँ यदि । स नकारो ञकारस् स्याच् चकारश् चाऽन्तरा भवेत् ॥१५८॥ घनेव वज्ज्रिञ्च् छ्नथिह्य्यमित्तरानिति निदर्शनम् । **पदान्तस्य विसर्गस्य शषसेषूदयेषु च ॥१५९॥ ततस् स्वद्वित्त्वमाप्नोति प्प्रकृतिश् च विधीयते ।** कखयोऽ परयो(र)स्स्य क्क्व चिद्दूष्मा भवेत् ततः ॥१६०॥ ते तु पिण्डकृतास् स्पर्शा ये कण्ठ्यास् स्वरसयँयुताः । सर्वेषाञ् चोदाहरणम् पूर्वोक्तं श्रूयतामिदम् ॥१६१॥ **यथा योक्त्रेण सर्वँवेष्ट्य तृणम् बध्नन्ति वाहकाः । एववँ वेष्ट्य यकारेण वैदिकम् पिण्डमुच्यते ॥१६२॥** वाद्ध्र्यश्श्व सुपित्तर्च वद्ध्र्यश्श्वस्स्य सुमित्तर्चाः । रान्द्र्चा तर्च्चम्बकङ कृतान्न्यृजीषिणस् सद्ध्र्यग्घ्यृतूं श्च ॥१६३॥ तौग्रर्चो वज्ज्र्यृचीषम एष्ष्यृक्क्वा द्र्वन्नः । अशत्त्वर्यो रात्तर्च्युषसेऽस्यृषिकृत् ॥१६४॥ जिह्वाग्रीयफलितमृकारद्द्वयसयँयुतम् । एकीकृत्त्योच्चारणीयन् निस्सन्धि वर्त्ति वर्त्तुलम् ॥१६५॥ प्रान्तर् ऋषयो निर्ऋत्त्या निर्ऋतिन् निर्ऋथं सचन्ताम् । अग्निऽ पूर्वेभिर् ऋषिभिराविर्ऋजीक ऋतूँर् ऋतुपते ॥१६६॥ गीर्भिर् ऋणोमि दुर्हृणायून् जर्हृषाणो जर्हृषन्तः मतिर् हृदऽ पत्नीर् हृषितञ् ज्योतिर् हृदयञ् च निदर्शनम् ॥१६७॥ **हकारम् पञ्चमैर् युक्तमन्तस्थाभिश् च सयँयुतम् । उच्चारणीयमौरस्स्यमेवमीप्सन्ति बह्वृचाः ॥१६८॥** ह्रादुनिञ् च ह्व्वयाम्म्यग्निं ह्लादिके ह्लादिकावति । महान् ह्यस्स्य ब्ब्रह्म्म ब्रह्म्माऽह्न्नाह्न्नेति निदर्शनम् ॥१६९॥ स्थानङ कालो विकारश् च सवँवृतवँ विवृतागमौ । ईषत्तस्पृष्टमघोषत्त्वं स्वरऽ कम्पस् तथोष्मता ॥१७०॥ घोषाऽनासिक्क्यनासिक्क्या **वर्णधर्मास् तु देवताः । यावन्तो यत्तर ये धर्मास् तावन्तस् तत्तर तान् विदुः ॥१७१॥** चतुर्मात्तरस् तु षण्मात्तरऽ प्रणवऽ कीर्त्यते बुधैः । पूर्वे स्वरो परो नादस् सममात्तरऽ प्रकीर्तितः ॥१७२॥ अनुदात्तस् स्वरो ज्ज्ञेय उदात्तो नाद उच्च्यते । लक्क्षणम् प्रणवस्स्येदम् प्रणवो ब्रह्म्म कीर्त्यते ॥१७३॥ तैलधारामिवाऽच्छिन्नान् दीर्घघण्टानिनादवत् । अवाग्जम् प्रणवस्स्याऽग्रयँ यस् तवँ वेद स

वेदवित् ॥१७४॥ त्रिस्स्थानञ् च त्रिरमात्त्रञ् च त्रिरब्रह्मम च त्र्यक्षरम् । त्रिमात्त्रादर्धमात्त्राच् च यस् तवँ वेद स वेदवित् ॥१७५॥ वेदो हि वर्णसङ्घातो वेदो ब्रह्ममेति कीर्त्यते । तस्मात् तद्वेदवर्णज्ज्ञो ब्रह्ममलोके महीयते ॥१७६॥ छन्दः पादौ ज्योतिषन् नेत्त्रयुग्मं हस्तौ कल्पश् श्रोत्त्रयुग्मन् निरुक्तम् । शिक्षा घ्राणवँ व्याकरणन् तथाऽऽस्स्यवँ वेदात्मने विष्णवेऽस्मै नमोऽस्तु ॥१७७॥ विष्णुं षडङ्गेन्द्रियमादिदेववँ वेदात्मानम् पुरुषवँ विश्वरूपम् । सञ्चिन्त्य देवम् पठते द्द्विजो यस् स याति विष्णोः परमम् पदन् तत् ॥१७८[1]॥ ओम् ॥ इति शैशिरीयशिक्षा समाप्ता ।

३. व्याडिशिक्षा (विकृतिवल्ली) +

तं सर्वज्ज्ञञ् जगत्सेतुम् परमात्मानमीश्वरम् । वन्दे नारायणन् देवन् निरवद्द्यन् निरञ्जनम् ॥१॥ नत्वाऽऽदौ शौनकाचार्यङ् गुरुवँ वेदमहानिधिम् । मुनीन्द्रं सर्ववेदज्ज्ञम् ब्रह्ममज्ज्ञलँ लोकविश्श्रुतम् ॥२॥ नमामि शाकलाचार्यं शाकल्यं स्थविरन् तथा । ब्रह्ममविद्द्यागुरुं श्रेष्ठम् भारद्द्वाजम् बृहस्पतिम् ॥३॥ शैशिरीये समाम्नाये व्याडिनैव महर्षिणा । जटाद्द्या विकृतीरष्टौ लक्ष्यन्ते नातिविस्तरम् ॥४॥ जटा माला शिखा रेखा ध्वजो दण्डो रथो घनः । अष्टौ विकृतयः प्रोक्ताः क्रमपूर्वा मनीषिभिः ॥५॥ ब्रूयात् क्रमविपर्यासक्रममीदृग्विधिन् दिशेत् । जटाख्यावँ विकृतिन् धीमान् विज्ज्ञाय क्रमलक्षणम् ॥६॥ अनुलोमविलोमाभ्यान् त्रिवारं हि पठेत् क्रमम् । विलोमे पदवत् सन्धिरनुलोमे यथाक्रमम् ॥७॥ षत्वण् णत्वञ् च दीर्घत्वङ् क्रमसन्धौ यथोच्यते । व्युत्क्रमे तन् न कर्तव्यं स्वरक्षैप्रादिकम् भवेत् ॥८॥ विलोमे पदवत् सन्धिरनानुपूर्व्यसंहिते । आनुपूर्व्यङ् क्रमे त्याज्ज्यवँ व्युत्क्रमे पदवत् पठेत् ॥९॥ चतुष्क्रमत्त्रिक्क्रमेषु तथा पञ्चक्क्रमेऽपि च । आद्द्यन्ताभ्यान् त्रिवृन्मद्ध्यम्

---

१. श्लोकसङ्ख्याऽस्माभिर् प्रायेण द्व्योरर्धकयोरेकं श्लोकं स्वीकृत्य निवेशिता वेदितव्या । पूर्वमुद्द्रिते पाठे श्लोकसङ्ख्या न दत्ता ।

+ एषा शिक्षा उषाख्यायाम् पत्त्रिकायाम् (१८८९ तमे क्रैस्ताब्दे कालिघट्टनगरे) वेदविकृतिलक्षणसङ्ग्रहे (१९७८ तमे क्रैस्ताब्दे पुण्यपत्तने) च मुद्द्रिता ।

ब्रूयात् क्रमविपर्ययैः ॥१०॥ **समयादौ** क्रमे यद्वत् समयात् परतस् तथा। जटायां समयादिस्थं शुद्धेन परिवर्तयेत् ॥११॥ समयक्क्रमणन् नास्ति समयादिक्क्रमवें विना। त्रिक्क्रमं समयादिस्थमादिना सहितम् पठेत् ॥१२॥ व्युत्क्रमे क्रमवत् सन्धिस् स च क्क्षैप्प्रादिरिष्यते। डकारादिविधानन् तत् स्वरान्तऽपरिवर्तनम् ॥१३॥ त्रचक्क्षरान्तप्प्रगृह्ययाणामुकारामन्त्रितस्य च। विलोमे पदसन्धौ तु प्प्रगृह्ययत्वन् न बिद्द्यते ॥१४॥ एकारौकारपरस् त्वकारोऽभिनिहन्यते। व्युत्क्रमे क्रमवच् चैव नवधा कम्पलोपनम् ॥१५॥ विलोमसन्धौ प्रश्श्लिष्टे क्षैप्प्राभिनिहितेषु च। वर्जयित्वा स्वरन् जात्त्यन् त्रिषु कम्पनिषेधनम् ॥१६॥ परिग्ग्रहावग्ग्रहेषु द्व्युदात्तादिपदेषु च। उदात्तादिविधानन् तच् **छौनकोक्तम् भवेदिह** ॥१७॥ आदित्त्यैर् यातमित्त्यस्मिन् पादे चाऽष्टाक्क्षरे भवत्। पदाद्ध्यायेऽनुदात्तस् स्यात् संहितायामुदात्तवत् ॥१८॥ पदद्द्वयमनुक्क्रम्म्य व्युत्क्रम्म्योत्क्रम्म्य सन्धिवत्। स्वरलक्क्षणसयँयुक्ता सा **जटेत्त्यभिधीयते** ॥१९॥ जात्त्योऽभिनिहितश् चैव क्क्षैप्प्रऽ प्रश्श्लिष्ट एव च। एते स्वाराऽ प्रकम्पन्ते यत्त्रोच्चस्स्वरितोदयाः ॥२०॥ (**इति जटापटलम्**)। ब्रूयात् क्रमविपर्यासावर्धर्चस्स्याऽऽदितोऽन्ततः। अन्तन् चाऽऽदिन् नयेदेवङ् **क्रममालेति** कीर्तिता ॥२१॥ माला मालेव पुष्पाणाम् पदानाङ् ग्रथनी हि सा। आवर्तन्ते त्रयस् तस्स्याम् **पदमाला प्रकीर्तिता**[1] ॥२२॥ पदोत्तरान् जटामेव **शिखामार्या**ऽ प्रचक्क्षते। क्रमाद् द्वित्त्रिचतुऽपञ्चपदक्क्रममुदाहरेत् ॥२३॥ पृथक्पृथग् विपर्यस्स्य **लेखामाहु**ऽ पुनः क्रमात्। ब्रूयादेव क्क्रमं सम्म्यगन्तादुत्तारयेद् यदि ॥२४॥ वर्गे वा ऋचि वा यत्त्र पठनं स द्ध्वजस् स्मृतः। क्रममुक्त्वा विपर्यय-

---

१. 'क्रम-व्युत्क्रम-सङ्क्रमाः' इति चतुर्थचरणपाठोऽष्टविकृतिलक्क्षणे, महिदासकृतचरणव्यूहभाष्ये च; विकृतिकौमुदीपरिशिष्टे तु एष श्श्लोक एव न सङ्गृहीतोऽपूर्वार्थत्त्वाभावात्; मधुसूदनमस्करिकृताष्टविकृतिविवृतावपि एष श्श्लोकोऽनादृतः; गङ्गाधरभट्टाचार्यकृतविकृतिकौमुद्द्यामपि 'पदमाला प्रकीर्तिता' इत्त्यंशोऽस्स्पृष्टः, तत्त्र 'तस्स्याङ् क्रमव्युत्क्रमसङ्क्रमाणामावृत्तिर् भवति' इत्त्युक्तत्त्वाद् 'आवर्तन्ते त्रयस् तस्स्याङ् क्रमव्युत्क्रमसङ्क्रमाः' इति पाठस्स्यैव व्याक्ख्या कृता प्प्रतीयते। एष श्श्लोको गङ्गाधरभट्टाचार्येणाऽपि क्क्रममालाया मालात्त्वस्स्योपपादन एव नीतो नत्त्वपूर्वार्थप्प्रतिपादने इति च बोद्ध्यम्।

स्स्य पुनश् च क्क्रममुत्तरम् ॥२५॥ आर्धर्चादेवमुक्तस् स **क्क्रम-दण्डो**ऽभिधीयते । पादशोऽर्धर्चशो वापि सहोक्त्या दण्डवद् **रथः** ॥२६॥ अन्तक्क्रमम् पठेत् पूर्वमादिपर्यन्तमानयेत् । आदिक्क्रमन् नयेदन्तङ् **घनमाहुर्** मनीषिणः ॥२७॥ **इति व्याडिशिक्क्षा(विकृतिवल्ली)समाप्ता ।**

४. चारायणीयशिक्क्षा[1]

ओम् । नमो ब्रह्मणे । प्राक् प्रपद्द्ये विभुम् भक्त्या **सर्व-लोकपितामहम् ।** शिक्क्षां साक्क्षात् प्रवक्क्ष्यामि तेनैवाऽऽलपितामहम् ॥१॥ **चारायणीम् महाशिक्क्षाम्** प्रवक्क्ष्याम्म्यनुपूर्वशः । निबोधत बुधैर् जुष्टान् नित्त्यवँ वाङ्मलशान्तये ॥२॥ वर्णानाञ् चैव सङ्ख्यानं सञ्ज्ञा स्थानम् पृथग्विधम् । स्वरास् सव्व्यञ्जनाश् चैव तेषाम् भेद-मशेषतः ॥३॥ **दश स्स्थानानि वर्णानाङ्** कीर्तयन्ति मनीषिणः । यतः प्रवृत्तिर् वर्णानान् तानि मे गदतश् शृणु ॥४॥ उरः कण्ठश् शिरस् तालु दन्ता ओष्ठौ तु नासिका । जिह्व्वामूलन् तु सृक्क्वश् च दन्तमूलस् तथैव च ॥५॥ उरः कण्ठश् शिरश् चैव स्स्थानानि त्तरीणि वाङ्मये । सवनान्न्याहुरेतानि सावनान्यर्थतोन्तरम् ॥६॥ उदात्तस् **तालुगर्भश्** च स्स्वरितः प्रचयस् तथा । नीचस् सर्वानुदात्तश् च सन्नतरस् तथैव च ॥७॥ तरसा प्रजपेन् नीचमुच्चम् पृष्ठादिवोन्नयेत् । नैच्च्या– (?) न्न्यन् च ब्भ्रुवोर् मद्ध्ये स्वरितं शिक्क्षका विदुः ॥८॥ **अकारप्प्रमु-खैर् वर्णैर् हकारान्तैस् त्रिषष्टिभिः** । विवद्धवँ वाङ्मयं सर्वमप्प्र-मेयमपारगम् ॥९॥ अकाराद्द्या औकारान्तास् **स्वरा** ज्ज्ञेयाश् चतुर्दश । शिष्टानि **व्व्यञ्जनान्न्येव** प्प्रोक्तान्न्यक्क्षरचिन्तकैः ॥१०॥ कादयो मावसानाश् च **स्स्पर्शास्** स्युः पञ्चविंशतिः । यादयश् च तथा**न्तस्स्था ऊष्माणश्** च शषसहाः ॥११॥ स्पर्शानाङ् **करणं** स्पृष्टमन्तस्स्थानामतो-ऽन्न्यथा । **यमानां सवँवृतम् प्राहुर्** विवृतञ् च स्वरोष्मणाम् ॥१२॥ वर्गेष्ष्वनन्तगा (?) वर्णाश् चतुस्सञ्ज्ञाः प्रकीर्तिताः । नासिक्क्या आनुनासिक्क्याः पञ्चमाश् चाऽन्त्यसञ्ज्ञकाः ॥१३॥ वर्गप्प्रथम-द्वितीयाश् शषसाश् च त्तरयोदश । ज्ञेया **अघोषा** इत्त्येवं सञ्ज्ञया-ऽक्क्षरचिन्तकैः ॥१४॥ अघोषाणान् तु **करणं** श्वासवत् समुदाहृतम् ।

---

१. एतस्स्याश् शिक्क्षाया अमुद्द्रितायाः प्रतिलिपिरस्माभिर् भाण्डारकरप्राच्यविद्द्यानुसन्धानमन्दिराल् लब्धा ।

नादवच् चैव सर्वेषाङ्ग करसतेति (करणञ् चेति ?) निश्चयः ।।१५।। अघोषे तु **विसृष्टस्य** परसस्थानता भवेत् । अनुस्वारो विसृष्टश् च **कलापाठ×** (?) प्लुता यमाः ।।१६।। जिह्वामूलमुपद्ध्मा च **षोडशैते पराश्श्रयाः । अनुस्वारे तु नित्यं स्याद् द्वित्वञ् चारायणीयके** ।।१७।। अलावुवीणानिर्घोषो दन्त्यमूलस्स्वराननु । अनुस्वारस् तु कर्तव्यो नित्यं र्होश् शषसेषु च ।।१८।। **एकमात्तरस् स्वरो ह्रस्स्वो** द्विमात्तरो दीर्घ उच्च्यते । प्लुतस् त्रिमात्तरो विज्ज्ञेयो व्यञ्जनन् त्वर्धमात्तरकम् ।।१९।। ह्रस्स्वन् द्विमात्तरसयँ युक्तम् प्लुतमाहुर् मनीषिणः । **वृद्धस्**(न् ?) त्रिमात्तरमेवापि व्यञ्जने त्त्वर्धमात्तरकम् ।।२०।।। ह्रस्स्वप्प्लुतान् प्रयुञ्जीत विरामेषु न नासिकान् । स्वर्लोकप्प्रभृतीनान् तु न तु व्व्यञ्जनमस्तकान् ।।२१।। स्वरसन्धिस्(न्?)तु सर्वेषान् द्विमात्तरेण विनिर्दिशेत् । ह्रस्स्वदीर्घप्प्लुतानाञ् च यथाशास्तरनिदर्शनम् ।।२२।। अनन्त्यश् च भवेत् पूर्वः अन्त्यश् च परतो यदि । तत्तर मद्ध्ये **यमस्** तिष्ठेत् सवर्ण× पूर्ववर्णयोः ।।२३।। अपञ्चमस् त्वेकपदे सयँ युक्त× पञ्चमेऽक्क्षरे । यमो ज्ञेयो यथा रुक्म सङ्खवग्निर् घ्नन्ति चैव हि (?) ।।२४।। **पञ्चाऽयुग्मास् स्वरा ह्रस्स्वाश्** शिष्टा दीर्घास् त्वशेषतः । तेषामेव प्प्लुतास् सन्ति **ऋलृवर्णौ विवर्जितौ** ।।२५।। विद्द्यादमित्त्यनुस्वारञ् जिह्वामूलङ् कखाश्श्रयम् । **विसृष्टस्** तु इति प्प्रोक्त उपद्ध्मा स्यात् पफाश्श्रयः ।।२६।। अशरीरास् तु ये वर्णा विज्ज्ञेयास् तु पराश्श्रयाः । अन्न्यवँ वर्णं समाश्श्रित्त्य दर्शयन्ति निजवँ वपुः ।।२७।। जायापत्त्योर् यथा योगाद् गर्भञ् चैव प्प्रजायते । तथा पराश्श्रयो वर्णस् सयँ योगश् च प्प्रजायते ।।२८।। प्राक्पदै× पर्यमाणस् तु पुरुषश् च यथाशुभम् । तथा पराश्श्रया वर्णा विज्ज्ञेयास् ते पराश्श्रयाः ।।२९।। (**संश्रयन्ति परन् तु तदिति द्वितीय× पाठः**) । स्पर्शनासिक्क्यसयँ युक्तास् तत्तर मद्ध्ये **यमास् स्थिताः । अशरीराश् चतुर्भेदास् सञ्ज्ञाभिर् विहिता× पृथक्** ।।३०।। प्रथमा× पञ्चमैर् युक्ता× **कयमन्** तत्तर मद्ध्यगम् । द्वितीयेष्वेव **खयमन्** तृतीये **गयम** स्मृतम् ।।३१।। चतुर्था यत्तर दृश्श्यन्ते वर्गान्तैस् सह सयँ युताः । **घयमस्** तत्तर मद्ध्यस्स्थो ज्ञेयश् **चारायणीयके** ।।३२।। नासामूर्धनिसंस्थान× प्रथमश् च यमस् स्मृतः । द्वितीयन् तालु जिह्वायान् नासायान् तु विनिर्दिशेत् ।।३३।। तृतीय× कर्णदन्तञ् च कर्णौ नासाञ् च संस्पृशेत् । चतुर्थो हृदयन् नासां **सर्वे कण्ठ्या यमास् स्मृताः** ।।३४।। **अष्टौ स्थानानि** वर्णानामुर×

कण्ठश् शिरस् तथा । जिह्व्वामूलञ् च दन्ताश् च नासिकोष्ठौ च तालु च ।।३५।। **अकुहविसृष्टा× कण्ठ्यास्** तालुनीचुयशास् स्मृताः । मूर्धन्न्यृटुरषा ज्ञेया दन्त्या लृतुलसास् स्मृताः ।।३६।। उपूपद्ध्मानीया ओष्ठ्या उरस्स्यौ हविसृष्टकौ । कण्ठ्यतालव्व्यकण्ठ्योष्ठ्यास् सन्धिवर्णा× प्रकीर्तिताः ।।३७।। दक्(?)स्वर× परतो यत्तर हकारस्स्य तु दृश्यते । हकारङ्ग कण्ठ्यमित्त्याहुरौरस्स्यवँ व्यञ्जनेन तु ।।३८।। **अवर्णश् च कवर्गश् च जिह्व्वामूलीय इत्त्यपि ।** नवैते कीर्तिता वर्णा जिह्व्वामूलसमुद्भवाः ।।३९।। इवर्णश् च चवर्गश् च यशकारौ तथैव च । एते वर्णा× परा ज्ञेया दश तालुसमुद्भवाः ।।४०।। लृवर्णश् च तवर्गश् च लशकारौ तथैव च । अष्टौ दन्त्या× परिज्ज्ञेया दन्तमूलसमुद्भवाः ।।४१।। उवर्णश् च पवर्गश् च वकारोऽष्टम एव च । उपद्ध्मानीयसहिता ओष्ठ्यवर्णा दश स्स्मृताः ।।४२।। हकारस् स्वरसयँयुक्तो लघुत्त्वन् दृश्यते यदि । कण्ठ्यन् तन् तु विजानीयाद् हृदयेति निदर्शनम् ।।४३।। हकारम् पञ्चमैर् युक्तमन्तस्स्थैर् वाऽपि सयँयुतम् । तमुरस्स्यवँ विजानीयादाहिरयेति निदर्शनम्।।४४।। **यमानुस्स्वारनासिक्या नासामूलसमुद्भवाः । सर्वस्स्थानमवर्णस्स्य के चिदिच्छन्ति सूरयः** ।।४५।। यस्स्ययस्स्य तु वर्णस्स्य करणन् नोपपद्द्यते । प्रतिज्ज्ञा तत्तर बोद्धव्या करणं हि तदात्मकम् ।।४६।। एते स्थानसमुत्पन्ना वर्णाष् षष्टिस् त्रयस् तथा । यैरेव तत्वखिलवँ विश्श्ववँ व्याप्तवँ वाङ्मयमण्डलम् ।।४७।। स्वराश् चतुर्दश प्प्रोक्तास् स्पर्शास् स्यु× पञ्चविंशतिः । यादयश् च स्स्मृताश् चाष्टौ षोडशैव पराश्श्रयाः ।।४८।। एते वर्णास् त्रिषष्टिश् च विहिताऽक्ष्वरचिन्तकैः । एतेनैवाऽखिलो व्याप्तो वाक्समुद्द्रस् त्वपारगः ।।४९।। **सितवर्णास् स्वरास् सर्वे** ईकारं स्पर्शसन्निभम्। स्पर्शान्तस्स्थास् तथोष्माणश् श्यामपीतारुणास् स्मृताः।।५०।।अयोगवाहाश् श्यामास् तु सितास् सर्वे स्मृतास् स्वराः । अन्तस्स्था हरिता ज्ञेया ऊष्माणश् चाऽरुणप्प्रभाः।।५१।। स्पर्शा ईकारसहिता× कृष्णवर्णा न संशयः । **सौम्म्योऽत्तर तालव्व्यगणो** जिह्व्वामूलस् तु नैर्ऋतः ।।५२।। आग्नेय× कण्ठजश् चैव मूर्धन्न्यो वायुदैवतः। दन्त्या रौद्द्रास् तु विज्ज्ञेया ओष्ठ्याश् चैवाऽऽश्श्विना मताः ।।५३।। वैश्श्वदेवास् तु विज्ज्ञेयाश् शेषा वर्णा न संशयः । एववँ वर्णा× प्रयोक्तव्या नाऽव्व्यक्ता न च पीडिताः ।।५४।। सम्म्यग्वर्णप्प्रयोगेण ब्रह्ममलोके महीयते । **संहितायास् त्विमलँ लोकञ् जित्त्वाऽनृतरिक्ष्वमाप्नुयात् ।।५५।। अयलँ लोकोऽनृतरिक्ष्वस्स्य तृतीयन् दिवमेव**

तु । जित्त्वेमान् क्रमपाठस् तु ब्रह्मलोके महीयते ।।५६।। प्राक्कूलो-पर्य्युपासीत पवित्त्रैश् चैव पावितः । प्राणायामैस् त्रिभिश्च पूतस् तत ओङ्कारमर्हति ।।५७।। प्रणवम् प्राक् प्रयुञ्जीत व्याहृतीस् तदनन्तरम् । सावित्त्रीम् चाऽनुवचनन् ततो वृत्तान्तमारभेत् ।।५८।। वसिष्ठः । तपस् तप्यति योऽरण्ये मुनिर् मूलफलाशनः । ऋचमेकान् तु योऽधीते तच् च तानि च तत् समम् ।।५९।। वेदाब्भ्यासोऽनुन्वहं शक्त्या महायज्ञक्क्रिया क्षमः । नाशयत्त्याशु पापानि महापातकजान्न्यपि ।।६०।। वेदोचितं स्वकङ्ग कर्म नित्त्यङ्ग कुर्यादतन्द्रितः । तद् धि कुर्वन् यथाशक्ति प्प्राप्नोति परमाङ्ग गतिम् ।।६१।। यज्ञानान् तपसाञ् चैव शुभानाञ् चैव कर्मणाम्। वेदधर्मो द्विजातीनान् निश्श्रेयसकरावुभौ।।६२।।नि(त्रि)-र्वृ(वि)त्तपूर्णाम् पृथिवीन् दत्त्वा यत् फलमश्नुते।तपसश् च परस्स्यैव तत् स्यात् स्वाद्ध्यायिनि द्द्विजे ।।६३।। यजूंषि शक्तितोऽधीते योऽनून्वहं स घृतामृतैः । प्रीणाति देवानाज्ज्येन मधुना च पितॄंस् तथा ।।६४।। यस् स्वाद्ध्यायमधीतेऽब्दवँ विधिना नियतश् शुचिः । तस्स्य नित्त्यङ्ग क्षरत्त्येष पयो दधि घृतम् मधु।।६५।।इति चारायणीयसञ्ज्ञाद्ध्याय४ प्रथमः। इदानीं सन्धिप्प्राप्तानावँ वर्णानालँ लक्क्षणमाह । सन्धिप्प्राप्तास् तु ये वर्णास् तेषान् द्विर्भाव इष्यते । अभावे सन्धिना चैव लघुत्त्वन् चैव निर्दिशेत् ।।१।। दीर्घवँ विसर्जनीयान्तम् पदान्तवँ बिन्दुसयँयुतम् । सयँयोगस्स्य शृणोति दर्शनम् (···?) ।।२।। एकबिन्दुरनुस्स्वारो विसृष्टस् तु द्द्वयोस् स्मृतः । न रूपङ्ग कलपाठस्स्य मूर्धन्न्या इव दृश्यते ।।३।। ह्रस्स्वपूर्वस् त्वनुस्स्वारो विज्ज्ञेयोऽद्ध्यर्धमात्त्रकः । अर्धमात्त्रस् तु पूर्वस् स्याद् विपरीते विपर्ययः ।।४।। अनुस्स्वारे तु नित्त्यं स्याद् द्वित्त्वन् चारायणीयके । वर्जयित्त्वा तु पुंश्चल्ल्यास् तथा वै संस्कृता-दिषु ।।५।। ब्रह्मचारी च पुंश्चली, तन् नौ संस्कृतम् । न रेफे वा हकारे वा द्विर्भाववँ विद्द्यते क्व चित् । न चैव जिह्वामूलीये नोपद्ध्मानीय एव च।।६।। सूर्मीम्···,वर्णवतीम्··· यथा यर्हि, धिर्ह्या य४ कामयते । न चैवाऽस्स्वरपूर्वे तु नाऽन्तस्थैस् स्पर्शसयँयुतैः । न च वर्गद्द्वितीये तु न च तुर्ये कदा चन ।।७।। आद्द्यमन्त्यन् च मद्ध्यन् च स्ववर्णेनैव पीडयेत् । यदवग्ध्रापयति । हराब्भ्यान् तु परन् नित्त्यङ्ग क्रामयन्ति विचक्क्षणाः ।।८।। तथैव जिह्वामूलीयान् तथोपद्ध्मानि निर्दिशेत् । स्वरपूर्वात् तु रेफात् स्याद् द्विर्भावो व्यञ्जनस्स्य तु ।।९।। हकारात् तु परन् नित्त्यङ्ग क्रमते ह्यस्स्वरादपि । रेफपूर्वो हपूर्वो वा यस् सयँयोगो

भवेत् क्व चित् ।।१०।। द्विरुच्यते परन् तस्य घर्म्मा ब्रह्म्म निदर्शनम् । **हंरो (हरौ?) यत्तर नियुज्ज्येते हकार× करमते तदा ।।११।। अह्ह्रुतं ह्ह्रियते ह्ह्रादिनीं ह्ह्रदज् च निदर्शनम् ।** रयावुभयतो यत्तर हकारो मद्ध्यतस् स्थितः ।।१२।। उभयो४ करमणवँ विद्द्यादेतर्ह्ह्यग्निर् निदर्शनम् । लवरेफहकाराणाञ् जिह्वामूलमुपद्ध्मयोः ।।१३।। ···तु यत् पूर्वन् तद् द्विमात्तरङ गुरु स्स्मृतम्। ह्रस्स्वपूर्वस् त्वनुस्स्वारो द्विमात्तर इति मे मतिः ।।१४।। द्विमात्तरपरो ह्रस्स्वश् च मन्न्यन्तेऽक्क्षरचिन्तकाः । तैलवत् पीडयेद् वर्णान् सन्धिप्प्राप्तांस्तु सर्वदा ।।१५।। सन्धिना रहितांश्चैव पर्णवच् च समाचरेत् । **स्वरात् करामति सयँ योगे व्यञ्जनवँ व्यञ्जने परे ।।१६।। के चित् पूर्वम् परङ के चिदुभयोर् नोभयोरपि ।** सयँ योगो द्विविधो ज्ञेय× कृत४ कृत्तिरम एव च ।।१७।। **कृतस् त्वेकपदे जात४ कृत्तिरमस् सन्धिसम्भवः ।** तत्तर यस् स्यात् स्वरपर× कृतो वा कृत्तिरमोऽपि वा ।।१८।। तस्य पूर्वाक्क्षरन् द्विस् स्याद् यथा श्श्वोश्श्वोश्श्वमित्त्यपि । व्यञ्जनान्तम् पदम् पूर्वन् तद्वर्णञ् चाऽपरम् भवेत् ।।१९।। द्विर्भावन् तवँ विजानीयात् सन्धिकाले तु नित्त्यशः । तेषु स्स्वरावनन्तरौ यत्तर सयँ योगसञ्ज्ञिकौ ।।२०।। तत्तर द्द्विष्करणं स्यात् सकृत्त्करणमतोऽन्यथा । **ओष्ठ्यौ वर्णौ यदि स्स्यातामसयँ योगपरौ यदि ।।२१।। द्विरोष्ठितामतै४ कार्या जिह्वाम् पुपूष दर्शनम् ।** वर्णा विंशतिरेकश् च **येषान् द्विर्भाव इष्यते** ।।२२।। प्रथमान्त्यास् तृतीयाश् च यलवाश् शषसैस् सह । **अन्तस्स्थासन्निपाते तु प्प्रथमङ करामयेद् बुधः ।।२३।।** अनुस्स्वारो विसृष्टस् तु द्द्वावेतावशरीरिणौ । द्विर्भावमेतयोश् चैव ज्ज्ञेयञ् **चारायणीयके** ।।२४।। शषसहा न दृश्यन्ते परस्स्थस्स्य तु नित्त्यशः । दीर्घानुस्स्वारमित्त्येके सयँ योगे ह्रस्स्व एव तु ।।२५।। अनुस्स्वारस्स्योपरिष्टात् सर्वं वृतन् दृश्यते यदि । दीर्घोऽनुस्स्वारो विज्ज्ञेयो यज्ज्ञं··· ।।२६।। एतेषामेव वर्णानाम् परङ करामेन् न संशयः । अन्तस्स्थास्पर्शसयँ योगे स्पर्शस्स्य क्करान्तिर् दृश्यते ।।२७।। **अन्तस्थासन्निपाते तु प्प्रथमङ करमयेद् बुधः ।** यथा खल्वाश् च मे अवेव्व्लीयन्त जलम्मा उदरम् ।।२८।। अन्तस्स्थोष्मपरस्पर्शसयँ योगो यत्तर दृश्यते । द्वित्त्वं स्पर्शे वदेत् तस्मिन् कल्म्माशो विशप्पती तथा ।।२९।। **यत्तर चोभयतस् स्पर्शास् सयँ युक्ताश् शषसैस् सह । आद्द्यस् तत्तर क्करमो ज्ञेयो नाऽपरो बोधितो बुधैः ।।३०।।** स्पर्शा४ पञ्चमसयँ युक्ता यत्तर पञ्चममन्तगाः ।

सयँ योगसञ्ज्ञा दृश्यन्ते तत्तर मद्ध्ये यमास् स्थिताः ।।३१।। अपञ्चमस् त्वेकपदे सयँ युक्तꣳ पञ्चमेऽक्षरे । यमो ज्ञेयो यथा रुक्म सङ्ख्वग्निर् ग्घ्नन्ति चैव हि ।।३२।। शषस् तथा ··· सयँ योग(?)मनौ तु परतो यदि । यमन् तत्तर विजानीयात् स्स्नात् स्स्नानेति निदर्शनम् ।।३३।। वर्ग-वर्गचतुर्भिस् स्युꣳ परस्मिन् पञ्चमे यमाः । शविकारच्छकारादिर् न यसन् (मन्?) न तु सञ्ज्ञितम् ।।३४।। स्पर्शा यत्तर न दृश्यन्ते वर्गान्तैस् सह सयँ युताः । यमास् तत्तर निवर्तन्ते श्मशानादिव बान्धवाः ।।३५।। वर्ग्यान्त्याच् छषसैस् सार्धमन्तस्स्थैर् वाऽपि सयँ युतम् । दृष्ट्वा यमा निवर्तन्ते आदेशगमिवाद्ध्वगः ।।३६।। उभयोरन्त्यसयँ युक्तꣳ पुमान् कुण्डलयोरिव । अयसन्(मन्?) तवँ विजानीयात् सञ्ज्ञानेति निदर्शनम् ।।३७।। सञ्ज्ञा न वो यथा दीर्घन् न चाऽनुस्स्वारमादिशेत् । सन्नियम्म्य ञकारेण परिक्रामे ङ्ञौ लघु ।।३८।। अनुस्स्वारन् तथैकार-मुपधामनुनासिकम् । **विक्करोशमनुकूजञ् च सञ्ज्ञाने परिवर्जयेत् ।।३९।। समा(न्) श्लक्ष्णानसन्दिग्धान् वर्णानुच्चारयेद् बुधः । न वैयाकरणैश् शक्यं सम्म्यग् वक्तुमशिक्षकैः ।।४०।।** हकारꣳ पञ्चमैर् यत्तर सयँ युज्ज्येत यथाविधि । तयोर् मद्ध्ये तु **नासिक्यम्** प्रा(?)-ह्हँणो ह्हँणम् ब्राह्हँमणो यथा ।।४१।। न वायुं हमसयँ योगे नासिका-ब्भ्यां समुत्सृजेत् । नाब्भ्यन्तमुरसा नादन् तथा हयवनेषु च ।।४२।। हकारं स्वरसयँ युक्तलँ लघुत्वन् दृश्यते यदि । कण्ठ्यन् तन् तु विजानीयाद् धृदयेति निदर्शनम्।।४३।। हकारवँ व्यञ्जनैर् युक्तङ गुरुत्वे दृश्यते यदि । तमुरस्स्यवँ विजानीयादाह्रियेति निदर्शनम् ।।४४।। नासिकेष्वपि वर्णेषु यो यत्तर भजते स्स्वरम् । तन्तमेवोपजीवन्ति नासा-दोषा श्च वर्जयेत् ।।४५।। ऋकाररेफसन्देहे यत् पूर्ववव्यञ्जनम् परम् । रेफन् तद् **भारिकवँ** विद्द्यादृकारे लघु तद् भवेत् ।।४६।। **ऊणनाꣳ पूर्वपदान्ताश् शषसेषु परेषु च। कटतैर् व्यवधीयन्ते वर्जयेत् तच् च सयँ-युतम्** ।।४७।। प्रथमा ऊष्मसयँ युक्ता पदस्था वा पदादिगाः । न चैनान् प्रतिजानीयाद् यथा मत्तस्याꣳ क्षरोऽप्सरः।।४८।।टशौ पशौ च सयँ योगे तथा स्यात् कशकारयोः । दर्शयेत् स्वरूपन् तेषान् द्वितीयन् तु विस-(व-?) र्जयेत् ।।४९।। षट्पात्तरक्क्षराणि विरिप्शिर् नु उदयः । अनुक्शाति पदयँ यत्तर विरिप्शिन् तु तथैव च ।।५०।। स्वरूपे तु कपौ तत्तर द्वितीयन् तु विसर्जयेत्। अन्न्यत्तर यदाद्द्यादृग्ग्ये(?)कपादूष्मसयँ युतम्।।५१।। द्वितयत्त्वे(?) तु तञ् ज्ञात्त्वा-ऽनुष्टुप् शारद्द्वदाहृतम् । तृतीयश् च

चतुर्थश् च चतुर्थादिपरम् पदम् ॥५२॥ त्रिषुग्घर्मः। नविकाराञ् ञकारात् तु शकारे च्छागमस् स्मृतः। शकारात् तु छकारस्स्य **ह्यन्न्येषामपि शाखिनाम् ॥५३॥** अघोषे तु विसृष्टस्स्य परसस्स्थानता भवेत्। क्षप्प्सादिच्छपरे चैवं प्रकृत्त्या तेषु नित्त्यशः ॥५४॥ **न क्करमेत् संस्कृतादीनाम् पूर्वञ् चैव तथा परम्।** ऋगर्धर्चानुवाकादौ स्वरभन्(क् ?)तौ तथैव च ॥५५॥ पुंश्चल्ल्या तु तथैवास्स्या ऊष्मा चैवोष्मणि स्स्थितः। वर्णेषूक्तꣳ क्रमविधिरेतच् **चारायणेर्** मतम् ॥५६॥ सर्वेषाङ् क्रमशास्त्राणां स्वरोऽधिष्ठानमुच्यते। नाऽस्स्वरात् क्रमते वर्णो बहुप्प्राप्तोऽपि कारणात् ॥५७॥ **द्वितीयोऽद्ध्यायः। संहिताकरणञ्** चेदमथ वक्क्ष्याम्म्यतो लघु। व्यञ्जनेन क्क्व चित् **सन्धिस्** स्वरेण स्स्यात् क्व चित् तथा ॥१॥ तथा **सनत्कुमारः। स्वरोऽक्क्षरमिति प्प्राहुराचार्याश् शब्दचिन्तकाः। समुदायꣳ पदन् तेषान् तच् चतुर्धा व्यवस्स्थितम्** ॥२॥ नामिकाऽऽक्ख्यातिके चोभे नैपातिकमनन्तरम्। उपसर्गाश् च निष्पत्तिꣳ पदमेत्रञ् चतुर्विधम् ॥३॥ नामिकं सविता व्योम व्यर्त्वित्त्याक्ख्यातिकं स्मृतम्। पर्युपेत्त्युपसर्गश् च च वा हेति निदर्शनम् ॥४॥ **नाम वायव्यमैन्द्रवं** वा सौम्म्यमाक्ख्यातमिष्यते। आग्नेयस् तूपसर्गस् स्यान् निपातो वारुणस् स्मृतः ॥५॥ भारद्द्वाजकमाक्ख्यातम् भार्गवन् नाम गोत्त्रतः। वासिष्ठा उपसर्गास् तु निपाताꣳ काश्श्यपास् स्मृताः॥६॥ **लोपसन्धिस्** स ते लोकमु(सु?)श्चन्द्रेत्त्यागमस् स्मृतः। वाज्ज्यसीति **विकारस्** तु प्रकृतिꣳ किं स्विदित्त्यपि ॥७॥ वर्णस्स्याऽदर्शनलँ लोप आगमो वर्णदर्शनम्। वर्णान्न्यत्त्ववँ विकारस् स्यात् स्वभावꣳ प्रकृतिस् स्मृतः ॥८॥ **वर्णाऽऽगमो वर्णविपर्ययश् च द्वौ चाऽपरौ वर्णविकारनाशौ। (धा)तोस् तथाऽर्थातिशयो नियोगस् तदुच्च्यते पञ्चविधन् निरुक्तम्** ॥९॥ ह्रस्स्वसन्धिन् तथा दीर्घं स्वरेण व्व्यञ्जनेन तु। चतुर्विधन् तथा सन्धिवँ वक्क्ष्याम्म्य अग्निर् वै प्राङ न चेत् तम् (?) ॥१०॥ द्वौ दीर्घौ ह्रस्स्वदीर्घौ वा दीर्घह्रस्स्वावनन्तरौ। ह्रस्स्वयोरुभयोर् वाऽपि दीर्घमेकं समासतः ॥११॥ दक्क्षिणावर्तयति। एसन्धिस् स्यादकारान्तादिकारादौ परे पदे। उकारादद्द्ये तथोभाव ऋवर्णे रेफसयँयुतम् ॥१२॥ ऋवर्णादद्द्यमकारान्ताद् रेफत्त्वयँ याति तत्स्वरः। परेण सह सयँयोज्ज्यो यथर्त्विति निदर्शनम् ॥१३॥ यत्त्रयत्त्र ह्युकारादद्द्यमकारान्तात् परम् पदम्। तत्त्रतत्त्र भवेद् रेफꣳ परेण सह सयँयुतः ॥१४॥ **पुनर्ग्रहणं स्पष्टार्थम्।** सन्धिवर्णेष्ष्वकारान्तात् परेष्ष्वेव

समासतः। प्रथमाद्द्ये द्वितीयत्त्वन् तृतीयाद्द्ये चतुर्थता ॥१५॥ **एवैषा परीति एवकारकरणात् क्व चिद् वि(व्यु ?)त्क्रमो दृश्यते अपान्ते सर्शादयामीत्त्येवमादयः** । इकारान्तम् पदम् पूर्वं स्वराद्द्यन् चेत् परम् पदम्। समासे सन्धयेद् यत्त्वमुकारान्ते च वागमम् ॥१६॥ प्रत्त्यक् स वरुणस् स्थावरस् स्रवन्ति। समासतो **विवृत्तिस्** स्यात् सन्धिवर्णात् स्वरे परे। ह्रस्स्वपूर्वामयुग्माव् च दीर्घपूर्वमतोऽन्न्यथा ॥१७॥ न विवृत्तिरकाराद्द्यमेकारान्तात् परम् पदम्। एकसन्धिङ कन् चिदिच्छन्ति के चिद् विवृत्तिसंहितम् ॥१८॥ अयुग्मेषु यथा सन्धिरकारान्तात् स्वरे परे। युग्मेऽप्याहुस् तथा सन्धिन् दीर्घश् च तदनन्तरम् ॥१९॥ कण्ठ्याद् विसृष्टस्स्योभावम् परे घोषे च तत् परे। प्राहुर् लोपन् तथा दीर्घाद् विवृत्तिस् स्यात् स्वरे परे ॥२०॥ नाम्म्यक्क्षराद् विसृष्टस्स्य घोषाद्द्ये रेफरूपता। लोपमाहुऽ परे रेफे दीर्घस् स्यादिउवर्णयोः ॥२१॥ विसृष्टस् त्विदु(?)पूर्वाङ्ग्यात् परो रेफो यदा भवेत्। सन्धिकाले तु तौ दीर्घौ रेफसन्धिमतोऽन्न्यथा ॥२२॥ रेफत्व(?)कण्ठपूर्वोप्यकारान्तादीनि शेषतः। समासतऽ परे घोषे स्वस्स्थानत्त्वमतोन्न्यथा ॥२३॥ तालुमूर्धन्न्यदन्त्यानावँ वर्गाणाम् प्राग् द्विकन्द्विकम्। यत्तर चैकपदाद्द्यन् चेद् विसृष्टात् सोष्मसयँ युतम् ॥२४॥ **पञ्चमत्त्वं स्ववर्गाच्च प्प्रथमाऽ पञ्चमे परे। तृतीयत्त्वम् परे घोषे प्रथमाद्द्ये स् स्वरूपता** ॥२५॥ परे स्पर्शे मकारान्तात् स्पर्शं स्यात् स्वान्त्यसयँ युतम्। सवर्णता परेऽन्तस्स्थे अनुस्स्वारस् तथोष्मणि ॥२६॥ यत्तेषु कत उत्त्वायँ यविष्ठः। अनुस्स्वारे परे पूर्वे सयँ योगे पुरतस्स्थिते। तद् धि ह्रस्स्ववँ विजानीयात् संस्थाप्प्येति निदर्शनम् ॥२७॥ अनुस्स्वारोपरिष्टाच् च सवँ वृतन् दृश्यते क्व चित्। स दीर्घमपि विज्ज्ञेया यज्ज्ञं शृणोति दर्शनम् ॥२८॥ **ह्रस्स्वोपधास् तु ङणनास् स्वराद्द्येषु पदेषु च**। सर्वत्तर गुरवो ज्ञेया लघु दीर्घोपधास् तथा ॥२९॥ प्रत्त्यङ्ङासीनः। यानावह। न क्क्रमेत् तु समासाङ्गे व्यञ्जनम् ऋत्स्वरे परे। **सयँ योगे क्रमते नित्त्यवँ व्यञ्जनं रेफवर्जितम्** ॥३०॥ नृषु यदन्ना। व्यञ्जनान्तम् पदम् पूर्वम् परव्यञ्जनमक्क्षरम्। ऋवर्णेन तु सयँ युक्तन् तत् समासे न **भारिकम्** ॥३१॥ अभीष्टका न्द्यन्दन्ति। प्रथमास् तूष्मणाद्द्ये तु द्द्वितीयत्त्वम् परे पदे। सयँ युज्ज्यम् प्रथमम् मद्ध्ये नासिक्क्योष्मणयोस् तथा ॥३२॥ तत्सावित्रोदयक्क्ष्मत। रङ्गसन्धिर् नकारान्ताद् विसृष्टेव सरेफता। मकारान्तादनुस्स्वारम् परेष्वेव रफोष्मसु॥३३॥

द्वे पदे तु सङ्गसं (तकम् ?) ष(सम्पू ?)र्वं राट्परयँ यदि। मागमस्
स्यात् तयोर् मद्ध्ये नाऽनुस्स्वारो विधीयते ॥३४॥ सम्म्सट्। दिशां
समासे क्रमते ताल्व्यन् तकारान्तादनन्तरम्। सयकारञ् छकारञ् च लकारन्
तुल्य एव तु ॥३५॥ यश् चरुर् भवति। तच्छान्तम् मिथुनम्। स्वर्गाल्-
लोकात्। **पूर्वङ् कृत्वा पदच्छेदं समासन् तदनन्तरम्। समासे तु कृते**
पश्चादर्थम् ब्रूयाद् विचक्षणः ॥३६॥ संहितायावँ विधिꝗ प्रोक्तꝗ
कवीनामनुकम्पया पुरा सकृद् बुधैर् जुष्टस् सैनिकैरिव केशवः ॥३७॥ **इति**
चारायणीयशिक्षायान् तृतीयोऽद्ध्यायः ॥ मन्त्रो हीनस् स्वरतो वर्णतो
वा मित्थ्याप्प्रयुक्तो न स्वमर्थमाह। **स वाग्वज्ज्रो यजमानं हिनस्ति**
यथेन्द्रशत्त्रुस् स्वरतोऽपराधात् ॥१॥ **कुतीर्थादागतञ्** जग्धमपवर्णेषु
भक्षितः। न तस्स्य परिमोक्षोऽस्ति पापाहेरिव दुर्द्विषाम् ॥२॥
सुतीर्थादागतञ् जग्धं स्वाम्म्नातं सुप्प्रतिष्ठितम्। सुस्स्वरञ् च सुव-
क्त्रञ् च प्प्रयुक्तम् ब्रह्मम राजते ॥३॥ यथा व्याघ्री हरेत् पुत्त्रन्
दंष्ट्राभिर् न च पीडयेत्। भीता पतनभेदाब्भ्यान् तद्वद् वर्णान् प्रयो-
जयेत् ॥४॥ **मधुरञ् च न चाऽव्व्यक्तवँ व्यक्तञ् च न च निष्ठुरम्।**
सनाथस्स्येव देशस्स्य न वर्णास् सङ्करङ् गताः ॥५॥ माधुर्यमक्षर-
व्व्यक्तिꝗ पदच्छेदस् तथात्वरः। धैर्यो गुरुलघुत्त्वञ् च षडेते **पाठके गुणाः**
॥६॥ प्रातर् वदेन् नित्त्यमुरस्स्थितेन स्स्वरेण शार्दूलरुतोपमेन।
मद्ध्यन्दिनो कण्ठगतेन चैव चक्राह्वया कूजितसन्निभेन ॥७॥ तारन्
तु विद्द्यात् सवनन् तृतीयं शिरोगतन् तच् च सदा प्रयोज्ज्यम्। वाचं
स्वतन्त्रान् न पठेत् कदा चित् प्राज्ज्ञोऽन्न्यथा तैर् विहितं··· वेदम् ॥८॥
समविक्रमसम्पन्नामद्द्रुतामविलम्बिताम्। उच्चारयेत कल्ल्याणीवँ
वाचमाम्नायसारिणीम् ॥९॥ न वासरस्स्य पूर्वाह्णे तारमुच्चारयेत्
स्वरम्। उत्साहो नश्श्यते तस्स्य रात्त्रयन्ते मैथुने यथा ॥१०॥ **पठेत्**
कैवल्ल्यसोपानं सौम्म्येन परिवेष्टितम्। तुलाकोटिनिभम् पाठं स्वराड्-
ढ्यम् मद्ध्यमं स्वरम् ॥११॥ स्वरात् स्वरं सङ्क्रमयेत् स्वरे सन्धिमनु-
ल्बणम्। अविच्छिन्नं समङ्ग कुर्यात् सूक्ष्माच्छायोतपोरसम् ॥१२॥
समं स्वरम् पठेन् नित्त्यम् मार्गहस्ते प्रदर्शयेत्। यद् वाणी गच्छति
स्स्थानन् तद् हस्तेन प्प्रदर्शयेत् ॥१३॥ यथा वाणी तथा पाणिर् विस्-
स्वरम् परिवर्जयेत्। यत्त्रैवाऽवस्स्थिता वाणी पाणिस् तत्त्रैव गच्छति
॥१४॥ **स्वरस्स्यानुगतं हस्तन् नृणामिव शुभाशुभम्। हस्तस्यानुगता**
दृष्टिश् छायेवाऽनुविधावति ॥१५॥ हस्तवँ वागनुगङ् कृत्वा वाचङ्

कृत्वा मनोनुगाम्। दृष्टिं हस्तगताङ्ग कृत्वा त्रैस्स्वर्यस्येति लक्षणम् ॥१६॥ **स्वरतश् च (स्वर उच्चः ?) स्वरो नीचस् स्वरस् स्वरित उच्यते। स्वरम् प्रधानन् त्रैस्स्वर्ये प्राहुरक्षरचिन्तकाः ॥१७॥** सुखोपविष्टश् शुचिरेकचित्तो विवर्जितत्रासमदाश्रयस् तु। **यथर्तु युक्त्याऽशनपानभोजी** वेदम् पठेद् वर्जितवर्णदोषम् ॥१८॥ दक्षिणाक्षिनिपातेन दृष्टिं हन्न्यात् कनीयसीम्। नासागण्डब्भ्रुवोस् सन्धिमुदात्तविषये विदुः ॥१९॥ **पुटिर् दण्डस् स्फुटिर् वीणा मुष्टिको घनुराकृतिः। षडेते हस्तदोषास् तु परशुश् चेति सप्तमः ॥२०॥** उत्तानं सोन्नतङ्ग किञ् चित् सुव्यक्ताङ्गुलिरञ्जितम्। स्वरवँ विद्धङ्ग करङ्ग कुर्यात् प्रादेशोद्देशगामिनम् ॥२१॥ उदात्तस् **तालुगर्भश्** च तालुगर्भस् ततः परः। समाहारे तु स्स्वरितः प्रचयस् तस्स्य पृष्ठतः ॥२२॥ **नीचस्स्थानोऽनुदात्तश् च सन्नतरस् ततोऽधगः।** सर्वानुदात्तयोर् मद्ध्ये सप्तैते स्वर उत्तमाः ॥२३॥ अन्तोदात्तम् पदम् पूर्वमुदात्तवँ वा भवेत् क्व चित्। उदात्तम् परपदं स्यात् **तालुगर्भस्** स उच्यते ॥२४॥ स्वरितानन्तरवँ वर्णयँ यत् किञ् चित् तत्तर विद्ध्यते। **प्रचयन्** तवँ विजानीयादेवमाहुर् मनीषिणः ॥२५॥ उक्षान्नाय। प्राहुस् सर्वानुदात्तन् तु नीचान् नीचतरस् तु यः। तत्परञ् चेद् भवेन् नीचमाहुस् **सन्नतरम्** बुधाः ॥२६॥ स्वरितन् त्र्यङ्गुलवँ विद्ध्यादुच्चैर् यत्तर परम् पदम्। नीचवँ वापि पदम् भूयादङ्गुले स्स्वरितम् भवेत् ॥२७॥ अग्ने सम्भ्राडजैकपादाहवनी अमावास्स्यायावँ वा यजेत कया शुभा। प्रचितन् तालुगर्भञ् च सन्नतरन् तथापि च। वाक् स्पृशति न पाणिश् च ज्ञेयञ् चारायणीयके ॥२८॥ **चारायणीयशिक्षायाञ् चतुर्थोद्ध्यायः॥** स्वरा अष्टविधाः प्रोक्ता अमी वक्ष्ये यथाक्रमम्। तिर्यक्त्वञ् चतुरो गच्छेच् चत्वार ऋजवस् स्मृताः ॥१॥ सयकारं सववँ वाप्य–(?) मक्षरं स्वरितम् पदम्। नीचपूर्वमपूर्ववँ वा स **जात्यस्** स्वर उच्यते ॥२॥ सदस्पते। एओ आब्भ्यामुदात्ताब्भ्यामकारो यत्तर दृश्यते। अनुदात्तोऽभिनिहितः ··· ··· ॥३॥ सोहन् तस्मै वाजमिति सोहवँ वाजसनोमि तस्मै वाजं सुवान्तम्। इउवर्णौ यद्ध्युदात्तौ आपद्ध्येते यवौ क्व चित्। नीचे च प्प्रत्यये नित्यवँ विद्ध्यात् **वर्षप्प्रस्स्य** लक्षणम् ॥४॥ त्र्यम्बकयँ यजामहे द्व्य(द्र्व ?)न्नस् सर्पिः। इकारे यत्तर लोपस् स्यादिकारेणैव सन्धितम्। उदात्तञ् चाऽनुदात्तन् च प्प्रश्श्लिष्टोऽभीन्धतामिति ॥५॥ ह्रस्स्वप्प्रकृतिरिकार ईकार उच्चनीचयोः।

प्रश्श्लिष्टं स्मर्यते तादृग् विहीमिस्स्वो विभाव्यते ॥६॥ उदात्त-पूर्वयँ यत् किञ् चिच् छन्दसि स्स्वरितम् पदम् । एष सर्वबहुस्स्वारस् तैरोव्यञ्जन उच्च्यते ॥७॥ ईडे अग्निम् । अवग्ग्रहात् परयँ यत्तर स्स्वरितं स्यादननन्तरम् । ततो-(तिरो-?)विरामन् तवँ विद्द्यादुदात्ते यद्द्यवग्ग्रहः ॥८॥ गोपतौ । उच्चनीचौ स्वरौ यत्तर नीचे स्याद् यद्द्यवग्ग्रहः । तथाभाव्यवँ विजानीयादेवमाहुर् मनीषिणः ॥९॥ यथा धनुषमादाय शरे क्षिपते पुनर् गुणः । स्वस्स्थानम् प्रतिपद्द्येत तद्वद् धस्तगते स्वरे ॥१०॥ प्रश्लिष्टक्क्षैप्प्रजात्त्यानायँ यश् चापि निहिते भवेत् । उदात्तोपस्स्थितन् तेषामेकदेशे प्रकीर्तितम् ॥११॥ न तत् स्वरितपूर्वाङ्गे नापराङ्गे कदा चन। उभयोर् वाव सयँयोगे द्वा(स्वा ?)रङ कुर्याद् विचक्क्षणः ॥१२॥ अनुतोदात्तम् परम् पूर्वमुदात्तवँ वा भवेत् क्व चित् । हस्तन् न नीचैर् निक्क्षिप्प्य तिर्यक् कुत्तरैव गच्छति ॥१३॥ तव शश्रियेमजिहीत । पत्नी स्वः । अनुदात्तात् कम्पनयँ यत्तर द्व्यङ्गुलन् तत्तर पृष्ठगम् । हस्तं स्वरसमायुक्तङ कम्पयेत विचक्क्षणः ॥१४॥ देवा अनन्योन्यस्स्य । स्वरितात् कम्पनयँ यत्तर तत्तराङ्गुलकमूर्ध्वगः । हस्तं श्रु(?)तिगतङ कम्पेन् नाङ्गुलादतिरेचयेत् ॥१५॥ इषिरा अनतिः । न्यङनियन्ति । अवरुह्य्य तथोदात्तादङ्गुलं सम(?)मेव तु । कम्पङ कुर्यात् तत४ पश्चाद् धस्तन् तत्तरैव गच्छति ॥१६॥ आ सवँ वा वसो ग्नेः । कम्पयोरुभयोर् यत्तर ह्येकस्स्थानङ कदा चन । सार्धात् स्यादङ्गुलादेकाद् द्वितीयञ् चाऽङ्गुलोर्ध्वगम् ॥१७॥ मनुष्यास् तेऽन्न्यतः । सार्धात् तथाङ्गुलात् कम्पस् सर्वस्स्थानेषु कत्थ्यते । स्वरज्ज्ञा४ के चिदिच्छन्ति मया भेदा४ प्रकीर्तिताः ॥१८॥ पञ्चमोऽद्ध्यायः ॥ यथाऽसौ मत्तनागेन्द्र४ पदात् पदवँ विधावति । एवम् पदम्पदवँ व्यक्तन् दर्शनीयम् पृथक्पृथक् ॥१॥ पदान्ते तु विरामस् स्याद् वलाहक इति स्स्मृतः । अर्धर्चैर् वैद्द्युतो नाम ऋगन्ते तु भुजङ्गमः ॥२॥ प(ा ?)दे विरमते यत् तु स वै विशिख उच्च्यते । योऽन्न्यस्स्मिन् छन्दसि प्प्रोक्त४ पर्वकन् तवँ विदुर् बुधाः ॥३॥ प्रतगसम् । तनुमद्ध्यन् तु तद् वृत्तयँ यस्स्य पादं षडक्क्षरम् । कुमारललितं सप्त ह्यष्टाक्क्षरमनुष्टुभम् ॥४॥ नवाक्क्षरम् फलयुतम् प्रणवन् तु दशाक्क्षरम् । एकादशोपेन्द्रवज्ज्रन् द्वादशन् तु जलोद्धतम् ॥५॥ त्रयोदशाक्क्षरपदम् प्रहर्षवँ वृत्तमुच्च्यते । चतुर्दशाक्क्षरवँ वृत्तवँ वसन्ततिलकवँ विदुः ॥६॥ पञ्चदशन् तु मालिन्न्यमृषभं षोडशवँ विदुः । सप्तदशाक्क्षरम् पादम्

मन्दाक्करान्तन् तु नित्यशः ।।७।। अष्टादशन् तु गोकरणं श(ा ?)र्दूलैकोनविंशतिः । विंशाक्षरं सुवदनं स्रग्धरा चैकविंशतिः ।।८।। द्वाविंशमब्भ्रनुत्तन् तु सुललितवँ विंशतित्तरयम् । चतुर्विंशति तन्वङ्गी करौञ्चपादमतX परम् ।।९।। अष्टाविंशमथ पादं शोभनं नवविंशकम् । भुजङ्गजृम्भं षड्विंशन् ततो मधुकरम् परम् ।।१०।। योऽन्यस्मिंस्तिरंशमात् पादा आर्यावँ वै तान् निबोधत । अतोऽन्यथा भवेद् गद्द्यवँ यत्तर पादे न विद्द्यते ।।११।। यत्तर कण्ठ्यदन्त्यदन्त्यष्टानामन्तम् पदन् तु वर्तते(?) । परे पदे तथाग्रं स्यात् तद् विरामवँ विदुर् बुधाः ।।१२।।दिवस्पृक् अहरुत।अक्क्ष्णो निमेषमात्तरेण ये वर्णा पृस्स्वधीयते(?)। स एकमात्तरा द्विर्भावाद् दीर्घस् तिरX प्लुत उच्च्यते ।।१३।। हृदयस्थम् मण्डलवँ विद्द्यात् कण्ठे विद्द्याद् द्विराणवम् । तिरराणवन् तु जिह्वाग्रे विसृतम् मात्तिरकम् भवेत् ।।१४।। चाषस् तु वदते मात्तरान् द्विमात्तरावँ व(ा ?)यसो भ्रुवेत्(?) । शिखी तिरमात्तरावँ विज्ज्ञेया एष मात्तरापरिग्रहः ।।१५।। आकाशस्था यथा विद्द्युत् स्फुटिके मणिसूत्तरवत् । एवञ् छेद्द्यवँ विवृत्तीनायँ यथा व(ा ?)लेषु कर्तनम् ।।१६।। चतसृणावँ विवृत्तीनामन्तरम् मात्तिरकम् भवेत् । अर्धमात्तरमन्येषामन्येषा मनु(णु ?)मात्तरकम् ।।१७।। उभौ यत्तर दीर्घौ स्यातावँ व्यवधानन् तु मात्तिरकम् । यवा आयवा । पूर्वमग्रे तदर्धन् तु ह्रस्स्वयोरर्धमेव च ।।१८।। ह्रस्स्वादि वत्सानुसृता वत्सानुचारिणी चाग्रे। पाकवत्त्युभयोर् ह्रस्स्वा दीर्घमद्ध्या पिपीलिका ।।१९।। चारायणीयशिक्षायां षष्ठोऽद्ध्यायः ।। प्रचिता वलगा तारा केशिनी धात्तिरेव च । स्वमति पिपीलका त्वष्ट्रा वायव्या नव वृत्तयः ।।१।। तिस्रस्तिस्रX क्रमेणासाम् पूर्वे मद्ध्ये तथोत्तरे । सवनेषु प्प्रशस्स्यन्ते द्रुतमद्ध्यविलम्बिताः ।।२।। अब्भ्यासार्थे द्रुतावँ वृत्तिम् प्रयोगार्थे तु मद्ध्यमाम् । शिष्याणामुपदेशार्थे वृत्तिङ्ग कुर्याद् विलम्बिताम् ।।३।। पदक्क्रमेण सन्धाय यजुर्धर्मेण संस्थितम् । स्थानपाणिस्वरश्श्लिष्टन् द्रुतमाहुर् मनीषिणः ।।४।। लग्ध्वादिगुरुसन्धिञ् च सोच्छ्वासन्तम् (सञ् च ?) पदेपदे । मात्तराकालं समङ्ग कुर्यान् मद्ध्यमान्ताम् प्रचक्क्षते ।।५।। पदम्पदम् पृथक्पृथक् प्रक्क्रमम्प्रक्क्रमन् तु यत् । प्राण प्रारमण(–प्प्रायेण ?) प्रश्श्लिष्टन् न्यासे वृत्तिवँ विलम्बिताम् ।।६।। वाद्द्यञ् च ताण्डवादीनाम् मात्तरार्धमनुवर्तते । क्रमञ् चैव तिरस्कृत्त्य शिष्याब्भ्यासनहेतवे ।।७।। क्रुद्धो गुरुर् वदति यानि

पदानि शिष्ष्ये दावाग्निसूर्यसदृशानि दहन्ति तानि ।(तान्न्ये?)व शिक्क्षित-पदानि सुखावहानि पश्चाद् भवन्ति कुमुदाकरशीतलानि ।।८।। **सप्तमोऽद्ध्यायः** ।। वर्णानाम् प्रथमा **भुक्ता भुक्ताश्** चैव तु पञ्चमाः । अन्तस्स्थानालँ लवौ **भुक्तौ** शेषाश् चाऽन्न्ये **बुभुक्क्षिताः** ।।१।। वर्गेवर्गे द्विकञ् चाऽऽद्द्यन् दशकवँ वर्णसञ्चयम् । परेषां सहयोगेन **भक्क्ष्य-वृत्तिX** प्रशस्स्यते ।।२।। यक्ना हलिक्ष्ण पत्नीवान् । परस्परं स्पर्शौ भुक्तौ वर्जयित्त्वा तु पञ्चमौ । ङकारX पञ्चमैर् यत्तर भोक्तव्यन् तत् प्रयत्नतः ।।३।। रुक्ममुपदधाति । वाङ्नोपधस्स्यति । पञ्चाऽन्त्यैस् त्रीणि चाऽन्तस्स्था पदे चैके लवद्द्वयम् । प्रागन्त्येनाऽन्त्याश् चतुरो **भक्क्ष्याX** पञ्चदशाऽक्क्षराः ।।४।। अर्वन् यज्ञः । यकारादिहकारान्त-मष्टकञ् च परस्परम् । चतुरश्चतुरो वाऽपि **तत्वभक्क्ष्यं** षोडशाक्क्षरम् ।।५।। विष्ष्वग् वातो वातः । तृतीयाX पञ्चमा वर्ज्याश् शेषा भक्क्ष्यास् तु वर्गिणः । एकपदे न नासिक्क्या उपनीतस्स्य मद्ध्विव ।।६।। मुद्गाश् च मे । विण्निन्वाधे(?)। परस्परं स्पर्शभक्क्ष्यास् तृतीयाX पञ्चमादृताः। स्पर्शा अन्तस्स्थसयँयुक्ता मदिरेव द्द्विजातिभुक् ।।७।। सप्तमे । अग्ने । युग्मदयुजौ । तृतीयश् च चतुर्थश् च ह्यन्तस्स्थोष्माणसयँयुतः । सन्धिन् तु पञ्चमा यत्तर न वक्क्ष्यामीति मे मतिः ।।८।। वाग्घुता । जिह्व्वा मे। आगता घ्नन्ति । सप्प्रेष्ष्याणान् तु पिण्डानाम् भक्क्ष्यञ् **वारायणीयके** । यकारं हरयोर् युक्तं स्फुटमन्न्यत्तर न क्क्व चित् ।।९।। **हकारे** तु स्स्फुटम् प्रोक्तमेकारे रेफऋक्स्वरे । स ह्यग्निस् तन् मनुष्ष्येषु वीर्यमस्स्य तमेव च ।।१०।। स ह्यग्निस् तन् मनुष्ष्येषु वीर्यमस्स्पृतमसि । **ज्वालापिण्डान्** सनासिक्क्यान् सानुस्स्वारां स्तु **मन्मयान्** ।।११।। सोपद्ध्मान् **वायुपिण्डां** श्च जिह्व्वामूलां स्तु **वज्ज्रिणः** । ब्रह्मोस्तम्, बाङ् म आसन् । सयमवँ विद्ध्य**यस्पिण्डमन्तस्थेषु च दारुवत्** ।।१२।। अन्तस्थायमवर्जितमूर्णापिण्डवँ विनिर्दिशेत् । स्थानम् पद-विभागेन विक्करते(?) पाठको जनः ।।१३।। एकपदे तु सम्मोहन् दन्त्यताल-व्ययोर् यदा । सचिकालञ् (सचकारञ्) छकारन् तु तालव्यवँ विन्दते जनः ।।१४।। सकारे दन्त्यमित्त्याहुरभेदे स्मृतिविब्भ्रमः । गच्छ गच्छ कलश् चैव यच्छतश् चयोरेव च ।।१५।। इच्छ ऋच्छ तथा तालव्यं बिन्दते जनः । प्रवत्स्यत्त्यसुतो वत्सो नि होता सत्सि पित्सरु ।।१६।। पुनरुत्स्यूतमाधत्स्व पुनरुत्सृष्ट पीत्स्यति(?) । रुरुत्समानो दित्सन्तवँ वात्स्येत्स्याममदित्स्यया(?) ।।१७।। उत्सदतोन् तितृत्से आ रथकृत्सश्

चिकित्सतः । सर्वत्सरो जिघत्सेत वृत्स्व काममरुत्त्स्महि ।।१८।। नोत्स्यात्ता बीतभत्सौ रात्त्स्म कुत्सथोऽत्त्रैव वेत्स्यथ।उत्साद्दुहेन भित्सारो वरुणच्छत्मभित्सति।।१९।।उत्सयँयतोत्सञ् जुषस्व दन्त्याश् चाभिहिता४ पृथक् । हकारम् पञ्चमैर् युक्तमन्तस्स्थैर् वापि सयँयुतम् ।।२०।। ओरस्स्यन् तवँ विजानीयात् कण्ठ्यमाहुरसयँयुतम् । न वायुं हमसयँयोगे नासिकाब्भ्यां समुत्सृजेत् ।।२१।। नात्त्यन्तमुरसा नादन् तथा ह्यवनेषु च । ब्रह्म्मा देवानां स्वाह्य्येनवँ वागैद्द्व । ऋत्स्वर४ परतो यत्त्र हकारस्स्य तु दृश्श्यते ।।२२।। हकार४ कण्ठ्यमित्त्याहुरौरस्स्यवँ व्यञ्जनेन तु । आह्य्ययेत(?) । उरस्स्यन् तवँ विजानीयादाह्रियेत निदर्शनम् ।।२३।।हकारं स्वरसयँयुक्तलँ लघुत्त्वन् दृश्श्यते यदि । कण्ठ्यन् तन् तु विजानीयाद् धृदये तु निदर्शनम्।।२४।।हृदयमपिकक्क्ष्ये । हकारम् पञ्चमैर् युक्तमन्तस्स्थैर् वापि सयँयुतम् । तयोर् मद्ध्ये भवेत् तु नासिक्क्यम् प्रोक्तन् तु ब्रह्ह्मणे ।।२५।।स्वरभक्तिर् द्विधा ज्ञेया लकारे रेफ एव च । स्वरोदा व्यञ्जनोदा च विहिताक्क्षरचिन्तकैः ।।२६।। रह्योः४ करिणीवँ विद्द्यात् कर्विणीं रशकारयोः । लशयोर् हरिणीवँ विद्द्याद् धात्त्रीन् तु रसकारयोः ।।२७।। या तु हंसपदा नाम सा स्स्याद् रेफश(ष ?)कारयोः । अभक्क्ष्या४ क्रमवर्ज्याश् च पञ्चैतास् स्वरभक्तयः ।।२८।। एकपदा भवेद् यत्त्र स्स्वरभक्तिस् स्वरोदया । द्विपदा चैव या दृष्टा व्यञ्जनोदा च सा स्स्मृता।।२९।।अणुमात्त्रञ् च रेफस् स्याद् व्यञ्जनस्स्य तथैव च । स्वरस्स्य सार्धमात्त्रञ् च स्वरभक्तिवँ विनिर्दिशेत् ।।३०।। स्वरभक्तीं४ प्रयुञ्जानस् त्रीन् दोषान् वर्जयेद् बुधः। इकारञ् चाऽप्प्युकारञ् च ग्रस्तदोषान् विवर्जयेत् ।।३१।। दर्शपूर्णमासौ । वार्षुकेस्मैं । यथेन्द्रनीलप्प्रभयाऽभिभूतश् शुक्लो मणिर् याति हि नीलभावम् । तथैव नासिक्क्यगुणाभिभूतस् स्वरोऽपि रङ्गत्त्वमुपैति कृत्त्स्नम् ।।३२।। हृदयाज् जायते रङ्ग४ कांस्यवच् चैव निस्स्वनः । लघुश् चैव द्द्विमात्त्रश् च दधन्न्वेति निदर्शनम् ।।३३।। दधन्न्वार्योनर्यः । हकारे व्यञ्जनोदस् स्यात् शषसेषु स्स्वरोदयः । शषसैर् विवृतवँ विद्द्यात् तद् धरि(?)सवँवृतवँ विदुः।।३४।।सयँयोगे रशयोर् दोषश् शतवत्सो (वल्शो ?) निदर्शनम् । तस्स्य मात्त्रा तु हृदये अणुमात्त्रा तु मूर्धनि ।।३५।। नासाग्रे त्त्वणूनाम् मात्त्रा रङ्गस् स परिकीर्तितः । न स्स्वरेण विना रङ्गो ङकारेण तथैव च ।।३६।। उभयोर् धानसयँयोगाद् रङ्ग इत्त्यभिधीयते । रपरे रङ्गमित्त्याहुरघोषे मुखनासिकः ।।३७।। स्वरपरे

तु **नासिक्यस्** तनुमद्ध्यन् दधन्न्वयोः ।। ऋतूं ऋतुपते भ्रातृव्य वीहृत्य-न्न ते गोमां अग्ग्रे। वर्णस्स्यादर्शनलँ **लोप आगमो** वर्णदर्शनम्।।३८।। **वर्णान्न्यत्त्ववँ विकारस्** स्यात् स्वभाव× **प्रकृतिस्** स्मृतः । सन्धिश् चतुर्विधस् तेषाम् पदानां समुदाहृतः ।।३९।। लोपागमविकारास् तु प्रकृ-तिश् चेति निश्चयः । लोपसन्धिस् स ते लोक सुश्चन्द्रेत्त्यागमस् स्मृतः ।।४०।। वाजि(ज्ज्य ?)सीति विकारस् तु प्रकृति× कः स्विदित्त्यपि । तृणवेति **णत्त्ववँ** विद्द्यात् सुषुपुषीति **षत्त्वयोः** ।।४१।। राथस्योषोत्यु-**पचारन्** दीर्घन् च्यावयते विदुः । तृणवः सुषुपुषी । क्रियालोपं समस्स्कु-र्वन् नुत्तष् टे वर्णलोपता ।।४२।। एतैः षड्भिर् द्विलोपैस् तु ज्ज्ञेयन् **चाराणीयके** । एकपदे पदार्धे च पदावग्ग्रहजे तथा ।।४३।। स्थानारम्भन् तु कुर्वीत त्रिर× प्रक्क्रमपदेषु च । यस् सङ्ग्रामन् जम्पति अमागम्म्या इति ।।४४।। काष्ठकश् च समग्ग्रश् च हिमवान् केशवस् तथा । चत्त्वा-र्य्येतान्न्यसङ्ख्यानि श्रुतितोध्वगुहागुणैः ।।४५।। **वर्णसञ्ज्ञास् तु सयँ-योगस् संहिता करणन् तथा । मात्त्रा प्रमाणं हस्तश् च स्वरा× कम्पा विवृत्तयः** ।।४६।। **स्वरभक्ती× पादवृत्तवँ वृत्ती भुक्तमभुक्तयोः । एतत् क्रमेण पूर्वोक्तमथात× क्रमलक्क्षणम्** ।।४७।। **इत्त्यष्टमोद्ध्यायः**।। द्विपदां संहिताङ्ग कृत्त्वा विरमेत् तु यदा पदम् । पूर्वमुत्सृज्ज्य सयँ-योज्ज्यमुत्त्रेणोत्तरम् पदम् ।।१।। असि तस्स्य तस्स्य ते । त्रिपदान्न्य-वसानानि यथा स्यात् त्रिपद× क्रमः । पूर्वमुत्सृज्ज्य मेधावी प्रक्क्रमेत् पुनरेव तु ।।२।। देवतयो(द्रु ?)यामि । चतुष्क्रमस् तथैव स्स्यात् त्रिपदेन विधिस् स्मृतः । पदम्पदन् त्यजेत् पूर्वम् प्रक्क्रमेत् पुनरेव च ।।३।। देवेब्भ्य एमेनत् । स्वरान्त्यनि(द्रु ?)दादीं स्तान् स्वरसन्धिसमीरितान् । त्रिक्क्रमान् जनयन्त्येते उभयोष् षत्त्वणत्त्वयोः ।।४।। उपोपेन्नु ब्रह्म-मणोद्धरति ऋतस्स्यादित् शयथेमपाचीन् मोषूणः । उकार× पदयोर् मद्ध्ये यत्त्राऽपृक्त× परम् भवेत् । स त्त्रिकस् त्रिक्क्रमो ज्ज्ञेयस् तथैवाकारमा-विशेत् ।।५।। उदुत्त्यम् । यत्त्र त्त्वेव समेयातां हेतू त्रिकमकारकौ । अन्न्ययो× पदयोर् मद्ध्ये स चतुष्कचतुष्क्रमः ।।६।। स पुनरैमीत्त्येद् वृक्क्षस्स्य । पदान्तेषु प्प्रगृह्य्याणामित्त्यकारो निदर्शनम् । न क्क्रमस्स्याऽवसाने तु न च स्स्यात् संहिताम् प्रति ।।७।। उर्वी रोदसी । ऋगर्धर्चानुवाकान्तास् तथाप्प्येकपदन् च यत् । विसंहितमसन्धेयं संहार× केवलस् स्मृतः ।।८।। अनुदृश्श्यायजन्त कवयः । अनुदात्तम् पदम् पूर्व्वं सु(स्व?)राद्द्युच्चै× परम् पदम् । प्रक्क्रमे सन्ध्यमानानामुच्चै×-

करणमादिशेत् ।।९।। जात्यादीनामशेषाणान् तिर्यक् प्रक्क्रमणं स्मृतम् । अनन्यपूर्वमेतेषामुदात्तादेव निर्दिशेत् ।।१०।। स्वरितम् परपदं स्यादृजुꣳ प्रक्क्रामयेद् बुधः । परमे व्योमन्, पत्नि स्स्वो रोहाव । स इत्यत्तर तथा पूर्वमित्पदन्···ततꣳ परम् ।।११।। स्वरादिना तृतीयेन क्क्रमन् तत्तर विनिर्दिशेत् । सेश् चैव तु तथा स्यातामुपदे परतस् स्थितः ।।१२।। सन्धिना तु यथोक्तेन तत् चतुष्क्रममादिशेत् । द्विपदम् प्रक्क्रमात् पूर्वम् परयाङ्गिरसꣳ परम् ।।१३।। त्रिक्क्रमम् बालखिल्ल्या वै माषकुम्भ्यान् चतुष्क्रमम् । पुनरुक्तपदे पूर्वम् परिहारन् तु वै भवेत् ।।१४।। कृत्वा प्रक्क्रमसन्धिन् तु संहरेत विचक्क्षणः । देवा वास्तो स्वाहेति । अतोऽनन्यत्तर तु सन्धाय पुनरुक्तपरे पदे ।।१५।। द्विपदन् त्रिपदङ्ग कुर्यादुक्तप्प्रक्क्रमलक्क्षणम् । सवितो वयतु । प्रक्क्रमेषु यथाशास्तरलँ लक्क्षणवँ विहितङ्ग क्रमात् ।।१६।। वेष्टेष्ष्वेव तु सन्धीनामत ऊर्ध्वन् निगद्द्यते । षत्त्वणत्त्वमुपा(चा)रो दीर्घत्त्वन् तच् चतुष्टयम् ।।१७।। पदे यस्मिन् निवर्तेत तत् समापाद्द्यलक्क्षणम् ।। **नवमोऽध्यायः ।।**

वेष्टꣳ परिग्ग्रहश् चैव संहारश् च विवर्तनः । आद(व ?)रꣳ परिहारश् च शब्दाꣳ पर्यायवाचकाः।।१।। अवग्ग्रहं समापाद्द्यम् प्रगृह्यंयन् नैधनानि च । सयँ योज्ज्य पुनरावृत्तिꣳ परिहार्याणि शास्तरतः ।।२।। सुषुपुषी उर्वी इति । परिहारे विधिवँ विद्द्यात् सयँ योज्ज्याऽब्भ्यस्स्यते पुनः । इत्यनन्तां संहिताङ्ग कृत्वा पदवत् पुनरारभेत् ।।३।। प्रप्प्रायमग्निꣳ प्रप्प्रेति प्रप्प्र । अकारान्तम् पदयँ यत्तर दीर्घवँ वा यदि वा प्लुतम् । एसन्धिस् तत्तर कर्तव्यꣳ परिहारेषु नित्यशः ।।४।। प्रदातारम्, सुगावः, उपयाम इति । सन्धिवर्णेषु शेषेषु विवृत्तिस् स्यात् स्वरे परे । उकारान्तवँ वकारस् स्यादिकारे ईत्त्वमादिशेत् ।।५।। अंहोमुचे, अनुमत्त्या, अष्टाकपालः । नत्यक्क्षराद् विसृष्टस् तु रेफङ्ग कुर्याद् विवर्तने । आवर्वरिति रेह्येते(?)कण्ठ्यपूर्वास् तु नित्यशः ।।६।। मयोभूर् वातः, वेन आवः । यक्क्ष्वा ह्येते भुवो ह्येको ज्ञेयो रेफविवर्जितः । अन्न्ये सरेफाꣳ कर्तव्या भुवशब्दाꣳ प्रयत्नतः ।।७।। ऋतावा यज्ज्ञियो भुवः । अकारात् तु पुनꣳ प्रातस् स्वर् भु(व)स् त्वहरहꣳ कः । दोषावस्तरजीगर्तꣳ प्रणेतस् सत्तर(र्व ?)तस् तथा ।।८।। उद्गातꣳ प्रातरुन्मेतर् होतर् नेष्टस् तथैव च । द्वारविभरजागश् च ह्वारभास् सत्तर(?)तस् तथा ।।९।। एते पदविशेषास् स्युꣳ पृथक्त्वेन समुद्धृताः । रेफतꣳ परिहार्यास् स्युर् नित्यन् **चारायणीयके** ।।१०।। अवग्ग्रहं समा-

पाद्द्यम् प्रगृह्य्यन् नैधनानि च । आदरं पदव·····स् तु ऋते दुरोहणादिति ।।११।। अश्श्ववन्तम् वर्धन तत् हरोहणम् । विनते षत्त्वणत्त्वे तु कण्ठ्यव्व्यवहितौ यदि । पृथगेकपदे तौ तु न तत्तरादरमादिशेत् ।।१२।। शुक्तवँ विषजन्ति, अपऽ प्रणयते । स्वयन् तौ रेफलोपस् स्यादुपद्या स्यात् परिग्ग्रहे । स्वर्षा यन् तु सकारेण गुरुणाऽथ विनिर्दिशेत् ।।१३।। ऋते दूरोहणादेव निवृत्तानामतऽ परम् । नैधनावग्ग्रहे स्यातान् तौ तु ज्ञेयौ यथापदम् ।।१४।। दुन्दुभः । प्रथमान्तम् पदयँ यत्तर तृतीयत्त्वम् परिग्ग्रहे । पञ्चमा अ विकारास् स्युरेवमाहुर् मनीषिणः ।।१५।। यज्ज्ञमानुषक् । सर्वेषान् तु स्स्वरादीनायँ यकारे स्स्याद् विवर्तनम् । इकारे ह्रस्स्वदीर्घेण सवर्णेनैव निर्दिशेत् ।।१६।। ऋतवत् पृतवा इहोइतौ । इतिकारपरान् सर्वान् स यँ युक्तान् कामयेद् बुधः । असयँ युक्तमिकारेण न क्क्रमन्ति च्छवर्जिता ।।१७।। इतिकारपरा स्वसामिति स्वसा छायमिव । मोक्क्षपूर्वे नु वा कान्ते प्रक्क्रमान्ते तु सारणा । तौ तु नीचावसानौ चेत् पूर्वे चैव विनिर्दिशेत् ।।१८।। यदक्क्षरन् त्यजेन् मोक्क्षम् पदकाले तु नित्त्यशः । तदेवादर्शयेत् पाठन् नीचस्स्थे ग्रहणे पदे ।।१९।। इतिकारपदम् मोक्क्षं स्वराद्द्यङ ग्रहणम् पदम् । अन्त्यवर्णम् पुरस्कृत्त्य पूर्ववर्णे विनिर्दिशेत् ।।२०।। हन्न्यमाने पदे नीचे पूर्वाङ्गे विनिहन्न्यते । पदवन् नीचपूर्वे स्यान् नीचस् स्यादुच्चपूर्वके ।।२१।। मोक्क्षान्ते स्वरितेत्त्यर्थे वर्णशेषाद् विमोक्क्षणम् । अनुसन्धाने पराङ्गे पदवच् च निहन्न्यते ।।२२।। मोक्क्षान्ते द्विपदवँ वर्णं साधारत्त्वे स्थितयँ यदि । ग्रहणन् तवँ विजानीयात् तत्पूर्वे मोक्क्षणम् भवेत् ।।२३।। मोक्क्षग्ग्रहणसन्धाने स्पन्दनन् दृश्श्यते यदि । स्पन्दनं सारणङ कुर्यात् तत्पूर्वे मोक्क्षणम् भवेत् ।।२४।। स्वरिताद् ग्रहणन् नीचम् पादशेषाद् विमोक्क्षणम् । पदवन् नीचपूर्वस् स्यात् त्रीचेस्(?)स्यादुच्चपूर्वके ।।२५।। मोक्क्षान्ते स्वरितवँ वोच्चं स्वराद्द्यङ ग्रहणम् पदम् । उच्चस्स्थवँ वापि नीचस्स्थवँ वर्णशेषाद् विमोक्क्षणम् ।।२६।। एकारान्तम् पदम् मोक्क्षं स्वराद्द्यङ ग्रहणम् पदम् । एकारे मोक्क्षणङ कुर्यादकारे ग्रहणन् तथा ।।२७।। सविसृष्टे भुवो मोक्क्षमकाराद्द्यम् परम् पदम् । विसृष्टे मोक्क्षणङ कुर्याद् वर्णो(?)वर्णशेषवँ विवर्जयेत् ।।२८।। मोक्क्षणादुच्चकङ गच्छेद् वर्णमाद्द्ये परे पदे । द्वितीयङ ग्राहयेद् वर्णम् मोक्क्षकाले तु नित्त्यशः ।।२९।। पुनरुक्तावसानन् तु स्वरिते दृश्श्यते यदि । ग्रहणमनुदात्ते चेदुदात्ते मोक्क्षणम् भवेत् ।।३०।। अन्तोदात्तादि-

सर्वेषावँ वर्णादिस्स्मरणम् भवेत्। द्विरुदात्तन् तथाद्द्यन् च द्द्वितीये चैव निर्दिशेत् ॥३१॥ ब्रह्मचारी स्वचरिते मेधावी कर्मकृत् तथा। प्रियश् च धनदश् चैव यश् च विद्द्याम् प्रयच्छति ॥३२॥ शरोत्त्रियश् शुश्रूषणश् च श्रद्धावान् प्रश्नकृत् तथा। दमशमसमायुक्तस् तीर्थान्येतानि ब्रह्मणः ॥३३॥ पृथिवीवँ वित्तपूर्णान् त्रिर् दत्त्वा यत् फलमश्नुते। परस्य तपसश् चैव तत्(स्यात्)स्वाद्ध्यायिनि द्द्विजे ॥३४॥ के चित् साङ्ख्येन गच्छन्ति के चिद् योगेन योगिनः। के चिदेव महात्मानऽ क्रमस्स्याद्ध्ययनेन तु॥३५॥सर्वशास्त्रविदो ये च ये च कर्मविदो जनाः। एकार्थभावोपगतास् ते हरिम् प्रविशन्ति वै ॥३६॥ षट्पञ्चाशत् प्रथमे वै त्रिंशच् छ्लोका द्वितीयके। तृतीये त्रिंशव् चैवोक्ता एकेनोनाश् चतुर्थके ॥३७॥ षट्त्रिंशत् पञ्चमे प्रोक्तास् सप्त चत्त्वार एव हि। चत्त्वारिंशदष्टमे वै नवमे तु त्त्रयोदश ॥३८॥ चत्त्वारिंशत् तु दशमे श्लोका वै परिकीर्तिताः। एकत्त्रैव तु विख्यातं श्लोकानान् तु शतत्त्रयम् ॥३९॥ चत्त्वारिंशदधिकवँ वै शास्त्रन् चारायणीयकम्। अमत्सरे इदन् देयम् मत्सरे न कदा चन ॥४०॥ मत्सरे तु भवेद् दत्तन् न्युप्तम् बीजमिवोषरे। य इदम् पठते नित्त्ययँ यश् चाऽप्यद्ध्यापयेद् द्विजम् ॥४१॥ अस्स्यार्थम् बुद्ध्यते यो वै ब्रह्मलोकं स गच्छति ॥ इति चारायणीयशिक्क्षायान् दशमोऽद्ध्यायः ॥ यथाप्सु चरताम् मार्गो मीनानान् नोपलब्ध्यते। आकाशे च विहङ्गानान् तद्वद् धस्हगता श्रुतिः ॥ गीते शीघ्रे अलब्धश् चाल्पभाषश् च षडेते पाठकाधमाः(?)॥ पाठस्स्य तु दशविधा गुणवृत्तिस् तद् यथा रक्तम् १ पूर्णम् २ अलङ्कृतम् ३ प्रसन्नम्४ व्यक्तम् ५ विक्रुष्टम् ६ श्लक्ष्णम् ७ समम् ८ सुकुमारम् ९ म[1]-...

५. कौहलीयशिक्क्षा (कौहडेयशिक्क्षा ?)[2]

अथ शिक्क्षाम् प्रवक्ष्यामि कौहलीय(?)मतानुगाम्। स्वरादिनिर्णयस्

---

१. वस्तुतश् चारायणीयशिक्क्षा दशमाद्ध्यायसमाप्तौ समाप्तैव प्रतीयते। यथाप्सुचरतामित्त्यादिको भागस् तु शिक्क्षान्तरस्स्याऽशोऽवगम्यते।नारदीयशिक्क्षायाऽ प्रथमे प्रपाठके तृतीयायाऽ कण्डिकायाऽ "गानस्स्य तु दशविधा गुणवृत्तिः" इत्त्यादिकऽ पाठऽ प्राप्यते। तस्मादस्माभिरुपबन्धे एतत्सम्बन्धे यदुक्तन् तत् सम्यग् विमृश्यैव ग्राह्यं सुधीभिः। दशमाद्ध्यायान्ते प्रोक्ता श्लोकसङ्ख्या च विमृश्यैव दृश्यते। २. एषा शिक्क्षा साधुराससम्पादिता वैदिकाद्ध्ययनाऽनुसन्धानपत्त्रिकायाम् [J.V.S.] १९३५ तमे क्रैस्ताब्दे मुद्द्रिता।

तत्त्र क्रियते तन् निबोधत ॥१॥ **उदात्तश् चाऽनुदात्तश् च स्स्वरितꣳ प्रचयस् तथा** । इति चत्त्वार भागे(?)हि स्वराꣳ प्रोक्ता मनीषिभिः ॥२॥ उच्चैरुच्चार्यते यस् तु स उदात्त उदाहृतः । आयामो दृढता सौक्ष्म्यङ्गात्त्रेऽङ्गेषु तथा गले । उच्चत्त्वकारकानेतानाहुꣳ प्राज्ञा विशेषतः ॥३॥ नीचैरुच्चार्यते यस् तु सोऽनुदात्तोऽभिधीयते । प्रस्सरता मृदुता स्थौल्यङ्गात्त्रादेꣳ कारकवँ् विदुः ॥४॥ नीचत्त्वे स्वरितꣳ प्रोक्तस् तयोस् सन्धान इष्यते । तस्य तु स्स्वरितस्याऽऽद्द्यमर्धमुच्चैस्तरावँ् विदुः । शेषस्स्याऽर्धस्य नीचत्त्वङ्किन् चित्त्वाद् भृशमिष्यते ॥५॥ के चिदस्यादिमम् भागमुदात्तसदृशवँ् विदु.। अनुदात्तसमश् शेष एतावन्तो द्विधा स्स्मृताः ॥६॥ प्रचयꣳ कत्थ्यते सद्भिरुदात्तसदृशश्श्रुतिः ॥७॥ **स्वारास् सप्तविधा ज्ञेया** वक्ष्यन्ते ते विशेषतः । नित्त्यꣳ क्षैप्प्रोऽभिनिहितꣳ प्रश्श्लिष्टꣳ प्रातिहतस् तथा । पादवृत्तस् तथा तैरोव्यञ्जनस्स्वरितोऽपि च ॥८॥ अणुमात्त्रक इत्त्येके स्वरमन्न्यम् प्रचक्षते । उदात्तादुत्तरो नीचस् सन्धाने स्वरितस् स्मृतः ॥९॥ स्वारोदात्तपरश् चेत् स्यात् तदा निहत इष्यते । स्वरितस्स्याऽस्स्य मन्न्यन्ते प्रज्ञानम् **प्राकृतस्त्विति** ॥१०॥ स्वरितादुत्तरो नीचस् सन्धौ प्रचय इष्यते । बहुत्त्वेऽथ तथा ते स्स्युस् स्वारोदात्तपरो न तु ॥११॥ इवर्णोकारयोस् सन्धौ यवभाव उदात्तयोः । तत्त्र यस् स्वर्यते स्स्वारꣳ **वर्षप्प्र** एष उदाहृतः ॥१२॥ अविकारस् त्वसावेव **नित्त्य** इत्त्यभिधीयते ॥१३॥ ओकारो य उदात्तस् स्यादेकारश् च पदान्तगः । तयोर् यस् स्वरिते सन्धौ निहतेनोत्तरेण तु । एषोऽ**भिनिहिताक्ख्यस्** तु स्वरꣳ प्रोक्तो मनीषिभिः ॥१४॥ एकादिष्ट उदात्तेन नित्त्यꣳ **प्रातिहता**भिधः ॥१५॥ द्वयोरुकारयोस् सन्धावुदात्तपरयोꣳ क्रमात् । तत्त्र यस् स्वर्यते स्स्वारꣳ **प्रश्श्लिष्टस्** सोऽभिधीयते ॥१६॥ तृतीयो वा चतुर्थो वा भागो निहत उच्च्यते । **पादवृत्ताभिधस्** स्वारो विवृत्तौ यꣳ पदस्स्य तु ॥१७॥ **कम्पेषु** प्प्रथमस्स्वारो अणुमात्त्रिक इष्यते । त्रयाणामादितस् तेषु सन्निपातो मिथो यदि ॥ अपरꣳ प्रथमस्स्यार्धन् निहतन् तु विधीयते ॥१८॥ तृतीयो वा चतुर्थो वा भागो निहत इष्यते । प्रश्श्लिष्टस्स्य च सयँ्योगस् तेषामन्न्यतमेन चेत् ॥१९॥ स्वेच्छाप्प्रयोग इच्छन्ति **कम्पन्** तत्त्रापि के चन । अदीर्घन् दीर्घवत् कार्यन् तत्त्र ह्रस्स्वस्स्य कर्षणात् ॥२०॥ अथ स्स्वायम्भुवे काण्डे **कम्पाꣳ** के चिदुदाहृताः । तत्त्रोदात्ताꣳ प्रयोक्तव्या निहतांशस् तु पूर्ववत् ॥२१॥ वीर्यम् बलमिति ह्यत्त्र ह्र-

स्स्वरः कम्प उदीरितः । तन्वा स्वायामितीत्यादि दीर्घः कम्पो विधीयते ॥२२॥ ते अस्मदिति वाक्यांशे कैश् चित् कम्पो न पठ्यते । लक्षणप्रतिकूलन् तद् ब्रुवते केऽपि सूरयः ॥२३॥ ये पदन् न हतङ्क कस्मात् स्यादानर्थक्यमस्य तु। एवम् बहुविधा दोषाः परदृश्यन्ते मनीषिभिः ॥२४॥ अविनीते तु पाठेऽस्मिन् व्यक्तयस् साधुरिष्यते । व्यक्तयो बहुला वेदे दृश्यन्ते स्स्वरवर्णयोः ॥२५॥ उच्च्यन्ते विक्वरमास् तेऽपि विज्ज्ञेयाष् षड्विधा बुधैः । उभयस्स्वरितः कश् चिदुभयोदात्तकः परः । उदात्तपूर्वकस् स्वारपर एकस् तु विद्द्यते ॥२६॥ एकस्य विपरीतोऽन्यस् तथा प्रचयपूर्वकः । परोदात्तस् तथा स्वारपर एव निबोधत ॥२७॥ उभयोस् स्वारयोर् मद्ध्ये निहतो यत्तर दृश्यते । उच्च्यते विक्वरमस् त्वेष उभयस्स्वरिताभिधः ॥२८॥ इतरे विक्वरमा एवमूहनीया मनीषिभिः । प्रयत्नस् स्याद् दृढतरो विक्वरमेष्वेषु सयँयतः ॥२९॥ उदात्तान्न्यनुदात्तानि बहुलानि प्रता चा ?)न्यपि । निरन्तराणि दृश्यन्ते स्वरितस्य न संहतिः॥३०॥ उदात्तास् सहका यत्तर दृश्यन्ते च निरन्तराः । उच्चादुच्चतरन् तेषु क्वरमात् तत्तर विधीयते ॥३१॥ संहतावनुदात्तानान् नीचान् नीचतरवँ विदुः । स्वरितस्य सन्निपाते कम्पस् त्वभिहितः पुरा ॥३२॥ प्रथमान् विक्वरमान् बुद्ध्वा सम्म्यगुच्चारयेदृषिम् । यस् तु विप्रो विशेषेण श्रेयो नित्यमभीप्सति ॥३३॥ नवप्रकारवँ विज्ज्ञेयम् पदानां स्वरलक्षणम् । अन्तोदात्तमथोदात्तमाद्द्यु दात्तमुदात्तकम् ॥३४॥ मद्ध्योदात्तं ह्युदात्तन् च निहतस्स्वरितन् तथा । एकस्स्वरितमित्येताः पदशब्द (पदशय्या ?) नव स्स्मृताः ॥३५॥ स्वरान् हस्तेन विन्न्यस्स्येद् विपश्चिद् दक्षिणेन तु । श्रेयो विपुलमन्विच्छन् न सव्येन कदा चन॥३६॥तेन चेन् निष्फलन् तस्स्य ब्रुवते ते विपश्चितः । अविदोषस् तथा कार्यस् तत एतद् विजानता॥३७॥ कनिष्ठिकाऽनामिका च मद्ध्यमा च प्रदेशिनी नीचस्स्वारधृतोदात्तानङ्गुष्ठाग्रेण निर्दिशेत् ॥३८॥ विन्न्यस्स्य द्विस्स्वरं सौम्म्यम् मद्ध्यमे पर्वणि स्स्पृशेत् । इह कीर्तिमवाप्नोति प्रेत्त्य स्वर्गे महीयते ॥३९॥ अतोऽन्यथा तु यो मर्त्यो निर्दिशेन् मतिमोहितः । स गच्छेन् नरकङ्घोरम् पापयोनिषु जायते ॥४०॥ स्वरविन्न्यासशीलस् तु हस्तेन वेदवित्तमः । यस् तस्स्य गुणदोषौ यौ तत्तर तौ फलदौ स्फुटम् ॥४१॥ ईजानस्स्य यथा तेन दाक्क्षायणसवो मुखः । तस्मात् तत्तराऽवधातव्यं श्रेयो विपुलमिच्छता ॥४२॥ अधीत्त्य विधिवत् पूर्वमृषिमाचार्यतश् शुभात् ।

**अनन्तरम् पदाद्ध्यायꣳ कर्तव्यो धीमता ध्रुवम् ॥४३॥ ततꣳ क्रम-मधीयीत स्वरसंस्कारसयुतम् । एवन् त्वेवाऽधीयानस्य श्रेयो भवति नित्यदा ॥४४॥ यस्याम् पदक्रमा(कृदा ?)त्तरेयो वृत्तिकारस् तु कर्णिनः (कुण्डिनः ?) । तां विद्द्वांसो महाशाखाम् भद्रमश्नुवते महत् ॥४५॥ क्रमो द्वाभ्यामनुक्रम्य प्रत्यादायोत्तरन् तयोः । उत्तरेणैव सन्दद्ध्यादर्धर्चान्तं समापयेत् ॥४६॥ यथालक्षणमव्यग्रयं यथान्यायं समाचरेत् । तर्हि तावत् पदम् पूर्वन् तयोꣳ पदवदुत्तरम् ॥४७॥ आवृत्तिरवसानस्य प्रगृह्यस्य च नेष्यते । आत्तरेयेण तथाप्यत्तर सा तयोस् त्वभिधीयते ॥४८॥ आकारान्तमुदात्तान्तमाङ्परयं यत्तर दृश्यते । त्रिक्रमन् तवं विजानीयान् मोषूण ऊ षु णस् तथा ॥४९॥ त्रिक्रमे वक्ष्यमाणे तु प्रथमे त्रिपदक्रमः । मद्ध्यान्ताभ्यान् ततस् तेषु न विशेषस् ततꣳ परम् ॥५०॥ समन्तानि पदानि स्युर् यानि प्राप्तानि तस्यं तु । पुनस् सुवरकर् होतरमृतराविर् विवश् च कः । अजीगरिति रेफण सहाऽऽयत्ता पदावलिः ॥५१॥ एवङ् क्रममधीयानस् सर्वदोषविवर्जितः । श्रेयꣳ परमवाप्नोति दैवत्वमधिगच्छति ॥५२॥ य इच्छति जटावं वक्तुं स विप्रो वेदवित्तमः । तस्य कीर्तिर् विवर्धेत स वेदफलमश्नुते ॥५२॥ पदद्द्वयमनुक्रम्य व्युत्क्रम्योत्क्रम्य सन्धिमत् । यथावत् स्वरसयुक्तम् प्रयुञ्ज्यात् सा जटा मता ॥५४॥ संहिता प्रकृतिꣳ प्रोक्ता पदस्यैतत् क्रमस्य तु । जटायाꣳ प्रकृतिस् त्वेष इति नित्यन् निबोधत ॥५५॥ जटायावं वक्ष्यमाणायाङ् कम्पसन्धिस्स्वरादयः । अवधाय प्रयोक्तव्या निपुणन् तदुदीरितम् ॥५६॥ प्रातिशाक्ख्यादिशास्त्रज्ज्ञस् सर्वशिक्षाविशारदः । बुद्धिशक्तिसमेतो यस् स जटावं वक्तुमर्हति ॥५७॥ यदधीतमविज्ज्ञातन् निगदेनैव शक्यते (शब्द्यते ?, । अनश्नाविविशु ·· (अनग्नाविव शुष्कैधो ?) ततो (न तज् ?) ज्वलति कस्य चित् (कर्हि चित् ?) ॥५८॥ तिस्रस् तु वृत्तयो वाचो द्रुतमद्ध्यविलम्बिता । प्रयोज्ज्या नियतवं वेद एवम् प्राज्ज्ञाꣳ प्रचक्षते ॥५९॥ अन्न्यत्त्वयं यदि वृत्तीनाङ् कर्मणामत्तर भिन्ता । वृत्तिम् प्रति विशेषस् तु मात्तराया भिद्द्यते ध्रुवम् ॥६०॥ अभ्यासार्थे द्रुतावं वृत्तिम् प्रयोगार्थे तु मद्ध्यमाम् । शिष्याणामुपदेशार्थे कुर्याद् वृत्तिवं विलम्बिताम् ॥६१॥ वेदक्रमो (वेदकामो?) द्रुतावं वृत्तिम् बुद्धिकामस् तु मद्ध्यमाम् । कुर्वीत वेदविवृतिं (वेदविद् वृत्तिं ?) स्वर्गकामो विलम्बिताम् ॥६२॥ आसुरादिप्रमाद्द्याश्चेद् दुर्गतिवं विपरीतकः । यदन्न्यन् नियतयं याति विद्द्यादेव ततो

द्विजः ।।६३।। तत्तरैवम् मन्वते केचित् सर्वशास्त्रविशारदाः । मद्ध्यमैव प्रयोक्तव्या निपुणत् तदुदीरितम् ।।६४।। स्वराक्षरसमानानावँ वृत्तिवेदप्रवर्तिनाम् । मात्तरायाः कथनङ्क कर्तुङ्क कैर···ण्येन शक्यते ।।६५।। तस्माद् वृत्तिः प्रयोक्तव्या मद्ध्यमा वेदवित्तमैः । एवं सुसंस्कृतन् नित्यम् प्रयुक्तम् ब्रह्मम राजते ।।६६।। **क्रमविक्रमसम्पन्नामद्द्रुतामविलम्बिताम् । नीचोच्चस्स्वारसम्पन्नावँ वदेद् धृतवतीं समाम्** ।।६७।। बहुशो मन्यते **मात्तरालक्षणन्** तन् मनीषिभिः । तेषुतेषु वेव कार्येषु प्रग्रहः···।।६८।। एकद्वित्त्रिक्रमेणैव मात्तराकालम् मनीषिणः । शब्दैर् निदर्शयन्त्यत्तर चाषकाककलापिनाम् ।।६९।। एवम् बहुविधम् **मात्तरालक्षणम्** ब्रुवते बुधाः । तत्तरतत्तर प्रबोद्धव्यमात्मनश् श्रेयमिच्छता ।।७०।। ब्रह्मम्मणः **प्रणवङ्** कुर्यादादावन्ते च सर्वदा । स्रवत्त्यनोङ्कृतम् पूर्वम् परस्ताच् च विशीर्यते ।।७१।। प्रणवाद्द्यास् सर्ववेदाः प्रणवोपरि च सस्थिताः ·· । प्रणवस् तु सदा कार्यो वेदारम्भे मनीषिभिः ।।७२।। अद्ध्यर्ध··· तयो योऽस्य तन्नादस् त्वेकमात्त्रिकः । त्रासुरर्धर्धवँ (?)वा द्वयन् तथा ··· ।।७३।। वेदस्थप्रणवे तु स्स्यात् समकारो द्विमात्रिकः । स्वरमात्तरन् द्विमात्तरवँ वा व्यञ्जनन् त्वणुमात्त्रिकम् ।।७४।। **काण्डप्रश्नानुवाकानां समाप्तौ काल इष्यते । दशाष्टपञ्चमात्तरास् स्युस् तन्तराणाञ् च तत्र्यहम् भवेत्** ।।७५।। विश्श्रमो न समासस्य··· । मद्ध्ये तु पदवाक्ये वा अदृष्टार्थो निषिद्ध्यते ।।७६।। **रेफस्य ऊष्मसयँयोग एष याति स्स्वरात्मताम् । ··· समानकरणरूपभाक्** ।।७७।। **ऋकार आदिरणुमात्तरो मद्ध्ये रेफोऽर्धमात्त्रिकः । अणुमात्तरस् तथाऽन्त्यांशो मद्ध्ये भक्तिर् विधीयते** ।।७८।। अनुस्स्वा · सयँयोगादिर् यदि स्स्थितः । ओष्ठ्यस्स्वरान्ते चाऽप्यैवन् निपुणन् तन् निबोधत ।।७९।। अ ·· र्योर् विद्द्यते यव्य तद्वियाम् प्रय ·· । शास्त्रमेतत् त ··· । ···सव्व ऋषिरस्य प्रसिद्ध्यति ।।८०।। शिक्षामिमान् तु योऽधीते वेदतत्त्वप्रकाशिकाम् । अतुलामश्नुते कीर्तिम् परे (ब्रह्मम्मणि लीयते) ।।८१।। **इति कौहलीयशिक्षा समाप्ता ।**

६. सर्वसम्मतशिक्षा[1]

गणेशवँ वरदन् देवम् प्रणिपत्त्य गजाननम् । द्वित्त्वादीनाम्

---

१. पूर्वममुद्दरितैषा शिक्षा दिल्लीस्थसरस्वतीविहारपुस्तकालयात् प्राप्ता । पूर्वम् मुद्दरिता सर्वसम्मतशिक्षाऽन्न्यैवेति तद्दर्शटारः।

प्रवक्ष्यामि लक्षणं सर्वसम्मतम् ।।१।। स्वराद् द्वित्त्वमवाप्नोति व्यञ्जनवँ व्यञ्जने परे ।।२।। स्पर्शो लकारपूर्वो यो ल(व ?)पूर्वश्च द्द्विरुच्यते ।।३।। स्वरपूर्वस्य रेफस्य परस्ताद् व्यञ्जनं स्थितम् । आपद्द्यते द्विवर्णन् तद् वर्णमात्त्रे परे सति ।।४।। सयँयोगादिरियाद् द्वित्त्वमनुस्स्वारात् परस्स्थितः ।।५।। अनुस्स्वारो द्विरुच्येत सयँयोगे परतस् स्थिते ।।६।। ह्रस्स्वपूर्वौ नङौ द्वित्त्वमापद्द्येते **पदान्तगौ** । अपि स्स्वरोत्तरावेव श्श्लिष्टे भवति नाऽन्यथा ।।७।। **इति द्वित्त्वप्रकरणम्** । यत्त्र येन निमित्तेन द्वित्त्ववँ व्यञ्जनमश्नुते । द्वितीयस्य चतुर्थस्य तेन **पूर्वागमो** भवेत् ।।१।। परमात्त्यातिभूते च ह्युपसर्गाश् च धाम च । पाथ एष च पूर्वेषु पूर्वञ् छखिभुजा इयुः ।।२।। कुत्त्र चित् स्वरयोर् मद्ध्ये द्वित्त्वलँ लक्ष्यानुसारतः । पूर्वागमस् तथा तत्त्र ज्ञेयो वर्णविचक्षणैः ।।३।। **इति पूर्वागमप्रकरणम्** ।। अघोषादूष्मगो ह्यूर्ध्वं स्पर्शमात्त्रे समास्स्थिते । सकृत् तत् त्स्पर्शसस्स्थानस् तन्मद्ध्ये प्रथमागमः ।।१।। **पदान्तस्स्याऽपदान्तस्य सषयोऽ परभूतयोः** । प्रथमस्य द्द्वितीयत्त्वमपदान्तस्य शोत्तरे ।।२।। प्राप्तौ यत्त्र निवर्तेत द्वित्त्वन् तदधुनोच्यते ।।३।। स्वरेब्भ्यऽ प्रथमात् पूर्व ऊष्मा चैव विसर्गरौ ।।४।। अनुत्तमात् सवर्गीयात् सवर्णात् पूर्वतस् स्थितः ।।५।। हशस्स्पर्शपरो लश् च वश् च स्स्पर्शपरस् तथा ।।६।। नकारश् च पदान्तस्स्थो यवहात् पूर्वतस् स्थितः ।।७।। एवमूष्मादयो वर्णा उक्ता द्वित्त्वविवर्जिताः ।।८।। **ऋषिभिर् बहुधा प्रोक्तवँ वेदविद्भिस् तथापि हि । अद्ध्येतृभिस् समस्तैस् तु यद् गृहीतन् तदीरितम्** ।।९।। ङकारादपदान्ताद् वै तधयोऽ परभूतयोः । यथाक्रमङ कगौ स्यातामागमाविति निर्णयः ।।१०।। स्पर्शानायँ यवलानाञ् च मकारऽ पूर्वतस् स्थितः । तेषामत्राप्नुयाच् छ्लिष्टे सवर्णमनुनासिकम् ।।११।। ङात् को भवेट् टनात् तस् तु सषयोऽ परभूतयोः ।।१२।। **शपूर्वस्य नकारस्य त्रकारस् तैत्तिरीयके** ।।१३।। **तकारश् शनयोर् मद्ध्ये काठके परिकीर्त्यते** ।।१४।। अनूष्मप्प्रकृतेस् स्पर्शादुत्तमेऽनुत्तमाद् **यमान्** । वर्णयन्त्यानुपूर्व्येण वर्गक्रमविचक्षणाः ।।१५।। इदानीं ह्रस्तविन्न्यासभेदोच्चारणसिद्धये । अनुक्तानामुदात्तादिवर्णानां सिद्धयेऽपि च ।।१६।। **व्यञ्जनं स्यात् परस्स्याऽङ्गम् पूर्वस्स्याऽवसितम् भवेत्** ।।१७।। परायुक्तमनुस्स्वारो योगादिर् भक्तिरेव च ।।१८।। असवर्णम् परस्स्याऽङ्गमन्तस्थापरमक्षरम् ।।१९।। पराङ्गोष्मपरस्स्पर्शो यमश् चैवाऽङ्गनिर्णयः ।

॥२०॥ स्वरोत्तरोष्मणः पूर्वरेफस्य **स्वरभक्तिता** ॥२१॥ ऋकारस्य स्वरूपन् तद् बुद्ध्वा बोद्धुं हि शक्यते। स्वरभक्तिमतो विद्द्याद्दकारमिह विस्तरात् ॥२२॥ **ऋकारस्य स्वरूपं हि श्लिष्टम् पादचतुष्टयम्** ॥२३॥ पादेषु तेषु विज्ज्ञेयावादावन्ते स्वरात्मकौ। अणू रेफस्य मद्ध्ये द्वौ विज्ज्ञेयौ व्यञ्जनात्मकौ ॥२४॥ स्वरात्मकेन पादेन ह्युत्तरेणोत्तरन् तथा ॥२५॥ स्वरपादान्वितौ भागौ स्वरभक्तिरितीरितौ ॥२६॥ **हकारे पूर्वभागस् स्यादुत्तरश् शषसेषु च** ॥२७॥ **हकारे सर्वं वृतावं विद्द्याद् विवृतामितरत्तर तु** ॥२८॥ पूर्वस्स्वरस्य चाऽल्पत्वमितत्वमुतत्वमिति त्तरयम्। एतत् त्रयवं विसृज्ज्यैव स्वरभक्तिं समुच्चरेत् ॥२९॥ स्वरभक्तिः परात् स्वारात् प्रचयत्त्वमवाप्नुयात् ॥३०॥ स्वारे दीर्घे तु नाऽनृत्या या स्वतन्तरा धूर्षदम् भवेत् ॥३१॥ कामो मन्न्युस् तथा पापन् त्रिषु पू वेष तत्त्वतः। स्वरभक्तिवं विजानीयादिकारो नैव सम्भवेत् ॥३२॥ पुपूपौ त्रिषु पूर्वेषु शषहेषु परेषु च। रेफादुकार एव स्स्यात् स्वरभक्तिर् न विद्द्यते ॥३३॥ अकारिषन् च णः पूर्वा रिरीषो रीरिषन्नपि। तारिषस् तारिषच् चेत् स्यात् स्वरभक्तिर् न विद्द्यते॥३४॥ हशोत्तरो लकारश् च प्राप्नुयात् स्वरभक्तिताम् ॥३५॥ करेणुः कर्विणी ··· ॥ करेणू ··· ॥ हरिणी ··· ॥ या तु हंसपदा ··· ॥३७॥ **वासशब्दादनुस्स्वारः पूर्वस्स्थाङ्न् न काठके** ॥३८॥ न ह्यूष्मप्रकृतिस् स्परशः पूर्वाङ्गत्त्वमवाप्नुयात् ॥३९॥ **अङ्गप्रकरणम्** ॥ उदात्तादिस्स्वराधारवर्णानामिह संस्थितेः। प्रोच्यते स्वरसंस्थानमज्ज्ञानाञ् ज्ञानसिद्धये ॥१॥ **यदेतद् देहदीर्घत्वमङ्गानान् दृढता च या। कण्ठाकाशस्य कृशता निमित्तान्न्युच्चजन्मनि** ॥२॥ ह्रस्स्वत्त्वयं यच् च देहस्य त्त्वङ्गानाम् मृदुता च या। कण्ठाकाशमहत्त्वञ् च नीचजन्मनि हेतवः॥३॥ कारणं स्वरितोत्पत्तौ समाहारोऽनयोर् भवेत् ॥४॥ **उदात्तश्श्रुतिरेवेति प्रचयस्स्य प्रसिद्धता**। उच्चात् परोऽनुदात्तो यस् स्वरितत्त्वमवाप्नुयात्। तैरोव्यञ्जनसञ्ज्ञोऽयमुच्चपूर्वः प्रकीर्तितः ॥५॥ **अमुञ् च पादवृत्तञ् च वदेदल्पतरम् बुधः** ॥६॥ विवृत्त्याम् पदयोर् यस् तु पादवृत्तः प्रकीर्तितः ॥७॥ स प्रातिहतनामा स्स्यात् स्वर्यते यस् तु सांहिते ॥८॥ **अत्त्यन्तमार्दवन् तत्तर कार्यं स्वरविचक्षणैः** ॥९॥ पादवृत्त-हतौ स्यातान् तैरोव्यञ्जनबाधकौ ॥१०॥ हतस् सर्वावशब्दाब्भ्यान् न हि प्रत्त्ययबाधकः। स्वरितादनुदात्ताश् च प्रचयत्त्वमवाप्नुयुः ॥११॥ स्वरितोदात्ततयोर् यत्तर परत्तर स्स्थितयोस् सतोः।

स्वरितो न भवेत् तत्तर प्प्रचयश् च निवर्त्यते ।।१२।। एदोद्भ्यायँ यत्तर लुप्तस् स्यादकारस् तत्स्वरादिह । स्वरान्तरविधिवँ वक्क्ष्ये पूर्ववर्ण-स्स्य विस्तरात् ।।१३।। लुप्ताकारोऽनुदात्तश् चेत् पूर्वोच्चस्स्वरितो भवेत् ।।१४।। **एषोऽभिनिहितो ज्ञेयो वदेद् दृढतरम् बुधः** ।।१५।। इवर्णो-कारयोस् स्थाने यवत्त्वे सत्त्युदात्तयोः । तस्मात् परं हि यन् नीचं स्वरितस् तस्स्य वै भवेत् ।।१६।। नाम्ना तु क्क्षेप्प्र एव स्स्यादमुन् **दृढतरवँ वदेत्** ।।१७।। उकारादुच्चकान् नीचे ह्युकारे चोत्तरस्स्थिते । ऊकार× क्रियमाणोऽत्तर स्वरितस् सन्धितो भवेत् ।।१८।। प्रश्श्लिष्टो-ऽप्प्युपदिष्टोऽयवँ **वदेन् मृदुतरम् बुधः** ।।१९।। सयवं स्वर्यते यत्तर पद-स्स्थन् नीचपूर्वकम् । अपूर्ववँ वा स नित्त्यस् स्याद् **वदेद् दृढतरम् बुधः** ।।२०।। पदान्तरोच्चपूर्वोऽपि नित्त्य एव च नाऽन्न्यथा ।।२१।। उक्त-लक्क्षणशून्न्यो यस् स्वर्यते कुत्तर चिद् यदि । **अल्पवायुर् भवेत् सोऽपि** पादवृत्त इतीरितः ।।२२।। नादाऽनुस्स्वारयो× पूर्वं स्वरस् स्वरितभाक् स्थितः । न ह्य्याक्क्षेपस् स्वरे तत्तर नादेऽनुस्स्वार एव सः ।।२३।। **विरामे पञ्चमानान् तु नादसञ्ज्ञा प्रकीर्तिता** ।।२४।। यत्तरैको मद्ध्यको नीचो **विक्क्रमस्** स उदाहृतः । **स्वरितवँ विक्क्रमञ् चैव वदेद् दृढतरम् बुधः** । स्वरिते परभूते च स्स्वरितस्स्योत्तरार्धकम् । नीचङ्ग कुर्यात् **सक्रमपश् च** यथादीर्घन् तमुच्चरेत् ।।२५।। द्वयोरेकम् भवेद् यत्तर तत्तरापि स्स्वर उच्च्यते ।।२६।। **तयोरेकोऽनुदात्तश् चेदुच्च एव तयोर् भवेत्** ।।२७।। **स्वारानुदात्तयोर् योगे स्वरितस् तत्तर वै भवेत्** ।।२८।। एकोदात्तम् पदञ् ज्ञेयमुदात्तद्द्वितयम् पदम् ।।२९।। त्र्यु दात्तवँ वा पदवँ विद्द्यान् नित्त्यस्स्वारमथापरम् । सर्वानुदात्तमथ वा पदानाङ्ग कुत्तर चित् पदम् । स समासस् त्र्यु दात्तस् स्यादेकोदात्तद्द्व्युदात्तयोः ।।३०।। यदेष्ष्वन्न्यद् धि तन् नीचमेवमेव **पदस्स्थितिः** । एवं शिष्टैरभिहितं स्वरूपवँ वैदिकस्स्य तु ।।३१।। परस्तात् पदकालोऽयम् पूर्वोच्चारण एव हि । नोपसर्गोऽ-वसानस्स्थो नीच× पूर्वस् तथा द्वयोः । त्रिषु मद्ध्यस्स्थितन् चैव ह्य-वानोऽवग्ग्रहस् तथा ।।३३।। **प्रापावान्न्वभिपर्य्युत्सु व्व्यतिन्न्यद्ध्यप्प्युप प्प्रति । निस् सम् परोपसर्गास् स्युस् सप्ताऽत्तर द्द्वादश स्स्मृताः** ।।३४।।मास्तान् महित्त्वना नाकम् प्रिय धा विशतो षु णःमो षू णश् चार्-यमा याति पूषा धत्ताऽप्प्यधत्त यत् ।।३५।। दक्विषणावर्ततोत्त्या प्प्र ऋचा सादयतीति च । भूत्वा हरश् च मा वृक्क्षि भूता विश विश इत्त्यपि ।।३६।। कृत्वा हरति धत्ते च लभते त्रिक्क्रमास् स्मृताः । दद्ध्ना तनक्ति

चोद्गाता रोहतीति च विंशतिः ॥३७॥ आकारान्तमुदात्तान्तमाङ्परयँ यत्तर दृश्यते । तिरक्करमन् तवँ विजानीयान् मू(?)पू ण ऊ पु णस् तथा ॥३८॥ संहितावत् करमे पूर्वम् परम् पदवदुच्चरेत् ॥३९॥ करमे त्यक्तम् परगृह्यन् तदिति मद्ध्यन् द्विरुच्चरेत् । इङ्गयन् च यत् करमे त्यक्तमवसानन् द्विरुच्चरेत् ॥४०॥ अन्तस्स्थाव्भ्यः पवर्गाश् च स्वरेव्भ्यः पूर्वतस् स्थितौ । तिरष्टुक् छन्दस् तथाऽनुष्टुक् ककारान्ताविरीरितौ ॥४१॥ अन्यत्तर तु पकारान्तावेताविति च निश्चितौ ॥४२॥ पूर्वस्स्य तु विधेस् तत्तर वैपरीत्यमिति स्स्थितिः । वर्णद्द्वये विरामो वा स्वरयोर् मद्ध्य ओष्ठयोः । पूर्ववर्णप्परयत्नेन न वदेदुत्तरम् बुधः ॥४३॥ ओकारे परभूते च वकारे चाऽधरस्स्य च ॥४४॥ हकारमौरसवँ विद्द्यादन्तस्स्थासु परासु च ॥४५॥ उत्तरे(मे)षु परेप्वेवन् नासिक्क्यत्त्वमिहाऽधिकम् ॥४६॥ नासाब्भ्यान् नोत्सृजेद् वायुमत्त्यन्तं हमसङ्गमे ॥४७॥ न वदेदुरसात्त्यन्तमन्तस्स्थाभिश् च सङ्गमे ॥४८॥ प्लुतो वर्णः पदान्तस्स्थो नासिक्क्यो रङ्गसञ्ज्ञकः ॥४९॥ चत्त्वारः काठके रङ्गा दीर्घा ह्यारण्यके विदुः ॥५०॥ पञ्च रङ्गाः प्लुता दीर्घाश् चत्त्वारस् तैत्तिरीयके ॥५१॥ श्लोकाँ सुमङ्गलाँ यद्घ्राँ उपहूतौँ ममाँ प्लुताः ॥५२॥ दीर्घास् ताँ इमि देवाँ उ स्स्वाँ अहम् ममूवाँ अवा ॥५३॥ नित्त्या भवन्ति नासिक्क्या अनुस्स्वारोत्तमा यमाः ॥५४॥ अन्तस्स्थाश् च हकारश् च स्वराश् चैव निमित्ततः ॥५५॥ स्वराणामूष्मणाञ् चैव प्रयत्नो विवृतस् स्मृतः ॥५६॥ सवँ वृतत्त्वमकारस्स्य विशेषोऽयवँ विधीयते ॥५७॥ स्पर्शानां स्पृष्टतावँ विद्द्यादन्तस्स्थास्स्वीषदीरिता ॥५८॥ नेमिवत् स्पृष्टता ज्ञेया चतुर्थेषु विचक्क्षणैः ॥५९॥ स्पर्शनायँ यत्तर सयँयोगः पाठे यदि भवेत् तदा । तयोरादेश् श्रुतिर् नास्ति विरामव्यञ्जनस्स्य च ॥६०॥ पदान्ते चोत्तरस्स्यादावेकवर्गेऽवसानगे । पूर्ववर्णप्परयत्नेन न वदेदुत्तरम् बुधः ॥६१॥ ओमः पवर्गसयँयोगे प्रयत्नो नेष्यते पृथक् ॥६२॥ विरामो मात्त्रिकस् तत्तर ततोऽन्यत्तर द्द्विमात्त्रिकः ॥६३॥ संहितायाञ् च पदवत् कार्यवँ यत्तर सांहितम् । प्रकृतिस् सा तु विज्ज्ञेया ज्ञानादेव फलम् भवेत् ॥६४॥ आद्विवर्णे चतुर्थे च सप्तमे दशमे तथा । द्वादशे च स्स्वरेष्वेषु मात्त्राकालः प्रकीर्तितः ॥६५॥ द्वितीयः पञ्चमश् चैव ह्यष्टमैकादशौ तथा । त्रयोदशाद्द्याश् चत्त्वारो द्विमात्त्राः परिकीर्तिताः ॥६६॥ नवमस्स्य तृतीयस्स्य षष्ठस्स्य प्प्लुतता भवेत् ॥६७॥ त्रिपादवालँ लकारस् स्यात् पञ्चमानान्

तु केवलात् । दीर्घात् प्लुताच् च कालो हि मात्त्रिकः परिकीर्तितः ॥६८॥ पञ्चमानान् द्विमात्त्रत्वं ह्रस्स्वस्स्योपरि तिष्ठताम् ॥६९॥ विवृत्तौ पदयोर् मद्ध्ये एकमात्त्रः प्रकीर्तितः ॥७०॥ पदमद्ध्येऽर्धमात्त्रा स्याद् विवृत्ताविति निश्चयः ॥७१॥ ह्रस्स्वादिर् **वत्सानुसृतिरन्ते वत्सानुसारिणी । पाकवत्त्युभयह्रस्स्वा उभयदीर्घी पिपीलिका** ॥७२॥ पदमद्ध्ये विवृत्तत्त्वम् भाष्यकारेण तस्स्य च । सामर्थ्यविहितः कालो मात्त्रार्धम् प्रगृह्यहेषु च ॥७३॥ प्रगृह्यहेङ्ग्यप्प्रयुक्तत्त्वात् पादैकत्त्वमिति स्स्फुटम् ॥७४॥ कुर्वन्त्यद्ध्ययनं सर्वे पदैक्यम् परिगृह्य्य च ॥७५॥ नो चेत् सङ्ख्यातिरिक्तमृचिवत् (?)पदवच् च तत्॥७६॥ अवसाने द्विमात्त्रत्त्वम् पदानामिति निश्चयः ॥७७॥ अनुस्स्वारस्स्य मात्त्रत्त्वं सयँ्योगे परतस् स्थिते । **अन्यत्त्राऽद्ध्येतृभिस् सर्वैर् द्विमात्त्रः परिकीर्तितः।अनुस्स्वारो द्विमात्त्रस् स्याद् रेफोष्मसु परेषु च । सयँ्योगे परभूते स्यान् मात्त्रिकस् तु द्द्विरूपवत्** ॥७९॥ ओष्ठ्ययोस् स्वरयोर् मद्ध्ये सयँ्योगादिर् यदि स्स्थितः । विसर्गात् क्षपरादूर्ध्वमुभयत्त्राऽर्धमात्त्रिकः ॥८०॥ इ-लमद्ध्ये(?)तु कालस्स्य मात्त्रार्धम् परिकीर्तितम् ॥८१॥ अर्धमात्त्रा भवेद् भक्तिर् वाक्क्यान्तेऽद्ध्यर्धमात्त्रता ॥८२॥ अवगृह्यावसाने तु मात्त्राकालः प्रकीर्तितः ॥८३॥ ऋगर्धयोस् त्रिमात्त्रत्त्वमवसाने समीर्यते ॥८४॥ नासिक्क्यो व्यक्तिमद्ध्यस्स्थस् सपादो मात्त्रिको भवेत् ॥८५॥ समाप्तावनुवाकस्स्य मात्त्राणाम् पञ्चकं स्मृतम् ॥८६॥ अष्टौ दशेति विज्ज्ञेयम् प्रश्ने काण्डे यथाक्रमम् ॥८७॥ तन्त्राणां हि समाप्तौ(तु) त्र्यहः काल ·· इष्यते (इहेष्यते) ॥८८॥ वेदस्स्योपक्रमे विद्द्वानवसानेऽप्प्यतन्द्रितः । उच्चरेत् **प्रणवम्** ब्रह्मम रक्क्षायै छन्दसां स्फुटम् ॥८९॥ आदावनुक्ते स्रवति परस्ताच् च विशीर्यते ॥९०॥ **यजुःप्रणव उच्चस् स्यात् स्वारास् स्युस् त्वोन् तदादिषु** ॥९१॥ प्रारम्भकश् चतुर्मात्त्रो वेदस्स्थस् स्यात् तदर्धकः ॥९२॥ अद्ध्यायान्त्योऽनुवाकान्त्यः कर्पाद्द्व्यश् च त्त्रिमात्त्रिकः । प्रारम्भाद्द्व्यः क्रमान् नादो मात्त्राणुद्द्व्यणुमात्त्रिकः॥९३॥ वेदस्स्थप्प्रणवे तु स्स्यात् समकारे द्द्विमात्त्रता ॥९४॥ अस्स्वरवँ्व्यञ्जनन् नित्त्यमणुमात्त्रम् प्रयुज्ज्यते । संसर्गाच् चेति बाहुल्यान् मात्त्रा वृद्धैः प्रकीर्तिता ॥९५॥ चाषो रौत्त्येकमात्त्रं हि द्विमात्त्रत्त्वन् तु वायसः । त्रिमात्त्रं हि शिखी रौति **ह्येतन् मात्त्रादिलक्षणम्** ॥९६॥ विलम्बितन् द्रुतम् मद्ध्यवँ् **वाचस् तिस्रो हि वृत्तयः।**

कर्मान्न्यत्वम् प्रति वृत्तौ कालान्न्यत्वम् भवेत् स्फुटम्।उक्तऽ प्रयत्नो यो यस्य समस् सर्वत्तर तस्य मः । **प्रयत्नसाम्यमेतद् धि वृत्तिसाम्यन् तदुच्यते** ।।९७।। उपक्रमे यया वृत्त्या पठेत् तावत् तथैव हि । यावद् विराममेतद् यद् वृत्तिसाम्यन् तदुच्यते ।।९८।। आश्शिरत्त्य मद्ध्यमावँ् वृत्तिङ्ग कालानान् निर्णयऽ कृतः । प्रातिशाक्ख्यादिशास्त्रेषु यस्मात् सैव समाश्शिरता।।९९।।**विक्वरमऽ** पदमद्ध्ये च नेङ्ग्यमद्ध्ये विधीयते। वाक्क्यान्ते च पदान्ते च **विक्करमस्** तु विधीयते । नित्त्यम् प्राक्पदसम्बन्धन् चाद्धिङ कुर्याद् विचक्क्षणः । परेण नित्त्यं सम्बन्धङ कुर्यात् प्रादिन् तथैव च।।१००।।गीती शीग्घ्री ··।।१०१।। सुव्व्यक्तमक्क्षरयँ् यच् च माधुर्ययँ् यच् च सयँ्युतम् । सुव्व्यक्तश् च पदच्छेदो यच् च धैर्यसमन्वितम् ।।१०२।। लये समर्थता या च स्वरनिर्मलता च या । **षट्सङ्ख्यका गुणा ह्येते विहिताऽ पाठकस्स्य वै** ।।१०३।। उद्गात्तो ब्रह्मजातिः ····· ।।१०४।। वर्गाणाम् प्रथमा वर्णास् स्वराश् च **ब्रह्मजातयः** । द्वितीयाश् च ·· ।।१०५।। अन्तस्स्थाश् चोत्तमा ·· ।।१०६।। **गोकर्णाकृतिहस्ते हि निर्दिशेद् दक्क्षिणे स्स्वरम्** । निवेश्य दृष्टिं हस्ताग्रे शास्त्रार्थमनुविन्तयन् ।।१०७।। अङ्गुलीषु च सर्वासु नयेदङ्गुष्ठमेव तु । शिरऽ कम्पवँ् विहायैव स्वरन्न्यासो विधीयते ।।१०८।। कनिष्ठानामिकामद्ध्यातर्जनीमद्ध्यपर्वसु । नीचस्स्वारधृतोदात्तान् क्रमेणैव विनिर्दिशेत् ।।१०९।। पदान्तस्स्य स(न)कारस्स्य यवहेषु परेषु च । तयोर् नकारयाद्द्योश् च सयँ्युक्तत्त्वन् न विद्द्यते ।।११०।। **उच्चारणेषु वर्णानां सामग्र्यं चेतावदीरिता । अन्न्यूनानतिरिक्तस् सन्नुच्चरेद् ब्रह्मम भक्तितः** ।।१११।। व्याग्घ्री यथा हरेत् पुत्त्रम् ·· ।।११२।। नातिव्व्यक्तन् न चाव्व्यक्तमेववँ् वर्णानुद्धिङ्गयेत् । पयऽपूर्णमिवाऽमत्त्रं हरन् धीरो यथामति ।।११३।। उच्चरेत् परया भक्त्या सर्वकालमतन्द्रितः । **यज्जातिस्स्खलनन् तेषान् तज्जातिहननयँ् यतः** ।।११४।। हस्ताद् भ्रष्टस् स्वराद् भ्रष्टो वर्णात् कालात् तथाऽर्थतः । प्रयोगाच् च परिभ्रष्टो न वेदफलमश्नुते ।।११५।। हस्तहीनन् तु योऽधीते स्वरवर्णाऽर्थवर्जितम् । ऋग्यजुस्सामभिर् दग्धो वियोनिमधिगच्छति ।।११६।। मन्त्रो हीनः ··· ।।११७।। **स्वरवर्णान् स्फुटम् मत्त्वा सम्यग् यश् च समुच्चरेत् । अब्भ्युत्कृष्टफलन् तस्य तत्त्रतत्त्र समीरितम्** ।।११८।। हस्तेन वेदयँ् योऽधीते स्वर–वर्ण–ऽर्थ–सयँ्युतम् । ऋग्यजुस्सामभिऽ पूतो ब्रह्मलोके महीयते ।।११९।। पदक्रम··· ··· ।।१२०।।

सूर्यदेवबुधेन्द्रस्य नन्दनेन महात्मना । प्रणीतङ्ग केशवार्येण लक्क्षणं सर्वसम्मतम् ॥१२१॥ इति सर्वसम्मतशिक्क्षा ॥

७. पारिशिक्क्षा[1]

प्रणिपत्त्य जगन्नाथवँ वासुदेवं सनातनम् । गणाधिपङ्ग गिरान् देवीं शिक्क्षावँ वक्क्ष्ये यथामति ॥१॥ **अथ वर्णसमाम्नाय उच्यते याजुषोऽत्तर तु** । स्वरान् स्पर्शास् तथान्तस्स्था ऊष्माणश् चाऽथ दर्शिताः ॥२॥ विसर्गानुस्स्वारङ्गाश् च नासिक्क्याऽ पञ्च चोदिताः । ह्रस्स्वदीर्घप्लुतावर्णेवर्णोवर्णा ऋऋॄ च । एदैदोदौदिति ज्ञेयाष् षोडशेहादितश् स्वराः ॥३॥ कखौ गघौ ङ-चछजा झञौ टठडढा णतौ । थदौ धनौ पफबभा मस् स्पर्शाऽ पञ्चविंशतिः ॥४॥ यरौ लवौ चतस्स्रोऽन्तस्स्थाश् च ऽकशषसऽपहाः । षडूष्माणो विसर्गोऽनुस्स्वारो ङो नास्स्यपञ्चकम् ॥५॥ आदितो नव वर्णास् स्युस् समानाक्क्षरका इह । अन्वर्थत्वम् महासञ्ज्ञा व्यञ्जन्त्यर्थान्तराणि च ॥६॥ पूर्वाचार्यैरतस् तास् तु सूत्तरकारेण चाऽऽशश्रिताः । ह्रस्स्वदीर्घे सवर्णेऽसो द्वेद्द्वे न प्प्लुतपूर्वकम् ॥७॥ **स्वराष् षोडश तस्स्यादौ शेषो व्यञ्जनसञ्ज्ञकः** ॥८॥ यस् स्वयं राजते तन् तु स्स्वरमाह **पतञ्जलिः** । उपरिस्स्थायिना तेन व्यङ्ग्यवँ व्यञ्जनमुच्यते ॥९॥ स्पर्शास् स्युर् व्यञ्जनेष्ष्वाद्द्याऽ पञ्चविंशतिरीरिताः । पराश् चतस्स्रस् त्वन्तस्स्थाष् **षडूष्माणस् ततऽ परे** ॥१०॥ प्रथमाद्द्याऽ क्रमात् सञ्ज्ञा उत्तमऽ पञ्चमस्य तु ॥११॥ पूर्वागमो ह्यत्तर भवेद् द्वितीय-चतुर्थयोश् चैव यथाक्क्रमेण । ये ते त्रयस् तत् प्रथमन् तृतीयं स्यादुत्तमा ···सति नाऽऽनुपूर्व्यात् ॥१२॥ विसर्गोष्ठद्द्वितीयास् स्युरघोषाऽ प्रथमा न हः । पर्यान्वद्ध्यभिविप्प्रति प्प्रावोपेत्त्युपसर्गकाः । वर्णऽ कारोत्तरो वर्णसञ्ज्ञाऽव्व्यवेतस् स तु व्यञ्जने । विसर्जनीयोऽनुस्स्वारोपद्ध्मानीयाश् च नाऽत्तर च । जिह्वामूलीयनासिक्क्याश् चैवैषां रस्स्य रेफकः ॥ वर्णोत्तरस् त्रयाणां स्याद् ह्रस्स्वोऽकारो ह्ययम् भवेत् । ऋकारल्कारकौ ह्रस्स्वावनुस्स्वारोऽदिदुक् तथा ॥१४॥ वर्गोत्तरस् तु वर्णाक्ख्या प्रथमो भवतीत्त्यपि ।

---

१. पूर्वममुद्द्रितैषा शिक्क्षा दिल्लीस्स्थसरस्स्वतीविहारपुस्तकालयादधिगता ।

इति परिभाषाप्रकरणम् । अथ वक्ष्ये **वर्णसारभूतवर्णक्रमस्य** च । शुद्धवर्णक्रमादीनाम् चतुर्णामपि लक्षणम् ।।१५।। तत्तरादौ **वर्णसारस्य** प्रकारस् समम्यगुच्यते । ध्वनिस् स्थानम् च करणम् प्रयत्नो देवता ततः । जातिरङ्गवर्ं वर्णसम्ज्ञा व्यम्जनानावर्ं विधीयते । अचामेवम् प्रोच्यमानो ध्वनन्यादौ च यथाक्रमम् । प्रयत्नदेवयोर् मद्ध्ये मात्तराकालꣳ प्रकीर्तितः ।।१८।। आचां हलाङ्ग केवलानामङ्गानाम् (–ङ्गन् न) परिकीर्तयेत् ।।१९।। उदात्तादिस्स्वराणान् तु द्ध्वनन्यादीन् परिवर्जयेत् । तथापि देवताजातिगुणा रेखादिदर्शनम् ।।२०।। अद्ध्येत्तरङ्गाद्द्यवस्थाम् च षड्जादिस्स्वरकारणम् । सोत्पत्तिस्स्थानकम् चैव स्वसम्ज्ञानाम् चाऽनुपूर्व्यशः ।।२१।। ये धर्मा शुद्धवर्णे तु शास्त्रोक्ता इह तानपि । सर्यं योज्ज्य तत्तरतत्तरैव भक्तिरङ्गादिकान् वदेत् ।।२२।। व्यम्जनस्स्याऽष्टधा धर्मास् स्वरस्स्यैव तथाऽष्टधा । नीचोच्चादिस्स्वराणान् तु दश धर्माꣳ प्रकीर्तिताः ।।२३।। व्यम्जनोच्चादिसयं युक्तस्स्वरस्स्यैकस्स्य वै पुनः । षड्विंशतिरीरिता धर्माꣳ क इत्त्येष उदाहृतः । **इमम् बुधा वर्णसारभूतवर्ं वर्णक्रमवर्ं विदुः** ।।२४।। **अथ शब्दोद्भवो** वायोश् **शरीरेण** समीरणात्। कण्ठोरसोश् च सन्धाने तस्स्योत्पत्तिꣳ प्रकीर्तिता।। प्रातिशश्रुत्कानि तस्स्याऽत्तर भवन्त्येतानि पञ्च च । उरꣳ कण्ठश् शीर्षमुखन् नासिकाया बिलद्द्वयम् । **नादस् स्यात् सर्वं वृते कण्ठे श्वासस् तु विवृते सति । हकारꣳ क्रियते मद्ध्ये वर्णप्रकृतयश् च ताः** ।।२६।। स भूयान् प्रथमान्न्येषु ह्येतानेव विदुर् ध्वनीन् । प्रथमान्न्येष्ष्वघोषेषु महाप्प्राणा उदाहृताः । अल्पप्प्राणास् तु प्रथमवर्णेष्ष्वेव प्प्रकीर्तिताः ।।२८।। **नातिव्यस्तमवर्णे हनूवोष्ठन् नाऽत्त्युपसंहृतम् । कार्य ओष्ठोपसंहार उवर्णेऽत्तर विशेषकः** । एकान्तरस्स्य कर्तव्यꣳ प्रकृतान् नाऽर्धमद्ध्यकः ।।२९।। बर्स्वेष्ष्वादौ तु जिह्वाग्रमुपसंहरति त्तिरके । हनूपसंहृततरे स्यातामोष्ठौ वकारवत् ।।३०।।एकारे पूर्ववत् तालौ जिह्वामद्ध्यमिवर्णवत् ।।३१।। करणं स्थानमेदोतोर् युदैदौतोꣳ क्रमेण तत् ।।३२।। **ऐकारौकारयो**रादिरकारार्धमी(मिती)रितम् ।।३३।। इकारोऽद्ध्यर्धꣳ पूर्वस्स्य शेषस् स्यादुत्तरस्स्य उत् । अनुनासिकधर्मास् स्युरनुस्स्वारोत्तमा अपि ।।३४।। अचायं यत्तरोपसंहारस् तत् स्थानङ्ग क्रियतेऽत्तर तु । स्वराणाङ्ग करणवर्ं विद्द्यादुपसंहरतीति यत् ।।३५।। व्यम्जनानान् तु तत् स्थानं स्पर्शनङ्ग क्रियते यदा ।।३६।। करणन् तद् धलाम् ज्ञेयं स्पर्शयत्त्यत्तर येन तु । हनूमूले कवर्गे तु जिह्वामूलेन वै तथा

॥३८॥ कण्ठं स्थानं स एवाऽत्तर करणं हविसर्गयोः । स्पर्शयत्त्यथ तालौ च-वर्गे जिह्वान्तरेण तु ॥४०॥ प्रतिवेष्ट्य टवर्गे तु जिह्वाग्रेणैव मूर्धनि ॥४१॥ दन्तमूलेष्वधोभागे जिह्वाग्रेण तवर्गके ॥४२॥ **उत्तरोष्ठेऽधरोष्ठेन पवर्गे स्पर्शयत्त्यथ**।तालौ यकारे वै जिह्वामद्ध्यान्ताब्भ्यान् तथैव च । रेफे जिह्वाग्रमद्ध्येन दन्तमूलोत्तरेषु ले । ओष्ठान्ताब्भ्यावँ वकारे तूत्तरदन्ताग्रकेषु च ॥४५॥ ऊष्माण आनुपूर्व्येण स्स्पर्शस्स्थानेषु पञ्च च ॥४६॥ तेषाङ्ग करणमद्ध्यन् तु विवृतम् भवतीह तत्॥४७॥ कण्ठं स्थानं स एवाऽत्तर **करणं** हविसर्गयोः ॥४८॥ उरस्स्यत्त्वं हकारे तूत्तमान्तस्स्थापरे सति ॥४९॥ नासिक्क्या नासिकास्स्थाना मुखनासिक्क्यकाश् च वा । स्थानयोगे भवत्त्यत्तर वर्गवच् चेति तेषु तु ॥५०॥ स्वरोष्मणां स्याद् **विवृतꣳ प्रयत्नस्** त्वकारमात्तरस्स्य ··· कृत् प्रयत्नः । ··· कादिमान्ताꣳ ··· स्पृष्टजन्या ·· ॥५१॥ वर्गद्द्वितीयश् च तुरीयवर्णोऽतिस्स्पृष्टजꣳ **पञ्चविधꣳ प्रयत्नः** । वाय्वग्निभूचन्द्ररदिवाकराश् च **वेदाक्क्षराणामधिदेवतास् स्युः** ॥५२॥ अवर्णवर्गादिधषैत् समीरा इदैद् द्वितीयेन्द्रसवह्न्निसञ्ज्ञाः । ओ औ उवर्णे ह ओत् तृतीयाश् चान्द्रा ऋवर्णोप इ औच् चतुर्थः ॥५३॥ सौर्या लृकारोत्तमशास् तथैवम् **पञ्चाशदर्णा ऋषिभिस् सुगीताः** ॥५४॥ **बराट्मभास्** तु वर्गप्प्रथमास् स्वराश् च **क्क्षात्तरास्** तथा द्वित्तिरितुरीयवर्णाः। **वैशश्या** यकारादिचतुस् तथोत्तमाश् **शूद्द्रा** अनुस्स्वारविसर्ग ऊष्मा ॥५५॥ **यद् व्यञ्जनन् तद् भजते स्वराङ्गन्** तदङ्गभूतन् तु परस्स्वराङ्गम् ॥५६॥ पूर्वस्स्वराङ्गन् त्ववसानवर्ति भवेत् परायुक्तमसयँ युतो नः । योगाद्द्यनुस्स्वारविसर्गभक्तयो रेफस् त्विकारे परतस् तथा स्यात् ॥ अचपूर्वकयँ व्यञ्जनमेति हल्परं ····· । यत्तराऽवर्णन् तु परस्स्वरस्स्याऽन्तस्थोदयवँ व्यञ्जनमङ्गमेव ॥५९॥ पूर्वस्स्वराङ्गन् न भवेद् य ऊष्मणस् स्पर्शो यदि स्स्याद् विकृतिस् तथापि ॥६०॥ भक्तिꣳ पराङ्गम् प्रचयात् परा स्यात् तथा **धृते सत्त्यपरे च रेफः** ॥ परे सति ह्यूष्मणि वै पराङ्गे स्पर्शो **यमाश् चैव परस्स्वराङ्गम्** । अचस् स्वरास् स्पर्शहलावघोषाऽन्तस्थोष्मघोषव्यञ्जनमुत्तमाद्द्द्याः । तथैव वर्गप्प्रथमाद्दिट्टरस्स्व-दीर्घप्प्लुताद्द्द्या इति वर्णसञ्ज्ञाः ॥६४॥ **ट्टरस्स्वश्** च यावद् विपिने स्वभावात् किलीदिवी रौति स एकमात्तरः । काकोऽब्रवीत् तद् द्विगुणन् तु कानन् **द्विमात्तरकस्** स्यात् तु स एव **दीर्घः** ॥६५॥ शिखी त्रिमात्तरवँ वदति **प्प्लुतस्** स्याद् ध्रस्स्वार्धकालन् नकुलोऽर्धमात्तरम्

॥६६॥ उच्चस्स्य भूमिर् निहतस्स्य चाऽग्निस् स्वारस्स्य चन्द्रर× प्रचयस्स्य चाऽर्कः। नीचो विराड् ब्राह्मणजातिरुच्चस् स्वारस् तु वैश्य× प्रचयश् च शूद्रः ॥६७॥ स्वारोच्चकौ राजससात्त्विकौ स्तो धृताऽनुदात्तावपि तामसौ स्तः॥६८॥ विनिर्दिशेत् तर्जनिमद्ध्यपर्वण्युच्चम् च नीचन् तु कनिष्ठिकादौ। अनामिकान्त्ये स्वरितम् च निर्दिशेत् तम् मद्ध्यमाया× प्रचयम् च मद्ध्यमे ॥६९॥ भक्तेर् भवेद् यत् स्वर उच्च्यते पृथक् तदङ्गुलिस्स्थानमुदात्तकादिः ॥७०॥ स्वारयँ यदि ह्युच्चमिवोर्ध्वकम् च ह्यनामिकाममिकान्त्ययोश् च(?)॥७१॥ तौ स्वारकम्पे स्वरिताऽनुदात्तावनामिकान्त्यादिमरेखयोश् च॥७२॥ उदात्तनीचौ क्रमश× प्रदेशिनीमद्ध्याद्द्वयोर् निर्दिशदुच्चकम्पे(?)॥७३॥ तद् व्यञ्जनस्स्यैव विरामकाले न स्स्यात् पृथक् स्थानमुपैति पूर्वम् ॥७४॥ गोधेनुकर्णाकृतिदक्षहस्ते ह्यङ्गुष्ठकाग्रेण विदर्शयेज् ज्ञः। स्वरेषु हस्ते च मनश् च दृष्टिङ्क्रमान् निवेशश्याऽत्तर नियोजयेत् तत् ॥७५॥ हस्तेन वेदयँ य इमन् त्वधीते वर्णस्स्वराऽर्थाननुचिन्तयन् सन्। स ऋग्यजुस्सामभिरेव पूतस् तद् ब्रह्मलोके सततम् महीयते ॥७६॥ यद् गात्तरदैर्घ्यन् दृढता च या ध्वनेस् तथाऽणुता कण्ठबिलस्स्य या च। एतानि कुर्वन्ति च शब्दमुच्चैर् यद् ध्रस्स्वता या मृदुता स्वरस्स्य ॥७७॥ या विस्तृता(?) कण्ठबिलस्स्य चैता× कराणि शब्दन् निहतम् च नित्त्यम् ॥७८॥ गान्धारको मद्ध्यम उच्चजातष् षड्जर्षभौ द्वौ निहतोद्भवौ स्तः। सपञ्चमो धैवतको निषादस् त्रयस् स्वराश् च स्स्वरितात् तु जाताः ॥७९॥ तत्तराऽपि नित्त्यो निहतश् च तेऽत्तर क्षैप्रो निषादस्स्वरहेतवस् स्युः। प्रश्श्लिष्टकप्रातिहताभिधानौ स्यातान् तथा पञ्चमकारणे तौ ॥८१॥ तथान्तिमस्स्वारकपादवृत्तौ स्यातान् तथा धैवतहेतुभूतौ ॥८२॥ गान्धारकस्स्याऽप्यथ मद्ध्यकस्स्य क्रमादुदात्तप्रचयावपि क्रमात् ॥८३॥ अथाऽनुदात्तौ यदि दीर्घह्रस्स्वौ हेतू च षड्जर्षभयो× क्रमेण ॥८४॥ उरश् च कण्ठन् दशनांश्च तालु जिह्वान् च नासायँ युगपच् च संस्पृशन्। तेभ्यो हि यस्मात् स्वर एष जायते षड्भ्यस् ततष् षड्ज इतीह चोच्च्यते ॥८५॥ नाभेस् सकाशाल् लघुवात उत्थित× कण्ठोत्तमाङ्गेन समाहि(ह)तस् सन् यस्मान् नदत्त्यार्षभवत् सनीचस् स्वरेण तस्मादृषभस् स्मृतस् स्यात् ॥८६॥ गौरुच्चवान् धारयतीति तावँ वै ग(गा?)न्धेत्त्यजा सेति च रौति वा स्यात् ॥८७॥ मद्ध्यस्स्थितत्त्वादपि तत्स्वराणां स मद्ध्यमस् स्वारकनीचयोश् च ॥८८॥ अब्भ्युत्थितो वायुरुर×प्रदेशहृत्कण्ठमूर्धश्श्रुति-

मूलकेषु । पञ्चप्रतीकेषु चरंश्च कण्ठादुत्तिष्ठते **पञ्चम** इत्त्यतस् स्यात् ॥८९॥ षड्जादिसप्तस्वपि मद्ध्यमत्त्वात् केकीपिकैः पञ्चत इत्त्यतो वा॥९०॥ यस्मात् स्वरान्तेन विशेषतोऽभिसन्धीयते स्वर्यत एष **धैवतः** । तानप्रधानत्त्वबलाल् ललाटप्रान्ते स पश्चाद् व्यवतिष्ठतीति ॥९१॥ अस्मिन् निषीदन्त्यच इत्त्यनेन **निषाद** इत्त्युक्तमतस् स पश्चात् । व्याप्याऽवतिष्ठत्त्यखिलञ् च सन्धिप्रदेशमैभद्ध्वनितुल्यरूपः ॥९२॥ प्रथममुदितशब्दश् श्रूयते ह्रस्स्वमात्तरश् **श्रुतिरिति** विदुरेनं सा स्वराङ्ग-प्रधाना । विविधभरतविद्भिः प्रोच्यते तत् स्वराणां **सरिगमपधनीति** ह्य्यत्तर सञ्ज्ञा मुनीन्द्रैः ॥९३॥ **ज्ञेयोऽनुदात्तो हृदि मूर्द्धन्युदात्तस् स्यात् कर्णमूले स्वरितन् तु विद्द्यात् । सर्वप्रतीके प्रचयस् स्मृतस् स्यात् तस्थानं स्वराणामिदमेव नाऽन्न्यत्** ॥९४॥ स्वारस् समाहार **उदात्त** उच्चैर् भवेद् धि नीचैरनुदात्त एव ॥९५॥ स्वारस् तदन्न्यो निहताऽणु-मात्तरः पूर्वोच्चकोऽयं **स्वरितस्** स्वरस् स्यात् ॥९६॥ ते संहितायां स्वरितात् परे स्युरेकोऽथवा द्वौ बहवोऽनुदात्ताः । पदस्स्थिता ये **प्रचयस्**स्वरात्मकङ्ग गुणम् भजन्त्यत्तर **स उच्चकश्श्रुतिः** ॥९७॥ इवर्ण-कोतोर् यवकारभावे यस् स्वर्यते **क्षैप्र** उदात्तयोस् स्यात् ॥९८॥ स्थिते पदे यत्तर तु नीचपूर्वे व्यपूर्वके वा यवपूर्वमक्षरम् । यत् स्वर्यते तत् स्वरितन् तु **नित्त्य** एवेति विद्द्यान् न यथाक्रमोऽत्तर ॥९९॥ नानापद-स्स्थेऽपि च संहितेन यस् स्वर्यते **प्रातिहतस्** स उच्चैः ॥१००॥ लुप्ते पृथग्भूतपदस्स्थितोच्चात् परेऽनुदात्ते यदि तर्ह्यकारे । पूर्वोच्चकोऽयं स्वरितस् स्वरस्स्यान् नाम्ना भवेत् सोऽ**भिहतश्** च पश्चात्॥१०१॥ उच्चा-दुकारादनुदात्तधर्म उकार ऊर्ध्वे सति सन्धितोऽत्तर । ऊभाव एष स्स्वरितश् च तत्तर **प्रश्शिलष्ट** इत्त्युच्च्यत एव सद्भिः ॥१०२॥ या स्यात् समाने तु पदे विवृत्तिस् तस्स्याः परे यस् स्वरितश् च लब्धः । स **पादवृत्ताह्वय** एव नाऽन्न्य एतद्विवृत्तेरपि चाऽर्धमात्तरः ॥१०३॥ पदे समाने य उदात्तपूर्वस् **तैरो अथो व्यञ्जन** उत्तरस् सः ॥१०४॥ **क्षैप्रे च नित्त्येऽतिदृढः प्रयत्नो** दृढोऽतिपूर्वोऽभिहते प्रयत्नः ॥१०५॥ प्रश्-शिलष्टके प्रातिहते च कार्यस् स्वारे तथैवाऽ**तिमृदुः प्रयत्नः** ॥१०६॥ स्यात् पादवृत्ते खलु सप्तमे च स्वारे भवे**दल्पतरः प्रयत्नः** ॥१०७॥ प्रश्शिलष्टनित्त्याभिहताश् च यत्तर क्षैप्रस् तथोच्चस्स्वरितोदयास् स्युः । तत्तर **प्रक्रम्यन्त** इमे हि सन्धौ पूर्वस्स्वरान्ते निहतन् च कुर्यात् ॥१०८॥ **स कम्प** एवाऽत्तर यथा हि दीर्घन् तथोच्चरेद् ह्रस्स्वमपि

प्प्रकम्पे।।१०९।।**कम्पो द्विधा** स्वार उदात्तकश् च स्वाराक्ख्यकम्पास् त्विह संहितायाम्।शाखान्तरेष्वेव **उदात्तकम्पा**ऽ पुनर् द्विधा तौ खलु ह्रस्स्वदीर्घौ ।।१११।। तस्स्याऽऽदितस् स त्तर्च्चणुमात्तरकालस् स्वारस् तदन्त्ये निहतोऽणुमात्तरः । उच्चस् तथा स त्तर्च्चणुमात्तर आदौ तस्स्याऽन्त्यभागेऽप्प्यणुमात्तरनीचः ।।११२।। सम्मेलनेनैव तयोर् द्विमात्तरस् स एव कम्पस् स्वरितोच्चयोश् च ।।११३।। क्षैप्प्रस्स्य कम्पस् तु चतुर्भिरादूदेदैद्भिरेङोऽभिहतस्स्य कम्पः । प्रश्श्लिष्ट ऊत्त्वात् कथितोऽत्तर नित्त्य आतोच्च्यतेऽसौ(?) क्व चिदेव ओङः ।।११४।। एङरूपनित्त्यौ स्त उदात्तकम्पा**वित्थङ कृत**ऽ **कम्पविनिर्णयश् च** ।।११५।। स्वरोत्तरोष्मण्यपि पूर्वरेफलकारयोश् च स्**स्वरभक्तिसञ्ज्ञा**। स्यादर्धमात्तरा रलयोस् तदादावन्ते स्वरांशावणुमात्तरयुक्तौ ।।११६।। रलौ तु यस्मात् स्वरपादयुक्तौ तस्मात् तयोश् च स्**स्वरभक्तिसञ्ज्ञा** ।।११७।। **पूर्वांशपादद्द्वययुग्(?) घलन्ता स्यात् सर्वावृताक्ख्या हपरे तु भक्तिः**।।११८।। **परांशयुक्ता(?)शषसेषु भक्ति**ऽ **परेष्वजन्ता विवृताऽभिधाना** ।।११९।। पूर्वस्स्वराल्पत्त्वकमित्त्वमुत्त्वन् तरयर्वं विसृज्ज्यैव वदेद्(विपश्चित् ?) ।।१२०।। **करेणुसञ्ज्ञा** रह्योश् च योगे सा **कर्विणी** स्याल् लहकारयोगे ।।१२१।। भक्तिस् तु या रेफसकारयोगे तां **हस्तिनीति** प्प्रवदन्ति केचित् ।। सा धूर्षमित्त्यत्तर तु या च भक्तिस् सेयं **स्वतन्त्रा** स्वरभक्तिरुक्ता । सा **हारिता** स्याल् लशयोस् तथैव क्क्रमेण सप्त स्स्वरभक्तयस् ताः ।।१२२।। उदाहरिष्ष्ये स्वरभक्तयस्(?) ताऽ क्रमात् करेण्वादि च हारितान्तम् ।।१२३।। बर्हिर् यजत्त्यर्हति गार्हपत्त्यङ **करेणु** मल्हा इति **कर्विणी** स्यात् । सहर्षभा **हंसपदा**, सुवर्षा दर्शश् च पर्शुर् **हरिणी** च बर्सम्(?)।।१२४।। दीर्घाच् च ह्रस्स्वात् स्वरितादनन्त्यात् पृथग् भवेद् भक्तिरसांहिता च ।।१२५।। पृथक् स्वरयँ यो भजतीह वर्णऽ पृथक् च भक्तिर् निहितेन होर्ध्वे ।।१२६।। अत्तरोभयोश् च स्स्वरयोरसन्धिर् **विवृत्तिरित्त्युच्च्यत** एव तज्ज्ञैः । क्रमेण वत्सानुसृतिश् च वत्सानुसारिणी पाकवती पिपीलिका ।।१२७।। वैशेषिका चोभयदीर्घिका च स्यान् मद्ध्यमा चैव **सवर्णता** च । **इत्त्येवमष्टौ हि विवृत्तिसञ्ज्ञास्** तासां स्वरूपङ खलु वक्क्ष्यतेऽत्तर ।।१२८।। या ह्रस्स्वपूर्वोत्तरदीर्घिका स्स्यात् सा तर्हि **वत्सानुसृतिस्** समात्तरा ।।१२९।। ह्रस्स्वोत्तरा यत्तर तु दीर्घपूर्वा **वत्सानुसारिण्यपि** सैकमात्तरा।।१३०।। यस्स्या विवृत्तेरुभयत्तर ह्रस्स्वऽ पादोनमात्तरा(?) खलु **पाकवत्त्याम्** । क्रमेण पूर्वोत्तरयोश् च दीर्घौ स्त उच्चनीचौ

पदकाल एव। विसर्जनीयश् च न यत्तर दृश्यते यस्स्याम् च सन्धौ स्वरितम् च लब्ध्यते ॥१३२॥ सवर्णभूतावपि तौ भवेतां सा पादमात्तरा च **पिपीलिका** स्यात् ॥१३३॥ स्यातावँ विवृत्तेरपि यत्तर यस्स्या आद्द्यन्तयोश् चाऽप्यसवर्णदीर्घौ। मद्ध्ये विसर्गो यदि वाऽपि मा वा **वैशेषिका** मात्तिरककालयुक्ताः ॥१३४॥ आद्द्यन्तयोश् चैव सवर्णदीर्घौ स्वरो न सन्धानपदे विसर्गः। एवङ गुणा यत्तर भवन्ति यस्स्यास् स्यादेक-मात्तरोभयदीर्घिका सा ॥१३५॥ सवर्णदीर्घावुभयत्तर यस्स्या उदात्तनीचौ भवतऽ क्रमेण। यद्द्यस्ति चेत् तत्तर विसर्जनीयस्स्वारोऽपि सन्धौ च समात्तर–**मद्ध्यमा** ॥१३६॥ आदौ तथाऽन्ते च सवर्णदीर्घौ विभज्यमाने स विसर्जनीयः। नाऽत्तर जातु स्स्वरितश् च स··· तस्स्यास् समात्तरा हि **सवर्णदीर्घी** ॥१३७॥ यद्व्यक्तिमद्ध्ये त्त्वनुनासिकस् स्यात् तत्तरानुनास्स्यस् तु स पादमात्तरः। सा व्यक्तिरप्यत्तर सपादमात्तरा **पूर्वोक्तमेवात्तर च नाम तस्स्याः** ॥१३८॥ उदाहरिष्यत्त्यधुना विवृत्ततयो वत्सानुसृत्त्यादिसवर्णतान्तम् ॥१३९॥ त आवहन्ति प्प्रतरान् न आयुस् स आयु **वत्सानुसृतिस्** त एनम् ॥१४०॥ ते अस्स्य यो वा अयथा च **वत्सानुसारिणी** वा इयमग्गर आसीत् ॥१४१॥ स इज् जनेन प्प्रउगन् न इन्द्रायाऽहोमुचे **पाकवती** म इन्द्रः ॥१४२॥ वा आदि वा आहियमाणरण् चे ते एनमब्ध्यत्तर **पिपीलिका** स्स्यात् ॥१४३॥ ता एव सो एव तथा च कक्क्षीवां औशि **वैशेषिकसञ्ज्ञिकास्** स्युः ॥१४४॥ वा आप ते एव तथैव तस्स्या आवृश्चथो ओ**भयदीर्घिका** स्यात् ॥१४५॥ भवन्ति वा आग्गरयणाग्गरवेद्द्या आदेश् च या आविवि **मद्ध्यमास्** स्युः ॥१४६॥ वा आस ता आस च आप्प्रि दिव्या आपस् तु ता आहु**रवर्णदीर्घी** ॥१४७॥ यशो ममा चैव सुमङ्गला सुश्श्लोकोपहूता च तथैव यद् घरात् ॥१४८॥ **रङ्गे** मुखे व्याग्घररुतोपमं स्यान् मात्तराद्द्वयं हृज्जनितन् त्वनास्स्यम्। मात्तराद्द्वयं स्यादिह कांस्यघण्टानादस् सकम्पस् स तु मूर्धजातः। नासिक्क्यरन्ध्ररद्द्वयनिस्सृतोऽन्त्ये स्यादेकमात्तरस् स तु **काकली** स्यात् ॥१४९॥ सौराष्ट्रिका गोपवधूस् सुकण्ठस्स्वरेण तक्क्रा३ँ इति भाषते यथा। तथा समुच्चार्य वदेत् स्वकालाद् **रङ्गश्** च कम्पऽ खलु **वर्धते सः** ॥१५०॥ देवा उदा इम् ममुवा अम स्स्वा अहङ कठे स्युऽ खलु **रङ्गदीर्घाः** ॥१५१॥ एते द्विमात्तराश् च **सपादमात्तरनासिक्क्ययुक्ताश्** च विवृत्तिपूर्वाः। सपादमात्तरत्तिरतये हृदि स्स्यादेकस् ततो मूर्धनि चाऽर्धमात्तरः॥ भवेद् विशेषो मुखनासिके च व्यक्तेश् च तस्मा अपि

साऽणुमात्तरः ।।१५२।। अच्पूर्वकवँ् व्यञ्जनमेति हल्परे स्पर्शो **द्विवर्णलँ्** लवकारपूर्वः ।।१५३।। परञ् च हल् यत् स्वरपूर्वरेफाद् **द्वित्त्वम्** परे तत् सति वर्णमात्तरे ।।१५४।। द्विवर्णमाप्नोति **पदान्तवर्ती** ङो नो स्वरोर्ध्वोऽपि च ह्रस्स्वपूर्वः ।।१५५।। **यजुष्यनुस्स्वार** इहापि **यत्तर भवेत् तदाद्द्चर्धगकारयुक्तः**।सरूपशान्तिश्(?)शपरो यदि स्स्यान् न स्याद् गकारस्स्य तु केवलाक्ख्या ।।१५६।। ह्रस्स्वादनुस्स्वार इयाद् द्विवर्णयँ् योगे परे तस्स्य च मात्तिरकस् स्यात् । योगादिरप्यत्तर तथा द्विरुच्च्यतेऽनुस्स्वारपूर्वोऽप्यथ चाऽऽगमस् स्यात् ।।१५७।। **यद् व्यञ्जनयँ् येन निमित्तकेन द्द्विवर्णमाप्नोत्त्यधुनैव तेन । पूर्वागमो ह्यत्तर भवेद् द्वितीयचतुर्थयोश् चैव यथाक्रमेण** ।।१५८।। धामातिभूते परमोपसर्गपाथ एष आत्त्यूर्ध्वगताश् छखीभुजाः । एते त्रयस् त्रिक्(?) प्रथमन् तृतीयम् पूर्वागमम् प्राप्नुयुरेव धाम ।।१५९।। **क्व चित् समाने स्वरयोस् तु मद्ध्ये लक्क्ष्यानुसारन् द्वितयं हलस् स्यात्** । पदे द्वितीयस्स्य तुरीय(क)स्स्य पूर्वागमस् स्याद् धि तथैव लक्क्ष्यात् ।।१६०।। **शात् तैत्तिरीये खलु नस्स्य ञस् स्यादादेश एवाऽत्तर न काठके ञः** ।।१६१।। हाऽन्न्योष्मणस् स्पर्शपरात् परस् तत्स्पर्शस्स्य सस्स्थान इहाऽऽगमस् स्यात् । सकृच् च वर्गप्रथमस् स चाऽभिनिधीयतेऽत्तराऽभिनिधान उच्च्यते ।।१६२।। स्पर्शाद् यदोष्माऽविकृतेरनुत्तमात् स्यादुत्तमोर्ध्वे सति चाऽऽनुपूर्व्यात् । **नासिक्क्यसञ्ज्ञा** इह चाऽऽगमास् स्युरेतान् **यमानेव** वदन्ति के चित् ।।१६३।। पदान्तगो वाऽप्यपदान्तवर्ती **द्वितीयवर्णम् प्रथमोऽश्नुते सम** । सषौ परौ चेदपदान्तवर्तिनो **द्वितीयकत्त्वम् प्रथमस्स्य(शे चेत् ?)** ।।१६४।। ह्रस्स्वात् परो **नाद** इह द्द्विरूपवर्णक्क्रमे तं सकृदुच्चरेज् ञः ।।१६५।। **द्वित्त्वन् निवर्तेत यदा प्रसक्तौ** पूर्वागमो (वापि) तदुच्च्यतेऽत्तर ।।१६६।। ईदैदयो यश् च विसर्गरेफावूष्मा स्वरे वा प्रथमोत्तरे च । स्वरे परे वश् च लकार ऊष्म–विसर्गोत्तरस्स्यो(?)भवति द्द्विरूपः।।१६७।।परे सवर्गीय अनुत्तमे हल् द्वित्त्वं सवर्णोत्तर एव नेयात् । स्पर्शोत्तरश् चेद् यवलोत्तरो मस् तस्स्येति तेषामनुनासिकञ् च ।।१६८।। दीर्घात् परो नो ऽपरे च द्वित्त्वन् नेयाच् च ह्रस्स्वाद् यहयोः (परस्स्थयोः ?) ।।१६९।। (शषसेष्वच्परेष्वत्तर विसर्गो यत्तर दृश्यते । वैकृतत्त्वम् प्राकृतत्त्वङ क्रमाच् शिष्टे [संहितायाम्] भवेदिति ।) हकारान् नणमा यत्तर दृश्यन्ते परतस् तदा । नासिक्क्यत्त्वमुरस्स्यत्त्वं **हस्स्य (हश् च ?) तत्तर द्द्विरुच्च्यते** ।।१७०।। विवृत्तिमद्ध्ये यत्तर स्स्याद् विसर्-

गस् सोऽर्धमात्त्रिकः। विरामश् चैकमात्त्रस् स्यात् तस्स्य सन्ज्ञा यथाविधि ॥१७१॥ प्राग् यद्द्यघोषवर्णाब्भ्यावँ विसर्गꣳ कप ·· । क्रमात् स जिह्वामूलीयोपद्ध्मानीयौ ·· उच्च्यते(?)॥१७२॥ (वर्णक्क्रमस्स्याऽद्ध्ययने न वदेदन्न्यस[युतम्?]।) शुद्धवर्णे त्वचामादौ यद्द्यु च्चादिꣳ प्रयुज्ज्यते। सर्वँ विद्द्यात् स्वरवर्णन् तदेतदेवाऽस्स्य लक्क्षणम् ॥१७३॥ **(इति पारिशिक्क्षाव्याक्ख्या[?] समाप्ता)**[1] ॥

८. आपिशलीयशिक्क्षा[2]

आकाशवायुप्प्रभवश् शरीरात् समुच्चरन् वक्त्रमुपैति नादः। स्थानान्तरेषु प्प्रविभज्ज्यमानो वर्णत्वमागच्छति यस् स शब्दः ॥१॥ तमक्क्षरम् ब्रह्म परम् पवित्त्रङ्ग गुहाशयं सम्म्यगुशन्ति विप्प्राः। स श्श्रेयसा चाऽब्भ्युदयेन चैव सम्म्यक् प्रयुक्तꣳ पुरुषयँ युनक्ति ॥२॥ **स्थानमिदङ्ग करणमिदम् प्रयत्न एष द्द्विधाऽनिल स्स्थानम् पीडयति वृत्तिकारꣳ प्रक्क्रम एषोऽथ नाभितलात्** ॥३॥ तत्त्र स्स्थान–करणप्रयत्नेब्भ्यो वर्णास् त्रिषष्टिः ॥४॥ तत्त्र वर्णानाङ्ग केषाङ्ग किं स्थानङ्ग किङ्ग करणम् प्रयत्नश् च कꣳ केषामित्त्युच्च्यते ॥५॥ **तत्त्र स्स्थानन् तावत्** ॥१॥ अकुहविसर्जनीयाꣳ कण्ठ्याः ॥२॥ हविसर्जनीयावुरस्स्यावेकेषाम् ॥३॥ जिह्वामूलीयो जिह्व्यः ॥४॥ कवर्गावर्णानुस्स्वारजिह्वामूलीया जिह्व्या एकेषाम् ॥५॥ सर्वमुखस्स्थानमवर्णमेके ॥६॥ इचुयशास् तालव्याः ॥७॥ ऋटुरषा मूर्धन्न्याः ॥८॥ रो दन्तमूलस्स्थानमेकेषाम् ॥९॥ लृतुलसा दन्त्याः ॥१०॥ वकारो दन्तोष्ठ्यः ॥११॥ सृक्क्वस्स्थानमेके ॥१२॥ उपूपद्ध्मानीया ओष्ठ्याः ॥१३॥ अनुस्स्वारयमा नासिक्क्याः ॥१४॥ कण्ठनासिक्क्यमनुस्स्वारमेके ॥१५॥ यमाश् च नासिक्क्यजिह्वामूलीया एकेषाम् ॥१६॥ एदैतौ कण्ठतालव्यौ ॥१७॥

---

१. शैशिरीयशिक्क्षादयश् शिक्क्षाग्रन्था विदुषामेतेषु ग्रन्थेषु चित्तमाकर्षट्टयँ यथालाभयँ यथादृष्टमत्त्राऽस्माभिर् मुद्द्रापिताः। एतेषां शिक्क्षाग्रन्थानां सम्म्यगद्ध्ययनङ्ग कृत्वा साधनसम्पन्नैस् सम्बद्धशाखाविशेषज्ज्ञैर् विद्द्वद्भिस् सुसम्पादनन् च विधायैतेषाम् पुनर् मुद्द्रापणङ्ग कर्तव्यम्। २. एषा शिक्क्षा रघुवीरसम्पादिता वैदिकाद्ध्ययनानुसन्धानपत्त्रिकायाम् (The Journal of Vedic Studies) प्रथमे भागे द्वितीयेऽङ्के १९३४ तमे क्रैस्ताब्दे प्रथमम् मुद्द्रिता।युधिष्ठिरमीमांसकमहाभागेनाऽपीयं सम्पाद्द्य मुद्द्रापिता।

ओदौतौ कण्ठोष्ठ्यौ ॥१८॥ ञमङणनास् स्वस्स्थाना नासिकास्स्थानाश् च ॥१९॥ द्विवर्णानि सन्ध्यक्षराणि ॥२०॥ सरेफ ऋवर्णः ॥२१॥ एवमेतानि स्स्थानानि ॥२२॥ **करणमपि** ॥१॥ जिह्वव्यतालव्यमूर्धन्यदन्त्यानाम् जिह्वा करणम् ॥२॥ कथमिति ॥३॥ जिह्वामूलेन जिह्वव्यानाम् ॥४॥ जिह्वामध्येन तालव्यानाम् ॥५॥ जिह्वोपाग्रेण मूर्धन्यानाम् ॥६॥ जिह्वाग्राधःकरणवँ वा ॥७॥ जिह्वाग्रेण दन्त्यानाम् ॥८॥ शेषास् स्वस्स्थानकरणाः ॥९॥ इत्त्येतत् करणम् ॥१०॥ **प्रयत्नो द्विविधः** ॥१॥ आभ्यन्तरो बाह्यश्च ॥२॥ **आभ्यन्तरस्तावत्** ॥३॥ स्पृष्टकरणास् स्पर्शाः ॥४॥ ईषत्स्पृष्टकरणा अन्तस्स्थाः ॥५॥ ईषद्विवृतकरणा ऊष्माणः ॥६॥ विवृतकरणास् स्वराः ॥७॥ तेभ्य एओ विवृततरौ ॥८॥ ताभ्यामैऔ ॥९॥ ताभ्यामप्याकारः ॥१०॥ सर्वँ वृतोऽकारः ॥११॥ **इत्त्येषोऽन्तःप्रयत्नः** ॥१२॥ **अथ बाह्यः** ॥१॥ वर्गाणाम् प्रथमद्वितीयाश् शषसविसर्जनीयजिह्वामूलीयोपध्मानीया यमौ च प्रथमद्वितीयौ विवृतकण्ठाश् श्वासानुप्प्रदाना अघोषाः ॥२॥ वर्गयमानाम् प्रथमे अल्पप्राणा इतरे सर्वे महाप्राणाः ॥३॥ वर्गाणान् तृतीयचतुर्था अन्तस्स्था हकाराऽनुस्वारौ यमौ च तृतीयचतुर्थौ सर्वँ वृतकण्ठा नादानुप्प्रदाना घोषवन्तः ॥४॥ वर्गयमानान् तृतीया अन्तस्स्थाश् चाऽल्पप्राणा इतरे सर्वे महाप्राणाः ॥५॥ यथा तृतीयास् तथा पञ्चमाः ॥६॥ आनुनासिक्यमेषामधिको गुणः ॥७॥ शादय ऊष्माणः ॥८॥ सस्स्थानेन द्वितीयाः ॥९॥ हकारेण चतुर्थाः ॥१०॥ **एष बाह्यःप्रयत्नः** ॥११॥ तत्तर स्पर्शयमवर्णकरो वायुरयःपिण्डवत् **तस्थानमभिपीडयति** ॥१॥ अन्तस्स्थवर्णकरो वायुर् दारुपिण्डवत् ॥२॥ ऊष्मस्स्वरवर्णकरो वायुरूर्णापिण्डवत् ॥३॥ एवँ व्याख्याने **वृत्तिकाराः** पठन्त्यष्टादशप्रभेदमवर्णकुलमिति ॥१॥ तत् कथम् ॥२॥ ह्रस्स्वदीर्घप्लुत्वाच् च त्रैस्स्वर्योपनयेन च। आनुनासिक्यभेदाच् च सङ्ख्यातोऽष्टादशात्मक इति ॥३॥ एवमिवर्णादयः ॥४॥ लृवर्णस्य दीर्घा न सन्ति ॥५॥ तन् द्वादशप्रभेदमाचक्षते ॥६॥ यदृच्छाऽकृतिजाऽनुकरणा वा यदा दीर्घास् स्युस् तदा तमप्यष्टादशप्रभेदम् ब्रुवते ॥७॥ सन्ध्यक्षराणां ह्रस्स्वा न सन्ति ॥८॥ तान्न्यपि द्वादशप्रभेदानि ॥९॥ छन्दोगानां सात्त्यमुग्गरायनीया ह्रस्स्वानि पठन्ति ॥१०॥ तेषामप्यष्टादशप्रभेदानि ॥११॥ अन्तस्स्था द्विप्रभेदा रेफवर्जितास् सानुनासिका निरनुनासिकाश् च ॥१२॥ रेफोष्मणां सवर्णा न सन्ति ॥१३॥ **वर्ग्यो वर्ग्येण सवर्णः** ॥१४॥ **एष क्रमो वर्णानाम्** ॥१॥

तत्तरैषां स्थानकरणप्रयत्नानावँ व्याकरणप्रसिद्धिरुच्यते ।।२।। इह यत्तर स्स्थाने वर्णा उपलब्ध्यन्ते तत् **त्स्थानम्** ।।३।। येन निर्वर्त्यन्ते तत् **करणम्** ।।४।। प्रयतनम् **प्रयत्नः** ।।५।। तत्तर **नाभिप्रदेशात्** प्रयत्नप्रेरितऽ प्राणो नाम वायुरूर्ध्वमाक्क्रामन्नुरऽप्रभृतीनां स्थानानामन्न्यतमस्मिन् स्थाने प्रयत्नेन विधार्यते, स विधार्यमाणो वायुस् स्थानमभिहन्ति, तस्मात् स्थानाभिघाताद् ध्वनिरुत्पद्द्यत आकाशे, **सा वर्णश्श्रुतिः, स वर्णस्स्यात्मलाभः** ।।१।। तत्तर द्ध्वनावुत्पद्द्यमाने यदा स्थानकरणप्रयत्नाऽ परस्परं स्पृशन्ति(?) **सा स्पृष्टता**।।२।। यदेषत् त्स्पृशन्ति तदेषत्स्पृष्टता ।।३।। दूरे यदा स्स्पृशन्ति **सा विवृतता** ।।४।। सामीप्येन यदा स्पृशन्ति सा सर्वँवृतता ।।५।। इत्त्येषोऽन्तऽप्रयत्नः ।।६।। स इदानीम् प्राणो नाम वायुरूर्ध्वमाक्क्रामन् मूर्द्धिन प्रतिहतो निवृत्तो यदा कोष्ठमभिहन्ति तदा कोष्ठेऽभिहन्न्यमाने गलबिलस्स्य विवृतत्त्वाद् **विवारः**, सर्वँवृतत्त्वात् **सर्वँवारो** जायते ।।७।। तौ सर्वँवारविवारौ ।।८।। तत्तर यदा कण्ठबिलं सर्वँवृतम् भवति तदा **नादो** जायते ।।९।। विवृते कण्ठबिले **श्वासो** जायते ।।१०।। तौ श्वासनादा**वनुप्रदान**मित्त्याचक्क्षते ।।११।। अन्न्ये तु ब्रुवतेऽनुप्रदानमनुस्स्वानो घण्टानिर्हादवत् ।।१२।। तत्तर यदा स्थानाभिघातजे ध्वनौ नादोऽनुप्रदीयते तदा नादद्ध्वनिसंसर्गाद् **घोषो** जायते ।।१३।। यदा श्वासोऽनुप्रदीयते तदा श्वासद्ध्वनिसंसर्गा**दघोषः** ।।१४।। सा घोषवदघोषता ।।१५।। महति वायौ **महाप्राणः** ।।१६।। अल्पे वायावल्प**प्राणः** ।।१७।। साऽल्पप्राणमहाप्राणता ।।१८।। महाप्राणत्त्वा**दूष्मत्त्वम्** ।।१९।। यदा सर्वाङ्गानुसारी प्रयत्नस् तीव्रो भवति तदा गात्तरस्स्य निग्रहऽ कण्ठबिलस्स्य चाऽणुत्त्वं स्वरस्स्य च वायोस् तीव्रत्त्वाद् रौक्क्ष्यम् भवति **तमुदात्त**माचक्क्षते ।।२०।। यदा तु मन्दऽ प्रयत्नो भवति तदा गात्तरस्स्य स्रंसनङ् कण्ठबिलस्स्य महत्त्वं स्वरस्स्य च वायोर् मन्दगतित्त्वात् स्निग्धता भवति **तमनुदात्त**माचक्क्षते ।।२१।। उदात्तानुदात्तस्स्वरसन्निपातात् **त्स्वरित** इति ।।२२।। एवम् प्रयत्नोऽभिनिर्वृत्तऽ कृत्त्स्नऽ प्रयत्नो भवति ।।२३।। **अष्टौ स्थानानि वर्णानामुरऽ** कण्ठश् शिरस् तथा । जिह्वामूलञ् च दन्ताश् च नासिकोष्ठौ च तालु च ।।२४।। स्पृष्टत्त्वमीषत्स्पृष्टत्त्वं सर्वँवृतत्त्वन् तथैव च । विवृतत्त्वञ् च वर्णानामन्तऽ**करण**मुच्यते ।।२५।। कालो विवारसर्वँवारौ श्वासनादावघोषता । घोषोऽल्पप्राणता चैव महाप्राणस् स्वरास् त्रयः । बाह्यप्रयत्नकरणमाहुस् तान् वर्णानावँ वर्णवेदिनः ।।२६।। **इत्त्यापिशलीयशिक्क्षा समाप्ता** ।।

९. कतिपये प्रमुखाश् शिक्षाशास्त्रसम्बद्धाः पारिभाषिकाश् शब्दाः

[प्रस्तुतायां शिक्षायाम् मूलकारिकासु प्रयुक्तानाम् पारिभाषिकशब्दानां सङ्ग्रहो विस्तृतया विषयानुक्रमणिकयैव प्रायेण गतार्थ इति सम्प्रति संस्कृतज्ञनिकाये सामान्यतयाऽप्रसिद्धानामन्येषाञ्च कतिपयानाम् पारिभाषिकशब्दानामेवाऽत्र सङ्ग्रहः क्रियते]

अक्षरम्, २९४ ।
अक्षरसंहिता, ५९३ ।
अक्षरसमाम्नायः, १८७ ।
अङ्गसंहिता, ५९३ ।
अनानुपूर्व्यसंहिता, ५९३ ।
अनिङ्ग्यम्, ३५ ।
अनुरङ्गः, २२४ ।
अभिगीतः, ४४८, ४४९ ।
अभिनिधानः, २३० ।
अभिनिष्टानः, ७०३ ।
अभिनिहितवर्णः, २३० इ. ।
अयोगवाहः, २८५, २९१ इ. ।
अस्थितस्स्पृष्टप्रयत्नः, ५१९ ।
इङ्ग्यम्, ७७३ ।
उच्चः, ३१७ ।
उच्चश्श्रुतिः, ३५९ ।
उदात्तकः, ३५९ ।
उदात्ततमयः, ३५९ ।
उपधानिका, २२४, ४७५ ।
उपबृंहित्, १७१, ५६५ ।
उपांशु, ५६५ ।
एकयमः, ३५९ ।
एकश्श्रुतिः, ३५९ ।
एकस्स्वरः, ३५९ ।
काकलकम्, १७२ ।
किट्किडाकारः, २५७ ।
क्रमः, ७३३ ।
क्रमघनसंहिता, ५९२, ७७९ ।
क्रमजटासंहिता, ५९२, ७६९ ।
क्रमजम्, २९५ ।
क्रमदण्डसंहिता, ५९२, ७७३ ।
क्रमद्ध्वजसंहिता, ५९२, ७७६ ।
क्रममालासंहिता, ५९२, ७७५ ।
क्रमरथसंहिता, ५९२, ७७७ ।
क्रमलेखासंहिता, ५९२, ७७५ ।
क्रमशिखासंहिता, ५९२, ७७३ ।
क्रमसंहिता, ५९२, ७५९ ।
क्षिप्रः, ४४७ ।
क्षैप्रसन्धिः, ६१३ ।
गलशुण्डिका, १७२ ।

चयः, ३२५ ।
चर्चा, ७५८ ।
तानः, ३५९ ।
तृतीयसवनम्, ५६५ ।
तिरक्क्रमः, ७६२ ।
द्वियमः, ३२५ ।
द्विस्स्वरः, ३२५ ।
धार्यः, ३५९ ।
धृतः, ३५९ ।
धृतप्प्रचयः, ३५९ ।
ध्रुवम्, २३४ ।
ध्वानम्, ५६५ ।
नतिः, ७२३ ।
नन्तृ, ७२० ।
नमयितृ, ७२० ।
नामि, २९०, ७२३, ७२९ ।
नासिक्क्यः, २४६ इ. ।
निचितः, ३५९ ।
नित्त्यः, ३३३ ।
निमदः, १७१, ५६५ ।
नियतः, ३२४ ।
निर्भुजसंहिता, ५९२ ।
न्यस्तः, ३२४ ।
न्यूङ्खः, ३, ४ इ. ।
परिहारः, ७५८ ।
प्रग्ग्रहः, ६३० ।
प्रचः, ३५९ ।
प्रचितः, ३५९ ।
प्रतृण्णसंहिता, ५९२ ।
प्रश्नः, १५६ ।
प्रश्श्लिष्टसन्धिः, ६०१, ६०३ ।
प्रातस्सवनम्, ५६५ ।
बर्स्वम्, १६९, १७३ इ. ।
ब्रह्मराशिः, १८७ ।
भक्क्ष्यः, २३० ।
भाषिकश्श्रुतिः, ३६९ ।
भाषास्वरः, ३६९ ।
भाषिकस्स्वरः, ३६८ ।
भुक्तः, २३० ।
मस्तिष्कतन्त्रम्, १६९ ।
माद्ध्यन्दिनसवनम्, ५६५ ।
यमः, २३४ ।
योगवाहः, २८५, २९१, २९३ ।
रक्तः, १९१, ४९६ ।
रङ्गः, १९१, २२१ इ. ।
लेखसम्पत्, १२६ ।
वर्णराशिः, ११, १८८ इ. ।
वर्णश्श्रुतिः, १७७ ।
वर्णसंहिता, ५९३ ।
वर्णसमाम्नायः, १८७ ।
विच्छेदः, २३५ ।
वृद्धः, ४४८, ४४९ ।
शिक्क्षकः, १०७ इ. ।
शिक्क्षुकः, ६, १० इ. ।
शैक्क्षिकः, १०९ ।
सन्ध्यक्क्षरम्, २८९ ।
सन्नः, ३२४ ।
समयः, ७६२ ।
समानाक्क्षरम्, २८९ ।
समापत्तिः, ७५८ ।
स्थितः (स्थितकरणः), ४५८ ।
स्थितस्स्वारः, ३३२ ।
स्वरभक्तिः, १९१, २४८ ।
स्वाद्ध्यायस्स्य मुखम्, १५५ ।
स्वारः, ३२५ ।

१० प्रस्तुतग्रन्थे आगतानि कति चन विशिष्टनामानि

[प्रमुखाणाम् प्राचीनानाम् प्रातिशाख्यशिक्षादिग्रन्थानाम्, शिक्षाशास्त्रकाराणाञ्च व्याकरणकाराणाञ्च नामानि उपबन्धे एकप्रघट्टकगततयैव प्प्रदर्शितानि, विषयानुक्रमणिकयैव च तत्सङ्ग्रहो गतार्थप्प्राय इति, अन्न्यानि ग्रन्थनामानि च सङ्केतविवरणप्प्रसङ्गेन पृथग् दत्तानि इति चाऽवशिष्टानि कति चन विशिष्टनामान्न्येवाऽत्तर सङ्गृह्य्यन्ते]

अगस्त्यशिक्षा, ६६ ।
अण्णाशास्त्री, २४, ४८ इ. ।
अनन्तदेवः, ५१ ।
अनन्तभट्टः, २२ ।
अभिनवगुप्तः, ६७, २०३ इ. ।
अमरनाथशास्त्री, ४२, ४५ इ. ।
अमरेशः, ४३, ९३ ।
आत्त्रेयः, २४ ।
कस्तूरिरङ्गाचार्य्यः, १४, २५ इ. ।
कहोडः, ५७ ।
कार्त्तिकेयः, २३ ।
कुमारिलभट्टः, ६७ इ. ।
केशवरामः, ४८ ।
केशवार्य्यः, ६१ ।
कोहलः, ५७ ।
गङ्गाधरभट्टाचार्य्यः, ३१ ।
गणपतिशास्त्री हेब्बारः, ४०५ ।
गार्ग्यगोपालयज्ज्वा, १२, १३ इ. ।
गोपालचन्द्रमिश्रः, ४९, १०१ इ. ।
चक्करः, ६४ ।
छन्दोभाषा प्रातिशाख्यव्याख्या, १८३ ।
जयन्तस्स्वामी, ४२, ४५ इ. ।
जिनेन्द्रबुद्धिः, ७५ इ. ।
ज्योत्स्ना, २२ इ. ।
तिरभाष्य्यरत्नम्, १८३ इ. ।
दयाशङ्करः, ३२ ।
दीनबन्धुशर्मा, ७७ ।
देवपालः, २५ ।
नरसिंहः, ३२ ।
नागदेवः, ३४ ।
नारायणः, ३५, ३७ ।
पञ्जिका, ४१ इ. ।
पदक्रमसदनम्, २४ ।
पदार्थप्प्रकाशः, २२ ।
पारिः, ६४ ।
पुरोगमाचार्य्यः, ३२ ।
पुष्पयशा औदव्व्रजिः, २६ ।
बालकृष्णगोडशेः, ४४, ५२ इ. ।
भट्टशोभाकरः, ६७ इ. ।

मञ्चिभट्टः, ६१ ।
मधुसूदनमस्करी, ३१, ७६३, ७६७, इ. ।
मधुसूदनविद्द्यावाचस्पतिः, १८२ इ. ।
मधुसूदनसरस्स्वती, १८ इ. ।
मल्लशर्मा, ५१ इ. ।
महास्वामी, ३४ ।
मातृमोदः, २२ ।
माहिषेयः, २४, २५ इ. ।
मित्त्रमिश्श्रः, १८, ४० इ. ।
मुक्तीश्श्वराचार्य्यः, ६३ ।
युगलकिशोरपाठकः, २३, ३१ इ. ।
राजशेखरः, ७३, ८९, १०२ इ. ।
रामचन्द्रः, ५० ।
वररुचिः, २४ ।
विश्श्वबन्धुशास्त्री, २९ ।
विष्णुमित्त्रः, १२, १३, १८ इ. ।
वृषभदेवः, ७३ इ. ।
वेङ्कटरामः, २५, ३२ इ. ।
वेदतेजसम्, १८५ इ. ।
वैदिकाभरणम्, १८३ इ. ।
शङ्करपाण्डुरङ्गः, ३० ।
शम्भुमिश्श्रः, ५१ ।
शिवदत्तशर्मा दाधिमथः, २४१ ।
शौरिसूनुः, ३४, ३७ इ. ।
श्रीधरशास्त्री, २४ ।
श्रीनिवासाद्ध्वरीन्द्रः, ६२ ।
श्रीराजाघनपाठी, ६३, ६५ इ. ।
श्रीरामशर्मा, २२ ।
सनत्कुमारः, ८०८ ।
सर्वलक्क्षणमञ्जरी, ३५८ ।
साधुरामः, ५७ ।
सामश्श्रमि–सत्त्यव्व्रत–भट्टाचार्य्यः, २८ ।
सिद्धेश्श्वरवर्मा, ५४ इ. ।
सूर्यनारायणसूरावधानी, २४३ ।
सोमयार्य्यः, १४, ७४, २०४ इ. ।
स्वरपञ्चशती, ६६ ।
स्वराष्टकम्, ६६ ।
हरदत्तः, ९, २६ इ. ।
ह्विट्निः, २९, ६१३ इ. ।

सङ्केताः

आधार–ग्रन्थसम्बद्धाः सहायक–ग्रन्थसम्बद्धाः सामान्याश् च

तत्र आधार-ग्रन्थसम्बद्धास् तावत्

अ.प्रा.	अथर्वप्रातिशाख्यम्, दिल्ली, १९६८ ।
अ.शि.; अमो.शि.	अमोघानन्दिनी शिक्षा, शि. स., वारा., १८९३ ।
अष्टा.	अष्टाध्यायी (पाणिनीयव्याकरणम्) ।
आ.(त्रेय)शि.	आत्रेयशिक्षा, अमुद्रिता ।
आ.शि.; आपि.शि.	आपिशलशिक्षा(शिक्षासूत्राणि),अजमेरम्,२०२४।
आर.शि.	आरण्यशिक्षा, अमुद्रिता ।
आ(श्व).श्रौ.(सू.)	आश्वलायनश्रौतसूत्रम्, दिल्ली, १९८४–१९८५ ।
ऋक्त.; ऋ.त.	ऋक्तन्त्रम्, दिल्ली, १९७० ।
ऋ.प्रा.	ऋग्वेदप्रातिशाख्यम्, वारा., १९७० ।
का.श्रौ.(सू.)	कात्यायन–श्रौतसूत्रम्, वारा. १९८७ वै. ।
का.शि.	कात्यायनीयशिक्षा, शि. स., वारा., १८९३ ।
... ...	केशवीयकारिकावलिः (केशवीयशिक्षा) ।
के.शि.(का.)	केशवीयशिक्षा(कारिकावलिः),शि.स.,वारा.,१८९३।
कौ.अ.	कौटलीयार्थशास्त्रम्, मैसुरम्, १९६० ।
कौ.शि.	कौहलीय(कौहडेय)शिक्षा, JVS,II–1(1935) ।
गौ.शि.	गौतमीयशिक्षा, शि.स., वारा., १८९३ ।
च.सं.	चरकसंहिता, पुनर्मुद्रिता, वारा., १९८४ ।
च.सं वि.(मा[न])स्था.	चरकसंहिताविमानस्स्थानम् ।
च.सं.सि(द्धि).	चरकसंहितासिद्धिस्स्थानम् ।
च.सं.सू.	चरकसंहितासूत्रस्स्थानम् ।
च.व्यू.	चरणव्यूहसूत्रम्(शौनककृतम्), वारा., १९३८ ।
... ...	चान्द्रवर्णसूत्रम्(शिक्षासूत्राणि), अजमेरम्, २०२४ ।
चा.शि.; चारा.शि.	चारायणीयशिक्षा, पूर्वममुद्रिता ।
छ.शा.	छन्दश्शास्त्रम्, पुनर्मुद्रितम्, दिल्ली, १९८१ ।

जै.ध.मी.सू.	जैमिनीयधर्ममीमांसासूत्तरम्,आन., पुण्य.,१९५३ ।
तै.आ.	तैत्तिरीयारण्यकम्, आन., पुण्य.,१९६७–१९६९ ।
तै.उ.	तैत्तिरीयोपनिषत् (शङ्करादिव्याख्यासहिता) ।
तै.प्रा.	तैत्तिरीयप्रातिशाख्यम्, मैसुरम्, १९०६ ।
द.वि.	(अथर्ववेदीय–) दन्त्योष्ठविधिः, लवपुरम्,१९७७वै. ।
ध.मी.(सू.);	धर्ममी.धर्ममीमांसासूत्तरम् (जैमिनीयम्) ।
ना.शा.	नाट्यशास्त्रम्, दिल्ली, १९८१–१९८४ ।
ना.शि.	नारदीयशिक्षा, दतिया, मद्ध्यप्रदेशः, २०२१ ।
प.सू.; प.सू.शि.	परिभाषाङ्कसूत्तरशिक्षा, शि.स., वारा., १८९३ ।
पा.व्या.भा.	पाणिनीयव्याकरणभाष्यम्(महाभाष्यम्),दिल्ली,१९६७।
पा.शि.	पाणिनीयशिक्षा, शि.स., वारा., १८९३ ।
पा.गृ.(सू.)	पारस्करगृह्ययसूत्तरम्, मुम्बइ, १९१७ ।
पारा.शि.	पाराशरी शिक्षा, शि.स., वारा., १८९३ ।
पारिशि.	पारिशिक्षा, पूर्वममुद्द्रिता ।
पि.छ.सू.	पिङ्गलच्छन्दस्सूत्तरम् (छन्दश्शास्त्रम्) ।
प्र.सू.	प्रतिज्ञासूत्तरम्, शु.य.प्रा., वारा., १८८८ ।
प्र.शा.	प्रत्त्यक्षशारीरम्(१–३भागाः),कलिकाता,१९९२वै.।
प्रा.प्र.शि.	प्रातिशाख्यप्रदीपशिक्षा, शि.स., वारा., १८९३ ।
... ...	फिट्सूत्तरम्, पुण्य., १९६७ ।
बृ.दे.	बृहद्देवता, वारा., १९६५ ।
भा.सू.	भाषिकसूत्तरम्, होशियारपुरम्, १९७५ ।
भे.सं.(चिकित्सा)	भेड(भेल)संहिता(चिकित्सास्स्थानम्), कलिकाता, १९२१ ।
मनु.	मनुस्स्मृतिः, मुम्बइ, १९४६ ।
मल्ल.शि.; म.श.शि.	मल्लशर्मशिक्षा, शि.स., वारा., १८९३ ।
माण्डव्यशि.	माण्डव्यशिक्षा, शि.स., वारा., १८९३ ।
माण्.शि., मा.शि.	माण्डूकी शिक्षा, शि.स., वारा., १८९३ ।
माद्ध्य.शि.	माद्ध्यन्दिनीयशिक्षा, शि.स., वारा., १८९३ ।
मु.उ.	मुण्डकोपनिषद्, शङ्कर–ग्रन्थावलिः, दिल्ली, १९६४ ।
या.; या.शि.	याज्ञवल्क्यशिक्षा, शि.स., वारा., १८९३ ।
ल.अ(मो).शि.	लघ्वमोघाननन्दिनी शिक्षा, शि.स., वारा., १८९३ ।

ल(घु).मा.शि.	लघुमाद्ध्यन्दिनीयशिक्षा, शि.स., वारा., १८९३।
लो.शि.	लोमशीयशिक्षा, शि.स.,वारा., १८९३।
... ...	वर्णपटलम्, अथर्वपरिशिष्ट(ानि), वारा., १९७६।
व.([र.]प्र.)शि.	वर्णरत्नप्रदीपिका शिक्षा,शि.स.,वारा., १८९३।
व.प्र.प.	(वर्णोच्चारण-प्रकार-सन्धि-विवृति-)स्वरभक्ति-लक्षण-परिशिष्टशिक्षा,शि.स.,वारा.,१८९३।
... ...	व्याडिशिक्षा(विकृतिवल्ली), वे.वि.ल.सं., पुण्य., १९७८।
व्या.शि.	व्यासशिक्षा, वारा. १९७६।
शम्भुशि; .श.शि.	शम्भुशिक्षा; अमुद्द्रिता।
शु.य.प्रा.	शुक्लयजुर्वेदप्रातिशाख्यम्, वारा. १९७५।
शु.य.प्रा.म.	शु.य.प्रा. मद्द्रासस्संस्करणम्, १९३४।
शु.य.प्रा.यु.	शु.य.प्रा. युगलकिशोरपाठक(व्यास)संस्करणम्, वारा. १८८८।
शै.शि.	शैशिरीयशिक्षा, JVS, II-2, Lahore, 1935.
शौ.च.(अ.)	शौनकीयचतुरद्ध्यायिका, वारा. १९६२।
स(म्).(प्र.)शि.	सम्प्रदायप्रबोधिनी शिक्षा, वाराणसी।
सर्व.शि.; स.स.शि.	सर्वसम्मतशिक्षा, पूर्वममुद्द्रिता।
सा.त.	सामतन्त्रम्, काशिहिन्दुविश्वविद्द्यालयः, १९६१।
सुश्श्रुत.,सु.सं.	सुश्श्रुतसंहिता, मुम्बइ, १९३१।
स्वरभक्तिशि.	स्वरभक्तिलक्षणपरिशिष्टशिक्षा, शि.स., वारा., १८९३।
स्वरा.शि.	स्वराङ्कुशशिक्षा, शि.स., वारा., १८९३।

अथ सहायक-ग्रन्थसम्बद्धाः

अथ.प.; अथर्वप(रि).	अथर्वपरिशिष्ट(ानि), वारा. १९७६।
अ.प्रा.भा.	अथर्वप्रातिशाख्यभाष्यम्।
अनु.	अनुशासनपर्व(महाभारतस्य)।
अ.को.	अमरकोशः, वारा. १९७०।
अ.हृ.	अष्टाङ्गहृदयम्, पुनर्मुद्द्रितम्, वारा. १९८२।
अ.हृ.सू.स्था.	अष्टाङ्गहृदयसूत्रस्स्थानम्।

आ.तै.कृ.य.वे.सं.	आत्त्रेयतैत्तिरीयकृष्णयजुर्वेदसंहिता (तैत्तिरीयसंहिता)।
आदि.	आदिपर्व (महाभारतस्य)।
आ(प).ध.(सू.)	आपस्तम्बधर्मसूत्रम्, वारा. १९६९।
आ.सं.	आरण्यसंहिता, कलिकाता, १८९१।
आश्श्व.गृ.(सू.)	आश्श्वलायनगृह्ययसूत्रम्, अड्ड्यारम्, १९८०।
आ.सू.	आह्नूनिकसूत्रावलिः, मुम्बइ, १९२३।
उ.रा.च.	उत्तररामचरितम्, वारा. २०१९।
ऋ.त.वृ.	ऋक्तन्त्रवृत्तिः, ऋक्तन्त्रम्, दिल्ली, १९७०।
ऋ.त.सा.स.	ऋक्तन्त्रपरिशिष्टस्स्थसामवेदसर्वानुक्रमणी, ऋक्तन्त्रम्, दिल्ली, १९७०।
... ...	ऋग्वर्णक्रमलक्षणव्याख्या,अड्ड्यारम्,१९५९।
ऋ.खि.	ऋग्वेदखिलानि, ऋग्वेदसंहिता,पुण्य., १९४६।
ऋ.(वे.)घ.(सा.)	ऋग्वेदघनसारः, श्रीरङ्गम्, १९६६।
ऋ.प्रा.प.	ऋग्वेदप्रातिशाख्य(एक परिशीलन), वारा., १९७२।
ऋ.प्रा.भू.	ऋग्वेदप्रातिशाख्यभूमिका, ऋ.प्रा., वारा. १९७०।
ऋ.प्रा.व.(वि.)वृ.	ऋ.प्रा. वर्गद्द्वय–(विष्णुमित्त्र-)वृत्तिः, वारा., १९७०।
ऋ.प्रा.(उ.)भा.	ऋ.प्रा. उव्वटभाष्यम्।
ऋ.प्रा.व्या.	ऋ.प्रा. व्याख्या(उव्वटभाष्यम्)।
ऋ.वे.भा.भू.	ऋग्वेदभाष्यभूमिका, ऋ.सं., पुण्य. १९७२।
ऋ.;ऋग्.;ऋ.सं.	ऋग्वेदसंहिता, अजमेरम्, १९५२.;पारडी, १९८९।
... ...	ऐतरेयब्राह्मणम्, आन., पुण्य. १९७९।
ऐ.आ.	ऐतरेयारण्यकम्, आन., पुण्य. १९५९।
कण्वस्मृ.	कण्वस्मृतिः, स्मृतिसन्दर्भः, कलिकाता, २०१२।
... ...	कर्मप्रदीपाख्या गोभिलस्स्मृतिः(कात्त्यायन-स्स्मृतिः), स्मृतिसन्दर्भः, कलिकाता, २००९।
का.कृ.य.सं.	काठक-(कृष्णयजुर्वेद-)संहिता, पारडी, १९४२।
का.(वा.)बृ.उ.	काण्ववाजसनेयिबृहदारण्यकोपनिषद् (बृहदारण्यकोपनिद्)।
का.(वा.शु.य.वे. म.ब्र.य.)सं.	काण्व-(वाजसनेयिशुक्लयजुर्वेदमन्त्रब्रह्ममयज्ञ-)संहिता, पारडी, १९४०।

... ...	कातन्त्रम् (बालशिक्षा), जोधपुरम्, १९६८।
... ...	कातन्त्रवृत्तिः, (दुर्गसिंहकृता), कलिकाता।
का.प्रा.सू.व्या.	कात्त्यायनप्रातिशाख्यसूत्रव्याख्या (अनन्तकृता)।
का.श्रौ.सू.स.वृ.	का. श्रौतसूत्रस्य सरला वृत्तिः, वारा., १९८७वै.।
... ...	काव्यप्रकाशः, वारा., १९८०।
का.मी.	काव्यमीमांसा, वारा., २०१६।
... ...	काव्यालङ्कारः (भामहकृतः), पाटलिपुत्रम्, २०१९।
... ...	काव्यालङ्कारः (वक्रोक्तिजीवितम्), दिल्ली, २०१२।
का.वि.	काशिकाविवरणपञ्जिका (न्यासः), वारा., १९६५–१९६७।
... ...	किरातार्जुनीयम्, मुम्बइ, १९५४।
कु.स.	कुमारसम्भवम्, मुम्बइ, १९१९।
कौ.सा.(वे.)सं.	(कौथुम) सामवेदसंहिता, पारडी, २०१५।
कौ.सामगानसं.	कौथुमसामवेदगानसंहिता (प्रकृतिगानम्), पारडी, २०१५; ऊहगानम्, ऊह्यगानञ्च, वारा., २०२३)
कौ.सा.आ.सं.	कौथुमसामवेदाऽऽरण्यकसंहिता, कलिकाता, १८९१।
... ...	कौशिकचरणव्यूहः अथर्वप., वारा., १९७६।
खि.	खिलानि (ऋग्वेदखिलानि) पुण्य., १९४६।
गी.	गीता (महाभारतभीष्मपर्वान्तर्गता)।
गोपथब्रा., गो.ब्रा.	गोपथब्राह्मणम्, दिल्ली, १९७२।
गौ.ध.सू.	गौतमधर्मसूत्रम्, आन., पुण्य., १९३१।
चा.नी.(द).	चाणक्यनीतिदर्पणः, श्यामकाशिप्रेस्, मथुरा।
... ...	छन्दोमञ्जरीप्रभा, छन्दोमञ्जरी, वारा., २०१२।
छा.उ.	छान्दोग्योपनिषद् (शङ्करग्रन्थावलिः), दिल्ली, १९६४।
छा.उ.वि.	छान्दोग्योपनिषद्विवरणम् (शङ्करकृतम्)।
जै.उ.ब्रा.	जैमिनीयोपनिषद्ब्राह्मणम्, लवपुरम्, १९७७ वै.।
त.वा.	तन्त्र-वार्तिकम्, आन., पुण्य., १९७२।
तै.प्रा.क्र.स.	तै.प्रा. व्याख्या माहिषेयच्छन्दोभाषा (पदक्रमसदनम्), तै.प्रा., (पुनर्मुद्रितम्) दिल्ली, १९८२।
तै.प्रा.त्रि(भा).र.	तै.प्रा. त्रिभाष्यरत्नम्, तै.प्रा., मैसुरम्, १९०६।
तै.प्रा.भू.	तैत्तिरीयप्रातिशाख्यभूमिका, तै.प्रा., मैसुरम्, १९०६।
तै.प्रा.वै.आ. (टी.[व्या.])	तैत्तिरीयप्रातिशाख्यव्याख्यानम्, वैदिकाभरणम्, तै.प्रा., मैसुरम्, १९०६।

तै.प्रा.व्या.	तै.प्रा.ह्विट्निव्याख्या,पुनर्मुद्रिता,दिल्ली,१९७३।
तै.ब्रा.	तैत्तिरीयब्राह्मणम्, आन., पुण्य., १९३४।
तै.सं.	तैत्तिरीयसंहिता, आन., पुण्य., १९५९।
तै.आ.व्या.	तैत्तिरीयारण्यकव्याख्या (सायणकृता)।
तै.उ.व्या.	तैत्तिरीयोपनिषद्व्याख्या (शङ्करादिकृता)।
द.स्मृ.	दक्षस्मृतिः, स्मृतीनां समुच्चयः, आन., १९२९।
... ...	धम्मपद, लखनऊ, १९६५।
ध.मी.सू.भा.	धर्ममीमांसासूत्तरभाष्यम् (शबरकृतम्)।
... ...	धातुकाव्यव्याख्या,(धातुका.),त्रिवेन्द्रम्,१९७०।
ध्व.	ध्वन्न्यालोकः, वारा. २०२१।
ना.शा.अ(भि).भा.	नाट्यशास्त्राभिनवभारती, दिल्ली, १९८१-१९८४।
ना.शि.शो.व्या.	नारदीयशिक्षाशोभाकरव्याख्या,ना.शि.,दतिया,२०२१।
... ...	निरुक्तम्, अजमेरम्, २०१४।
नि.दु.वृ.	निरुक्तदुर्गवृत्तिः, आन., १९२१।
नी.वा.	नीतिवाक्यामृतम्, कौ.अ., मैसुरम्, १९६०।
ने.श.को.प्र.	नेपालिशब्दकोशप्रस्तावना, काठमाण्डु, २०१९।
प.त.	पञ्चतन्त्रम्, दिल्ली, १९६९।
प.त.अप.	पञ्चतन्त्रे अपरीक्षितकारकम्।
प.त.काको.	पञ्चतन्त्रे काकोलूकीयम्।
प.त.मि.भे.	पञ्चतन्त्रे मित्रभेदः।
... ...	पञ्चदशीव्याख्या (रामकृष्णकृता), मुम्बइ, १९४९।
... ...	पत्थ्या स्वस्तिः, जोधपुरम्, १९६९।
... ...	पराशरस्मृतिः, स्मृतिसन्दर्भः, कलिकाता, २००९।
पा.धा.पा.	पाणिनीयधातुपाठः, सि.कौ., मुम्बइ, १९०९।
पा.व्या.भा.दी.	पा.व्या.भा. दीपिका (महाभाष्यटीका),वारा.,२०२१।
पा.व्या.भा.प्र.	पाणिनीयव्याकरणभाष्यप्रदीपः।
पा.व्या.भा.प्र.उ.	पाणिनीयव्याकरणभाष्यप्रदीपोद्द्योतः।
पा.शि.प.	पाणिनीयशिक्षापञ्जिका, वारा.,२००५।
पा.शि.प्र.	पाणिनीयशिक्षाप्रकाशः, शि.स., वारा., १८९३।
पा.शि.प्र.	पाणिनीयशिक्षाप्रकाशिका, वारा.,१९९० वै.।
पा.शि.प्रदी.	पाणिनीयशिक्षाप्रदीपः, वारा., १९४७।
पा.शि.अभि.	पाणिनीयशिक्षाऽभिनवराजलक्ष्मीः,वारा., २००५।

पा.शि.शि.स.स. पाणिनीयशिक्षायाश् शिक्षान्तरैस् सह समीक्षा, वारा., १९७२ ।

पु.वे.स.स.अ. पुराणगत वेदविषयक सामग्रीका समीक्षात्मक अद्ध्ययन, प्रयाग, १९६५ ।

पै.म.सं. पैप्पलाद(अथर्ववेदमन्तर-)संहिता, लवपुरम्, १९३६ ।

... ... प्रजापतिस्स्मृतिः, स्मृतीनां समुच्चयः,आन.,१९२९ ।

प्र.सू.(अ.)भा. प्रतिज्ञासूत्रानन्तभाष्यम्,शु.य.प्रा.,वारा.,१८८८।

प्र.सि.कौ. प्रतिसंस्कृता सिद्धान्तकौमुदी,काष्ठमण्डपम्,२०१५।

प्रा.ल.सू. प्राकृतलक्षणसूत्रम्(प्राकृतप्रकाशः),वारा.,२००६।

प्रा.भा.शि.प. प्राचीन भारतीय शिक्षणपद्धति, वारा., १९६८ ।

प्रा.प्र.पा.श.आ.अ. प्रातिशाख्योँ मेँ प्रयुक्त पारिभाषिक शब्दोँ का आलोचनात्मक अद्ध्ययन, वारा. १९७२ ।

बृ.श.शे. बृहच्छब्देन्दुशेखरः(१–३ भागाः), वारा., १९६० ।

... ... बृहत्पराशरस्स्मृतिः,स्मृतिसन्दर्भः,कलिकाता,२००९।

बृ.उ. बृहदारण्यकोपनिषद्(का.वा. बृहदारण्यकोपनिषद्)।

... ... बोधायनगृह्ययसूत्रम्,पुनर्मुद्रितम्,दिल्ली,१९८२।

बौ.ध.सू. बौधायनधर्मसूत्रम्, वारा., १९७२ ।

ब्र.मी.सू. ब्रह्मम-(मीमांसा-)सूत्रम् ।

ब्र.मी.सू.शा.मी.भा. ब्रह्ममीमांसासूत्रशारीरकमीमांसाभाष्यम् (ब्रह्मसूत्रशाङ्करभाष्यम्) ।

... ... ब्रह्मसूत्रवृत्तिः, मिताक्षरा,मद्रासम्,१९५० ।

भ.का.सु. भट्टिकाव्यसुधारणा, भ.का., मुम्बइ, १९२८ ।

... ... भागवतपुराणम्, गोरक्षपुरम्, २००८ ।

... ... भावप्रकाशः, वाराणसी, १९६८–१९७० ।

... ... भाषावृत्तिः, वारा.,१८७१ ।

म.कौ. मद्ध्यकौमुदी., वारा.,१९५६ ।

... ... मन्वर्थमुक्तावलिः, मनुस्स्मृतिः, मुम्बइ, १९४६ ।

म.भा. महाभारतम्,चित्तशालाप्रेस्,पुण्य. १९२९–१९३३ ।

म.भा.अनु. महाभारते अनुशासनपर्व ।

म.भा.आ.(दि)प. महाभारते आदिपर्व ।

म.भा.उ.(द्द्योग)प.महाभारते उद्द्योगपर्व ।

म.भा.वन.	महाभारते वनपर्व ।
म.भा.दी.	महाभाष्यटीका(दीपिका), वारा., २०२१ ।
म.स्तो.टी.	महिम्नस्स्तोत्तरटीका, वारा., १९६४ ।
... ...	मात्तरालक्षणम्,(पञ्चविधसूत्तरम्),तिरुपतिः,१९७०।
मा.सं.पद.परि.	माद्ध्यन्दिनसंहितायाः पदपाठः, परिशिष्टम्, हरयाणा, २०२८ ।
मा.वा.बृ.उ.	माद्ध्यन्दिनीयवाजसनेयिबृहदारण्यकोपनिषद्, मा.वा शतपथब्राह्मणम्, मुम्बइ, १९९७ वै. ।
मा.(वा.)श.ब्रा.	माद्ध्यन्दिनीयवाजसनेयिशतपथब्राह्मणम्, (१–५ भागाः),मुम्बइ, १९९७ वै. ।
मा.(वा.शु.य.वे. म.[ब्र.य.])सं.	माद्ध्यन्दिनीय-(वाजसनेयिशुक्लयजुर्वेदमन्तत्र-[ब्रह्मम-यज्ज्ञ-])संहिता,वारा.,१९९२वै.; मुम्बइ,१९५०।
मा.वा.शु.य. वे.सं.परि.	माद्ध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदसंहितापरिशिष्टानि, वारा.,१९९२वै.; मुम्बइ,१९५०;पुनर्मुद्द्रणे, दिल्ली, १९७१ ।
मा.धा.वृ.	माधवीयधातुवृत्तिः, वारा.,१९६४ ।
माल.	मालविकाग्निमित्तरम्, वारा.,१९७१ ।
मी.अनु.	मीमांसानुक्रमणिका, वारा., १९८७ वै. ।
... ...	मीमांसान्यायप्रकाशः, पुण्य ,१९७२ ।
मे.दू.	मेघदूतम्(कालिदासग्रन्थावलिः), वारा., १९७८ ।
मै.(कृ.य.)सं.	मैत्तरायणीय-(कृष्णयजुर्वेद-)संहिता,पारडी.,१९४२ ।
मै.प्रा.	मैत्तरायणीयप्रातिशाख्यम्, अमुद्द्रितम् ।
मै.उ.	मैत्तरायणीयोपनिषद्,उपनिषत्सङ्ग्रहः,दिल्ली,१९७०।
य.वे.	यजुर्वेदः (मा.वा.शु.य.वे.म.ब्र.य.सं.) ।
या.शि.शि.व.	याज्ज्ञवल्क्यशिक्षा शिक्षावल्ली विवृतिः, वारा., २०१९ ।
याज्ज्ञ.	याज्ज्ञवल्क्यस्स्मृतिः, वारा.,२०२४ ।
या.स्मृ.मि.	याज्ज्ञवल्क्यस्स्मृतिमिताक्षरा, वारा., २०२४ ।
ल.श.शे.	लघुशब्देन्दुशेखरः(भैरवीयुतः)[द्वौ भागौ] वारा., १९८३ वै. ।
ल.श.शे.वै.सि.कौ. सा.स्व.प्र.व्या.	लघुशब्देन्दुशेखराख्या वैयाकरणसिद्धान्तकौमुदी-साधारण-स्वर-प्रकरण-व्याख्या ।
ला.श्रौ.सू.	लाट्ट्यायनश्रौतसूत्तरम्,पुनर्मुद्द्रितम्,दिल्ली,१९८२।

लि.अ.	लिच्छविकालका अभिलेख, काठमाण्डु, २०३० ।
व.शि.	वर्णोच्चारणशिक्षा(वेदाङ्गप्रकाशः),अजमेरम्,२०१८।
व.स्मृ.	वसिष्ठस्मृतिः, स्मृतीनां समुच्चयः, आन., १९२९ ।
वा.प.	वाक्यपदीयम् (१–५भागाः), वारा.,१९६३–१९७७ ।
वा.प.ब्र.का.स्वो.वृ.	वाक्यपदीयब्रह्मकाण्डस्वोपज्ञवृत्तिः,वारा.१९६३।
वा.प.वृ.	वाक्यपदीय(ब्रह्मकाण्ड-)वृषभदेवव्याख्या, पुण्य. १९६६ ।
... ...	वाधूलस्मृतिः, स्मृतिसन्दर्भः, कलिकाता, २०१२ ।
वा.सं.वि.वि.प.नि.	वाराणसेयसंस्कृतवि.वि.परीक्षानियमावलिः,१९६७ ।
वा.रा.	वाल्मीकिरामायणम्, वारा., १९५७ ।
वा.रा.सु.का.	वाल्मीकिरामायणसुन्दरकाण्डम् ।
... ...	वासुदेवरसानन्दः, प्रयागः, १९८२ वै. ।
विष्णुपु.	विष्णुपुराणम्, गोरक्षपुरम्, २०४१ ।
वी.मि.	वीरमित्त्रोदयः, वारा., १९०६–१९२९ ।
वी.मि.आ.प्र.	वीरमित्त्रोदये आह्निकप्रकाशः ।
वी.मि.प.प्र.	वीरमित्त्रोदये परिभाषाप्रकाशः ।
वी.मि.सं.(सँ.)प्र.	वीरमित्त्रोदये संस्कारप्रकाशः ।
वे.वि.ल.स.	वेदविकृतिलक्षणसङ्ग्रहः, पुण्य., १९७८ ।
... ...	वेदविकृतिविवरणम्, वारा.,१९५५ ।
... ...	वेदशाखापर्यालोचनञ्च कात्त्यायनकृतञ्च चरणव्यूह-परिशिष्टञ्च, वारा., २०४२ ।
वे.प्र.व.शि.भू.	वेदाङ्गप्रकाश–वर्णोच्चारणशिक्षा–भूमिका, अजमेरम्, २०१८ ।
... ...	वेदान्तकल्पतरुः, ब्रह्ममसूत्त्रशाङ्करभाष्यम्, मुम्बइ, १९३८ ।
... ...	वैजयन्तीकोषः, वारा., २०२८ ।
वै.वा.इ.	वैदिकवाङ्मयका इतिहास,प्रथमभाग,अमृतसर, २०१३।
वै.स्व.मी.	वैदिकस्वरमीमांसा(द्वितीयसंस्करण),अमृतसर ।
वै.स्व.मी.	वैदिकस्वरितमीमांसा, होशियारपुर, १९७२ ।
वै.आ.	वैदिकाभरणम्, तै.प्रा., मैसुरम्, १९०६ ।
वै.सि.कौ.	वैयाकरणसिद्धान्तकौमुदी, मुम्बइ, १९०९ ।
वै.सि.कौ.ह.पु.	वैयाकरणसिद्धान्तकौमुदीहलन्तपुलँलिङ्गप्रकरणम् ।
... ...	वैयासकन्यायमाला, आन., पुण्य., १९६६ ।

... ...	व्याकरणचन्द्रोदय,(१–५भाग),दिल्ली.१९७१–१९७३।
व्या.शि.(वे.तै.)व्या.	व्यासशिक्षा-(वेदतैजस-)व्याख्या, वारा.,१९७६ ।
व्या.सु.सङ्ग.	व्याससुभाषितसङ्ग्रहः, वारा.,२०२६ ।
व्या.स्मृ.	व्याससस्मृतिः, स्स्मृतीनां समुच्चयः, आन., १९२९ ।
श.स्मृ.	शङ्खस्स्मृतिः, स्मृतीनां समुच्चयः, आन., १९२९ ।
श.ब्रा.	शतपथब्राह्मणम्(माद्ध्यदिनशाखीयम्)भागद्द्वयात्मकम्, वारा., १९९४, १९९७ वै.।
श.ब्रा.उ.	शतपथब्राह्मणोपोद्घातः, मुम्बइ, १९९७ वै.।
श.कौ.	शब्दकौस्तुभः, नेपालि-सौभाग्य-पुस्तकालयः, वारा.।
शा.ऋ.(म.)सं.	(शाकल)ऋग्वेद(मन्त्र)संहिता, पुण्य., १९७२ ।
शाङ्ख.ब्रा.	शाङ्खायनब्राह्मणम्, आन., पुण्य. १९७७ ।
शाङ्ख.आ.	शाङ्खायनारण्यकम्, आन., पुण्य. १९२२ ।
... ...	शाण्डिल्योपनिषद्,उपनिषत्सङ्ग्रहः,दिल्ली,१९७० ।
शान्ति.	शान्तिपर्व(महाभारतस्य) ।
शि.व.	शिशुपालवधम्, वारा., २०१८ ।
शि.व.वि.	शिक्षावल्ली विवृतिः, या.शि., वारा., २०१९ ।
शि.स.	शिक्षासङ्ग्रहः(श्रीमद्-याज्ञवल्क्यादिमहर्षिप्रणीतश् शिक्षासङ्ग्रहः),वारा.,१८८९–१८९३।
शि.स.वि.	शिक्षासङ्ग्रहविज्ञापनम्, शि.स., वारा., १८९३ ।
शि.सू.भू.	शिक्षासूत्रभूमिका,शिक्षासूत्राणि,अजमेरम्,२०२४।
शु.नी.	शुक्रनीतिः, मुम्बइ, १९८२ वै. ।
शु.य.प्रा.की.प्र.टि.	शु.य.प्रा. कीर्तिप्रकाशटिप्पणी, वारा., १८८८ ।
शु.य.ज्यो.	शुक्लयजुःप्रातिशाख्यज्योत्स्ना, वारा., १९८९ ।
शु.य.प्रा.भू.	शुक्लयजुःप्रातिशाख्यभूमिका,शु.य.प्रा.,वारा.,१९७५।
शु.य.प्रा.वि.	शुक्लयजुःप्रातिशाख्यविज्ञापनम्, शु.य.प्रा., वारा., १८८८ ।
शु.य.वि.सू.	शुक्लयजुर्विधानसूत्रम्, मुम्बइ, १९४३ ।
शु.य.वे.	शुक्लयजुर्वेदः(मा.वा.शुक्लयजुर्वेदसंहिता) ।
शु.य.प्रा.व्या	शुक्लयजुर्वेदप्रातिशाख्यव्याख्या ।
शु.य.प्रा.अ.भा.	शु.य.प्रातिशाख्यानन्तभाष्यम्, मद्द्रासम्,१९३४।
शु.य(वे.)प्रा.(उ.)भा.	शु.य.प्रातिशाख्योव्वटभाष्यम्,मद्द्रासम्,१९३४।
शु.य.वे.सं.परि.	शुक्लयजुर्वेदसंहितापरिशिष्टानि,वारा., १९९२ वै.; मुम्बइ, १९५०; पुनर्मुद्द्रितानि,दिल्ली,१९७१ ।

शौ.च.टि.	शौ.चतुरद्ध्यायिकाटिप्पणी(ह्विट्निकृता)वारा.,१९६२।
शौ.च.भा.	शौनकीयचतुरद्ध्यायिकाभाष्यम्,शौ.च.,वारा.,१९६२।
शौ.च.अ.वृ.	शौनकीयचतुरद्ध्यायिकावृत्तिः,शौ.च.,वारा.,१९६२।
शौ.अ.(वे.म.)सं.	शौनकीयथर्ववेदमन्त्रसंहिता(अथर्ववेदसंहिता), अजमेरम्, १९५७।
श्वे.उ.	श्वेताश्वतरोपनिषद्, गोरक्षपुरम्, २०१६।
श्लो.वा.(वाक्य.)	श्लोकवार्तिकम्(वाक्याधिकरणम्),वारा.,२०३४।
सं.व्या.शा.इ.	संस्कृत व्याकरणशास्त्रका इतिहास,हरयाणा,२०३०।
... ...	संहितोपनिषद्ब्राह्मणम्, तिरुपतिः, १९६५।
सङ्ग.शा.	सङ्गीतशारीरकम्, वारा.,१९८१ वै.।
सङ्ग.वि.वि.	सङ्गीतका विकास और विभूतियाँ, वारा., १९७६।
सत्त्या.श्रौ.(सू.)	सत्त्याषाढश्रौतसूत्रम्, आन., १९०६-१९२८।
सा.त.भू.	सामतन्त्रभूमिका, सामतन्त्रम्, वारा., १९६१।
सि.हे.श.	(सिद्धहेमशब्दानुशासनम्)प्राकृतव्याकरणम्, पुण्य., १९५८।
सि.कौ.	सिद्धान्तकौमुदी, मुम्बइ, १९६६ वै.।
... ...	सीतोपनिषद्, उपनिषत्सङ्ग्रहः, दिल्ली, १९७०।
सु.र.भा.वै.प्र.	सुभाषितरत्नभाण्डागारे वैयाकरणप्रशंसा, मुम्बइ, १९३५।
सु.र.भा.सा.नी.	सुभाषितरत्नभाण्डागारे सामान्यनीतिप्रकरणम्।
सुभा.	सुभाषितावलिः, पुण्य.,१९६१।
... ...	स्कन्दपुराण-सूतसंहिता-यज्ञवैभवखण्डोपरिभागे सूतगीता, आन., १९२४-१९२५।
स्मृ.कौ.	स्मृतिकौस्तुभः, पुनर्मुद्रितः, दिल्ली, १९८५।
... ...	स्मृतिसन्दर्भः(१-६भागाः),कलिकाता,२००९-२०१३।
... ...	स्वरप्रक्रिया(-टीका), आन.,पुण्य., १९७४।
... ...	हरिवंशम्(महाभारतखिलभागरूपम्), गोरक्षपुरम्, २०२४।
हि.उ.	हितोपदेशः, दिल्ली, १९६७।
हि.उ.प्र.	हितोपदेशे प्रस्ताविका।
हि.उ.मित्र.	हितोपदेशे मित्रलाभः।
A.Pr.	Atharvapratisakhya, Delhi, 1968.
A.Pr.(Sau.c.)	Atharvavedapratisakhya or Saunakiya-Chaturadhyayika, Varanasi, 1962.

C.G.P.L. Comparative Grammar of the Prakrit Languages, by Dr. R. Pischel, translated by Subhadra Jha, Varanasi, 1957.
CSIPOIG. Critical Studies in the Phonetic Observations of Indian Grammarians, Delhi, 1961.
CSKSP. Critical Studies on Katyayana's Suklayajurveda Pratisakhya, Madras, 1935.
CSSP. A Critical Study of Sanskrit Phonetics, Varanasi, 1972.
.... Dictionary of Sanskrit Grammar, Baroda, 1977.
E.A. Encyclopaedia Americana, 1965.
E.B. Encyclopaedia Britanica, 1969.
JVS. The Journal of Vedic Studies, Lahore. (1934–35)
JLS(I) The Journal of the Linguistic Society of India.
L.R.S. Laghuriktantrasangraha, Lahore, 1940.
PAI, PIAI Phonetics in Ancient India, Oxford, 1953.
R.T.Intro. Riktantra, Introduction, Delhi, 1970.
S.H.P. Sanskrit Historical Phonology, U.S.A., 1946.

अथ सामान्न्याः

अ.=अद्ध्यायः।**अनु.**=अनुवाकः।**आन.**=आनन्दाश्रमः।**आ.**=आह्नन्निकम्। **इ.**=इत्त्यादिकम्। **उ.**=उत्तरार्चिकम्। **का.**=काण्व–। **काशि.**=काशिसंस्करणम्। **क्रै.**=क्रैस्ताब्दाः। **चौ.**=चौखम्बा-।; **टि.**=टिप्पणी।**टी.**=टीका।**तृ.भा.**=तृतीयभाग।**दू.भा.**=दूसरा भाग। **द्र.**=द्रष्टव्य-। **द्वि.**=द्वितीय-। **नि.सा.**=निर्णयसागरप्रेस्। **निर्णय.**=निर्णयसागरसंस्करणम्।**पङ्क्ति.**=पङ्क्ति-। **पद्द्या.**=पद्द्यात्मक-। **प.भा.**=पहला भाग।**पा.**=पाद-। **पुण्य.**=पुण्यपत्तनम्। **पू.**=पूर्वार्चिकम्।**पृ.**=पृष्ठ-। **प्र.**=प्रकरणम्।**प्र.भा.**=प्रथमभाग-।**प्र.**=प्रपाठक-।**मा.**=माद्ध्यदिनीय-। **वारा.**=वाराणसी।**वा.**=वार्तिकम्। **वि.**=विवृतिः।**वृ.**=वृत्तिः। **वै.**=वैक्क्रमाब्दाः।**श्लो.**=श्लोकसङ्ख्या।**सा.भा.**=सायणभाष्यम्। **सू.**=सूत्त्रम्।
P.=Page. pp.=pages. Vol.=Volume.

ऋषि-वेद-ख-नेत्त्रैस् सं-सूच्च्ये वैक्क्रम-वत्सरे ।
सोपबन्धा सानुबन्धा शिक्क्षेयम् मुद्द्रिता शुभा ।।
२०४७।१२।२९

शुद्धिपत्रम्

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
(क)	१८	अतत्यन् ामेवा	अतत्यन्तमेवा
(क)	२२	मन ोश्	मनयोश्
(ख)	२०	ग्रन्थः	ग्रन्थः
(ग)	१	वीञ् चा ुसृतत्य	वीञ् चानुसृतत्य
(ग)	७	सि च्च का	सिच्छ्याका
(ग)	१८	क्रैस्ताब्दमा	क्रैस्ताब्दमाँ
(घ)	२	sanskrits	Sanskrit
(घ)	६	fualty	faulty
(घ)	१०–११	containts	contents
(घ)	१४	discribe	describe
(घ)	२५	concider-	consider-
(ङ)	६	genral	general
(ङ)	७	wo ks	works
(ङ)	१४	anusvara'	anusvara,
(ङ)	१५	y m s	yamas
(ङ)	१६	Sankrit	Sanskrit
(च)	७	bitween	between
(च)	९	follwing	following
(च)	१३	llke	like
(च)	१५	delt	dealt
(च)	२९	just fies	justifies
(इ)	१२	निरूणाय	निरूपणाय
(इ)	१४	स्स्पष्तया	स्स्पष्टतया
(ओ)	२८	गृह्ण्णन् तु	गृह्ण्णन्तु
(अं)	१९	१९-२९	१९-३०
(ङ)	२९	१९४	२९४
३६	११	संहिताया थकार	संहितायास् थकार
३९	९	अस्ति।	अस्ति (४।३।१०६)।
४०	५	शिक्क्षाशास्त्रविया	शिक्क्षाशास्त्रविषया
५८	४	सङ्गृहे	सङ्ग्रहे
६०	२७	स्वरितमेदाः	स्वरितभेदाः
६१	३०	चरण सम्बद्धा	चरणसम्बद्धा
६२	२५	भट्भास्करस्स्योल्लेखश्	भट्टभास्करस्स्योल्लेखश्

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
६६	५	तिरस्स्रोवृत्ति	तिस्स्रोवृत्ति
६६	८	युङ्क्ते विवक्क्षया	युङ्क्ते विवक्क्षया
६८	२४	स्यो लेखोऽपि	स्योल्लेखोऽपि
७०	२१	वेदी चरणव्व्यूहे	वेदीयचरणव्व्यूहे
७२	१९	मात्राभेदादि	मात्त्राभेदादि
७८	१४	विलिङ्घ्य	विलङ्घ्य
७८	२९	विस्तृता श् च कृत्त्वा	विस्तृताँश् च कृत्त्वा
८०	२९	कौ.शि.श्लो.	कौहलीयशिक्क्षायां श्लो.
८२	५	**(११) प्राचीनाश्**	**११. प्राचीनाश्**
८६	१८	प्युपोद्वलकम्।	प्युपोद्बलकम्।
८६	२१	ग्रन्न्थकाराश् च	ग्रंन्थकाराश् च
९०	१०	शिक्क्षाया पूर्वता	शिक्क्षायाः पूर्वता
९०	१९	श्रुतिप्प्रम ण	श्रुतिप्प्रमाण
९२	१७	योज्ज्योऽगदक्क्रमः	योज्ज्योऽगदक्क्रमः
९४	५	व्याकरणभाष्ये	व्याकरणभाष्ष्ये
९४	१०	विज्ज्नायाते	विज्ज्नायते
९४	२८	१. स्मृतिचनद्रिकायां	१. स्मृतिचन्द्रिकायां
९५	३०	तत्त्रैव भविष्ष्यपर्वणि	तत्त्रैव
९६	३	प्रविशत्येवेति	प्रविशत्त्येवेति
९८	१	प्राधान्न्य मूलकमेव	प्राधान्न्यमूलकमेव
९८	४	ब्याकरण-	व्याकरण-
९८	१०	ब्रह्म्मलोकं स	ब्रह्म्मलोकं स
१०१	१२	वेदसम्प्रदायज्ज्नत	वेदसम्प्रदायज्ज्नता
१०१	२३	शिक्क्षाणब्भ्यासा	शिक्क्षणाब्भ्यासा
१०१	२८	न तर्व बुद्ध्या	न तर्कबुद्ध्या
१०३	२२	तादृशी चेदवस्थ	तादृशी चेदवस्था
१०३	२३	सर्वे सँस्स्कृता-।	सर्वे सँस्कृताऽ-
१०५	४	तत्त्फनेन	तत्त्फलेन
१०६	२३	शिक्क्षाग्रन्थेब्भ्य[२]	शिक्क्षाग्रन्थेब्भ्य
१०६	२४	शिक्क्षादिष्ष्वपि[३]	शिक्क्षादिष्ष्वपि[२]
१०६	२८	केषु उपात्तेषु	श्लोकेषु उपात्तेषु
१०६	२९	र्यः ॥१८॥	कार्यः ॥१८॥
१०७	१४	न हि कुर्युः"	न हि कुर्युः"[३]
१०७	२५	स्वारात्	स्वरात्
१०७	२६	छायातपोपमम् ।२१॥[३]	छायातपोपमम् ॥२१॥[४]

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
१०७	२८	वक्तुमर्हति ॥२२॥[४]	वक्तुमर्हति ॥२२॥[५]
११०	२४	वसुन्धरा"[२]	वसुन्धरा"[४]
११०	२६	भवेत् ॥२७॥[४]	भवेत् ॥२७॥[५]
१११	१	कृतत्नवँ वेदं	कृतत्स्नवँ वेदं
११५	२२	तद्विद्द्यवृत्वँ	तद्विद्द्यवृत्तवँ
११७	१६	चोच्क्यते	चोच्च्यते
१२१	२८	जयति त्रिस् तावन्तञ्	जयति त्त्रिस्त् तावन्तञ्
१२७	शीर्षलेखे	उपक्करमे अधिकारिनिरूपणस्	उपक्करमेऽद्ध्ययनविधिनिरूपणम्
१२७	३१	काम.सू.	कामसू.
१३३	६	च नुसृतत्य	चानुसृतत्य
१३३	१०	ब्राहहँमणः	ब्राहहँमणः
१३३	१७	करतव्व्यम् वैदिक-	करतव्व्यवँ वैदिक-
१४४	१८	प्प्रतिभानमदुभुतम्।	प्प्रतिभानमद्भुतम्।
१५१	१७	मतत्रधानेन	मत्प्रधानेन
१५४	९	नितत्यमुसस्थितेन	नितत्यमुरसस्थितेन
१५९	१९	ब्राहहँमणास्स्तेषान्	ब्राहहँमणास्स्तेषान्
१५९	२३	ब्राहहँणास् सम्	ब्राहहँमणास् सम्
१६३	३०–३१	४. मनु. ८।३१७ (मनुस्स्मृतौ किञ्चित् पाठान्तरमस्ति)	४. मनु. ८।३१७
१६३	३१	५. तत्तैव ४।१७	५. तत्तैव ४।१७ (मनुस्स्मृतौ किञ्चित् पाठान्तरमसति)
१६६	२२	शब्दश् समुपशाम्म्यति।	शब्दस् समुपशाम्म्यति।
१७०	१८	प्रसिद्धा[३]।	प्रसिद्धा[१]।
१७०	३०	समासेनोपर्णितम्	समासेनोपवर्णितम्
१७१	१६	कृकाट शिरसि	कृकाटकशिरसि
१७१	१८	चतुष्टयय	चतुष्टयं
१७२	१६	रित्युच्च्यते	रित्त्युच्च्यते
१७४	२	तरम् मूलभीप्सितम्	तरमूलमभीप्सितम्
१७७	शीर्षलेखे	वर्णोत्पत्तिशारीराधिकारः	वर्णोत्पत्त्यधिकारः
१७७	९	वक्तत्रमापद्द्य मारुतः	वक्तत्रमापद्द्य मारुतः
१८०	१३	रक्तादिवर्णकया	रक्तादिवर्णिकया
१८१	१०	पञ्चमात् ॥५६॥[४]	पञ्चमात् ॥५५॥[४]
१८१	३२	त्रि.भा. र. २३।३।	त्रिभा. र. २३।३।
१८८	१९	च सस्तुतः ॥६०॥	च सस्तुतः ॥५८–५९॥

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
१८८	२१	यथामति ॥६१॥	यथामति ॥६०॥
१८९	२५	ऱप ह " ५ इति	ऱप ह)"५ इति
१९०	५	स्स्परशाः, अथान्-	स्स्परशाः, अथान्-
१९१	२	प्रतिपाद्द्यते ॥६२॥	प्रतिपाद्द्यते ॥६०॥
१९१	५	भिन्ना यथाथम् ॥६२॥	भिन्ना यथायथम् ॥६१॥
१९१	७	तथदधनाः ॥६३॥	तथदधनाः ॥६२॥
१९१	९	ततः ॥६४॥	ततः ॥६३॥
१९१	११	अपि ॥६५॥	अपि ॥६४॥
१९१—३११		॥६६॥—॥३३३॥	॥६५॥—॥३३२॥
१९६—३११		॥६२-६६॥—॥१३२-१३३॥	॥६१-६५॥—॥१३१-१३२॥
१९३	२३	तत्त्रसङ्गात्	तत्प्रसङ्गात्
१९८	१८	इकारोकार्य्योः	इकारोकारयोः
२००	३	प्वर्ते	प्वर्तते
२०६	१३	ऋकारस्स्वभाग-	ऋकारस्स्वरभाग-
२१४	१३	अभिहितीभूतस्स्य	अभिनिहितीभूतस्स्य
२२१	३०	६. ३।१३३।	५. ३।१३४।
२२१	३०	५. १५।१।	६. १५।१।
२२४	२९	देवा २॥ऽ	देवाँ २॥ऽ
२२८	१७	भागान्रे	भागान्तरे
२३२	२९	अर्वन्यज्ञः	अर्वन्न्यज्ञः
२३३	५	युष्मदयुजौ	युष्मदयुजौ
२३३	८	सप्रेष्याणान् तु	सप्प्रेष्याणान् तु
२३३	९	स्फुटमन्न्यत्र	स्फुटमन्न्यत्त्र
२३५	१६	स ंस्थापप्य	सँस्थापप्य
२३५	२९	CSPOIG	CSIPOIG
२३७	२८	सं ख्वग्निर्घ्नन्ति	सङ्ख्वग्निर्घ्नन्ति
२३९	१४	यमा ंस् तत्त्र	यमाँस् तत्त्र
२४३	१७	सङ्गृह्य	सङ्गृह्य्य
२४४	११	ज्सत्वस्स्या	जशत्वस्स्या
२४६	३	प्रावृत्तम्;	प्वृत्तम्;
२४६	२१	अपराहहँणे, अहहँनाङ्	अपराहहँणे, अहहँनाङ्
२४६	२१	ब्रहहँमवादिन	ब्रहहँमवादिन
२४७	१६	प्रप्प्रसिद्धि	परप्प्रसिद्धि
२४८	७	नासिक्क्याम्"	नासिक्क्यम्"
२६२	२६	(चेत्त्यते तत्त्र)	(चेत्त्येते तत्त्र)

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
२६५	११	प्रयेणोच्चार्येते	प्रायेणोच्चार्येते
२६५	१७	"जयोर् ज्ञः"	"जञोर् ज्ञः"
२७५	११	"अयक्क्ष्मा"	"अयक्ष्मा"
२७६	१	'अयक्क्ष्मा'	'अयक्ष्मा'
२७७	४	स७स्रष्ट्टा	स७स्रष्ट्टा
२८५	२२	वर्णा खलु	वर्णाः खलु
२८६	८	अकारादय ओकारान्ता	अकारादय औकारान्ता
२९२	९	दृश्श्यते[३]	दृश्श्यते[२]
२९२	१६	श्श्रूयन्ते'[३]	श्श्रूयन्ते"[४]
२९४	१७	स्वरव्यजनयोस्	स्वरव्यञ्जनयोस्
२९९	२९	य.वे. २५-४०	य.वे. २५।४०
३०१	१५	सयँयोगादित	सयँयोगादिः
३०२	७	द्विर्भाव ऽहेतुतत्वमिति	द्विर्भावाऽहेतुतत्वमिति
३०९	२४	य ज्ञवल्क्यशिक्क्षा	याज्ञवल्क्यशिक्क्षा
३११	१५	तथा ॥१३४॥	तथा ॥१३३॥
३११	१७	परिशेषिणाम् ॥१३५॥	परिशेषिणाम् ॥१३४॥
३१२	२४	प्रतिभाति ॥३३४-३३५॥	प्रतिभाति ॥३३३-३३४॥
३१५	२३	स्मृतन् ॥४॥	स्मृतम् ॥४॥
३१७	१४	िग्ग्रहमूलक	निग्ग्रहमूलक
३१८	१८	"उच्चै चैरुच्चार्यते	"उच्चैरुच्चार्यते
३२४	७	पतञ्जलीन ञ् च	पतञ्जलीनाञ् च
३२४	२४	तन् र्त्योः	तन्त्र्योः
३५२	१८	क्व१ वोश्श्वा	क्व१ वोश्श्वा
३६८	१५	प्रव र्षेण	प्रकर्षेण
३६९	११	आक्ख्यातपरो	आक्ख्यातपरो
३७१	१५	षड्ज्जर्षभगागान्धारं	षड्ज्जर्षभगान्धार
३७२	२५	धारानुदात्त	धारावनुदात्त
३८०	३२	ना.शा. १८।१०९।	ना.शा. १७।१०२।
३९९	१७	प्प्रयोश् शबरे-	प्प्रयोगश् शबरे-
४०९	३	वामाया ब्भुव	वामाया ब्भुव
४०९	९	दृट्वा जात्त्य-	दृष्ट्वा जात्त्य-
४१०	१४	दक्क्थिणेऽधष्	दक्क्षिणेऽधष्
४१३	१५	िहन्नेऽव्व्यवहिते	चिह्नेऽव्व्यवहिते
४१६	५	व्यबस्था	व्यवस्था

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
४२४	३१	भूमिकायाम्	प्राक्कथने
४२९	१०	कर्णयो ॥१६४॥	कर्णयोः ॥१६४॥
४३४	४	प्रयुज्ज्यन्ने	प्रयुज्ज्यन्ते
४३४	१४	वरणयितुन् न हि॥	वर्णयितुन् न हि॥
४३४	१६	वर्ण्यते॥१९४	वर्ण्यते॥१९४॥
४३४	२७	परञ् च यत्॥१९४॥	परञ् च यत्॥१९५॥
४४०	९	क-युक् त्र्यङकस् तु	क-युक् त्र्यङ्कस् तु
४५०	८	र ह्रस्स्वादि-	न ह्रस्स्वादि-
४५६	२३	सुजातेँ	सुजाते
४५६	२३	अद्ध्वर्य्योँ	अद्ध्वर्य्यो
४५६	२४	तेँ एँन्न्यद्,	ते एँन्न्यद्,
४५६	२४	तेँ एँन्न्यद् इति।	ते एँन्न्यद् इति।
४५८	५	प्लुतिरेकारस् स्य	प्लुतिरेकारस्स्य
४६१	१	प्र ोज्ज्यस्स्य	प्रयोज्ज्यस्स्य
४६१	३	म स्स्थातुं	मास्स्थातुं
४६३	२९	ऽप्प्यर्धमात्रकः।	ऽप्प्यर्धमात्त्रकः।
४६५	१२	तथा	यथा
४८४	८	"ऋटुर् कम्"	"ऋषटुर् कम्"
४८४	१२	रेफभागस्त्य	रेफभागस्स्य
४८४	३२	तत्रैव	तत्त्रैव
४८६	१	द्विस्स्थानकत्त्व	द्विस्स्थानकत्त्वं
४८७	२२	औकारस्स्याऽपि	ओकारस्स्याऽपि
४९८	३	वर्ण स्स्योच्चारणे	वर्णस्स्योच्चारणे
५०४	१०	व्यहितस्स्वर	व्यवहितस्स्वर
५१०	२५	रेफस्स्यदन्तमू लानि	रेफस्स्य दन्तमूलानि
५१७	२८	चिदिष् यते॥६६॥	चिदिष्ष्यते॥६६॥
५१७	३०	तान्तरीयकौ॥६७॥	नान्तरीयकौ॥६७॥
५२४	२९	वा.मा.शु.य.सं.,	मा.वा.शु.य.सं.,
५२७	शीर्षलेखे	वर्णविशेषस्स्वरयन्त्रज-प्रयत्नविरूपणम्	वर्णविशेषाब्भ्यन्तर-प्प्रयत्नानिरूपणम्
५३५	१०	शिक्क्षायामप्प्येमेव	शिक्क्षायामप्प्येवमेव
५४६	१५	इति कत्थ्यते॥१४२॥	इति कत्थ्यते॥१४३॥
५४८	१	सम्भवत्प्येष दोष इति	सम्भवत्त्येष दोष इति
५४८	२०	क्क्ष्वेडनमूष्माणान्	क्क्ष्वेडनमूष्मणान्

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
५५३	२६	नित्त्यम् मर्गहस्ते	नित्त्यम् मार्गहस्ते
५५६	२	सङ्कितेनेव	शङ्कितेनेव
५६०	२३	दृश्यते॥११-१३॥	दृश्यन्ते॥११-१३॥
५६१	२१	वग्यतः प्रात-	वाग्यतः प्रात-
५६७	१५	सिरस्स्थानगतस्	शिरस्स्थानगतस्
५७०	१८	कानि चिच् च स्वात्तर	कानि चिच् च स्वोत्तरं
५८१	३२	१. सू. १३२-१५२।	१. सू. १२७-१४७।
५९१	२१	खल्विमे ाविकर्षन्	खल्विमे अविकर्षन्
५९८	१०	इन्द्राबृहस्पतिस् स्वश् च	इन्द्राबृहस्पती स्स्वश् च
५९९	६	व र्म, स्व हा, व रि, म धु, ब हू	कर्म, स्वाहा, वारि, मधु, बाहू
६००	४	ञुङाव,	ञुङुवे,
६०५	२८	'षदेवर्त्तवः',	'षडेवर्त्तवः',
६०६	१६	शोतार्त्तः,	शीतार्त्तः,
६०९	६	प्रोक्तम्॥२९-३०॥	प्रोक्तम्॥३०-३१॥
६०९	९	एर् भवेत्॥३१॥	एर् भवेत्॥३२॥
६०९	११	औरपि॥३२॥	औरपि॥३३॥
६०९-६२०		॥३३॥—॥४३॥	॥३४॥—४४॥
६११-६२३		॥३१-३४॥—॥४३॥	॥३२-३५॥—॥४४॥
६२३	१६	क्क्व चित्॥४४॥	क्क्व चित्॥४५॥
६३१	१२	पूर्वोक्तान्न्येव॥४८॥	पूर्वोक्तान्न्येव॥४९॥
६३१	१४	शौनकादयः॥४९॥	शौनकादयः॥५०॥
६३२	२	प्रगह्य्यपदानि	प्रगृह्य्यपदानि
६३६	७	मयः'	मयः
६३६	१३	स्वपूर्ववर्स्तिस्पर्श	स्वपूर्ववर्तिस्स्पर्श
६३८	५	कौनकीय-चतु	शौनकीय-चतु
६४०	१०	पदपाठदिके क्व चित्॥५६॥	पदपाठादिके क्व चित्॥५६॥
६४०	११	पोकार	ओकार
६५८	१७	माद्ध्यदिनीयादि	माद्ध्यन्दिनीयादि
६६३	१४	यच्छ दशस्य	यच्छ दशस्स्य
६६४	२३	नश्शब्दे गुर वपि॥८०॥	नश्शब्दे गुरावपि॥८०॥
६६५	शीर्षलेखे	प्रकृतिभावसन्धिनिरूपणम्	स्वरव्यञ्जनसंहितानिरूपणम्
६६८	११	स्थितेन व्यञ्जनेन	स्थितेनाऽव्यञ्जनेन
६६९	५	इत्त्यस् स्तोभस्स्य	इत्त्यस्स्य स्तोभस्स्य
६७०	२८	मा.वा.शु.य.वे.म. ब्र.य.स.	मा.वा.शु.य.वे.म. ब्र.य.स.

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
६७२	२३	शूरिव	शूँरिव
६७८	६	व्यार् लघुप्रयत्नतरश्	व्योर् लघुप्रयत्नतरश्
६८३	७	माद्ध्यदिनीयादि	माद्ध्यन्दिनीयादि
६९२	९	एव॥११७॥	एव॥११८॥
६९२	११	पाह्य्यसुरादिके॥११८॥	पाह्य्यसुरादिके॥११९॥
६९२	१८	सुधीभिः॥११८॥	सुधीभिः॥११९॥
६९२	२०	यू च तौ॥११९॥	यू च तौ॥१२०॥
६९३	४	मन्तव्व्यमेव॥११९॥	मन्तव्व्यमेव॥१२०॥
६९३–७३५		॥१२०॥—॥२३०॥	॥१२१॥—॥२३१॥
६९३–७३६		॥१२०॥—॥२२९–२३०॥	॥१२१॥—॥२३०–२३१॥
६९९	८	अवग्ग्रहनि-	अवग्ग्रहवि-
७०३	२८	तद्तैव	तत्तैव
७०७	शीर्षलेखे	व्यञ्जनस्वरसंहिता	व्यञ्जनसंहिता
७१४	२	वण् षण्डे	वण् षण्डे
७१७	२५	त्रिशुब्भ	त्रिशुब्भ
७३५	५	त्वमयक्क्षमया	त्वमयक्ष्मया
७३६	१८	द्द्विरुच्च्यते॥२३१॥	द्द्विरुच्च्यते॥२३२॥
७३६	२०	प्रथमागमः॥२३२॥	प्रथमागमः॥२३३॥
७३६	२२	एव च॥२३३॥	एव च॥२३४॥
७४०	२०	विज्ज्ञायते[७]॥२३६॥	विज्ज्ञायते[७]॥२३७॥
७४४	१२	क्रमप्प्रतिषेधः'[९]	क्रमप्प्रतिषेधः"[९]
७४५	८	इति, बर्हिरङ्ङ्क्ताम्	इति, "बर्हिरङ्ङ्क्ताम्
७४६	२७	सूत्त्रान्तरारम्मेण	सूत्त्रान्तरारम्भेण
७५४	३२	CSPOIG	CSIPOIG
७६३	२३	नाऽतिविस्तरात्" इति	नाऽतिविस्तरम्" इति
७६८	१९	विप्प्रतत्व लाभाय	विप्प्रतत्वलाभाय
७७४	१३	घृतैर्बोधयतातिथिम्।	घृतैर्ब् बोधयतातिथिम्।
७७४	२४	घृतैर्दुवस्स्यता	घृतैर्द् दुवस्स्यता
७७४	२६	घृतैर्बोधयत।	घृतैर्ब् बोधयत।
७७५	१२	मधु नक्तमुतोषसो	मधु नक्क्तमुतोषसो
७८२	१५	सस्सस्वतती	सरस्स्वती
८५६	२६	माद्ध्यदिनीय-।	माद्ध्यन्दिनीय-।

दर्ता नम्बर
१४०५५

अस्माकम् प्रकाशिताः प्रकाशनीयाश्च केचन ग्रन्थाः

(नैपालीयभाषायाम्)

१. आदिकवि भानुभक्त आचार्यको सच्चा जीवनचरित्र (२०३६) नै. रू. ५०/-
२. वृत्तनक्षत्रमाला (छन्दोग्रन्थः, २०२८) नै. रू. १/-
३. जिम्दो नेपालि भाषा (भाषाव्याकरणसिद्धान्तग्रन्थः, प्र.ख. २०३०) नै. रू. ३/१०
४. जिम्दो नेपालि भाषा (द्वितीयखण्डात्मकः, २०३७) नै. रू. १०/-
५. नेपाली वर्णोच्चारणशिक्षा (साझाप्रकाशनेन प्रकाशिता, २०३१) नै. रू, ११/१५
६. वैदिक धर्म मूल रूपमा (२०४५) नै. रू. १००/-

(संस्कृतभाषायाम्)

७. काव्यप्रकाशः हैमवत्त्या संस्कृतव्याख्यया सहितः,
मोतीलाल-बनारसीदास-प्रकाशितः, वाराणस्याम् (१९८०) भा रू. ८०/-
८. कतिपय-नैपाल-संस्कृतग्रन्थकारपरिचयः (२०४८) नै. रू. ४०/-, भा. रू. २५/-
९. चतुर्वर्गसुभाषितपीयूषपिन्वनकम् ।
१०. नारायणपण्डितकृतो हितोपदेशः आचार्यकौण्डिन्न्यायनप्रतिसंस्कृतः ।
११. माद्ध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदाद्ध्यायि-निरग्निक-नित्यकर्म-
संस्कारकर्म-श्राद्धकर्मादिमन्त्रसङ्ग्रहः ।
१२. माद्ध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदाद्ध्यायि-निरग्निक-नित्यकर्म-
संस्कारकर्मश्राद्धकर्मादिपद्धतयः ।
१३. माद्ध्यन्दिनीयवाजसनेयिशुक्लयजुर्वेदाद्ध्यायिनां स्वशाखीय-मन्त्र-ब्राह्मण-
श्रौतसूत्र-गृह्यसूत्रपरिशिष्टादिसङ्ग्रहरूपः स्वाद्ध्यायसङ्ग्रहःसटिप्पणः ।
१४. कौण्डिन्न्यायनशिक्षा [प्रातिशाख्यादिसर्वसंस्कृतशिक्षाग्रन्थसमीक्षागर्भा महाशिक्षा
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयेन वाचस्पतिः (डि. लिट्.)
इत्युपाधये स्वीकृता, २०४९] नै. रू. ६६०/- भा. रू. ४००/-
१५. कात्त्यायनश्रौतसूत्रम् सपरिशिष्टम् अनेकव्याख्यानयुतम् ।
१६. पारस्करगृह्यसूत्रम् सपरिशिष्टम् अनेकव्याख्यानयुतम् ।
१७. पाणिनीयव्याकरणम् आचार्यकौण्डिन्न्यायनपरिष्कृतम्, वेदपरक-व्याख्यानयुतम् ।
१८. वेदभाषानिघण्टुः (कौण्डिन्न्यायनकोषः) वैदिक-लौकिक-संस्कृतशब्दानां
सङ्ग्रहेण अमरकोषशैल्याम् आचार्यकौण्डिन्न्यायनेन रचितः ।
१९. वेदभाषानिघण्टुः (कौण्डिन्न्यायनकोषः) भूलोककाण्डान्तर्गतदेववर्गब्रह्मवर्गात्मकम्
सप्रस्ताविकश् शब्दानुक्रमणिकासहितः (२०५०) नै.रू.४०/- भा.रू.२५/-
२०. छन्दस्सूत्रम् ब्राह्मणादिग्रन्थप्रतिपादितच्छन्दस्तत्त्वप्रकाशनव्याख्यानयुतम् ।
२१. वेदाङ्गज्योतिषम् लगधकृतम्, वैदिकव्याख्यानयुतम् ।
२२. जैमिनीय-धर्ममीमांसासूत्रम् कौण्डिन्न्यायनवृत्तियुतम् ।
२३. बादरायणीय-ब्रह्ममीमांसासूत्रम् कौण्डिन्न्यायनवृत्तियुतम् ।
२४. माद्ध्यन्दिनीयवाजसनेय्यौपनिषदोपासनादिकर्मप्रयोगकल्पः
आचार्यकौण्डिन्न्यायन-विरचितः ।
२५. काशिनिवासिभिर् विद्वद्भिर् ब्राह्मणैर् दत्ता भारतवर्षबहिर्गमन-विदेशनिवासिदेशि-
सहवाससहभोजना दिदुरित-प्रायश्चित्तव्यवस्था (२०४९);
नै रू. ४०/- भा. रू. २५/-